THE

MAHĀBHĀRATA

TEXT AS CONSTITUTED IN ITS CRITICAL EDITION

VOLUME III

KARṆA-, ŚALYA-, SAUPTIKA-, STRĪ-, AND ŚĀNTI-PARVANS

तेजस्विनावधीतमस्तु

PUBLISHED BY

THE BHANDARKAR ORIENTAL RESEARCH INSTITUTE

POONA

1974

All rights reserved

Printed by Dr. R. N. Dandekar, at the Bhandarkar Institute Press, Poona 4

and

Published by Dr. R. N. Dandekar, Hon. Secretary, Bhandarkar Oriental Research Institute,

Poona 4 (India).

चिकित्सितपाठात्मिका

महाभारत-संहिता

तृतीयः खण्डः

कर्ण - शल्य - सौप्तिक - स्त्री - शान्ति - पर्वाणि

भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरेण

प्रकाशिता

पुण्यपत्तनम्

शकाब्दाः १८९६

अनुक्रमणिका

८ कर्णपर्व अध्यायाः १–६९	pp. 1641–1803
७१ कर्णवधपर्व १–६९	1641–1803
धृतराष्ट्रसंजयसंवादः १–२	1641–1643
धृतराष्ट्रशोकः ३	1643–1644
संजयवचनम् ४	1644–1648
धृतराष्ट्रजल्पनम् ५	1648–1652
कर्णाभिषेकः ६	1652–1654
षोडशायुद्धदिवसः ७–२१	1654–1684
सप्तदशायुद्धदिवसः २२–६७	1684–1797
शल्यसारथ्याभ्युपगमः २३	1686–1688
त्रिपुरवधोपाख्यानम् २४	1688–1694
मद्रककुत्सनम् २७	1699–1702
हंसकाकीयोपाख्यानम् २८	1702–1705
बाह्लीकमद्रककुत्सनम् ३०	1707–1710
युधिष्ठिरस्य अर्जुनं प्रति परुषवाक्यम् । अर्जुनस्य कोपः ।	
कृष्णेन उभयोः कृतं सान्त्वनम् ४६–५०	1746–1756
दुःशासनवधः ६०–६१	1775–1789
कर्णार्जुनयुद्धम् ६३–६६	1783–1794
कर्णवधः ६७	1795–1797
रणभूमिवर्णनम् ६८	1797–1801
युधिष्ठिरानन्दः ६९	1801–1803
९ शल्यपर्व अध्यायाः १–६४	pp. 1804–1930
७२ शल्यवधपर्व १–१६	1804–1836
७३ ह्रदप्रवेशपर्व १७–२८	1836–1861
७४ तीर्थयात्रापर्व २९–५३	1862–1909
त्रितोपाख्यानम् ३५	1875–1876
स्कन्दाभिषेकः ४३–४५	1888–1897
श्रुतावत्युपाख्यानम् ४७	1898–1901
जैगीषव्योपाख्यानम् ४९	1901–1904
वृद्धकन्योपाख्यानम् ५१	1906–1907
७५ गदायुद्धपर्व ५४–६४	1909–1930
दुर्योधनोरुभङ्गः ५७	1915–1917
बलदेववासुदेवसंवादः ५९	1918–1920
द्रौणिसैनापत्याभिषेकः ६४	1928–1930

१० सौप्तिकपर्व अध्यायाः १–१८ pp. 1931–1959

७८ सौप्तिकपर्व १–९ 1931–1949

कौशिकदर्शनम् १ 1931–1933

शिवस्तुतिः ७ 1939–1942

७९ ऐषीकपर्व १०–१८ 1949–1959

द्रौपदीपरिदेवितम् ११ 1951–1952

ऐषीकोत्सर्गः १३–१५ 1953–1956

द्रौपदीप्रसादः १६ 1956–1958

रुद्रमाहात्म्यम् १७–१८ 1958–1959

११ स्त्रीपर्व अध्यायाः १–२७ pp. 1960–1987

८० विशोकपर्व १–८ 1960–1967

८१ स्त्रीपर्व ९–२५ 1967–1985

अयोभीमभञ्जनम् ११ 1969–1970

उत्तराविलापः २० 1978–1979

८२ श्राद्धपर्व २६ 1985–1986

८३ जलप्रदानिकपर्व २७ 1987

१२ शान्तिपर्व अध्यायाः १–३५३ pp. 1988–2491

८४ राजधर्मपर्व १–१२८ 1988–2160

ऋषिशकुनिसंवादः ११ 1998–1999

जनकोपाख्यानम् १८ 2007–2008

देवस्थानवाक्यम् २०–२१ 2009–2010

शङ्खलिखितोपाख्यानम् २४ 2012–2013

हयग्रीवोपाख्यानम् २५ 2013–2014

सेनजिद्-वाक्यम् २६ 2014–2016

अश्मजनकसंवादः २८ 2017–2019

षोडशराजकीयोपाख्यानम् २९ 2019–2024

सुवर्णष्ठीव्युपाख्यानम् ३१ 2026–2028

चार्वाकचरितकथनम् ३९ 2037–2038

कृष्णनामशतस्तुतिः ४३ 2040–2041

भीष्मस्तवराजः ४७ 2044–2046

जामदग्न्योपाख्यानम् ४९ 2047–2050

इन्द्रमान्धातृसंवादः ६४–६५ 2071–2075

मनुराजकरणोपन्यासः ६७ 2076–2077

बृहस्पतिकौसल्यसंवादः ६८ 2077–2080

पुरूरवःपवनसंवादः ७३ 2085–2086

ऐलकश्यपसंवादः ७४	2086–2088
मुचुकुन्दोपाख्यानम् ७५	2088–2089
केकयराजराक्षससंवादः ७८	2091–2092
वासुदेवनारदसंवादः ८२	2096–2097
कालकवृक्षीयोपाख्यानम् ८३	2097–2100
शक्रबृहस्पतिसंवादः ८५	2102
उतथ्यगीता ९१–९२	2108–2112
वामदेवगीता ९३–९५	2112–2114
इन्द्राम्बरीषसंवादः ९९	2117–2119
इन्द्रबृहस्पतिसंवादः १०४	2124–2126
कालकवृक्षीयम् १०५–१०७	2126–2130
व्याघ्रगोमायुसंवादः ११२	2134–2137
उष्ट्रशिरोग्रीवकथनम् ११३	2137–2138
सरित्सागरसंवादः ११४	2138–2139
श्वर्षिसंवादः ११७–११९	2141–2144
वसुहोममान्धातृसंवादः १२२	2149–2151
कामन्दाङ्गारिष्ठसंवादः १२३	2151
ऋषभसुमित्रसंवादः १२५–१२६	2454–2157
यमगौतमसंवादः १२७	2157–2158
८५ आपद्धर्मपर्व १२९–१६७	2160–2219
कापव्यानुशासनम् १३३	2163
शकुलाख्यानम् १३५	2164–2165
मार्जारमूषकसंवादः १३६	2165–2172
ब्रह्मदत्तपूजनीसंवादः १३७	2172–2176
कणिङ्कशत्रुंतपसंवादः १३८	2176–2178
विश्वामित्रश्वपचसंवादः १३९	2179–2183
कपोतलुब्धकसंवादः १४१–१४५	2184–2188
इन्द्रोतशौनकपारिक्षितीयम् १४६–१४८	2188–2191
गृध्रजम्बुकसंवादः १४९	2191–2196
शल्मलिपवनसंवादः १५०–१५१	2196–2198
खड्गोत्पत्तिः १६०	2207–2210
कृतघ्नगौतमोपाख्यानम् १६२–१६७	2212–2219
८६ मोक्षधर्मपर्व १६८–३५३	2219–2491
सेनजित्पिङ्गलागीते १६८	2219–2221
पितापुत्रसंवादः १६९	2221–2223
शम्पाकगीता १७०	2223–2224
मङ्किगीता १७१	2224–2226
प्रह्लादाजगरसंवादः १७२	2226–2227
कश्यपसृगालसंवादः १७३	2228–2229

भृगुभरद्वाजसंवादः १७५–१८५	2230–2241
अध्यात्मकथनम् १८७	2243–2245
ध्यानयोगः १८८	2245–2246
जापकोपाख्यानम् १८९–१९३	2246–2254
मनुबृहस्पतिसंवादः १९४–१९९	2254–2260
केशवमाहात्म्यम् २००	2261–2263
दिक्पालककीर्तनम् २०१	2263–2264
विष्णोः वराहरूपम् २०२	2264–2265
गुरुशिष्यसंवादः (वार्ष्णेयाध्यात्मम्) २०३–२१०	2265–2274
जनकपञ्चशिखसंवादः २११–२१२	2274–2278
इन्द्रप्रह्लादसंवादः २१५	2279–2280
बलिवासवसंवादः २१६–२१८	2281–2285
शक्रनमुचिसंवादः २१९	2286–2287
बलिवासवसंवादः २२०	2287–2291
श्रीवासवसंवादः २२१	2291–2294
जैगीषव्यासितसंवादः २२२	2294–2295
वासुदेवोग्रसेनसंवादः २२३	2295–2296
शुकानुप्रश्नः २२४–२४७	2296–2321
(अविकम्पकनारदसंवादे) मृत्यूत्पत्तिः २४८–२५०	2321–2324
तुलाधारजाजलिसंवादः २५३–२५६	2326–2332
विचख्नुगीता २५७	2332–2333
चिरकारिकोपाख्यानम् २५८	2333–2336
सत्यवद्-द्युमत्सेनसंवादः २५९	2336–2337
कपिलगोसंवादः २६०–२६२	2337–2343
कुण्डधारोपाख्यानम् २६३	2343–2345
उञ्छवृत्तेः पुरावृत्तम् २६४	2345–2346
नारददेवलसंवादः २६७	2347–2349
माण्डव्यजनकसंवादः २६८	2349
हारीतगीता २६९	2349–2359
वृत्रगीता २७०–२७१	2350–2355
वृत्रवधः २७२–२७३	2355–2359
ज्वरोत्पत्तिः २७४	2359–2361
नारदसमङ्गसंवादः २७५	2362–2363
नारदगालवसंवादः २७६	2363–2365
अरिष्टनेमिसगरसंवादः २७७	2365–2366
काव्योपाख्यानम् २७८	2366–2368
पराशरगीता २७९–२८७	2368–2379
हंससाध्यसंवादः २८८	2379–2382
योगकथनम् २८९	2382–2384
सांख्यवर्णनम् २९०	2384–2388

वसिष्ठकरालजनकसंवादः २९१-२९६	2388-2399
भृगुजनकसंवादः २९७	2399-2400
याज्ञवल्क्यजनकसंवादः २९८-३०६	2400-2411
पञ्चशिखजनकसंवादः ३०७	2411-2412
सुलभाजनकसंवादः ३०८	2412-2418
पावकाध्यायः (द्वैपायनशुकसंवादः) ३०९	2418-2422
शुकचरितम् ३१०-३२०	2422-2439
नरनारायणीयम् ३२१-३३९	2439-2483
महापुरुषस्तवः ३२५	2447-2448
भगवन्नामनिर्वचनम् ३२८	2457-2459
ब्राह्मणमाहात्म्यमग्नीषोमीयात्मकम् ३२९	2459-2464
भगवन्नामनिर्वचनम् ३३०	2464-2467
उञ्छवृत्त्युपाख्यानम् ३४०-३५३	2483-2491

CORRIGENDA

	read	*for*
9. 1. 52^{d}	च	इ
9. 2. 35^{a}	अलम्बुसम्	अलंबुसम्
9. 6. 23^{a}	एतज्ज्ञात्वा	एतच्छ्रुत्वा
9. 33. 18^{b}	रोमहर्षणः	लोमहर्षणः
9. 55. 13^{b}	रोमहर्षणाः	लोमहर्षणाः
9. 56. 3^{b}	रोमहर्षणम्	लोमहर्षणम्
9. 62. 16^{b}	रोमहर्षणे	लोमहर्षणे
9. 69. 15^{d}	शेते	शेषे
12. 136. 23^{a}	चण्डालः	चाण्डालः
12. 137. 81^{b}	पञ्चमम्	पञ्चकम्
12. 140. 25^{c}	तस्मादतीक्ष्णभूतानां	तस्मादभीक्ष्णभूतानां

तृतीयः खण्डः

८

कर्णपर्व

१

वैशंपायन उवाच ।

ततो द्रोणे हते राजन्दुर्योधनमुखा नृपाः ।
भृशमुद्विग्नमनसो द्रोणपुत्रमुपागमन् ॥ १
ते द्रोणमुपशोचन्तः कश्मलाभिहतौजसः ।
पर्युपासन्त शोकार्तास्ततः शारद्वतीसुतम् ॥ २
मुहूर्तं ते समाश्वास्य हेतुभिः शास्त्रसंमितैः ।
रात्र्यागमे महीपालाः स्वानि वेश्मानि भेजिरे ॥३
विशेषतः सूतपुत्रो राजा चैव सुयोधनः ।
दुःशासनोऽथ शकुनिर्न निद्रामुपलेभिरे ॥ ४
ते वेश्मस्वपि कौरव्य पृथ्वीशा नाप्नुवन्सुखम् ।
चिन्तयन्तः क्षयं तीव्रं निद्रां नैवोपलेभिरे ॥ ५
सहितास्ते निशायां तु दुर्योधननिवेशने ।
अतिप्रचण्डाद्विद्वेषात्पाण्डवानां महात्मनाम् ॥ ६
कृतद्यूतपरिक्लिष्टां कृष्णामानिन्यिरे सभाम् ।
संस्मरन्तोऽन्वतप्यन्त भृशमुद्विग्नचेतसः ॥ ७
चिन्तयन्तश्च पार्थानां तान्क्लेशान्द्यूतकारितान् ।
कृच्छ्रेण क्षणदां राजन्निन्युरब्दशतोपमाम् ॥ ८
ततः प्रभाते विमले स्थिता दिष्टस्य शासने ।
चक्रुरावश्यकं सर्वे विधिदृष्टेन कर्मणा ॥ ९
ते कृत्वावश्यकार्याणि समाश्वस्य च भारत ।
योगमाज्ञापयामासुर्युद्धाय च विनिर्ययुः ॥ १०
कर्णं सेनापतिं कृत्वा कृतकौतुकमङ्गलाः ।
वाचयित्वा द्विजश्रेष्ठान्दधिपात्रघृताक्षतैः ॥ ११
निष्कैर्गोभिर्हिरण्येन वासोभिश्च महाधनैः ।
वर्ध्यमाना जयाशीर्भिः सूतमागधबन्दिभिः ॥ १२
तथैव पाण्डवा राजन्कृतसर्वाह्णिकक्रियाः ।
शिबिरान्निर्ययू राजन्युद्धाय कृतनिश्चयाः ॥ १३
ततः प्रववृते युद्धं तुमुलं रोमहर्षणम् ।
कुरूणां पाण्डवानां च परस्परवधैषिणाम् ॥ १४
तयोर्द्वे दिवसे युद्धं कुरुपाण्डवसेनयोः ।
कर्णे सेनापतौ राजन्नभूदद्भुतदर्शनम् ॥ १५
ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे वृषः ।
पश्यतां धार्तराष्ट्राणां फल्गुनेन निपातितः ॥ १६
ततस्तत्संजयः सर्वं गत्वा नागाह्वयं पुरम् ।
आचख्यौ धृतराष्ट्राय यद्वृत्तं कुरुजाङ्गले ॥ १७

जनमेजय उवाच ।

आपगेयं हतं श्रुत्वा द्रोणं च समरे परैः ।
यो जगाम परामार्तिं वृद्धो राजाम्बिकासुतः ॥ १८
स श्रुत्वा निहतं कर्णं दुर्योधनहितैषिणम् ।
कथं द्विजवर प्राणानधारयत दुःखितः ॥ १९
यस्मिञ्जयाशां पुत्राणाममन्यत स पार्थिवः ।
तस्मिन्हते स कौरव्यः कथं प्राणानधारयत् ॥ २०
दुर्मरं बत मन्येऽहं नृणां कृच्छ्रेऽपि वर्तताम् ।
यत्र कर्णं हतं श्रुत्वा नात्यजज्जीवितं नृपः ॥ २१
तथा शांतनवं वृद्धं ब्रह्मन्बाह्लिकमेव च ।
द्रोणं च सोमदत्तं च भूरिश्रवसमेव च ॥ २२
तथैव चान्यान्सुहृदः पुत्रपौत्रांश्च पातितान् ।

श्रुत्वा यन्नाजहात्प्राणांस्तन्मन्ये दुष्करं द्विज ॥ २३
एतन्मे सर्वमाचक्ष्व विस्तरेण तपोधन ।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ २४

वैशंपायन उवाच ।

हते कर्णे महाराज निशि गावल्गणिस्तदा ।
दीनो ययौ नागपुरमश्वैर्वातसमैर्जवे ॥ २५
स हास्तिनपुरं गत्वा भृशमुद्विग्नमानसः ।
जगाम धृतराष्ट्रस्य क्षयं प्रक्षीणबान्धवम् ॥ २६
स समुद्वीक्ष्य राजानं कश्मलाभिहतौजसम् ।
ववन्दे प्राञ्जलिर्भूत्वा मूर्ध्ना पादौ नृपस्य ह ॥ २७
संपूज्य च यथान्यायं धृतराष्ट्रं महीपतिम् ।
हा कष्टमिति चोक्त्वा स ततो वचनमाददे ॥ २८
संजयोऽहं क्षितिपते कच्चिदास्ते सुखं भवान् ।
स्वदोषेणापदं प्राप्य कच्चिन्नाद्य विमुह्यसि ॥ २९
हितान्युक्तानि विदुरद्रोणगाङ्गेयकेशवैः ।
अगृहीतान्यनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥ ३०
रामनारदकण्वैश्च हितमुक्तं सभातले ।
नगृहीतमनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥ ३१
सुहृदस्त्वद्धिते युक्तान्भीष्मद्रोणमुखान्परैः ।
निहतान्युधि संस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥३२
तमेवंवादिनं राजा सूतपुत्रं कृताञ्जलिम् ।
सुदीर्घमभिनिःश्वस्य दुःखार्त इदमब्रवीत् ॥ ३३
गाङ्गेये निहते शूरे दिव्यास्त्रवति संजय ।
द्रोणे च परमेष्वासे भृशं मे व्यथितं मनः ॥ ३४
यो रथानां सहस्राणि दंशितानां दशैव हि ।
अहन्यहनि तेजस्वी निजघ्ने वसुसंभवः ॥ ३५
स हतो यज्ञसेनस्य पुत्रेणेह शिखण्डिना ।
पाण्डवेयाभिगुप्तेन भृशं मे व्यथितं मनः ॥ ३६
भार्गवः प्रददौ यस्मै परमास्त्रं महात्मने ।
साक्षाद्रामेण यो बाल्ये धनुर्वेद उपाकृतः ॥ ३७
यस्य प्रसादात्कौन्तेया राजपुत्रा महाबलाः ।
महारथत्वं संप्राप्तास्तथान्ये वसुधाधिपाः ॥ ३८
तं द्रोणं निहतं श्रुत्वा धृष्टद्युम्नेन संयुगे ।
सत्यसंधं महेष्वासं भृशं मे व्यथितं मनः ॥ ३९
त्रैलोक्ये यस्य शास्त्रेषु न पुमान्विद्यते समः ।
तं द्रोणं निहतं श्रुत्वा किमकुर्वत मामकाः ॥ ४०
संशप्तकानां च बले पाण्डवेन महात्मना ।
धनंजयेन विक्रम्य गमिते यमसादनम् ॥ ४१
नारायणास्त्रे निहते द्रोणपुत्रस्य धीमतः ।
हतशेषेष्वनीकेषु किमकुर्वत मामकाः ॥ ४२
विप्रद्रुतानहं मन्ये निमग्नः शोकसागरे ।
प्लवमानान्हते द्रोणे सन्ननौकानिवार्णवे ॥ ४३
दुर्योधनस्य कर्णस्य भोजस्य कृतवर्मणः ।
मद्रराजस्य शल्यस्य द्रौणेश्चैव कृपस्य च ॥ ४४
मत्पुत्रशेषस्य तथा तथान्येषां च संजय ।
विप्रकीर्णेष्वनीकेषु मुखवर्णोऽभवत्कथम् ॥ ४५
एतत्सर्वं यथा वृत्तं तत्त्वं गावल्गणे रणे ।
आचक्ष्व पाण्डवेयानां मामकानां च सर्वशः ॥४६

संजय उवाच ।

पाण्डवेयैर्हि यद्वृत्तं कौरवेयेषु मारिष ।
तच्छ्रुत्वा मा व्यथां कार्षीर्दिष्टे न व्यथते मनः॥४७
यस्मादभावी भावी वा भवेदर्थो नरं प्रति ।
अप्राप्तौ तस्य वा प्राप्तौ न कश्चिद्व्यथते बुधः॥४८

धृतराष्ट्र उवाच ।

न व्यथा शृण्वतः काचिद्विद्यते मम संजय ।
दिष्टमेतत्पुरा मन्ये कथयस्व यथेच्छकम् ॥ ४९

इति श्रीमहाभारते कर्णपर्वणि प्रथमोऽध्यायः ॥१॥

२

संजय उवाच ।

हते द्रोणे महेष्वासे तव पुत्रा महारथाः ।

बभूवुराश्वस्तमुखा विषण्णा गतचेतसः ॥ १
अवाङ्मुखाः शस्त्रभृतः सर्व एव विशां पते ।
अप्रेक्षमाणाः शोकार्ता नाभ्यभाषन्परस्परम् ॥ २
तान्दृष्ट्वा व्यथिताकारान्सैन्यानि तव भारत ।
ऊर्ध्वमेवाभ्यवेक्षन्त दुःखत्रस्तान्यनेकशः ॥ ३
शस्त्राण्येषां च राजेन्द्र शोणिताक्तान्यशेषतः ।
प्राभ्रश्यन्त कराग्रेभ्यो दृष्ट्वा द्रोणं निपातितम् ॥ ४
तानि बद्धान्यनिष्टानि लम्बमानानि भारत ।
अदृश्यन्त महाराज नक्षत्राणि यथा दिवि ॥ ५
तथार्तं स्तिमितं दृष्ट्वा गतसत्त्वमिव स्थितम् ।
स्वं बलं तन्महाराज राजा दुर्योधनोऽब्रवीत् ॥ ६
भवतां बाहुवीर्यं हि समाश्रित्य मया युधि ।
पाण्डवेयाः समाहूता युद्धं चेदं प्रवर्तितम् ॥ ७
तदिदं निहते द्रोणे विषण्णमिव लक्ष्यते ।
युध्यमानाश्च समरे योधा वध्यन्ति सर्वतः ॥ ८
जयो वापि वधो वापि युध्यमानस्य संयुगे ।
भवेत्किमत्र चित्रं वै युध्यध्वं सर्वतोमुखाः ॥ ९
पश्यध्वं च महात्मानं कर्णं वैकर्तनं युधि ।
प्रचरन्तं महेष्वासं दिव्यैरस्त्रैर्महाबलम् ॥ १०
यस्य वै युधि संत्रासात्कुन्तीपुत्रो धनंजयः ।
निवर्तते सदामर्षात्सिंहात्क्षुद्रमृगो यथा ॥ ११
येन नागायुतप्राणो भीमसेनो महाबलः ।
मानुषेणैव युद्धेन तामवस्थां प्रवेशितः ॥ १२
येन दिव्यास्त्रविच्छूरो मायावी स घटोत्कचः ।
अमोघया रणे शक्त्या निहतो भैरवं नदन् ॥ १३
तस्य दुष्पारवीर्यस्य सत्यसंधस्य धीमतः ।
बाह्वोर्द्रविणमक्षय्यमद्य द्रक्ष्यथ संयुगे ॥ १४
द्रोणपुत्रस्य विक्रान्तं राधेयस्यैव चोभयोः ।
पाण्डुपाञ्चालसैन्येषु द्रक्ष्यथापि महात्मनोः ॥ १५
सर्व एव भवन्तश्च शूराः प्राज्ञाः कुलोद्गताः ।
शीलवन्तः कृतास्त्राश्च द्रक्ष्यथाद्य परस्परम् ॥ १६
एवमुक्ते महाराज कर्णो वैकर्तनो नृपः ।
सिंहनादं विनद्योच्चैः प्रायुध्यत महाबलः ॥ १७
स सृञ्जयानां सर्वेषां पाञ्चालानां च पश्यताम् ।
केकयानां विदेहानामकरोत्कदनं महत् ॥ १८
तस्येषुधाराः शतशः प्रादुरासञ्शरासनात् ।
अग्रे पुङ्खे च संसक्ता यथा भ्रमरपङ्क्तयः ॥ १९
स पीडयित्वा पाञ्चालान्पाण्डवांश्च तरस्विनः ।
हत्वा सहस्रशो योधानर्जुनेन निपातितः ॥ २०

इति श्रीमहाभारते कर्णपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।
शोकस्यान्तमपश्यन्वै हतं मत्वा सुयोधनम् ।
विह्वलः पतितो भूमौ नष्टचेता इव द्विपः ॥ १
तस्मिन्निपतिते भूमौ विह्वले राजसत्तमे ।
आर्तनादो महानासीत्स्त्रीणां भरतसत्तम ॥ २
स शब्दः पृथिवीं सर्वां पूरयामास सर्वशः ।
शोकार्णवे महाघोरे निमग्ना भरतस्त्रियः ॥ ३
राजानं च समासाद्य गान्धारी भरतर्षभ ।
निःसंज्ञा पतिता भूमौ सर्वाण्यन्तःपुराणि च ॥ ४
ततस्ताः संजयो राजन्समाश्वासयदातुराः ।
मुह्यमानाः सुबहुशो मुञ्चन्त्यो वारि नेत्रजम् ॥ ५
समाश्वस्ताः स्त्रियस्तास्तु वेपमाना मुहुर्मुहुः ।
कदल्य इव वातेन धूयमानाः समन्ततः ॥ ६
राजानं विदुरश्चापि प्रज्ञाचक्षुषमीश्वरम् ।
आश्वासयामास तदा सिञ्चंस्तोयेन कौरवम् ॥ ७
स लब्ध्वा शनकैः संज्ञां ताश्च दृष्ट्वा स्त्रियो नृप ।
उन्मत्त इव राजा स स्थितस्तूष्णीं विशां पते ॥ ८

ततो ध्यात्वा चिरं कालं निःश्वसंश्च पुनः पुनः ।
स्वान्पुत्रान्गर्हयामास बहु मेने च पाण्डवान् ॥ ९
गर्हयित्वात्मनो बुद्धिं शकुनेः सौबलस्य च ।
ध्यात्वा च सुचिरं कालं वेपमानो मुहुर्मुहुः ॥ १०
संस्तभ्य च मनो भूयो राजा धैर्यसमन्वितः ।
पुनर्गावल्गणिं सूतं पर्यपृच्छत संजयम् ॥ ११
यत्त्वया कथितं वाक्यं श्रुतं संजय तन्मया ।
कच्चिद्दुर्योधनः सूत न गतो वै यमक्षयम् ।
ब्रूहि संजय तत्त्वेन पुनरुक्तां कथामिमाम् ॥ १२
एवमुक्तोऽब्रवीत्सूतो राजानं जनमेजय ।
हतो वैकर्तनो राजन्सह पुत्रैर्महारथैः ।
भ्रातृभिश्च महेष्वासैः सूतपुत्रैस्तनुत्यजैः ॥ १३
दुःशासनश्च निहतः पाण्डवेन यशस्विना ।
पीतं च रुधिरं कोपाद्भीमसेनेन संयुगे ॥ १४

इति श्रीमहाभारते कर्णपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

वैशंपायन उवाच ।

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।
अब्रवीत्संजयं सूतं शोकव्याकुलचेतनः ॥ १
दुष्प्रणीतेन मे तात मनसाभिप्लुतात्मनः ।
हतं वैकर्तनं श्रुत्वा शोको मर्माणि कृन्तति ॥ २
कृतास्त्रपरमाः शल्ये दुःखपारं तितीर्षवः ।
कुरूणां सृञ्जयानां च के नु जीवन्ति के मृताः ॥ ३

संजय उवाच ।

हतः शांतनवो राजन्दुराधर्षः प्रतापवान् ।
हत्वा पाण्डवयोधानामर्बुदं दशभिर्दिनैः ॥ ४
ततो द्रोणो महेष्वासः पाञ्चालानां रथव्रजान् ।
निहत्य युधि दुर्धर्षः पश्चाद्रुक्मरथो हतः ॥ ५
हतशिष्टस्य भीष्मेण द्रोणेन च महात्मना ।
अर्धं निहत्य सैन्यस्य कर्णो वैकर्तनो हतः ॥ ६
विविंशतिर्महाराज राजपुत्रो महाबलः ।
आनर्तयोधाञ्शतशो निहत्य निहतो रणे ॥ ७
अथ पुत्रो विकर्णस्ते क्षत्रव्रतमनुस्मरन् ।
क्षीणवाहायुधः शूरः स्थितोऽभिमुखतः परान् ॥ ८
घोररूपान्परिक्लेशान्दुर्योधनकृतान्बहून् ।
प्रतिज्ञां स्मरता चैव भीमसेनेन पातितः ॥ ९
विन्दानुविन्दावावन्त्यौ राजपुत्रौ महाबलौ ।
कृत्वा नसुकरं कर्म गतौ वैवस्वतक्षयम् ॥ १०
सिन्धुराष्ट्रमुखानीह दश राष्ट्राणि यस्य वै ।
वशे तिष्ठन्ति वीरस्य यः स्थितस्तव शासने ॥ ११
अक्षौहिणीर्दशैकां च निर्जित्य निशितैः शरैः ।
अर्जुनेन हतो राजन्महावीर्यो जयद्रथः ॥ १२
तथा दुर्योधनसुतस्तरस्वी युद्धदुर्मदः ।
वर्तमानः पितुः शास्त्रे सौभद्रेण निपातितः ॥ १३
तथा दौःशासनिर्वीरो बाहुशाली रणोत्कटः ।
द्रौपदेयेन विक्रम्य गमितो यमसादनम् ॥ १४
किरातानामधिपतिः सागरानूपवासिनाम् ।
देवराजस्य धर्मात्मा प्रियो बहुमतः सखा ॥ १५
भगदत्तो महीपालः क्षत्रधर्मरतः सदा ।
धनंजयेन विक्रम्य गमितो यमसादनम् ॥ १६
तथा कौरवदायादः सौमदत्तिर्महायशाः ।
हतो भूरिश्रवा राजञ्शूरः सात्यकिना युधि ॥ १७
श्रुतायुरपि चाम्बष्ठः क्षत्रियाणां धनुर्धरः ।
चरन्नभीतवत्संख्ये निहतः सव्यसाचिना ॥ १८
तव पुत्रः सदा संख्ये कृतास्त्रो युद्धदुर्मदः ।
दुःशासनो महाराज भीमसेनेन पातितः ॥ १९
यस्य राजन्गजानीकं बहुसाहस्रमद्भुतम् ।
सुदक्षिणः स संग्रामे निहतः सव्यसाचिना ॥ २०
कोसलानामधिपतिर्हत्वा बहुशतान्परान् ।

सौभद्रेण हि विक्रम्य गमितो यमसादनम् ॥ २१
बहुशो योधयित्वा च भीमसेनं महारथः ।
चित्रसेनस्तव सुतो भीमसेनेन पातितः ॥ २२
मद्रराजात्मजः शूरः परेषां भयवर्धनः ।
असिचर्मधरः श्रीमान्सौभद्रेण निपातितः ॥ २३
समः कर्णस्य समरे यः स कर्णस्य पश्यतः ।
वृषसेनो महातेजाः शीघ्रास्त्रः कृतनिश्चयः ॥ २४
अभिमन्योर्वधं स्मृत्वा प्रतिज्ञामपि चात्मनः ।
धनंजयेन विक्रम्य गमितो यमसादनम् ॥ २५
नित्यप्रसक्तवैरो यः पाण्डवैः पृथिवीपतिः ।
विश्राव्य वैरं पार्थेन श्रुतायुः स निपातितः ॥ २६
शल्यपुत्रस्तु विक्रान्तः सहदेवेन मारिष ।
हतो रुक्मरथो राजन्भ्राता मातुलजो युधि ॥ २७
राजा भगीरथो वृद्धो बृहत्क्षत्रश्च केकयः ।
पराक्रमन्तौ विक्रान्तौ निहतौ वीर्यवत्तरौ ॥ २८
भगदत्तसुतो राजन्कृतप्रज्ञो महाबलः ।
श्येनवच्चरता संख्ये नकुलेन निपातितः ॥ २९
पितामहस्तव तथा बाह्लिकः सह बाह्लिकैः ।
भीमसेनेन विक्रम्य गमितो यमसादनम् ॥ ३०
जयत्सेनस्तथा राजञ्जारासंधिर्महाबलः ।
मागधो निहतः संख्ये सौभद्रेण महात्मना ॥ ३१
पुत्रस्ते दुर्मुखो राजन्दुःसहश्च महारथः ।
गदया भीमसेनेन निहतौ शूरमानिनौ ॥ ३२
दुर्मर्षणो दुर्विषहो दुर्जयश्च महारथः ।
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ॥ ३३
सचिवो वृषवर्मा ते सूतः परमवीर्यवान् ।
भीमसेनेन विक्रम्य गमितो यमसादनम् ॥ ३४
नागायुतबलो राजा नागायुतबलो महान् ।
सगणः पाण्डुपुत्रेण निहतः सव्यसाचिना ॥ ३५
वसातयो महाराज द्विसाहस्राः प्रहारिणः ।
शूरसेनाश्च विक्रान्ताः सर्वे युधि निपातिताः ॥३६
अभीषाहाः कवचिनः प्रहरन्तो मदोत्कटाः ।
शिबयश्च रथोदाराः कलिङ्गसहिता हताः ॥ ३७
गोकुले नित्यसंवृद्धा युद्धे परमकोविदाः ।
श्रेणयो बहुसाहस्राः संशप्तकगणाश्च ये ।
ते सर्वे पार्थमासाद्य गता वैवस्वतक्षयम् ॥ ३८
स्यालौ तव महाराज राजानौ वृषकाचलौ ।
त्वदर्थे संपराक्रान्तौ निहतौ सव्यसाचिना ॥ ३९
उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा ।
शाल्वराजो महाराज भीमसेनेन पातितः ॥ ४०
ओघवांश्च महाराज बृहन्तः सहितो रणे ।
पराक्रमन्तौ मित्रार्थे गतौ वैवस्वतक्षयम् ॥ ४१
तथैव रथिनां श्रेष्ठः क्षेमधूर्तिर्विशां पते ।
निहतो गदया राजन्भीमसेनेन संयुगे ॥ ४२
तथा राजा महेष्वासो जलसंधो महाबलः ।
सुमहत्कदनं कृत्वा हतः सात्यकिना रणे ॥ ४३
अलायुधो राक्षसेन्द्रः खरबन्धुरयानगः ।
घटोत्कचेन विक्रम्य गमितो यमसादनम् ॥ ४४
राधेयाः सूतपुत्राश्च भ्रातरश्च महारथाः ।
केकयाः सर्वशश्चापि निहताः सव्यसाचिना ॥४५
मालवा मद्रकाश्चैव द्रविडाश्चोग्रविक्रमाः ।
यौधेयाश्च ललित्थाश्च क्षुद्रकाश्चाप्युशीनराः ॥ ४६
मावेल्लकास्तुण्डिकेराः सावित्रीपुत्रकाञ्चलाः ।
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च मारिष ॥
पत्तीनां निहताः संघा हयानामयुतानि च ।
रथव्रजाश्च निहता हताश्च वरवारणाः ॥ ४८
सध्वजाः सायुधाः शूराः सवर्माम्बरभूषणाः ।
कालेन महता यत्ताः कुले ये च विवर्धिताः ॥ ४९
ते हताः समरे राजन्पार्थेनाक्लिष्टकर्मणा ।
अन्ये तथामितबलाः परस्परवधैषिणः ॥ ५०

एते चान्ये च बहवो राजानः सगणा रणे ।
हताः सहस्रशो राजन्यन्मां त्वं परिपृच्छसि ।
एवमेष क्षयो वृत्तः कर्णार्जुनसमागमे ॥ ५१
महेन्द्रेण यथा वृत्रो यथा रामेण रावणः ।
यथा कृष्णेन निहतो मुरो रणनिपातितः ।
कार्तवीर्यश्च रामेण भार्गवेण हतो यथा ॥ ५२
सज्ञातिबान्धवः शूरः समरे युद्धदुर्मदः ।
रणे कृत्वा महायुद्धं घोरं त्रैलोक्यविश्रुतम् ॥ ५३
तथार्जुनेन निहतो द्वैरथे युद्धदुर्मदः ।
सामात्यबान्धवो राजन्कर्णः प्रहरतां वरः ॥ ५४
जयाशा धार्तराष्ट्राणां वैरस्य च मुखं यतः ।
तीर्णं तत्पाण्डवै राजन्यत्पुरा नावबुध्यसे ॥ ५५
उच्यमानो महाराज बन्धुभिर्हितकाङ्क्षिभिः ।
तदिदं समनुप्राप्तं व्यसनं त्वां महात्ययम् ॥ ५६
पुत्राणां राज्यकामानां त्वया राजन्हितैषिणा ।
अहितानीव चीर्णानि तेषां ते फलमागतम् ॥ ५७

धृतराष्ट्र उवाच ।

आख्याता मामकास्तात निहता युधि पाण्डवैः ।
निहतान्पाण्डवेयानां मामकैर्ब्रूहि संजय ॥ ५८

संजय उवाच ।

कुन्तयो युधि विक्रान्ता महासत्त्वा महाबलाः ।
सानुबन्धाः सहामात्या भीष्मेण युधि पातिताः ॥
समः किरीटिना संख्ये वीर्येण च बलेन च ।
सत्यजित्सत्यसंधेन द्रोणेन निहतो रणे ॥ ६०
तथा विराटद्रुपदौ वृद्धौ सहसुतौ नृपौ ।
पराक्रमन्तौ मित्रार्थे द्रोणेन निहतौ रणे ॥ ६१
यो बाल एव समरे संमितः सव्यसाचिना ।
केशवेन च दुर्धर्षो बलदेवेन चाभिभूः ॥ ६२
स एष कदनं कृत्वा महद्रणविशारदः ।
परिवार्य महामात्रैः षड्भिः परमकै रथैः ।
अशक्नुवद्भिर्बीभत्सुमभिमन्युर्निपातितः ॥ ६३
तं कृतं विरथं वीरं क्षत्रधर्मे व्यवस्थितम् ।
दौःशासनिर्महाराज सौभद्रं हतवान्रणे ॥ ६४
बृहन्तस्तु महेष्वासः कृतास्त्रो युद्धदुर्मदः ।
दुःशासनेन विक्रम्य गमितो यमसादनम् ॥ ६५
मणिमान्दण्डधारश्च राजानौ युद्धदुर्मदौ ।
पराक्रमन्तौ मित्रार्थे द्रोणेन विनिपातितौ ॥ ६६
अंशुमान्भोजराजस्तु सहसैन्यो महारथः ।
भारद्वाजेन विक्रम्य गमितो यमसादनम् ॥ ६७
चित्रायुधश्चित्रयोधी कृत्वा तौ कदनं महत् ।
चित्रमार्गेण विक्रम्य कर्णेन निहतौ युधि ॥ ६८
वृकोदरसमो युद्धे दृढः केकयजो युधि ।
केकयेनैव विक्रम्य भ्रात्रा भ्राता निपातितः ॥ ६९
जनमेजयो गदायोधी पार्वतीयः प्रतापवान् ।
दुर्मुखेन महाराज तव पुत्रेण पातितः ॥ ७०
रोचमानौ नरव्याघ्रौ रोचमानौ ग्रहाविव ।
द्रोणेन युगपद्राजन्दिवं संप्रेषितौ शरैः ॥ ७१
नृपाश्च प्रतियुध्यन्तः पराक्रान्ता विशां पते ।
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ॥ ७२
पुरुजित्कुन्तिभोजश्च मातुलः सव्यसाचिनः ।
संग्रामनिर्जिताँल्लोकान्गमितो द्रोणसायकैः ॥ ७३
अभिभूः काशिराजश्च काशिकैर्बहुभिर्वृतः ।
वसुदानस्य पुत्रेण न्यासितो देहमाहवे ॥ ७४
अमितौजा युधामन्युरुत्तमौजाश्च वीर्यवान् ।
निहत्य शतशः शूरान्परैर्विनिहतो रणे ॥ ७५
क्षत्रधर्मा च पाञ्चाल्यः क्षत्रवर्मा च मारिष ।
द्रोणेन परमेष्वासौ गमितौ यमसादनम् ॥ ७६
शिखण्डितनयो युद्धे क्षत्रदेवो युधां पतिः ।
लक्ष्मणेन हतो राजंस्तव पौत्रेण भारत ॥ ७७
सुचित्रश्चित्रधर्मा च पितापुत्रौ महारथौ ।

प्रचरन्तौ महावीर्यौ द्रोणेन निहतौ रणे ॥ ७८
पार्थक्षेमिर्महाराज कृत्वा कदनमाहवे ।
बाह्लिकेन महाराज कौरवेण निपातितः ॥ ७९
धृष्टकेतुर्महाराज चेदीनां प्रवरो रथः ।
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ॥ ८०
तथा सत्यधृतिस्तात कृत्वा कदनमाहवे ।
पाण्डवार्थे पराक्रान्तो गमितो यमसादनम् ॥ ८१
पुत्रस्तु शिशुपालस्य सुकेतुः पृथिवीपते ।
निहत्य शात्रवान्संख्ये द्रोणेन निहतो युधि ॥ ८२
तथा सत्यधृतिर्वीरो मदिराश्वश्च वीर्यवान् ।
सूर्यदत्तश्च विक्रान्तो निहतो द्रोणसायकैः ॥ ८३
श्रेणिमांश्च महाराज युध्यमानः पराक्रमी ।
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ॥ ८४
तथैव युधि विक्रान्तो मागधः परवीरहा ।
भीष्मेण निहतो राजन्युध्यमानः पराक्रमी ॥ ८५
वसुदानश्च कदनं कुर्वाणोऽतीव संयुगे ।
भारद्वाजेन विक्रम्य गमितो यमसादनम् ॥ ८६
एते चान्ये च बहवः पाण्डवानां महारथाः ।
हता द्रोणेन विक्रम्य यन्मां त्वं परिपृच्छसि ॥८७

धृतराष्ट्र उवाच ।

हतप्रवीरे सैन्येऽस्मिन्मामके वदतां वर ।
अहतान्शंस मे सूत येऽत्र जीवन्ति केचन ॥ ८८
एतेषु निहतेष्वद्य ये त्वया परिकीर्तिताः ।
अहतान्मन्यसे यांस्त्वं तेऽपि स्वर्गजितो मताः ॥

संजय उवाच ।

यस्मिन्महास्त्राणि समर्पितानि
चित्राणि शुभ्राणि चतुर्विधानि ।
दिव्यानि राजन्निहितानि चैव
द्रोणेन वीरद्विजसत्तमेन ॥ ९०
महारथः कृतिमान्क्षिप्रहस्तो
दृढायुधो दृढमुष्टिर्दृढेषुः ।
स वीर्यवान्द्रोणपुत्रस्तरस्वी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ९१
आनर्तवासी हृदिकात्मजोऽसौ
महारथः सात्वतानां वरिष्ठः ।
स्वयं भोजः कृतवर्मा कृतास्त्रो
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ९२
शारद्वतो गौतमश्चापि राज-
न्महाबलो बहुचित्रास्त्रयोधी ।
धनुश्चित्रं सुमहद्भारसाहं
व्यवस्थितो योत्स्यमानः प्रगृह्य ॥ ९३
आर्तायनिः समरे दुष्प्रकम्प्यः
सेनाग्रणीः प्रथमस्तावकानाम् ।
स्वस्रेयांस्तान्पाण्डवेयान्विसृज्य
सत्यां वाचं तां चिकीर्षुस्तरस्वी ॥ ९४
तेजोवधं सूतपुत्रस्य संख्ये
प्रतिश्रुत्वाजातशत्रोः पुरस्तात् ।
दुराधर्षः शक्रसमानवीर्यः
शल्यः स्थितो योद्धुकामस्त्वदर्थे ॥ ९५
आजानेयैः सैन्धवैः पार्वतीयै-
र्नदीजकाम्बोजवनायुबाह्लिकैः ।
गान्धारराजः स्वबलेन युक्तो
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ९६
तथा सुतस्ते ज्वलनार्कवर्णं
रथं समास्थाय कुरुप्रवीर ।
व्यवस्थितः कुरुमित्रो नरेन्द्र
व्यभ्रे सूर्यो भ्राजमानो यथा वै ॥ ९७
दुर्योधनो नागकुलस्य मध्ये
महावीर्यः सह सैन्यप्रवीरैः ।
रथेन जाम्बूनदभूषणेन

व्यवस्थितः समरे योद्धुकामः ॥ ९८
स राजमध्ये पुरुषप्रवीरो
रराज जाम्बूनदचित्रवर्मा ।
पद्मप्रभो वह्निरिवाल्पधूमो
मेघान्तरे सूर्य इव प्रकाशः ॥ ९९
तथा सुषेणोऽप्यसिचर्मपाणि-
स्तवात्मजः सत्यसेनश्च वीरः ।
व्यवस्थितौ चित्रसेनेन सार्धं
हृष्टात्मानौ समरे योद्धुकामौ ॥ १००
ह्रीनिषेधा भरता राजपुत्रा-
श्चित्रायुधः श्रुतकर्मा जयश्च ।
शलश्च सत्यव्रतदुःशलौ च
व्यवस्थिता बलिनो योद्धुकामाः ॥ १०१
कैतव्यानामधिपः शूरमानी
रणे रणे शत्रुहा राजपुत्रः ।
पत्री हयी नागरथप्रयायी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १०२
वीरः श्रुतायुश्च श्रुतायुधश्च
चित्राङ्गदश्चित्रवर्मा स वीरः ।
व्यवस्थिता ये तु सैन्ये नराग्र्याः
प्रहारिणो मानिनः सत्यसंधाः ॥ १०३
कर्णात्मजः सत्यसेनो महात्मा
व्यवस्थितः समरे योद्धुकामः ।
अथापरौ कर्णसुतौ वरार्हौ
व्यवस्थितौ लघुहस्तौ नरेन्द्र ।
बलं महद्दुर्भिदमल्पधैर्यैः
समाश्रितौ योत्स्यमानौ त्वदर्थे ॥ १०४
एतैश्च मुख्यैरपरैश्च राज-
न्योधप्रवीरैरमितप्रभावैः ।
व्यवस्थितो नागकुलस्य मध्ये
यथा महेन्द्रः कुरुराजो जयाय ॥ १०५

धृतराष्ट्र उवाच ।

आख्याता जीवमाना ये परेभ्योऽन्ये यथातथम् ।
इतीदमभिगच्छामि व्यक्तमर्थाभिपत्तितः ॥ १०६

वैशंपायन उवाच ।

एवं ब्रुवन्नेव तदा धृतराष्ट्रोऽम्बिकासुतः ।
हतप्रवीरं विध्वस्तं किंचिच्छेषं स्वकं बलम् ।
श्रुत्वा व्यामोहमगमच्छोकव्याकुलितेन्द्रियः ॥ १०७
मुह्यमानोऽब्रवीच्चापि मुहूर्तं तिष्ठ संजय ।
व्याकुलं मे मनस्तात श्रुत्वा सुमहदप्रियम् ।
नष्टचित्तस्ततः सोऽथ बभूव जगतीपतिः ॥ १०८

इति श्रीमहाभारते कर्णपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

जनमेजय उवाच ।

श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैवापलायिनः ।
नरेन्द्रः किंचिदाश्वस्तो द्विजश्रेष्ठ किमब्रवीत् ॥ १
प्राप्तवान्परमं दुःखं पुत्रव्यसनजं महत् ।
तस्मिन्यदुक्तवान्काले तन्ममाचक्ष्व पृच्छतः ॥ २

वैशंपायन उवाच ।

श्रुत्वा कर्णस्य निधनमश्रद्धेयमिवाद्भुतम् ।
भूतसंमोहनं भीमं मेरोः पर्यसनं यथा ॥ ३
चित्तमोहमिवायुक्तं भार्गवस्य महामतेः ।
पराजयमिवेन्द्रस्य द्विषद्भ्यो भीमकर्मणः ॥ ४
दिवः प्रपतनं भानोरुर्व्यामिव महाद्युतेः ।
संशोषणमिवाचिन्त्यं समुद्रस्याक्षयाम्भसः ॥ ५
महीवियद्दिगीशानां सर्वनाशमिवाद्भुतम् ।
कर्मणोरिव वैफल्यमुभयोः पुण्यपापयोः ॥ ६
संचिन्त्य निपुणं बुद्ध्या धृतराष्ट्रो जनेश्वरः ।
नेदमस्तीति संचिन्त्य कर्णस्य निधनं प्रति ॥ ७

प्राणिनामेतदात्मत्वात्स्यादपीति विनाशनम् ।
शोकाग्निना दह्यमानो धम्यमान इवाशयः ॥ ८
विध्वस्तात्मा श्वसन्दीनो हा हेत्युक्त्वा सुदुःखितः ।
विललाप महाराज धृतराष्ट्रोऽम्बिकासुतः ॥ ९

धृतराष्ट्र उवाच ।

संजयाधिरथो वीरः सिंहद्विरदविक्रमः ।
वृषभप्रतिमस्कन्धो वृषभाक्षगतिस्वनः ॥ १०
वृषभो वृषभस्येव यो युद्धे न निवर्तते ।
शत्रोरपि महेन्द्रस्य वज्रसंहननो युवा ॥ ११
यस्य ज्यातलशब्देन शरवृष्टिरवेण च ।
रथाश्वनरमातङ्गा नावतिष्ठन्ति संयुगे ॥ १२
यमाश्रित्य महाबाहुं द्विषत्संघघ्नमच्युतम् ।
दुर्योधनोऽकरोद्वैरं पाण्डुपुत्रैर्महाबलैः ॥ १३
स कथं रथिनां श्रेष्ठः कर्णः पार्थेन संयुगे ।
निहतः पुरुषव्याघ्रः प्रसह्यासह्यविक्रमः ॥ १४
यो नामन्यत वै नित्यमच्युतं न धनंजयम् ।
न वृष्णीनपि तानन्यान्स्वबाहुबलमाश्रितः ॥ १५
शार्ङ्गगाण्डीवधन्वानौ सहितावपराजितौ ।
अहं दिव्याद्रथादेकः पातयिष्यामि संयुगे ॥ १६
इति यः सततं मन्दमवोचल्लोभमोहितम् ।
दुर्योधनमपादीनं राज्यकामुकमातुरम् ॥ १७
यश्चाजैषीदतिबलानमित्रानपि दुर्जयान् ।
गान्धारान्मद्रकान्मत्स्यांस्त्रिगर्तांस्तङ्गणाञ्शकान् ॥ १८
पाञ्चालांश्च विदेहांश्च कुणिन्दान्काशिकोसलान् ।
सुह्मानङ्गांश्च पुण्ड्रांश्च निषादान्वङ्गकीचकान् ॥ १९
वत्सान्कलिङ्गांस्तरलानश्मकानृषिकांस्तथा ।
यो जित्वा समरे वीरश्चक्रे बलिभृतः पुरा ॥ २०
उच्चैःश्रवा वरोऽश्वानां राज्ञां वैश्रवणो वरः ।
वरो महेन्द्रो देवानां कर्णः प्रहरतां वरः ॥ २१
यं लब्ध्वा मागधो राजा सान्त्वमानार्थगौरवैः ।
अरौत्सीत्पार्थिवं क्षत्रमृते कौरवयादवान् ॥ २२
तं श्रुत्वा निहतं कर्णं द्वैरथे सव्यसाचिना ।
शोकार्णवे निमग्नोऽहमप्लवः सागरे यथा ॥ २३
ईदृशैर्यद्यहं दुःखैर्न विनश्यामि संजय ।
वज्राद्दृढतरं मन्ये हृदयं मम दुर्भिदम् ॥ २४
ज्ञातिसंबन्धिमित्राणामिमं श्रुत्वा पराजयम् ।
को मदन्यः पुमाँल्लोके न जह्यात्सूत जीवितम् ॥
विषमग्निं प्रपातं वा पर्वताग्रादहं वृणे ।
न हि शक्ष्यामि दुःखानि सोढुं कष्टानि संजय ॥ २६

संजय उवाच ।

श्रिया कुलेन यशसा तपसा च श्रुतेन च ।
त्वामद्य सन्तो मन्यन्ते ययातिमिव नाहुषम् ॥ २७
श्रुते महर्षिप्रतिमः कृतकृत्योऽसि पार्थिव ।
पर्यवस्थापयात्मानं मा विषादे मनः कृथाः ॥ २८

धृतराष्ट्र उवाच ।

दैवमेव परं मन्ये धिक्पौरुषमनर्थकम् ।
यत्र रामप्रतीकाशः कर्णोऽहन्यत संयुगे ॥ २९
हत्वा युधिष्ठिरानीकं पाञ्चालानां रथव्रजान् ।
प्रताप्य शरवर्षेण दिशः सर्वा महारथः ॥ ३०
मोहयित्वा रणे पार्थान्वज्रहस्त इवासुरान् ।
स कथं निहतः शेते वातरुग्ण इव द्रुमः ॥ ३१
शोकस्यान्तं न पश्यामि समुद्रस्येव विप्लुकाः ।
चिन्ता मे वर्धते तीव्रा मुमूर्षा चापि जायते ॥ ३२
कर्णस्य निधनं श्रुत्वा विजयं फल्गुनस्य च ।
अश्रद्धेयमहं मन्ये वधं कर्णस्य संजय ॥ ३३
वज्रसारमयं नूनं हृदयं सुदृढं मम ।
यच्छ्रुत्वा पुरुषव्याघ्रं हतं कर्णं न दीर्यते ॥ ३४
आयुर्नूनं सुदीर्घं मे विहितं दैवतैः पुरा ।
यत्र कर्णं हतं श्रुत्वा जीवामीह सुदुःखितः ॥ ३५
धिग्जीवितमिदं मेऽद्य सुहृद्धीनस्य संजय ।

अद्य चाहं दशामेतां गतः संजय गर्हिताम् ।
कृपणं वर्तयिष्यामि शोच्यः सर्वस्य मन्दधीः ॥ ३६
अहमेव पुरा भूत्वा सर्वलोकस्य सत्कृतः ।
परिभूतः कथं सूत पुनः शक्ष्यामि जीवितुम् ।
दुःखात्सुदुःखं व्यसनं प्राप्तवानस्मि संजय ॥ ३७
तस्माद्भीष्मवधे चैव द्रोणस्य च महात्मनः ।
नात्र शेषं प्रपश्यामि सूतपुत्रे हते युधि ॥ ३८
स हि पारं महानासीत्पुत्राणां मम संजय ।
युद्धे विनिहतः शूरो विसृजन्सायकान्बहून् ॥ ३९
को हि मे जीवितेनार्थस्तमृते पुरुषर्षभम् ।
रथादतिरथो नूनमपतत्सायकार्दितः ॥ ४०
पर्वतस्येव शिखरं वज्रपातविदारितम् ।
शयीत पृथिवीं नूनं शोभयन्रुधिरोक्षितः ।
मातङ्ग इव मत्तेन मातङ्गेन निपातितः ॥ ४१
यद्बलं धार्तराष्ट्राणां पाण्डवानां यतो भयम् ।
सोऽर्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् ॥ ४२
स हि वीरो महेष्वासः पुत्राणामभयंकरः ।
शेते विनिहतो वीरः शक्रेणेव यथा बलः ॥ ४३
पङ्गोरिवाध्वगमनं दरिद्रस्येव कामितम् ।
दुर्योधनस्य चाकूतं तृषितस्येव विप्रुषः ॥ ४४
अन्यथा चिन्तितं कार्यमन्यथा तत्तु जायते ।
अहो नु बलवद्दैवं कालश्च दुरतिक्रमः ॥ ४५
पलायमानः कृपणं दीनात्मा दीनपौरुषः ।
कच्चिन्न निहतः सूत पुत्रो दुःशासनो मम ॥ ४६
कच्चिन्न नीचाचरितं कृतवांस्तात संयुगे ।
कच्चिन्न निहतः शूरो यथा न क्षत्रिया हताः ॥ ४७
युधिष्ठिरस्य वचनं मा युद्धमिति सर्वदा ।
दुर्योधनो नाभ्यगृह्णान्मूढः पथ्यमिवौषधम् ॥ ४८
शरतल्पे शयानेन भीष्मेण सुमहात्मना ।
पानीयं याचितः पार्थः सोऽविध्यन्मेदिनीतलम् ॥
जलस्य धारां विहितां दृष्ट्वा तां पाण्डवेन ह ।
अब्रवीत्स महाबाहुस्तात संशाम्य पाण्डवैः ॥ ५०
प्रशमाद्धि भवेच्छान्तिर्मदन्तं युद्धमस्तु च ।
भ्रातृभावेन पृथिवीं भुङ्क्ष्व पाण्डुसुतैः सह ॥ ५१
अकुर्वन्वचनं तस्य नूनं शोचति मे सुतः ।
तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः ॥ ५२
अहं तु निहतामात्यो हतपुत्रश्च संजय ।
द्यूततः कृच्छ्रमापन्नो लूनपक्ष इव द्विजः ॥ ५३
यथा हि शकुनिं गृह्य छित्त्वा पक्षौ च संजय ।
विसर्जयन्ति संहृष्टाः क्रीडमानाः कुमारकाः ॥ ५४
छिन्नपक्षतया तस्य गमनं नोपपद्यते ।
तथाहमपि संप्राप्तो लूनपक्ष इव द्विजः ॥ ५५
क्षीणः सर्वार्थहीनश्च निर्बन्धुर्ज्ञातिवर्जितः ।
कां दिशं प्रतिपत्स्यामि दीनः शत्रुवशं गतः ॥ ५६
दुर्योधनस्य वृद्ध्यर्थं पृथिवीं योऽजयत्प्रभुः ।
स जितः पाण्डवैः शूरैः समर्थैर्वीर्यशालिभिः ॥ ५७
तस्मिन्हते महेष्वासे कर्णे युधि किरीटिना ।
के वीराः पर्यवर्तन्त तन्ममाचक्ष्व संजय ॥ ५८
कच्चिन्नैकः परित्यक्तः पाण्डवैर्निहतो रणे ।
उक्तं त्वया पुरा वीर यथा वीरा निपातिताः ॥ ५९
भीष्ममप्रतियुध्यन्तं शिखण्डी सायकोत्तमैः ।
पातयामास समरे सर्वशस्त्रभृतां वरम् ॥ ६०
तथा द्रौपदिना द्रोणो न्यस्तसर्वायुधो युधि ।
युक्तयोगो महेष्वासः शरैर्बहुभिराचितः ।
निहतः खड्गमुद्यम्य धृष्टद्युम्नेन संजय ॥ ६१
अन्तरेण हतावेतौ छलेन च विशेषतः ।
अश्रौषमहमेतद्वै भीष्मद्रोणौ निपातितौ ॥ ६२
भीष्मद्रोणौ हि समरे न हन्याद्वज्रभृत्स्वयम् ।
न्यायेन युध्यमानौ हि तद्वै सत्यं ब्रवीमि ते ॥ ६३
कर्णं त्वस्यन्तमस्त्राणि दिव्यानि च बहूनि च ।

कथमिन्द्रोपमं वीरं मृत्युर्युद्धे समस्पृशत् ।। ६४
यस्य विद्युत्प्रभां शक्तिं दिव्यां कनकभूषणाम् ।
प्रायच्छद्द्विषतां हन्त्रीं कुण्डलाभ्यां पुरंदरः ।। ६५
यस्य सर्पमुखो दिव्यः शरः कनकभूषणः ।
अशेत निहतः पत्री चन्दनेष्वरिसूदनः ।। ६६
भीष्मद्रोणमुखान्वीरान्योऽवमन्य महारथान् ।
जामदग्न्यान्महाघोरं ब्राह्ममस्त्रमशिक्षत ।। ६७
यश्च द्रोणमुखान्दृष्ट्वा विमुखानर्दिताञ्शरैः ।
सौभद्रस्य महाबाहुर्व्यधमत्कार्मुकं शरैः ।। ६८
यश्च नागायुतप्राणं वातरंहसमच्युतम् ।
विरथं भ्रातरं कृत्वा भीमसेनमुपाहसत् ।। ६९
सहदेवं च निर्जित्य शरैः संनतपर्वभिः ।
कृपया विरथं कृत्वा नाहनद्धर्मवित्तया ।। ७०
यश्च मायासहस्राणि ध्वंसयित्वा रणोत्कटम् ।
घटोत्कचं राक्षसेन्द्रं शक्रशक्त्याभिजघ्निवान् ।। ७१
एतानि दिवसान्यस्य युद्धे भीतो धनंजयः ।
नागमद्द्वैरथं वीरः स कथं निहतो रणे ।। ७२
रथचक्रं न चेत्तस्य धनुर्वा न व्यशीर्यत ।
न चेदस्त्राणि निर्णेशुः स कथं निहतः परैः ।। ७३
को हि शक्तो रणे कर्णं विधुन्वानं महद्धनुः ।
विमुञ्चन्तं शरान्घोरान्दिव्यान्यस्त्राणि चाहवे ।
जेतुं पुरुषशार्दूलं शार्दूलमिव वेगितम् ।। ७४
ध्रुवं तस्य धनुश्छिन्नं रथो वापि गतो महीम् ।
अस्त्राणि वा प्रनष्टानि यथा शंससि मे हतम् ।
न ह्यन्यदनुपश्यामि कारणं तस्य नाशने ।। ७५
न हन्यामर्जुनं यावत्तावत्पादौ न धावये ।
इति यस्य महाघोरं व्रतमासीन्महात्मनः ।। ७६
यस्य भीतो वने नित्यं धर्मराजो युधिष्ठिरः ।
त्रयोदश समा निद्रां न लेभे पुरुषर्षभः ।। ७७
यस्य वीर्यवतो वीर्यं समाश्रित्य महात्मनः ।
मम पुत्रः सभां भार्यां पाण्डूनां नीतवान्बलात् ।।
तत्र चापि सभामध्ये पाण्डवानां च पश्यताम् ।
दासभार्येति पाञ्चालीमब्रवीत्कुरुसंसदि ।। ७९
यश्च गाण्डीवमुक्तानां स्पर्शमुग्रमचिन्तयन् ।
अपतिर्ह्यसि कृष्णेति ब्रुवन्पार्थानवैक्षत ।। ८०
यस्य नासीद्भयं पार्थैः सपुत्रैः सजनार्दनैः ।
स्वबाहुबलमाश्रित्य मुहूर्तमपि संजय ।। ८१
तस्य नाहं वधं मन्ये देवैरपि सवासवैः ।
प्रतीपमुपधावद्भिः किं पुनस्तात पाण्डवैः ।। ८२
न हि ज्यां स्पृशमानस्य तलत्रे चापि गृह्णतः ।
पुमानाधिरथेः कश्चित्प्रमुखे स्थातुमर्हति ।। ८३
अपि स्यान्मेदिनी हीना सोमसूर्यप्रभांशुभिः ।
न वधः पुरुषेन्द्रस्य समरेष्वपलायिनः ।। ८४
यदि मन्दः सहायेन भ्रात्रा दुःशासनेन च ।
वासुदेवस्य दुर्बुद्धिः प्रत्याख्यानमरोचयत् ।। ८५
स नूनमृषभस्कन्धं दृष्ट्वा कर्णं निपातितम् ।
दुःशासनं च निहतं मन्ये शोचति पुत्रकः ।। ८६
हतं वैकर्तनं श्रुत्वा द्वैरथे सव्यसाचिना ।
जयतः पाण्डवान्दृष्ट्वा किंस्विद्दुर्योधनोऽब्रवीत् ।। ८७
दुर्मर्षणं हतं श्रुत्वा वृषसेनं च संयुगे ।
प्रभग्नं च बलं दृष्ट्वा वध्यमानं महारथैः ।। ८८
पराङ्मुखांस्तथा राज्ञः पलायनपरायणान् ।
विद्रुतान्रथिनो दृष्ट्वा मन्ये शोचति पुत्रकः ।। ८९
अनेयश्चाभिमानेन बालबुद्धिरमर्षणः ।
हतोत्साहं बलं दृष्ट्वा किंस्विद्दुर्योधनोऽब्रवीत् ।। ९०
भ्रातरं निहतं दृष्ट्वा भीमसेनेन संयुगे ।
रुधिरं पीयमानेन किंस्विद्दुर्योधनोऽब्रवीत् ।। ९१
सह गान्धारराजेन सभायां यदभाषत ।
कर्णोऽर्जुनं रणे हन्ता हते तस्मिन्किमब्रवीत् ।। ९२
द्यूतं कृत्वा पुरा हृष्टो वञ्चयित्वा च पाण्डवान् ।

शकुनिः सौबलस्तात हते कर्णे किमब्रवीत् ।। ९३
कृतवर्मा महेष्वासः सात्वतानां महारथः ।
कर्णं विनिहतं दृष्ट्वा हार्दिक्यः किमभाषत ।। ९४
ब्राह्मणाः क्षत्रिया वैश्या यस्य शिक्षामुपासते ।
धनुर्वेदं चिकीर्षन्तो द्रोणपुत्रस्य धीमतः ।। ९५
युवा रूपेण संपन्नो दर्शनीयो महायशाः ।
अश्वत्थामा हते कर्णे किमभाषत संजय ।। ९६
आचार्यत्वं धनुर्वेदे गतः परमतत्त्ववित् ।
कृपः शारद्वतस्तात हते कर्णे किमब्रवीत् । ९७
मद्रराजो महेष्वासः शल्यः समितिशोभनः ।
दिष्टं तेन हि तत्सर्वं यथा कर्णो निपातितः ।। ९८
ये च केचन राजानः पृथिव्यां योद्धुमागताः ।
वैकर्तनं हतं दृष्ट्वा किमभाषन्त संजय ।। ९९
कर्णे तु निहते वीरे रथव्याघ्रे नरर्षभे ।
किं वो मुखमनीकानामासीत्संजय भागशः ।।१००
मद्रराजः कथं शल्यो नियुक्तो रथिनां वरः ।
वैकर्तनस्य सारथ्ये तन्ममाचक्ष्व संजय ।। १०१
केऽरक्षन्दक्षिणं चक्रं सूतपुत्रस्य संयुगे ।
वामं चक्रं ररक्षुर्वा के वा वीरस्य पृष्ठतः ।। १०२
के कर्णं वाजहुः शूराः के क्षुद्राः प्राद्रवन्भयात् ।
कथं च वः समेतानां हतः कर्णो महारथः ।।१०३
पाण्डवाश्च कथं शूराः प्रत्युदीयुर्महारथम् ।
सृजन्तं शरवर्षाणि वारिधारा इवाम्बुदम् ।। १०४
स च सर्पमुखो दिव्यो महेषुप्रवरस्तदा ।
व्यर्थः कथं समभवत्तन्ममाचक्ष्व संजय ।। १०५
मामकस्यास्य सैन्यस्य हतोत्सेधस्य संजय ।
अवशेषं न पश्यामि ककुदे मृदिते सति ।। १०६
तौ हि वीरौ महेष्वासौ मदर्थे कुरुसत्तमौ ।
भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो जीवितेन मे ।।
न मृष्यामि च राधेयं हतमाहवशोभिनम् ।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम् ।।१०८
द्रोणे हते च यद्वृत्तं कौरवाणां परैः सह ।
संग्रामे नरवीराणां तन्ममाचक्ष्व संजय ।। १०९
यथा च कर्णः कौन्तेयैः सह युद्धमयोजयत् ।
यथा च द्विषतां हन्ता रणे शान्तस्तदुच्यताम् ।।११०

इति श्रीमहाभारते कर्णपर्वणि
पञ्चमोऽध्यायः ।। ५ ।।

६

संजय उवाच ।

हते द्रोणे महेष्वासे तस्मिन्नहनि भारत ।
कृते च मोघसंकल्पे द्रोणपुत्रे महारथे ।। १
द्रवमाणे महाराज कौरवाणां बले तथा ।
व्यूह्य पार्थः स्वकं सैन्यमतिष्ठद्भ्रातृभिः सह ।। २
तमवस्थितमाज्ञाय पुत्रस्ते भरतर्षभ ।
द्रवच्च स्वबलं दृष्ट्वा पौरुषेण न्यवारयत् ।। ३
स्वमनीकमवस्थाप्य बाहुवीर्ये व्यवस्थितः ।
युद्ध्वा च सुचिरं कालं पाण्डवैः सह भारत ।। ४
लब्धलक्षैः परैर्हृष्टैर्व्यायच्छद्भिश्चिरं तदा ।
संध्याकालं समासाद्य प्रत्याहारमकारयत् ।। ५
कृत्वावहारं सैन्यानां प्रविश्य शिबिरं स्वकम् ।
कुरवोऽऽत्महितं मन्त्रं मन्त्रयांचक्रिरे तदा ।। ६
पर्यङ्केषु परार्ध्येषु स्पर्ध्यास्तरणवत्सु च ।
वरासनेषूपविष्टाः सुखशय्यास्विवामराः ।। ७
ततो दुर्योधनो राजा साम्ना परमवल्गुना ।
तानाभाष्य महेष्वासान्प्राप्तकालमभाषत ।। ८
मतिं मतिमतां श्रेष्ठाः सर्वे प्रब्रूत माचिरम् ।
एवं गते तु यत्कार्यं भवेत्कार्यकरं नृपाः ।। ९
एवमुक्ते नरेन्द्रेण नरसिंहा युयुत्सवः ।
चक्रुर्नानाविधाश्चेष्टाः सिंहासनगतास्तदा ।। १०
तेषां निशम्येङ्गितानि युद्धे प्राणाञ्जुहूषताम् ।

समुद्वीक्ष्य मुखं राज्ञो बालार्कसमवर्चसः ।
आचार्यपुत्रो मेधावी वाक्यज्ञो वाक्यमाददे ॥ ११
रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः ।
उपायाः पण्डितैः प्रोक्ताः सर्वे दैवसमाश्रिताः ॥ १२
लोकप्रवीरा येऽस्माकं देवकल्पा महारथाः ।
नीतिमन्तस्तथा युक्ता दक्षा रक्ताश्च ते हताः ॥ १३
न त्वेव कार्यं नैराश्यमस्माभिर्विजयं प्रति ।
सुनीतैरिह सर्वार्थैर्दैवमप्यनुलोम्यते ॥ १४
ते वयं प्रवरं नृणां सर्वैर्गुणगणैर्युतम् ।
कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून् ॥ १५
ततो दुर्योधनः प्रीतः प्रियं श्रुत्वा वचस्तदा ।
प्रीतिसंस्कारसंयुक्तं तथ्यमात्महितं शुभम् ॥ १६
स्वं मनः समवस्थाप्य बाहुवीर्यमुपाश्रितः ।
दुर्योधनो महाराज राधेयमिदमब्रवीत् ॥ १७
कर्ण जानामि ते वीर्यं सौहृदं च परं मयि ।
तथापि त्वां महाबाहो प्रवक्ष्यामि हितं वचः ॥ १८
श्रुत्वा यथेष्टं च कुरु वीर यत्तव रोचते ।
भवान्प्राज्ञतमो नित्यं मम चैव परा गतिः ॥ १९
भीष्मद्रोणावतिरथौ हतौ सेनापती मम ।
सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः ॥ २०
वृद्धौ च तौ महेष्वासौ सापेक्षौ च धनंजये ।
मानितौ च मया वीरौ राधेय वचनात्तव ॥ २१
पितामहत्वं संप्रेक्ष्य पाण्डुपुत्रा महारणे ।
रक्षितास्तात भीष्मेण दिवसानि दशैव ह ॥ २२
न्यस्तशस्त्रे च भवति हतो भीष्मः पितामहः ।
शिखण्डिनं पुरस्कृत्य फल्गुनेन महाहवे ॥ २३
हते तस्मिन्महाभागे शरतल्पगते तदा ।
त्वयोक्ते पुरुषव्याघ्र द्रोणो ह्यासीत्पुरःसरः ॥ २४
तेनापि रक्षिताः पार्थाः शिष्यत्वादिह संयुगे ।
स चापि निहतो वृद्धो धृष्टद्युम्नेन सत्वरम् ॥ २५

निहताभ्यां प्रधानाभ्यां ताभ्याममितविक्रम ।
त्वत्समं समरे योधं नान्यं पश्यामि चिन्तयन् ॥
भवानेव तु नः शक्तो विजयाय न संशयः ।
पूर्वं मध्ये च पश्चाच्च तवैव विदितं हि तत् ॥ २७
स भवान्धुर्यवत्संख्ये धुरमुद्वोढुमर्हसि ।
अभिषेचय सेनान्ये स्वयमात्मानमात्मना ॥ २८
देवतानां यथा स्कन्दः सेनानीः प्रभुरव्ययः ।
तथा भवानिमां सेनां धार्तराष्ट्रीं बिभर्तु मे ।
जहि शत्रुगणान्सर्वान्महेन्द्र इव दानवान् ॥ २९
अवस्थितं रणे ज्ञात्वा पाण्डवास्त्वां महारथम् ।
द्रविष्यन्ति सपाञ्चाला विष्णुं दृष्ट्वेव दानवाः ।
तस्मात्त्वं पुरुषव्याघ्र प्रकर्षेथा महाचमूम् ॥ ३०
भवत्यवस्थिते यत्ते पाण्डवा गतचेतसः ।
भविष्यन्ति सहामात्याः पाञ्चालैः सृञ्जयैः सह ॥
यथा ह्यभ्युदितः सूर्यः प्रतपन्स्वेन तेजसा ।
व्यपोहति तमस्तीव्रं तथा शत्रून्व्यपोह नः ॥ ३२

कर्ण उवाच ।

उक्तमेतन्मया पूर्वं गान्धारे तव संनिधौ ।
जेष्यामि पाण्डवान्राजन्सपुत्रान्सजनार्दनान् ॥ ३३
सेनापतिर्भविष्यामि तवाहं नात्र संशयः ।
स्थिरो भव महाराज जितान्विद्धि च पाण्डवान् ॥

संजय उवाच ।

एवमुक्तो महातेजास्ततो दुर्योधनो नृपः ।
उत्तस्थौ राजभिः सार्धं देवैरिव शतक्रतुः ।
सेनापत्येन सत्कर्तुं कर्णं स्कन्दमिवामराः ॥ ३५
ततोऽभिषिषिचुस्तूर्णं विधिदृष्टेन कर्मणा ।
दुर्योधनमुखा राजन्राजानो विजयैषिणः ।
शातकौम्भमयैः कुम्भैर्माहेयैश्चाभिमन्त्रितैः ॥ ३६
तोयपूर्णैर्विषाणैश्च द्वीपिखड्गमहर्षभैः ।
मणिमुक्तामयैश्चान्यैः पुण्यगन्धैस्तथौषधैः ॥ ३७

औदुम्बरे समासीनमासने क्षौमसंवृतम् ।
शास्त्रदृष्टेन विधिना संभारैश्च सुसंभृतैः ॥ ३८
जय पार्थान्सगोविन्दान्सानुगांस्त्वं महाहवे ।
इति तं बन्दिनः प्राहुर्द्विजाश्च भरतर्षभ ॥ ३९
जहि पार्थान्सपाञ्चालान्राधेय विजयाय नः ।
उद्यन्निव सदा भानुस्तमांस्युग्रैर्गभस्तिभिः ॥ ४०
न ह्यलं त्वद्विसृष्टानां शराणां ते सकेशवाः ।
कृतघ्नाः सूर्यरश्मीनां ज्वलतामिव दर्शने ॥ ४१
न हि पार्थाः सपाञ्चालाः स्थातुं शक्तास्तवाग्रतः ।
आत्तशस्त्रस्य समरे महेन्द्रस्येव दानवाः ॥ ४२
अभिषिक्तस्तु राधेयः प्रभया सोऽमितप्रभः ।
व्यत्यरिच्यत रूपेण दिवाकर इवापरः ॥ ४३
सेनापत्येन राधेयमभिषिच्य सुतस्तव ।
अमन्यत तदात्मानं कृतार्थं कालचोदितः ॥ ४४
कर्णोऽपि राजन्संप्राप्य सेनापत्यमरिंदमः ।
योगमाज्ञापयामास सूर्यस्योदयनं प्रति ॥ ४५
तव पुत्रैर्वृतः कर्णः शुशुभे तत्र भारत ।
देवैरिव यथा स्कन्दः संग्रामे तारकामये ॥ ४६

इति श्रीमहाभारते कर्णपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

धृतराष्ट्र उवाच ।

सेनापत्यं तु संप्राप्य कर्णो वैकर्तनस्तदा ।
तथोक्तश्च स्वयं राज्ञा स्निग्धं भ्रातृसमं वचः ॥ १
योगमाज्ञाप्य सेनाया आदित्येऽभ्युदिते तदा ।
अकरोत्किं महाप्राज्ञस्तन्ममाचक्ष्व संजय ॥ २

संजय उवाच ।

कर्णस्य मतमाज्ञाय पुत्रस्ते भरतर्षभ ।
योगमाज्ञापयामास नान्दीतूर्यपुरःसरम् ॥ ३
महत्यपररात्रे तु तव पुत्रस्य मारिष ।
योगो योगेति सहसा प्रादुरासीन्महास्वनः ॥ ४
नागानां कल्पमानानां रथानां च वरूथिनाम् ।
संनह्यतां पदातीनां वाजिनां च विशां पते ॥ ५
क्रोशतां चापि योधानां त्वरितानां परस्परम् ।
बभूव तुमुलः शब्दो दिवस्पृक्सुमहांस्तदा ॥ ६
ततः श्वेतपताकेन बालार्काकारवाजिना ।
हेमपृष्ठेन धनुषा हस्तिकक्ष्येण केतुना ॥ ७
तूणेन शरपूर्णेन साङ्गदेन वरूथिना ।
शतघ्नीकिङ्किणीशक्तिशूलतोमरधारिणा ॥ ८
कार्मुकेणोपपन्नेन विमलादित्यवर्चसा ।
रथेनातिपताकेन सूतपुत्रो व्यदृश्यत ॥ ९
धमन्तं वारिजं तात हेमजालविभूषितम् ।
विधुन्वानं महच्चापं कार्तस्वरविभूषितम् ॥ १०
दृष्ट्वा कर्णं महेष्वासं रथस्थं रथिनां वरम् ।
भानुमन्तमिवोद्यन्तं तमो घ्नन्तं सहस्रशः ॥ ११
न भीष्मव्यसनं केचिन्नापि द्रोणस्य मारिष ।
नान्येषां पुरुषव्याघ्र मेनिरे तत्र कौरवाः ॥ १२
ततस्तु त्वरयन्योधाञ्शङ्खशब्देन मारिष ।
कर्णो निष्कासयामास कौरवाणां वरूथिनीम् ॥ १३
व्यूहं व्यूह्य महेष्वासो माकरं शत्रुतापनः ।
प्रत्युद्ययौ तदा कर्णः पाण्डवान्विजिगीषया ॥ १४
मकरस्य तु तुण्डे वै कर्णो राजन्व्यवस्थितः ।
नेत्राभ्यां शकुनिः शूर उलूकश्च महारथः ॥ १५
द्रोणपुत्रस्तु शिरसि ग्रीवायां सर्वसोदराः ।
मध्ये दुर्योधनो राजा बलेन महता वृतः ॥ १६
वामे पादे तु राजेन्द्र कृतवर्मा व्यवस्थितः ।
नारायणबलैर्युक्तो गोपालैर्युद्धदुर्मदः ॥ १७
पादे तु दक्षिणे राजन्गौतमः सत्यविक्रमः ।
त्रिगर्तैश्च महेष्वासैर्दाक्षिणात्यैश्च संवृतः ॥ १८
अनुपादस्तु यो वामस्तत्र शल्यो व्यवस्थितः ।

महत्या सेनया सार्धं मद्रदेशसमुत्थया ॥ १९
दक्षिणे तु महाराज सुषेणः सत्यसंगरः ।
वृतो रथसहस्रैश्च दन्तिनां च शतैस्तथा ॥ २०
पुच्छे आस्तां महावीरौ भ्रातरौ पार्थिवौ तदा ।
चित्रसेनश्च चित्रश्च महत्या सेनया वृतौ ॥ २१
ततः प्रयाते राजेन्द्र कर्णे नरवरोत्तमे ।
धनंजयमभिप्रेक्ष्य धर्मराजोऽब्रवीदिदम् ॥ २२
पश्य पार्थ महासेनां धार्तराष्ट्रस्य संयुगे ।
कर्णेन निर्मितां वीर गुप्तां वीरैर्महारथैः ॥ २३
हतवीरतमा ह्येषा धार्तराष्ट्री महाचमूः ।
फल्गुशेषा महाबाहो तृणैस्तुल्या मता मम ॥ २४
एको ह्यत्र महेष्वासः सूतपुत्रो व्यवस्थितः ।
सदेवासुरगन्धर्वैः सकिंनरमहोरगैः ।
चराचरैस्त्रिभिर्लोकैर्योऽजय्यो रथिनां वरः ॥ २५
तं हत्वाद्य महाबाहो विजयस्तव फल्गुन ।
उद्धृतश्च भवेच्छल्यो मम द्वादशवार्षिकः ।
एवं ज्ञात्वा महाबाहो व्यूहं व्यूह यथेच्छसि ॥२६
भ्रातुस्तद्वचनं श्रुत्वा पाण्डवः श्वेतवाहनः ।
अर्धचन्द्रेण व्यूहेन प्रत्यव्यूहत तां चमूम् ॥ २७
वामपार्श्वेऽभवद्राजन्भीमसेनो व्यवस्थितः ।
दक्षिणे च महेष्वासो धृष्टद्युम्नो महाबलः ॥ २८
मध्ये व्यूहस्य साक्षात्तु पाण्डवः कृष्णसारथिः ।
नकुलः सहदेवश्च धर्मराजश्च पृष्ठतः ॥ २९
चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
नार्जुनं जहतुर्युद्धे पाल्यमानौ किरीटिना ॥ ३०
शेषा नृपतयो वीराः स्थिता व्यूहस्य दंशिताः ।
यथाभावं यथोत्साहं यथासत्त्वं च भारत ॥ ३१
एवमेतन्महाव्यूहं व्यूह्य भारत पाण्डवाः ।
तावकाश्च महेष्वासा युद्धायैव मनो दधुः ॥ ३२
दृष्ट्वा व्यूढां तव चमूं सूतपुत्रेण संयुगे ।
निहतान्पाण्डवान्मेने तव पुत्रः सहान्वयः ॥ ३३
तथैव पाण्डवीं सेनां व्यूढां दृष्ट्वा युधिष्ठिरः ।
धार्तराष्ट्रान्हतान्मेने सकर्णान्वै जनाधिप ॥ ३४
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त सशब्दाश्च समन्ततः ॥ ३५
सेनयोरुभयो राजन्प्रावाद्यन्त महास्वनाः ।
सिंहनादश्च संजज्ञे शूराणां जयगृद्धिनाम् ॥ ३६
हयहेषितशब्दाश्च वारणानां च बृंहितम् ।
रथनेमिस्वनाश्चोग्राः संबभूवुर्जनाधिप ॥ ३७
न द्रोणव्यसनं कश्चिज्जानीते भरतर्षभ ।
दृष्ट्वा कर्णं महेष्वासं मुखे व्यूहस्य दंशितम् ॥ ३८
उभे सेने महासत्त्वे प्रहृष्टनरकुञ्जरे ।
योद्धुकामे स्थिते राजन्हन्तुमन्योन्यमञ्जसा ॥ ३९
तत्र यत्तौ सुसंरब्धौ दृष्ट्वान्योन्यं व्यवस्थितौ ।
अनीकमध्ये राजेन्द्र रेजतुः कर्णपाण्डवौ ॥ ४०
नृत्यमाने तु ते सेने समेयातां परस्परम् ।
तयोः पक्षैः प्रपक्षैश्च निर्जग्मुर्वै युयुत्सवः ॥ ४१
ततः प्रववृते युद्धं नरवारणवाजिनाम् ।
रथिनां च महाराज अन्योन्यं निघ्नतां दृढम् ॥४२

इति श्रीमहाभारते कर्णपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

संजय उवाच ।

ते सेनेऽन्योन्यमासाद्य प्रहृष्टाश्वनरद्विपे ।
बृहत्यौ संप्रजह्राते देवासुरचमूपमे ॥ १
ततो गजा रथाश्चाश्वाः पत्तयश्च महाहवे ।
संप्रहारं परं चक्रुर्देहपाप्मप्रणाशनम् ॥ २
पूर्णचन्द्रार्कपद्मानां कान्तित्विड्गन्धतः समैः ।
उत्तमाङ्गैर्नृसिंहानां नृसिंहास्तस्तरुर्महीम् ॥ ३
अर्धचन्द्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टिशैः ।

परश्वधैश्चाप्यकृन्तन्नुत्तमाङ्गानि युध्यताम् ॥ ४
व्यायतायतबाहूनां व्यायतायतबाहुभिः ।
व्यायता बाहवः पेतुश्छिन्नमुष्ट्यायुधाङ्गदाः ॥ ५
तैः स्फुरद्भिर्मही भाति रक्ताङ्गुलितलैस्तदा ।
गरुडप्रहतैरुग्रैः पञ्चास्यैरिव पन्नगैः ॥ ६
हयस्यन्दननागेभ्यः पेतुर्वीरा द्विषद्धताः ।
विमानेभ्यो यथा क्षीणे पुण्ये स्वर्गसदस्तथा ॥ ७
गदाभिरन्यैर्गुर्वीभिः परिघैर्मुसलैरपि ।
पोथिताः शतशः पेतुर्वीरा वीरतरै रणे ॥ ८
रथा रथैर्विनिहता मत्ता मत्तैर्द्विपैर्द्विपाः ।
सादिनः सादिभिश्चैव तस्मिन्परमसंकुले ॥ ९
रथा वररथैर्नागैरश्वारोहाश्च पत्तिभिः ।
अश्वारोहैः पदाताश्च निहता युधि शेरते ॥ १०
रथाश्वपत्तयो नागै रथैर्नागाश्च पत्तयः ।
रथपत्तिद्विपाश्चाश्वैर्नृभिश्चाश्वरथद्विपाः ॥ ११
रथाश्वेभनराणां च नराश्वेभरथैः कृतम् ।
पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत् ॥ १२
तथा तस्मिन्बले शूरैर्वध्यमाने हतेऽपि च ।
अस्मानभ्यागमन्पार्था वृकोदरपुरोगमाः ॥ १३
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ।
सात्यकिश्चेकितानश्च द्रविडैः सैनिकैः सह ॥ १४
भृता वित्तेन महता पाण्ड्याश्चौड्राः सकेरलाः ।
व्यूढोरस्का दीर्घभुजाः प्रांशवः प्रियदर्शनाः ॥ १५
आपीडिनो रक्तदन्ता मत्तमातङ्गविक्रमाः ।
नानाविरागवसना गन्धचूर्णावचूर्णिताः ॥ १६
बद्धासयः पाशहस्ता वारणप्रतिवारणाः ।
समानमृत्यवो राजन्ननीकस्थाः परस्परम् ॥ १७
कलापिनश्चापहस्ता दीर्घकेशाः प्रियाहवाः ।
पत्तयः सात्यकेरन्ध्रा घोररूपपराक्रमाः ॥ १८
अथापरे पुनः शूराश्चेदिपाञ्चालकेकयाः ।
करूषाः कोसलाः काश्या मागधाश्चापि दुद्रुवुः ॥
तेषां रथाश्च नागाश्च प्रवराश्चापि पत्तयः ।
नानाविधरवैर्हृष्टा नृत्यन्ति च हसन्ति च ॥ २०
तस्य सैन्यस्य महतो महामात्रवरैर्वृतः ।
मध्यं वृकोदरोऽभ्यागात्त्वदीयं नागधूर्गतः ॥ २१
स नागप्रवरोऽत्युग्रो विधिवत्कल्पितो बभौ ।
उदयाद्र्यग्र्यभवनं यथाभ्युदितभास्करम् ॥ २२
तस्यायसं वर्मवरं वररत्नविभूषितम् ।
ताराढ्यस्य नभसः शारदस्य समत्विषम् ॥ २३
स तोमरप्रासकरश्चारुमौलिः स्वलंकृतः ।
चरन्मध्यंदिनार्काभस्तेजसा व्यदहद्रिपून् ॥ २४
तं दृष्ट्वा द्विरदं दूरात्क्षेमधूर्तिर्द्विपस्थितः ।
आह्वयानोऽभिदुद्राव प्रमनाः प्रमनस्तरम् ॥ २५
तयोः समभवद्युद्धं द्विपयोरुग्ररूपयोः ।
यदृच्छया द्रुमवतोर्महापर्वतयोरिव ॥ २६
संसक्तनागौ तौ वीरौ तोमरैरितरेतरम् ।
बलवत्सूर्यरश्म्याभैर्भित्त्वा भित्त्वा विनेदतुः ॥ २७
व्यपसृत्य तु नागाभ्यां मण्डलानि विचेरतुः ।
प्रगृह्य चैव धनुषी जघ्नतुर्वै परस्परम् ॥ २८
क्ष्वेडितास्फोटितरवैर्बाणशब्दैश्च सर्वशः ।
तौ जनान्हर्षयित्वा च सिंहनादान्प्रचक्रतुः ॥ २९
समुद्यतकराभ्यां तौ द्विपाभ्यां कृतिनावुभौ ।
वातोद्धूतपताकाभ्यां युयुधाते महाबलौ ॥ ३०
तावन्योन्यस्य धनुषी छित्त्वान्योन्यं विनेदतुः ।
शक्तितोमरवर्षेण प्रावृण्मेघाविवाम्बुभिः ॥ ३१
क्षेमधूर्तिस्तदा भीमं तोमरेण स्तनान्तरे ।
निर्बिभेद तु वेगेन षड्भिश्चाप्यपरैर्नदन् ॥ ३२
स भीमसेनः शुशुभे तोमरैरङ्गमाश्रितैः ।
क्रोधदीप्तवपुर्मेघैः सप्तसप्तिरिवांशुमान् ॥ ३३
ततो भास्करवर्णाभमञ्जोगतिमयस्मयम् ।

ससर्ज तोमरं भीमः प्रत्यमित्राय यत्नवान् ॥ ३४
ततः कुलूताधिपतिश्चापमायम्य सायकैः ।
दशभिस्तोमरं छित्त्वा शक्त्या विव्याध पाण्डवम् ॥
अथ कार्मुकमादाय महाजलदनिस्वनम् ।
रिपोरभ्यर्दयन्नागमुन्मदः पाण्डवः शरैः ॥ ३६
स शरौघार्दितो नागो भीमसेनेन संयुगे ।
निगृह्यमाणो नातिष्ठद्वातध्वस्त इवाम्बुदः ॥ ३७
तमभ्यधावद्द्विरदं भीमसेनस्य नागराट् ।
महावातेरितं मेघं वातोद्धूत इवाम्बुदः ॥ ३८
संनिवर्त्यात्मनो नागं क्षेमधूर्तिः प्रयत्नतः ।
विव्याधाभिद्रुतं बाणैर्भीमसेनं सकुञ्जरम् ॥ ३९
ततः साधुविसृष्टेन क्षुरेण पुरुषर्षभः ।
छित्त्वा शरासनं शत्रोर्नागमामित्रमार्दयत् ॥ ४०
ततः खजाकया भीमं क्षेमधूर्तिः पराभिनत् ।
जघान चास्य द्विरदं नाराचैः सर्वमर्मसु ॥ ४१
पुरा नागस्य पतनादवप्लुत्य स्थितो महीम् ।
भीमसेनो रिपोर्नागं गदया समपोथयत् ॥ ४२
तस्मात्प्रमथितान्नागात्क्षेमधूर्तिमवद्रुतम् ।
उद्यतासिमुपायान्तं गदयाहन्वृकोदरः ॥ ४३
स पपात हतः सासिर्व्यसुः स्वमभितो द्विपम् ।
वज्रप्ररुग्णमचलं सिंहो वज्रहतो यथा ॥ ४४
निहतं नृपतिं दृष्ट्वा कुलूतानां यशस्करम् ।
प्राद्रवद्व्यथिता सेना त्वदीया भरतर्षभ ॥ ४५

इति श्रीमहाभारते कर्णपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

संजय उवाच ।

ततः कर्णो महेष्वासः पाण्डवानामनीकिनीम् ।
जघान समरे शूरः शरैः संनतपर्वभिः ॥ १
तथैव पाण्डवा राजंस्तव पुत्रस्य वाहिनीम् ।
कर्णस्य प्रमुखे क्रुद्धा विनिजघ्नुर्महारथाः ॥ २
कर्णो राजन्महाबाहुर्न्यवधीत्पाण्डवीं चमूम् ।
नाराचैरर्करश्म्याभैः कर्मारपरिमार्जितैः ॥ ३
तत्र भारत कर्णेन नाराचैस्ताडिता गजाः ।
नेदुः सेदुश्च मम्लुश्च बभ्रमुश्च दिशो दश ॥ ४
वध्यमाने बले तस्मिन्सूतपुत्रेण मारिष ।
नकुलोऽभ्यद्रवत्तूर्णं सूतपुत्रं महारणे ॥ ५
भीमसेनस्तथा द्रौणिं कुर्वाणं कर्म दुष्करम् ।
विन्दानुविन्दौ कैकेयौ सात्यकिः समवारयत् ॥ ६
श्रुतकर्माणमायान्तं चित्रसेनो महीपतिः ।
प्रतिविन्ध्यं तथा चित्रश्चित्रकेतनकार्मुकः ॥ ७
दुर्योधनस्तु राजानं धर्मपुत्रं युधिष्ठिरम् ।
संशप्तकगणान्क्रुद्धो अभ्यधावद्धनंजयः ॥ ८
धृष्टद्युम्नः कृपं चाथ तस्मिन्वीरवरक्षये ।
शिखण्डी कृतवर्माणं समासादयदच्युतम् ॥ ९
श्रुतकीर्तिस्तथा शल्यं माद्रीपुत्रः सुतं तव ।
दुःशासनं महाराज सहदेवः प्रतापवान् ॥ १०
केकयौ सात्यकिं युद्धे शरवर्षेण भास्वता ।
सात्यकिः केकयौ चैव छादयामास भारत ॥ ११
तावेनं भ्रातरौ वीरं जघ्नतुर्हृदये भृशम् ।
विषाणाभ्यां यथा नागौ प्रतिनागं महाहवे ॥ १२
शरसंभिन्नवर्माणौ तावुभौ भ्रातरौ रणे ।
सात्यकिं सत्यकर्माणं राजन्विव्यधतुः शरैः ॥ १३
तौ सात्यकिर्महाराज प्रहसन्सर्वतोदिशम् ।
छादयञ्शरवर्षेण वारयामास भारत ॥ १४
वार्यमाणौ ततस्तौ तु शैनेयशरवृष्टिभिः ।
शैनेयस्य रथं तूर्णं छादयामासतुः शरैः ॥ १५
तयोस्तु धनुषी चित्रे छित्त्वा शौरिर्महाहवे ।
अथ तौ सायकैस्तीक्ष्णैश्छादयामास दुःसहैः ॥१६
अथान्ये धनुषी मृष्टे प्रगृह्य च महाशरान् ।

सात्यकिं पूरयन्तौ तौ चेरतुर्लघु सुष्ठु च ॥ १७
ताभ्यां मुक्ता महाबाणाः कङ्कबर्हिणवाससः ।
द्योतयन्तो दिशः सर्वाः संपेतुः स्वर्णभूषणाः ॥१८
बाणान्धकारमभवत्तयो राजन्महाहवे ।
अन्योन्यस्य धनुश्चैव चिच्छिदुस्ते महारथाः ॥ १९
ततः क्रुद्धो महाराज सात्वतो युद्धदुर्मदः ।
धनुरन्यत्समादाय सज्यं कृत्वा च संयुगे ।
क्षुरप्रेण सुतीक्ष्णेन अनुविन्दशिरोऽहरत् ॥ २०
तच्छिरो न्यपतद्भूमौ कुण्डलोत्पीडितं महत् ।
शम्बरस्य शिरो यद्वन्निहतस्य महारणे ।
शोषयन्केकयान्सर्वाञ्जगामाशु वसुंधराम् ॥ २१
तं दृष्ट्वा निहतं शूरं भ्राता तस्य महारथः ।
सज्यमन्यद्धनुः कृत्वा शैनेयं प्रत्यवारयत् ॥ २२
स शक्त्या सात्यकिं विद्ध्वा स्वर्णपुङ्खैः शिलाशितैः ।
ननाद बलवन्नादं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २३
स सात्यकिं पुनः क्रुद्धः केकयानां महारथः ।
शरैरग्निशिखाकारैर्बाह्वोरुरसि चार्दयत् ॥ २४
स शरैः क्षतसर्वाङ्गः सात्वतः सत्त्वकोविदः ।
रराज समरे राजन्सपत्र इव किंशुकः ॥ २५
सात्यकिः समरे विद्धः केकयेन महात्मना ।
केकयं पञ्चविंशत्या विव्याध प्रहसन्निव ॥ २६
शतचन्द्रचिते गृह्य चर्मणी सुभुजौ तु तौ ।
व्यरोचेतां महारङ्गे निस्त्रिंशवरधारिणौ ।
यथा देवासुरे युद्धे जम्भशक्रौ महाबलौ ॥ २७
मण्डलानि ततस्तौ च विचरन्तौ महारणे ।
अन्योन्यमसिभिस्तूर्णं समाजघ्नतुराहवे ॥ २८
केकयस्य ततश्चर्म द्विधा चिच्छेद सात्वतः ।
सात्यकेश्च तथैवासौ चर्म चिच्छेद पार्थिवः ॥ २९
चर्म च्छित्त्वा तु कैकेयस्तारागणशतैर्वृतम् ।
चचार मण्डलान्येव गतप्रत्यागतानि च ॥ ३०
तं चरन्तं महारङ्गे निस्त्रिंशवरधारिणम् ।
अपहस्तेन चिच्छेद शैनेयस्त्वरयान्वितः ॥ ३१
सवर्मा केकयो राजन्द्विधा छिन्नो महाहवे ।
निपपात महेष्वासो वज्रनुन्न इवाचलः ॥ ३२
तं निहत्य रणे शूरः शैनेयो रथसत्तमः ।
युधामन्यो रथं तूर्णमारुरोह परंतपः ॥ ३३
ततोऽन्यं रथमास्थाय विधिवत्कल्पितं पुनः ।
केकयानां महत्सैन्यं व्यधमत्सात्यकिः शरैः ॥ ३४
सा वध्यमाना समरे केकयस्य महाचमूः ।
तमुत्सृज्य रथं शत्रुं प्रदुद्राव दिशो दश ॥ ३५

इति श्रीमहाभारते कर्णपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

संजय उवाच ।

श्रुतकर्मा महाराज चित्रसेनं महीपतिम् ।
आजघ्ने समरे क्रुद्धः पञ्चाशद्भिः शिलीमुखैः ॥ १
अभिसारस्तु तं राजा नवभिर्निशितैः शरैः ।
श्रुतकर्माणमाहत्य सूतं विव्याध पञ्चभिः ॥ २
श्रुतकर्मा ततः क्रुद्धश्चित्रसेनं चमूमुखे ।
नाराचेन सुतीक्ष्णेन मर्मदेशे समर्दयत् ॥ ३
एतस्मिन्नन्तरे चैनं श्रुतकीर्तिर्महायशाः ।
नवत्या जगतीपालं छादयामास पत्रिभिः ॥ ४
प्रतिलभ्य ततः संज्ञां चित्रसेनो महारथः ।
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ॥ ५
सोऽन्यत्कार्मुकमादाय वेगघ्नं रुक्मभूषणम् ।
चित्ररूपतरं चक्रे चित्रसेनं शरोर्मिभिः ॥ ६
स शरैश्चित्रितो राजंश्चित्रमाल्यधरो युवा ।
युवेव समशोभत्स गोष्ठीमध्ये स्वलंकृतः ॥ ७
श्रुतकर्माणमथ वै नाराचेन स्तनान्तरे ।
बिभेद समरे क्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ८

श्रुतकर्मापि समरे नाराचेन समर्दितः ।
सुस्राव रुधिरं भूरि गैरिकाम्भ इवाचलः ॥ ९
ततः स रुधिराक्ताङ्गो रुधिरेण कृतच्छविः ।
रराज समरे राजन्सपुष्प इव किंशुकः ॥ १०
श्रुतकर्मा ततो राजञ्शत्रूणां समभिद्रुतः ।
शत्रुसंवरणं कृत्वा द्विधा चिच्छेद कार्मुकम् ॥ ११
अथैनं छिन्नधन्वानं नाराचानां त्रिभिः शतैः ।
विव्याध भरतश्रेष्ठ श्रुतकर्मा महायशाः ॥ १२
ततोऽपरेण भल्लेन भृशं तीक्ष्णेन सत्वरः ।
जहार सशिरस्त्राणं शिरस्तस्य महात्मनः ॥ १३
तच्छिरो न्यपतद्भूमौ सुमहच्चित्रवर्मणः ।
यदृच्छया यथा चन्द्रश्च्युतः स्वर्गान्महीतले ॥ १४
राजानं निहतं दृष्ट्वा अभिसारं च मारिष ।
अभ्यद्रवन्त वेगेन चित्रसेनस्य सैनिकाः ॥ १५
ततः क्रुद्धो महेष्वासस्तत्सैन्यं प्राद्रवच्छरैः ।
अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट् ।
द्रावयन्निषुभिस्तूर्णं श्रुतकर्मा व्यरोचत ॥ १६
प्रतिविन्ध्यस्ततश्चित्रं भित्त्वा पञ्चभिराशुगैः ।
सारथिं त्रिभिरानर्च्छद्ध्वजमेकेषुणा ततः ॥ १७
तं चित्रो नवभिर्भल्लैर्बाह्वोरुरसि चार्दयत् ।
स्वर्णपुङ्खैः शिलाधौतैः कङ्कबर्हिणवाजितैः ॥ १८
प्रतिविन्ध्यो धनुस्तस्य छित्त्वा भारत सायकैः ।
पञ्चभिर्निशितैर्बाणैरथैनं संप्रजघ्निवान् ॥ १९
ततः शक्तिं महाराज हेमदण्डां दुरासदाम् ।
प्राहिणोत्तव पुत्राय घोरामग्निशिखामिव ॥ २०
तामापतन्तीं सहसा शक्तिमुल्कामिवाम्बरात् ।
द्विधा चिच्छेद समरे प्रतिविन्ध्यो हसन्निव ॥२१
सा पपात तदा छिन्ना प्रतिविन्ध्यशरैः शितैः ।
युगान्ते सर्वभूतानि त्रासयन्ती यथाशनिः ॥ २२
शक्तिं तां प्रहतां दृष्ट्वा चित्रो गृह्य महागदाम् ।
प्रतिविन्ध्याय चिक्षेप रुक्मजालविभूषिताम् ॥ २३
सा जघान हयांस्तस्य सारथिं च महारणे ।
रथं प्रमृद्य वेगेन धरणीमन्वपद्यत ॥ २४
एतस्मिन्नेव काले तु रथादाप्लुत्य भारत ।
शक्तिं चिक्षेप चित्राय स्वर्णघण्टामलंकृताम् ॥ २५
तामापतन्तीं जग्राह चित्रो राजन्महामनाः ।
ततस्तामेव चिक्षेप प्रतिविन्ध्याय भारत ॥ २६
समासाद्य रणे शूरं प्रतिविन्ध्यं महाप्रभा ।
निर्भिद्य दक्षिणं बाहुं निपपात महीतले ।
पतिताभासयच्चैव तं देशमशनिर्यथा ॥ २७
प्रतिविन्ध्यस्ततो राजंस्तोमरं हेमभूषितम् ।
प्रेषयामास संक्रुद्धश्चित्रस्य वधकाम्यया ॥ २८
स तस्य देहावरणं भित्त्वा हृदयमेव च ।
जगाम धरणीं तूर्णं महोरग इवाशयम् ॥ २९
स पपात तदा राजंस्तोमरेण समाहतः ।
प्रसार्य विपुलौ बाहू पीनौ परिघसंनिभौ ॥ ३०
चित्रं संप्रेक्ष्य निहतं तावका रणशोभिनः ।
अभ्यद्रवन्त वेगेन प्रतिविन्ध्यं समन्ततः ॥ ३१
सृजन्तो विविधान्बाणाञ्शतघ्नीश्च सकिङ्किणीः ।
त एनं छादयामासुः सूर्यमभ्रगणा इव ॥ ३२
तानपास्य महाबाहुः शरजालेन संयुगे ।
व्यद्रावयत्तव चमूं वज्रहस्त इवासुरीम् ॥ ३३
ते वध्यमानाः समरे तावकाः पाण्डवैर्नृप ।
विप्रकीर्यन्त सहसा वातनुन्ना घना इव ॥ ३४
विप्रद्रुते बले तस्मिन्वध्यमाने समन्ततः ।
द्रौणिरेकोऽभ्ययात्तूर्णं भीमसेनं महाबलम् ॥ ३५
ततः समागमो घोरो बभूव सहसा तयोः ।
यथा देवासुरे युद्धे वृत्रवासवयोरभूत् ॥ ३६

इति श्रीमहाभारते कर्णपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

संजय उवाच ।

भीमसेनं ततो द्रौणी राजन्विव्याध पत्रिणा ।
त्वरया परया युक्तो दर्शयन्नस्त्रलाघवम् ॥ १
अथैनं पुनराजघ्ने नवत्या निशितैः शरैः ।
सर्वमर्माणि संप्रेक्ष्य मर्मज्ञो लघुहस्तवत् ॥ २
भीमसेनः समाकीर्णो द्रौणिना निशितैः शरैः ।
रराज समरे राजन्रश्मिवानिव भास्करः ॥ ३
ततः शरसहस्रेण सुप्रयुक्तेन पाण्डवः ।
द्रोणपुत्रमवच्छाद्य सिंहनादममुञ्चत ॥ ४
शरैः शरांस्ततो द्रौणिः संवार्य युधि पाण्डवम् ।
ललाटेऽभ्यहनद्राजन्नाराचेन स्मयन्निव ॥ ५
ललाटस्थं ततो बाणं धारयामास पाण्डवः ।
यथा शृङ्गं वने दृप्तः खड्गो धारयते नृप ॥ ६
ततो द्रौणिं रणे भीमो यतमानं पराक्रमी ।
त्रिभिर्विव्याध नाराचैर्ललाटे विस्मयन्निव ॥ ७
ललाटस्थैस्ततो बाणैर्ब्राह्मणः स व्यरोचत ।
प्रावृषीव यथा सिक्तस्त्रिशृङ्गः पर्वतोत्तमः ॥ ८
ततः शरशतैर्द्रौणिमर्दयामास पाण्डवः ।
न चैनं कम्पयामास मातरिश्वेव पर्वतम् ॥ ९
तथैव पाण्डवं युद्धे द्रौणिः शरशतैः शितैः ।
नाकम्पयत संहृष्टो वार्योघ इव पर्वतम् ॥ १०
तावन्योन्यं शरैर्घोरैश्छादयानौ महारथौ ।
रथचर्यागतौ शूरौ शुशुभाते रणोत्कटौ ॥ ११
आदित्याविव संदीप्तौ लोकक्षयकरावुभौ ।
स्वरश्मिभिरिवान्योन्यं तापयन्तौ शरोत्तमैः ॥ १२
कृतप्रतिकृते यत्नं कुर्वाणौ च महारणे ।
कृतप्रतिकृते यत्नं चक्राते तावभीतवत् ॥ १३
व्याघ्राविव च संग्रामे चेरतुस्तौ महारथौ ।
शरदंष्ट्रौ दुराधर्षौ चापव्यात्तौ भयानकौ ॥ १४
अभूतां तावदृश्यौ च शरजालैः समन्ततः ।
मेघजालैरिव च्छन्नौ गगने चन्द्रभास्करौ ॥ १५
प्रकाशौ च मुहूर्तेन तत्रैवास्तामरिंदमौ ।
विमुक्तौ मेघजालेन शशिसूर्यौ यथा दिवि ॥ १६
अपसव्यं ततश्चक्रे द्रौणिस्तत्र वृकोदरम् ।
किरञ्शरशतैरुग्रैर्धाराभिरिव पर्वतम् ॥ १७
न तु तन्ममृषे भीमः शत्रोर्विजयलक्षणम् ।
प्रतिचक्रे च तं राजन्पाण्डवोऽप्यपसव्यतः ॥ १८
मण्डलानां विभागेषु गतप्रत्यागतेषु च ।
बभूव तुमुलं युद्धं तयोस्तत्र महामृधे ॥ १९
चरित्वा विविधान्मार्गान्मण्डलं स्थानमेव च ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ २०
अन्योन्यस्य वधे यत्नं चक्रतुस्तौ महारथौ ।
ईषतुर्विरथं चैव कर्तुमन्योन्यमाहवे ॥ २१
ततो द्रौणिर्महास्त्राणि प्रादुश्चक्रे महारथः ।
तान्यस्त्रैरेव समरे प्रतिजघ्नेऽस्य पाण्डवः ॥ २२
ततो घोरं महाराज अस्त्रयुद्धमवर्तत ।
ग्रहयुद्धं यथा घोरं प्रजासंहरणे अभूत् ॥ २३
ते बाणाः समसज्जन्त क्षिप्तास्ताभ्यां तु भारत ।
द्योतयन्तो दिशः सर्वास्तच्च सैन्यं समन्ततः ॥ २४
बाणसंघावृतं घोरमाकाशं समपद्यत ।
उल्कापातकृतं यद्वत्प्रजानां संक्षये नृप ॥ २५
बाणाभिघातात्संजज्ञे तत्र भारत पावकः ।
सविस्फुलिङ्गो दीप्तार्चिः सोऽदहद्वाहिनीद्वयम् ॥२६
तत्र सिद्धा महाराज संपतन्तोऽब्रुवन्वचः ।
अति युद्धानि सर्वाणि युद्धमेतत्ततोऽधिकम् ॥ २७
सर्वयुद्धानि चैतस्य कलां नार्हन्ति षोडशीम् ।
नैतादृशं पुनर्युद्धं न भूतं न भविष्यति ॥ २८
अहो ज्ञानेन संयुक्तावुभौ चोग्रपराक्रमौ ।
अहो भीमे बलं भीममेतयोश्च कृतास्त्रता ॥ २९

अहो वीर्यस्य सारत्वमहो सौष्ठवमेतयोः ।
स्थितावेतौ हि समरे कालान्तकयमोपमौ ॥ ३०
शूरौ द्वाविव संभूतौ यथा द्वाविव भास्करौ ।
यमौ वा पुरुषव्याघ्रौ घोररूपाविमौ रणे ॥ ३१
श्रूयन्ते स्म तदा वाचः सिद्धानां वै मुहुर्मुहुः ।
सिंहनादश्च संजज्ञे समेतानां दिवौकसाम् ।
अद्भुतं चाप्यचिन्त्यं च दृष्ट्वा कर्म तयोर्मृधे ॥ ३२
तौ शूरौ समरे राजन्परस्परकृतागसौ ।
परस्परमुदैक्षेतां क्रोधादुद्वृत्य चक्षुषी ॥ ३३
क्रोधरक्तेक्षणौ तौ तु क्रोधात्प्रस्फुरिताधरौ ।
क्रोधात्संदष्टदशनौ संदष्टदशनच्छदौ ॥ ३४
अन्योन्यं छादयन्तौ स्म शरवृष्ट्या महारथौ ।
शराम्बुधारौ समरे शस्त्रविद्युत्प्रकाशिनौ ॥ ३५
तावन्योन्यं ध्वजौ विद्ध्वा सारथी च महारथौ ।
अन्योन्यस्य हयान्विद्ध्वा बिभिदाते परस्परम् ॥ ३६
ततः क्रुद्धौ महाराज बाणौ गृह्य महाहवे ।
उभौ चिक्षिपतुस्तूर्णमन्योन्यस्य वधैषिणौ ॥ ३७
तौ सायकौ महाराज द्योतमानौ चमूमुखे ।
आजघ्नाते समासाद्य वज्रवेगौ दुरासदौ ॥ ३८
तौ परस्परवेगाच्च शराभ्यां च भृशाहतौ ।
निपेततुर्महावीरौ स्वरथोपस्थयोस्तदा ॥ ३९
ततस्तु सारथिर्ज्ञात्वा द्रोणपुत्रमचेतनम् ।
अपोवाह रणाद्राजन्सर्वक्षत्रस्य पश्यतः ॥ ४०
तथैव पाण्डवं राजन्विह्वलन्तं मुहुर्मुहुः ।
अपोवाह रथेनाजौ सारथिः शत्रुतापनम् ॥ ४१

इति श्रीमहाभारते कर्णपर्वणि
एकोदशोऽध्यायः ॥ ११ ॥

१२

धृतराष्ट्र उवाच ।

यथा संशप्तकैः सार्धमर्जुनस्याभवद्रणः ।
अन्येषां च मदीयानां पाण्डवैस्तद्ब्रवीहि मे ॥ १

संजय उवाच ।

शृणु राजन्यथावृत्तं संग्रामं ब्रुवतो मम ।
वीराणां शत्रुभिः सार्धं देहपाप्मप्रणाशनम् ॥ २
पार्थः संशप्तकगणं प्रविश्यार्णवसंनिभम् ।
व्यक्षोभयदमित्रघ्नो महावात इवार्णवम् ॥ ३
शिरांस्युन्मथ्य वीराणां शितैर्भल्लैर्धनंजयः ।
पूर्णचन्द्राभवक्त्राणि स्वक्षिभ्रूदशनानि च ।
संतस्तार क्षितिं क्षिप्रं विनालैर्नलिनैरिव ॥ ४
सुवृत्तानायतान्पुष्टांश्चन्दनागुरुभूषितान् ।
सायुधान्सतनुत्राणान्पञ्चास्योरगसंनिभान् ।
बाहून्क्षुरैरमित्राणां विचकर्तार्जुनो रणे ॥ ५
धुर्यान्धुर्यतरान्सूतान्ध्वजांश्चापानि सायकान् ।
पाणीनरत्नीनसकृद्भल्लैश्चिच्छेद पाण्डवः ॥ ६
द्विपान्हयान्रथांश्चैव सारोहानर्जुनो रणे ।
शरैरनेकसाहस्रै राजन्निन्ये यमक्षयम् ॥ ७
तं प्रवीरं प्रतीयाता नर्दमाना इवर्षभाः ।
वाशितार्थमभिक्रुद्धा हुंकृत्वा चाभिदुद्रुवुः ।
निघ्नन्तमभिजघ्नुस्ते शरैः शृङ्गैरिवर्षभाः ॥ ८
तस्य तेषां च तद्युद्धमभवल्लोमहर्षणम् ।
त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा ॥ ९
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ।
इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणान्जहार सः ॥ १०
छिन्नत्रिवेणुचक्राक्षान्हतयोधाश्वसारथीन् ।
विध्वस्तायुधतूणीरान्समुन्मथितकेतनान् ॥ ११
संछिन्नयोक्त्ररश्मीकान्वित्रिवेणून्विकूबरान् ।
विध्वस्तबन्धुरयुगान्विशस्तायुधमण्डलान् ।
रथान्विशकलीकुर्वन्महाभ्राणीव मारुतः ॥ १२
विस्मापयन्प्रेक्षणीयं द्विषतां भयवर्धनम् ।
महारथसहस्रस्य समं कर्मार्जुनोऽकरोत् ॥ १३

सिद्धदेवर्षिसंघाश्च चारणाश्चैव तुष्टुवुः ।
देवदुन्दुभयो नेदुः पुष्पवर्षाणि चापतन् ।
केशवार्जुनयोर्मूर्ध्नि प्राह वाक्याशरीरिणी ॥ १४
चन्द्रार्कानिलवह्नीनां कान्तिदीप्तिबलद्युतीः ।
यौ सदा बिभ्रतुर्वीरौ ताविमौ केशवार्जुनौ ॥ १५
ब्रह्मेशानाविवाजय्यौ वीरावेकरथे स्थितौ ।
सर्वभूतवरौ वीरौ नरनारायणावुभौ ॥ १६
इत्येतन्महदाश्चर्यं दृष्ट्वा श्रुत्वा च भारत ।
अश्वत्थामा सुसंयत्तः कृष्णावभ्यद्रवद्रणे ॥ १७
अथ पाण्डवमस्यन्तं यमकालान्तकाञ्शरान् ।
सेषुणा पाणिनाहूय हसन्द्रौणिरथाब्रवीत् ॥ १८
यदि मां मन्यसे वीर प्राप्तमर्हमिवातिथिम् ।
ततः सर्वात्मनाद्य त्वं युद्धातिथ्यं प्रयच्छ मे ॥१९
एवमाचार्यपुत्रेण समाहूतो युयुत्सया ।
बहु मेनेऽर्जुनोऽऽत्मानमिदं चाह जनार्दनम् ॥ २०
संशप्तकाश्च मे वध्या द्रौणिराह्वयते च माम् ।
यदत्रानन्तरं प्राप्तं प्रशाधि त्वं महाभुज ॥ २१
एवमुक्तोऽवहत्पार्थं कृष्णो द्रोणात्मजान्तिकम् ।
जैत्रेण विधिनाहूतं वायुरिन्द्रमिवाध्वरे ॥ २२
समामन्त्र्यैकमनसा केशवो द्रौणिमब्रवीत् ।
अश्वत्थामन्स्थिरो भूत्वा प्रहराशु सहस्व च ॥ २३
निर्वेष्टुं भर्तृपिण्डं हि कालोऽयमुपजीविनाम् ।
सूक्ष्मो विवादो विप्राणां स्थूलौ क्षात्रौ जयाजयौ ॥
यां न संक्षमसे मोहाद्दिव्यां पार्थस्य सत्क्रियाम् ।
तामाप्तुमिच्छन्युध्यस्व स्थिरो भूत्वाद्य पाण्डवम् ॥
इत्युक्तो वासुदेवेन तथेत्युक्त्वा द्विजोत्तमः ।
विव्याध केशवं षष्ट्या नाराचैरर्जुनं त्रिभिः ॥ २६
तस्यार्जुनः सुसंक्रुद्धस्त्रिभिर्भल्लैः शरासनम् ।
चिच्छेदाथान्यदादत्त द्रौणिर्घोरतरं धनुः ॥ २७
सज्यं कृत्वा निमेषात्तद्विव्याधार्जुनकेशवौ ।
त्रिभिः शरैर्वासुदेवं सहस्रेण च पाण्डवम् ॥ २८
ततः शरसहस्राणि प्रयुतान्यर्बुदानि च ।
ससृजे द्रौणिरायस्तः संस्तभ्य च रणेऽर्जुनम् ॥२९
इषुधेर्धनुषो ज्याया अङ्गुलीभ्यश्च मारिष ।
बाह्वोः कराभ्यामुरसो वदनघ्राणनेत्रतः ॥ ३०
कर्णाभ्यां शिरसोऽङ्गेभ्यो लोमवर्त्मभ्य एव च ।
रथध्वजेभ्यश्च शरा निष्पेतुर्ब्रह्मवादिनः ॥ ३१
शरजालेन महता विद्ध्वा केशवपाण्डवौ ।
ननाद मुदितो द्रौणिर्महामेघौघनिस्वनः ॥ ३२
तस्य नानदतः श्रुत्वा पाण्डवोऽच्युतमब्रवीत् ।
पश्य माधव दौरात्म्यं द्रोणपुत्रस्य मां प्रति ॥ ३३
वधप्राप्तौ मन्यते नौ प्रवेश्य शरवेश्मनि ।
एषोऽस्य हन्मि संकल्पं शिक्षया च बलेन च ॥३४
अश्वत्थाम्नः शरानस्तांश्छित्त्वैकैकं त्रिधा त्रिधा ।
व्यधमद्भरतश्रेष्ठो नीहारमिव मारुतः ॥ ३५
ततः संशप्तकान्भूयः साश्वसूतरथद्विपान् ।
ध्वजपत्तिगणानुग्रैर्बाणैर्विव्याध पाण्डवः ॥ ३६
ये ये ददृशिरे तत्र यद्यद्रूपं यथा यथा ।
ते ते तत्तच्छरैर्व्याप्तं मेनिरेऽऽत्मानमेव च ॥ ३७
ते गाण्डीवप्रणुदिता नानारूपाः पतत्रिणः ।
क्रोशे साग्रे स्थितान्घ्नन्ति द्विपांश्च पुरुषान्रणे ॥३८
भल्लैश्छिन्नाः कराः पेतुः करिणां मदकर्षिणाम् ।
छिन्ना यथा परशुभिः प्रवृद्धाः शरदि द्रुमाः ॥ ३९
पश्चात्तु शैलवत्पेतुस्ते गजाः सह सादिभिः ।
वज्रिवज्रप्रमथिता यथैवाद्रिचयास्तथा ॥ ४०
गन्धर्वनगराकारान्विधिवत्कल्पितान्रथान् ।
विनीतजवनान्युक्तानास्थितान्युद्धदुर्मदान् ॥ ४१
शरैर्विशकलीकुर्वन्नमित्रानभ्यवीवृषत् ।
अलंकृतानश्वसादीन्पत्तींश्चाहन्धनंजयः ॥ ४२
धनंजययुगान्तार्कः संशप्तकमहार्णवम् ।

व्यशोषयत दुःशोषं तीव्रैः शरगभस्तिभिः ॥ ४३
पुनर्द्रौणिमहाशैलं नाराचैः सूर्यसंनिभैः ।
निर्बिभेद महावेगैस्त्वरन्वज्रीव पर्वतम् ॥ ४४
तमाचार्यसुतः क्रुद्धः साश्वयन्तारमाशुगैः ।
युयुत्सुर्नाशकद्योद्धुं पार्थस्तानन्तराच्छिनत् ॥ ४५
ततः परमसंक्रुद्धः काण्डकोशानवासृजत् ।
अश्वत्थामाभिरूपाय गृहानतिथये यथा ॥ ४६
अथ संशप्तकांस्त्यक्त्वा पाण्डवो द्रौणिमभ्ययात् ।
अपाङ्क्तेयमिव त्यक्त्वा दाता पाङ्क्तेयमर्थिनम् ॥ ४७
ततः समभवद्युद्धं शुक्राङ्गिरसवर्चसोः ।
नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव ॥ ४८
संतापयन्तावन्योन्यं दीप्तैः शरगभस्तिभिः ।
लोकत्रासकरावास्तां विमार्गस्थौ ग्रहाविव ॥ ४९
ततोऽविध्यद्भ्रुवोर्मध्ये नाराचेनार्जुनो भृशम् ।
स तेन विबभौ द्रौणिरूर्ध्वरश्मिर्यथा रविः ॥ ५०
अथ कृष्णौ शरशतैरश्वत्थाम्नार्दितौ भृशम् ।
सरश्मिजालनिकरौ युगान्तार्काविवासतुः ॥ ५१
ततोऽर्जुनः सर्वतोधारमस्त्र-
मवासृजद्वासुदेवाभिगुप्तः ।
द्रौणायनिं चाभ्यहनत्पृषत्कै-
र्वज्राग्निवैवस्वतदण्डकल्पैः ॥ ५२
स केशवं चार्जुनं चातितेजा
विव्याध मर्मस्वतिरौद्रकर्मा ।
बाणैः सुमुक्तैरतितीव्रवेगै-
र्यैराहतो मृत्युरपि व्यथेत ॥ ५३
द्रौणेरिषूनर्जुनः संनिवार्य
व्यायच्छतस्तद्द्विगुणैः सुपुङ्खैः ।
तं साश्वसूतध्वजमेकवीर-
मावृत्य संशप्तकसैन्यमार्छत् ॥ ५४
धनूंषि बाणानिषुधीर्धनुर्ज्याः
पाणीन्भुजान्पाणिगतं च शस्त्रम् ।
छत्राणि केतूंस्तुरगानथैषां
वस्त्राणि माल्यान्यथ भूषणानि ॥ ५५
चर्माणि वर्माणि मनोरथांश्च
प्रियाणि सर्वाणि शिरांसि चैव ।
चिच्छेद पार्थो द्विषतां प्रमुक्तै-
र्बाणैः स्थितानामपराङ्मुखानाम् ॥ ५६
सुकल्पिताः स्यन्दनवाजिनागाः
समास्थिताः कृतयत्नैर्नृवीरैः ।
पार्थेरितैर्बाणगणैर्निरस्ता-
स्तैरेव सार्धं नृवरैर्निपेतुः ॥ ५७
पद्मार्कपूर्णेन्दुसमाननानि
किरीटमालामुकुटोत्कटानि ।
भल्लार्धचन्द्रक्षुरहिंसितानि
प्रपेतुरुर्व्यां नृशिरांस्यजस्रम् ॥ ५८
अथ द्विपैर्देवपतिद्विपाभै-
र्देवारिदर्पोल्बणमन्युदर्पैः ।
कलिङ्गवङ्गाङ्गनिषादवीरा
जिघांसवः पाण्डवमभ्यधावन् ॥ ५९
तेषां द्विपानां विचकर्त पार्थो
वर्माणि मर्माणि करान्नियन्तॄन् ।
ध्वजाः पताकाश्च ततः प्रपेतु-
र्वज्राहतानीव गिरेः शिरांसि ॥ ६०
तेषु प्ररुग्णेषु गुरोस्तनूजं
बाणैः किरीटी नवसूर्यवर्णैः ।
प्रच्छादयामास महाभ्रजालै-
र्वायुः समुद्युक्तमिवांशुमन्तम् ॥ ६१
ततोऽर्जुनेषूनिषुभिर्निरस्य
द्रौणिः शरैरर्जुनवासुदेवौ ।
प्रच्छादयित्वा दिवि चन्द्रसूर्यौ

ननाद सोऽम्भोद इवातपान्ते ॥ ६२
तमर्जुनस्तांश्च पुनस्त्वदीया-
नभ्यर्दितस्तैरविकृत्तशस्त्रैः ।
बाणान्धकारं सहसैव कृत्वा
विव्याध सर्वानिषुभिः सुपुङ्खैः ॥ ६३
नाप्याददत्संदधन्नैव मुञ्च-
न्बाणान्रणेऽदृश्यत सव्यसाची ।
हतांश्च नागांस्तुरगान्पदाती-
न्संस्यूतदेहान्ददृशू रथांश्च ॥ ६४
संधाय नाराचवरान्दशाशु
द्रौणिस्त्वरन्नेकमिवोत्ससर्ज ।
तेषां च पञ्चार्जुनमभ्यविध्य-
न्पञ्चाच्युतं निर्बिभिदुः सुमुक्ताः ॥ ६५
तैराहतौ सर्वमनुष्यमुख्या-
वसृक्क्षरन्तौ धनदेन्द्रकल्पौ ।
समाप्तविद्येन यथाभिभूतौ
हतौ स्विदेतौ किमु मेनिरेऽन्ये ॥ ६६
अथार्जुनं प्राह दशार्हनाथः
प्रमाद्यसे किं जहि योधमेतम् ।
कुर्याद्धि दोषं समुपेक्षितोऽसौ
कष्टो भवेद्व्याधिरिवाक्रियावान् ॥ ६७
तथेति चोक्त्वाच्युतमप्रमादी
द्रौणिं प्रयत्नादिषुभिस्ततक्ष ।
छित्त्वाश्वरश्मींस्तुरगानविध्य-
त्ते तं रणादूहुरतीव दूरम् ॥ ६८
आवृत्य नेयेष पुनस्तु युद्धं
पार्थेन सार्धं मतिमान्विमृश्य ।
जानञ्जयं नियतं वृष्णिवीरे
धनंजये चाङ्गिरसां वरिष्ठः ॥ ६९
प्रतीपकाये तु रणादश्वत्थाम्नि हृते हयैः ।
मन्त्रौषधिक्रियादानैर्व्याधौ देहादिवाहृते ॥ ७०
संशप्तकानभिमुखौ प्रयातौ केशवार्जुनौ ।
वातोद्धूतपताकेन स्यन्दनेनौघनादिना ॥ ७१

इति श्रीमहाभारते कर्णपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

संजय उवाच ।

अथोत्तरेण पाण्डूनां सेनायां ध्वनिरुत्थितः ।
रथनागाश्वपत्तीनां दण्डधारेण वध्यताम् ॥ १
निवर्तयित्वा तु रथं केशवोऽर्जुनमब्रवीत् ।
वाहयन्नेव तुरगान्गरुडानिलरंहसः ॥ २
मागधोऽथाप्यतिक्रान्तो द्विरदेन प्रमाथिना ।
भगदत्तादनवरः शिक्षया च बलेन च ॥ ३
एनं हत्वा निहन्तासि पुनः संशप्तकानिति ।
वाक्यान्ते प्रापयत्पार्थं दण्डधारान्तिकं प्रति ॥ ४
स मागधानां प्रवरोऽङ्कुशग्रहो
ग्रहेष्वसह्यो विकचो यथा ग्रहः ।
सपत्नसेनां प्रममाथ दारुणो
महीं समग्रां विकचो यथा ग्रहः ॥ ५
सुकल्पितं दानवनागसंनिभं
महाभ्रसंह्रादममित्रमर्दनम् ।
रथाश्वमातङ्गगणान्सहस्रशः
समास्थितो हन्ति शरैर्द्विपानपि ॥ ६
रथानधिष्ठाय सवाजिसारथी-
न्रथांश्च पद्भिस्त्वरितो व्यपोथयत् ।
द्विपांश्च पद्भ्यां चरणैः करेण च
द्विपास्थितो हन्ति स कालचक्रवत् ॥ ७
नरांश्च कार्ष्णायसवर्मभूषणा-
न्निपात्य साश्वानपि पत्तिभिः सह ।
व्यपोथयद्दन्तिवरेण शुष्मिणा

सशब्दवत्स्थूलनडान्यथा तथा ॥ ८
अथार्जुनो ज्यातलनेमिनिस्वने
मृदङ्गभेरीबहुशङ्खनादिते ।
नराश्वमातङ्गसहस्रनादिते
रथोत्तमेनाभ्यपतद्द्विपोत्तमम् ॥ ९
ततोऽर्जुनं द्वादशभिः शरोत्तमै-
र्जनार्दनं षोडशभिः समार्दयत् ।
स दण्डधारस्तुरगांस्त्रिभिस्त्रिभि-
स्ततो ननाद प्रजहास चासकृत् ॥ १०
ततोऽस्य पार्थः सगुणेषुकार्मुकं
चकर्त भल्लैर्ध्वजमप्यलंकृतम् ।
पुनर्नियन्तॄन्सह पादगोप्तृभि-
स्ततस्तु चुक्रोध गिरिव्रजेश्वरः ॥ ११
ततोऽर्जुनं भिन्नकटेन दन्तिना
घनाघनेनानिलतुल्यरंहसा ।
अतीव चुक्षोभयिषुर्जनार्दनं
धनंजयं चाभिजघान तोमरैः ॥ १२
अथास्य बाहू द्विपहस्तसंनिभौ
शिरश्च पूर्णेन्दुनिभाननं त्रिभिः ।
क्षुरैः प्रचिच्छेद सहैव पाण्डव-
स्ततो द्विपं बाणशतैः समार्दयत् ॥ १३
स पार्थबाणैस्तपनीयभूषणैः
समारुचत्काञ्चनवर्मभृद्द्विपः ।
तथा चकाशे निशि पर्वतो यथा
दवाग्निना प्रज्वलितौषधिद्रुमः ॥ १४
स वेदनार्तोऽम्बुदनिस्वनो नदं-
श्चलन्भ्रमन्प्रस्खलितोऽऽतुरो द्रवन् ।
पपात रुग्णः सनियन्तृकस्तथा
यथा गिरिर्वज्रनिपातचूर्णितः ॥ १५
हिमावदातेन सुवर्णमालिना
हिमाद्रिकूटप्रतिमेन दन्तिना ।
हते रणे भ्रातरि दण्ड आव्रज-
ज्जिघांसुरिन्द्रावरजं धनंजयम् ॥ १६
स तोमरैरर्ककरप्रभैस्त्रिभि-
र्जनार्दनं पञ्चभिरेव चार्जुनम् ।
समर्पयित्वा विननाद चार्दयं-
स्ततोऽस्य बाहू विचकर्त पाण्डवः ॥ १७
क्षुरप्रकृत्तौ सुभृशं सतोमरौ
च्युताङ्गदौ चन्दनरूषितौ भुजौ ।
गजात्पतन्तौ युगपद्विरेजतु-
र्यथाद्रिशृङ्गात्पतितौ महोरगौ ॥ १८
अथार्धचन्द्रेण हृतं किरीटिना
पपात दण्डस्य शिरः क्षितिं द्विपात् ।
तच्छोणिताभं निपतद्विरेजे
दिवाकरोऽस्तादिव पश्चिमां दिशम् ॥ १९
अथ द्विपं श्वेतनगाग्रसंनिभं
दिवाकरांशुप्रतिमैः शरोत्तमैः ।
बिभेद पार्थः स पपात नानद-
न्हिमाद्रिकूटः कुलिशाहतो यथा ॥ २०
ततोऽपरे तत्प्रतिमा गजोत्तमा
जिगीषवः संयति सव्यसाचिनम् ।
तथा कृतास्तेन यथैव तौ द्विपौ
ततः प्रभग्नं सुमहद्द्विपोर्बलम् ॥ २१
गजा रथाश्वाः पुरुषाश्च संघशः
परस्परघ्नाः परिपेतुराहवे ।
परस्परप्रस्खलिताः समाहता
भृशं च तत्तत्कुलभाषिणो हताः ॥ २२
अथार्जुनं स्वे परिवार्य सैनिकाः
पुरंदरं देवगणा इवाब्रुवन् ।
अभैष्म यस्मान्मरणादिव प्रजाः

स वीर दिष्ट्या निहतस्त्वया रिपुः ॥ २३
न चेत्परित्रास्य इमाञ्जनान्भया-
द्विषद्भिरेवं बलिभिः प्रपीडितान् ।
तथाभविष्यद्द्विषतां प्रमोदनं
यथा हतेष्वेष्विह नोऽरिषु त्वया ॥ २४
इतीव भूयश्च सुहृद्भिरीरिता
निशम्य वाचः सुमनास्ततोऽर्जुनः ।
यथानुरूपं प्रतिपूज्य तं जनं
जगाम संशप्तकसंघहा पुनः ॥ २५

इति श्रीमहाभारते कर्णपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

संजय उवाच ।

प्रत्यागत्य पुनर्जिष्णुरहन्संशप्तकान् बहून् ।
वक्रानुवक्रगमनादङ्गारक इव ग्रहः ॥ १
पार्थबाणहता राजन्नराश्वरथकुञ्जराः ।
विचेलुर्बभ्रमुर्नेदुः पेतुर्मम्लुश्च मारिष ॥ २
धुर्यं धुर्यतरान्सूतान्रथांश्च परिसंक्षिपन् ।
पाणीन्पाणिगतं शस्त्रं बाहूनपि शिरांसि च ॥ ३
भल्लैः क्षुरैरर्धचन्द्रैर्वत्सदन्तैश्च पाण्डवः ।
चिच्छेदामित्रवीराणां समरे प्रतियुध्यताम् ॥ ४
वाशितार्थे युयुत्सन्तो वृषभा वृषभं यथा ।
आपतन्त्यर्जुनं शूराः शतशोऽथ सहस्रशः ॥ ५
तेषां तस्य च तद्युद्धमभवल्लोमहर्षणम् ।
त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा ॥ ६
तमविध्यत्त्रिभिर्बाणैर्दन्दशूकैरिवाहिभिः ।
उग्रायुधस्ततस्तस्य शिरः कायादपाहरत् ॥ ७
तेऽर्जुनं सर्वतः क्रुद्धा नानाशस्त्रैरवीवृषन् ।
मरुद्भिः प्रेषिता मेघा हिमवन्तमिवोष्णगे ॥ ८
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ।
सम्यगस्तैः शरैः सर्वान्सहितानहनद्बहून् ॥ ९
छिन्नत्रिवेणुजङ्घेषान्निहतपार्ष्णिसारथीन् ।
संछिन्नरश्मियोक्त्राक्षान्व्यनुकर्षयुगान्रथान् ।
विध्वस्तसर्वसंनाहान्बाणैश्चक्रेऽर्जुनस्त्वरन् ॥ १०
ते रथास्तत्र विध्वस्ताः परार्ध्या भान्त्यनेकशः ।
धनिनामिव वेश्मानि हतान्यग्न्यनिलाम्बुभिः ॥ ११
द्विपाः संभिन्नमर्माणो वज्राशनिसमैः शरैः ।
पेतुर्गिर्यग्रवेश्मानि वज्रवाताग्निभिर्यथा ॥ १२
सारोहास्तुरगाः पेतुर्बहवोऽर्जुनताडिताः ।
निर्जिह्वान्त्राः क्षितौ क्षीणा रुधिरार्द्राः सुदुर्दृशः ॥
नराश्वनागा नाराचैः संस्यूताः सव्यसाचिना ।
बभ्रमुश्चस्खलुः पेतुर्नेदुर्मम्लुश्च मारिष ॥ १४
अणकैश्च शिलाधौतैर्वज्राशनिविषोपमैः ।
शरैर्निजघ्निवान्पार्थो महेन्द्र इव दानवान् ॥ १५
महार्हवर्माभरणा नानारूपाम्बरायुधाः ।
सरथाः सध्वजा वीरा हताः पार्थेन शेरते ॥ १६
विजिताः पुण्यकर्माणो विशिष्टाभिजनश्रुताः ।
गताः शरीरैर्वसुधामूर्जितैः कर्मभिर्दिवम् ॥ १७
अथार्जुनरथं वीरास्त्वदीयाः समुपाद्रवन् ।
नानाजनपदाध्यक्षाः सगणा जातमन्यवः ॥ १८
उह्यमाना रथाश्वैस्ते पत्तयश्च जिघांसवः ।
समभ्यधावन्नस्यन्तो विविधं क्षिप्रमायुधम् ॥ १९
तदायुधमहावर्षं क्षिप्तं योधमहाम्बुदैः ।
व्यधमन्निशितैर्बाणैः क्षिप्रमर्जुनमारुतः ॥ २०
साश्वपत्तिद्विपरथं महाशस्त्रौघमप्लवम् ।
सहसा संतितीर्षन्तं पार्थं शस्त्रास्त्रसेतुना ॥ २१
अथाब्रवीद्वासुदेवः पार्थं किं क्रीडसेऽनघ ।
संशप्तकान्प्रमथ्यैतांस्ततः कर्णवधे त्वर ॥ २२
तथेत्युक्त्वार्जुनः क्षिप्रं शिष्टान्संशप्तकांस्तदा ।
आक्षिप्य शस्त्रेण बलाद्दैत्यानिन्द्र इवावधीत् ॥ २३

आदधत्संदधन्नेषून्दृष्टः कैश्चिद्रणेऽर्जुनः ।
विमुञ्चन्वा शराञ्शीघ्रं दृश्यते स्म हि कैरपि ॥२४
आश्चर्यमिति गोविन्दो ब्रुवन्नश्वानचोदयत् ।
हंसांसगौरास्ते सेनां हंसाः सर इवाविशन् ॥ २५
ततः संग्रामभूमिं तां वर्तमाने जनक्षये ।
अवेक्षमाणो गोविन्दः सव्यसाचिनमब्रवीत् ॥ २६
एष पार्थ महारौद्रो वर्तते भरतक्षयः ।
पृथिव्यां पार्थिवानां वै दुर्योधनकृते महान् ॥ २७
पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम् ।
महतामपविद्धानि कलापानिषुधीस्तथा ॥ २८
जातरूपमयैः पुङ्खैः शरांश्च नतपर्वणः ।
तैलधौतांश्च नाराचान्निर्मुक्तानिव पन्नगान् ॥ २९
हस्तिदन्तत्सरून्खड्गाञ्जातरूपपरिष्कृतान् ।
आकीर्णांस्तोमरांश्चापांश्चित्रान्हेमविभूषितान् ॥ ३०
वर्माणि चापविद्धानि रुक्मपृष्ठानि भारत ।
सुवर्णविकृतान्प्रासाञ्शक्तीः कनकभूषिताः ॥ ३१
जाम्बूनदमयैः पट्टैर्बद्धाश्च विपुला गदाः ।
जातरूपमयीश्चर्ष्टीः पट्टिशान्हेमभूषितान् ॥ ३२
दण्डैः कनकचित्रैश्च विप्रविद्धान्परश्वधान् ।
अयस्कुशान्तान्पतितान्मुसलानि गुरूणि च ॥ ३३
शतघ्नीः पश्य चित्राश्च विपुलान्परिघांस्तथा ।
चक्राणि चापविद्धानि मुद्गरांश्च बहून्रणे ॥ ३४
नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः ।
जीवन्त इव लक्ष्यन्ते गतसत्त्वास्तरस्विनः ॥ ३५
गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् ।
गजवाजिरथक्षुण्णान्पश्य योधान्सहस्रशः ॥ ३६
मनुष्यगजवाजीनां शरशक्त्यृष्टितोमरैः ।
निस्त्रिंशैः पट्टिशैः प्रासैर्नखरैर्लगुडैरपि ॥ ३७
शरीरैर्बहुधा भिन्नैः शोणितौघपरिप्लुतैः ।
गतासुभिरमित्रघ्न संवृता रणभूमयः ॥ ३८
बाहुभिश्चन्दनादिग्धैः साङ्गदैः शुभभूषणैः ।
सतलत्रैः सकेयूरैर्भाति भारत मेदिनी ॥ ३९
साङ्गुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः ।
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम् ॥ ४०
बद्धचूडामणिवरैः शिरोभिश्च सकुण्डलैः ।
निकृत्तैर्वृषभाक्षाणां विराजति वसुंधरा ॥ ४१
कबन्धैः शोणितादिग्धैश्छिन्नगात्रशिरोधरैः ।
भूर्भाति भरतश्रेष्ठ शान्तार्चिर्भिरिवाग्निभिः ॥ ४२
रथान्बहुविधान्भग्नान्हेमकिङ्किणिनः शुभान् ।
अश्वांश्च बहुधा पश्य शोणितेन परिप्लुतान् ॥ ४३
योधानां च महाशङ्खान्पाण्डुरांश्च प्रकीर्णकान् ।
निरस्तजिह्वान्मातङ्गाञ्शयानान्पर्वतोपमान् ॥ ४४
वैजयन्तीविचित्रांश्च हतांश्च गजयोधिनः ।
वारणानां परिस्तोमान्सुयुक्ताम्बरकम्बलान् ॥ ४५
विपाटिता विचित्राश्च रूपचित्राः कुथास्तथा ।
भिन्नाश्च बहुधा घण्टाः पतद्भिश्चूर्णिता गजैः ॥४६
वैडूर्यमणिदण्डांश्च पतितानङ्कुशान्भुवि ।
बद्धाः सादिध्वजाग्रेषु सुवर्णविकृताः कशाः ॥ ४७
विचित्रान्मणिचित्रांश्च जातरूपपरिष्कृतान् ।
अश्वास्तरपरिस्तोमान्राङ्कवान्पतितान्भुवि ॥ ४८
चूडामणीन्नरेन्द्राणां विचित्राः काञ्चनस्रजः ।
छत्राणि चापविद्धानि चामरव्यजनानि च ॥ ४९
चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः ।
क्लृप्तश्मश्रुभिरत्यर्थं वीराणां समलंकृतैः ।
वदनैः पश्य संछन्नां महीं शोणितकर्दमाम् ॥ ५०
सजीवांश्च नरान्पश्य कूजमानान्समन्ततः ।
उपास्यमानान्बहुभिर्न्यस्तशस्त्रैर्विशां पते ॥ ५१
ज्ञातिभिः सहितैस्तत्र रोदमानैर्मुहुर्मुहुः ।
व्युत्क्रान्तानपरान्योधांश्छादयित्वा तरस्विनः ।
पुनर्युद्धाय गच्छन्ति जयगृद्धाः प्रमन्यवः ॥ ५२

अपरे तत्र तत्रैव परिधावन्ति मानिनः ।
ज्ञातिभिः पतितैः शूरैर्याच्यमानास्तथोदकम् ॥ ५३
जलार्थं च गताः केचिन्निष्प्राणा बहवोऽर्जुन ।
संनिवृत्ताश्च ते शूरास्तान्दृष्ट्वैव विचेतसः ॥ ५४
जलं दृष्ट्वा प्रधावन्ति क्रोशमानाः परस्परम् ।
जलं पीत्वा मृतान्पश्य पिबतोऽन्यांश्च भारत ॥५५
परित्यज्य प्रियानन्ये बान्धवान्बान्धवप्रिय ।
व्युत्क्रान्ताः समदृश्यन्त तत्र तत्र महारणे ॥ ५६
पश्यापरान्नरश्रेष्ठ संदष्टौष्ठपुटान्पुनः ।
भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान्समन्ततः ॥ ५७
एतत्तवैवानुरूपं कर्मार्जुन महाहवे ।
दिवि वा देवराजस्य त्वया यत्कृतमाहवे ॥ ५८
एवं तां दर्शयन्कृष्णो युद्धभूमिं किरीटिने ।
गच्छन्नेवाशृणोच्छब्दं दुर्योधनबले महत् ॥ ५९
शङ्खदुन्दुभिनिर्घोषान्भेरीपणवमिश्रितान् ।
रथाश्वगजनादांश्च शस्त्रशब्दांश्च दारुणान् ॥ ६०
प्रविश्य तद्बलं कृष्णस्तुरगैर्वातवेगिभिः ।
पाण्ड्येनाभ्यर्दितां सेनां त्वदीयां वीक्ष्य विष्ठितः ॥
स हि नानाविधैर्बाणैरिष्वासप्रवरो युधि ।
न्यहनद्द्विषतां व्रातान्गतासूनन्तको यथा ॥ ६२
गजवाजिमनुष्याणां शरीराणि शितैः शरैः ।
भित्त्वा प्रहरतां श्रेष्ठो विदेहासूंश्चकार सः ॥ ६३
शत्रुप्रवीरैरस्तानि नानाशस्त्राणि सायकैः ।
भित्त्वा तानहनत्पाण्ड्यः शत्रूञ्शक्र इवासुरान् ॥६४

इति श्रीमहाभारते कर्णपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

धृतराष्ट्र उवाच ।
प्रोक्तस्त्वया पूर्वमेव प्रवीरो लोकविश्रुतः ।
न त्वस्य कर्म संग्रामे त्वया संजय कीर्तितम् ॥ १
तस्य विस्तरतो ब्रूहि प्रवीरस्याद्य विक्रमम् ।
शिक्षां प्रभावं वीर्यं च प्रमाणं दर्पमेव च ॥ २

संजय उवाच ।
द्रोणभीष्मकृपद्रौणिकर्णार्जुनजनार्दनान् ।
समाप्तविद्यान्धनुषि श्रेष्ठान्यान्मन्यसे युधि ॥ ३
तुल्यता कर्णभीष्माभ्यामात्मनो येन दृश्यते ।
वासुदेवार्जुनाभ्यां च न्यूनतां नात्मनीच्छति ॥ ४
स पाण्ड्यो नृपतिश्रेष्ठः सर्वशस्त्रभृतां वरः ।
कर्णस्यानीकमवधीत्परिभूत इवान्तकः ॥ ५
तदुदीर्णरथाश्वं च पत्तिप्रवरकुञ्जरम् ।
कुलालचक्रवद्भ्रान्तं पाण्ड्येनाधिष्ठितं बलम् ॥ ६
व्यश्वसूतध्वजरथान्विप्रविद्धायुधान्रिपून् ।
सम्यगस्तैः शरैः पाण्ड्यो वायुर्मेघानिवाक्षिपत् ॥७
द्विरदान्प्रहतप्रोथान्विपताकध्वजायुधान् ।
सपादरक्षानवधीद्वज्रेणारीनिवारिहा ॥ ८
सशक्तिप्रासतूणीरानश्वारोहान्हयानपि ।
पुलिन्दखशबाह्लीकान्निषादान्ध्रकतङ्गणान् ॥ ९
दाक्षिणात्यांश्च भोजांश्च क्रूरान्संग्रामकर्कशान् ।
विशस्त्रकवचान्बाणैः कृत्वा पाण्ड्योऽकरोद्गतासून् ॥
चतुरङ्गं बलं बाणैर्निघ्नन्तं पाण्ड्यमाहवे ।
दृष्ट्वा द्रौणिरसंभ्रान्तमसंभ्रान्ततरोऽभ्ययात् ॥ ११
आभाष्य चैनं मधुरमभि नृत्यन्नभीतवत् ।
प्राह प्रहरतां श्रेष्ठः स्मितपूर्वं समाह्वयन् ॥ १२
राजन्कमलपत्राक्ष प्रधानायुधवाहन ।
वज्रसंहननप्रख्य प्रधानबलपौरुष ॥ १३
मुष्टिश्लिष्टायुधाभ्यां च व्यायताभ्यां महद्धनुः ।
दोर्भ्यां विस्फारयन्भासि महाजलदवद्भृशम् ॥ १४
शरवर्षैर्महावेगैरमित्रानभिवर्षतः ।
मदन्यं नानुपश्यामि प्रतिवीरं तवाहवे ॥ १५
रथद्विरदपत्त्यश्वानेकः प्रमथसे बहून् ।

मृगसंघानिवारण्ये विभीर्भीमबलो हरिः ॥ १६
महता रथघोषेण दिवं भूमिं च नादयन् ।
वर्षान्ते सस्यहा पीथो भाभिरापूरयन्निव ॥ १७
संस्पृशानः शरांस्तीक्ष्णांस्तूणादाशीविषोपमान् ।
मयैवैकेन युध्यस्व त्र्यम्बकेणान्धको यथा ॥ १८
एवमुक्तस्तथेत्युक्त्वा प्रहरेति च ताडितः ।
कर्णिना द्रोणतनयं विव्याध मलयध्वजः ॥ १९
मर्मभेदिभिरत्युग्रैर्बाणैरग्निशिखोपमैः ।
स्मयन्नभ्यहनद्द्रौणिः पाण्ड्यमाचार्यसत्तमः ॥ २०
ततो नवापरांस्तीक्ष्णान्नाराचान्कङ्कवाससः ।
गत्या दशम्या संयुक्तानश्वत्थामा व्यवासृजत् ॥२१
तेषां पञ्चाच्छिनत्पाण्ड्यः पञ्चभिर्निशितैः शरैः ।
चत्वारोऽभ्याहनन्वाहानाशु ते व्यसवोऽभवन् ॥२२
अथ द्रोणसुतस्येषूंस्तांश्छित्त्वा निशितैः शरैः ।
धनुर्ज्यां विततां पाण्ड्यश्चिच्छेदादित्यवर्चसः ॥२३
विज्यं धनुरथाधिज्यं कृत्वा द्रौणिरमित्रहा ।
ततः शरसहस्राणि प्रेषयामास पाण्ड्यतः ।
इषुसंबाधमाकाशमकरोद्दिश एव च ॥ २४
ततस्तानस्यतः सर्वान्द्रौणेर्बाणान्महात्मनः ।
जानानोऽप्यक्षयान्पाण्ड्योऽशातयत्पुरुषर्षभः ॥ २५
प्रहितांस्तान्प्रयत्नेन छित्त्वा द्रौणेरिषूनरिः ।
चक्ररक्षौ ततस्तस्य प्राणुदन्निशितैः शरैः ॥ २६
अथारेर्लाघवं दृष्ट्वा मण्डलीकृतकार्मुकः ।
प्रास्यद्द्रोणसुतो बाणान्वृष्टिं पूषानुजो यथा ॥ २७
अष्टावष्टगवान्यूहुः शकटानि यदायुधम् ।
अह्नस्तदष्टभागेन द्रौणिश्चिक्षेप मारिष ॥ २८
तमन्तकमिव क्रुद्धमन्तकालान्तकोपमम् ।
ये ये ददृशिरे तत्र विसंज्ञाः प्रायशोऽभवन् ॥२९
पर्जन्य इव घर्मान्ते वृष्ट्या साद्रिद्रुमां महीम् ।
आचार्यपुत्रस्तां सेनां बाणवृष्ट्याभ्यवीवृषत् ॥ ३०
द्रौणिपर्जन्यमुक्तां तां बाणवृष्टिं सुदुःसहाम् ।
वायव्यास्त्रेण स क्षिप्रं रुद्ध्वा पाण्ड्यानिलोऽनदत् ॥
तस्य नानदतः केतुं चन्दनागुरुभूषितम् ।
मलयप्रतिमं द्रौणिश्छित्त्वाश्वांश्चतुरोऽहनत् ॥ ३२
सूतमेकेषुणा हत्वा महाजलदनिस्वनम् ।
धनुश्छित्त्वार्धचन्द्रेण व्यधमत्तिलशो रथम् ॥ ३३
अस्त्रैरस्त्राणि संवार्य छित्त्वा सर्वायुधानि च ।
प्राप्तमप्यहितं द्रौणिर्न जघान रणेप्सया ॥ ३४
हतेश्वरो दन्तिवरः सुकल्पित-
स्त्वराभिसृष्टः प्रतिशर्मगो बली ।
तमध्यतिष्ठन्मलयेश्वरो महा-
न्यथाद्रिशृङ्गं हरिरुन्नदंस्तथा ॥ ३५
स तोमरं भास्कररश्मिसंनिभं
बलास्त्रसर्गोत्तमयत्नमन्युभिः ।
ससर्ज शीघ्रं प्रतिपीडयन्गजं
गुरोः सुतायाद्रिपतीश्वरो नदन् ॥ ३६
मणिप्रतानोत्तमवज्रहाटकै-
रलंकृतं चांशुकमाल्यमौक्तिकैः ।
हतोऽस्यसावित्यसकृन्मुदा नद-
न्पराभिनद्द्रौणिवराङ्गभूषणम् ॥ ३७
तदर्कचन्द्रग्रहपावकत्विषं
भृशाभिघातात्पतितं विचूर्णितम् ।
महेन्द्रवज्राभिहतं महावनं
यथाद्रिशृङ्गं धरणीतले तथा ॥ ३८
ततः प्रजज्वाल परेण मन्युना
पदाहतो नागपतिर्यथा तथा ।
समादधे चान्तकदण्डसंनिभा-
निषूनमित्रान्तकरांश्चतुर्दश ॥ ३९
द्विपस्य पादाग्रकरान्स पञ्चभि-
र्नृपस्य बाहू च शिरोऽथ च त्रिभिः ।

जघान षड्भिः षड्तूत्तमत्विषः
स पाण्ड्यराजानुचरान्महारथान् ॥ ४०
सुदीर्घवृत्तौ वरचन्दनोक्षितौ
सुवर्णमुक्तामणिवज्रभूषितौ ।
भुजौ धरायां पतितौ नृपस्य तौ
विवेष्टतुस्तार्क्ष्यहताविवोरगौ ॥ ४१
शिरश्च तत्पूर्णशशिप्रभाननं
सरोषताम्रायतनेत्रमुन्नसम् ।
क्षितौ विबभ्राज पतत्सकुण्डलं
विशाखयोर्मध्यगतः शशी यथा ॥ ४२
समाप्तविद्यं तु गुरोः सुतं नृपः
समाप्तकर्माणमुपेत्य ते सुतः ।
सुहृद्वृतोऽत्यर्थमपूजयन्मुदा
जिते बलौ विष्णुमिवामरेश्वरः ॥ ४३

इति श्रीमहाभारते कर्णपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

धृतराष्ट्र उवाच ।

पाण्ड्ये हते किमकरोदर्जुनो युधि संजय ।
एकवीरेण कर्णेन द्रावितेषु परेषु च ॥ १
समाप्तविद्यो बलवान्युक्तो वीरश्च पाण्डवः ।
सर्वभूतेष्वनुज्ञातः शंकरेण महात्मना ॥ २
तस्मान्महद्भयं तीव्रममित्रघ्नाद्धनंजयात् ।
स यत्तत्राकरोत्पार्थस्तन्ममाचक्ष्व संजय ॥ ३

संजय उवाच ।

हते पाण्ड्येऽर्जुनं कृष्णस्त्वरन्नाह वचो हितम् ।
पश्यातिमान्यं राजानमपयातांश्च पाण्डवान् ॥ ४
अश्वत्थाम्नश्च संकल्पाद्धताः कर्णेन सृञ्जयाः ।
तथाश्वनरनागानां कृतं च कदनं महत् ।
इत्याचष्ट सुदुर्धर्षो वासुदेवः किरीटिने ॥ ५
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातुर्घोरं महद्भयम् ।
वाहयाश्वान्हृषीकेश क्षिप्रमित्याह पाण्डवः ॥ ६
ततः प्रायाद्धृषीकेशो रथेनाप्रतियोधिना ।
दारुणश्च पुनस्तत्र प्रादुरासीत्समागमः ॥ ७
ततः प्रववृते भूयः संग्रामो राजसत्तम ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ ८
धनूंषि बाणान्परिघानसितोमरपट्टिशान् ।
मुसलानि भुशुण्डीश्च शक्तिऋष्टिपरश्वधान् ॥ ९
गदाः प्रासानसीन्कुन्तान्भिण्डिपालान्महाङ्कुशान् ।
प्रगृह्य क्षिप्रमापेतुः परस्परजिगीषया ॥ १०
बाणज्यातलशब्देन द्यां दिशः प्रदिशो वियत् ।
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान् ॥ ११
तेन शब्देन महता संहृष्टाश्चक्रुराहवम् ।
वीरा वीरैर्महाघोरं कलहान्तं तितीर्षवः ॥ १२
ज्यातलत्रधनुःशब्दाः कुञ्जराणां च बृंहितम् ।
ताडितानां च पततां निनादः सुमहानभूत् ॥ १३
बाणशब्दांश्च विविधाञ्शूराणामभिगर्जताम् ।
श्रुत्वा शब्दं भृशं त्रेसुर्जग्मुर्मम्लुश्च भारत ॥ १४
तेषां नानद्यतां चैव शस्त्रवृष्टिं च मुञ्चताम् ।
बहूनाधिरथिः कर्णः प्रममाथ रणेषुभिः ॥ १५
पञ्च पाञ्चालवीराणां रथान्दश च पञ्च च ।
साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयम् ॥ १६
योधमुख्या महावीर्याः पाण्डूनां कर्णमाहवे ।
शीघ्रास्त्रा दिवमावृत्य परिवव्रुः समन्ततः ॥ १७
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोडयन् ।
विजगाहेऽण्डजापूर्णां पद्मिनीमिव यूथपः ॥ १८
द्विषन्मध्यमवस्कन्द्य राधेयो धनुरुत्तमम् ।
विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयत् ॥ १९
चर्मवर्माणि संछिन्द्य निर्वापमिव देहिनाम् ।
विषेहुर्नास्य संपर्कं द्वितीयस्य पतत्रिणः ॥ २०

वर्मदेहासुमथनैर्धनुषः प्रच्युतैः शरैः ।
मौर्व्या तलत्रैर्न्यवधीत्कशया वाजिनो यथा ॥ २१
पाण्डुसृञ्जयपाञ्चालाञ्शरगोचरमानयत् ।
ममर्द कर्णस्तरसा सिंहो मृगगणानिव ॥ २२
ततः पाञ्चालपुत्राश्च द्रौपदेयाश्च मारिष ।
यमौ च युयुधानश्च सहिताः कर्णमभ्ययुः ॥ २३
व्यायच्छमानाः सुभृशं कुरुपाण्डवसृञ्जयाः ।
प्रियानसून्रणे त्यक्त्वा योधा जग्मुः परस्परम् ॥२४
सुसंनद्धाः कवचिनः सशिरस्त्राणभूषणाः ।
गदाभिर्मुसलैश्चान्ये परिघैश्च महारथाः ॥ २५
समभ्यधावन्त भृशं देवा दण्डैरिवोद्यतैः ।
नदन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष ॥ २६
ततो निजघ्नुरन्योन्यं पेतुश्चाहवताडिताः ।
वमन्तो रुधिरं गात्रैर्विमस्तिष्केक्षणा युधि ॥ २७
दन्तपूर्णैः सरुधिरैर्वक्त्रैर्दाडिमसंनिभैः ।
जीवन्त इव चाप्येते तस्थुः शस्त्रोपबृंहिताः ॥ २८
परस्परं चाप्यपरे पट्टिशैरसिभिस्तथा ।
शक्तिभिर्भिण्डिपालैश्च नखरप्रासतोमरैः ॥ २९
ततक्षुश्चिच्छिदुश्चान्ये बिभिदुश्चिक्षिपुस्तथा ।
संचकर्तुश्च जघ्नुश्च क्रुद्धा निर्बिभिदुश्च ह ॥ ३०
पेतुरन्योन्यनिहता व्यसवो रुधिरोक्षिताः ।
क्षरन्तः स्वरसं रक्तं प्रकृत्ताश्चन्दना इव ॥ ३१
रथै रथा विनिहता हस्तिनश्चापि हस्तिभिः ।
नरा नरवरैः पेतुरश्वाश्चाश्वैः सहस्रशः ॥ ३२
ध्वजाः शिरांसि च्छत्राणि द्विपहस्ता नृणां भुजाः ।
क्षुरैर्भल्लार्धचन्द्रैश्च छिन्नाः शस्त्राणि तत्यजुः ॥ ३३
नरांश्च नागांश्च रथान्हयान्ममृदुराहवे ।
अश्वारोहैर्हताः शूराश्छिन्नहस्ताश्च दन्तिनः ॥ ३४
सपताका ध्वजाः पेतुर्विशीर्णा इव पर्वताः ।
पत्तिभिश्च समाप्लुत्य द्विरदाः स्यन्दनास्तथा ॥ ३५
प्रहता हन्यमानाश्च पतिताश्चैव सर्वशः ।
अश्वारोहाः समासाद्य त्वरिताः पत्तिभिर्हताः ।
सादिभिः पत्तिसंघाश्च निहता युधि शेरते ॥ ३६
मृदितानीव पद्मानि प्रम्लाना इव च स्रजः ।
हतानां वदनान्यासन्गात्राणि च महामते ॥ ३७
रूपाण्यत्यर्थकाम्यानि द्विरदाश्वनृणां नृप ।
समुन्नानीव वस्त्राणि प्रापुर्दुर्दर्शतां परम् ॥ ३८

इति श्रीमहाभारते कर्णपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

संजय उवाच ।

हस्तिभिस्तु महामात्रास्तव पुत्रेण चोदिताः ।
धृष्टद्युम्नं जिघांसन्तः क्रुद्धाः पार्षतमभ्ययुः ॥ १
प्राच्याश्च दाक्षिणात्याश्च प्रवीरा गजयोधिनः ।
अङ्गा वङ्गाश्च पुण्ड्राश्च मागधास्ताम्रलिप्तकाः ॥ २
मेकलाः कोशला मद्रा दशार्णा निषधास्तथा ।
गजयुद्धेषु कुशलाः कलिङ्गैः सह भारत ॥ ३
शरतोमरनाराचैर्वृष्टिमन्त इवाम्बुदाः ।
सिषिचुस्ते ततः सर्वे पाञ्चालाचलमाहवे ॥ ४
तान्संमिमर्दिषुर्नागान्पार्ष्ण्यङ्गुष्ठाङ्कुशैर्भृशम् ।
पोथितान्पार्षतो बाणैर्नाराचैश्चाभ्यवीवृषत् ॥ ५
एकैकं दशभिः षड्भिरष्टाभिरपि भारत ।
द्विरदानभिविव्याध क्षिप्तैर्गिरिनिभाञ्शरैः ।
प्रच्छाद्यमानो द्विरदैर्मेघैरिव दिवाकरः ॥ ६
पर्यासुः पाण्डुपाञ्चाला नदन्तो निशितायुधाः ।
तान्नागानभिवर्षन्तो ज्यातन्त्रीशरनादितैः ॥ ७
नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ।
सात्यकिश्च शिखण्डी च चेकितानश्च वीर्यवान् ॥८
ते म्लेच्छैः प्रेषिता नागा नरानश्वान्रथानपि ।
हस्तैराक्षिप्य ममृदुः पद्भिश्चाप्यतिमन्यवः ॥ ९

बिभिदुश्च विषाणाग्रैः समाक्षिप्य च चिक्षिपुः ।
विषाणलग्नैश्चाप्यन्ये परिपेतुर्विभीषणाः ॥ १०
प्रमुखे वर्तमानं तु द्विपं वङ्गस्य सात्यकिः ।
नाराचेनोग्रवेगेन भित्त्वा मर्मण्यपातयत् ॥ ११
तस्यावर्जितनागस्य द्विरदादुत्पतिष्यतः ।
नाराचेनाभिनद्वक्षः सोऽपतद्भुवि सात्यकेः ॥ १२
पुण्ड्रस्यापततो नागं चलन्तमिव पर्वतम् ।
सहदेवः प्रयत्नात्तैर्नाराचैर्व्यहनत्त्रिभिः ॥ १३
विपताकं वियन्तारं विवर्मध्वजजीवितम् ।
तं कृत्वा द्विरदं भूयः सहदेवोऽङ्गमभ्यगात् ॥ १४
सहदेवं तु नकुलो वारयित्वाङ्गमार्दयत् ।
नाराचैर्यमदण्डाभैस्त्रिभिर्नागं शतेन च ॥ १५
दिवाकरकरप्रख्यानङ्गश्चिक्षेप तोमरान् ।
नकुलाय शतान्यष्टौ त्रिधैकैकं तु सोऽच्छिनत् ॥ १६
तथार्धचन्द्रेण शिरस्तस्य चिच्छेद पाण्डवः ।
स पपात हतो म्लेच्छस्तेनैव सह दन्तिना ॥ १७
आचार्यपुत्रे निहते हस्तिशिक्षाविशारदे ।
अङ्गाः क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः ॥ १८
चलत्पताकैः प्रमुखैर्हेमकक्ष्यातनुच्छदैः ।
मिमर्दिषन्तस्त्वरिताः प्रदीप्तैरिव पर्वतैः ॥ १९
मेकलोत्कलकालिङ्गा निषादास्ताम्रलिप्तकाः ।
शरतोमरवर्षाणि विमुञ्चन्तो जिघांसवः ॥ २०
तैश्छाद्यमानं नकुलं दिवाकरमिवाम्बुदैः ।
परि पेतुः सुसंरब्धाः पाण्डुपाञ्चालसोमकाः ॥ २१
ततस्तदभवद्युद्धं रथिनां हस्तिभिः सह ।
सृजतां शरवर्षाणि तोमरांश्च सहस्रशः ॥ २२
नागानां प्रस्फुटुः कुम्भा मर्माणि विविधानि च ।
दन्ताश्चैवातिविद्धानां नाराचैर्भूषणानि च ॥ २३
तेषामष्टौ महानागांश्चतुःषष्ट्या सुतेजनैः ।
सहदेवो जघानाशु ते पेतुः सह सादिभिः ॥ २४
अञ्जोगतिभिरायम्य प्रयत्नाद्धनुरुत्तमम् ।
नाराचैरहनन्नागान्नकुलः कुरुनन्दन ॥ २५
ततः शैनेयपाञ्चाल्यौ द्रौपदेयाः प्रभद्रकाः ।
शिखण्डी च महानागान्सिषिचुः शरवृष्टिभिः ॥ २६
ते पाण्डुयोधाम्बुधरैः शत्रुद्विरदपर्वताः ।
बाणवर्षैर्हताः पेतुर्वज्रवर्षैरिवाचलाः ॥ २७
एवं हत्वा तव गजांस्ते पाण्डुनरकुञ्जराः ।
द्रुतं सेनामवैक्षन्त भिन्नकूलामिवापगाम् ॥ २८
ते तां सेनामवालोक्य पाण्डुपुत्रस्य सैनिकाः ।
विक्षोभयित्वा च पुनः कर्णमेवाभिदुद्रुवुः ॥ २९
सहदेवं ततः क्रुद्धं दहन्तं तव वाहिनीम् ।
दुःशासनो महाराज भ्राता भ्रातरमभ्ययात् ॥ ३०
तौ समेतौ महायुद्धे दृष्ट्वा तत्र नराधिपाः ।
सिंहनादरवांश्चक्रुर्वासांस्यादुधुवुश्च ह ॥ ३१
ततो भारत क्रुद्धेन तव पुत्रेण धन्विना ।
पाण्डुपुत्रस्त्रिभिर्बाणैर्वक्षस्यभिहतो बली ॥ ३२
सहदेवस्ततो राजन्नाराचेन तवात्मजम् ।
विद्ध्वा विव्याध सप्तत्या सारथिं च त्रिभिस्त्रिभिः ॥
दुःशासनस्तदा राजंश्छित्त्वा चापं महाहवे ।
सहदेवं त्रिसप्तत्या बाह्वोरुरसि चार्दयत् ॥ ३४
सहदेवस्ततः क्रुद्धः खड्गं गृह्य महाहवे ।
व्याविध्यत युधां श्रेष्ठः श्रीमांस्तव सुतं प्रति ॥ ३५
समार्गणगणं चापं छित्त्वा तस्य महानसिः ।
निपपात ततो भूमौ च्युतः सर्प इवाम्बरात् ॥ ३
अथान्यद्धनुरादाय सहदेवः प्रतापवान् ।
दुःशासनाय चिक्षेप बाणमन्तकरं ततः ॥ ३७
तमापतन्तं विशिखं यमदण्डोपमत्विषम् ।
खड्गेन शितधारेण द्विधा चिच्छेद कौरवः ॥ ३
तमापतन्तं सहसा निस्त्रिंशं निशितैः शरैः ।
पातयामास समरे सहदेवो हसन्निव ॥ ३९

ततो बाणांश्चतुःषष्टिं तव पुत्रो महारणे ।
सहदेवरथे तूर्णं पातयामास भारत ॥ ४०
ताञ्शरान्समरे राजन्वेगेनापततो बहून् ।
एकैकं पञ्चभिर्बाणैः सहदेवो न्यकृन्तत ॥ ४१
स निवार्य महाबाणांस्तव पुत्रेण प्रेषितान् ।
अथास्मै सुबहून्बाणान्माद्रीपुत्रः समाचिनोत् ॥ ४२
ततः क्रुद्धो महाराज सहदेवः प्रतापवान् ।
समाधत्त शरं घोरं मृत्युकालान्तकोपमम् ।
विकृष्य बलवच्चापं तव पुत्राय सोऽसृजत् ॥ ४३
स तं निर्भिद्य वेगेन भित्त्वा च कवचं महत् ।
प्राविशद्धरणीं राजन्वल्मीकमिव पन्नगः ।
ततः स मुमुहे राजंस्तव पुत्रो महारथः ॥ ४४
मूढं चैनं समालक्ष्य सारथिस्त्वरितो रथम् ।
अपोवाह भृशं त्रस्तो वध्यमानं शितैः शरैः ॥ ४५
पराजित्य रणे तं तु पाण्डवः पाण्डुपूर्वज ।
दुर्योधनबलं हृष्टः प्रामथद्वै समन्ततः ॥ ४६
पिपीलिकापुटं राजन्यथामृद्नान्नरो रुषा ।
तथा सा कौरवी सेना मृदिता तेन भारत ॥ ४७
नकुलं रभसं युद्धे दारयन्तं वरूथिनीम् ।
कर्णो वैकर्तनो राजन्वारयामास वै तदा ॥ ४८
नकुलश्च तदा कर्णं प्रहसन्निदमब्रवीत् ।
चिरस्य बत दृष्टोऽहं दैवतैः सौम्यचक्षुषा ॥ ४९
यस्य मे त्वं रणे पाप चक्षुर्विषयमागतः ।
त्वं हि मूलमनर्थानां वैरस्य कलहस्य च ॥ ५०
त्वद्दोषात्कुरवः क्षीणाः समासाद्य परस्परम् ।
त्वामद्य समरे हत्वा कृतकृत्योऽस्मि विज्वरः ॥ ५१
एवमुक्तः प्रत्युवाच नकुलं सूतनन्दनः ।
सदृशं राजपुत्रस्य धन्विनश्च विशेषतः ॥ ५२
प्रहरस्व रणे बाल पश्यामस्तव पौरुषम् ।
कर्म कृत्वा रणे शूर ततः कत्थितुमर्हसि ॥ ५३
अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः ।
स युध्यस्व मया शक्त्या विनेष्ये दर्पमद्य ते ॥ ५४
इत्युक्त्वा प्राहरत्तूर्णं पाण्डुपुत्राय सूतजः ।
विव्याध चैनं समरे त्रिसप्तत्या शिलीमुखैः ॥ ५५
नकुलस्तु ततो विद्धः सूतपुत्रेण भारत ।
अशीत्याशीविषप्रख्यैः सूतपुत्रमविध्यत ॥ ५६
तस्य कर्णो धनुश्छित्त्वा स्वर्णपुङ्खैः शिलाशितैः ।
त्रिंशता परमेष्वासः शरैः पाण्डवमार्दयत् ॥ ५७
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ।
आशीविषा यथा नागा भित्त्वा गां सलिलं पपुः ॥
अथान्यद्धनुरादाय हेमपृष्ठं दुरासदम् ।
कर्णं विव्याध विंशत्या सारथिं च त्रिभिः शरैः ॥५९
ततः क्रुद्धो महाराज नकुलः परवीरहा ।
क्षुरप्रेण सुतीक्ष्णेन कर्णस्य धनुरच्छिनत् ॥ ६०
अथैनं छिन्नधन्वानं सायकानां शतैस्त्रिभिः ।
आजघ्ने प्रहसन्वीरः सर्वलोकमहारथम् ॥ ६१
कर्णमभ्यर्दितं दृष्ट्वा पाण्डुपुत्रेण मारिष ।
विस्मयं परमं जग्मू रथिनः सह दैवतैः ॥ ६२
अथान्यद्धनुरादाय कर्णो वैकर्तनस्तदा ।
नकुलं पञ्चभिर्बाणैर्जत्रुदेशे समार्दयत् ॥ ६३
उरःस्थैरथ तैर्बाणैर्माद्रीपुत्रो व्यरोचत ।
स्वरश्मिभिरिवादित्यो भुवने विसृजन्प्रभाम् ॥ ६४
नकुलस्तु ततः कर्णं विद्ध्वा सप्तभिरायसैः ।
अथास्य धनुषः कोटिं पुनश्चिच्छेद मारिष ॥ ६५
सोऽन्यत्कार्मुकमादाय समरे वेगवत्तरम् ।
नकुलस्य ततो बाणैः सर्वतोऽवारयद्दिशः ॥ ६६
संछाद्यमानः सहसा कर्णचापच्युतैः शरैः ।
चिच्छेद स शरांस्तूर्णं शरैरेव महारथः ॥ ६७
ततो बाणमयं जालं विततं व्योम्न्यदृश्यत ।
खद्योतानां गणैरेव संपतद्भिर्यथा नभः ॥ ६८
तैर्विमुक्तैः शरशतैश्छादितं गगनं तदा ।
शलभानां यथा व्रातैस्तद्वदासीत्समाकुलम् ॥ ६९

ते शरा हेमविकृताः संपतन्तो मुहुर्मुहुः ।
श्रेणीकृता अभासन्त हंसाः श्रेणीगता इव ॥ ७०
बाणजालावृते व्योम्नि छादिते च दिवाकरे ।
समसर्पत्ततो भूतं किंचिदेव विशां पते ॥ ७१
निरुद्धे तत्र मार्गे तु शरसंघैः समन्ततः ।
व्यरोचतां महाभागौ बालसूर्याविवोदितौ ॥ ७२
कर्णचापच्युतैर्बाणैर्वध्यमानास्तु सोमकाः ।
अवालीयन्त राजेन्द्र वेदनार्ताः शरार्दिताः ॥ ७३
नकुलस्य तथा बाणैर्वध्यमाना चमूस्तव ।
व्यशीर्यत दिशो राजन्वातनुन्ना इवाम्बुदाः ॥ ७४
ते सेने वध्यमाने तु ताभ्यां दिव्यैर्महाशरैः ।
शरपातमपक्रम्य ततः प्रेक्षकवत्स्थिते ॥ ७५
प्रोत्सारिते जने तस्मिन्कर्णपाण्डवयोः शरैः ।
विव्याधाते महात्मानावन्योन्यं शरवृष्टिभिः ॥ ७६
निदर्शयन्तौ त्वस्त्राणि दिव्यानि रणमूर्धनि ।
छादयन्तौ च सहसा परस्परवधैषिणौ ॥ ७७
नकुलेन शरा मुक्ताः कङ्कबर्हिणवाससः ।
ते तु कर्णमवच्छाद्य व्यतिष्ठन्त यथा परे ॥ ७८
शरवेश्मप्रविष्टौ तौ ददृशाते न कैश्चन ।
चन्द्रसूर्यौ यथा राजंश्छाद्यमानौ जलागमे ॥ ७९
ततः क्रुद्धो रणे कर्णः कृत्वा घोरतरं वपुः ।
पाण्डवं छादयामास समन्ताच्छरवृष्टिभिः ॥ ८०
स च्छाद्यमानः समरे सूतपुत्रेण पाण्डवः ।
न चकार व्यथां राजन्भास्करो जलदैर्यथा ॥ ८१
ततः प्रहस्याधिरथिः शरजालानि मारिष ।
प्रेषयामास समरे शतशोऽथ सहस्रशः ॥ ८२
एकच्छायमभूत्सर्वं तस्य बाणैर्महात्मनः ।
अभ्रच्छायेव संजज्ञे संपतद्भिः शरोत्तमैः ॥ ८३
ततः कर्णो महाराज धनुश्छित्त्वा महात्मनः ।
सारथिं पातयामास रथनीडाद्धसन्निव ॥ ८४
तथाश्वांश्चतुरश्चास्य चतुर्भिर्निशितैः शरैः ।
यमस्य सदनं तूर्णं प्रेषयामास भारत ॥ ८५
अथास्य तं रथं तूर्णं तिलशो व्यधमच्छरैः ।
पताकां चक्ररक्षौ च ध्वजं खड्गं च मारिष ।
शतचन्द्रं ततश्चर्म सर्वोपकरणानि च ॥ ८६
हताश्वो विरथश्चैव विवर्मा च विशां पते ।
अवतीर्य रथात्तूर्णं परिघं गृह्य विष्ठितः ॥ ८७
तमुद्यतं महाघोरं परिघं तस्य सूतजः ।
व्यहनत्सायकै राजञ्शतशोऽथ सहस्रशः ॥ ८८
व्यायुधं चैनमालक्ष्य शरैः संनतपर्वभिः ।
आर्दयद्बहुशः कर्णो न चैनं समपीडयत् ॥ ८९
स वध्यमानः समरे कृतास्त्रेण बलीयसा ।
प्राद्रवत्सहसा राजन्नकुलो व्याकुलेन्द्रियः ॥ ९०
तमभिद्रुत्य राधेयः प्रहसन्वै पुनः पुनः ।
सज्यमस्य धनुः कण्ठे सोऽवासृजत भारत ॥ ९१
ततः स शुशुभे राजन्कण्ठासक्तमहाधनुः ।
परिवेषमनुप्राप्तो यथा स्याद्व्योम्नि चन्द्रमाः ।
यथैव च सितो मेघः शक्रचापेन शोभितः ॥ ९२
तमब्रवीत्तदा कर्णो व्यर्थं व्याहृतवानसि ।
वदेदानीं पुनर्हृष्टो वध्यं मां त्वं पुनः पुनः ॥ ९३
मा योत्सीर्गुरुभिः सार्धं बलवद्भिश्च पाण्डव ।
सदृशैस्तात युध्यस्व व्रीडां मा कुरु पाण्डव ।
गृहं वा गच्छ माद्रेय यत्र वा कृष्णफल्गुनौ ॥९४
एवमुक्त्वा महाराज व्यसर्जयत तं ततः ।
वधप्राप्तं तु तं राजन्नावधीत्सूतनन्दनः ।
स्मृत्वा कुन्त्या वचो राजंस्तत एनं व्यसर्जयत् ॥९५
विसृष्टः पाण्डवो राजन्सूतपुत्रेण धन्विना ।
व्रीडन्निव जगामाथ युधिष्ठिररथं प्रति ॥ ९६
आरुरोह रथं चापि सूतपुत्रप्रतापितः ।
निःश्वसन्दुःखसंतप्तः कुम्भे क्षिप्त इवोरगः ॥ ९७

तं विसृज्य रणे कर्णः पाञ्चालांस्त्वरितो ययौ ।
रथेनातिपताकेन चन्द्रवर्णहयेन च ॥ ९८
तत्राक्रन्दो महानासीत्पाण्डवानां विशां पते ।
दृष्ट्वा सेनापतिं यान्तं पाञ्चालानां रथव्रजान् ॥ ९९
तत्राकरोन्महाराज कदनं सूतनन्दनः ।
मध्यं गते दिनकरे चक्रवत्प्रचरन्प्रभुः ॥ १००
भग्नचक्रै रथैः केचिच्छिन्नध्वजपताकिभिः ।
ससूतैर्हतसूतैश्च भग्नाक्षैश्चैव मारिष ।
ह्रियमाणानपश्याम पाञ्चालानां रथव्रजान् ॥ १०१
तत्र तत्र च संभ्रान्ता विचेरुर्मत्तकुञ्जराः ।
दवाग्निना परीताङ्गा यथैव स्युर्महावने ॥ १०२
भिन्नकुम्भा विरुधिराश्छिन्नहस्ताश्च वारणाः ।
भिन्नगात्रवराश्चैव च्छिन्नवालाश्च मारिष ।
छिन्नाभ्राणीव संपेतुर्वध्यमाना महात्मना ॥ १०३
अपरे त्रासिता नागा नाराचशततोमरैः ।
तमेवाभिमुखा यान्ति शलभा इव पावकम् ॥ १०४
अपरे निष्टनन्तः स्म व्यदृश्यन्त महाद्विपाः ।
क्षरन्तः शोणितं गात्रैर्नगा इव जलप्लवम् ॥ १०५
उरश्छदैर्विमुक्ताश्च वालबन्धैश्च वाजिनः ।
राजतैश्च तथा कांस्यैः सौवर्णैश्चैव भूषणैः ॥ १०६
हीना आस्तरणैश्चैव खलीनैश्च विवर्जिताः ।
चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि ॥ १०७
निहतैः सादिभिश्चैव शूरैराहवशोभिभिः ।
अपश्याम रणे तत्र भ्राम्यमाणान्हयोत्तमान् ॥ १०८
प्रासैः खड्गैश्च संस्यूतानृष्टिभिश्च नराधिप ।
हययोधानपश्याम कञ्चुकोष्णीषधारिणः ॥ १०९
रथान्हेमपरिष्कारान्सुयुक्ताञ्जवनैर्हयैः ।
भ्रममाणानपश्याम हतेषु रथिषु द्रुतम् ॥ ११०
भग्नाक्षकूबरान्कांश्चिच्छिन्नचक्रांश्च मारिष ।
विपताकाध्वजांश्चान्याञ्छिन्नेषायुगबन्धुरान् ॥ १११
विहीनान्रथिनस्तत्र धावमानान्समन्ततः ।
सूर्यपुत्रशरैस्त्रस्तानपश्याम विशां पते ॥ ११२
विशस्त्रांश्च तथैवान्यान्सशस्त्रांश्च बहून्हतान् ।
तावकाञ्जालसंछन्नानुरोघण्टाविभूषितान् ॥ ११३
नानावर्णविचित्राभिः पताकाभिरलंकृतान् ।
पदातीनन्वपश्याम धावमानान्समन्ततः ॥ ११४
शिरांसि बाहूनूरूंश्च छिन्नानन्यांस्तथा युधि ।
कर्णचापच्युतैर्बाणैरपश्याम विनाकृतान् ॥ ११५
महान्व्यतिकरो रौद्रो योधानामन्वदृश्यत ।
कर्णसायकनुन्नानां हतानां निशितैः शरैः ॥ ११६
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
तमेवाभिमुखा यान्ति पतंगा इव पावकम् ॥ ११७
तं दहन्तमनीकानि तत्र तत्र महारथम् ।
क्षत्रिया वर्जयामासुर्युगान्ताग्निमिवोल्बणम् ॥ ११८
हतशेषास्तु ये वीराः पाञ्चालानां महारथाः ।
तान्प्रभग्नान्द्रुतान्कर्णः पृष्ठतो विकिरञ्शरैः ।
अभ्यधावत तेजस्वी विशीर्णकवचध्वजान् ॥ ११९
तापयामास तान्बाणैः सूतपुत्रो महारथः ।
मध्यंदिनमनुप्राप्तो भूतानीव तमोनुदः ॥ १२०

इति श्रीमहाभारते कर्णपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

संजय उवाच ।

युयुत्सुं तव पुत्रं तु प्राद्रवन्तं महद्बलम् ।
उलूकोऽभ्यपतत्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १
युयुत्सुस्तु ततो राजञ्शितधारेण पत्रिणा ।
उलूकं ताडयामास वज्रेणेन्द्र इवाचलम् ॥ २
उलूकस्तु ततः क्रुद्धस्तव पुत्रस्य संयुगे ।
क्षुरप्रेण धनुश्छित्त्वा ताडयामास कर्णिना ॥ ३
तदपास्य धनुश्छिन्नं युयुत्सुर्वेगवत्तरम् ।

अन्यदादत्त सुमहच्चापं संरक्तलोचनः ॥ ४
शकुनिं च ततः षष्ट्या विव्याध भरतर्षभ ।
सारथिं त्रिभिरानर्छत्तं च भूयो व्यविध्यत ॥ ५
उलूकस्तं तु विंशत्या विद्ध्वा हेमविभूषितैः ।
अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनम् ॥६
स च्छिन्नयष्टिः सुमहाञ्शीर्यमाणो महाध्वजः ।
पपात प्रमुखे राजन्युयुत्सोः काञ्चनोज्ज्वलः ॥ ७
ध्वजमुन्मथितं दृष्ट्वा युयुत्सुः क्रोधमूर्छितः ।
उलूकं पञ्चभिर्बाणैराजघान स्तनान्तरे ॥ ८
उलूकस्तस्य भल्लेन तैलधौतेन मारिष ।
शिरश्चिच्छेद सहसा यन्तुर्भरतसत्तम ॥ ९
जघान चतुरोऽश्वांश्च तं च विव्याध पञ्चभिः ।
सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम् ॥ १०
तं निर्जित्य रणे राजन्नुलूकस्त्वरितो ययौ ।
पाञ्चालान्सृञ्जयांश्चैव विनिघ्नन्निशितैः शरैः ॥ ११
शतानीकं महाराज श्रुतकर्मा सुतस्तव ।
व्यश्वसूतरथं चक्रे निमेषार्धादसंभ्रमम् ॥ १२
हताश्वे तु रथे तिष्ठञ्शतानीको महाबलः ।
गदां चिक्षेप संक्रुद्धस्तव पुत्रस्य मारिष ॥ १३
सा कृत्वा स्यन्दनं भस्म हयांश्चैव ससारथीन् ।
पपात धरणीं तूर्णं दारयन्तीव भारत ॥ १४
तावुभौ विरथौ वीरौ कुरूणां कीर्तिवर्धनौ ।
अपाक्रमेतां युद्धार्तौ प्रेक्षमाणौ परस्परम् ॥ १५
पुत्रस्तु तव संभ्रान्तो विवित्सो रथमाविशत् ।
शतानीकोऽपि त्वरितः प्रतिविन्ध्यरथं गतः ॥ १६
सुतसोमस्तु शकुनिं विव्याध निशितैः शरैः ।
नाकम्पयत संरब्धो वार्योघ इव पर्वतम् ॥ १७
सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम् ।
शरैरनेकसाहस्रैश्छादयामास भारत ॥ १८
ताञ्शराञ्शकुनिस्तूर्णं चिच्छेदान्यैः पतत्रिभिः ।
लघ्वस्त्रश्चित्रयोधी च जितकाशी च संयुगे ॥ १९
निवार्य समरे चापि शरांस्तान्निशितैः शरैः ।
आजघान सुसंक्रुद्धः सुतसोमं त्रिभिः शरैः ॥ २०
तस्याश्वान्केतनं सूतं तिलशो व्यधमच्छरैः ।
स्यालस्तव महावीर्यस्ततस्ते चुक्रुशुर्जनाः ॥ २१
हताश्वो विरथश्चैव छिन्नधन्वा च मारिष ।
धन्वी धनुर्वरं गृह्य रथाद्भूमावतिष्ठत ।
व्यसृजत्सायकांश्चैव स्वर्णपुङ्खाञ्शिलाशितान् । २२
छादयामासुरथ ते तव स्यालस्य तं रथम् ।
पतंगानामिव व्राताः शरव्राता महारथम् ॥ २३
रथोपस्थान्समीक्ष्यापि विव्यथे नैव सौबलः ।
प्रमृद्नंश्च शरांस्तांस्ताञ्शरव्रातैर्महायशाः ॥ २४
तत्रातुष्यन्त योधाश्च सिद्धाश्चापि दिवि स्थिताः ।
सुतसोमस्य तत्कर्म दृष्ट्वाश्रद्धेयमद्भुतम् ।
रथस्थं नृपतिं तं तु पदातिः सन्नयोधयत् ॥ २५
तस्य तीक्ष्णैर्महावेगैर्भल्लैः संनतपर्वभिः ।
व्यहनत्कार्मुकं राजा तूणीरं चैव सर्वशः ॥ २६
स च्छिन्नधन्वा समरे खड्गमुद्यम्य नानदन् ।
वैडूर्योत्पलवर्णाभं हस्तिदन्तमयत्सरुम् ॥ २७
भ्राम्यमाणं ततस्तं तु विमलाम्बरवर्चसम् ।
कालोपमं ततो मेने सुतसोमस्य धीमतः ॥ २८
सोऽचरत्सहसा खड्गी मण्डलानि सहस्रशः ।
चतुर्विंशन्महाराज शिक्षाबलसमन्वितः ॥ २९
सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान् ।
तानापतत एवाशु चिच्छेद परमासिना ॥ ३०
ततः क्रुद्धो महाराज सौबलः परवीरहा ।
प्राहिणोत्सुतसोमस्य शरानाशीविषोपमान् ॥ ३१
चिच्छेद तांश्च खड्गेन शिक्षया च बलेन च ।
दर्शयँल्लाघवं युद्धे तार्क्ष्यवीर्यसमद्युतिः ॥ ३२
तस्य संचरतो राजन्मण्डलावर्तने तदा ।

क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभम् ॥ ३३
स च्छिन्नः सहसा भूमौ निपपात महानसिः ।
अवशस्य स्थितं हस्ते तं खड्गं सत्सरुं तदा ॥ ३४
छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् ।
प्राविध्यत ततः शेषं सुतसोमो महारथः ॥ ३५
स च्छित्त्वा सगुणं चापं रणे तस्य महात्मनः ।
पपात धरणीं तूर्णं स्वर्णवज्रविभूषितः ।
सुतसोमस्ततोऽगच्छच्छ्रुतकीर्तेर्महारथम् ॥ ३६
सौबलोऽपि धनुर्गृह्य घोरमन्यत्सुदुःसहम् ।
अभ्ययात्पाण्डवानीकं निघ्नञ्शत्रुगणान्बहून् ॥ ३७
तत्र नादो महानासीत्पाण्डवानां विशां पते ।
सौबलं समरे दृष्ट्वा विचरन्तमभीतवत् ॥ ३८
तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च ।
द्राव्यमाणान्यदृश्यन्त सौबलेन महात्मना ॥ ३९
यथा दैत्यचमूं राजन्देवराजो ममर्द ह ।
तथैव पाण्डवीं सेनां सौबलेयो व्यनाशयत् ॥ ४०
धृष्टद्युम्नं कृपो राजन्वारयामास संयुगे ।
यथा दृप्तं वने नागं शरभो वारयेद्युधि ॥ ४१
निरुद्धः पार्षतस्तेन गौतमेन बलीयसा ।
पदात्पदं विचलितुं नाशक्नोत्तत्र भारत ॥ ४२
गौतमस्य वपुर्दृष्ट्वा धृष्टद्युम्नरथं प्रति ।
वित्रेसुः सर्वभूतानि क्षयं प्राप्तं च मेनिरे ॥ ४३
तत्रावोचन्विमनसो रथिनः सादिनस्तथा ।
द्रोणस्य निधने नूनं संक्रुद्धो द्विपदां वरः ॥ ४४
शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः ।
अपि स्वस्ति भवेदद्य धृष्टद्युम्नस्य गौतमात् ॥ ४५
अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात् ।
अप्ययं ब्राह्मणः सर्वान्न नो हन्यात्समागतान् ॥
यादृशं दृश्यते रूपमन्तकप्रतिमं भृशम् ।
गमिष्यत्यद्य पदवीं भारद्वाजस्य संयुगे ॥ ४७
आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि ।
अस्त्रवान्वीर्यसंपन्नः क्रोधेन च समन्वितः ॥ ४८
पार्षतश्च भृशं युद्धे विमुखोऽद्यापि लक्ष्यते ।
इत्येवं विविधा वाचस्तावकानां परैः सह ॥ ४९
विनिःश्वस्य ततः क्रुद्धः कृपः शारद्वतो नृप ।
पार्षतं छादयामास निश्चेष्टं सर्वमर्मसु ॥ ५०
स वध्यमानः समरे गौतमेन महात्मना ।
कर्तव्यं न प्रजानाति मोहितः परमाहवे ॥ ५१
तमब्रवीत्ततो यन्ता कच्चित्क्षेमं नु पार्षत ।
ईदृशं व्यसनं युद्धे न ते दृष्टं कदाचन ॥ ५२
दैवयोगात्तु ते बाणा नातरन्मर्मभेदिनः ।
प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वशः ॥ ५३
व्यावर्तये तत्र रथं नदीवेगमिवार्णवात् ।
अवध्यं ब्राह्मणं मन्ये येन ते विक्रमो हतः ॥ ५४
धृष्टद्युम्नस्ततो राजञ्शनकैरब्रवीद्वचः ।
मुह्यते मे मनस्तात गात्रे स्वेदश्च जायते ॥ ५५
वेपथुं च शरीरे मे रोमहर्षं च पश्य वै ।
वर्जयन्ब्राह्मणं युद्धे शनैर्याहि यतोऽच्युतः ॥ ५६
अर्जुनं भीमसेनं वा समरे प्राप्य सारथे ।
क्षेममद्य भवेद्यन्तरिति मे नैष्ठिकी मतिः ॥ ५७
ततः प्रायान्महाराज सारथिस्त्वरयन्हयान् ।
यतो भीमो महेष्वासो युयुधे तव सैनिकैः ॥ ५८
प्रद्रुतं तु रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष ।
किरञ्शरशतान्येव गौतमोऽनुययौ तदा ॥ ५९
शङ्खं च पूरयामास मुहुर्मुहुररिंदमः ।
पार्षतं प्राद्रवद्यन्तं महेन्द्र इव शम्बरम् ॥ ६०
शिखण्डिनं तु समरे भीष्ममृत्युं दुरासदम् ।
हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः ॥ ६१

शिखण्डी च समासाद्य हार्दिक्यं महारथम् ।
पञ्चभिर्निशितैर्भल्लैर्जत्रुदेशे समार्दयत् ॥ ६२
कृतवर्मा तु संक्रुद्धो भित्त्वा षष्टिभिराशुगैः ।
धनुरेकेन चिच्छेद हसन्राजन्महारथः ॥ ६३
अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली ।
तिष्ठ तिष्ठेति संक्रुद्धो हार्दिक्यं प्रत्यभाषत ॥ ६४
ततोऽस्य नवतिं बाणान्रुक्मपुङ्खान्सुतेजनान् ।
प्रेषयामास राजेन्द्र तेऽस्याभ्रश्यन्त वर्मणः ॥ ६५
वितथांस्तान्समालक्ष्य पतितांश्च महीतले ।
क्षुरप्रेण सुतीक्ष्णेन कार्मुकं चिच्छिदे बली ॥ ६६
अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम् ।
अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्दयत् ॥६७
कृतवर्मा तु संक्रुद्धो मार्गणैः कृतविक्षतः ।
धनुरन्यत्समादाय समार्गणगणं प्रभो ।
शिखण्डिनं बाणवरैः स्कन्धदेशेऽभ्यताडयत् ॥६८
स्कन्धदेशे स्थितैर्बाणैः शिखण्डी च रराज ह ।
शाखाप्रतानैर्विमलैः सुमहान्स यथा द्रुमः ॥ ६९
तावन्योन्यं भृशं विद्ध्वा रुधिरेण समुक्षितौ ।
अन्योन्यशृङ्गाभिहतौ रेजतुर्वृषभाविव ॥ ७०
अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ ।
रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः ॥ ७१
कृतवर्मा महाराज पार्षतं निशितैः शरैः ।
रणे विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः ॥७२
ततोऽस्य समरे बाणं भोजः प्रहरतां वरः ।
जीवितान्तकरं घोरं व्यसृजत्त्वरयान्वितः ॥ ७३
स तेनाभिहतो राजन्मूर्छामाशु समाविशत् ।
ध्वजयष्टिं च सहसा शिश्रिये कश्मलावृतः ॥ ७४
अपोवाह रणात्तं तु सारथी रथिनां वरम् ।
हार्दिक्यशरसंतप्तं निःश्वसन्तं पुनः पुनः ॥ ७५
पराजिते ततः शूरे द्रुपदस्य सुते प्रभो ।
प्राद्रवत्पाण्डवी सेना वध्यमाना समन्ततः ॥ ७६

इति श्रीमहाभारते कर्णपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

संजय उवाच ।

श्वेताश्वोऽपि महाराज व्यधमत्तावकं बलम् ।
यथा वायुः समासाद्य तूलराशिं समन्ततः ॥ १
प्रत्युद्ययुस्त्रिगर्तास्तं शिबयः कौरवैः सह ।
शाल्वाः संशप्तकाश्चैव नारायणबलं च यत् ॥ २
सत्यसेनः सत्यकीर्तिर्मित्रदेवः श्रुतंजयः ।
सौश्रुतिश्चित्रसेनश्च मित्रवर्मा च भारत ॥ ३
त्रिगर्तराजः समरे भ्रातृभिः परिवारितः ।
पुत्रैश्चैव महेष्वासैर्नानाशस्त्रधरैर्युधि ॥ ४
ते सृजन्तः शरव्रातान्किरन्तोऽर्जुनमाहवे ।
अभ्यद्रवन्त समरे वार्योघा इव सागरम् ॥ ५
ते त्वर्जुनं समासाद्य योधाः शतसहस्रशः ।
अगच्छन्विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ॥ ६
ते वध्यमानाः समरे नाजहुः पाण्डवं तदा ।
दह्यमाना यथा राजञ्शलभा इव पावकम् ॥ ७
सत्यसेनस्त्रिभिर्बाणैर्विव्याध युधि पाण्डवम् ।
मित्रदेवस्त्रिषष्ट्या च चन्द्रदेवश्च सप्तभिः ॥ ८
मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि पञ्चभिः ।
शत्रुंजयश्च विंशत्या सुशर्मा नवभिः शरैः ॥ ९
शत्रुंजयं च राजानं हत्वा तत्र शिलाशितैः ।
सौश्रुतेः सशिरस्त्राणं शिरः कायादपाहरत् ।
त्वरितश्चन्द्रदेवं च शरैर्निन्ये यमक्षयम् ॥ १०
अथेतरान्महाराज यतमानान्महारथान् ।
पञ्चभिः पञ्चभिर्बाणैरेकैकं प्रत्यवारयत् ॥ ११
सत्यसेनस्तु संक्रुद्धस्तोमरं व्यसृजन्महत् ।
समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च ॥ १२

स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः ।
अयस्मयो महाचण्डो जगाम धरणीं तदा ॥ १३
माधवस्य तु विद्धस्य तोमरेण महारणे ।
प्रतोदः प्रापतद्धस्ताद्रश्मयश्च विशां पते ॥ १४
स प्रतोदं पुनर्गृह्य रश्मींश्चैव महायशाः ।
वाहयामास तानश्वान्सत्यसेनरथं प्रति ॥ १५
विष्वक्सेनं तु निर्भिन्नं प्रेक्ष्य पार्थो धनंजयः ।
सत्यसेनं शरैस्तीक्ष्णैर्दारयित्वा महाबलः ॥ १६
ततः सुनिशितैर्बाणै राज्ञस्तस्य महच्छिरः ।
कुण्डलोपचितं कायाच्चकर्त पृतनान्तरे ॥ १७
तं निहत्य शितैर्बाणैर्मित्रवर्माणमाक्षिपत् ।
वत्सदन्तेन तीक्ष्णेन सारथिं चास्य मारिष ॥ १८
ततः शरशतैर्भूयः संशप्तकगणान्वशी ।
पातयामास संक्रुद्धः शतशोऽथ सहस्रशः ॥ १९
ततो रजतपुङ्खेन राज्ञः शीर्षं महात्मनः ।
मित्रदेवस्य चिच्छेद क्षुरप्रेण महायशाः ।
सुशर्माणं च संक्रुद्धो जत्रुदेशे समार्दयत् ॥ २०
ततः संशप्तकाः सर्वे परिवार्य धनंजयम् ।
शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश ॥ २१
अभ्यर्दितस्तु तैर्जिष्णुः शक्रतुल्यपराक्रमः ।
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः ।
ततः शरसहस्राणि प्रादुरासन्विशां पते ॥ २२
ध्वजानां छिद्यमानानां कार्मुकाणां च संयुगे ।
रथानां सपताकानां तूणीराणां शरैः सह ॥ २३
अक्षाणामथ योक्त्राणां चक्राणां रश्मिभिः सह ।
कूबराणां वरूथानां पृषत्कानां च संयुगे ॥ २४
अश्मनां पततां चैव प्रासानामृष्टिभिः सह ।
गदानां परिघाणां च शक्तीनां तोमरैः सह ॥ २५
शतघ्नीनां सचक्राणां भुजानामूरुभिः सह ।
कण्ठसूत्राङ्गदानां च केयूराणां च मारिष ॥ २६
हाराणामथ निष्काणां तनुत्राणां च भारत ।
छत्राणां व्यजनानां च शिरसां मुकुटैः सह ।
अश्रूयत महाञ्शब्दस्तत्र तत्र विशां पते ॥ २७
सकुण्डलानि स्वक्षीणि पूर्णचन्द्रनिभानि च ।
शिरांस्युर्व्यामदृश्यन्त तारागण इवाम्बरे ॥ २८
सुस्रग्वीणि सुवासांसि चन्दनेनोक्षितानि च ।
शरीराणि व्यदृश्यन्त हतानां च महीतले ।
गन्धर्वनगराकारं घोरमायोधनं तदा ॥ २९
निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः ।
हस्तिभिः पतितैश्चैव तुरगैश्चाभवन्मही ।
अगम्यमार्गा समरे विशीर्णैरिव पर्वतैः ॥ ३०
नासीच्चक्रपथश्चैव पाण्डवस्य महात्मनः ।
निघ्नतः शात्रवान्भल्लैर्हस्त्यश्वं चामितं महत् ॥ ३१
आ तुम्बादवसीदन्ति रथचक्राणि मारिष ।
रणे विचरतस्तस्य तस्मिँल्लोहितकर्दमे ॥ ३२
सीदमानानि चक्राणि समूहुस्तुरगा भृशम् ।
श्रमेण महता युक्ता मनोमारुतरंहसः ॥ ३३
वध्यमानं तु तत्सैन्यं पाण्डुपुत्रेण धन्विना ।
प्रायशो विमुखं सर्वं नावतिष्ठत संयुगे ॥ ३४
ताञ्जित्वा समरे जिष्णुः संशप्तकगणान्बहून् ।
रराज स महाराज विधूमोऽग्निरिव ज्वलन् ॥ ३५
युधिष्ठिरं महाराज विसृजन्तं शरान्बहून् ।
स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत् ॥ ३६
तमापतन्तं सहसा तव पुत्रं महाबलम् ।
धर्मराजो द्रुतं विद्ध्वा तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३७
स च तं प्रतिविव्याध नवभिर्निशितैः शरैः ।
सारथिं चास्य भल्लेन भृशं क्रुद्धोऽभ्यताडयत् ॥ ३८
ततो युधिष्ठिरो राजा हेमपुङ्खाञ्शिलीमुखान् ।
दुर्योधनाय चिक्षेप त्रयोदश शिलाशितान् ॥ ३९
चतुर्भिश्चतुरो वाहांस्तस्य हत्वा महारथः ।

पञ्चमेन शिरः कायात्सारथेस्तु समाक्षिपत् ॥ ४०
षष्ठेन च ध्वजं राज्ञः सप्तमेन च कार्मुकम् ।
अष्टमेन तथा खड्गं पातयामास भूतले ।
पञ्चभिर्नृपतिं चापि धर्मराजोऽर्दयद्भृशम् ॥ ४१
हताश्वात्तु रथात्तस्मादवप्लुत्य सुतस्तव ।
उत्तमं व्यसनं प्राप्तो भूमावेव व्यतिष्ठत ॥ ४२
तं तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणिकृपादयः ।
अभ्यवर्तन्त सहिताः परीप्सन्तो नराधिपम् ॥ ४३
अथ पाण्डुसुताः सर्वे परिवार्य युधिष्ठिरम् ।
अभ्ययुः समरे राजंस्ततो युद्धमवर्तत ॥ ४४
अथ तूर्यसहस्राणि प्रावाद्यन्त महामृधे ।
क्ष्वेडाः किलकिलाशब्दाः प्रादुरासन्महीपते ।
यदभ्यगच्छन्समरे पाञ्चालाः कौरवैः सह ॥ ४५
नरा नरैः समाजग्मुर्वारणा वरवारणैः ।
रथाश्च रथिभिः सार्धं हयाश्च हयसादिभिः ॥ ४६
द्वंद्वान्यासन्महाराज प्रेक्षणीयानि संयुगे ।
विस्मापनान्यचिन्त्यानि शस्त्रवन्त्युत्तमानि च ॥ ४७
अयुध्यन्त महावेगाः परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुर्योधव्रतमनुष्ठिताः ।
न हि ते समरं चक्रुः पृष्ठतो वै कथंचन ॥ ४८
मुहूर्तमेव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्निर्मर्यादमवर्तत ॥ ४९
रथी नागं समासाद्य विचरन्रणमूर्धनि ।
प्रेषयामास कालाय शरैः संनतपर्वभिः ॥ ५०
नागा हयान्समासाद्य विक्षिपन्तो बहूनथ ।
द्रावयामासुरत्युग्रास्तत्र तत्र तदा तदा ॥ ५१
विद्राव्य च बहूनश्वान्नागा राजन्बलोत्कटाः ।
विषाणैश्चापरे जघ्नुर्ममृदुश्चापरे भृशम् ॥ ५२
साश्वारोहांश्च तुरगान्विषाणैर्बिभिदू रणे ।
अपरांश्चिक्षिपुर्वेगात्प्रगृह्यातिबलास्तथा ॥ ५३
पादातैराहता नागा विवरेषु समन्ततः ।
चक्रुरार्तस्वरं घोरं व्यद्रवन्त दिशो दश ॥ ५४
पदातीनां तु सहसा प्रद्रुतानां महामृधे ।
उत्सृज्याभरणं तूर्णमवप्लुत्य रणाजिरे ॥ ५५
निमित्तं मन्यमानास्तु परिणम्य महागजाः ।
जगृहुर्बिभिदुश्चैव चित्राण्याभरणानि च ॥ ५६
प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ॥ ५७
निगृह्य च गदाः केचित्पार्श्वस्थैर्भृशदारुणैः ।
रथाश्वसादिभिस्तत्र संभिन्ना न्यपतन्भुवि ॥ ५८
सरथं सादिनं तत्र अपरे तु महागजाः ।
भूमावमृद्नन्वेगेन सवर्माणं पताकिनम् ॥ ५९
रथं नागाः समासाद्य धुरि गृह्य च मारिष ।
व्याक्षिपन्सहसा तत्र घोररूपे महामृधे ॥ ६०
नाराचैर्निहतश्चापि निपपात महागजः ।
पर्वतस्येव शिखरं वज्रभग्नं महीतले ॥ ६१
योधा योधान्समासाद्य मुष्टिभिर्व्यहनन्युधि ।
केशेष्वन्योन्यमाक्षिप्य चिच्छिदुर्बिभिदुः सह ॥ ६
उद्यम्य च भुजावन्यो निक्षिप्य च महीतले ।
पदा चोरः समाक्रम्य स्फुरतो व्यहनच्छिरः ॥ ६
मृतमन्यो महाराज पद्भ्यां ताडितवांस्तदा ।
जीवतश्च तथैवान्यः शस्त्रं काये न्यमज्जयत् ॥ ६
मुष्टियुद्धं महच्चासीद्योधानां तत्र भारत ।
तथा केशग्रहश्चोग्रो बाहुयुद्धं च केवलम् ॥ ६५
समासक्तस्य चान्येन अविज्ञातस्तथापरः ।
जहार समरे प्राणान्नानाशस्त्रैरनेकधा ॥ ६६
संसक्तेषु च योधेषु वर्तमाने च संकुले ।
कबन्धान्युत्थितानि स्म शतशोऽथ सहस्रशः ॥ ६
लोहितैः सिच्यमानानि शस्त्राणि कवचानि च ।
महारङ्गानुरक्तानि वस्त्राणीव चकाशिरे ॥ ६८

एवमेतन्महायुद्धं दारुणं भृशसंकुलम् ।
उन्मत्तरङ्गप्रतिमं शब्देनापूरयज्जगत् ॥ ६९
नैव स्वे न परे राजन्विज्ञायन्ते शरातुराः ।
योद्धव्यमिति युध्यन्ते राजानो जयगृद्धिनः ॥ ७०
स्वान्स्वे जघ्नुर्महाराज परांश्चैव समागतान् ।
उभयोः सेनयोर्वीरैर्व्याकुलं समपद्यत ॥ ७१
रथैर्भग्नैर्महाराज वारणैश्च निपातितैः ।
हयैश्च पतितैस्तत्र नरैश्च विनिपातितैः ॥ ७२
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ।
क्षणेनासीन्महाराज क्षतजौघप्रवर्तिनी ॥ ७३
पाञ्चालानवधीत्कर्णस्त्रिगर्तांश्च धनंजयः ।
भीमसेनः कुरून्राजन्हस्त्यनीकं च सर्वशः ॥ ७४
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
अपराह्णे महाराज काङ्क्षन्त्योर्विपुलं जयम् ॥ ७५

इति श्रीमहाभारते कर्णपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

धृतराष्ट्र उवाच ।

अतितीव्राणि दुःखानि दुःसहानि बहूनि च ।
तवाहं संजयाश्रौषं पुत्राणां मम संक्षयम् ॥ १
तथा तु मे कथयसे यथा युद्धं तु वर्तते ।
न सन्ति सूत कौरव्या इति मे नैष्ठिकी मतिः ॥२
दुर्योधनस्तु विरथः कृतस्तत्र महारणे ।
धर्मपुत्रः कथं चक्रे तस्मिन्वा नृपतिः कथम् ॥ ३
अपराह्णे कथं युद्धमभवल्लोमहर्षणम् ।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि संजय ॥ ४

संजय उवाच ।

संसक्तेषु च सैन्येषु युध्यमानेषु भागशः ।
रथमन्यं समास्थाय पुत्रस्तव विशां पते ॥ ५
क्रोधेन महताविष्टः सविषो भुजगो यथा ।
दुर्योधनस्तु दृष्ट्वा वै धर्मराजं युधिष्ठिरम् ।
उवाच सूत त्वरितं याहि याहीति भारत ॥ ६
अत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः ।
ध्रियमाणेन छत्रेण राजा राजति दंशितः ॥ ७
स सूतश्चोदितो राज्ञा राज्ञः स्यन्दनमुत्तमम् ।
युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे ॥ ८
ततो युधिष्ठिरः क्रुद्धः प्रमत्त इव सद्गवः ।
सारथिं चोदयामास याहि यत्र सुयोधनः ॥ ९
तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ ।
समेत्य च महावीर्यौ संनद्धौ युद्धदुर्मदौ ।
ततक्षतुर्महेष्वासौ शरैरन्योन्यमाहवे ॥ १०
ततो दुर्योधनो राजा धर्मशीलस्य मारिष ।
शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे ।
तं नामृष्यत संक्रुद्धो व्यवसायं युधिष्ठिरः ॥ ११
अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः ।
अन्यत्कार्मुकमादाय धर्मपुत्रश्चमूमुखे ॥ १२
दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च ।
अथान्यद्धनुरादाय प्रत्यविध्यत पाण्डवम् ॥ १३
तावन्योन्यं सुसंरब्धौ शरवर्षाण्यमुञ्चताम् ।
सिंहाविव सुसंक्रुद्धौ परस्परजिगीषया ॥ १४
अन्योन्यं जघ्नतुश्चैव नर्दमानौ वृषाविव ।
अन्योन्यं प्रेक्षमाणौ च चेरतुस्तौ महारथौ ॥ १५
ततः पूर्णायतोत्सृष्टैरन्योन्यं सुकृतव्रणौ ।
विरेजतुर्महाराज पुष्पिताविव किंशुकौ ॥ १६
ततो राजन्प्रतिभयान्सिंहनादान्मुहुर्मुहुः ।
तलयोश्च तथा शब्दान्धनुषोश्च महाहवे ॥ १७
शङ्खशब्दरवांश्चैव चक्रतुस्तौ रथोत्तमौ ।
अन्योन्यं च महाराज पीडयांचक्रतुर्भृशम् ॥ १८
ततो युधिष्ठिरो राजा तव पुत्रं त्रिभिः शरैः ।
आजघानोरसि क्रुद्धो वज्रवेगो दुरासदः ॥ १९

प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिम् ।
पञ्चभिर्निशितैर्बाणैर्हेमपुङ्खैः शिलाशितैः ॥ २०
ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत ।
सर्वपारशवीं तीक्ष्णां महोल्काप्रतिमां तदा ॥ २१
तामापतन्तीं सहसा धर्मराजः शिलाशितैः ।
त्रिभिश्चिच्छेद सहसा तं च विव्याध सप्तभिः ॥
निपपात ततः साथ हेमदण्डा महाधना ।
निपतन्ती महोल्केव व्यराजच्छिखिसंनिभा ॥ २३
शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशां पते ।
नवभिर्निशितैर्भल्लैर्निजघान युधिष्ठिरम् ॥ २४
सोऽतिविद्धो बलवतामग्रणीः शत्रुतापनः ।
दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः ॥ २५
समाधत्त च तं बाणं धनुष्युग्रं महाबलः ।
चिक्षेप च ततो राजा राज्ञः क्रुद्धः पराक्रमी ॥२६
स तु बाणः समासाद्य तव पुत्रं महारथम् ।
व्यमोहयत राजानं धरणीं च जगाम ह ॥ २७
ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगितः ।
विधित्सुः कलहस्यान्तमभिदुद्राव पाण्डवम् ॥ २८
तमालक्ष्योद्यतगदं दण्डहस्तमिवान्तकम् ।
धर्मराजो महाशक्तिं प्राहिणोत्तव सूनवे ।
दीप्यमानां महावेगां महोल्कां ज्वलितामिव ॥ २९
रथस्थः स तया विद्धो वर्म भित्त्वा महाहवे ।
भृशं संविग्नहृदयः पपात च मुमोह च ॥ ३०
ततस्त्वरितमागत्य कृतवर्मा तवात्मजम् ।
प्रत्यपद्यत राजानं मग्नं वै व्यसनार्णवे ॥ ३१
भीमोऽपि महतीं गृह्य गदां हेमपरिष्कृताम् ।
अभिदुद्राव वेगेन कृतवर्माणमाहवे ।
एवं तदभवद्युद्धं त्वदीयानां परैः सह ॥ ३२

इति श्रीमहाभारते कर्णपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

संजय उवाच ।

ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः ।
पुनरावृत्य संग्रामं चक्रुर्देवासुरोपमम् ॥ १
द्विरदरथनराश्वशङ्खशब्दैः
परिहृषिता विविधैश्च शस्त्रपातैः ।
द्विरदरथपदातिसार्थवाहाः
परिपतिताभिमुखाः प्रजह्रिरे ते ॥ २
शरपरशुवरासिपट्टिशै-
रिषुभिरनेकविधैश्च सादिताः ।
द्विरदरथहया महाहवे
वरपुरुषैः पुरुषाश्च वाहनैः ॥ ३
कमलदिनकरेन्दुसंनिभैः
सितदशनैः सुमुखाक्षिनासिकैः ।
रुचिरमुकुटकुण्डलैर्मही
पुरुषशिरोभिरवस्तृता बभौ ॥ ४
परिघमुसलशक्तितोमरै-
र्नखरभुशुण्डिगदाशतैर्द्रुताः ।
द्विरदनरहयाः सहस्रशो
रुधिरनदीप्रवहास्तदाभवन् ॥ ५
प्रहतनररथाश्वकुञ्जरं
प्रतिभयदर्शनमुल्बणं तदा ।
तदहितनिहतं बभौ बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥ ६
अथ तव नरदेव सैनिका-
स्तव च सुताः सुरसूनुसंनिभाः ।
अमितबलपुरःसरा रणे
कुरुवृषभाः शिनिपुत्रमभ्ययुः ॥ ७
तदतिरुचिरभीममाबभौ
पुरुषवराश्वरथद्विपाकुलम् ।

लवणजलसमुद्धतस्वनं
बलममरासुरसैन्यसंनिभम् ॥ ८
सुरपतिसमविक्रमस्तत-
स्त्रिदशवरावरजोपमं युधि ।
दिनकरकिरणप्रभैः पृषत्कै
रवितनयोऽभ्यहनच्छिनिप्रवीरम् ॥ ९
तमपि सरथवाजिसारथिं
शिनिवृषभो विविधैः शरैस्त्वरन् ।
भुजगविषसमप्रभै रणे
पुरुषवरं समवास्तृणोत्तदा ॥ १०
शिनिवृषभशरप्रपीडितं
तव सुहृदो वसुषेणमभ्ययुः ।
त्वरितमतिरथा रथर्षभं
द्विरदरथाश्वपदातिभिः सह ॥ ११
तमुदधिनिभमाद्रवद्बली
त्वरिततरैः समभिद्रुतं परैः ।
द्रुपदसुतसखस्तदाकरो-
त्पुरुषरथाश्वगजक्षयं महत् ॥ १२
अथ पुरुषवरौ कृताह्निकौ
भवमभिपूज्य यथाविधि प्रभुम् ।
अरिवधकृतनिश्चयौ द्रुतं
तव बलमर्जुनकेशवौ सृतौ ॥ १३
जलदनिनदनिस्वनं रथं
पवनविधूतपताककेतनम् ।
सितहयमुपयान्तमन्तिकं
हृतमनसो ददृशुस्तदारयः ॥ १४
अथ विस्फार्य गाण्डीवं रणे नृत्यन्निवार्जुनः ।
शरसंबाधमकरोत्खं दिशः प्रदिशस्तथा ॥ १५
स विमानप्रतिमान्सज्जयन्त्रायुधध्वजान् ।
ससारथींस्तदा बाणैरभ्राणीवानिलोऽवधीत् ॥ १६
गजान्गजप्रयन्तॄंश्च वैजयन्त्यायुधध्वजान् ।
सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयम् ॥१७
तमन्तकमिव क्रुद्धमनिवार्यं महारथम् ।
दुर्योधनोऽभ्ययादेको निघ्नन्बाणैः पृथग्विधैः ॥ १८
तस्यार्जुनो धनुः सूतं केतुमश्वांश्च सायकैः ।
हत्वा सप्तभिरेकैकं छत्रं चिच्छेद पत्रिणा ॥ १९
नवमं च समासाद्य व्यसृजत्प्रतिघातिनम् ।
दुर्योधनायेषुवरं तं द्रौणिः सप्तधाच्छिनत् ॥ २०
ततो द्रौणेर्धनुश्छित्त्वा हत्वा चाश्ववराञ्शरैः ।
कृपस्यापि तथात्युग्रं धनुश्चिच्छेद पाण्डवः ॥ २१
हार्दिक्यस्य धनुश्छित्त्वा ध्वजं चाश्वं तथावधीत् ।
दुःशासनस्येषुवरं छित्त्वा राधेयमभ्ययात् ॥ २२
अथ सात्यकिमुत्सृज्य त्वरन्कर्णोऽर्जुनं त्रिभिः ।
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनस्त्रिभिः ॥
अथ सात्यकिरागत्य कर्णं विद्ध्वा शितैः शरैः ।
नवत्या नवभिश्चोग्रैः शतेन पुनरार्दयत् ॥ २४
ततः प्रवीराः पाण्डूनां सर्वे कर्णमपीडयन् ।
युधामन्युः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥२५
उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च ।
चेदिकारूषमत्स्यानां केकयानां च यद्बलम् ।
चेकितानश्च बलवान्धर्मराजश्च सुव्रतः ॥ २६
एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः ।
परिवार्य रणे कर्णं नानाशस्त्रैरवाकिरन् ।
भाषन्तो वाग्भिरुग्राभिः सर्वे कर्णवधे वृताः ॥२७
तां शस्त्रवृष्टिं बहुधा छित्त्वा कर्णः शितैः शरैः ।
अपोवाह स तान्सर्वान्द्रुमान्भङ्क्त्वेव मारुतः ॥२८
रथिनः समहामात्रान्गजानश्वान्ससादिनः ।
शरव्रातांश्च संक्रुद्धो निघ्नन्कर्णो व्यदृश्यत ॥ २९
तद्वध्यमानं पाण्डूनां बलं कर्णास्त्रतेजसा ।
विशस्त्रक्षतदेहं च प्राय आसीत्पराङ्मुखम् ॥ ३०

अथ कर्णास्त्रमस्त्रेण प्रतिहत्यार्जुनः स्वयम् ।
दिशः खं चैव भूमिं च प्रावृणोच्छरवृष्टिभिः ॥ ३१
मुसलानीव निष्पेतुः परिघा इव चेषवः ।
शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि वापरे ॥ ३२
तैर्वध्यमानं तत्सैन्यं सपत्त्यश्वरथद्विपम् ।
निमीलिताक्षमत्यर्थमुदभ्राम्यत्समन्ततः ॥ ३३
निष्कैवल्यं तदा युद्धं प्रापुरश्वनरद्विपाः ।
वध्यमानाः शरैरन्ये तदा भीताः प्रदुद्रुवुः ॥ ३४
एवं तेषां तदा युद्धे संसक्तानां जयैषिणाम् ।
गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ॥ ३५
तमसा च महाराज रजसा च विशेषतः ।
न किंचित्प्रत्यपश्याम शुभं वा यदि वाशुभम् ॥ ३६
ते त्रसन्तो महेष्वासा रात्रियुद्धस्य भारत ।
अपयानं ततश्चक्रुः सहिताः सर्ववाजिभिः ॥ ३७
कौरवेषु च यातेषु तदा राजन्दिनक्षये ।
जयं सुमनसः प्राप्य पार्थाः स्वशिबिरं ययुः ॥ ३८
वादित्रशब्दैर्विविधैः सिंहनादैश्च नर्तितैः ।
परानवहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ॥ ३९
कृतेऽवहारे तैर्वीरैः सैनिकाः सर्व एव ते ।
आशिषः पाण्डवेयेषु प्रायुज्यन्त नरेश्वराः ॥ ४०
ततः कृतेऽवहारे च प्रहृष्टाः कुरुपाण्डवाः ।
निशायां शिबिरं गत्वा न्यविशन्त नरेश्वराः ॥ ४१
यक्षरक्षःपिशाचाश्च श्वापदानि च संघशः ।
जग्मुरायोधनं घोरं रुद्रस्यानर्तनोपमम् ॥ ४२

इति श्रीमहाभारते कर्णपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

धृतराष्ट्र उवाच ।

स्वेन च्छन्देन नः सर्वान्नावधीद्व्यक्तमर्जुनः ।
न ह्यस्य समरे मुच्येतान्तकोऽप्याततायिनः ॥ १
पार्थो ह्येकोऽहरद्भद्रामेकश्चाग्निमतर्पयत् ।
एकश्चेमां महीं जित्वा चक्रे बलिभृतो नृपान् ॥ २
एको निवातकवचानवधीद्दिव्यकार्मुकः ।
एकः किरातरूपेण स्थितं शर्वमयोधयत् ॥ ३
एकोऽभ्यरक्षद्भरतानेको भवमतोषयत् ।
तेनैकेन जिताः सर्वे मदीया उग्रतेजसः ।
ते न निन्द्याः प्रशस्याश्च यत्ते चक्रुर्ब्रवीहि तत् ॥ ४

संजय उवाच ।

हतप्रहतविध्वस्ता विवर्मायुधवाहनाः ।
दीनस्वरा दूयमाना मानिनः शत्रुभिर्जिताः ॥ ५
शिबिरस्थाः पुनर्मन्त्रं मन्त्रयन्ति स्म कौरवाः ।
भग्नदंष्ट्रा हतविषाः पदाक्रान्ता इवोरगाः ॥ ६
तानब्रवीत्ततः कर्णः क्रुद्धः सर्प इव श्वसन् ।
करं करेणाभिपीड्य प्रेक्षमाणस्तवात्मजम् ॥ ७
यत्तो दृढश्च दक्षश्च धृतिमानर्जुनः सदा ।
स बोधयति चाप्येनं प्राप्तकालमधोक्षजः ॥ ८
सहसास्त्रविसर्गेण वयं तेनाद्य वञ्चिताः ।
श्वस्त्वहं तस्य संकल्पं सर्वं हन्ता महीपते ॥ ९
एवमुक्तस्तथेत्युक्त्वा सोऽनुजज्ञे नृपोत्तमान् ।
सुखोषितास्ते रजनीं हृष्टा युद्धाय निर्ययुः ॥ १०
तेऽपश्यन्विहितं व्यूहं धर्मराजेन दुर्जयम् ।
प्रयत्नात्कुरुमुख्येन बृहस्पत्युशनोमतात् ॥ ११
अथ प्रतीपकर्तारं सततं विजितात्मनाम् ।
सस्मार वृषभस्कन्धं कर्णं दुर्योधनस्तदा ॥ १२
पुरंदरसमं युद्धे मरुद्गणसमं बले ।
कार्तवीर्यसमं वीर्ये कर्णं राज्ञोऽगमन्मनः ।
सूतपुत्रं महेष्वासं बन्धुमात्ययिकेष्विव ॥ १३

धृतराष्ट्र उवाच ।

यद्वोऽगमन्मनो मन्दाः कर्णं वैकर्तनं तदा ।
अप्यद्राक्षत तं यूयं शीतार्ता इव भास्करम् ॥ १४

कृतेऽवहारे सैन्यानां प्रवृत्ते च रणे पुनः ।
कथं वैकर्तनः कर्णस्तत्रायुध्यत संजय ।
कथं च पाण्डवाः सर्वे युयुधुस्तत्र सूतजम् ॥ १५
कर्णो ह्येको महाबाहुर्हन्यात्पार्थान्ससोमकान् ।
कर्णस्य भुजयोर्वीर्यं शक्रविष्णुसमं मतम् ।
तथास्त्राणि सुघोराणि विक्रमश्च महात्मनः ॥ १६
दुर्योधनं तदा दृष्ट्वा पाण्डवेन भृशार्दितम् ।
पराक्रान्तान्पाण्डुसुतान्दृष्ट्वा चापि महाहवे ॥ १७
कर्णमाश्रित्य संग्रामे दर्पो दुर्योधने पुनः ।
जेतुमुत्सहते पार्थान्सपुत्रान्सहकेशवान् ॥ १८
अहो बत महद्दुःखं यत्र पाण्डुसुतान्रणे ।
नातरद्रभसः कर्णो दैवं नूनं परायणम् ।
अहो द्यूतस्य निष्ठेयं घोरा संप्रति वर्तते ॥ १९
अहो दुःखानि तीव्राणि दुर्योधनकृतान्यहम् ।
सहिष्यामि सुघोराणि शल्यभूतानि संजय ॥ २०
सौबलं च तथा तात नीतिमानिति मन्यते ॥ २१
युद्धेषु नाम दिव्येषु वर्तमानेषु संजय ।
अश्रौषं निहतान्पुत्रान्नित्यमेव च निर्जितान् ॥ २२
न पाण्डवानां समरे कश्चिदस्ति निवारकः ।
स्त्रीमध्यमिव गाहन्ति दैवं हि बलवत्तरम् ॥ २३

संजय उवाच ।

अतिक्रान्तं हि यत्कार्यं पश्चाच्चिन्तयतीति च ।
तच्चास्य न भवेत्कार्यं चिन्तया च विनश्यति ॥ २४
तदिदं तव कार्यं तु दूरप्राप्तं विजानता ।
न कृतं यत्त्वया पूर्वं प्राप्ताप्राप्तविचारणे ॥ २५
उक्तोऽसि बहुधा राजन्मा युध्यस्वेति पाण्डवैः ।
गृह्णीषे न च तन्मोहात्पाण्डवेषु विशां पते ॥ २६
त्वया पापानि घोराणि समाचीर्णानि पाण्डुषु ।
त्वत्कृते वर्तते घोरः पार्थिवानां जनक्षयः ॥ २७
तत्त्विदानीमतिक्रम्य मा शुचो भरतर्षभ ।
शृणु सर्वं यथावृत्तं घोरं वैशसमच्युत ॥ २८
प्रभातायां रजन्यां तु कर्णो राजानमभ्ययात् ।
समेत्य च महाबाहुर्दुर्योधनमभाषत ॥ २९
अद्य राजन्समेष्यामि पाण्डवेन यशस्विना ।
हनिष्यामि च तं वीरं स वा मां निहनिष्यति ॥३०
बहुत्वान्मम कार्याणां तथा पार्थस्य पार्थिव ।
नाभूत्समागमो राजन्मम चैवार्जुनस्य च ॥ ३१
इदं तु मे यथाप्रज्ञं शृणु वाक्यं विशां पते ।
अनिहत्य रणे पार्थं नाहमेष्यामि भारत ॥ ३२
हतप्रवीरे सैन्येऽस्मिन्मयि चैव स्थिते युधि ।
अभियास्यति मां पार्थः शक्रशक्त्या विनाकृतम् ॥
ततः श्रेयस्करं यत्ते तन्निबोध जनेश्वर ।
आयुधानां च यद्वीर्यं द्रव्याणामर्जुनस्य च ॥ ३४
कायस्य महतो भेदे लाघवे दूरपातने ।
सौष्ठवे चास्त्रयोगे च सव्यसाची न मत्समः ॥३५
सर्वायुधमहामात्रं विजयं नाम तद्धनुः ।
इन्द्रार्थमभिकामेन निर्मितं विश्वकर्मणा ॥ ३६
येन दैत्यगणान्राजञ्जितवान्वै शतक्रतुः ।
यस्य घोषेण दैत्यानां विमुह्यन्ति दिशो दश ।
तद्भार्गवाय प्रायच्छच्छक्रः परमसंमतम् ॥ ३७
तद्दिव्यं भार्गवो मह्यमददाद्धनुरुत्तमम् ।
येन योत्स्ये महाबाहुमर्जुनं जयतां वरम् ।
यथेन्द्रः समरे सर्वान्दैतेयान्वै समागतान् ॥ ३८
धनुर्घोरं रामदत्तं गाण्डीवात्तद्विशिष्यते ।
त्रिःसप्तकृत्वः पृथिवी धनुषा तेन निर्जिता ॥ ३९
धनुषो यस्य कर्माणि दिव्यानि प्राह भार्गवः ।
तद्रामो ह्यददान्मह्यं येन योत्स्यामि पाण्डवम् ॥४०
अद्य दुर्योधनाहं त्वां नन्दयिष्ये सबान्धवम् ।
निहत्य समरे वीरमर्जुनं जयतां वरम् ॥ ४१
सपर्वतवनद्वीपा हतद्विड् भूः ससागरा ।

पुत्रपौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ॥ ४२
नासाध्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः ।
सम्यग्धर्मानुरक्तस्य सिद्धिरात्मवतो यथा ॥ ४३
न हि मां समरे सोढुं स शक्तोऽग्निं तरुर्यथा ।
अवश्यं तु मया वाच्यं येन हीनोऽस्मि फल्गुनात् ॥
ज्या तस्य धनुषो दिव्या तथाक्षय्यौ महेषुधी ।
तस्य दिव्यं धनुः श्रेष्ठं गाण्डीवमजरं युधि ॥ ४५
विजयं च महद्दिव्यं ममापि धनुरुत्तमम् ।
तत्राहमधिकः पार्थाद्धनुषा तेन पार्थिव ॥ ४६
मया चाभ्यधिको वीरः पाण्डवस्तन्निबोध मे ।
रश्मिग्राहश्च दाशार्हः सर्वलोकनमस्कृतः ॥ ४७
अग्निदत्तश्च वै दिव्यो रथः काञ्चनभूषणः ।
अच्छेद्यः सर्वतो वीर वाजिनश्च मनोजवाः ।
ध्वजश्च दिव्यो द्युतिमान्वानरो विस्मयंकरः ॥ ४८
कृष्णश्च स्रष्टा जगतो रथं तमभिरक्षति ।
एभिर्द्रव्यैरहं हीनो योद्धुमिच्छामि पाण्डवम् ॥ ४९
अयं तु सदृशो वीरः शल्यः समितिशोभनः ।
सारथ्यं यदि मे कुर्याद्ध्रुवस्ते विजयो भवेत् ॥५०
तस्य मे सारथिः शल्यो भवत्वसुकरः परैः ।
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु मे ॥ ५१
रथाश्च मुख्या राजेन्द्र युक्ता वाजिभिरुत्तमैः ।
आयान्तु पश्चात्सततं मामेव भरतर्षभ ॥ ५२
एवमभ्यधिकः पार्थाद्भविष्यामि गुणैरहम् ।
शल्यो ह्यभ्यधिकः कृष्णादर्जुनादधिको ह्यहम् ॥५३
यथाश्वहृदयं वेद दाशार्हः परवीरहा ।
तथा शल्योऽपि जानीते हयानां वै महारथः ॥५४
बाहुवीर्ये समो नास्ति मद्रराजस्य कश्चन ।
तथास्त्रैर्मत्समो नास्ति कश्चिदेव धनुर्धरः ॥ ५५
तथा शल्यसमो नास्ति हययाने ह कश्चन ।
सोऽयमभ्यधिकः पार्थाद्भविष्यति रथो मम ॥५६
एतत्कृतं महाराज त्वयेच्छामि परंतप ।
एवं कृते कृतं मह्यं सर्वकामैर्भविष्यति ॥ ५७
ततो द्रष्टासि समरे यत्करिष्यामि भारत ।
सर्वथा पाण्डवान्सर्वाञ्जेष्याम्यद्य समागतान् ॥५८

दुर्योधन उवाच ।

सर्वमेतत्करिष्यामि यथा त्वं कर्ण मन्यसे ।
सोपासङ्गा रथाः साश्वा अनुयास्यन्ति सूतज ॥५९
नाराचान्गार्ध्रपक्षांश्च शकटानि वहन्तु ते ।
अनुयास्याम कर्ण त्वां वयं सर्वे च पार्थिवाः ॥६०

संजय उवाच ।

एवमुक्त्वा महाराज तव पुत्रः प्रतापवान् ।
अभिगम्याब्रवीद्राजा मद्रराजमिदं वचः ॥ ६१

इति श्रीमहाभारते कर्णपर्वणि
द्वाविंशतितमोऽध्यायः ॥ २२ ॥

२३

संजय उवाच ।

पुत्रस्तव महाराज मद्रराजमिदं वचः ।
विनयेनोपसंगम्य प्रणयाद्वाक्यमब्रवीत् ॥ १
सत्यव्रत महाभाग द्विषतामघवर्धन ।
मद्रेश्वर रणे शूर परसैन्यभयंकर ॥ २
श्रुतवानसि कर्णस्य ब्रुवतो वदतां वर ।
यथा नृपतिसिंहानां मध्ये त्वां वरयत्ययम् ॥ ३
तस्मात्पार्थविनाशार्थं हितार्थं मम चैव हि ।
सारथ्यं रथिनां श्रेष्ठ सुमनाः कर्तुमर्हसि ॥ ४
अस्याभीशुग्रहो लोके नान्योऽस्ति भवता समः ।
स पातु सर्वतः कर्णं भवान्ब्रह्मेव शंकरम् ॥ ५
पार्थस्य सचिवः कृष्णो यथाभीशुग्रहो वरः ।
तथा त्वमपि राधेयं सर्वतः परिपालय ॥ ६
भीष्मो द्रोणः कृपः कर्णो भवान्भोजश्च वीर्यवान्
शकुनिः सौबलो द्रौणिरहमेव च नो बलम् ।

एषामेव कृतो भागो नवधा पृतनापते ॥ ७
नैव भागोऽत्र भीष्मस्य द्रोणस्य च महात्मनः ।
ताभ्यामतीत्य तौ भागौ निहता मम शत्रवः ॥ ८
वृद्धौ हि तौ नरव्याघ्रौ छलेन निहतौ च तौ ।
कृत्वा नसुकरं कर्म गतौ स्वर्गमितोऽनघ ॥ ९
तथान्ये पुरुषव्याघ्राः परैर्विनिहता युधि ।
अस्मदीयाश्च बहवः स्वर्गायोपगता रणे ।
त्यक्त्वा प्राणान्यथाशक्ति चेष्टाः कृत्वा च पुष्कलाः ॥
कर्णो ह्येको महाबाहुरस्मत्प्रियहिते रतः ।
भवांश्च पुरुषव्याघ्र सर्वलोकमहारथः ।
तस्मिञ्जयाशा विपुला मम मद्रजनाधिप ॥ ११
पार्थस्य समरे कृष्णो यथाभीशुवरग्रहः ।
तेन युक्तो रणे पार्थो रक्ष्यमाणश्च पार्थिव ।
यानि कर्माणि कुरुते प्रत्यक्षाणि तथैव ते ॥ १२
पूर्वं न समरे ह्येवमवधीदर्जुनो रिपून् ।
अहन्यहनि मद्रेश द्रावयन्दृश्यते युधि ॥ १३
भागोऽवशिष्टः कर्णस्य तव चैव महाद्युते ।
तं भागं सह कर्णेन युगपन्नाशयाहवे ॥ १४
सूर्यारुणौ यथा दृष्ट्वा तमो नश्यति मारिष ।
तथा नश्यन्तु कौन्तेयाः सपाञ्चालाः ससृञ्जयाः॥१५
रथानां प्रवरः कर्णो यन्तॄणां प्रवरो भवान् ।
संनिपातः समो लोके भवतोर्नास्ति कश्चन ॥ १६
यथा सर्वास्ववस्थासु वार्ष्णेयः पाति पाण्डवम् ।
तथा भवान्परित्रातु कर्णं वैकर्तनं रणे ॥ १७
त्वया सारथिना ह्येष अप्रधृष्यो भविष्यति ।
देवतानामपि रणे सशक्राणां महीपते ।
किं पुनः पाण्डवेयानां मातिशङ्कीर्वचो मम ॥ १८
दुर्योधनवचः श्रुत्वा शल्यः क्रोधसमन्वितः ।
त्रिशिखां भ्रुकुटीं कृत्वा धुन्वन्हस्तौ पुनः पुनः ॥१९
क्रोधरक्ते महानेत्रे परिवर्त्य महाभुजः ।
कुलैश्वर्यश्रुतिबलैर्दृप्तः शल्योऽब्रवीदिदम् ॥ २०
अवमन्यसे मां गान्धारे ध्रुवं मां परिशङ्कसे ।
यन्मां ब्रवीषि विस्रब्धं सारथ्यं क्रियतामिति ॥२१
अस्मत्तोऽभ्यधिकं कर्णं मन्यमानः प्रशंससि ।
न चाहं युधि राधेयं गणये तुल्यमात्मना ॥ २२
आदिश्यतामभ्यधिको ममांशः पृथिवीपते ।
तमहं समरे हत्वा गमिष्यामि यथागतम् ॥ २३
अथ वाप्येक एवाहं योत्स्यामि कुरुनन्दन ।
पश्य वीर्यं ममाद्य त्वं संग्रामे दहतो रिपून् ॥ २४
न चाभिकामान्कौरव्य विधाय हृदये पुमान् ।
अस्मद्विधः प्रवर्तेत मा मा त्वमतिशङ्किथाः ॥ २५
युधि चाप्यवमानो मे न कर्तव्यः कथंचन ।
पश्य हीमौ मम भुजौ वज्रसंहननोपमौ ॥ २६
धनुः पश्य च मे चित्रं शरांश्चाशीविषोपमान् ।
रथं पश्य च मे क्लृप्तं सदश्वैर्वातवेगितैः ।
गदां च पश्य गान्धारे हेमपट्टविभूषिताम् ॥ २७
दारयेयं महीं क्रुद्धो विकिरेयं च पर्वतान् ।
शोषयेयं समुद्रांश्च तेजसा स्वेन पार्थिव ॥ २८
तन्मामेवंविधं जानन्समर्थमरिनिग्रहे ।
कस्माद्युनक्षि सारथ्ये न्यूनस्याधिरथेर्नृप ॥ २९
न नाम धुरि राजेन्द्र प्रयोक्तुं त्वमिहार्हसि ।
न हि पापीयसः श्रेयान्भूत्वा प्रेष्यत्वमुत्सहे ॥ ३०
यो ह्यभ्युपगतं प्रीत्या गरीयांसं वशे स्थितम् ।
वशे पापीयसो धत्ते तत्पापमधरोत्तरम् ॥ ३१
ब्राह्मणा ब्रह्मणा सृष्टा मुखात्क्षत्रमथोरसः ।
ऊरुभ्यामसृजद्वैश्याञ्शूद्रान्पद्भ्यामिति श्रुतिः ।
तेभ्यो वर्णविशेषाश्च प्रतिलोमानुलोमजाः ॥ ३२
अथान्योन्यस्य संयोगाच्चातुर्वर्ण्यस्य भारत ।
गोप्तारः संग्रहीतारो दातारः क्षत्रियाः स्मृताः ॥३३
याजनाध्यापनैर्विप्रा विशुद्धैश्च प्रतिग्रहैः ।

लोकस्यानुग्रहार्थाय स्थापिता ब्रह्मणा भुवि ॥ ३४
कृषिश्च पाशुपाल्यं च विशां दानं च सर्वशः ।
ब्रह्मक्षत्रविशां शूद्रा विहिताः परिचारकाः ॥ ३५
ब्रह्मक्षत्रस्य विहिताः सूता वै परिचारकाः ।
न विट्शूद्रस्य तत्रैव शृणु वाक्यं ममानघ ॥ ३६
सोऽहं मूर्धावसिक्तः सन्राजर्षिकुलसंभवः ।
महारथः समाख्यातः सेव्यः स्तव्यश्च बन्दिनाम् ॥
सोऽहमेतादृशो भूत्वा नेहारिकुलमर्दन ।
सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे ॥ ३८
अवमानमहं प्राप्य न योत्स्यामि कथंचन ।
आपृच्छ्य त्वाद्य गान्धारे गमिष्यामि यथागतम् ॥
एवमुक्त्वा नरव्याघ्रः शल्यः समितिशोभनः ।
उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ॥ ४०
प्रणयाद्बहुमानाच्च तं निगृह्य सुतस्तव ।
अब्रवीन्मधुरं वाक्यं साम सर्वार्थसाधकम् ॥ ४१
यथा शल्य त्वमात्थेदमेवमेतदसंशयम् ।
अभिप्रायस्तु मे कश्चित्तं निबोध जनेश्वर ॥ ४२
न कर्णोऽभ्यधिकस्त्वत्तः शङ्के नैव कथंचन ।
न हि मद्रेश्वरो राजा कुर्याद्यदनृतं भवेत् ॥ ४३
ऋतमेव हि पूर्वास्ते वहन्ति पुरुषोत्तमाः ।
तस्मादार्तायनिः प्रोक्तो भवानिति मतिर्मम ॥ ४४
शल्यभूतश्च शत्रूणां यस्मात्त्वं भुवि मानद ।
तस्माच्छल्येति ते नाम कथ्यते पृथिवीपते ॥ ४५
यदेव व्याहृतं पूर्वं भवता भूरिदक्षिण ।
तदेव कुरु धर्मज्ञ मदर्थं यद्यदुच्यसे ॥ ४६
न च त्वत्तो हि राधेयो न चाहमपि वीर्यवान् ।
वृणीमस्त्वां हयाग्र्याणां यन्तारमिति संयुगे ॥ ४७
यथा ह्यभ्यधिकं कर्णं गुणैस्तात धनंजयात् ।
वासुदेवादपि त्वां च लोकोऽयमिति मन्यते ॥ ४८
कर्णो ह्यभ्यधिकः पार्थादस्त्रैरेव नरर्षभ ।
भवानप्यधिकः कृष्णादश्वयाने बले तथा ॥ ४९
यथाश्वहृदयं वेद वासुदेवो महामनाः ।
द्विगुणं त्वं तथा वेत्थ मद्रराज न संशयः ॥ ५०

शल्य उवाच ।

यन्मा ब्रवीषि गान्धारे मध्ये सैन्यस्य कौरव ।
विशिष्टं देवकीपुत्रात्प्रीतिमानस्म्यहं त्वयि ॥ ५१
एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः ।
युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ॥ ५२
समयश्च हि मे वीर कश्चिद्वैकर्तनं प्रति ।
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य संनिधौ ॥ ५३

संजय उवाच ।

तथेति राजन्पुत्रस्ते सह कर्णेन भारत ।
अब्रवीन्मद्रराजस्य सुतं भरतसत्तम ॥ ५४

इति श्रीमहाभारते कर्णपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

दुर्योधन उवाच ।

भूय एव तु मद्रेश यत्ते वक्ष्यामि तच्छृणु ।
यथा पुरा वृत्तमिदं युद्धे देवासुरे विभो ॥ १
यदुक्तवान्पितुर्मह्यं मार्कण्डेयो महानृषिः ।
तदशेषेण ब्रुवतो मम राजर्षिसत्तम ।
त्वं निबोध न चाप्यत्र कर्तव्या ते विचारणा ॥
देवानामसुराणां च महानासीत्समागमः ।
बभूव प्रथमो राजन्संग्रामस्तारकामयः ।
निर्जिताश्च तदा दैत्या दैवतैरिति नः श्रुतम् ॥ ३
निर्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः ।
ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव ॥ ४
तप उग्रं समास्थाय नियमे परमे स्थिताः ।
तपसा कर्शयामासुर्देहान्स्वाञ्शत्रुतापन ॥ ५
दमेन तपसा चैव नियमेन च पार्थिव ।

तेषां पितामहः प्रीतो वरदः प्रददौ वरान् ॥ ६
अवध्यत्वं च ते राजन्सर्वभूतेषु सर्वदा ।
सहिता वरयामासुः सर्वलोकपितामहम् ॥ ७
तानब्रवीत्तदा देवो लोकानां प्रभुरीश्वरः ।
नास्ति सर्वामरत्वं हि निवर्तध्वमतोऽसुराः ।
वरमन्यं वृणीध्वं वै यादृशं संप्ररोचते ॥ ८
ततस्ते सहिता राजन्संप्रधार्यासकृद्बहु ।
सर्वलोकेश्वरं वाक्यं प्रणम्यैनमथाब्रुवन् ॥ ९
अस्माकं त्वं वरं देव प्रयच्छेमं पितामह ।
वयं पुराणि त्रीण्येव समास्थाय महीमिमाम् ।
विचरिष्याम लोकेऽस्मिंस्त्वत्प्रसादपुरस्कृताः ॥ १०
ततो वर्षसहस्रे तु समेष्यामः परस्परम् ।
एकीभावं गमिष्यन्ति पुराण्येतानि चानघ ॥ ११
समागतानि चैतानि यो हन्याद्भगवंस्तदा ।
एकेषुणा देववरः स नो मृत्युर्भविष्यति ।
एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम् ॥१२
ते तु लब्धवराः प्रीताः संप्रधार्य परस्परम् ।
पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महासुरम् ।
विश्वकर्माणमजरं दैत्यदानवपूजितम् ॥ १३
ततो मयः स्वतपसा चक्रे धीमान्पुराणि ह ।
त्रीणि काञ्चनमेकं तु रौप्यं कार्ष्णायसं तथा ॥१४
काञ्चनं दिवि तत्रासीदन्तरिक्षे च राजतम् ।
आयसं चाभवद्भूमौ चक्रस्थं पृथिवीपते ॥ १५
एकैकं योजनशतं विस्तारायामसंमितम् ।
गृहाट्टाट्टालकयुतं बृहत्प्राकारतोरणम् ॥ १६
गुणप्रसवसंबाधमसंबाधमनामयम् ।
प्रासादैर्विविधैश्चैव द्वारैश्चाप्युपशोभितम् ॥ १७
पुरेषु चाभवन्राजन्राजानो वै पृथक्पृथक् ।
काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः ।
राजतं कमलाक्षस्य विद्युन्मालिन आयसम् ॥ १८
त्रयस्ते दैत्यराजानस्त्रीँल्लोकानाशु तेजसा ।
आक्रम्य तस्थुर्वर्षाणां पूगान्नाम प्रजापतिः ॥ १९
तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च ।
कोट्यश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः ।
महदैश्वर्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः ॥ २०
सर्वेषां च पुनस्तेषां सर्वयोगवहो मयः ।
तमाश्रित्य हि ते सर्वे अवर्तन्ताकुतोभयाः ॥ २१
यो हि यं मनसा कामं दध्यौ त्रिपुरसंश्रयः ।
तस्मै कामं मयस्तं तं विदधे मायया तदा ॥ २२
तारकाक्षसुतश्चासीद्धरिर्नाम महाबलः ।
तपस्तेपे परमकं येनातुष्यत्पितामहः ॥ २३
स तुष्टमवृणोद्देवं वापी भवतु नः पुरे ।
शस्त्रैर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः ॥ २४
स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः ।
ससृजे तत्र वापीं तां मृतानां जीवनीं प्रभो ॥ २५
येन रूपेण दैत्यस्तु येन वेषेण चैव ह ।
मृतस्तस्यां परिक्षिप्तस्तादृशेनैव जज्ञिवान् ॥ २६
तां प्राप्य त्रैपुरस्थास्तु सर्वाँल्लोकान्बबाधिरे ।
महता तपसा सिद्धाः सुराणां भयवर्धनाः ।
न तेषामभवद्राजन्क्षयो युद्धे कथंचन ॥ २७
ततस्ते लोभमोहाभ्यामभिभूता विचेतसः ।
निर्ह्रीकाः संस्थितिं सर्वे स्थापितां समलूलुपन् ॥
विद्राव्य सगणान्देवांस्तत्र तत्र तदा तदा ।
विचेरुः स्वेन कामेन वरदानेन दर्पिताः ॥ २९
देवारण्यानि सर्वाणि प्रियाणि च दिवौकसाम् ।
ऋषीणामाश्रमान्पुण्यान्यूपाञ्जनपदांस्तथा ।
व्यनाशयन्त मर्यादा दानवा दुष्टचारिणः ॥ ३०
ते देवाः सहिताः सर्वे पितामहमरिंदम ।
अभिजग्मुस्तदाख्यातुं विप्रकारं सुरेतरैः ॥ ३१
ते तत्त्वं सर्वमाख्याय शिरसाभिप्रणम्य च ।

वधोपायमपृच्छन्त भगवन्तं पितामहम् ।। ३२
श्रुत्वा तद्भगवान्देवो देवानिदमुवाच ह ।
असुराश्च दुरात्मानस्ते चापि विबुधद्विषः ।
अपराध्यन्ति सततं ये युष्मान्पीडयन्त्युत ।। ३३
अहं हि तुल्यः सर्वेषां भूतानां नात्र संशयः ।
अधार्मिकास्तु हन्तव्या इत्यहं प्रब्रवीमि वः ।। ३४
ते यूयं स्थाणुमीशानं जिष्णुमक्लिष्टकारिणम् ।
योद्धारं वृणुतादित्याः स तान्हन्ता सुरेतरान् ।।३५
इति तस्य वचः श्रुत्वा देवाः शक्रपुरोगमाः ।
ब्रह्माणमग्रतः कृत्वा वृषाङ्कं शरणं ययुः ।। ३६
तपः परं समातस्थुर्गृणन्तो ब्रह्म शाश्वतम् ।
ऋषिभिः सह धर्मज्ञा भवं सर्वात्मना गताः ।।३७
तुष्टुवुर्वाग्भिरर्थ्याभिर्भयेष्वभयकृत्तमम् ।
सर्वात्मानं महात्मानं येनाप्तं सर्वमात्मना ।। ३८
तपोविशेषैर्बहुभिर्योगं यो वेद चात्मनः ।
यः सांख्यमात्मनो वेद यस्य चात्मा वशे सदा ।।
ते तं ददृशुरीशानं तेजोराशिमुमापतिम् ।
अनन्यसदृशं लोके व्रतवन्तमकल्मषम् ।। ४०
एकं च भगवन्तं ते नानारूपमकल्पयन् ।
आत्मनः प्रतिरूपाणि रूपाण्यथ महात्मनि ।
परस्परस्य चापश्यन्सर्वे परमविस्मिताः ।। ४१
सर्वभूतमयं चेशं तमजं जगतः पतिम् ।
देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः ।। ४२
तान्स्वस्तिवाक्येनाभ्यर्च्य समुत्थाप्य च शंकरः ।
ब्रूत ब्रूतेति भगवान्स्मयमानोऽभ्यभाषत ।। ४३
त्र्यम्बकेणाभ्यनुज्ञातास्ततस्तेऽस्वस्थचेतसः ।
नमो नमस्तेऽस्तु विभो तत इत्यब्रुवन्भवम् ।। ४४
नमो देवातिदेवाय धन्विने चातिमन्यवे ।
प्रजापतिमखघ्नाय प्रजापतिभिरीड्यसे ।। ४५
नमः स्तुताय स्तुत्याय स्तूयमानाय मृत्यवे ।
विलोहिताय रुद्राय नीलग्रीवाय शूलिने ।। ४६
अमोघाय मृगाक्षाय प्रवरायुधयोधिने ।
दुर्वारणाय शुक्राय ब्रह्मणे ब्रह्मचारिणे ।। ४७
ईशानायाप्रमेयाय नियन्त्रे चर्मवाससे ।
तपोनित्याय पिङ्गाय व्रतिने कृत्तिवाससे ।। ४८
कुमारपित्रे त्र्यक्षाय प्रवरायुधधारिणे ।
प्रपन्नार्तिविनाशाय ब्रह्मद्विट्संघघातिने ।। ४९
वनस्पतीनां पतये नराणां पतये नमः ।
गवां च पतये नित्यं यज्ञानां पतये नमः ।। ५०
नमोऽस्तु ते ससैन्याय त्र्यम्बकायोग्रतेजसे ।
मनोवाक्कर्मभिर्देव त्वां प्रपन्नान्भजस्व नः ।। ५१
ततः प्रसन्नो भगवान्स्वागतेनाभिनन्द्य तान् ।
प्रोवाच व्येतु वस्त्रासो ब्रूत किं करवाणि वः ।।५२
पितृदेवर्षिसंघेभ्यो वरे दत्ते महात्मना ।
सत्कृत्य शंकरं प्राह ब्रह्मा लोकहितं वचः ।। ५३
तवातिसर्गाद्देवेश प्राजापत्यमिदं पदम् ।
मयाधितिष्ठता दत्तो दानवेभ्यो महान्वरः ।। ५४
तानतिक्रान्तमर्यादान्नान्यः संहर्तुमर्हति ।
त्वामृते भूतभव्येश त्वं ह्येषां प्रत्यरिर्वधे ।। ५५
स त्वं देव प्रपन्नानां याचतां च दिवौकसाम् ।
कुरु प्रसादं देवेश दानवाञ्जहि शूलभृत् ।। ५६

श्रीभगवानुवाच ।

हन्तव्याः शत्रवः सर्वे युष्माकमिति मे मतिः ।
न त्वेकोऽहं वधे तेषां समर्थो वै सुरद्विषाम् ।।५
ते यूयं सहिताः सर्वे मदीयेनास्त्रतेजसा ।
जयध्वं युधि ताञ्शत्रून्संघातो हि महाबलः ।।५

देवा ऊचुः ।

अस्मत्तेजोबलं यावत्तावद्द्विगुणमेव च ।
तेषामिति ह मन्यामो दृष्टतेजोबला हि ते ।। ५

भगवानुवाच ।
वध्यास्ते सर्वतः पापा ये युष्मास्वपराधिनः ।
मम तेजोबलार्धेन सर्वांस्तान्घ्नत शात्रवान् ॥ ६०
देवा ऊचुः ।
बिभर्तुं तेजसोऽर्धं ते न शक्ष्यामो महेश्वर ।
सर्वेषां नो बलार्धेन त्वमेव जहि शात्रवान् ॥ ६१
दुर्योधन उवाच ।
ततस्तथेति देवेशस्तैरुक्तो राजसत्तम ।
अर्धमादाय सर्वेभ्यस्तेजसाभ्यधिकोऽभवत् ॥६२
स तु देवो बलेनासीत्सर्वेभ्यो बलवत्तरः ।
महादेव इति ख्यातस्तदाप्रभृति शंकरः ॥ ६३
ततोऽब्रवीन्महादेवो धनुर्बाणधरस्त्वहम् ।
हनिष्यामि रथेनाजौ तान्रिपून्वै दिवौकसः ॥ ६४
ते यूयं मे रथं चैव धनुर्बाणं तथैव च ।
पश्यध्वं यावदद्यैतान्पातयामि महीतले ॥ ६५
देवा ऊचुः ।
मूर्तिसर्वस्वमादाय त्रैलोक्यस्य ततस्ततः ।
रथं ते कल्पयिष्याम देवेश्वर महौजसम् ॥ ६६
तथैव बुद्ध्या विहितं विश्वकर्मकृतं शुभम् ।
ततो विबुधशार्दूलास्तं रथं समकल्पयन् ॥ ६७
वन्धुरं पृथिवीं देवीं विशालपुरमालिनीम् ।
सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा ॥ ६८
मन्दरं पर्वतं चाक्षं जङ्घास्तस्य महानदीः ।
दिशश्च प्रदिशश्चैव परिवारं रथस्य हि ॥ ६९
अनुकर्षान्ग्रहान्दीप्तान्वरूथं चापि तारकाः ।
धर्मार्थकामसंयुक्तं त्रिवेणुं चापि बन्धुरम् ।
ओषधीर्विविधास्तत्र नानापुष्पफलोद्गमाः ॥ ७०
सूर्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे ।
पक्षौ पूर्वापरौ तत्र कृते राञ्यहनी शुभे ॥ ७१
दश नागपतीनीषां धृतराष्ट्रमुखान्दृढाम् ।
द्यां युगं युगचर्माणि संवर्तकबलाहकान् ॥ ७२
शम्यां धृतिं च मेधां च स्थितिं संनतिमेव च ।
ग्रहनक्षत्रताराभिश्चर्म चित्रं नभस्तलम् ॥ ७३
सुराम्बुप्रेतवित्तानां पतीँल्लोकेश्वरान्हयान् ।
सिनीवालीमनुमतिं कुहूं राकां च सुव्रताम् ।
योक्त्राणि चक्रुर्वाहानां रोहकांश्चापि कण्ठकम् ॥७४
कर्म सत्यं तपोऽर्थश्च विहितास्तत्र रश्मयः ।
अधिष्ठानं मनस्त्वासीत्परिरथ्यं सरस्वती ॥ ७५
नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः ।
विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयत् ॥ ७६
एवं तस्मिन्महाराज कल्पिते रथसत्तमे ।
देवैर्मनुजशार्दूल द्विषतामभिमर्दने ॥ ७७
स्वान्यायुधानि मुख्यानि न्यदधाच्छंकरो रथे ।
रथयष्टिं वियत्कृत्वा स्थापयामास गोवृषम् ॥ ७८
ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः ।
परिस्कन्दा रथस्यास्य सर्वतोदिशमुद्यताः ॥ ७९
अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः ।
ऋग्वेदः सामवेदश्च पुराणं च पुरःसराः ॥ ८०
इतिहासयजुर्वेदौ पृष्ठरक्षौ बभूवतुः ।
दिव्या वाचश्च विद्याश्च परिपार्श्वचराः कृताः ॥८१
तोत्रादयश्च राजेन्द्र वषट्कारस्तथैव च ।
ॐकारश्च मुखे राजन्नतिशोभाकरोऽभवत् ॥ ८२
विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः ।
तस्मान्नृणां कालरात्रिर्ज्या कृता धनुषोऽजरा ॥ ८३
इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोम एव च ।
अग्नीषोमौ जगत्कृत्स्नं वैष्णवं चोच्यते जगत् ॥८४
विष्णुश्चात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते ॥ ८५
तस्मिञ्शरे तिग्ममन्युर्मुमोचाविषहं प्रभुः ।
भृग्वङ्गिरोमन्युभवं क्रोधाग्निमतिदुःसहम् ॥ ८६

स नीललोहितो धूम्रः कृत्तिवासा भयंकरः ।
आदित्यायुतसंकाशस्तेजोज्वालावृतो ज्वलन् ॥ ८७
दुश्च्यावश्च्यावनो जेता हन्ता ब्रह्मद्विषां हरः ।
नित्यं त्राता च हन्ता च धर्माधर्माश्रिताञ्जनान् ॥
प्रमाथिभिर्घोररूपैर्भीमोदग्रैर्गणैर्वृतः ।
विभाति भगवान्स्थाणुस्तैरेवात्मगुणैर्वृतः ॥ ८९
तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत् ।
जङ्गमाजङ्गमं राजञ्शुशुभेऽद्भुतदर्शनम् ॥ ९०
दृष्ट्वा तु तं रथं दिव्यं कवची स शरासनी ।
बाणमादत्त तं दिव्यं सोमविष्ण्वग्निसंभवम् ॥ ९१
तस्य वाजांस्ततो देवाः कल्पयांचक्रिरे विभोः ।
पुण्यगन्धवहं राजञ्श्वसनं राजसत्तम ॥ ९२
तमास्थाय महादेवस्त्रासयन्दैवतान्यपि ।
आरुरोह तदा यत्तः कम्पयन्निव रोदसी ॥ ९३
स शोभमानो वरदः खड्गी बाणी शरासनी ।
हसन्निवाब्रवीद्देवो सारथिः को भविष्यति ॥ ९४
तमब्रुवन्देवगणा यं भवान्संनियोक्ष्यते ।
स भविष्यति देवेश सारथिस्ते न संशयः ॥ ९५
तानब्रवीत्पुनर्देवो मत्तः श्रेष्ठतरो हि यः ।
तं सारथिं कुरुध्वं मे स्वयं संचिन्त्य माचिरम् ॥९६
एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना ।
गत्वा पितामहं देवं प्रसाद्यैवं वचोऽब्रुवन् ॥ ९७
देव त्वयेदं कथितं त्रिदशारिनिबर्हणम् ।
तथा च कृतमस्माभिः प्रसन्नो वृषभध्वजः ॥ ९८
रथश्च विहितोऽस्माभिर्विचित्रायुधसंवृतः ।
सारथिं तु न जानीमः कः स्यात्तस्मिन्रथोत्तमे ॥९९
तस्माद्विधीयतां कश्चित्सारथिर्देवसत्तम ।
सफलां तां गिरं देव कर्तुमर्हसि नो विभो ॥१००
एवमस्मासु हि पुरा भगवन्नुक्तवानसि ।
हितं कर्तास्मि भवतामिति तत्कर्तुमर्हसि ॥ १०१

स देव युक्तो रथसत्तमो नो
दुरावरो द्रावणः शात्रवाणाम् ।
पिनाकपाणिर्विहितोऽत्र योद्धा
विभीषयन्दानवानुद्यतोऽसौ ॥ १०२
तथैव वेदाश्चतुरो हयाग्र्या
धरा सशैला च रथो महात्मन् ।
नक्षत्रवंशोऽनुगतो वरूथे
यस्मिन्योद्धा सारथिनाभिरक्ष्यः ॥ १०३
तत्र सारथिरेष्टव्यः सर्वैरेतैर्विशेषवान् ।
तत्प्रतिष्ठो रथो देव हया योद्धा तथैव च ।
कवचानि च शस्त्राणि कार्मुकं च पितामह ॥१०४
त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम् ।
त्वं हि सर्वैर्गुणैर्युक्तो देवताभ्योऽधिकः प्रभो ।
सारथ्ये तूर्णमारोह संयच्छ परमान्हयान् ॥ १०५
इति ते शिरसा नत्वा त्रिलोकेशं पितामहम् ।
देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम् ॥

ब्रह्मोवाच ।

नात्र किंचिन्मृषा वाक्यं यदुक्तं वो दिवौकसः ।
संयच्छामि हयानेष युध्यतो वै कपर्दिनः ॥ १०
ततः स भगवान्देवो लोकस्रष्टा पितामहः ।
सारथ्ये कल्पितो देवैरीशानस्य महात्मनः ॥ १०
तस्मिन्नारोहति क्षिप्रं स्यन्दनं लोकपूजिते ।
शिरोभिरगमंस्तूर्णं ते हया वातरंहसः ॥ १०९
महेश्वरे त्वारुहति जानुभ्यामगमन्महीम् ॥ ११
अभीशून्हि त्रिलोकेशः संगृह्य प्रपितामहः ।
तानश्वांश्चोदयामास मनोमारुतरंहसः ॥ १११
ततोऽधिरूढे वरदे प्रयाते चासुरान्प्रति ।
साधु साध्विति विश्वेशः स्मयमानोऽभ्यभाषत ॥
याहि देव यतो दैत्याश्चोदयाश्वानतन्द्रितः ।
पश्य बाह्वोर्बलं मेऽद्य निघ्नतः शात्रवान्रणे ॥११

ततस्तांश्चोदयामास वायुवेगसमाञ्जवे ।
येन तत्त्रिपुरं राजन्दैत्यदानवरक्षितम् ॥ ११४
अथाधिज्यं धनुः कृत्वा शर्वः संधाय तं शरम् ।
युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् ॥ ११५
तस्मिन्स्थिते तदा राजन्क्रुद्धे विधृतकार्मुके ।
पुराणि तानि कालेन जग्मुरेकत्वतां तदा ॥ ११६
एकीभावं गते चैव त्रिपुरे समुपागते ।
बभूव तुमुलो हर्षो दैवतानां महात्मनाम् ॥ ११७
ततो देवगणाः सर्वे सिद्धाश्च परमर्षयः ।
जयेति वाचो मुमुचुः संस्तुवन्तो मुदान्विताः ॥
ततोऽग्रतः प्रादुरभूत्त्रिपुरं जघ्नुषोऽसुरान् ।
अनिर्देश्योग्रवपुषो देवस्यासह्यतेजसः ॥ ११९
स तद्विकृष्य भगवान्दिव्यं लोकेश्वरो धनुः ।
त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति ।
तत्सासुरगणं दग्ध्वा प्राक्षिपत्पश्चिमार्णवे ॥ १२०
एवं तत्त्रिपुरं दग्धं दानवाश्चाप्यशेषतः ।
महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा ॥ १२१
स चात्मक्रोधजो वह्निर्हाहेत्युक्त्वा निवारितः ।
मा कार्षीर्भस्मसाल्लोकानिति त्र्यक्षोऽब्रवीच्च तम् ॥
ततः प्रकृतिमापन्ना देवा लोकास्तथर्षयः ।
तुष्टुवुर्वाग्भिरर्थ्याभिः स्थाणुमप्रतिमौजसम् ॥१२३
तेऽनुज्ञाता भगवता जग्मुः सर्वे यथागतम् ।
कृतकामाः प्रसन्नेन प्रजापतिमुखाः सुराः ॥ १२४
यथैव भगवान्ब्रह्मा लोकधाता पितामहः ।
संयच्छ त्वं हयानस्य राधेयस्य महात्मनः ॥ १२५
त्वं हि कृष्णाच्च कर्णाच्च फल्गुनाच्च विशेषतः ।
विशिष्टो राजशार्दूल नास्ति तत्र विचारणा ॥१२६
युद्धे ह्ययं रुद्रकल्पस्त्वं च ब्रह्मसमोऽनघ ।
तस्माच्छक्तौ युवां जेतुं मच्छत्रूंस्ताविवासुरान् ॥
यथा शल्याद्य कर्णोऽयं श्वेताश्वं कृष्णसारथिम् ।
प्रमथ्य हन्यात्कौन्तेयं तथा शीघ्रं विधीयताम् ।
त्वयि कर्णश्च राज्यं च वयं चैव प्रतिष्ठिताः ॥१२८
इमं चाप्यपरं भूय इतिहासं निबोध मे ।
पितुर्मम सकाशे यं ब्राह्मणः प्राह धर्मवित् ॥१२९
श्रुत्वा चैतद्वचश्चित्रं हेतुकार्यार्थसंहितम् ।
कुरु शल्य विनिश्चित्य मा भूदत्र विचारणा ॥१३०
भार्गवाणां कुले जातो जमदग्निर्महातपाः ।
तस्य रामेति विख्यातः पुत्रस्तेजोगुणान्वितः ॥१३१
स तीव्रं तप आस्थाय प्रसादयितवान्भवम् ।
अस्त्रहेतोः प्रसन्नात्मा नियतः संयतेन्द्रियः ॥१३२
तस्य तुष्टो महादेवो भक्त्या च प्रशमेन च ।
हृद्गतं चास्य विज्ञाय दर्शयामास शंकरः ॥ १३३

ईश्वर उवाच ।

राम तुष्टोऽस्मि भद्रं ते विदितं मे तवेप्सितम् ।
कुरुष्व पूतमात्मानं सर्वमेतदवाप्स्यसि ॥ १३४
दास्यामि ते तदास्त्राणि यदा पूतो भविष्यसि ।
अपात्रमसमर्थं च दहन्त्यस्त्राणि भार्गव ॥ १३५
इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना ।
प्रत्युवाच महात्मानं शिरसावनतः प्रभुम् ॥ १३६
यदा जानासि देवेश पात्रं मामस्त्रधारणे ।
तदा शुश्रूषतेऽस्त्राणि भवान्मे दातुमर्हति ॥ १३७

दुर्योधन उवाच ।

ततः स तपसा चैव दमेन नियमेन च ।
पूजोपहारबलिभिर्होममन्त्रपुरस्कृतैः ॥ १३८
आराधयितवाञ्शर्वं बहून्वर्षगणांस्तदा ।
प्रसन्नश्च महादेवो भार्गवस्य महात्मनः ॥ १३९
अब्रवीत्तस्य बहुशो गुणान्देव्याः समीपतः ।
भक्तिमानेष सततं मयि रामो दृढव्रतः ॥ १४०
एवं तस्य गुणान्प्रीतो बहुशोऽकथयत्प्रभुः ।
देवतानां पितॄणां च समक्षमरिसूदनः ॥ १४१

एतस्मिन्नेव काले तु दैत्या आसन्महाबलाः ।
तैस्तदा दर्पमोहान्धैरबाध्यन्त दिवौकसः ॥ १४२
ततः संभूय विबुधास्तान्हन्तुं कृतनिश्चयाः ।
चक्रुः शत्रुवधे यत्नं न शेकुर्जेतुमेव ते ॥ १४३
अभिगम्य ततो देवा महेश्वरमथाब्रुवन् ।
प्रसादयन्तस्तं भक्त्या जहि शत्रुगणानिति ॥ १४४
प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम् ।
रामं भार्गवमाहूय सोऽभ्यभाषत शंकरः ॥ १४५
रिपून्भार्गव देवानां जहि सर्वान्समागतान् ।
लोकानां हितकामार्थं मत्प्रीत्यर्थं तथैव च ॥ १४६

राम उवाच ।

अकृतास्त्रस्य देवेश का शक्तिर्मे महेश्वर ।
निहन्तुं दानवान्सर्वान्कृतास्त्रान्युद्धदुर्मदान् ॥ १४७

ईश्वर उवाच ।

गच्छ त्वं मदनुध्यानान्निहनिष्यसि दानवान् ।
विजित्य च रिपून्सर्वान्गुणान्प्राप्स्यसि पुष्कलान् ॥

दुर्योधन उवाच ।

एतच्छ्रुत्वा च वचनं प्रतिगृह्य च सर्वशः ।
रामः कृतस्वस्त्ययनः प्रययौ दानवान्प्रति ॥ १४९
अवधीद्देवशत्रूंस्तान्मददर्पबलान्वितान् ।
वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः ॥ १५०
स दानवैः क्षततनुर्जामदग्न्यो द्विजोत्तमः ।
संस्पृष्टः स्थाणुना सद्यो निर्व्रणः समजायत ॥ १५१
प्रीतश्च भगवान्देवः कर्मणा तेन तस्य वै ।
वरान्प्रादाद्ब्रह्मविदे भार्गवाय महात्मने ॥ १५२
उक्तश्च देवदेवेन प्रीतियुक्तेन शूलिना ।
निपातात्तव शस्त्राणां शरीरे याभवद्रुजा ॥ १५३
तया ते मानुषं कर्म व्यपोढं भृगुनन्दन ।
गृहाणास्त्राणि दिव्यानि मत्सकाशाद्यथेप्सितम् ॥
ततोऽस्त्राणि समस्तानि वरांश्च मनसेप्सितान् ।
लब्ध्वा बहुविधान्रामः प्रणम्य शिरसा शिवम् ॥
अनुज्ञां प्राप्य देवेशाज्जगाम स महातपाः ।
एवमेतत्पुरावृत्तं तदा कथितवानृषिः ॥ १५६
भार्गवोऽप्यददात्सर्वं धनुर्वेदं महात्मने ।
कर्णाय पुरुषव्याघ्र सुप्रीतेनान्तरात्मना ॥ १५७
वृजिनं हि भवेत्किंचिद्यदि कर्णस्य पार्थिव ।
नास्मै ह्यस्त्राणि दिव्यानि प्रादास्यद्भृगुनन्दनः ॥
नापि सूतकुले जातं कर्णं मन्ये कथंचन ।
देवपुत्रमहं मन्ये क्षत्रियाणां कुलोद्भवम् ॥ १५९
सकुण्डलं सकवचं दीर्घबाहुं महारथम् ।
कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति ॥ १६०
पश्य ह्यस्य भुजौ पीनौ नागराजकरोपमौ ।
वक्षः पश्य विशालं च सर्वशत्रुनिबर्हणम् ॥ १६१

इति श्रीमहाभारते कर्णपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

दुर्योधन उवाच ।

एवं स भगवान्देवः सर्वलोकपितामहः ।
सारथ्यमकरोत्तत्र यत्र रुद्रोऽभवद्रथी ॥ १
रथिनाभ्यधिको वीरः कर्तव्यो रथसारथिः ।
तस्मात्त्वं पुरुषव्याघ्र नियच्छ तुरगान्युधि ॥ २

संजय उवाच ।

ततः शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत् ।
दुर्योधनममित्रघ्नः प्रीतो मद्राधिपस्तदा ॥ ३
एवं चेन्मन्यसे राजन्गान्धारे प्रियदर्शन ।
तस्मात्ते यत्प्रियं किंचित्तत्सर्वं करवाण्यहम् ॥ ४
यत्रास्मि भरतश्रेष्ठ योग्यः कर्मणि कर्हिचित् ।
तत्र सर्वात्मना युक्तो वक्ष्ये कार्यधुरं तव ॥ ५
यत्तु कर्णमहं ब्रूयां हितकामः प्रियाप्रियम् ।
मम तत्क्षमतां सर्वं भवान्कर्णश्च सर्वशः ॥ ६

कर्ण उवाच ।

ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः ।
तथा नित्यं हिते युक्तो मद्रराज भजस्व नः ॥ ७

शल्य उवाच ।

आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः ।
अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ॥ ८
यत्तु विद्वन्प्रवक्ष्यामि प्रत्ययार्थमहं तव ।
आत्मनः स्तवसंयुक्तं तन्निबोध यथातथम् ॥ ९
अहं शक्रस्य सारथ्ये योग्यो मातलिवत्प्रभो ।
अप्रमादप्रयोगाच्च ज्ञानविद्याचिकित्सितैः ॥ १०
ततः पार्थेन संग्रामे युध्यमानस्य तेऽनघ ।
वाहयिष्यामि तुरगान्विज्वरो भव सूतज ॥ ११

इति श्रीमहाभारते कर्णपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

दुर्योधन उवाच ।

अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति ।
कृष्णादभ्यधिको यन्ता देवेन्द्रस्येव मातलिः ॥ १
यथा हरिहयैर्युक्तं संगृह्णाति स मातलिः ।
शल्यस्तव तथाद्यायं संयन्ता रथवाजिनाम् ॥ २
योधे त्वयि रथस्थे च मद्रराजे च सारथौ ।
रथश्रेष्ठो ध्रुवं संख्ये पार्थो नाभिभविष्यति ॥ ३

संजय उवाच ।

ततो दुर्योधनो भूयो मद्रराजं तरस्विनम् ।
उवाच राजन्संग्रामे संयच्छन्तं हयोत्तमान् ॥ ४
त्वयाभिगुप्तो राधेयो विजेष्यति धनंजयम् ।
इत्युक्तो रथमास्थाय तथेति प्राह भारत ॥ ५
शल्येऽभ्युपगते कर्णः सारथिं सुमनोऽब्रवीत् ।
स्वं सूत स्यन्दनं मह्यं कल्पयेत्यसकृत्त्वरन् ॥ ६
ततो जैत्रं रथवरं गन्धर्वनगरोपमम् ।
विधिवत्कल्पितं भर्त्रे जयेत्युक्त्वा न्यवेदयत् ॥ ७
तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि ।
संपादितं ब्रह्मविदा पूर्वमेव पुरोधसा ॥ ८
कृत्वा प्रदक्षिणं यत्नादुपस्थाय च भास्करम् ।
समीपस्थं मद्रराजं समारोपयदग्रतः ॥ ९
ततः कर्णस्य दुर्धर्षं स्यन्दनप्रवरं महत् ।
आरुरोह महातेजाः शल्यः सिंह इवाचलम् ॥ १०
ततः शल्यास्थितं राजन्कर्णः स्वरथमुत्तमम् ।
अध्यतिष्ठद्यथाम्भोदं विद्युत्वन्तं दिवाकरः ॥ ११
तावेकरथमारूढावादित्याग्निसमत्विषौ ।
व्यभ्राजेतां यथा मेघं सूर्याग्नी सहितौ दिवि ॥ १२
संस्तूयमानौ तौ वीरौ तदास्तां द्युतिमत्तरौ ।
ऋत्विक्सदस्यैरिन्द्राग्नी हूयमानाविवाध्वरे ॥ १३
स शल्यसंगृहीताश्वे रथे कर्णः स्थितोऽभवत् ।
धनुर्विस्फारयन्घोरं परिवेषीव भास्करः ॥ १४
आस्थितः स रथश्रेष्ठं कर्णः शरगभस्तिमान् ।
प्रबभौ पुरुषव्याघ्रो मन्दरस्थ इवांशुमान् ॥ १५
तं रथस्थं महावीरं यान्तं चामिततेजसम् ।
दुर्योधनः स्म राधेयमिदं वचनमब्रवीत् ॥ १६
अकृतं द्रोणभीष्माभ्यां दुष्करं कर्म संयुगे ।
कुरुष्वाधिरथे वीर मिषतां सर्वधन्विनाम् ॥ १७
मनोगतं मम ह्यासीद्भीष्मद्रोणौ महारथौ ।
अर्जुनं भीमसेनं च निहन्ताराविति ध्रुवम् ॥ १८
ताभ्यां यदकृतं वीर वीरकर्म महामृधे ।
तत्कर्म कुरु राधेय वज्रपाणिरिवापरः ॥ १९
गृहाण धर्मराजं वा जहि वा त्वं धनंजयम् ।
भीमसेनं च राधेय माद्रीपुत्रौ यमावपि ॥ २०
जयश्च तेऽस्तु भद्रं च प्रयाहि पुरुषर्षभ ।
पाण्डुपुत्रस्य सैन्यानि कुरु सर्वाणि भस्मसात् ॥ २१
ततस्तूर्यसहस्राणि भेरीणामयुतानि च ।

वाद्यमानान्यरोचन्त मेघशब्दा यथा दिवि ॥ २२
प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः ।
अभ्यभाषत राधेयः शल्यं युद्धविशारदम् ॥ २३
चोदयाश्वान्महाबाहो यावद्धन्मि धनंजयम् ।
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम् ॥२४
अद्य पश्यतु मे शल्य बाहुवीर्यं धनंजयः ।
अस्यतः कङ्कपत्राणां सहस्राणि शतानि च ॥ २५
अद्य क्षेप्स्याम्यहं शल्य शरान्परमतेजनान् ।
पाण्डवानां विनाशाय दुर्योधनजयाय च ॥ २६

शल्य उवाच ।

सूतपुत्र कथं नु त्वं पाण्डवानवमन्यसे ।
सर्वास्त्रज्ञान्महेष्वासान्सर्वानेव महारथान् ॥ २७
अनिवर्तिनो महाभागानजेयान्सत्यविक्रमान् ।
अपि संजनयेयुर्ये भयं साक्षाच्छतक्रतोः ॥ २८
यदा श्रोष्यसि निर्घोषं विस्फूर्जितमिवाशनेः ।
राधेय गाण्डिवस्याजौ तदा नैवं वदिष्यसि ॥ २९

संजय उवाच ।

अनादृत्य तु तद्वाक्यं मद्रराजेन भाषितम् ।
द्रक्ष्यस्यद्येत्यवोचद्वै शल्यं कर्णो नरेश्वर ॥ ३०
दृष्ट्वा कर्णं महेष्वासं युयुत्सुं समवस्थितम् ।
चुक्रुशुः कुरवः सर्वे हृष्टरूपाः परंतप ॥ ३१
ततो दुन्दुभिघोषेण भेरीणां निनदेन च ।
बाणशब्दैश्च विविधैर्गर्जितैश्च तरस्विनाम् ।
निर्ययुस्तावका युद्धे मृत्युं कृत्वा निवर्तनम् ॥ ३२
प्रयाते तु ततः कर्णे योधेषु मुदितेषु च ।
चचाल पृथिवी राजन्ररास च सुविस्वरम् ॥ ३३
निश्चरन्तो व्यदृश्यन्त सूर्यात्सप्त महाग्रहाः ।
उल्कापातश्च संजज्ञे दिशां दाहस्तथैव च ।
तथाशन्यश्च संपेतुर्ववुर्वाताश्च दारुणाः ॥ ३४
मृगपक्षिगणाश्चैव बहुशः पृतनां तव ।
अपसव्यं तदा चक्रुर्वेदयन्तो महद्भयम् ॥ ३५
प्रस्थितस्य च कर्णस्य निपेतुस्तुरगा भुवि ।
अस्थिवर्षं च पतितमन्तरिक्षाद्भयानकम् ॥ ३६
जज्वलुश्चैव शस्त्राणि ध्वजाश्चैव चकम्पिरे ।
अश्रूणि च व्यमुञ्चन्त वाहनानि विशां पते ॥ ३७
एते चान्ये च बहव उत्पातास्तत्र मारिष ।
समुत्पेतुर्विनाशाय कौरवाणां सुदारुणाः ॥ ३८
न च तान्गणयामासुः सर्वे ते दैवमोहिताः ।
प्रस्थितं सूतपुत्रं च जयेत्यूचुर्नरा भुवि ।
निर्जितान्पाण्डवांश्चैव मेनिरे तव कौरवाः ॥ ३९

ततो रथस्थः परवीरहन्ता
भीष्मद्रोणावात्तवीर्यौ निरीक्ष्य ।
समज्वलद्भारत पावकाभो
वैकर्तनोऽसौ रथकुञ्जरो वृषः ॥ ४०
स शल्यमाभाष्य जगाद वाक्यं
पार्थस्य कर्माप्रतिमं च दृष्ट्वा ।
मानेन दर्पेण च दह्यमानः
क्रोधेन दीप्यन्निव निःश्वसित्वा ॥ ४१
नाहं महेन्द्रादपि वज्रपाणेः
क्रुद्धाद्बिभेम्यात्तधनू रथस्थः ।
दृष्ट्वा तु भीष्मप्रमुखाञ्शयाना-
न्न त्वेव मां स्थिरता संजहाति ॥ ४२
महेन्द्रविष्णुप्रतिमावनिन्दितौ
रथाश्वनागप्रवरप्रमाथिनौ ।
अवध्यकल्पौ निहतौ यदा परै-
स्ततो ममाद्यापि रणेऽस्ति साध्वसम् ॥४३
समीक्ष्य संख्येऽतिबलान्नराधिपै-
र्नराश्वमातङ्गरथाञ्शरैर्हतान् ।
कथं न सर्वानहितान्रणेऽवधी-
न्महास्त्रविद्ब्राह्मणपुंगवो गुरुः ॥ ४४

स संस्मरन्द्रोणहवं महाहवे
ब्रवीमि सत्यं कुरवो निबोधत ।
न वो मदन्यः प्रसहेद्रणेऽर्जुनं
क्रमागतं मृत्युमिवोग्ररूपिणम् ॥ ४५
शिक्षा प्रसादश्च बलं धृतिश्च
द्रोणे महास्त्राणि च संनतिश्च ।
स चेदगान्मृत्युवशं महात्मा
सर्वानन्यानातुरानद्य मन्ये ॥ ४६
नेह ध्रुवं किंचिदपि प्रचिन्त्यं
विदुर्लोके कर्मणोऽनित्ययोगात् ।
सूर्योदये को हि विमुक्तसंशयो
गर्वं कुर्वीताद्य गुरौ निपातिते ॥ ४७
न नूनमस्त्राणि बलं पराक्रमः
क्रिया सुनीतं परमायुधानि वा ।
अलं मनुष्यस्य सुखाय वर्तितुं
तथा हि युद्धे निहतः परैर्गुरुः ॥ ४८
हुताशनादित्यसमानतेजसं
पराक्रमे विष्णुपुरंदरोपमम् ।
नये बृहस्पत्युशनःसमं सदा
न चैनमस्त्रं तदपात्सुदुःसहम् ॥ ४९
संप्रक्रुष्टे रुदितस्त्रीकुमारे
पराभूते पौरुषे धार्तराष्ट्रे ।
मया कृत्यमिति जानामि शल्य
प्रयाहि तस्माद्द्विषतामनीकम् ॥ ५०
यत्र राजा पाण्डवः सत्यसंधो
व्यवस्थितो भीमसेनार्जुनौ च ।
वासुदेवः सृञ्जयाः सात्यकिश्च
यमौ च कस्तौ विषहेन्मदन्यः ॥ ५१
तस्मात्क्षिप्रं मद्रपते प्रयाहि
रणे पाञ्चालान्पाण्डवान्सृञ्जयांश्च ।
तान्वा हनिष्यामि समेत्य संख्ये
यास्यामि वा द्रोणमुखाय मन्ये ॥ ५२
न त्वेवाहं न गमिष्यामि मध्यं
तेषां शूराणामिति मा शल्य विद्धि ।
मित्रद्रोहो मर्षणीयो न मेऽयं
त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ॥ ५३
प्राज्ञस्य मूढस्य च जीवितान्ते
प्राणप्रमोक्षोऽन्तकवक्त्रगस्य ।
अतो विद्वन्नभियास्यामि पार्थं
दिष्टं न शक्यं व्यतिवर्तितुं वै ॥ ५४
कल्याणवृत्तः सततं हि राज-
न्वैचित्रवीर्यस्य सुतो ममासीत् ।
तस्यार्थसिद्ध्यर्थमहं त्यजामि
प्रियान्भोगान्दुस्त्यजं जीवितं च ॥ ५५
वैयाघ्रचर्माणमकूजनाक्षं
हैमत्रिकोशं रजतत्रिवेणुम् ।
रथप्रबर्हं तुरगप्रबर्है-
र्युक्तं प्रादान्मह्यमिदं हि रामः ॥ ५६
धनूंषि चित्राणि निरीक्ष्य शल्य
ध्वजं गदां सायकांश्चोग्ररूपान् ।
असिं च दीप्तं परमायुधं च
शङ्खं च शुभ्रं स्वनवन्तमुग्रम् ॥ ५७
पताकिनं वज्रनिपातनिस्वनं
सिताश्वयुक्तं शुभतूणशोभितम् ।
इमं समास्थाय रथं रथर्षभं
रणे हनिष्याम्यहमर्जुनं बलात् ॥ ५८
तं चेन्मृत्युः सर्वहरोऽभिरक्षते
सदाप्रमत्तः समरे पाण्डुपुत्रम् ।
तं वा हनिष्यामि समेत्य युद्धे
यास्यामि वा भीष्ममुखो यमाय ॥ ५९

यमवरुणकुबेरवासवा वा
यदि युगपत्सगणा महाहवे ।
जुगुपिषव इहैत्य पाण्डवं
किमु बहुना सह तैर्जयामि तम् ॥ ६०
इति रणरभसस्य कत्थत-
स्तदुपनिशम्य वचः स मद्रराट् ।
अवहसदवमन्य वीर्यवा-
न्प्रतिषिषिधे च जगाद चोत्तरम् ॥ ६१
विरम विरम कर्ण कत्थना-
दतिरभसोऽस्यति चाप्ययुक्तवाक् ।
क च हि नरवरो धनंजयः
क पुनरिह त्वमुपारमाबुध ॥ ६२
यदुसदनमुपेन्द्रपालितं
त्रिदिवमिवामरराजरक्षितम् ।
प्रसभमिह विलोक्य को हरे-
त्पुरुषवरावरजामृतेऽर्जुनात् ॥ ६३
त्रिभुवनसृजमीश्वरेश्वरं
क इह पुमान्भवमाह्वयेद्युधि ।
मृगवधकलहे ऋतेऽर्जुना-
त्सुरपतिवीर्यसमप्रभाववतः ॥ ६४
असुरसुरमहोरगान्नरा-
न्गरुडपिशाचसयक्षराक्षसान् ।
इषुभिरजयदग्निगौरवा-
त्स्वभिलषितं च हविर्ददौ जयः ॥ ६५
स्मरसि ननु यदा परैर्हृतः
स च धृतराष्ट्रसुतो विमोक्षितः ।
दिनकरज नरोत्तमैर्यदा
मरुषु बहून्विनिहत्य तानरीन् ॥ ६६
प्रथममपि पलायिते त्वयि
प्रियकलहा धृतराष्ट्रसूनवः ।
स्मरसि ननु यदा प्रमोचिताः
खचरगणानवजित्य पाण्डवैः ॥ ६७
समुदितबलवाहनाः पुनः
पुरुषवरेण जिताः स्थ गोग्रहे ।
सगुरुगुरुसुताः सभीष्मकाः
किमु न जितः स तदा त्वयार्जुनः ॥ ६
इदमपरमुपस्थितं पुन-
स्तव निधनाय सुयुद्धमद्य वै ।
यदि न रिपुभयात्पलायसे
समरगतोऽद्य हतोऽसि सूतज ॥ ६९

संजय उवाच ।

इति बहुपरुषं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ।
भृशमतिरुषितः परं वृषः
कुरुपृतनापतिराह मद्रपम् ॥ ७०
भवतु भवतु किं विकत्थसे
ननु मम तस्य च युद्धमुद्यतम् ।
यदि स जयति मां महाहवे
तत इदमस्तु सुकत्थितं तव ॥ ७१
एवमस्त्विति मद्रेश उक्त्वा नोत्तरमुक्तवान् ।
याहि मद्रेश चाप्येनं कर्णः प्राह युयुत्सया ॥ ७
स रथः प्रययौ शत्रूञ्श्वेताश्वः शल्यसारथिः ।
निघ्नन्नमित्रान्समरे तमो घ्नन्सविता यथा ॥ ७
ततः प्रायात्प्रीतिमान्वै रथेन
वैयाघ्रेण श्वेतयुजाथ कर्णः ।
स चालोक्य ध्वजिनीं पाण्डवानां
धनंजयं त्वरया पर्यपृच्छत् ॥ ७४

इति श्रीमहाभारते कर्णपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

संजय उवाच ।

प्रयानेव तदा कर्णो हर्षयन्वाहिनीं तव ।
एकैकं समरे दृष्ट्वा पाण्डवं पर्यपृच्छत ॥ १
यो ममाद्य महात्मानं दर्शयेच्छ्वेतवाहनम् ।
तस्मै दद्यामभिप्रेतं वरं यं मनसेच्छति ॥ २
स चेत्तदभिमन्येत तस्मै दद्यामहं पुनः ।
शकटं रत्नसंपूर्णं यो मे ब्रूयाद्धनंजयम् ॥ ३
स चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यं तस्मै पुनर्दद्यां सौवर्णं हस्तिषड्गवम् ॥ ४
तथा तस्मै पुनर्दद्यां स्त्रीणां शतमलंकृतम् ।
श्यामानां निष्ककण्ठीनां गीतवाद्यविपश्चिताम् ॥ ५
स चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यं तस्मै वरं दद्यां श्वेतान्पञ्चशतान्हयान् ॥ ६
हेमभाण्डपरिच्छन्नान्सुमृष्टमणिकुण्डलान् ।
सुदान्तानपि चैवाहं दद्यामष्टशतान्परान् ॥ ७
रथं च शुभ्रं सौवर्णं दद्यां तस्मै स्वलंकृतम् ।
युक्तं परमकाम्बोजैर्यो मे ब्रूयाद्धनंजयम् ॥ ८
अन्यं तस्मै वरं दद्यां कुञ्जराणां शतानि षट् ।
काञ्चनैर्विविधैर्भाण्डैराच्छन्नान्हेममालिनः ।
उत्पन्नानपरान्तेषु विनीतान्हस्तिशिक्षकैः ॥ ९
स चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यं तस्मै वरं दद्यां यमसौ कामयेत्स्वयम् ॥ १०
पुत्रदारान्विहारांश्च यदन्यद्वित्तमस्ति मे ।
तच्च तस्मै पुनर्दद्यां यद्यत्स मनसेच्छति ॥ ११
हत्वा च सहितौ कृष्णौ तयोर्वित्तानि सर्वशः ।
तस्मै दद्यामहं यो मे प्रब्रूयात्केशवार्जुनौ ॥ १२
एता वाचः सुबहुशः कर्ण उच्चारयन्युधि ।
दध्मौ सागरसंभूतं सुस्वनं शङ्खमुत्तमम् ॥ १३
ता वाचः सूतपुत्रस्य तथा युक्ता निशम्य तु ।
दुर्योधनो महाराज प्रहृष्टः सानुगोऽभवत् ॥ १४
ततो दुन्दुभिनिर्घोषो मृदङ्गानां च सर्वशः ।
सिंहनादः सवादित्रः कुञ्जराणां च निस्वनः ॥ १५
प्रादुरासीत्तदा राजंस्त्वत्सैन्ये भरतर्षभ ।
योधानां संप्रहृष्टानां तथा समभवत्स्वनः ॥ १६
तथा प्रहृष्टे सैन्ये तु प्लवमानं महारथम् ।
विकत्थमानं समरे राधेयमरिकर्शनम् ।
मद्रराजः प्रहस्येदं वचनं प्रत्यभाषत ॥ १७
मा सूतपुत्र मानेन सौवर्णं हस्तिषड्गवम् ।
प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनंजयम् ॥ १८
बाल्यादिव त्वं त्यजसि वसु वैश्रवणो यथा ।
अयत्नेनैव राधेय द्रष्टास्यद्य धनंजयम् ॥ १९
परासृजसि मिथ्या किं किं च त्वं बहु मूढवत् ।
अपात्रदाने ये दोषास्तान्मोहान्नावबुध्यसे ॥ २०
यत्प्रवेदयसे वित्तं बहुत्वेन खलु त्वया ।
शक्यं बहुविधैर्यज्ञैर्यष्टुं सूत यजस्व तैः ॥ २१
यच्च प्रार्थयसे हन्तुं कृष्णौ मोहान्मृषैव तत् ।
न हि शुश्रुम संमर्दे क्रोष्ट्रा सिंहौ निपातितौ ॥२२
अप्रार्थितं प्रार्थयसे सुहृदो न हि सन्ति ते ।
ये त्वां न वारयन्त्याशु प्रपतन्तं हुताशने ॥ २३
कालकार्यं न जानीषे कालपक्वोऽस्यसंशयम् ।
बह्वबद्धमकर्णीयं को हि ब्रूयाज्जिजीविषुः ॥ २४
समुद्रतरणं दोर्भ्यां कण्ठे बद्ध्वा यथा शिलाम् ।
गिर्यग्राद्वा निपतनं तादृक्तव चिकीर्षितम् ॥ २५
सहितः सर्वयोधैस्त्वं व्यूढानीकैः सुरक्षितः ।
धनंजयेन युध्यस्व श्रेयश्चेत्प्राप्तुमिच्छसि ॥ २६
हितार्थं धार्तराष्ट्रस्य ब्रवीमि त्वा न हिंसया ।
श्रद्धत्स्वैतन्मया प्रोक्तं यदि तेऽस्ति जिजीविषा ॥२७

कर्ण उवाच ।

स्ववीर्येऽहं पराश्वस्य प्रार्थयाम्यर्जुनं रणे ।

त्वं तु मित्रमुखः शत्रुर्मां भीषयितुमिच्छसि ॥२८
न मामस्मादभिप्रायात्कश्चिदद्य निवर्तयेत् ।
अपीन्द्रो वज्रमुद्यम्य किं नु मर्त्यः करिष्यति ॥२९

संजय उवाच ।

इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः ।
चुकोपयिषुरत्यर्थं कर्णं मद्रेश्वरः पुनः ॥ ३०

यदा वै त्वां फल्गुनवेगनुन्ना
ज्याचोदिता हस्तवता विसृष्टाः ।
अन्वेतारः कङ्कपत्राः शिताग्रा-
स्तदा तप्स्यस्यर्जुनस्याभियोगात् ॥ ३१
यदा दिव्यं धनुरादाय पार्थः
प्रभासयन्पृतनां सव्यसाची ।
त्वामर्दयेत निशितैः पृषत्कै-
स्तदा पश्चात्तप्स्यसे सूतपुत्र ॥ ३२
बालश्चन्द्रं मातुरङ्के शयानो
यथा कश्चित्प्रार्थयतेऽपहर्तुम् ।
तद्वन्मोहाद्यतमानो रथस्थ-
स्त्वं प्रार्थयस्यर्जुनमद्य जेतुम् ॥ ३३
त्रिशूलमाश्लिष्य सुतीक्ष्णधारं
सर्वाणि गात्राणि निघर्षसि त्वम् ।
सुतीक्ष्णधारोपमकर्मणा त्वं
युयुत्ससे योऽर्जुनेनाद्य कर्ण ॥ ३४
सिद्धं सिंहं केसरिणं बृहन्तं
बालो मूढः क्षुद्रमृगस्तरस्वी ।
समाह्वयेत्तद्वदेतत्तवाद्य
समाह्वानं सूतपुत्रार्जुनस्य ॥ ३५
मा सूतपुत्राह्वय राजपुत्रं
महावीर्यं केसरिणं यथैव ।
वने सृगालः पिशितस्य तृप्तो
मा पार्थमासाद्य विनङ्क्ष्यसि त्वम् ॥ ३६

ईषादन्तं महानागं प्रभिन्नकरटामुखम् ।
शशकाह्वयसे युद्धे कर्ण पार्थं धनंजयम् ॥ ३७
बिलस्थं कृष्णसर्पं त्वं बाल्यात्काष्ठेन विध्यसि ।
महाविषं पूर्णकोशं यत्पार्थं योद्धुमिच्छसि ॥ ३८
सिंहं केसरिणं क्रुद्धमतिक्रम्याभिनर्दसि ।
सृगाल इव मूढत्वान्नृसिंहं कर्ण पाण्डवम् ॥ ३९
सुपर्णं पतगश्रेष्ठं वैनतेयं तरस्विनम् ।
लट्वेवाह्वयसे पाते कर्ण पार्थं धनंजयम् ॥ ४०
सर्वाम्भोनिलयं भीममूर्मिमन्तं झषायुतम् ।
चन्द्रोदये विवर्तन्तमप्लवः संतितीर्षसि ॥ ४१
ऋषभं दुन्दुभिग्रीवं तीक्ष्णशृङ्गं प्रहारिणम् ।
वत्स आह्वयसे युद्धे कर्ण पार्थं धनंजयम् ॥ ४२
महाघोषं महामेघं दर्दुरः प्रतिनर्दसि ।
कामतोयप्रदं लोके नरपर्जन्यमर्जुनम् ॥ ४३
यथा च स्वगृहस्थः श्वा व्याघ्रं वनगतं भषेत् ।
तथा त्वं भषसे कर्ण नरव्याघ्रं धनंजयम् ॥ ४४
सृगालोऽपि वने कर्ण शशैः परिवृतो वसन् ।
मन्यते सिंहमात्मानं यावत्सिंहं न पश्यति ॥ ४५
तथा त्वमपि राधेय सिंहमात्मानमिच्छसि ।
अपश्यञ्शत्रुदमनं नरव्याघ्रं धनंजयम् ॥ ४६
व्याघ्रं त्वं मन्यसेऽऽत्मानं यावत्कृष्णौ न पश्यसि ।
समास्थितावेकरथे सूर्याचन्द्रमसाविव ॥ ४७
यावद्गाण्डीवनिर्घोषं न शृणोषि महाहवे ।
तावदेव त्वया कर्ण शक्यं वक्तुं यथेच्छसि । ४८
रथशब्दधनुःशब्दैर्नादयन्तं दिशो दश ।
नर्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि ॥ ४९
नित्यमेव सृगालस्त्वं नित्यं सिंहो धनंजयः ।
वीरप्रद्वेषणान्मूढ नित्यं क्रोष्टेव लक्ष्यसे ॥ ५०
यथाखुः स्याद्बिडालश्च श्वा व्याघ्रश्च बलाबले ।
यथा सृगालः सिंहश्च यथा च शशकुञ्जरौ ॥ ५१

यथानृतं च सत्यं च यथा चापि विषामृते ।
तथा त्वमपि पार्थश्च प्रख्यातावात्मकर्मभिः ॥ ५२
संजय उवाच ।
अधिक्षिप्तस्तु राधेयः शल्येनामिततेजसा ।
शल्यमाह सुसंक्रुद्धो वाक्शल्यमवधारयन् ॥ ५३
गुणान्गुणवतः शल्य गुणवान्वेत्ति नागुणः ।
त्वं तु नित्यं गुणैर्हीनः किं ज्ञास्यस्यगुणो गुणान् ॥
अर्जुनस्य महास्त्राणि क्रोधं वीर्यं धनुः शरान् ।
अहं शल्याभिजानामि न त्वं जानासि तत्तथा ॥ ५५
एवमेवात्मनो वीर्यमहं वीर्यं च पाण्डवे ।
जानन्नेवाह्वये युद्धे शल्य नाग्निं पतंगवत् ॥ ५६
अस्ति चायमिषुः शल्य सुपुङ्खो रक्तभोजनः ।
एकतूणीशयः पत्री सुधौतः समलंकृतः ॥ ५७
शेते चन्दनपूर्णेन पूजितो बहुलाः समाः ।
आहेयो विषवानुग्रो नराश्वद्विपसंघहा ॥ ५८
एकवीरो महारौद्रस्तनुत्रास्थिविदारणः ।
निर्भिन्द्यां येन रुष्टोऽहमपि मेरुं महागिरिम् ॥ ५९
तमहं जातु नास्येयमन्यस्मिन्फल्गुनादृते ।
कृष्णाद्वा देवकीपुत्रात्सत्यं चात्र शृणुष्व मे ॥ ६०
तेनाहमिषुणा शल्य वासुदेवधनंजयौ ।
योत्स्ये परमसंक्रुद्धस्तत्कर्म सदृशं मम ॥ ६१
सर्वेषां वासुदेवानां कृष्णे लक्ष्मीः प्रतिष्ठिता ।
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः ।
उभयं तत्समासाद्य कोऽतिवर्तितुमर्हति ॥ ६२
तावेतौ पुरुषव्याघ्रौ समेतौ स्यन्दने स्थितौ ।
मामेकमभिसंयातौ सुजातं शल्य पश्य मे ॥ ६३
पितृष्वसामातुलजौ भ्रातरावपराजितौ ।
मणी सूत्र इव प्रोतौ द्रष्टासि निहतौ मया ॥ ६४
अर्जुने गाण्डिवं कृष्णे चक्रं तार्क्ष्यकपिध्वजौ ।
भीरूणां त्रासजननौ शल्य हर्षकरौ मम ॥ ६५
त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः ।
भयावतीर्णः संत्रासादबद्धं बहु भाषसे ॥ ६६
संस्तौषि त्वं तु केनापि हेतुना तौ कुदेशज ।
तौ हत्वा समरे हन्ता त्वामद्या सहबान्धवम् ॥ ६७
पापदेशज दुर्बुद्धे क्षुद्र क्षत्रियपांसन ।
सुहृद्भूत्वा रिपुः किं मां कृष्णाभ्यां भीषयन्नसि ॥ ६८
तौ वा ममाद्य हन्तारौ हन्तास्मि समरे स्थितौ ।
नाहं बिभेमि कृष्णाभ्यां विजानन्नात्मनो बलम् ॥
वासुदेवसहस्रं वा फल्गुनानां शतानि च ।
अहमेको हनिष्यामि जोषमास्स्व कुदेशज ॥ ७०
स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीडागता जनाः ।
या गाथाः संप्रगायन्ति कुर्वन्तोऽध्ययनं यथा ।
ता गाथाः शृणु मे शल्य मद्रकेषु दुरात्मसु ॥ ७१
ब्राह्मणैः कथिताः पूर्वं यथावद्राजसंनिधौ ।
श्रुत्वा चैकमना मूढ क्षम वा ब्रूहि वोत्तरम् ॥ ७२
मित्रध्रुङ्मद्रको नित्यं यो नो द्वेष्टि स मद्रकः ।
मद्रके संगतं नास्ति क्षुद्रवाक्ये नराधमे ॥ ७३
दुरात्मा मद्रको नित्यं नित्यं चानृतिकोऽनृजुः ।
यावदन्तं हि दौरात्म्यं मद्रकेष्विति नः श्रुतम् ॥ ७४
पिता माता च पुत्रश्च श्वश्रूश्वशुरमातुलाः ।
जामाता दुहिता भ्राता नप्ता ते ते च बान्धवाः ॥
वयस्याभ्यागताश्चान्ये दासीदासं च संगतम् ।
पुंभिर्विमिश्रा नार्यश्च ज्ञाताज्ञाताः स्वयेच्छया ॥ ७६
येषां गृहेषु शिष्टानां सक्तुमन्थाशिनां सदा ।
पीत्वा सीधुं सगोमांसं नर्दन्ति च हसन्ति च ॥
यानि चैवाप्यबद्धानि प्रवर्तन्ते च कामतः ।
कामप्रलापिनोऽन्योन्यं तेषु धर्मः कथं भवेत् ॥ ७८
मद्रकेषु विलुप्तेषु प्रख्याताशुभकर्मसु ।
नापि वैरं न सौहार्दं मद्रकेषु समाचरेत् ॥ ७९
मद्रके संगतं नास्ति मद्रको हि सचापलः ।

मद्रकेषु च दुःस्पर्शं शौचं गान्धारकेषु च ॥ ८०
राजयाजकयाज्येन नष्टं दत्तं हविर्भवेत् ॥ ८१
शूद्रसंस्कारको विप्रो यथा याति पराभवम् ।
तथा ब्रह्मद्विषो नित्यं गच्छन्तीह पराभवम् ॥ ८२
मद्रके संगतं नास्ति हतं वृश्चिकतो विषम् ।
आथर्वणेन मन्त्रेण सर्वा शान्तिः कृता भवेत् ॥८३
इति वृश्चिकदष्टस्य नानाविषहतस्य च ।
कुर्वन्ति भेषजं प्राज्ञाः सत्यं तच्चापि दृश्यते ।
एवं विद्वञ्जोषमास्स्व शृणु चात्रोत्तरं वचः ॥ ८४
वासांस्युत्सृज्य नृत्यन्ति स्त्रियो या मद्यमोहिताः ।
मिथुनेऽसंयताश्चापि यथाकामचराश्च ताः ।
तासां पुत्रः कथं धर्मं मद्रको वक्तुमर्हति ॥ ८५
यास्तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्रीदशेरके ।
तासां विभ्रष्टलज्जानां निर्लज्जानां ततस्ततः ।
त्वं पुत्रस्तादृशीनां हि धर्मं वक्तुमिहेच्छसि ॥ ८६
सुवीरकं याच्यमाना मद्रका कषति स्फिजौ ।
अदातुकामा वचनमिदं वदति दारुणम् ॥ ८७
मा मा सुवीरकं कश्चिद्याचतां दयितो मम ।
पुत्रं दद्यां प्रतिपदं न तु दद्यां सुवीरकम् ॥ ८८
नार्यो बृहत्यो निर्ह्रीका मद्रकाः कम्बलावृताः ।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम ॥ ८९
एवमादि मयान्यैर्वा शक्यं वक्तुं भवेद्बहु ।
आ केशाग्रान्नखाग्राच्च वक्तव्येषु कुवर्त्मसु ॥ ९०
मद्रकाः सिन्धुसौवीरा धर्मं विद्युः कथं त्विह ।
पापदेशोद्भवा म्लेच्छा धर्माणामविचक्षणाः ॥ ९१
एष मुख्यतमो धर्मः क्षत्रियस्येति नः श्रुतम् ।
यदाजौ निहतः शेते सद्भिः समभिपूजितः ॥ ९२
आयुधानां संपराये यन्मुच्येयमहं ततः ।
न मे स प्रथमः कल्पो निधने स्वर्गमिच्छतः ॥९३
सोऽहं प्रियः सखा चास्मि धार्तराष्ट्रस्य धीमतः ।
तदर्थे हि मम प्राणा यच्च मे विद्यते वसु ॥ ९४
व्यक्तं त्वमप्युपहितः पाण्डवैः पापदेशज ।
यथा ह्यमित्रवत्सर्वं त्वमस्मासु प्रवर्तसे ॥ ९५
कामं न खलु शक्योऽहं त्वद्विधानां शतैरपि ।
संग्रामाद्विमुखः कर्तुं धर्मज्ञ इव नास्तिकैः ॥ ९६
सारङ्ग इव घर्मार्तः कामं विलप शुष्य च ।
नाहं भीषयितुं शक्यः क्षत्रवृत्ते व्यवस्थितः ॥ ९७
तनुत्यजां नृसिंहानामाहवेष्वनिवर्तिनाम् ।
या गतिर्गुरुणा प्राङ्मे प्रोक्ता रामेण तां स्मर ॥९८
स्वेषां त्राणार्थमुद्युक्तं वधाय द्विषतामपि ।
विद्धि मामास्थितं वृत्तं पौरूरवसमुत्तमम् ॥ ९९
न तद्भूतं प्रपश्यामि त्रिषु लोकेषु मद्रक ।
यो मामस्मादभिप्रायाद्वारयेदिति मे मतिः ॥१००
एवं विद्वञ्जोषमास्स्व त्रासात्किं बहु भाषसे ।
मा त्वा हत्वा प्रदास्यामि क्रव्याद्भ्यो मद्रकाधम ॥
मित्रप्रतीक्षया शल्य धार्तराष्ट्रस्य चोभयोः ।
अपवादतितिक्षाभिस्त्रिभिरेतैर्हि जीवसि ॥ १०२
पुनश्चेदीदृशं वाक्यं मद्रराज वदिष्यसि ।
शिरस्ते पातयिष्यामि गदया वज्रकल्पया ॥ १०३
श्रोतारस्त्विदमद्येह द्रष्टारो वा कुदेशज ।
कर्णं वा जघ्नतुः कृष्णौ कर्णो वापि जघान तौ ॥१०४
एवमुक्त्वा तु राधेयः पुनरेव विशां पते ।
अब्रवीन्मद्रराजानं याहि याहीत्यसंभ्रमम् ॥ १०५

इति श्रीमहाभारते कर्णपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

संजय उवाच ।

मारिषाधिरथेः श्रुत्वा वचो युद्धाभिनन्दिनः ।
शल्योऽब्रवीत्पुनः कर्णं निदर्शनमुदाहरन् ॥ १
यथैव मत्तो मद्येन त्वं तथा न च वा तथा ।

तथाहं त्वां प्रमाद्यन्तं चिकित्सामि सुहृत्तया ॥ २
इमां काकोपमां कर्ण प्रोच्यमानां निबोध मे ।
श्रुत्वा यथेष्टं कुर्यास्त्वं विहीन कुलपांसन ॥ ३
नाहमात्मनि किंचिद्वै किल्बिषं कर्ण संस्मरे ।
येन त्वं मां महाबाहो हन्तुमिच्छस्यनागसम् ॥ ४
अवश्यं तु मया वाच्यं बुध्यतां यदि ते हितम् ।
विशेषतो रथस्थेन राज्ञश्चैव हितैषिणा ॥ ५
समं च विषमं चैव रथिनश्च बलाबलम् ।
श्रमः खेदश्च सततं हयानां रथिना सह ॥ ६
आयुधस्य परिज्ञानं रुतं च मृगपक्षिणाम् ।
भारश्चाप्यतिभारश्च शल्यानां च प्रतिक्रिया ॥ ७
अस्त्रयोगश्च युद्धं च निमित्तानि तथैव च ।
सर्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना ।
अतस्त्वां कथये कर्ण निदर्शनमिदं पुनः ॥ ८
वैश्यः किल समुद्रान्ते प्रभूतधनधान्यवान् ।
यज्वा दानपतिः क्षान्तः स्वकर्मस्थोऽभवच्छुचिः ॥९
बहुपुत्रः प्रियापत्यः सर्वभूतानुकम्पकः ।
राज्ञो धर्मप्रधानस्य राष्ट्रे वसति निर्भयः ॥ १०
पुत्राणां तस्य बालानां कुमाराणां यशस्विनाम् ।
काको बहूनामभवदुच्छिष्टकृतभोजनः ॥ ११
तस्मै सदा प्रयच्छन्ति वैश्यपुत्राः कुमारकाः ।
मांसोदनं दधि क्षीरं पायसं मधुसर्पिषी ॥ १२
स चोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः ।
सदृशान्पक्षिणो दृप्तः श्रेयसश्चावमन्यते ॥ १३
अथ हंसाः समुद्रान्ते कदाचिदभिपातिनः ।
गरुडस्य गतौ तुल्याश्चक्राङ्गा हृष्टचेतसः ॥ १४
कुमारकास्ततो हंसान्दृष्ट्वा काकमथाब्रुवन् ।
भवानेव विशिष्टो हि पतत्रिभ्यो विहंगम ॥ १५
प्रतार्यमाणस्तु स तैरल्पबुद्धिभिरण्डजः ।
तद्वचः सत्यमित्येव मौर्ख्याद्दर्पाच्च मन्यते ॥ १६
तान्सोऽभिपत्य जिज्ञासुः क एषां श्रेष्ठभागिति ।
उच्छिष्टदर्पितः काको बहूनां दूरपातिनाम् ॥ १७
तेषां यं प्रवरं मेने हंसानां दूरपातिनाम् ।
तमाह्वयत दुर्बुद्धिः पताम इति पक्षिणम् ॥ १८
तच्छ्रुत्वा प्राहसन्हंसा ये तत्रासन्समागताः ।
भाषतो बहु काकस्य बलिनः पततां वराः ।
इदमूचुश्च चक्राङ्गा वचः काकं विहंगमाः ॥ १९
वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।
पक्षिणां च वयं नित्यं दूरपातेन पूजिताः ॥ २०
कथं नु हंसं बलिनं वज्राङ्गं दूरपातिनम् ।
काको भूत्वा निपतने समाह्वयसि दुर्मते ।
कथं त्वं पतनं काक सहास्माभिर्ब्रवीषि तत् ॥ २१
अथ हंसवचो मूढः कुत्सयित्वा पुनः पुनः ।
प्रजगादोत्तरं काकः कत्थनो जातिलाघवात् ॥ २२
शतमेकं च पातानां पतितास्मि न संशयः ।
शतयोजनमेकैकं विचित्रं विविधं तथा ॥ २३
उड्डीनमवडीनं च प्रडीनं डीनमेव च ।
निडीनमथ संडीनं तिर्यक्चातिगतानि च ॥ २४
विडीनं परिडीनं च पराडीनं सुडीनकम् ।
अतिडीनं महाडीनं निडीनं परिडीनकम् ॥ २५
गतागतप्रतिगता बह्वीश्च निकुडीनिकाः ।
कर्तास्मि मिषतां वोऽद्य ततो द्रक्ष्यथ मे बलम् ॥
एवमुक्ते तु काकेन प्रहस्यैको विहंगमः ।
उवाच हंसस्तं काकं वचनं तन्निबोध मे ॥ २७
शतमेकं च पातानां त्वं काक पतिता ध्रुवम् ।
एकमेव तु ये पातं विदुः सर्वे विहंगमाः ॥ २८
तमहं पतिता काक नान्यं जानामि कंचन ।
पत त्वमपि रक्ताक्ष येन वा तेन मन्यसे ॥ २९
अथ काकाः प्रजहसुर्ये तत्रासन्समागताः ।
कथमेकेन पातेन हंसः पातशतं जयेत् ॥ ३०

एकेनैव शतस्यैकं पातेनाभिभविष्यति ।
हंसस्य पतितं काको बलवानाशुविक्रमः ।। ३१
प्रपेततुः स्पर्धयाथ ततस्तौ हंसवायसौ ।
एकपाती च चक्राङ्गः काकः पातशतेन च ।। ३२
पेतिवानथ चक्राङ्गः पेतिवानथ वायसः ।
विसिस्मापयिषुः पातैराचक्षाणोऽऽत्मनः क्रियाम् ।।
अथ काकस्य चित्राणि पतितानीतराणि च ।
दृष्ट्वा प्रमुदिताः काका विनेदुरथ तैः स्वरैः ।। ३४
हंसांश्चावहसन्ति स्म प्रावदन्नप्रियाणि च ।
उत्पत्योत्पत्य च प्राहुर्मुहूर्तमिति चेति च ।। ३५
वृक्षाग्रेभ्यः स्थलेभ्यश्च निपतन्त्युत्पतन्ति च ।
कुर्वाणा विविधान्रावानाशंसन्तस्तदा जयम् ।। ३६
हंसस्तु मृदुकेनैव विक्रान्तुमुपचक्रमे ।
प्रत्यहीयत काकाच्च मुहूर्तमिव मारिष ।। ३७
अवमन्य रयं हंसानिदं वचनमब्रवीत् ।
योऽसावुत्पतितो हंसः सोऽसावेव प्रहीयते ।। ३८
अथ हंसः स तच्छ्रुत्वा प्रापतत्पश्चिमां दिशम् ।
उपर्युपरि वेगेन सागरं वरुणालयम् ।। ३९
ततो भीः प्राविशत्काकं तदा तत्र विचेतसम् ।
द्वीपद्रुमानपश्यन्तं निपतन्तं श्रमान्वितम् ।
निपतेयं क नु श्रान्त इति तस्मिञ्जलार्णवे ।। ४०
अविषह्यः समुद्रो हि बहुसत्त्वगणालयः ।
महाभूतशतोद्भासी नभसोऽपि विशिष्यते ।। ४१
गाम्भीर्याद्धि समुद्रस्य न विशेषः कुलाधम ।
दिगम्बराम्भसां कर्ण समुद्रस्था हि दुर्जयाः ।
विदूरपातात्तोयस्य किं पुनः कर्ण वायसः ।। ४२
अथ हंसोऽभ्यतिक्रम्य मुहूर्तमिति चेति च ।
अवेक्षमाणस्तं काकं नाशक्नोद्व्यपसर्पितुम् ।
अतिक्रम्य च चक्राङ्गः काकं तं समुदैक्षत ।। ४३
तं तथा हीयमानं च हंसो दृष्ट्वाब्रवीदिदम् ।
उज्जिहीर्षुर्निमज्जन्तं स्मरन्सत्पुरुषव्रतम् ।। ४४
बहूनि पतनानि त्वमाचक्षाणो मुहुर्मुहुः ।
पतस्यव्याहरंश्चेदं न नो गुह्यं प्रभाषसे ।। ४५
किं नाम पतनं काक यत्त्वं पतसि सांप्रतम् ।
जलं स्पृशसि पक्षाभ्यां तुण्डेन च पुनः पुनः ।।४६
स पक्षाभ्यां स्पृशन्नार्तस्तुण्डेन जलमर्णवे ।
काको दृढं परिश्रान्तः सहसा निपपात ह ।। ४७

हंस उवाच ।

शतमेकं च पातानां यत्प्रभाषसि वायस ।
नानाविधानीह पुरा तच्चानृतमिहाद्य ते ।। ४८

काक उवाच ।

उच्छिष्टदर्पितो हंस मन्येऽऽत्मानं सुपर्णवत् ।
अवमन्य बहूंश्चाहं काकानन्यांश्च पक्षिणः ।
प्राणैर्हंस प्रपद्ये त्वां द्वीपान्तं प्रापयस्व माम् ।। ४९
यद्यहं स्वस्तिमान्हंस स्वदेशं प्राप्नुयां पुनः ।
न कंचिदवमन्येयमापदो मां समुद्धर ।। ५०
तमेवंवादिनं दीनं विलपन्तमचेतनम् ।
काक काकेति वाशन्तं निमज्जन्तं महार्णवे ।। ५१
तथैत्य वायसं हंसो जलक्लिन्नं सुदुर्दशम् ।
पद्भ्यामुत्क्षिप्य वेपन्तं पृष्ठमारोपयच्छनैः ।। ५२
आरोप्य पृष्ठं काकं तं हंसः कर्ण विचेतसम् ।
आजगाम पुनर्द्वीपं स्पर्धया पेततुर्यतः ।। ५३
संस्थाप्य तं चापि पुनः समाश्वास्य च खेचरम् ।
गतो यथेप्सितं देशं हंसो मन इवाशुगः ।। ५४
उच्छिष्टभोजनात्काको यथा वैश्यकुले तु सः ।
एवं त्वमुच्छिष्टभृतो धार्तराष्ट्रैर्न संशयः ।
सदृशाञ्श्रेयसश्चापि सर्वान्कर्णातिमन्यसे ।। ५५
द्रोणद्रौणिकृपैर्गुप्तो भीष्मेणान्यैश्च कौरवैः ।
विराटनगरे पार्थमेकं किं नावधीस्तदा ।। ५६
यत्र व्यस्ताः समस्ताश्च निर्जिताः स्थ किरीटिना ।

सृगाला इव सिंहेन क ते वीर्यमभूत्तदा ॥ ५७
भ्रातरं च हतं दृष्ट्वा निर्जितः सव्यसाचिना ।
पश्यतां कुरुवीराणां प्रथमं त्वं पलायथाः ॥ ५८
तथा द्वैतवने कर्ण गन्धर्वैः समभिद्रुतः ।
कुरून्समग्रानुत्सृज्य प्रथमं त्वं पलायथाः ॥ ५९
हत्वा जित्वा च गन्धर्वांश्चित्रसेनमुखान्रणे ।
कर्ण दुर्योधनं पार्थः सभार्यं सममोचयत् ॥ ६०
पुनः प्रभावः पार्थस्य पुराणः केशवस्य च ।
कथितः कर्ण रामेण सभायां राजसंसदि ॥ ६१
सततं च तदश्रौषीर्वचनं द्रोणभीष्मयोः ।
अवध्यौ वदतोः कृष्णौ संनिधौ वै महीक्षिताम् ॥
कियन्तं तत्र वक्ष्यामि येन येन धनंजयः ।
त्वत्तोऽतिरिक्तः सर्वेभ्यो भूतेभ्यो ब्राह्मणो यथा ॥
इदानीमेव द्रष्टासि प्रधने स्यन्दने स्थितौ ।
पुत्रं च वसुदेवस्य पाण्डवं च धनंजयम् ॥ ६४
देवासुरमनुष्येषु प्रख्यातौ यौ नरर्षभौ ।
प्रकाशेनाभिविख्यातौ त्वं तु खद्योतवन्नृषु ॥ ६५
एवं विद्वान्मावमंस्थाः सूतपुत्राच्युतार्जुनौ ।
नृसिंहौ तौ नरश्वा त्वं जोषमास्स्व विकत्थन ॥६६

इति श्रीमहाभारते कर्णपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

संजय उवाच ।

मद्राधिपस्याधिरथिस्तदैवं
वचो निशम्याप्रियमप्रतीतः ।
उवाच शल्यं विदितं ममैत-
द्यथाविधावर्जुनवासुदेवौ ॥ १
शौरे रथं वाहयतोऽर्जुनस्य
बलं महास्त्राणि च पाण्डवस्य ।
अहं विजानामि यथावदद्य
परोक्षभूतं तव तत्तु शल्य ॥ २
तौ चाप्रधृष्यौ शस्त्रभृतां वरिष्ठौ
व्यपेतभीर्योधयिष्यामि कृष्णौ ।
संतापयत्यभ्यधिकं तु रामा-
च्छापोऽद्य मां ब्राह्मणसत्तमाच्च ॥ ३
अवात्सं वै ब्राह्मणच्छद्मनाहं
रामे पुरा दिव्यमस्त्रं चिकीर्षुः ।
तत्रापि मे देवराजेन विघ्नो
हितार्थिना फल्गुनस्यैव शल्य ॥ ४
कृतोऽवभेदेन ममोरुमेत्य
प्रविश्य कीटस्य तनुं विरूपाम् ।
गुरोर्भयाच्चापि न चेलिवानहं
तच्चावबुद्धो ददृशे स विप्रः ॥ ५
पृष्टश्चाहं तमवोचं महर्षिं
सूतोऽहमस्मीति स मां शशाप ।
सूतोपधावाप्तमिदं त्वयास्त्रं
न कर्मकाले प्रतिभास्यति त्वाम् ॥ ६
अन्यत्र यस्मात्तव मृत्युकाला-
दब्राह्मणे ब्रह्म न हि ध्रुवं स्यात् ।
तदद्य पर्याप्तमतीव शस्त्र-
मस्मिन्संग्रामे तुमुले तात भीमे ॥ ७
अपां पतिर्वेगवानप्रमेयो
निमज्जयिष्यन्निवहान्प्रजानाम् ।
महानगं यः कुरुते समुद्रं
वेलैव तं वारयत्यप्रमेयम् ॥ ८
प्रमुञ्चन्तं बाणसंघानमोघा-
न्मर्मच्छिदो वीरहणः सपत्रान् ।
कुन्तीपुत्रं प्रतियोत्स्यामि युद्धे
ज्याकर्षिणामुत्तममद्य लोके ॥ ९
एवं बलेनातिबलं महास्त्रं

समुद्रकल्पं सुदुरापमुग्रम् ।
शरौघिणं पार्थिवान्मज्जयन्तं
वेलेव पार्थमिषुभिः संसहिष्ये ॥ १०
अद्याहवे यस्य न तुल्यमन्यं
मन्ये मनुष्यं धनुराददानम् ।
सुरासुरान्वै युधि यो जयेत
तेनाद्य मे पश्य युद्धं सुघोरम् ॥ ११
अतिमानी पाण्डवो युद्धकामो
अमानुषैरेष्यति मे महास्त्रैः ।
तस्यास्त्रमस्त्रैरभिहत्य संख्ये
शरोत्तमैः पातयिष्यामि पार्थम् ॥ १२
दिवाकरेणापि समं तपन्तं
समाप्तरश्मिं यशसा ज्वलन्तम् ।
तमोनुदं मेघ इवातिमात्रो
धनंजयं छादयिष्यामि बाणैः ॥ १३
वैश्वानरं धूमशिखं ज्वलन्तं
तेजस्विनं लोकमिमं दहन्तम् ।
मेघो भूत्वा शरवर्षैर्यथाग्निं
तथा पार्थं शमयिष्यामि युद्धे ॥ १४
प्रमाथिनं बलवन्तं प्रहारिणं
प्रभञ्जनं मातरिश्वानमुग्रम् ।
युद्धे सहिष्ये हिमवानिवाचलो
धनंजयं क्रुद्धममृष्यमाणम् ॥ १५
विशारदं रथमार्गेष्वसक्तं
धुर्यं नित्यं समरेषु प्रवीरम् ।
लोके वरं सर्वधनुर्धराणां
धनंजयं संयुगे संसहिष्ये ॥ १६
अद्याहवे यस्य न तुल्यमन्यं
मध्येमनुष्यं धनुराददानम् ।
सर्वामिमां यः पृथिवीं सहेत
तथा विद्वान्योत्स्यमानोऽस्मि तेन ॥ १७
यः सर्वभूतानि सदेवकानि
प्रस्थेऽजयत्खाण्डवे सव्यसाची ।
को जीवितं रक्षमाणो हि तेन
युयुत्सते मामृते मानुषोऽन्यः ॥ १८
अहं तस्य पौरुषं पाण्डवस्य
ब्रूयां हृष्टः समितौ क्षत्रियाणाम् ।
किं त्वं मूर्खः प्रभषन्मूढचेता
मामवोचः पौरुषमर्जुनस्य ॥ १९
अप्रियो यः परुषो निष्ठुरो हि
क्षुद्रः क्षेप्ता क्षमिणश्चाक्षमावान् ।
हन्यामहं तादृशानां शतानि
क्षमामि त्वां क्षमया कालयोगात् ॥ २०
अवोचस्त्वं पाण्डवार्थेऽप्रियाणि
प्रधर्षयन्मां मूढवत्पापकर्मन् ।
मय्यार्जवे जिह्मगतिर्हतस्त्वं
मित्रद्रोही सप्तपदं हि मित्रम् ॥ २१
कालस्त्वयं मृत्युमयोऽतिदारुणो
दुर्योधनो युद्धमुपागमद्यत् ।
तस्यार्थसिद्धिमभिकाङ्क्षमाण-
स्तमभ्येष्ये यत्र नैकान्त्यमस्ति ॥ २२
मित्रं मिदेर्नन्दतेः प्रीयतेर्वा
संत्रायतेर्मानद मोदतेर्वा ।
ब्रवीति तच्चामुत विप्रपूर्वा-
त्तच्चापि सर्वं मम दुर्योधनेऽस्ति ॥ २३
शत्रुः शदेः शासतेः शायतेर्वा
शृणातेर्वा श्वयतेर्वापि सर्गे ।
उपसर्गाद्बहुधा सूदतेश्च
प्रायेण सर्वं त्वयि तच्च मह्यम् ॥ २४
दुर्योधनार्थं तव चाप्रियार्थं

यशोर्थमात्मार्थमपीश्वरार्थम् ।
तस्मादहं पाण्डववासुदेवौ
योत्स्ये यत्नात्कर्म तत्पश्य मेऽद्य ॥ २५
अस्त्राणि पश्याद्य ममोत्तमानि
ब्राह्माणि दिव्यान्यथ मानुषाणि ।
आसादयिष्याम्यहमुग्रवीर्यं
द्विपोत्तमं मत्तमिवाभिमत्तः ॥ २६
अस्त्रं ब्राह्मं मनसा तद्ध्यजय्यं
क्षेप्स्ये पार्थायाप्रतिमं जयाय ।
तेनापि मे नैव मुच्येत युद्धे
न चेत्पतेद्विषमे मेऽद्य चक्रम् ॥ २७
वैवस्वताद्दण्डहस्ताद्वरुणाद्वापि पाशिनः ।
सगदाद्वा धनपतेः सवज्राद्वापि वासवात् ॥ २८
नान्यस्मादपि कस्माच्चिद्बिभिमो ह्याततायिनः ।
इति शल्य विजानीहि यथा नाहं बिभेम्यभीः ॥
तस्माद्भयं न मे पार्थान्नापि चैव जनार्दनात् ।
अद्य युद्धं हि ताभ्यां मे संपराये भविष्यति ॥३०
श्वभ्रे ते पततां चक्रमिति मे ब्राह्मणोऽवदत् ।
युध्यमानस्य संग्रामे प्राप्तस्यैकायने भयम् ॥ ३१
तस्माद्बिभेमि बलवद्ब्राह्मणव्याहृतादहम् ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ ३२
होमधेन्वा वत्समस्य प्रमत्त इषुणाहनम् ।
चरन्तमजने शल्य ब्राह्मणात्तपसो निधेः ॥ ३३
ईषादन्तान्सप्तशतान्दासीदासशतानि च ।
ददतो द्विजमुख्याय प्रसादं न चकार मे ॥ ३४
कृष्णानां श्वेतवत्सानां सहस्राणि चतुर्दश ।
आहरन्न लभे तस्मात्प्रसादं द्विजसत्तमात् ॥ ३५
ऋद्धं गेहं सर्वकामैर्यच्च मे वसु किंचन ।
तत्सर्वमस्मै सत्कृत्य प्रयच्छामि न चेच्छति ॥ ३६
ततोऽब्रवीन्मां याचन्तमपराद्धं प्रयत्नतः ।
व्याहृतं यन्मया सूत तत्तथा न तदन्यथा ॥ ३७
अनृतोक्तं प्रजा हन्यात्ततः पापमवाप्नुयात् ।
तस्माद्धर्माभिरक्षार्थं नानृतं वक्तुमुत्सहे ॥ ३८
मा त्वं ब्रह्मगतिं हिंस्याः प्रायश्चित्तं कृतं त्वया ।
मद्वाक्यं नानृतं लोके कश्चित्कुर्यात्समाप्नुहि ॥ ३९
इत्येतत्ते मया प्रोक्तं क्षिप्तेनापि सुहृत्तया ।
जानामि त्वाधिक्षिपन्तं जोषमास्स्वोत्तरं शृणु ॥४०

इति श्रीमहाभारते कर्णपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

संजय उवाच ।

ततः पुनर्महाराज मद्रराजमरिंदमम् ।
अभ्यभाषत राधेयः संनिवार्योत्तरं वचः ॥ १
यत्त्वं निदर्शनार्थं मां शल्य जल्पितवानसि ।
नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे ॥ २
यदि मां देवताः सर्वा योधयेयुः सवासवाः ।
तथापि मे भयं न स्यात्किमु पार्थात्सकेशवात् ॥ ३
नाहं भीषयितुं शक्यो वाङ्मात्रेण कथंचन ।
अन्यं जानीहि यः शक्यस्त्वया भीषयितुं रणे ॥ ४
नीचस्य बलमेतावत्पारुष्यं यत्त्वमात्थ माम् ।
अशक्तोऽस्मद्गुणान्प्राप्तुं वल्गसे बहु दुर्मते ॥ ५
न हि कर्णः समुद्भूतो भयार्थमिह मारिष ।
विक्रमार्थमहं जातो यशोर्थं च तथैव च ॥ ६
इदं तु मे त्वमेकाग्रः शृणु मद्रजनाधिप ।
संनिधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम् ॥ ७
देशांश्च विविधांश्चित्रान्पूर्ववृत्तांश्च पार्थिवान् ।
ब्राह्मणाः कथयन्तः स्म धृतराष्ट्रमुपासते ॥ ८
तत्र वृद्धः पुरावृत्ताः कथाः काश्चिद्द्विजोत्तमः ।
बाह्लीकदेशं मद्रांश्च कुत्सयन्वाक्यमब्रवीत् ॥ ९
बहिष्कृता हिमवता गङ्गया च तिरस्कृताः ।

सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ॥ १०
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः ।
तान्धर्मबाह्यानशुचीन्बाह्लीकान्परिवर्जयेत् ॥ ११
गोवर्धनो नाम वटः सुभाण्डं नाम चत्वरम् ।
एतद्राजकुलद्वारमाकुमारः स्मराम्यहम् ॥ १२
कार्येणात्यर्थगाढेन बाह्लीकेषूषितं मया ।
तत एषां समाचारः संवासाद्विदितो मम ॥ १३
शाकलं नाम नगरमापगा नाम निम्नगा ।
जर्तिका नाम बाह्लीकास्तेषां वृत्तं सुनिन्दितम् ॥१४
धानागौडासवे पीत्वा गोमांसं लशुनैः सह ।
अपूपमांसवाट्यानामाशिनः शीलवर्जिताः ॥ १५
हसन्ति गान्ति नृत्यन्ति स्त्रीभिर्मत्ता विवाससः ।
नगरागारवप्रेषु बहिर्माल्यानुलेपनाः ॥ १६
मत्तावगीतैर्विविधैः खरोष्ट्रनिनदोपमैः ।
आहुरन्योन्यमुक्तानि प्रब्रुवाणा मदोत्कटाः ॥ १७
हा हते हा हतेत्येव स्वामिभर्तृहतेति च ।
आक्रोशन्त्यः प्रनृत्यन्ति मन्दाः पर्वस्वसंयताः ॥१८
तेषां किलावलिप्तानां निवसन्कुरुजाङ्गले ।
कश्चिद्बाह्लीकमुख्यानां नातिहृष्टमना जगौ ॥ १९
सा नूनं बृहती गौरी सूक्ष्मकम्बलवासिनी ।
मामनुस्मरती शेते बाह्लीकं कुरुवासिनम् ॥ २०
शतद्रुकनदीं तीर्त्वा तां च रम्यामिरावतीम् ।
गत्वा स्वदेशं द्रक्ष्यामि स्थूलशङ्खाः शुभाः स्त्रियः ॥
मनःशिलोज्ज्वलापाङ्गा गौर्यस्त्रिककुदाञ्जनाः ।
केवलाजिनसंवीताः कूर्दन्त्यः प्रियदर्शनाः ॥ २२
मृदङ्गानकशङ्खानां मर्दलानां च निस्वनैः ।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ॥ २३
शमीपीलुकरीराणां वनेषु सुखवर्त्मसु ।
अपूपान्सक्तुपिण्डीश्च खादन्तो मथितान्विताः ॥२४
पथिषु प्रबला भूत्वा कदासमृदितेऽध्वनि ।
खलोपहारं कुर्वाणास्ताडयिष्याम भूयसः ॥ २५
एवं हीनेषु व्रात्येषु बाह्लीकेषु दुरात्मसु ।
कश्चेतयानो निवसेन्मुहूर्तमपि मानवः ॥ २६
ईदृशा ब्राह्मणेनोक्ता बाह्लीका मोघचारिणः ।
येषां षड्भागहर्ता त्वमुभयोः शुभपापयोः ॥ २७
इत्युक्त्वा ब्राह्मणः साधुरुत्तरं पुनरुक्तवान् ।
बाह्लीकेष्वविनीतेषु प्रोच्यमानं निबोधत ॥ २८
तत्र स्म राक्षसी गाति सदा कृष्णचतुर्दशीम् ।
नगरे शाकले स्फीते आहत्य निशि दुन्दुभिम् ॥२९
कदा वा घोषिका गाथाः पुनर्गास्यन्ति शाकले ।
गव्यस्य तृप्ता मांसस्य पीत्वा गौडं महासवम् ॥३०
गौरीभिः सह नारीभिर्बृहतीभिः स्वलंकृताः ।
पलाण्डुगण्डूषयुतान्खादन्ते चैडकान्बहून् ॥ ३१
वाराहं कौक्कुटं मांसं गव्यं गार्दभमौष्ट्रकम् ।
ऐडं च ये न खादन्ति तेषां जन्म निरर्थकम् ॥३२
इति गायन्ति ये मत्ताः शीधुना शाकलावतः ।
सबालवृद्धाः कूर्दन्तस्तेषु वृत्तं कथं भवेत् ॥ ३३
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदन्योऽप्युक्तवानस्मान्ब्राह्मणः कुरुसंसदि ॥ ३४
पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्यपि ।
शतद्रुश्च विपाशा च तृतीयेरावती तथा ।
चन्द्रभागा वितस्ता च सिन्धुषष्ठा बहिर्गताः ॥ ३५
आरट्टा नाम ते देशा नष्टधर्मान्न तान्व्रजेत् ।
व्रात्यानां दासमीयानां विदेहानामयज्वनाम् ॥ ३६
न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा ।
तेषां प्रनष्टधर्माणां बाह्लीकानामिति श्रुतिः ॥ ३७
ब्राह्मणेन तथा प्रोक्तं विदुषा साधुसंसदि ।
काष्ठकुण्डेषु बाह्लीका मृण्मयेषु च भुञ्जते ।
सक्तुवाट्यावलिप्तेषु श्वादिलीढेषु निर्घृणाः ॥ ३८
आविकं चौष्ट्रिकं चैव क्षीरं गार्दभमेव च ।

तद्विकारांश्च बाह्लीकाः खादन्ति च पिबन्ति च ॥
पुत्रसंकरिणो जाल्माः सर्वान्नक्षीरभोजनाः ।
आरट्टा नाम बाह्लीका वर्जनीया विपश्चिता ॥ ४०
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदन्योऽप्युक्तवान्सभ्यो ब्राह्मणः कुरुसंसदि ॥ ४१
युगंधरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले ।
तद्वद्भूतिलये स्नात्वा कथं स्वर्गं गमिष्यति ॥ ४२
पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्वतात् ।
आरट्टा नाम बाह्लीका न तेष्वार्यो द्व्यहं वसेत् ॥
बहिश्च नाम ह्लीकश्च विपाशायां पिशाचकौ ।
तयोरपत्यं बाह्लीका नैषा सृष्टिः प्रजापतेः ॥ ४४
कारस्करान्महिषकान्कलिङ्गान्कीकटाटवीन् ।
कर्कोटकान्वीरकांश्च दुर्धर्मांश्च विवर्जयेत् ॥ ४५
इति तीर्थानुसर्तारं राक्षसी काचिदब्रवीत् ।
एकरात्रा शमीगेहे महोलूखलमेखला ॥ ४६
आरट्टा नाम ते देशा बाह्लीका नाम ते जनाः ।
वसातिसिन्धुसौवीरा इति प्रायो विकुत्सिताः ॥४७
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
उच्यमानं मया सम्यक्तदेकाग्रमनाः शृणु ॥ ४८
ब्राह्मणः शिल्पिनो गेहमभ्यगच्छत्पुरातिथिः ।
आचारं तत्र संप्रेक्ष्य प्रीतः शिल्पिनमब्रवीत् ॥४९
मया हिमवतः शृङ्गमेकेनाध्युषितं चिरम् ।
दृष्टाश्च बहवो देशा नानाधर्मसमाकुलाः ॥ ५०
न च केन च धर्मेण विरुध्यन्ते प्रजा इमाः ।
सर्वे हि तेऽब्रुवन्धर्मं यथोक्तं वेदपारगैः ॥ ५१
अटता तु सदा देशान्नानाधर्मसमाकुलान् ।
आगच्छता महाराज बाह्लीकेषु निशामितम् ॥ ५२
तत्रैव ब्राह्मणो भूत्वा ततो भवति क्षत्रियः ।
वैश्यः शूद्रश्च बाह्लीकस्ततो भवति नापितः ॥ ५३
नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः ।
द्विजो भूत्वा च तत्रैव पुनर्दासोऽपि जायते ॥५४
भवत्येकः कुले विप्रः शिष्टान्ये कामचारिणः ।
गान्धारा मद्रकाश्चैव बाह्लीकाः केऽप्यचेतसः ॥५५
एतन्मया श्रुतं तत्र धर्मसंकरकारकम् ।
कृत्स्नामटित्वा पृथिवीं बाह्लीकेषु विपर्ययः ॥ ५६
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदप्यन्योऽब्रवीद्वाक्यं बाह्लीकानां विकुत्सितम् ॥
सती पुरा हृता काचिदारट्टा किल दस्युभिः ।
अधर्मतश्चोपयाता सा तानभ्यशपत्ततः ॥ ५८
बालां बन्धुमतीं यन्मामधर्मेणोपगच्छथ ।
तस्मान्नार्यो भविष्यन्ति बन्धक्यो वै कुलेषु वः ।
न चैवास्मात्प्रमोक्ष्यध्वं घोरात्पापान्नराधमाः ॥ ५९
कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः ।
कोसलाः काशयोऽङ्गाश्च कलिङ्गा मगधास्तथा ॥६०
चेदयश्च महाभागा धर्मं जानन्ति शाश्वतम् ।
नानादेशेषु सन्तश्च प्रायो बाह्या लयादृते ॥ ६१

आ मत्स्येभ्यः कुरुपाञ्चालदेश्या
आ नैमिषाच्चेदयो ये विशिष्टाः ।
धर्मं पुराणमुपजीवन्ति सन्तो
मद्रानृते पञ्चनदांश्च जिह्मान् ॥ ६२
एवं विद्वन्धर्मकथांश्च राजं-
स्तूष्णींभूतो जडवच्छल्य भूयाः ।
त्वं तस्य गोप्ता च जनस्य राजा
षड्भागहर्ता शुभदुष्कृतस्य ॥ ६३

अथ वा दुष्कृतस्य त्वं हर्ता तेषामरक्षिता ।
रक्षिता पुण्यभाग्राजा प्रजानां त्वं त्वपुण्यभाक् ॥
पूज्यमाने पुरा धर्मे सर्वदेशेषु शाश्वते ।
धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः ॥ ६५
व्रात्यानां दाशमीयानां कृतेऽप्यशुभकर्मणाम् ।
इति पाञ्चनदं धर्ममवमेने पितामहः ।

स्वधर्मस्थेषु वर्णेषु सोऽप्येतं नाभिपूजयेत् ॥ ६६
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
कल्माषपादः सरसि निमज्जन्राक्षसोऽब्रवीत् ॥ ६७
क्षत्रियस्य मलं भैक्षं ब्राह्मणस्यानृतं मलम् ।
मलं पृथिव्या बाह्लीकाः स्त्रीणां मद्रस्त्रियो मलम् ॥
निमज्जमानमुद्धृत्य कश्चिद्राजा निशाचरम् ।
अपृच्छत्तेन चाख्यातं प्रोक्तवान्यन्निबोध तत् ॥६९
मानुषाणां मलं म्लेच्छा म्लेच्छानां मौष्टिका मलम् ।
मौष्टिकानां मलं शण्डाः शण्डानां राजयाजकाः ॥
राजयाजकयाज्यानां मद्रकाणां च यन्मलम् ।
तद्भवेद्वै तव मलं यद्यस्मान्न विमुञ्चसि ॥ ७१
इति रक्षोपसृष्टेषु विषवीर्यहतेषु च ।
राक्षसं भेषजं प्रोक्तं संसिद्धं वचनोत्तरम् ॥ ७२
ब्राह्मं पाञ्चाला कौरवेयाः स्वधर्मः
सत्यं मत्स्याः शूरसेनाश्च यज्ञः ।
प्राच्या दासा वृषला दाक्षिणात्याः
स्तेना बाह्लीकाः संकरा वै सुराष्ट्राः ॥ ७३
कृतघ्नता परवित्तापहारः
सुरापानं गुरुदारावमर्शः ।
येषां धर्मस्तान्प्रति नास्त्यधर्म
आरट्टकान्पाञ्चनदान्धिगस्तु ॥ ७४
आ पाञ्चालेभ्यः कुरवो नैमिषाश्च
मत्स्याश्चैवाप्यथ जानन्ति धर्मम् ।
कलिङ्गकाश्चाङ्गका मागधाश्च
शिष्टान्धर्मानुपजीवन्ति वृद्धाः ॥ ७५
प्राचीं दिशं श्रिता देवा जातवेदःपुरोगमाः ।
दक्षिणां पितरो गुप्तां यमेन शुभकर्मणा ॥ ७६
प्रतीचीं वरुणः पाति पालयन्नसुरान्बली ।
उदीचीं भगवान्सोमो ब्रह्मण्यो ब्राह्मणैः सह ॥ ७७
रक्षःपिशाचान्हिमवान्गुह्यकान्गन्धमादनः ।
ध्रुवः सर्वाणि भूतानि विष्णुर्लोकाञ्जनार्दनः ॥७८
इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोसलाः ।
अर्धोक्ताः कुरुपाञ्चालाः शाल्वाः कृत्स्नानुशासनाः ।
पार्वतीयाश्च विषमा यथैव गिरयस्तथा ॥ ७९
सर्वज्ञा यवना राजञ्शूराश्चैव विशेषतः ।
म्लेच्छाः स्वसंज्ञानियता नानुक्त इतरो जनः ॥८०
प्रतिरब्धास्तु बाह्लीका न च केचन मद्रकाः ।
स त्वमेतादृशः शल्य नोत्तरं वक्तुमर्हसि ॥ ८१
एतज्ज्ञात्वा जोषमास्स्व प्रतीपं मा स्म वै कृथाः ।
स त्वां पूर्वमहं हत्वा हनिष्ये केशवार्जुनौ ॥ ८२

शल्य उवाच ।

आतुराणां परित्यागः स्वदारसुतविक्रयः ।
अङ्गेषु वर्तते कर्ण येषामधिपतिर्भवान् ॥ ८३
रथातिरथसंख्यायां यत्त्वा भीष्मस्तदाब्रवीत् ।
तान्विदित्वात्मनो दोषान्निर्मन्युर्भव मा क्रुधः ॥८४
सर्वत्र ब्राह्मणाः सन्ति सन्ति सर्वत्र क्षत्रियाः ।
वैश्याः शूद्रास्तथा कर्ण स्त्रियः साध्व्यश्च सुव्रताः ।
रमन्ते चोपहासेन पुरुषाः पुरुषैः सह ।
अन्योन्यमवतक्षन्तो देशे देशे समैथुनाः ॥ ८६
परवाच्येषु निपुणः सर्वो भवति सर्वदा ।
आत्मवाच्यं न जानीते जानन्नपि विमुह्यति ॥ ८७

संजय उवाच ।

कर्णोऽपि नोत्तरं प्राह शल्योऽप्यभिमुखः परान् ।
पुनः प्रहस्य राधेयः पुनर्याहीत्यचोदयत् ॥ ८८

इति श्रीमहाभारते कर्णपर्वणि
त्रिंशत्तमोऽध्यायः ॥ ३० ॥

३१

संजय उवाच ।

ततः परानीकभिदं व्यूहमप्रतिमं परैः ।
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम् ॥ १

प्रययौ रथघोषेण सिंहनादरवेण च ।
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम् ॥ २
वेपमान इव क्रोधाद्युद्धशौण्डः परंतपः ।
प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ॥ ३
व्यधमत्पाण्डवीं सेनामासुरीं मघवानिव ।
युधिष्ठिरं चाभिभवन्नपसव्यं चकार ह ॥ ४

धृतराष्ट्र उवाच ।

कथं संजय राधेयः प्रत्यव्यूहत पाण्डवान् ।
धृष्टद्युम्नप्रमुखान्वीरान्भीमसेनाभिरक्षितान् ॥ ५
के च प्रपक्षौ पक्षौ वा मम सैन्यस्य संजय ।
प्रविभज्य यथान्यायं कथं वा समवस्थिताः ॥ ६
कथं पाण्डुसुताश्चापि प्रत्यव्यूहन्त मामकान् ।
कथं चैतन्महायुद्धं प्रावर्तत सुदारुणम् ॥ ७
क्व च बीभत्सुरभवद्यत्कर्णोऽयाद्युधिष्ठिरम् ।
को ह्यर्जुनस्य सांनिध्ये शक्तोऽभ्येतुं युधिष्ठिरम् ॥८
सर्वभूतानि यो ह्येकः खाण्डवे जितवान्पुरा ।
कस्तमन्यत्र राधेयात्प्रतियुध्येज्जिजीविषुः ॥ ९

संजय उवाच ।

शृणु व्यूहस्य रचनामर्जुनश्च यथा गतः ।
परिदाय नृपं तेभ्यः संग्रामश्चाभवद्यथा ॥ १०
कृपः शारद्वतो राजन्मागधश्च तरस्विनः ।
सात्वतः कृतवर्मा च दक्षिणं पक्षमाश्रिताः ॥ ११
तेषां प्रपक्षे शकुनिरुलूकश्च महारथः ।
सादिभिर्विमलप्रासैस्तवानीकमरक्षताम् ॥ १२
गान्धारिभिरसंभ्रान्तैः पार्वतीयैश्च दुर्जयैः ।
शलभानामिव व्रातैः पिशाचैरिव दुर्दृशैः ॥ १३
चतुस्त्रिंशत्सहस्राणि रथानामनिवर्तिनाम् ।
संशप्तका युद्धशौण्डा वामं पार्श्वमपालयन् ॥ १४
समुषितास्तव सुतैः कृष्णार्जुनजिघांसवः ।
तेषां प्रपक्षः काम्बोजाः शकाश्च यवनैः सह ॥१५
निदेशात्सूतपुत्रस्य सरथाः साश्वपत्तयः ।
आह्वयन्तोऽर्जुनं तस्थुः केशवं च महाबलम् ॥ १६
मध्येसेनामुखं कर्णो व्यवातिष्ठत दंशितः ।
चित्रवर्माङ्गदः स्रग्वी पालयन्ध्वजिनीमुखम् ॥ १७
रक्ष्यमाणः सुसंरब्धैः पुत्रैः शस्त्रभृतां वरः ।
वाहिनीप्रमुखं वीरः संप्रकर्षन्नशोभत ॥ १८
अयोरत्निर्महाबाहुः सूर्यवैश्वानरद्युतिः ।
महाद्विपस्कन्धगतः पिङ्गलः प्रियदर्शनः ।
दुःशासनो वृतः सैन्यैः स्थितो व्यूहस्य पृष्ठतः ॥ १९
तमन्वयान्महाराज स्वयं दुर्योधनो नृपः ।
चित्राश्वैश्चित्रसंनाहैः सोदर्यैरभिरक्षितः ॥ २०
रक्ष्यमाणो महावीर्यैः सहितैर्मद्रकेकयैः ।
अशोभत महाराज देवैरिव शतक्रतुः ॥ २१
अश्वत्थामा कुरूणां च ये प्रवीरा महारथाः ।
नित्यमत्ताश्च मातङ्गाः शूरैर्म्लेच्छैरधिष्ठिताः ।
अन्वयुस्तद्रथानीकं क्षरन्त इव तोयदाः ॥ २२
ते ध्वजैर्वैजयन्तीभिर्ज्वलद्भिः परमायुधैः ।
सादिभिश्चास्थिता रेजुर्द्रुमवन्त इवाचलाः ॥ २३
तेषां पदातिनागानां पादरक्षाः सहस्रशः ।
पट्टिशासिधराः शूरा बभूवुरनिवर्तिनः ॥ २४
सादिभिः स्यन्दनैर्नागैरधिकं समलंकृतैः ।
स व्यूहराजो विबभौ देवासुरचमूपमः ॥ २५
बार्हस्पत्यः सुविहितो नायकेन विपश्चिता ।
नृत्यतीव महाव्यूहः परेषामादधद्भयम् ॥ २६
तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः ।
पत्त्यश्वरथमातङ्गाः प्रावृषीव बलाहकाः ॥ २७
ततः सेनामुखे कर्णं दृष्ट्वा राजा युधिष्ठिरः ।
धनंजयममित्रघ्नमेकवीरमुवाच ह ॥ २८
पश्यार्जुन महाव्यूहं कर्णेन विहितं रणे ।
युक्तं पक्षैः प्रपक्षैश्च सेनानीकं प्रकाशते ॥ २९

तदेतद्वै समालोक्य प्रत्यमित्रं महद्बलम् ।
यथा नाभिभवत्यस्मांस्तथा नीतिर्विधीयताम् ॥ ३०
एवमुक्तोऽर्जुनो राज्ञा प्राञ्जलिर्नृपमब्रवीत् ।
यथा भवानाह तथा तत्सर्वं न तदन्यथा ॥ ३१
यस्त्वस्य विहितो घातस्तं करिष्यामि भारत ।
प्रधानवध एवास्य विनाशस्तं करोम्यहम् ॥ ३२

युधिष्ठिर उवाच ।

तस्मात्त्वमेव राधेयं भीमसेनः सुयोधनम् ।
वृषसेनं च नकुलः सहदेवोऽपि सौबलम् ॥ ३३
दुःशासनं शतानीको हार्दिक्यं शिनिपुंगवः ।
धृष्टद्युम्नस्तथा द्रौणिं स्वयं यास्याम्यहं कृपम् ॥ ३४
द्रौपदेया धार्तराष्ट्राञ्शिष्टान्सह शिखण्डिना ।
ते ते च तांस्तानहितानस्माकं घ्नन्तु मामकाः ॥३५

संजय उवाच ।

इत्युक्तो धर्मराजेन तथेत्युक्त्वा धनंजयः ।
व्यादिदेश स्वसैन्यानि स्वयं चागाच्चमूमुखम् ॥३६
अथ तं रथमायान्तं दृष्ट्वात्यद्भुतदर्शनम् ।
उवाचाधिरथिं शल्यः पुनस्तं युद्धदुर्मदम् ॥ ३७
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः ।
निघ्नन्नमित्रान्कौन्तेयो यं यं त्वं परिपृच्छसि ॥ ३८
श्रूयते तुमुलः शब्दो रथनेमिस्वनो महान् ।
एष रेणुः समुद्भूतो दिवमावृत्य तिष्ठति ॥ ३९
चक्रनेमिप्रणुन्ना च कम्पते कर्ण मेदिनी ।
प्रवात्येष महावायुरभितस्तव वाहिनीम् ।
क्रव्यादा व्याहरन्त्येते मृगाः कुर्वन्ति भैरवम् ॥४०
पश्य कर्ण महाघोरं भयदं लोमहर्षणम् ।
कबन्धं मेघसंकाशं भानुमावृत्य संस्थितम् ॥ ४१
पश्य यूथैर्बहुविधैर्मृगाणां सर्वतोदिशम् ।
बलिभिर्दृप्तशार्दूलैरादित्योऽभिनिरीक्ष्यते ॥ ४२
पश्य कङ्कांश्च गृध्रांश्च समवेतान्सहस्रशः ।
स्थितानभिमुखान्घोरानन्योन्यमभिभाषतः ॥ ४३
सिताश्चाश्वाः समायुक्तास्तव कर्ण महारथे ।
प्रदराः प्रज्वलन्त्येते ध्वजश्चैव प्रकम्पते ॥ ४४
उदीर्यतो हयान्पश्य महाकायान्महाजवान् ।
प्लवमानान्दर्शनीयानाकाशे गरुडानिव ॥ ४५
ध्रुवमेषु निमित्तेषु भूमिमावृत्य पार्थिवाः ।
स्वप्स्यन्ति निहताः कर्ण शतशोऽथ सहस्रशः ॥४६
शङ्खानां तुमुलः शब्दः श्रूयते लोमहर्षणः ।
आनकानां च राधेय मृदङ्गानां च सर्वशः ॥ ४७
बाणशब्दान्बहुविधान्नराश्वरथनिस्वनान् ।
ज्यातलत्रेषुशब्दांश्च शृणु कर्ण महात्मनाम् ॥ ४८
हेमरूप्यप्रमृष्टानां वाससां शिल्पिनिर्मिताः ।
नानावर्णा रथे भान्ति श्वसनेन प्रकम्पिताः ॥ ४९
सहेमचन्द्रतारार्काः पताकाः किङ्किणीयुताः ।
पश्य कर्णार्जुनस्यैताः सौदामिन्य इवाम्बुदे ॥ ५०
ध्वजाः कणकणायन्ते वातेनाभिसमीरिताः ।
सपताका रथाश्चापि पाञ्चालानां महात्मनाम् ॥ ५१
नागाश्वरथपत्त्यौघांस्तावकान्समभिघ्नतः ।
ध्वजाग्रं दृश्यते त्वस्य ज्याशब्दश्चापि श्रूयते ॥ ५२
अद्य द्रष्टासि तं वीरं श्वेताश्वं कृष्णसारथिम् ।
निघ्नन्तं शात्रवान्संख्ये यं कर्ण परिपृच्छसि ॥ ५३
अद्य तौ पुरुषव्याघ्रौ लोहिताक्षौ परंतपौ ।
वासुदेवार्जुनौ कर्ण द्रष्टास्येकरथस्थितौ ॥ ५४
सारथिर्यस्य वार्ष्णेयो गाण्डीवं यस्य कार्मुकम् ।
तं चेद्धन्तासि राधेय त्वं नो राजा भविष्यसि ॥५५
एष संशप्तकाहूतस्तानेवाभिमुखो गतः ।
करोति कदनं चैषां संग्रामे द्विषतां बली ।
इति ब्रुवाणं मद्रेशं कर्णः प्राहातिमन्युमान् ॥ ५६
पश्य संशप्तकैः क्रुद्धैः सर्वतः समभिद्रुतः ।
एष सूर्य इवाम्भोदैश्छन्नः पार्थो न दृश्यते ।

एतदन्तोऽर्जुनः शल्य निमग्नः शोकसागरे ॥ ५७

शल्य उवाच ।

वरुणं कोऽम्भसा हन्यादिन्धनेन च पावकम् ।
को वानिलं निगृह्णीयात्पिबेद्वा को महार्णवम् ॥५८
ईदृग्रूपमहं मन्ये पार्थस्य युधि निग्रहम् ।
न हि शक्योऽर्जुनो जेतुं सेन्द्रैः सर्वैः सुरासुरैः ॥
अथैवं परितोषस्ते वाचोक्त्वा सुमना भव ।
न स शक्यो युधा जेतुमन्यं कुरु मनोरथम् ॥ ६०
बाहुभ्यामुद्धरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः ।
पातयेत्त्रिदिवाद्देवान्योऽर्जुनं समरे जयेत् ॥ ६१
पश्य कुन्तीसुतं वीरं भीममक्लिष्टकारिणम् ।
प्रभासन्तं महाबाहुं स्थितं मेरुमिवाचलम् ॥ ६२
अमर्षी नित्यसंरब्धश्चिरं वैरमनुस्मरन् ।
एष भीमो जयप्रेप्सुर्युधि तिष्ठति वीर्यवान् ॥ ६३
एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः ।
तिष्ठत्यसुकरः संख्ये परैः परपुरंजयः ॥ ६४
एतौ च पुरुषव्याघ्रावश्विनाविव सोदरौ ।
नकुलः सहदेवश्च तिष्ठतो युधि दुर्जयौ ॥ ६५
दृश्यन्त एते कार्ष्णेयाः पञ्च पञ्चाचला इव ।
व्यवस्थिता योत्स्यमानाः सर्वेऽर्जुनसमा युधि ॥६६
एते द्रुपदपुत्राश्च धृष्टद्युम्नपुरोगमाः ।
हीनाः सत्यजिता वीरास्तिष्ठन्ति परमौजसः ॥ ६७
इति संवदतोरेव तयोः पुरुषसिंहयोः ।
ते सेने समसज्जेतां गङ्गायमुनवद्भृशम् ॥ ६८

इति श्रीमहाभारते कर्णपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

धृतराष्ट्र उवाच ।

तथा व्यूढेष्वनीकेषु संसक्तेषु च संजय ।
संशप्तकान्कथं पार्थो गतः कर्णश्च पाण्डवान् ॥ १
एतद्विस्तरतो युद्धं प्रब्रूहि कुशलो ह्यसि ।
न हि तृप्यामि वीराणां शृण्वानो विक्रमान्रणे ॥ २

संजय उवाच ।

तस्थाने समवस्थाप्य प्रत्यमित्रं महाबलम् ।
अव्यूहतार्जुनो व्यूहं पुत्रस्य तव दुर्नये ॥ ३
तत्सादिनागकलिलं पदातिरथसंकुलम् ।
धृष्टद्युम्नमुखैर्व्यूढमशोभत महद्बलम् ॥ ४
पारावतसवर्णाश्वश्चन्द्रादित्यसमद्युतिः ।
पार्षतः प्रबभौ धन्वी कालो विग्रहवानिव ॥ ५
पार्षतं त्वभि संतस्थुर्द्रौपदेया युयुत्सवः ।
सानुगा भीमवपुषश्चन्द्रं तारागणा इव ॥ ६
अथ व्यूढेष्वनीकेषु प्रेक्ष्य संशप्तकान्रणे ।
क्रुद्धोऽर्जुनोऽभिदुद्राव व्याक्षिपन्गाण्डिवं धनुः ॥ ७
अथ संशप्तकाः पार्थमभ्यधावन्वधैषिणः ।
विजये कृतसंकल्पा मृत्युं कृत्वा निवर्तनम् ॥ ८
तदश्वसंघबहुलं मत्तनागरथाकुलम् ।
पत्तिमच्छूरवीरौघैर्द्रुतमर्जुनमाद्रवत् ॥ ९
स संप्रहारस्तुमुलस्तेषामासीत्किरीटिना ।
तस्यैव नः श्रुतो यादृङ्निवातकवचैः सह ॥ १०
रथानश्वान्ध्वजान्नागान्पत्तीन्रथपतीनपि ।
इषून्धनूंषि खड्गांश्च चक्राणि च परश्वधान् ॥ ११
सायुधानुद्यतान्बाहूनुद्यतान्यायुधानि च ।
चिच्छेद द्विषतां पार्थः शिरांसि च सहस्रशः ॥१२
तस्मिन्सैन्ये महावर्ते पातालावर्तसंनिभे ।
निमग्नं तं रथं मत्वा नेदुः संशप्तका मुदा ॥ १३
स पुरस्तादरीन्हत्वा पश्चार्धेनोत्तरेण च ।
दक्षिणेन च बीभत्सुः क्रुद्धो रुद्रः पशूनिव ॥ १४
अथ पाञ्चालचेदीनां सृञ्जयानां च मारिष ।
त्वदीयैः सह संग्राम आसीत्परमदारुणः ॥ १५
कृपश्च कृतवर्मा च शकुनिश्चापि सौबलः ।

हृष्टसेनाः सुसंरब्धा रथानीकैः प्रहारिणः ॥ १६
कोसलैः काशिमत्स्यैश्च कारूषैः केकयैरपि ।
शूरसेनैः शूरवीरैर्युयुधुर्युद्धदुर्मदाः ॥ १७
तेषामन्तकरं युद्धं देहपाप्मप्रणाशनम् ।
शूद्रविट्क्षत्रवीराणां धर्म्यं स्वर्ग्यं यशस्करम् ॥ १८
दुर्योधनोऽपि सहितो भ्रातृभिर्भरतर्षभ ।
गुप्तः कुरुप्रवीरैश्च मद्राणां च महारथैः ॥ १९
पाण्डवैः सहपाञ्चालैश्चेदिभिः सात्यकेन च ।
युध्यमानं रणे कर्णं कुरुवीरोऽभ्यपालयत् ॥ २०
कर्णोऽपि निशितैर्बाणैर्विनिहत्य महाचमूम् ।
प्रमृद्य च रथश्रेष्ठान्युधिष्ठिरमपीडयत् ॥ २१
विपत्रायुधदेहासून्कृत्वा शत्रून्सहस्रशः ।
युक्त्वा स्वर्गयशोभ्यां च स्वेभ्यो मुदमुदावहत् ॥

धृतराष्ट्र उवाच ।

यत्तत्प्रविश्य पार्थानां सेनां कुर्वञ्जनक्षयम् ।
कर्णो राजानमभ्यर्च्छत्तन्ममाचक्ष्व संजय ॥ २३
के च प्रवीराः पार्थानां युधि कर्णमवारयन् ।
कांश्च प्रमथ्याधिरथिर्युधिष्ठिरमपीडयत् ॥ २४

संजय उवाच ।

धृष्टद्युम्नमुखान्पार्थान्दृष्ट्वा कर्णो व्यवस्थितान् ।
समभ्यधावत्त्वरितः पाञ्चालाञ्शत्रुकर्शनः ॥ २५
तं तूर्णमभिधावन्तं पाञ्चाला जितकाशिनः ।
प्रत्युद्ययुर्महाराज हंसा इव महार्णवम् ॥ २६
ततः शङ्खसहस्राणां निस्वनो हृदयंगमः ।
प्रादुरासीदुभयतो भेरीशब्दश्च दारुणः ॥ २७
नानावादित्रनादश्च द्विपाश्वरथनिस्वनः ।
सिंहनादश्च वीराणामभवद्दारुणस्तदा ॥ २८
साद्रिद्रुमार्णवा भूमिः सवाताम्बुदमम्बरम् ।
सार्केन्दुग्रहनक्षत्रा द्यौश्च व्यक्तं व्यघूर्णत ॥ २९
अति भूतानि तं शब्दं मेनिरेऽति च विव्यथुः ।
यानि चाप्लवसत्त्वानि प्रायस्तानि मृतानि च ॥ ३०
अथ कर्णो भृशं क्रुद्धः शीघ्रमस्त्रमुदीरयन् ।
जघान पाण्डवीं सेनामासुरीं मघवानिव ॥ ३१
स पाण्डवरथांस्तूर्णं प्रविश्य विसृजञ्शरान् ।
प्रभद्रकाणां प्रवरानहनत्सप्तसप्ततिम् ॥ ३२
ततः सुपुङ्खैर्निशितै रथश्रेष्ठो रथेषुभिः ।
अवधीत्पञ्चविंशत्या पाञ्चालान्पञ्चविंशतिम् ॥ ३३
सुवर्णपुङ्खैर्नाराचैः परकायविदारणैः ।
चेदिकानवधीद्वीरः शतशोऽथ सहस्रशः ॥ ३४
तं तथा समरे कर्म कुर्वाणमतिमानुषम् ।
परिवव्रुर्महाराज पाञ्चालानां रथव्रजाः ॥ ३५
ततः संधाय विशिखान्पञ्च भारत दुःसहान् ।
पाञ्चालानवधीत्पञ्च कर्णो वैकर्तनो वृषः ॥ ३६
भानुदेवं चित्रसेनं सेनाबिन्दुं च भारत ।
तपनं शूरसेनं च पाञ्चालानवधीद्रणे ॥ ३७
पाञ्चालेषु च शूरेषु वध्यमानेषु सायकैः ।
हाहाकारो महानासीत्पाञ्चालानां महाहवे ॥ ३८
तेषां संकीर्यमाणानां हाहाकारकृता दिशः ।
पुनरेव च तान्कर्णो जघानाशु पतत्रिभिः ॥ ३९
चक्ररक्षौ तु कर्णस्य पुत्रौ मारिष दुर्जयौ ।
सुषेणः सत्यसेनश्च त्यक्त्वा प्राणानयुध्यताम् ॥ ४०
पृष्ठगोपस्तु कर्णस्य ज्येष्ठः पुत्रो महारथः ।
वृषसेनः स्वयं कर्णं पृष्ठतः पर्यपालयत् ॥ ४१
धृष्टद्युम्नः सात्यकिश्च द्रौपदेया वृकोदरः ।
जनमेजयः शिखण्डी च प्रवीराश्च प्रभद्रकाः ॥ ४२
चेदिकेकयपाञ्चाला यमौ मत्स्याश्च दंशिताः ।
समभ्यधावन्राधेयं जिघांसन्तः प्रहारिणः ॥ ४३
त एनं विविधैः शस्त्रैः शरधाराभिरेव च ।
अभ्यवर्षन्विमृद्नन्तः प्रावृषीवाम्बुदा गिरिम् ॥ ४४
पितरं तु परीप्सन्तः कर्णपुत्राः प्रहारिणः ।

त्वदीयाश्चापरे राजन्वीरा वीरानवारयन् ॥ ४५
सुषेणो भीमसेनस्य छित्त्वा भल्लेन कार्मुकम् ।
नाराचैः सप्तभिर्विद्ध्वा हृदि भीमं ननाद ह ॥ ४६
अथान्यद्धनुरादाय सुदृढं भीमविक्रमः ।
सज्यं वृकोदरः कृत्वा सुषेणस्याच्छिनद्धनुः ॥ ४७
विव्याध चैनं नवभिः क्रुद्धो नृत्यन्निवेषुभिः ।
कर्णं च तूर्णं विव्याध त्रिसप्तत्या शितैः शरैः॥ ४८
सत्यसेनं च दशभिः साश्वसूतध्वजायुधम् ।
पश्यतां सुहृदां मध्ये कर्णपुत्रमपातयत् ॥ ४९
क्षुरप्रणुन्नं तत्तस्य शिरश्चन्द्रनिभाननम् ।
शुभदर्शनमेवासीन्नालभ्रष्टमिवाम्बुजम् ॥ ५०
हत्वा कर्णसुतं भीमस्तावकान्पुनरार्दयत् ।
कृपहार्दिक्ययोश्छित्त्वा चापे तावप्यथार्दयत् ॥५१
दुःशासनं त्रिभिर्विद्ध्वा शकुनिं षड्भिरायसैः ।
उलूकं च पतत्रिं च चकार विरथावुभौ ॥ ५२
हे सुषेण हतोऽसीति ब्रुवन्नादत्त सायकम् ।
तमस्य कर्णश्चिच्छेद त्रिभिश्चैनमताडयत् ॥ ५३
अथान्यमपि जग्राह सुपर्वाणं सुतेजनम् ।
सुषेणायासृजद्भीमस्तमप्यस्याच्छिनद्वृषः ॥ ५४
पुनः कर्णस्त्रिसप्तत्या भीमसेनं रथेषुभिः ।
पुत्रं परीप्सन्विव्याध क्रूरं क्रूरजिघांसया ॥ ५५
सुषेणस्तु धनुर्गृह्य भारसाधनमुत्तमम् ।
नकुलं पञ्चभिर्बाणैर्बाह्वोरुरसि चार्दयत् ॥ ५६
नकुलस्तं तु विंशत्या विद्ध्वा भारसहैर्दृढैः ।
ननाद बलवन्नादं कर्णस्य भयमादधत् ॥ ५७
तं सुषेणो महाराज विद्ध्वा दशभिराशुगैः ।
चिच्छेद च धनुः शीघ्रं क्षुरप्रेण महारथः ॥ ५८
अथान्यद्धनुरादाय नकुलः क्रोधमूर्छितः ।
सुषेणं बहुभिर्बाणैर्वारयामास संयुगे ॥ ५९
स तु बाणैर्दिशो राजन्नाच्छाद्य परवीरहा ।
आजघ्ने सारथिं चास्य सुषेणं च ततस्त्रिभिः ।
चिच्छेद चास्य सुदृढं धनुर्भल्लैस्त्रिभिस्त्रिधा ॥ ६०
अथान्यद्धनुरादाय सुषेणः क्रोधमूर्छितः ।
अविध्यन्नकुलं षष्ट्या सहदेवं च सप्तभिः ॥ ६१
तद्युद्धं सुमहद्घोरमासीद्देवासुरोपमम् ।
निघ्नतां सायकैस्तूर्णमन्योन्यस्य वधं प्रति ॥ ६२
सात्यकिर्वृषसेनस्य हत्वा सूतं त्रिभिः शरैः ।
धनुश्चिच्छेद भल्लेन जघानाश्वांश्च सप्तभिः ।
ध्वजमेकेषुणोन्मथ्य त्रिभिस्तं हृद्यताडयत् ॥ ६३
अथावसन्नः स्वरथे मुहूर्तात्पुनरुत्थितः ।
अथो जिघांसुः शैनेयं खड्गचर्मभृदभ्ययात् ॥ ६४
तस्य चाप्लवतः शीघ्रं वृषसेनस्य सात्यकिः ।
वराहकर्णैर्दशभिरविध्यदसिचर्मणी ॥ ६५
दुःशासनस्तु तं दृष्ट्वा विरथं व्यायुधं कृतम् ।
आरोप्य स्वरथे तूर्णमपोवाह रथान्तरम् ॥ ६६
अथान्यं रथमास्थाय वृषसेनो महारथः ।
कर्णस्य युधि दुर्धर्षः पुनः पृष्ठमपालयत् ॥ ६७
दुःशासनं तु शैनेयो नवैर्नवभिराशुगैः ।
विसूताश्वरथं कृत्वा ललाटे त्रिभिरार्पयत् ॥ ६८
स त्वन्यं रथमास्थाय विधिवत्कल्पितं पुनः ।
युयुधे पाण्डुभिः सार्धं कर्णस्याप्याययन्बलम् ॥६९
धृष्टद्युम्नस्ततः कर्णमविध्यद्दशभिः शरैः ।
द्रौपदेयास्त्रिसप्तत्या युयुधानस्तु सप्तभिः ॥ ७०
भीमसेनश्चतुःषष्ट्या सहदेवश्च पञ्चभिः ।
नकुलस्त्रिंशता बाणैः शतानीकश्च सप्तभिः ।
शिखण्डी दशभिर्वीरो धर्मराजः शतेन तु ॥ ७१
एते चान्ये च राजेन्द्र प्रवीरा जयगृद्धिनः ।
अभ्यर्दयन्महेष्वासं सूतपुत्रं महामृधे ॥ ७२
तान्सूतपु ो विशिखैर्दशभिर्दशभिः शितैः ।
रथे चारु चरन्वीरः प्रत्यविध्यदरिंदमः ॥ ७३

तत्रास्त्रवीर्यं कर्णस्य लाघवं च महात्मनः ।
अपश्याम महाराज तदद्भुतमिवाभवत् ॥ ७४
न ह्याददानं ददृशुः संदधानं च सायकान् ।
विमुञ्चन्तं च संरम्भाद्ददृशुस्ते महारथम् ॥ ७५
द्यौर्वियद्भूर्दिशश्चाशु प्रणुन्ना निशितैः शरैः ।
अरुणाभ्रावृताकारं तस्मिन्देशे बभौ वियत् ॥ ७६
नृत्यन्निव हि राधेयश्चापहस्तः प्रतापवान् ।
यैर्विद्धः प्रत्यविध्यत्तानेकैकं त्रिगुणैः शरैः ॥ ७७
दशभिर्दशभिश्चैनान्पुनर्विद्ध्वा ननाद ह ।
साश्वसूतध्वजच्छत्रास्ततस्ते विवरं ददुः ॥ ७८
तान्प्रमृद्नन्महेष्वासान्राधेयः शरवृष्टिभिः ।
राजानीकमसंबाधं प्राविशच्छत्रुकर्शनः ॥ ७९
स रथांस्त्रिशतान्हत्वा चेदीनामनिवर्तिनाम् ।
राधेयो निशितैर्बाणैस्ततोऽभ्याच्छेद्युधिष्ठिरम् ॥८०
ततस्ते पाण्डवा राजञ्शिखण्डी च ससात्यकिः ।
राधेयात्परिरक्षन्तो राजानं पर्यवारयन् ॥ ८१
तथैव तावकाः सर्वे कर्णं दुर्वारणं रणे ।
यत्ताः सेनामहेष्वासाः पर्यरक्षन्त सर्वशः ॥ ८२
नानावादित्रघोषाश्च प्रादुरासन्विशां पते ।
सिंहनादश्च संजज्ञे शूराणामनिवर्तिनाम् ॥ ८३
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः ।
युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ ८४

इति श्रीमहाभारते कर्णपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

संजय उवाच ।

विदार्य कर्णस्तां सेनां धर्मराजमुपाद्रवत् ।
रथहस्त्यश्वपत्तीनां सहस्रैः परिवारितः ॥ १
नानायुधसहस्राणि प्रेषितान्यरिभिर्वृषः ।
छित्त्वा बाणशतैरुग्रैस्तानविध्यदसंभ्रमः ॥ २
निचकर्त शिरांस्येषां बाहूनूरूंश्च सर्वशः ।
ते हता वसुधां पेतुर्भग्नाश्चान्ये विदुद्रुवुः ॥ ३
द्रविडान्ध्रनिषादास्तु पुनः सात्यकिचोदिताः ।
अभ्यर्दयञ्जिघांसन्तः पत्तयः कर्णमाहवे ॥ ४
ते विबाहुशिरस्त्राणाः प्रहताः कर्णसायकैः ।
पेतुः पृथिव्यां युगपच्छिन्नं शालवनं यथा ॥ ५
एवं योधशतान्याजौ सहस्राण्ययुतानि च ।
हतानीयुर्महीं देहैर्यशसापूरयन्दिशः ॥ ६
अथ वैकर्तनं कर्णं रणे क्रुद्धमिवान्तकम् ।
रुरुधुः पाण्डुपाञ्चाला व्याधिं मन्त्रौषधैरिव ॥ ७
स तान्प्रमृद्याभ्यपतत्पुनरेव युधिष्ठिरम् ।
मन्त्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा ॥ ८
स राजगृद्धिभी रुद्धः पाण्डुपाञ्चालकेकयैः ।
नाशकत्तानतिक्रान्तुं मृत्युर्ब्रह्मविदो यथा ॥ ९
ततो युधिष्ठिरः कर्णमदूरस्थं निवारितम् ।
अब्रवीत्परवीरघ्नः क्रोधसंरक्तलोचनः ॥ १०
कर्ण कर्ण वृथादृष्टे सूतपुत्र वचः शृणु ।
सदा स्पर्धसि संग्रामे फल्गुनेन यशस्विना ।
तथास्मान्बाधसे नित्यं धार्तराष्ट्रमते स्थितः ॥ ११
यद्बलं यच्च ते वीर्यं प्रद्वेषो यश्च पाण्डुषु ।
तत्सर्वं दर्शयस्वाद्य पौरुषं महदास्थितः ।
युद्धश्रद्धां स तेऽद्याहं विनेष्यामि महाहवे ॥ १२
एवमुक्त्वा महाराज कर्णं पाण्डुसुतस्तदा ।
सुवर्णपुङ्खैर्दशभिर्विव्याधायस्मयैः शितैः ॥ १३
तं सूतपुत्रो नवभिः प्रत्यविध्यदरिंदमः ।
वत्सदन्तैर्महेष्वासः प्रहसन्निव भारत ॥ १४
ततः क्षुराभ्यां पाञ्चाल्यौ चक्ररक्षौ महात्मनः ।
जघान समरे शूरः शरैः संनतपर्वभिः ॥ १५
तावुभौ धर्मराजस्य प्रवीरौ परिपार्श्वतः ।
रथाभ्याशे चकाशेते चन्द्रस्येव पुनर्वसू ॥ १६

युधिष्ठिरः पुनः कर्णमविध्यत्त्रिंशता शरैः ।
सुषेणं सत्यसेनं च त्रिभिस्त्रिभिरताडयत् ॥ १७
शल्यं नवत्या विव्याध त्रिसप्तत्या च सूतजम् ।
तांश्चास्य गोप्तृन्विव्याध त्रिभिस्त्रिभिरजिह्मगैः ॥१८
ततः प्रहस्याधिरथिर्विधुन्वानः स कार्मुकम् ।
भित्त्वा भल्लेन राजानं विद्ध्वा षष्ट्यानदन्मुदा ॥१९
ततः प्रवीराः पाण्डूनामभ्यधावन्युधिष्ठिरम् ।
सूतपुत्रात्परीप्सन्तः कर्णमभ्यर्दयञ्शरैः ॥ २०
सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च ।
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥२१
यमौ च भीमसेनश्च शिशुपालस्य चात्मजः ।
कारूषा मत्स्यशेषाश्च केकयाः काशिकोसलाः ।
एते च त्वरिता वीरा वसुषेणमवारयन् ॥ २२
जनमेजयश्च पाञ्चाल्यः कर्णं विव्याध सायकैः ।
वराहकर्णैर्नाराचैर्नालीकैर्निशितैः शरैः ।
वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्चटकामुखैः ॥ २३
नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिनः ।
सर्वतोऽभ्याद्रवन्कर्णं परिवार्य जिघांसया ॥ २४
स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः ।
उदैरयद्ब्राह्ममस्त्रं शरैः संपूरयन्दिशः ॥ २५
ततः शरमहाज्वालो वीर्योष्मा कर्णपावकः ।
निर्दहन्पाण्डववनं चारु पर्यचरद्रणे ॥ २६
स संवार्य महास्त्राणि महेष्वासो महात्मनाम् ।
प्रहस्य पुरुषेन्द्रस्य शरैश्चिच्छेद कार्मुकम् ॥ २७
ततः संधाय नवतिं निमेषान्नतपर्वणाम् ।
बिभेद कवचं राज्ञो रणे कर्णः शितैः शरैः ॥ २८
तद्वर्म हेमविकृतं रराज निपतत्तदा ।
सविद्युदभ्रं सवितुः शिष्टं वातहतं यथा ॥ २९
तदङ्गं पुरुषेन्द्रस्य भ्रष्टवर्म व्यरोचत ।
रत्नैरलंकृतं दिव्यैर्व्यभ्रं निशि यथा नभः ॥ ३०
स विवर्मा शरैः पार्थो रुधिरेण समुक्षितः ।
क्रुद्धः सर्वायसीं शक्तिं चिक्षेपाधिरथिं प्रति ॥ ३१
तां ज्वलन्तीमिवाकाशे शरैश्चिच्छेद सप्तभिः ।
सा छिन्ना भूमिमपतन्महेष्वासस्य सायकैः ॥ ३२
ततो बाह्वोर्ललाटे च हृदि चैव युधिष्ठिरः ।
चतुर्भिस्तोमरैः कर्णं ताडयित्वा मुदानदत् ॥ ३३
उद्भिन्नरुधिरः कर्णः क्रुद्धः सर्प इव श्वसन् ।
ध्वजं चिच्छेद भल्लेन त्रिभिर्विव्याध पाण्डवम् ।
इषुधी चास्य चिच्छेद रथं च तिलशोऽच्छिनत् ॥
एवं पार्थो व्यपायात्स निहतपार्ष्णिसारथिः ।
अशक्नुवन्प्रमुखतः स्थातुं कर्णस्य दुर्मनाः ॥ ३५
तमभिद्रुत्य राधेयः स्कन्धं संस्पृश्य पाणिना ।
अब्रवीत्प्रहसन्राजन्कुत्सयन्निव पाण्डवम् ॥ ३६
कथं नाम कुले जातः क्षत्रधर्मे व्यवस्थितः ।
प्रजह्यात्समरे शत्रून्प्राणान्रक्षन्महाहवे ॥ ३७
न भवान्क्षत्रधर्मेषु कुशलोऽसीति मे मतिः ।
ब्राह्मे बले भवान्युक्तः स्वाध्याये यज्ञकर्मणि ॥ ३८
मा स्म युध्यस्व कौन्तेय मा च वीरान्समासदः ।
मा चैनानप्रियं ब्रूहि मा च व्रज महारणम् ॥ ३९
एवमुक्त्वा ततः पार्थं विसृज्य च महाबलः ।
न्यहनत्पाण्डवीं सेनां वज्रहस्त इवासुरीम् ।
ततः प्रायाद्द्रुतं राजन्व्रीडन्निव जनेश्वरः ॥ ४०
अथ प्रयान्तं राजानमन्वयुस्ते तदाच्युतम् ।
चेदिपाण्डवपाञ्चालाः सात्यकिश्च महारथः ।
द्रौपदेयास्तथा शूरा माद्रीपुत्रौ च पाण्डवौ ॥ ४१
ततो युधिष्ठिरानीकं दृष्ट्वा कर्णः पराङ्मुखम् ।
कुरुभिः सहितो वीरैः पृष्ठगैः पृष्ठमन्वयात् ॥ ४२
शङ्खभेरीनिनादैश्च कार्मुकाणां च निस्वनैः ।
बभूव धार्तराष्ट्राणां सिंहनादरवस्तदा ॥ ४३
युधिष्ठिरस्तु कौरव्य रथमारुह्य सत्वरः ।

श्रुतकीर्तिर्महाराज दृष्टवान्कर्णविक्रमम् ॥ ४४
काल्यमानं बलं दृष्ट्वा धर्मराजो युधिष्ठिरः ।
तान्योधानब्रवीत्क्रुद्धो हतैनं वै सहस्रशः ॥ ४५
ततो राज्ञाभ्यनुज्ञाताः पाण्डवानां महारथाः ।
भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रवन् ॥ ४६
अभवत्तुमुलः शब्दो योधानां तत्र भारत ।
हस्त्यश्वरथपत्तीनां शस्त्राणां च ततस्ततः ॥ ४७
उत्तिष्ठत प्रहरत प्रैताभिपततेति च ।
इति ब्रुवाणा अन्योन्यं जघ्नुर्योधा रणाजिरे ॥ ४८
अभ्रच्छायेव तत्रासीच्छरवृष्टिभिरम्बरे ।
समावृत्तैर्नरवरैर्निघ्नद्भिरितरेतरम् ॥ ४९
विपताकाध्वजच्छत्रा व्यश्वसूतायुधा रणे ।
व्यङ्गाङ्गावयवाः पेतुः क्षितौ क्षीणा हतेश्वराः ॥५०
प्रवराणीव शैलानां शिखराणि द्विपोत्तमाः ।
सारोहा निहताः पेतुर्वज्रभिन्ना इवाद्रयः ॥ ५१
छिन्नभिन्नविपर्यस्तैर्वर्मालंकारविग्रहैः ।
सारोहास्तुरगाः पेतुर्हतवीराः सहस्रशः ॥ ५२
विप्रविद्धायुधाङ्गाश्च द्विरदाश्वरथैर्हताः ।
प्रतिवीरैश्च संमर्दे पत्तिसंघाः सहस्रशः ॥ ५३
विशालायतताम्राक्षैः पद्मेन्दुसदृशाननैः ।
शिरोभिर्युद्धशौण्डानां सर्वतः संस्तृता मही ॥ ५४
तथा तु वितते व्योम्नि निस्वनं शुश्रुवुर्जनाः ।
विमानैरप्सरःसंघैर्गीतवादित्रनिस्वनैः ॥ ५५
हतान्कृत्तानभिमुखान्वीरान्वीरैः सहस्रशः ।
आरोप्यारोप्य गच्छन्ति विमानेष्वप्सरोगणाः ॥५६
तद्दृष्ट्वा महदाश्चर्यं प्रत्यक्षं स्वर्गलिप्सया ।
प्रहृष्टमनसः शूराः क्षिप्रं जग्मुः परस्परम् ॥ ५७
रथिनो रथिभिः सार्धं चित्रं युयुधुराहवे ।
पत्तयः पत्तिभिर्नागा नागैः सह हयैर्हयाः ॥ ५८
एवं प्रवृत्ते संग्रामे गजवाजिजनक्षये ।
सैन्ये च रजसा व्याप्ते स्वे स्वाञ्जघ्नुः परे परान् ॥ ५९
कचाकचि बभौ युद्धं दन्तादन्ति नखानखि ।
मुष्टियुद्धं नियुद्धं च देहपाप्मविनाशनम् ॥ ६०
तथा वर्तति संग्रामे गजवाजिजनक्षये ।
नराश्वगजदेहेभ्यः प्रसृता लोहितापगा ।
नराश्वगजदेहान्सा व्युवाह पतितान्बहून् ॥ ६१
नराश्वगजसंबाधे नराश्वगजसादिनाम् ।
लोहितोदा महाघोरा नदी लोहितकर्दमा ।
नराश्वगजदेहान्सा वहन्ती भीरुभीषणी ॥ ६२
तस्याः परमपारं च व्रजन्ति विजयैषिणः ।
गाधेन च प्लवन्तश्च निमज्ज्योन्मज्ज्य चापरे ॥ ६३
ते तु लोहितदिग्धाङ्गा रक्तवर्मायुधाम्बराः ।
सस्नुस्तस्यां पपुश्चासृङ्मम्लुश्च भरतर्षभ ॥ ६४
रथानश्वान्नरान्नागानायुधाभरणानि च ।
वसनान्यथ वर्माणि हन्यमानान्हतानपि ।
भूमिं खं द्यां दिशश्चैव प्रायः पश्याम लोहितम् ॥६५
लोहितस्य तु गन्धेन स्पर्शेन च रसेन च ।
रूपेण चातिरिक्तेन शब्देन च विसर्पता ।
विषादः सुमहानासीत्प्रायः सैन्यस्य भारत ॥ ६६
तत्तु विप्रहतं सैन्यं भीमसेनमुखैस्तव ।
भूयः समाद्रवन्वीराः सात्यकिप्रमुखा रथाः ॥ ६७
तेषामापततां वेगमविषह्य महात्मनाम् ।
पुत्राणां ते महत्सैन्यमासीद्राजन्पराङ्मुखम् ॥ ६८
तत्प्रकीर्णरथाश्वेभं नरवाजिसमाकुलम् ।
विध्वस्तचर्मकवचं प्रविद्धायुधकार्मुकम् ॥ ६९
व्यद्रवत्तावकं सैन्यं लोड्यमानं समन्ततः ।
सिंहार्दितं महारण्ये यथा गजकुलं तथा ॥ ७०

इति श्रीमहाभारते कर्णपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

संजय उवाच ।

तानभिद्रवतो दृष्ट्वा पाण्डवांस्तावकं बलम् ।
क्रोशतस्तव पुत्रस्य न स्म राजन्न्यवर्तत ॥ १
ततः पक्षात्प्रपक्षाच्च प्रपक्षैश्चापि दक्षिणात् ।
उद्यतशस्त्राः कुरवो भीममभ्यद्रवन्रणे ॥ २
कर्णोऽपि दृष्ट्वा द्रवतो धार्तराष्ट्रान्पराङ्मुखान् ।
हंसवर्णान्हयाग्र्यांस्तान्प्रैषीद्यत्र वृकोदरः ॥ ३
ते प्रेषिता महाराज शल्येनाहवशोभिना ।
भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ॥ ४
दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः ।
मतिं दध्रे विनाशाय कर्णस्य भरतर्षभ ॥ ५
सोऽब्रवीत्सात्यकिं वीरं धृष्टद्युम्नं च पार्षतम् ।
एनं रक्षत राजानं धर्मात्मानं युधिष्ठिरम् ।
संशयान्महतो मुक्तं कथंचित्प्रेक्षतो मम ॥ ६
अग्रतो मे कृतो राजा छिन्नसर्वपरिच्छदः ।
दुर्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ॥ ७
अन्तमद्य करिष्यामि तस्य दुःखस्य पार्षत ।
हन्तास्मि रणे कर्णं स वा मां निहनिष्यति ।
संग्रामेण सुघोरेण सत्यमेतद्ब्रवीमि वः ॥ ८
राजानमद्य भवतां न्यासभूतं ददामि वै ।
अस्य संरक्षणे सर्वे यतध्वं विगतज्वराः ॥ ९
एवमुक्त्वा महाबाहुः प्रायादाधिरथिं प्रति ।
सिंहनादेन महता सर्वाः संनादयन्दिशः ॥ १०
दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम् ।
सूतपुत्रमथोवाच मद्राणामीश्वरो विभुः ॥ ११
पश्य कर्ण महाबाहुं क्रुद्धं पाण्डवनन्दनम् ।
दीर्घकालार्जितं क्रोधं मोक्तुकामं त्वयि ध्रुवम् ॥ १२
ईदृशं नास्य रूपं मे दृष्टपूर्वं कदाचन ।
अभिमन्यौ हते कर्ण राक्षसे वा घटोत्कचे ॥ १३
त्रैलोक्यस्य समस्तस्य शक्तः क्रुद्धो निवारणे ।
बिभर्ति यादृशं रूपं कालाग्निसदृशं शुभम् ॥ १४
इति ब्रुवति राधेयं मद्राणामीश्वरे नृप ।
अभ्यवर्तत वै कर्णं क्रोधदीप्तो वृकोदरः ॥ १५
तथागतं तु संप्रेक्ष्य भीमं युद्धाभिनन्दिनम् ।
अब्रवीद्वचनं शल्यं राधेयः प्रहसन्निव ॥ १६
यदुक्तं वचनं मेऽद्य त्वया मद्रजनेश्वर ।
भीमसेनं प्रति विभो तत्सत्यं नात्र संशयः ॥ १७
एष शूरश्च वीरश्च क्रोधनश्च वृकोदरः ।
निरपेक्षः शरीरे च प्राणतश्च बलाधिकः ॥ १८
अज्ञातवासं वसता विराटनगरे तदा ।
द्रौपद्याः प्रियकामेन केवलं बाहुसंश्रयात् ।
गूढभावं समाश्रित्य कीचकः सगणो हतः ॥ १९
सोऽद्य संग्रामशिरसि संनद्धः क्रोधमूर्छितः ।
किंकरोद्यतदण्डेन मृत्युनापि व्रजेद्रणम् ॥ २०
चिरकालाभिलषितो ममायं तु मनोरथः ।
अर्जुनं समरे हन्यां मां वा हन्याद्धनंजयः ।
स मे कदाचिदद्यैव भवेद्भीमसमागमात् ॥ २१
निहते भीमसेने तु यदि वा विरथीकृते ।
अभियास्यति मां पार्थस्तन्मे साधु भविष्यति ।
अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं संप्रधारय ॥ २२
एतच्छ्रुत्वा तु वचनं राधेयस्य महात्मनः ।
उवाच वचनं शल्यः सूतपुत्रं तथागतम् ॥ २३
अभियासि महाबाहो भीमसेनं महाबलम् ।
निरस्य भीमसेनं तु ततः प्राप्स्यसि फल्गुनम् ॥ २४
यस्ते कामोऽभिलषितश्चिरात्प्रभृति हृद्गतः ।
स वै संपत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते ॥ २५
एवमुक्ते ततः कर्णः शल्यं पुनरभाषत ।
हन्ताहमर्जुनं संख्ये मां वा हन्ता धनंजयः ।
युद्धे मनः समाधाय याहि याहीत्यचोदयत् ॥ २६

ततः प्रायाद्रथेनाशु शल्यस्तत्र विशां पते ।
यत्र भीमो महेष्वासो व्यद्रावयत वाहिनीम् ॥ २७
ततस्तूर्यनिनादश्च भेरीणां च महास्वनः ।
उदतिष्ठत राजेन्द्र कर्णभीमसमागमे ॥ २८
भीमसेनोऽथ संक्रुद्धस्तव सैन्यं दुरासदम् ।
नाराचैर्विमलैस्तीक्ष्णैर्दिशः प्राद्रावयद्बली ॥ २९
स संनिपातस्तुमुलो भीमरूपो विशां पते ।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ।
ततो मुहूर्ताद्राजेन्द्र पाण्डवः कर्णमाद्रवत् ॥ ३०
तमापतन्तं संप्रेक्ष्य कर्णो वैकर्तनो वृषः ।
आजघानोरसि क्रुद्धो नाराचेन स्तनान्तरे ।
पुनश्चैनममेयात्मा शरवर्षैरवाकिरत् ॥ ३१
स विद्धः सूतपुत्रेण छादयामास पत्रिभिः ।
विव्याध निशितैः कर्णं नवभिर्नतपर्वभिः ॥ ३२
तस्य कर्णो धनुर्मध्ये द्विधा चिच्छेद पत्रिणा ।
अथ तं छिन्नधन्वानमभ्यविध्यत्स्तनान्तरे ।
नाराचेन सुतीक्ष्णेन सर्वावरणभेदिना ॥ ३३
सोऽन्यत्कार्मुकमादाय सूतपुत्रं वृकोदरः ।
राजन्मर्मसु मर्मज्ञो विद्ध्वा सुनिशितैः शरैः ।
ननाद बलवन्नादं कम्पयन्निव रोदसी ॥ ३४
तं कर्णः पञ्चविंशत्या नाराचानां समार्दयत् ।
मदोत्कटं वने दृप्तमुल्काभिरिव कुञ्जरम् ॥ ३५
ततः सायकभिन्नाङ्गः पाण्डवः क्रोधमूर्छितः ।
संरम्भामर्षताम्राक्षः सूतपुत्रवधेच्छया ॥ ३६
स कार्मुके महावेगं भारसाधनमुत्तमम् ।
गिरीणामपि भेत्तारं सायकं समयोजयत् ॥ ३७
विकृष्य बलवच्चापमा कर्णादतिमारुतिः ।
तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया ॥ ३८
स विसृष्टो बलवता बाणो वज्राशनिस्वनः ।
अदारयद्रणे कर्णं वज्रवेग इवाचलम् ॥ ३९
स भीमसेनाभिहतो सूतपुत्रः कुरूद्वह ।
निषसाद रथोपस्थे विसंज्ञः पृतनापतिः ॥ ४०
ततो मद्राधिपो दृष्ट्वा विसंज्ञं सूतनन्दनम् ।
अपोवाह रथेनाजौ कर्णमाहवशोभिनम् ॥ ४१
ततः पराजिते कर्णे धार्तराष्ट्रीं महाचमूम् ।
व्यद्रावयद्भीमसेनो यथेन्द्रो दानवीं चमूम् ॥ ४२

इति श्रीमहाभारते कर्णपर्वणि
चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥

३५

धृतराष्ट्र उवाच ।

सुदुष्करमिदं कर्म कृतं भीमेन संजय ।
येन कर्णो महाबाहू रथोपस्थे निपातितः ॥ १
कर्णो ह्येको रणे हन्ता सृञ्जयान्पाण्डवैः सह ।
इति दुर्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः ॥ २
पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे ।
ततः परं किमकरोत्पुत्रो दुर्योधनो मम ॥ ३

संजय उवाच ।

विभ्रान्तं प्रेक्ष्य राधेयं सूतपुत्रं महाहवे ।
महत्या सेनया राजन्सोदर्यान्समभाषत ॥ ४
शीघ्रं गच्छत भद्रं वो राधेयं परिरक्षत ।
भीमसेनभयागाधे मज्जन्तं व्यसनार्णवे ॥ ५
ते तु राज्ञा समादिष्टा भीमसेनजिघांसवः ।
अभ्यवर्तन्त संक्रुद्धाः पतंगा इव पावकम् ॥ ६
श्रुतायुर्दुर्धरः क्राथो विवित्सुर्विकटः समः ।
निषङ्गी कवची पाशी तथा नन्दोपनन्दकौ ॥ ७
दुष्प्रधर्षः सुबाहुश्च वातवेगसुवर्चसौ ।
धनुर्ग्राहो दुर्मदश्च तथा सत्त्वसमः सहः ॥ ८
एते रथैः परिवृता वीर्यवन्तो महाबलाः ।
भीमसेनं समासाद्य समन्तात्पर्यवारयन् ।
ते व्यमुञ्चञ्शरव्रातान्नानालिङ्गान्समन्ततः ॥ ९

स तैरभ्यर्द्यमानस्तु भीमसेनो महाबलः ।
तेषामापततां क्षिप्रं सुतानां ते नराधिप ।
रथैः पञ्चाशता सार्धं पञ्चाशन्न्यहनद्रथान् ॥ १०
विविर्त्सोस्तु ततः क्रुद्धो भल्लेनापाहरच्छिरः ।
सकुण्डलशिरस्त्राणं पूर्णचन्द्रोपमं तदा ।
भीमेन च महाराज स पपात हतो भुवि ॥ ११
तं दृष्ट्वा निहतं शूरं भ्रातरः सर्वतः प्रभो ।
अभ्यद्रवन्त समरे भीमं भीमपराक्रमम् ॥ १२
ततोऽपराभ्यां भल्लाभ्यां पुत्रयोस्ते महाहवे ।
जहार समरे प्राणान्भीमो भीमपराक्रमः ॥ १३
तौ धरामन्वपद्येतां वातरुग्णाविव द्रुमौ ।
विकटश्च समश्चोभौ देवगर्भसमौ नृप ॥ १४
ततस्तु त्वरितो भीमः क्राथं निन्ये यमक्षयम् ।
नाराचेन सुतीक्ष्णेन स हतो न्यपतद्भुवि ॥ १५
हाहाकारस्ततस्तीव्रः संबभूव जनेश्वर ।
वध्यमानेषु ते राजंस्तदा पुत्रेषु धन्विषु ॥ १६
तेषां संलुलिते सैन्ये भीमसेनो महाबलः ।
नन्दोपनन्दौ समरे प्रापयद्यमसादनम् ॥ १७
ततस्ते प्राद्रवन्भीताः पुत्रास्ते विह्वलीकृताः ।
भीमसेनं रणे दृष्ट्वा कालान्तकयमोपमम् ॥ १८
पुत्रांस्ते निहतान्दृष्ट्वा सूतपुत्रो महामनाः ।
हंसवर्णान्हयान्भूयः प्राहिणोद्यत्र पाण्डवः ॥ १९
ते प्रेषिता महाराज मद्रराजेन वाजिनः ।
भीमसेनरथं प्राप्य समसज्जन्त वेगिताः ॥ २०
स संनिपातस्तुमुलो घोररूपो विशां पते ।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ॥ २१
दृष्ट्वा मम महाराज तौ समेतौ महारथौ ।
आसीद्बुद्धिः कथं नूनमेतदद्य भविष्यति ॥ २२
ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्धसन्निव ।
विरथं भीमकर्माणं भीमं कर्णश्चकार ह ॥ २३
विरथो भरतश्रेष्ठः प्रहसन्ननिलोपमः ।
गदाहस्तो महाबाहुरपतत्स्यन्दनोत्तमात् ॥ २४
नागान्सप्तशतान्राजन्नीषादन्तान्प्रहारिणः ।
व्यधमत्सहसा भीमः क्रुद्धरूपः परंतपः ॥ २५
दन्तवेष्टेषु नेत्रेषु कुम्भेषु स कटेषु च ।
मर्मस्वपि च मर्मज्ञो निनदन्व्यधमद्भृशम् ॥ २६
ततस्ते प्राद्रवन्भीताः प्रतीपं प्रहिताः पुनः ।
महामात्रैस्तमावव्रुर्मेघा इव दिवाकरम् ॥ २७
तान्स सप्तशतान्नागान्सारोहायुधकेतनान् ।
भूमिष्ठो गदया जघ्ने शरन्मेघानिवानिलः ॥ २८
ततः सुबलपुत्रस्य नागानतिबलान्पुनः ।
पोथयामास कौन्तेयो द्वापञ्चाशतमाहवे ॥ २९
तथा रथशतं साग्रं पत्तींश्च शतशोऽपरान् ।
न्यहनत्पाण्डवो युद्धे तापयंस्तव वाहिनीम् ॥ ३०
प्रताप्यमानं सूर्येण भीमेन च महात्मना ।
तव सैन्यं संचुकोच चर्म वह्निगतं यथा ॥ ३१
ते भीमभयसंत्रस्तास्तावका भरतर्षभ ।
विहाय समरे भीमं दुद्रुवुर्वै दिशो दश ॥ ३२
रथाः पञ्चशताश्चान्ये ह्रादिनश्चर्मवर्मिणः ।
भीममभ्यद्रवंस्तूर्णं शरपूगैः समन्ततः ॥ ३३
तान्ससूतरथान्सर्वान्सपताकाध्वजायुधान् ।
पोथयामास गदया भीमो विष्णुरिवासुरान् ॥ ३४
ततः शकुनिनिर्दिष्टाः सादिनः शूरसंमताः ।
त्रिसाहस्रा ययुर्भीमं शक्त्यृष्टिप्रासपाणयः ॥ ३५
तान्प्रत्युद्गम्य यवनानश्वारोहान्वरारिहा ।
विचरन्विविधान्मार्गान्घातयामास पोथयन् ॥ ३६
तेषामासीन्महाञ्शब्दस्ताडितानां च सर्वशः ।
असिभिश्छिद्यमानानां नडानामिव भारत ॥ ३७
एवं सुबलपुत्रस्य त्रिसाहस्रान्हयोत्तमान् ।
हत्वान्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात् ॥ ३८

कर्णोऽपि समरे राजन्धर्मपुत्रमरिंदमम् ।
शरैः प्रच्छादयामास सारथिं चाप्यपातयत् ॥ ३९
ततः संप्रद्रुतं संख्ये रथं दृष्ट्वा महारथः ।
अन्वधावत्किरन्बाणैः कङ्कपत्रैरजिह्मगैः ॥ ४०
राजानमभि धावन्तं शरैरावृत्य रोदसी ।
क्रुद्धः प्रच्छादयामास शरजालेन मारुतिः ॥ ४१
संनिवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्शनः ।
भीमं प्रच्छादयामास समन्तान्निशितैः शरैः ॥ ४२
भीमसेनरथव्यग्रं कर्णं भारत सात्यकिः ।
अभ्यर्दयदमेयात्मा पार्ष्णिग्रहणकारणात् ।
अभ्यवर्तत कर्णस्तमर्दितोऽपि शरैर्भृशम् ॥ ४३
तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनाम् ।
विसृजन्तौ शरांश्चित्रान्विभ्राजेतां मनस्विनौ ॥ ४४
ताभ्यां वियति राजेन्द्र विततं भीमदर्शनम् ।
क्रौञ्चपृष्ठारुणं रौद्रं बाणजालं व्यदृश्यत ॥ ४५
नैव सूर्यप्रभां खं वा न दिशः प्रदिशः कुतः ।
प्राज्ञासिष्म वयं ताभ्यां शरैर्मुक्तैः सहस्रशः ॥ ४६
मध्याह्ने तपतो राजन्भास्करस्य महाप्रभाः ।
हृताः सर्वाः शरौघैस्तैः कर्णमाधवयोस्तदा ॥ ४७
सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम् ।
संसक्तान्पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः ॥ ४८
तेषामापततां शब्दस्तीव्र आसीद्विशां पते ।
उद्धूतानां यथा वृष्ट्या सागराणां भयावहः ॥ ४९
ते सेने भृशसंविग्ने दृष्ट्वान्योन्यं महारणे ।
हर्षेण महता युक्ते परिगृह्य परस्परम् ॥ ५०
ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ।
यादृशं न कदाचिद्धि दृष्टपूर्वं न च श्रुतम् ॥ ५१
बलौघस्तु समासाद्य बलौघं सहसा रणे ।
उपासर्पत वेगेन जलौघ इव सागरम् ॥ ५२
आसीन्निनादः सुमहान्बलौघानां परस्परम् ।
गर्जतां सागरौघाणां यथा स्यान्निस्वनो महान् ॥ ५३
ते तु सेने समासाद्य वेगवत्यौ परस्परम् ।
एकीभावमनुप्राप्ते नद्याविव समागमे ॥ ५४
ततः प्रववृते युद्धं घोररूपं विशां पते ।
कुरूणां पाण्डवानां च लिप्सतां सुमहद्यशः ॥ ५५
कुरूणां गर्जतां तत्र अविच्छेदकृता गिरः ।
श्रूयन्ते विविधा राजन्नामान्युद्दिश्य भारत ॥ ५६
यस्य यद्धि रणे न्यङ्गं पितृतो मातृतोऽपि वा ।
कर्मतः शीलतो वापि स तच्छ्रावयते युधि ॥ ५७
तान्दृष्ट्वा समरे शूरांस्तर्जयानान्परस्परम् ।
अभवन्मे मती राजन्नैषामस्तीति जीवितम् ॥ ५८
तेषां दृष्ट्वा तु क्रुद्धानां वपूंष्यमिततेजसाम् ।
अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ॥ ५९
ततस्ते पाण्डवा राजन्कौरवाश्च महारथाः ।
ततक्षुः सायकैस्तीक्ष्णैर्निघ्नन्तो हि परस्परम् ॥ ६०

इति श्रीमहाभारते कर्णपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

संजय उवाच ।

क्षत्रियास्ते महाराज परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुः कृतवैराः परस्परम् ॥ १
रथौघाश्च हयौघाश्च नरौघाश्च समन्ततः ।
गजौघाश्च महाराज संसक्ताः स्म परस्परम् ॥ २
गदानां परिघाणां च कणपानां च सर्पताम् ।
प्रासानां भिण्डिपालानां भुशुण्डीनां च सर्वशः ।
संपातं चान्वपश्याम संग्रामे भृशदारुणे ।
शलभा इव संपेतुः समन्ताच्छरवृष्टयः ॥ ४
नागा नागान्समासाद्य व्यधमन्त परस्परम् ।
हया हयांश्च समरे रथिनो रथिनस्तथा ।
पत्तयः पत्तिसंघैश्च हयसंघैर्हयास्तथा ॥ ५

पत्तयो रथमातङ्गान्रथा हस्त्यश्वमेव च ।
नागाश्च समरे त्र्यङ्गं ममृदुः शीघ्रगा नृप ॥ ६
पततां तत्र शूराणां क्रोशतां च परस्परम् ।
घोरमायोधनं जज्ञे पशूनां वैशसं यथा ॥ ७
रुधिरेण समास्तीर्णा भाति भारत मेदिनी ।
शक्रगोपगणाकीर्णा प्रावृषीव यथा धरा ॥ ८
यथा वा वाससी शुक्ले महारजनरञ्जिते ।
बिभृयाद्युवतिः श्यामा तद्वदासीद्वसुंधरा ।
मांसशोणितचित्रेव शातकौम्भमयीव च ॥ ९
छिन्नानां चोत्तमाङ्गानां बाहूनां चोरुभिः सह ।
कुण्डलानां प्रविद्धानां भूषणानां च भारत ॥ १०
निष्काणामधिसूत्राणां शरीराणां च धन्विनाम् ।
वर्मणां सपताकानां संघास्तत्रापतन्भुवि ॥ ११
गजान्गजाः समासाद्य विषाणाग्रैरदारयन् ।
विषाणाभिहतास्ते च भ्राजन्ते द्विरदा यथा ॥ १२
रुधिरेणावसिक्ताङ्गा गैरिकप्रस्रवा इव ।
यथा भ्राजन्ति स्यन्दन्तः पर्वता धातुमण्डिताः ॥
तोमरान्गजिभिर्मुक्तान्प्रतीपानास्थितान्बहून् ।
हस्तैर्विचेरुस्ते नागा बभञ्जुश्चापरे तथा ॥ १४
नाराचैश्छिन्नवर्माणो भ्राजन्ते स्म गजोत्तमाः ।
हिमागमे महाराज व्यभ्रा इव महीधराः ॥ १५
शरैः कनकपुङ्खैस्तु चिता रेजुर्गजोत्तमाः ।
उल्काभिः संप्रदीप्ताग्राः पर्वता इव मारिष ॥ १६
केचिदभ्याहता नागा नागैर्नगनिभा भुवि ।
निपेतुः समरे तस्मिन्पक्षवन्त इवाद्रयः ॥ १७
अपरे प्राद्रवन्नागाः शल्यार्ता व्रणपीडिताः ।
प्रतिमानैश्च कुम्भैश्च पेतुरुर्व्यां महाहवे ॥ १८
निषेदुः सिंहवच्चान्ये नदन्तो भैरवान्रवान् ।
मम्लुश्च बहवो राजंश्चुकूजुश्चापरे तथा ॥ १९
हयाश्च निहता बाणैः स्वर्णभाण्डपरिच्छदाः ।
निषेदुश्चैव मम्लुश्च बभ्रमुश्च दिशो दश ॥ २०
अपरे कृष्यमाणाश्च विवेष्टन्तो महीतले ।
भावान्बहुविधांश्चक्रुस्ताडिताः शरतोमरैः ॥ २१
नरास्तु निहता भूमौ कूजन्तस्तत्र मारिष ।
दृष्ट्वा च बान्धवानन्ये पितॄनन्ये पितामहान् ॥ २२
धावमानान्परांश्चैव दृष्ट्वान्ये तत्र भारत ।
गोत्रनामानि ख्यातानि शशंसुरितरेतरम् ॥ २३
तेषां छिन्ना महाराज भुजाः कनकभूषणाः ।
उद्वेष्टन्ते विवेष्टन्ते पतन्ते चोत्पतन्ति च ॥ २४
निपतन्ति तथा भूमौ स्फुरन्ति च सहस्रशः ।
वेगांश्चान्ये रणे चक्रुः स्फुरन्त इव पन्नगाः ॥ २५
ते भुजा भोगिभोगाभाश्चन्दनाक्ता विशां पते ।
लोहितार्द्रा भृशं रेजुस्तपनीयध्वजा इव ॥ २६
वर्तमाने तथा घोरे संकुले सर्वतोदिशम् ।
अविज्ञाताः स्म युध्यन्ते विनिघ्नन्तः परस्परम् ॥२७
भौमेन रजसा कीर्णे शस्त्रसंपातसंकुले ।
नैव स्वे न परे राजन्व्यज्ञायन्त तमोवृते ॥ २८
तथा तदभवद्युद्धं घोररूपं भयानकम् ।
शोणितोदा महानद्यः प्रसस्रुस्तत्र चासकृत् ॥ २९
शीर्षपाषाणसंछन्नाः केशशैवलशाद्वलाः ।
अस्थिसंघातसंकीर्णा धनुःशरवरोत्तमाः ॥ ३०
मांसकर्दमपङ्काश्च शोणितौघाः सुदारुणाः ।
नदीः प्रवर्तयामासुर्यमराष्ट्रविवर्धनीः ॥ ३१
ता नद्यो घोररूपाश्च नयन्त्यो यमसादनम् ।
अवगाढा मज्जयन्त्यः क्षत्रस्याजनयन्भयम् ॥ ३२
क्रव्यादानां नरव्याघ्र नर्दतां तत्र तत्र ह ।
घोरमायोधनं जज्ञे प्रेतराजपुरोपमम् ॥ ३३
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।
नृत्यन्ति वै भूतगणाः संतृप्ता मांसशोणितैः ॥ ३४
पीत्वा च शोणितं तत्र वसां पीत्वा च भारत ।

मेदोमज्जावसासृप्तास्तृप्ता मांसस्य चैव हि ।
धावमानाश्च दृश्यन्ते काकगृध्रबलास्तथा ॥ ३५
शूरास्तु समरे राजन्भयं त्यक्त्वा सुदुस्त्यजम् ।
योधव्रतसमाख्याताश्चक्रुः कर्माण्यभीतवत् ॥ ३६
शरशक्तिसमाकीर्णे क्रव्यादगणसंकुले ।
व्यचरन्त गणैः शूराः ख्यापयन्तः स्वपौरुषम् ॥ ३७
अन्योन्यं श्रावयन्ति स्म नामगोत्राणि भारत ।
पितृनामानि च रणे गोत्रनामानि चाभितः ॥ ३८
श्रावयन्तो हि बहवस्तत्र योधा विशां पते ।
अन्योन्यमवमृद्नन्तः शक्तितोमरपट्टिशैः ॥ ३९
वर्तमाने तदा युद्धे घोररूपे सुदारुणे ।
व्यषीदत्कौरवी सेना भिन्ना नौरिव सागरे ॥ ४०

इति श्रीमहाभारते कर्णपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

संजय उवाच ।

वर्तमाने तदा युद्धे क्षत्रियाणां निमज्जने ।
गाण्डीवस्य महान्घोषः शुश्रुवे युधि मारिष ॥ १
संशप्तकानां कदनमकरोद्यत्र पाण्डवः ।
कोसलानां तथा राजन्नारायणबलस्य च ॥ २
संशप्तकास्तु समरे शरवृष्टिं समन्ततः ।
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः ॥ ३
तां वृष्टिं सहसा राजंस्तरसा धारयन्प्रभुः ।
व्यगाहत रणे पार्थो विनिघ्नन्रथिनां वरः ॥ ४
निगृह्य तु रथानीकं कङ्कपत्रैः शिलाशितैः ।
आससाद रणे पार्थः सुशर्माणं महारथम् ॥ ५
स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थस्य समरे स्थिताः ॥ ६
सुशर्मा तु ततः पार्थं विद्ध्वा नवभिराशुगैः ।
जनार्दनं त्रिभिर्बाणैरभ्यहन्दक्षिणे भुजे ।
ततोऽपरेण भल्लेन केतुं विव्याध मारिष ॥ ७
स वानरवरो राजन्विश्वकर्मकृतो महान् ।
ननाद सुमहन्नादं भीषयन्वै ननर्द च ॥ ८
कपेस्तु निनदं श्रुत्वा संत्रस्ता तव वाहिनी ।
भयं विपुलमादाय निश्चेष्टा समपद्यत ॥ ९
ततः सा शुशुभे सेना निश्चेष्टावस्थिता नृप ।
नानापुष्पसमाकीर्णं यथा चैत्ररथं वनम् ॥ १०
प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम ।
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ।
परिवव्रुस्तदा सर्वे पाण्डवस्य महारथम् ॥ ११
ते हयान्रथचक्रे च रथेषाश्चापि भारत ।
निगृह्य बलवत्तूर्णं सिंहनादमथानदन् ॥ १२
अपरे जगृहुश्चैव केशवस्य महाभुजौ ।
पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा ॥ १३
केशवस्तु तदा बाहू विधुन्वन्रणमूर्धनि ।
पातयामास तान्सर्वान्दुष्टहस्तीव हस्तिनः ॥ १४
ततः क्रुद्धो रणे पार्थः संवृतस्तैर्महारथैः ।
निगृहीतं रथं दृष्ट्वा केशवं चाप्यभिद्रुतम् ।
रथारूढांश्च सुबहून्पदातींश्चाप्यपातयत् ॥ १५
आसन्नांश्च ततो योधाञ्शरैरासन्नयोधिभिः ।
च्यावयामास समरे केशवं चेदमब्रवीत् ॥ १६
पश्य कृष्ण महाबाहो संशप्तकगणान्मया ।
कुर्वाणान्दारुणं कर्म वध्यमानान्सहस्रशः ॥ १७
रथबन्धमिमं घोरं पृथिव्यां नास्ति कश्चन ।
यः सहेत पुमाँल्लोके मदन्यो यदुपुंगव ॥ १८
इत्येवमुक्त्वा बीभत्सुर्देवदत्तमथाधमत् ।
पाञ्चजन्यं च कृष्णोऽपि पूरयन्निव रोदसी ॥ १९
तं तु शङ्खस्वनं श्रुत्वा संशप्तकवरूथिनी ।
संचचाल महाराज वित्रस्ता चाभवद्भृशम् ॥ २०
पदबन्धं ततश्चक्रे पाण्डवः परवीरहा ।

नागमस्त्रं महाराज संप्रोदीर्य मुहुर्मुहुः ॥ २१
यानुद्दिश्य रणे पार्थः पदबन्धं चकार ह ।
ते बद्धाः पदबन्धेन पाण्डवेन महात्मना ।
निश्चेष्टा अभवन्राजन्नश्मसारमया इव ॥ २२
निश्चेष्टांस्तु ततो योधानवधीत्पाण्डुनन्दनः ।
यथेन्द्रः समरे दैत्यांस्तारकस्य वधे पुरा ॥ २३
ते वध्यमानाः समरे मुमुचुस्तं रथोत्तमम् ।
आयुधानि च सर्वाणि विस्रष्टुमुपचक्रमुः ॥ २४
ततः सुशर्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीम् ।
सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथः ॥ २५
ततः सुपर्णाः संपेतुर्भक्षयन्तो भुजंगमान् ।
ते वै विदुद्रुवुर्नागा दृष्ट्वा तान्खचरान्नृप ॥ २६
बभौ बलं तद्विमुक्तं पदबन्धाद्विशां पते ।
मेघवृन्दाद्यथा मुक्तो भास्करस्तापयन्प्रजाः ॥ २७
विप्रमुक्तास्तु ते योधाः फल्गुनस्य रथं प्रति ।
ससृजुर्बाणसंघांश्च शस्त्रसंघांश्च मारिष ॥ २८
तां महास्त्रमयीं वृष्टिं संछिद्य शरवृष्टिभिः ।
व्यवातिष्ठत्ततो योधान्वासविः परवीरहा ॥ २९
सुशर्मा तु ततो राजन्बाणेनानतपर्वणा ।
अर्जुनं हृदये विद्ध्वा विव्याधान्यैस्त्रिभिः शरैः ।
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ॥ ३०
प्रतिलभ्य ततः संज्ञां श्वेताश्वः कृष्णसारथिः ।
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे त्वरान्वितः ।
ततो बाणसहस्राणि समुत्पन्नानि मारिष ॥ ३१
सर्वदिक्षु व्यदृश्यन्त सूदयन्तो नृप द्विपान् ।
हयान्रथांश्च समरे शस्त्रैः शतसहस्रशः ॥ ३२
वध्यमाने ततः सैन्ये विपुला भीः समाविशत् ।
संशप्तकगणानां च गोपालानां च भारत ।
न हि कश्चित्पुमांस्तत्र योऽर्जुनं प्रत्ययुध्यत ॥ ३३
पश्यतां तत्र वीराणामहन्यत महद्बलम् ।
हन्यमानमपश्यंश्च निश्चेष्टाः स्म पराक्रमे ॥ ३४
अयुतं तत्र योधानां हत्वा पाण्डुसुतो रणे ।
व्यभ्राजत रणे राजन्विधूमोऽग्निरिव ज्वलन् ॥ ३५
चतुर्दश सहस्राणि यानि शिष्टानि भारत ।
रथानामयुतं चैव त्रिसाहस्राश्च दन्तिनः ॥ ३६
ततः संशप्तका भूयः परिवव्रुर्धनंजयम् ।
मर्तव्यमिति निश्चित्य जयं वापि निवर्तनम् ॥ ३७
तत्र युद्धं महद्ध्यासीत्तावकानां विशां पते ।
शूरेण बलिना सार्धं पाण्डवेन किरीटिना ॥ ३८

इति श्रीमहाभारते कर्णपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

संजय उवाच ।

कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष ।
उलूकः सौबलश्चैव राजा च सह सोदरैः ॥ १
सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्दिताम् ।
समुज्जिहीर्षुर्वेगेन भिन्नां नावमिवार्णवे ॥ २
ततो युद्धमतीवासीन्मुहूर्तमिव भारत ।
भीरूणां त्रासजननं शूराणां हर्षवर्धनम् ॥ ३
कृपेण शरवर्षाणि विप्रमुक्तानि संयुगे ।
सृञ्जयाः शातयामासुः शलभानां व्रजा इव ॥ ४
शिखण्डी तु ततः क्रुद्धो गौतमं त्वरितो ययौ ।
ववर्ष शरवर्षाणि समन्तादेव ब्राह्मणे ॥ ५
कृपस्तु शरवर्षं तद्विनिहत्य महास्त्रवित् ।
शिखण्डिनं रणे क्रुद्धो विव्याध दशभिः शरैः ॥ ६
ततः शिखण्डी कुपितः शरैः सप्तभिराहवे ।
कृपं विव्याध सुभृशं कङ्कपत्रैरजिह्मगैः ॥ ७
ततः कृपः शरैस्तीक्ष्णैः सोऽतिविद्धो महारथः ।
व्यश्वसूतरथं चक्रे पार्षतं तु द्विजोत्तमः ॥ ८
हताश्वात्तु ततो यानादवप्लुत्य महारथः ।

चर्मखड्गे च संगृह्य सत्वरं ब्राह्मणं ययौ ॥ ९
तमापतन्तं सहसा शरैः संनतपर्वभिः ।
छादयामास समरे तदद्भुतमिवाभवत् ॥ १०
तत्राद्भुतमपश्याम शिलानां प्लवनं यथा ।
निश्चेष्टो यद्रणे राजञ्शिखण्डी समतिष्ठत ॥ ११
कृपेण छादितं दृष्ट्वा नृपोत्तम शिखण्डिनम् ।
प्रत्युद्ययौ कृपं तूर्णं धृष्टद्युम्नो महारथः ॥ १२
धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति ।
प्रतिजग्राह वेगेन कृतवर्मा महारथः ॥ १३
युधिष्ठिरमथायान्तं शारद्वतरथं प्रति ।
सपुत्रं सहसेनं च द्रोणपुत्रो न्यवारयत् ॥ १४
नकुलं सहदेवं च त्वरमाणौ महारथौ ।
प्रतिजग्राह ते पुत्रः शरवर्षेण वारयन् ॥ १५
भीमसेनं करूषांश्च केकयान्सहसृञ्जयान् ।
कर्णो वैकर्तनो युद्धे वारयामास भारत ॥ १६
शिखण्डिनस्ततो बाणान्कृपः शारद्वतो युधि ।
प्राहिणोत्त्वरया युक्तो दिधक्षुरिव मारिष ॥ १७
ताञ्शरान्प्रेषितांस्तेन समन्ताद्धेमभूषणान् ।
चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनः पुनः ॥ १८
शतचन्द्रं ततश्चर्म गौतमः पार्षतस्य ह ।
व्यधमत्सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः ॥ १९
स विचर्मा महाराज खड्गपाणिरुपाद्रवत् ।
कृपस्य वशमापन्नो मृत्योरास्यमिवातुरः ॥ २०
शारद्वतशरैर्ग्रस्तं क्लिश्यमानं महाबलम् ।
चित्रकेतुसुतो राजन्सुकेतुस्त्वरितो ययौ ॥ २१
विकिरन्ब्राह्मणं युद्धे बहुभिर्निशितैः शरैः ।
अभ्यापतदमेयात्मा गौतमस्य रथं प्रति ॥ २२
दृष्ट्वाविषह्यं तं युद्धे ब्राह्मणं चरितव्रतम् ।
अपयातस्ततस्तूर्णं शिखण्डी राजसत्तम ॥ २३
सुकेतुस्तु ततो राजन्गौतमं नवभिः शरैः ।
विद्ध्वा विव्याध सप्तत्या पुनश्चैनं त्रिभिः शरैः ॥२४
अथास्य सशरं चापं पुनश्चिच्छेद मारिष ।
सारथिं च शरेणास्य भृशं मर्मण्यताडयत् ॥ २५
गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढम् ।
सुकेतुं त्रिंशता बाणैः सर्वमर्मस्वताडयत् ॥ २६
स विह्वलितसर्वाङ्गः प्रचचाल रथोत्तमे ।
भूमिचाले यथा वृक्षश्चलत्याकम्पितो भृशम् ॥ २७
चलतस्तस्य कायात्तु शिरो ज्वलितकुण्डलम् ।
सोष्णीषं सशिरस्त्राणं क्षुरप्रेणान्वपातयत् ॥ २८
तच्छिरः प्रापतद्भूमौ श्येनाहृतमिवामिषम् ।
ततोऽस्य कायो वसुधां पश्चात्प्राप तदा च्युतः ॥२९
तस्मिन्हते महाराज त्रस्तास्तस्य पदानुगाः ।
गौतमं समरे त्यक्त्वा दुद्रुवुस्ते दिशो दश ॥ ३०
धृष्टद्युम्नं तु समरे संनिवार्य महाबलः ।
कृतवर्माब्रवीद्धृष्टस्तिष्ठ तिष्ठेति पार्षतम् ॥ ३१
तदभूत्तुमुलं युद्धं वृष्णिपार्षतयो रणे ।
आमिषार्थे यथा युद्धं श्येनयोर्गृद्धयोर्नृप ॥ ३२
धृष्टद्युम्नस्तु समरे हार्दिक्यं नवभिः शरैः ।
आजघानोरसि क्रुद्धः पीडयन्हृदिकात्मजम् ॥ ३३
कृतवर्मा तु समरे पार्षतेन दृढाहतः ।
पार्षतं सरथं साश्वं छादयामास सायकैः ॥ ३४
सरथश्छादितो राजन्धृष्टद्युम्नो न दृश्यते ।
मेघैरिव परिच्छन्नो भास्करो जलदागमे ॥ ३५
विधूय तं बाणगणं शरैः कनकभूषणैः ।
व्यरोचत रणे राजन्धृष्टद्युम्नः कृतव्रणः ॥ ३६
ततस्तु पार्षतः क्रुद्धः शस्त्रवृष्टिं सुदारुणाम् ।
कृतवर्माणमासाद्य व्यसृजत्पृतनापतिः ॥ ३७
तामापतन्तीं सहसा शस्त्रवृष्टिं निरन्तराम् ।
शरैरनेकसाहस्रैर्हार्दिक्यो व्यधमद्युधि ॥ ३८
दृष्ट्वा तु दारितां युद्धे शस्त्रवृष्टिं दुरुत्तराम् ।

कृतवर्माणमभ्येत्य वारयामास पार्षतः ॥ ३९
सारथिं चास्य तरसा प्राहिणोद्यमसादनम् ।
भल्लेन शितधारेण स हतः प्रापतद्रथात् ॥ ४०
धृष्टद्युम्नस्तु बलवाञ्जित्वा शत्रुं महारथम् ।
कौरवान्समरे तूर्णं वारयामास सायकैः ॥ ४१
ततस्ते तावका योधा धृष्टद्युम्नमुपाद्रवन् ।
सिंहनादरवं कृत्वा ततो युद्धमवर्तत ॥ ४२

इति श्रीमहाभारते कर्णपर्वणि
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

संजय उवाच ।

द्रौणिर्युधिष्ठिरं दृष्ट्वा शैनेयेनाभिरक्षितम् ।
द्रौपदेयैस्तथा शूरैरभ्यवर्तत हृष्टवत् ॥ १
किरन्निषुगणान्घोरान्स्वर्णपुङ्खाञ्शिलाशितान् ।
दर्शयन्विविधान्मार्गाञ्शिक्षार्थं लघुहस्तवत् ॥ २
ततः खं पूरयामास शरैर्दिव्यास्त्रमन्त्रितैः ।
युधिष्ठिरं च समरे पर्यवारयदस्त्रवित् ॥ ३
द्रौणायनिशरच्छन्नं न प्राज्ञायत किंचन ।
बाणभूतमभूत्सर्वमायोधनशिरो हि तत् ॥ ४
बाणजालं दिविष्ठं तत्स्वर्णजालविभूषितम् ।
शुशुभे भरतश्रेष्ठ वितानमिव विष्ठितम् ॥ ५
तेन छन्ने रणे राजन्बाणजालेन भास्वता ।
अभ्रच्छायेव संजज्ञे बाणरुद्धे नभस्तले ॥ ६
तत्राश्चर्यमपश्याम बाणभूते तथाविधे ।
न स्म संपतते भूमौ दृष्ट्वा द्रौणेः पराक्रमम् ॥ ७
लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः ।
व्यस्मयन्त महाराज न चैनं प्रतिवीक्षितुम् ।
शेकुस्ते सर्वराजानस्तपन्तमिव भास्करम् ॥ ८
सात्यकिर्यतमानस्तु धर्मराजश्च पाण्डवः ।
तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमम् ॥ ९

वध्यमाने ततः सैन्ये द्रौपदेया महारथाः ।
सात्यकिर्धर्मराजश्च पाञ्चालाश्चापि संगताः ।
त्यक्त्वा मृत्युभयं घोरं द्रौणायनिमुपाद्रवन् ॥ १०
सात्यकिः पञ्चविंशत्या द्रौणिं विद्ध्वा शिलीमुखैः ।
पुनर्विव्याध नाराचैः सप्तभिः स्वर्णभूषितैः ॥ ११
युधिष्ठिरस्त्रिसप्तत्या प्रतिविन्ध्यश्च सप्तभिः ।
श्रुतकर्मा त्रिभिर्बाणैः श्रुतकीर्तिस्तु सप्तभिः ॥ १२
सुतसोमश्च नवभिः शतानीकश्च सप्तभिः ।
अन्ये च बहवः शूरा विव्यधुस्तं समन्ततः ॥ १३
सोऽतिक्रुद्धस्ततो राजन्नाशीविष इव श्वसन् ।
सात्यकिं पञ्चविंशत्या प्राविध्यत शिलाशितैः ॥ १४
श्रुतकीर्तिं च नवभिः सुतसोमं च पञ्चभिः ।
अष्टभिः श्रुतकर्माणं प्रतिविन्ध्यं त्रिभिः शरैः ।
शतानीकं च नवभिर्धर्मपुत्रं च सप्तभिः ॥ १५
अथेतरांस्ततः शूरान्द्वाभ्यां द्वाभ्यामताडयत् ।
श्रुतकीर्तेस्तथा चापं चिच्छेद निशितैः शरैः ॥ १६
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः ।
द्रौणायनिं त्रिभिर्विद्ध्वा विव्याधान्यैः शितैः शरैः ॥
ततो द्रौणिर्महाराज शरवर्षेण भारत ।
छादयामास तत्सैन्यं समन्ताच्च शरैर्नृपान् ॥ १८
ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम् ।
द्रौणिश्चिच्छेद विहसन्विव्याध च शरैस्त्रिभिः ॥ १९
ततो धर्मसुतो राजन्प्रगृह्यान्यन्महद्धनुः ।
द्रौणिं विव्याध सप्तत्या बाह्वोरुरसि चार्दयत् ॥ २०
सात्यकिस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे ।
अर्धचन्द्रेण तीक्ष्णेन धनुश्छित्त्वानदद्भृशम् ॥ २१
छिन्नधन्वा ततो द्रौणिः शक्त्या शक्तिमतां वरः ।
सारथिं पातयामास शैनेयस्य रथाद्द्रुतम् ॥ २२
अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान् ।
शैनेयं शरवर्षेण छादयामास भारत ॥ २३

तस्याश्वाः प्रद्रुताः संख्ये पतिते रथसारथौ ।
तत्र तत्रैव धावन्तः समदृश्यन्त भारत ॥ २४
युधिष्ठिरपुरोगास्ते द्रौणिं शस्त्रभृतां वरम् ।
अभ्यवर्षन्त वेगेन विसृजन्तः शिताञ्शरान् ॥२५
आगच्छमानांस्तान्दृष्ट्वा रौद्ररूपान्परंतपः ।
प्रहसन्प्रतिजग्राह द्रोणपुत्रो महारणे ॥ २६
ततः शरशतज्वालः सेनाकक्षं महारथः ।
द्रौणिर्ददाह समरे कक्षमग्निर्यथा वने ॥ २७
तद्बलं पाण्डुपुत्रस्य द्रोणपुत्रप्रतापितम् ।
चुक्षुभे भरतश्रेष्ठ तिमिनेव नदीमुखम् ॥ २८
दृष्ट्वा ते च महाराज द्रोणपुत्रपराक्रमम् ।
निहतान्मेनिरे सर्वान्पाण्डून्द्रोणसुतेन वै ॥ २९
युधिष्ठिरस्तु त्वरितो द्रौणिं शिष्य महारथम् ।
अब्रवीद्द्रोणपुत्रं तु रोषामर्षसमन्वितः ॥ ३०
नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता ।
यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ॥ ३१
ब्राह्मणेन तपः कार्यं दानमध्ययनं तथा ।
क्षत्रियेण धनुर्नाम्यं स भवान्ब्राह्मणब्रुवः ॥ ३२
मिषतस्ते महाबाहो जेष्यामि युधि कौरवान् ।
कुरुष्व समरे कर्म ब्रह्मबन्धुरसि ध्रुवम् ॥ ३३
एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव ।
युक्तत्वं तच्च संचिन्त्य नोत्तरं किंचिदब्रवीत् ॥ ३४
अनुक्त्वा च ततः किंचिच्छरवर्षेण पाण्डवम् ।
छादयामास समरे क्रुद्धोऽन्तक इव प्रजाः ॥ ३५
संछाद्यमानस्तु तदा द्रोणपुत्रेण मारिष ।
पार्थोऽपयातः शीघ्रं वै विहाय महतीं चमूम् ॥३६
अपयाते ततस्तस्मिन्धर्मपुत्रे युधिष्ठिरे ।
द्रोणपुत्रः स्थितो राजन्प्रत्यादेशान्महात्मनः ॥ ३७
ततो युधिष्ठिरो राजा त्यक्त्वा द्रौणिं महाहवे ।
प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ॥ ३८

इति श्रीमहाभारते कर्णपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

संजय उवाच ।

भीमसेनं सपाञ्चाल्यं चेदिकेकयसंवृतम् ।
वैकर्तनः स्वयं रुद्ध्वा वारयामास सायकैः ॥ १
ततस्तु चेदिकारूषान्सृञ्जयांश्च महारथान् ।
कर्णो जघान संक्रुद्धो भीमसेनस्य पश्यतः ॥ २
भीमसेनस्ततः कर्णं विहाय रथसत्तमम् ।
प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ॥ ३
सूतपुत्रोऽपि समरे पाञ्चालान्केकयांस्तथा ।
सृञ्जयांश्च महेष्वासान्निजघान सहस्रशः ॥ ४
संशप्तकेषु पार्थश्च कौरवेषु वृकोदरः ।
पाञ्चालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ॥ ५
ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोपमैः ।
जग्मुर्विनाशं समरे राजन्दुर्मन्त्रिते तव ॥ ६
ततो दुर्योधनः क्रुद्धो नकुलं नवभिः शरैः ।
विव्याध भरतश्रेष्ठ चतुरश्चास्य वाजिनः ॥ ७
ततः पुनरमेयात्मा तव पुत्रो जनाधिपः ।
क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ॥ ८
नकुलस्तु ततः क्रुद्धस्तव पुत्रं त्रिसप्तभिः ।
जघान समरे राजन्सहदेवश्च पञ्चभिः ॥ ९
तावुभौ भरतश्रेष्ठौ श्रेष्ठौ सर्वधनुष्मताम् ।
विव्याधोरसि संक्रुद्धः पञ्चभिः पञ्चभिः शरैः ॥
ततोऽपराभ्यां भल्लाभ्यां धनुषी समकृन्तत ।
यमयोः प्रहसन्राजन्विव्याधैव च सप्तभिः ॥ ११
तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे ।
प्रगृह्य रेजतुः शूरौ देवपुत्रसमौ युधि ॥ १२
ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं नृप ।

शरैर्ववर्षतुर्घोरैर्महामेघौ यथाचलम् ॥ १३
ततः क्रुद्धो महाराज तव पुत्रो महारथः ।
पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः ॥ १४
धनुर्मण्डलमेवास्य दृश्यते युधि भारत ।
सायकाश्चैव दृश्यन्ते निश्चरन्तः समन्ततः ॥ १५
तस्य सायकसंछन्नौ चकाशेतां च पाण्डवौ ।
मेघच्छन्नौ यथा व्योम्नि चन्द्रसूर्यौ हतप्रभौ ॥ १६
ते तु बाणा महाराज हेमपुङ्खाः शिलाशिताः ।
आच्छादयन्दिशः सर्वाः सूर्यस्येवांशवस्तदा ॥ १७
बाणभूते ततस्तस्मिन्संछन्ने च नभस्तले ।
यमाभ्यां ददृशे रूपं कालान्तकयमोपमम् ॥ १८
पराक्रमं तु तं दृष्ट्वा तव सूनोर्महारथाः ।
मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे ॥ १९
ततः सेनापती राजन्पाण्डवस्य महात्मनः ।
पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः ॥ २०
माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ ।
धृष्टद्युम्नस्तव सुतं ताडयामास सायकैः ॥ २१
तमविध्यदमेयात्मा तव पुत्रोऽत्यमर्षणः ।
पाञ्चाल्यं पञ्चविंशत्या प्रहस्य पुरुषर्षभ ॥ २२
ततः पुनरमेयात्मा पुत्रस्ते पृथिवीपते ।
विद्ध्वा ननाद पाञ्चाल्यं षष्ट्या पञ्चभिरेव च ॥ २३
अथास्य सशरं चापं हस्तावापं च मारिष ।
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे ॥ २४
तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्शनः ।
अन्यदादत्त वेगेन धनुर्भारसहं नवम् ॥ २५
प्रज्वलन्निव वेगेन संरम्भाद्रुधिरेक्षणः ।
अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ॥ २६
स पञ्चदश नाराचाञ्श्वसतः पन्नगानिव ।
जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यवासृजत् ॥ २७
ते वर्म हेमविकृतं भित्त्वा राज्ञः शिलाशिताः ।
विविशुर्वसुधां वेगात्कङ्कबर्हिणवाससः ॥ २८
सोऽतिविद्धो महाराज पुत्रस्तेऽतिव्यराजत ।
वसन्ते पुष्पशबलः सपुष्प इव किंशुकः ॥ २९
स छिन्नवर्मा नाराचैः प्रहारैर्जर्जरच्छविः ।
धृष्टद्युम्नस्य भल्लेन क्रुद्धश्चिच्छेद कार्मुकम् ॥ ३०
अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः ।
सायकैर्दशभी राजन्भ्रुवोर्मध्ये समार्दयत् ॥ ३१
तस्य तेऽशोभयन्वक्त्रं कर्मारपरिमार्जिताः ।
प्रफुल्लं चम्पकं यद्वद्भ्रमरा मधुलिप्सवः ॥ ३२
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ।
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ॥ ३३
ततो दुर्योधनस्याश्वान्हत्वा सूतं च पञ्चभिः ।
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ॥ ३४
रथं सोपस्करं छत्रं शक्तिं खड्गं गदां ध्वजम् ।
भल्लैश्चिच्छेद नवभिः पुत्रस्य तव पार्षतः ॥ ३५
तपनीयाङ्गदं चित्रं नागं मणिमयं शुभम् ।
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ॥ ३६
दुर्योधनं तु विरथं छिन्नसर्वायुधं रणे ।
भ्रातरः पर्यरक्षन्त सोदर्या भरतर्षभ ॥ ३७
तमारोप्य रथे राजन्दण्डधारो जनाधिपम् ।
अपोवाह च संभ्रान्तो धृष्टद्युम्नस्य पश्यतः ॥ ३८
कर्णस्तु सात्यकिं जित्वा राजगृद्धी महाबलः ।
द्रोणहन्तारमुग्रेषुं ससाराभिमुखं रणे ॥ ३९
तं पृष्ठतोऽभ्ययात्तूर्णं शैनेयो वितुदञ्शरैः ।
वारणं जघनोपान्ते विषाणाभ्यामिव द्विपः ॥ ४०
स भारत महानासीद्योधानां सुमहात्मनाम् ।
कर्णपार्षतयोर्मध्ये त्वदीयानां महारणः ॥ ४१
न पाण्डवानां नास्माकं योधः कश्चित्पराङ्मुखः ।
प्रत्यदृश्यत यत्कर्णः पाञ्चालांस्त्वरितो ययौ ॥ ४२
तस्मिन्क्षणे नरश्रेष्ठ गजवाजिनरक्षयः ।

प्रादुरासीदुभयतो राजन्मध्यंगतेऽहनि ॥ ४३
पाञ्चालास्तु महाराज त्वरिता विजिगीषवः ।
सर्वतोऽभ्यद्रवन्कर्णं पतत्रिण इव द्रुमम् ॥ ४४
तेषामाधिरथिः क्रुद्धो यतमानान्मनस्विनः ।
विचिन्वन्नेव बाणाग्रैः समासादयदग्रतः ॥ ४५
व्याघ्रकेतुं सुशर्माणं शङ्कुं चोग्रं धनंजयम् ।
शुक्लं च रोचमानं च सिंहसेनं च दुर्जयम् ॥ ४६
ते वीरा रथवेगेन परिवव्रुर्नरोत्तमम् ।
सृजन्तं सायकान्क्रुद्धं कर्णमाहवशोभिनम् ॥ ४७
युध्यमानांस्तु ताञ्शूरान्मनुजेन्द्रः प्रतापवान् ।
अष्टाभिरष्टौ राधेयो न्यहनन्निशितैः शरैः ॥ ४८
अथापरान्महाराज सूतपुत्रः प्रतापवान् ।
जघान बहुसाहस्रान्योधान्युद्धविशारदः ॥ ४९
विष्णुं च विष्णुकर्माणं देवापिं भद्रमेव च ।
दण्डं च समरे राजंश्चित्रं चित्रायुधं हरिम् ॥ ५०
सिंहकेतुं रोचमानं शलभं च महारथम् ।
निजघान सुसंक्रुद्धश्चेदीनां च महारथान् ॥ ५१
तेषामाददतः प्राणानासीदाधिरथेर्वपुः ।
शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवोर्जितं महत् ॥ ५२
तत्र भारत कर्णेन मातङ्गास्ताडिताः शरैः ।
सर्वतोऽभ्यद्रवन्भीताः कुर्वन्तो महदाकुलम् ॥ ५३
निपेतुरुर्व्यां समरे कर्णसायकपीडिताः ।
कुर्वन्तो विविधान्नादान्वज्रनुन्ना इवाचलाः ॥ ५४
गजवाजिमनुष्यैश्च निपतद्भिः समन्ततः ।
रथैश्चावगतैर्मार्गे पर्यस्तीर्यत मेदिनी ॥ ५५
नैव भीष्मो न च द्रोणो नाप्यन्ये युधि तावकाः ।
चक्रुः स्म तादृशं कर्म यादृशं वै कृतं रणे ॥ ५६
सूतपुत्रेण नागेषु रथेषु च हयेषु च ।
नरेषु च नरव्याघ्र कृतं स्म कदनं महत् ॥ ५७
मृगमध्ये यथा सिंहो दृश्यते निर्भयश्चरन् ।
पाञ्चालानां तथा मध्ये कर्णोऽचरदभीतवत् ॥ ५
यथा मृगगणांस्त्रस्तान्सिंहो द्रावयते दिशः ।
पाञ्चालानां रथव्रातान्कर्णो द्रावयते तथा ॥ ५९
सिंहास्यं च यथा प्राप्य न जीवन्ति मृगाः क्वचित्
तथा कर्णमनुप्राप्य न जीवन्ति महारथाः ॥ ६०
वैश्वानरं यथा दीप्तं दह्यन्ते प्राप्य वै जनाः ।
कर्णाग्निना रणे तद्वद्दग्धा भारत सृञ्जयाः ॥ ६१
कर्णेन चेदिष्वेकेन पाञ्चालेषु च भारत ।
विश्राव्य नाम निहता बहवः शूरसंमताः ॥ ६२
मम चासीन्मनुष्येन्द्र दृष्ट्वा कर्णस्य विक्रमम् ।
नैकोऽप्याधिरथेर्जीवन्पाञ्चाल्यो मोक्ष्यते युधि ॥
पाञ्चालान्विधमन्संख्ये सूतपुत्रः प्रतापवान् ।
अभ्यधावत संक्रुद्धो धर्मपुत्रं युधिष्ठिरम् ॥ ६४
धृष्टद्युम्नश्च राजानं द्रौपदेयाश्च मारिष ।
परिवव्रुरमित्रघ्नं शतशश्चापरे जनाः ॥ ६५
शिखण्डी सहदेवश्च नकुलो नाकुलिस्तथा ।
जनमेजयः शिनेर्नप्ता बहवश्च प्रभद्रकाः ॥ ६६
एते पुरोगमा भूत्वा धृष्टद्युम्नस्य संयुगे ।
कर्णमस्यन्तमिष्वस्त्रैर्विचेरुरमितौजसः ॥ ६७
तांस्तत्राधिरथिः संख्ये चेदिपाञ्चालपाण्डवान् ।
एको बहूनभ्यपतद्गरुत्मान्पन्नगानिव ॥ ६८
भीमसेनस्तु संक्रुद्धः कुरून्मद्रान्सकेकयान् ।
एकः संख्ये महेष्वासो योधयन्बह्वशोभत ॥ ६९
तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः ।
प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम् ॥७
वाजिनश्च हतारोहाः पत्तयश्च गतासवः ।
शेरते युधि निर्भिन्ना वमन्तो रुधिरं बहु ॥ ७१
सहस्रशश्च रथिनः पतिताः पतितायुधाः ।
अक्षताः समदृश्यन्त भीमाद्भीता गतासवः ॥ ७
रथिभिर्वाजिभिः सूतैः पत्तिभिश्च तथा गजैः ।

भीमसेनशरच्छिन्नैरास्तीर्णा वसुधाभवत् ॥ ७३
तत्स्तम्भितमिवातिष्ठद्भीमसेनबलार्दितम् ।
दुर्योधनबलं राजन्निरुत्साहं कृतव्रणम् ॥ ७४
निश्चेष्टं तुमुले दीनं बभौ तस्मिन्महारणे ।
प्रसन्नसलिलः काले यथा स्यात्सागरो नृप ॥ ७५
मन्युवीर्यबलोपेतं बलात्पर्यवरोपितम् ।
अभवत्तव पुत्रस्य तत्सैन्यमिषुभिस्तदा ।
रुधिरौघपरिक्लिन्नं रुधिरार्द्रं बभूव ह ॥ ७६
सूतपुत्रो रणे क्रुद्धः पाण्डवानामनीकिनीम् ।
भीमसेनः कुरूंश्चापि द्रावयन्बह्वशोभत ॥ ७७
वर्तमाने तथा रौद्रे संग्रामेऽद्भुतदर्शने ।
निहत्य पृतनामध्ये संशप्तकगणान्बहून् ॥ ७८
अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ।
प्रभग्नं बलमेतद्धि योत्स्यमानं जनार्दन ॥ ७९
एते धावन्ति सगणाः संशप्तकमहारथाः ।
अपारयन्तो मद्बाणान्सिंहशब्दान्मृगा इव ॥ ८०
दीर्यते च महत्सैन्यं सृञ्जयानां महारणे ।
हस्तिकक्ष्यो ह्यसौ कृष्ण केतुः कर्णस्य धीमतः ।
दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः ॥ ८१
न च कर्णं रणे शक्ता जेतुमन्ये महारथाः ।
जानीते हि भवान्कर्णं वीर्यवन्तं पराक्रमे ॥ ८२
तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ॥ ८३
वर्जयित्वा रणे याहि सूतपुत्रं महारथम् ।
अथो मा बाधते कृष्ण यथा वा तव रोचते ॥ ८४
एतच्छ्रुत्वा महाराज गोविन्दः प्रहसन्निव ।
अब्रवीदर्जुनं तूर्णं कौरवाञ्जहि पाण्डव ॥ ८५
ततस्तव महत्सैन्यं गोविन्दप्रेरिता हयाः ।
हंसवर्णाः प्रविविशुर्वहन्तः कृष्णपाण्डवौ ॥ ८६
केशवप्रहितैरश्वैः श्वेतैः काञ्चनभूषणैः ।
प्रविशद्भिस्तव बलं चतुर्दिशमभिद्यत ॥ ८७
तौ विदार्य महासेनां प्रविष्टौ केशवार्जुनौ ।
क्रुद्धौ संरम्भरक्ताक्षौ व्यभ्राजेतां महाद्युती ॥ ८८
युद्धशौण्डौ समाहूतावरिभिस्तौ रणाध्वरम् ।
यज्वभिर्विधिनाहूतौ मखे देवाविवाश्विनौ ॥ ८९
क्रुद्धौ तौ तु नरव्याघ्रौ वेगवन्तौ बभूवतुः ।
तलशब्देन रुषितौ यथा नागौ महाहवे ॥ ९०
विगाहन्स रथानीकमश्वसंघांश्च फल्गुनः ।
व्यचरत्पृतनामध्ये पाशहस्त इवान्तकः ॥ ९१
तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत ।
संशप्तकगणान्भूयः पुत्रस्ते समचोदयत् ॥ ९२
ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः ।
चतुर्दशसहस्रैश्च तुरगाणां महाहवे ॥ ९३
द्वाभ्यां शतसहस्राभ्यां पदातीनां च धन्विनाम् ।
शूराणां नामलब्धानां विदितानां समन्ततः ।
अभ्यवर्तन्त तौ वीरौ छादयन्तो महारथाः ॥ ९४
स छाद्यमानः समरे शरैः परबलार्दनः ।
दर्शयन्रौद्रमात्मानं पाशहस्त इवान्तकः ।
निघ्नन्संशप्तकान्पार्थः प्रेक्षणीयतरोऽभवत् ॥ ९५
ततो विद्युत्प्रभैर्बाणैः कार्तस्वरविभूषितैः ।
निरन्तरमिवाकाशमासीन्नुन्नैः किरीटिना ॥ ९६
किरीटिभुजनिर्मुक्तैः संपतद्भिर्महाशरैः ।
समाच्छन्नं बभौ सर्वं काद्रवेयैरिव प्रभो ॥ ९७
रुक्मपुङ्खान्प्रसन्नाग्राञ्शरान्संनतपर्वणः ।
अदर्शयदमेयात्मा दिक्षु सर्वासु पाण्डवः ॥ ९८
हत्वा दश सहस्राणि पार्थिवानां महारथः ।
संशप्तकानां कौन्तेयः प्रपक्षं त्वरितोऽभ्ययात् ॥ ९९
प्रपक्षं स समासाद्य पार्थः काम्बोजरक्षितम् ।
प्रममाथ बलाद्बाणैर्दानवानिव वासवः ॥ १००
प्रचिच्छेदाशु भल्लैश्च द्विषतामाततायिनाम् ।
शस्त्रपाणींस्तथा बाहूंस्तथापि च शिरांस्युत ॥ १०१

अङ्गाङ्गावयवैश्छिन्नैर्व्यायुधास्तेऽपतन्क्षितौ ।
विष्वग्वाताभिसंभग्ना बहुशाखा इव द्रुमाः ॥ १०२
हस्त्यश्वरथपत्तीनां व्रातान्निघ्नन्तमर्जुनम् ।
सुदक्षिणादवरजः शरवृष्ट्याभ्यवीवृषत् ॥ १०३
अस्यास्यतोऽर्धचन्द्राभ्यां स बाहू परिघोपमौ ।
पूर्णचन्द्राभवक्त्रं च क्षुरेणाभ्यहनच्छिरः ॥ १०४
स पपात ततो वाहात्स्वलोहितपरिस्रवः ।
मनःशिलागिरेः शृङ्गं वज्रेणेवावदारितम् ॥ १०५
सुदक्षिणादवरजं काम्बोजं ददृशुर्हतम् ।
प्रांशुं कमलपत्राक्षमत्यर्थं प्रियदर्शनम् ।
काञ्चनस्तम्भसंकाशं भिन्नं हेमगिरिं यथा ॥ १०६
ततोऽभवत्पुनर्युद्धं घोरमद्भुतदर्शनम् ।
नानावस्थाश्च योधानां बभूवुस्तत्र युध्यताम् ॥ १०७
एतेष्वावर्जितैरश्वैः काम्बोजैर्यवनैः शकैः ।
शोणिताक्तैस्तदा रक्तं सर्वमासीद्विशां पते ॥ १०८
रथै रथाश्वसूतैश्च हतारोहैश्च वाजिभिः ।
द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः ।
अन्योन्येन महाराज कृतो घोरो जनक्षयः ॥ १०९
तस्मिन्प्रपक्षे पक्षे च वध्यमाने महात्मना ।
अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिराययौ ॥ ११०
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् ।
आददानः शरान्घोरान्स्वरश्मीनिव भास्करः ॥ १११
तैः पतद्भिर्महाराज द्रौणिमुक्तैः समन्ततः ।
संछादितौ रथस्थौ तावुभौ कृष्णधनंजयौ ॥ ११२
ततः शरशतैस्तीक्ष्णैर्भारद्वाजः प्रतापवान् ।
निश्चेष्टौ तावुभौ चक्रे युद्धे माधवपाण्डवौ ॥ ११३
हाहाकृतमभूत्सर्वं जङ्गमं स्थावरं तथा ।
चराचरस्य गोप्तारौ दृष्ट्वा संछादितौ शरैः ॥ ११४
सिद्धचारणसंघाश्च संपेतुर्वै समन्ततः ।
चिन्तयन्तो भवेदद्य लोकानां स्वस्त्यपीत्युत ॥ ११५
न मया तादृशो राजन्दृष्टपूर्वः पराक्रमः ।
संजज्ञे यादृशो द्रौणेः कृष्णौ संछादयिष्यतः ॥
द्रौणेस्तु धनुषः शब्दमहितत्रासनं रणे ।
अश्रौषं बहुशो राजन्सिंहस्य नदतो यथा ॥ ११७
ज्या चास्य चरतो युद्धे सव्यदक्षिणमस्यतः ।
विद्युदम्बुदमध्यस्था भ्राजमानेव साभवत् ॥ ११८
स तथा क्षिप्रकारी च दृढहस्तश्च पाण्डवः ।
संमोहं परमं गत्वा प्रैक्षत द्रोणजं ततः ॥ ११९
स विक्रमं हृतं मेने आत्मनः सुमहात्मना ।
तथास्य समरे राजन्वपुरासीत्सुदुर्दृशम् ॥ १२०
द्रौणिपाण्डवयोरेवं वर्तमाने महारणे ।
वर्धमाने च राजेन्द्र द्रोणपुत्रे महाबले ।
हीयमाने च कौन्तेये कृष्णं रोषः समभ्ययात् ॥
स रोषान्निःश्वसन्राजन्निर्दहन्निव चक्षुषा ।
द्रौणिं ह्यपश्यत्संग्रामे फल्गुनं च मुहुर्मुहुः ॥ १२२
ततः क्रुद्धोऽब्रवीत्कृष्णः पार्थं सप्रणयं तदा ।
अत्यद्भुतमिदं पार्थ तव पश्यामि संयुगे ।
अतिशेते हि यत्र त्वा द्रोणपुत्रोऽद्य भारत ॥ १२३
कच्चित्ते गाण्डिवं हस्ते रथे तिष्ठसि चार्जुन ।
कच्चित्कुशलिनौ बाहू कच्चिद्वीर्यं तदेव ते ॥ १२४
एवमुक्तस्तु कृष्णेन क्षिप्त्वा भल्लांश्चतुर्दश ।
त्वरमाणस्त्वराकाले द्रौणेर्धनुरथाच्छिनत् ।
ध्वजं छत्रं पताकां च रथं शक्तिं गदां तथा ॥ १२५
जत्रुदेशे च सुभृशं वत्सदन्तैरताडयत् ।
स मूर्च्छां परमां गत्वा ध्वजयष्टिं समाश्रितः ॥ १२६
तं विसंज्ञं महाराज किरीटिभयपीडितम् ।
अपोवाह रणात्सूतो रक्षमाणो धनंजयात् ॥ १२७
एतस्मिन्नेव काले तु विजयः शत्रुतापनः ।
न्यवधीत्तावकं सैन्यं शतशोऽथ सहस्रशः ।
पश्यतस्तव पुत्रस्य तस्य वीरस्य भारत ॥ १२८

एवमेष क्षयो वृत्तस्तावकानां परैः सह ।
क्रूरो विशसनो घोरो राजन्दुर्मन्त्रिते तव ॥ १२९
संशप्तकांश्च कौन्तेयः कुरूंश्चापि वृकोदरः ।
वसुषेणं च पाञ्चालः कृत्स्नेन व्यधमद्रणे ॥ १३०

इति श्रीमहाभारते कर्णपर्वणि
चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

४१

संजय उवाच ।

त्वरमाणः पुनः कृष्णः पार्थमभ्यवदच्छनैः ।
पश्य कौरव्य राजानमपयातांश्च पाण्डवान् ॥ १
कर्णं पश्य महारङ्गे ज्वलन्तमिव पावकम् ।
असौ भीमो महेष्वासः संनिवृत्तो रणं प्रति ॥ २
तमेतेऽनु निवर्तन्ते धृष्टद्युम्नपुरोगमाः ।
पाञ्चालानां सृञ्जयानां पाण्डवानां च यन्मुखम् ।
निवृत्तैश्च तथा पार्थैर्भग्नं शत्रुबलं महत् ॥ ३
कौरवान्द्रवतो ह्येष कर्णो धारयतेऽर्जुन ।
अन्तकप्रतिमो वेगे शक्रतुल्यपराक्रमः ॥ ४
असौ गच्छति कौरव्य द्रौणिरस्त्रभृतां वरः ।
तमेष प्रद्रुतः संख्ये धृष्टद्युम्नो महारथः ॥ ५
सर्वं व्याचष्ट दुर्धर्षो वासुदेवः किरीटिने ।
ततो राजन्प्रादुरासीन्महाघोरो महारणः ॥ ६
सिंहनादरवाश्चात्र प्रादुरासन्समागमे ।
उभयोः सेनयो राजन्मृत्युं कृत्वा निवर्तनम् ॥ ७

इति श्रीमहाभारते कर्णपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

संजय उवाच ।

ततः पुनः समाजग्मुरभीताः कुरुसृञ्जयाः ।
युधिष्ठिरमुखाः पार्था वैकर्तनमुखा वयम् ॥ १
ततः प्रववृते भीमः संग्रामो लोमहर्षणः ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ २
तस्मिन्प्रवृत्ते संग्रामे तुमुले शोणितोदके ।
संशप्तकेषु शूरेषु किंचिच्छिष्टेषु भारत ॥ ३
धृष्टद्युम्नो महाराज सहितः सर्वराजभिः ।
कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ॥ ४
आगच्छमानांस्तान्संख्ये प्रहृष्टान्विजयैषिणः ।
दधारैको रणे कर्णो जलौघानिव पर्वतः ॥ ५
तमासाद्य तु ते कर्णं व्यशीर्यन्त महारथाः ।
यथाचलं समासाद्य जलौघाः सर्वतोदिशम् ।
तयोरासीन्महाराज संग्रामो लोमहर्षणः ॥ ६
धृष्टद्युम्नस्तु राधेयं शरेण नतपर्वणा ।
ताडयामास संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ७
विजयं तु धनुःश्रेष्ठं विधुन्वानो महारथः ।
पार्षतस्य धनुश्छित्त्वा शरानाशीविषोपमान् ।
ताडयामास संक्रुद्धः पार्षतं नवभिः शरैः ॥ ८
ते वर्म हेमविकृतं भित्त्वा तस्य महात्मनः ।
शोणिताक्ता व्यराजन्त शक्रगोपा इवानघ ॥ ९
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महारथः ।
अन्यद्धनुरुपादाय शरांश्चाशीविषोपमान् ।
कर्णं विव्याध सप्तत्या शरैः संनतपर्वभिः ॥ १०
तथैव राजन्कर्णोऽपि पार्षतं शत्रुतापनम् ।
द्रोणशत्रुं महेष्वासो विव्याध निशितैः शरैः ॥ ११
तस्य कर्णो महाराज शरं कनकभूषणम् ।
प्रेषयामास संक्रुद्धो मृत्युदण्डमिवापरम् ॥ १२
तमापतन्तं सहसा घोररूपं विशां पते ।
चिच्छेद सप्तधा राजञ्शैनेयः कृतहस्तवत् ॥ १३
दृष्ट्वा विनिहितं बाणं शरैः कर्णो विशां पते ।
सात्यकिं शरवर्षेण समन्तात्पर्यवारयत् ॥ १४
विव्याध चैनं समरे नाराचैस्तत्र सप्तभिः ।
तं प्रत्यविध्यच्छैनेयः शरैर्हेमविभूषितैः ॥ १५

ततो युद्धमतीवासीच्चक्षुःश्रोत्रभयावहम् ।
राजन्घोरं च चित्रं च प्रेक्षणीयं समन्ततः ॥ १६
सर्वेषां तत्र भूतानां लोमहर्षो व्यजायत ।
तद्दृष्ट्वा समरे कर्म कर्णशैनेययोर्नृप ॥ १७
एतस्मिन्नन्तरे द्रौणिरभ्ययात्सुमहाबलम् ।
पार्षतं शत्रुदमनं शत्रुवीर्यासुनाशनम् ॥ १८
अभ्यभाषत संक्रुद्धो द्रौणिर्दूरे धनंजये ।
तिष्ठ तिष्ठाद्य ब्रह्मघ्न न मे जीवन्विमोक्ष्यसे ॥ १९
इत्युक्त्वा सुभृशं वीरः शीघ्रकृन्निशितैः शरैः ।
पार्षतं छादयामास घोररूपैः सुतेजनैः ।
यतमानं परं शक्त्या यतमानो महारथः ॥ २०
यथा हि समरे द्रौणिः पार्षतं वीक्ष्य मारिष ।
तथा द्रौणिं रणे दृष्ट्वा पार्षतः परवीरहा ।
नातिहृष्टमना भूत्वा मन्यते मृत्युमात्मनः ॥ २१
द्रौणिस्तु दृष्ट्वा राजेन्द्र धृष्टद्युम्नं रणे स्थितम् ।
क्रोधेन निःश्वसन्वीरः पार्षतं समुपाद्रवत् ।
तावन्योन्यं तु दृष्ट्वैव संरम्भं जग्मतुः परम् ॥ २२
अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान् ।
धृष्टद्युम्नं समीपस्थं त्वरमाणो विशां पते ।
पाञ्चालापसदाद्य त्वां प्रेषयिष्यामि मृत्यवे ॥ २३
पापं हि यत्त्वया कर्म घ्नता द्रोणं पुरा कृतम् ।
अद्य त्वा पत्स्यते तद्वै यथा ह्यकुशलं तथा ॥ २४
अरक्ष्यमाणः पार्थेन यदि तिष्ठसि संयुगे ।
नापक्रमसि वा मूढ सत्यमेतद्ब्रवीमि ते ॥ २५
एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान् ।
प्रतिवाक्यं स एवासिर्मामको दास्यते तव ।
येनैव ते पितुर्दत्तं यतमानस्य संयुगे ॥ २६
यदि तावन्मया द्रोणो निहतो ब्राह्मणब्रुवः ।
त्वामिदानीं कथं युद्धे न हनिष्यामि विक्रमात् ॥ २७
एवमुक्त्वा महाराज सेनापतिरमर्षणः ।
निशितेनाथ बाणेन द्रौणिं विव्याध पार्षतः ॥ २८
ततो द्रौणिः सुसंक्रुद्धः शरैः संनतपर्वभिः ।
प्राच्छादयद्दिशो राजन्धृष्टद्युम्नस्य संयुगे ॥ २९
नैवान्तरिक्षं न दिशो नैव योधाः समन्ततः ।
दृश्यन्ते वै महाराज शरैश्छन्नाः सहस्रशः ॥ ३०
तथैव पार्षतो राजन्द्रौणिमाहवशोभिनम् ।
शरैः संछादयामास सूतपुत्रस्य पश्यतः ॥ ३१
राधेयोऽपि महाराज पाञ्चालान्सह पाण्डवैः ।
द्रौपदेयान्युधामन्युं सात्यकिं च महारथम् ।
एकः स वारयामास प्रेक्षणीयः समन्ततः ॥ ३२
धृष्टद्युम्नोऽपि समरे द्रौणेश्चिच्छेद कार्मुकम् ।
तदपास्य धनुश्छिन्नमन्यदादत्त कार्मुकम् ।
वेगवत्समरे घोरं शरांश्चाशीविषोपमान् ॥ ३३
स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजम् ।
हयान्सूतं रथं चैव निमेषाद्व्यधमच्छरैः ॥ ३४
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
खड्गमादत्त विपुलं शतचन्द्रं च भानुमत् ॥ ३५
द्रौणिस्तदपि राजेन्द्र भल्लैः क्षिप्रं महारथः ।
चिच्छेद समरे वीरः क्षिप्रहस्तो दृढायुधः ।
रथादनवरूढस्य तदद्भुतमिवाभवत् ॥ ३६
धृष्टद्युम्नं तु विरथं हताश्वं छिन्नकार्मुकम् ।
शरैश्च बहुधा विद्धमस्त्रैश्च शकलीकृतम् ।
नातरद्भरतश्रेष्ठ यतमानो महारथः ॥ ३७
तस्यान्तमिषुभी राजन्यदा द्रौणिर्न जग्मिवान् ।
अथ त्यक्त्वा धनुर्वीरः पार्षतं त्वरितोऽन्वगात् ॥
आसीदाद्रवतो राजन्वेगस्तस्य महात्मनः ।
गरुडस्येव पततो जिघृक्षोः पन्नगोत्तमम् ॥ ३९
एतस्मिन्नेव काले तु माधवोऽर्जुनमब्रवीत् ।
पश्य पार्थ यथा द्रौणिः पार्षतस्य वधं प्रति ।
यत्नं करोति विपुलं हन्याच्चैनमसंशयम् ॥ ४०

तं मोचय महाबाहो पार्षतं शत्रुतापनम् ।
द्रौणेरास्यमनुप्राप्तं मृत्योरास्यगतं यथा ॥ ४१
एवमुक्त्वा महाराज वासुदेवः प्रतापवान् ।
प्रैषयत्तत्र तुरगान्यत्र द्रौणिर्व्यवस्थितः ॥ ४२
ते हयाश्चन्द्रसंकाशाः केशवेन प्रचोदिताः ।
पिबन्त इव तद्व्योम जग्मुर्द्रौणिरथं प्रति ॥ ४३
दृष्ट्वायान्तौ महावीर्यावुभौ कृष्णधनंजयौ ।
धृष्टद्युम्नवधे राजंश्चक्रे यत्नं महाबलः ॥ ४४
विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं जनेश्वर ।
शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महाबलः ॥ ४५
ते शरा हेमविकृता गाण्डीवप्रेषिता भृशम् ।
द्रौणिमासाद्य विविशुर्वल्मीकमिव पन्नगाः ॥ ४६
स विध्यस्तैः शरैर्घोरैर्द्रोणपुत्रः प्रतापवान् ।
रथमारुरुहे वीरो धनंजयशरार्दितः ।
प्रगृह्य च धनुः श्रेष्ठं पार्थं विव्याध सायकैः ॥४७
एतस्मिन्नन्तरे वीरः सहदेवो जनाधिप ।
अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ॥ ४८
अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्रिभिः ।
तं द्रोणपुत्रः संक्रुद्धो बाह्वोरुरसि चार्दयत् ॥ ४९
क्रोधितस्तु रणे पार्थो नाराचं कालसंमितम् ।
द्रोणपुत्राय चिक्षेप कालदण्डमिवापरम् ।
स ब्राह्मणस्यांसदेशे निपपात महाद्युतिः ॥ ५०
स विह्वलो महाराज शरवेगेन संयुगे ।
निषसाद रथोपस्थे वैक्लव्यं च परं ययौ ॥ ५१
ततः कर्णो महाराज व्याक्षिपद्विजयं धनुः ।
अर्जुनं समरे क्रुद्धः प्रेक्षमाणो मुहुर्मुहुः ।
द्वैरथं चापि पार्थेन कामयानो महारणे ॥ ५२
तं तु हित्वा हतं वीरं सारथिः शत्रुकर्शनम् ।
अपोवाह रथेनाजौ त्वरमाणो रणाजिरात् ॥ ५३
अथोत्कुष्टं महाराज पाञ्चालैर्जितकाशिभिः ।
मोक्षितं पार्षतं दृष्ट्वा द्रोणपुत्रं च पीडितम् ॥ ५४
वादित्राणि च दिव्यानि प्रावाद्यन्त सहस्रशः ।
सिंहनादश्च संजज्ञे दृष्ट्वा घोरं महाद्भुतम् ॥ ५५
एवं कृत्वाब्रवीत्पार्थो वासुदेवं धनंजयः ।
याहि संशप्तकान्कृष्ण कार्यमेतत्परं मम ॥ ५६
ततः प्रयातो दाशार्हः श्रुत्वा पाण्डवभाषितम्
रथेनातिपताकेन मनोमारुतरंहसा ॥ ५७

इति श्रीमहाभारते कर्णपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

संजय उवाच ।

एतस्मिन्नन्तरे कृष्णः पार्थं वचनमब्रवीत् ।
दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् ॥ १
एष पाण्डव ते भ्राता धार्तराष्ट्रैर्महाबलैः ।
जिघांसुभिर्महेष्वासैर्द्रुतं पार्थानुसर्यते ॥ २
तथानुयान्ति संरब्धाः पाञ्चाला युद्धदुर्मदाः ।
युधिष्ठिरं महात्मानं परीप्सन्तो महाजवाः ॥ ३
एष दुर्योधनः पार्थ रथानीकेन दंशितः ।
राजा सर्वस्य लोकस्य राजानमनुधावति ॥ ४
जिघांसुः पुरुषव्याघ्रं भ्रातृभिः सहितो बली ।
आशीविषसमस्पर्शैः सर्वयुद्धविशारदैः ॥ ५
एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः ।
युधिष्ठिरं धार्तराष्ट्रा रत्नोत्तममिवार्थिनः ॥ ६
पश्य सात्वतभीमाभ्यां निरुद्धाधिष्ठितः प्रभुः ।
जिहीर्षवोऽमृतं दैत्याः शक्राग्निभ्यामिवावशाः ॥ ७
एते बहुत्वात्त्वरिताः पुनर्गच्छन्ति पाण्डवम् ।
समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ॥ ८
नदन्तः सिंहनादांश्च धमन्तश्चापि वारिजान् ।
बलवन्तो महेष्वासा विधुन्वन्तो धनूंषि च ॥ ९
मृत्योर्मुखगतं मन्ये कुन्तीपुत्रं युधिष्ठिरम् ।

हुतमग्नौ च भद्रं ते दुर्योधनवशं गतम् ॥ १०
यथायुक्तमनीकं हि धार्तराष्ट्रस्य पाण्डव ।
नास्य शक्रोऽपि मुच्येत संप्राप्तो बाणगोचरम् ॥११
दुर्योधनस्य शूरस्य द्रौणेः शारद्वतस्य च ।
कर्णस्य चेषुवेगो वै पर्वतानपि दारयेत् ॥ १२
दुर्योधनस्य शूरस्य शरौघाञ्शीघ्रमस्यतः ।
संक्रुद्धस्यान्तकस्येव को वेगं संसहेद्रणे ॥ १३
कर्णेन च कृतो राजा विमुखः शत्रुतापनः ।
बलवाँल्लघुहस्तश्च कृती युद्धविशारदः ॥ १४
राधेयः पाण्डवश्रेष्ठ शक्तः पीडयितुं रणे ।
सहितो धृतराष्ट्रस्य पुत्रैः शूरो महात्मभिः ॥ १५
तस्यैवं युध्यमानस्य संग्रामे संयतात्मनः ।
अन्यैरपि च पार्थस्य हृतं वर्म महारथैः ॥ १६
उपवासकृशो राजा भृशं भरतसत्तम ।
ब्राह्मे बले स्थितो ह्येष न क्षत्रेऽतिबले विभो ॥१७
न जीवति महाराजो मन्ये पार्थ युधिष्ठिरः ।
यद्भीमसेनः सहते सिंहनादममर्षणः ॥ १८
नर्दतां धार्तराष्ट्राणां पुनः पुनररिंदम ।
धमतां च महाशङ्खान्संग्रामे जितकाशिनाम् ॥ १९
युधिष्ठिरं पाण्डवेयं हतेति भरतर्षभ ।
संचोदयत्यसौ कर्णो धार्तराष्ट्रान्महाबलान् ॥ २०
स्थूणाकर्णेन्द्रजालेन पार्थ पाशुपतेन च ।
प्रच्छादयन्तो राजानमनुयान्ति महारथाः ।
आतुरो मे मतो राजा संनिषेव्यश्च भारत ॥ २१
यथैनमनुवर्तन्ते पाञ्चालाः सह पाण्डवैः ।
त्वरमाणास्त्वराकाले सर्वशस्त्रभृतां वराः ।
मज्जन्तमिव पाताले बलिनोऽप्युज्जिहीर्षवः ॥ २२
न केतुर्दृश्यते राज्ञः कर्णेन निहतः शरैः ।
पश्यतोर्यमयोः पार्थ सात्यकेश्च शिखण्डिनः ॥२३
धृष्टद्युम्नस्य भीमस्य शतानीकस्य वा विभो ।
पाञ्चालानां च सर्वेषां चेदीनां चैव भारत ॥ २४
एष कर्णो रणे पार्थ पाण्डवानामनीकिनीम् ।
शरैर्विध्वंसयति वै नलिनीमिव कुञ्जरः ॥ २५
एते द्रवन्ति रथिनस्त्वदीयाः पाण्डुनन्दन ।
पश्य पश्य यथा पार्थ गच्छन्त्येते महारथाः ॥२६
एते भारत मातङ्गाः कर्णेनाभिहता रणे ।
आर्तनादान्विकुर्वाणा विद्रवन्ति दिशो दश ॥ २७
रथानां द्रवतां वृन्दं पश्य पार्थ समन्ततः ।
द्राव्यमाणं रणे चैव कर्णेनामित्रकर्शिना ॥ २८
हस्तिकक्ष्यां रणे पश्य चरन्तीं तत्र तत्र ह ।
रथस्थं सूतपुत्रस्य केतुं केतुमतां वर ॥ २९
असौ धावति राधेयो भीमसेनरथं प्रति ।
किरञ्शरशतानीव विनिघ्नंस्तव वाहिनीम् ॥ ३०
एतान्पश्य च पाञ्चालान्द्राव्यमाणान्महात्मना ।
शक्रेणेव यथा दैत्यान्हन्यमानान्महाहवे ॥ ३१
एष कर्णो रणे जित्वा पाञ्चालान्पाण्डुसृञ्जयान् ।
दिशो विप्रेक्षते सर्वास्त्वदर्थमिति मे मतिः ॥ ३२
पश्य पार्थ धनुः श्रेष्ठं विकर्षन्साधु शोभते ।
शत्रूञ्जित्वा यथा शक्रो देवसंघैः समावृतः ॥ ३३
एते नदन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम् ।
त्रासयन्तो रणे पार्थान्सृञ्जयांश्च सहस्रशः ॥ ३४
एष सर्वात्मना पाण्डूंस्त्रासयित्वा महारणे ।
अभिभाषति राधेयः सर्वसैन्यानि मानदः ॥ ३५
अभिद्रवत गच्छध्वं द्रुतं द्रवत कौरवाः ।
यथा जीवन्न वः कश्चिन्मुच्यते युधि सृञ्जयः ॥ ३६
तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः ।
एवमुक्त्वा ययावेष पृष्ठतो विकिरञ्शरैः ॥ ३७
पश्य कर्णं रणे पार्थ श्वेतच्छत्रविराजितम् ।
उदयं पर्वतं यद्वच्छोभयन्वै दिवाकरः ॥ ३८
पूर्णचन्द्रनिकाशेन मूर्ध्नि छत्रेण भारत ।

म्रियमाणेन समरे तथा शतशलाकिना ॥ ३९
एष त्वां प्रेक्षते कर्णः सकटाक्षो विशां पते ।
उत्तमं यत्नमास्थाय ध्रुवमेष्यति संयुगे ॥ ४०
पश्य ह्येनं महाबाहो विधुन्वानं महद्धनुः ।
शरांश्चाशीविषाकारान्विसृजन्तं महाबलम् ॥ ४१
असौ निवृत्तो राधेयो दृश्यते वानरध्वज ।
वधाय चात्मनोऽभ्येति दीपस्य शलभो यथा ॥ ४२
कर्णमेकाकिनं दृष्ट्वा रथानीकेन भारत ।
रिरक्षिषुः सुसंयत्तो धार्तराष्ट्रोऽभिवर्तते ॥ ४३
सर्वैः सहैभिर्दुष्टात्मा वध्य एष प्रयत्नतः ।
त्वया यशश्च राज्यं च सुखं चोत्तममिच्छता ॥ ४४
आत्मानं च कृतात्मानं समीक्ष्य भरतर्षभ ।
कृतागसं च राधेयं धर्मात्मनि युधिष्ठिरे ॥ ४५
प्रतिपद्यस्व राधेयं प्राप्तकालमनन्तरम् ।
आर्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ॥ ४६
पञ्च ह्येतानि मुख्यानां रथानां रथसत्तम ।
शतान्यायान्ति वेगेन बलिनां भीमतेजसाम् ॥ ४७
पञ्च नागसहस्राणि द्विगुणा वाजिनस्तथा ।
अभिसंहत्य कौन्तेय पदातिप्रयुतानि च ।
अन्योन्यरक्षितं वीर बलं त्वामभिवर्तते ॥ ४८
सूतपुत्रे महेष्वासे दर्शयात्मानमात्मना ।
उत्तमं यत्नमास्थाय प्रत्येहि भरतर्षभ ॥ ४९
असौ कर्णः सुसंरब्धः पाञ्चालानभिधावति ।
केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति ।
समुच्छेत्स्यति पाञ्चालानिति मन्ये परंतप ॥ ५०
आचक्षे ते प्रियं पार्थ तदेवं भरतर्षभ ।
राजा जीवति कौरव्यो धर्मपुत्रो युधिष्ठिरः ॥ ५१
असौ भीमो महाबाहुः संनिवृत्तश्चमूमुखे ।
वृतः सृञ्जयसैन्येन सात्यकेन च भारत ॥ ५२
वध्यन्त एते समरे कौरवा निशितैः शरैः ।
भीमसेनेन कौन्तेय पाञ्चालैश्च महात्मभिः ॥ ५३
सेना हि धार्तराष्ट्रस्य विमुखा चाभवद्रणात् ।
विप्रधावति वेगेन भीमस्य निहता शरैः ॥ ५४
विपन्नसस्येव मही रुधिरेण समुक्षिता ।
भारती भरतश्रेष्ठ सेना कृपणदर्शना ॥ ५५
निवृत्तं पश्य कौन्तेय भीमसेनं युधां पतिम् ।
आशीविषमिव क्रुद्धं तस्माद्द्रवति वाहिनी ॥ ५६
पीतरक्तासितसितास्ताराचन्द्रार्कमण्डिताः ।
पताका विप्रकीर्यन्ते छत्राण्येतानि चार्जुन ॥ ५७
सौवर्णा राजताश्चैव तैजसाश्च पृथग्विधाः ।
केतवो विनिपात्यन्ते हस्त्यश्वं विप्रकीर्यते ॥ ५८
रथेभ्यः प्रपतन्त्येते रथिनो विगतासवः ।
नानावर्णैर्हता बाणैः पाञ्चालैरपलायिभिः ॥ ५९
निर्मनुष्यान्गजानश्वान्रथांश्चैव धनंजय ।
समाद्रवन्ति पाञ्चाला धार्तराष्ट्रांस्तरस्विनः ॥ ६०
मृद्नन्ति च नरव्याघ्रा भीमसेनव्यपाश्रयात् ।
बलं परेषां दुर्धर्षं त्यक्त्वा प्राणानरिंदम ॥ ६१
एते नदन्ति पाञ्चाला धमन्त्यपि च वारिजान् ।
अभिद्रवन्ति च रणे निघ्नन्तः सायकैः परान् ॥ ६२
पश्य स्वर्गस्य माहात्म्यं पाञ्चाला हि परंतप ।
धार्तराष्ट्रान्विनिघ्नन्ति क्रुद्धाः सिंहा इव द्विपान् ॥
सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः ।
पाञ्चालैर्मानसादेत्य हंसैर्गङ्गेव वेगितैः ॥ ६४
सुभृशं च पराक्रान्ताः पाञ्चालानां निवारणे ।
कृपकर्णादयो वीरा ऋषभाणामिवर्षभाः ॥ ६५
सुनिमग्नांश्च भीमास्त्रैर्धार्तराष्ट्रान्महारथान् ।
धृष्टद्युम्नमुखा वीरा घ्नन्ति शत्रून्सहस्रशः ।
विषण्णभूयिष्ठरथा धार्तराष्ट्री महाचमूः ॥ ६६
पश्य भीमेन नाराचैश्छिन्ना नागाः पतन्त्यमी ।
वज्रिवज्राहतानीव शिखराणि महीभृताम् ॥ ६७

भीमसेनस्य निर्विद्धा बाणैः संनतपर्वभिः ।
स्वान्यनीकानि मृद्गन्तो द्रवन्त्येते महागजाः ॥ ६८
नाभिजानासि भीमस्य सिंहनादं दुरुत्सहम् ।
नदतोऽर्जुन संग्रामे वीरस्य जितकाशिनः ॥ ६९
एष नैषादिरभ्येति द्विपमुख्येन पाण्डवम् ।
जिघांसुस्तोमरैः क्रुद्धो दण्डपाणिरिवान्तकः ॥ ७०
सतोमरावस्य भुजौ छिन्नौ भीमेन गर्जतः ।
तीक्ष्णैरग्निशिखाप्रख्यैर्नाराचैर्दशभिर्हतः ॥ ७१
हत्वैनं पुनरायाति नागानन्यान्प्रहारिणः ।
पश्य नीलाम्बुदनिभान्महामात्रैरधिष्ठितान् ।
शक्तितोमरसंकाशैर्विनिघ्नन्तं वृकोदरम् ॥ ७२
सप्त सप्त च नागांस्तान्वैजयन्तीश्च सध्वजाः ।
निहत्य निशितैर्बाणैश्छिन्नाः पार्थाग्रजेन ते ।
दशभिर्दशभिश्चैको नाराचैर्निहतो गजः ॥ ७३
न चासौ धार्तराष्ट्राणां श्रूयते निनदस्तथा ।
पुरंदरसमे क्रुद्धे निवृत्ते भरतर्षभे ॥ ७४
अक्षौहिण्यस्तथा तिस्रो धार्तराष्ट्रस्य संहताः ।
क्रुद्धेन नरसिंहेन भीमसेनेन वारिताः ॥ ७५

संजय उवाच ।

भीमसेनेन तत्कर्म कृतं दृष्ट्वा सुदुष्करम् ।
अर्जुनो व्यधमच्छिष्टानहितान्निशितैः शरैः ॥ ७६
ते वध्यमानाः समरे संशप्तकगणाः प्रभो ।
शक्रस्यातिथितां गत्वा विशोका ह्यभवन्मुदा ॥ ७७
पार्थश्च पुरुषव्याघ्रः शरैः संनतपर्वभिः ।
जघान धार्तराष्ट्रस्य चतुर्विधबलां चमूम् ॥ ७८

इति श्रीमहाभारते कर्णपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

धृतराष्ट्र उवाच ।

निवृत्ते भीमसेने च पाण्डवे च युधिष्ठिरे ।
वध्यमाने बले चापि मामके पाण्डुसृञ्जयैः ॥ १
द्रवमाणे बलौघे च निराक्रन्दे मुहुर्मुहुः ।
किमकुर्वन्त कुरवस्तन्ममाचक्ष्व संजय ॥ २

संजय उवाच ।

दृष्ट्वा भीमं महाबाहुं सूतपुत्रः प्रतापवान् ।
क्रोधरक्तेक्षणो राजन्भीमसेनमुपाद्रवत् ॥ ३
तावकं च बलं दृष्ट्वा भीमसेनात्पराङ्मुखम् ।
यत्नेन महता राजन्पर्यवस्थापयद्बली ॥ ४
व्यवस्थाप्य महाबाहुस्तव पुत्रस्य वाहिनीम् ।
प्रत्युद्ययौ तदा कर्णः पाण्डवान्युद्धदुर्मदान् ॥ ५
प्रत्युद्ययुस्तु राधेयं पाण्डवानां महारथाः ।
धुन्वानाः कार्मुकाण्याजौ विक्षिपन्तश्च सायकान् ॥ ६
भीमसेनः शिनेर्नप्ता शिखण्डी जनमेजयः ।
धृष्टद्युम्नश्च बलवान्सर्वे चापि प्रभद्रकाः ॥ ७
पाञ्चालाश्च नरव्याघ्राः समन्तात्तव वाहिनीम् ।
अभ्यद्रवन्त संक्रुद्धाः समरे जितकाशिनः ॥ ८
तथैव तावका राजन्पाण्डवानामनीकिनीम् ।
अभ्यद्रवन्त त्वरिता जिघांसन्तो महारथाः ॥ ९
रथनागाश्वकलिलं पत्तिध्वजसमाकुलम् ।
बभूव पुरुषव्याघ्र सैन्यमद्भुतदर्शनम् ॥ १०
शिखण्डी च ययौ कर्णं धृष्टद्युम्नः सुतं तव ।
दुःशासनं महाराज महत्या सेनया वृतम् ॥ ११
नकुलो वृषसेनं च चित्रसेनं युधिष्ठिरः ।
उलूकं समरे राजन्सहदेवः समभ्ययात् ॥ १२
सात्यकिः शकुनिं चापि भीमसेनश्च कौरवान् ।
अर्जुनं च रणे यत्तं द्रोणपुत्रो महारथः ॥ १३
युधामन्युं महेष्वासं गौतमोऽभ्यपतद्रणे ।
कृतवर्मा च बलवानुत्तमौजसमाद्रवत् ॥ १४
भीमसेनः कुरून्सर्वान्पुत्रांश्च तव मारिष ।
सहानीकान्महाबाहुरेक एवाभ्यवारयत् ॥ १५

शिखण्डी च ततः कर्णं विचरन्तमभीतवत् ।
भीष्महन्ता महाराज वारयामास पत्रिभिः ॥ १६
प्रतिरब्धस्ततः कर्णो रोषात्प्रस्फुरिताधरः ।
शिखण्डिनं त्रिभिर्बाणैर्भ्रुवोर्मध्ये व्यताडयत् ॥१७
धारयंस्तु स तान्बाणाञ्शिखण्डी बह्वशोभत ।
राजतः पर्वतो यद्वत्त्रिभिः शृङ्गैः समन्वितः ॥ १८
सोऽतिविद्धो महेष्वासः सूतपुत्रेण संयुगे ।
कर्णं विव्याध समरे नवत्या निशितैः शरैः ॥ १९
तस्य कर्णो हयान्हत्वा सारथिं च त्रिभिः शरैः ।
उन्ममाथ ध्वजं चास्य क्षुरप्रेण महारथः ॥ २०
हताश्वात्तु ततो यानादवप्लुत्य महारथः ।
शक्तिं चिक्षेप कर्णाय संक्रुद्धः शत्रुतापनः ॥ २१
तां छित्त्वा समरे कर्णस्त्रिभिर्भारत सायकैः ।
शिखण्डिनमथाविध्यन्नवभिर्निशितैः शरैः ॥ २२
कर्णचापच्युतान्बाणान्वर्जयंस्तु नरोत्तमः ।
अपयातस्ततस्तूर्णं शिखण्डी जयतां वरः ॥ २३
ततः कर्णो महाराज पाण्डुसैन्यान्यशातयत् ।
तूलराशिं समासाद्य यथा वायुर्महाजवः ॥ २४
धृष्टद्युम्नो महाराज तव पुत्रेण पीडितः ।
दुःशासनं त्रिभिर्बाणैरभ्यविध्यत्स्तनान्तरे ॥ २५
तस्य दुःशासनो बाहुं सव्यं विव्याध मारिष ।
शितेन रुक्मपुङ्खेन भल्लेन नतपर्वणा ॥ २६
धृष्टद्युम्नस्तु निर्विद्धः शरं घोरममर्षणः ।
दुःशासनाय संक्रुद्धः प्रेषयामास भारत ॥ २७
आपतन्तं महावेगं धृष्टद्युम्नसमीरितम् ।
शरैश्चिच्छेद पुत्रस्ते त्रिभिरेव विशां पते ॥ २८
अथापरैः सप्तदशैर्भल्लैः कनकभूषणैः ।
धृष्टद्युम्नं समासाद्य बाह्वोरुरसि चार्दयत् ॥ २९
ततः स पार्षतः क्रुद्धो धनुश्चिच्छेद मारिष ।
क्षुरप्रेण सुतीक्ष्णेन तत उच्चुक्रुशुर्जनाः ॥ ३०
अथान्यद्धनुरादाय पुत्रस्ते भरतर्षभ ।
धृष्टद्युम्नं शरव्रातैः समन्तात्पर्यवारयत् ॥ ३१
तव पुत्रस्य ते दृष्ट्वा विक्रमं तं महात्मनः ।
व्यहसन्त रणे योधाः सिद्धाश्चाप्सरसां गणाः ॥
ततः प्रववृते युद्धं तावकानां परैः सह ।
घोरं प्राणभृतां काले घोररूपं परंतप ॥ ३३
नकुलं वृषसेनस्तु विद्ध्वा पञ्चभिरायसैः ।
पितुः समीपे तिष्ठन्तं त्रिभिरन्यैरविध्यत ॥ ३४
नकुलस्तु ततः क्रुद्धो वृषसेनं स्मयन्निव ।
नाराचेन सुतीक्ष्णेन विव्याध हृदये दृढम् ॥ ३५
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ।
शत्रुं विव्याध विंशत्या स च तं पञ्चभिः शरैः॥३६
ततः शरसहस्रेण तावुभौ पुरुषर्षभौ ।
अन्योन्यमाच्छादयतामथाभज्यत वाहिनी ॥ ३७
दृष्ट्वा तु प्रद्रुतां सेनां धार्तराष्ट्रस्य सूतजः ।
निवारयामास बलादनुपत्य विशां पते ।
निवृत्ते तु ततः कर्णे नकुलः कौरवान्ययौ ॥ ३८
कर्णपुत्रस्तु समरे हित्वा नकुलमेव तु ।
जुगोप चक्रं त्वरितं राधेयस्यैव मारिष ॥ ३९
उलूकस्तु रणे क्रुद्धः सहदेवेन वारितः ।
तस्याश्वांश्चतुरो हत्वा सहदेवः प्रतापवान् ।
सारथिं प्रेषयामास यमस्य सदनं प्रति ॥ ४०
उलूकस्तु ततो यानादवप्लुत्य विशां पते ।
त्रिगर्तानां बलं पूर्णं जगाम पितृनन्दनः ॥ ४१
सात्यकिः शकुनिं विद्ध्वा विंशत्या निशितैः शरैः ।
ध्वजं चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ ४२
सौबलस्तस्य समरे क्रुद्धो राजन्प्रतापवान् ।
विदार्य कवचं भूयो ध्वजं चिच्छेद काञ्चनम्॥४३
अथैनं निशितैर्बाणैः सात्यकिः प्रत्यविध्यत ।

सारथिं च महाराज त्रिभिरेव समार्दयत् ।
अथास्य वाहांस्त्वरितः शरैर्निन्ये यमक्षयम् ॥ ४४
ततोऽवप्लुत्य सहसा शकुनिर्भरतर्षभ ।
आरुरोह रथं तूर्णमुलूकस्य महारथः ।
अपोवाहाथ शीघ्रं स शैनेयाद्युद्धशालिनः ॥ ४५
सात्यकिस्तु रणे राजंस्तावकानामनीकिनीम् ।
अभिदुद्राव वेगेन ततोऽनीकमभिद्यत ॥ ४६
शैनेयशरनुन्नं तु ततः सैन्यं विशां पते ।
भेजे दश दिशस्तूर्णं न्यपतच्च गतासुवत् ॥ ४७
भीमसेनं तव सुतो वारयामास संयुगे ।
तं तु भीमो मुहूर्तेन व्यश्वसूतरथध्वजम् ।
चक्रे लोकेश्वरं तत्र तेनातुष्यन्त चारणाः ॥ ४८
ततोऽपायान्नृपस्तत्र भीमसेनस्य गोचरात् ।
कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत् ।
तत्र रावो महानासीद्भीममेकं जिघांसताम् ॥ ४९
युधामन्युः कृपं विद्ध्वा धनुरस्याशु चिच्छिदे ।
अथान्यद्धनुरादाय कृपः शस्त्रभृतां वरः ॥ ५०
युधामन्योर्ध्वजं सूतं छत्रं चापातयत्क्षितौ ।
ततोऽपायाद्रथेनैव युधामन्युर्महारथः ॥ ५१
उत्तमौजास्तु हार्दिक्यं शरैर्भीमपराक्रमम् ।
छादयामास सहसा मेघो वृष्ट्या यथाचलम् ॥ ५२
तद्युद्धं सुमहच्चासीद्घोररूपं परंतप ।
यादृशं न मया युद्धं दृष्टपूर्वं विशां पते ॥ ५३
कृतवर्मा ततो राजन्नुत्तमौजसमाहवे ।
हृदि विव्याध स तदा रथोपस्थ उपाविशत् ॥ ५४
सारथिस्तमपोवाह रथेन रथिनां वरम् ।
ततस्तु सत्वरं राजन्पाण्डुसैन्यमुपाद्रवत् ॥ ५५

इति श्रीमहाभारते कर्णपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

संजय उवाच ।

द्रौणिस्तु रथवंशेन महता परिवारितः ।
आपतत्सहसा राजन्यत्र राजा व्यवस्थितः ॥ १
तमापतन्तं सहसा शूरः शौरिसहायवान् ।
दधार सहसा पार्थो वेलेव मकरालयम् ॥ २
ततः क्रुद्धो महाराज द्रोणपुत्रः प्रतापवान् ।
अर्जुनं वासुदेवं च छादयामास पत्रिभिः ॥ ३
अवच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथाः ।
विस्मयं परमं गत्वा प्रैक्षन्त कुरवस्तदा ॥ ४
अर्जुनस्तु ततो दिव्यमस्त्रं चक्रे हसन्निव ।
तदस्त्रं ब्राह्मणो युद्धे वारयामास भारत ॥ ५
यद्यद्धि व्याक्षिपद्युद्धे पाण्डवोऽस्त्रं जिघांसया ।
तत्तदस्त्रं महेष्वासो द्रोणपुत्रो व्यशातयत् ॥ ६
अस्त्रयुद्धे ततो राजन्वर्तमाने भयावहे ।
अपश्याम रणे द्रौणिं व्यात्ताननमिवान्तकम् ॥ ७
स दिशो विदिशश्चैव छादयित्वा विजिह्मगैः ।
वासुदेवं त्रिभिर्बाणैरविध्यद्दक्षिणे भुजे ॥ ८
ततोऽर्जुनो हयान्हत्वा सर्वांस्तस्य महात्मनः ।
चकार समरे भूमिं शोणितौघतरङ्गिणीम् ॥ ९
निहता रथिनः पेतुः पार्थचापच्युतैः शरैः ।
हयाश्च पर्यधावन्त मुक्तयोक्त्रास्ततस्ततः ॥ १०
तद्दृष्ट्वा कर्म पार्थस्य द्रौणिराहवशोभिनः ।
अवाकिरद्रणे कृष्णं समन्तान्निशितैः शरैः ॥ ११
ततोऽर्जुनं महाराज द्रौणिरायम्य पत्रिणा ।
वक्षोदेशे समासाद्य ताडयामास संयुगे ॥ १२
सोऽतिविद्धो रणे तेन द्रोणपुत्रेण भारत ।
आदत्त परिघं घोरं द्रौणेश्चैनमवाक्षिपत् ॥ १३
तमापतन्तं परिघं कार्तस्वरविभूषितम् ।
द्रौणिश्चिच्छेद सहसा तत उच्चुक्रुशुर्जनाः ॥ १४

सोऽनेकधापतद्भूमौ भारद्वाजस्य सायकैः ।
विशीर्णः पर्वतो राजन्यथा स्यान्मातरिश्वना ॥ १५
ततोऽर्जुनो रणे द्रौणिं विव्याध दशभिः शरैः ।
सारथिं चास्य भल्लेन रथनीडादपाहरत् ॥ १६
स संगृह्य स्वयं वाहान्कृष्णौ प्राच्छादयच्छरैः ।
तत्राद्भुतमपश्याम द्रौणेराशु पराक्रमम् ॥ १७
अवहत्तुरगान्यच्च फल्गुनं चाप्ययोधयत् ।
तदस्य समरे राजन्सर्वे योधा अपूजयन् ॥ १८
यदा त्वमस्यत रणे द्रोणपुत्रेण फल्गुनः ।
ततो रश्मीन्रथाश्वानां क्षुरप्रैश्चिच्छिदे जयः ॥ १९
प्राद्रवंस्तुरगास्ते तु शरवेगप्रबाधिताः ।
ततोऽभून्निनदो भूयस्तव सैन्यस्य भारत ॥ २०
पाण्डवास्तु जयं लब्ध्वा तव सैन्यमुपाद्रवन् ।
समन्तान्निशितान्बाणान्विमुञ्चन्तो जयैषिणः ॥ २१
पाण्डवैस्तु महाराज धार्तराष्ट्री महाचमूः ।
पुनः पुनरथो वीरैरभज्यत जयोद्धतैः ॥ २२
पश्यतां ते महाराज पुत्राणां चित्रयोधिनाम् ।
शकुनेः सौबलेयस्य कर्णस्य च महात्मनः ॥ २३
वार्यमाणा महासेना पुत्रैस्तव जनेश्वर ।
नावतिष्ठत संग्रामे ताड्यमाना समन्ततः ॥ २४
ततो योधैर्महाराज पलायद्भिस्ततस्ततः ।
अभवद्भयाकुलं भीतैः पुत्राणां ते महद्बलम् ॥ २५
तिष्ठ तिष्ठेति सततं सूतपुत्रस्य जल्पतः ।
नावतिष्ठत सा सेना वध्यमाना महात्मभिः ॥ २६
अथोत्क्रुष्टं महाराज पाण्डवैर्जितकाशिभिः ।
धार्तराष्ट्रबलं दृष्ट्वा द्रवमाणं समन्ततः ॥ २७
ततो दुर्योधनः कर्णमब्रवीत्प्रणयादिव ।
पश्य कर्ण यथा सेना पाण्डवैरर्दिता भृशम् ॥ २८
त्वयि तिष्ठति संत्रासात्पलायति समन्ततः ।
एतज्ज्ञात्वा महाबाहो कुरु प्राप्तमरिंदम ॥ २९

सहस्राणि च योधानां त्वामेव पुरुषर्षभ ।
क्रोशन्ति समरे वीर द्राव्यमाणानि पाण्डवैः ॥ ३०
एतच्छ्रुत्वा तु राधेयो दुर्योधनवचो महत् ।
मद्रराजमिदं वाक्यमब्रवीत्सूतनन्दनः ॥ ३१
पश्य मे भुजयोर्वीर्यमस्त्राणां च जनेश्वर ।
अद्य हन्मि रणे सर्वान्पाञ्चालान्पाण्डुभिः सह ।
वाहयाश्वान्नरव्याघ्र भद्रेणैव जनेश्वर ॥ ३२
एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान् ।
प्रगृह्य विजयं वीरो धनुःश्रेष्ठं पुरातनम् ।
सज्यं कृत्वा महाराज संमृज्य च पुनः पुनः ॥ ३३
संनिवार्य च योधान्स्वान्सत्येन शपथेन च ।
प्रायोजयदमेयात्मा भार्गवास्त्रं महाबलः ॥ ३४
ततो राजन्सहस्राणि प्रयुतान्यर्बुदानि च ।
कोटिशश्च शरास्तीक्ष्णा निरगच्छन्महामृधे ॥ ३५
ज्वलितैस्तैर्महाघोरैः कङ्कबर्हिणवाजितैः ।
संछन्ना पाण्डवी सेना न प्राज्ञायत किंचन ॥ ३६
हाहाकारो महानासीत्पाञ्चालानां विशां पते ।
पीडितानां बलवता भार्गवास्त्रेण संयुगे ॥ ३७
निपतद्भिर्गजै राजन्नरैश्चापि सहस्रशः ।
रथैश्चापि नरव्याघ्र हयैश्चापि समन्ततः ॥ ३८
प्राकम्पत मही राजन्निहतैस्तैस्ततस्ततः ।
व्याकुलं सर्वमभवत्पाण्डवानां महद्बलम् ॥ ३९
कर्णस्त्वेको युधां श्रेष्ठो विधूम इव पावकः ।
दहञ्शत्रून्नरव्याघ्र शुशुभे स परंतपः ॥ ४०
ते वध्यमानाः कर्णेन पाञ्चालाश्चेदिभिः सह ।
तत्र तत्र व्यमुह्यन्त वनदाहे यथा द्विपाः ।
चुक्रुशुस्ते नरव्याघ्र यथाप्राग्र्या नरोत्तमाः ॥ ४१
तेषां तु क्रोशतां श्रुत्वा भीतानां रणमूर्धनि ।
धावतां च दिशो राजन्वित्रस्तानां समन्ततः ।
आर्तनादो महांस्तत्र प्रेतानामिव संप्लवे ॥ ४२

वध्यमानांस्तु तान्दृष्ट्वा सूतपुत्रेण मारिष ।
वित्रेसुः सर्वभूतानि तिर्यग्योनिगतान्यपि ॥ ४३
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
अर्जुनं वासुदेवं च व्याक्रोशन्त मुहुर्मुहुः ।
प्रेतराजपुरे यद्वत्प्रेतराजं विचेतसः ॥ ४४
अथाब्रवीद्वासुदेवं कुन्तीपुत्रो धनंजयः ।
भार्गवास्त्रं महाघोरं दृष्ट्वा तत्र समीरितम् ॥ ४५
पश्य कृष्ण महाबाहो भार्गवास्त्रस्य विक्रमम् ।
नैतदस्त्रं हि समरे शक्यं हन्तुं कथंचन ॥ ४६
सूतपुत्रं च संरब्धं पश्य कृष्ण महारणे ।
अन्तकप्रतिमं वीरं कुर्वाणं कर्म दारुणम् ॥ ४७
सुतीक्ष्णं चोदयन्नश्वान्प्रेक्षते मां मुहुर्मुहुः ।
न च पश्यामि समरे कर्णस्य प्रपलायितम् ॥ ४८
जीवन्प्राप्नोति पुरुषः संख्ये जयपराजयौ ।
जितस्य तु हृषीकेश वध एव कुतो जयः ॥ ४९
ततो जनार्दनः प्रायाद्द्रष्टुमिच्छन्युधिष्ठिरम् ।
श्रमेण ग्राहयिष्यंश्च कर्णं युद्धेन मारिष ॥ ५०
अर्जुनं चाब्रवीत्कृष्णो भृशं राजा परिक्षतः ।
तमाश्वास्य कुरुश्रेष्ठ ततः कर्णं हनिष्यसि ॥ ५१
ततो धनंजयो द्रष्टुं राजानं बाणपीडितम् ।
रथेन प्रययौ क्षिप्रं संग्रामे केशवाज्ञया ॥ ५२
गच्छन्नेव तु कौन्तेयो धर्मराजदिदृक्षया ।
सैन्यमालोकयामास नापश्यत्तत्र चाग्रजम् ॥ ५३
युद्धं कृत्वा तु कौन्तेयो द्रोणपुत्रेण भारत ।
दुःसहं वज्रिणा संख्ये पराजिग्ये भृगोः सुतम् ॥

द्रौणिं पराजित्य ततोग्रधन्वा
कृत्वा महद्दुष्करमार्यकर्म ।
आलोकयामास ततः स्वसैन्यं
धनंजयः शत्रुभिरप्रधृष्यः ॥ ५५
स युध्यमानः पृतनामुखस्था-
ञ्शूराञ्शूरो हर्षयन्सव्यसाची ।
पूर्वापदानैः प्रथितैः प्रशंस-
न्स्थिरांश्चकारात्मरथाननीके ॥ ५६
अपश्यमानस्तु किरीटमाली
युधि ज्येष्ठं भ्रातरमाजमीढम् ।
उवाच भीमं तरसाभ्युपेत्य
राज्ञः प्रवृत्तिस्त्विह केति राजन् ॥ ५७

भीम उवाच ।

अपयात इतो राजा धर्मपुत्रो युधिष्ठिरः ।
कर्णबाणविभुमाङ्गो यदि जीवेत्कथंचन ॥ ५८

अर्जुन उवाच ।

तस्माद्भवाञ्शीघ्रमितः प्रयातु
राज्ञः प्रवृत्त्यै कुरुसत्तमस्य ।
नूनं हि विद्धोऽतिभृशं पृषत्कैः
कर्णेन राजा शिबिरं गतोऽसौ ॥ ५९
यः संप्रहारे निशि संप्रवृत्ते
द्रोणेन विद्धोऽतिभृशं तरस्वी ।
तस्थौ च तत्रापि जयप्रतीक्षो
द्रोणेन यावन्न हतः किलासीत् ॥ ६०
स संशयं गमितः पाण्डवाग्र्यः
संख्येऽद्य कर्णेन महानुभावः ।
ज्ञातुं प्रयाह्याशु तमद्य भीम
स्थास्याम्यहं शत्रुगणान्निरुध्य ॥ ६१

भीम उवाच ।

त्वमेव जानीहि महानुभाव
राज्ञः प्रवृत्तिं भरतर्षभस्य ।
अहं हि यद्यर्जुन यामि तत्र
वक्ष्यन्ति मां भीत इति प्रवीराः ॥ ६२
ततोऽब्रवीदर्जुनो भीमसेनं
संशप्तकाः प्रत्यनीकं स्थिता मे ।

एतानहत्वा न मया तु शक्य-
मितोऽपयातुं रिपुसंघगोष्ठात् ॥ ६३
अथाब्रवीदर्जुनं भीमसेनः
स्ववीर्यमाश्रित्य कुरुप्रवीर ।
संशप्तकान्प्रतियोत्स्यामि संख्ये
सर्वानहं याहि धनंजयेति ॥ ६४
तद्भीमसेनस्य वचो निशम्य
सुदुर्वचं भ्रातुरमित्रमध्ये ।
द्रष्टुं कुरुश्रेष्ठमभिप्रयातुं
प्रोवाच वृष्णिप्रवरं तदानीम् ॥ ६५
चोदयाश्वान्हृषीकेश विगाह्यैतं रथार्णवम् ।
अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव ॥ ६६
ततो हयान्सर्वदाशार्हमुख्यः
प्राचोदयद्भीममुवाच चेदम् ।
नैतच्चित्रं तव कर्माद्य वीर
यास्यामहे जहि भीमारिसंघान् ॥ ६७
ततो ययौ हृषीकेशो यत्र राजा युधिष्ठिरः ।
शीघ्राच्छीघ्रतरं राजन्वाजिभिर्गरुडोपमैः ॥६८
प्रत्यनीके व्यवस्थाप्य भीमसेनमरिंदमम् ।
संदिश्य चैव राजेन्द्र युद्धं प्रति वृकोदरम् ॥ ६९
ततस्तु गत्वा पुरुषप्रवीरौ
राजानमासाद्य शयानमेकम् ।
रथादुभौ प्रत्यवरुह्य तस्मा-
द्ववन्दतुर्धर्मराजस्य पादौ ॥ ७०
तौ दृष्ट्वा पुरुषव्याघ्रौ क्षेमिणौ पुरुषर्षभ ।
मुदाभ्युपगतौ कृष्णावश्विनाविव वासवम् ॥ ७१
तावभ्यनन्दद्राजा हि विवस्वानश्विनाविव ।
हते महासुरे जम्भे शक्रविष्णू यथा गुरुः ॥ ७२
मन्यमानो हतं कर्णं धर्मराजो युधिष्ठिरः ।
हर्षगद्गदया वाचा प्रीतः प्राह परंतपौ ॥ ७३

इति श्रीमहाभारते कर्णपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

संजय उवाच ।

महासत्त्वौ तु तौ दृष्ट्वा सहितौ केशवार्जुनौ ।
हतमाधिरथिं मेने संख्ये गाण्डीवधन्वना ॥ १
तावभ्यनन्दत्कौन्तेयः साम्ना परमवल्गुना ।
स्मितपूर्वममित्रघ्नः पूजयन्भरतर्षभ ॥ २

युधिष्ठिर उवाच ।

स्वागतं देवकीपुत्र स्वागतं ते धनंजय ।
प्रियं मे दर्शनं बाढं युवयोरच्युतार्जुनौ ॥ ३
अक्षताभ्यामरिष्टाभ्यां कथं युध्य महारथम् ।
आशीविषसमं युद्धे सर्वशस्त्रविशारदम् ॥ ४
अग्रगं धार्तराष्ट्राणां सर्वेषां शर्म वर्म च ।
रक्षितं वृषसेनेन सुषेणेन च धन्विना ॥ ५
अनुज्ञातं महावीर्यं रामेणास्त्रेषु दुर्जयम् ।
त्रातारं धार्तराष्ट्राणां गन्तारं वाहिनीमुखे ॥ ६
हन्तारमरिसैन्यानाममित्रगणमर्दनम् ।
दुर्योधनहिते युक्तमस्मद्युद्धाय चोद्यतम् ॥ ७
अप्रधृष्यं महायुद्धे देवैरपि सवासवैः ।
अनलानिलयोस्तुल्यं तेजसा च बलेन च ॥ ८
पातालमिव गम्भीरं सुहृदानन्दवर्धनम् ।
अन्तकाभममित्राणां कर्णं हत्वा महाहवे ।
दिष्ट्या युवामनुप्राप्तौ जित्वासुरमिवामरौ ॥ ९
तेन युद्धमदीनेन मया ह्यद्याच्युतार्जुनौ ।
कुपितेनान्तकेनेव प्रजाः सर्वा जिघांसता ॥ १०
तेन केतुश्च मे छिन्नो हतौ च पार्ष्णिसारथी ।
हतवाहः कृतश्चास्मि युयुधानस्य पश्यतः ॥ ११
धृष्टद्युम्नस्य यमयोर्वीरस्य च शिखण्डिनः ।

पश्यतां द्रौपदेयानां पाञ्चालानां च सर्वशः ॥ १२
एताञ्जित्वा महावीर्यान्कर्णः शत्रुगणान्बहून् ।
जितवान्मां महाबाहो यतमानं महारणे ॥ १३
अनुसृत्य च मां युद्धे परुषाण्युक्तवान्बहु ।
तत्र तत्र युधां श्रेष्ठः परिभूय न संशयः ॥ १४
भीमसेनप्रभावात्तु यज्जीवामि धनंजय ।
बहुनात्र किमुक्तेन नाहं तत्सोढुमुत्सहे ॥ १५
त्रयोदशाहं वर्षाणि यस्माद्भीतो धनंजय ।
न स्म निद्रां लभे रात्रौ न चाहनि सुखं क्वचित्॥१६
तस्य द्वेषेण संयुक्तः परिदह्ये धनंजय ।
आत्मनो मरणं जानन्वाध्रीणस इव द्विपः ॥ १७
यस्यायमगमत्कालश्चिन्तयानस्य मे विभो ।
कथं शक्यो मया कर्णो युद्धे क्षपयितुं भवेत् ॥१८
जाग्रत्स्वपंश्च कौन्तेय कर्णमेव सदा ह्यहम् ।
पश्यामि तत्र तत्रैव कर्णभूतमिदं जगत् ॥ १९
यत्र यत्र हि गच्छामि कर्णाद्भीतो धनंजय ।
तत्र तत्र हि पश्यामि कर्णमेवाग्रतः स्थितम् ॥ २०
सोऽहं तेनैव वीरेण समरेष्वपलायिना ।
सहयः सरथः पार्थ जित्वा जीवन्विसर्जितः ॥२१
को नु मे जीवितेनार्थो राज्येनार्थोऽथ वा पुनः ।
ममैवं धिक्कृतस्येह कर्णेनाहवशोभिना ॥ २२
न प्राप्तपूर्वं यद्भीष्मात्कृपाद्द्रोणाच्च संयुगे ।
तत्प्राप्तमद्य मे युद्धे सूतपुत्रान्महारथात् ॥ २३
तत्त्वा पृच्छामि कौन्तेय यथा ह्यकुशलस्तथा ।
तन्ममाचक्ष्व कात्स्न्र्येन यथा कर्णस्त्वया हतः ॥२४
शक्रवीर्यसमो युद्धे यमतुल्यपराक्रमः ।
रामतुल्यस्तथास्त्रे यः स कथं वै निषूदितः ॥ २५
महारथः समाख्यातः सर्वयुद्धविशारदः ।
धनुर्धराणां प्रवरः सर्वेषामेकपूरुषः ॥ २६
पूजितो धृतराष्ट्रेण सपुत्रेण विशां पते ।
सदा त्वदर्थं राधेयः स कथं निहतस्त्वया ॥ २७
धृतराष्ट्रो हि योधेषु सर्वेष्वेव सदार्जुन ।
तव मृत्युं रणे कर्णं मन्यते पुरुषर्षभः ॥ २८
स त्वया पुरुषव्याघ्र कथं युद्धे निषूदितः ।
तन्ममाचक्ष्व बीभत्सो यथा कर्णो हतस्त्वया॥२९
सोत्सेधमस्य च शिरः पश्यतां सुहृदां हृतम् ।
त्वया पुरुषशार्दूल शार्दूलेन यथा रुरोः ॥ ३०

यः पर्युपासीत्प्रदिशो दिशश्च
त्वां सूतपुत्रः समरे परीप्सन् ।
दित्सुः कर्णः समरे हस्तिपूगं
स हीदानीं कङ्कपत्रैः सुतीक्ष्णैः ॥ ३१
त्वया रणे निहतः सूतपुत्रः
कच्चिच्छेते भूमितले दुरात्मा ।
कच्चित्प्रियं मे परमं त्वयाद्य
कृतं रणे सूतपुत्रं निहत्य ॥ ३२
यः सर्वतः पर्यपतत्त्वदर्थे
मदान्वितो गर्वितः सूतपुत्रः ।
स शूरमानी समरे समेत्य
कच्चित्त्वया निहतः संयुगेऽद्य ॥ ३३
रौक्मं रथं हस्तिवरैश्च युक्तं
रथं दित्सुर्यः परेभ्यस्त्वदर्थे ।
सदा रणे स्पर्धते यः स पापः
कच्चित्त्वया निहतस्तात युद्धे ॥ ३४
योऽसौ नित्यं शूरमदेन मत्तो
विकत्थते संसदि कौरवाणाम् ।
प्रियोऽत्यर्थं तस्य सुयोधनस्य
कच्चित्स पापो निहतस्त्वयाद्य ॥ ३५
कच्चित्समागम्य धनुःप्रमुक्तै-
स्त्वत्प्रेषितैर्लोहितार्थैर्विहंगैः ।
शेतेऽद्य पापः स विभिन्नगात्रः

कच्चिद्भग्नो धार्तराष्ट्रस्य बाहुः ॥ ३६
योऽसौ सदा श्लाघते राजमध्ये
दुर्योधनं हर्षयन्दर्पपूर्णः ।
अहं हन्ता फल्गुनस्येति मोहा-
त्कच्चिद्वृतस्तस्य न वै तथा रथः ॥ ३७
नाहं पादौ धावयिष्ये कदाचि-
द्यावत्स्थितः पार्थ इत्यल्पबुद्धिः ।
व्रतं तस्यैतत्सर्वदा शक्रसूनो
कच्चित्त्वया निहतः सोऽद्य कर्णः ॥ ३८
योऽसौ कृष्णामब्रवीद्दुष्टबुद्धिः
कर्णः सभायां कुरुवीरमध्ये ।
किं पाण्डवांस्त्वं न जहासि कृष्णे
सुदुर्बलान्पतितान्हीनसत्त्वान् ॥ ३९
यत्तत्कर्णः प्रत्यजानात्त्वदर्थे
नाहत्वाहं सह कृष्णेन पार्थम् ।
इहोपयातेति स पापबुद्धिः
कच्चिच्छेते शरसंभिन्नगात्रः ॥ ४०
कच्चित्संग्रामे विदितो वा तदायं
समागमः सृञ्जयकौरवाणाम् ।
यत्रावस्थामीदृशीं प्रापितोऽहं
कच्चित्त्वया सोऽद्य हतः समेत्य ॥ ४१
कच्चित्त्वया तस्य सुमन्दबुद्धे-
र्गाण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः ।
सकुण्डलं भानुमदुत्तमाङ्गं
कायात्प्रकृत्तं युधि सव्यसाचिन् ॥ ४२
यत्तन्मया बाणसमर्पितेन
ध्यातोऽसि कर्णस्य वधाय वीर ।
तन्मे त्वया कच्चिदमोघमद्य
ध्यातं कृतं कर्णनिपातनेन ॥ ४३
यद्दर्पपूर्णः स सुयोधनोऽस्मा-
नवेक्षते कर्णसमाश्रयेण ।
कच्चित्त्वया सोऽद्य समाश्रयोऽस्य
भग्नः पराक्रम्य सुयोधनस्य ॥ ४४
यो नः पुरा षण्ढतिलानवोच-
त्सभामध्ये पार्थिवानां समक्षम् ।
स दुर्मतिः कच्चिदुपेत्य संख्ये
त्वया हतः सूतपुत्रोऽत्यमर्षी ॥ ४५
यः सूतपुत्रः प्रहसन्दुरात्मा
पुराब्रवीन्निर्जितां सौबलेन ।
स्वयं प्रसह्यानय याज्ञसेनी-
मपीह कच्चित्स हतस्त्वयाद्य ॥ ४६
यः शस्त्रभृच्छ्रेष्ठतमं पृथिव्यां
पितामहं व्याक्षिपदल्पचेताः ।
संख्यायमानोऽर्धरथः स कच्चि-
त्त्वया हतोऽद्याधिरथिर्दुरात्मा ॥ ४७
अमर्षणं निकृतिसमीरणेरितं
हृदि श्रितं ज्वलनमिमं सदा मम ।
हतो मया सोऽद्य समेत्य पापधी-
रिति ब्रुवन्प्रशमय मेऽद्य फल्गुन ॥ ४८

इति श्रीमहाभारते कर्णपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

संजय उवाच ।

तद्धर्मशीलस्य वचो निशम्य
राज्ञः क्रुद्धस्याधिरथौ महात्मा ।
उवाच दुर्धर्षमदीनसत्त्वं
युधिष्ठिरं जिष्णुरनन्तवीर्यः ॥ १
संशप्तकैर्युध्यमानस्य मेऽद्य
सेनाग्रयायी कुरुसैन्यस्य राजन् ।
आशीविषाभान्खगमान्प्रमुञ्च-

न्द्रौणिः पुरस्तात्सहसा व्यतिष्ठत् ॥ २
दृष्ट्वा रथं मेघनिभं ममेम-
मम्बष्ठसेना मरणे व्यतिष्ठत् ।
तेषामहं पञ्च शतानि हत्वा
ततो द्रौणिमगमं पार्थिवाग्र्य ॥ ३
ततोऽपरान्बाणसंधाननेका-
नाकर्णपूर्णायतविप्रमुक्तान् ।
ससर्ज शिक्षास्त्रबलप्रयत्नै-
स्तथा यथा प्रावृषि कालमेघः ॥ ४
नैवाददानं न च संदधानं
जानीमहे कतरेणास्यतीति ।
वामेन वा यदि वा दक्षिणेन
स द्रोणपुत्रः समरे पर्यवर्तत् ॥ ५
अविध्यन्मां पञ्चभिर्द्रोणपुत्रः
शितैः शरैः पञ्चभिर्वासुदेवम् ।
अहं तु तं त्रिंशता वज्रकल्पैः
समार्दयं निमिषस्यान्तरेण ॥ ६
स विक्षरन्रुधिरं सर्वगात्रै
रथानीकं सूतसूनोर्विवेश ।
मयाभिभूतः सैनिकानां प्रबर्हा-
नसावपश्यन्रुधिरेण प्रदिग्धान् ॥ ७
ततोऽभिभूतं युधि वीक्ष्य सैन्यं
विध्वस्तयोधं द्रुतवाजिनागम् ।
पञ्चाशता रथमुख्यैः समेतः
कर्णस्त्वरन्मामुपायात्प्रमाथी ॥ ८
तान्सूदयित्वाहमपास्य कर्णं
द्रष्टुं भवन्तं त्वरयाभियातः ।
सर्वे पाञ्चाला ह्युद्विजन्ते स्म कर्णा-
द्गन्धाद्गावः केसरिणो यथैव ॥ ९
महाझषस्येव मुखं प्रपन्नाः
प्रभद्रकाः कर्णमभि द्रवन्ति ।
मृत्योरास्यं व्यात्तमिवान्वपद्य-
न्प्रभद्रकाः कर्णमासाद्य राजन् ॥ १०
आयाहि पश्याद्य युयुत्समानं
मां सूतपुत्रं च वृतौ जयाय ।
षट्साहस्रा भारत राजपुत्राः
स्वर्गाय लोकाय रथा निमग्नाः ॥ ११
समेत्याहं सूतपुत्रेण संख्ये
वृत्रेण वज्रीव नरेन्द्रमुख्य ।
योत्स्ये भृशं भारत सूतपुत्र-
मस्मिन्संग्रामे यदि वै दृश्यतेऽद्य ॥ १२
कर्णं न चेदद्य निहन्मि राज-
न्सबान्धवं युध्यमानं प्रसह्य ।
प्रतिश्रुत्याकुर्वतां वै गतिर्या
कष्टां गच्छेयं तामहं राजसिंह ॥ १३
आमन्त्रये त्वां ब्रूहि जयं रणे मे
पुरा भीमं धार्तराष्ट्रा ग्रसन्ते ।
सौतिं हनिष्यामि नरेन्द्रसिंह
सैन्यं तथा शत्रुगणांश्च सर्वान् ॥ १४

इति श्रीमहाभारते कर्णपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

संजय उवाच ।

श्रुत्वा कर्णं कल्यमुदारवीर्यं
क्रुद्धः पार्थः फल्गुनस्यामितौजाः ।
धनंजयं वाक्यमुवाच चेदं
युधिष्ठिरः कर्णशराभितप्तः ॥ १
इदं यदि द्वैतवने ह्यवक्ष्यः
कर्णं योद्धुं न प्रसहे नृपेति ।
वयं तदा प्राप्तकालानि सर्वे

वृत्तान्युपैष्याम तदैव पार्थ ॥ २
मयि प्रतिश्रुत्य वधं हि तस्य
बलस्य चाप्तस्य तथैव वीर ।
आनीय नः शत्रुमध्यं स कस्मा-
त्समुत्क्षिप्य स्थण्डिले प्रत्यपिंष्ठाः ॥ ३
अन्वाशिष्म वयमर्जुन त्वयि
यियासवो बहु कल्याणमिष्टम् ।
तन्नः सर्वं विफलं राजपुत्र
फलार्थिनां निचुल इवातिपुष्पः ॥ ४
प्रच्छादितं बडिशमिवामिषेण
प्रच्छादितो गवय इवापवाचा ।
अनर्थकं मे दर्शितवानसि त्वं
राज्यार्थिनो राज्यरूपं विनाशम् ॥ ५
यत्तत्पृथां वागुवाचान्तरिक्षे
सप्ताहजाते त्वयि मन्दबुद्धौ ।
जातः पुत्रो वासवविक्रमोऽयं
सर्वाञ्शूराञ्शात्रवाञ्जेष्यतीति ॥ ६
अयं जेता खाण्डवे देवसंघा-
न्सर्वाणि भूतान्यपि चोत्तमौजाः ।
अयं जेता मद्रकलिङ्गकेकया-
नयं कुरून्हन्ति च राजमध्ये ॥ ७
अस्मात्परो न भविता धनुर्धरो
न वै भूतः कश्चन जातु जेता ।
इच्छन्नार्यः सर्वभूतानि कुर्या-
द्वशे वशी सर्वसमाप्तविद्यः ॥ ८
कान्त्या शशाङ्कस्य जवेन वायोः
स्थैर्येण मेरोः क्षमया पृथिव्याः ।
सूर्यस्य भासा धनदस्य लक्ष्म्या
शौर्येण शक्रस्य बलेन विष्णोः ॥ ९
तुल्यो महात्मा तव कुन्ति पुत्रो
जातोऽदितेर्विष्णुरिवारिहन्ता ।
स्वेषां जयाय द्विषतां वधाय
ख्यातोऽमितौजाः कुलतन्तुकर्ता ॥ १०
इत्यन्तरिक्षे शतशृङ्गमूर्ध्नि
तपस्विनां शृण्वतां वागुवाच ।
एवंविधं त्वां तच्च नाभूत्तवाद्य
देवा हि नूनमनृतं वदन्ति ॥ ११
तथापरेषामृषिसत्तमानां
श्रुत्वा गिरं पूजयतां सदैव ।
न संनतिं प्रैमि सुयोधनस्य
न त्वा जानाम्याधिरथेर्भयार्तम् ॥ १२
त्वष्ट्रा कृतं वाहमकूजनाक्षं
शुभं समास्थाय कपिध्वजं त्वम् ।
खड्गं गृहीत्वा हेमचित्रं समिद्धं
धनुश्चेदं गाण्डिवं तालमात्रम् ।
स केशवेनोह्यमानः कथं नु
कर्णाद्भीतो व्यपयातोऽसि पार्थ ॥ १३
धनुश्चैतत्केशवाय प्रदाय
यन्ताभविष्यस्त्वं रणे चेद्दुरात्मन् ।
ततोऽहनिष्यत्केशवः कर्णमुग्रं
मरुत्पतिर्वृत्रमिवात्तवज्रः ॥ १४
मासेऽपतिष्यः पञ्चमे त्वं प्रकृच्छ्रे
न वा गर्भोऽप्यभविष्यः पृथायाः ।
तत्ते श्रमो राजपुत्राभविष्य-
न्न संग्रामादपयातुं दुरात्मन् ॥ १५

इति श्रीमहाभारते कर्णपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

संजय उवाच ।

युधिष्ठिरेणैवमुक्तः कौन्तेयः श्वेतवाहनः ।

असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभम् ॥ १
तस्य कोपं समुद्वीक्ष्य चित्तज्ञः केशवस्तदा ।
उवाच किमिदं पार्थ गृहीतः खड्ग इत्युत ॥ २
नेह पश्यामि योद्धव्यं तव किंचिद्धनंजय ।
ते ध्वस्ता धार्तराष्ट्रा हि सर्वे भीमेन धीमता ॥ ३
अपयातोऽसि कौन्तेय राजा द्रष्टव्य इत्यपि ।
स राजा भवता दृष्टः कुशली च युधिष्ठिरः ॥ ४
तं दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमम् ।
हर्षकाले तु संप्राप्ते कस्मात्त्वा मन्युराविशत् ॥ ५
न तं पश्यामि कौन्तेय यस्ते वध्यो भवेदिह ।
कस्माद्भवान्महाखड्गं परिगृह्णाति सत्वरम् ॥ ६
तत्त्वा पृच्छामि कौन्तेय किमिदं ते चिकीर्षितम् ।
परामृशसि यत्क्रुद्धः खड्गमद्भुतविक्रम ॥ ७
एवमुक्तस्तु कृष्णेन प्रेक्षमाणो युधिष्ठिरम् ।
अर्जुनः प्राह गोविन्दं क्रुद्धः सर्प इव श्वसन् ॥ ८
दद गाण्डीवमन्यस्मा इति मां योऽभिचोदयेत् ।
छिन्द्यामहं शिरस्तस्य इत्युपांशुव्रतं मम ॥ ९
तदुक्तोऽहमदीनात्मन्राज्ञामितपराक्रम ।
समक्षं तव गोविन्द न तत्क्षन्तुमिहोत्सहे ॥ १०
तस्मादेनं वधिष्यामि राजानं धर्मभीरुकम् ।
प्रतिज्ञां पालयिष्यामि हत्वेमं नरसत्तमम् ।
एतदर्थं मया खड्गो गृहीतो यदुनन्दन ॥ ११
सोऽहं युधिष्ठिरं हत्वा सत्येऽप्यानृण्यतां गतः ।
विशोको विज्वरश्चापि भविष्यामि जनार्दन ॥ १२
किं वा त्वं मन्यसे प्राप्तमस्मिन्काले समुत्थिते ।
त्वमस्य जगतस्तात वेत्थ सर्वं गतागतम् ।
तत्तथा प्रकरिष्यामि यथा मां वक्ष्यते भवान् ॥ १३

कृष्ण उवाच ।

इदानीं पार्थ जानामि न वृद्धाः सेवितास्त्वया ।
अकाले पुरुषव्याघ्र संरम्भक्रिययानया ।
न हि धर्मविभागज्ञः कुर्यादेवं धनंजय ॥ १४
अकार्याणां च कार्याणां संयोगं यः करोति वै ।
कार्याणामक्रियाणां च स पार्थ पुरुषाधमः ॥ १५
अनुसृत्य तु ये धर्मं कवयः समुपस्थिताः ।
समासविस्तरविदां न तेषां वेत्थ निश्चयम् ॥ १६
अनिश्चयज्ञो हि नरः कार्याकार्यविनिश्चये ।
अवशो मुह्यते पार्थ यथा त्वं मूढ एव तु ॥ १७
न हि कार्यमकार्यं वा सुखं ज्ञातुं कथंचन ।
श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे ॥ १८
अविज्ञानाद्भवान्यच्च धर्मं रक्षति धर्मवित् ।
प्राणिनां हि वधं पार्थ धार्मिको नावबुध्यते ॥ १९
प्राणिनामवधस्तात सर्वज्यायान्मतो मम ।
अनृतं तु भवेद्वाच्यं न च हिंस्यात्कथंचन ॥ २०
स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदम् ।
हन्याद्भवान्नरश्रेष्ठ प्राकृतोऽन्यः पुमानिव ॥ २१
अयुध्यमानस्य वधस्तथाशत्रोस्य भारत ।
पराङ्मुखस्य द्रवतः शरणं वाभिगच्छतः ।
कृताञ्जलेः प्रपन्नस्य न वधः पूज्यते बुधैः ॥ २२
त्वया चैव व्रतं पार्थ बालेनैव कृतं पुरा ।
तस्मादधर्मसंयुक्तं मौढ्यात्कर्म व्यवस्यसि ॥ २३
स गुरुं पार्थ कस्मात्त्वं हन्या धर्ममनुस्मरन् ।
असंप्रधार्य धर्माणां गतिं सूक्ष्मां दुरन्वयाम् ॥२४
इदं धर्मरहस्यं च वक्ष्यामि भरतर्षभ ।
यद्ब्रूयात्तव भीष्मो वा धर्मज्ञो वा युधिष्ठिरः ॥२५
विदुरो वा तथा क्षत्ता कुन्ती वापि यशस्विनी ।
तत्ते वक्ष्यामि तत्त्वेन तन्निबोध धनंजय ॥ २६
सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
तत्त्वेनैतत्सुदुर्ज्ञेयं यस्य सत्यमनुष्ठितम् ॥ २७
भवेत्सत्यमवक्तव्यं वक्तव्यमनृतं भवेत् ।
सर्वस्वस्यापहारे तु वक्तव्यमनृतं भवेत् ॥ २८

प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत् ।
यत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत् ॥ २९
तादृशं पश्यते बालो यस्य सत्यमनुष्ठितम् ।
सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ॥ ३०
किमाश्चर्यं कृतप्रज्ञः पुरुषोऽपि सुदारुणः ।
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ॥ ३१
किमाश्चर्यं पुनर्मूढो धर्मकामोऽप्यपण्डितः ।
सुमहत्प्राप्नुयात्पापमापगामिव कौशिकः ॥ ३२

अर्जुन उवाच ।

आचक्ष्व भगवन्नेतद्यथा विद्यामहं तथा ।
बलाकान्धाभिसंबद्धं नदीनां कौशिकस्य च ॥ ३३

कृष्ण उवाच ।

मृगव्याधोऽभवत्कश्चिद्बलाको नाम भारत ।
यात्रार्थं पुत्रदारस्य मृगान्हन्ति न कामतः ॥ ३४
सोऽन्धौ च मातापितरौ बिभर्त्यन्यांश्च संश्रितान् ।
स्वधर्मनिरतो नित्यं सत्यवागनसूयकः ॥ ३५
स कदाचिन्मृगाँल्लिप्सुर्नान्वविन्दत्प्रयत्नवान् ।
अथापश्यत्स पीतोदं श्वापदं घ्राणचक्षुषम् ॥ ३६
अदृष्टपूर्वमपि तत्सत्त्वं तेन हतं तदा ।
अन्वेव च ततो व्योम्नः पुष्पवर्षमवापतत् ॥ ३७
अप्सरोगीतवादित्रैर्नादितं च मनोरमम् ।
विमानमागमत्स्वर्गान्मृगव्याधनिनीषया ॥ ३८
तद्भूतं सर्वभूतानामभावाय किलार्जुन ।
तपस्तप्त्वा वरं प्राप्तं कृतमन्धं स्वयंभुवा ॥ ३९
तद्धत्वा सर्वभूतानामभावकृतनिश्चयम् ।
ततो बलाकः स्वरगादेवं धर्मः सुदुर्विदः ॥ ४०
कौशिकोऽप्यभवद्विप्रस्तपस्वी न बहुश्रुतः ।
नदीनां संगमे ग्रामाददूरे स किलावसत् ॥ ४१
सत्यं मया सदा वाच्यमिति तस्याभवद्व्रतम् ।
सत्यवादीति विख्यातः स तदासीद्धनंजय ॥ ४२
अथ दस्युभयात्केचित्तदा तद्वनमाविशन् ।
दस्यवोऽपि गताः क्रूरा व्यमार्गन्त प्रयत्नतः ॥ ४३
अथ कौशिकमभ्येत्य प्राहुस्तं सत्यवादिनम् ।
कतमेन पथा याता भगवन्बहवो जनाः ।
सत्येन पृष्टः प्रब्रूहि यदि तान्वेत्थ शंस नः ॥ ४४
स पृष्टः कौशिकः सत्यं वचनं तानुवाच ह ।
बहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः ।
ततस्ते तान्समासाद्य क्रूरा जघ्नुरिति श्रुतिः ॥ ४५
तेनाधर्मेण महता वाग्दुरुक्तेन कौशिकः ।
गतः सुकष्टं नरकं सूक्ष्मधर्मेष्वकोविदः ।
अप्रभूतश्रुतो मूढो धर्माणामविभागवित् ॥ ४६
वृद्धानपृष्ट्वा संदेहं महच्छ्वभ्रमितोऽर्हति ।
तत्र ते लक्षणोद्देशः कश्चिदेव भविष्यति ॥ ४७
दुष्करं परमज्ञानं तर्केणात्र व्यवस्यति ।
श्रुतिर्धर्म इति ह्येके वदन्ति बहवो जनाः ॥ ४८
न त्वेतत्प्रतिसूयामि न हि सर्वं विधीयते ।
प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ॥ ४९
धारणाद्धर्ममित्याहुर्धर्मो धारयति प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥ ५०
येऽन्यायेन जिहीर्षन्तो जना इच्छन्ति कर्हिचित् ।
अकूजनेन चेन्मोक्षो नात्र कूजेत्कथंचन ॥ ५१
अवश्यं कूजितव्यं वा शङ्केरन्वाप्यकूजतः ।
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विचारितम् ॥ ५२
प्राणात्यये विवाहे वा सर्वज्ञातिधनक्षये ।
नर्मण्यभिप्रवृत्ते वा प्रवक्तव्यं मृषा भवेत् ।
अधर्मं नात्र पश्यन्ति धर्मतत्त्वार्थदर्शिनः ॥ ५३
यः स्तेनैः सह संबन्धान्मुच्यते शपथैरपि ।
श्रेयस्तत्रानृतं वक्तुं तत्सत्यमविचारितम् ॥ ५४
न च तेभ्यो धनं देयं शक्ये सति कथंचन ।
पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत् ।

तस्माद्धर्मार्थमनृतमुक्त्वा नानृतवाग्भवेत् ॥ ५५
एष ते लक्षणोद्देशः समुद्दिष्टो यथाविधि ।
एतच्छ्रुत्वा ब्रूहि पार्थ यदि वध्यो युधिष्ठिरः ॥ ५६

अर्जुन उवाच ।

यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महामतिः ।
हितं चैव यथास्माकं तथैतद्वचनं तव ॥ ५७
भवान्मातृसमोऽस्माकं तथा पितृसमोऽपि च ।
गतिश्च परमा कृष्ण तेन ते वाक्यमद्भुतम् ॥ ५८
न हि ते त्रिषु लोकेषु विद्यतेऽविदितं क्वचित् ।
तस्माद्भवान्परं धर्मं वेद सर्वं तथातथम् ॥ ५९
अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम् ।
तस्मिन्समयसंयोगे ब्रूहि किंचिदनुग्रहम् ।
इदं चापरमत्रैव शृणु हृत्स्थं विवक्षितम् ॥ ६०
जानासि दाशार्ह मम व्रतं त्वं
यो मां ब्रूयात्कश्चन मानुषेषु ।
अन्यस्मै त्वं गाण्डिवं देहि पार्थ
यस्त्वत्तोऽस्त्रैर्भविता वा विशिष्टः ॥ ६१
हन्यामहं केशव तं प्रसह्य
भीमो हन्यात्तूबरकेति चोक्तः ।
तन्मे राजा प्रोक्तवांस्ते समक्षं
धनुर्देहीत्यसकृद्वृष्णिसिंह ॥ ६२
तं हत्वा चेत्केशव जीवलोके
स्थाता कालं नाहमप्यल्पमात्रम् ।
सा च प्रतिज्ञा मम लोकप्रबुद्धा
भवेत्सत्या धर्मभृतां वरिष्ठ ।
यथा जीवेत्पाण्डवोऽहं च कृष्ण
तथा बुद्धिं दातुमद्यार्हसि त्वम् ॥ ६३

वासुदेव उवाच ।

राजा श्रान्तो जगतो विक्षतश्च
कर्णेन संख्ये निशितैर्बाणसंघैः ।
तस्मात्पार्थ त्वां परुषाण्यवोच-
त्कर्णे द्यूतं ह्यद्य रणे निबद्धम् ॥ ६४
तस्मिन्हते कुरवो निर्जिताः स्यु-
रेवंबुद्धिः पार्थिवो धर्मपुत्रः ।
यदावमानं लभते महान्तं
तदा जीवन्मृत इत्युच्यते सः ॥ ६५
तन्मानितः पार्थिवोऽयं सदैव
त्वया सभीमेन तथा यमाभ्याम् ।
वृद्धैश्च लोके पुरुषप्रवीरै-
स्तस्यावमानं कलया त्वं प्रयुङ्क्ष्व ॥ ६६
त्वमित्यत्रभवन्तं त्वं ब्रूहि पार्थ युधिष्ठिरम् ।
त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ॥ ६७
एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे ।
अधर्मयुक्तं संयोगं कुरुष्वैवं कुरूद्वह ॥ ६८
अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः ।
अविचार्यैव कार्यैषा श्रेयःकामैर्नरैः सदा ॥ ६९
वधो ह्ययं पाण्डव धर्मराज्ञ-
स्त्वत्तो युक्तो वेत्स्यते चैवमेषः ।
ततोऽस्य पादावभिवाद्य पश्चा-
च्छमं ब्रूयाः सान्त्वपूर्वं च पार्थम् ॥ ७०
भ्राता प्राज्ञस्तव कोपं न जातु
कुर्याद्राजा कंचन पाण्डवेयः ।
मुक्तोऽनृताद्भ्रातृवधाच्च पार्थ
हृष्टः कर्णं त्वं जहि सूतपुत्रम् ॥ ७१

संजय उवाच ।

इत्येवमुक्तस्तु जनार्दनेन
पार्थः प्रशस्याथ सुहृद्वधं तम् ।
ततोऽब्रवीदर्जुनो धर्मराज-
मनुक्तपूर्वं परुषं प्रसह्य ॥ ७२
मा त्वं राजन्व्याहर व्याहरत्सु

न तिष्ठसे क्रोशमात्रे रणार्धे ।
भीमस्तु मामर्हति गर्हणाय
यो युध्यते सर्वयोधप्रवीरः ॥ ७३
काले हि शत्रून्प्रतिपीड्य संख्ये
हत्वा च शूरान्पृथिवीपतींस्तान् ।
यः कुञ्जराणामधिकं सहस्रं
हत्वानदत्तुमुलं सिंहनादम् ॥ ७४
सुदुष्करं कर्म करोति वीरः
कर्तुं यथा नार्हसि त्वं कदाचित् ।
रथादवप्लुत्य गदां परामृशं-
स्तया निहन्त्यश्वनरद्विपान्रणे ॥ ७५
वरासिना वाजिरथाश्वकुञ्जरां-
स्तथा रथाङ्गैर्धनुषा च हन्त्यरीन् ।
प्रमृद्य पद्भ्यामहितान्निहन्ति यः
पुनश्च दोर्भ्यां शतमन्युविक्रमः ॥ ७६
महाबलो वैश्रवणान्तकोपमः
प्रसह्य हन्ता द्विषतां यथार्हम् ।
स भीमसेनोऽर्हति गर्हणां मे
न त्वं नित्यं रक्ष्यसे यः सुहृद्भिः ॥ ७७
महारथान्नागवरान्हयांश्च
पदातिमुख्यानपि च प्रमथ्य ।
एको भीमो धार्तराष्ट्रेषु मग्नः
स मामुपालब्धुमरिंदमोऽर्हति ॥ ७८
कलिङ्गवङ्गाङ्गनिषादमागधा-
न्सदामदान्नीलबलाहकोपमान् ।
निहन्ति यः शत्रुगणाननेकशः
स मामिवक्तुं प्रभवत्यनागसम् ॥ ७९
सुयुक्तमास्थाय रथं हि काले
धनुर्विकर्षञ्शरपूर्णमुष्टिः ।
सृजत्यसौ शरवर्षाणि वीरो
महाहवे मेघ इवाम्बुधाराः ॥ ८०
बलं तु वाचि द्विजसत्तमानां
क्षात्रं बुधा बाहुबलं वदन्ति ।
त्वं वाग्बलो भारत निष्ठुरश्च
त्वमेव मां वेत्सि यथाविधोऽहम् ॥ ८१
यतामि नित्यं तव कर्तुमिष्टं
दारैः सुतैर्जीवितेनात्मना च ।
एवं च मां वाग्विशिखैर्निहंसि
त्वत्तः सुखं न वयं विद्म किंचित् ॥ ८२
अवामंस्था मां द्रौपदीतल्पसंस्थो
महारथान्प्रतिहन्मि त्वदर्थे ।
तेनातिशङ्की भारत निष्ठुरोऽसि
त्वत्तः सुखं नाभिजानामि किंचित् ॥ ८३
प्रोक्तः स्वयं सत्यसंधेन मृत्यु-
स्तव प्रियार्थं नरदेव युद्धे ।
वीरः शिखण्डी द्रौपदोऽसौ महात्मा
मयाभिगुप्तेन हतश्च तेन ॥ ८४
न चाभिनन्दामि तवाधिराज्यं
यतस्त्वमक्षेष्वहिताय सक्तः ।
स्वयं कृत्वा पापमनार्यजुष्ट-
मेभिर्युद्धे तर्तुमिच्छस्यरींस्तु ॥ ८५
अक्षेषु दोषा बहवो विधर्माः
श्रुतास्त्वया सहदेवोऽब्रवीद्यान् ।
तान्नैषि संतर्तुमसाधुजुष्टा-
न्येन स्म सर्वे निरयं प्रपन्नाः ॥ ८६
त्वं देविता त्वत्कृते राज्यनाश-
स्त्वत्संभवं व्यसनं नो नरेन्द्र ।
मास्मान्क्रूरैर्वाक्प्रतोदैस्तुद त्वं
भूयो राजन्कोपयन्नल्पभाग्यान् ॥ ८७
एता वाचः परुषाः सव्यसाची

स्थिरप्रज्ञं श्रावयित्वा ततश्च ।
तदानुतेपे सुरराजपुत्रो
विनिःश्वसंश्चाप्यसिमुद्बबर्ह ॥ ८८
तमाह कृष्णः किमिदं पुनर्भवा-
न्विकोशमाकाशनिभं करोत्यसिम् ।
प्रब्रूहि सत्यं पुनरुत्तरं विधे-
र्वचः प्रवक्ष्याम्यहमर्थसिद्धये ॥ ८९
इत्येव पृष्टः पुरुषोत्तमेन
सुदुःखितः केशवमाह वाक्यम् ।
अहं हनिष्ये स्वशरीरमेव
प्रसह्य येनाहितमाचरं वै ॥ ९०
निशम्य तत्पार्थवचोऽब्रवीदिदं
धनंजयं धर्मभृतां वरिष्ठः ।
प्रब्रूहि पार्थ स्वगुणानिहात्मन-
स्तथा स्वहार्दं भवतीह सद्यः ॥ ९१
तथास्तु कृष्णेत्यभिनन्द्य वाक्यं
धनंजयः प्राह धनुर्विनाम्य ।
युधिष्ठिरं धर्मभृतां वरिष्ठं
शृणुष्व राजन्निति शक्रसूनुः ॥ ९२
न मादृशोऽन्यो नरदेव विद्यते
धनुर्धरो देवमृते पिनाकिनम् ।
अहं हि तेनानुमतो महात्मना
क्षणेन हन्यां सचराचरं जगत् ॥ ९३
मया हि राजन्सदिगीश्वरा दिशो
विजित्य सर्वा भवतः कृता वशे ।
स राजसूयश्च समाप्तदक्षिणः
सभा च दिव्या भवतो ममौजसा ॥ ९४
पाणौ पृषत्का लिखिता ममेमे
धनुश्च संख्ये विततं सबाणम् ।
पादौ च मे सशरौ सध्वजौ
न मादृशं युद्धगतं जयन्ति ॥ ९५
हता उदीच्या निहताः प्रतीच्याः
प्राच्या निरस्ता दाक्षिणात्या विशस्ताः ।
संशप्तकानां किंचिदेवावशिष्टं
सर्वस्य सैन्यस्य हतं मयार्धम् ॥ ९६
शेते मया निहता भारती च
चमू राजन्देवचमूप्रकाशा ।
ये नास्त्रज्ञास्तानहं हन्मि शस्त्रै-
स्तस्माल्लोकं नेह करोमि भस्मसात् ॥ ९
इत्येवमुक्त्वा पुनराह पार्थो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ।
अप्यपुत्रा तेन राधा भवित्री
कुन्ती मया वा तद्वतं विद्धि राजन् ।
प्रसीद राजन्क्षम यन्मयोक्तं
काले भवान्वेत्स्यति तन्नमस्ते ॥ ९८
प्रसाद्य राजानममित्रसाहं
स्थितोऽब्रवीच्चैनमभिप्रपन्नः ।
याम्येष भीमं समरात्प्रमोक्तुं
सर्वात्मना सूतपुत्रं च हन्तुम् ॥ ९९
तव प्रियार्थं मम जीवितं हि
ब्रवीमि सत्यं तदवेहि राजन् ।
इति प्रायादुपसंगृह्य पादौ
समुत्थितो दीप्ततेजाः किरीटी ।
नेदं चिरात्क्षिप्रमिदं भविष्य-
त्यावर्ततेऽसावभियामि चैनम् ॥ १००
एतच्छ्रुत्वा पाण्डवो धर्मराजो
भ्रातुर्वाक्यं परुषं फल्गुनस्य ।
उत्थाय तस्माच्छयनादुवाच
पार्थं ततो दुःखपरीतचेताः ॥ १०१
कृतं मया पार्थ यथा न साधु

येन प्राप्तं व्यसनं वः सुघोरम् ।
तस्माच्छिरश्छिन्द्धि ममेदमद्य
कुलान्तकस्याधमपूरुषस्य ॥ १०२
पापस्य पापव्यसनान्वितस्य
विमूढबुद्धेरलसस्य भीरोः ।
वृद्धावमन्तुः परुषस्य चैव
किं ते चिरं मामनुवृत्य रूक्षम् ॥ १०३
गच्छाम्यहं वनमेवाद्य पापः
सुखं भवान्वर्ततां मद्विहीनः ।
योग्यो राजा भीमसेनो महात्मा
क्लीबस्य वा मम किं राज्यकृत्यम् ॥ १०४
न चास्मि शक्तः परुषाणि सोढुं
पुनस्तवेमानि रुषान्वितस्य ।
भीमोऽस्तु राजा मम जीवितेन
किं कार्यमद्यावमतस्य वीर ॥ १०५
इत्येवमुक्त्वा सहसोत्पपात
राजा ततस्तच्छयनं विहाय ।
इयेष निर्गन्तुमथो वनाय
तं वासुदेवः प्रणतोऽभ्युवाच ॥ १०६
राजन्विदितमेतत्ते यथा गाण्डीवधन्वनः ।
प्रतिज्ञा सत्यसंधस्य गाण्डीवं प्रति विश्रुता ॥१०७
ब्रूयाद्य एवं गाण्डीवं देह्यन्यस्मै त्वमित्युत ।
स वध्योऽस्य पुमाँल्लोके त्वया चोक्तोऽयमीदृशम् ॥
अतः सत्यां प्रतिज्ञां तां पार्थेन परिरक्षता ।
मच्छन्दादवमानोऽयं कृतस्तव महीपते ।
गुरूणामवमानो हि वध इत्यभिधीयते ॥ १०९
तस्मात्त्वं वै महाबाहो मम पार्थस्य चोभयोः ।
व्यतिक्रममिमं राजन्संक्षमस्वार्जुनं प्रति ॥ ११०
शरणं त्वां महाराज प्रपन्नौ स्व उभावपि ।
क्षन्तुमर्हसि मे राजन्प्रणतस्याभियाचतः ॥ १११
राधेयस्याद्य पापस्य भूमिः पास्यति शोणितम् ।
सत्यं ते प्रतिजानामि हतं विद्ध्यद्य सूतजम् ।
यस्येच्छसि वधं तस्य गतमेवाद्य जीवितम् ॥११२
इति कृष्णवचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
ससंभ्रमं हृषीकेशमुत्थाप्य प्रणतं तदा ।
कृताञ्जलिमिदं वाक्यमुवाचानन्तरं वचः ॥ ११३
एवमेतद्यथात्थ त्वमस्त्येषोऽतिक्रमो मम ।
अनुनीतोऽस्मि गोविन्द तारितश्चाद्य माधव ।
मोक्षिता व्यसनाद्घोराद्वयमद्य त्वयाच्युत ॥ ११४
भवन्तं नाथमासाद्य आवां व्यसनसागरात् ।
घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ ॥ ११५
त्वद्बुद्धिप्लवमासाद्य दुःखशोकार्णवाद्वयम् ।
समुत्तीर्णाः सहामात्याः सनाथाः स्म त्वयाच्युत ॥

इति श्रीमहाभारते कर्णपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

संजय उवाच ।

इति स्म कृष्णवचनात्प्रत्युच्चार्य युधिष्ठिरम् ।
बभूव विमनाः पार्थः किंचित्कृत्वेव पातकम् ॥ १
ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम् ।
कथं नाम भवेदेतद्यदि त्वं पार्थ धर्मजम् ।
असिना तीक्ष्णधारेण हन्या धर्मे व्यवस्थितम् ॥ २
त्वमित्युक्त्वैव राजानमेवं कश्मलमाविशः ।
हत्वा तु नृपतिं पार्थ अकरिष्यः किमुत्तरम् ।
एवं सुदुर्विदो धर्मो मन्दप्रज्ञैर्विशेषतः ॥ ३
स भवान्धर्मभीरुत्वाद्ध्रुवमैष्यन्महत्तमः ।
नरकं घोररूपं च भ्रातुर्ज्येष्ठस्य वै वधात् ॥ ४
स त्वं धर्मभृतां श्रेष्ठं राजानं धर्मसंहितम् ।
प्रसादय कुरुश्रेष्ठमेतदत्र मतं मम ॥ ५
प्रसाद्य भक्त्या राजानं प्रीतं चैव युधिष्ठिरम् ।

प्रयामस्त्वरिता योद्धुं सूतपुत्ररथं प्रति ॥ ६
हत्वा सुदुर्जयं कर्णं त्वमद्य निशितैः शरैः ।
विपुलां प्रीतिमाधत्स्व धर्मपुत्रस्य मानद ॥ ७
एतदत्र महाबाहो प्राप्तकालं मतं मम ।
एवं कृते कृतं चैव तव कार्यं भविष्यति ॥ ८
ततोऽर्जुनो महाराज लज्जया वै समन्वितः ।
धर्मराजस्य चरणौ प्रपेदे शिरसानघ ॥ ९
उवाच भरतश्रेष्ठ प्रसीदेति पुनः पुनः ।
क्षमस्व राजन्यत्प्रोक्तं धर्मकामेन भीरुणा ॥ १०
पादयोः पतितं दृष्ट्वा धर्मराजो युधिष्ठिरः ।
धनंजयममित्रघ्नं रुदन्तं भरतर्षभ ॥ ११
उत्थाप्य भ्रातरं राजा धर्मराजो धनंजयम् ।
समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः ॥ १२
रुदित्वा तु चिरं कालं भ्रातरौ सुमहाद्युती ।
कृतशौचौ नरव्याघ्रौ प्रीतिमन्तौ बभूवतुः ॥ १३
तत आश्लिष्य स प्रेम्णा मूर्ध्नि चाघ्राय पाण्डवम् ।
प्रीत्या परमया युक्तः प्रस्मयंश्चाब्रवीज्जयम् ॥ १४
कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः ।
कवचं च ध्वजश्चैव धनुः शक्तिर्हया गदा ।
शरैः कृत्ता महेष्वास यतमानस्य संयुगे ॥ १५
सोऽहं ज्ञात्वा रणे तस्य कर्म दृष्ट्वा च फल्गुन ।
व्यवसीदामि दुःखेन न च मे जीवितं प्रियम् ॥
तमद्य यदि वै वीर न हनिष्यसि सूतजम् ।
प्राणानेव परित्यक्ष्ये जीवितार्थो हि को मम ॥१७
एवमुक्तः प्रत्युवाच विजयो भरतर्षभ ।
सत्येन ते शपे राजन्प्रसादेन तवैव च ।
भीमेन च नरश्रेष्ठ यमाभ्यां च महीपते ॥ १८
यथाद्य समरे कर्णं हनिष्यामि हतोऽथ वा ।
महीतले पतिष्यामि सत्येनायुधमालभे ॥ १९
एवमाभाष्य राजानमब्रवीन्माधवं वचः ।
अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः ।
तदनुध्याहि भद्रं ते वधं तस्य दुरात्मनः ॥ २०
एवमुक्तोऽब्रवीत्पार्थं केशवो राजसत्तम ।
शक्तोऽस्मि भरतश्रेष्ठ यत्नं कर्तुं यथाबलम् ॥ २१
एवं चापि हि मे कामो नित्यमेव महारथ ।
कथं भवान्रणे कर्णं निहन्यादिति मे मतिः ॥ २२
भूयश्चोवाच मतिमान्माधवो धर्मनन्दनम् ।
युधिष्ठिरेमं बीभत्सुं त्वं सान्त्वयितुमर्हसि ।
अनुज्ञातुं च कर्णस्य वधायाद्य दुरात्मनः ॥ २३
श्रुत्वा ह्ययमहं चैव त्वां कर्णशरपीडितम् ।
प्रवृत्तिं ज्ञातुमायाताविह पाण्डवनन्दन ॥ २४
दिष्ट्यासि राजन्निरुजो दिष्ट्या न ग्रहणं गतः ।
परिसान्त्वय बीभत्सुं जयमाशाधि चानघ ॥ २५

युधिष्ठिर उवाच ।

एह्येहि पार्थ बीभत्सो मां परिष्वज पाण्डव ।
वक्तव्यमुक्तोऽस्म्यहितं त्वया क्षान्तं च तन्मया ॥ २६
अहं त्वामनुजानामि जहि कर्णं धनंजय ।
मन्युं च मा कृथाः पार्थ यन्मयोक्तोऽसि दारुणम् ॥

संजय उवाच ।

ततो धनंजयो राजञ्शिरसा प्रणतस्तदा ।
पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष ॥ २८
समुत्थाप्य ततो राजा परिष्वज्य च पीडितम् ।
मूर्ध्न्युपाघ्राय चैवैनमिदं पुनरुवाच ह ॥ २९
धनंजय महाबाहो मानितोऽस्मि दृढं त्वया ।
माहात्म्यं विजयं चैव भूयः प्राप्नुहि शाश्वतम् ॥३०

अर्जुन उवाच ।

अद्य तं पापकर्माणं सानुबन्धं रणे शरैः ।
नयाम्यन्तं समासाद्य राधेयं बलगर्वितम् ॥ ३१
येन त्वं पीडितो बाणैर्दृढमायम्य कार्मुकम् ।
तस्याद्य कर्मणः कर्णः फलं प्राप्स्यति दारुणम् ॥३२

अद्य त्वामहमेष्यामि कर्णं हत्वा महीपते ।
सभाजयितुमाक्रन्दादिति सत्यं ब्रवीमि ते ॥ ३३
नाहत्वा विनिवर्तेऽहं कर्णमद्य रणाजिरात् ।
इति सत्येन ते पादौ स्पृशामि जगतीपते ॥ ३४

संजय उवाच ।

प्रसाद्य धर्मराजानं प्रहृष्टेनान्तरात्मना ।
पार्थः प्रोवाच गोविन्दं सूतपुत्रवधोद्यतः ॥ ३५
कल्प्यतां च रथो भूयो युज्यन्तां च हयोत्तमाः ।
आयुधानि च सर्वाणि सज्ज्यन्तां वै महारथे ॥३६
उपावृत्ताश्च तुरगाः शिक्षिताश्चाश्वसादिनः ।
रथोपकरणैः सर्वैरुपायान्तु त्वरान्विताः ॥ ३७
एवमुक्ते महाराज फल्गुनेन महात्मना ।
उवाच दारुकं कृष्णः कुरु सर्वं यथाब्रवीत् ।
अर्जुनो भरतश्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ॥ ३८
आज्ञप्तस्त्वथ कृष्णेन दारुको राजसत्तम ।
योजयामास स रथं वैयाघ्रं शत्रुतापनम् ॥ ३९
युक्तं तु रथमास्थाय दारुकेण महात्मना ।
आपृच्छ्य धर्मराजानं ब्राह्मणान्स्वस्ति वाच्य च ।
समङ्गलस्वस्त्ययनमारुरोह रथोत्तमम् ॥ ४०
तस्य राजा महाप्राज्ञो धर्मराजो युधिष्ठिरः ।
आशिषोऽयुङ्क्त परमा युक्ताः कर्णवधं प्रति ॥ ४१
तं प्रयान्तं महेष्वासं दृष्ट्वा भूतानि भारत ।
निहतं मेनिरे कर्णं पाण्डवेन महात्मना ॥ ४२
बभूवुर्विमलाः सर्वा दिशो राजन्समन्ततः ।
चाषाश्च शतपत्राश्च क्रौञ्चाश्चैव जनेश्वर ।
प्रदक्षिणमकुर्वन्त तदा वै पाण्डुनन्दनम् ॥ ४३
बहवः पक्षिणो राजन्पुंनामानः शुभाः शिवाः ।
त्वरयन्तोऽर्जुनं युद्धे हृष्टरूपा ववाशिरे ॥ ४४
कङ्का गृध्रा वडाश्चैव वायसाश्च विशां पते ।
अग्रतस्तस्य गच्छन्ति भक्ष्यहेतोर्भयानकाः ॥ ४५
निमित्तानि च धन्यानि पार्थस्य प्रशशंसिरे ।
विनाशमरिसैन्यानां कर्णस्य च वधं तथा ॥ ४६
प्रयातस्याथ पार्थस्य महान्स्वेदो व्यजायत ।
चिन्ता च विपुला जज्ञे कथं न्वेतद्भविष्यति ॥४७
ततो गाण्डीवधन्वानमब्रवीन्मधुसूदनः ।
दृष्ट्वा पार्थं तदायस्तं चिन्तापरिगतं तदा ॥ ४८
गाण्डीवधन्वन्संग्रामे ये त्वया धनुषा जिताः ।
न तेषां मानुषो जेता त्वदन्य इह विद्यते ॥ ४९
दृष्टा हि बहवः शूराः शक्रतुल्यपराक्रमाः ।
त्वां प्राप्य समरे वीरं ये गताः परमां गतिम् ॥५०
को हि द्रोणं च भीष्मं च भगदत्तं च मारिष ।
विन्दानुविन्दावावन्त्यौ काम्बोजं च सुदक्षिणम् ॥
श्रुतायुषं महावीर्यमच्युतायुषमेव च ।
प्रत्युद्गम्य भवेत्क्षेमी यो न स्यात्त्वमिव क्षमी ॥५२
तव ह्यस्त्राणि दिव्यानि लाघवं बलमेव च ।
वेधः पातश्च लक्षश्च योगश्चैव तवार्जुन ।
असंमोहश्च युद्धेषु विज्ञानस्य च संनतिः ॥ ५३
भवान्देवासुरान्सर्वान्हन्यात्सहचराचरान् ।
पृथिव्यां हि रणे पार्थ न योद्धा त्वत्समः पुमान् ॥५४
धनुर्ग्रहा हि ये केचित्क्षत्रिया युद्धदुर्मदाः ।
आ देवात्त्वत्समं तेषां न पश्यामि शृणोमि वा ॥
ब्रह्मणा च प्रजाः सृष्टा गाण्डीवं च महाद्भुतम् ।
येन त्वं युध्यसे पार्थ तस्मान्नास्ति त्वया समः ॥५६
अवश्यं तु मया वाच्यं यत्पथ्यं तव पाण्डव ।
मावमंस्था महाबाहो कर्णमाहवशोभिनम् ॥ ५७
कर्णो हि बलवान्धृष्टः कृतास्त्रश्च महारथः ।
कृती च चित्रयोधी च देशे काले च कोविदः ॥५८
तेजसा वह्निसदृशो वायुवेगसमो जवे ।
अन्तकप्रतिमः क्रोधे सिंहसंहननो बली ॥ ५९
अयोरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः ।

अतिमानी च शूरश्च प्रवीरः प्रियदर्शनः ॥ ६०
सर्वैर्योधगुणैर्युक्तो मित्राणामभयंकरः ।
सततं पाण्डवद्वेषी धार्तराष्ट्रहिते रतः ॥ ६१
सर्वैरवध्यो राधेयो देवैरपि सवासवैः ।
ऋते त्वामिति मे बुद्धिस्त्वमद्य जहि सूतजम् ॥६२
देवैरपि हि संयत्तैर्बिभ्रद्भिर्मांसशोणितम् ।
अशक्यः समरे जेतुं सर्वैरपि युयुत्सुभिः ॥ ६३
दुरात्मानं पापमतिं नृशंसं
दुष्टप्रज्ञं पाण्डवेयेषु नित्यम् ।
हीनस्वार्थं पाण्डवेयैर्विरोधे
हत्वा कर्णं धिष्ठितार्थो भवाद्य ॥ ६४
वीरं मन्यत आत्मानं येन पापः सुयोधनः ।
तमद्य मूलं पापानां जय सौतिं धनंजय ॥ ६५

इति श्रीमहाभारते कर्णपर्वणि
पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

संजय उवाच ।

ततः पुनरमेयात्मा केशवोऽर्जुनमब्रवीत् ।
कृतसंकल्पमायस्तं वधे कर्णस्य सर्वशः ॥ १
अद्य सप्तदशाहानि वर्तमानस्य भारत ।
विनाशस्यातिघोरस्य नरवारणवाजिनाम् ॥ २
भूत्वा हि विपुला सेना तावकानां परैः सह ।
अन्योन्यं समरे प्राप्य किंचिच्छेषा विशां पते ॥३
भूत्वा हि कौरवाः पार्थ प्रभूतगजवाजिनः ।
त्वां वै शत्रुं समासाद्य विनष्टा रणमूर्धनि ॥ ४
एते च सर्वे पाञ्चालाः सृञ्जयाश्च सहान्वयाः ।
त्वां समासाद्य दुर्धर्षं पाण्डवाश्च व्यवस्थिताः ॥ ५
पाञ्चालैः पाण्डवैर्मत्स्यैः कारूषैश्चेदिकेकयैः ।
त्वया गुप्तैरमित्रघ्न कृतः शत्रुगणक्षयः ॥ ६
को हि शक्तो रणे जेतुं कौरवांस्तात संगतान् ।
अन्यत्र पाण्डवान्युद्धे त्वया गुप्तान्महारथान् ॥ ७
त्वं हि शक्तो रणे जेतुं ससुरासुरमानुषान् ।
त्रीँल्लोकान्सममुद्युक्तान्किं पुनः कौरवं बलम् ॥ ८
भगदत्तं हि राजानं कोऽन्यः शक्तस्त्वया विना ।
जेतुं पुरुषशार्दूल योऽपि स्याद्वासवोपमः ॥ ९
तथेमां विपुलां सेनां गुप्तां पार्थ त्वयानघ ।
न शेकुः पार्थिवाः सर्वे चक्षुर्भिरभिवीक्षितुम् ॥१०
तथैव सततं पार्थ रक्षिताभ्यां त्वया रणे ।
धृष्टद्युम्नशिखण्डिभ्यां भीष्मद्रोणौ निपातितौ ॥११
को हि शक्तो रणे पार्थ पाञ्चालानां महारथौ ।
भीष्मद्रोणौ युधा जेतुं शक्रतुल्यपराक्रमौ ॥ १२
को हि शांतनवं संख्ये द्रोणं वैकर्तनं कृपम् ।
द्रौणिं च सौमदत्तिं च कृतवर्माणमेव च ।
सैन्धवं मद्रराजं च राजानं च सुयोधनम् ॥ १३
वीरान्कृतास्त्रान्समरे सर्वानेवानुवर्तिनः ।
अक्षौहिणीपतीनुग्रान्संरब्धान्युद्धदुर्मदान् ॥ १४
श्रेण्यश्च बहुलाः क्षीणाः प्रदीर्णाश्वरथद्विपाः ।
नानाजनपदाश्चोग्राः क्षत्रियाणाममर्षिणाम् ॥ १५
गोवासदासमीयानां वसातीनां च भारत ।
व्रात्यानां वाटधानानां भोजानां चापि मानिनाम् ॥
उदीर्णाश्च महासेना ब्रह्मक्षत्रस्य भारत ।
त्वां समासाद्य निधनं गताः साश्वरथद्विपाः ॥ १७
उग्राश्च क्रूरकर्माणस्तुखारा यवनाः खशाः ।
दार्वाभिसारा दरदाः शका रमठतङ्गणाः ॥ १८
अन्ध्रकाश्च पुलिन्दाश्च किराताश्चोग्रविक्रमाः ।
म्लेच्छाश्च पार्वतीयाश्च सागरानूपवासिनः ।
संरम्भिणो युद्धशौण्डा बलिनो दृढपाणयः ॥ १९
एते सुयोधनस्यार्थे संरब्धाः कुरुभिः सह ।
न शक्या युधि निर्जेतुं त्वदन्येन परंतप ॥ २०
धार्तराष्ट्रमुदग्रं हि व्यूढं दृष्ट्वा महाबलम् ।

यस्य त्वं न भवेस्त्राता प्रतीयात्को नु मानवः ॥ २१
तत्सागरमिवोद्भूतं रजसा संवृतं बलम् ।
विदार्य पाण्डवैः क्रुद्धैस्त्वया गुप्तैर्हतं विभो ॥ २२
मागधानामधिपतिर्जयत्सेनो महाबलः ।
अद्य सप्तैव चाहानि हतः संख्येऽभिमन्युना ॥ २३
ततो दश सहस्राणि गजानां भीमकर्मणाम् ।
जघान गदया भीमस्तस्य राज्ञः परिच्छदम् ।
ततोऽन्येऽपि हता नागा रथाश्च शतशो बलात् ॥ २४
तदेवं समरे तात वर्तमाने महाभये ।
भीमसेनं समासाद्य त्वां च पाण्डव कौरवाः ।
सवाजिरथनागाश्च मृत्युलोकमितो गताः ॥ २५
तथा सेनामुखे तत्र निहते पार्थ पाण्डवैः ।
भीष्मः प्रासृजदुग्राणि शरवर्षाणि मारिष ॥ २६
स चेदिकाशिपाञ्चालान्करूषान्मत्स्यकेकयान् ।
शरैः प्रच्छाद्य निधनमनयत्परुषास्त्रवित् ॥ २७
तस्य चापच्युतैर्बाणैः परदेहविदारणैः ।
पूर्णमाकाशमभवद्रुक्मपुङ्खैरजिह्मगैः ॥ २८
गत्वा दशम्या ते गत्वा जघ्नुर्वाजिरथद्विपान् ।
हित्वा नव गतीर्दुष्टाः स बाणान्व्यायतोऽमुचत् ॥
दिनानि दश भीष्मेण निघ्नता तावकं बलम् ।
शून्याः कृता रथोपस्था हताश्च गजवाजिनः ॥ ३०
दर्शयित्वात्मनो रूपं रुद्रोपेन्द्रसमं युधि ।
पाण्डवानामनीकानि प्रविगाह्य व्यशातयत् ॥ ३१
विनिघ्नन्पृथिवीपालांश्चेदिपाञ्चालकेकयान् ।
व्यदहत्पाण्डवीं सेनां नराश्वगजसंकुलाम् ॥ ३२
मज्जन्तमप्लवे मन्दमुज्जिहीर्षुः सुयोधनम् ।
तथा चरन्तं समरे तपन्तमिव भास्करम् ।
न शेकुः सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः ॥ ३३
विचरन्तं तथा तं तु संग्रामे जितकाशिनम् ।
सर्वोद्योगेन सहसा पाण्डवाः समुपाद्रवन् ॥ ३४
स तु विद्राव्य समरे पाण्डवान्सृञ्जयानपि ।
एक एव रणे भीष्म एकवीरत्वमागतः ॥ ३५
तं शिखण्डी समासाद्य त्वया गुप्तो महारथम् ।
जघान पुरुषव्याघ्रं शरैः संनतपर्वभिः ॥ ३६
स एष पतितः शेते शरतल्पे पितामहः ।
त्वां प्राप्य पुरुषव्याघ्र गृध्रः प्राप्येव वायसम् ॥ ३७
द्रोणः पञ्च दिनान्युग्रो विधम्य रिपुवाहिनीः ।
कृत्वा व्यूहं महायुद्धे पातयित्वा महारथान् ॥ ३८
जयद्रथस्य समरे कृत्वा रक्षां महारथः ।
अन्तकप्रतिमश्चोग्रां रात्रिं युद्धादहत्प्रजाः ॥ ३९
अद्येति द्वे दिने वीरो भारद्वाजः प्रतापवान् ।
धृष्टद्युम्नं समासाद्य स गतः परमां गतिम् ॥ ४०
यदि चैव परान्युद्धे सूतपुत्रमुखान्रथान् ।
नावारयिष्यः संग्रामे न स्म द्रोणो व्यनङ्क्ष्यत ॥ ४१
भवता तु बलं सर्वं धार्तराष्ट्रस्य वारितम् ।
ततो द्रोणो हतो युद्धे पार्षतेन धनंजय ॥ ४२
क इवान्यो रणे कुर्यात्त्वदन्यः क्षत्रियो युधि ।
यादृशं ते कृतं पार्थ जयद्रथवधं प्रति ॥ ४३
निवार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान् ।
निहतः सैन्धवो राजा त्वयास्त्रबलतेजसा ॥ ४४
आश्चर्यं सिन्धुराजस्य वधं जानन्ति पार्थिवाः ।
अनाश्चर्यं हि तत्त्वत्तस्त्वं हि पार्थ महारथः ॥ ४५
त्वां हि प्राप्य रणे क्षत्रमेकाहादिति भारत ।
तप्यमानमसंयुक्तं न भवेदिति मे मतिः ॥ ४६
सेयं पार्थ चमूर्घोरा धार्तराष्ट्रस्य संयुगे ।
हता ससर्ववीरा हि भीष्मद्रोणौ यदा हतौ ॥ ४७
शीर्णप्रवरयोधाद्य हतवाजिनरद्विपा ।
हीना सूर्येन्दुनक्षत्रैर्द्यौरिवाभाति भारती ॥ ४८
विध्वस्ता हि रणे पार्थ सेनेयं भीमविक्रमात् ।
आसुरीव पुरा सेना शक्रस्येव पराक्रमैः ॥ ४९

तेषां हतावशिष्टास्तु पञ्च सन्ति महारथाः ।
अश्वत्थामा कृतवर्मा कर्णो मद्राधिपः कृपः ॥ ५०
तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान् ।
हतामित्रः प्रयच्छोर्वीं राज्ञः सद्वीपपत्तनाम् ॥ ५१
साकाशजलपातालां सपर्वतमहावनाम् ।
प्राप्नोत्वमितवीर्यश्रीरद्य पार्थो वसुंधराम् ॥ ५२
एतां पुरा विष्णुरिव हत्वा दैतेयदानवान् ।
प्रयच्छ मेदिनीं राज्ञे शक्रायेव यथा हरिः ॥ ५३
अद्य मोदन्तु पाञ्चाला निहतेष्वरिषु त्वया ।
विष्णुना निहतेष्वेव दानवेयेषु देवताः ॥ ५४
यदि वा द्विपदां श्रेष्ठ द्रोणं मानयतो गुरुम् ।
अश्वत्थाम्नि कृपा तेऽस्ति कृपे चाचार्यगौरवात् ॥५५
अत्यन्तोपचितान्वा त्वं मानयन्भ्रातृबान्धवान् ।
कृतवर्माणमासाद्य न नेष्यसि यमक्षयम् ॥ ५६
भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम् ।
यदि त्वमरविन्दाक्ष दयावान्न जिघांससि ॥ ५७
इमं पापमतिं क्षुद्रमत्यन्तं पाण्डवान्प्रति ।
कर्णमद्य नरश्रेष्ठ जह्याशु निशितैः शरैः ॥ ५८
एतत्ते सुकृतं कर्म नात्र किंचिन्न युज्यते ।
वयमप्यत्र जानीमो नात्र दोषोऽस्ति कश्चन ॥ ५९
दहने यत्सपुत्राया निशि मातुस्तवानघ ।
द्यूतार्थे यच्च युष्मासु प्रावर्तत सुयोधनः ।
तत्र सर्वत्र दुष्टात्मा कर्णो मूलमिहार्जुन ॥ ६०
कर्णाद्धि मन्यते त्राणं नित्यमेव सुयोधनः ।
ततो मामपि संरब्धो निग्रहीतुं प्रचक्रमे ॥ ६१
स्थिरा बुद्धिर्नरेन्द्रस्य धार्तराष्ट्रस्य मानद ।
कर्णः पार्थान्रणे सर्वान्विजेष्यति न संशयः ॥६२
कर्णमाश्रित्य कौन्तेय धार्तराष्ट्रेण विग्रहः ।
रोचितो भवता सार्धं जानतापि बलं तव ॥ ६३
कर्णो हि भाषते नित्यमहं पार्थान्समागतान् ।
वासुदेवं सराजानं विजेष्यामि महारणे ॥ ६४
प्रोत्साहयन्दुरात्मानं धार्तराष्ट्रं सुदुर्मतिः ।
समितौ गर्जते कर्णस्तमद्य जहि भारत ॥ ६५
यच्च युष्मासु पापं वै धार्तराष्ट्रः प्रयुक्तवान् ।
तत्र सर्वत्र दुष्टात्मा कर्णः पापमतिर्मुखम् ॥ ६६
यच्च तद्धार्तराष्ट्राणां क्रूरैः षड्भिर्महारथैः ।
अपश्यं निहतं वीरं सौभद्रमृषभेक्षणम् ॥ ६७
द्रोणद्रौणिकृपान्वीरान्कम्पयन्तो महारथान् ।
निर्मनुष्यांश्च मातङ्गान्विरथांश्च महारथान् ॥ ६८
व्यश्वारोहांश्च तुरगान्पत्तीन्व्यायुधजीवितान् ।
कुर्वन्तमृषभस्कन्धं कुरुवृष्णियशस्करम् ॥ ६९
विधमन्तमनीकानि व्यथयन्तं महारथान् ।
मनुष्यवाजिमातङ्गान्प्रहिण्वन्तं यमक्षयम् ॥ ७०
शरैः सौभद्रमायस्तं दहन्तमिव वाहिनीम् ।
तन्मे दहति गात्राणि सखे सत्येन ते शपे ॥ ७१
यत्तत्रापि च दुष्टात्मा कर्णोऽभ्यद्रुह्यत प्रभो ।
अशक्नुवंश्चाभिमन्योः कर्णः स्थातुं रणेऽग्रतः ॥ ७२
सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः ।
निःश्वसन्क्रोधसंदीप्तो विमुखः सायकार्दितः ॥ ७३
अपयानकृतोत्साहो निराशश्चापि जीविते ।
तस्थौ सुविह्वलः संख्ये प्रहारजनितश्रमः ॥ ७४
अथ द्रोणस्य समरे तत्कालसदृशं तदा ।
श्रुत्वा कर्णो वचः क्रूरं ततश्चिच्छेद कार्मुकम् ॥७५
ततश्छिन्नायुधं तेन रणे पञ्च महारथाः ।
स चैव निकृतिप्रज्ञः प्रावधीच्छरवृष्टिभिः ॥ ७६
यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः ।
प्रमुखे पाण्डवेयानां कुरूणां च नृशंसवत् ॥ ७७
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं पृथुश्रोणि वृणीष्व मितभाषिणि ॥ ७८
लेखाभ्रु धृतराष्ट्रस्य दासी भूत्वा निवेशनम् ।

अविशालपक्ष्माक्षि न सन्ति पतयस्तव ॥ ७९
श्रुत्वानधर्मज्ञस्तदा परमदुर्मतिः ।
पापः पापं वचः कर्णः शृण्वतस्तव भारत ॥ ८०
तस्य पापस्य तद्वाक्यं सुवर्णविकृताः शराः ।
शमयन्तु शिलाधौतास्त्वयास्ता जीवितच्छिदः ॥८१
यानि चान्यानि दुष्टात्मा पापानि कृतवांस्त्वयि ।
तान्यद्य जीवितं चास्य शमयन्तु शरास्तव ॥ ८२
गाण्डीवप्रहितान्घोरानद्य गात्रैः स्पृशञ्शरान् ।
कर्णः स्मरतु दुष्टात्मा वचनं द्रोणभीष्मयोः ॥ ८३
सुवर्णपुङ्खा नाराचाः शत्रुघ्ना वैद्युतप्रभाः ।
त्वयास्तास्तस्य मर्माणि भित्त्वा पास्यन्ति शोणितम् ॥
उग्रास्त्वद्भुजनिर्मुक्ता मर्म भित्त्वा शिताः शराः ।
अद्य कर्णं महावेगाः प्रेषयन्तु यमक्षयम् ॥ ८५
अद्य हाहाकृता दीना विषण्णास्त्वच्छरार्दिताः ।
प्रपतन्तं रथात्कर्णं पश्यन्तु वसुधाधिपाः ॥ ८६
अद्य स्वशोणिते मग्नं शयानं पतितं भुवि ।
अपविद्धायुधं कर्णं पश्यन्तु सुहृदो निजाः ॥ ८७
हस्तिकक्ष्यो महानस्य भल्लेनोन्मथितस्त्वया ।
प्रकम्पमानः पततु भूमावाधिरथेर्ध्वजः ॥ ८८
त्वया शरशतैश्छिन्नं रथं हेमविभूषितम् ।
हतयोधं समुत्सृज्य भीतः शल्यः पलायताम् ॥८९
ततः सुयोधनो दृष्ट्वा हतमाधिरथिं त्वया ।
निराशो जीविते त्वद्य राज्ये चैव धनंजय ॥ ९०
एते द्रवन्ति पाञ्चाला वध्यमानाः शितैः शरैः ।
कर्णेन भरतश्रेष्ठ पाण्डवानुज्जिहीर्षवः ॥ ९१
पाञ्चालान्द्रौपदेयांश्च धृष्टद्युम्नशिखण्डिनौ ।
धृष्टद्युम्नतनूजांश्च शतानीकं च नाकुलिम् ॥ ९२
नकुलं सहदेवं च दुर्मुखं जनमेजयम् ।
सुवर्माणं सात्यकिं च विद्धि कर्णवशं गतान् ॥९३
अभ्याहतानां कर्णेन पाञ्चालानां महारणे ।
श्रूयते निनदो घोरस्त्वद्बन्धूनां परंतप ॥ ९४
न त्वेव भीताः पाञ्चालाः कथंचित्स्युः पराङ्मुखाः ।
न हि मृत्युं महेष्वासा गणयन्ति महारथाः ॥ ९५
यः एकः पाण्डवीं सेनां शरौघैः समवेष्टयत् ।
तं समासाद्य पाञ्चाला भीष्मं नासन्पराङ्मुखाः ॥९६
तथा ज्वलन्तमस्त्राग्निं गुरुं सर्वधनुष्मताम् ।
निर्दहन्तं समारोहन्दुर्धर्षं द्रोणमोजसा ॥ ९७
ते नित्यमुदिता जेतुं युद्धे शत्रूनरिंदमाः ।
न जात्वाधिरथेर्भीताः पाञ्चालाः स्युः पराङ्मुखाः ॥
तेषामापततां शूरः पाञ्चालानां तरस्विनाम् ।
आदत्तेऽसूञ्शरैः कर्णः पतंगानामिवानलः ॥ ९९
तांस्तथाभिमुखान्वीरान्मित्रार्थे त्यक्तजीवितान् ।
क्षयं नयति राधेयः पाञ्चालाञ्शतशो रणे ॥ १००
अस्त्रं हि रामात्कर्णेन भार्गवादृषिसत्तमात् ।
यदुपात्तं पुरा घोरं तस्य रूपमुदीर्यते ॥ १०१
तापनं सर्वसैन्यानां घोररूपं सुदारुणम् ।
समावृत्य महासेनां ज्वलति स्वेन तेजसा ॥ १०२
एते चरन्ति संग्रामे कर्णचापच्युताः शराः ।
भ्रमराणामिव व्रातास्तापयन्तः स्म तावकान् ॥१०३
एते चरन्ति पाञ्चाला दिक्षु सर्वासु भारत ।
कर्णास्त्रं समरे प्राप्य दुर्निवारमनात्मभिः ॥ १०४
एष भीमो दृढक्रोधो वृतः पार्थ समन्ततः ।
सृञ्जयैर्योधयन्कर्णं पीड्यते स्म शितैः शरैः ॥१०५
पाण्डवान्सृञ्जयांश्चैव पाञ्चालांश्चैव भारत ।
हन्यादुपेक्षितः कर्णो रोगो देहमिवाततः ॥ १०६
नान्यं त्वत्तोऽभिपश्यामि योधं यौधिष्ठिरे बले ।
यः समासाद्य राधेयं स्वस्तिमानाव्रजेद्गृहम् ॥१०७
तमद्य निशितैर्बाणैर्निहत्य भरतर्षभ ।
यथाप्रतिज्ञं पार्थ त्वं कृत्वा कीर्तिमवाप्नुहि ॥ १०८
त्वं हि शक्तो रणे जेतुं सकर्णानपि कौरवान् ।

नान्यो युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥१०९
एतत्कृत्वा महत्कर्म हत्वा कर्णं महारथम् ।
कृतार्थः सफलः पार्थ सुखी भव नरोत्तम ॥११०

इति श्रीमहाभारते कर्णपर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥

५२

संजय उवाच ।

स केशवस्य बीभत्सुः श्रुत्वा भारत भाषितम् ।
विशोकः संप्रहृष्टश्च क्षणेन समपद्यत ॥ १
ततो ज्यामनुमृज्याशु व्याक्षिपद्गाण्डिवं धनुः ।
दध्रे कर्णविनाशाय केशवं चाभ्यभाषत ॥ २
त्वया नाथेन गोविन्द ध्रुव एष जयो मम ।
प्रसन्नो यस्य मेऽद्य त्वं भूतभव्यभवत्प्रभुः ॥ ३
त्वत्सहायो ह्यहं कृष्ण त्रीँल्लोकान्वै समागतान् ।
प्रापयेयं परं लोकं किमु कर्णं महारणे ॥ ४
पश्यामि द्रवतीं सेनां पाञ्चालानां जनार्दन ।
पश्यामि कर्णं समरे विचरन्तमभीतवत् ॥ ५
भार्गवास्त्रं च पश्यामि विचरन्तं समन्ततः ।
सृष्टं कर्णेन वार्ष्णेय शक्रेणेव महाशनिम् ॥ ६
अयं खलु स संग्रामो यत्र कृष्ण मया कृतम् ।
कथयिष्यन्ति भूतानि यावद्भूमिर्धरिष्यति ॥ ७
अद्य कृष्ण विकर्णा मे कर्णं नेष्यन्ति मृत्यवे ।
गाण्डीवमुक्ताः क्षिण्वन्तो मम हस्तप्रचोदिताः ॥ ८
अद्य राजा धृतराष्ट्रः स्वां बुद्धिमवमंस्यते ।
दुर्योधनमराज्यार्हं यया राज्येऽभ्यषेचयत् ॥ ९
अद्य राज्यात्सुखाच्चैव श्रियो राष्ट्रात्तथा पुरात् ।
पुत्रेभ्यश्च महाबाहो धृतराष्ट्रो वियोक्ष्यते ॥ १०
अद्य दुर्योधनो राजा जीविताच्च निराशकः ।
भविष्यति हते कर्णे कृष्ण सत्यं ब्रवीमि ते ॥ ११
अद्य दृष्ट्वा मया कर्णं शरैर्विशकलीकृतम् ।
स्मरतां तव वाक्यानि शमं प्रति जनेश्वरः ॥ १२
अद्यासौ सौबलः कृष्ण ग्लहं जानातु वै शरान् ।
दुरोदरं च गाण्डीवं मण्डलं च रथं मम ॥ १३
योऽसौ रणे नरं नान्यं पृथिव्यामभिमन्यते ।
तस्याद्य सूतपुत्रस्य भूमिः पास्यति शोणितम् ।
गाण्डीवसृष्टा दास्यन्ति कर्णस्य परमां गतिम् ॥ १४
अद्य तप्स्यति राधेयः पाञ्चालीं यत्तदाब्रवीत् ।
सभामध्ये वचः क्रूरं कुत्सयन्पाण्डवान्प्रति ॥ १५
ये वै षण्ढतिलास्तत्र भवितारोऽद्य ते तिलाः ।
हते वैकर्तने कर्णे सूतपुत्रे दुरात्मनि ॥ १६
अहं वः पाण्डुपुत्रेभ्यस्त्रास्यामीति यदब्रवीत् ।
अनृतं तत्करिष्यन्ति मामका निशिताः शराः ॥१७
हन्ताहं पाण्डवान्सर्वान्सपुत्रानिति योऽब्रवीत् ।
तमद्य कर्णं हन्तास्मि मिषतां सर्वधन्विनाम् ॥ १८
यस्य वीर्ये समाश्वस्य धार्तराष्ट्रो बृहन्मनाः ।
अवामन्यत दुर्बुद्धिर्नित्यमस्मान्दुरात्मवान् ।
तमद्य कर्णं राधेयं हन्तास्मि मधुसूदन ॥ १९
अद्य कर्णे हते कृष्ण धार्तराष्ट्राः सराजकाः ।
विद्रवन्तु दिशो भीताः सिंहत्रस्ता मृगा इव ॥ २०
अद्य दुर्योधनो राजा पृथिवीमन्ववेक्षताम् ।
हते कर्णे मया संख्ये सपुत्रे ससुहृज्जने ॥ २१
अद्य कर्णं हतं दृष्ट्वा धार्तराष्ट्रोऽत्यमर्षणः ।
जानातु मां रणे कृष्ण प्रवरं सर्वधन्विनाम् ॥ २२
अद्याहमनृणः कृष्ण भविष्यामि धनुर्भृताम् ।
क्रोधस्य च कुरूणां च शराणां गाण्डिवस्य च ॥२३
अद्य दुःखमहं मोक्ष्ये त्रयोदशसमार्जितम् ।
हत्वा कर्णं रणे कृष्ण शम्बरं मघवानिव ॥ २४
अद्य कर्णे हते युद्धे सोमकानां महारथाः ।
कृतं कार्यं च मन्यन्तां मित्रकार्येप्सवो युधि ॥ २५
न जाने च कथं प्रीतिः शैनेयस्याद्य माधव ।

भविष्यति हते कर्णे मयि चापि जयाधिके ॥ २६
अद्य हत्वा रणे कर्णं पुत्रं चास्य महारथम् ।
प्रीतिं दास्यामि भीमस्य यमयोः सात्यकेरपि ॥ २७
धृष्टद्युम्नशिखण्डिभ्यां पाञ्चालानां च माधव ।
अद्यानृण्यं गमिष्यामि हत्वा कर्णं महारणे ॥ २८
अद्य पश्यन्तु संग्रामे धनंजयसमर्पणम् ।
घ्नन्तं कौरवान्संख्ये पातयन्तं च सूतजम् ।
त्वत्सकाशे वक्ष्ये च पुनरेवात्मसंस्तवम् ॥ २९
धनुर्वेदे मत्समो नास्ति लोके
पराक्रमे वा मम कोऽस्ति तुल्यः ।
को वाप्यन्यो मत्समोऽस्ति क्षमायां
तथा क्रोधे सदृशोऽन्यो न मेऽस्ति ॥ ३०
अहं धनुष्मानसुरान्सुरांश्च
सर्वाणि भूतानि च संगतानि ।
स्वबाहुवीर्याद्गमये पराभवं
मत्पौरुषं विद्धि परः परेभ्यः ॥ ३१
शरार्चिषा गाण्डिवेनाहमेकः
सर्वान्कुरून्बाह्लिकांश्चाभिपत्य ।
हिमात्यये कक्षगतो यथाग्नि-
स्तथा दहेयं सगणान्प्रसह्य ॥ ३२
पाणौ पृषत्का लिखिता ममैते
धनुश्च सव्ये निहितं सबाणम् ।
पादौ च मे सरथौ सध्वजौ च
न मादृशं युद्धगतं जयन्ति ॥ ३३

इति श्रीमहाभारते कर्णपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

संजय उवाच ।

तेषामनीकानि बृहद्ध्वजानि
रणे समृद्धानि समागतानि ।
गर्जन्ति भेरीनिनदोन्मुखानि
मेघैर्यथा मेघगणास्तपान्ते ॥ १
महागजाभ्राकुलमस्त्रतोयं
वादित्रनेमीतलशब्दवच्च ।
हिरण्यचित्रायुधवैद्युतं च
महारथैरावृतशब्दवच्च ॥ २
तद्भीमवेगं रुधिरौघवाहि
खड्गाकुलं क्षत्रियजीववाहि ।
अनार्तवं क्रूरमनिष्टवर्षं
बभूव तत्संहरणं प्रजानाम् ॥ ३
रथान्ससूतान्सहयान्गजांश्च
सर्वानरीन्मृत्युवशं शरौघैः ।
निन्ये हयांश्चैव तथा ससादी-
न्पदातिसंघांश्च तथैव पार्थः ॥ ४
कृपः शिखण्डी च रणे समेतौ
दुर्योधनं सात्यकिरभ्यगच्छत् ।
श्रुतश्रवा द्रोणसुतेन सार्धं
युधामन्युश्चित्रसेनेन चापि ॥ ५
कर्णस्य पुत्रस्तु रथी सुषेणं
समागतः सृञ्जयांश्चोत्तमौजाः ।
गान्धारराजं सहदेवः क्षुधार्तो
महर्षभं सिंह इवाभ्यधावत् ॥ ६
शतानीको नाकुलिः कर्णपुत्रं
युवा युवानं वृषसेनं शरौघैः ।
समार्दयत्कर्णसुतश्च वीरः
पाञ्चालेयं शरवर्षैरनेकैः ॥ ७
रथर्षभः कृतवर्माणमार्च्छ-
न्माद्रीपुत्रो नकुलश्चित्रयोधी ।
पाञ्चालानामधिपो याज्ञसेनिः
सेनापतिं कर्णमार्च्छत्ससैन्यम् ॥ ८

दुःशासनो भारत भारती च
संशप्तकानां पृतना समृद्धा ।
भीमं रणे शस्त्रभृतां वरिष्ठं
तदा समार्च्छंत्तमसह्यवेगम् ॥ ९
कर्णात्मजं तत्र जघान शूर-
स्तथाच्छिनच्चोत्तमौजाः प्रसह्य ।
तस्योत्तमाङ्गं निपपात भूमौ
निनादयद्गां निनदेन खं च ॥ १०
सुषेणशीर्षं पतितं पृथिव्यां
विलोक्य कर्णोऽथ तदार्तरूपः ।
क्रोधाद्धयांस्तस्य रथं ध्वजं च
बाणैः सुधारैर्निशितैर्न्यकृन्तत् ॥ ११
स तूत्तमौजा निशितैः पृषत्कै-
र्विव्याध खड्गेन च भास्वरेण ।
पार्ष्णिं हयांश्चैव कृपस्य हत्वा
शिखण्डिवाहं स ततोऽभ्यरोहत् ॥ १२
कृपं तु दृष्ट्वा विरथं रथस्थो
नैच्छच्छरैस्ताडयितुं शिखण्डी ।
तं द्रौणिरावार्य रथं कृपं स्म
समुज्जह्रे पङ्कगतां यथा गाम् ॥ १३
हिरण्यवर्मा निशितैः पृषत्कै-
स्तवात्मजानामनिलात्मजो वै ।
अतापयत्सैन्यमतीव भीमः
काले शुचौ मध्यगतो यथार्कः ॥ १४

इति श्रीमहाभारते कर्णपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

५४

संजय उवाच ।

अथ त्विदानीं तुमुले विमर्दे
द्विषद्भिरेको बहुभिः समावृतः ।
महाभये सारथिमित्युवाच
भीमश्चमूं वारयन्धार्तराष्ट्रीम् ।
त्वं सारथे याहि जवेन वाहै-
र्नयाम्येतान्धार्तराष्ट्रान्यमाय ॥ १
संचोदितो भीमसेनेन चैवं
स सारथिः पुत्रबलं त्वदीयम् ।
प्रायात्ततः सारथिरुग्रवेगो
यतो भीमस्तद्बलं गन्तुमैच्छत् ॥ २
ततोऽपरे नागरथाश्वपत्तिभिः
प्रत्युद्ययुः कुरवस्तं समन्तात् ।
भीमस्य वाहाग्र्यमुदारवेगं
समन्ततो बाणगणैर्निजघ्नुः ॥ ३
ततः शरानापततो महात्मा
चिच्छेद बाणैस्तपनीयपुङ्खैः ।
ते वै निपेतुस्तपनीयपुङ्खा
द्विधा त्रिधा भीमशरैर्निकृत्ताः ॥ ४
ततो राजन्नागरथाश्वयूनां
भीमाहतानां तव राजमध्ये ।
घोरो निनादः प्रबभौ नरेन्द्र
वज्राहतानामिव पर्वतानाम् ॥ ५
ते वध्यमानाश्च नरेन्द्रमुख्या
निर्भिन्ना वै भीमसेनप्रवेकैः ।
भीमं समन्तात्समरेऽध्यरोह-
न्वृक्षं शकुन्ता इव पुष्पहेतोः ॥ ६
ततोऽभिपातं तव सैन्यमध्ये
प्रादुश्चक्रे वेगमिवात्तवेगः ।
यथान्तकाले क्षपयन्दिधक्षु-
र्भूतान्तकृत्काल इवात्तदण्डः ॥ ७
तस्यातिवेगस्य रणेऽतिवेगं
नाशक्नुवन्धारयितुं त्वदीयाः ।

व्यात्ताननस्यापततो यथैव
कालस्य काले हरतः प्रजा वै ॥ ८
ततो बलं भारत भारतानां
प्रदह्यमानं समरे महात्मन् ।
भीतं दिशोऽकीर्यत भीमनुन्नं
महानिलेनाभ्रगणो यथैव ॥ ९
ततो धीमान्सारथिमब्रवीद्बली
स भीमसेनः पुनरेव हृष्टः ।
सूताभिजानीहि परान्स्वकान्वा
रथान्ध्वजांश्चापततः समेतान् ।
युध्यन्नहं नाभिजानामि किंचि-
न्मा सैन्यं स्वं छादयिष्ये पृषत्कैः ॥ १०
अरीन्विशोकाभिनिरीक्ष्य सर्वतो
मनस्तु चिन्ता प्रदुनोति मे भृशम् ।
राजातुरो नागमद्यत्किरीटी
बहूनि दुःखान्यभिजातोऽस्मि सूत ॥ ११
एतद्दुःखं सारथे धर्मराजो
यन्मां हित्वा यातवाञ्शत्रुमध्ये ।
नैनं जीवन्नापि जानाम्यजीव-
न्बीभत्सुं वा तन्ममाद्यातिदुःखम् ॥ १२
सोऽहं द्विषत्सैन्यमुदग्रकल्पं
विनाशयिष्ये परमप्रतीतः ।
एतान्निहत्याजिमध्ये समेता-
न्प्रीतो भविष्यामि सह त्वयाद्य ॥ १३
सर्वांस्तूणीरान्मार्गणान्वान्ववेक्ष्य
किं शिष्टं स्यात्सायकानां रथे मे ।
का वा जातिः किं प्रमाणं च तेषां
ज्ञात्वा व्यक्तं तन्ममाचक्ष्व सूत ॥ १४

विशोक उवाच ।

षण्मार्गणानामयुतानि वीर
क्षुराश्च भल्लाश्च तथायुताख्याः ।
नाराचानां द्वे सहस्रे तु वीर
त्रीण्येव च प्रदराणां च पार्थ ॥ १५
अस्त्यायुधं पाण्डवेयावशिष्टं
न यद्वहेच्छकटं षड्गवीयम् ।
एतद्विद्वन्मुञ्च सहस्रशोऽपि
गदासिबाहुद्रविणं च तेऽस्ति ॥ १६

भीम उवाच ।

सूताद्येमं पश्य भीमप्रमुक्तैः
संभिन्दद्भिः पार्थिवानाशुवेगैः ।
उग्रैर्बाणैराहवं घोररूपं
नष्टादित्यं मृत्युलोकेन तुल्यम् ॥ १७
अद्यैव तद्विदितं पार्थिवानां
भविष्यति आकुमारं च सूत ।
निमग्नो वा समरे भीमसेन
एकः कुरून्वा समरे विजेता ॥ १८
सर्वे संख्ये कुरवो निष्पतन्तु
मां वा लोकाः कीर्तयन्त्वाकुमारम् ।
सर्वानेकस्तानहं पातयिष्ये
ते वा सर्वे भीमसेनं तुदन्तु ॥ १९
आशास्तारः कर्म चाप्युत्तमं वा
तन्मे देवाः केवलं साधयन्तु ।
आयात्विहाद्यार्जुनः शत्रुघाती
शक्रस्तूर्णं यज्ञ इवोपहूतः ॥ २०
ईक्षस्वैतां भारतीं दीर्यमाणा-
मेते कस्माद्विद्रवन्ते नरेन्द्राः ।
व्यक्तं धीमान्सव्यसाची नराग्र्यः
सैन्यं ह्येतच्छादयत्याशु बाणैः ॥ २१
पश्य ध्वजांश्च द्रवतो विशोक
नागान्हयान्पत्तिसंघांश्च संख्ये ।

रथान्विशीर्णान्विशरशक्तिताडिता-
न्पश्यस्वैतान्रथिनश्चैव सूत ॥ २२
आपूर्यते कौरवी चाप्यभीक्ष्णं
सेना ह्यसौ सुभृशं हन्यमाना ।
धनंजयस्याशनितुल्यवेगै-
र्ग्रस्ता शरैर्बर्हिसुवर्णवाजैः ॥ २३
एते द्रवन्ति स्म रथाश्वनागाः
पदातिसंघानवमर्दयन्तः ।
संमुह्यमानाः कौरवाः सर्व एव
द्रवन्ति नागा इव दावभीताः ।
हाहाकृताश्चैव रणे विशोक
मुञ्चन्ति नादान्विपुलान्गजेन्द्राः ॥ २४

विशोक उवाच ।

सर्वे कामाः पाण्डव ते समृद्धाः
कपिध्वजो दृश्यते हस्तिसैन्ये ।
नीलाद्घनाद्विद्युतमुच्चरन्तीं
तथापश्यं विस्फुरद्वै धनुस्तत् ॥ २५
कपिर्ह्यसौ वीक्ष्यते सर्वतो वै
ध्वजाग्रमारुह्य धनंजयस्य ।
दिवाकराभो मणिरेष दिव्यो
विभ्राजते चैव किरीटसंस्थः ॥ २६
पार्श्वे भीमं पाण्डुराभ्रप्रकाशं
पश्येमं त्वं देवदत्तं सुघोषम् ।
अभीशुहस्तस्य जनार्दनस्य
विगाहमानस्य चमूं परेषाम् ॥ २७
रविप्रभं वज्रनाभं क्षुरान्तं
पार्श्वे स्थितं पश्य जनार्दनस्य ।
चक्रं यशो वर्धयत्केशवस्य
सदार्चितं यदुभिः पश्य वीर ॥ २८

भीम उवाच ।

ददामि ते ग्रामवरांश्चतुर्दश
प्रियाख्याने सारथे सुप्रसन्नः ।
दासीशतं चापि रथांश्च विंशतिं
यदर्जुनं वेदयसे विशोक ॥ २९

इति श्रीमहाभारते कर्णपर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

५५

संजय उवाच ।

श्रुत्वा च रथनिर्घोषं सिंहनादं च संयुगे ।
अर्जुनः प्राह गोविन्दं शीघ्रं चोदय वाजिनः ॥ १
अर्जुनस्य वचः श्रुत्वा गोविन्दोऽर्जुनमब्रवीत् ।
एष गच्छामि सुक्षिप्रं यत्र भीमो व्यवस्थितः ॥ २
आयान्तमश्वैर्हिमशङ्खवर्णैः
सुवर्णमुक्तामणिजालनद्धैः ।
जम्भं जिघांसुं प्रगृहीतवज्रं
जयाय देवेन्द्रमिवोग्रमन्युम् ॥ ३
रथाश्वमातङ्गपदातिसंघा
बाणस्वनैर्नेमिखुरस्वनैश्च ।
संनादयन्तो वसुधां दिशश्च
क्रुद्धा नृसिंहा जयमभ्युदीयुः ॥ ४
तेषां च पार्थस्य महत्तदासी-
द्देहासुपाप्मक्षपणं सुयुद्धम् ।
त्रैलोक्यहेतोरसुरैर्यथासी-
द्देवस्य विष्णोर्जयतां वरस्य ॥ ५
तैरस्तमुच्चावचमायुधौघ-
मेकः प्रचिच्छेद किरीटमाली ।
क्षुरार्धचन्द्रैर्निशितैश्च बाणैः
शिरांसि तेषां बहुधा च बाहून् ॥ ६
छत्राणि वालव्यजनानि केतू-

नश्वान्रथान्पत्तिगणान्द्विपांश्च ।
ते पेतुरुर्व्यां बहुधा विरूपा
वातप्रभग्नानि यथा वनानि ॥ ७
सुवर्णजालावतता महागजाः
सवैजयन्तीध्वजयोधकल्पिताः ।
सुवर्णपुङ्खैरिषुभिः समाचिता-
श्चकाशिरे प्रज्वलिता यथाचलाः ॥ ८
विदार्य नागांश्च रथांश्च वाजिनः
शरोत्तमैर्वासववज्रसंनिभैः ।
द्रुतं ययौ कर्णजिघांसया तथा
यथा मरुत्वान्बलभेदने पुरा ॥ ९
ततः स पुरुषव्याघ्रः सूतसैन्यमरिंदम ।
प्रविवेश महाबाहुर्मकरः सागरं यथा ॥ १०
तं दृष्ट्वा तावका राजन्रथपत्तिसमन्विताः ।
गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ॥ ११
तत्राभिद्रवतां पार्थमारावः सुमहानभूत् ।
सागरस्येव मत्तस्य यथा स्यात्सलिलस्वनः ॥ १२
ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः ।
अभ्यद्रवन्त संग्रामे त्यक्त्वा प्राणकृतं भयम् ॥ १३
तेषामापततां तत्र शरवर्षाणि मुञ्चताम् ।
अर्जुनो व्यधमत्सैन्यं महावातो घनानिव ॥ १४
तेऽर्जुनं सहिता भूत्वा रथवंशैः प्रहारिणः ।
अभियाय महेष्वासा विव्यधुर्निशितैः शरैः ॥ १५
ततोऽर्जुनः सहस्राणि रथवारणवाजिनाम् ।
प्रेषयामास विशिखैर्यमस्य सदनं प्रति ॥ १६
ते वध्यमानाः समरे पार्थचापच्युतैः शरैः ।
तत्र तत्र स्म लीयन्ते भये जाते महारथाः ॥ १७
तेषां चतुःशतान्वीरान्यतमानान्महारथान् ।
अर्जुनो निशितैर्बाणैरनयद्यमसादनम् ॥ १८
ते वध्यमानाः समरे नानालिङ्गैः शितैः शरैः ।
अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो भयात् ॥ १९
तेषां शब्दो महानासीद्द्रवतां वाहिनीमुखे ।
महौघस्येव भद्रं ते गिरिमासाद्य दीर्यतः ॥ २०
तां तु सेनां भृशं विद्ध्वा द्रावयित्वार्जुनः शरैः ।
प्रायादभिमुखः पार्थः सूतानीकानि मारिष ॥ २१
तस्य शब्दो महानासीत्परानभिमुखस्य वै ।
गरुडस्येव पततः पन्नगार्थे यथा पुरा ॥ २२
तं तु शब्दमभिश्रुत्य भीमसेनो महाबलः ।
बभूव परमप्रीतः पार्थदर्शनलालसः ॥ २३
श्रुत्वैव पार्थमायान्तं भीमसेनः प्रतापवान् ।
त्यक्त्वा प्राणान्महाराज सेनां तव ममर्द ह ॥ २४
स वायुवेगप्रतिमो वायुवेगसमो जवे ।
वायुवद्व्यचरद्भीमो वायुपुत्रः प्रतापवान् ॥ २५
तेनार्द्यमाना राजेन्द्र सेना तव विशां पते ।
व्यभ्राम्यत महाराज भिन्ना नौरिव सागरे ॥ २६
तां तु सेनां तदा भीमो दर्शयन्पाणिलाघवम् ।
शरैरवचकर्तोग्रैः प्रेषयिष्यन्यमक्षयम् ॥ २७
तत्र भारत भीमस्य बलं दृष्ट्वातिमानुषम् ।
व्यत्रस्यन्त रणे योधाः कालस्येव युगक्षये ॥ २८
तथार्दितान्भीमबलान्भीमसेनेन भारत ।
दृष्ट्वा दुर्योधनो राजा इदं वचनमब्रवीत् ॥ २९
सैनिकान्स महेष्वासो योधांश्च भरतर्षभ ।
समादिशद्रणे सर्वान्हत भीममिति स्म ह ।
तस्मिन्हते हतं मन्ये सर्वसैन्यमशेषतः ॥ ३०
प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः ।
भीमं प्रच्छादयामासुः शरवर्षैः समन्ततः ॥ ३१
गजाश्च बहुला राजन्नराश्च जयगृद्धिनः ।
रथा हयाश्च राजेन्द्र परिवव्रुर्वृकोदरम् ॥ ३२
स तैः परिवृतः शूरैः शूरो राजन्समन्ततः ।
शुशुभे भरतश्रेष्ठ नक्षत्रैरिव चन्द्रमाः ॥ ३३

स रराज तथा संख्ये दर्शनीयो नरोत्तमः ।
निर्विशेषं महाराज यथा हि विजयस्तथा ॥ ३४
तत्र ते पार्थिवाः सर्वे शरवृष्टीः समासृजन् ।
क्रोधरक्तेक्षणाः क्रूरा हन्तुकामा वृकोदरम् ॥ ३५
स विदार्य महासेनां शरैः संनतपर्वभिः ।
निश्चक्राम रणाद्भीमो मत्स्यो जालादिवाम्भसि ॥ ३६
हत्वा दश सहस्राणि गजानामनिवर्तिनाम् ।
नृणां शतसहस्रे द्वे द्वे शते चैव भारत ॥ ३७
पञ्च चाश्वसहस्राणि रथानां शतमेव च ।
हत्वा प्रास्यन्दयद्भीमो नदीं शोणितकर्दमाम् ॥ ३८
शोणितोदां रथावर्तां हस्तिग्राहसमाकुलाम् ।
नरमीनामश्वनक्रां केशशैवलशाद्वलाम् ॥ ३९
संछिन्नभुजनागेन्द्रां बहुरत्नापहारिणीम् ।
ऊरुग्राहां मज्जपङ्कां शीर्षोपलसमाकुलाम् ॥ ४०
धनुष्काशां शरावापां गदापरिघकेतनाम् ।
योधव्रातवतीं संख्ये वहन्तीं यमसादनम् ॥ ४१
क्षणेन पुरुषव्याघ्रः प्रावर्तयत निम्नगाम् ।
यथा वैतरणीमुग्रां दुस्तरामकृतात्मभिः ॥ ४२
यतो यतः पाण्डवेयः प्रवृत्तो रथसत्तमः ।
ततस्ततोऽपातयत योधाञ्शतसहस्रशः ॥ ४३
एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे ।
दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत् ॥ ४४
जय मातुल संग्रामे भीमसेनं महाबलम् ।
अस्मिञ्जिते जितं मन्ये पाण्डवेयं महाबलम् ॥ ४५
ततः प्रायान्महाराज सौबलेयः प्रतापवान् ।
रणाय महते युक्तो भ्रातृभिः परिवारितः ॥ ४६
स समासाद्य संग्रामे भीमं भीमपराक्रमम् ।
वारयामास तं वीरो वेलेव मकरालयम् ।
स न्यवर्तत तं भीमो वार्यमाणः शितैः शरैः ॥ ४७
शकुनिस्तस्य राजेन्द्र वामे पार्श्वे स्तनान्तरे ।
प्रेषयामास नाराचान्रुक्मपुङ्खाञ्शिलाशितान् ॥ ४८
वर्म भित्त्वा तु सौवर्णं बाणास्तस्य महात्मनः ।
न्यमज्जन्त महाराज कङ्कबर्हिणवाससः ॥ ४९
सोऽतिविद्धो रणे भीमः शरं हेमविभूषितम् ।
प्रेषयामास सहसा सौबलं प्रति भारत ॥ ५०
तमायान्तं शरं घोरं शकुनिः शत्रुतापनः ।
चिच्छेद शतधा राजन्कृतहस्तो महाबलः ॥ ५१
तस्मिन्निपतिते भूमौ भीमः क्रुद्धो विशां पते ।
धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ ५२
तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान् ।
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ॥ ५३
तैस्तस्य तु महाराज भल्लैः संनतपर्वभिः ।
चतुर्भिः सारथिं ह्यार्च्छद्भीमं पञ्चभिरेव च ॥ ५४
ध्वजमेकेन चिच्छेद छत्रं द्वाभ्यां विशां पते ।
चतुर्भिश्चतुरो वाहान्विव्याध सुबलात्मजः ॥ ५५
ततः क्रुद्धो महाराज भीमसेनः प्रतापवान् ।
शक्तिं चिक्षेप समरे रुक्मदण्डामयस्मयीम् ॥ ५६
सा भीमभुजनिर्मुक्ता नागजिह्वेव चञ्चला ।
निपपात रथे तूर्णं सौबलस्य महात्मनः ॥ ५७
ततस्तामेव संगृह्य शक्तिं कनकभूषणाम् ।
भीमसेनाय चिक्षेप क्रुद्धरूपो विशां पते ॥ ५८
सा निर्भिद्य भुजं सव्यं पाण्डवस्य महात्मनः ।
पपात च ततो भूमौ यथा विद्युन्नभश्च्युता ॥ ५९
अथोत्क्रुष्टं महाराज धार्तराष्ट्रैः समन्ततः ।
न तु तं ममृषे भीमः सिंहनादं तरस्विनाम् ॥ ६०
स संगृह्य धनुः सज्यं त्वरमाणो महारथः ।
मुहूर्तादिव राजेन्द्र छादयामास सायकैः ।
सौबलस्य बलं संख्ये त्यक्त्वात्मानं महाबलः ॥ ६१
तस्याश्वांश्चतुरो हत्वा सूतं चैव विशां पते ।

ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी ॥ ६२
हताश्वं रथमुत्सृज्य त्वरमाणो नरोत्तमः ।
धन्वी विस्फारयंश्चापं क्रोधरक्तेक्षणः श्वसन् ।
शरैश्च बहुधा राजन्भीममाच्छेत्समन्ततः ॥ ६३
प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान् ।
धनुश्चिच्छेद संक्रुद्धो विव्याध च शितैः शरैः ॥
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ।
निपपात ततो भूमौ किंचित्प्राणो नराधिप ॥ ६५
ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशां पते ।
अपोवाह रथेनाजौ भीमसेनस्य पश्यतः ॥ ६६
रथस्थे तु नरव्याघ्रे धार्तराष्ट्राः पराङ्मुखाः ।
प्रदुद्रुवुर्दिशो भीता भीमाज्जाते महाभये ॥ ६७
सौबले निर्जिते राजन्भीमसेनेन धन्विना ।
भयेन महता भग्नः पुत्रो दुर्योधनस्तव ।
अपायाज्जवनैरश्वैः सापेक्षो मातुलं प्रति ॥ ६८
पराङ्मुखं तु राजानं दृष्ट्वा सैन्यानि भारत ।
विप्रजग्मुः समुत्सृज्य द्वैरथानि समन्ततः ॥ ६९
तान्दृष्ट्वातिरथान्सर्वान्धार्तराष्ट्रान्पराङ्मुखान् ।
जवेनाभ्यपतद्भीमः किरञ्शरशतान्बहून् ॥ ७०
ते वध्यमाना भीमेन धार्तराष्ट्राः पराङ्मुखाः ।
कर्णमासाद्य समरे स्थिता राजन्समन्ततः ।
स हि तेषां महावीर्यो द्वीपोऽभूत्सुमहाबलः ॥ ७१
भिन्ननौका यथा राजन्द्वीपमासाद्य निर्वृताः ।
भवन्ति पुरुषव्याघ्र नाविकाः कालपर्यये ॥ ७२
यथा कर्णं समासाद्य तावका भरतर्षभ ।
समाश्वस्ताः स्थिता राजन्संप्रहृष्टाः परस्परम् ।
समाजग्मुश्च युद्धाय मृत्युं कृत्वा निवर्तनम् ॥ ७३

इति श्रीमहाभारते कर्णपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

५६

धृतराष्ट्र उवाच ।

ततो भग्नेषु सैन्येषु भीमसेनेन संयुगे ।
दुर्योधनोऽब्रवीत्किं नु सौबलो वापि संजय ॥ १
कर्णो वा जयतां श्रेष्ठो योधा वा मामका युधि ।
कृपो वा कृतवर्मा च द्रौणिर्दुःशासनोऽपि वा ॥ २
अत्यद्भुतमिदं मन्ये पाण्डवेयस्य विक्रमम् ।
यथाप्रतिज्ञं योधानां राधेयः कृतवानपि ॥ ३
कुरूणामपि सर्वेषां कर्णः शत्रुनिषूदनः ।
शर्म वर्म प्रतिष्ठा च जीविताशा च संजय ॥ ४
तत्प्रभग्नं बलं दृष्ट्वा कौन्तेयेनामितौजसा ।
राधेयानामधिरथः कर्णः किमकरोद्युधि ॥ ५
पुत्रा वा मम दुर्धर्षा राजानो वा महारथाः ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि संजय ॥ ६

संजय उवाच ।

अपराह्णे महाराज सूतपुत्रः प्रतापवान् ।
जघान सोमकान्सर्वान्भीमसेनस्य पश्यतः ।
भीमोऽप्यतिबलः सैन्यं धार्तराष्ट्रं व्यपोथयत् ॥ ७
द्राव्यमाणं बलं दृष्ट्वा भीमसेनेन धीमता ।
यन्तारमब्रवीत्कर्णः पाञ्चालानेव मा वह ॥ ८
मद्रराजस्ततः शल्यः श्वेतानश्वान्महाजवान् ।
प्राहिणोच्चेदिपाञ्चालान्करूषांश्च महाबलः ॥ ९
प्रविश्य च स तां सेनां शल्यः परबलार्दनः ।
न्ययच्छत्तुरगान्हृष्टो यत्र यत्रैच्छदग्रणीः ॥ १०
तं रथं मेघसंकाशं वैयाघ्रपरिवारणम् ।
संदृश्य पाण्डुपाञ्चालास्त्रस्ता आसन्विशां पते ॥ ११
ततो रथस्य निनदः प्रादुरासीन्महारणे ।
पर्जन्यसमनिर्घोषः पर्वतस्येव दीर्यतः ॥ १२
ततः शरशतैस्तीक्ष्णैः कर्णोऽप्याकर्णनिःसृतैः ।
जघान पाण्डवबलं शतशोऽथ सहस्रशः ॥ १३

तं तथा समरे कर्म कुर्वाणमतिमानुषम् ।
परिवव्रुर्महेष्वासाः पाण्डवानां महारथाः ॥ १४
तं शिखण्डी च भीमश्च धृष्टद्युम्नश्च पार्षतः ।
नकुलः सहदेवश्च द्रौपदेयाः ससात्यकाः ।
परिवव्रुर्जिघांसन्तो राधेयं शरवृष्टिभिः ॥ १५
सात्यकिस्तु ततः कर्णं विंशत्या निशितैः शरैः ।
अताडयद्रणे शूरो जत्रुदेशे नरोत्तमः ॥ १६
शिखण्डी पञ्चविंशत्या धृष्टद्युम्नश्च पञ्चभिः ।
द्रौपदेयाश्चतुःषष्ट्या सहदेवश्च सप्तभिः ।
नकुलश्च शतेनाजौ कर्णं विव्याध सायकैः ॥ १७
भीमसेनस्तु राधेयं नवत्या नतपर्वणाम् ।
विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः ॥ १८
ततः प्रहस्याधिरथिर्विक्षिपन्धनुरुत्तमम् ।
मुमोच निशितान्बाणान्पीडयन्सुमहाबलः ।
तान्प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिः शरैः ॥ १९
सात्यकेस्तु धनुश्छित्त्वा ध्वजं च पुरुषर्षभः ।
अथैनं नवभिर्बाणैराजघान स्तनान्तरे ॥ २०
भीमसेनस्तु तं क्रुद्धो विव्याध त्रिंशता शरैः ।
सारथिं च त्रिभिर्बाणैराजघान परंतपः ॥ २१
विरथान्द्रौपदेयांश्च चकार पुरुषर्षभः ।
अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत् ॥ २२
विमुखीकृत्य तान्सर्वाञ्शरैः संनतपर्वभिः ।
पाञ्चालानहनच्छूरश्चेदीनां च महारथान् ॥ २३
ते वध्यमानाः समरे चेदिमत्स्या विशां पते ।
कर्णमेकमभिद्रुत्य शरसंघैः समार्दयन् ।
ताञ्जघान शितैर्बाणैः सूतपुत्रो महारथः ॥ २४
एतदत्यद्भुतं कर्णे दृष्टवानस्मि भारत ।
यदेकः समरे शूरान्सूतपुत्रः प्रतापवान् ॥ २५
यतमानान्परं शक्त्यायोधयत्तांश्च धन्विनः ।
पाण्डवेयान्महाराज शरैर्वारितवान्रणे ॥ २६
तत्र भारत कर्णस्य लाघवेन महात्मनः ।
तुतुषुर्देवताः सर्वाः सिद्धाश्च परमर्षयः ॥ २७
अपूजयन्महेष्वासा धार्तराष्ट्रा नरोत्तमम् ।
कर्णं रथवरश्रेष्ठं श्रेष्ठं सर्वधनुष्मताम् ॥ २८
ततः कर्णो महाराज ददाह रिपुवाहिनीम् ।
कक्षमिद्धो यथा वह्निर्निदाघे ज्वलितो महान् ॥२९
ते वध्यमानाः कर्णेन पाण्डवेयास्ततस्ततः ।
प्राद्रवन्त रणे भीताः कर्णं दृष्ट्वा महाबलम् ॥ ३०
तत्राक्रन्दो महानासीत्पाञ्चालानां महारणे ।
वध्यतां सायकैस्तीक्ष्णैः कर्णचापवरच्युतैः ॥ ३१
तेन शब्देन वित्रस्ता पाण्डवानां महाचमूः ।
कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः ॥ ३२
तत्राद्भुतं परं चक्रे राधेयः शत्रुकर्शनः ।
यदेकं पाण्डवाः सर्वे न शेकुरभिवीक्षितुम् ॥ ३३
यथौघः पर्वतश्रेष्ठमासाद्याभिप्रदीर्यते ।
तथा तत्पाण्डवं सैन्यं कर्णमासाद्य दीर्यते ॥ ३४
कर्णोऽपि समरे राजन्विधूमोऽग्निरिव ज्वलन् ।
दहंस्तस्थौ महाबाहुः पाण्डवानां महाचमूम् ॥ ३५
शिरांसि च महाराज कर्णांश्चञ्चलकुण्डलान् ।
बाहूंश्च वीरो वीराणां चिच्छेद लघु चेषुभिः ॥३६
हस्तिदन्तान्त्सरून्खड्गान्ध्वजाञ्शक्तीर्हयान्गजान् ।
रथांश्च विविधान्राजन्पताका व्यजनानि च ॥ ३७
अक्षेषायुगयोक्त्राणि चक्राणि विविधानि च ।
चिच्छेद शतधा कर्णो योधव्रतमनुष्ठितः ॥ ३८
तत्र भारत कर्णेन निहतैर्गजवाजिभिः ।
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ॥ ३९
विषमं च समं चैव हतैरश्वपदातिभिः ।
रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किंचन ॥ ४०
नापि स्वे न परे योधाः प्राज्ञायन्त परस्परम् ।
घोरे शरान्धकारे तु कर्णास्त्रे च विजृम्भिते ॥ ४१

राधेयचापनिर्मुक्तैः शरैः काञ्चनभूषितैः ।
संछादिता महाराज यतमाना महारथाः ॥ ४२
ते पाण्डवेयाः समरे कर्णेन स्म पुनः पुनः ।
अभज्यन्त महाराज यतमाना महारथाः ॥ ४३
मृगसंघान्यथा क्रुद्धः सिंहो द्रावयते वने ।
कर्णस्तु समरे योधांस्तत्र तत्र महायशाः ।
कालयामास तत्सैन्यं यथा पशुगणान्वृकः ॥ ४४
दृष्ट्वा तु पाण्डवीं सेनां धार्तराष्ट्राः पराङ्मुखीम् ।
अभिजग्मुर्महेष्वासा रुवन्तो भैरवान्रवान् ॥ ४५
दुर्योधनो हि राजेन्द्र मुदा परमया युतः ।
वादयामास संहृष्टो नानावाद्यानि सर्वशः ॥ ४६
पाञ्चालापि महेष्वासा भग्ना भग्ना नरोत्तमाः ।
न्यवर्तन्त यथा शूरा मृत्युं कृत्वा निवर्तनम् ॥ ४७
तान्निवृत्तान्रणे शूरान्राधेयः शत्रुतापनः ।
अनेकशो महाराज बभञ्ज पुरुषर्षभः ॥ ४८
तत्र भारत कर्णेन पाञ्चाला विंशती रथाः ।
निहताः सादयः क्रोधाच्चेदयश्च परःशताः ॥ ४९
कृत्वा शून्यान्रथोपस्थान्वाजिपृष्ठांश्च भारत ।
निर्मनुष्यान्गजस्कन्धान्पादातांश्चैव विद्रुतान् ॥ ५०
आदित्य इव मध्याह्ने दुर्निरीक्ष्यः परंतपः ।
कालान्तकवपुः क्रूरः सूतपुत्रश्चचार ह ॥ ५१
एवमेतान्महाराज नरवाजिरथद्विपान् ।
हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः ॥ ५२
यथा भूतगणान्हत्वा कालस्तिष्ठेन्महाबलः ।
तथा स सोमकान्हत्वा तस्थावेको महारथः ॥ ५३
तत्राद्भुतमपश्याम पाञ्चालानां पराक्रमम् ।
वध्यमानापि कर्णेन नाजहू रणमूर्धनि ॥ ५४
राजा दुःशासनश्चैव कृपः शारद्वतस्तथा ।
अश्वत्थामा कृतवर्मा शकुनिश्चापि सौबलः ।
न्यहनन्पाण्डवीं सेनां शतशोऽथ सहस्रशः ॥ ५५
कर्णपुत्रौ च राजेन्द्र भ्रातरौ सत्यविक्रमौ ।
अनाशयेतां बलिनः पाञ्चालान्वै ततस्ततः ।
तत्र युद्धं तदा ह्यासीत्क्रूरं विशसनं महत् ॥ ५६
तथैव पाण्डवाः शूरा धृष्टद्युम्नशिखण्डिनौ ।
द्रौपदेयाश्च संक्रुद्धा अभ्यघ्नंस्तावकं बलम् ॥ ५७
एवमेष क्षयो वृत्तः पाण्डवानां ततस्ततः ।
तावकानामपि रणे भीमं प्राप्य महाबलम् ॥ ५८

इति श्रीमहाभारते कर्णपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

५७

संजय उवाच ।

अर्जुनस्तु महाराज कृत्वा सैन्यं पृथग्विधम् ।
सूतपुत्रं सुसंरब्धं दृष्ट्वा चैव महारणे ॥ १
शोणितोदां महीं कृत्वा मांसमज्जास्थिवाहिनीम् ।
वासुदेवमिदं वाक्यमब्रवीत्पुरुषर्षभ ॥ २
एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते ।
भीमसेनादयश्चैते योधयन्ति महारथान् ।
एते द्रवन्ति पाञ्चालाः कर्णात्त्रस्ता जनार्दन ॥ ३
एष दुर्योधनो राजा श्वेतच्छत्रेण भास्वता ।
कर्णेन भग्नान्पाञ्चालान्द्रावयन्बहु शोभते ॥ ४
कृपश्च कृतवर्मा च द्रौणिश्चैव महाबलः ।
एते रक्षन्ति राजानं सूतपुत्रेण रक्षिताः ।
अवध्यमानास्तेऽस्माभिर्घातयिष्यन्ति सोमकान् ॥ ५
एष शल्यो रथोपस्थे रश्मिसंचारकोविदः ।
सूतपुत्ररथं कृष्ण वाहयन्बहु शोभते ॥ ६
तत्र मे बुद्धिरुत्पन्ना वाहयात्र महारथम् ।
नाहत्वा समरे कर्णं निवर्तिष्ये कथंचन ॥ ७
राधेयोऽप्यन्यथा पार्थान्सृञ्जयांश्च महारथान् ।
निःशेषान्समरे कुर्यात्पश्यतोर्नौ जनार्दन ॥ ८
ततः प्रायाद्रथेनाशु केशवस्तव वाहिनीम् ।

कर्णं प्रति महेष्वासं द्वैरथे सव्यसाचिना ॥ ९
प्रयातश्च महाबाहुः पाण्डवानुज्ञया हरिः ।
आश्वासयन्रथेनैव पाण्डुसैन्यानि सर्वशः ॥ १०
रथघोषः स संग्रामे पाण्डवेयस्य संबभौ ।
वासवाशनितुल्यस्य महौघस्येव मारिष ॥ ११
महता रथघोषेण पाण्डवः सत्यविक्रमः ।
अभ्ययादप्रमेयात्मा विजयस्तव वाहिनीम् ॥ १२
तमायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम् ।
मद्रराजोऽब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः ॥ १३
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः ।
निघ्नन्नमित्रान्समरे यं कर्ण परिपृच्छसि ॥ १४
एष तिष्ठति कौन्तेयः संस्पृशन्गाण्डिवं धनुः ।
तं हनिष्यसि चेदद्य तन्नः श्रेयो भविष्यति ॥ १५
एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः ।
अर्जुनस्य भयात्तूर्णं निघ्नतः शात्रवान्बहून् ॥ १६
वर्जयन्सर्वसैन्यानि त्वरते हि धनंजयः ।
त्वदर्थमिति मन्येऽहं यथास्योदीर्यते वपुः ॥ १७
न ह्यवस्थाप्यते पार्थो युयुत्सुः केनचित्सह ।
त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे ॥ १८
विरथं धर्मराजं च दृष्ट्वा सुदृढविक्षतम् ।
शिखण्डिनं सात्यकिं च धृष्टद्युम्नं च पार्षतम् ॥१९
द्रौपदेयान्युधामन्युमुत्तमौजसमेव च ।
नकुलं सहदेवं च भ्रातरौ द्वौ समीक्ष्य च ॥ २०
सहसैकरथः पार्थस्त्वामभ्येति परंतप ।
क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्वधन्विनाम् ॥२१
त्वरितोऽभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यसंशयम् ।
त्वं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्धरः ॥ २२
न तं पश्यामि लोकेऽस्मिंस्त्वत्तोऽप्यन्यं धनुर्धरम् ।
अर्जुनं समरे क्रुद्धं यो वेलामिव धारयेत् ॥ २३
न चास्य रक्षां पश्यामि पृष्ठतो न च पार्श्वतः ।
एक एवाभियाति त्वां पश्य साफल्यमात्मनः ॥२४
त्वं हि कृष्णौ रणे शक्तः संसाधयितुमाहवे ।
तवैष भारो राधेय प्रत्युद्याहि धनंजयम् ॥ २५
त्वं कृतो ह्येव भीष्मेण द्रोणद्रौणिकृपैरपि ।
सव्यसाचिप्रतिरथस्तं निवर्तय पाण्डवम् ॥ २६
लेलिहानं यथा सर्पं गर्जन्तमृषभं यथा ।
लयस्थितं यथा व्याघ्रं जहि कर्ण धनंजयम् ॥ २७
एते द्रवन्ति समरे धार्तराष्ट्रा महारथाः ।
अर्जुनस्य भयात्तूर्णं निरपेक्षा जनाधिपाः ॥ २८
द्रवतामथ तेषां तु युधि नान्योऽस्ति मानवः ।
भयहा यो भवेद्वीर त्वामृते सूतनन्दन ॥ २९
एते त्वां कुरवः सर्वे द्वीपमासाद्य संयुगे ।
विष्ठिताः पुरुषव्याघ्र त्वत्तः शरणकाङ्क्षिणः ॥ ३०
वैदेहाम्बष्ठकाम्बोजास्तथा नग्नजितस्त्वया ।
गान्धाराश्च यया धृत्या जिताः संख्ये सुदुर्जयाः ॥
तां धृतिं कुरु राधेय ततः प्रत्येहि पाण्डवम् ।
वासुदेवं च वार्ष्णेयं प्रीयमाणं किरीटिना ॥ ३२

कर्ण उवाच ।

प्रकृतिस्थो हि मे शल्य इदानीं संमतस्तथा ।
प्रतिभासि महाबाहो विभीश्चैव धनंजयात् ॥ ३३
पश्य बाह्वोर्बलं मेऽद्य शिक्षितस्य च पश्य मे ।
एकोऽद्य निहनिष्यामि पाण्डवानां महाचमूम् ॥३४
कृष्णौ च पुरुषव्याघ्रौ तच्च सत्यं ब्रवीमि ते ।
नाहत्वा युधि तौ वीरावपयास्ये कथंचन ॥ ३५
स्वप्स्ये वा निहतस्ताभ्यामसत्यो हि रणे जयः ।
कृतार्थो वा भविष्यामि हत्वा तावथ वा हतः ॥३६

नैतादृशो जातु बभूव लोके
रथोत्तमो यावदनुश्रुतं नः ।
तमीदृशं प्रतियोत्स्यामि पार्थं
महाहवे पश्य च पौरुषं मे ॥ ३७

रथे चरत्येष रथप्रवीरः
शीघ्रैर्हयैः कौरवराजपुत्रः ।
स वाद्य मां नेष्यति कृच्छ्रमेत-
त्कर्णस्यान्तादेतदन्ताः स्थ सर्वे ॥ ३८
अवेपिनौ राजपुत्रस्य हस्ता-
ववेपिनौ जातकिणौ बृहन्तौ ।
दृढायुधः कृतिमान्क्षिप्रहस्तो
न पाण्डवेयेन समोऽस्ति योधः ॥ ३९
गृह्णात्यनेकानपि कङ्कपत्रा-
नेकं यथा तान्क्षितिपान्प्रमथ्य ।
ते क्रोशमात्रं निपतन्त्यमोघाः
कस्तेन योधोऽस्ति समः पृथिव्याम् ॥ ४०
अतोषयत्पाण्डवेयो हुताशं
कृष्णद्वितीयोऽतिरथस्तरस्वी ।
लेभे चक्रं यत्र कृष्णो महात्मा
धनुर्गाण्डीवं पाण्डवः सव्यसाची ॥ ४१
श्वेताश्वयुक्तं च सुघोषमग्र्यं
रथं महाबाहुरदीनसत्त्वः ।
महेषुधी चाक्षयौ दिव्यरूपौ
शस्त्राणि दिव्यानि च हव्यवाहात् ॥ ४२
तथेन्द्रलोके निजघान दैत्या-
नसंख्येयान्कालकेयांश्च सर्वान् ।
लेभे शङ्खं देवदत्तं स्म तत्र
को नाम तेनाभ्यधिकः पृथिव्याम् ॥ ४३
महादेवं तोषयामास चैव
साक्षात्सुयुद्धेन महानुभावः ।
लेभे ततः पाशुपतं सुघोरं
त्रैलोक्यसंहारकरं महास्त्रम् ॥ ४४
पृथक्पृथग्लोकपालाः समेता
ददुर्ह्यस्त्राण्यप्रमेयाणि यस्य ।
यैस्ताञ्जघानाशु रणे नृसिंहा-
न्स कालखञ्जानसुरान्समेतान् ॥ ४५
तथा विराटस्य पुरे समेता-
न्सर्वानस्मानेकरथेन जित्वा ।
जहार तद्गोधनमाजिमध्ये
वस्त्राणि चादत्त महारथेभ्यः ॥ ४६
तमीदृशं वीर्यगुणोपपन्नं
कृष्णद्वितीयं वरये रणाय ।
अनन्तवीर्येण च केशवेन
नारायणेनाप्रतिमेन गुप्तम् ॥ ४७
वर्षायुतैर्यस्य गुणा न शक्या
वक्तुं समेतैरपि सर्वलोकैः ।
महात्मनः शङ्खचक्रासिपाणे-
र्विष्णोर्जिष्णोर्वसुदेवात्मजस्य ।
भयं मे वै जायते साध्वसं च
दृष्ट्वा कृष्णावेकरथे समेतौ ॥ ४८
उभौ हि शूरौ कृतिनौ दृढास्त्रौ
महारथौ संहननोपपन्नौ ।
एतादृशौ फल्गुनवासुदेवौ
कोऽन्यः प्रतीयान्मदृते नु शल्य ॥ ४९
एतावहं युधि वा पातयिष्ये
मां वा कृष्णौ निहनिष्यतोऽद्य ।
इति ब्रुवञ्शल्यममित्रहन्ता
कर्णो रणे मेघ इवोन्ननाद ॥ ५०
अभ्येत्य पुत्रेण तवाभिनन्दितः
समेत्य चोवाच कुरुप्रवीरान् ।
कृपं च भोजं च महाभुजावुभौ
तथैव गान्धारनृपं सहानुजम् ।
गुरोः सुतं चावरजं तथात्मनः
पदातिनोऽथ द्विपसादिनोऽन्यान् ॥ ५१

निरुन्धताभिद्रवताच्युतार्जुनौ
श्रमेण संयोजयताशु सर्वतः ।
यथा भवद्भिर्भृशविक्षतावुभौ
सुखेन हन्यामहमद्य भूमिपाः ॥ ५२
तथेति चोक्त्वा त्वरिताः स्म तेऽर्जुनं
जिघांसवो वीरतमाः समभ्ययुः ।
नदीनदान्भूरिजलो महार्णवो
यथा तथा तान्समरेऽर्जुनोऽग्रसत् ॥ ५३
न संदधानो न तथा शरोत्तमा-
न्प्रमुञ्चमानो रिपुभिः प्रदृश्यते ।
धनंजयस्तस्य शरैश्च दारिता
हताश्च पेतुर्नरवाजिकुञ्जराः ॥ ५४
शरार्चिषं गाण्डिवचारुमण्डलं
युगान्तसूर्यप्रतिमानतेजसम् ।
न कौरवाः शेकुरुदीक्षितुं जयं
यथा रविं व्याधितचक्षुषो जनाः ॥ ५५
तमभ्यधावद्विसृजञ्शरान्कृप-
स्तथैव भोजस्तव चात्मजः स्वयम् ।
जिघांसुभिस्तान्कुशलैः शरोत्तमा-
न्महाहवे संजवितान्प्रयत्नतः ।
शरैः प्रचिच्छेद च पाण्डवस्त्वर-
न्पराभिनद्वक्षसि च त्रिभिस्त्रिभिः ॥ ५६
स गाण्डिवाभ्यायतपूर्णमण्डल-
स्तपन्रिपूनर्जुनभास्करो बभौ ।
शरोग्ररश्मिः शुचिशुक्रमध्यगो
यथैव सूर्यः परिवेषगस्तथा ॥ ५७
अथाग्र्यबाणैर्दशभिर्धनंजयं
पराभिनद्द्रोणसुतोऽच्युतं त्रिभिः ।
चतुर्भिरश्वांश्चतुरः कपिं तथा
शरैः स नाराचवरैरवाकिरत् ॥ ५८

तथा तु तत्तत्स्फुरदात्तकार्मुकं
त्रिभिः शरैर्यन्तृशिरः क्षुरेण ।
हयांश्चतुर्भिश्चतुरस्त्रिभिर्ध्वजं
धनंजयो द्रौणिरथान्न्यपातयत् ॥ ५९
स रोषपूर्णोऽशनिवज्रहाटकै-
रलंकृतं तक्षकभोगवर्चसम् ।
सुबन्धनं कार्मुकमन्यदाददे
यथा महाहिप्रवरं गिरेस्तथा ॥ ६०
स्वमायुधं चोपविकीर्य भूतले
धनुश्च कृत्वा सगुणं गुणाधिकः ।
समानयानावजितौ नरोत्तमौ
शरोत्तमैर्द्रौणिरविध्यदन्तिकात् ॥ ६१
कृपश्च भोजश्च तथात्मजश्च ते
तमोनुदं वारिधरा इवापतन् ।
कृपस्य पार्थः सशरं शरासनं
हयान्ध्वजं सारथिमेव पत्रिभिः ॥ ६२
शरैः प्रचिच्छेद तवात्मजस्य
ध्वजं धनुश्च प्रचकर्त नर्दतः ।
जघान चाश्वान्कृतवर्मणः शुभा-
न्ध्वजं च चिच्छेद ततः प्रतापवान् ॥ ६३
सवाजिसूतेष्वसनान्सकेतना-
ञ्जघान नागाश्वरथांस्त्वरंश्च सः ।
ततः प्रकीर्णं सुमहद्बलं तव
प्रदारितं सेतुरिवाम्भसा यथा ।
ततोऽर्जुनस्याशु रथेन केशव-
श्चकार शत्रूनपसव्यमातुरान् ॥ ६४
ततः प्रयान्तं त्वरितं धनंजयं
शतक्रतुं वृत्रनिजघ्नुषं यथा ।
समन्वधावन्पुनरुच्छ्रितैर्ध्वजै
रथैः सुयुक्तैरपरे युयुत्सवः ॥ ६५

अथाभिसृत्य प्रतिवार्य तानरी-
न्धनंजयस्याभि रथं महारथाः ।
शिखण्डिशैनेययमाः शितैः शरै-
र्विदारयन्तो व्यनदन्सुभैरवम् ॥ ६६
ततोऽभिजघ्नुः कुपिताः परस्परं
शरैस्तदाञ्जोगतिभिः सुतेजनैः ।
कुरुप्रवीराः सह सृञ्जयैर्यथा-
सुराः पुरा देववरैरयोधयन् ॥ ६७
जयेप्सवः स्वर्गमनाय चोत्सुकाः
पतन्ति नागाश्वरथाः परंतप ।
जगर्जुरुच्चैर्बलवच्च विव्यधुः
शरैः सुमुक्तैरितरेतरं पृथक् ॥ ६८
शरान्धकारे तु महात्मभिः कृते
महामृधे योधवरैः परस्परम् ।
बभुर्दशाशा न दिवं च पार्थिव
प्रभा च सूर्यस्य तमोवृताभवत् ॥ ६९

इति श्रीमहाभारते कर्णपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

संजय उवाच ।

राजन्कुरूणां प्रवरैर्बलैर्भीममभिद्रुतम् ।
मज्जन्तमिव कौन्तेयमुज्जिहीर्षुर्धनंजयः ॥ १
विमृद्य सूतपुत्रस्य सेनां भारत सायकैः ।
प्राहिणोन्मृत्युलोकाय परवीरान्धनंजयः ॥ २
ततोऽस्याम्बरमावृत्य शरजालानि भागशः ।
अदृश्यन्त तथान्ये च निघ्नन्तस्तत्र वाहिनीम् ॥ ३
स पक्षिसंघाचरितमाकाशं पूरयञ्शरैः ।
धनंजयो महाराज कुरूणामन्तकोऽभवत् ॥ ४
ततो भल्लैः क्षुरप्रैश्च नाराचैर्निर्मलैरपि ।
गात्राणि प्राक्षिणोत्पार्थः शिरांसि च चकर्त ह ॥ ५
छिन्नगात्रैर्विकवचैर्विशिरस्कैः समन्ततः ।
पतितैश्च पतद्भिश्च योधैरासीत्समावृतम् ॥ ६
धनंजयशराभ्यस्तैः स्यन्दनाश्वनरद्विपैः ।
रणभूमिरभूद्राजन्महावैतरणी यथा ॥ ७
ईषाचक्राक्षभङ्गैश्च व्यश्वैः साश्वैश्च युध्यताम् ।
ससूतैर्हतसूतैश्च रथैः स्तीर्णाभवन्मही ॥ ८
सुवर्णवर्मसंनाहैर्योधैः कनकभूषणैः ।
आस्थिताः कृतवर्माणो भद्रा नित्यमदा द्विपाः ।
क्रुद्धाः क्रुद्धैर्महामात्रैः प्रेषितार्जुनमभ्ययुः ॥ ९
चतुःशताः शरवर्षैर्हताः पेतुः किरीटिना ।
पर्यस्तानीव शृङ्गाणि ससत्त्वानि महागिरेः ॥ १०
धनंजयशराभ्यस्तैः स्तीर्णा भूर्वरवारणैः ।
अभिपेदेऽर्जुनरथो घनान्भिन्दन्निवांशुमान् ॥ ११
हतैर्गजमनुष्याश्वैर्भग्नैश्च बहुधा रथैः ।
विशस्त्रपत्रकवचैर्युद्धशौण्डैर्गतासुभिः ।
अपविद्धायुधैर्मार्गः स्तीर्णोऽभूत्फल्गुनेन वै ॥ १२
व्यस्फूर्जयच्च गाण्डीवं सुमहद्भैरवस्वनम् ।
घोरो वज्रविनिष्पेषः स्तनयित्नोरिवाम्बरे ॥ १३
ततः प्रादीर्यत चमूर्धनंजयशराहता ।
महावातसमाविद्धा महानौरिव सागरे ॥ १४
नानारूपाः प्रहरणाः शरा गाण्डीवचोदिताः ।
अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन् ॥ १५
महागिरौ वेणुवनं निशि प्रज्वलितं यथा ।
तथा तव महत्सैन्यं प्रास्फुरच्छरपीडितम् ॥ १६
संपिष्टदग्धविध्वस्तं तव सैन्यं किरीटिना ।
हतं प्रविहतं बाणैः सर्वतः प्रद्रुतं दिशः ॥ १७
महावने मृगगणा दावाग्निग्रसिता यथा ।
कुरवः पर्यवर्तन्त निर्दग्धाः सव्यसाचिना ॥ १८
उत्सृज्य हि महाबाहुं भीमसेनं तदा रणे ।
बलं कुरूणामुद्विग्नं सर्वमासीत्पराङ्मुखम् ॥ १९

ततः कुरुषु भग्नेषु बीभत्सुरपराजितः ।
भीमसेनं समासाद्य मुहूर्तं सोऽभ्यवर्तत ॥ २०
समागम्य स भीमेन मन्त्रयित्वा च फल्गुनः ।
विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम् ॥ २१
भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनंजयः ।
नादयन्रथघोषेण पृथिवीं द्यां च भारत ॥ २२
ततः परिवृतो भीमैर्दशभिः शत्रुपुंगवैः ।
दुःशासनादवरजैस्तव पुत्रैर्धनंजयः ॥ २३
ते तमभ्यर्दयन्बाणैरुल्काभिरिव कुञ्जरम् ।
आततेष्वसनाः क्रूरा नृत्यन्त इव भारत ॥ २४
अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः ।
ततस्ते प्राद्रवञ्शूराः पराङ्मुखरथेऽर्जुने ॥ २५
तेषामापततां केतून्रथांश्चापानि सायकान् ।
नाराचैरर्धचन्द्रैश्च क्षिप्रं पार्थो न्यपातयत् ॥ २६
अथान्यैर्दशभिर्भल्लैः शिरांस्येषां न्यपातयत् ।
रोषसंरक्तनेत्राणि संदष्टौष्ठानि भूतले ।
तानि वक्त्राणि विबभुर्व्योम्नि तारागणा इव ॥ २७
तांस्तु भल्लैर्महावेगैर्दशभिर्दश कौरवान् ।
रुक्माङ्गदान्रुक्मपुङ्खैर्विद्ध्वा प्रायादमित्रहा ॥ २८

इति श्रीमहाभारते कर्णपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

संजय उवाच ।

तं तु यान्तं महावेगैरश्वैः कपिवरध्वजम् ।
युद्धायाभ्यद्रवन्वीराः कुरूणां नवती रथाः ।
परिवव्रुर्नरव्याघ्रा नरव्याघ्रं रणेऽर्जुनम् ॥ १
कृष्णः श्वेतान्महावेगानश्वान्कनकभूषणान् ।
मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथं प्रति ॥ २
ततः कर्णरथं यान्तमरीन्घ्नन्तं धनंजयम् ।
बाणवर्षैरभिघ्नन्तः संशप्तकरथा ययुः ॥ ३
त्वरमाणांस्तु तान्सर्वान्ससूतेष्वसनध्वजान् ।
जघान नवतिं वीरानर्जुनो निशितैः शरैः ॥ ४
तेऽपतन्त हता बाणैर्नानारूपैः किरीटिना ।
सविमाना यथा सिद्धाः स्वर्गात्पुण्यक्षये तथा ॥ ५
ततः सरथनागाश्वाः कुरवः कुरुसत्तम ।
निर्भया भरतश्रेष्ठमभ्यवर्तन्त फल्गुनम् ॥ ६
तदायस्तममुक्तास्त्रमुदीर्णवरवारणम् ।
पुत्राणां ते महत्सैन्यं समरौत्सीद्धनंजयः ॥ ७
शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः ।
प्राच्छादयन्महेष्वासाः कुरवः कुरुनन्दनम् ॥ ८
तां कुरूणां प्रविततां शस्त्रवृष्टिं समुद्यताम् ।
व्यधमत्पाण्डवो बाणैस्तमः सूर्य इवांशुभिः ॥ ९
ततो म्लेच्छाः स्थितैर्मत्तैस्त्रयोदशशतैर्गजैः ।
पार्श्वतोऽभ्यहनन्पार्थं तव पुत्रस्य शासनात् ॥ १०
कर्णिनालीकनाराचैस्तोमरैः प्रासशक्तिभिः ।
कम्पनैर्भिण्डिपालैश्च रथस्थं पार्थमार्दयन् ॥ ११
तामस्त्रवृष्टिं प्रहितां द्विपस्थैर्यवनैः स्मयन् ।
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फल्गुनः ॥ १२
अथ तान्द्विरदान्सर्वान्नानालिङ्गैर्महाशरैः ।
सपताकान्सहारोहान्गिरीन्वज्रैरिवाभिनत् ॥ १३
ते हेमपुङ्खैरिषुभिराचिता हेममालिनः ।
हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः ॥ १४
ततो गाण्डीवनिर्घोषो महानासीद्विशां पते ।
स्तनतां कूजतां चैव मनुष्यगजवाजिनाम् ॥ १५
कुञ्जराश्च हता राजन्प्राद्रवंस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ १६
रथा हीना महाराज रथिभिर्वाजिभिस्तथा ।
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥ १७
अश्वारोहा महाराज धावमानास्ततस्ततः ।
तत्र तत्रैव दृश्यन्ते पतिताः पार्थसायकैः ॥ १८

तस्मिन्क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत ।
यत्सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ १९
ततस्त्र्यङ्गेण महता बलेन भरतर्षभ ।
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् ॥ २०
हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान् ।
जवेनाभ्यद्रवद्राजन्धनंजयरथं प्रति ॥ २१
ततस्तत्प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वा यदर्जुनं भीमो जगाम भ्रातरं प्रति ॥ २२
हतावशिष्टांस्तुरगानर्जुनेन महाजवान् ।
भीमो व्यधमदभ्रान्तो गदापाणिर्महाहवे ॥ २३
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ २४
ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत् ।
सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥ २५
कांस्यायसतनुत्रांस्तान्नरानश्वांश्च पाण्डवः ।
पोथयामास गदया सशब्दं तेऽपतन्हताः ॥ २६
हत्वा तु तद्गजानीकं भीमसेनो महाबलः ।
पुनः स्वरथमास्थाय पृष्ठतोऽर्जुनमन्वगात् ॥ २७
हतं पराङ्मुखप्रायं निरुत्साहं परं बलम् ।
व्यालम्बत महाराज प्रायशः शस्त्रवेष्टितम् ॥ २८
विलम्बमानं तत्सैन्यमप्रगल्भमवस्थितम् ।
दृष्ट्वा प्राच्छादयद्बाणैरर्जुनः प्राणतापनैः ॥ २९
ततः कुरूणामभवदार्तनादो महामृधे ।
रथाश्वनागासुहरैर्वध्यतामर्जुनेषुभिः ॥ ३०
हाहाकृतं भृशं तस्थौ लीयमानं परस्परम् ।
अलातचक्रवत्सैन्यं तदाभ्रमत तावकम् ॥ ३१
आदीप्तं तव तत्सैन्यं शरैश्छिन्नतनुच्छदम् ।
आसीत्स्वशोणितक्लिन्नं फुल्लाशोकवनं यथा ॥ ३२
तद्दृष्ट्वा कुरवस्तत्र विक्रान्तं सव्यसाचिनः ।
निराशाः समपद्यन्त सर्वे कर्णस्य जीविते ॥ ३३
अविषह्यं तु पार्थस्य शरसंपातमाहवे ।
मत्वा न्यवर्तन्कुरवो जिता गाण्डीवधन्वना ॥ ३४
ते हित्वा समरे पार्थं वध्यमानाश्च सायकैः ।
प्रदुद्रुवुर्दिशो भीताश्चुक्रुशुश्चापि सूतजम् ॥ ३५
अभ्यद्रवत तान्पार्थः किरञ्शरशतान्बहून् ।
हर्षयन्पाण्डवान्योधान्भीमसेनपुरोगमान् ॥ ३६
पुत्रास्तु ते महाराज जग्मुः कर्णरथं प्रति ।
अगाधे मज्जतां तेषां द्वीपः कर्णोऽभवत्तदा ॥ ३७
कुरवो हि महाराज निर्विषाः पन्नगा इव ।
कर्णमेवोपलीयन्त भयाद्गाण्डीवधन्वनः ॥ ३८
यथा सर्वाणि भूतानि मृत्योर्भीतानि भारत ।
धर्ममेवोपलीयन्ते कर्मवन्ति हि यानि च ॥ ३९
तथा कर्णं महेष्वासं पुत्रास्तव नराधिप ।
उपालीयन्त संत्रासात्पाण्डवस्य महात्मनः ॥ ४०
ताञ्शोणितपरिक्लिन्नान्विषमस्थाञ्शरातुरान् ।
मा भैष्टेत्यब्रवीत्कर्णो ह्यभितो मामितेति च ॥ ४१
संभग्नं हि बलं दृष्ट्वा बलात्पार्थेन तावकम् ।
धनुर्विस्फारयन्कर्णस्तस्थौ शत्रुजिघांसया ।
पाञ्चालान्पुनराधावत्पश्यतः सव्यसाचिनः ॥ ४२
ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः ।
कर्णं ववर्षुर्बाणौघैर्यथा मेघा महीधरम् ॥ ४३
ततः शरसहस्राणि कर्णमुक्तानि मारिष ।
व्ययोजयन्त पाञ्चालान्प्राणैः प्राणभृतां वर ॥ ४४
ततो रणो महानासीत्पाञ्चालानां विशां पते ।
वध्यतां सूतपुत्रेण मित्रार्थेऽमित्रघातिनाम् ॥ ४५

इति श्रीमहाभारते कर्णपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

संजय उवाच ।

ततः कर्णः कुरुषु प्रद्रुतेषु

वरूथिना श्वेतहयेन राजन् ।
पाञ्चालपुत्रान्व्यधमत्सूतपुत्रो
महेषुभिर्वात इवाभ्रसंघान् ॥ १
सूतं रथादञ्जलिकेन पात्य
जघान चाश्वाञ्जनमेजयस्य ।
शतानीकं सुतसोमं च भल्लै-
रवाकिरद्धनुषी चाप्यकृन्तत् ॥ २
धृष्टद्युम्नं निर्बिभेदाथ षड्भि-
र्जघान चाश्वं दक्षिणं तस्य संख्ये ।
हत्वा चाश्वान्सात्यकेः सूतपुत्रः
कैकेयपुत्रं न्यवधीद्विशोकम् ॥ ३
तमभ्यधावन्निहते कुमारे
कैकेयसेनापतिरुग्रधन्वा ।
शरैर्विभिन्नं भृशमुग्रवेगैः
कर्णात्मजं सोऽभ्यहनत्सुषेणम् ॥ ४
तस्यार्धचन्द्रैस्त्रिभिरुच्चकर्त
प्रसह्य बाहू च शिरश्च कर्णः ।
स स्यन्दनाद्गामपतद्गतासुः
परश्वधैः शाल इवावरुग्णः ॥ ५
हताश्वमञ्जोगतिभिः सुषेणः
शिनिप्रवीरं निशितैः पृषत्कैः ।
प्रच्छाद्य नृत्यन्निव सौतिपुत्रः
शैनेयबाणाभिहतः पपात ॥ ६
पुत्रे हते क्रोधपरीतचेताः
कर्णः शिनीनामृषभं जिघांसुः ।
हतोऽसि शैनेय इति ब्रुवन्स
व्यवासृजद्बाणममित्रसाहम् ॥ ७
स तस्य चिच्छेद शरं शिखण्डी
त्रिभिस्त्रिभिश्च प्रतुतोद कर्णम् ।
शिखण्डिनः कार्मुकं स ध्वजं च
च्छित्त्वा शराभ्यामहनत्सुजातम् ॥ ८
शिखण्डिनं षड्भिरविध्यदुग्रो
दान्तो धार्ष्टद्युम्नशिरश्चकर्त ।
अथाभिनत्सुतसोमं शरेण
स संशितेनाधिरथिर्महात्मा ॥ ९
अथाक्रन्दे तुमुले वर्तमाने
धार्ष्टद्युम्ने निहते तत्र कृष्णः ।
अपाञ्चाल्यं क्रियते याहि पार्थ
कर्णं जहीत्यब्रवीद्राजसिंह ॥ १०
ततः प्रहस्याशु नरप्रवीरो
रथं रथेनाधिरथेर्जगाम ।
भये तेषां त्राणमिच्छन्सुबाहु-
रभ्याहतानां रथयूथपेन ॥ ११
विस्फार्य गाण्डीवमथोग्रघोषं
ज्यया समाहत्य तले भृशं च ।
बाणान्धकारं सहसैव कृत्वा
जघान नागाश्वरथान्नरांश्च ॥ १२
तं भीमसेनोऽनु ययौ रथेन
पृष्ठे रक्षन्पाण्डवमेकवीरम् ।
तौ राजपुत्रौ त्वरितौ रथाभ्यां
कर्णाय यातावरिभिर्विमुक्तौ ॥ १३
अत्रान्तरे सुमहत्सूतपुत्र-
श्चक्रे युद्धं सोमकान्संप्रमृद्नन् ।
रथाश्वमातङ्गगणाञ्जघान
प्रच्छादयामास दिशः शरैश्च ॥ १४
तमुत्तमौजा जनमेजयश्च
क्रुद्धौ युधामन्युशिखण्डिनौ च ।
कर्णं विनेदुः सहिताः पृषत्कैः
संमर्दमानाः सह पार्षतेन ॥ १५
ते पञ्च पाञ्चालरथाः सुरूपै-

वैकर्तनं कर्णमभिद्रवन्तः ।
तस्माद्रथाद्च्यावयितुं न शेकु-
र्धैर्यात्कृतात्मानमिवेन्द्रियाणि ॥ १६
तेषां धनूंषि ध्वजवाजिसूता-
स्तूणं पताकाश्च निकृत्य बाणैः ।
तान्पञ्चभिः स त्वहनत्पृषत्कैः
कर्णस्ततः सिंह इवोन्ननाद ॥ १७
तस्यास्यतस्तानभिनिघ्नतश्च
ज्याबाणहस्तस्य धनुःस्वनेन ।
साद्रिद्रुमा स्यात्पृथिवी विशीर्णा
इत्येव मत्वा जनता व्यषीदत् ॥ १८
स शक्रचापप्रतिमेन धन्वना
भृशाततेनाधिरथिः शरान्सृजन् ।
बभौ रणे दीप्तमरीचिमण्डलो
यथांशुमाली परिवेषवांस्तथा ॥ १९
शिखण्डिनं द्वादशभिः पराभिन-
च्छितैः शरैः षड्भिरथोत्तमौजसम् ।
त्रिभिर्युधामन्युमविध्यदाशुगै-
स्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ ॥ २०
पराजिताः पञ्च महारथास्तु ते
महाहवे सूतसुतेन मारिष ।
निरुद्यमास्तस्थुरमित्रमर्दना
यथेन्द्रियार्थात्मवता पराजिताः ॥ २१
निमज्जतस्तानथ कर्णसागरे
विपन्ननावो वणिजो यथार्णवे ।
उद्दध्रिरे नौभिरिवार्णवाद्रथैः
सुकल्पितैर्द्रौपदिजाः स्वमातुलान् ॥ २२
ततः शिनीनामृषभः शितैः शरै-
र्निकृत्य कर्णप्रहितानिषूम्बहून् ।
विदार्य कर्णं निशितैरयस्मयै-
स्तवात्मजं ज्येष्ठमविध्यदष्टभिः ॥ २३
कृपोऽथ भोजश्च तवात्मजस्तथा
स्वयं च कर्णो निशितैरताडयत् ।
स तैश्चतुर्भिर्युयुधे यदूत्तमो
दिगीश्वरैर्दैत्यपतिर्यथा तथा ॥ २४
समाततेनेष्वसनेन कूजता
भृशाततेनामितबाणवर्षिणा ।
बभूव दुर्धर्षतरः स सात्यकिः
शरन्नभोमध्यगतो यथा रविः ॥ २५
पुनः समासाद्य रथान्सुदंशिताः
शिनिप्रवीरं जुगुपुः परंतपाः ।
समेत्य पाञ्चालरथा महारणे
मरुद्गणाः शक्रमिवारिनिग्रहे ॥ २६
ततोऽभवद्युद्धमतीव दारुणं
तवाहितानां तव सैनिकैः सह ।
रथाश्वमातङ्गविनाशनं तथा
यथा सुराणामसुरैः पुराभवत् ॥ २७
रथद्विपा वाजिपदातयोऽपि वा
भ्रमन्ति नानाविधशस्त्रवेष्टिताः ।
परस्परेणाभिहताश्च चस्खलु-
र्विनेदुरार्ता व्यसवोऽपतन्त च ॥ २८
तथा गते भीममभीस्तवात्मजः
ससार राजावरजः किरञ्शरैः ।
तमभ्यधावत्त्वरितो वृकोदरो
महारुरुं सिंह इवाभिपेतिवान् ॥ २९
ततस्तयोर्युद्धमतीतमानुषं
प्रदीव्यतोः प्राणदुरोदरेऽभवत् ।
परस्परेणाभिनिविष्टरोषयो-
रुदग्रयोः शम्बरशक्रयोर्यथा ॥ ३०
शरैः शरीरान्तकरैः सुतेजनै-

निर्जघ्नतुस्तावितरेतरं भृशम् ।
सक्तप्रभिन्नाविव वाशितान्तरे
महागजौ मन्मथसक्तचेतसौ ॥ ३१
तवात्मजस्याथ वृकोदरस्त्वर-
न्धनुः क्षुराभ्यां ध्वजमेव चाच्छिनत् ।
ललाटमप्यस्य बिभेद पत्रिणा
शिरश्च कायात्प्रजहार सारथेः ॥ ३२
स राजपुत्रोऽन्यदवाप्य कार्मुकं
वृकोदरं द्वादशभिः पराभिनत् ।
स्वयं नियच्छंस्तुरगानजिह्मगैः
शरैश्च भीमं पुनरभ्यवीवृषत् ॥ ३३

इति श्रीमहाभारते कर्णपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

संजय उवाच ।

तत्राकरोद्दुष्करं राजपुत्रो
दुःशासनस्तुमुले युध्यमानः ।
चिच्छेद भीमस्य धनुः क्षुरेण
षड्भिः शरैः सारथिमप्यविध्यत् ॥ १
ततोऽभिनद्बहुभिः क्षिप्रमेव
वरेषुभिर्भीमसेनं महात्मा ।
स विक्षरन्नाग इव प्रभिन्नो
गदामस्मै तुमुले प्राहिणोद्वै ॥ २
तयाहरद्दश धन्वन्तराणि
दुःशासनं भीमसेनः प्रसह्य ।
तया हतः पतितो वेपमानो
दुःशासनो गदया वेगवत्या ॥ ३
हयाः ससूताश्च हता नरेन्द्र
चूर्णीकृतश्चास्य रथः पतन्त्या ।
विध्वस्तवर्माभरणाम्बरस्र-
ग्विचेष्टमानो भृशवेदनार्तः ॥ ४
ततः स्मृत्वा भीमसेनस्तरस्वी
सापत्नकं यत्प्रयुक्तं सुतैस्ते ।
रथादवप्लुत्य गतः स भूमौ
यत्नेन तस्मिन्प्रणिधाय चक्षुः ॥ ५
असिं समुद्धृत्य शितं सुधारं
कण्ठे समाक्रम्य च वेपमानम् ।
उत्कृत्य वक्षः पतितस्य भूमा-
वथापिबच्छोणितमस्य कोष्णम् ।
आस्वाद्य चास्वाद्य च वीक्षमाणः
क्रुद्धोऽतिवेलं प्रजगाद वाक्यम् ॥ ६
स्तन्यस्य मातुर्मधुसर्पिषो वा
माध्वीकपानस्य च सत्कृतस्य ।
दिव्यस्य वा तोयरसस्य पाना-
त्पयोदधिभ्यां मथिताच्च मुख्यात् ।
सर्वेभ्य एवाभ्यधिको रसोऽयं
मतो ममाद्याहितलोहितस्य ॥ ७
एवं ब्रुवाणं पुनराद्रवन्त-
मास्वाद्य वल्गन्तमतिप्रहृष्टम् ।
ये भीमसेनं ददृशुस्तदानीं
भयेन तेऽपि व्यथिता निपेतुः ॥ ८
ये चापि तत्रापतिता मनुष्या-
स्तेषां करेभ्यः पतितं च शस्त्रम् ।
भयाच्च संचुक्रुशुरुच्चकैस्ते
निमीलिताक्षा ददृशुश्च तन्न ॥ ९
ये तत्र भीमं ददृशुः समन्ता-
द्दौःशासनं तद्रुधिरं पिबन्तम् ।
सर्वे पलायन्त भयाभिपन्ना
नायं मनुष्य इति भाषमाणाः ॥ १०
शृण्वतां लोकवीराणामिदं वचनमब्रवीत् ।

इह ते रुधिरं कण्ठात्पिबामि पुरुषाधम ।
ब्रूहीदानीं सुसंरब्धः पुनर्गौरिति गौरिति ॥ ११
प्रमाणकोट्यां शयनं कालकूटस्य भोजनम् ।
दशनं चाहिभिः कष्टं दाहं च जतुवेश्मनि ॥ १२
द्यूतेन राज्यहरणमरण्ये वसतिश्च या ।
इष्वस्त्राणि च संग्रामेष्वसुखानि च वेश्मनि ॥ १३
दुःखान्येतानि जानीमो न सुखानि कदाचन ।
धृतराष्ट्रस्य दौरात्म्यात्सपुत्रस्य सदा वयम् ॥ १४
इत्युक्त्वा वचनं राजञ्जयं प्राप्य वृकोदरः ।
पुनराह महाराज स्मयंस्तौ केशवार्जुनौ ॥ १५
दुःशासने यद्रणे संश्रुतं मे
तद्वै सर्वं कृतमद्येह वीरौ ।
अत्रैव दास्याम्यपरं द्वितीयं
दुर्योधनं यज्ञपशुं विशस्य ।
शिरो मृदित्वा च पदा दुरात्मनः
शान्तिं लप्स्ये कौरवाणां समक्षम् ॥ १६
एतावदुक्त्वा वचनं प्रहृष्टो
ननाद चोच्चै रुधिरार्द्रगात्रः ।
ननर्त चैवातिबलो महात्मा
वृत्रं निहत्येव सहस्रनेत्रः ॥ १७

इति श्रीमहाभारते कर्णपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

संजय उवाच ।

दुःशासने तु निहते पुत्रास्तव महारथाः ।
महाक्रोधविषा वीराः समरेष्वपलायिनः ।
दश राजन्महावीर्या भीमं प्राच्छादयञ्शरैः ॥ १
कवची निषङ्गी पाशी दण्डधारो धनुर्धरः ।
अलोलुपः शलः संधो वातवेगसुवर्चसौ ॥ २
एते समेत्य सहिता भ्रातृव्यसनकर्शिताः ।
भीमसेनं महाबाहुं मार्गणैः समवारयन् ॥ ३
स वार्यमाणो विशिखैः समन्तात्तैर्महारथैः ।
भीमः क्रोधाभिरक्ताक्षः क्रुद्धः काल इवाबभौ ॥ ४
तांस्तु भल्लैर्महावेगैर्दशभिर्दशभिः शितैः ।
रुक्माङ्गदो रुक्मपुङ्खैः पार्थो निन्ये यमक्षयम् ॥ ५
हतेषु तेषु वीरेषु प्रदुद्राव बलं तव ।
पश्यतः सूतपुत्रस्य पाण्डवस्य भयार्दितम् ॥ ६
ततः कर्णो महाराज प्रविवेश महारणम् ।
दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव ॥ ७
तस्य त्वाकारभावज्ञः शल्यः समितिशोभनः ।
उवाच वचनं कर्णं प्राप्तकालमरिंदम ।
मा व्यथां कुरु राधेय नैतत्त्वय्युपपद्यते ॥ ८
एते द्रवन्ति राजानो भीमसेनभयार्दिताः ।
दुर्योधनश्च संमूढो भ्रातृव्यसनदुःखितः ॥ ९
दुःशासनस्य रुधिरे पीयमाने महात्मना ।
व्यापन्नचेतसश्चैव शोकोपहतमन्यवः ॥ १०
दुर्योधनमुपासन्ते परिवार्य समन्ततः ।
कृपप्रभृतयः कर्ण हतशेषाश्च सोदराः ॥ ११
पाण्डवा लब्धलक्षाश्च धनंजयपुरोगमाः ।
त्वामेवाभिमुखाः शूरा युद्धाय समुपस्थिताः ॥ १२
स त्वं पुरुषशार्दूल पौरुषे महति स्थितः ।
क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनंजयम् ॥ १३
भारो हि धार्तराष्ट्रेण त्वयि सर्वः समर्पितः ।
तमुद्वह महाबाहो यथाशक्ति यथाबलम् ।
जये स्याद्विपुला कीर्तिर्ध्रुवः स्वर्गः पराजये ॥ १४
वृषसेनश्च राधेय संक्रुद्धस्तनयस्तव ।
त्वयि मोहसमापन्ने पाण्डवानभिधावति ॥ १५
एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः ।
हृदि मानुष्यकं भावं चक्रे युद्धाय सुस्थिरम् ॥ १६
ततः क्रुद्धो वृषसेनोऽभ्यधाव-

दातस्थिवांसं स्वरथं हतारिम् ।
वृकोदरं कालमिवात्तदण्डं
गदाहस्तं पोथमानं त्वदीयान् ॥ १७
तमभ्यधावन्नकुलः प्रवीरो
रोषादमित्रं प्रतुदन्पृषत्कैः ।
कर्णस्य पुत्रं समरे प्रहृष्टं
जिष्णुर्जिघांसुर्मघवेव जम्भम् ॥ १८
ततो ध्वजं स्फाटिकचित्रकम्बुं
चिच्छेद वीरो नकुलः क्षुरेण ।
कर्णात्मजस्येष्वसनं च चित्रं
भल्लेन जाम्बूनदपट्टनद्धम् ॥ १९
अथान्यदादाय धनुः सुशीघ्रं
कर्णात्मजः पाण्डवमभ्यविध्यत् ।
दिव्यैर्महास्त्रैर्नकुलं महास्त्रो
दुःशासनस्यापचितिं यियासुः ॥ २०
ततः क्रुद्धो नकुलस्तं महात्मा
शरैर्महोल्काप्रतिमैरविध्यत् ।
दिव्यैरस्त्रैरभ्यविध्यच्च सोऽपि
कर्णस्य पुत्रो नकुलं कृतास्त्रः ॥ २१
कर्णस्य पुत्रो नकुलस्य राज-
न्सर्वानश्वानक्षिणोदुत्तमास्त्रैः ।
वनायुजान्सुकुमारस्य शुभ्रा-
नलंकृताञ्जातरूपेण शीघ्रान् ॥ २२
ततो हताश्वादवरुह्य याना-
दादाय चर्म रुचिरं चाष्टचन्द्रम् ।
आकाशसंकाशमसिं गृहीत्वा
पोप्लूयमानः खगवच्चचार ॥ २३
ततोऽन्तरिक्षे नृवराश्वनागां-
श्चिच्छेद मार्गान्विचरन्विचित्रान् ।
ते प्रापतन्नसिना गां विशस्ता
यथाश्वमेधे पशवः शमित्रा ॥ २४
द्विसाहस्रा विदिता युद्धशौण्डा
नानादेश्याः सुभृताः सत्यसंधाः ।
एकेन शीघ्रं नकुलेन कृत्ताः
सारेप्सुनेवोत्तमचन्दनास्ते ॥ २५
तमापतन्तं नकुलं सोऽभिपत्य
समन्ततः सायकैरभ्यविध्यत् ।
स तुद्यमानो नकुलः पृषत्कै-
र्विव्याध वीरं स चुकोप विद्धः ॥ २६
तं कर्णपुत्रो विधमन्तमेकं
नराश्वमातङ्गरथप्रवेकान् ।
क्रीडन्तमष्टादशभिः पृषत्कै-
र्विव्याध वीरं स चुकोप विद्धः ॥ २७
ततोऽभ्यधावत्समरे जिघांसुः
कर्णात्मजं पाण्डुसुतो नृवीरः ।
तस्येषुभिर्व्यधमत्कर्णपुत्रो
महारणे चर्म सहस्रतारम् ॥ २८
तस्यायसं निशितं तीक्ष्णधार-
मसिं विकोशं गुरुभारसाहम् ।
द्विषच्छरीरापहरं सुघोर-
माधुन्वतः सर्पमिवोग्ररूपम् ॥ २९
क्षिप्रं शरैः षड्भिरमित्रसाह-
श्चकर्त खड्गं निशितैः सुधारैः ।
पुनश्च पीतैर्निशितैः पृषत्कैः
स्तनान्तरे गाढमथाभ्यविध्यत् ॥ ३०
स भीमसेनस्य रथं हताश्वो
माद्रीसुतः कर्णसुताभितप्तः ।
आपुप्लुवे सिंह इवाचलाग्रं
संप्रेक्षमाणस्य धनंजयस्य ॥ ३१
नकुलमथ विदित्वा छिन्नबाणासनासिं

विरथमरिशरार्तं कर्णपुत्राश्वभग्नम् ।
पवनधुतपताका ह्रादिनो वल्गिताश्वा
वरपुरुषनियत्तास्ते रथाः शीघ्रमीयुः ॥ ३२
द्रुपदसुतवरिष्ठाः पञ्च शैनेयषष्ठा
द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः ।
द्विरदरथनराश्वान्सूदयन्तस्त्वदीया-
न्भुजगपतिनिकाशैर्मार्गणैरात्तशस्त्राः ॥ ३३
अथ तव रथमुख्यास्तान्प्रतीयुस्त्वरन्तो
हृदिकसुतकृपौ च द्रौणिदुर्योधनौ च ।
शकुनिशुकवृकाश्च क्राथदेवावृधौ च
द्विरदजलदघोषैः स्यन्दनैः कार्मुकैश्च ॥३४
तव नरवरवर्यास्तान्दशैकं च वीरा-
न्प्रवरशरवराग्र्यैस्ताडयन्तोऽभ्यरुन्धन् ।
नवजलदसवर्णैर्हस्तिभिस्तानुदीयु-
र्गिरिशिखरनिकाशैर्भीमवेगैः कुणिन्दाः ॥
सुकल्पिता हैमवता मदोत्कटा
रणाभिकामैः कृतिभिः समास्थिताः ।
सुवर्णजालावतता बभुर्गजा-
स्तथा यथा वै जलदाः सविद्युतः ॥ ३६
कुणिन्दपुत्रो दशभिर्महायसैः
कृपंससूताश्वमपीडयद्भृशम् ।
ततः शरद्वत्सुतसायकैर्हतः
सहैव नागेन पपात भूतले ॥ ३७
कुणिन्दपुत्रावरजस्तु तोमरै-
र्दिवाकरांशुप्रतिमैरयस्मयैः ।
रथं च विक्षोभ्य ननाद नर्दत-
स्ततोऽस्य गान्धारपतिः शिरोऽहरत् ॥ ३८
ततः कुणिन्देषु हतेषु तेष्वथ
प्रहृष्टरूपास्तव ते महारथाः ।
भृशं प्रदध्मुर्लवणाम्बुसंभवा-
न्परांश्च बाणासनपाणयोऽभ्ययुः ॥ ३९
अथाभवद्युद्धमतीव दारुणं
पुनः कुरूणां सह पाण्डुसृञ्जयैः ।
शरासिशक्त्यृष्टिगदापरश्वधै-
र्नराश्वनागासुहरं भृशाकुलम् ॥ ४०
रथाश्वमातङ्गपदातिभिस्ततः
परस्परं विप्रहतापतन्क्षितौ ।
यथा सविद्युत्स्तनिता बलाहकाः
समास्थिता दिग्भ्य इवोग्रमारुतैः ॥ ४१
ततः शतानीकहतान्महागजां-
स्तथा रथान्पत्तिगणांश्च तावकान् ।
जघान भोजश्च हयानथापत-
न्विशस्त्रकृत्ताः कृतवर्मणा द्विपाः ॥ ४२
अथापरे द्रौणिशराहता द्विपा-
स्त्रयः ससर्वायुधयोधकेतवः ।
निपेतुरुर्व्यां व्यसवः प्रपातिता-
स्तथा यथा वज्रहता महाचलाः ॥ ४३
कुणिन्दराजावरजादनन्तरः
स्तनान्तरे पत्रिवरैरताडयत् ।
तवात्मजं तस्य तवात्मजः शरैः
शितैः शरीरं बिभिदे द्विपं च तम् ॥ ४४
स नागराजः सह राजसूनुना
पपात रक्तं बहु सर्वतः क्षरन् ।
शचीशवज्रप्रहतोऽम्बुदागमे
यथा जलं गैरिकपर्वतस्तथा ॥ ४५
कुणिन्दपुत्रप्रहितोऽपरद्विपः
शुकं ससूताश्वरथं व्यपोथयत् ।
ततोऽपतत्क्राथशराभिदारितः
सहेश्वरो वज्रहतो यथा गिरिः ॥ ४६
रथी द्विपस्थेन हतोऽपतच्छरैः

क्राथाधिपः पर्वतजेन दुर्जयः ।
स वाजिसूतेष्वसनस्तथापत-
यथा महावातहतो महाद्रुमः ॥ ४७
वृको द्विपस्थं गिरिराजवासिनं
भृशं शरैर्द्वादशभिः पराभिनत् ।
ततो वृकं साश्वरथं महाजवं
त्वरंश्चतुर्भिश्चरणे व्यपोथयत् ॥ ४८
स नागराजः सनियन्तृकोऽपत-
त्पराहतो बभ्रुसुतेषुभिर्भृशम् ।
स चापि देवावृधसूनुरर्दितः
पपात नुन्नः सहदेवसूनुना ॥ ४९
विषाणपोत्रापरगात्रघातिना
गजेन हन्तुं शकुनेः कुणिन्दजः ।
जगाम वेगेन भृशार्दयंश्च तं
ततोऽस्य गान्धारपतिः शिरोऽहरत् ॥ ५०
ततः शतानीकहता महागजा
हया रथाः पत्तिगणाश्च तावकाः ।
सुपर्णवातप्रहता यथा नगा-
स्तथा गता गामवशा विचूर्णिताः ॥ ५१
ततोऽभ्यविध्यद्बहुभिः शितैः शरैः
कुणिन्दपुत्रो नकुलात्मजं स्मयन् ।
ततोऽस्य कायान्निचकर्त नाकुलिः
शिरः क्षुरेणाम्बुजसंनिभाननम् ॥ ५२
ततः शतानीकमविध्यदाशुगै-
स्त्रिभिः शितैः कर्णसुतोऽर्जुनं त्रिभिः ।
त्रिभिश्च भीमं नकुलं च सप्तभि-
र्जनार्दनं द्वादशभिश्च सायकैः ॥ ५३
तदस्य कर्मातिमनुष्यकर्मणः
समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् ।
पराक्रमज्ञास्तु धनंजयस्य ते
हुतोऽयमग्नाविति तं तु मेनिरे ॥ ५४
ततः किरीटी परवीरघाती
हताश्वमालोक्य नरप्रवीरम् ।
तमभ्यधावद्वृषसेनमाहवे
स सूतजस्य प्रमुखे स्थितं तदा ॥ ५५
तमापतन्तं नरवीरमुग्रं
महाहवे बाणसहस्रधारिणम् ।
अभ्यापतत्कर्णसुतो महारथो
यथैव चेन्द्रं नमुचिः पुरातने ॥ ५६
ततोऽद्भुतेनैकशतेन पार्थं
शरैर्विद्ध्वा सूतपुत्रस्य पुत्रः ।
ननाद नादं सुमहानुभावो
विद्ध्वेव शक्रं नमुचिः पुरा वै ॥ ५७
पुनः स पार्थं वृषसेन उग्रै-
र्बाणैरविध्यद्भुजमूलमध्ये ।
तथैव कृष्णं नवभिः समार्दय-
त्पुनश्च पार्थं दशभिः शिताग्रैः ॥ ५८
ततः किरीटी रणमूर्ध्नि कोपा-
त्कृत्वा त्रिशाखां भ्रुकुटिं ललाटे ।
मुमोच बाणान्विशिखान्महात्मा
वधाय राजन्सूतपुत्रस्य संख्ये ॥ ५९
विव्याध चैनं दशभिः पृषत्कै-
र्मर्मस्वसक्तं प्रसभं किरीटी ।
चिच्छेद चास्येष्वसनं भुजौ च
क्षुरैश्चतुर्भिः शिर एव चोग्रैः ॥ ६०
स पार्थबाणाभिहतः पपात
रथाद्विबाहुर्विशिरा धरायाम् ।
सुपुष्पितः पर्णधरोऽतिकायो
वातेरितः शाल इवाद्रिशृङ्गात् ॥ ६१
तं प्रेक्ष्य बाणाभिहतं पतन्तं

रथात्सुतं सूतजः क्षिप्रकारी ।
रथं रथेनाशु जगाम वेगा-
त्किरीटिनः पुत्रवधाभितप्तः ॥ ६२

इति श्रीमहाभारते कर्णपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

संजय उवाच ।

वृषसेनं हतं दृष्ट्वा शोकामर्षसमन्वितः ।
मुक्त्वा शोकोद्भवं वारि नेत्राभ्यां सहसा वृषः ॥ १
रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपून् ।
युद्धायामर्षताम्राक्षः समाहूय धनंजयम् ॥ २
तौ रथौ सूर्यसंकाशौ वैयाघ्रपरिवारणौ ।
समेतौ ददृशुस्तत्र द्वाविवार्कौ समागतौ ॥ ३
श्वेताश्वौ पुरुषादित्यावास्थितावरिमर्दनौ ।
शुशुभाते महात्मानौ चन्द्रादित्यौ यथा दिवि ॥ ४
तौ दृष्ट्वा विस्मयं जग्मुः सर्वभूतानि मारिष ।
त्रैलोक्यविजये यत्ताविन्द्रवैरोचनाविव ॥ ५
ज्यातलनिर्ह्रादैर्बाणशङ्खरवैरपि ।
तौ रथावभिधावन्तौ समालोक्य महीक्षिताम् ॥ ६
ध्वजौ च दृष्ट्वा संसक्तौ विस्मयः समपद्यत ।
हस्तिकक्ष्यां च कर्णस्य वानरं च किरीटिनः ॥ ७
तौ रथौ संप्रसक्तौ च दृष्ट्वा भारत पार्थिवाः ।
सिंहनादरवांश्चक्रुः साधुवादांश्च पुष्कलान् ॥ ८
श्रुत्वा तु द्वैरथं ताभ्यां तत्र योधाः समन्ततः ।
चक्रुर्बाहुवलं चैव तथा चेलवलं महत् ॥ ९
आजग्मुः कुरवस्तत्र वादित्रानुगतास्तदा ।
कर्णं प्रहर्षयन्तश्च शङ्खान्दध्मुश्च पुष्कलान् ॥ १०
तथैव पाण्डवाः सर्वे हर्षयन्तो धनंजयम् ।
तूर्यशङ्खनिनादेन दिशः सर्वा व्यनादयन् ॥ ११
क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलं सर्वतोऽभवत् ।
बाहुघोषाश्च वीराणां कर्णार्जुनसमागमे ॥ १२
तौ दृष्ट्वा पुरुषव्याघ्रौ रथस्थौ रथिनां वरौ ।
प्रगृहीतमहाचापौ शरशक्तिगदायुधौ ॥ १३
वर्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शङ्खशोभिनौ ।
तूणीरवरसंपन्नौ द्वावपि स्म सुदर्शनौ ॥ १४
रक्तचन्दनदिग्धाङ्गौ समदौ वृषभाविव ।
आशीविषसमप्रख्यौ यमकालान्तकोपमौ ॥ १५
इन्द्रवृत्राविव क्रुद्धौ सूर्याचन्द्रमसप्रभौ ।
महाग्रहाविव क्रूरौ युगान्ते समुपस्थितौ ॥ १६
देवगर्भौ देवसमौ देवतुल्यौ च रूपतः ।
समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनंजयौ ॥ १७
उभौ वरायुधधरावुभौ रणकृतश्रमौ ।
उभौ च बाहुशब्देन नादयन्तौ नभस्तलम् ॥ १८
उभौ विश्रुतकर्माणौ पौरुषेण बलेन च ।
उभौ च सदृशौ युद्धे शम्बरामरराजयोः ॥ १९
कार्तवीर्यसमौ युद्धे तथा दाशरथेः समौ ।
विष्णुवीर्यसमौ वीर्ये तथा भवसमौ युधि ॥ २०
उभौ श्वेतहयौ राजन्रथप्रवरवाहिनौ ।
सारथी प्रवरौ चैव तयोरास्तां महाबलौ ॥ २१
तौ तु दृष्ट्वा महाराज राजमानौ महारथौ ।
सिद्धचारणसंघानां विस्मयः समपद्यत ॥ २२
धार्तराष्ट्रास्ततः कर्णं सबला भरतर्षभ ।
परिवव्रुर्महात्मानं क्षिप्रमाहवशोभिनम् ॥ २३
तथैव पाण्डवा हृष्टा धृष्टद्युम्नपुरोगमाः ।
परिवव्रुर्महात्मानं पार्थमप्रतिमं युधि ॥ २४
तावकानां रणे कर्णो ग्लह आसीद्विशां पते ।
तथैव पाण्डवेयानां ग्लहः पार्थोऽभवद्युधि ॥ २५
त एव सभ्यास्तत्रासन्प्रेक्षकाश्चाभवन्स्म ते ।
तत्रैषां ग्लहमानानां ध्रुवौ जयपराजयौ ॥ २६
ताभ्यां द्यूतं समायत्तं विजयायेतराय वा ।

अस्माकं पाण्डवानां च स्थितानां रणमूर्धनि ॥ २७
तौ तु स्थितौ महाराज समरे युद्धशालिनौ।
अन्योन्यं प्रतिसंरब्धावन्योन्यस्य जयैषिणौ ॥ २८
तावुभौ प्रजिहीर्षेतामिन्द्रवृत्राविवाभितः।
भीमरूपधरावास्तां महाधूमाविव ग्रहौ ॥ २९
ततोऽन्तरिक्षे साक्षेपा विवादा भरतर्षभ।
मिथो भेदाश्च भूतानामासन्कर्णार्जुनान्तरे।
व्याश्रयन्त दिशो भिन्नाः सर्वलोकाश्च मारिष ॥३०
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः।
प्रतिपक्षग्रहं चक्रुः कर्णार्जुनसमागमे ॥ ३१
द्यौरासीत्कर्णतो व्यग्रा सनक्षत्रा विशां पते।
भूमिर्विशाला पार्थस्य माता पुत्रस्य भारत ॥ ३२
सरितः सागराश्चैव गिरयश्च नरोत्तम।
वृक्षाश्चौषधयस्तत्र व्याश्रयन्त किरीटिनम् ॥ ३३
असुरा यातुधानाश्च गुह्यकाश्च परंतप।
कर्णतः समपद्यन्त खेचराणि वयांसि च ॥ ३४
रत्नानि निधयः सर्वे वेदाश्चाख्यानपञ्चमाः।
सोपवेदोपनिषदः सरहस्याः ससंग्रहाः ॥ ३५
वासुकिश्चित्रसेनश्च तक्षकश्चोपतक्षकः।
पर्वताश्च तथा सर्वे काद्रवेयाश्च सान्वयाः।
विषवन्तो महारोषा नागाश्चार्जुनतोऽभवन् ॥ ३६
ऐरावताः सौरभेया वैशालेयाश्च भोगिनः।
एतेऽभवन्नर्जुनतः क्षुद्रसर्पास्तु कर्णतः ॥ ३७
ईहामृगा व्याडमृगा मङ्गल्याश्च मृगद्विजाः।
पार्थस्य विजयं राजन्सर्व एवाभिसंश्रिताः ॥ ३८
वसवो मरुतः साध्या रुद्रा विश्वेऽश्विनौ तथा।
अग्निरिन्द्रश्च सोमश्च पवनश्च दिशो दश।
धनंजयमुपाजग्मुरादित्याः कर्णतोऽभवन् ॥ ३९
देवास्तु पितृभिः सार्धं सगणार्जुनतोऽभवन्।
यमो वैश्रवणश्चैव वरुणश्च यतोऽर्जुनः ॥ ४०
देवब्रह्मनृपर्षीणां गणाः पाण्डवतोऽभवन्।
तुम्बुरुप्रमुखा राजन्गन्धर्वाश्च यतोऽर्जुनः ॥ ४१
प्रावेयाः सह मौनेयैर्गन्धर्वाप्सरसां गणाः।
ईहामृगव्याडमृगैर्द्विपाश्च रथपत्तिभिः ॥ ४२
उह्यमानास्तथा मेघैर्वायुना च मनीषिणः।
दिदृक्षवः समाजग्मुः कर्णार्जुनसमागमम् ॥ ४३
देवदानवगन्धर्वा नागा यक्षाः पतत्रिणः।
महर्षयो वेदविदः पितरश्च स्वधाभुजः ॥ ४४
तपो विद्यास्तथौषध्यो नानारूपाम्बरत्विषः।
अन्तरिक्षे महाराज विनदन्तोऽवतस्थिरे ॥ ४५
ब्रह्मा ब्रह्मर्षिभिः सार्धं प्रजापतिभिरेव च।
भवेनावस्थितो यानं दिव्यं तं देशमभ्ययात् ॥ ४६
दृष्ट्वा प्रजापतिं देवाः स्वयंभुवमुपागमन्।
समोऽस्तु देव विजय एतयोर्नरसिंहयोः ॥ ४७
तदुपश्रुत्य मघवा प्रणिपत्य पितामहम्।
कर्णार्जुनविनाशेन मा नश्यत्वखिलं जगत् ॥ ४८
स्वयंभो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः।
तत्तथास्तु नमस्तेऽस्तु प्रसीद भगवन्मम ॥ ४९
ब्रह्मेशानावथो वाक्यमूचतुस्त्रिदशेश्वरम्।
विजयो ध्रुव एवास्तु विजयस्य महात्मनः ॥ ५०
मनस्वी बलवाञ्शूरः कृतास्त्रश्च तपोधनः।
बिभर्ति च महातेजा धनुर्वेदमशेषतः ॥ ५१
अतिक्रमेच्च माहात्म्याद्दिष्टमेतस्य पर्ययात्।
अतिक्रान्ते च लोकानामभावो नियतो भवेत् ॥५२
न विद्यते व्यवस्थानं कृष्णयोः क्रुद्धयोः क्वचित्।
स्रष्टारौ ह्यसतश्चोभौ सतश्च पुरुषर्षभौ ॥ ५३
नरनारायणावेतौ पुराणावृषिसत्तमौ।
अनियत्तौ नियन्तारावभीतौ स्म परंतपौ ॥ ५४
कर्णो लोकानयं मुख्यान्प्राप्नोतु पुरुषर्षभः।
वीरो वैकर्तनः शूरो विजयस्त्वस्तु कृष्णयोः ॥ ५५

वसूनां च सलोकत्वं मरुतां वा समाप्नुयात् ।
सहितो द्रोणभीष्माभ्यां नाकलोके महीयताम् ॥ ५६
इत्युक्तो देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः ।
आमन्त्र्य सर्वभूतानि ब्रह्मेशानानुशासनात् ॥ ५७
श्रुतं भवद्भिर्यत्प्रोक्तं भगवद्भ्यां जगद्धितम् ।
तत्तथा नान्यथा तद्धि तिष्ठध्वं गतमन्यवः ॥ ५८
इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष ।
विस्मितान्यभवन्राजन्पूजयांचक्रिरे च तत् ॥ ५९
व्यसृजंश्च सुगन्धीनि नानारूपाणि खात्तथा ।
पुष्पवर्षाणि विबुधा देवतूर्याण्यवादयन् ॥ ६०
दिदृक्षवश्चाप्रतिमं द्वैरथं नरसिंहयोः ।
देवदानवगन्धर्वाः सर्व एवावतस्थिरे ।
रथौ च तौ श्वेतहयौ युक्तकेतू महास्वनौ ॥ ६१
समागता लोकवीराः शङ्खान्दध्मुः पृथक्पृथक् ।
वासुदेवार्जुनौ वीरौ कर्णशल्यौ च भारत ॥ ६२
तद्भीरुसंत्रासकरं युद्धं समभवत्तदा ।
अन्योन्यस्पर्धिनोर्वीर्ये शक्रशम्बरयोरिव ॥ ६३
तयोर्ध्वजौ वीतमालौ शुशुभाते रथस्थितौ ।
पृथग्रूपौ समार्छन्तौ क्रोधं युद्धे परस्परम् ॥ ६४
कर्णस्याशीविषनिभा रत्नसारवती दृढा ।
पुरंदरधनुःप्रख्या हस्तिकक्ष्या व्यराजत ॥ ६५
कपिश्रेष्ठस्तु पार्थस्य व्यादितास्यो भयंकरः ।
भीषयन्नेव दंष्ट्राभिर्दुर्निरीक्ष्यो रविर्यथा ॥ ६६
युद्धाभिलाषुको भूत्वा ध्वजो गाण्डीवधन्वनः ।
कर्णध्वजमुपातिष्ठत्सोऽवर्धीदभिनर्दयन् ॥ ६७
उत्पत्य च महावेगः कक्ष्यामभ्यहनत्कपिः ।
नखैश्च दशनैश्चैव गरुडः पन्नगं यथा ॥ ६८
सुकिङ्किणीकाभरणा कालपाशोपमायसी ।
अभ्यद्रवत्सुसंक्रुद्धा नागकक्ष्या महाकपिम् ॥ ६९
उभयोरुत्तमे युद्धे द्वैरथे द्यूत आहृते ।
प्रकुर्वाते ध्वजौ युद्धं प्रत्यहेषन्हयान्हयाः ॥ ७०
अविध्यत्पुण्डरीकाक्षः शल्यं नयनसायकैः ।
स चापि पुण्डरीकाक्षं तथैवाभिसमैक्षत ॥ ७१
तत्राजयद्वासुदेवः शल्यं नयनसायकैः ।
कर्णं चाप्यजयद्दृष्ट्या कुन्तीपुत्रो धनंजयः ॥ ७२
अथाब्रवीत्सूतपुत्रः शल्यमाभाष्य सस्मितम् ।
यदि पार्थो रणे हन्यादद्य मामिह कर्हिचित् ।
किमुत्तरं तदा ते स्यात्सखे सत्यं ब्रवीहि मे ॥ ७३

शल्य उवाच ।

यदि कर्ण रणे हन्यादद्य त्वां श्वेतवाहनः ।
उभावेकरथेनाहं हन्यां माधवपाण्डवौ ॥ ७४

संजय उवाच ।

एवमेव तु गोविन्दमर्जुनः प्रत्यभाषत ।
तं प्रहस्याब्रवीत्कृष्णः पार्थं परमिदं वचः ॥ ७५
पतेद्दिवाकरः स्थानाच्छीर्येतानेकधा क्षितिः ।
शैत्यमग्निरियान्न त्वा कर्णो हन्याद्धनंजयम् ॥ ७६
यदि त्वेवं कथंचित्स्याल्लोकपर्यसनं यथा ।
हन्यां कर्णं तथा शल्यं बाहुभ्यामेव संयुगे ॥ ७७
इति कृष्णवचः श्रुत्वा प्रहसन्कपिकेतनः ।
अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम् ।
ममाप्येतावपर्याप्तौ कर्णशल्यौ जनार्दन ॥ ७८
सपताकाध्वजं कर्णं सशल्यरथवाजिनम् ।
सच्छत्रकवचं चैव सशक्तिशरकार्मुकम् ॥ ७९
द्रष्टास्यद्य शरैः कर्णं रणे कृत्तमनेकधा ।
अद्यैनं सरथं साश्वं सशक्तिकवचायुधम् ।
न हि मे शाम्यते वैरं कृष्णां यत्प्राहसत्पुरा ॥ ८०
अद्य द्रष्टासि गोविन्द कर्णमुन्मथितं मया ।
वारणेनेव मत्तेन पुष्पितं जगतीरुहम् ॥ ८१
अद्य ता मधुरा वाचः श्रोतासि मधुसूदन ।
अद्याभिमन्युजननीमनृणः सान्त्वयिष्यसि ।

कुन्तीं पितृष्वसारं च संप्रहृष्टो जनार्दन ॥ ८२
अद्य बाष्पमुखीं कृष्णां सान्त्वयिष्यसि माधव ।
वाग्भिश्चामृतकल्पाभिर्धर्मराजं युधिष्ठिरम् ॥ ८३

इति श्रीमहाभारते कर्णपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

संजय उवाच ।

तद्देवनागासुरसिद्धसंघै-
र्गन्धर्वयक्षाप्सरसां च संघैः ।
ब्रह्मर्षिराजर्षिसुपर्णजुष्टं
बभौ वियद्विस्मयनीयरूपम् ॥ १
नानद्यमानं निनदैर्मनोज्ञै-
र्वादित्रगीतस्तुतिभिश्च नृत्तैः ।
सर्वेऽन्तरिक्षे ददृशुर्मनुष्याः
खस्थांश्च तान्विस्मयनीयरूपान् ॥ २
ततः प्रहृष्टाः कुरुपाण्डुयोधा
वादित्रपत्त्रायुधसिंहनादैः ।
निनादयन्तो वसुधां दिशश्च
स्वनेन सर्वे द्विषतो निजघ्नुः ॥ ३
नानाश्वमातङ्गरथायुताकुलं
वरासिशक्त्यृष्टिनिपातदुःसहम् ।
अभीरुजुष्टं हतदेहसंकुलं
रणाजिरं लोहितरक्तमाबभौ ॥ ४
तथा प्रवृत्तेऽस्त्रभृतां पराभवे
धनंजयश्चाधिरथिश्च सायकैः ।
दिशश्च सैन्यं च शितैरजिह्मगैः
परस्परं प्रोर्णुवतुः स्म दंशितौ ॥ ५
ततस्त्वदीयाश्च परे च सायकैः
कृतेऽन्धकारे विविदुर्न किंचन ।
भयात्तु तावेव रथौ समाश्रयं-
स्तमोनुदौ खे प्रसृता इवांशवः ॥ ६
ततोऽस्त्रमस्त्रेण परस्परस्य तौ
विधूय वाताविव पूर्वपश्चिमौ ।
घनान्धकारे वितते तमोनुदौ
यथोदितौ तद्वदतीव रेजतुः ॥ ७
न चाभिमन्तव्यमिति प्रचोदिताः
परे त्वदीयाश्च तदावतस्थिरे ।
महारथौ तौ परिवार्य सर्वतः
सुरासुरा वासवशम्बराविव ॥ ८
मृदङ्गभेरीपणवानकस्वनै-
र्निनादिते भारत शङ्खनिस्वनैः ।
ससिंहनादौ बभतुर्नरोत्तमौ
शशाङ्कसूर्याविव मेघसंप्लवे ॥ ९
महाधनुर्मण्डलमध्यगावुभौ
सुवर्चसौ बाणसहस्ररश्मिनौ ।
दिधक्षमाणौ सचराचरं जग-
द्युगास्तसूर्याविव दुःसहौ रणे ॥ १०
उभावजेयावहितान्तकावुभौ
जिघांसतुस्तौ कृतिनौ परस्परम् ।
महाहवे वीरवरौ समीयतु-
र्यथेन्द्रजम्भाविव कर्णपाण्डवौ ॥ ११
ततो महास्त्राणि महाधनुर्धरौ
विमुञ्चमानाविषुभिर्भयानकैः ।
नराश्वनागानमितौ निजघ्नतुः
परस्परं जघ्नतुरुत्तमेषुभिः ॥ १२
ततो विसस्रुः पुनरर्दिताः शरै-
र्नरोत्तमाभ्यां कुरुपाण्डवाश्रयाः ।
सनागपत्त्यश्वरथा दिशो गता-
स्तथा यथा सिंहभयाद्वनौकसः ॥ १३
ततस्तु दुर्योधनभोजसौबलाः

कृपश्च शारद्वतसूनुना सह ।
महारथाः पञ्च धनंजयाच्युतौ
शरैः शरीरान्तकरैरताडयन् ॥ १४
धनूंषि तेषामिषुधीन्हयान्ध्वजा-
न्रथांश्च सूतांश्च धनंजयः शरैः ।
समं च चिच्छेद पराभिनच्च ता-
ञ्शरोत्तमैर्द्वादशभिश्च सूतजम् ॥ १५
अथाभ्यधावंस्त्वरिताः शतं रथाः
शतं च नागार्जुनमाततायिनः ।
शकास्तुखारा यवनाश्च सादिनः
सहैव काम्बोजवरैर्जिघांसवः ॥ १६
वरायुधान्पाणिगतान्करैः सह
क्षुरैर्न्यकृन्तंस्त्वरिताः शिरांसि च ।
हयांश्च नागांश्च रथांश्च युध्यतां
धनंजयः शत्रुगणं तमक्षिणोत् ॥ १७
ततोऽन्तरिक्षे सुरतूर्यनिस्वनाः
ससाधुवादा हृषितैः समीरिताः ।
निपेतुरप्युत्तमपुष्पवृष्टयः
सुरूपगन्धाः पवनेरिताः शिवाः ॥ १८
तदद्भुतं देवमनुष्यसाक्षिकं
समीक्ष्य भूतानि विसिष्मियुर्नृप ।
तवात्मजः सूतसुतश्च न व्यथां
न विस्मयं जग्मतुरेकनिश्चयौ ॥ १९
अथाब्रवीद्द्रोणसुतस्तवात्मजं
करं करेण प्रतिपीड्य सान्त्वयन् ।
प्रसीद दुर्योधन शाम्य पाण्डवै-
रलं विरोधेन धिगस्तु विग्रहम् ॥ २०
हतो गुरुर्ब्रह्मसमो महास्त्रवि-
त्तथैव भीष्मप्रमुखा नरर्षभाः ।
अहं त्ववध्यो मम चापि मातुलः
प्रशाधि राज्यं सह पाण्डवैश्चिरम् ॥ २१
धनंजयः स्थास्यति वारितो मया
जनार्दनो नैव विरोधमिच्छति ।
युधिष्ठिरो भूतहिते सदा रतो
वृकोदरस्तद्वशगस्तथा यमौ ॥ २२
त्वया च पार्थैश्च परस्परेण
प्रजाः शिवं प्राप्नुयुरिच्छति त्वयि ।
व्रजन्तु शेषाः स्वपुराणि पार्थिवा
निवृत्तवैराश्च भवन्तु सैनिकाः ॥ २३
न चेद्वचः श्रोष्यसि मे नराधिप
ध्रुवं प्रतप्तासि हतोऽरिभिर्युधि ।
इदं च दृष्टं जगता सह त्वया
कृतं यदेकेन किरीटमालिना ।
यथा न कुर्याद्बलभिन्न चान्तको
न च प्रचेता भगवान्न यक्षराट् ॥ २४
अतोऽपि भूयांश्च गुणैर्धनंजयः
स चाभिपत्स्यत्यखिलं वचो मम ।
तवानुयात्रां च तथा करिष्यति
प्रसीद राजञ्जगतः शमाय वै ॥ २५
ममापि मानः परमः सदा त्वयि
ब्रवीम्यतस्त्वां परमाच्च सौहृदात् ।
निवारयिष्यामि हि कर्णमप्यहं
यदा भवान्सप्रणयो भविष्यति ॥ २६
वदन्ति मित्रं सहजं विचक्षणा-
स्तथैव साम्ना च धनेन चार्जितम् ।
प्रतापतश्चोपनतं चतुर्विधं
तदस्ति सर्वं त्वयि पाण्डवेषु च ॥ २७
निसर्गतस्ते तव वीर बान्धवाः
पुनश्च साम्ना च समाप्नुहि स्थिरम् ।
त्वयि प्रसन्ने यदि मित्रतामियु-

ध्रुवं नरेन्द्रेन्द्र तथा त्वमाचर ॥ २८
स एवमुक्तः सुहृदा वचो हितं
विचिन्त्य निःश्वस्य च दुर्मनाब्रवीत् ।
यथा भवानाह सखे तथैव त-
न्ममापि च ज्ञापयतो वचः शृणु ॥ २९
निहत्य दुःशासनमुक्तवान्बहु
प्रसह्य शार्दूलवदेष दुर्मतिः ।
वृकोदरस्तद्धृदये मम स्थितं
न तत्परोक्षं भवतः कुतः शमः ॥ ३०
न चापि कर्णं गुरुपुत्र संस्तवा-
दुपारमेत्यर्हसि वक्तुमच्युत ।
श्रमेण युक्तो महताद्य फल्गुन-
स्तमेष कर्णः प्रसभं हनिष्यति ॥ ३१
तमेवमुक्त्वाभ्यनुनीय चासकृ-
त्तवात्मजः स्वाननुशास्ति सैनिकान् ।
समाघ्नताभिद्रवताहितानिमा-
न्सबाणशब्दान्किमु जोषमास्यते ॥ ३२

इति श्रीमहाभारते कर्णपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

संजय उवाच ।

तौ शङ्खभेरीनिनदे समृद्धे
समीयतुः श्वेतहयौ नराग्र्यौ ।
वैकर्तनः सूतपुत्रोऽर्जुनश्च
दुर्मन्त्रिते तव पुत्रस्य राजन् ॥ १
यथा गजौ हैमवतौ प्रभिन्नौ
प्रगृह्य दन्ताविव वाशितार्थे ।
तथा समाजग्मतुरुग्रवेगौ
धनंजयश्चाधिरथिश्च वीरौ ॥ २
बलाहकेनेव यथा बलाहको
यदृच्छया वा गिरिणा गिरिर्यथा ।
तथा धनुर्ज्यातलनेमिनिस्वनौ
समीयतुस्ताविषुवर्षवर्षिणौ ॥ ३
प्रवृद्धशृङ्गद्रुमवीरुदोषधी
प्रवृद्धनानाविधपर्वतौकसौ ।
यथाचलौ वा गलितौ महाबलौ
तथा महास्त्रैरितरेतरं घ्नतः ॥ ४
स संनिपातस्तु तयोर्महानभू-
त्सुरेशवैरोचनयोर्यथा पुरा ।
शरैर्विभुग्नाङ्गनियन्तृवाहनः
सुदुःसहोऽन्यैः पटुशोणितोदकः ॥ ५
प्रभूतपद्मोत्पलमत्स्यकच्छपौ
महाह्रदौ पक्षिगणानुनादितौ ।
सुसंनिकृष्टावनिलोद्धतौ यथा
तथा रथौ तौ ध्वजिनौ समीयतुः ॥ ६
उभौ महेन्द्रस्य समानविक्रमा-
वुभौ महेन्द्रप्रतिमौ महारथौ ।
महेन्द्रवज्रप्रतिमैश्च सायकै-
र्महेन्द्रवृत्राविव संप्रजह्रतुः ॥ ७
सनागपत्त्यश्वरथे उभे बले
विचित्रवर्णाभरणाम्बरस्रजे ।
चकम्पतुश्चोन्नमतः स्म विस्मया-
द्वियद्गताश्चार्जुनकर्णसंयुगे ॥ ८
भुजाः सवज्राङ्गुलयः समुच्छ्रिताः
ससिंहनादा हृषितैर्दिदृक्षुभिः ।
यदार्जुनं मत्तमिव द्विपो द्विपं
समभ्ययादाधिरथिर्जिघांसया ॥ ९
अभ्यक्रोशन्सोमकास्तत्र पार्थं
त्वरस्व याह्यर्जुन विध्य कर्णम् ।

छिन्द्ध्यस्य मूर्धानमलं चिरेण
श्रद्धां च राज्याद्धृतराष्ट्रसूनोः ॥ १०
यथास्माकं बहवस्तत्र योधाः
कर्णं तदा याहि याहीत्यवोचन् ।
अथार्जुनं कर्ण ततः सचीराः
पुनर्वनं यान्तु चिराय पार्थाः ॥ ११
ततः कर्णः प्रथमं तत्र पार्थं
महेषुभिर्दशभिः पर्यविध्यत् ।
तमर्जुनः प्रत्यविध्यच्छिताग्रैः
कक्षान्तरे दशभिरतीव क्रुद्धः ॥ १२
परस्परं तौ विशिखैः सुतीक्ष्णै-
स्ततक्षतुः सूतपुत्रोऽर्जुनश्च ।
परस्परस्यान्तरेप्सू विमर्दे
सुभीममभ्याययतुः प्रहृष्टौ ॥ १३
अमृष्यमाणश्च महाविमर्दे
तत्राक्रुध्यद्भीमसेनो महात्मा ।
अथाब्रवीत्पाणिना पाणिमाघ्न-
न्संदष्टौष्ठो नृत्यति वादयन्निव ।
कथं नु त्वां सूतपुत्रः किरीटि-
न्महेषुभिर्दशभिरविध्यदग्रे ॥ १४
यया धृत्या सर्वभूतान्यजैषी-
र्ग्रासं ददद्वह्नये खाण्डवे त्वम् ।
तया धृत्या सूतपुत्रं जहि त्व-
महं वैनं गदया पोथयिष्ये ॥ १५
अथाब्रवीद्वासुदेवोऽपि पार्थं
दृष्ट्वा रथेषून्प्रतिहन्यमानान् ।
अमीमृदत्सर्वथा तेऽद्य कर्णो
ह्यस्त्रैरस्त्राणि किमिदं किरीटिन् ॥ १६
स वीर किं मुह्यसि नावधीयसे
नदन्त्येते कुरवः संप्रहृष्टाः ।
कर्णं पुरस्कृत्य विदुर्हि सर्वे
त्वदस्त्रमस्त्रैर्विनिपात्यमानम् ॥ १७
यया धृत्या निहतं तामसास्त्रं
युगे युगे राक्षसाश्चापि घोराः ।
दम्भोद्भवाश्चासुराश्चाहवेषु
तया धृत्या त्वं जहि सूतपुत्रम् ॥ १८
अनेन वास्य क्षुरनेमिनाद्य
संछिन्द्धि मूर्धानमरेः प्रसह्य ।
मया निसृष्टेन सुदर्शनेन
वज्रेण शक्रो नमुचेरिवारेः ॥ १९
किरातरूपी भगवान्यया च
त्वया महत्या परितोषितोऽभूत् ।
तां त्वं धृतिं वीर पुनर्गृहीत्वा
सहानुबन्धं जहि सूतपुत्रम् ॥ २०
ततो महीं सागरमेखलां त्वं
सपत्तनां ग्रामवतीं समृद्धाम् ।
प्रयच्छ राज्ञे निहतारिसंघां
यशश्च पार्थातुलमाप्नुहि त्वम् ॥ २१
संचोदितो भीमजनार्दनाभ्यां
स्मृत्वा तदात्मानमवेक्ष्य सत्त्वम् ।
महात्मनश्चागमने विदित्वा
प्रयोजनं केशवमित्युवाच ॥ २२
प्रादुष्करोम्येष महास्त्रमुग्रं
शिवाय लोकस्य वधाय सौतेः ।
तन्मेऽनुजानातु भवान्सुराश्च
ब्रह्मा भवो ब्रह्मविदश्च सर्वे ॥ २३
इत्यूचिवान्ब्राह्ममसह्यमस्त्रं
प्रादुश्चक्रे मनसा संविधेयम् ।
ततो दिशश्च प्रदिशश्च सर्वाः
समावृणोत्सायकैर्भूरितेजाः ।

ससर्ज बाणान्भरतर्षभोऽपि
शतंशतानेकवदाशुवेगान् ॥ २४
वैकर्तनेनापि तथाजिमध्ये
सहस्रशो बाणगणा विसृष्टाः ।
ते घोषिणः पाण्डवमभ्युपेयुः
पर्जन्यमुक्ता इव वारिधाराः ॥ २५
स भीमसेनं च जनार्दनं च
किरीटिनं चाप्यमनुष्यकर्मा ।
त्रिभिस्त्रिभिर्भीमबलो निहत्य
ननाद घोरं महता स्वरेण ॥ २६
स कर्णबाणाभिहतः किरीटी
भीमं तथा प्रेक्ष्य जनार्दनं च ।
अमृष्यमाणः पुनरेव पार्थः
शरान्दशाष्टौ च समुद्बबर्ह ॥ २७
सुषेणमेकेन शरेण विद्ध्वा
शल्यं चतुर्भिस्त्रिभिरेव कर्णम् ।
ततः सुमुक्तैर्दशभिर्जघान
सभापतिं काञ्चनवर्मनद्धम् ॥ २८
स राजपुत्रो विशिरा विबाहु-
र्विवाजिसूतो विधनुर्विकेतुः ।
ततो रथाग्रादपतत्प्रभग्नः
परश्वधैः शाल इवाभिकृत्तः ॥ २९
पुनश्च कर्णं त्रिभिरष्टभिश्च
द्वाभ्यां चतुर्भिर्दशभिश्च विद्ध्वा ।
चतुःशतान्द्विरदान्सायुधीया-
न्हत्वा रथानष्टशतं जघान ।
सहस्रमश्वांश्च पुनश्च सादी-
नष्टौ सहस्राणि च पत्तिवीरान् ॥ ३०
दृष्ट्वाजिमुख्यावथ युध्यमानौ
दिदृक्षवः शूरवरावरिघ्नौ ।
कर्णं च पार्थं च नियम्य वाहा-
न्खस्था महीस्थाश्च जनावतस्थुः ॥ ३१
ततो धनुर्ज्या सहसातिकृष्टा
सुघोषमाच्छिद्यत पाण्डवस्य ।
तस्मिन्क्षणे सूतपुत्रस्तु पार्थं
समाचिनोत्क्षुद्रकाणां शतेन ॥ ३२
निर्मुक्तसर्पप्रतिमैश्च तीक्ष्णै-
स्तैलप्रधौतैः खगपत्रवाजैः ।
षष्ट्या नाराचैर्वासुदेवं बिभेद
तदन्तरं सोमकाः प्राद्रवन्त ॥ ३३
ततो धनुर्ज्यामवधम्य शीघ्रं
शरानस्तानाधिरथेर्विधम्य ।
सुसंरब्धः कर्णशरक्षताङ्गो
रणे पार्थः सोमकान्प्रत्यगृह्णात् ।
न पक्षिणः संपतन्त्यन्तरिक्षे
क्षेपीयसास्त्रेण कृतेऽन्धकारे ॥ ३४
शल्यं च पार्थो दशभिः पृषत्कै-
र्भृशं तनुत्रे प्रहसन्नविध्यत् ।
ततः कर्णं द्वादशभिः सुमुक्तै-
र्विद्ध्वा पुनः सप्तभिरभ्यविध्यत् ॥ ३५
स पार्थबाणासनवेगनुन्नै-
र्दृढाहतः पत्रिभिरुग्रवेगैः ।
विभिन्नगात्रः क्षतजोक्षिताङ्गः
कर्णो बभौ रुद्र इवाततेषुः ॥ ३६
ततस्त्रिभिश्च त्रिदशाधिपोपमं
शरैर्बिभेदाधिरथिर्धनंजयम् ।
शरांस्तु पञ्च ज्वलितानिवोरगा-
न्प्रवीरयामास जिघांसुरच्युते ॥ ३७
ते वर्म भित्त्वा पुरुषोत्तमस्य
सुवर्णचित्रं न्यपतन्सुमुक्ताः ।

वेगेन गामाविविशुः सुवेगाः
स्नात्वा च कर्णाभिमुखाः प्रतीयुः ॥ ३८
ताञ्शक्रभल्लैस्त्वरितैः सुमुक्तै-
स्त्रिधा त्रिधैकैकमथोच्चकर्त ।
धनंजयस्ते न्यपतन्पृथिव्यां
महाहयस्तक्षकपुत्रपक्षाः ॥ ३९
ततः प्रजज्वाल किरीटमाली
क्रोधेन कक्षं प्रदहन्निवाग्निः ।
स कर्णमाकर्णविकृष्टसृष्टैः
शरैः शरीरान्तकरैर्ज्वलद्भिः ।
मर्मस्वविध्यत्स चचाल दुःखा-
द्धैर्यात्तु तस्थावतिमात्रधैर्यः ॥ ४०
ततः शरौघैः प्रदिशो दिशश्च
रविप्रभा कर्णरथश्च राजन् ।
अदृश्य आसीत्कुपिते धनंजये
तुषारनीहारवृतं यथा नभः ॥ ४१
स चक्ररक्षानथ पादरक्षा-
न्पुरःसरान्पृष्ठगोपांश्च सर्वान् ।
दुर्योधनेनानुमतानरिघ्ना-
न्समुच्चितान्सुरथान्सारभूतान् ॥ ४२
द्विसाहस्रान्समरे सव्यसाची
कुरुप्रवीरानृषभः कुरूणाम् ।
क्षणेन सर्वान्सरथाश्वसूता-
न्निनाय राजन्क्षयमेकवीरः ॥ ४३
अथापलायन्त विहाय कर्णं
तवात्मजाः कुरवश्चावशिष्टाः ।
हतानवाकीर्य शरक्षतांश्च
लालप्यमानांस्तनयान्पितॄंश्च ॥ ४४
स सर्वतः प्रेक्ष्य दिशो विशून्या
भयावदीर्णैः कुरुभिर्विहीनः ।
न विव्यथे भारत तत्र कर्णः
प्रतीपमेवार्जुनमभ्यधावत् ॥ ४५

इति श्रीमहाभारते कर्णपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

संजय उवाच ।

ततोऽपयाताः शरपातमात्र-
मवस्थिताः कुरवो भिन्नसेनाः ।
विद्युत्प्रकाशं ददृशुः समन्ता-
द्धनंजयास्त्रं समुदीर्यमाणम् ॥ १
तदर्जुनास्त्रं ग्रसते स्म वीरा-
न्वियत्तथाकाशमनन्तघोषम् ।
क्रुद्धेन पार्थेन तदाशु सृष्टं
वधाय कर्णस्य महाविमर्दे ॥ २
रामादुपात्तेन महामहिम्ना
आथर्वणेनारिविनाशनेन ।
तदर्जुनास्त्रं व्यधमद्दहन्तं
पार्थं च बाणैर्निशितैर्निजघ्ने ॥ ३
ततो विमर्दः सुमहान्बभूव
तस्यार्जुनस्याधिरथेश्च राजन् ।
अन्योन्यमासादयतोः पृषत्कै-
र्विषाणघातैर्द्विपयोरिवोग्रैः ॥ ४
ततो रिपुघ्नं समधत्त कर्णः
सुसंशितं सर्पमुखं ज्वलन्तम् ।
रौद्रं शरं संयति सुप्रधौतं
पार्थार्थमत्यर्थचिराय गुप्तम् ॥ ५
सदार्चितं चन्दनचूर्णशायिनं
सुवर्णनालीशयनं महाविषम् ।
प्रदीप्तमैरावतवंशसंभवं

शिरो जिहीर्षुर्युधि फल्गुनस्य ॥ ६
तमब्रवीन्मद्रराजो महात्मा
वैकर्तनं प्रेक्ष्य हि संहितेषुम् ।
न कर्ण ग्रीवामिषुरेष प्राप्स्यते
संलक्ष्य संधत्स्व शरं शिरोघ्नम् ॥ ७
अथाब्रवीत्क्रोधसंरक्तनेत्रः
कर्णः शल्यं संधितेषुः प्रसह्य ।
न संधत्ते द्विः शरं शल्य कर्णो
न मादृशाः शाठ्ययुक्ता भवन्ति ॥ ८
तथैवमुक्त्वा विससर्ज तं शरं
बलाहकं वर्षघनाभिपूजितम् ।
हतोऽसि वै फल्गुन इत्यवोच-
स्ततस्त्वरन्नूर्जितमुत्ससर्ज ॥ ९
संधीयमानं भुजगं दृष्ट्वा कर्णेन माधवः ।
आक्रम्य स्यन्दनं पद्भ्यां बलेन बलिनां वरः ॥ १०
अवगाढे रथे भूमौ जानुभ्यामगमन्हयाः ।
ततः शरः सोऽभ्यहनत्किरीटं तस्य धीमतः ॥ ११
अथार्जुनस्योत्तमगात्रभूषणं
धरावियद्द्योसलिलेषु विश्रुतम् ।
बलाब्रसर्गोत्तमयत्नमन्युभिः
शरेण मूर्ध्नः स जहार सूतजः ॥ १२
दिवाकरेन्दुज्वलनग्रहत्विषं
सुवर्णमुक्तामणिजालभूषितम् ।
पुरंदरार्थं तपसा प्रयत्नतः
स्वयं कृतं यद्भुवनस्य सूनुना ॥ १३
महार्हरूपं द्विषतां भयंकरं
विभाति चात्यर्थसुखं सुगन्धि तत् ।
निजघ्नुषे देवरिपून्सुरेश्वरः
स्वयं ददौ यत्सुमनाः किरीटिने ॥ १४
हराम्बुपाखण्डलवित्तगोप्तृभिः
पिनाकपाशाशनिसायकोत्तमैः ।
सुरोत्तमैरप्यविषह्यमर्दितुं
प्रसह्य नागेन जहार यद्वृषः ॥ १५
तदुत्तमेषून्मथितं विषाग्निना
प्रदीप्तमर्चिष्मदभिक्षिति प्रियम् ।
पपात पार्थस्य किरीटमुत्तमं
दिवाकरोऽस्तादिव पर्वताज्ज्वलन् ॥ १६
ततः किरीटं बहुरत्नमण्डितं
जहार नागोऽर्जुनमूर्धतो बलात् ।
गिरेः सुजाताङ्कुरपुष्पितद्रुमं
महेन्द्रवज्रः शिखरं यथोत्तमम् ॥ १७
मही वियद्द्यौः सलिलानि वायुना
यथा विभिन्नानि विभान्ति भारत ।
तथैव शब्दो भुवनेष्वभूत्तदा
जना व्यवस्यन्व्यथिताश्च चस्खलुः ॥
ततः समुद्ग्रथ्य सितेन वाससा
स्वमूर्धजानव्यथितः स्थितोऽर्जुनः ।
विभाति संपूर्णमरीचिभास्वता
शिरोगतेनोदयपर्वतो यथा ॥ १९
बलाहकः कर्णभुजेरितस्ततो
हुताशनार्कप्रतिमद्युतिर्महान् ।
महोरगः कृतवैरोऽर्जुनेन
किरीटमासाद्य समुत्पपात ॥ २०
तमब्रवीद्विद्धि कृतागसं मे
कृष्णाद्य मातुर्वधजातवैरम् ।
ततः कृष्णः पार्थमुवाच संख्ये
महोरगं कृतवैरं जहि त्वम् ॥ २१
स एवमुक्तो मधुसूदनेन
गाण्डीवधन्वा रिपुषूग्रधन्वा ।
उवाच को न्वेष ममाद्य नागः

स्वयं य आगाद्गरुडस्य वक्त्रम् ॥ २२

कृष्ण उवाच ।

योऽसौ त्वया खाण्डवे चित्रभानुं
संतर्पयानेन धनुर्धरेण ।
वियद्गतो बाणनिकृत्तदेहो
ह्यनेकरूपो निहतास्य माता ॥ २३
ततस्तु जिष्णुः परिहृत्य शेषां-
श्चिच्छेद षड्भिर्निशितैः सुधारैः ।
नागं वियत्तिर्यगिवोत्पतन्तं
स छिन्नगात्रो निपपात भूमौ ॥ २४
तस्मिन्मुहूर्ते दशभिः पृषत्कैः
शिलाशितैर्बर्हिणवाजितैश्च ।
विव्याध कर्णः पुरुषप्रवीरं
धनंजयं तिर्यगवेक्षमाणम् ॥ २५
ततोऽर्जुनो द्वादशभिर्विमुक्तै-
राकर्णमुक्तैर्निशितैः समर्प्य ।
नाराचमाशीविषतुल्यवेग-
माकर्णपूर्णायतमुत्ससर्ज ॥ २६
स चित्रवर्मेषुवरो विदार्य
प्राणान्निरस्यन्निव साधु मुक्तः ।
कर्णस्य पीत्वा रुधिरं विवेश
वसुंधरां शोणितवाजदिग्धः ॥ २७
ततो वृषो बाणनिपातकोपितो
महोरगो दण्डविघट्टितो यथा ।
तथाशुकारी व्यसृजच्छरोत्तमा-
न्महाविषः सर्प इवोत्तमं विषम् ॥ २८
जनार्दनं द्वादशभिः पराभिन-
न्नवैर्नवत्या च शरैस्तथार्जुनम् ।
शरेण घोरेण पुनश्च पाण्डवं
विभिद्य कर्णोऽभ्यनदज्जहास च ॥ २९
तमस्य हर्षं ममृषे न पाण्डवो
बिभेद मर्माणि ततोऽस्य मर्मवित् ।
परं शरैः पत्रिभिरिन्द्रविक्रम-
स्तथा यथेन्द्रो बलमोजसाहनत् ॥ ३०
ततः शराणां नवतीर्नवार्जुनः
ससर्ज कर्णेऽन्तकदण्डसंनिभाः ।
शरैर्भृशायस्ततनुः प्रविव्यथे
तथा यथा वज्रविदारितोऽचलः ॥ ३१
मणिप्रवेकोत्तमवज्रहाटकै-
रलंकृतं चास्य वराङ्गभूषणम् ।
प्रविद्धमुर्व्यां निपपात पत्रिभि-
र्धनंजयेनोत्तमकुण्डलेऽपि च ॥ ३२
महाधनं शिल्पिवरैः प्रयत्नतः
कृतं यदस्योत्तमवर्म भास्वरम् ।
सुदीर्घकालेन तदस्य पाण्डवः
क्षणेन बाणैर्बहुधा व्यशातयत् ॥ ३३
स तं विवर्माणमथोत्तमेषुभिः
शरैश्चतुर्भिः कुपितः पराभिनत् ।
स विव्यथेऽत्यर्थमरिप्रहारितो
यथातुरः पित्तकफानिलव्रणैः ॥ ३४
महाधनुर्मण्डलनिःसृतैः शितैः
क्रियाप्रयत्नप्रहितैर्बलेन च ।
ततक्ष कर्णं बहुभिः शरोत्तमै-
र्बिभेद मर्मस्वपि चार्जुनस्त्वरन् ॥ ३५
दृढाहतः पत्रिभिरुग्रवेगैः
पार्थेन कर्णो विविधैः शिताग्रैः ।
बभौ गिरिर्गैरिकधातुरक्तः
क्षरन्प्रपातैरिव रक्तमम्भः ॥ ३६
साश्वं तु कर्णं सरथं किरीटी

समाचिनोद्धारत वत्सदन्तैः ।
प्रच्छादयामास दिशश्च बाणैः
सर्वप्रयत्नात्तपनीयपुङ्खैः ॥ ३७
स वत्सदन्तैः पृथुपीनवक्षाः
समाचितः स्माधिरथिर्विभाति ।
सुपुष्पिताशोकपलाशशाल्मलि-
र्यथाचलः स्पन्दनचन्दनायुतः ॥ ३८
शरैः शरीरे बहुधा समर्पितै-
र्विभाति कर्णः समरे विशां पते ।
महीरुहैराचितसानुकन्दरो
यथा महेन्द्रः शुभकर्णिकारवान् ॥ ३९
स बाणसंघान्धनुषा व्यवासृज-
न्विभाति कर्णः शरजालरश्मिवान् ।
सलोहितो रक्तगभस्तिमण्डलो
दिवाकरोऽस्ताभिमुखो यथा तथा ॥ ४०
बाह्वन्तरादाधिरथेर्विमुक्ता-
न्बाणान्महाहीनिव दीप्यमानान् ।
व्यध्वंसयन्नर्जुनबाहुमुक्ताः
शराः समासाद्य दिशः शिताग्राः ॥ ४१
ततश्चक्रमपतत्तस्य भूमौ
स विह्वलः समरे सूतपुत्रः ।
घूर्णे रथे ब्राह्मणस्याभिशापा-
द्रामादुपात्तेऽप्रतिभाति चास्त्रे ॥ ४२
अमृष्यमाणो व्यसनानि तानि
हस्तौ विधुन्वन्स विगर्हमाणः ।
धर्मप्रधानानभिपाति धर्म
इत्यब्रुवन्धर्मविदः सदैव ।
ममापि निम्नोऽद्य न पाति भक्ता-
न्मन्ये न नित्यं परिपाति धर्मः ॥ ४३
एवं ब्रुवन्प्रस्खलिताश्वसूतो
विचाल्यमानोऽर्जुनशस्त्रपातैः ।
मर्माभिघाताच्छलितः क्रियासु
पुनः पुनर्धर्ममगर्हदाजौ ॥ ४४
ततः शरैर्भीमतरैरविध्यत्त्रिभिराहवे ।
हस्ते कर्णस्तदा पार्थमभ्यविध्यच्च सप्तभिः ॥ ४५
ततोऽर्जुनः सप्तदश तिग्मतेजानजिह्मगान् ।
इन्द्राशनिसमान्घोरानसृजत्पावकोपमान् ॥ ४६
निर्भिद्य ते भीमवेगा न्यपतन्पृथिवीतले ।
कम्पितात्मा तथा कर्णः शक्त्या चेष्टामदर्शयत् ॥४
बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदैरयत् ।
ऐन्द्रास्त्रमर्जुनश्चापि तद्दृष्ट्वाभिन्यमन्त्रयत् ॥ ४८
गाण्डीवं ज्यां च बाणांश्च अनुमन्त्र्य धनंजयः ।
असृजच्छरवर्षाणि वर्षाणीव पुरंदरः ॥ ४९
ततस्तेजोमया बाणा रथात्पार्थस्य निःसृताः ।
प्रादुरासन्महावीर्याः कर्णस्य रथमन्तिकात् ॥ ५
तान्कर्णस्त्वग्रतोऽभ्यस्तान्मोघांश्चक्रे महारथः ।
ततोऽब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रे विनाशिते ॥ ५१
विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान् ।
ब्रह्मास्त्रमर्जुनश्चापि संमन्त्र्याथ प्रयोजयत् ॥ ५२
छादयित्वा ततो बाणैः कर्णं प्रभ्राम्य चार्जुनः ।
तस्य कर्णः शरैः क्रुद्धश्चिच्छेद ज्यां सुतेजनैः ॥५
ततो ज्यामवधायान्यामनुमृज्य च पाण्डवः ।
शरैरवाकिरत्कर्णं दीप्यमानैः सहस्रशः ॥ ५४
तस्य ज्याच्छेदनं कर्णो ज्यावधानं च संयुगे ।
नान्वबुध्यत शीघ्रत्वात्तदद्भुतमिवाभवत् ॥ ५५
अस्त्रैरस्त्राणि राधेयः प्रत्यहन्सव्यसाचिनः ।
चक्रे चाभ्यधिकं पार्थात्स्ववीर्यं प्रतिदर्शयन् ॥ ५
ततः कृष्णोऽर्जुनं दृष्ट्वा कर्णास्त्रेणाभिपीडितम् ।
अभ्यस्येत्यब्रवीत्पार्थमातिष्ठास्त्रमनुत्तमम् ॥ ५७
ततोऽन्यमग्निसदृशं शरं सर्पविषोपमम् ।

अश्मसारमयं दिव्यमनुमन्त्र्य धनंजयः ॥ ५८
रौद्रमस्त्रं समादाय क्षेप्तुकामः किरीटवान् ।
ततोऽग्रसन्मही चक्रं राधेयस्य महामृधे ॥ ५९
ग्रस्तचक्रस्तु राधेयः कोपादश्रूण्यवर्तयत् ।
सोऽब्रवीदर्जुनं चापि मुहूर्तं क्षम पाण्डव ॥ ६०
मध्ये चक्रमवग्रस्तं दृष्ट्वा दैवादिदं मम ।
पार्थ कापुरुषाचीर्णमभिसंधिं विवर्जय ॥ ६१
प्रकीर्णकेशे विमुखे ब्राह्मणे च कृताञ्जलौ ।
शरणागते न्यस्तशस्त्रे तथा व्यसनगेऽर्जुन ॥ ६२
अबाणे भ्रष्टकवचे भ्रष्टभग्नायुधे तथा ।
न शूराः प्रहरन्त्याजौ न राज्ञे पार्थिवास्तथा ।
त्वं च शूरोऽसि कौन्तेय तस्मात्क्षम मुहूर्तकम् ॥६३
यावच्चक्रमिदं भूमेरुद्धरामि धनंजय ।
न मां रथस्थो भूमिष्ठमसज्जं हन्तुमर्हसि ।
न वासुदेवात्त्वत्तो वा पाण्डवेय बिभेम्यहम् ॥ ६४
त्वं हि क्षत्रियदायादो महाकुलविवर्धनः ।
स्मृत्वा धर्मोपदेशं त्वं मुहूर्तं क्षम पाण्डव ॥ ६५

इति श्रीमहाभारते कर्णपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

संजय उवाच ।

अथाब्रवीद्वासुदेवो रथस्थो
राधेय दिष्ट्या स्मरसीह धर्मम् ।
प्रायेण नीचा व्यसनेषु मग्ना
निन्दन्ति दैवं कुकृतं न तत्तत् ॥ १
यद्द्रौपदीमेकवस्त्रां सभाया-
मानाय्य त्वं चैव सुयोधनश्च ।
दुःशासनः शकुनिः सौबलश्च
न ते कर्ण प्रत्यभात्तत्र धर्मः ॥ २
यदा सभायां कौन्तेयमनक्षज्ञं युधिष्ठिरम् ।
अक्षज्ञः शकुनिर्जेता तदा धर्मः क्व ते गतः ॥ ३
यदा रजस्वलां कृष्णां दुःशासनवशे स्थिताम् ।
सभायां प्राहसः कर्ण क्व ते धर्मस्तदा गतः ॥ ४
राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवम् ।
गान्धारराजमाश्रित्य क्व ते धर्मस्तदा गतः ॥ ५
एवमुक्ते तु राधेये वासुदेवेन पाण्डवम् ।
मन्युरभ्याविशत्तीव्रः स्मृत्वा तत्तद्धनंजयम् ॥ ६
तस्य क्रोधेन सर्वेभ्यः स्रोतोभ्यस्तेजसोऽर्चिषः ।
प्रादुरासन्महाराज तदद्भुतमिवाभवत् ॥ ७
तं समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनंजयम् ।
अभ्यवर्षत्पुनर्यत्नमकरोद्रथसर्जने ।
तदस्त्रमस्त्रेणावार्य प्रजहारास्य पाण्डवः ॥ ८
ततोऽन्यदस्त्रं कौन्तेयो दयितं जातवेदसः ।
मुमोच कर्णमुद्दिश्य तत्प्रजज्वाल वै भृशम् ॥ ९
वारुणेन ततः कर्णः शमयामास पावकम् ।
जीमूतैश्च दिशः सर्वाश्चक्रे तिमिरदुर्दिनाः ॥ १०
पाण्डवेयस्त्वसंभ्रान्तो वायव्यास्त्रेण वीर्यवान् ।
अपोवाह तदाभ्राणि राधेयस्य प्रपश्यतः ॥ ११
तं हस्तिकक्ष्याप्रवरं च बाणैः
सुवर्णमुक्तामणिवज्रमृष्टम् ।
कालप्रयत्नोत्तमशिल्पियत्नैः
कृतं सुरूपं वितमस्कमुच्चैः ॥ १२
ऊर्जस्करं तव सैन्यस्य नित्य-
ममित्रवित्रासनमीड्यरूपम् ।
विख्यातमादित्यसमस्य लोके
त्विषा समं पावकभानुचन्द्रैः ॥ १३
ततः क्षुरेणाधिरथेः किरीटी
सुवर्णपुङ्खेन शितेन यत्तः ।
श्रिया ज्वलन्तं ध्वजमुन्ममाथ

महारथस्याधिरथेर्महात्मा ॥ १४
यशश्च धर्मश्च जयश्च मारिष
प्रियाणि सर्वाणि च तेन केतुना ।
तदा कुरूणां हृदयानि चापत-
न्बभूव हाहेति च निस्वनो महान् ॥ १५
अथ त्वरन्कर्णवधाय पाण्डवो
महेन्द्रवज्रानलदण्डसंनिभम् ।
आदत्त पार्थोऽञ्जलिकं निषङ्गा-
त्सहस्ररश्मेरिव रश्मिमुत्तमम् ॥ १६
मर्मच्छिदं शोणितमांसदिग्धं
वैश्वानरार्कप्रतिमं महार्हम् ।
नराश्वनागासुहरं त्र्यरत्निं
षड्वाजमञ्जोगतिमुग्रवेगम् ॥ १७
सहस्रनेत्राशनितुल्यतेजसं
समानक्रव्यादमिवातिदुःसहम् ।
पिनाकनारायणचक्रसंनिभं
भयंकरं प्राणभृतां विनाशनम् ॥ १८
युक्त्वा महास्त्रेण परेण मन्त्रवि-
द्विकृष्य गाण्डीवमुवाच सस्वनम् ।
अयं महास्त्रोऽप्रतिमो धृतः शरः
शरीरभिच्चासुहरश्च दुर्हृदः ॥ १९
तपोऽस्ति तप्तं गुरवश्च तोषिता
मया यदिष्टं सुहृदां तथा श्रुतम् ।
अनेन सत्येन निहन्त्वयं शरः
सुदंशितः कर्णमरिं ममाजितः ॥ २०
इत्यूचिवांस्तं स मुमोच बाणं
धनंजयः कर्णवधाय घोरम् ।
कृत्यामथर्वाङ्गिरसीमिवोग्रां
दीप्तामसह्यां युधि मृत्युनापि ॥ २१
ब्रुवन्किरीटी तमतिप्रहृष्टो
अयं शरो मे विजयावहोऽस्तु ।
जिघांसुरर्केन्दुसमप्रभावः
कर्णं समाप्तिं नयतां यमाय ॥ २२
तेनेषुवर्येण किरीटमाली
प्रहृष्टरूपो विजयावहेन ।
जिघांसुरर्केन्दुसमप्रभेण
चक्रे विषक्तं रिपुमाततायी ॥ २३
तदुद्यतादित्यसमानवर्चसं
शरन्नभोमध्यगभास्करोपमम् ।
वराङ्गमुर्व्यामपतच्चमूपते-
र्दिवाकरोऽस्तादिव रक्तमण्डलः ॥ २४
तदस्य देही सततं सुखोदितं
स्वरूपमत्यर्थमुदारकर्मणः ।
परेण कृच्छ्रेण शरीरमत्यज-
द्गृहं महर्द्धीव ससङ्गमीश्वरः ॥ २५
शरैर्विभुग्नं व्यसु तद्विवर्मणः
पपात कर्णस्य शरीरमुच्छ्रितम् ।
स्रवद्व्रणं गैरिकतोयविस्रवं
गिरेर्यथा वज्रहतं शिरस्तथा ॥ २६
देहात्तु कर्णस्य निपातितस्य
तेजो दीप्तं खं विगाह्याचिरेण ।
तदद्भुतं सर्वमनुष्ययोधाः
पश्यन्ति राजन्निहते स्म कर्णे ॥ २७
तं सोमकाः प्रेक्ष्य हतं शयानं
प्रीता नादं सह सैन्यैरकुर्वन् ।
तूर्याणि चाजघ्नुरतीव हृष्टा
वासांसि चैवादुधुवुर्भुजांश्च ।
बलान्विताश्चाप्यपरे ह्यनृत्य-
न्नन्योन्यमाश्लिष्य नदन्त ऊचुः ॥ २८
दृष्ट्वा तु कर्णं भुवि निष्टनन्तं

हतं रथात्सायकेनावभिन्नम् ।
महानिलेनाग्निमिवापविद्धं
यज्ञावसाने शयने निशान्ते ॥ २९
शरैराचितसर्वाङ्गः शोणितौघपरिप्लुतः ।
विभाति देहः कर्णस्य स्वरश्मिभिरिवांशुमान् ॥३०
प्रताप्य सेनामामित्रीं दीप्तैः शरगभस्तिभिः ।
बलिनार्जुनकालेन नीतोऽस्तं कर्णभास्करः ॥ ३१
अस्तं गच्छन्यथादित्यः प्रभामादाय गच्छति ।
एवं जीवितमादाय कर्णस्येषुर्जगाम ह ॥ ३२
अपराह्णे पराह्णस्य सूतपुत्रस्य मारिष ।
छिन्नमञ्जलिकेनाजौ सोत्सेधमपतच्छिरः ॥ ३३
उपर्युपरि सैन्यानां तस्य शत्रोस्तदञ्जसा ।
शिरः कर्णस्य सोत्सेधमिषुः सोऽपाहरद्द्रुतम् ॥ ३४

संजय उवाच ।

कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
दृष्ट्वा शयानं भुवि मद्रराज-
श्छिन्नध्वजेनापययौ रथेन ॥ ३५
कर्णे हते कुरवः प्राद्रवन्त
भयार्दिता गाढविद्धाश्च संख्ये ।
अवेक्षमाणा मुहुरर्जुनस्य
ध्वजं महान्तं वपुषा ज्वलन्तम् ॥ ३६
सहस्रनेत्रप्रतिमानकर्मणः
सहस्रपत्रप्रतिमाननं शुभम् ।
सहस्ररश्मिर्दिनसंक्षये यथा
तथापतत्तस्य शिरो वसुंधराम् ॥ ३७

इति श्रीमहाभारते कर्णपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

संजय उवाच ।

शल्यस्तु कर्णार्जुनयोर्विमर्दे
बलानि दृष्ट्वा मृदितानि बाणैः ।
दुर्योधनं यान्तमवेक्षमाणो
संदर्शयद्भारत युद्धभूमिम् ॥ १
निपातितस्यन्दनवाजिनागं
दृष्ट्वा बलं तद्धतसूतपुत्रम् ।
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो
मुहुर्मुहुर्न्यश्वसदार्तरूपः ॥ २
कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
यदृच्छया सूर्यमिवावनिस्थं
दिदृक्षवः संपरिवार्य तस्थुः ॥ ३
प्रहृष्टवित्रस्तविषण्णविस्मृता-
स्तथापरे शोकगता इवाभवन् ।
परे त्वदीयाश्च परस्परेण
यथा यथैषां प्रकृतिस्तथाभवन् ॥ ४
प्रविद्धवर्माभरणाम्बरायुधं
धनंजयेनाभिहतं हतौजसम् ।
निशम्य कर्णं कुरवः प्रदुद्रुवु-
र्हतर्षभा गाव इवाकुलाकुलाः ॥ ५
कृत्वा विमर्दं भृशमर्जुनेन
कर्णं हतं केसरिणेव नागम् ।
दृष्ट्वा शयानं भुवि मद्रराजो
भीतोऽपसर्पत्सरथः सुशीघ्रम् ॥ ६
मद्राधिपश्चापि विमूढचेता-
स्तूर्णं रथेनापहृतध्वजेन ।
दुर्योधनस्यान्तिकमेत्य शीघ्रं

संभाष्य दुःखार्तमुवाच वाक्यम् ॥ ७
विशीर्णनागाश्वरथप्रवीरं
बलं त्वदीयं यमराष्ट्रकल्पम् ।
अन्योन्यमासाद्य हतं महद्भि-
र्नराश्वनागैर्गिरिकूटकल्पैः ॥ ८
नैतादृशं भारत युद्धमासी-
द्यथाद्य कर्णार्जुनयोर्बभूव ।
ग्रस्तौ हि कर्णेन समेत्य कृष्णा-
वन्ये च सर्वे तव शत्रवो ये ॥ ९
दैवं तु यत्तत्स्ववशं प्रवृत्तं
तत्पाण्डवान्पाति हिनस्ति चास्मान् ।
तवार्थसिद्ध्यर्थकरा हि सर्वे
प्रसह्य वीरा निहता द्विषद्भिः ॥ १०
कुबेरवैवस्वतवासवानां
तुल्यप्रभावाम्बुपतेश्च वीराः ।
वीर्येण शौर्येण बलेन चैव
तैस्तैश्च युक्ता विपुलैर्गुणौघैः ॥ ११
अवध्यकल्पा निहता नरेन्द्रा-
स्तवार्थकामा युधि पाण्डवेयैः ।
तन्मा शुचो भारत दिष्टमेत-
त्पर्यायसिद्धिर्न सदास्ति सिद्धिः ॥ १२
एतद्वचो मद्रपतेर्निशम्य
स्वं चापनीतं मनसा निरीक्ष्य ।
दुर्योधनो दीनमना विसंज्ञः
पुनः पुनर्न्यश्वसदार्तरूपः ॥ १३
तं ध्यानमूकं कृपणं भृशार्त-
मार्तायनिर्दीनमुवाच वाक्यम् ।
पश्येदमुग्रं नरवाजिनागै-
रायोधनं वीरहतैः प्रपन्नम् ॥ १४
महीधराभैः पतितैर्महागजैः
सकृत्प्रविद्धैः शरविद्धमर्मभिः ।
तैर्विह्वलद्भिश्च गतासुभिश्च
प्रध्वस्तयन्त्रायुधवर्मयोधैः ॥ १५
वज्रापविद्धैरिव चाचलेन्द्रै-
र्विभिन्नपाषाणमृगद्रुमौषधैः ।
प्रविद्धघण्टाङ्कुशतोमरध्वजैः
सहेममालै रुधिरौघसंप्लुतैः ॥ १६
शरावभिन्नैः पतितैश्च वाजिभिः
श्वसद्भिरन्यैः क्षतजं वमद्भिः ।
दीनैः स्तनद्भिः परिवृत्तनेत्रै-
र्महीं दशद्भिः कृपणं नदद्भिः ॥ १७
तथापविद्धैर्गजवाजियोधै-
र्मन्दासुभिश्चैव गतासुभिश्च ।
नराश्वनागैश्च रथैश्च मर्दितै-
र्मही महावैतरणीव दुर्दृशा ॥ १८
गजैर्निकृत्तापरहस्तगात्रै-
रुद्वेपमानैः पतितैः पृथिव्याम् ।
यशस्विभिर्नागरथाश्वयोधिभिः
पदातिभिश्चाभिमुखैर्हतैः परैः ।
विशीर्णवर्माभरणाम्बरायुधै-
र्वृता निशान्तैरिव पावकैर्मही ॥ १९
शरप्रहाराभिहतैर्महाबलै-
रवेक्ष्यमाणैः पतितैः सहस्रशः ।
प्रनष्टसंज्ञैः पुनरुच्छ्वसद्भि-
र्मही बभूवानुगतैरिवाग्निभिः ।
दिवश्च्युतैर्भूरतिदीप्तिमद्भि-
र्नक्तं ग्रहैर्द्यौरमलेव दीप्तैः ॥ २०
शरास्तु कर्णार्जुनबाहुमुक्ता
विदार्य नागाश्वमनुष्यदेहान् ।
प्राणान्निरस्याशु महीमतीयु-

महोरगा वासमिवाभितोऽस्त्रैः ॥ २१
हतैर्मनुष्याश्वगजैश्च संख्ये
शरावभिन्नैश्च रथैर्बभूव ।
धनंजयस्याधिरथेश्च मार्गे
गजैरगम्या वसुधातिदुर्गा ॥ २२
रथैर्वरेषून्मथितैश्च योधैः
संस्यूतसूताश्ववरायुधध्वजैः ।
विशीर्णशस्त्रैर्विनिकृत्तबन्धुरै-
र्निकृत्तचक्राक्षयुगत्रिवेणुभिः ॥ २३
विमुक्तयन्त्रैर्निहतैरयस्मयै-
र्हतानुषङ्गैर्विनिषङ्गबन्धुरैः ।
प्रभग्ननीडैर्मणिहेममण्डितैः
स्तृता मही द्यौरिव शारदैर्घनैः ॥ २४
विकृष्यमाणैर्जवनैरलंकृतै-
र्हतेश्वरैराजिरथैः सुकल्पितैः ।
मनुष्यमातङ्गरथाश्वराशिभि-
र्द्रुतं व्रजन्तो बहुधा विचूर्णिताः ॥ २५
सहेमपट्टाः परिघाः परश्वधाः
कडङ्गरायोमुसलानि पट्टिशाः ।
पेतुश्च खड्गा विमला विकोशा
गदाश्च जाम्बूनदपट्टबद्धाः ॥ २६
चापानि रुक्माङ्गदभूषणानि
शराश्च कार्तस्वरचित्रपुङ्खाः ।
ऋष्यश्च पीता विमला विकोशाः
प्रासाः सखड्गाः कनकावभासाः ॥ २७
छत्राणि वालव्यजनानि शङ्खाः
स्रजश्च पुष्पोत्तमहेमचित्राः ।
कुथाः पताकाम्बरवेष्टिताश्च
किरीटमाला मुकुटाश्च शुभ्राः ॥ २८
प्रकीर्णका विप्रकीर्णाः कुथाश्च
प्रधानमुक्तातरलाश्च हाराः ।
आपीडकेयूरवराङ्गदानि
ग्रैवेयनिष्काः ससुवर्णसूत्राः ॥ २९
मण्युत्तमा वज्रसुवर्णमुक्ता
रत्नानि चोच्चावचमङ्गलानि ।
गात्राणि चात्यन्तसुखोचितानि
शिरांसि चेन्दुप्रतिमाननानि ॥ ३०
देहांश्च भोगांश्च परिच्छदांश्च
त्यक्त्वा मनोज्ञानि सुखानि चापि ।
स्वधर्मनिष्ठां महतीमवाप्य
व्याप्तांश्च लोकान्यशसा समीयुः ॥ ३१
इत्येवमुक्त्वा विरराम शल्यो
दुर्योधनः शोकपरीतचेताः ।
हा कर्ण हा कर्ण इति ब्रुवाण
आर्तो विसंज्ञो भृशमश्रुनेत्रः ॥ ३२
तं द्रोणपुत्रप्रमुखा नरेन्द्राः
सर्वे समाश्वास्य सह प्रयान्ति ।
निरीक्षमाणा मुहुरर्जुनस्य
ध्वजं महान्तं यशसा ज्वलन्तम् ॥ ३३
नराश्वमातङ्गशरीरजेन
रक्तेन सिक्ता रुधिरेण भूमिः ।
रक्ताम्बरस्रक्तपनीययोगा-
न्नारी प्रकाशा इव सर्वगम्या ॥ ३४
प्रच्छन्नरूपा रुधिरेण राज-
न्रौद्रे मुहूर्तेऽतिविराजमानाः ।
नैवावतस्थुः कुरवः समीक्ष्य
प्रव्राजिता देवलोकाश्च सर्वे ॥ ३५
वधेन कर्णस्य सुदुःखितास्ते
हा कर्ण हा कर्ण इति ब्रुवाणाः ।
द्रुतं प्रयाताः शिबिराणि राज-

न्दिवाकरं रक्तमवेक्षमाणाः ॥ ३६
गाण्डीवमुक्तैस्तु सुवर्णपुङ्खैः
शितैः शरैः शोणितदिग्धवाजैः ।
शरैश्चिताङ्गो भुवि भाति कर्णो
हतोऽपि सन्सूर्य इवांशुमाली ॥ ३७
कर्णस्य देहं रुधिरावसिक्तं
भक्तानुकम्पी भगवान्विवस्वान् ।
स्पृष्ट्वा करैर्लोहितरक्तरूपः
सिष्णासुरभ्येति परं समुद्रम् ॥ ३८
इतीव संचिन्त्य सुरर्षिसंघाः
संप्रस्थिता यान्ति यथानिकेतम् ।
संचिन्तयित्वा च जना विसस्रु-
र्यथासुखं खं च महीतलं च ॥ ३९
तदद्भुतं प्राणभृतां भयंकरं
निशम्य युद्धं कुरुवीरमुख्ययोः ।
धनंजयस्याधिरथेश्च विस्मिताः
प्रशंसमानाः प्रययुस्तदा जनाः ॥ ४०
शरैः संकृत्तवर्माणं वीरं विशसने हतम् ।
गतासुमपि राधेयं नैव लक्ष्मीर्व्यमुञ्चत ॥ ४१
नानाभरणवान्राजन्मृष्टजाम्बूनदाङ्गदः ।
हतो वैकर्तनः शेते पादपोऽङ्कुरवानिव ॥ ४२
कनकोत्तमसंकाशः प्रदीप्त इव पावकः ।
सपुत्रः पुरुषव्याघ्रः संशान्तः पार्थतेजसा ।
प्रताप्य पाण्डवान्राजन्पाञ्चालांश्चास्त्रतेजसा ॥ ४३
ददानीत्येव योऽवोचन्न नास्तीत्यर्थितोऽर्थिभिः ।
सद्भिः सदा सत्पुरुषः स हतो द्वैरथे वृषः ॥ ४४
यस्य ब्राह्मणसात्सर्वमात्मार्थं न महात्मनः ।
नादेयं ब्राह्मणेष्वासीद्यस्य स्वमपि जीवितम् ॥ ४५
सदा नृणां प्रियो दाता प्रियदानो दिवं गतः ।
आदाय तव पुत्राणां जयाशां शर्म वर्म च ॥ ४६
हते स्म कर्णे सरितो न सस्रवु-
र्जगाम चास्तं कलुषो दिवाकरः ।
ग्रहश्च तिर्यग्ज्वलितार्कवर्णो
यमस्य पुत्रोऽभ्युदियाय राजन् ॥ ४७
नभः पफालाथ ननाद चोर्वी
ववुश्च वाताः परुषातिवेलम् ।
दिशः सधूमाश्च भृशं प्रजज्वलु-
र्महार्णवाश्चुक्षुभिरे च सस्वनाः ॥ ४८
सकाननाः साद्रिचयाश्चकम्पुः
प्रविव्यथुर्भूतगणाश्च मारिष ।
बृहस्पती रोहिणीं संप्रपीड्य
बभूव चन्द्रार्कसमानवर्णः ॥ ४९
हते कर्णे न दिशो विप्रजज्ञु-
स्तमोवृता द्यौर्विचचाल भूमिः ।
पपात चोल्का ज्वलनप्रकाशा
निशाचराश्चाप्यभवन्प्रहृष्टाः ॥ ५०
शशिप्रकाशाननमर्जुनो यदा
क्षुरेण कर्णस्य शिरो न्यपातयत् ।
अथान्तरिक्षे दिवि चेह चासक्-
द्बभूव हाहेति जनस्य निस्वनः ॥ ५१
स देवगन्धर्वमनुष्यपूजितं
निहत्य कर्णं रिपुमाहवेऽर्जुनः ।
रराज पार्थः परमेण तेजसा
वृत्रं निहत्येव सहस्रलोचनः ॥ ५२
ततो रथेनाम्बुदवृन्दनादिना
शरन्नभोमध्यगभास्करत्विषा ।
पताकिना भीमनिनादकेतुना
हिमेन्दुशङ्खस्फटिकावभासिना ।
सुवर्णमुक्तामणिवज्रविद्रुमै-
रलंकृतेनाप्रतिमानरंहसा ॥ ५३

नरोत्तमौ पाण्डवकेशिमर्दना-
वुदाहितावग्निदिवाकरोपमौ ।
रणाजिरे वीतभयौ विरेजतुः
समानयानाविव विष्णुवासवौ ॥ ५४
ततो धनुर्ज्यातलनेमिनिस्वनैः
प्रसह्य कृत्वा च रिपून्हतप्रभान् ।
ससाधयित्वैव कुरूञ्शरौघैः
कपिध्वजः पक्षिवरध्वजश्च ।
प्रसह्य शङ्खौ धमतुः सुघोषौ
मनांस्यरीणामवसादयन्तौ ॥ ५५
सुवर्णजालावततौ महास्वनौ
हिमावदातौ परिगृह्य पाणिभिः ।
चुचुम्बतुः शङ्खवरौ नृणां वरौ
वराननाभ्यां युगपच्च दध्मतुः ॥ ५६
पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः ।
पृथिवीमन्तरिक्षं च द्यामपश्चाप्यपूरयत् ॥ ५७
तौ शङ्खशब्देन निनादयन्तौ
वनानि शैलान्सरितो दिशश्च ।
वित्रासयन्तौ तव पुत्रसेनां
युधिष्ठिरं नन्दयतः स्म वीरौ ॥ ५८
ततः प्रयाताः कुरवो जवेन
श्रुत्वैव शङ्खस्वनमीर्यमाणम् ।
विहाय मद्राधिपतिं पतिं च
दुर्योधनं भारत भारतानाम् ॥ ५९
महाहवे तं बहु शोभमानं
धनंजयं भूतगणाः समेताः ।
तदान्वमोदन्त जनार्दनं च
प्रभाकरावभ्युदितौ यथैव ॥ ६०
समाचितौ कर्णशरैः परंतपा-
वुभौ व्यभातां समरेऽच्युतार्जुनौ ।
तमो निहत्याभ्युदितौ यथामलौ
शशाङ्कसूर्याविव रश्मिमालिनौ ॥ ६१
विहाय तान्बाणगणानथागतौ
सुहृद्वृतावप्रतिमानविक्रमौ ।
सुखं प्रविष्टौ शिबिरं स्वमीश्वरौ
सदस्यहूताविव वासवाच्युतौ ॥ ६२
सदेवगन्धर्वमनुष्यचारणै-
र्महर्षिभिर्यक्षमहोरगैरपि ।
जयाभिवृद्ध्या परयाभिपूजितौ
निहत्य कर्णं परमाहवे तदा ॥ ६३

इति श्रीमहाभारते कर्णपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

संजय उवाच ।

तथा निपातिते कर्णे तव सैन्ये च विद्रुते ।
आश्लिष्य पार्थं दाशार्हो हर्षाद्वचनमब्रवीत् ॥ १
हतो बलभिदा वृत्रस्त्वया कर्णो धनंजय ।
वधं वै कर्णवृत्राभ्यां कथयिष्यन्ति मानवाः ॥ २
वज्रिणा निहतो वृत्रः संयुगे भूरितेजसा ।
त्वया तु निहतः कर्णो धनुषा निशितैः शरैः ॥ ३
तमिमं विक्रमं लोके प्रथितं ते यशोवहम् ।
निवेदयावः कौन्तेय धर्मराजाय धीमते ॥ ४
वधं कर्णस्य संग्रामे दीर्घकालचिकीर्षितम् ।
निवेद्य धर्मराजस्य त्वमानृण्यं गमिष्यसि ॥ ५
तथेत्युक्ते केशवस्तु पार्थेन यदुपुंगवः ।
पर्यवर्तयदव्यग्रो रथं रथवरस्य तम् ॥ ६
धृष्टद्युम्नं युधामन्युं माद्रीपुत्रौ वृकोदरम् ।
युयुधानं च गोविन्द इदं वचनमब्रवीत् ॥ ७
परानभिमुखा यत्तास्तिष्ठध्वं भद्रमस्तु वः ।

यावदावेद्यते राज्ञे हतः कर्णोऽर्जुनेन वै ॥ ८
स तैः शूरैरनुज्ञातो ययौ राजनिवेशनम् ।
पार्थमादाय गोविन्दो ददर्श च युधिष्ठिरम् ॥ ९
शयानं राजशार्दूलं काञ्चने शयनोत्तमे ।
अगृह्णीतां च चरणौ मुदितौ पार्थिवस्य तौ ॥ १०
तयोः प्रहर्षमालक्ष्य प्रहारांश्चातिमानुषान् ।
राधेयं निहतं मत्वा समुत्तस्थौ युधिष्ठिरः ॥ ११
ततोऽस्मै तद्यथावृत्तं वासुदेवः प्रियंवदः ।
कथयामास कर्णस्य निधनं यदुनन्दनः ॥ १२
ईषदुत्स्मयमानस्तु कृष्णो राजानमब्रवीत् ।
युधिष्ठिरं हतामित्रं कृताञ्जलिरथाच्युतः ॥ १३
दिष्ट्या गाण्डीवधन्वा च पाण्डवश्च वृकोदरः ।
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ ॥१४
मुक्ता वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् ।
क्षिप्रमुत्तरकालानि कुरु कार्याणि पार्थिव ॥ १५
हतो वैकर्तनः क्रूरः सूतपुत्रो महाबलः ।
दिष्ट्या जयसि राजेन्द्र दिष्ट्या वर्धसि पाण्डव ॥१६
यः स द्यूतजितां कृष्णां प्राहसत्पुरुषाधमः ।
तस्याद्य सूतपुत्रस्य भूमिः पिबति शोणितम् ॥ १७
शेतेऽसौ शरदीर्णाङ्गः शत्रुस्ते कुरुपुंगव ।
तं पश्य पुरुषव्याघ्र विभिन्नं बहुधा शरैः ॥ १८
युधिष्ठिरस्तु दाशार्हं प्रहृष्टः प्रत्यपूजयत् ।
दिष्ट्या दिष्ट्येति राजेन्द्र प्रीत्या चेदमुवाच ह ॥१९
नैतच्चित्रं महाबाहो त्वयि देवकिनन्दन ।
त्वया सारथिना पार्थो यत्कुर्यादद्य पौरुषम् ॥ २०
प्रगृह्य च कुरुश्रेष्ठः साङ्गदं दक्षिणं भुजम् ।
उवाच धर्मभृत्पार्थ उभौ तौ केशवार्जुनौ ॥ २१
नरनारायणौ देवौ कथितौ नारदेन ह ।
धर्मसंस्थापने युक्तौ पुराणौ पुरुषोत्तमौ ॥ २२
असकृच्चापि मेधावी कृष्णद्वैपायनो मम ।
कथामेतां महाबाहो दिव्यामकथयत्प्रभुः ॥ २३
तव कृष्ण प्रभावेण गाण्डीवेन धनंजयः ।
जयत्यभिमुखाञ्शत्रून्न चासीद्विमुखः क्वचित् ॥२४
जयश्चैव ध्रुवोऽस्माकं न त्वस्माकं पराजयः ।
यदा त्वं युधि पार्थस्य सारथ्यमुपजग्मिवान् ॥२५
एवमुक्त्वा महाराज तं रथं हेमभूषितम् ।
दन्तवर्णैर्हयैर्युक्तं कालवालैर्महारथः ॥ २६
आस्थाय पुरुषव्याघ्रः स्वबलेनाभिसंवृतः ।
कृष्णार्जुनाभ्यां वीराभ्यामनुमन्य ततः प्रियम् ॥२७
आगतो बहुवृत्तान्तं द्रष्टुमायोधनं तदा ।
आभाषमाणस्तौ वीरावुभौ माधवफल्गुनौ ॥ २८
स ददर्श रणे कर्णं शयानं पुरुषर्षभम् ।
गाण्डीवमुक्तैर्विशिखैः सर्वतः शकलीकृतम् ॥ २९
सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः ।
प्रशशंस नरव्याघ्रावुभौ माधवपाण्डवौ ॥ ३०
अद्य राजास्मि गोविन्द पृथिव्यां भ्रातृभिः सह ।
त्वया नाथेन वीरेण विदुषा परिपालितः ॥ ३१
हतं दृष्ट्वा नरव्याघ्रं राधेयमभिमानिनम् ।
निराशोऽद्य दुरात्मासौ धार्तराष्ट्रो भविष्यति ।
जीविताच्चापि राज्याच्च हते कर्णे महारथे ॥ ३२
त्वत्प्रसादाद्वयं चैव कृतार्थाः पुरुषर्षभ ।
त्वं च गाण्डीवधन्वा च विजयी यदुनन्दन ।
दिष्ट्या जयसि गोविन्द दिष्ट्या कर्णो निपातितः ॥
एवं स बहुशो हृष्टः प्रशशंस जनार्दनम् ।
अर्जुनं चापि राजेन्द्र धर्मराजो युधिष्ठिरः ॥ ३४
ततो भीमप्रभृतिभिः सर्वैश्च भ्रातृभिर्वृतम् ।
वर्धयन्ति स्म राजानं हर्षयुक्ता महारथाः ॥ ३५
नकुलः सहदेवश्च पाण्डवश्च वृकोदरः ।
सात्यकिश्च महाराज वृष्णीनां प्रवरो रथः ॥ ३६
धृष्टद्युम्नः शिखण्डी च पाण्डुपाञ्चालसृञ्जयाः ।

पूजयन्ति स्म कौन्तेयं निहते सूतनन्दने ॥ ३७
ते वर्धयित्वा नृपतिं पाण्डुपुत्रं युधिष्ठिरम् ।
जितकाशिनो लब्धलक्षा युद्धशौण्डाः प्रहारिणः॥३८
स्तुवन्तः स्तवयुक्ताभिर्वाग्भिः कृष्णौ परंतपौ ।
जग्मुः स्वशिबिरायैव मुदा युक्ता महारथाः ॥ ३९
एवमेष क्षयो वृत्तः सुमहाल्ँलोमहर्षणः ।
तव दुर्मन्त्रिते राजन्नतीतं किं नु शोचसि ॥ ४०

वैशंपायन उवाच ।

श्रुत्वा तदप्रियं राजन्धृतराष्ट्रो महीपतिः ।
पपात भूमौ निश्चेष्टः कौरव्यः परमार्तिवान् ।
तथा सत्यव्रता देवी गान्धारी धर्मदर्शिनी ॥ ४१
तं प्रत्यगृह्णाद्विदुरो नृपतिं संजयस्तथा ।
पर्याश्वासयतश्चैवं तावुभावेव भूमिपम् ॥ ४२
तथैवोत्थापयामासुर्गान्धारीं राजयोषितः ।
ताभ्यामाश्वासितो राजा तूष्णीमासीद्विचेतनः ॥४३

इति श्रीमहाभारते कर्णपर्वणि
एकोनसप्ततितमोऽध्यायः॥ ६९ ॥

॥ समाप्तं कर्णपर्व ॥

९

शल्यपर्व

१

जनमेजय उवाच ।

एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज ॥ १
उदीर्यमाणं च बलं दृष्ट्वा राजा सुयोधनः ।
पाण्डवैः प्राप्तकालं च किं प्रापद्यत कौरवः ॥ २
एतदिच्छाम्यहं श्रोतुं तदाचक्ष्व द्विजोत्तम ।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ ३

वैशंपायन उवाच ।

ततः कर्णे हते राजन्धार्तराष्ट्रः सुयोधनः ।
भृशं शोकार्णवे मग्नो निराशः सर्वतोऽभवत् ॥ ४
हा कर्ण हा कर्ण इति शोचमानः पुनः पुनः ।
कृच्छ्रात्स्वशिबिरं प्रायाद्धतशेषैर्नृपैः सह ॥ ५
स समाश्वास्यमानोऽपि हेतुभिः शास्त्रनिश्चितैः ।
राजभिर्नालभच्छर्म सूतपुत्रवधं स्मरन् ॥ ६
स दैवं बलवन्मत्वा भवितव्यं च पार्थिवः ।
संग्रामे निश्चयं कृत्वा पुनर्युद्धाय निर्ययौ ॥ ७
शल्यं सेनापतिं कृत्वा विधिवद्राजपुंगवः ।
रणाय निर्ययौ राजा हतशेषैर्नृपैः सह ॥ ८
ततः सुतुमुलं युद्धं कुरुपाण्डवसेनयोः ।
बभूव भरतश्रेष्ठ देवासुररणोपमम् ॥ ९
ततः शल्यो महाराज कृत्वा कदनमाहवे ।
पाण्डुसैन्यस्य मध्याह्ने धर्मराजेन पातितः ॥ १०
ततो दुर्योधनो राजा हतबन्धू रणाजिरात् ।
अपसृत्य ह्रदं घोरं विवेश रिपुजाद्भयात् ॥ ११
अथापराह्णे तस्याह्नः परिवार्य महारथैः ।
ह्रदादाहूय योगेन भीमसेनेन पातितः ॥ १२
तस्मिन्हते महेष्वासे हतशिष्टास्त्रयो रथाः ।
संरम्भान्निशि राजेन्द्र जघ्नुः पाञ्चालसैनिकान् ॥१
ततः पूर्वाह्णसमये शिबिरादेत्य संजयः ।
प्रविवेश पुरीं दीनो दुःखशोकसमन्वितः ॥ १४
प्रविश्य च पुरं तूर्णं भुजावुच्छ्रित्य दुःखितः ।
वेपमानस्ततो राज्ञः प्रविवेश निवेशनम् ॥ १५
रुरोद च नरव्याघ्र हा राजन्निति दुःखितः ।
अहो बत विविग्नाः स्म निधनेन महात्मनः ॥ १
अहो सुबलवान्कालो गतिश्च परमा तथा ।
शक्रतुल्यबलाः सर्वे यत्रावध्यन्त पार्थिवाः ॥ १७
दृष्ट्वैव च पुरो राजञ्जनः सर्वः स संजयम् ।
प्ररुरोद भृशोद्विग्नो हा राजन्निति सस्वरम् ॥ १८
आकुमारं नरव्याघ्र तत्पुरं वै समन्ततः ।
आर्तनादं महच्चक्रे श्रुत्वा विनिहतं नृपम् ॥ १९
धावतश्चाप्यपश्यच्च तत्र त्रीन्पुरुषर्षभान् ।
नष्टचित्तानिवोन्मत्ताञ्शोकेन भृशपीडितान् ॥ २
तथा स विह्वलः सूतः प्रविश्य नृपतिक्षयम् ।
ददर्श नृपतिश्रेष्ठं प्रज्ञाचक्षुषमीश्वरम् ॥ २१
दृष्ट्वा चासीनमनघं समन्तात्परिवारितम् ।
स्नुषाभिर्भरतश्रेष्ठ गान्धार्या विदुरेण च ॥ २२

अमात्यैश्च सुहृद्भिश्च ज्ञातिभिश्च हितैषिभिः ।
तमेव चार्थं ध्यायन्तं कर्णस्य निधनं प्रति ॥ २३
समेवाब्रवीद्वाक्यं राजानं जनमेजय ।
नातिहृष्टमनाः सूतो बाष्पसंदिग्धया गिरा ॥ २४
संजयोऽहं नरव्याघ्र नमस्ते भरतर्षभ ।
मद्राधिपो हतः शल्यः शकुनिः सौबलस्तथा ।
उलूकः पुरुषव्याघ्र कैतव्यो दृढविक्रमः ॥ २५
संशप्तका हताः सर्वे काम्बोजाश्च शकैः सह ।
म्लेच्छाश्च पार्वतीयाश्च यवनाश्च निपातिताः ॥२६
प्राच्या हता महाराज दाक्षिणात्याश्च सर्वशः ।
उदीच्या निहताः सर्वे प्रतीच्याश्च नराधिप ।
राजानो राजपुत्राश्च सर्वतो निहता नृप ॥ २७
दुर्योधनो हतो राजन्यथोक्तं पाण्डवेन च ।
भग्नसक्थो महाराज शेते पांसुषु रूषितः ॥ २८
धृष्टद्युम्नो हतो राजञ्शिखण्डी चापराजितः ।
उत्तमौजा युधामन्युस्तथा राजन्प्रभद्रकाः ॥ २९
पञ्चालाश्च नरव्याघ्राश्चेदयश्च निषूदिताः ।
तव पुत्रा हताः सर्वे द्रौपदेयाश्च भारत ।
कर्णपुत्रो हतः शूरो वृषसेनो महाबलः ॥ ३०
नरा विनिहताः सर्वे गजाश्च विनिपातिताः ।
रथिनश्च नरव्याघ्र हयाश्च निहता युधि ॥ ३१
किंचिच्छेषं च शिबिरं तावकानां कृतं विभो ।
पाण्डवानां च शूराणां समासाद्य परस्परम् ॥ ३२
प्रायः स्त्रीशेषमभवज्जगत्कालेन मोहितम् ।
सप्त पाण्डवतः शेषा धार्तराष्ट्रास्तथा त्रयः ॥ ३३
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
कृपश्च कृतवर्मा च द्रौणिश्च जयतां वरः ॥ ३४
तवाप्येते महाराज रथिनो नृपसत्तम ।
अक्षौहिणीनां सर्वासां समेतानां जनेश्वर ।
एते शेषा महाराज सर्वेऽन्ये निधनं गताः ॥ ३५

कालेन निहतं सर्वं जगद्वै भरतर्षभ ।
दुर्योधनं वै पुरतः कृत्वा वैरस्य भारत ॥ ३६
एतच्छ्रुत्वा वचः क्रूरं धृतराष्ट्रो जनेश्वरः ।
निपपात महाराज गतसत्त्वो महीतले ॥ ३७
तस्मिन्निपतिते भूमौ विदुरोऽपि महायशाः ।
निपपात महाराज राजव्यसनकर्शितः ॥ ३८
गान्धारी च नृपश्रेष्ठ सर्वाश्च कुरुयोषितः ।
पतिताः सहसा भूमौ श्रुत्वा क्रूरं वचश्च ताः ॥३९
निःसंज्ञं पतितं भूमौ तदासीद्राजमण्डलम् ।
प्रलापयुक्ता महती कथा न्यस्ता पटे यथा ॥ ४०
कृच्छ्रेण तु ततो राजा धृतराष्ट्रो महीपतिः ।
शनैरलभत प्राणान्पुत्रव्यसनकर्शितः ॥ ४१
लब्ध्वा तु स नृपः संज्ञां वेपमानः सुदुःखितः ।
उदीक्ष्य च दिशः सर्वाः क्षत्तारं वाक्यमब्रवीत् ॥
विद्वन्क्षत्तर्महाप्राज्ञ त्वं गतिर्भरतर्षभ ।
ममानाथस्य सुभृशं पुत्रैर्हीनस्य सर्वशः ।
एवमुक्त्वा ततो भूयो विसंज्ञो निपपात ह ॥ ४३
तं तथा पतितं दृष्ट्वा बान्धवा येऽस्य केचन ।
शीतैस्ते सिषिचुस्तोयैर्विव्यजुर्व्यजनैरपि ॥ ४४
स तु दीर्घेण कालेन प्रत्याश्वस्तो महीपतिः ।
तूष्णीं दध्यौ महीपालः पुत्रव्यसनकर्शितः ।
निःश्वसञ्जिह्मग इव कुम्भक्षिप्तो विशां पते ॥ ४५
संजयोऽप्यरुदत्तत्र दृष्ट्वा राजानमातुरम् ।
तथा सर्वाः स्त्रियश्चैव गान्धारी च यशस्विनी ॥४६
ततो दीर्घेण कालेन विदुरं वाक्यमब्रवीत् ।
धृतराष्ट्रो नरव्याघ्रो मुह्यमानो मुहुर्मुहुः ॥ ४७
गच्छन्तु योषितः सर्वा गान्धारी च यशस्विनी ।
तथेमे सुहृदः सर्वे भ्रश्यते मे मनो भृशम् ॥ ४८
एवमुक्तस्ततः क्षत्ता ताः स्त्रियो भरतर्षभ ।
विसर्जयामास शनैर्वेपमानः पुनः पुनः ॥ ४९

निश्चक्रमुस्ततः सर्वास्ताः स्त्रियो भरतर्षभ ।
सुहृदश्च ततः सर्वे दृष्ट्वा राजानमातुरम् ॥ ५०
ततो नरपतिं तत्र लब्धसंज्ञं परंतप ।
अवेक्ष्य संजयो दीनो रोदमानं भृशातुरम् ॥ ५१
प्राञ्जलिर्निःश्वसन्तं च तं नरेन्द्रं मुहुर्मुहुः ।
समाश्वासयत क्षत्ता वचसा मधुरेण ह ॥ ५२

इति श्रीमहाभारते शल्यपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

विसृष्टास्वथ नारीषु धृतराष्ट्रोऽम्बिकासुतः ।
विललाप महाराज दुःखाद्दुःखतरं गतः ॥ १
सधूममिव निःश्वस्य करौ धुन्वन्पुनः पुनः ।
विचिन्त्य च महाराज ततो वचनमब्रवीत् ॥ २
अहो बत महद्दुःखं यदहं पाण्डवान्रणे ।
क्षेमिणश्चाव्ययांश्चैव त्वत्तः सूत शृणोमि वै ॥ ३
वज्रसारमयं नूनं हृदयं सुदृढं मम ।
यच्छ्रुत्वा निहतान्पुत्रान्दीर्यते न सहस्रधा ॥ ४
चिन्तयित्वा वचस्तेषां बालक्रीडां च संजय ।
अद्य श्रुत्वा हतान्पुत्रान्भृशं मे दीर्यते मनः ॥ ५
अन्धत्वाद्यदि तेषां तु न मे रूपनिदर्शनम् ।
पुत्रस्नेहकृता प्रीतिर्नित्यमेतेषु धारिता ॥ ६
बालभावमतिक्रान्तान्यौवनस्थांश्च तानहम् ।
मध्यप्राप्तांस्तथा श्रुत्वा हृष्ट आसं तथानघ ॥ ७
तानद्य निहताञ्श्रुत्वा हतैश्वर्यान्हतौजसः ।
न लभे वै क्वचिच्छान्तिं पुत्राधिभिरभिप्लुतः ॥ ८
एह्येहि पुत्र राजेन्द्र ममानाथस्य सांप्रतम् ।
त्वया हीनो महाबाहो कां नु यास्याम्यहं गतिम् ॥ ९
गतिर्भूत्वा महाराज ज्ञातीनां सुहृदां तथा ।
अन्धं वृद्धं च मां वीर विहाय क्व नु गच्छसि ॥ १०
सा कृपा सा च ते प्रीतिः सा च राजन्सुमानिता ।
कथं विनिहतः पार्थैः संयुगेष्वपराजितः ॥ ११
कथं त्वं पृथिवीपालान्भुक्त्वा तात समागतान् ।
शेषे विनिहतो भूमौ प्राकृतः कुनृपो यथा ॥ १२
को नु मामुत्थितं काल्ये तात तातेति वक्ष्यति ।
महाराजेति सततं लोकनाथेति चासकृत् ॥ १३
परिष्वज्य च मां कण्ठे स्नेहेनाक्लिन्नलोचनः ।
अनुशाधीति कौरव्य तत्साधु वद मे वचः ॥ १४
ननु नामाहमश्रौषं वचनं तव पुत्रक ।
भूयसी मम पृथ्वीयं यथा पार्थस्य नो तथा ॥ १५
भगदत्तः कृपः शल्य आवन्त्योऽथ जयद्रथः ।
भूरिश्रवाः सोमदत्तो महाराजोऽथ बाह्लिकः ॥ १६
अश्वत्थामा च भोजश्च मागधश्च महाबलः ।
बृहद्बलश्च काशीशः शकुनिश्चापि सौबलः ॥ १७
म्लेच्छाश्च बहुसाहस्राः शकाश्च यवनैः सह ।
सुदक्षिणश्च काम्बोजस्त्रिगर्ताधिपतिस्तथा ॥ १८
भीष्मः पितामहश्चैव भारद्वाजोऽथ गौतमः ।
श्रुतायुश्चाच्युतायुश्च शतायुश्चापि वीर्यवान् ॥ १९
जलसंधोऽथार्ष्यशृङ्गी राक्षसश्चाप्यलायुधः ।
अलंबुसो महाबाहुः सुबाहुश्च महारथः ॥ २०
एते चान्ये च बहवो राजानो राजसत्तम ।
मदर्थमुद्यताः सर्वे प्राणांस्त्यक्त्वा रणे प्रभो ॥ २१
येषां मध्ये स्थितो युद्धे भ्रातृभिः परिवारितः ।
योधयिष्याम्यहं पार्थान्पाञ्चालांश्चैव सर्वशः ॥ २२
चेदींश्च नृपशार्दूल द्रौपदेयांश्च संयुगे ।
सात्यकिं कुन्तिभोजं च राक्षसं च घटोत्कचम् ॥ २३
एकोऽप्येषां महाराज समर्थः संनिवारणे ।
समरे पाण्डवेयानां संक्रुद्धो ह्यभिधावताम् ।
किं पुनः सहिता वीराः कृतवैराश्च पाण्डवैः ॥ २४
अथ वा सर्व एवैते पाण्डवस्यानुयायिभिः ।

योत्स्यन्ति सह राजेन्द्र हनिष्यन्ति च तान्मृधे ॥२५
कर्णस्त्वेको मया सार्धं निहनिष्यति पाण्डवान् ।
ततो नृपतयो वीराः स्थास्यन्ति मम शासने ॥ २६
यश्च तेषां प्रणेता वै वासुदेवो महाबलः ।
न स संनह्यते राजन्निति मामब्रवीद्वचः ॥ २७
तस्याहं वदतः सूत बहुशो मम संनिधौ ।
शुक्तितो ह्यनुपश्यामि निहतान्पाण्डवान्मृधे ॥ २८
तेषां मध्ये स्थिता यत्र हन्यन्ते मम पुत्रकाः ।
व्यायच्छमानाः समरे किमन्यद्भागधेयतः ॥ २९
भीष्मश्च निहतो यत्र लोकनाथः प्रतापवान् ।
शिखण्डिनं समासाद्य मृगेन्द्र इव जम्बुकम् ॥३०
द्रोणश्च ब्राह्मणो यत्र सर्वशस्त्रास्त्रपारगः ।
निहतः पाण्डवैः संख्ये किमन्यद्भागधेयतः ॥ ३१
भूरिश्रवा हतो यत्र सोमदत्तश्च संयुगे ।
बाह्लीकश्च महाराज किमन्यद्भागधेयतः ॥ ३२
सुदक्षिणो हतो यत्र जलसंधश्च कौरवः ।
श्रुतायुश्चाच्युतायुश्च किमन्यद्भागधेयतः ॥ ३३
बृहद्बलो हतो यत्र मागधश्च महाबलः ।
आवन्त्यो निहतो यत्र त्रिगर्तश्च जनाधिपः ।
संशप्तकाश्च बहवः किमन्यद्भागधेयतः ॥ ३४
अलंबुसस्तथा राजन्राक्षसश्चाप्यलायुधः ।
आर्श्यशृङ्गश्च निहतः किमन्यद्भागधेयतः ॥ ३५
नारायणा हता यत्र गोपाला युद्धदुर्मदाः ।
म्लेच्छाश्च बहुसाहस्राः किमन्यद्भागधेयतः ॥ ३६
शकुनिः सौबलो यत्र कैतव्यश्च महाबलः ।
निहतः सबलो वीरः किमन्यद्भागधेयतः ॥ ३७
राजानो राजपुत्राश्च शूराः परिघबाहवः ।
निहता बहवो यत्र किमन्यद्भागधेयतः ॥ ३८
नानादेशसमावृत्ताः क्षत्रिया यत्र संजय ।
निहताः समरे सर्वे किमन्यद्भागधेयतः ॥ ३९
पुत्राश्च मे विनिहताः पौत्राश्चैव महाबलाः ।
वयस्या भ्रातरश्चैव किमन्यद्भागधेयतः ॥ ४०
भागधेयसमायुक्तो ध्रुवमुत्पद्यते नरः ।
यश्च भाग्यसमायुक्तः स शुभं प्राप्नुयान्नरः ॥ ४१
अहं वियुक्तः स्वैर्भाग्यैः पुत्रैश्चैवेह संजय ।
कथमद्य भविष्यामि वृद्धः शत्रुवशं गतः ॥ ४२
नान्यदत्र परं मन्ये वनवासादृते प्रभो ।
सोऽहं वनं गमिष्यामि निर्बन्धुर्ज्ञातिसंक्षये ॥ ४३
न हि मेऽन्यद्भवेच्छ्रेयो वनाभ्युपगमादृते ।
इमामवस्थां प्राप्तस्य लूनपक्षस्य संजय ॥ ४४
दुर्योधनो हतो यत्र शल्यश्च निहतो युधि ।
दुःशासनो विशस्तश्च विकर्णश्च महाबलः ॥ ४५
कथं हि भीमसेनस्य श्रोष्येऽहं शब्दमुत्तमम् ।
एकेन समरे येन हतं पुत्रशतं मम ॥ ४६
असकृद्वदतस्तस्य दुर्योधनवधेन च ।
दुःखशोकाभिसंतप्तो न श्रोष्ये परुषा गिरः ॥ ४७
एवं स शोकसंतप्तः पार्थिवो हतबान्धवः ।
मुहुर्मुहुर्मुह्यमानः पुत्राधिभिरभिप्लुतः ॥ ४८
विलप्य सुचिरं कालं धृतराष्ट्रोऽम्बिकासुतः ।
दीर्घमुष्णं च निःश्वस्य चिन्तयित्वा पराभवम् ॥४९
दुःखेन महता राजा संतप्तो भरतर्षभ ।
पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथम् ॥ ५०
भीष्मद्रोणौ हतौ श्रुत्वा सूतपुत्रं च पातितम् ।
सेनापतिं प्रणेतारं किमकुर्वत मामकाः ॥ ५१
यं यं सेनाप्रणेतारं युधि कुर्वन्ति मामकाः ।
अचिरेणैव कालेन तं तं निघ्नन्ति पाण्डवाः ॥ ५२
रणमूर्ध्नि हतो भीष्मः पश्यतां वः किरीटिना ।
एवमेव हतो द्रोणः सर्वेषामेव पश्यताम् ॥ ५३
एवमेव हतः कर्णः सूतपुत्रः प्रतापवान् ।
सराजकानां सर्वेषां पश्यतां वः किरीटिना ॥ ५४

पूर्वमेवाहमुक्तो वै विदुरेण महात्मना ।
दुर्योधनापराधेन प्रजेयं विनशिष्यति ॥ ५५
केचिन्न सम्यक्पश्यन्ति मूढाः सम्यक्तथापरे ।
तदिदं मम मूढस्य तथाभूतं वचः स्म ह ॥ ५६
यदब्रवीन्मे धर्मात्मा विदुरो दीर्घदर्शिवान् ।
तत्तथा समनुप्राप्तं वचनं सत्यवादिनः ॥ ५७
दैवोपहतचित्तेन यन्मयापकृतं पुरा ।
अनयस्य फलं तस्य ब्रूहि गावल्गणे पुनः ॥ ५८
को वा मुखमनीकानामासीत्कर्णे निपातिते ।
अर्जुनं वासुदेवं च को वा प्रत्युद्ययौ रथी ॥ ५९
केऽरक्षन्दक्षिणं चक्रं मद्रराजस्य संयुगे ।
वामं च योद्धुकामस्य के वा वीरस्य पृष्ठतः ॥ ६०
कथं च वः समेतानां मद्रराजो महाबलः ।
निहतः पाण्डवैः संख्ये पुत्रो वा मम संजय ॥ ६१
ब्रूहि सर्वं यथातत्त्वं भरतानां महाक्षयम् ।
यथा च निहतः संख्ये पुत्रो दुर्योधनो मम ॥ ६२
पाञ्चालाश्च यथा सर्वे निहताः सपदानुगाः ।
धृष्टद्युम्नः शिखण्डी च द्रौपद्याः पञ्च चात्मजाः ॥ ६३
पाण्डवाश्च यथा मुक्तास्तथोभौ सात्वतौ युधि ।
कृपश्च कृतवर्मा च भारद्वाजस्य चात्मजः ॥ ६४
यद्यथा यादृशं चैव युद्धं वृत्तं च सांप्रतम् ।
अखिलं श्रोतुमिच्छामि कुशलो ह्यसि संजय ॥ ६५

इति श्रीमहाभारते शल्यपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

संजय उवाच ।

शृणु राजन्नवहितो यथा वृत्तो महान्क्षयः ।
कुरूणां पाण्डवानां च समासाद्य परस्परम् ॥ १
निहते सूतपुत्रे तु पाण्डवेन महात्मना ।
विद्रुतेषु च सैन्येषु समानीतेषु चासकृत् ॥ २
विमुखे तव पुत्रे तु शोकोपहतचेतसि ।
भृशोद्विग्नेषु सैन्येषु दृष्ट्वा पार्थस्य विक्रमम् ॥ ३
ध्यायमानेषु सैन्येषु दुःखं प्राप्तेषु भारत ।
बलानां मथ्यमानानां श्रुत्वा निनदमुत्तमम् ॥ ४
अभिज्ञानं नरेन्द्राणां विकृतं प्रेक्ष्य संयुगे ।
पतितान्रथनीडांश्च रथांश्चापि महात्मनाम् ॥ ५
रणे विनिहतान्नागान्दृष्ट्वा पत्तींश्च मारिष ।
आयोधनं चातिघोरं रुद्रस्याक्रीडसंनिभम् ॥ ६
अप्रख्यातिं गतानां तु राज्ञां शतसहस्रशः ।
कृपाविष्टः कृपो राजन्वयःशीलसमन्वितः ॥ ७
अब्रवीत्तत्र तेजस्वी सोऽभिसृत्य जनाधिपम् ।
दुर्योधनं मन्युवशाद्वचनं वचनक्षमः ॥ ८
दुर्योधन निबोधेदं यत्त्वा वक्ष्यामि कौरव ।
श्रुत्वा कुरु महाराज यदि ते रोचतेऽनघ ॥ ९
न युद्धधर्माच्छ्रेयान्वै पन्था राजेन्द्र विद्यते ।
यं समाश्रित्य युध्यन्ते क्षत्रियाः क्षत्रियर्षभ ॥ १०
पुत्रो भ्राता पिता चैव स्वस्रेयो मातुलस्तथा ।
संबन्धिबान्धवाश्चैव योध्या वै क्षत्रजीविना ॥ ११
वधे चैव परो धर्मस्तथाधर्मः पलायने ।
ते स्म घोरां समापन्ना जीविकां जीवितार्थिनः ॥ १२
तत्र त्वां प्रतिवक्ष्यामि किंचिदेव हितं वचः ।
हते भीष्मे च द्रोणे च कर्णे चैव महारथे ॥ १३
जयद्रथे च निहते तव भ्रातृषु चानघ ।
लक्ष्मणे तव पुत्रे च किं शेषं पर्युपास्महे ॥ १४
येषु भारं समासज्य राज्ये मतिमकुर्महि ।
ते संत्यज्य तनूर्याताः शूरा ब्रह्मविदां गतिम् ॥ १५
वयं त्विह विनाभूता गुणवद्भिर्महारथैः ।
कृपणं वर्तयिष्याम पातयित्वा नृपान्बहून् ॥ १६
सर्वैरपि च जीवद्भिर्बीभत्सुरपराजितः ।
कृष्णनेत्रो महाबाहुर्देवैरपि दुरासदः ॥ १७

इन्द्रकार्मुकवज्राभमिन्द्रकेतुमिवोच्छ्रितम् ।
वानरं केतुमासाद्य संचचाल महाचमूः ॥ १८
सिंहनादेन भीमस्य पाञ्चजन्यस्वनेन च ।
गाण्डीवस्य च निर्घोषात्संहृष्यन्ति मनांसि नः ॥१९
चरन्तीव महाविद्युन्मुष्णन्ती नयनप्रभाम् ।
अलातमिव चाविद्धं गाण्डीवं समदृश्यत ॥ २०
जाम्बूनदविचित्रं च धूयमानं महद्धनुः ।
दृश्यते दिक्षु सर्वासु विद्युदभ्रघनेष्विव ॥ २१
उह्यमानश्च कृष्णेन वायुनेव बलाहकः ।
तावकं तद्बलं राजन्नर्जुनोऽस्त्रविदां वरः ।
गहनं शिशिरे कक्षं ददाहाग्निरिवोत्थितः ॥ २२
गाहमानमनीकानि महेन्द्रसदृशप्रभम् ।
धनंजयमपश्याम चतुर्दन्तमिव द्विपम् ॥ २३
विक्षोभयन्तं सेनां ते त्रासयन्तं च पार्थिवान् ।
धनंजयमपश्याम नलिनीमिव कुञ्जरम् ॥ २४
त्रासयन्तं तथा योधान्धनुर्घोषेण पाण्डवम् ।
भूय एनमपश्याम सिंहं मृगगणा इव ॥ २५
सर्वलोकमहेष्वासौ वृषभौ सर्वधन्विनाम् ।
आमुक्तकवचौ कृष्णौ लोकमध्ये विरेजतुः ॥ २६
अद्य सप्तदशाहानि वर्तमानस्य भारत ।
संग्रामस्यातिघोरस्य वध्यतां चाभितो युधि ॥ २७
वायुनेव विधूतानि तवानीकानि सर्वशः ।
शरदम्भोदजालानि व्यशीर्यन्त समन्ततः ॥ २८
तां नावमिव पर्यस्तां भ्रान्तवातां महार्णवे ।
तव सेनां महाराज सव्यसाची व्यकम्पयत् ॥ २९
क नु ते सूतपुत्रोऽभूत्क नु द्रोणः सहानुगः ।
अहं क च क चात्मा ते हार्दिक्यश्च तथा क नु ।
दुःशासनश्च भ्राता ते भ्रातृभिः सहितः क नु ॥३०
बाणगोचरसंप्राप्तं प्रेक्ष्य चैव जयद्रथम् ।
संबन्धिनस्ते भ्रातृंश्च सहायान्मातुलांस्तथा ॥ ३१
सर्वान्विक्रम्य मिषतो लोकांश्चाक्रम्य मूर्धनि ।
जयद्रथो हतो राजन्किं नु शेषमुपास्महे ॥ ३२
को वेह स पुमानस्ति यो विजेष्यति पाण्डवम् ।
तस्य चास्त्राणि दिव्यानि विविधानि महात्मनः ।
गाण्डीवस्य च निर्घोषो वीर्याणि हरते हि नः ॥ ३३
नष्टचन्द्रा यथा रात्रिः सेनेयं हतनायका ।
नागभग्नद्रुमा शुष्का नदीवाकुलतां गता ॥ ३४
ध्वजिन्यां हतनेत्रायां यथेष्टं श्वेतवाहनः ।
चरिष्यति महाबाहुः कक्षेऽग्निरिव संज्वलन् ॥ ३५
सात्यकेश्चैव यो वेगो भीमसेनस्य चोभयोः ।
दारयेत गिरीन्सर्वाञ्शोषयेत च सागरान् ॥ ३६
उवाच वाक्यं यद्भीमः सभामध्ये विशां पते ।
कृतं तत्सकलं तेन भूयश्चैव करिष्यति ॥ ३७
प्रमुखस्थे तदा कर्णे बलं पाण्डवरक्षितम् ।
दुरासदं तथा गुप्तं गूढं गाण्डीवधन्वना ॥ ३८
युष्माभिस्तानि चीर्णानि यान्यसाधूनि साधुषु ।
अकारणकृतान्येव तेषां वः फलमागतम् ॥ ३९
आत्मनोऽर्थे त्वया लोको यत्नतः सर्व आहृतः ।
स ते संशयितस्तात आत्मा च भरतर्षभ ॥ ४०
रक्ष दुर्योधनात्मानमात्मा सर्वस्य भाजनम् ।
भिन्ने हि भाजने तात दिशो गच्छति तद्गतम् ॥४१
हीयमानेन वै संधिः पर्येष्टव्यः समेन च ।
विग्रहो वर्धमानेन नीतिरेषा बृहस्पतेः ४२
ते वयं पाण्डुपुत्रेभ्यो हीनाः स्वबलशक्तितः ।
अत्र ते पाण्डवैः सार्धं संधिं मन्ये क्षमं प्रभो ॥४३
न जानीते हि यः श्रेयः श्रेयसश्चावमन्यते ।
स क्षिप्रं भ्रश्यते राज्यान्न च श्रेयोऽनुविन्दति ॥४४
प्रणिपत्य हि राजानं राज्यं यदि लभेमहि ।
श्रेयः स्यान्न तु मौढ्येन राजन्गन्तुं पराभवम् ॥४५
वैचित्रवीर्यवचनात्कृपाशीलो युधिष्ठिरः ।

विनियुञ्जीत राज्ये त्वां गोविन्दवचनेन च ॥ ४६
यद्ब्रूयाद्धि हृषीकेशो राजानमपराजितम् ।
अर्जुनं भीमसेनं च सर्वं कुर्युरसंशयम् ॥ ४७
नातिक्रमिष्यते कृष्णो वचनं कौरवस्य ह ।
धृतराष्ट्रस्य मन्येऽहं नापि कृष्णस्य पाण्डवः ॥ ४८
एतत्क्षममहं मन्ये तव पार्थैरविग्रहम् ।
न त्वा ब्रवीमि कार्पण्यान्न प्राणपरिरक्षणात् ।
पथ्यं राजन्ब्रवीमि त्वां तत्परासुः स्मरिष्यसि ॥४९
इति वृद्धो विलप्यैतत्कृपः शारद्वतो वचः ।
दीर्घमुष्णं च निःश्वस्य शुशोच च मुमोह च ॥५०

इति श्रीमहाभारते शल्यपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

संजय उवाच ।

एवमुक्तस्ततो राजा गौतमेन यशस्विना ।
निःश्वस्य दीर्घमुष्णं च तूष्णीमासीद्विशां पते ॥ १
ततो मुहूर्तं स ध्यात्वा धार्तराष्ट्रो महामनाः ।
कृपं शारद्वतं वाक्यमित्युवाच परंतपः ॥ २
यत्किंचित्सुहृदा वाच्यं तत्सर्वं श्रावितो ह्यहम् ।
कृतं च भवता सर्वं प्राणान्संत्यज्य युध्यता ॥ ३
गाहमानमनीकानि युध्यमानं महारथैः ।
पाण्डवैरतितेजोभिर्लोकस्त्वामनुदृष्टवान् ॥ ४
सुहृदा यदिदं वाच्यं भवता श्रावितो ह्यहम् ।
न मां प्रीणाति तत्सर्वं मुमूर्षोरिव भेषजम् ॥ ५
हेतुकारणसंयुक्तं हितं वचनमुत्तमम् ।
उच्यमानं महाबाहो न मे विप्राग्र्य रोचते ॥ ६
राज्याद्विनिकृतोऽस्माभिः कथं सोऽस्मासु विश्वसेत् ।
अक्षद्यूते च नृपतिर्जितोऽस्माभिर्महाधनः ।
स कथं मम वाक्यानि श्रद्दध्याद्भूय एव तु ॥ ७
तथा दौत्येन संप्राप्तः कृष्णः पार्थहिते रतः ।
प्रलब्धश्च हृषीकेशस्तच्च कर्म विरोधितम् ।
स च मे वचनं ब्रह्मन्कथमेवाभिमंस्यते ॥ ८
विललाप हि यत्कृष्णा सभामध्ये समेयुषी ।
न तन्मर्षयते कृष्णो न राज्यहरणं तथा ॥ ९
एकप्राणावुभौ कृष्णावन्योन्यं प्रति संहतौ ।
पुरा यच्छ्रुतमेवासीदद्य पश्यामि तत्प्रभो ॥ १०
स्वस्रीयं च हतं श्रुत्वा दुःखं स्वपिति केशवः ।
कृतागसो वयं तस्य स मदर्थं कथं क्षमेत् ॥ ११
अभिमन्योर्विनाशेन न शर्म लभतेऽर्जुनः ।
स कथं मद्धिते यत्नं प्रकरिष्यति याचितः ॥ १२
मध्यमः पाण्डवस्तीक्ष्णो भीमसेनो महाबलः ।
प्रतिज्ञातं च तेनोग्रं स भज्येत न संनमेत् ॥ १३
उभौ तौ बद्धनिस्त्रिंशावुभौ चाबद्धकङ्कटौ ।
कृतवैरावुभौ वीरौ यमावपि यमोपमौ ॥ १४
धृष्टद्युम्नः शिखण्डी च कृतवैरौ मया सह ।
तौ कथं मद्धिते यत्नं प्रकुर्यातां द्विजोत्तम ॥ १५
दुःशासनेन यत्कृष्णा एकवस्त्रा रजस्वला ।
परिक्लिष्टा सभामध्ये सर्वलोकस्य पश्यतः ॥ १६
तथा विवसनां दीनां स्मरन्त्यद्यापि पाण्डवाः ।
न निवारयितुं शक्याः संग्रामात्ते परंतपाः ॥ १७
यदा च द्रौपदी कृष्णा मद्विनाशाय दुःखिता ।
उग्रं तेपे तपः कृष्णा भर्तॄणामर्थसिद्धये ।
स्थण्डिले नित्यदा शेते यावद्वैरस्य यातना ॥ १८
निक्षिप्य मानं दर्पं च वासुदेवसहोदरा ।
कृष्णायाः प्रेष्यवद्भूत्वा शुश्रूषां कुरुते सदा ॥ १९
इति सर्वं समुन्नद्धं न निर्वाति कथंचन ।
अभिमन्योर्विनाशेन स संधेयः कथं मया ॥ २०
कथं च नाम भुक्त्वेमां पृथिवीं सागराम्बराम् ।
पाण्डवानां प्रसादेन भुञ्जीयां राज्यमल्पकम् ॥ २१
उपर्युपरि राज्ञां वै ज्वलितो भास्करो यथा ।

युधिष्ठिरं कथं पश्चादनुयास्यामि दासवत् ॥ २२
कथं भुक्त्वा स्वयं भोगान्दत्त्वा दायांश्च पुष्कलान् ।
कृपणं वर्तयिष्यामि कृपणैः सह जीविकाम् ॥ २३
नाभ्यसूयामि ते वाक्यमुक्तं स्निग्धं हितं त्वया ।
न तु संधिमहं मन्ये प्राप्तकालं कथंचन ॥ २४
सुनीतमनुपश्यामि सुयुद्धेन परंतप ।
नायं क्लीबयितुं कालः संयोद्धुं काल एव नः ॥ २५
इष्टं मे बहुभिर्यज्ञैर्दत्ता विप्रेषु दक्षिणाः ।
प्राप्ताः क्रमश्रुता वेदाः शत्रूणां मूर्ध्नि च स्थितम् ॥
भृत्या मे सुभृतास्तात दीनश्चाभ्युद्धृतो जनः ।
यातानि परराष्ट्राणि स्वराष्ट्रमनुपालितम् ॥ २७
भुक्ताश्च विविधा भोगास्त्रिवर्गः सेवितो मया ।
पितॄणां गतमानृण्यं क्षत्रधर्मस्य चोभयोः ॥ २८
न ध्रुवं सुखमस्तीह कुतो राज्यं कुतो यशः ।
इह कीर्तिर्विधातव्या सा च युद्धेन नान्यथा ॥ २९
गृहे यत्क्षत्रियस्यापि निधनं तद्विगर्हितम् ।
अधर्मः सुमहानेष यच्छय्यामरणं गृहे ॥ ३०
अरण्ये यो विमुञ्चेत संग्रामे वा तनुं नरः ।
क्रतूनाहृत्य महतो महिमानं स गच्छति ॥ ३१
कृपणं विलपन्नार्तो जरयाभिपरिप्लुतः ।
म्रियते रुदतां मध्ये ज्ञातीनां न स पूरुषः ॥ ३२
त्यक्त्वा तु विविधान्भोगान्प्राप्तानां परमां गतिम् ।
अपीदानीं सुयुद्धेन गच्छेयं सत्सलोकताम् ॥ ३३
शूराणामार्यवृत्तानां संग्रामेष्वनिवर्तिनाम् ।
धीमतां सत्यसंधानां सर्वेषां क्रतुयाजिनाम् ॥ ३४
शस्त्रावभृथमाप्तानां ध्रुवं वासस्त्रिविष्टपे ।
मुदा नूनं प्रपश्यन्ति शुभ्रा ह्यप्सरसां गणाः ॥ ३५
पश्यन्ति नूनं पितरः पूजितान्शक्रसंसदि ।
अप्सरोभिः परिवृतान्मोदमानांस्त्रिविष्टपे ॥ ३६
पन्थानममरैर्यातं शूरैश्चैवानिवर्तिभिः ।
अपि तैः संगतं मार्गं वयमप्यारुहेमहि ॥ ३७
पितामहेन वृद्धेन तथाचार्येण धीमता ।
जयद्रथेन कर्णेन तथा दुःशासनेन च ॥ ३८
घटमाना मदर्थेऽस्मिन्हताः शूरा जनाधिपाः ।
शेरते लोहिताक्ताङ्गाः पृथिव्यां शरविक्षताः ॥ ३९
उत्तमास्त्रविदः शूरा यथोक्तक्रतुयाजिनः ।
त्यक्त्वा प्राणान्यथान्यायमिन्द्रसद्मसु धिष्ठिताः ॥ ४०
तैस्त्वयं रचितः पन्था दुर्गमो हि पुनर्भवेत् ।
संपतद्भिर्महावेगैरितो याद्भिश्च सद्गतिम् ॥ ४१
ये मदर्थे हताः शूरास्तेषां कृतमनुस्मरन् ।
ऋणं तत्प्रतिमुञ्चानो न राज्ये मन आदधे ॥ ४२
पातयित्वा वयस्यांश्च भ्रातॄनथ पितामहान् ।
जीवितं यदि रक्षेयं लोको मां गर्हयेद्ध्रुवम् ॥ ४३
कीदृशं च भवेद्राज्यं मम हीनस्य बन्धुभिः ।
सखिभिश्च सुहृद्भिश्च प्रणिपत्य च पाण्डवम् ॥ ४४
सोऽहमेतादृशं कृत्वा जगतोऽस्य पराभवम् ।
सुयुद्धेन ततः स्वर्गं प्राप्स्यामि न तदन्यथा ॥ ४५
एवं दुर्योधनेनोक्तं सर्वे संपूज्य तद्वचः ।
साधु साध्विति राजानं क्षत्रियाः संबभाषिरे ॥ ४६
पराजयमशोचन्तः कृतचित्ताश्च विक्रमे ।
सर्वे सुनिश्चिता योद्धुमुदग्रमनसोऽभवन् ॥ ४७
ततो वाहान्समाश्वास्य सर्वे युद्धाभिनन्दिनः ।
ऊने द्वियोजने गत्वा प्रत्यतिष्ठन्त कौरवाः ॥ ४८
आकाशे विद्रुमे पुण्ये प्रस्थे हिमवतः शुभे ।
अरुणां सरस्वतीं प्राप्य पपुः सस्नुश्च तज्जलम् ॥ ४९
तव पुत्राः कृतोत्साहाः पर्यवर्तन्त ते ततः ।
पर्यवस्थाप्य चात्मानमन्योन्येन पुनस्तदा ।
सर्वे राजन्न्यवर्तन्त क्षत्रियाः कालचोदिताः ॥ ५०

इति श्रीमहाभारते शल्यपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

संजय उवाच ।

अथ हैमवते प्रस्थे स्थित्वा युद्धाभिनन्दिनः ।
सर्व एव महाराज योधास्तत्र समागताः ॥ १
शल्यश्च चित्रसेनश्च शकुनिश्च महारथः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ २
सुषेणोऽरिष्टसेनश्च धृतसेनश्च वीर्यवान् ।
जयत्सेनश्च राजानस्ते रात्रिमुषितास्ततः ॥ ३
रणे कर्णे हते वीरे त्रासिता जितकाशिभिः ।
नालभञ्शर्म ते पुत्रा हिमवन्तमृते गिरिम् ॥ ४
तेऽब्रुवन्सहितास्तत्र राजानं सैन्यसंनिधौ ।
कृतयत्ना रणे राजन्संपूज्य विधिवत्तदा ॥ ५
कृत्वा सेनाप्रणेतारं परांस्त्वं योद्धुमर्हसि ।
येनाभिगुप्ताः संग्रामे जयेमासुहृदो वयम् ॥ ६
ततो दुर्योधनः स्थित्वा रथे रथवरोत्तमम् ।
सर्वयुद्धविभागज्ञमन्तकप्रतिमं युधि ॥ ७
स्वङ्गं प्रच्छन्नशिरसं कम्बुग्रीवं प्रियंवदम् ।
व्याकोशपद्माभिमुखं व्याघ्रास्यं मेरुगौरवम् ॥ ८
स्थाणोर्वृषस्य सदृशं स्कन्धनेत्रगतिस्वरैः ।
पुष्टश्लिष्टायतभुजं सुविस्तीर्णघनोरसम् ॥ ९
जवे बले च सदृशमरुणानुजवातयोः ।
आदित्यस्य त्विषा तुल्यं बुद्ध्या चोशनसा समम् ॥
कान्तिरूपमुखैश्वर्यैस्त्रिभिश्चन्द्रमसोपमम् ।
काञ्चनोपलसंघातैः सदृशं श्लिष्टसंधिकम् ॥ ११
सुवृत्तोरुकटीजङ्घं सुपादं स्वङ्गुलीनखम् ।
स्मृत्वा स्मृत्वैव च गुणान्धात्रा यत्नाद्विनिर्मितम् ॥ १२
सर्वलक्षणसंपन्नं निपुणं श्रुतिसागरम् ।
जेतारं तरसारीणामजेयं शत्रुभिर्बलात् ॥ १३
दशाङ्गं यश्चतुष्पादमिष्वस्त्रं वेद तत्त्वतः ।
साङ्गांश्च चतुरो वेदान्सम्यगाख्यानपञ्चमान् ॥ १४
आराध्य त्र्यम्बकं यत्नाद्व्रतैरुग्रैर्महातपाः ।
अयोनिजायामुत्पन्नो द्रोणेनायोनिजेन यः ॥ १५
तमप्रतिमकर्माणं रूपेणासदृशं भुवि ।
पारगं सर्वविद्यानां गुणार्णवमनिन्दितम् ।
तमभ्येत्यात्मजस्तुभ्यमश्वत्थामानमब्रवीत् ॥ १६
यं पुरस्कृत्य सहिता युधि जेष्याम पाण्डवान् ।
गुरुपुत्रोऽद्य सर्वेषामस्माकं परमा गतिः ।
भवांस्तस्मान्नियोगात्ते कोऽस्तु सेनापतिर्मम ॥ १७

द्रौणिरुवाच ।

अयं कुलेन वीर्येण तेजसा यशसा श्रिया ।
सर्वैर्गुणैः समुदितः शल्यो नोऽस्तु चमूपतिः ॥ १८
भागिनेयान्निजांस्त्यक्त्वा कृतज्ञोऽस्मानुपागतः ।
महासेनो महाबाहुर्महासेन इवापरः ॥ १९
एनं सेनापतिं कृत्वा नृपतिं नृपसत्तम ।
शक्यः प्राप्तुं जयोऽस्माभिर्देवैः स्कन्दमिवाजितम् ॥
तथोक्ते द्रोणपुत्रेण सर्व एव नराधिपाः ।
परिवार्य स्थिताः शल्यं जयशब्दांश्च चक्रिरे ।
युद्धाय च मतिं चक्रुरावेशं च परं ययुः ॥ २१
ततो दुर्योधनः शल्यं भूमौ स्थित्वा रथे स्थितम् ।
उवाच प्राञ्जलिर्भूत्वा रामभीष्मसमं रणे ॥ २२
अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल ।
यत्र मित्रममित्रं वा परीक्षन्ते बुधा जनाः ॥ २३
स भवानस्तु नः शूरः प्रणेता वाहिनीमुखे ।
रणं च याते भवति पाण्डवा मन्दचेतसः ।
भविष्यन्ति सहामात्याः पाञ्चालाश्च निरुद्यमाः ॥ २४

शल्य उवाच ।

यत्तु मां मन्यसे राजन्कुरुराज करोमि तत् ।
त्वत्प्रियार्थं हि मे सर्वं प्राणा राज्यं धनानि च ॥ २५

दुर्योधन उवाच ।

सेनापत्येन वरये त्वामहं मातुलातुलम् ।

सोऽस्मान्पाहि युधां श्रेष्ठ स्कन्दो देवानिवाहवे ॥२६
अभिषिच्यस्व राजेन्द्र देवानामिव पावकिः ।
जहि शत्रून्रणे वीर महेन्द्रो दानवानिव ॥ २७

इति श्रीमहाभारते शल्यपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

संजय उवाच ।

एतच्छ्रुत्वा वचो राज्ञो मद्रराजः प्रतापवान् ।
दुर्योधनं तदा राजन्वाक्यमेतदुवाच ह ॥ १
दुर्योधन महाबाहो शृणु वाक्यविदां वर ।
यावेतौ मन्यसे कृष्णौ रथस्थौ रथिनां वरौ ।
न मे तुल्यावुभावेतौ बाहुवीर्ये कथंचन ॥ २
उद्यतां पृथिवीं सर्वां ससुरासुरमानवाम् ।
योधयेयं रणमुखे संक्रुद्धः किमु पाण्डवान् ।
विजेष्ये च रणे पार्थान्सोमकांश्च समागतान् ॥ ३
अहं सेनाप्रणेता ते भविष्यामि न संशयः ।
तं च व्यूहं विधास्यामि न तरिष्यन्ति यं परे ।
इति सत्यं ब्रवीम्येष दुर्योधन न संशयः ॥ ४
एवमुक्तस्ततो राजा मद्राधिपतिमञ्जसा ।
अभ्यषिञ्चत सेनाया मध्ये भरतसत्तम ।
विधिना शास्त्रदृष्टेन हृष्टरूपो विशां पते ॥ ५
अभिषिक्ते ततस्तस्मिन्सिंहनादो महानभूत् ।
तव सैन्येष्ववाद्यन्त वादित्राणि च भारत ॥ ६
हृष्टाश्चासंस्तदा योधा मद्रकाश्च महारथाः ।
तुष्टुवुश्चैव राजानं शल्यमाहवशोभिनम् ॥ ७
जय राजंश्चिरं जीव जहि शत्रून्समागतान् ।
तव बाहुबलं प्राप्य धार्तराष्ट्रा महाबलाः ।
निखिलां पृथिवीं सर्वां प्रशासन्तु हतद्विषः ॥ ८
त्वं हि शक्तो रणे जेतुं ससुरासुरमानवान् ।
मर्त्यधर्माण इह तु किमु सोमकसृञ्जयान् ॥ ९
एवं संस्तूयमानस्तु मद्राणामधिपो बली ।
हर्षं प्राप तदा वीरो दुरापमकृतात्मभिः ॥ १०

शल्य उवाच ।

अद्यैवाहं रणे सर्वान्पाञ्चालान्सह पाण्डवैः ।
निहनिष्यामि राजेन्द्र स्वर्गं यास्यामि वा हतः ॥११
अद्य पश्यन्तु मां लोका विचरन्तमभीतवत् ।
अद्य पाण्डुसुताः सर्वे वासुदेवः ससात्यकिः ॥१२
पाञ्चालाश्चेदयश्चैव द्रौपदेयाश्च सर्वशः ।
धृष्टद्युम्नः शिखण्डी च सर्वे चापि प्रभद्रकाः ॥ १३
विक्रमं मम पश्यन्तु धनुषश्च महद्बलम् ।
लाघवं चास्त्रवीर्यं च भुजयोश्च बलं युधि ॥ १४
अद्य पश्यन्तु मे पार्थाः सिद्धाश्च सह चारणैः ।
यादृशं मे बलं बाह्वोः संपदस्त्रेषु या च मे ॥ १५
अद्य मे विक्रमं दृष्ट्वा पाण्डवानां महारथाः ।
प्रतीकारपरा भूत्वा चेष्टन्तां विविधाः क्रियाः ॥१६
अद्य सैन्यानि पाण्डूनां द्रावयिष्ये समन्ततः ।
द्रोणभीष्मावति विभो सूतपुत्रं च संयुगे ।
विचरिष्ये रणे युध्यन्प्रियार्थं तव कौरव ॥ १७

संजय उवाच ।

अभिषिक्ते तदा शल्ये तव सैन्येषु मानद ।
न कर्णव्यसनं किंचिन्मेनिरे तत्र भारत ॥ १८
हृष्टाः सुमनसश्चैव बभूवुस्तत्र सैनिकाः ।
मेनिरे निहतान्पार्थान्मद्रराजवशं गतान् ॥ १९
प्रहर्षं प्राप्य सेना तु तावकी भरतर्षभ ।
तां रात्रिं सुखिनी सुप्ता स्वस्थचित्तेव साभवत् ॥२०
सैन्यस्य तव तं शब्दं श्रुत्वा राजा युधिष्ठिरः ।
वार्ष्णेयमब्रवीद्वाक्यं सर्वक्षत्रस्य शृण्वतः ॥ २१
मद्रराजः कृतः शल्यो धार्तराष्ट्रेण माधव ।
सेनापतिर्महेष्वासः सर्वसैन्येषु पूजितः ॥ २२
एतच्छ्रुत्वा यथाभूतं कुरु माधव यत्क्षमम् ।

भवान्नेता च गोप्ता च विधत्स्व यदनन्तरम् ॥ २३
तमब्रवीन्महाराज वासुदेवो जनाधिपम् ।
आर्तायनिमहं जाने यथातत्त्वेन भारत ॥ २४
वीर्यवांश्च महातेजा महात्मा च विशेषतः ।
कृती च चित्रयोधी च संयुक्तो लाघवेन च ॥ २५
यादृग्भीष्मस्तथा द्रोणो यादृक्कर्णश्च संयुगे ।
तादृशस्तद्विशिष्टो वा मद्रराजो मतो मम ॥ २६
युध्यमानस्य तस्याजौ चिन्तयन्नेव भारत ।
योद्धारं नाधिगच्छामि तुल्यरूपं जनाधिप ॥ २७
शिखण्ड्यर्जुनभीमानां सात्वतस्य च भारत ।
धृष्टद्युम्नस्य च तथा बलेनाभ्यधिको रणे ॥ २८
मद्रराजो महाराज सिंहद्विरदविक्रमः ।
विचरिष्यत्यभीः काले कालः क्रुद्धः प्रजास्विव ॥२९
तस्याद्य न प्रपश्यामि प्रतियोद्धारमाहवे ।
त्वामृते पुरुषव्याघ्र शार्दूलसमविक्रमम् ॥ ३०
सदेवलोके कृत्स्नेऽस्मिन्नान्यस्त्वत्तः पुमान्भवेत् ।
मद्रराजं रणे क्रुद्धं यो हन्यात्कुरुनन्दन ।
अहन्यहनि युध्यन्तं क्षोभयन्तं बलं तव ॥ ३१
तस्माज्जहि रणे शल्यं मघवानिव शम्बरम् ।
अतिपश्चादसौ वीरो धार्तराष्ट्रेण सत्कृतः ॥ ३२
तवैव हि जयो नूनं हते मद्रेश्वरे युधि ।
तस्मिन्हते हतं सर्वं धार्तराष्ट्रबलं महत् ॥ ३३
एतच्छ्रुत्वा महाराज वचनं मम सांप्रतम् ।
प्रत्युद्याहि रणे पार्थ मद्रराजं महाबलम् ।
जहि चैनं महाबाहो वासवो नमुचिं यथा ॥ ३४
न चैवात्र दया कार्या मातुलोऽयं ममेति वै ।
क्षत्रधर्मं पुरस्कृत्य जहि मद्रजनेश्वरम् ॥ ३५
भीष्मद्रोणार्णवं तीर्त्वा कर्णपातालसंभवम् ।
मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम् ॥३६
यच्च ते तपसो वीर्यं यच्च क्षात्रं बलं तव ।
तद्दर्शय रणे सर्वं जहि चैनं महारथम् ॥ ३७
एतावदुक्त्वा वचनं केशवः परवीरहा ।
जगाम शिबिरं सायं पूज्यमानोऽथ पाण्डवैः ॥ ३८
केशवे तु तदा याते धर्मराजो युधिष्ठिरः ।
विसृज्य सर्वान्भ्रातॄंश्च पाञ्चालानथ सोमकान् ।
सुष्वाप रजनीं तां तु विशल्य इव कुञ्जरः ॥ ३९
ते च सर्वे महेष्वासाः पाञ्चालाः पाण्डवास्तथा ।
कर्णस्य निधने हृष्टाः सुषुपुस्तां निशां तदा ॥ ४०
गतज्वरं महेष्वासं तीर्णपारं महारथम् ।
बभूव पाण्डवेयानां सैन्यं प्रमुदितं निशि ।
सूतपुत्रस्य निधने जयं लब्ध्वा च मारिष ॥ ४१

इति श्रीमहाभारते शल्यपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

संजय उवाच ।

व्यतीतायां रजन्यां तु राजा दुर्योधनस्तदा ।
अब्रवीत्तावकान्सर्वान्संनह्यन्तां महारथाः ॥ १
राज्ञस्तु मतमाज्ञाय समनह्यत सा चमूः ।
अयोजयन्रथांस्तूर्णं पर्यधावंस्तथापरे ॥ २
अकल्प्यन्त च मातङ्गाः समनह्यन्त पत्तयः ।
हयानास्तरणोपेतांश्चक्रुरन्ये सहस्रशः ॥ ३
वादित्राणां च निनदः प्रादुरासीद्विशां पते ।
बोधनार्थं हि योधानां सैन्यानां चाप्युदीर्यताम् ॥ ४
ततो बलानि सर्वाणि सेनाशिष्टानि भारत ।
संनद्धान्येव ददृशुर्मृत्युं कृत्वा निवर्तनम् ॥ ५
शल्यं सेनापतिं कृत्वा मद्रराजं महारथाः ।
प्रविभज्य बलं सर्वमनीकेषु व्यवस्थिताः ॥ ६
ततः सर्वे समागम्य पुत्रेण तव सैनिकाः ।
कृपश्च कृतवर्मा च द्रौणिः शल्योऽथ सौबलः ॥ ७
अन्ये च पार्थिवाः शेषाः समयं चक्रिरे तदा ।

न न एकेन योद्धव्यं कथंचिदपि पाण्डवैः ॥ ८
यो ह्येकः पाण्डवैर्युध्येद्यो वा युध्यन्तमुत्सृजेत् ।
स पञ्चभिर्भवेद्युक्तः पातकैः सोपपातकैः ।
अन्योन्यं परिरक्षद्भिर्योद्धव्यं सहितैश्च नः ॥ ९
एवं ते समयं कृत्वा सर्वे तत्र महारथाः ।
मद्रराजं पुरस्कृत्य तूर्णमभ्यद्रवन्परान् ॥ १०
तथैव पाण्डवा राजन्व्यूह्य सैन्यं महारणे ।
अभ्ययुः कौरवान्सर्वान्योत्स्यमानाः समन्ततः ॥ ११
तद्बलं भरतश्रेष्ठ क्षुब्धार्णवसमस्वनम् ।
समुद्धूतार्णवाकारमुद्धूतरथकुञ्जरम् ॥ १२

धृतराष्ट्र उवाच ।

द्रोणस्य भीष्मस्य च वै राधेयस्य च मे श्रुतम् ।
पातनं शंस मे भूयः शल्यस्याथ सुतस्य मे ॥ १३
कथं रणे हतः शल्यो धर्मराजेन संजय ।
भीमेन च महाबाहुः पुत्रो दुर्योधनो मम ॥ १४

संजय उवाच ।

क्षयं मनुष्यदेहानां रथनागाश्वसंक्षयम् ।
शृणु राजन्स्थिरो भूत्वा संग्रामं शंसतो मम ॥ १५
आशा बलवती राजन्पुत्राणां तेऽभवत्तदा ।
हते भीष्मे च द्रोणे च सूतपुत्रे च पातिते ।
शल्यः पार्थान्रणे सर्वान्निहनिष्यति मारिष ॥ १६
तामाशां हृदये कृत्वा समाश्वास्य च भारत ।
मद्रराजं च समरे समाश्रित्य महारथम् ।
नाथवन्तमथात्मानममन्यत सुतस्तव ॥ १७
यदा कर्णे हते पार्थाः सिंहनादं प्रचक्रिरे ।
तदा राजन्धार्तराष्ट्रानाविवेश महद्भयम् ॥ १८
तान्समाश्वास्य तु तदा मद्रराजः प्रतापवान् ।
व्यूह्य व्यूहं महाराज सर्वतोभद्रमृद्धिमत् ॥ १९
प्रत्युद्यातो रणे पार्थान्मद्रराजः प्रतापवान् ।
विधुन्वन्कार्मुकं चित्रं भारघ्नं वेगवत्तरम् ॥ २०
रथप्रवरमास्थाय सैन्धवाश्वं महारथः ।
तस्य सीता महाराज रथस्याशोभयद्रथम् ॥ २१
स तेन संवृतो वीरो रथेनामित्रकर्शनः ।
तस्थौ शूरो महाराज पुत्राणां ते भयप्रणुत् ॥ २२
प्रयाणे मद्रराजोऽभून्मुखं व्यूहस्य दंशितः ।
मद्रकैः सहितो वीरैः कर्णपुत्रैश्च दुर्जयैः ॥ २३
सव्येऽभूत्कृतवर्मा च त्रिगर्तैः परिवारितः ।
गौतमो दक्षिणे पार्श्वे शकैश्च यवनैः सह ॥ २४
अश्वत्थामा पृष्ठतोऽभूत्काम्बोजैः परिवारितः ।
दुर्योधनोऽभवन्मध्ये रक्षितः कुरुपुंगवैः ॥ २५
हयानीकेन महता सौबलश्चापि संवृतः ।
प्रययौ सर्वसैन्येन कैतव्यश्च महारथः ॥ २६
पाण्डवाश्च महेष्वासा व्यूह्य सैन्यमरिंदमाः ।
त्रिधा भूत्वा महाराज तव सैन्यमुपाद्रवन् ॥ २७
धृष्टद्युम्नः शिखण्डी च सात्यकिश्च महारथः ।
शल्यस्य वाहिनीं तूर्णमभिदुद्रुवुराहवे ॥ २८
ततो युधिष्ठिरो राजा स्वेनानीकेन संवृतः ।
शल्यमेवाभिदुद्राव जिघांसुर्भरतर्षभ ॥ २९
हार्दिक्यं तु महेष्वासमर्जुनः शत्रुपूगहा ।
संशप्तकगणांश्चैव वेगतोऽभिविदुद्रुवे ॥ ३०
गौतमं भीमसेनो वै सोमकाश्च महारथाः ।
अभ्यद्रवन्त राजेन्द्र जिघांसन्तः परान्युधि ॥ ३१
माद्रीपुत्रौ तु शकुनिमुलूकं च महारथौ ।
ससैन्यौ सहसेनौ तावुपतस्थतुराहवे ॥ ३२
तथैवायुतशो योधास्तावकाः पाण्डवान्रणे ।
अभ्यद्रवन्त संक्रुद्धा विविधायुधपाणयः ॥ ३३

धृतराष्ट्र उवाच ।

हते भीष्मे महेष्वासे द्रोणे कर्णे महारथे ।
कुरुष्वल्पावशिष्टेषु पाण्डवेषु च संयुगे ॥ ३४
सुसंरब्धेषु पार्थेषु पराक्रान्तेषु संजय ।

मामकानां परेषां च किं शिष्टमभवद्बलम् ॥ ३५

संजय उवाच ।

यथा वयं परे राजन्युद्धाय समवस्थिताः ।
यावच्चासीद्बलं शिष्टं संग्रामे तन्निबोध मे ॥ ३६
एकादश सहस्राणि रथानां भरतर्षभ ।
दश दन्तिसहस्राणि सप्त चैव शतानि च ॥ ३७
पूर्णे शतसहस्रे द्वे हयानां भरतर्षभ ।
नरकोट्यस्तथा तिस्रो बलमेतत्तवाभवत् ॥ ३८
रथानां षट्सहस्राणि षट्सहस्राश्च कुञ्जराः ।
दश चाश्वसहस्राणि पत्तिकोटी च भारत ॥ ३९
एतद्बलं पाण्डवानामभवच्छेषमाहवे ।
एत एव समाजग्मुर्युद्धाय भरतर्षभ ॥ ४०
एवं विभज्य राजेन्द्र मद्रराजमते स्थिताः ।
पाण्डवान्प्रत्युदीयाम जयगृद्धाः प्रमन्यवः ॥ ४१
तथैव पाण्डवाः शूराः समरे जितकाशिनः ।
उपयाता नरव्याघ्राः पाञ्चालाश्च यशस्विनः ॥ ४२
एवमेते बलौघेन परस्परवधैषिणः ।
उपयाता नरव्याघ्राः पूर्वां संध्यां प्रति प्रभो ॥ ४३
ततः प्रववृते युद्धं घोररूपं भयानकम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥ ४४

इति श्रीमहाभारते शल्यपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

संजय उवाच ।

ततः प्रववृते युद्धं कुरूणां भयवर्धनम् ।
सृञ्जयैः सह राजेन्द्र घोरं देवासुरोपमम् ॥ १
नरा रथा गजौघाश्च सादिनश्च सहस्रशः ।
वाजिनश्च पराक्रान्ताः समाजग्मुः परस्परम् ॥ २
नागानां भीमरूपाणां द्रवतां निस्वनो महान् ।
अश्रूयत यथा काले जलदानां नभस्तले ॥ ३
नागैरभ्याहताः केचित्सरथा रथिनोऽपतन् ।
व्यद्रवन्त रणे वीरा द्राव्यमाणा मदोत्कटैः ॥ ४
हयौघान्पादरक्षांश्च रथिनस्तत्र शिक्षिताः ।
शरैः संप्रेषयामासुः परलोकाय भारत ॥ ५
सादिनः शिक्षिता राजन्परिवार्य महारथान् ।
विचरन्तो रणेऽभ्यघ्नन्प्रासशक्त्यृष्टिभिस्तथा ॥ ६
धन्विनः पुरुषाः केचित्संनिवार्य महारथान् ।
एकं बहव आसाद्य प्रेषयेयुर्यमक्षयम् ॥ ७
नागं रथवरांश्चान्ये परिवार्य महारथाः ।
सोत्तरायुधिनं जघ्नुर्द्रवमाणा महारवम् ॥ ८
तथा च रथिनं क्रुद्धं विकिरन्तं शरान्बहून् ।
नागा जघ्नुर्महाराज परिवार्य समन्ततः ॥ ९
नागो नागमभिद्रुत्य रथी च रथिनं रणे ।
शक्तितोमरनाराचैर्निजघ्नुस्तत्र तत्र ह ॥ १०
पादातानवमृद्नन्तो रथवारणवाजिनः ।
रणमध्ये व्यदृश्यन्त कुर्वन्तो महदाकुलम् ॥ ११
हयाश्च पर्यधावन्त चामरैरुपशोभिताः ।
हंसा हिमवतः प्रस्थे पिबन्त इव मेदिनीम् ॥ १२
तेषां तु वाजिनां भूमिः खुरैश्चित्रा विशां पते ।
अशोभत यथा नारी करजक्षतविक्षता ॥ १३
वाजिनां खुरशब्देन रथनेमिस्वनेन च ।
पत्तीनां चापि शब्देन नागानां बृंहितेन च ॥ १४
वादित्राणां च घोषेण शङ्खानां निस्वनेन च ।
अभवन्नादिता भूमिर्निर्घातैरिव भारत ॥ १५
धनुषां कूजमानानां निस्त्रिंशानां च दीप्यताम् ।
कवचानां प्रभाभिश्च न प्राज्ञायत किंचन ॥ १६
बहवो बाहवश्छिन्ना नागराजकरोपमाः ।
उद्वेष्टन्ते विवेष्टन्ते वेगं कुर्वन्ति दारुणम् ॥ १७
शिरसां च महाराज पततां वसुधातले ।

च्युतानामिव तालेभ्यः फलानां श्रूयते स्वनः ॥ १८
शिरोभिः पतितैर्भाति रुधिरार्द्रैर्वसुंधरा ।
तपनीयनिभैः काले नलिनैरिव भारत ॥ १९
उद्वृत्तनयनैस्तैस्तु गतसत्त्वैः सुविक्षतैः ।
व्यभ्राजत महाराज पुण्डरीकैरिवावृता ॥ २०
बाहुभिश्चन्दनादिग्धैः सकेयूरैर्महाधनैः ।
पतितैर्भाति राजेन्द्र मही शक्रध्वजैरिव ॥ २१
ऊरुभिश्च नरेन्द्राणां विनिकृत्तैर्महाहवे ।
हस्तिहस्तोपमैरन्यैः संवृतं तद्रणाङ्गणम् ॥ २२
कबन्धशतसंकीर्णं छत्रचामरशोभितम् ।
सेनावनं तच्छुशुभे वनं पुष्पाचितं यथा ॥ २३
तत्र योधा महाराज विचरन्तो ह्यभीतवत् ।
दृश्यन्ते रुधिराक्ताङ्गाः पुष्पिता इव किंशुकाः ॥२४
मातङ्गाश्चाप्यदृश्यन्त शरतोमरपीडिताः ।
पतन्तस्तत्र तत्रैव छिन्नाभ्रसदृशा रणे ॥ २५
गजानीकं महाराज वध्यमानं महात्मभिः ।
व्यदीर्यत दिशः सर्वा वातनुन्ना घना इव ॥ २६
ते गजा घनसंकाशाः पेतुरुर्व्यां समन्ततः ।
वज्ररुग्णा इव बभुः पर्वता युगसंक्षये ॥ २७
हयानां सादिभिः सार्धं पतितानां महीतले ।
राशयः संप्रदृश्यन्ते गिरिमात्रास्ततस्ततः ॥ २८
संजज्ञे रणभूमौ तु परलोकवहा नदी ।
शोणितोदा रथावर्ता ध्वजवृक्षास्थिशर्करा ॥ २९
भुजनक्रा धनुःस्रोता हस्तिशैला हयोपला ।
मेदोमज्जाकर्दमिनी छत्रहंसा गदोडुपा ॥ ३०
कवचोष्णीषसंछन्ना पताकारुचिरद्रुमा ।
चक्रचक्रावलीजुष्टा त्रिवेणूदण्डकावृता ॥ ३१
शूराणां हर्षजननी भीरूणां भयवर्धिनी ।
प्रावर्तत नदी रौद्रा कुरुसृञ्जयसंकुला ॥ ३२
तां नदीं पितृलोकाय वहन्तीमतिभैरवाम् ।
तेरुर्वाहननौभिस्ते शूराः परिघबाहवः ॥ ३३
वर्तमाने तथा युद्धे निर्मर्यादे विशां पते ।
चतुरङ्गक्षये घोरे पूर्वं देवासुरोपमे ॥ ३४
अक्रोशन्बान्धवानन्ये तत्र तत्र परंतप ।
क्रोशद्भिर्बान्धवैश्चान्ये भयार्ता न निवर्तिरे ॥ ३५
निर्मर्यादे तथा युद्धे वर्तमाने भयानके ।
अर्जुनो भीमसेनश्च मोहयांचक्रतुः परान् ॥ ३६
सा वध्यमाना महती सेना तव जनाधिप ।
अमुह्यत्तत्र तत्रैव योषिन्मदवशादिव ॥ ३७
मोहयित्वा च तां सेनां भीमसेनधनंजयौ ।
दध्मतुर्वारिजौ तत्र सिंहनादं च नेदतुः ॥ ३८
श्रुत्वैव तु महाशब्दं धृष्टद्युम्नशिखण्डिनौ ।
धर्मराजं पुरस्कृत्य मद्रराजमभिद्रुतौ ॥ ३९
तत्राश्चर्यमपश्याम घोररूपं विशां पते ।
शल्येन संगताः शूरा यदयुध्यन्त भागशः ॥ ४०
माद्रीपुत्रौ सरभसौ कृतास्त्रौ युद्धदुर्मदौ ।
अभ्ययातां त्वरायुक्तौ जिगीषन्तौ बलं तव ॥ ४१
ततो न्यवर्तत बलं तावकं भरतर्षभ ।
शरैः प्रणुन्नं बहुधा पाण्डवैर्जितकाशिभिः ॥ ४२
वध्यमाना चमूः सा तु पुत्राणां प्रेक्षतां तव ।
भेजे दिशो महाराज प्रणुन्ना दृढधन्विभिः ।
हाहाकारो महाञ्जज्ञे योधानां तव भारत ॥ ४३
तिष्ठ तिष्ठेति वागासीद्द्रावितानां महात्मनाम् ।
क्षत्रियाणां तदान्योन्यं संयुगे जयमिच्छताम् ।
आद्रवन्नेव भग्नास्ते पाण्डवैस्तव सैनिकाः ॥ ४४
त्यक्त्वा युद्धे प्रियान्पुत्रान्भ्रातॄनथ पितामहान् ।
मातुलान्भागिनेयांश्च तथा संबन्धिबान्धवान् ॥४५
हयान्द्विपांस्त्वरयन्तो योधा जग्मुः समन्ततः ।
आत्मत्राणकृतोत्साहास्तावका भरतर्षभ ॥ ४६

इति श्रीमहाभारते शल्यपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

९

संजय उवाच ।

तत्प्रभग्नं बलं दृष्ट्वा मद्रराजः प्रतापवान् ।
उवाच सारथिं तूर्णं चोदयाश्वान्महाजवान् ॥ १
एष तिष्ठति वै राजा पाण्डुपुत्रो युधिष्ठिरः ।
छत्रेण ध्रियमाणेन पाण्डुरेण विराजता ॥ २
अत्र मां प्रापय क्षिप्रं पश्य मे सारथे बलम् ।
न समर्था हि मे पार्थाः स्थातुमद्य पुरो युधि ॥ ३
एवमुक्तस्ततः प्रायान्मद्रराजस्य सारथिः ।
यत्र राजा सत्यसंधो धर्मराजो युधिष्ठिरः ॥ ४
आपतन्तं च सहसा पाण्डवानां महद्बलम् ।
दधारैको रणे शल्यो वेलेवोद्धृत्तमर्णवम् ॥ ५
पाण्डवानां बलौघस्तु शल्यमासाद्य मारिष ।
व्यतिष्ठत तदा युद्धे सिन्धोर्वेग इवाचलम् ॥ ६
मद्रराजं तु समरे दृष्ट्वा युद्धाय विष्ठितम् ।
कुरवः संन्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ॥ ७
तेषु राजन्निवृत्तेषु व्यूढानीकेषु भागशः ।
प्रावर्तत महारौद्रः संग्रामः शोणितोदकः ।
समार्छच्चित्रसेनेन नकुलो युद्धदुर्मदः ॥ ८
तौ परस्परमासाद्य चित्रकार्मुकधारिणौ ।
मेघाविव यथोद्धृत्तौ दक्षिणोत्तरवर्षिणौ ॥ ९
शरतोयैः सिषिचतुस्तौ परस्परमाहवे ।
नान्तरं तत्र पश्यामि पाण्डवस्येतरस्य वा ॥ १०
उभौ कृतास्त्रौ बलिनौ रथचर्याविशारदौ ।
परस्परवधे यत्तौ छिद्रान्वेषणतत्परौ ॥ ११
चित्रसेनस्तु भल्लेन पीतेन निशितेन च ।
नकुलस्य महाराज मुष्टिदेशेऽच्छिनद्धनुः ॥ १२
अथैनं छिन्नधन्वानं रुक्मपुङ्खैः शिलाशितैः ।
त्रिभिः शरैरसंभ्रान्तो ललाटे वै समर्पयत् ॥ १३
हयांश्चास्य शरैस्तीक्ष्णैः प्रेषयामास मृत्यवे ।
तथा ध्वजं सारथिं च त्रिभिस्त्रिभिरपातयत् ॥ १४
स शत्रुभुजनिर्मुक्तैर्ललाटस्थैस्त्रिभिः शरैः ।
नकुलः शुशुभे राजंस्त्रिशृङ्ग इव पर्वतः ॥ १५
स छिन्नधन्वा विरथः खड्गमादाय चर्म च ।
रथादवातरद्वीरः शैलाग्रादिव केसरी ॥ १६
पद्भ्यामापततस्तस्य शरवृष्टिमवासृजत् ।
नकुलोऽप्यग्रसत्तां वै चर्मणा लघुविक्रमः ॥ १७
चित्रसेनरथं प्राप्य चित्रयोधी जितश्रमः ।
आरुरोह महाबाहुः सर्वसैन्यस्य पश्यतः ॥ १८
सकुण्डलं समुकुटं सुनसं स्वायतेक्षणम् ।
चित्रसेनशिरः कायादपाहरत पाण्डवः ।
स पपात रथोपस्थाद्दिवाकरसमप्रभः ॥ १९
चित्रसेनं विशस्तं तु दृष्ट्वा तत्र महारथाः ।
साधुवादस्वनांश्चक्रुः सिंहनादांश्च पुष्कलान् ॥ २०
विशस्तं भ्रातरं दृष्ट्वा कर्णपुत्रौ महारथौ ।
सुषेणः सत्यसेनश्च मुञ्चन्तौ निशिताञ्शरान् ॥ २१
ततोऽभ्यधावतां तूर्णं पाण्डवं रथिनां वरम् ।
जिघांसन्तौ यथा नागं व्याघ्रौ राजन्महावने ॥२२
तावभ्यधावतां तीक्ष्णौ द्वावप्येनं महारथम् ।
शरौघान्सम्यगस्यन्तौ जीमूतौ सलिलं यथा ॥ २३
स शरैः सर्वतो विद्धः प्रहृष्ट इव पाण्डवः ।
अन्यत्कार्मुकमादाय रथमारुह्य वीर्यवान् ।
अतिष्ठत रणे वीरः क्रुद्धरूप इवान्तकः ॥ २४
तस्य तौ भ्रातरौ राजञ्शरैः संनतपर्वभिः ।
रथं विशकलीकर्तुं समारब्धौ विशां पते ॥ २५
ततः प्रहस्य नकुलश्चतुर्भिश्चतुरो रणे ।
जघान निशितैस्तीक्ष्णैः सत्यसेनस्य वाजिनः ॥ २६
ततः संधाय नाराचं रुक्मपुङ्खं शिलाशितम् ।
धनुश्चिच्छेद राजेन्द्र सत्यसेनस्य पाण्डवः ॥ २७
अथान्यं रथमास्थाय धनुरादाय चापरम् ।

सत्यसेनः सुषेणश्च पाण्डवं पर्यधावताम् ॥ २८
अविध्यत्तावसंभ्रान्तौ माद्रीपुत्रः प्रतापवान् ।
द्वाभ्यां द्वाभ्यां महाराज शराभ्यां रणमूर्धनि ॥ २९
सुषेणस्तु ततः क्रुद्धः पाण्डवस्य महद्धनुः ।
चिच्छेद प्रहसन्युद्धे क्षुरप्रेण महारथः ॥ ३०
अथान्यद्धनुरादाय नकुलः क्रोधमूर्छितः ।
सुषेणं पञ्चभिर्विद्ध्वा ध्वजमेकेन चिच्छिदे ॥ ३१
सत्यसेनस्य च धनुर्हस्तावापं च मारिष ।
चिच्छेद तरसा युद्धे तत उच्चुक्रुशुर्जनाः ॥ ३२
अथान्यद्धनुरादाय वेगघ्नं भारसाधनम् ।
शरैः संछादयामास समन्तात्पाण्डुनन्दनम् ॥ ३३
संनिवार्य तु तान्बाणान्नकुलः परवीरहा ।
सत्यसेनं सुषेणं च द्वाभ्यां द्वाभ्यामविध्यत ॥ ३४
तावेनं प्रत्यविध्येतां पृथक्पृथगजिह्मगैः ।
सारथिं चास्य राजेन्द्र शरैर्विव्यधतुः शितैः ॥ ३५
सत्यसेनो रथेषां तु नकुलस्य धनुस्तथा ।
पृथक्शराभ्यां चिच्छेद कृतहस्तः प्रतापवान् ॥ ३६
स रथेऽतिरथस्तिष्ठन्रथशक्तिं परामृशत् ।
स्वर्णदण्डामकुण्ठाग्रां तैलधौतां सुनिर्मलाम् ॥ ३७
लेलिहानामिव विभो नागकन्यां महाविषाम् ।
समुद्यम्य च चिक्षेप सत्यसेनस्य संयुगे ॥ ३८
सा तस्य हृदयं संख्ये बिभेद शतधा नृप ।
स पपात रथाद्भूमौ गतसत्त्वोऽल्पचेतनः ॥ ३९
भ्रातरं निहतं दृष्ट्वा सुषेणः क्रोधमूर्छितः ।
अभ्यवर्षच्छरैस्तूर्णं पदातिं पाण्डुनन्दनम् ॥ ४०
नकुलं विरथं दृष्ट्वा द्रौपदेयो महाबलः ।
सुतसोमोऽभिदुद्राव परीप्सन्पितरं रणे ॥ ४१
ततोऽधिरुह्य नकुलः सुतसोमस्य तं रथम् ।
शुशुभे भरतश्रेष्ठो गिरिस्थ इव केसरी ।
सोऽन्यत्कार्मुकमादाय सुषेणं समयोधयत् ॥ ४२
तावुभौ शरवर्षाभ्यां समासाद्य परस्परम् ।
परस्परवधे यत्नं चक्रतुः सुमहारथौ ॥ ४३
सुषेणस्तु ततः क्रुद्धः पाण्डवं विशिखैस्त्रिभिः ।
सुतसोमं च विंशत्या बाह्वोरुरसि चार्पयत् ॥ ४४
ततः क्रुद्धो महाराज नकुलः परवीरहा ।
शरैस्तस्य दिशः सर्वाश्छादयामास वीर्यवान् ॥ ४५
ततो गृहीत्वा तीक्ष्णाग्रमर्धचन्द्रं सुतेजनम् ।
स वेगयुक्तं चिक्षेप कर्णपुत्रस्य संयुगे ॥ ४६
तस्य तेन शिरः कायाज्जहार नृपसत्तम ।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥ ४७
स हतः प्रापतद्राजन्नकुलेन महात्मना ।
नदीवेगादिवारुग्णस्तीरजः पादपो महान् ॥ ४८
कर्णपुत्रवधं दृष्ट्वा नकुलस्य च विक्रमम् ।
प्रदुद्राव भयात्सेना तावकी भरतर्षभ ॥ ४९
तां तु सेनां महाराज मद्रराजः प्रतापवान् ।
अपालयद्रणे शूरः सेनापतिररिंदमः ॥ ५०
बिभीस्तस्थौ महाराज व्यवस्थाप्य च वाहिनीम् ।
सिंहनादं भृशं कृत्वा धनुःशब्दं च दारुणम् ॥ ५१
तावकाः समरे राजन्रक्षिता दृढधन्वना ।
प्रत्युद्ययुररातींस्ते समन्ताद्विगतव्यथाः ॥ ५२
मद्रराजं महेष्वासं परिवार्य समन्ततः ।
स्थिता राजन्महासेना योद्धुकामाः समन्ततः ॥ ५३
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
युधिष्ठिरं पुरस्कृत्य ह्रीनिषेधमरिंदमम् ॥ ५४
परिवार्य रणे वीराः सिंहनादं प्रचक्रिरे ।
बाणशब्दरवांश्चोग्रान्क्ष्वेडांश्च विविधान्दधुः ॥ ५५
तथैव तावकाः सर्वे मद्राधिपतिमञ्जसा ।
परिवार्य सुसंरब्धाः पुनर्युद्धमरोचयन् ॥ ५६
ततः प्रववृते युद्धं भीरूणां भयवर्धनम् ।
तावकानां परेषां च मृत्युं कृत्वा निवर्तनम् ॥ ५७

यथा देवासुरं युद्धं पूर्वमासीद्विशां पते ।
अभीतानां तथा राजन्यमराष्ट्रविवर्धनम् ॥ ५८
ततः कपिध्वजो राजन्हत्वा संशप्तकान्रणे ।
अभ्यद्रवत तां सेनां कौरवीं पाण्डुनन्दनः ॥ ५९
तथैव पाण्डवाः शेषा धृष्टद्युम्नपुरोगमाः ।
अभ्यधावन्त तां सेनां विसृजन्तः शिताञ्शरान् ॥६०
पाण्डवैरवकीर्णानां संमोहः समजायत ।
न च जज्ञुरनीकानि दिशो वा प्रदिशस्तथा ॥ ६१
आपूर्यमाणा निशितैः शरैः पाण्डवचोदितैः ।
हतप्रवीरा विध्वस्ता कीर्यमाणा समन्ततः ।
कौरव्यवध्यत चमूः पाण्डुपुत्रैर्महारथैः ॥ ६२
तथैव पाण्डवी सेना शरै राजन्समन्ततः ।
रणेऽहन्यत पुत्रैस्ते शतशोऽथ सहस्रशः ॥ ६३
ते सेने भृशसंतप्ते वध्यमाने परस्परम् ।
व्याकुले समपद्येतां वर्षासु सरिताविव ॥ ६४
आविवेश ततस्तीव्रं तावकानां महद्भयम् ।
पाण्डवानां च राजेन्द्र तथाभूते महाहवे ॥ ६५

इति श्रीमहाभारते शल्यपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

संजय उवाच ।

तस्मिन्विलुलिते सैन्ये वध्यमाने परस्परम् ।
द्रवमाणेषु योधेषु निनदत्सु च दन्तिषु ॥ १
कूजतां स्तनतां चैव पदातीनां महाहवे ।
विद्रुतेषु महाराज हयेषु बहुधा तदा ॥ २
प्रक्षये दारुणे जाते संहारे सर्वदेहिनाम् ।
नानाशस्त्रसमावापे व्यतिषक्तरथद्विपे ॥ ३
हर्षणे युद्धशौण्डानां भीरूणां भयवर्धने ।
गाहमानेषु योधेषु परस्परवधैषिषु ॥ ४
प्राणादाने महाघोरे वर्तमाने दुरोदरे ।
संग्रामे घोररूपे तु यमराष्ट्रविवर्धने ॥ ५
पाण्डवास्तावकं सैन्यं व्यधमन्निशितैः शरैः ।
तथैव तावका योधा जघ्नुः पाण्डवसैनिकान् ॥ ६
तस्मिंस्तथा वर्तमाने युद्धे भीरुभयावहे ।
पूर्वाह्णे चैव संप्राप्ते भास्करोदयनं प्रति ॥ ७
लब्धलक्षाः परे राजन्रक्षिताश्च महात्मना ।
अयोधयंस्तव बलं मृत्युं कृत्वा निवर्तनम् ॥ ८
बलिभिः पाण्डवैर्दृप्तैर्लब्धलक्षैः प्रहारिभिः ।
कौरव्यसीदत्पृतना मृगीवाग्निसमाकुला ॥ ९
तां दृष्ट्वा सीदतीं सेनां पङ्के गामिव दुर्बलाम् ।
उज्जिहीर्षुस्तदा शल्यः प्रायात्पाण्डुचमूं प्रति ॥ १०
मद्रराजस्तु संक्रुद्धो गृहीत्वा धनुरुत्तमम् ।
अभ्यद्रवत संग्रामे पाण्डवानाततायिनः ॥ ११
पाण्डवाश्च महाराज समरे जितकाशिनः ।
मद्रराजं समासाद्य विव्यधुर्निशितैः शरैः ॥ १२
ततः शरशतैस्तीक्ष्णैर्मद्रराजो महाबलः ।
अर्दयामास तां सेनां धर्मराजस्य पश्यतः ॥ १३
प्रादुरासंस्ततो राजन्नानारूपाण्यनेकशः ।
चचाल शब्दं कुर्वाणा मही चापि सपर्वता ॥ १४
सदण्डशूला दीप्ताग्राः शीर्यमाणाः समन्ततः ।
उल्का भूमिं दिवः पेतुराहत्य रविमण्डलम् ॥ १५
मृगाश्च महिषाश्चापि पक्षिणश्च विशां पते ।
अपसव्यं तदा चक्रुः सेनां ते बहुशो नृप ॥ १६
ततस्तद्युद्धमत्युग्रमभवत्संघचारिणाम् ।
तथा सर्वाण्यनीकानि संनिपत्य जनाधिप ।
अभ्ययुः कौरवा राजन्पाण्डवानामनीकिनीम् ॥१७
शल्यस्तु शरवर्षेण वर्षन्निव सहस्रदृक् ।
अभ्यवर्षददीनात्मा कुन्तीपुत्रं युधिष्ठिरम् ॥ १८
भीमसेनं शरैश्चापि रुक्मपुङ्खैः शिलाशितैः ।
द्रौपदेयांस्तथा सर्वान्माद्रीपुत्रौ च पाण्डवौ ॥१९

धृष्टद्युम्नं च शैनेयं शिखण्डिनमथापि च ।
एकैकं दशभिर्बाणैर्विव्याध च महाबलः ।
ततोऽसृजद्बाणवर्षं घर्मान्ते मघवानिव ॥ २०
ततः प्रभद्रका राजन्सोमकाश्च सहस्रशः ।
पतिताः पात्यमानाश्च दृश्यन्ते शल्यसायकैः ॥ २१
भ्रमराणामिव व्राताः शलभानामिव व्रजाः ।
ह्रादिन्य इव मेघेभ्यः शल्यस्य न्यपतञ्शराः ॥ २२
द्विरदास्तुरगाश्चार्ताः पत्तयो रथिनस्तथा ।
शल्यस्य बाणैर्न्यपतन्बभ्रमुर्व्यनदंस्तथा ॥ २३
आविष्ट इव मद्रेशो मन्युना पौरुषेण च ।
प्राच्छादयदरीन्संख्ये कालसृष्ट इवान्तकः ।
विनर्दमानो मद्रेशो मेघह्रादो महाबलः ॥ २४
सा वध्यमाना शल्येन पाण्डवानामनीकिनी ।
अजातशत्रुं कौन्तेयमभ्यधावद्युधिष्ठिरम् ॥ २५
तां समर्प्य ततः संख्ये लघुहस्तः शितैः शरैः ।
शरवर्षेण महता युधिष्ठिरमपीडयत् ॥ २६
तमापतन्तं पत्त्यश्वैः क्रुद्धो राजा युधिष्ठिरः ।
अवारयच्छरैस्तीक्ष्णैर्मत्तं द्विपमिवाङ्कुशैः ॥ २७
तस्य शल्यः शरं घोरं मुमोचाशीविषोपमम् ।
सोऽभ्यविध्यन्महात्मानं वेगेनाभ्यपतच्च गाम् ॥२८
ततो वृकोदरः क्रुद्धः शल्यं विव्याध सप्तभिः ।
पञ्चभिः सहदेवस्तु नकुलो दशभिः शरैः ॥ २९
द्रौपदेयाश्च शत्रुघ्नं शूरमार्तायनिं शरैः ।
अभ्यवर्षन्महाभागं मेघा इव महीधरम् ॥ ३०
ततो दृष्ट्वा तुद्यमानं शल्यं पार्थैः समन्ततः ।
कृतवर्मा कृपश्चैव संक्रुद्धावभ्यधावताम् ॥ ३१
उलूकश्च पतत्री च शकुनिश्चापि सौबलः ।
स्मयमानश्च शनकैरश्वत्थामा महारथः ।
तव पुत्राश्च कार्त्स्न्येन जुगुपुः शल्यमाहवे ॥ ३२
भीमसेनं त्रिभिर्विद्ध्वा कृतवर्मा शिलीमुखैः ।
बाणवर्षेण महता क्रुद्धरूपमवारयत् ॥ ३३
धृष्टद्युम्नं कृपः क्रुद्धो बाणवर्षैरपीडयत् ।
द्रौपदेयांश्च शकुनिर्यमौ च द्रौणिरभ्ययात् ॥ ३४
दुर्योधनो युधां श्रेष्ठावाहवे केशवार्जुनौ ।
समभ्ययादुग्रतेजाः शरैश्चाभ्यहनद्बली ॥ ३५
एवं द्वंद्वशतान्यासंस्त्वदीयानां परैः सह ।
घोररूपाणि चित्राणि तत्र तत्र विशां पते ॥ ३६
ऋश्यवर्णाञ्जघानाश्वान्भोजो भीमस्य संयुगे ।
सोऽवतीर्य रथोपस्थाद्धताश्वः पाण्डुनन्दनः ।
कालो दण्डमिवोद्यम्य गदापाणिरयुध्यत ॥ ३७
प्रमुखे सहदेवस्य जघानाश्वांश्च मद्रराट् ।
ततः शल्यस्य तनयं सहदेवोऽसिनावधीत् ॥ ३८
गौतमः पुनराचार्यो धृष्टद्युम्नमयोधयत् ।
असंभ्रान्तमसंभ्रान्तो यत्नवान्यत्नवत्तरम् ॥ ३९
द्रौपदेयांस्तथा वीरानेकैकं दशभिः शरैः ।
अविध्यदाचार्यसुतो नातिक्रुद्धः स्मयन्निव ॥ ४०
शल्योऽपि राजन्संक्रुद्धो निघ्नन्सोमकपाण्डवान् ।
पुनरेव शितैर्बाणैर्युधिष्ठिरमपीडयत् ॥ ४१
तस्य भीमो रणे क्रुद्धः संदष्टदशनच्छदः ।
विनाशायाभिसंधाय गदामादत्त वीर्यवान् ॥ ४२
यमदण्डप्रतीकाशां कालरात्रिमिवोद्यताम् ।
गजवाजिमनुष्याणां प्राणान्तकरणीमपि ॥ ४३
हेमपट्टपरिक्षिप्तामुल्कां प्रज्वलितामिव ।
शैक्यां व्यालीमिवात्युग्रां वज्रकल्पामयस्मयीम् ॥४४
चन्दनागुरुपङ्काक्तां प्रमदामीप्सितामिव ।
वसामेदोसृगादिग्धां जिह्वां वैवस्वतीमिव ॥ ४५
पटुघण्टारवशतां वासवीमशनीमिव ।
निर्मुक्ताशीविषाकारां पृक्तां गजमदैरपि ॥ ४६
त्रासनीं रिपुसैन्यानां स्वसैन्यपरिहर्षिणीम् ।
मनुष्यलोके विख्यातां गिरिशृङ्गविदारिणीम् ॥४७

यथा कैलासभवने महेश्वरसखं बली ।
आह्वयामास कौन्तेयः संक्रुद्धमलकाधिपम् ॥ ४८
यथा मायाविनो दृप्तान्सुबहून्धनदालये ।
जघान गुह्यकान्क्रुद्धो मन्दारार्थे महाबलः ।
निवार्यमाणो बहुभिर्द्रौपद्याः प्रियमास्थितः ॥ ४९
तां वज्रमणिरत्नौघामष्टाश्रिं वज्रगौरवाम् ।
समुद्यम्य महाबाहुः शल्यमभ्यद्रवद्रणे ॥ ५०
गदया युद्धकुशलस्तया दारुणनादया ।
पोथयामास शल्यस्य चतुरोऽश्वान्महाजवान् ॥५१
ततः शल्यो रणे क्रुद्धः पीने वक्षसि तोमरम् ।
निचखान नदन्वीरो वर्म भित्त्वा च सोऽभ्यगात्॥
वृकोदरस्त्वसंभ्रान्तस्तमेवोद्धृत्य तोमरम् ।
यन्तारं मद्रराजस्य निर्बिभेद ततो हृदि ॥ ५३
स भिन्नवर्मा रुधिरं वमन्वित्रस्तमानसः ।
पपाताभिमुखो दीनो मद्रराजस्त्वपाक्रमत् ॥ ५४
कृतप्रतिकृतं दृष्ट्वा शल्यो विस्मितमानसः ।
गदामाश्रित्य धीरात्मा प्रत्यमित्रमवैक्षत ॥ ५५
ततः सुमनसः पार्था भीमसेनमपूजयन् ।
तद्दृष्ट्वा कर्म संग्रामे घोरमक्लिष्टकर्मणः ॥ ५६

इति श्रीमहाभारते शल्यपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

संजय उवाच ।

पतितं प्रेक्ष्य यन्तारं शल्यः सर्वायसीं गदाम् ।
आदाय तरसा राजंस्तस्थौ गिरिरिवाचलः ॥ १
तं दीप्तमिव कालाग्निं पाशहस्तमिवान्तकम् ।
सशृङ्गमिव कैलासं सवज्रमिव वासवम् ॥ २
सशूलमिव हर्यक्षं वने मत्तमिव द्विपम् ।
जवेनाभ्यपतद्भीमः प्रगृह्य महतीं गदाम् ॥ ३
ततः शङ्खप्रणादश्च तूर्याणां च सहस्रशः ।
सिंहनादश्च संजज्ञे शूराणां हर्षवर्धनः ॥ ४
प्रेक्षन्तः सर्वतस्तौ हि योधा योधमहाद्विपौ ।
तावकाश्च परे चैव साधु साध्वित्यथाब्रुवन् ॥ ५
न हि मद्राधिपादन्यो रामाद्वा यदुनन्दनात् ।
सोढुमुत्सहते वेगं भीमसेनस्य संयुगे ॥ ६
तथा मद्राधिपस्यापि गदावेगं महात्मनः ।
सोढुमुत्सहते नान्यो योधो युधि वृकोदरात् ॥ ७
तौ वृषाविव नर्दन्तौ मण्डलानि विचेरतुः ।
आवल्गितौ गदाहस्तौ मद्रराजवृकोदरौ ॥ ८
मण्डलावर्तमार्गेषु गदाविहरणेषु च ।
निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः ॥ ९
तप्तहेममयैः शुभ्रैर्बभूव भयवर्धनी ।
अग्निज्वालैरिवाविद्धा पट्टैः शल्यस्य सा गदा ॥ १०
तथैव चरतो मार्गान्मण्डलेषु महात्मनः ।
विद्युदभ्रप्रतीकाशा भीमस्य शुशुभे गदा ॥ ११
ताडिता मद्रराजेन भीमस्य गदया गदा ।
दीप्यमानेव वै राजन्ससृजे पावकार्चिषः ॥ १२
तथा भीमेन शल्यस्य ताडिता गदया गदा ।
अङ्गारवर्षं मुमुचे तदद्भुतमिवाभवत् ॥ १३
दन्तैरिव महानागौ शृङ्गैरिव महर्षभौ ।
तोत्त्रैरिव तदान्योन्यं गदाग्राभ्यां निजघ्नतुः ॥ १४
तौ गदानिहतैर्गात्रैः क्षणेन रुधिरोक्षितौ ।
प्रेक्षणीयतरावास्तां पुष्पिताविव किंशुकौ ॥ १५
गदया मद्रराजेन सव्यदक्षिणमाहतः ।
भीमसेनो महाबाहुर्न चचालाचलो यथा ॥ १६
तथा भीमगदावेगैस्ताड्यमानो मुहुर्मुहुः ।
शल्यो न विव्यथे राजन्दन्तिनेवाहतो गिरिः ॥ १७
शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः ।
गदानिपातसंह्रादो वज्रयोरिव निस्वनः ॥ १८
निवृत्य तु महावीर्यौ समुच्छ्रितगदावुभौ ।

नरान्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ १९
अथाभ्येत्य पदान्यष्टौ संनिपातोऽभवत्तयोः ।
उद्यम्य लोहदण्डाभ्यामतिमानुषकर्मणोः ॥ २०
प्रार्थयानौ तदान्योऽन्यं मण्डलानि विचेरतुः ।
क्रियाविशेषं कृतिनौ दर्शयामासतुस्तदा ॥ २१
अथोद्यम्य गदे घोरे सशृङ्गाविव पर्वतौ ।
तावाजघ्नतुरन्योन्यं यथा भूमिचलेऽचलौ ॥ २२
तौ परस्परवेगाच्च गदाभ्यां च भृशाहतौ ।
युगपत्पेततुर्वीरावुभाविन्द्रध्वजाविव ॥ २३
उभयोः सेनयोर्वीरास्तदा हाहाकृतोऽभवन् ।
भृशं मर्मण्यभिहतावुभावास्तां सुविह्वलौ ॥ २४
ततः सगदमारोप्य मद्राणामृषभं रथे ।
अपोवाह कृपः शल्यं तूर्णमायोधनादपि ॥ २५
क्षीबवद्विह्वलत्वात्तु निमेषात्पुनरुत्थितः ।
भीमसेनो गदापाणिः समाह्वयत मद्रपम् ॥ २६
ततस्तु तावकाः शूरा नानाशस्त्रसमायुताः ।
नानावादित्रशब्देन पाण्डुसेनामयोधयन् ॥ २७
भुजावुच्छ्रित्य शस्त्रं च शब्देन महता ततः ।
अभ्यद्रवन्महाराज दुर्योधनपुरोगमाः ॥ २८
तदनीकमभिप्रेक्ष्य ततस्ते पाण्डुनन्दनाः ।
प्रययुः सिंहनादेन दुर्योधनवधेप्सया ॥ २९
तेषामापततां तूर्णं पुत्रस्ते भरतर्षभ ।
प्रासेन चेकितानं वै विव्याध हृदये भृशम् ॥ ३०
स पपात रथोपस्थे तव पुत्रेण ताडितः ।
रुधिरौघपरिक्लिन्नः प्रविश्य विपुलं तमः ॥ ३१
चेकितानं हतं दृष्ट्वा पाण्डवानां महारथाः ।
असक्तमभ्यवर्षन्त शरवर्षाणि भागशः ॥ ३२
तावकानामनीकेषु पाण्डवा जितकाशिनः ।
व्यचरन्त महाराज प्रेक्षणीयाः समन्ततः ॥ ३३
कृपश्च कृतवर्मा च सौबलश्च महाबलः ।
अयोधयन्धर्मराजं मद्रराजपुरस्कृताः ॥ ३४
भारद्वाजस्य हन्तारं भूरिवीर्यपराक्रमम् ।
दुर्योधनो महाराज धृष्टद्युम्नमयोधयत् ॥ ३५
त्रिसाहस्रा रथा राजंस्तव पुत्रेण चोदिताः ।
अयोधयन्त विजयं द्रोणपुत्रपुरस्कृताः ॥ ३६
विजये धृतसंकल्पाः समभित्यक्तजीविताः ।
प्राविशंस्तावका राजन्हंसा इव महत्सरः ॥ ३७
ततो युद्धमभूद्घोरं परस्परवधैषिणाम् ।
अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनम् ॥ ३८
तस्मिन्प्रवृत्ते संग्रामे राजन्वीरवरक्षये ।
अनिलेनेरितं घोरमुत्तस्थौ पार्थिवं रजः ॥ ३९
श्रवणान्नामधेयानां पाण्डवानां च कीर्तनात् ।
परस्परं विजानीमो ये चायुध्यन्नभीतवत् ॥ ४०
तद्रजः पुरुषव्याघ्र शोणितेन प्रशामितम् ।
दिशश्च विमला जज्ञुस्तस्मिन्रजसि शामिते ॥ ४१
तथा प्रवृत्ते संग्रामे घोररूपे भयानके ।
तावकानां परेषां च नासीत्कश्चित्पराङ्मुखः ॥ ४२
ब्रह्मलोकपरा भूत्वा प्रार्थयन्तो जयं युधि ।
सुयुद्धेन पराक्रान्ता नराः स्वर्गमभीप्सवः ॥ ४३
भर्तृपिण्डविमोक्षार्थं भर्तृकार्यविनिश्चिताः ।
स्वर्गसंसक्तमनसो योधा युयुधिरे तदा ॥ ४४
नानारूपाणि शस्त्राणि विसृजन्तो महारथाः ।
अन्योन्यमभिगर्जन्तः प्रहरन्तः परस्परम् ॥ ४५
हत विध्यत गृह्णीत प्रहरध्वं निकृन्तत ।
इति स्म वाचः श्रूयन्ते तव तेषां च वै बले ॥ ४६
ततः शल्यो महाराज धर्मराजं युधिष्ठिरम् ।
विव्याध निशितैर्बाणैर्हन्तुकामो महारथम् ॥ ४७
तस्य पार्थो महाराज नाराचान्वै चतुर्दश ।
मर्माण्युद्दिश्य मर्मज्ञो निचखान हसन्निव ॥ ४८
तं वार्य पाण्डवं बाणैर्हन्तुकामो महायशाः ।

विव्याध समरे क्रुद्धो बहुभिः कङ्कपत्रिभिः ॥ ४९
अथ भूयो महाराज शरेण नतपर्वणा ।
युधिष्ठिरं समाजघ्ने सर्वसैन्यस्य पश्यतः ॥ ५०
धर्मराजोऽपि संक्रुद्धो मद्रराजं महायशाः ।
विव्याध निशितैर्बाणैः कङ्कबर्हिणवाजितैः ॥ ५१
चन्द्रसेनं च सप्तत्या सूतं च नवभिः शरैः ।
द्रुमसेनं चतुःषष्ट्या निजघान महारथः ॥ ५२
चक्ररक्षे हते शल्यः पाण्डवेन महात्मना ।
निजघान ततो राजंश्चेदीन्वै पञ्चविंशतिम् ॥ ५३
सात्यकिं पञ्चविंशत्या भीमसेनं च पञ्चभिः ।
माद्रीपुत्रौ शतेनाजौ विव्याध निशितैः शरैः ॥५४
एवं विचरतस्तस्य संग्रामे राजसत्तम ।
संप्रेषयच्छितान्पार्थः शरानाशीविषोपमान् ॥ ५५
ध्वजाग्रं चास्य समरे कुन्तीपुत्रो युधिष्ठिरः ।
प्रमुखे वर्तमानस्य भल्लेनापहरद्रथात् ॥ ५६
पाण्डुपुत्रेण वै तस्य केतुं छिन्नं महात्मना ।
निपतन्तमपश्याम गिरिशृङ्गमिवाहतम् ॥ ५७
ध्वजं निपतितं दृष्ट्वा पाण्डवं च व्यवस्थितम् ।
संक्रुद्धो मद्रराजोऽभूच्छरवर्षं मुमोच ह ॥ ५८
शल्यः सायकवर्षेण पर्जन्य इव वृष्टिमान् ।
अभ्यवर्षदमेयात्मा क्षत्रियं क्षत्रियर्षभः ॥ ५९
सात्यकिं भीमसेनं च माद्रीपुत्रौ च पाण्डवौ ।
एकैकं पञ्चभिर्विद्ध्वा युधिष्ठिरमपीडयत् ॥ ६०
ततो बाणमयं जालं विततं पाण्डवोरसि ।
अपश्याम महाराज मेघजालमिवोद्गतम् ॥ ६१
तस्य शल्यो रणे क्रुद्धो बाणैः संनतपर्वभिः ।
दिशः प्रच्छादयामास प्रदिशश्च महारथः ॥ ६२
ततो युधिष्ठिरो राजा बाणजालेन पीडितः ।
बभूव हतविक्रान्तो जम्भो वृत्रहणा यथा ॥ ६३

इति श्रीमहाभारते शल्यपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

संजय उवाच ।

पीडिते धर्मराजे तु मद्रराजेन मारिष ।
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
परिवार्य रथैः शल्यं पीडयामासुराहवे ॥ १
तमेकं बहुभिर्दृष्ट्वा पीड्यमानं महारथैः ।
साधुवादो महाञ्जज्ञे सिद्धाश्चासन्प्रहर्षिताः ।
आश्चर्यमित्यभाषन्त मुनयश्चापि संगताः ॥ २
भीमसेनो रणे शल्यं शल्यभूतं पराक्रमे ।
एकेन विद्ध्वा बाणेन पुनर्विव्याध सप्तभिः ॥ ३
सात्यकिश्च शतेनैनं धर्मपुत्रपरीप्सया ।
मद्रेश्वरमवाकीर्य सिंहनादमथानदत् ॥ ४
नकुलः पञ्चभिश्चैनं सहदेवश्च सप्तभिः ।
विद्ध्वा तं तु ततस्तूर्णं पुनर्विव्याध सप्तभिः ॥ ५
स तु शूरो रणे यत्तः पीडितस्तैर्महारथैः ।
विकृष्य कार्मुकं घोरं वेगघ्नं भारसाधनम् ॥ ६
सात्यकिं पञ्चविंशत्या शल्यो विव्याध मारिष ।
भीमसेनं त्रिसप्तत्या नकुलं सप्तभिस्तथा ॥ ७
ततः सविशिखं चापं सहदेवस्य धन्विनः ।
छित्त्वा भल्लेन समरे विव्याधैनं त्रिसप्तभिः ॥ ८
सहदेवस्तु समरे मातुलं भूरिवर्चसम् ।
सज्यमन्यद्धनुः कृत्वा पञ्चभिः समताडयत् ।
शरैराशीविषाकारैर्ज्वलज्ज्वलनसंनिभैः ॥ ९
सारथिं चास्य समरे शरेणानतपर्वणा ।
विव्याध भृशसंक्रुद्धस्तं च भूयस्त्रिभिः शरैः ॥ १०
भीमसेनस्त्रिसप्तत्या सात्यकिर्नवभिः शरैः ।
धर्मराजस्तथा षष्ट्या गात्रे शल्यं समर्पयत् ॥ ११

ततः शल्यो महाराज निर्विद्धस्तैर्महारथैः ।
सुस्राव रुधिरं गात्रैर्गैरिकं पर्वतो यथा ॥ १२
तांश्च सर्वान्महेष्वासान्पञ्चभिः पञ्चभिः शरैः ।
विव्याध तरसा राजंस्तदद्भुतमिवाभवत् ॥ १३
ततोऽपरेण भल्लेन धर्मपुत्रस्य मारिष ।
धनुश्चिच्छेद समरे सज्यं स सुमहारथः ॥ १४
अथान्यद्धनुरादाय धर्मपुत्रो महारथः ।
साश्वसूतध्वजरथं शल्यं प्राच्छादयच्छरैः ॥ १५
स च्छाद्यमानः समरे धर्मपुत्रस्य सायकैः ।
युधिष्ठिरमथाविध्यद्दशभिर्निशितैः शरैः ॥ १६
सात्यकिस्तु ततः क्रुद्धो धर्मपुत्रे शरार्दिते ।
मद्राणामधिपं शूरं शरौघैः समवारयत् ॥ १७
स सात्यकेः प्रचिच्छेद क्षुरप्रेण महद्धनुः ।
भीमसेनमुखांस्तांश्च त्रिभिस्त्रिभिरताडयत् ॥ १८
तस्य क्रुद्धो महाराज सात्यकिः सत्यविक्रमः ।
तोमरं प्रेषयामास स्वर्णदण्डं महाधनम् ॥ १९
भीमसेनोऽथ नाराचं ज्वलन्तमिव पन्नगम् ।
नकुलः समरे शक्तिं सहदेवो गदां शुभाम् ।
धर्मराजः शतघ्नीं तु जिघांसुः शल्यमाहवे ॥ २०
तावापतत एवाशु पञ्चानां वै भुजच्युतान् ।
सात्यकिप्रहितं शल्यो भल्लैश्चिच्छेद तोमरम् ॥ २१
भीमेन प्रहितं चापि शरं कनकभूषणम् ।
द्विधा चिच्छेद समरे कृतहस्तः प्रतापवान् ॥ २२
नकुलप्रेषितां शक्तिं हेमदण्डां भयावहाम् ।
गदां च सहदेवेन शरौघैः समवारयत् ॥ २३
शराभ्यां च शतघ्नीं तां राज्ञश्चिच्छेद भारत ।
पश्यतां पाण्डुपुत्राणां सिंहनादं ननाद च ।
नामृष्यत्तं तु शैनेयः शत्रोर्विजयमाहवे ॥ २४
अथान्यद्धनुरादाय सात्यकिः क्रोधमूर्छितः ।
द्वाभ्यां मद्रेश्वरं विद्ध्वा सारथिं च त्रिभिः शरैः ॥२५
ततः शल्यो महाराज सर्वांस्तान्दशभिः शरैः ।
विव्याध सुभृशं क्रुद्धस्तोत्त्रैरिव महाद्विपान् ॥ २६
ते वार्यमाणाः समरे मद्रराज्ञा महारथाः ।
न शेकुः प्रमुखे स्थातुं तस्य शत्रुनिषूदनाः ॥ २७
ततो दुर्योधनो राजा दृष्ट्वा शल्यस्य विक्रमम् ।
निहतान्पाण्डवान्मेने पाञ्चालानथ सृञ्जयान् ॥ २८
ततो राजन्महाबाहुर्भीमसेनः प्रतापवान् ।
संत्यज्य मनसा प्राणान्मद्राधिपमयोधयत् ॥ २९
नकुलः सहदेवश्च सात्यकिश्च महारथः ।
परिवार्य तदा शल्यं समन्ताद्व्यकिरञ्शरैः ॥ ३०
स चतुर्भिर्महेष्वासैः पाण्डवानां महारथैः ।
वृतस्तान्योधयामास मद्रराजः प्रतापवान् ॥ ३१
तस्य धर्मसुतो राजन्क्षुरप्रेण महाहवे ।
चक्ररक्षं जघानाशु मद्रराजस्य पार्थिव ॥ ३२
तस्मिंस्तु निहते शूरे चक्ररक्षे महारथे ।
मद्रराजोऽतिबलवान्सैनिकानास्तृणोच्छरैः ॥ ३३
समाच्छन्नांस्ततस्तांस्तु राजन्वीक्ष्य स सैनिकान् ।
चिन्तयामास समरे धर्मराजो युधिष्ठिरः ॥ ३४
कथं नु न भवेत्सत्यं तन्माधववचो महत् ।
न हि क्रुद्धो रणे राजा क्षपयेत बलं मम ॥ ३५
ततः सरथनागाश्वाः पाण्डवाः पाण्डुपूर्वज ।
मद्रेश्वरं समासेदुः पीडयन्तः समन्ततः ॥ ३६
नानाशस्त्रौघबहुलां शस्त्रवृष्टिं समुत्थिताम् ।
व्यधमत्समरे राजन्महाभ्राणीव मारुतः ॥ ३७
ततः कनकपुङ्खां तां शल्यक्षिप्तां वियद्गताम् ।
शरवृष्टिमपश्याम शलभानामिवाततिम् ॥ ३८
ते शरा मद्रराजेन प्रेषिता रणमूर्धनि ।
संपतन्तः स्म दृश्यन्ते शलभानां व्रजा इव ॥ ३९
मद्रराजधनुर्मुक्तैः शरैः कनकभूषणैः ।
निरन्तरमिवाकाशं संबभूव जनाधिप ॥ ४०

न पाण्डवानां नास्माकं तत्र कश्चिद्व्यदृश्यत ।
बाणान्धकारे महति कृते तत्र महाभये ॥ ४१
मद्रराजेन बलिना लाघवाच्छरवृष्टिभिः ।
लोड्यमानं तथा दृष्ट्वा पाण्डवानां बलार्णवम् ।
विस्मयं परमं जग्मुर्देवगन्धर्वदानवाः ॥ ४२
स तु तान्सर्वतो यत्तान्शरैः संपीड्य मारिष ।
धर्मराजमवच्छाद्य सिंहवद्व्यनदन्मुहुः ॥ ४३
ते छन्नाः समरे तेन पाण्डवानां महारथाः ।
न शेकुस्तं तदा युद्धे प्रत्युद्यातुं महारथम् ॥ ४४
धर्मराजपुरोगास्तु भीमसेनमुखा रथाः ।
न जहुः समरे शूरं शल्यमाहवशोभिनम् ॥ ४५

इति श्रीमहाभारते शल्यपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

संजय उवाच ।

अर्जुनो द्रौणिना विद्धो युद्धे बहुभिरायसैः ।
तस्य चानुचरैः शूरैस्त्रिगर्तानां महारथैः ।
द्रौणिं विव्याध समरे त्रिभिरेव शिलीमुखैः ॥ १
तथेतरान्महेष्वासान्द्वाभ्यां द्वाभ्यां धनंजयः ।
भूयश्चैव महाबाहुः शरवर्षैरवाकिरत् ॥ २
शरकण्टकितास्ते तु तावका भरतर्षभ ।
न जहुः समरे पार्थं वध्यमानाः शितैः शरैः ॥ ३
तेऽर्जुनं रथवंशेन द्रोणपुत्रपुरोगमाः ।
अयोधयन्त समरे परिवार्य महारथाः ॥ ४
तैस्तु क्षिप्ताः शरा राजन्कार्तस्वरविभूषिताः ।
अर्जुनस्य रथोपस्थं पूरयामासुरञ्जसा ॥ ५
तथा कृष्णौ महेष्वासौ वृषभौ सर्वधन्विनाम् ।
शरैर्वीक्ष्य वितुन्नाङ्गौ प्रहृष्टौ युद्धदुर्मदौ ॥ ६
कूबरं रथचक्राणि ईषा योक्त्राणि चाभिभो ।
युगं चैवानुकर्षं च शरभूतमभूत्तदा ॥ ७
नैतादृशं दृष्टपूर्वं राजन्नैव च नः श्रुतम् ।
यादृशं तत्र पार्थस्य तावकाः संप्रचक्रिरे ॥ ८
स रथः सर्वतो भाति चित्रपुङ्खैः शितैः शरैः ।
उल्काशतैः संप्रदीप्तं विमानमिव भूतले ॥ ९
ततोऽर्जुनो महाराज शरैः संनतपर्वभिः ।
अवाकिरत्तां पृतनां मेघो वृष्ट्या यथाचलम् ॥ १०
ते वध्यमानाः समरे पार्थनामाङ्कितैः शरैः ।
पार्थभूतममन्यन्त प्रेक्षमाणास्तथाविधम् ॥ ११
ततोऽद्भुतशरज्वालो धनुःशब्दानिलो महान् ।
सेनेन्धनं ददाहाशु तावकं पार्थपावकः ॥ १२
चक्राणां पततां चैव युगानां च धरातले ।
तूणीराणां पताकानां ध्वजानां च रथैः सह ॥ १३
ईषाणामनुकर्षाणां त्रिवेणूनां च भारत ।
अक्षाणामथ योक्त्राणां प्रतोदानां च सर्वशः ॥ १४
शिरसां पततां चैव कुण्डलोष्णीषधारिणाम् ।
भुजानां च महाराज स्कन्धानां च समन्ततः ॥ १५
छत्राणां व्यजनैः सार्धं मुकुटानां च राशयः ।
समदृश्यन्त पार्थस्य रथमार्गेषु भारत ॥ १६
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ।
बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा ।
भीरूणां त्रासजननी शूराणां हर्षवर्धनी ॥ १७
हत्वा तु समरे पार्थः सहस्रे द्वे परंतप ।
रथानां सवरूथानां विधूमोऽग्निरिव ज्वलन् ॥ १८
यथा हि भगवानग्निर्जगद्दग्ध्वा चराचरम् ।
विधूमो दृश्यते राजंस्तथा पार्थो महारथः ॥ १९
द्रौणिस्तु समरे दृष्ट्वा पाण्डवस्य पराक्रमम् ।
रथेनातिपताकेन पाण्डवं प्रत्यवारयत् ॥ २०
तावुभौ पुरुषव्याघ्रौ श्वेताश्वौ धन्विनां वरौ ।
समीयतुस्तदा तूर्णं परस्परवधैषिणौ ॥ २१
तयोरासीन्महाराज बाणवर्षं सुदारुणम् ।

जीमूतानां यथा वृष्टिस्तपान्ते भरतर्षभ ॥ २२
अन्योन्यस्पर्धिनौ तौ तु शरैः संनतपर्वभिः ।
ततक्षतुर्मृधेऽन्योन्यं शृङ्गाभ्यां वृषभाविव ॥ २३
तयोर्युद्धं महाराज चिरं सममिवाभवत् ।
अस्त्राणां संगमश्चैव घोरस्तत्राभवन्महान् ॥ २४
ततोऽर्जुनं द्वादशभी रुक्मपुङ्खैः सुतेजनैः ।
वासुदेवं च दशभिर्द्रौणिर्विव्याध भारत ॥ २५
ततः प्रहस्य बीभत्सुर्व्याक्षिपद्गाण्डिवं धनुः ।
मानयित्वा मुहूर्तं च गुरुपुत्रं महाहवे ॥ २६
व्यश्वसूतरथं चक्रे सव्यसाची महारथः ।
मृदुपूर्वं ततश्चैनं त्रिभिर्विव्याध सायकैः ॥ २७
हताश्वे तु रथे तिष्ठन्द्रोणपुत्रस्त्वयस्मयम् ।
मुसलं पाण्डुपुत्राय चिक्षेप परिघोपमम् ॥ २८
तमापतन्तं सहसा हेमपट्टविभूषितम् ।
चिच्छेद सप्तधा वीरः पार्थः शत्रुनिबर्हणः ॥ २९
स च्छिन्नं मुसलं दृष्ट्वा द्रौणिः परमकोपनः ।
आददे परिघं घोरं नगेन्द्रशिखरोपमम् ।
चिक्षेप चैव पार्थाय द्रौणिर्युद्धविशारदः ॥ ३०
तमन्तकमिव क्रुद्धं परिघं प्रेक्ष्य पाण्डवः ।
अर्जुनस्त्वरितो जघ्ने पञ्चभिः सायकोत्तमैः ॥ ३१
स च्छिन्नः पतितो भूमौ पार्थबाणैर्महाहवे ।
दारयन्पृथिवीन्द्राणां मनः शब्देन भारत ॥ ३२
ततोऽपरैस्त्रिभिर्बाणैर्द्रौणिं विव्याध पाण्डवः ।
सोऽतिविद्धो बलवता पार्थेन सुमहाबलः ।
न संभ्रान्तस्तदा द्रौणिः पौरुषे स्वे व्यवस्थितः ॥ ३३
सुधर्मा तु ततो राजन्भारद्वाजं महारथम् ।
अवाकिरच्छरव्रातैः सर्वक्षत्रस्य पश्यतः ॥ ३४
ततस्तु सुरथोऽप्याजौ पाञ्चालानां महारथः ।
रथेन मेघघोषेण द्रौणिमेवाभ्यधावत ॥ ३५
विकर्षन्वै धनुः श्रेष्ठं सर्वभारसहं दृढम् ।
ज्वलनाशीविषनिभैः शरैश्चैनमवाकिरत् ॥ ३६
सुरथं तु ततः क्रुद्धमापतन्तं महारथम् ।
चुकोप समरे द्रौणिर्दण्डाहत इवोरगः ॥ ३७
त्रिशिखां भ्रुकुटीं कृत्वा सृक्किणी परिलेलिहन् ।
उद्वीक्ष्य सुरथं रोषाद्धनुर्ज्यामवमृज्य च ।
मुमोच तीक्ष्णं नाराचं यमदण्डसमद्युतिम् ॥ ३८
स तस्य हृदयं भित्त्वा प्रविवेशातिवेगतः ।
शक्राशनिरिवोत्सृष्टा विदार्य धरणीतलम् ॥ ३९
ततस्तं पतितं भूमौ नाराचेन समाहतम् ।
वज्रेणेव यथा शृङ्गं पर्वतस्य महाधनम् ॥ ४०
तस्मिंस्तु निहते वीरे द्रोणपुत्रः प्रतापवान् ।
आरुरोह रथं तूर्णं तमेव रथिनां वरः ॥ ४१
ततः सज्जो महाराज द्रौणिराहवदुर्मदः ।
अर्जुनं योधयामास संशप्तकवृतो रणे ॥ ४२
तत्र युद्धं महच्चासीदर्जुनस्य परैः सह ।
मध्यंदिनगते सूर्ये यमराष्ट्रविवर्धनम् ॥ ४३
तत्राश्चर्यमपश्याम दृष्ट्वा तेषां पराक्रमम् ।
यदेको युगपद्वीरान्समयोधयदर्जुनः ॥ ४४
विमर्दस्तु महानासीदर्जुनस्य परैः सह ।
शतक्रतोर्यथा पूर्वं महत्या दैत्यसेनया ॥ ४५

इति श्रीमहाभारते शल्यपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

संजय उवाच ।

दुर्योधनो महाराज धृष्टद्युम्नश्च पार्षतः ।
चक्रतुः सुमहद्युद्धं शरशक्तिसमाकुलम् ॥ १
तयोरासन्महाराज शरधाराः सहस्रशः ।
अम्बुदानां यथा काले जलधाराः समन्ततः ॥ २
राजा तु पार्षतं विद्ध्वा शरैः पञ्चभिरायसैः ।

द्रोणहन्तारमुग्रेषुः पुनर्विव्याध सप्तभिः ॥ ३
धृष्टद्युम्नस्तु समरे बलवान्दृढविक्रमः ।
सप्तत्या विशिखानां वै दुर्योधनमपीडयत् ॥ ४
पीडितं प्रेक्ष्य राजानं सोदर्या भरतर्षभ ।
महत्या सेनया सार्धं परिवव्रुः स्म पार्षतम् ॥ ५
स तैः परिवृतः शूरैः सर्वतोऽतिरथैर्भृशम् ।
व्यचरत्समरे राजन्दर्शयन्हस्तलाघवम् ॥ ६
शिखण्डी कृतवर्माणं गौतमं च महारथम् ।
प्रभद्रकैः समायुक्तो योधयामास धन्विनौ ॥ ७
तत्रापि सुमहद्युद्धं घोररूपं विशां पते ।
प्राणान्संत्यजतां युद्धे प्राणद्यूताभिदेवने ॥ ८
शल्यस्तु शरवर्षाणि विमुञ्चन्सर्वतोदिशम् ।
पाण्डवान्पीडयामास ससात्यकिवृकोदरान् ॥ ९
तथोभौ च यमौ युद्धे यमतुल्यपराक्रमौ ।
योधयामास राजेन्द्र वीर्येण च बलेन च ॥ १०
शल्यसायकनुन्नानां पाण्डवानां महामृधे ।
त्रातारं नाध्यगच्छन्त केचित्तत्र महारथाः ॥ ११
ततस्तु नकुलः शूरो धर्मराजे प्रपीडिते ।
अभिदुद्राव वेगेन मातुलं माद्रिनन्दनः ॥ १२
संछाद्य समरे शल्यं नकुलः परवीरहा ।
विव्याध चैनं दशभिः स्मयमानः स्तनान्तरे ॥ १३
सर्वपारशवैर्बाणैः कर्मारपरिमार्जितैः ।
स्वर्णपुङ्खैः शिलाधौतैर्धनुर्यन्त्रप्रचोदितैः ॥ १४
शल्यस्तु पीडितस्तेन स्वस्रीयेण महात्मना ।
नकुलं पीडयामास पत्रिभिर्नतपर्वभिः ॥ १५
ततो युधिष्ठिरो राजा भीमसेनोऽथ सात्यकिः ।
सहदेवश्च माद्रेयो मद्रराजमुपाद्रवन् ॥ १६
तानापतत एवाशु पूरयानान्रथस्वनैः ।
दिशश्च प्रदिशश्चैव कम्पयानांश्च मेदिनीम् ।
प्रतिजग्राह समरे सेनापतिरमित्रजित् ॥ १७
युधिष्ठिरं त्रिभिर्विद्ध्वा भीमसेनं च सप्तभिः ।
सात्यकिं च शतेनाजौ सहदेवं त्रिभिः शरैः ॥ १८
ततस्तु सशरं चापं नकुलस्य महात्मनः ।
मद्रेश्वरः क्षुरप्रेण तदा चिच्छेद मारिष ।
तदशीर्यत विच्छिन्नं धनुः शल्यस्य सायकैः ॥ १९
अथान्यद्धनुरादाय माद्रीपुत्रो महारथः ।
मद्रराजरथं तूर्णं पूरयामास पत्रिभिः ॥ २०
युधिष्ठिरस्तु मद्रेशं सहदेवश्च मारिष ।
दशभिर्दशभिर्बाणैरुरस्येनमविध्यताम् ॥ २१
भीमसेनस्ततः षष्ट्या सात्यकिर्नवभिः शरैः ।
मद्रराजमभिद्रुत्य जघ्नतुः कङ्कपत्रिभिः ॥ २२
मद्रराजस्ततः क्रुद्धः सात्यकिं नवभिः शरैः ।
विव्याध भूयः सप्तत्या शराणां नतपर्वणाम् ॥ २३
अथास्य सशरं चापं मुष्टौ चिच्छेद मारिष ।
हयांश्च चतुरः संख्ये प्रेषयामास मृत्यवे ॥ २४
विरथं सात्यकिं कृत्वा मद्रराजो महाबलः ।
विशिखानां शतेनैनमाजघान समन्ततः ॥ २५
माद्रीपुत्रौ तु संरब्धौ भीमसेनं च पाण्डवम् ।
युधिष्ठिरं च कौरव्य विव्याध दशभिः शरैः ॥ २६
तत्राद्भुतमपश्याम मद्रराजस्य पौरुषम् ।
यदेनं सहिताः पार्था नाभ्यवर्तन्त संयुगे ॥ २७
अथान्यं रथमास्थाय सात्यकिः सत्यविक्रमः ।
पीडितान्पाण्डवान्दृष्ट्वा मद्रराजवशं गतान् ।
अभिदुद्राव वेगेन मद्राणामधिपं बली ॥ २८
आपतन्तं रथं तस्य शल्यः समितिशोभनः ।
प्रत्युद्ययौ रथेनैव मत्तो मत्तमिव द्विपम् ॥ २९
स संनिपातस्तुमुलो बभूवाद्भुतदर्शनः ।
सात्यकेश्चैव शूरस्य मद्राणामधिपस्य च ।
यादृशो वै पुरा वृत्तः शम्बरामरराजयोः ॥ ३०
सात्यकिः प्रेक्ष्य समरे मद्रराजं व्यवस्थितम् ।

विव्याध दशभिर्बाणैस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३१
मद्रराजस्तु सुभृशं विद्धस्तेन महात्मना ।
सात्यकिं प्रतिविव्याध चित्रपुङ्खैः शितैः शरैः ॥ ३२
ततः पार्था महेष्वासाः सात्वताभिसृतं नृपम् ।
अभ्यद्रवन्रथैस्तूर्णं मातुलं वधकाम्यया ॥ ३३
तत आसीत्परामर्दस्तुमुलः शोणितोदकः ।
शूराणां युध्यमानानां सिंहानामिव नर्दताम् ॥ ३४
तेषामासीन्महाराज व्यतिक्षेपः परस्परम् ।
सिंहानामामिषेप्सूनां कूजतामिव संयुगे ॥ ३५
तेषां बाणसहस्रौघैराकीर्णा वसुधाभवत् ।
अन्तरिक्षं च सहसा बाणभूतमभूत्तदा ॥ ३६
शरान्धकारं बहुधा कृतं तत्र समन्ततः ।
अभ्रच्छायेव संजज्ञे शरैर्मुक्तैर्महात्मभिः ॥ ३७
तत्र राजञ्शरैर्मुक्तैर्निर्मुक्तैरिव पन्नगैः ।
स्वर्णपुङ्खैः प्रकाशद्भिर्व्यरोचन्त दिशस्तथा ॥ ३८
तत्राद्भुतं परं चक्रे शल्यः शत्रुनिबर्हणः ।
यदेकः समरे शूरो योधयामास वै बहून् ॥ ३९
मद्रराजभुजोत्सृष्टैः कङ्कबर्हिणवाजितैः ।
संपतद्भिः शरैर्घोरैरवाकीर्यत मेदिनी ॥ ४०
तत्र शल्यरथं राजन्विचरन्तं महाहवे ।
अपश्याम यथा पूर्वं शक्रस्यासुरसंक्षये ॥ ४१

इति श्रीमहाभारते शल्यपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

संजय उवाच ।

ततः सैन्यास्तव विभो मद्रराजपुरस्कृताः ।
पुनरभ्यद्रवन्पार्थान्वेगेन महता रणे ॥ १
पीडितास्तावकाः सर्वे प्रधावन्तो रणोत्कटाः ।
क्षणेनैव च पार्थांस्ते बहुत्वात्समलोडयन् ॥ २
ते वध्यमानाः कुरुभिः पाण्डवा नावतस्थिरे ।
निवार्यमाणा भीमेन पश्यतोः कृष्णपार्थयोः ॥ ३
ततो धनंजयः क्रुद्धः कृपं सह पदानुगैः ।
अवाकिरच्छरौघेण कृतवर्माणमेव च ॥ ४
शकुनिं सहदेवस्तु सहसैन्यमवारयत् ।
नकुलः पार्श्वतः स्थित्वा मद्रराजमवैक्षत ॥ ५
द्रौपदेया नरेन्द्रांश्च भूयिष्ठं समवारयन् ।
द्रोणपुत्रं च पाञ्चाल्यः शिखण्डी समवारयत् ॥ ६
भीमसेनस्तु राजानं गदापाणिरवारयत् ।
शल्यं तु सह सैन्येन कुन्तीपुत्रो युधिष्ठिरः ॥ ७
ततः समभवद्युद्धं संसक्तं तत्र तत्र ह ।
तावकानां परेषां च संग्रामेष्वनिवर्तिनाम् ॥ ८
तत्र पश्यामहे कर्म शल्यस्यातिमहद्रणे ।
यदेकः सर्वसैन्यानि पाण्डवानामयुध्यत ॥ ९
व्यदृश्यत तदा शल्यो युधिष्ठिरसमीपतः ।
रणे चन्द्रमसोऽभ्याशे शनैश्चर इव ग्रहः ॥ १०
पीडयित्वा तु राजानं शरैराशीविषोपमैः ।
अभ्यधावत्पुनर्भीमं शरवर्षैरवाकिरत् ॥ ११
तस्य तल्लाघवं दृष्ट्वा तथैव च कृतास्त्रताम् ।
अपूजयन्ननीकानि परेषां तावकानि च ॥ १२
पीड्यमानास्तु शल्येन पाण्डवा भृशविक्षताः ।
प्राद्रवन्त रणं हित्वा क्रोशमाने युधिष्ठिरे ॥ १३
वध्यमानेष्वनीकेषु मद्रराजेन पाण्डवः ।
अमर्षवशमापन्नो धर्मराजो युधिष्ठिरः ।
ततः पौरुषमास्थाय मद्रराजमपीडयत् ॥ १४
जयो वास्तु वधो वेति कृतबुद्धिर्महारथः ।
समाहूयाब्रवीत्सर्वान्भ्रातॄन्कृष्णं च माधवम् ॥ १५
भीष्मो द्रोणश्च कर्णश्च ये चान्ये पृथिवीक्षितः ।
कौरवार्थे पराक्रान्ताः संग्रामे निधनं गताः ॥ १६
यथाभागं यथोत्साहं भवन्तः कृतपौरुषाः ।
भागोऽवशिष्ट एकोऽयं मम शल्यो महारथः ॥ १७

सोऽहमद्य युधा जेतुमाशंसे मद्रकेश्वरम् ।
तत्र यन्मानसं मह्यं तत्सर्वं निगदामि वः ॥ १८
चक्ररक्षाविमौ शूरौ मम माद्रवतीसुतौ ।
अजेयौ वासवेनापि समरे वीरसंमतौ ॥ १९
साध्विमौ मातुलं युद्धे क्षत्रधर्मपुरस्कृतौ ।
मदर्थं प्रतियुध्येतां मानार्हौ सत्यसंगरौ ॥ २०
मां वा शल्यो रणे हन्ता तं वाहं भद्रमस्तु वः ।
इति सत्यामिमां वाणीं लोकवीरा निबोधत ॥ २१
योत्स्येऽहं मातुलेनाद्य क्षत्रधर्मेण पार्थिवाः ।
स्वयं समभिसंधाय विजयायेतराय वा ॥ २२
तस्य मेऽभ्यधिकं शस्त्रं सर्वोपकरणानि च ।
संयुञ्जन्तु रणे क्षिप्रं शास्त्रवद्रथयोजकाः ॥ २३
शैनेयो दक्षिणं चक्रं धृष्टद्युम्नस्तथोत्तरम् ।
पृष्ठगोपो भवत्वद्य मम पार्थो धनंजयः ॥ २४
पुरःसरो ममाद्यास्तु भीमः शस्त्रभृतां वरः ।
एवमभ्यधिकः शल्याद्भविष्यामि महामृधे ॥ २५
एवमुक्तास्तथा चक्रुः सर्वे राज्ञः प्रियैषिणः ।
ततः प्रहर्षः सैन्यानां पुनरासीत्तदा नृप ॥ २६
पाञ्चालानां सोमकानां मत्स्यानां च विशेषतः ।
प्रतिज्ञां तां च संग्रामे धर्मराजस्य पूरयन् ॥ २७
ततः शङ्खांश्च भेरीश्च शतशश्चैव पुष्करान् ।
अवादयन्त पाञ्चालाः सिंहनादांश्च नेदिरे ॥ २८
तेऽभ्यधावन्त संरब्धा मद्रराजं तरस्विनः ।
महता हर्षजेनाथ नादेन कुरुपुंगवाः ॥ २९
ह्रादेन गजघण्टानां शङ्खानां निनदेन च ।
तूर्यशब्देन महता नादयन्तश्च मेदिनीम् ॥ ३०
तान्प्रत्यगृह्णात्पुत्रस्ते मद्रराजश्च वीर्यवान् ।
महामेघानिव बहूञ्शैलावस्तोदयावुभौ ॥ ३१
शल्यस्तु समरश्लाघी धर्मराजमरिंदमम् ।
ववर्ष शरवर्षेण वर्षेण मघवानिव ॥ ३२
तथैव कुरुराजोऽपि प्रगृह्य रुचिरं धनुः ।
द्रोणोपदेशान्विविधान्दर्शयानो महामनाः ॥ ३३
ववर्ष शरवर्षाणि चित्रं लघु च सुष्ठु च ।
न चास्य विवरं कश्चिद्ददर्श चरतो रणे ॥ ३४
तावुभौ विविधैर्बाणैस्ततक्षाते परस्परम् ।
शार्दूलावामिषप्रेप्सू पराक्रान्ताविवाहवे ॥ ३५
भीमस्तु तव पुत्रेण रणशौण्डेन संगतः ।
पाञ्चाल्यः सात्यकिश्चैव माद्रीपुत्रौ च पाण्डवौ ।
शकुनिप्रमुखान्वीरान्प्रत्यगृह्णन्समन्ततः ॥ ३६
तदासीत्तुमुलं युद्धं पुनरेव जयैषिणाम् ।
तावकानां परेषां च राजन्दुर्मन्त्रिते तव ॥ ३७
दुर्योधनस्तु भीमस्य शरेणानतपर्वणा ।
चिच्छेदादिश्य संग्रामे ध्वजं हेमविभूषितम् ॥३८
सकिङ्किणीकजालेन महता चारुदर्शनः ।
पपात रुचिरः सिंहो भीमसेनस्य नानदन् ॥ ३९
पुनश्चास्य धनुश्चित्रं गजराजकरोपमम् ।
क्षुरेण शितधारेण प्रचकर्त नराधिपः ॥ ४०
स च्छिन्नधन्वा तेजस्वी रथशक्त्या सुतं तव ।
बिभेदोरसि विक्रम्य स रथोपस्थ आविशत् ॥४१
तस्मिन्मोहमनुप्राप्ते पुनरेव वृकोदरः ।
यन्तुरेव शिरः कायात्क्षुरप्रेणाहरत्तदा ॥ ४२
हतसूता हयास्तस्य रथमादाय भारत ।
व्यद्रवन्त दिशो राजन्हाहाकारस्तदाभवत् ॥ ४३
तमभ्यधावत्त्राणार्थं द्रोणपुत्रो महारथः ।
कृपश्च कृतवर्मा च पुत्रं तेऽभिपरीप्सवः ॥ ४४
तस्मिन्विलुलिते सैन्ये त्रस्तास्तस्य पदानुगाः ।
गाण्डीवधन्वा विस्फार्य धनुस्तानहनच्छरैः ॥४५
युधिष्ठिरस्तु मद्रेशमभ्यधावदमर्षितः ।
स्वयं संचोदयन्नश्वान्दन्तवर्णान्मनोजवान् ॥ ४६
तत्राद्भुतमपश्याम कुन्तीपुत्रे युधिष्ठिरे ।

पुरा भूत्वा मृदुर्दान्तो यत्तदा दारुणोऽभवत् ॥ ४७
विवृताक्षश्च कौन्तेयो वेपमानश्च मन्युना ।
चिच्छेद योधान्निशितैः शरैः शतसहस्रशः ॥ ४८
यां यां प्रत्युद्ययौ सेनां तां तां ज्येष्ठः स पाण्डवः ।
शरैरपातयद्राजन्गिरीन्वज्रैरिवोत्तमैः ॥ ४९
साश्वसूतध्वजरथान्रथिनः पातयन्बहून् ।
आक्रीडदेको बलवान्पवनस्तोयदानिव ॥ ५०
साश्वारोहांश्च तुरगान्पत्तींश्चैव सहस्रशः ।
व्यपोथयत संग्रामे क्रुद्धो रुद्रः पशूनिव ॥ ५१
शून्यमायोधनं कृत्वा शरवर्षैः समन्ततः ।
अभ्यद्रवत मद्रेशं तिष्ठ शल्येति चाब्रवीत् ॥ ५२
तस्य तच्चरितं दृष्ट्वा संग्रामे भीमकर्मणः ।
वित्रेसुस्तावकाः सर्वे शल्यस्त्वेनं समभ्ययात् ॥ ५३
ततस्तौ तु सुसंरब्धौ प्रध्माप्य सलिलोद्भवौ ।
समाहूय तदान्योन्यं भर्त्सयन्तौ समीयतुः ॥ ५४
शल्यस्तु शरवर्षेण युधिष्ठिरमवाकिरत् ।
मद्रराजं च कौन्तेयः शरवर्षैरवाकिरत् ॥ ५५
व्यदृश्येतां तदा राजन्कङ्कपत्रिभिराहवे ।
उद्भिन्नरुधिरौ शूरौ मद्रराजयुधिष्ठिरौ ॥ ५६
पुष्पिताविव रेजाते वने शल्मलिकिंशुकौ ।
दीप्यमानौ महात्मानौ प्राणयोर्युद्धदुर्मदौ ॥ ५७
दृष्ट्वा सर्वाणि सैन्यानि नाध्यवस्यंस्तयोर्जयम् ।
हत्वा मद्राधिपं पार्थो भोक्ष्यतेऽद्य वसुंधराम् ॥ ५८
शल्यो वा पाण्डवं हत्वा दद्याद्दुर्योधनाय गाम् ।
इतीव निश्चयो नाभूद्योधानां तत्र भारत ॥ ५९
प्रदक्षिणमभूत्सर्वं धर्मराजस्य युध्यतः ॥ ६०
ततः शरशतं शल्यो मुमोचाशु युधिष्ठिरे ।
धनुश्चास्य शिताग्रेण बाणेन निरकृन्तत ॥ ६१
सोऽन्यत्कार्मुकमादाय शल्यं शरशतैस्त्रिभिः ।
अविध्यत्कार्मुकं चास्य क्षुरेण निरकृन्तत ॥ ६२
अथास्य निजघानाश्वांश्चतुरो नतपर्वभिः ।
द्वाभ्यामथ शिताग्राभ्यामुभौ च पार्ष्णिसारथी ॥ ६३
ततोऽस्य दीप्यमानेन पीतेन निशितेन च ।
प्रमुखे वर्तमानस्य भल्लेनापाहरद्ध्वजम् ।
ततः प्रभग्नं तत्सैन्यं दौर्योधनमरिंदम ॥ ६४
ततो मद्राधिपं द्रौणिरभ्यधावत्तथाकृतम् ।
आरोप्य चैनं स्वरथं त्वरमाणः प्रदुद्रुवे ॥ ६५
मुहूर्तमिव तौ गत्वा नर्दमाने युधिष्ठिरे ।
स्थित्वा ततो मद्रपतिरन्यं स्यन्दनमास्थितः ॥ ६६
विधिवत्कल्पितं शुभ्रं महाम्बुदनिनादिनम् ।
सज्जयन्त्रोपकरणं द्विषतां लोमहर्षणम् ॥ ६७

इति श्रीमहाभारते शल्यपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

संजय उवाच ।

अथान्यद्धनुरादाय बलवद्वेगवत्तरम् ।
युधिष्ठिरं मद्रपतिर्विद्ध्वा सिंह इवानदत् ॥ १
ततः स शरवर्षेण पर्जन्य इव वृष्टिमान् ।
अभ्यवर्षदमेयात्मा क्षत्रियान्क्षत्रियर्षभः ॥ २
सात्यकिं दशभिर्विद्ध्वा भीमसेनं त्रिभिः शरैः ।
सहदेवं त्रिभिर्विद्ध्वा युधिष्ठिरमपीडयत् ॥ ३
तांस्तानन्यान्महेष्वासान्साश्वान्सरथकुञ्जरान् ।
कुञ्जरान्कुञ्जरारोहानश्वानश्वप्रयायिनः ।
रथांश्च रथिभिः सार्धं जघान रथिनां वरः ॥ ४
बाहूंश्चिच्छेद च तथा सायुधान्केतनानि च ।
चकार च महीं योधैः स्तीर्णां वेदीं कुशैरिव ॥ ५
तथा तमरिसैन्यानि घ्नन्तं मृत्युमिवान्तकम् ।
परिवव्रुर्भृशं क्रुद्धाः पाण्डुपाञ्चालसोमकाः ॥ ६
तं भीमसेनश्च शिनेश्च नप्ता
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।

समागतं भीमबलेन राज्ञा
पर्यापुरन्योन्यमथाह्वयन्तः ॥ ७
ततस्तु शूराः समरे नरेन्द्रं
मद्रेश्वरं प्राप्य युधां वरिष्ठम् ।
आवार्य चैनं समरे नृवीरा
जघ्नुः शरैः पत्रिभिरुग्रवेगैः ॥ ८
संरक्षितो भीमसेनेन राजा
माद्रीसुताभ्यामथ माधवेन ।
मद्राधिपं पत्रिभिरुग्रवेगैः
स्तनान्तरे धर्मसुतो निजघ्ने ॥ ९
ततो रणे तावकानां रथौघाः
समीक्ष्य मद्राधिपतिं शरार्तम् ।
पर्यावव्रुः प्रवराः सर्वशश्च
दुर्योधनस्यानुमते समन्तात् ॥ १०
ततो द्रुतं मद्रजनाधिपो रणे
युधिष्ठिरं सप्तभिरभ्यविध्यत् ।
तं चापि पार्थो नवभिः पृषत्कै-
र्विव्याध राजंस्तुमुले महात्मा ॥ ११
आकर्णपूर्णायतसंप्रयुक्तैः
शरैस्तदा संयति तैलधौतैः ।
अन्योन्यमाच्छादयतां महारथौ
मद्राधिपश्चापि युधिष्ठिरश्च ॥ १२
ततस्तु तूर्णं समरे महारथौ
परस्परस्यान्तरमीक्षमाणौ ।
शरैर्भृशं विव्यधतुर्नृपोत्तमौ
महाबलौ शत्रुभिरप्रधृष्यौ ॥ १३
तयोर्धनुर्ज्यातलनिस्वनो महा-
न्महेन्द्रवज्राशनितुल्यनिस्वनः ।
परस्परं बाणगणैर्महात्मनोः
प्रवर्षतोर्मद्रपपाण्डुवीरयोः ॥ १४
तौ चेरतुर्व्याघ्रशिशुप्रकाशौ
महावनेष्वामिषगृद्धिनाविव ।
विषाणिनौ नागवराविवोभौ
ततक्षतुः संयुगजातदर्पौ ॥ १५
ततस्तु मद्राधिपतिर्महात्मा
युधिष्ठिरं भीमबलं प्रसह्य ।
विव्याध वीरं हृदयेऽतिवेगं
शरेण सूर्याग्निसमप्रभेण ॥ १६
ततोऽतिविद्धोऽथ युधिष्ठिरोऽपि
सुसंप्रयुक्तेन शरेण राजन् ।
जघान मद्राधिपतिं महात्मा
मुदं च लेभे ऋषभः कुरूणाम् ॥ १७
ततो मुहूर्तादिव पार्थिवेन्द्रो
लब्ध्वा संज्ञां क्रोधसंरक्तनेत्रः ।
शतेन पार्थं त्वरितो जघान
सहस्रनेत्रप्रतिमप्रभावः ॥ १८
त्वरंस्ततो धर्मसुतो महात्मा
शल्यस्य क्रुद्धो नवभिः पृषत्कैः ।
भित्त्वा ह्युरस्तपनीयं च वर्म
जघान षड्भिस्त्वपरैः पृषत्कैः ॥ १९
ततस्तु मद्राधिपतिः प्रहृष्टो
धनुर्विकृष्य व्यसृजत्पृषत्कान् ।
द्वाभ्यां क्षुराभ्यां च तथैव राज्ञ-
श्चिच्छेद चापं कुरुपुंगवस्य ॥ २०
नवं ततोऽन्यत्समरे प्रगृह्य
राजा धनुर्घोरतरं महात्मा ।
शल्यं तु विद्ध्वा निशितैः समन्ता-
द्यथा महेन्द्रो नमुचिं शिताग्रैः ॥ २१
ततस्तु शल्यो नवभिः पृषत्कै-
र्भीमस्य राज्ञश्च युधिष्ठिरस्य ।

निकृत्य रौक्मे पटुवर्मणी तयो-
विदारयामास भुजौ महात्मा ॥ २२
ततोऽपरेण ज्वलितार्कतेजसा
क्षुरेण राज्ञो धनुरुन्ममाथ ।
कृपश्च तस्यैव जघान सूतं
षड्भिः शरैः सोऽभिमुखं पपात ॥ २३
मद्राधिपश्चापि युधिष्ठिरस्य
शरैश्चतुर्भिर्निजघान वाहान् ।
वाहांश्च हत्वा व्यकरोन्महात्मा
योधक्षयं धर्मसुतस्य राज्ञः ॥ २४
तथा कृते राजनि भीमसेनो
मद्राधिपस्याशु ततो महात्मा ।
छित्त्वा धनुर्वेगवता शरेण
द्वाभ्यामविध्यत्सुभृशं नरेन्द्रम् ॥ २५
अथापरेणास्य जहार यन्तुः
कायाच्छिरः संनहनीयमध्यात् ।
जघान चाश्वांश्चतुरः स शीघ्रं
तथा भृशं कुपितो भीमसेनः ॥ २६
तमग्रणीः सर्वधनुर्धराणा-
मेकं चरन्तं समरेऽतिवेगम् ।
भीमः शतेन व्यकिरच्छराणां
माद्रीपुत्रः सहदेवस्तथैव ॥ २७
तैः सायकैर्मोहितं वीक्ष्य शल्यं
भीमः शरैरस्य चकर्त वर्म ।
स भीमसेनेन निकृत्तवर्मा
मद्राधिपश्चर्म सहस्रतारम् ॥ २८
प्रगृह्य खड्गं च रथान्महात्मा
प्रस्कन्द्य कुन्तीसुतमभ्यधावत् ।
छित्त्वा रथेषां नकुलस्य सोऽथ
युधिष्ठिरं भीमबलोऽभ्यधावत् ॥ २९

तं चापि राजानमथोत्पतन्तं
क्रुद्धं यथैवान्तकमापतन्तम् ।
धृष्टद्युम्नो द्रौपदेयाः शिखण्डी
शिनेश्च नप्ता सहसा परीयुः ॥ ३०
अथास्य चर्माप्रतिमं न्यकृन्त-
द्भीमो महात्मा दशभिः पृषत्कैः ।
खड्गं च भल्लैर्निचकर्त मुष्टौ
नदन्प्रहृष्टस्तव सैन्यमध्ये ॥ ३१
तत्कर्म भीमस्य समीक्ष्य हृष्टा-
स्ते पाण्डवानां प्रवरा रथौघाः ।
नादं च चक्रुर्भृशमुत्स्मयन्तः
शङ्खांश्च दध्मुः शशिसंनिकाशान् ॥ ३२
तेनाथ शब्देन विभीषणेन
तवाभितप्तं बलमप्रहृष्टम् ।
स्वेदाभिभूतं रुधिरोक्षिताङ्गं
विसंज्ञकल्पं च तथा विषण्णम् ॥ ३३
स मद्रराजः सहसावकीर्णो
भीमाग्रगैः पाण्डवयोधमुख्यैः ।
युधिष्ठिरस्याभिमुखं जवेन
सिंहो यथा मृगहेतोः प्रयातः ॥ ३४
स धर्मराजो निहताश्वसूतं
क्रोधेन दीप्तज्वलनप्रकाशम् ।
दृष्ट्वा तु मद्राधिपतिं स तूर्णं
समभ्यधावत्तमरिं बलेन ॥ ३५
गोविन्दवाक्यं त्वरितं विचिन्त्य
दध्रे मतिं शल्यविनाशनाय ।
स धर्मराजो निहताश्वसूते
रथे तिष्ठञ्शक्तिमेवाभिकाङ्क्षन् ॥ ३६
तच्चापि शल्यस्य निशम्य कर्म
महात्मनो भागमथावशिष्टम् ।

स्मृत्वा मनः शल्यवधे यतात्मा
यथोक्तमिन्द्रावरजस्य चक्रे ॥ ३७
स धर्मराजो मणिहेमदण्डां
जग्राह शक्तिं कनकप्रकाशाम् ।
नेत्रे च दीप्ते सहसा विवृत्य
मद्राधिपं क्रुद्धमना निरैक्षत् ॥ ३८
निरीक्षितो वै नरदेव राज्ञा
पूतात्मना निर्हृतकल्मषेण ।
अभून्न यद्भस्मसान्मद्रराज-
स्तदद्भुतं मे प्रतिभाति राजन् ॥ ३९
ततस्तु शक्तिं रुचिरोग्रदण्डां
मणिप्रवालोज्ज्वलितां प्रदीप्ताम् ।
चिक्षेप वेगात्सुभृशं महात्मा
मद्राधिपाय प्रवरः कुरूणाम् ॥ ४०
दीप्तामथैनां महता बलेन
सविस्फुलिङ्गां सहसा पतन्तीम् ।
प्रैक्षन्त सर्वे कुरवः समेता
यथा युगान्ते महतीमिवोल्काम् ॥ ४१
तां कालरात्रीमिव पाशहस्तां
यमस्य धात्रीमिव चोग्ररूपाम् ।
सब्रह्मदण्डप्रतिमाममोघां
ससर्ज यत्तो युधि धर्मराजः ॥ ४२
गन्धस्रगग्र्यासनपानभोजनै-
रभ्यर्चितां पाण्डुसुतैः प्रयत्नात् ।
संवर्तकाग्निप्रतिमां ज्वलन्तीं
कृत्यामथर्वाङ्गिरसीमिवोग्राम् ॥ ४३
ईशानहेतोः प्रतिनिर्मितां तां
त्वष्ट्रा रिपूणामसुदेहभक्षाम् ।
भूम्यन्तरिक्षादिजलाशयानि
प्रसह्य भूतानि निहन्तुमीशाम् ॥ ४४
घण्टापताकामणिवज्रभाजं
वैडूर्यचित्रां तपनीयदण्डाम् ।
त्वष्ट्रा प्रयत्नान्नियमेन क्लृप्तां
ब्रह्मद्विषामन्तकरीममोघाम् ॥ ४५
बलप्रयत्नादधिरूढवेगां
मन्त्रैश्च घोरैरभिमन्त्रयित्वा ।
ससर्ज मार्गेण च तां परेण
वधाय मद्राधिपतेस्तदानीम् ॥ ४६
हतोऽस्यसावित्यभिगर्जमानो
रुद्रोऽन्तकायान्तकरं यथेषुम् ।
प्रसार्य बाहुं सुदृढं सुपाणिं
क्रोधेन नृत्यन्निव धर्मराजः ॥ ४७
तां सर्वशक्त्या प्रहितां स शक्तिं
युधिष्ठिरेणाप्रतिवार्यवीर्याम् ।
प्रतिग्रहायाभिननर्द शल्यः
सम्यग्घुतामग्निरिवाज्यधाराम् ॥ ४८
सा तस्य मर्माणि विदार्य शुभ्र-
मुरो विशालं च तथैव वर्म ।
विवेश गां तोयमिवाप्रसक्ता
यशो विशालं नृपतेर्दहन्ती ॥ ४९
नासाक्षिकर्णास्यविनिःसृतेन
प्रस्यन्दता च व्रणसंभवेन ।
संसिक्तगात्रो रुधिरेण सोऽभू-
त्क्रौञ्चो यथा स्कन्दहतो महाद्रिः ॥ ५०
प्रसार्य बाहू स रथाद्गतो गां
संछिन्नवर्मा कुरुनन्दनेन ।
महेन्द्रवाहप्रतिमो महात्मा
वज्राहतं शृङ्गमिवाचलस्य ॥ ५१
बाहू प्रसार्याभिमुखो धर्मराजस्य मद्रराट् ।
ततो निपतितो भूमाविन्द्रध्वज इवोच्छ्रितः ॥ ५२

स तथा भिन्नसर्वाङ्गो रुधिरेण समुक्षितः ।
प्रत्युद्गत इव प्रेम्णा भूम्या स नरपुंगवः ॥ ५३
प्रियया कान्तया कान्तः पतमान इवोरसि ।
चिरं भुक्त्वा वसुमतीं प्रियां कान्तामिव प्रभुः ।
सर्वैरङ्गैः समाश्लिष्य प्रसुप्त इव सोऽभवत् ॥ ५४
धर्म्ये धर्मात्मना युद्धे निहतो धर्मसूनुना ।
सम्यग्घुत इव स्विष्टः प्रशान्तोऽग्निरिवाध्वरे ॥ ५५
शक्त्या विभिन्नहृदयं विप्रविद्धायुधध्वजम् ।
संशान्तमपि मद्रेशं लक्ष्मीर्नैव व्यमुञ्चत ॥ ५६
ततो युधिष्ठिरश्चापमादायेन्द्रधनुष्प्रभम् ।
व्यधमद्द्विषतः संख्ये खगराडिव पन्नगान् ।
देहासून्निशितैर्भल्लै रिपूणां नाशयन्क्षणात् ॥ ५७
ततः पार्थस्य बाणौघैरावृताः सैनिकास्तव ।
निमीलिताक्षाः क्षिण्वन्तो भृशमन्योन्यमर्दिताः ।
संन्यस्तकवचा देहैर्विपत्रायुधजीविताः ॥ ५८
ततः शल्ये निपतिते मद्रराजानुजो युवा ।
भ्रातुः सर्वैर्गुणैस्तुल्यो रथी पाण्डवमभ्ययात् ॥ ५९
विव्याध च नरश्रेष्ठो नाराचैर्बहुभिस्त्वरन् ।
हतस्यापचितिं भ्रातुश्चिकीर्षुर्युद्धदुर्मदः ॥ ६०
तं विव्याधाशुगैः षड्भिर्धर्मराजस्त्वरन्निव ।
कार्मुकं चास्य चिच्छेद क्षुराभ्यां ध्वजमेव च ॥ ६१
ततोऽस्य दीप्यमानेन सुदृढेन शितेन च ।
प्रमुखे वर्तमानस्य भल्लेनापाहरच्छिरः ॥ ६२
सकुण्डलं तद्ददृशे पतमानं शिरो रथात् ।
पुण्यक्षयमिव प्राप्य पतन्तं स्वर्गवासिनम् ॥ ६३
तस्यापकृष्टशीर्षं तच्छरीरं पतितं रथात् ।
रुधिरेणावसिक्ताङ्गं दृष्ट्वा सैन्यमभज्यत ॥ ६४
विचित्रकवचे तस्मिन्हते मद्रनृपानुजे ।
हाहाकारं विकुर्वाणाः कुरवो विप्रदुद्रुवुः ॥ ६५
शल्यानुजं हतं दृष्ट्वा तावकास्त्यक्तजीविताः ।
वित्रेसुः पाण्डवभयाद्रजोध्वस्तास्तथा भृशम् ॥ ६६
तांस्तथा भज्यतस्त्रस्तान्कौरवान्भरतर्षभ ।
शिनेर्नप्ता किरन्बाणैरभ्यवर्तत सात्यकिः ॥ ६७
तमायान्तं महेष्वासमप्रसह्यं दुरासदम् ।
हार्दिक्यस्त्वरितो राजन्प्रत्यगृह्णादभीतवत् ॥ ६८
तौ समेतौ महात्मानौ वार्ष्णेयावपराजितौ ।
हार्दिक्यः सात्यकिश्चैव सिंहाविव मदोत्कटौ ॥ ६९
इषुभिर्विमलाभासैश्छादयन्तौ परस्परम् ।
अर्चिर्भिरिव सूर्यस्य दिवाकरसमप्रभौ ॥ ७०
चापमार्गबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः ।
आकाशे समपश्याम पतंगानिव शीघ्रगान् ॥ ७१
सात्यकिं दशभिर्विद्ध्वा हयांश्चास्य त्रिभिः शरैः ।
चापमेकेन चिच्छेद हार्दिक्यो नतपर्वणा ॥ ७२
तन्निकृत्तं धनुः श्रेष्ठमपास्य शिनिपुंगवः ।
अन्यदादत्त वेगेन वेगवत्तरमायुधम् ॥ ७३
तदादाय धनुः श्रेष्ठं वरिष्ठः सर्वधन्विनाम् ।
हार्दिक्यं दशभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ॥ ७४
ततो रथं युगेषां च छित्त्वा भल्लैः सुसंयतैः ।
अश्वांस्तस्यावधीत्तूर्णमुभौ च पार्ष्णिसारथी ॥ ७५
मद्रराजे हते राजन्विरथे कृतवर्मणि ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ७६
तत्परे नावबुध्यन्त सैन्येन रजसा वृते ।
बलं तु हतभूयिष्ठं तत्तदासीत्पराङ्मुखम् ॥ ७७
ततो मुहूर्तात्तेऽपश्यन्रजो भौमं समुत्थितम् ।
विविधैः शोणितस्रावैः प्रशान्तं पुरुषर्षभ ॥ ७८
ततो दुर्योधनो दृष्ट्वा भग्नं स्वबलमन्तिकात् ।
जवेनापततः पार्थानेकः सर्वानवारयत् ॥ ७९
पाण्डवान्सरथान्दृष्ट्वा धृष्टद्युम्नं च पार्षतम् ।
आनर्तं च दुराधर्षं शितैर्बाणैरवाकिरत् । ८०
तं परे नाभ्यवर्तन्त मर्त्या मृत्युमिवागतम् ।

अथान्यं रथमास्थाय हार्दिक्योऽपि न्यवर्तत ॥ ८१
ततो युधिष्ठिरो राजा त्वरमाणो महारथः ।
चतुर्भिर्निजघानाश्वान्पत्रिभिः कृतवर्मणः ।
विव्याध गौतमं चापि षड्भिर्भल्लैः सुतेजनैः ॥ ८२
अश्वत्थामा ततो राज्ञा हताश्वं विरथीकृतम् ।
समपोवाह हार्दिक्यं स्वरथेन युधिष्ठिरात् ॥ ८३
ततः शारद्वतोऽष्टाभिः प्रत्यविध्यद्युधिष्ठिरम् ।
विव्याध चाश्वान्निशितैस्तस्याष्टाभिः शिलीमुखैः ॥
एवमेतन्महाराज युद्धशेषमवर्तत ।
तव दुर्मन्त्रिते राजन्सहपुत्रस्य भारत ॥ ८५

तस्मिन्महेष्वासवरे विशस्ते
संग्राममध्ये कुरुपुंगवेन ।
पार्थाः समेताः परमप्रहृष्टाः
शङ्खान्प्रदध्मुर्हतमीक्ष्य शल्यम् ॥ ८६
युधिष्ठिरं च प्रशशंसुराजौ
पुरा सुरा वृत्रवधे यथेन्द्रम् ।
चक्रुश्च नानाविधवाद्यशब्दा-
न्निनादयन्तो वसुधां समन्तात् ॥ ८७

इति श्रीमहाभारते शल्यपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

॥ समाप्तं शल्यवधपर्व ॥

१७

संजय उवाच ।

शल्ये तु निहते राजन्मद्रराजपदानुगाः ।
रथाः सप्तशता वीरा निर्ययुर्महतो बलात् ॥ १
दुर्योधनस्तु द्विरदमारुह्याचलसंनिभम् ।
छत्रेण ध्रियमाणेन वीज्यमानश्च चामरैः ।
न गन्तव्यं न गन्तव्यमिति मद्रानवारयत् ॥ २
दुर्योधनेन ते वीरा वार्यमाणाः पुनः पुनः ।
युधिष्ठिरं जिघांसन्तः पाण्डूनां प्राविशन्बलम् ॥ ३
ते तु शूरा महाराज कृतचित्ताः स्म योधने ।
धनुःशब्दं महत्कृत्वा सहायुध्यन्त पाण्डवैः ॥ ४
श्रुत्वा तु निहतं शल्यं धर्मपुत्रं च पीडितम् ।
मद्रराजप्रिये युक्तैर्मद्रकाणां महारथैः ॥ ५
आजगाम ततः पार्थो गाण्डीवं विक्षिपन्धनुः ।
पूरयन्रथघोषेण दिशः सर्वा महारथः ॥ ६
ततोऽर्जुनश्च भीमश्च माद्रीपुत्रौ च पाण्डवौ ।
सात्यकिश्च नरव्याघ्रो द्रौपदेयाश्च सर्वशः ॥ ७
धृष्टद्युम्नः शिखण्डी च पाञ्चालाः सह सोमकैः ।
युधिष्ठिरं परीप्सन्तः समन्तात्पर्यवारयन् ॥ ८
ते समन्तात्परिवृताः पाण्डवैः पुरुषर्षभाः ।
क्षोभयन्ति स्म तां सेनां मकराः सागरं यथा ॥ ९
पुरोवातेन गङ्गेव क्षोभ्यमाना महानदी ।
अक्षोभ्यत तदा राजन्पाण्डूनां ध्वजिनी पुनः ॥१०
प्रस्कन्द्य सेनां महतीं त्यक्तात्मानो महारथाः ।
वृक्षानिव महावाताः कम्पयन्ति स्म तावकाः ॥११
बहवश्चुक्रुशुस्तत्र क स राजा युधिष्ठिरः ।
भ्रातरो वास्य ते शूरा दृश्यन्ते नेह केचन ॥ १२
पाञ्चालानां महावीर्याः शिखण्डी च महारथः ।
धृष्टद्युम्नोऽथ शैनेयो द्रौपदेयाश्च सर्वशः ॥ १३
एवं तान्वादिनः शूरान्द्रौपदेया महारथाः ।
अभ्यघ्नन्युयुधानश्च मद्रराजपदानुगान् ॥ १४
चक्रैर्विमथितैः केचित्केचिच्छिन्नैर्महाध्वजैः ।
प्रत्यदृश्यन्त समरे तावका निहताः परैः ॥ १५
आलोक्य पाण्डवान्युद्धे योधा राजन्समन्ततः ।
वार्यमाणा ययुर्वेगात्तव पुत्रेण भारत ॥ १६
दुर्योधनस्तु तान्वीरान्वारयामास सान्त्वयन् ।
न चास्य शासनं कश्चित्तत्र चक्रे महारथः ॥ १७
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ।
दुर्योधनं महाराज वचनं वचनक्षमः ॥ १८

किं नः संप्रेक्षमाणानां मद्राणां हन्यते बलम् ।
न युक्तमेतत्समरे त्वयि तिष्ठति भारत ॥ १९
सहितैर्नाम योद्धव्यमित्येष समयः कृतः ।
अथ कस्मात्परानेव घ्नतो मर्षयसे नृप ॥ २०

दुर्योधन उवाच ।

वार्यमाणा मया पूर्वं नैते चक्रुर्वचो मम ।
एते हि निहताः सर्वे प्रस्कन्नाः पाण्डुवाहिनीम् ॥२१

शकुनिरुवाच ।

न भर्तुः शासनं वीरा रणे कुर्वन्त्यमर्षिताः ।
अलं क्रोद्धुं तथैतेषां नायं काल उपेक्षितुम् ॥ २२
यामः सर्वेऽत्र संभूय सवाजिरथकुञ्जराः ।
परित्रातुं महेष्वासान्मद्रराजपदानुगान् ॥ २३
अन्योन्यं परिरक्षामो यत्नेन महता नृप ।
एवं सर्वेऽनुसंचिन्त्य प्रययुर्यत्र सैनिकाः ॥ २४

संजय उवाच ।

एवमुक्तस्ततो राजा बलेन महता वृतः ।
प्रययौ सिंहनादेन कम्पयन्वै वसुंधराम् ॥ २५
हत विध्यत गृह्णीत प्रहरध्वं निकृन्तत ।
इत्यासीत्तुमुलः शब्दस्तव सैन्यस्य भारत ॥ २६
पाण्डवास्तु रणे दृष्ट्वा मद्रराजपदानुगान् ।
सहितानभ्यवर्तन्त गुल्ममास्थाय मध्यमम् ॥ २७
ते मुहूर्ताद्रणे वीरा हस्ताहस्तं विशां पते ।
निहताः प्रत्यदृश्यन्त मद्रराजपदानुगाः ॥ २८
ततो नः संप्रयातानां हतामित्रास्तरस्विनः ।
हृष्टाः किलकिलाशब्दमकुर्वन्सहिताः परे ॥ २९
अथोत्थितानि रुण्डानि समदृश्यन्त सर्वशः ।
पपात महती चोल्का मध्येनादित्यमण्डलम् ॥ ३०
रथैर्भग्नैर्युगाक्षैश्च निहतैश्च महारथैः ।
अश्वैर्निपतितैश्चैव संछन्नाभूद्वसुंधरा ॥ ३१
वातायमानैस्तुरगैर्युगासक्तैस्तुरंगमैः ।
अदृश्यन्त महाराज योधास्तत्र रणाजिरे ॥ ३२
भग्नचक्रान्रथान्केचिदवहंस्तुरगा रणे ।
रथार्धं केचिदादाय दिशो दश विबभ्रमुः ।
तत्र तत्र च दृश्यन्ते योक्त्रैः श्लिष्टाः स्म वाजिनः ॥
रथिनः पतमानाश्च व्यदृश्यन्त नरोत्तम ।
गगनात्प्रच्युताः सिद्धाः पुण्यानामिव संक्षये ॥ ३४
निहतेषु च शूरेषु मद्रराजानुगेषु च ।
अस्मानापततश्चापि दृष्ट्वा पार्था महारथाः ॥ ३५
अभ्यवर्तन्त वेगेन जयगृध्राः प्रहारिणः ।
बाणशब्दरवान्कृत्वा विमिश्राञ्शङ्खनिस्वनैः ॥ ३६
अस्मांस्तु पुनरासाद्य लब्धलक्षाः प्रहारिणः ।
शरासनानि धुन्वानाः सिंहनादान्प्रचुक्रुशुः ॥ ३७
ततो हतमभिप्रेक्ष्य मद्रराजबलं महत् ।
मद्रराजं च समरे दृष्ट्वा शूरं निपातितम् ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ३८
वध्यमानं महाराज पाण्डवैर्जितकाशिभिः ।
दिशो भेजेऽथ संभ्रान्तं त्रासितं दृढधन्विभिः ॥३९

इति श्रीमहाभारते शल्यपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

संजय उवाच ।

पातिते युधि दुर्धर्षे मद्रराजे महारथे ।
तावकास्तव पुत्राश्च प्रायशो विमुखाभवन् ॥ १
वणिजो नावि भिन्नायां यथागाधेऽप्लवेऽर्णवे ।
अपारे पारमिच्छन्तो हते शूरे महात्मनि ॥ २
मद्रराजे महाराज वित्रस्ताः शरविक्षताः ।
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव ॥ ३
वृषा यथा भग्नशृङ्गाः शीर्णदन्ता गजा इव ।
मध्याह्ने प्रत्यपायाम निर्जिता धर्मसूनुना ॥ ४

न संधातुमनीकानि न च राजन्पराक्रमे ।
आसीद्बुद्धिर्हते शल्ये तव योधस्य कस्यचित् ॥ ५
भीष्मे द्रोणे च निहते सूतपुत्रे च भारत ।
यद्दुःखं तव योधानां भयं चासीद्विशां पते ।
तद्भयं स च नः शोको भूय एवाभ्यवर्तत ॥ ६
निराशाश्च जये तस्मिन्हते शल्ये महारथे ।
हतप्रवीरा विध्वस्ता विकृत्ताश्च शितैः शरैः ।
मद्रराजे हते राजन्योधास्ते प्राद्रवन्भयात् ॥ ७
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ।
आरुह्य जवसंपन्नाः पादाताः प्राद्रवन्भयात् ॥ ८
द्विसाहस्राश्च मातङ्गा गिरिरूपाः प्रहारिणः ।
संप्राद्रवन्हते शल्ये अङ्कुशाङ्गुष्ठचोदिताः ॥ ९
ते रणाद्भरतश्रेष्ठ तावकाः प्राद्रवन्दिशः ।
धावन्तश्चाप्यदृश्यन्त श्वसमानाः शरातुराः ॥ १०
तान्प्रभग्नान्द्रुतान्दृष्ट्वा हतोत्साहान्पराजितान् ।
अभ्यद्रवन्त पाञ्चालाः पाण्डवाश्च जयैषिणः ॥ ११
बाणशब्दरवश्चापि सिंहनादश्च पुष्कलः ।
शङ्खशब्दश्च शूराणां दारुणः समपद्यत ॥ १२
दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्रविद्रुतम् ।
अन्योन्यं समभाषन्त पाञ्चालाः पाण्डवैः सह ॥१३
अद्य राजा सत्यधृतिर्जितामित्रो युधिष्ठिरः ।
अद्य दुर्योधनो हीनो दीप्तया नृपतिश्रिया ॥ १४
अद्य श्रुत्वा हतं पुत्रं धृतराष्ट्रो जनेश्वरः ।
निःसंज्ञः पतितो भूमौ किल्बिषं प्रतिपद्यताम् ॥१५
अद्य जानातु कौन्तेयं समर्थं सर्वधन्विनाम् ।
अद्यात्मानं च दुर्मेधा गर्हयिष्यति पापकृत् ।
अद्य क्षत्तुर्वचः सत्यं स्मरतां ब्रुवतो हितम् ॥ १६
अद्यप्रभृति पार्थांश्च प्रेष्यभूत उपाचरन् ।
विजानातु नृपो दुःखं यत्प्राप्तं पाण्डुनन्दनैः ॥ १७
अद्य कृष्णस्य माहात्म्यं जानातु स महीपतिः ।
अद्यार्जुनधनुर्घोषं घोरं जानातु संयुगे ॥ १८
अस्त्राणां च बलं सर्वं बाह्वोश्च बलमाहवे ।
अद्य ज्ञास्यति भीमस्य बलं घोरं महात्मनः ॥ १९
हते दुर्योधने युद्धे शक्रेणेवासुरे मये ।
यत्कृतं भीमसेनेन दुःशासनवधे तदा ।
नान्यः कर्तास्ति लोके तद्दृते भीमं महाबलम् ॥२०
जानीतामद्य ज्येष्ठस्य पाण्डवस्य पराक्रमम् ।
मद्रराजं हतं श्रुत्वा देवैरपि सुदुःसहम् ॥ २१
अद्य ज्ञास्यति संग्रामे माद्रीपुत्रौ महाबलौ ।
निहते सौबले शूरे गान्धारेषु च सर्वशः ॥ २२
कथं तेषां जयो न स्याद्येषां योद्धा धनंजयः ।
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ॥ २३
द्रौपद्यास्तनयाः पञ्च माद्रीपुत्रौ च पाण्डवौ ।
शिखण्डी च महेष्वासो राजा चैव युधिष्ठिरः ॥२४
येषां च जगतां नाथो नाथः कृष्णो जनार्दनः ।
कथं तेषां जयो न स्याद्येषां धर्मो व्यपाश्रयः ॥२५
भीष्मं द्रोणं च कर्णं च मद्रराजानमेव च ।
तथान्यान्नृपतीन्वीराञ्शतशोऽथ सहस्रशः ॥ २६
कोऽन्यः शक्तो रणे जेतुमृते पार्थं युधिष्ठिरम् ।
यस्य नाथो हृषीकेशः सदा धर्मयशोनिधिः ॥ २७
इत्येवं वदमानास्ते हर्षेण महता युताः ।
प्रभग्नांस्तावकान्राजन्सृञ्जयाः पृष्ठतोऽन्वयुः २८
धनंजयो रथानीकमभ्यवर्तत वीर्यवान् ।
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महारथः ॥ २९
तान्प्रेक्ष्य द्रवतः सर्वान्भीमसेनभयार्दितान् ।
दुर्योधनस्तदा सूतमब्रवीदुत्स्मयन्निव ॥ ३०
न मातिक्रमते पार्थो धनुष्पाणिमवस्थितम् ।
जघने सर्वसैन्यानां ममाश्वान्प्रतिपादय ॥ ३१
जघने युध्यमानं हि कौन्तेयो मां धनंजयः ।
नोत्सहेताभ्यतिक्रान्तुं वेलामिव महोदधिः ॥ ३२

पश्य सैन्यं महत्सूत पाण्डवैः समभिद्रुतम् ।
सैन्यरेणुं समुद्भूतं पश्यस्वैनं समन्ततः ॥ ३३
सिंहनादांश्च बहुशः शृणु घोरान्भयानकान् ।
तस्माद्याहि शनैः सूत जघनं परिपालय ॥ ३४
मयि स्थिते च समरे निरुद्धेषु च पाण्डुषु ।
पुनरावर्तते तूर्णं मामकं बलमोजसा ॥ ३५
तच्छ्रुत्वा तव पुत्रस्य शूराग्र्यसदृशं वचः ।
सारथिर्हेमसंछन्नाञ्शनैरश्वानचोदयत् ॥ ३६
गजाश्वरथिभिर्हीनास्त्यक्तात्मानः पदातयः ।
एकविंशतिसाहस्राः संयुगायावतस्थिरे ॥ ३७
नानादेशसमुद्भूता नानारञ्जितवाससः ।
अवस्थितास्तदा योधाः प्रार्थयन्तो महद्यशः ॥ ३८
तेषामापततां तत्र संहृष्टानां परस्परम् ।
संमर्दः सुमहाञ्जज्ञे घोररूपो भयानकः ॥ ३९
भीमसेनं तदा राजन्धृष्टद्युम्नं च पार्षतम् ।
बलेन चतुरङ्गेण नानादेश्या न्यवारयन् ॥ ४०
भीममेवाभ्यवर्तन्त रणेऽन्ये तु पदातयः ।
प्रक्ष्वेड्यास्फोट्य संहृष्टा वीरलोकं यियासवः ॥४१
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ।
धार्तराष्ट्रा विनेदुर्हि नान्यां चाकथयन्कथाम् ।
परिवार्य रणे भीमं निजघ्नुस्ते समन्ततः ॥ ४२
स वध्यमानः समरे पदातिगणसंवृतः ।
न चचाल रथोपस्थे मैनाक इव पर्वतः ॥ ४३
ते तु क्रुद्धा महाराज पाण्डवस्य महारथम् ।
निग्रहीतुं प्रचक्रुर्हि योधांश्चान्यानवारयन् ४४
अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं पदातिः समवस्थितः ॥ ४५
जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्योधान्दण्डपाणिरिवान्तकः ॥ ४६
रथाश्वद्विपहीनांस्तु तान्भीमो गदया बली ।
एकविंशतिसाहस्रान्पदातीनवपोथयत् ॥ ४७
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य नचिरात्प्रत्यदृश्यत ॥ ४८
पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः ।
संभग्ना इव वातेन कर्णिकाराः सुपुष्पिताः ॥ ४९
नानापुष्पस्रजोपेता नानाकुण्डलधारिणः ।
नानाजात्या हतास्तत्र नानादेशसमागताः ॥ ५०
पताकाध्वजसंछन्नं पदातीनां महद्बलम् ।
निकृत्तं विबभौ तत्र घोररूपं भयानकम् ॥ ५१
युधिष्ठिरपुरोगास्तु सर्वसैन्यमहारथाः ।
अभ्यधावन्महात्मानं पुत्रं दुर्योधनं तव ॥ ५२
ते सर्वे तावकान्दृष्ट्वा महेष्वासान्पराङ्मुखान् ।
नाभ्यवर्तन्त ते पुत्रं वेलेव मकरालयम् ॥ ५३
तदद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेकं सहिताः पार्था न शेकुरतिवर्तितुम् ॥ ५४
नातिदूरापयातं तु कृतबुद्धिं पलायने ।
दुर्योधनः स्वकं सैन्यमब्रवीद्भृशविक्षतम् ॥ ५५
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु वा ।
यत्र यातान्न वो हन्युः पाण्डवाः किं सृतेन वः ॥ ५६
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ।
यदि सर्वेऽत्र तिष्ठामो ध्रुवो नो विजयो भवेत् ॥५७
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतकिल्बिषान् ।
अनुसृत्य हनिष्यन्ति श्रेयो नः समरे स्थितम् ॥५८
शृणुध्वं क्षत्रियाः सर्वे यावन्तः स्थ समागताः ।
यदा शूरं च भीरुं च मारयत्यन्तकः सदा ।
को नु मूढो न युध्येत पुरुषः क्षत्रियब्रुवः ॥ ५९
श्रेयो नो भीमसेनस्य क्रुद्धस्य प्रमुखे स्थितम् ।
सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ।
जित्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम् ॥ ६०
न युद्धधर्माच्छ्रेयान्हि पन्थाः स्वर्गस्य कौरवाः ।

अचिरेण जिताँल्लोकान्हतो युद्धे समश्नुते ॥ ६१
श्रुत्वा तु वचनं तस्य पूजयित्वा च पार्थिवाः ।
पुनरेवान्ववर्तन्त पाण्डवानाततायिनः ॥ ६२
तानापतत एवाशु व्यूढानीकाः प्रहारिणः ।
प्रत्युद्ययुस्तदा पार्था जयगृध्राः प्रहारिणः ॥ ६३
धनंजयो रथेनाजावभ्यवर्तत वीर्यवान् ।
विश्रुतं त्रिषु लोकेषु गाण्डीवं विक्षिपन्धनुः ॥ ६४
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन्हृष्टा यतो वै तावकं बलम् ॥ ६५

इति श्रीमहाभारते शल्यपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

संजय उवाच ।

संनिवृत्ते बलौघे तु शाल्वो म्लेच्छगणाधिपः ।
अभ्यवर्तत संक्रुद्धः पाण्डूनां सुमहद्बलम् ॥ १
आस्थाय सुमहानागं प्रभिन्नं पर्वतोपमम् ।
दृप्तमैरावतप्रख्यममित्रगणमर्दनम् ॥ २
योऽसौ महाभद्रकुलप्रसूतः
सुपूजितो धार्तराष्ट्रेण नित्यम् ।
सुकल्पितः शास्त्रविनिश्चयज्ञैः
सदोपवाह्यः समरेषु राजन् ॥ ३
तमास्थितो राजवरो बभूव
यथोदयस्थः सविता क्षपान्ते ।
स तेन नागप्रवरेण राज-
न्नभ्युद्ययौ पाण्डुसुतान्समन्तात् ।
शितैः पृषत्कैर्विददार चापि
महेन्द्रवज्रप्रतिमैः सुघोरैः ॥ ४
ततः शरान्वै सृजतो महारणे
योधांश्च राजन्नयतो यमाय ।
नास्यान्तरं ददृशुः स्वे परे वा
यथा पुरा वज्रधरस्य दैत्याः ॥ ५
ते पाण्डवाः सोमकाः सृञ्जयाश्च
तमेव नागं ददृशुः समन्तात् ।
सहस्रशो वै विचरन्तमेकं
यथा महेन्द्रस्य गजं समीपे ॥ ६
संद्राव्यमाणं तु बलं परेषां
परीतकल्पं विबभौ समन्तात् ।
नैवावतस्थे समरे भृशं भया-
द्विमर्दमानं तु परस्परं तदा ॥ ७
ततः प्रभग्ना सहसा महाचमूः
सा पाण्डवी तेन नराधिपेन ।
दिशश्चतस्रः सहसा प्रधाविता
गजेन्द्रवेगं तमपारयन्ती ॥ ८
दृष्ट्वा च तां वेगवता प्रभग्नां
सर्वे त्वदीया युधि योधमुख्याः ।
अपूजयंस्तत्र नराधिपं तं
दध्मुश्च शङ्खाञ्शशिसंनिकाशान् ॥ ९
श्रुत्वा निनादं त्वथ कौरवाणां
हर्षाद्विमुक्तं सह शङ्खशब्दैः ।
सेनापतिः पाण्डवसृञ्जयानां
पाञ्चालपुत्रो न ममर्ष रोषात् ॥ १०
ततस्तु तं वै द्विरदं महात्मा
प्रत्युद्ययौ त्वरमाणो जयाय ।
जम्भो यथा शक्रसमागमे वै
नागेन्द्रमैरावणमिन्द्रवाह्यम् ॥ ११
तमापतन्तं सहसा तु दृष्ट्वा
पाञ्चालराजं युधि राजसिंहः ।
तं वै द्विपं प्रेषयामास तूर्णं
वधाय राजन्द्रुपदात्मजस्य ॥ १२
स तं द्विपं सहसाभ्यापतन्त-

मविध्यदर्कप्रतिमैः पृषत्कैः ।
कर्मारधौतैर्निशितैर्ज्वलद्भि-
र्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ॥ १३
ततोऽपरान्पञ्च शितान्महात्मा
नाराचमुख्यान्विससर्ज कुम्भे ।
स तैस्तु विद्धः परमद्विपो रणे
तदा परावृत्य भृशं प्रदुद्रुवे ॥ १४
तं नागराजं सहसा प्रणुन्नं
विद्राव्यमाणं च निगृह्य शाल्वः ।
तीव्राङ्कुशैः प्रेषयामास तूर्णं
पाञ्चालराजस्य रथं प्रदिश्य ॥ १५
दृष्ट्वापतन्तं सहसा तु नागं
धृष्टद्युम्नः स्वरथाच्छीघ्रमेव ।
गदां प्रगृह्याशु जवेन वीरो
भूमिं प्रपन्नो भयविह्वलाङ्गः ॥ १६
स तं रथं हेमविभूषिताङ्गं
साश्वं ससूतं सहसा विमृद्य ।
उत्क्षिप्य हस्तेन तदा महाद्विपो
विपोथयामास वसुंधरातले ॥ १७
पाञ्चालराजस्य सुतं स दृष्ट्वा
तदार्दितं नागवरेण तेन ।
तमभ्यधावत्सहसा जवेन
भीमः शिखण्डी च शिनेश्च नप्ता ॥ १८
शरैश्च वेगं सहसा निगृह्य
तस्याभितोऽभ्यापततो गजस्य ।
स संगृहीतो रथिभिर्गजो वै
चचाल तैर्वार्यमाणश्च संख्ये ॥ १९
ततः पृषत्कान्प्रववर्ष राजा
सूर्यो यथा रश्मिजालं समन्तात् ।
तेनाशुगैर्वध्यमाना रथौघाः
प्रदुद्रुवुस्तत्र ततस्तु सर्वे ॥ २०
तत्कर्म शाल्वस्य समीक्ष्य सर्वे
पाञ्चालमत्स्या नृप सृञ्जयाश्च ।
हाहाकारैर्नादयन्तः स युद्धे
द्विपं समन्ताद्रुरुधुर्नराग्र्याः ॥ २१
पाञ्चालराजस्त्वरितस्तु शूरो
गदां प्रगृह्याचलशृङ्गकल्पाम् ।
असंभ्रमं भारत शत्रुघाती
जवेन वीरोऽनुससार नागम् ॥ २२
ततोऽथ नागं धरणीधराभं
मदं स्रवन्तं जलदप्रकाशम् ।
गदां समाविध्य भृशं जघान
पाञ्चालराजस्य सुतस्तरस्वी ॥ २३
स भिन्नकुम्भः सहसा विनद्य
मुखात्प्रभूतं क्षतजं विमुञ्चन् ।
पपात नागो धरणीधराभः
क्षितिप्रकम्पाच्चलितो यथाद्रिः ॥ २४
निपात्यमाने तु तदा गजेन्द्रे
हाहाकृते तव पुत्रस्य सैन्ये ।
स शाल्वराजस्य शिनिप्रवीरो
जहार भल्लेन शिरः शितेन ॥ २५
हृतोत्तमाङ्गो युधि सात्वतेन
पपात भूमौ सह नागराज्ञा ।
यथाद्रिशृङ्गं सुमहत्प्रणुन्नं
वज्रेण देवाधिपचोदितेन ॥ २६

इति श्रीमहाभारते शल्यपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

संजय उवाच ।

तस्मिंस्तु निहते शूरे शाल्वे समितिशोभने ।

तवाभज्यद्बलं वेगाद्वातेनेव महाद्रुमः ॥ १
तत्प्रभग्नं बलं दृष्ट्वा कृतवर्मा महारथः ।
दधार समरे शूरः शत्रुसैन्यं महाबलः ॥ २
संनिवृत्तास्तु ते शूरा दृष्ट्वा सात्वतमाहवे ।
शैलोपमं स्थितं राजन्कीर्यमाणं शरैर्युधि ॥ ३
ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह ।
निवृत्तानां महाराज मृत्युं कृत्वा निवर्तनम् ॥ ४
तत्राश्चर्यमभूद्युद्धं सात्वतस्य परैः सह ।
यदेको वारयामास पाण्डुसेनां दुरासदाम् ॥ ५
तेषामन्योन्यसुहृदां कृते कर्मणि दुष्करे ।
सिंहनादः प्रहृष्टानां दिवःस्पृक्सुमहानभूत् ॥ ६
तेन शब्देन वित्रस्तान्पाञ्चालान्भरतर्षभ ।
शिनेर्नप्ता महाबाहुरन्वपद्यत सात्यकिः ॥ ७
स समासाद्य राजानं क्षेमधूर्तिं महाबलम् ।
सप्तभिर्निशितैर्बाणैरनयद्यमसादनम् ॥ ८
तमायान्तं महाबाहुं प्रवपन्तं शिताञ्शरान् ।
जवेनाभ्यपतद्धीमान्हार्दिक्यः शिनिपुंगवम् ॥ ९
तौ सिंहाविव नर्दन्तौ धन्विनौ रथिनां वरौ ।
अन्योन्यमभ्यधावेतां शस्त्रप्रवरधारिणौ ॥ १०
पाण्डवाः सह पाञ्चालैर्योधाश्चान्ये नृपोत्तमाः ।
प्रेक्षकाः समपद्यन्त तयोः पुरुषसिंहयोः ॥ ११
नाराचैर्वत्सदन्तैश्च वृष्ण्यन्धकमहारथौ ।
अभिजघ्नतुरन्योन्यं प्रहृष्टाविव कुञ्जरौ ॥ १२
चरन्तौ विविधान्मार्गान्हार्दिक्यशिनिपुंगवौ ।
मुहुरन्तर्दधाते तौ बाणवृष्ट्या परस्परम् ॥ १३
चापवेगबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः ।
आकाशे समपश्याम पतंगानिव शीघ्रगान् ॥ १४
तमेकं सत्यकर्माणमासाद्य हृदिकात्मजः ।
अविध्यन्निशितैर्बाणैश्चतुर्भिश्चतुरो हयान् ॥ १५
स दीर्घबाहुः संक्रुद्धस्तोत्रार्दित इव द्विपः ।
अष्टाभिः कृतवर्माणमविध्यत्परमेषुभिः ॥ १६
ततः पूर्णायतोत्सृष्टैः कृतवर्मा शिलाशितैः ।
सात्यकिं त्रिभिराहत्य धनुरेकेन चिच्छिदे ॥ १७
निकृत्तं तद्धनुःश्रेष्ठमपास्य शिनिपुंगवः ।
अन्यदादत्त वेगेन शैनेयः सशरं धनुः ॥ १८
तदादाय धनुःश्रेष्ठं वरिष्ठः सर्वधन्विनाम् ।
आरोप्य च महावीर्यो महाबुद्धिर्महाबलः ॥ १९
अमृष्यमाणो धनुषश्छेदनं कृतवर्मणा ।
कुपितोऽतिरथः शीघ्रं कृतवर्माणमभ्ययात् ॥ २०
ततः सुनिशितैर्बाणैर्दशभिः शिनिपुंगवः ।
जघान सूतमश्वांश्च ध्वजं च कृतवर्मणः ॥ २१
ततो राजन्महेष्वासः कृतवर्मा महारथः ।
हताश्वसूतं संप्रेक्ष्य रथं हेमपरिष्कृतम् ॥ २२
रोषेण महताविष्टः शूलमुद्यम्य मारिष ।
चिक्षेप भुजवेगेन जिघांसुः शिनिपुंगवम् ॥ २३
तच्छूलं सात्वतो ह्याजौ निर्भिद्य निशितैः शरैः ।
चूर्णितं पातयामास मोहयन्निव माधवम् ।
ततोऽपरेण भल्लेन हृद्येनं समताडयत् ॥ २४
स युद्धे युयुधानेन हताश्वो हतसारथिः ।
कृतवर्मा कृतास्त्रेण धरणीमन्वपद्यत ॥ २५
तस्मिन्सात्यकिना वीरे द्वैरथे विरथीकृते ।
समपद्यत सर्वेषां सैन्यानां सुमहद्भयम् ॥ २६
पुत्रस्य तव चात्यर्थं विषादः समपद्यत ।
हतसूते हताश्वे च विरथे कृतवर्मणि ॥ २७
हताश्वं च समालक्ष्य हतसूतमरिंदमम् ।
अभ्यधावत्कृपो राजञ्जिघांसुः शिनिपुंगवम् ॥ २८
तमारोप्य रथोपस्थे मिषतां सर्वधन्विनाम् ।
अपोवाह महाबाहुस्तूर्णमायोधनादपि ॥ २९
शैनेयेऽधिष्ठिते राजन्विरथे कृतवर्मणि ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ३०

तत्परे नावबुध्यन्त सैन्येन रजसावृते ।
तावकाः प्रद्रुता राजन्दुर्योधनमृते नृपम् ॥ ३१
दुर्योधनस्तु संप्रेक्ष्य भग्नं स्वबलमन्तिकात् ।
जवेनाभ्यपतत्तूर्णं सर्वांश्चैको न्यवारयत् ॥ ३२
पाण्डूंश्च सर्वान्संक्रुद्धो धृष्टद्युम्नं च पार्षतम् ।
शिखण्डिनं द्रौपदेयान्पाञ्चालानां च ये गणाः ॥३३
केकयान्सोमकांश्चैव पाञ्चालांश्चैव मारिष ।
असंभ्रमं दुराधर्षः शितैरस्त्रैरवारयत् ॥ ३४
अतिष्ठदाहवे यत्तः पुत्रस्तव महाबलः ।
यथा यज्ञे महानग्निर्मन्त्रपूतः प्रकाशयन् ॥ ३५
तं परे नाभ्यवर्तन्त मर्त्या मृत्युमिवाहवे ।
अथान्यं रथमास्थाय हार्दिक्यः समपद्यत ॥ ३६

इति श्रीमहाभारते शल्यपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

संजय उवाच ।

पुत्रस्तु ते महाराज रथस्थो रथिनां वरः ।
दुरुत्सहो बभौ युद्धे यथा रुद्रः प्रतापवान् ॥ १
तस्य बाणसहस्रैस्तु प्रच्छन्ना ह्यभवन्मही ।
परांश्च सिषिचे बाणैर्धाराभिरिव पर्वतान् ॥ २
न च सोऽस्ति पुमान्कश्चित्पाण्डवानां महाहवे ।
हयो गजो रथो वापि योऽस्य बाणैरविक्षतः ॥ ३
यं यं हि समरे योधं प्रपश्यामि विशां पते ।
स स बाणैश्चितोऽभूद्वै पुत्रेण तव भारत ॥ ४
यथा सैन्येन रजसा समुद्धूतेन वाहिनी ।
प्रत्यदृश्यत संछन्ना तथा बाणैर्महात्मनः ॥ ५
बाणभूतामपश्याम पृथिवीं पृथिवीपते ।
दुर्योधनेन प्रकृतां क्षिप्रहस्तेन धन्विना ॥ ६
तेषु योधसहस्रेषु तावकेषु परेषु च ।
एको दुर्योधनो ह्यासीत्पुमानिति मतिर्मम ॥ ७
तत्राद्भुतमपश्याम तव पुत्रस्य विक्रमम् ।
यदेकं सहिताः पार्था नात्यवर्तन्त भारत ॥ ८
युधिष्ठिरं शतेनाजौ विव्याध भरतर्षभ ।
भीमसेनं च सप्तत्या सहदेवं च सप्तभिः ॥ ९
नकुलं च चतुःषष्ट्या धृष्टद्युम्नं च पञ्चभिः ।
सप्तभिर्द्रौपदेयांश्च त्रिभिर्विव्याध सात्यकिम् ।
धनुश्चिच्छेद भल्लेन सहदेवस्य मारिष ॥ १०
तदपास्य धनुश्छिन्नं माद्रीपुत्रः प्रतापवान् ।
अभ्यधावत राजानं प्रगृह्यान्यन्महद्धनुः ।
ततो दुर्योधनं संख्ये विव्याध दशभिः शरैः ॥ ११
नकुलश्च ततो वीरो राजानं नवभिः शरैः ।
घोररूपैर्महेष्वासो विव्याध च ननाद च ॥ १२
सात्यकिश्चापि राजानं शरेणानतपर्वणा ।
द्रौपदेयास्त्रिसप्तत्या धर्मराजश्च सप्तभिः ।
अशीत्या भीमसेनश्च शरै राजानमार्दयत् ॥ १३
समन्तात्कीर्यमाणस्तु बाणसंघैर्महात्मभिः ।
न चचाल महाराज सर्वसैन्यस्य पश्यतः ॥ १४
लाघवं सौष्ठवं चापि वीर्यं चैव महात्मनः ।
अति सर्वाणि भूतानि ददृशुः सर्वमानवाः ॥ १५
धार्तराष्ट्रास्तु राजेन्द्र यात्वा तु स्वल्पमन्तरम् ।
अपश्यमाना राजानं पर्यवर्तन्त दंशिताः ॥ १६
तेषामापततां घोरस्तुमुलः समजायत ।
क्षुब्धस्य हि समुद्रस्य प्रावृट्काले यथा निशि ॥ १७
समासाद्य रणे ते तु राजानमपराजितम् ।
प्रत्युद्ययुर्महेष्वासाः पाण्डवानाततायिनः ॥ १८
भीमसेनं रणे क्रुद्धं द्रोणपुत्रो न्यवारयत् ।
ततो बाणैर्महाराज प्रमुक्तैः सर्वतोदिशम् ।
नाज्ञायन्त रणे वीरा न दिशः प्रदिशस्तथा ॥ १९
तावुभौ क्रूरकर्माणावुभौ भारत दुःसहौ ।
घोररूपमयुध्येतां कृतप्रतिकृतैषिणौ ।

त्रासयन्तौ जगत्सर्वं ज्याक्षेपविहतत्वचौ ॥ २०
शकुनिस्तु रणे वीरो युधिष्ठिरमपीडयत् ।
तस्याश्वांश्चतुरो हत्वा सुबलस्य सुतो विभुः ।
नादं चकार बलवान्सर्वसैन्यानि कम्पयन् ॥ २१
एतस्मिन्नन्तरे वीरं राजानमपराजितम् ।
अपोवाह रथेनाजौ सहदेवः प्रतापवान् ॥ २२
अथान्यं रथमास्थाय धर्मराजो युधिष्ठिरः ।
शकुनिं नवभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः ।
ननाद च महानादं प्रवरः सर्वधन्विनाम् ॥ २३
तद्युद्धमभवच्चित्रं घोररूपं च मारिष ।
ईक्षितृप्रीतिजननं सिद्धचारणसेवितम् ॥ २४
उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदम् ।
अभ्यद्रवदमेयात्मा शरवर्षैः समन्ततः ॥ २५
तथैव नकुलः शूरः सौबलस्य सुतं रणे ।
शरवर्षेण महता समन्तात्पर्यवारयत् ॥ २६
तौ तत्र समरे वीरौ कुलपुत्रौ महारथौ ।
योधयन्तावपश्येतां परस्परकृतागसौ ॥ २७
तथैव कृतवर्मा तु शैनेयं शत्रुतापनम् ।
योधयञ्शुशुभे राजन्बलं शक्र इवाहवे ॥ २८
दुर्योधनो धनुश्छित्त्वा धृष्टद्युम्नस्य संयुगे ।
अथैनं छिन्नधन्वानं विव्याध निशितैः शरैः ॥ २९
धृष्टद्युम्नोऽपि समरे प्रगृह्य परमायुधम् ।
राजानं योधयामास पश्यतां सर्वधन्विनाम् ॥ ३०
तयोर्युद्धं महच्चासीत्संग्रामे भरतर्षभ ।
प्रभिन्नयोर्यथा सक्तं मत्तयोर्वरहस्तिनोः ॥ ३१
गौतमस्तु रणे क्रुद्धो द्रौपदेयान्महाबलान् ।
विव्याध बहुभिः शूरः शरैः संनतपर्वभिः ॥ ३२
तस्य तैरभवद्युद्धमिन्द्रियैरिव देहिनः ।
घोररूपमसंवार्यं निर्मर्यादमतीव च ॥ ३३
ते च तं पीडयामासुरिन्द्रियाणीव बालिशम् ।
स च तान्प्रतिसंरब्धः प्रत्ययोधयदाहवे ॥ ३४
एवं चित्रमभूद्युद्धं तस्य तैः सह भारत ।
उत्थायोत्थाय हि यथा देहिनामिन्द्रियैर्विभो ॥ ३५
नराश्चैव नरैः सार्धं दन्तिनो दन्तिभिस्तथा ।
हया हयैः समासक्ता रथिनो रथिभिस्तथा ।
संकुलं चाभवद्भूयो घोररूपं विशां पते ॥ ३६
इदं चित्रमिदं घोरमिदं रौद्रमिति प्रभो ।
युद्धान्यासन्महाराज घोराणि च बहूनि च ॥ ३७
ते समासाद्य समरे परस्परमरिंदमाः ।
विव्यधुश्चैव जघ्नुश्च समासाद्य महाहवे ॥ ३८
तेषां शस्त्रसमुद्भूतं रजस्तीव्रमदृश्यत ।
प्रवातेनोद्धतं राजन्धावद्भिश्चाश्वसादिभिः ॥ ३९
रथनेमिसमुद्धूतं निःश्वासैश्चापि दन्तिनाम् ।
रजः संध्याभ्रकपिलं दिवाकरपथं ययौ ॥ ४०
रजसा तेन संपृक्ते भास्करे निष्प्रभीकृते ।
संछादिताभवद्भूमिस्ते च शूरा महारथाः ॥ ४१
मुहूर्तादिव संवृत्तं नीरजस्कं समन्ततः ।
वीरशोणितसिक्तायां भूमौ भरतसत्तम ।
उपाशाम्यत्ततस्तीव्रं तद्रजो घोरदर्शनम् ॥ ४२
ततोऽपश्यं महाराज द्वंद्वयुद्धानि भारत ।
यथाप्राग्र्यं यथाज्येष्ठं मध्याह्ने वै सुदारुणे ।
वर्मणां तत्र राजेन्द्र व्यदृश्यन्तोज्ज्वलाः प्रभाः ॥४३
शब्दः सुतुमुलः संख्ये शराणां पतताभूत् ।
महावेणुवनस्येव दह्यमानस्य सर्वतः ॥ ४४

इति श्रीमहाभारते शल्यपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

संजय उवाच ।

वर्तमाने तथा युद्धे घोररूपे भयानके ।
अभज्यत बलं तत्र तव पुत्रस्य पाण्डवैः ॥ १

तांस्तु यत्नेन महता संनिवार्य महारथान् ।
पुत्रस्ते योधयामास पाण्डवानामनीकिनीम् ॥ २
निवृत्ताः सहसा योधास्तव पुत्रप्रियैषिणः ।
संनिवृत्तेषु तेष्वेवं युद्धमासीत्सुदारुणम् ॥ ३
तावकानां परेषां च देवासुररणोपमम् ।
परेषां तव सैन्ये च नासीत्कश्चित्पराङ्मुखः ॥ ४
अनुमानेन युध्यन्ते संज्ञाभिश्च परस्परम् ।
तेषां क्षयो महानासीद्युध्यतामितरेतरम् ॥ ५
ततो युधिष्ठिरो राजा क्रोधेन महता युतः ।
जिगीषमाणः संग्रामे धार्तराष्ट्रान्सराजकान् ॥ ६
त्रिभिः शारद्वतं विद्ध्वा रुक्मपुङ्खैः शिलाशितैः ।
चतुर्भिर्निजघानाश्वान्कल्याणान्कृतवर्मणः ॥ ७
अश्वत्थामा तु हार्दिक्यमपोवाह यशस्विनम् ।
अथ शारद्वतोऽष्टाभिः प्रत्यविध्यद्युधिष्ठिरम् ॥ ८
ततो दुर्योधनो राजा रथान्सप्तशतान्रणे ।
प्रेषयद्यत्र राजासौ धर्मपुत्रो युधिष्ठिरः ॥ ९
ते रथा रथिभिर्युक्ता मनोमारुतरंहसः ।
अभ्यद्रवन्त संग्रामे कौन्तेयस्य रथं प्रति ॥ १०
ते समन्तान्महाराज परिवार्य युधिष्ठिरम् ।
अदृश्यं सायकैश्चक्रुर्मेघा इव दिवाकरम् ॥ ११
नामृष्यन्त सुसंरब्धाः शिखण्डिप्रमुखा रथाः ।
रथैरग्र्यजवैर्युक्तैः किङ्किणीजालसंवृतैः ।
आजग्मुरभिरक्षन्तः कुन्तीपुत्रं युधिष्ठिरम् ॥ १२
ततः प्रववृते रौद्रः संग्रामः शोणितोदकः ।
पाण्डवानां कुरूणां च यमराष्ट्रविवर्धनः ॥ १३
रथान्सप्तशतान्हत्वा कुरूणामाततायिनाम् ।
पाण्डवाः सह पाञ्चालैः पुनरेवाभ्यवारयन् ॥ १४
तत्र युद्धं महच्चासीत्तव पुत्रस्य पाण्डवैः ।
न च नस्तादृशं दृष्टं नैव चापि परिश्रुतम् ॥ १५
वर्तमाने तथा युद्धे निर्मर्यादे समन्ततः ।
वध्यमानेषु योधेषु तावकेष्वितरेषु च ॥ १६
निनदत्सु च योधेषु शङ्खवर्यैश्च पूरितैः ।
उत्क्रुष्टैः सिंहनादैश्च गर्जितेन च धन्विनाम् ॥१७
अतिप्रवृद्धे युद्धे च छिद्यमानेषु मर्मसु ।
धावमानेषु योधेषु जयगृद्धिषु मारिष ॥ १८
संहारे सर्वतो जाते पृथिव्यां शोकसंभवे ।
बह्वीनामुत्तमस्त्रीणां सीमन्तोद्धरणे तथा ॥ १९
निर्मर्यादे तथा युद्धे वर्तमाने सुदारुणे ।
प्रादुरासन्विनाशाय तदोत्पाताः सुदारुणाः ।
चचाल शब्दं कुर्वाणा सपर्वतवना मही ॥ २०
सदण्डाः सोल्मुका राजञ्शीर्यमाणाः समन्ततः ।
उल्काः पेतुर्दिवो भूमावाहत्य रविमण्डलम् ॥ २१
विष्वग्वाताः प्रादुरासन्नीचैः शर्करवर्षिणः ।
अश्रूणि मुमुचुर्नागा वेपथुश्चास्पृशद्भृशम् ॥ २२
एतान्घोराननादृत्य समुत्पातान्सुदारुणान् ।
पुनर्युद्धाय संमन्त्र्य क्षत्रियास्तस्थुरव्यथाः ।
रमणीये कुरुक्षेत्रे पुण्ये स्वर्गं यियासवः ॥ २३
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ।
युध्यध्वमग्रतो यावत्पृष्ठतो हन्मि पाण्डवान् ॥ २४
ततो नः संप्रयातानां मद्रयोधास्तरस्विनः ।
हृष्टाः किलकिलाशब्दमकुर्वन्तापरे तथा ॥ २५
अस्मांस्तु पुनरासाद्य लब्धलक्षा दुरासदाः ।
शरासनानि धुन्वन्तः शरवर्षैरवाकिरन् ॥ २६
ततो हतं परैस्तत्र मद्रराजबलं तदा ।
दुर्योधनबलं दृष्ट्वा पुनरासीत्पराङ्मुखम् ॥ २७
गान्धारराजस्तु पुनर्वाक्यमाह ततो बली ।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः ॥ २८
अनीकं दशसाहस्रमश्वानां भरतर्षभ ।
आसीद्गान्धारराजस्य विमलप्रासयोधिनाम् ॥ २९
बलेन तेन विक्रम्य वर्तमाने जनक्षये ।

पृष्ठतः पाण्डवानीकमभ्यघ्नन्निशितैः शरैः ॥ ३०
तदभ्रमिव वातेन क्षिप्यमाणं समन्ततः ।
अभज्यत महाराज पाण्डूनां सुमहद्बलम् ॥ ३१
ततो युधिष्ठिरः प्रेक्ष्य भग्नं स्वबलमन्तिकात् ।
अभ्यचोदयदव्यग्रः सहदेवं महाबलम् ॥ ३२
असौ सुबलपुत्रो नो जघनं पीड्य दंशितः ।
सेनां निसूदयत्येष पश्य पाण्डव दुर्मतिम् ॥ ३३
गच्छ त्वं द्रौपदेयाश्च शकुनिं सौबलं जहि ।
रथानीकमहं रक्ष्ये पाञ्चालसहितोऽनघ ॥ ३४
गच्छन्तु कुञ्जराः सर्वे वाजिनश्च सह त्वया ।
पादाताश्च त्रिसाहस्राः शकुनिं सौबलं जहि ॥ ३५
ततो गजाः सप्तशताश्चापपाणिभिरास्थिताः ।
पञ्च चाश्वसहस्राणि सहदेवश्च वीर्यवान् ॥ ३६
पादाताश्च त्रिसाहस्रा द्रौपदेयाश्च सर्वशः ।
रणे ह्यभ्यद्रवंस्ते तु शकुनिं युद्धदुर्मदम् ॥ ३७
ततस्तु सौबलो राजन्नभ्यतिक्रम्य पाण्डवान् ।
जघान पृष्ठतः सेनां जयगृध्रः प्रतापवान् ॥ ३८
अश्वारोहास्तु संरब्धाः पाण्डवानां तरस्विनाम् ।
प्राविशन्सौबलानीकमभ्यतिक्रम्य तान्रथान् ॥ ३९
ते तत्र सादिनः शूराः सौबलस्य महद्बलम् ।
गजमध्येऽवतिष्ठन्तः शरवर्षैरवाकिरन् ॥ ४०
तदुद्यतगदाप्रासमकापुरुषसेवितम् ।
प्रावर्तत महद्युद्धं राजन्दुर्मन्त्रिते तव ॥ ४१
उपारमन्त ज्याशब्दाः प्रेक्षका रथिनोऽभवन् ।
न हि स्वेषां परेषां वा विशेषः प्रत्यदृश्यत ॥ ४२
शूरबाहुविसृष्टानां शक्तीनां भरतर्षभ ।
ज्योतिषामिव संपातमपश्यन्कुरुपाण्डवाः ॥ ४३
ऋष्टिभिर्विमलाभिश्च तत्र तत्र विशां पते ।
संपतन्तीभिराकाशमावृतं बह्वशोभत ॥ ४४
प्रासानां पततां राजन्रूपमासीत्समन्ततः ।
शलभानामिवाकाशे तदा भरतसत्तम ॥ ४५
रुधिरोक्षितसर्वाङ्गा विप्रविद्धैर्नियन्तृभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥ ४६
अन्योन्यपरिपिष्टाश्च समासाद्य परस्परम् ।
अविक्षताः स्म दृश्यन्ते वमन्तो रुधिरं मुखैः ॥ ४७
ततोऽभवत्तमो घोरं सैन्येन रजसा वृते ।
तानपाक्रमतोऽद्राक्षं तस्माद्देशादरिंदमान् ।
अश्वान्राजन्मनुष्यांश्च रजसा संवृते सति ॥ ४८
भूमौ निपतिताश्चान्ये वमन्तो रुधिरं बहु ।
केशाकेशिसमालग्ना न शेकुश्चेष्टितुं जनाः ॥ ४९
अन्योन्यमश्वपृष्ठेभ्यो विकर्षन्तो महाबलाः ।
मल्ला इव समासाद्य निजघ्नुरितरेतरम् ।
अश्वैश्च व्यपकृष्यन्त बहवोऽत्र गतासवः ॥ ५०
भूमौ निपतिताश्चान्ये बहवो विजयैषिणः ।
तत्र तत्र व्यदृश्यन्त पुरुषाः शूरमानिनः ॥ ५१
रक्तोक्षितैश्छिन्नभुजैरपकृष्टशिरोरुहैः ।
व्यदृश्यत मही कीर्णा शतशोऽथ सहस्रशः ॥ ५२
दूरं न शक्यं तत्रासीद्गन्तुमश्वेन केनचित् ।
साश्वारोहैर्हतैरश्वैरावृते वसुधातले ॥ ५३
रुधिरोक्षितसंनाहैरात्तशस्त्रैरुदायुधैः ।
नानाप्रहरणैर्घोरैः परस्परवधैषिभिः ।
सुसंनिकृष्टैः संग्रामे हतभूयिष्ठसैनिकैः ॥ ५४
स मुहूर्तं ततो युद्ध्वा सौबलोऽथ विशां पते ।
षट्सहस्रैर्हयैः शिष्टैरपायाच्छकुनिस्ततः ॥ ५५
तथैव पाण्डवानीकं रुधिरेण समुक्षितम् ।
षट्सहस्रैर्हयैः शिष्टैरपायाच्छ्रान्तवाहनम् ॥ ५६
अश्वारोहास्तु पाण्डूनामब्रुवन्रुधिरोक्षिताः ।
सुसंनिकृष्टाः संग्रामे भूयिष्ठं त्यक्तजीविताः ॥ ५७
नेह शक्यं रथैर्योद्धुं कुत एव महागजैः ।
रथानेव रथा यान्तु कुञ्जराः कुञ्जरानपि ॥ ५८

प्रतियातो हि शकुनिः स्वमनीकमवस्थितः ।
न पुनः सौबलो राजा युद्धमभ्यागमिष्यति ॥ ५९
ततस्तु द्रौपदेयाश्च ते च मत्ता महाद्विपाः ।
प्रययुर्यत्र पाञ्चाल्यो धृष्टद्युम्नो महारथः ॥ ६०
सहदेवोऽपि कौरव्य रजोमेघे समुत्थिते ।
एकाकी प्रययौ तत्र यत्र राजा युधिष्ठिरः ॥ ६१
ततस्तेषु प्रयातेषु शकुनिः सौबलः पुनः ।
पार्श्वतोऽभ्यहनत्क्रुद्धो धृष्टद्युम्नस्य वाहिनीम् ॥ ६२
तत्पुनस्तुमुलं युद्धं प्राणांस्त्यक्त्वाभ्यवर्तत ।
तावकानां परेषां च परस्परवधैषिणाम् ॥ ६३
ते ह्यन्योन्यमवेक्षन्त तस्मिन्वीरसमागमे ।
योधाः पर्यपतन्राजञ्शतशोऽथ सहस्रशः ॥ ६४
असिभिश्छिद्यमानानां शिरसां लोकसंक्षये ।
प्रादुरासीन्महाशब्दस्तालानां पततामिव ॥ ६५
विमुक्तानां शरीराणां भिन्नानां पततां भुवि ।
सायुधानां च बाहूनामूरूणां च विशां पते ।
आसीत्कटकटाशब्दः सुमहाँल्लोमहर्षणः ॥ ६६
निघ्नन्तो निशितैः शस्त्रैर्भ्रातॄन्पुत्रान्सखीनपि ।
योधाः परिपतन्ति स्म यथामिषकृते खगाः ६७
अन्योन्यं प्रतिसंरब्धाः समासाद्य परस्परम् ।
अहं पूर्वमहं पूर्वमिति न्यघ्नन्सहस्रशः ॥ ६८
संघातैरासनभ्रष्टैरश्वारोहैर्गतासुभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥ ६९
स्फुरतां प्रतिपिष्टानामश्वानां शीघ्रसारिणाम् ।
स्तनतां च मनुष्याणां संनद्धानां विशां पते ॥ ७०
शक्त्यृष्टिप्रासशब्दश्च तुमुलः समजायत ।
भिन्दतां परमर्माणि राजन्दुर्मन्त्रिते तव ॥ ७१
श्रमाभिभूताः संरब्धाः श्रान्तवाहाः पिपासिताः ।
विक्षताश्च शितैः शस्त्रैरभ्यवर्तन्त तावकाः ॥ ७२
मत्ता रुधिरगन्धेन बहवोऽत्र विचेतसः ।
जघ्नुः परान्स्वकांश्चैव प्राप्तान्प्राप्ताननन्तरान् ॥ ७३
बहवश्च गतप्राणाः क्षत्रिया जयगृद्धिनः ।
भूमावभ्यपतन्राजञ्शरवृष्टिभिरावृताः ॥ ७४
वृकगृध्रशृगालानां तुमुले मोदनेऽहनि ।
आसीद्बलक्षयो घोरस्तव पुत्रस्य पश्यतः ॥ ७५
नराश्वकायसंछन्ना भूमिरासीद्विशां पते ।
रुधिरोदकचित्रा च भीरूणां भयवर्धिनी ॥ ७६
असिभिः पट्टिशैः शूलैस्तक्षमाणाः पुनः पुनः ।
तावकाः पाण्डवाश्चैव नाभ्यवर्तन्त भारत ॥ ७७
प्रहरन्तो यथाशक्ति यावत्प्राणस्य धारणम् ।
योधाः परिपतन्ति स्म वमन्तो रुधिरं व्रणैः ॥ ७८
शिरो गृहीत्वा केशेषु कबन्धः समदृश्यत ।
उद्यम्य निशितं खड्गं रुधिरेण समुक्षितम् ॥ ७९
अथोत्थितेषु बहुषु कबन्धेषु जनाधिप ।
तथा रुधिरगन्धेन योधाः कश्मलमाविशन् ॥ ८०
मन्दीभूते ततः शब्दे पाण्डवानां महद्बलम् ।
अल्पावशिष्टैस्तुरगैरभ्यवर्तत सौबलः ॥ ८१
ततोऽभ्यधावंस्त्वरिताः पाण्डवा जयगृद्धिनः ।
पदातयश्च नागाश्च सादिनश्चोद्यतायुधाः ॥ ८२
कोष्टकीकृत्य चाप्येनं परिक्षिप्य च सर्वशः ।
शस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारं तितीर्षवः ॥ ८३
त्वदीयास्तांस्तु संप्रेक्ष्य सर्वतः समभिद्रुतान् ।
साश्वपत्तिद्विपरथाः पाण्डवानभिदुद्रुवुः ॥ ८४
केचित्पदातयः पद्भिर्मुष्टिभिश्च परस्परम् ।
निजघ्नुः समरे शूराः क्षीणशस्त्रास्ततोऽपतन् ॥ ८५
रथेभ्यो रथिनः पेतुर्द्विपेभ्यो हस्तिसादिनः ।
विमानेभ्य इव भ्रष्टाः सिद्धाः पुण्यक्षयाद्यथा ॥ ८६
एवमन्योन्यमायस्ता योधा जघ्नुर्महामृधे ।
पितॄन्भ्रातॄन्वयस्यांश्च पुत्रानपि तथापरे ॥ ८७
एवमासीदमर्यादं युद्धं भरतसत्तम ।

प्रासासिबाणकलिले वर्तमाने सुदारुणे ॥ ८८

इति श्रीमहाभारते शल्यपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

संजय उवाच ।

तस्मिञ्शब्दे मृदौ जाते पाण्डवैर्निहते बले ।
अश्वैः सप्तशतैः शिष्टैरुपावर्तत सौबलः ॥ १
स यात्वा वाहिनीं तूर्णमब्रवीत्त्वरयन्युधि ।
युध्यध्वमिति संहृष्टाः पुनः पुनररिंदमः ।
अपृच्छत्क्षत्रियांस्तत्र क नु राजा महारथः ॥ २
शकुनेस्तु वचः श्रुत्वा त ऊचुर्भरतर्षभ ।
असौ तिष्ठति कौरव्यो रणमध्ये महारथः ॥ ३
यत्रैतत्सुमहच्छत्रं पूर्णचन्द्रसमप्रभम् ।
यत्रैते सतलत्राणा रथास्तिष्ठन्ति दंशिताः ॥ ४
यत्रैष शब्दस्तुमुलः पर्जन्यनिनदोपमः ।
तत्र गच्छ द्रुतं राजंस्ततो द्रक्ष्यसि कौरवम् ॥ ५
एवमुक्तस्तु तैः शूरैः शकुनिः सौबलस्तदा ।
प्रययौ तत्र यत्रासौ पुत्रस्तव नराधिप ।
सर्वतः संवृतो वीरैः समरेष्वनिवर्तिभिः ॥ ६
ततो दुर्योधनं दृष्ट्वा रथानीके व्यवस्थितम् ।
सरथांस्तावकान्सर्वान्हर्षयञ्शकुनिस्ततः ॥ ७
दुर्योधनमिदं वाक्यं हृष्टरूपो विशां पते ।
कृतकार्यमिवात्मानं मन्यमानोऽब्रवीन्नृपम् ॥ ८
जहि राजन्रथानीकमश्वाः सर्वे जिता मया ।
नात्यक्त्वा जीवितं संख्ये शक्यो जेतुं युधिष्ठिरः ॥९
हते तस्मिन्रथानीके पाण्डवेनाभिपालिते ।
गजानेतान्हनिष्यामः पदातींश्चेतरांस्तथा ॥ १०
श्रुत्वा तु वचनं तस्य तावका जयगृद्धिनः ।
जवेनाभ्यपतन्हृष्टाः पाण्डवानामनीकिनीम् ॥ ११
सर्वे विवृततूणीराः प्रगृहीतशरासनाः ।
शरासनानि धुन्वानाः सिंहनादं प्रचक्रिरे ॥ १२
ततो ज्यातलनिर्घोषः पुनरासीद्विशां पते ।
प्रादुरासीच्छराणां च सुमुक्तानां सुदारुणः ॥ १३
तान्समीपगतान्दृष्ट्वा जवेनोद्यतकार्मुकान् ।
उवाच देवकीपुत्रं कुन्तीपुत्रो धनंजयः ॥ १४
चोदयाश्वानसंभ्रान्तः प्रविशैतद्बलार्णवम् ।
अन्तमद्य गमिष्यामि शत्रूणां निशितैः शरैः॥ १५
अष्टादश दिनान्यद्य युद्धस्यास्य जनार्दन ।
वर्तमानस्य महतः समासाद्य परस्परम् ॥ १६
अनन्तकल्पा ध्वजिनी भूत्वा ह्येषां महात्मनाम्।
क्षयमद्य गता युद्धे पश्य दैवं यथाविधम् ॥ १७
समुद्रकल्पं तु बलं धार्तराष्ट्रस्य माधव ।
अस्मानासाद्य संजातं गोष्पदोपममच्युत ॥ १८
हते भीष्मे च संदध्याच्छिवं स्यादिह माधव।
न च तत्कृतवान्मूढो धार्तराष्ट्रः सुबालिशः ॥ १९
उक्तं भीष्मेण यद्वाक्यं हितं पथ्यं च माधव ।
तच्चापि नासौ कृतवान्वीतबुद्धिः सुयोधनः ॥ २०
तस्मिंस्तु पतिते भीष्मे प्रच्युते पृथिवीतले ।
न जाने कारणं किं नु येन युद्धमवर्तत ॥ २१
मूढांस्तु सर्वथा मन्ये धार्तराष्ट्रान्सुबालिशान् ।
पतिते शंतनोः पुत्रे येऽकार्षुः संयुगं पुनः ॥ २२
अनन्तरं च निहते द्रोणे ब्रह्मविदां वरे ।
राधेये च विकर्णे च नैवाशाम्यत वैशसम् ॥ २३
अल्पावशिष्टे सैन्येऽस्मिन्सूतपुत्रे च पातिते ।
सपुत्रे वै नरव्याघ्रे नैवाशाम्यत वैशसम् ॥ २४
श्रुतायुषि हते शूरे जलसंधे च पौरवे ।
श्रुतायुधे च नृपतौ नैवाशाम्यत वैशसम् ॥ २५
भूरिश्रवसि शल्ये च शाल्वे चैव जनार्दन ।
आवन्त्येषु च वीरेषु नैवाशाम्यत वैशसम् ॥ २६
जयद्रथे च निहते राक्षसे चाप्यलायुधे ।

बाह्लिके सोमदत्ते च नैवाशाम्यत वैशसम् ॥ २७
भगदत्ते हते शूरे काम्बोजे च सुदक्षिणे ।
दुःशासने च निहते नैवाशाम्यत वैशसम् ॥ २८
दृष्ट्वा च निहताञ्शूरान्पृथङ्माण्डलिकान्नृपान् ।
बलिनश्च रणे कृष्ण नैवाशाम्यत वैशसम् ॥ २९
अक्षौहिणीपतीन्दृष्ट्वा भीमसेनेन पातितान् ।
मोहाद्वा यदि वा लोभान्नैवाशाम्यत वैशसम् ॥३०
को नु राजकुले जातः कौरवेयो विशेषतः ।
निरर्थकं महद्वैरं कुर्यादन्यः सुयोधनात् ॥ ३१
गुणतोऽभ्यधिकं ज्ञात्वा बलतः शौर्यतोऽपि वा ।
अमूढः को नु युध्येत जानन्प्राज्ञो हिताहितम् ॥३२
यन्न तस्य मनो ह्यासीत्त्वयोक्तस्य हितं वचः ।
प्रशमे पाण्डवैः सार्धं सोऽन्यस्य शृणुयात्कथम् ॥३३
येन शांतनवो भीष्मो द्रोणो विदुर एव च ।
प्रत्याख्याताः शमस्यार्थे किं नु तस्याद्य भेषजम् ॥३४
मौर्ख्यादेन पिता वृद्धः प्रत्याख्यातो जनार्दन ।
तथा माता हितं वाक्यं भाषमाणा हितैषिणी ।
प्रत्याख्याता ह्यसत्कृत्य स कस्मै रोचयेद्वचः ॥ ३५
कुलान्तकरणो व्यक्तं जात एष जनार्दन ।
तथास्य दृश्यते चेष्टा नीतिश्चैव विशां पते ।
नैष दास्यति नो राज्यमिति मे मतिरच्युत ॥ ३६
उक्तोऽहं बहुशस्तात विदुरेण महात्मना ।
न जीवन्दास्यते भागं धार्तराष्ट्रः कथंचन ॥ ३७
यावत्प्राणा धमिष्यन्ति धार्तराष्ट्रस्य मानद ।
तावद्युष्मास्वपापेषु प्रचरिष्यति पातकम् ॥ ३८
न स युक्तोऽन्यथा जेतुमृते युद्धेन माधव ।
इत्यब्रवीत्सदा मां हि विदुरः सत्यदर्शनः ॥ ३९
तत्सर्वमद्य जानामि व्यवसायं दुरात्मनः ।
यदुक्तं वचनं तेन विदुरेण महात्मना ॥ ४०
यो हि श्रुत्वा वचः पथ्यं जामदग्न्याद्यथातथम् ।
अवामन्यत दुर्बुद्धिर्ध्रुवं नाशमुखे स्थितः ॥ ४१
उक्तं हि बहुभिः सिद्धैर्जातमात्रे सुयोधने ।
एनं प्राप्य दुरात्मानं क्षयं क्षत्रं गमिष्यति ॥ ४२
तदिदं वचनं तेषां निरुक्तं वै जनार्दन ।
क्षयं याता हि राजानो दुर्योधनकृते भृशम् ॥ ४३
सोऽद्य सर्वान्रणे योधान्निहनिष्यामि माधव ।
क्षत्रियेषु हतेष्वाशु शून्ये च शिबिरे कृते ॥ ४४
वधाय चात्मनोऽस्माभिः संयुगं रोचयिष्यति ।
तदन्तं हि भवेद्वैरमनुमानेन माधव ॥ ४५
एवं पश्यामि वार्ष्णेय चिन्तयन्प्रज्ञया स्वया ।
विदुरस्य च वाक्येन चेष्टया च दुरात्मनः ॥ ४६
संयाहि भारतीं वीर यावद्धन्मि शितैः शरैः ।
दुर्योधनं दुरात्मानं वाहिनीं चास्य संयुगे ॥ ४७
क्षेममद्य करिष्यामि धर्मराजस्य माधव ।
हत्वैतद्दुर्बलं सैन्यं धार्तराष्ट्रस्य पश्यतः ॥ ४८

संजय उवाच ।

अभीशुहस्तो दाशार्हस्तथोक्तः सव्यसाचिना ।
तद्बलौघममित्राणामभीतः प्राविशद्रणे ॥ ४९
शरासनवरं घोरं शक्तिकण्टकसंवृतम् ।
गदापरिघपन्थानं रथनागमहाद्रुमम् ॥ ५०
हयपत्तिलताकीर्णं गाहमानो महायशाः ।
व्यचरत्तत्र गोविन्दो रथेनातिपताकिना ॥ ५१
ते हयाः पाण्डुरा राजन्वहन्तोऽर्जुनमाहवे ।
दिक्षु सर्वास्वदृश्यन्त दाशार्हेण प्रचोदिताः ॥ ५२
ततः प्रायाद्रथेनाजौ सव्यसाची परंतपः ।
किरञ्शरशतांस्तीक्ष्णान्वारिधारा इवाम्बुदः ॥ ५३
प्रादुरासीन्महाञ्शब्दः शराणां नतपर्वणाम् ।
इषुभिश्छाद्यमानानां समरे सव्यसाचिना ॥ ५४
असज्जन्तस्तनुत्रेषु शरौघाः प्रापतन्भुवि ।
इन्द्राशनिसमस्पर्शा गाण्डीवप्रेषिताः शराः ॥ ५५

नरान्नागान्समाहत्य हयांश्चापि विशां पते ।
अपतन्त रणे बाणाः पतंगा इव घोषिणः ॥ ५६
आसीत्सर्वमवच्छन्नं गाण्डीवप्रेषितैः शरैः ।
न प्राज्ञायन्त समरे दिशो वा प्रदिशोऽपि वा ॥५७
सर्वमासीज्जगत्पूर्णं पार्थनामाङ्कितैः शरैः ।
रुक्मपुङ्खैस्तैलधौतैः कर्मारपरिमार्जितैः ॥ ५८
ते दह्यमानाः पार्थेन पावकेनेव कुञ्जराः ।
समासीदन्त कौरव्या वध्यमानाः शितैः शरैः ॥५९
शरचापधरः पार्थः प्रज्वलन्निव भारत ।
ददाह समरे योधान्कक्षमग्निरिव ज्वलन् ॥ ६०

यथा वनान्ते वनपैर्विसृष्टः
कक्षं दहेत्कृष्णगतिः सघोषः ।
भूरिद्रुमं शुष्कलतावितानं
भृशं समृद्धो ज्वलनः प्रतापी ॥ ६१
एवं स नाराचगणप्रतापी
शरार्चिरुच्चावचतिग्मतेजाः ।
ददाह सर्वां तव पुत्रसेना-
ममृष्यमाणस्तरसा तरस्वी ॥ ६२
तस्येषवः प्राणहराः सुमुक्ता
नासज्जन्वै वर्मसु रुक्मपुङ्खाः ।
न च द्वितीयं प्रमुमोच बाणं
नरे हये वा परमद्विपे वा ॥ ६३
अनेकरूपाकृतिभिर्हि बाणै-
र्महारथानीकमनुप्रविश्य ।
स एव एकस्तव पुत्रसेनां
जघान दैत्यानिव वज्रपाणिः ॥ ६४

इति श्रीमहाभारते शल्यपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

संजय उवाच ।

अस्यतां यतमानानां शूराणामनिवर्तिनाम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनंजयः ॥ १
इन्द्राशनिसमस्पर्शानविषह्यान्महौजसः ।
विसृजन्दृश्यते बाणान्धारा मुञ्चन्निवाम्बुदः ॥ २
तत्सैन्यं भरतश्रेष्ठ वध्यमानं किरीटिना ।
संप्रदुद्राव संग्रामात्तव पुत्रस्य पश्यतः ॥ ३
हतधुर्या रथाः केचिद्धतसूतास्तथापरे ।
भग्नाक्षयुगचक्रेषाः केचिदासन्विशां पते ॥ ४
अन्येषां सायकाः क्षीणास्तथान्ये शरपीडिताः ।
अक्षता युगपत्केचित्प्राद्रवन्भयपीडिताः ॥ ५
केचित्पुत्रानुपादाय हतभूयिष्ठवाहनाः ।
विचुक्रुशुः पितॄनन्ये सहायानपरे पुनः ॥ ६
बान्धवांश्च नरव्याघ्र भ्रातॄन्संबन्धिनस्तथा ।
दुद्रुवुः केचिदुत्सृज्य तत्र तत्र विशां पते ॥ ७
बहवोऽत्र भृशं विद्धा मुह्यमाना महारथाः ।
निष्टनन्तः स्म दृश्यन्ते पार्थबाणहता नराः ॥ ८
तानन्ये रथमारोप्य समाश्वास्य मुहूर्तकम् ।
विश्रान्ताश्च वितृष्णाश्च पुनर्युद्धाय जग्मिरे ॥ ९
तानपास्य गताः केचित्पुनरेव युयुत्सवः ।
कुर्वन्तस्तव पुत्रस्य शासनं युद्धदुर्मदाः ॥ १०
पानीयमपरे पीत्वा पर्याश्वास्य च वाहनम् ।
वर्माणि च समारोप्य केचिद्भरतसत्तम ॥ ११
समाश्वास्यापरे भ्रातॄन्निक्षिप्य शिबिरेऽपि च ।
पुत्रानन्ये पितॄनन्ये पुनर्युद्धमरोचयन् ॥ १२
सज्जयित्वा रथान्केचिद्यथामुख्यं विशां पते ।
आप्लुत्य पाण्डवानीकं पुनर्युद्धमरोचयन् ॥ १३
ते शूराः किङ्किणीजालैः समाच्छन्ना बभासिरे ।
त्रैलोक्यविजये युक्ता यथा दैतेयदानवाः ॥ १४

आगम्य सहसा केचिद्रथैः स्वर्णविभूषितैः ।
पाण्डवानामनीकेषु धृष्टद्युम्नमयोधयन् ॥ १५
धृष्टद्युम्नोऽपि पाञ्चाल्यः शिखण्डी च महारथः ।
नाकुलिश्च शतानीको रथानीकमयोधयन् ॥ १६
पाञ्चाल्यस्तु ततः क्रुद्धः सैन्येन महता वृतः ।
अभ्यद्रवत्सुसंरब्धस्तावकान्हन्तुमुद्यतः ॥ १७
ततस्त्वापततस्तस्य तत्र पुत्रो जनाधिप ।
बाणसंघाननेकान्वै प्रेषयामास भारत ॥ १८
धृष्टद्युम्नस्ततो राजंस्तव पुत्रेण धन्विना ।
नाराचैर्बहुभिः क्षिप्रं बाह्वोरुरसि चार्पितः ॥ १९
सोऽतिविद्धो महेष्वासस्तोत्रार्दित इव द्विपः ।
तस्याश्वांश्चतुरो बाणैः प्रेषयामास मृत्यवे ।
सारथेश्चास्य भल्लेन शिरः कायादपाहरत् ॥ २०
ततो दुर्योधनो राजा पृष्ठमारुह्य वाजिनः ।
अपाक्रामद्धतरथो नातिदूरमरिंदमः ॥ २१
दृष्ट्वा तु हतविक्रान्तं स्वमनीकं महाबलः ।
तव पुत्रो महाराज प्रययौ यत्र सौबलः ॥ २२
ततो रथेषु भग्नेषु त्रिसाहस्रा महाद्विपाः ।
पाण्डवान्रथिनः पञ्च समन्तात्पर्यवारयन् ॥ २३
ते वृताः समरे पञ्च गजानीकेन भारत ।
अशोभन्त नरव्याघ्रा ग्रहा व्याप्ता घनैरिव ॥ २४
ततोऽर्जुनो महाराज लब्धलक्षो महाभुजः ।
विनिर्ययौ रथेनैव श्वेताश्वः कृष्णसारथिः ॥ २५
तैः समन्तात्परिवृतः कुञ्जरैः पर्वतोपमैः ।
नाराचैर्विमलैस्तीक्ष्णैर्गजानीकमपोथयत् ॥ २६
तत्रैकबाणनिहतानपश्याम महागजान् ।
पतितान्पात्यमानांश्च विभिन्नान्सव्यसाचिना ॥ २७
भीमसेनस्तु तान्दृष्ट्वा नागान्मत्तगजोपमः ।
करेण गृह्य महतीं गदामभ्यपतद्बली ।
अवप्लुत्य रथात्तूर्णं दण्डपाणिरिवान्तकः ॥ २८
तमुद्यतगदं दृष्ट्वा पाण्डवानां महारथम् ।
वित्रेसुस्तावकाः सैन्याः शकृन्मूत्रं प्रसुस्रुवुः ।
आविग्नं च बलं सर्वं गदाहस्ते वृकोदरे ॥ २९
गदया भीमसेनेन भिन्नकुम्भान्रजस्वलान् ।
धावमानानपश्याम कुञ्जरान्पर्वतोपमान् ॥ ३०
प्रधाव्य कुञ्जरास्ते तु भीमसेनगदाहताः ।
पेतुरार्तस्वरं कृत्वा छिन्नपक्षा इवाद्रयः ॥ ३१
तान्भिन्नकुम्भान्सुबहून्द्रवमाणानितस्ततः ।
पतमानांश्च संप्रेक्ष्य वित्रेसुस्तव सैनिकाः ॥ ३२
युधिष्ठिरोऽपि संक्रुद्धो माद्रीपुत्रौ च पाण्डवौ ।
गृध्रपक्षैः शितैर्बाणैर्जघ्नुर्वै गजयोधिनः ॥ ३३
धृष्टद्युम्नस्तु समरे पराजित्य नराधिपम् ।
अपक्रान्ते तव सुते हयपृष्ठं समाश्रिते ॥ ३४
दृष्ट्वा च पाण्डवान्सर्वान्कुञ्जरैः परिवारितान् ।
धृष्टद्युम्नो महाराज सह सर्वैः प्रभद्रकैः ।
पुत्रः पाञ्चालराजस्य जिघांसुः कुञ्जरान्ययौ ॥ ३५
अदृष्ट्वा तु रथानीके दुर्योधनमरिंदमम् ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
अपृच्छन्क्षत्रियांस्तत्र क नु दुर्योधनो गतः ॥ ३६
अपश्यमाना राजानं वर्तमाने जनक्षये ।
मन्वाना निहतं तत्र तव पुत्रं महारथाः ।
विषण्णवदना भूत्वा पर्यपृच्छन्त ते सुतम् ॥ ३७
आहुः केचिद्धते सूते प्रयातो यत्र सौबलः ।
अपरे त्वब्रुवंस्तत्र क्षत्रिया भृशविक्षताः ॥ ३८
दुर्योधनेन किं कार्यं द्रक्ष्यध्वं यदि जीवति ।
युध्यध्वं सहिताः सर्वे किं वो राजा करिष्यति ॥ ३९
ते क्षत्रियाः क्षतैर्गात्रैर्हतभूयिष्ठवाहनाः ।
शरैः संपीड्यमानाश्च नातिव्यक्तमिवाब्रुवन् ॥ ४०
इदं सर्वं बलं हन्मो येन स्म परिवारिताः ।
एते सर्वे गजान्हत्वा उपयान्ति स्म पाण्डवाः ॥ ४१

श्रुत्वा तु वचनं तेषामश्वत्थामा महाबलः ।
हित्वा पाञ्चालराजस्य तदनीकं दुरुत्सहम् ॥ ४२
कृपश्च कृतवर्मा च प्रययुर्यत्र सौबलः ।
रथानीकं परित्यज्य शूराः सुदृढधन्विनः ॥ ४३
ततस्तेषु प्रयातेषु धृष्टद्युम्नपुरोगमाः ।
आययुः पाण्डवा राजन्विनिघ्नन्तः स्म तावकान् ॥ ४४
दृष्ट्वा तु तानापततः संप्रहृष्टान्महारथान् ।
पराक्रान्तांस्ततो वीरान्निराशाञ्जीविते तदा ।
विवर्णमुखभूयिष्ठमभवत्तावकं बलम् ॥ ४५
परिक्षीणायुधान्दृष्ट्वा तानहं परिवारितान् ।
राजन्बलेन द्व्यङ्गेन त्यक्त्वा जीवितमात्मनः ॥ ४६
आत्मनापञ्चमोऽयुध्यं पाञ्चालस्य बलेन ह ।
तस्मिन्देशे व्यवस्थाप्य यत्र शारद्वतः स्थितः ॥ ४७
संप्रयुद्धा वयं पञ्च किरीटिशरपीडिताः ।
धृष्टद्युम्नं महानीकं तत्र नोऽभूद्रणो महान् ।
जितास्तेन वयं सर्वे व्यपयाम रणात्ततः ॥ ४८
अथापश्यं सात्यकिं तमुपायान्तं महारथम् ।
रथैश्चतुःशतैर्वीरो मां चाभ्यद्रवदाहवे ॥ ४९
धृष्टद्युम्नादहं मुक्तः कथंचिच्छ्रान्तवाहनः ।
पतितो माधवानीकं दुष्कृती नरकं यथा ।
तत्र युद्धमभूद्घोरं मुहूर्तमतिदारुणम् ॥ ५०
सात्यकिस्तु महाबाहुर्मम हत्वा परिच्छदम् ।
जीवग्राहमगृह्णान्मां मूर्छितं पतितं भुवि ॥ ५१
ततो मुहूर्तादिव तद्गजानीकमवध्यत ।
गदया भीमसेनेन नाराचैरर्जुनेन च ॥ ५२
प्रतिपिष्टैर्महानागैः समन्तात्पर्वतोपमैः ।
नातिप्रसिद्धेव गतिः पाण्डवानामजायत ॥ ५३
रथमार्गांस्ततश्चक्रे भीमसेनो महाबलः ।
पाण्डवानां महाराज व्यपकर्षन्महागजान् ॥ ५४
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
अपश्यन्तो रथानीके दुर्योधनमरिंदमम् ।
राजानं मृगयामासुस्तव पुत्रं महारथम् ॥ ५५
परित्यज्य च पाञ्चालं प्रयाता यत्र सौबलः ।
राज्ञोऽदर्शनसंविग्ना वर्तमाने जनक्षये ॥ ५६

इति श्रीमहाभारते शल्यपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

संजय उवाच ।

गजानीके हते तस्मिन्पाण्डुपुत्रेण भारत ।
वध्यमाने बले चैव भीमसेनेन संयुगे ॥ १
चरन्तं च तथा दृष्ट्वा भीमसेनमरिंदमम् ।
दण्डहस्तं यथा क्रुद्धमन्तकं प्राणहारिणम् ॥ २
समेत्य समरे राजन्हतशेषाः सुतास्तव ।
अदृश्यमाने कौरव्ये पुत्रे दुर्योधने तव ।
सोदर्याः सहिता भूत्वा भीमसेनमुपाद्रवन् ॥ ३
दुर्मर्षणो महाराज जैत्रो भूरिबलो रविः ।
इत्येते सहिता भूत्वा तव पुत्राः समन्ततः ।
भीमसेनमभिद्रुत्य रुरुधुः सर्वतोदिशम् ॥ ४
ततो भीमो महाराज स्वरथं पुनरास्थितः ।
मुमोच निशितान्बाणान्पुत्राणां तव मर्मसु ॥ ५
ते कीर्यमाणा भीमेन पुत्रास्तव महारणे ।
भीमसेनमपासेधन्प्रवणादिव कुञ्जरम् ॥ ६
ततः क्रुद्धो रणे भीमः शिरो दुर्मर्षणस्य ह ।
क्षुरप्रेण प्रमथ्याशु पातयामास भूतले ॥ ७
ततोऽपरेण भल्लेन सर्वावरणभेदिना ।
श्रुतान्तमवधीद्भीमस्तव पुत्रं महारथः ॥ ८
जयत्सेनं ततो विद्ध्वा नाराचेन हसन्निव ।
पातयामास कौरव्यं रथोपस्थादरिंदमः ।
स पपात रथाद्राजन्भूमौ तूर्णं ममार च ॥ ९
श्रुतर्वा तु ततो भीमं क्रुद्धो विव्याध मारिष ।

शतेन गृध्रवाजानां शराणां नतपर्वणाम् ॥ १०
ततः क्रुद्धो रणे भीमो जैत्रं भूरिबलं रविम् ।
त्रीनेतांस्त्रिभिरानर्च्छद्विषाग्निप्रतिमैः शरैः ॥ ११
ते हता न्यपतन्भूमौ स्यन्दनेभ्यो महारथाः ।
वसन्ते पुष्पशबला निकृत्ता इव किंशुकाः ॥ १२
ततोऽपरेण तीक्ष्णेन नाराचेन परंतपः ।
दुर्विमोचनमाहत्य प्रेषयामास मृत्यवे ॥ १३
स हतः प्रापतद्भूमौ स्वरथाद्रथिनां वरः ।
गिरेस्तु कूटजो भग्नो मारुतेनेव पादपः ॥ १४
दुष्प्रधर्षं ततश्चैव सुजातं च सुतौ तव ।
एकैकं न्यवधीत्संख्ये द्वाभ्यां द्वाभ्यां चमूमुखे ।
तौ शिलीमुखविद्धाङ्गौ पेततू रथसत्तमौ ॥ १५
ततो यतन्तमपरमभिवीक्ष्य सुतं तव ।
भल्लेन युधि विव्याध भीमो दुर्विषहं रणे ।
स पपात हतो वाहात्पश्यतां सर्वधन्विनाम् ॥ १६
दृष्ट्वा तु निहतान्भ्रातॄन्बहूनेकेन संयुगे ।
अमर्षवशमापन्नः श्रुतर्वा भीममभ्ययात् ॥ १७
विक्षिपन्सुमहच्चापं कार्तस्वरविभूषितम् ।
विसृजन्सायकांश्चैव विषाग्निप्रतिमान्बहून् ॥ १८
स तु राजन्धनुश्छित्त्वा पाण्डवस्य महामृधे ।
अथैनं छिन्नधन्वानं विंशत्या समवाकिरत् ॥ १९
ततोऽन्यद्धनुरादाय भीमसेनो महारथः ।
अवाकिरत्तव सुतं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २०
महदासीत्तयोर्युद्धं चित्ररूपं भयानकम् ।
यादृशं समरे पूर्वं जम्भवासवयोरभूत् ॥२१
तयोस्तत्र शरैर्मुक्तैर्यमदण्डनिभैः शुभैः ।
समाच्छन्ना धरा सर्वा खं च सर्वा दिशस्तथा॥२२
ततः श्रुतर्वा संक्रुद्धो धनुरायम्य सायकैः ।
भीमसेनं रणे राजन्बाह्वोरुरसि चार्पयत् ॥ २३
सोऽतिविद्धो महाराज तव पुत्रेण धन्विना ।
भीमः संचुक्षुभे क्रुद्धः पर्वणीव महोदधिः ॥ २४
ततो भीमो रुषाविष्टः पुत्रस्य तव मारिष ।
सारथिं चतुरश्चाश्वान्बाणैर्निन्ये यमक्षयम् ॥ २५
विरथं तं समालक्ष्य विशिखैर्लोमवाहिभिः ।
अवाकिरदमेयात्मा दर्शयन्पाणिलाघवम् ॥ २६
श्रुतर्वा विरथो राजन्नाददे खड्गचर्मणी ।
अथास्याददतः खड्गं शतचन्द्रं च भानुमत् ।
क्षुरप्रेण शिरः कायात्पातयामास पाण्डवः ॥ २७
छिन्नोत्तमाङ्गस्य ततः क्षुरप्रेण महात्मनः ।
पपात कायः स रथाद्वसुधामनुनादयन् ॥ २८
तस्मिन्निपतिते वीरे तावका भयमोहिताः ।
अभ्यद्रवन्त संग्रामे भीमसेनं युयुत्सवः ॥ २९
तानापतत एवाशु हतशेषाद्बलार्णवात् ।
दंशितः प्रतिजग्राह भीमसेनः प्रतापवान् ।
ते तु तं वै समासाद्य परिवव्रुः समन्ततः ॥ ३०
ततस्तु संवृतो भीमस्तावकैर्निशितैः शरैः ।
पीडयामास तान्सर्वान्सहस्राक्ष इवासुरान् ॥ ३१
ततः पञ्चशतान्हत्वा सवरूथान्महारथान् ।
जघान कुञ्जरानीकं पुनः सप्तशतं युधि ॥ ३२
हत्वा दश सहस्राणि पत्तीनां परमेषुभिः ।
वाजिनां च शतान्यष्टौ पाण्डवः स्म विराजते ॥३३
भीमसेनस्तु कौन्तेयो हत्वा युद्धे सुतांस्तव ।
मेने कृतार्थमात्मानं सफलं जन्म च प्रभो ॥ ३४
तं तथा युध्यमानं च विनिघ्नन्तं च तावकान् ।
ईक्षितुं नोत्सहन्ते स्म तव सैन्यानि भारत ॥ ३५
विद्राव्य तु कुरून्सर्वांस्तांश्च हत्वा पदानुगान् ।
दोर्भ्यां शब्दं ततश्चक्रे त्रासयानो महाद्विपान् ॥३६
हतभूयिष्ठयोधा तु तव सेना विशां पते ।

किंचिच्छेषा महाराज कृपणा समपद्यत ॥ ३७

इति श्रीमहाभारते शल्यपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

संजय उवाच ।

दुर्योधनो महाराज सुदर्शश्चापि ते सुतः ।
हतशेषौ तदा संख्ये वाजिमध्ये व्यवस्थितौ ॥ १
ततो दुर्योधनं दृष्ट्वा वाजिमध्ये व्यवस्थितम् ।
उवाच देवकीपुत्रः कुन्तीपुत्रं धनंजयम् ॥ २
शत्रवो हतभूयिष्ठा ज्ञातयः परिपालिताः ।
गृहीत्वा संजयं चासौ निवृत्तः शिनिपुंगवः ॥ ३
परिश्रान्तश्च नकुलः सहदेवश्च भारत ।
योधयित्वा रणे पापान्धार्तराष्ट्रपदानुगान् ॥ ४
सुयोधनमभित्यज्य त्रय एते व्यवस्थिताः ।
कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः ॥ ५
असौ तिष्ठति पाञ्चाल्यः श्रिया परमया युतः ।
दुर्योधनबलं हत्वा सह सर्वैः प्रभद्रकैः ॥ ६
असौ दुर्योधनः पार्थ वाजिमध्ये व्यवस्थितः ।
छत्रेण ध्रियमाणेन प्रेक्षमाणो मुहुर्मुहुः ॥ ७
प्रतिव्यूह्य बलं सर्वं रणमध्ये व्यवस्थितः ।
एनं हत्वा शितैर्बाणैः कृतकृत्यो भविष्यसि ॥ ८
गजानीकं हतं दृष्ट्वा त्वां च प्राप्तमरिंदम ।
यावन्न विद्रवन्त्येते तावज्जहि सुयोधनम् ॥ ९
यातु कश्चित्तु पाञ्चाल्यं क्षिप्रमागम्यतामिति ।
परिश्रान्तबलस्तात नैष मुच्येत किल्बिषी ॥ १०
तव हत्वा बलं सर्वं संग्रामे धृतराष्ट्रजः ।
जितान्पाण्डुसुतान्मत्वा रूपं धारयते महत् ॥ ११
निहतं स्वबलं दृष्ट्वा पीडितं चापि पाण्डवैः ।
ध्रुवमेष्यति संग्रामे वधायैवात्मनो नृपः ॥ १२
एवमुक्तः फल्गुनस्तु कृष्णं वचनमब्रवीत् ।
धृतराष्ट्रसुताः सर्वे हता भीमेन मानद ।
यावेतावास्थितौ कृष्ण तावद्य न भविष्यतः ॥ १३
हतो भीष्मो हतो द्रोणः कर्णो वैकर्तनो हतः ।
मद्रराजो हतः शल्यो हतः कृष्ण जयद्रथः ॥ १४
हयाः पञ्चशताः शिष्टाः शकुनेः सौबलस्य च ।
रथानां तु शते शिष्टे द्वे एव तु जनार्दन ।
दन्तिनां च शतं साग्रं त्रिसाहस्राः पदातयः ॥ १५
अश्वत्थामा कृपश्चैव त्रिगर्ताधिपतिस्तथा ।
उलूकः शकुनिश्चैव कृतवर्मा च सात्वतः ॥ १६
एतद्बलमभूच्छेषं धार्तराष्ट्रस्य माधव ।
मोक्षो न नूनं कालाद्धि विद्यते भुवि कस्यचित् ॥ १७
तथा विनिहते सैन्ये पश्य दुर्योधनं स्थितम् ।
अद्याह्ना हि महाराजो हतामित्रो भविष्यति ॥ १८
न हि मे मोक्ष्यते कश्चित्परेषामिति चिन्तये ।
ये त्वद्य समरं कृष्ण न हास्यन्ति रणोत्कटाः ।
तान्वै सर्वान्हनिष्यामि यद्यपि स्युरमानुषाः ॥ १९
अद्य युद्धे सुसंक्रुद्धो दीर्घं राज्ञः प्रजागरम् ।
अपनेष्यामि गान्धारं पातयित्वा शितैः शरैः ॥ २०
निकृत्या वै दुराचारो यानि रत्नानि सौबलः ।
सभायामहरद्द्यूते पुनस्तान्याहराम्यहम् ॥ २१
अद्य ता अपि वेत्स्यन्ति सर्वा नागपुरस्त्रियः ।
श्रुत्वा पतींश्च पुत्रांश्च पाण्डवैर्निहतान्युधि ॥ २२
समाप्तमद्य वै कर्म सर्वं कृष्ण भविष्यति ।
अद्य दुर्योधनो दीप्तां श्रियं प्राणांश्च त्यक्ष्यति ॥ २३
नापयाति भयात्कृष्ण संग्रामाद्यदि चेन्मम ।
निहतं विद्धि वार्ष्णेय धार्तराष्ट्रं सुबालिशम् ॥ २४
मम ह्येतदशक्तं वै वाजिवृन्दमरिंदम ।
सोढुं ज्यातलनिर्घोषं याहि यावन्निहन्म्यहम् ॥ २५
एवमुक्तस्तु दाशार्हः पाण्डवेन यशस्विना ।
अचोदयद्धयान्राजन्दुर्योधनबलं प्रति ॥ २६

तदनीकमभिप्रेक्ष्य त्रयः सज्जा महारथाः ।
भीमसेनोऽर्जुनश्चैव सहदेवश्च मारिष ।
प्रययुः सिंहनादेन दुर्योधनजिघांसया ॥ २७
तान्प्रेक्ष्य सहितान्सर्वाञ्जवेनोद्यतकार्मुकान् ।
सौबलोऽभ्यद्रवद्युद्धे पाण्डवानाततायिनः ॥ २८
सुदर्शनस्तव सुतो भीमसेनं समभ्ययात् ।
सुशर्मा शकुनिश्चैव युयुधाते किरीटिना ।
सहदेवं तव सुतो हयपृष्ठगतोऽभ्ययात् ॥ २९
ततो ह्ययत्नतः क्षिप्रं तव पुत्रो जनाधिप ।
प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ॥ ३०
सोपाविशद्रथोपस्थे तव पुत्रेण ताडितः ।
रुधिराप्लुतसर्वाङ्ग आशीविष इव श्वसन् ॥ ३१
प्रतिलभ्य ततः संज्ञां सहदेवो विशां पते ।
दुर्योधनं शरैस्तीक्ष्णैः संक्रुद्धः समवाकिरत् ॥ ३२
पार्थोऽपि युधि विक्रम्य कुन्तीपुत्रो धनंजयः ।
शूराणामश्वपृष्ठेभ्यः शिरांसि निचकर्त ह ॥ ३३
तदनीकं तदा पार्थो व्यधमद्बहुभिः शरैः ।
पातयित्वा हयान्सर्वांस्त्रिगर्तानां रथान्ययौ ॥ ३४
ततस्ते सहिता भूत्वा त्रिगर्तानां महारथाः ।
अर्जुनं वासुदेवं च शरवर्षैरवाकिरन् ॥ ३५
सत्यकर्माणमाक्षिप्य क्षुरप्रेण महायशाः ।
ततोऽस्य स्यन्दनस्येषां चिच्छिदे पाण्डुनन्दनः ॥ ३६
शिलाशितेन च विभो क्षुरप्रेण महायशाः ।
शिरश्चिच्छेद प्रहसंस्तप्तकुण्डलभूषणम् ॥ ३७
सत्येषुमथ चादत्त योधानां मिषतां ततः ।
यथा सिंहो वने राजन्मृगं परिबुभुक्षितः ॥ ३८
तं निहत्य ततः पार्थः सुशर्माणं त्रिभिः शरैः ।
विद्ध्वा तानहनत्सर्वान्रथान्रुक्मविभूषितान् ॥ ३९
ततस्तु प्रत्वरन्पार्थो दीर्घकालं सुसंभृतम् ।
मुञ्चन्क्रोधविषं तीक्ष्णं प्रस्थलाधिपतिं प्रति ॥ ४०
तमर्जुनः पृषत्कानां शतेन भरतर्षभ ।
पूरयित्वा ततो वाहान्न्यहनत्तस्य धन्विनः ॥ ४१
ततः शरं समादाय यमदण्डोपमं शितम् ।
सुशर्माणं समुद्दिश्य चिक्षेपाशु हसन्निव ॥ ४२
स शरः प्रेषितस्तेन क्रोधदीप्तेन धन्विना ।
सुशर्माणं समासाद्य बिभेद हृदयं रणे ॥ ४३
स गतासुर्महाराज पपात धरणीतले ।
नन्दयन्पाण्डवान्सर्वान्व्यथयंश्चापि तावकान् ॥ ४४
सुशर्माणं रणे हत्वा पुत्रानस्य महारथान् ।
सप्त चाष्टौ च त्रिंशच्च सायकैरनयत्क्षयम् ॥ ४५
ततोऽस्य निशितैर्बाणैः सर्वान्हत्वा पदानुगान् ।
अभ्यगाद्भारतीं सेनां हतशेषां महारथः ॥ ४६
भीमस्तु समरे क्रुद्धः पुत्रं तव जनाधिप ।
सुदर्शनमदृश्यं तं शरैश्चक्रे हसन्निव ॥ ४७
ततोऽस्य प्रहसन्क्रुद्धः शिरः कायादपाहरत् ।
क्षुरप्रेण सुतीक्ष्णेन स हतः प्रापतद्भुवि ॥ ४८
तस्मिंस्तु निहते वीरे ततस्तस्य पदानुगाः ।
परिवव्रू रणे भीमं किरन्तो विशिखाञ्शितान् ॥ ४९
ततस्तु निशितैर्बाणैस्तदनीकं वृकोदरः ।
इन्द्राशनिसमस्पर्शैः समन्तात्पर्यवाकिरत् ।
ततः क्षणेन तद्भीमो न्यहनद्भरतर्षभ ॥ ५०
तेषु तूत्साद्यमानेषु सेनाध्यक्षा महाबलाः ।
भीमसेनं समासाद्य ततोऽयुध्यन्त भारत ।
तांस्तु सर्वाञ्शरैर्घोरैरवाकिरत पाण्डवः ॥ ५१
तथैव तावका राजन्पाण्डवेयान्महारथान् ।
शरवर्षेण महता समन्तात्पर्यवारयन् ॥ ५२
व्याकुलं तदभूत्सर्वं पाण्डवानां परैः सह ।
तावकानां च समरे पाण्डवेयैर्युयुत्सताम् ॥ ५३
तत्र योधास्तदा पेतुः परस्परसमाहताः ।

उभयोः सेनयो राजन्संशोचन्तः स्म बान्धवान्॥५४

इति श्रीमहाभारते शल्यपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

संजय उवाच ।

तस्मिन्प्रवृत्ते संग्रामे नरवाजिगजक्षये ।
शकुनिः सौबलो राजन्सहदेवं समभ्ययात् ॥ १
ततोऽस्यापततस्तूर्णं सहदेवः प्रतापवान् ।
शरौघान्प्रेषयामास पतंगानिव शीघ्रगान् ।
उलूकश्च रणे भीमं विव्याध दशभिः शरैः ॥ २
शकुनिस्तु महाराज भीमं विद्ध्वा त्रिभिः शरैः ।
सायकानां नवत्या वै सहदेवमवाकिरत् ॥ ३
ते शूराः समरे राजन्समासाद्य परस्परम् ।
विव्यधुर्निशितैर्बाणैः कङ्कबर्हिणवाजितैः ।
स्वर्णपुङ्खैः शिलाधौतैरा कर्णात्प्रहितैः शरैः ॥ ४
तेषां चापभुजोत्सृष्टा शरवृष्टिर्विशां पते ।
आच्छादयद्दिशः सर्वा धाराभिरिव तोयदः ॥ ५
ततः क्रुद्धो रणे भीमः सहदेवश्च भारत ।
चेरतुः कदनं संख्ये कुर्वन्तौ सुमहाबलौ ॥ ६
ताभ्यां शरशतैश्छन्नं तद्बलं तव भारत ।
अन्धकारमिवाकाशमभवत्तत्र तत्र ह ॥ ७
अश्वैर्विपरिधावद्भिः शरच्छन्नैर्विशां पते ।
तत्र तत्र कृतो मार्गो विकर्षद्भिर्हतान्बहून् ॥ ८
निहतानां हयानां च सहैव हययोधिभिः ।
वर्मभिर्विनिकृत्तैश्च प्रासैश्छिन्नैश्च मारिष ।
संछन्ना पृथिवी जज्ञे कुसुमैः शबला इव ॥ ९
योधास्तत्र महाराज समासाद्य परस्परम् ।
व्यचरन्त रणे क्रुद्धा विनिघ्नन्तः परस्परम् ॥ १०
उद्वृत्तनयनै रोषात्संदष्टौष्ठपुटैर्मुखैः ।
सकुण्डलैर्मही छन्ना पद्मकिञ्जल्कसंनिभैः ॥ ११
भुजैश्छिन्नैर्महाराज नागराजकरोपमैः ।
साङ्गदैः सतनुत्रैश्च सासिप्रासपरश्वधैः ॥ १२
कबन्धैरुत्थितैश्छिन्नैर्नृत्यद्भिश्चापरैर्युधि ।
क्रव्यादगणसंकीर्णा घोराभूत्पृथिवी विभो ॥ १३
अल्पावशिष्टे सैन्ये तु कौरवेयान्महाहवे ।
प्रहृष्टाः पाण्डवा भूत्वा निन्यिरे यमसादनम् ॥ १४
एतस्मिन्नन्तरे शूरः सौबलेयः प्रतापवान् ।
प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ।
स विह्वलो महाराज रथोपस्थ उपाविशत् ॥ १५
सहदेवं तथा दृष्ट्वा भीमसेनः प्रतापवान् ।
सर्वसैन्यानि संक्रुद्धो वारयामास भारत ॥ १६
निर्बिभेद च नाराचैः शतशोऽथ सहस्रशः ।
विनिर्भिद्याकरोच्चैव सिंहनादमरिंदम ॥ १७
तेन शब्देन वित्रस्ताः सर्वे सहयवारणाः ।
प्राद्रवन्सहसा भीताः शकुनेश्च पदानुगाः ॥ १८
प्रभग्नानथ तान्दृष्ट्वा राजा दुर्योधनोऽब्रवीत् ।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः ॥ १९
इह कीर्तिं समाधाय प्रेत्य लोकान्समश्नुते ।
प्राणाञ्जहाति यो वीरो युधि पृष्ठमदर्शयन् ॥ २०
एवमुक्तास्तु ते राज्ञा सौबलस्य पदानुगाः ।
पाण्डवानभ्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ॥ २१
द्रवद्भिस्तत्र राजेन्द्र कृतः शब्दोऽतिदारुणः ।
क्षुब्धसागरसंकाशः क्षुभितः सर्वतोऽभवत् ॥ २२
तांस्तदापततो दृष्ट्वा सौबलस्य पदानुगान् ।
प्रत्युद्ययुर्महाराज पाण्डवा विजये वृताः ॥ २३
प्रत्याश्वस्य च दुर्धर्षः सहदेवो विशां पते ।
शकुनिं दशभिर्विद्ध्वा हयांश्चास्य त्रिभिः शरैः ।
धनुश्चिच्छेद च शरैः सौबलस्य हसन्निव ॥ २४
अथान्यद्धनुरादाय शकुनिर्युद्धदुर्मदः ।
विव्याध नकुलं षष्ट्या भीमसेनं च सप्तभिः ॥२५

उलूकोऽपि महाराज भीमं विव्याध सप्तभिः ।
सहदेवं च सप्तत्या परीप्सन्पितरं रणे ॥ २६
तं भीमसेनः समरे विव्याध निशितैः शरैः ।
शकुनिं च चतुःषष्ट्या पार्श्वस्थांश्च त्रिभिस्त्रिभिः ॥२७
ते हन्यमाना भीमेन नाराचैस्तैलपायितैः ।
सहदेवं रणे क्रुद्धाश्छादयञ्शरवृष्टिभिः ।
पर्वतं वारिधाराभिः सविद्युत इवाम्बुदाः ॥ २८
ततोऽस्यापततः शूरः सहदेवः प्रतापवान् ।
उलूकस्य महाराज भल्लेनापाहरच्छिरः ॥ २९
स जगाम रथाद्भूमिं सहदेवेन पातितः ।
रुधिराप्लुतसर्वाङ्गो नन्दयन्पाण्डवान्युधि ॥ ३०
पुत्रं तु निहतं दृष्ट्वा शकुनिस्तत्र भारत ।
साश्रुकण्ठो विनिःश्वस्य क्षत्तुर्वाक्यमनुस्मरन् ॥३१
चिन्तयित्वा मुहूर्तं स बाष्पपूर्णेक्षणः श्वसन् ।
सहदेवं समासाद्य त्रिभिर्विव्याध सायकैः ॥ ३२
तानपास्य शरान्मुक्ताञ्शरसंघैः प्रतापवान् ।
सहदेवो महाराज धनुश्चिच्छेद संयुगे ॥ ३३
छिन्ने धनुषि राजेन्द्र शकुनिः सौबलस्तदा ।
प्रगृह्य विपुलं खड्गं सहदेवाय प्राहिणोत् ॥ ३४
तमापतन्तं सहसा घोररूपं विशां पते ।
द्विधा चिच्छेद समरे सौबलस्य हसन्निव ॥ ३५
असिं दृष्ट्वा द्विधा छिन्नं प्रगृह्य महतीं गदाम् ।
प्राहिणोत्सहदेवाय सा मोघा न्यपतद्भुवि ॥ ३६
ततः शक्तिं महाघोरां कालरात्रिमिवोद्यताम् ।
प्रेषयामास संक्रुद्धः पाण्डवं प्रति सौबलः ॥ ३७
तामापतन्तीं सहसा शरैः काञ्चनभूषणैः ।
त्रिधा चिच्छेद समरे सहदेवो हसन्निव ॥ ३८
सा पपात त्रिधा छिन्ना भूमौ कनकभूषणा ।
शीर्यमाणा यथा दीप्ता गगनाद्वै शतह्रदा ॥ ३९
शक्तिं विनिहतां दृष्ट्वा सौबलं च भयार्दितम् ।
दुद्रुवुस्तावकाः सर्वे भये जाते ससौबलाः ॥ ४०
अथोत्क्रुष्टं महद्ध्यासीत्पाण्डवैर्जितकाशिभिः ।
धार्तराष्ट्रास्ततः सर्वे प्रायशो विमुखाभवन् ॥ ४१
तान्वै विमनसो दृष्ट्वा माद्रीपुत्रः प्रतापवान् ।
शरैरनेकसाहस्रैर्वारयामास संयुगे ॥ ४२
ततो गान्धारकैर्गुप्तं पृष्ठैरश्वैर्जये धृतम् ।
आससाद रणे यान्तं सहदेवोऽथ सौबलम् ॥ ४३
स्वमंशमवशिष्टं स संस्मृत्य शकुनिं नृप ।
रथेन काञ्चनाङ्गेन सहदेवः समभ्ययात् ।
अधिज्यं बलवत्कृत्वा व्याक्षिपन्सुमहद्धनुः ॥ ४४
स सौबलमभिद्रुत्य गृध्रपत्रैः शिलाशितैः ।
भृशमभ्यहनत्क्रुद्धस्तोत्रैरिव महाद्विपम् ॥ ४५
उवाच चैनं मेधावी निगृह्य स्मारयन्निव ।
क्षत्रधर्मे स्थितो भूत्वा युध्यस्व पुरुषो भव ॥ ४६
यत्तदा हृष्यसे मूढ ग्लहन्नक्षैः सभातले ।
फलमद्य प्रपद्यस्व कर्मणस्तस्य दुर्मते ॥ ४७
निहतास्ते दुरात्मानो येऽस्मानवहसन्पुरा ।
दुर्योधनः कुलाङ्गारः शिष्टस्त्वं तस्य मातुलः ॥ ४८
अद्य ते विहनिष्यामि क्षुरेणोन्मथितं शिरः ।
वृक्षात्फलमिवोद्धृत्य लगुडेन प्रमाथिना ॥ ४९
एवमुक्त्वा महाराज सहदेवो महाबलः ।
संक्रुद्धो नरशार्दूलो वेगेनाभिजगाम ह ॥ ५०
अभिगम्य तु दुर्धर्षः सहदेवो युधां पतिः ।
विकृष्य बलवच्चापं क्रोधेन प्रहसन्निव ॥ ५१
शकुनिं दशभिर्विद्ध्वा चतुर्भिश्चास्य वाजिनः ।
छत्रं ध्वजं धनुश्चास्य छित्त्वा सिंह इवानदत् ॥५२
छिन्नध्वजधनुश्छत्रः सहदेवेन सौबलः ।
ततो विद्धश्च बहुभिः सर्वमर्मसु सायकैः ॥ ५३
ततो भूयो महाराज सहदेवः प्रतापवान् ।
शकुनेः प्रेषयामास शरवृष्टिं दुरासदाम् ॥ ५४

ततस्तु क्रुद्धः सुबलस्य पुत्रो
माद्रीसुतं सहदेवं विमर्दे ।
प्रासेन जाम्बूनदभूषणेन
जिघांसुरेकोऽभिपपात शीघ्रम् ॥ ५५
माद्रीसुतस्तस्य समुद्यतं तं
प्रासं सुवृत्तौ च भुजौ रणाग्रे ।
भल्लैस्त्रिभिर्युगपत्संचकर्त
ननाद चोच्चैस्तरसाजिमध्ये ॥ ५६
तस्याशुकारी सुसमाहितेन
सुवर्णपुङ्खेन दृढायसेन ।
भल्लेन सर्वावरणातिगेन
शिरः शरीरात्प्रममाथ भूयः ॥ ५७
शरेण कार्तस्वरभूषितेन
दिवाकराभेन सुसंशितेन ।
हृतोत्तमाङ्गो युधि पाण्डवेन
पपात भूमौ सुबलस्य पुत्रः ॥ ५८
स तच्छिरो वेगवता शरेण
सुवर्णपुङ्खेन शिलाशितेन ।
प्रावेरयत्कुपितः पाण्डुपुत्रो
यत्तत्कुरूणामनयस्य मूलम् ॥ ५९
हृतोत्तमाङ्गं शकुनिं समीक्ष्य
भूमौ शयानं रुधिरार्द्रगात्रम् ।
योधास्त्वदीया भयनष्टसत्त्वा
दिशः प्रजग्मुः प्रगृहीतशस्त्राः ॥ ६०
विप्रद्रुताः शुष्कमुखा विसंज्ञा
गाण्डीवघोषेण समाहताश्च ।
भयार्दिता भग्नरथाश्वनागाः
पदातयश्चैव सधार्तराष्ट्राः ॥ ६१
ततो रथाच्छकुनिं पातयित्वा
मुदान्विता भारत पाण्डवेयाः ।
शङ्खान्प्रदध्मुः समरे प्रहृष्टाः
सकेशवाः सैनिकान्हर्षयन्तः ॥ ६२
तं चापि सर्वे प्रतिपूजयन्तो
हृष्टा ब्रुवाणाः सहदेवमाजौ ।
दिष्ट्या हतो नैकृतिको दुरात्मा
सहात्मजो वीर रणे त्वयेति ॥ ६३

इति श्रीमहाभारते शल्यपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

संजय उवाच ।

ततः क्रुद्धा महाराज सौबलस्य पदानुगाः ।
त्यक्त्वा जीवितमाक्रन्दे पाण्डवान्पर्यवारयन् ॥ १
तानर्जुनः प्रत्यगृह्णात्सहदेवजये धृतः ।
भीमसेनश्च तेजस्वी क्रुद्धाशीविषदर्शनः ॥ २
शक्त्यृष्टिप्रासहस्तानां सहदेवं जिघांसताम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनंजयः ॥ ३
प्रगृहीतायुधान्बाहून्योधानामभिधावताम् ।
भल्लैश्चिच्छेद बीभत्सुः शिरांस्यपि हयानपि ॥ ४
ते हताः प्रत्यपद्यन्त वसुधां विगतासवः ।
त्वरिता लोकवीरेण प्रहताः सव्यसाचिना ॥ ५
ततो दुर्योधनो राजा दृष्ट्वा स्वबलसंक्षयम् ।
हतशेषान्समानीय क्रुद्धो रथशतान्विभो ॥ ६
कुञ्जरांश्च हयांश्चैव पादातांश्च परंतप ।
उवाच सहितान्सर्वान्धार्तराष्ट्र इदं वचः ॥ ७
समासाद्य रणे सर्वान्पाण्डवान्ससुहृद्गणान् ।
पाञ्चाल्यं चापि सबलं हत्वा शीघ्रं निवर्तत ॥ ८
तस्य ते शिरसा गृह्य वचनं युद्धदुर्मदाः ।
प्रत्युद्ययू रणे पार्थांस्तव पुत्रस्य शासनात् ॥ ९
तानभ्यापततः शीघ्रं हतशेषान्महारणे ।
शरैराशीविषाकारैः पाण्डवाः समवाकिरन् ॥ १०

तत्सैन्यं भरतश्रेष्ठ मुहूर्तेन महात्मभिः ।
अवध्यत रणं प्राप्य त्रातारं नाभ्यविन्दत ।
प्रतिष्ठमानं तु भयान्नावतिष्ठत दंशितम् ॥ ११
अश्वैर्विपरिधावद्भिः सैन्येन रजसा वृते ।
न प्राज्ञायन्त समरे दिशश्च प्रदिशस्तथा ॥ १२
ततस्तु पाण्डवानीकान्निःसृत्य बहवो जनाः ।
अभ्यघ्नंस्तावकान्युद्धे मुहूर्तादिव भारत ।
ततो निःशेषमभवत्तत्सैन्यं तव भारत ॥ १३
अक्षौहिण्यः समेतास्तु तव पुत्रस्य भारत ।
एकादश हता युद्धे ताः प्रभो पाण्डुसृञ्जयैः ॥ १४
तेषु राजसहस्रेषु तावकेषु महात्मसु ।
एको दुर्योधनो राजन्नदृश्यत भृशं क्षतः ॥ १५
ततो वीक्ष्य दिशः सर्वा दृष्ट्वा शून्यां च मेदिनीम् ।
विहीनः सर्वयोधैश्च पाण्डवान्वीक्ष्य संयुगे ॥ १६
मुदितान्सर्वसिद्धार्थान्नर्दमानान्समन्ततः ।
बाणशब्दरवांश्चैव श्रुत्वा तेषां महात्मनाम् ॥ १७
दुर्योधनो महाराज कश्मलेनाभिसंवृतः ।
अपयाने मनश्चक्रे विहीनबलवाहनः ॥ १८

धृतराष्ट्र उवाच ।

निहते मामके सैन्ये निःशेषे शिबिरे कृते ।
पाण्डवानां बलं सूत किं नु शेषमभूत्तदा ।
एतन्मे पृच्छतो ब्रूहि कुशलो ह्यसि संजय ॥ १९
यच्च दुर्योधनो मन्दः कृतवांस्तनयो मम ।
बलक्षयं तथा दृष्ट्वा स एकः पृथिवीपतिः ॥ २०

संजय उवाच ।

रथानां द्वे सहस्रे तु सप्त नागशतानि च ।
पञ्च चाश्वसहस्राणि पत्तीनां च शतं शताः ॥ २१
एतच्छेषमभूद्राजन्पाण्डवानां महद्बलम् ।
परिगृह्य हि यद्युद्धे धृष्टद्युम्नो व्यवस्थितः ॥ २२
एकाकी भरतश्रेष्ठ ततो दुर्योधनो नृपः ।
नापश्यत्समरे कंचित्सहायं रथिनां वरः ॥ २३
नर्दमानान्परांश्चैव स्वबलस्य च संक्षयम् ।
हतं स्वहयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात् ॥ २४
एकादशचमूभर्ता पुत्रो दुर्योधनस्तव ।
गदामादाय तेजस्वी पदातिः प्रस्थितो ह्रदम् ॥२५
नातिदूरं ततो गत्वा पद्भ्यामेव नराधिपः ।
सस्मार वचनं क्षत्तुर्धर्मशीलस्य धीमतः ॥ २६
इदं नूनं महाप्राज्ञो विदुरो दृष्टवान्पुरा ।
महद्वैशसमस्माकं क्षत्रियाणां च संयुगे ॥ २७
एवं विचिन्तयानस्तु प्रविविक्षुर्ह्रदं नृपः ।
दुःखसंतप्तहृदयो दृष्ट्वा राजन्बलक्षयम् ॥ २८
पाण्डवाश्च महाराज धृष्टद्युम्नपुरोगमाः ।
अभ्यधावन्त संक्रुद्धास्तव राजन्बलं प्रति ॥ २९
शक्त्यृष्टिप्रासहस्तानां बलानामभिगर्जताम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनंजयः ॥ ३०
तान्हत्वा निशितैर्बाणैः सामात्यान्सह बन्धुभिः ।
रथे श्वेतहये तिष्ठन्नर्जुनो बह्वशोभत ॥ ३१
सुबलस्य हते पुत्रे सवाजिरथकुञ्जरे ।
महावनमिव छिन्नमभवत्तावकं बलम् ॥ ३२
अनेकशतसाहस्रे बले दुर्योधनस्य ह ।
नान्यो महारथो राजञ्जीवमानो व्यदृश्यत ॥ ३३
द्रोणपुत्राद्दृते वीरात्तथैव कृतवर्मणः ।
कृपाच्च गौतमाद्राजन्पार्थिवाच्च तवात्मजात् ॥ ३४
धृष्टद्युम्नस्तु मां दृष्ट्वा हसन्सात्यकिमब्रवीत् ।
किमनेन गृहीतेन नानेनार्थोऽस्ति जीवता ॥ ३५
धृष्टद्युम्नवचः श्रुत्वा शिनेर्नप्ता महारथः ।
उद्यम्य निशितं खड्गं हन्तुं मामुद्यतस्तदा ॥ ३६
तमागम्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत् ।
मुच्यतां संजयो जीवन्न हन्तव्यः कथंचन ॥ ३७
द्वैपायनवचः श्रुत्वा शिनेर्नप्ता कृताञ्जलिः ।

ततो मामब्रवीन्मुक्त्वा स्वस्ति संजय साधय ॥३८
अनुज्ञातस्त्वहं तेन न्यस्तवर्मा निरायुधः ।
प्रातिष्ठं येन नगरं सायाह्ने रुधिरोक्षितः ॥ ३९
क्रोशमात्रमपक्रान्तं गदापाणिमवस्थितम् ।
एकं दुर्योधनं राजन्नपश्यं भृशविक्षतम् ॥ ४०
स तु मामश्रुपूर्णाक्षो नाशक्नोदभिवीक्षितुम् ।
उपप्रैक्षत मां दृष्ट्वा तदा दीनमवस्थितम् ॥ ४१
तं चाहमपि शोचन्तं दृष्ट्वैकाकिनमाहवे ।
मुहूर्तं नाशकं वक्तुं किंचिद्दुःखपरिप्लुतः ॥ ४२
ततोऽस्मै तदहं सर्वमुक्तवान्ग्रहणं तदा ।
द्वैपायनप्रसादाच्च जीवतो मोक्षमाहवे ॥ ४३
मुहूर्तमिव च ध्यात्वा प्रतिलभ्य च चेतनाम् ।
भ्रातॄंश्च सर्वसैन्यानि पर्यपृच्छत मां ततः ॥ ४४
तस्मै तदहमाचक्षं सर्वं प्रत्यक्षदर्शिवान् ।
भ्रातॄंश्च निहतान्सर्वान्सैन्यं च विनिपातितम् ॥४५
त्रयः किल रथाः शिष्टास्तावकानां नराधिप ।
इति प्रस्थानकाले मां कृष्णद्वैपायनोऽब्रवीत् ॥ ४६
स दीर्घमिव निःश्वस्य विप्रेक्ष्य च पुनः पुनः ।
अंसे मां पाणिना स्पृष्ट्वा पुत्रस्ते पर्यभाषत ॥ ४७
त्वदन्यो नेह संग्रामे कश्चिज्जीवति संजय ।
द्वितीयं नेह पश्यामि ससहायाश्च पाण्डवाः ॥ ४८
ब्रूयाः संजय राजानं प्रज्ञाचक्षुषमीश्वरम् ।
दुर्योधनस्तव सुतः प्रविष्टो ह्रदमित्युत ॥ ४९
सुहृद्भिस्तादृशैर्हीनः पुत्रैर्भ्रातृभिरेव च ।
पाण्डवैश्च हृते राज्ये को नु जीवति मादृशः ॥ ५०
आचक्षेथाः सर्वमिदं मां च मुक्तं महाहवात् ।
अस्मिंस्तोयह्रदे सुप्तं जीवन्तं भृशविक्षतम् ॥ ५१
एवमुक्त्वा महाराज प्राविशत्तं ह्रदं नृपः ।
अस्तम्भयत तोयं च मायया मनुजाधिपः ॥ ५२
तस्मिन्ह्रदं प्रविष्टे तु त्रीन्रथाञ्श्रान्तवाहनान् ।
अपश्यं सहितानेकस्तं देशं समुपेयुषः ॥ ५३
कृपं शारद्वतं वीरं द्रौणिं च रथिनां वरम् ।
भोजं च कृतवर्माणं सहिताञ्शरविक्षतान् ॥ ५४
ते सर्वे मामभिप्रेक्ष्य तूर्णमश्वानचोदयन् ।
उपयाय च मामूचुर्दिष्ट्या जीवसि संजय ॥ ५५
अपृच्छंश्चैव मां सर्वे पुत्रं तव जनाधिपम् ।
कच्चिद्दुर्योधनो राजा स नो जीवति संजय ॥ ५६
आख्यातवानहं तेभ्यस्तदा कुशलिनं नृपम् ।
तच्चैव सर्वमाचक्षं यन्मां दुर्योधनोऽब्रवीत् ।
ह्रदं चैवाहमाचष्ट यं प्रविष्टो नराधिपः ॥ ५७
अश्वत्थामा तु तद्राजन्निशम्य वचनं मम ।
तं ह्रदं विपुलं प्रेक्ष्य करुणं पर्यदेवयत् ॥ ५८
अहो धिङ्न स जानाति जीवतोऽस्मान्नराधिपः ।
पर्याप्ता हि वयं तेन सह योधयितुं परान् ॥ ५९
ते तु तत्र चिरं कालं विलप्य च महारथाः ।
प्राद्रवन्रथिनां श्रेष्ठा दृष्ट्वा पाण्डुसुतान्रणे ॥ ६०
ते तु मां रथमारोप्य कृपस्य सुपरिष्कृतम् ।
सेनानिवेशमाजग्मुर्हतशेषास्त्रयो रथाः ॥ ६१
तत्र गुल्माः परित्रस्ताः सूर्ये चास्तमिते सति ।
सर्वे विचुक्रुशुः श्रुत्वा पुत्राणां तव संक्षयम् ॥ ६२
ततो वृद्धा महाराज योषितां रक्षिणो नराः ।
राजदारानुपादाय प्रययुर्नगरं प्रति ॥ ६३
तत्र विक्रोशतीनां च रुदतीनां च सर्वशः ।
प्रादुरासीन्महाञ्शब्दः श्रुत्वा तद्बलसंक्षयम् ॥ ६४
ततस्ता योषितो राजन्क्रन्दन्त्यो वै मुहुर्मुहुः ।
कुरर्य इव शब्देन नादयन्त्यो महीतलम् ॥ ६५
आजघ्नुः करजैश्चापि पाणिभिश्च शिरांस्युत ।
लुलुवुश्च तदा केशान्क्रोशन्त्यस्तत्र तत्र ह ॥ ६६
हाहाकारविनादिन्यो विनिघ्नन्त्य उरांसि च ।
क्रोशन्त्यस्तत्र रुरुदुः क्रन्दमाना विशां पते ॥ ६७

ततो दुर्योधनामात्याः साश्रुकण्ठा भृशातुराः ।
राजदारानुपादाय प्रययुर्नगरं प्रति ॥ ६८
वेत्रजर्झरहस्ताश्च द्वाराध्यक्षा विशां पते ।
शयनीयानि शुभ्राणि स्पर्ध्यास्तरणवन्ति च ।
समादाय ययुस्तूर्णं नगरं दाररक्षिणः ॥ ६९
आस्थायाश्वतरीयुक्तान्स्यन्दनानपरे जनाः ।
स्वान्स्वान्दारानुपादाय प्रययुर्नगरं प्रति ॥ ७०
अदृष्टपूर्वा या नार्यो भास्करेणापि वेश्मसु ।
ददृशुस्ता महाराज जना यान्तीः पुरं प्रति ॥ ७१
ताः स्त्रियो भरतश्रेष्ठ सौकुमार्यसमन्विताः ।
प्रययुर्नगरं तूर्णं हतस्वजनबान्धवाः ॥ ७२
आ गोपालाविपालेभ्यो द्रवन्तो नगरं प्रति ।
ययुर्मनुष्याः संभ्रान्ता भीमसेनभयार्दिताः ॥ ७३
अपि चैषां भयं तीव्रं पार्थेभ्योऽभूत्सुदारुणम् ।
प्रेक्षमाणास्तदान्योन्यमाधावन्नगरं प्रति ॥ ७४
तस्मिंस्तदा वर्तमाने विद्रवे भृशदारुणे ।
युयुत्सुः शोकसंमूढः प्राप्तकालमचिन्तयत् ॥ ७५
जितो दुर्योधनः संख्ये पाण्डवैर्भीमविक्रमैः ।
एकादशचमूभर्ता भ्रातरश्चास्य सूदिताः ।
हताश्च कुरवः सर्वे भीष्मद्रोणपुरःसराः ॥ ७६
अहमेको विमुक्तस्तु भाग्ययोगाद्यदृच्छया ।
विद्रुतानि च सर्वाणि शिबिराणि समन्ततः ॥ ७७
दुर्योधनस्य सचिवा ये केचिदवशेषिताः ।
राजदारानुपादाय व्यधावन्नगरं प्रति ॥ ७८
प्राप्तकालमहं मन्ये प्रवेशं तैः सहाभिभो ।
युधिष्ठिरमनुज्ञाप्य भीमसेनं तथैव च ॥ ७९
एतमर्थं महाबाहुरुभयोः स न्यवेदयत् ।
तस्य प्रीतोऽभवद्राजा नित्यं करुणवेदिता ।
परिष्वज्य महाबाहुर्वैश्यापुत्रं व्यसर्जयत् ॥ ८०
ततः स रथमास्थाय द्रुतमश्वानचोदयत् ।
असंभावितवांश्चापि राजदारान्पुरं प्रति ॥ ८१
तैश्चैव सहितः क्षिप्रमस्तं गच्छति भास्करे ।
प्रविष्टो हास्तिनपुरं बाष्पकण्ठोऽश्रुलोचनः ॥ ८२
अपश्यत महाप्राज्ञं विदुरं साश्रुलोचनम् ।
राज्ञः समीपान्निष्क्रान्तं शोकोपहतचेतसम् ॥ ८३
तमब्रवीत्सत्यधृतिः प्रणतं त्वग्रतः स्थितम् ।
अस्मिन्कुरुक्षये वृत्ते दिष्ट्या त्वं पुत्र जीवसि ॥ ८४
विना राज्ञः प्रवेशाद्वै किमसि त्वमिहागतः ।
एतन्मे कारणं सर्वं विस्तरेण निवेदय ॥ ८५

युयुत्सुरुवाच ।

निहते शकुनौ तात सज्ञातिसुतबान्धवे ।
हतशेषपरीवारो राजा दुर्योधनस्ततः ।
स्वकं स हयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात् ॥ ८६
अपक्रान्ते तु नृपतौ स्कन्धावारनिवेशनात् ।
भयव्याकुलितं सर्वं प्राद्रवन्नगरं प्रति ॥ ८७
ततो राज्ञः कलत्राणि भ्रातॄणां चास्य सर्वशः ।
वाहनेषु समारोप्य स्त्र्यध्यक्षाः प्राद्रवन्भयात् ॥ ८८
ततोऽहं समनुज्ञाप्य राजानं सहकेशवम् ।
प्रविष्टो हास्तिनपुरं रक्षँल्लोकाद्धि वाच्यताम् ॥ ८९
एतच्छ्रुत्वा तु वचनं वैश्यापुत्रेण भाषितम् ।
प्राप्तकालमिति ज्ञात्वा विदुरः सर्वधर्मवित् ।
अपूजयदमेयात्मा युयुत्सुं वाक्यकोविदम् ॥ ९०
प्राप्तकालमिदं सर्वं भवतो भरतक्षये ।
अद्य त्वमिह विश्रान्तः श्वोऽभिगन्ता युधिष्ठिरम् ॥ ९१
एतावदुक्त्वा वचनं विदुरः सर्वधर्मवित् ।
युयुत्सुं समनुज्ञाप्य प्रविवेश नृपक्षयम् ।
युयुत्सुरपि तां रात्रिं स्वगृहे न्यवसत्तदा ॥ ९२

इति श्रीमहाभारते शल्यपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

॥ समाप्तं ह्रदप्रवेशपर्व ॥

२९

धृतराष्ट्र उवाच ।

हतेषु सर्वसैन्येषु पाण्डुपुत्रै रणाजिरे ।
मम सैन्यावशिष्टास्ते किमकुर्वत संजय ॥ १
कृतवर्मा कृपश्चैव द्रोणपुत्रश्च वीर्यवान् ।
दुर्योधनश्च मन्दात्मा राजा किमकरोत्तदा ॥ २

संजय उवाच ।

संप्राद्रवत्सु दारेषु क्षत्रियाणां महात्मनाम् ।
विद्रुते शिबिरे शून्ये भृशोद्विग्नास्त्रयो रथाः ॥ ३
निशम्य पाण्डुपुत्राणां तदा विजयिनां स्वनम् ।
विद्रुतं शिबिरं दृष्ट्वा सायाह्ने राजगृद्धिनः ।
स्थानं नारोचयंस्तत्र ततस्ते ह्रदमभ्ययुः ॥ ४
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितो रणे ।
हृष्टः पर्यपतद्राजन्दुर्योधनवधेप्सया ॥ ५
मार्गमाणास्तु संक्रुद्धास्तव पुत्रं जयैषिणः ।
यत्नतोऽन्वेषमाणास्तु नैवापश्यञ्जनाधिपम् ॥ ६
स हि तीव्रेण वेगेन गदापाणिरपाक्रमत् ।
तं ह्रदं प्राविशच्चापि विष्टभ्यापः स्वमायया ॥ ७
यदा तु पाण्डवाः सर्वे सुपरिश्रान्तवाहनाः ।
ततः स्वशिबिरं प्राप्य व्यतिष्ठन्सहसैनिकाः ॥ ८
ततः कृपश्च द्रौणिश्च कृतवर्मा च सात्वतः ।
संनिविष्टेषु पार्थेषु प्रयातास्तं ह्रदं शनैः ॥ ९
ते तं ह्रदं समासाद्य यत्र शेते जनाधिपः ।
अभ्यभाषन्त दुर्धर्षं राजानं सुप्तमम्भसि ॥ १०
राजन्नुत्तिष्ठ युध्यस्व सहास्माभिर्युधिष्ठिरम् ।
जित्वा वा पृथिवीं भुङ्क्ष्व हतो वा स्वर्गमाप्नुहि ॥ ११
तेषामपि बलं सर्वं हतं दुर्योधन त्वया ।
प्रतिरब्धाश्च भूयिष्ठं ये शिष्टास्तत्र सैनिकाः ॥ १२
न ते वेगं विषहितुं शक्तास्तव विशां पते ।
अस्माभिरभिगुप्तस्य तस्मादुत्तिष्ठ भारत ॥ १३

दुर्योधन उवाच ।

दिष्ट्या पश्यामि वो मुक्तानीदृशात्पुरुषक्षयात् ।
पाण्डुकौरवसंमर्दाज्जीवमानान्नरर्षभान् ॥ १४
विजेष्यामो वयं सर्वे विश्रान्ता विगतक्लमाः ।
भवन्तश्च परिश्रान्ता वयं च भृशविक्षताः ।
उदीर्णं च बलं तेषां तेन युद्धं न रोचये ॥ १५
न त्वेतदद्भुतं वीरा यद्वो महदिदं मनः ।
अस्मासु च परा भक्तिर्न तु कालः पराक्रमे ॥ १६
विश्रम्यैकां निशामद्य भवद्भिः सहितो रणे ।
प्रतियोत्स्याम्यहं शत्रूञ्श्वो न मेऽस्त्यत्र संशयः ॥ १७

संजय उवाच ।

एवमुक्तोऽब्रवीद्द्रौणी राजानं युद्धदुर्मदम् ।
उत्तिष्ठ राजन्भद्रं ते विजेष्यामो रणे परान् ॥ १८
इष्टापूर्तेन दानेन सत्येन च जपेन च ।
शपे राजन्यथा ह्यद्य निहनिष्यामि सोमकान् ॥ १९
मा स्म यज्ञकृतां प्रीतिं प्राप्नुयां सज्जनोचिताम् ।
यदीमां रजनीं व्युष्टां न निहन्मि परान्रणे ॥ २०
नाहत्वा सर्वपाञ्चालान्विमोक्ष्ये कवचं विभो ।
इति सत्यं ब्रवीम्येतत्तन्मे शृणु जनाधिप ॥ २१
तेषु संभाषमाणेषु व्याधास्तं देशमाययुः ।
मांसभारपरिश्रान्ताः पानीयार्थं यदृच्छया ॥ २२
ते हि नित्यं महाराज भीमसेनस्य लुब्धकाः ।
मांसभारानुपाजह्रुर्भक्त्या परमया विभो ॥ २३
ते तत्र विष्ठितास्तेषां सर्वं तद्वचनं रहः ।
दुर्योधनवचश्चैव शुश्रुवुः संगता मिथः ॥ २४
तेऽपि सर्वे महेष्वासा अयुद्धार्थिनि कौरवे ।
निर्बन्धं परमं चक्रुस्तदा वै युद्धकाङ्क्षिणः ॥ २५
तांस्तथा समुदीक्ष्याथ कौरवाणां महारथान् ।
अयुद्धमनसं चैव राजानं स्थितमम्भसि ॥ २६
तेषां श्रुत्वा च संवादं राज्ञश्च सलिले सतः ।

व्याधाभ्यजानन्राजेन्द्र सलिलस्थं सुयोधनम् ॥ २७
ते पूर्वं पाण्डुपुत्रेण पृष्टा ह्यासन्सुतं तव ।
यदृच्छोपगतास्तत्र राजानं परिमार्गिताः ॥ २८
ततस्ते पाण्डुपुत्रस्य स्मृत्वा तद्भाषितं तदा ।
अन्योन्यमब्रुवन्राजन्मृगव्याधाः शनैरिदम् ॥ २९
दुर्योधनं ख्यापयामो धनं दास्यति पाण्डवः ।
सुव्यक्तमिति नः ख्यातो ह्रदे दुर्योधनो नृपः ॥ ३०
तस्माद्गच्छामहे सर्वे यत्र राजा युधिष्ठिरः ।
आख्यातुं सलिले सुप्तं दुर्योधनममर्षणम् ॥ ३१
धृतराष्ट्रात्मजं तस्मै भीमसेनाय धीमते ।
शयानं सलिले सर्वे कथयामो धनुर्भृते ॥ ३२
स नो दास्यति सुप्रीतो धनानि बहुलान्युत ।
किं नो मांसेन शुष्केण परिक्लिष्टेन शोषिणा ॥ ३३
एवमुक्त्वा ततो व्याधाः संप्रहृष्टा धनार्थिनः ।
मांसभारानुपादाय प्रययुः शिबिरं प्रति ॥ ३४
पाण्डवाश्च महाराज लब्धलक्षाः प्रहारिणः ।
अपश्यमानाः समरे दुर्योधनमवस्थितम् ॥ ३५
निकृतेस्तस्य पापस्य ते पारं गमनेप्सवः ।
चारान्संप्रेषयामासुः समन्तात्तद्रणाजिरम् ॥ ३६
आगम्य तु ततः सर्वे नष्टं दुर्योधनं नृपम् ।
न्यवेदयन्त सहिता धर्मराजस्य सैनिकाः ॥ ३७
तेषां तद्वचनं श्रुत्वा चाराणां भरतर्षभ ।
चिन्तामभ्यगमत्तीव्रां निशश्वास च पार्थिवः ॥ ३८
अथ स्थितानां पाण्डूनां दीनानां भरतर्षभ ।
तस्माद्देशादपक्रम्य त्वरिता लुब्धका विभो ॥ ३९
आजग्मुः शिबिरं हृष्टा दृष्ट्वा दुर्योधनं नृपम् ।
वार्यमाणाः प्रविष्टाश्च भीमसेनस्य पश्यतः ॥ ४०
ते तु पाण्डवमासाद्य भीमसेनं महाबलम् ।
तस्मै तत्सर्वमाचख्युर्यद्वृत्तं यच्च वै श्रुतम् ॥ ४१
ततो वृकोदरो राजन्दत्त्वा तेषां धनं बहु ।
धर्मराजाय तत्सर्वमाचचक्षे परंतपः ॥ ४२
असौ दुर्योधनो राजन्विज्ञातो मम लुब्धकैः ।
संस्तभ्य सलिलं शेते यस्यार्थे परितप्यसे ॥ ४३
तद्वचो भीमसेनस्य प्रियं श्रुत्वा विशां पते ।
अजातशत्रुः कौन्तेयो हृष्टोऽभूत्सह सोदरैः ॥ ४४
तं च श्रुत्वा महेष्वासं प्रविष्टं सलिलह्रदम् ।
क्षिप्रमेव ततोऽगच्छत्पुरस्कृत्य जनार्दनम् ॥ ४५
ततः किलकिलाशब्दः प्रादुरासीद्विशां पते ।
पाण्डवानां प्रहृष्टानां पाञ्चालानां च सर्वशः ॥ ४६
सिंहनादांस्ततश्चक्रुः क्ष्वेडांश्च भरतर्षभ ।
त्वरिताः क्षत्रिया राजञ्जग्मुर्द्वैपायनं ह्रदम् ॥ ४७
ज्ञातः पापो धार्तराष्ट्रो दृष्टश्चेत्यसकृद्रणे ।
प्राक्रोशन्सोमकास्तत्र हृष्टरूपाः समन्ततः ॥ ४८
तेषामाशु प्रयातानां रथानां तत्र वेगिनाम् ।
बभूव तुमुलः शब्दो दिवस्पृक्पृथिवीपते ॥ ४९
दुर्योधनं परीप्सन्तस्तत्र तत्र युधिष्ठिरम् ।
अन्वयुस्त्वरितास्ते वै राजानं श्रान्तवाहनाः ॥ ५०
अर्जुनो भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी चापराजितः ॥ ५१
उत्तमौजा युधामन्युः सात्यकिश्चापराजितः ।
पाञ्चालानां च ये शिष्टा द्रौपदेयाश्च भारत ।
हयाश्च सर्वे नागाश्च शतशश्च पदातयः ॥ ५२
ततः प्राप्तो महाराज धर्मपुत्रो युधिष्ठिरः ।
द्वैपायनह्रदं ख्यातं यत्र दुर्योधनोऽभवत् ॥ ५३
शीतामलजलं हृद्यं द्वितीयमिव सागरम् ।
मायया सलिलं स्तभ्य यत्राभूत्ते सुतः स्थितः ॥ ५४
अत्यद्भुतेन विधिना दैवयोगेन भारत ।
सलिलान्तर्गतः शेते दुर्दर्शः कस्यचित्प्रभो ।
मानुषस्य मनुष्येन्द्र गदाहस्तो जनाधिपः ॥ ५५
ततो दुर्योधनो राजा सलिलान्तर्गतो वसन् ।

शुश्रुवे तुमुलं शब्दं जलदोपमनिःस्वनम् ॥ ५६
युधिष्ठिरस्तु राजेन्द्र ह्रदं तं सह सोदरैः ।
आजगाम महाराज तव पुत्रवधाय वै ॥ ५७
महता शङ्खनादेन रथनेमिस्वनेन च ।
उद्धुन्वंश्च महारेणुं कम्पयंश्चापि मेदिनीम् ॥ ५८
यौधिष्ठिरस्य सैन्यस्य श्रुत्वा शब्दं महारथाः ।
कृतवर्मा कृपो द्रौणी राजानमिदमब्रुवन् ॥ ५९
इमे ह्यायान्ति संहृष्टाः पाण्डवा जितकाशिनः ।
अपयास्यामहे तावदनुजानातु नो भवान् ॥ ६०
दुर्योधनस्तु तच्छ्रुत्वा तेषां तत्र यशस्विनाम् ।
तथेत्युक्त्वा ह्रदं तं वै माययास्तम्भयत्प्रभो ॥ ६१
ते त्वनुज्ञाप्य राजानं भृशं शोकपरायणाः ।
जग्मुर्दूरं महाराज कृपप्रभृतयो रथाः ॥ ६२
ते गत्वा दूरमध्वानं न्यग्रोधं प्रेक्ष्य मारिष ।
न्यविशन्त भृशं श्रान्ताश्चिन्तयन्तो नृपं प्रति ॥६३
विष्टभ्य सलिलं सुप्तो धार्तराष्ट्रो महाबलः ।
पाण्डवाश्चापि संप्राप्तास्तं देशं युद्धमीप्सवः ॥ ६४
कथं नु युद्धं भविता कथं राजा भविष्यति ।
कथं नु पाण्डवा राजन्प्रतिपत्स्यन्ति कौरवम् ॥ ६५
इत्येवं चिन्तयन्तस्ते रथेभ्योऽश्वान्विमुच्य ह ।
तत्रासांचक्रिरे राजन्कृपप्रभृतयो रथाः ॥ ६६

इति श्रीमहाभारते शल्यपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

संजय उवाच ।

ततस्तेष्वपयातेषु रथेषु त्रिषु पाण्डवाः ।
तं ह्रदं प्रत्यपद्यन्त यत्र दुर्योधनोऽभवत् ॥ १
आसाद्य च कुरुश्रेष्ठ तदा द्वैपायनह्रदम् ।
स्तम्भितं धार्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् ।
वासुदेवमिदं वाक्यमब्रवीत्कुरुनन्दनः ॥ २
पश्येमां धार्तराष्ट्रेण मायामप्सु प्रयोजिताम् ।
विष्टभ्य सलिलं शेते नास्य मानुषतो भयम् ॥ ३
दैवीं मायामिमां कृत्वा सलिलान्तर्गतो ह्ययम् ।
निकृत्या निकृतिप्रज्ञो न मे जीवन्विमोक्ष्यते ॥ ४
यद्यस्य समरे साह्यं कुरुते वज्रभृत्स्वयम् ।
तथाप्येनं हतं युद्धे लोको द्रक्ष्यति माधव ॥ ५

श्रीवासुदेव उवाच ।

मायाविन इमां मायां मायया जहि भारत ।
मायावी मायया वध्यः सत्यमेतद्युधिष्ठिर ॥ ६
क्रियाभ्युपायैर्बहुलैर्मायामप्सु प्रयोज्य ह ।
जहि त्वं भरतश्रेष्ठ पापात्मानं सुयोधनम् ॥ ७
क्रियाभ्युपायैरिन्द्रेण निहता दैत्यदानवाः ।
क्रियाभ्युपायैर्बहुभिर्बलिर्बद्धो महात्मना ॥ ८
क्रियाभ्युपायैः पूर्वं हि हिरण्याक्षो महासुरः ।
हिरण्यकशिपुश्चैव क्रिययैव निषूदितौ ।
वृत्रश्च निहतो राजन्क्रिययैव न संशयः ॥ ९
तथा पौलस्त्यतनयो रावणो नाम राक्षसः ।
रामेण निहतो राजन्सानुबन्धः सहानुगः ।
क्रियया योगमास्थाय तथा त्वमपि विक्रम ॥ १०
क्रियाभ्युपायैर्निहतो मया राजन्पुरातने ।
तारकश्च महादैत्यो विप्रचित्तिश्च वीर्यवान् ॥ ११
वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो ।
सुन्दोपसुन्दावसुरौ क्रिययैव निषूदितौ ॥ १२
क्रियाभ्युपायैरिन्द्रेण त्रिदिवं भुज्यते विभो ।
क्रिया बलवती राजन्नान्यत्किंचिद्युधिष्ठिर ॥ १३
दैत्याश्च दानवाश्चैव राक्षसाः पार्थिवास्तथा ।
क्रियाभ्युपायैर्निहताः क्रियां तस्मात्समाचर ॥ १४

संजय उवाच ।

इत्युक्तो वासुदेवेन पाण्डवः संशितव्रतः ।
जलस्थं तं महाराज तव पुत्रं महाबलम् ।

अभ्यभाषत कौन्तेयः प्रहसन्निव भारत ॥ १५
सुयोधन किमर्थोऽयमारम्भोऽप्सु कृतस्त्वया ।
सर्वं क्षत्रं घातयित्वा स्वकुलं च विशां पते ॥ १६
जलाशयं प्रविष्टोऽद्य वाञ्छञ्जीवितमात्मनः ।
उत्तिष्ठ राजन्युध्यस्व सहास्माभिः सुयोधन ॥ १७
स च दर्पो नरश्रेष्ठ स च मानः क ते गतः ।
यस्त्वं संस्तभ्य सलिलं भीतो राजन्व्यवस्थितः ॥१८
सर्वे त्वां शूर इत्येव जना जल्पन्ति संसदि ।
व्यर्थं तद्भवतो मन्ये शौर्यं सलिलशायिनः ॥ १९
उत्तिष्ठ राजन्युध्यस्व क्षत्रियोऽसि कुलोद्भवः ।
कौरवेयो विशेषेण कुले जन्म च संस्मर ॥ २०
स कथं कौरवे वंशे प्रशंसञ्जन्म चात्मनः ।
युद्धाद्भीतस्ततस्तोयं प्रविश्य प्रतितिष्ठसि ॥ २१
अयुद्धमव्यवस्थानं नैष धर्मः सनातनः ।
अनार्यजुष्टमस्वर्ग्यं रणे राजन्पलायनम् ॥ २२
कथं पारमगत्वा हि युद्धे त्वं वै जिजीविषुः ।
इमान्निपतितान्दृष्ट्वा पुत्रान्भ्रातॄन्पितॄंस्तथा ॥ २३
संबन्धिनो वयस्यांश्च मातुलान्बान्धवांस्तथा ।
घातयित्वा कथं तात ह्रदे तिष्ठसि सांप्रतम् ॥ २४
शूरमानी न शूरस्त्वं मिथ्या वदसि भारत ।
शूरोऽहमिति दुर्बुद्धे सर्वलोकस्य शृण्वतः ॥ २५
न हि शूराः पलायन्ते शत्रून्दृष्ट्वा कथंचन ।
ब्रूहि वा त्वं यया धृत्या शूर त्यजसि संगरम् ॥ २६
स त्वमुत्तिष्ठ युध्यस्व विनीय भयमात्मनः ।
घातयित्वा सर्वसैन्यं भ्रातॄंश्चैव सुयोधन ॥ २७
नेदानीं जीविते बुद्धिः कार्या धर्मचिकीर्षया ।
क्षत्रधर्ममपाश्रित्य त्वद्विधेन सुयोधन ॥ २८
यत्तत्कर्णमुपाश्रित्य शकुनिं चापि सौबलम् ।
अमर्त्य इव संमोहात्त्वमात्मानं न बुद्धवान् ॥ २९
तत्पापं सुमहत्कृत्वा प्रतियुध्यस्व भारत ।
कथं हि त्वद्विधो मोहाद्रोचयेत पलायनम् ॥ ३०
क ते तत्पौरुषं यातं क च मानः सुयोधन ।
क च विक्रान्तता याता क च विस्फूर्जितं महत् ॥ ३१
क ते कृतास्त्रता याता किं च शेषे जलाशये ।
स त्वमुत्तिष्ठ युध्यस्व क्षत्रधर्मेण भारत ॥ ३२
अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमाम् ।
अथ वा निहतोऽस्माभिर्भूमौ स्वप्स्यसि भारत ॥३३
एष ते प्रथमो धर्मः सृष्टो धात्रा महात्मना ।
तं कुरुष्व यथातथ्यं राजा भव महारथ ॥ ३४

दुर्योधन उवाच ।

नैतच्चित्रं महाराज यद्भीः प्राणिनमाविशेत् ।
न च प्राणभयाद्भीतो व्यपयातोऽस्मि भारत ॥३५
अरथश्चानिषङ्गी च निहतः पार्ष्णिसारथिः ।
एकश्चाप्यगणः संख्ये प्रत्याश्वासमरोचयम् ॥ ३६
न प्राणहेतोर्न भयान्न विषादाद्विशां पते ।
इदमम्भः प्रविष्टोऽस्मि श्रमात्त्विदमनुष्ठितम् ॥ ३७
त्वं चाश्वसिहि कौन्तेय ये चाप्यनुगतास्तव ।
अहमुत्थाय वः सर्वान्प्रतियोत्स्यामि संयुगे ॥ ३८

युधिष्ठिर उवाच ।

आश्वस्ता एव सर्वे स्म चिरं त्वां मृगयामहे ।
तदिदानीं समुत्तिष्ठ युध्यस्वेह सुयोधन ॥ ३९
हत्वा वा समरे पार्थान्स्फीतं राज्यमवाप्नुहि ।
निहतो वा रणेऽस्माभिर्वीरलोकमवाप्स्यसि ॥ ४०

दुर्योधन उवाच ।

यदर्थं राज्यमिच्छामि कुरूणां कुरुनन्दन ।
त इमे निहताः सर्वे भ्रातरो मे जनेश्वर ॥ ४१
क्षीणरत्नां च पृथिवीं हतक्षत्रियपुंगवाम् ।
नाभ्युत्सहाम्यहं भोक्तुं विधवामिव योषितम् ॥४२
अद्यापि त्वहमाशंसे त्वां विजेतुं युधिष्ठिर ।

भङ्क्त्वा पाञ्चालपाण्डूनामुत्साहं भरतर्षभ ॥ ४३
न त्विदानीमहं मन्ये कार्यं युद्धेन कर्हिचित् ।
द्रोणे कर्णे च संशान्ते निहते च पितामहे ॥ ४४
अस्त्विदानीमियं राजन्केवला पृथिवी तव ।
असहायो हि को राजा राज्यमिच्छेत्प्रशासितुम् ॥४५
सुहृदस्तादृशान्हित्वा पुत्रान्भ्रातॄन्पितॄनपि ।
भवद्भिश्च हृते राज्ये को नु जीवेत मादृशः ॥ ४६
अहं वनं गमिष्यामि ह्यजिनैः प्रतिवासितः ।
रतिर्हि नास्ति मे राज्ये हतपक्षस्य भारत ॥ ४७
हतबान्धवभूयिष्ठा हताश्वा हतकुञ्जरा ।
एषा ते पृथिवी राजन्भुङ्क्ष्वैनां विगतज्वरः ॥ ४८
वनमेव गमिष्यामि वसानो मृगचर्मणी ।
न हि मे निर्जितस्यास्ति जीवितेऽद्य स्पृहा विभो॥४९
गच्छ त्वं भुङ्क्ष्व राजेन्द्र पृथिवीं निहतेश्वराम् ।
हतयोधां नष्टरत्नां क्षीणवप्रां यथासुखम् ॥ ५०

युधिष्ठिर उवाच ।

आर्तप्रलापान्मा तात सलिलस्थः प्रभाषथाः ।
नैतन्मनसि मे राजन्वाशितं शकुनेरिव ॥ ५१
यदि चापि समर्थः स्यास्त्वं दानाय सुयोधन ।
नाहमिच्छेयमवनिं त्वया दत्तां प्रशासितुम् ॥ ५२
अधर्मेण न गृह्णीयां त्वया दत्तां महीमिमाम् ।
न हि धर्मः स्मृतो राजन्क्षत्रियस्य प्रतिग्रहः ॥ ५३
त्वया दत्तां न चेच्छेयं पृथिवीमखिलामहम् ।
त्वां तु युद्धे विनिर्जित्य भोक्तास्मि वसुधामिमाम्॥५४
अनीश्वरश्च पृथिवीं कथं त्वं दातुमिच्छसि ।
त्वयेयं पृथिवी राजन्किं न दत्ता तदैव हि ॥ ५५
धर्मतो याचमानानां शमार्थं च कुलस्य नः ।
वार्ष्णेयं प्रथमं राजन्प्रत्याख्याय महाबलम् ॥ ५६
किमिदानीं ददासि त्वं को हि ते चित्तविभ्रमः ।
अभियुक्तस्तु को राजा दातुमिच्छेद्धि मेदिनीम् ॥५७
न त्वमद्य महीं दातुमीशः कौरवनन्दन ।
आच्छेत्तुं वा बलाद्राजन्स कथं दातुमिच्छसि ।
मां तु निर्जित्य संग्रामे पालयेमां वसुंधराम् ॥ ५८
सूच्यग्रेणापि यद्भूमेरपि ध्रीयेत भारत ।
तन्मात्रमपि नो मह्यं न ददाति पुरा भवान् ॥ ५९
स कथं पृथिवीमेतां प्रददासि विशां पते ।
सूच्यग्रं नात्यजः पूर्वं स कथं त्यजसि क्षितिम् ॥ ६०
एवमैश्वर्यमासाद्य प्रशास्य पृथिवीमिमाम् ।
को हि मूढो व्यवस्येत शत्रोर्दातुं वसुंधराम् ॥ ६१
त्वं तु केवलमौर्ख्येण विमूढो नावबुध्यसे ।
पृथिवीं दातुकामोऽपि जीवितेनाद्य मोक्ष्यसे ॥६२
अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमाम् ।
अथ वा निहतोऽस्माभिर्व्रज लोकाननुत्तमान् ॥६३
आवयोर्जीवतो राजन्मयि च त्वयि च ध्रुवम् ।
संशयः सर्वभूतानां विजये नो भविष्यति ॥ ६४
जीवितं तव दुष्प्रज्ञ मयि संप्रति वर्तते ।
जीवयेयं त्वहं कामं न तु त्वं जीवितुं क्षमः ॥६५
दहने हि कृतो यत्नस्त्वयास्मासु विशेषतः ।
आशीविषैर्विषैश्चापि जले चापि प्रवेशनैः ।
त्वया विनिकृता राजन्राज्यस्य हरणेन च ॥ ६६
एतस्मात्कारणात्पाप जीवितं ते न विद्यते ।
उत्तिष्ठोत्तिष्ठ युध्यस्व तत्ते श्रेयो भविष्यति ॥ ६७

संजय उवाच ।

एवं तु विविधा वाचो जययुक्ताः पुनः पुनः ।
कीर्तयन्ति स्म ते वीरास्तत्र तत्र जनाधिप ॥ ६८

इति श्रीमहाभारते शल्यपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

धृतराष्ट्र उवाच ।

एवं संतर्ज्यमानस्तु मम पुत्रो महीपतिः ।

प्रकृत्या मन्युमान्वीरः कथमासीत्परंतपः ॥ १
न हि संतर्जना तेन श्रुतपूर्वा कदाचन ।
राजभावेन मान्यश्च सर्वलोकस्य सोऽभवत् ॥ २
इयं च पृथिवी सर्वा सम्लेच्छाटविका भृशम् ।
प्रसादाद्ध्रियते यस्य प्रत्यक्षं तव संजय ॥ ३
स तथा तर्ज्यमानस्तु पाण्डुपुत्रैर्विशेषतः ।
विहीनश्च स्वकैर्भृत्यैर्निर्जने चावृतो भृशम् ॥ ४
श्रुत्वा स कटुका वाचो जययुक्ताः पुनः पुनः ।
किमब्रवीत्पाण्डवेयांस्तन्ममाचक्ष्व संजय ॥ ५

संजय उवाच ।

तर्ज्यमानस्तदा राजन्नुदकस्थस्तवात्मजः ।
युधिष्ठिरेण राजेन्द्र भ्रातृभिः सहितेन ह ॥ ६
श्रुत्वा स कटुका वाचो विषमस्थो जनाधिपः ।
दीर्घमुष्णं च निःश्वस्य सलिलस्थः पुनः पुनः ॥ ७
सलिलान्तर्गतो राजा धुन्वन्हस्तौ पुनः पुनः ।
मनश्चकार युद्धाय राजानं चाभ्यभाषत ॥ ८
यूयं ससुहृदः पार्थाः सर्वे सरथवाहनाः ।
अहमेकः परिद्यूनो विरथो हतवाहनः ॥ ९
आत्तशस्त्रै रथगतैर्बहुभिः परिवारितः ।
कथमेकः पदातिः सन्नशस्त्रो योद्धुमुत्सहे ॥ १०
एकैकेन तु मां यूयं योधयध्वं युधिष्ठिर ।
न ह्येको बहुभिर्वीरैर्न्याय्यं योधयितुं युधि ॥ ११
विशेषतो विकवचः श्रान्तश्चापः समाश्रितः ।
भृशं विक्षतगात्रश्च श्रान्तवाहनसैनिकः ॥ १२
न मे त्वत्तो भयं राजन्न च पार्थाद्वृकोदरात् ।
फल्गुनाद्वासुदेवाद्वा पाञ्चालेभ्योऽथ वा पुनः ॥१३
यमाभ्यां युयुधानाद्वा ये चान्ये तव सैनिकाः ।
एकः सर्वानहं क्रुद्धो न तान्योद्धुमिहोत्सहे ॥ १४
धर्ममूला सतां कीर्तिर्मनुष्याणां जनाधिप ।
धर्मं चैवेह कीर्तिं च पालयन्प्रब्रवीम्यहम् ॥ १५
अहमुत्थाय वः सर्वान्प्रतियोत्स्यामि संयुगे ।
अन्वंशाभ्यागतान्सर्वानृतून्संवत्सरो यथा ॥ १६
अद्य वः सरथान्साश्वानशस्त्रो विरथोऽपि सन् ।
नक्षत्राणीव सर्वाणि सविता रात्रिसंक्षये ।
तेजसा नाशयिष्यामि स्थिरीभवत पाण्डवाः ॥ १७
अद्यानृण्यं गमिष्यामि क्षत्रियाणां यशस्विनाम् ।
बाह्लीकद्रोणभीष्माणां कर्णस्य च महात्मनः ॥ १८
जयद्रथस्य शूरस्य भगदत्तस्य चोभयोः ।
मद्रराजस्य शल्यस्य भूरिश्रवस एव च ॥ १९
पुत्राणां भरतश्रेष्ठ शकुनेः सौबलस्य च ।
मित्राणां सुहृदां चैव बान्धवानां तथैव च ॥ २०
आनृण्यमद्य गच्छामि हत्वा त्वां भ्रातृभिः सह ।
एतावदुक्त्वा वचनं विरराम जनाधिपः ॥ २१

युधिष्ठिर उवाच ।

दिष्ट्या त्वमपि जानीषे क्षत्रधर्मं सुयोधन ।
दिष्ट्या ते वर्तते बुद्धिर्युद्धायैव महाभुज ॥ २२
दिष्ट्या शूरोऽसि कौरव्य दिष्ट्या जानासि संगरम् ।
यस्त्वमेको हि नः सर्वान्संयुगे योद्धुमिच्छसि ॥ २३
एक एकेन संगम्य यत्ते संमतमायुधम् ।
तत्त्वमादाय युध्यस्व प्रेक्षकास्ते वयं स्थिताः ॥ २४
अयमिष्टं च ते कामं वीर भूयो ददाम्यहम् ।
हत्वैकं भवतो राज्यं हतो वा स्वर्गमाप्नुहि ॥ २५

दुर्योधन उवाच ।

एकश्चेद्योद्धुमाक्रन्दे वरोऽद्य मम दीयते ।
आयुधानामियं चापि वृता त्वत्संमते गदा ॥ २६
भ्रातॄणां भवतामेकः शक्यं मां योऽभिमन्यते ।
पदातिर्गदया संख्ये स युध्यतु मया सह ॥ २७
वृत्तानि रथयुद्धानि विचित्राणि पदे पदे ।
इदमेकं गदायुद्धं भवत्वद्याद्भुतं महत् ॥ २८
अन्नानामपि पर्यायं कर्तुमिच्छन्ति मानवाः ।

युद्धानामपि पर्यायो भवत्वनुमते तव ॥ २९
गदया त्वां महाबाहो विजेष्यामि सहानुजम् ।
पाञ्चालान्सृञ्जयांश्चैव ये चान्ये तव सैनिकाः ॥३०

युधिष्ठिर उवाच ।

उत्तिष्ठोत्तिष्ठ गान्धारे मां योधय सुयोधन ।
एक एकेन संगम्य संयुगे गदया बली ॥ ३१
पुरुषो भव गान्धारे युध्यस्व सुसमाहितः ।
अद्य ते जीवितं नास्ति यद्यपि त्वं मनोजवः ॥३२

संजय उवाच ।

एतत्स नरशार्दूलो नामृष्यत तवात्मजः ।
सलिलान्तर्गतः श्वभ्रे महानाग इव श्वसन् ॥ ३३
तथासौ वाक्प्रतोदेन तुद्यमानः पुनः पुनः ।
वाचं न ममृषे धीमानुत्तमाश्वः कशामिव ॥ ३४
संक्षोभ्य सलिलं वेगाद्गदामादाय वीर्यवान् ।
अद्रिसारमयीं गुर्वीं काञ्चनाङ्गदभूषणाम् ।
अन्तर्जलात्समुत्तस्थौ नागेन्द्र इव निःश्वसन् ॥ ३५
स भित्त्वा स्तम्भितं तोयं स्कन्धे कृत्वायसीं गदाम् ।
उदतिष्ठत पुत्रस्ते प्रतपन्रश्मिमानिव ॥ ३६
ततः शैक्यायसीं गुर्वीं जातरूपपरिष्कृताम् ।
गदां परामृशद्धीमान्धार्तराष्ट्रो महाबलः ॥ ३७
गदाहस्तं तु तं दृष्ट्वा सशृङ्गमिव पर्वतम् ।
प्रजानामिव संक्रुद्धं शूलपाणिमवस्थितम् ।
सगदो भारतो भाति प्रतपन्भास्करो यथा ॥ ३८
तमुत्तीर्णं महाबाहुं गदाहस्तमरिंदमम् ।
मेनिरे सर्वभूतानि दण्डहस्तमिवान्तकम् ॥ ३९
वज्रहस्तं यथा शक्रं शूलहस्तं यथा हरम् ।
ददृशुः सर्वपाञ्चालाः पुत्रं तव जनाधिप ॥ ४०
तमुत्तीर्णं तु संप्रेक्ष्य समहृष्यन्त सर्वशः ।
पाञ्चालाः पाण्डवेयाश्च तेऽन्योन्यस्य तलान्ददुः ॥४१
अवहासं तु तं मत्वा पुत्रो दुर्योधनस्तव ।
उद्वृत्य नयने क्रुद्धो दिधक्षुरिव पाण्डवान् ॥ ४२
त्रिशिखां भ्रुकुटीं कृत्वा संदष्टदशनच्छदः ।
प्रत्युवाच ततस्तान्वै पाण्डवान्सहकेशवान् ॥ ४३
अवहासस्य वोऽस्याद्य प्रतिवक्तास्मि पाण्डवाः ।
गमिष्यथ हताः सद्यः सपाञ्चाला यमक्षयम् ॥ ४४
उत्थितस्तु जलात्तस्मात्पुत्रो दुर्योधनस्तव ।
अतिष्ठत गदापाणी रुधिरेण समुक्षितः ॥ ४५
तस्य शोणितदिग्धस्य सलिलेन समुक्षितम् ।
शरीरं स्म तदा भाति स्रवन्निव महीधरः ॥ ४६
तमुद्यतगदं वीरं मेनिरे तत्र पाण्डवाः ।
वैवस्वतमिव क्रुद्धं किंकरोद्यतपाणिनम् ॥ ४७
स मेघनिनदो हर्षान्नदन्निव च गोवृषः ।
आजुहाव ततः पार्थान्गदया युधि वीर्यवान् ॥ ४८

दुर्योधन उवाच ।

एकैकेन च मां यूयमासीदत युधिष्ठिर ।
न ह्येको बहुभिर्न्याय्यो वीर योधयितुं युधि ॥४९
न्यस्तवर्मा विशेषेण श्रान्तश्चाप्सु परिप्लुतः ।
भृशं विक्षतगात्रश्च हतवाहनसैनिकः ॥ ५०

युधिष्ठिर उवाच ।

नाभूदियं तव प्रज्ञा कथमेवं सुयोधन ।
यदाभिमन्युं बहवो जघ्नुर्युधि महारथाः ॥ ५१
आमुञ्च कवचं वीर मूर्धजान्यमयस्व च ।
यच्चान्यदपि ते नास्ति तदप्यादत्स्व भारत ।
इममेकं च ते कामं वीर भूयो ददाम्यहम् ॥ ५२
पञ्चानां पाण्डवेयानां येन योद्धुमिहेच्छसि ।
तं हत्वा वै भवान्राजा हतो वा स्वर्गमाप्नुहि ।
ऋते च जीविताद्वीर युद्धे किं कुर्म ते प्रियम् ॥ ५३

संजय उवाच ।

ततस्तव सुतो राजन्वर्म जग्राह काञ्चनम् ।

विचित्रं च शिरस्त्राणं जाम्बूनदपरिष्कृतम् ॥ ५४
सोऽवबद्धशिरस्त्राणः शुभकाञ्चनवर्मभृत् ।
राज राजन्पुत्रस्ते काञ्चनः शैलराडिव ॥ ५५
संनद्धः स गदी राजन्सज्जः संग्राममूर्धनि ।
अब्रवीत्पाण्डवान्सर्वान्पुत्रो दुर्योधनस्तव ॥ ५६
भ्रातॄणां भवतामेको युध्यतां गदया मया ।
सहदेवेन वा योत्स्ये भीमेन नकुलेन वा ॥ ५७
अथ वा फल्गुनेनाद्य त्वया वा भरतर्षभ ।
योत्स्येऽहं संगरं प्राप्य विजेष्ये च रणाजिरे ॥५८
अहमद्य गमिष्यामि वैरस्यान्तं सुदुर्गमम् ।
गदया पुरुषव्याघ्र हेमपट्टविनद्धया ॥ ५९
गदायुद्धे न मे कश्चित्सदृशोऽस्तीति चिन्तय ।
गदया वो हनिष्यामि सर्वानेव समागतान् ।
गृह्णातु स गदां यो वै युध्यतेऽद्य मया सह ॥ ६०

इति श्रीमहाभारते शल्यपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

संजय उवाच ।

एवं दुर्योधने राजन्गर्जमाने मुहुर्मुहुः ।
युधिष्ठिरस्य संक्रुद्धो वासुदेवोऽब्रवीदिदम् ॥ १
यदि नाम ह्ययं युद्धे वरयेत्त्वां युधिष्ठिर ।
अर्जुनं नकुलं वापि सहदेवमथापि वा ॥ २
किमिदं साहसं राजंस्त्वया व्याहृतमीदृशम् ।
एकमेव निहत्याजौ भव राजा कुरुष्विति ॥ ३
एतेन हि कृता योग्या वर्षाणीह त्रयोदश ।
आयसे पुरुषे राजन्भीमसेनजिघांसया ॥ ४
कथं नाम भवेत्कार्यमस्माभिर्भरतर्षभ ।
साहसं कृतवांस्त्वं तु ह्यनुक्रोशान्नृपोत्तम ॥ ५
नान्यमस्यानुपश्यामि प्रतियोद्धारमाहवे ।
ऋते वृकोदरात्पार्थात्स च नातिकृतश्रमः ॥ ६
तदिदं द्यूतमारब्धं पुनरेव यथा पुरा ।
विषमं शकुनेश्चैव तव चैव विशां पते ॥ ७
बली भीमः समर्थश्च कृती राजा सुयोधनः ।
बलवान्वा कृती वेति कृती राजन्विशिष्यते ॥ ८
सोऽयं राजंस्त्वया शत्रुः समे पथि निवेशितः ।
न्यस्तश्चात्मा सुविषमे कृच्छ्रमापादिता वयम् ॥ ९
को नु सर्वान्विनिर्जित्य शत्रूनेकेन वैरिणा ।
पणित्वा चैकपाणेन रोचयेदेवमाहवम् ॥ १०
न हि पश्यामि तं लोके गदाहस्तं नरोत्तमम् ।
युध्येद्दुर्योधनं संख्ये कृतित्वाद्धि विशेषयेत् ॥ ११
फल्गुनं वा भवन्तं वा माद्रीपुत्रावथापि वा ।
न समर्थानहं मन्ये गदाहस्तस्य संयुगे ॥ १२
स कथं वदसे शत्रुं युध्यस्व गदयेति ह ।
एकं च नो निहत्याजौ भव राजेति भारत ॥ १३
वृकोदरं समासाद्य संशयो विजये हि नः ।
न्यायतो युध्यमानानां कृती ह्येष महाबलः ॥ १४

भीम उवाच ।

मधुसूदन मा कार्षीर्विषादं यदुनन्दन ।
अद्य पारं गमिष्यामि वैरस्य भृशदुर्गमम् ॥ १५
अहं सुयोधनं संख्ये हनिष्यामि न संशयः ।
विजयो वै ध्रुवं कृष्ण धर्मराजस्य दृश्यते ॥ १६
अध्यर्धेन गुणेनेयं गदा गुरुतरी मम ।
न तथा धार्तराष्ट्रस्य मा कार्षीर्माधव व्यथाम् ॥१७
सामरानपि लोकांस्त्रीन्नानाशस्त्रधरान्युधि ।
योधयेयं रणे हृष्टः किमुताद्य सुयोधनम् ॥ १८

संजय उवाच ।

तथा संभाषमाणं तु वासुदेवो वृकोदरम् ।
हृष्टः संपूजयामास वचनं चेदमब्रवीत् ॥ १९
त्वामाश्रित्य महाबाहो धर्मराजो युधिष्ठिरः ।
निहतारिः स्वकां दीप्तां श्रियं प्राप्तो न संशयः ॥२०

त्वया विनिहताः सर्वे धृतराष्ट्रसुता रणे ।
राजानो राजपुत्राश्च नागाश्च विनिपातिताः ॥ २१
कलिङ्गा मागधाः प्राच्या गान्धाराः कुरवस्तथा ।
त्वामासाद्य महायुद्धे निहताः पाण्डुनन्दन ॥ २२
हत्वा दुर्योधनं चापि प्रयच्छोर्वीं ससागराम् ।
धर्मराजाय कौन्तेय यथा विष्णुः शचीपतेः ॥ २३
त्वां च प्राप्य रणे पापो धार्तराष्ट्रो विनङ्क्ष्यति ।
त्वमस्य सक्थिनी भङ्क्त्वा प्रतिज्ञां पारयिष्यसि ॥
यत्नेन तु सदा पार्थ योद्धव्यो धृतराष्ट्रजः ।
कृती च बलवांश्चैव युद्धशौण्डश्च नित्यदा ॥ २५
ततस्तु सात्यकी राजन्पूजयामास पाण्डवम् ।
विविधाभिश्च तं वाग्भिः पूजयामास माधवः ॥२६
पाञ्चालाः पाण्डवेयाश्च धर्मराजपुरोगमाः ।
तद्वचो भीमसेनस्य सर्व एवाभ्यपूजयन् ॥ २७
ततो भीमबलो भीमो युधिष्ठिरमथाब्रवीत् ।
सृञ्जयैः सह तिष्ठन्तं तपन्तमिव भास्करम् ॥ २८
अहमेतेन संगम्य संयुगे योद्धुमुत्सहे ।
न हि शक्तो रणे जेतुं मामेष पुरुषाधमः ॥ २९
अद्य क्रोधं विमोक्ष्यामि निहितं हृदये भृशम् ।
सुयोधने धार्तराष्ट्रे खाण्डवेऽग्निमिवार्जुनः ॥ ३०
शल्यमद्योद्धरिष्यामि तव पाण्डव हृच्छयम् ।
निहत्य गदया पापमद्य राजन्सुखी भव ॥ ३१
अद्य कीर्तिमयीं मालां प्रतिमोक्ष्ये तवानघ ।
प्राणाञ्श्रियं च राज्यं च मोक्ष्यतेऽद्य सुयोधनः ॥३२
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं मया हतम् ।
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ॥ ३३
इत्युक्त्वा भरतश्रेष्ठो गदामुद्यम्य वीर्यवान् ।
उदतिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ॥ ३४
तमेकाकिनमासाद्य धार्तराष्ट्रं महाबलम् ।
निर्यूथमिव मातङ्गं समहृष्यन्त पाण्डवाः ॥ ३५
तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनस्तदा राजन्दुर्योधनमथाब्रवीत् ॥ ३६
राज्ञापि धृतराष्ट्रेण त्वया चास्मासु यत्कृतम् ।
स्मर तद्दुष्कृतं कर्म यद्वृत्तं वारणावते ॥ ३७
द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला ।
द्यूते यद्विजितो राजा शकुनेर्बुद्धिनिश्चयात् ॥ ३८
यानि चान्यानि दुष्टात्मन्पापानि कृतवानसि ।
अनागःसु च पार्थेषु तस्य पश्य महत्फलम् ॥ ३९
त्वत्कृते निहतः शेते शरतल्पे महायशाः ।
गाङ्गेयो भरतश्रेष्ठः सर्वेषां नः पितामहः ॥ ४०
हतो द्रोणश्च कर्णश्च हतः शल्यः प्रतापवान् ।
वैरस्य चादिकर्तासौ शकुनिर्निहतो युधि ॥ ४१
भ्रातरस्ते हताः शूराः पुत्राश्च सहसैनिकाः ।
राजानश्च हताः शूराः समरेष्वनिवर्तिनः ॥ ४२
एते चान्ये च निहता बहवः क्षत्रियर्षभाः ।
प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः ॥ ४३
अवशिष्टस्त्वमेवैकः कुलघ्नोऽधमपूरुषः ।
त्वामप्यद्य हनिष्यामि गदया नात्र संशयः ॥ ४४
अद्य तेऽहं रणे दर्पं सर्वं नाशयिता नृप ।
राज्याशां विपुलां राजन्पाण्डवेषु च दुष्कृतम् ॥ ४५

दुर्योधन उवाच ।

किं कत्थितेन बहुधा युध्यस्वाद्य मया सह ।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां वृकोदर ॥ ४६
किं न पश्यसि मां पाप गदायुद्धे व्यवस्थितम् ।
हिमवच्छिखराकारां प्रगृह्य महतीं गदाम् ॥ ४७
गदिनं कोऽद्य मां पाप जेतुमुत्सहते रिपुः ।
न्यायतो युध्यमानस्य देवेष्वपि पुरंदरः ॥ ४८
मा वृथा गर्ज कौन्तेय शारदाभ्रमिवाजलम् ।
दर्शयस्व बलं युद्धे यावत्तत्तेऽद्य विद्यते ॥ ४९
तस्य तद्वचनं श्रुत्वा पाञ्चालाः सहसृञ्जयाः ।

सर्वे संपूजयामासुस्तद्वचो विजिगीषवः ॥ ५०
तं मत्तमिव मातङ्गं तलशब्देन मानवाः ।
भूयः संहर्षयामासू राजन्दुर्योधनं नृपम् ॥ ५१
बृंहन्ति कुञ्जरास्तत्र हया ह्रेषन्ति चासकृत् ।
शस्त्राणि संप्रदीप्यन्ते पाण्डवानां जयैषिणाम् ॥ ५२

इति श्रीमहाभारते शल्यपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

संजय उवाच ।

तस्मिन्युद्धे महाराज संप्रवृत्ते सुदारुणे ।
उपविष्टेषु सर्वेषु पाण्डवेषु महात्मसु ॥ १
ततस्तालध्वजो रामस्तयोर्युद्ध उपस्थिते ।
श्रुत्वा तच्छिष्ययो राजन्नाजगाम हलायुधः ॥ २
तं दृष्ट्वा परमप्रीताः पूजयित्वा नराधिपाः ।
शिष्ययोः कौशलं युद्धे पश्य रामेति चाब्रुवन् ॥ ३
अब्रवीच्च तदा रामो दृष्ट्वा कृष्णं च पाण्डवम् ।
दुर्योधनं च कौरव्यं गदापाणिमवस्थितम् ॥ ४
चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै ।
पुष्येण संप्रयातोऽस्मि श्रवणे पुनरागतः ।
शिष्ययोर्वै गदायुद्धं द्रष्टुकामोऽस्मि माधव ॥ ५
ततो युधिष्ठिरो राजा परिष्वज्य हलायुधम् ।
स्वागतं कुशलं चास्मै पर्यपृच्छद्यथातथम् ॥ ६
कृष्णौ चापि महेष्वासावभिवाद्य हलायुधम् ।
सस्वजाते परिप्रीतौ प्रियमाणौ यशस्विनौ ॥ ७
माद्रीपुत्रौ तथा शूरौ द्रौपद्याः पञ्च चात्मजाः ।
अभिवाद्य स्थिता राजन्रौहिणेयं महाबलम् ॥ ८
भीमसेनोऽथ बलवान्पुत्रस्तव जनाधिप ।
तथैव चोद्यतगदौ पूजयामासतुर्बलम् ॥ ९
स्वागतेन च ते तत्र प्रतिपूज्य पुनः पुनः ।
पश्य युद्धं महाबाहो इति ते राममब्रुवन् ।
एवमूचुर्महात्मानं रौहिणेयं नराधिपाः ॥ १०
परिष्वज्य तदा रामः पाण्डवान्सृञ्जयानपि ।
अपृच्छत्कुशलं सर्वान्पाण्डवांश्चामितौजसः ।
तथैव ते समासाद्य पप्रच्छुस्तमनामयम् ॥ ११
प्रत्यभ्यर्च्य हली सर्वान्क्षत्रियांश्च महामनाः ।
कृत्वा कुशलसंयुक्तां संविदं च यथावयः ॥ १२
जनार्दनं सात्यकिं च प्रेम्णा स परिषस्वजे ।
मूर्ध्नि चैतावुपाघ्राय कुशलं पर्यपृच्छत ॥ १३
तौ चैनं विधिवद्राजन्पूजयामासतुर्गुरुम् ।
ब्रह्माणमिव देवेशमिन्द्रोपेन्द्रौ मुदा युतौ ॥ १४
ततोऽब्रवीद्धर्मसुतो रौहिणेयमरिंदमम् ।
इदं भ्रात्रोर्महायुद्धं पश्य रामेति भारत ॥ १५
तेषां मध्ये महाबाहुः श्रीमान्केशवपूर्वजः ।
न्यविशत्परमप्रीतः पूज्यमानो महारथैः ॥ १६
स बभौ राजमध्यस्थो नीलवासाः सितप्रभः ।
दिवीव नक्षत्रगणैः परिकीर्णो निशाकरः ॥ १७
ततस्तयोः संनिपातस्तुमुलो लोमहर्षणः ।
आसीदन्तकरो राजन्वैरस्य तव पुत्रयोः ॥ १८

इति श्रीमहाभारते शल्यपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

जनमेजय उवाच ।

पूर्वमेव यदा रामस्तस्मिन्युद्ध उपस्थिते ।
आमन्त्र्य केशवं यातो वृष्णिभिः सहितः प्रभुः ॥ १
साहाय्यं धार्तराष्ट्रस्य न च कर्तास्मि केशव ।
न चैव पाण्डुपुत्राणां गमिष्यामि यथागतम् ॥ २
एवमुक्त्वा तदा रामो यातः शत्रुनिबर्हणः ।
तस्य चागमनं भूयो ब्रह्मञ्शंसितुमर्हसि ॥ ३
आख्याहि मे विस्तरतः कथं राम उपस्थितः ।
कथं च दृष्टवान्युद्धं कुशलो ह्यसि सत्तम ॥ ४

वैशंपायन उवाच ।

उपप्लव्ये निविष्टेषु पाण्डवेषु महात्मसु ।
प्रेषितो धृतराष्ट्रस्य समीपं मधुसूदनः ।
शमं प्रति महाबाहो हितार्थं सर्वदेहिनाम् ॥ ५
स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च ।
उक्तवान्वचनं तथ्यं हितं चैव विशेषतः ।
न च तत्कृतवान्राजा यथाख्यातं हि ते पुरा ॥ ६
अनवाप्य शमं तत्र कृष्णः पुरुषसत्तमः ।
आगच्छत महाबाहुरुपप्लव्यं जनाधिप ॥ ७
ततः प्रत्यागतः कृष्णो धार्तराष्ट्रविसर्जितः ।
अक्रियायां नरव्याघ्र पाण्डवानिदमब्रवीत् ॥ ८
न कुर्वन्ति वचो मह्यं कुरवः कालचोदिताः ।
निर्गच्छध्वं पाण्डवेयाः पुष्येण सहिता मया ॥ ९
ततो विभज्यमानेषु बलेषु बलिनां वरः ।
प्रोवाच भ्रातरं कृष्णं रौहिणेयो महामनाः ॥ १०
तेषामपि महाबाहो साहाय्यं मधुसूदन ।
क्रियतामिति तत्कृष्णो नास्य चक्रे वचस्तदा ॥ ११
ततो मन्युपरीतात्मा जगाम यदुनन्दनः ।
तीर्थयात्रां हलधरः सरस्वत्यां महायशाः ।
मैत्रे नक्षत्रयोगे स्म सहितः सर्वयादवैः ॥ १२
आश्रयामास भोजस्तु दुर्योधनमरिंदमः ।
युयुधानेन सहितो वासुदेवस्तु पाण्डवान् ॥ १३
रौहिणेये गते शूरे पुष्येण मधुसूदनः ।
पाण्डवेयान्पुरस्कृत्य ययावभिमुखः कुरून् ॥ १४
गच्छन्नेव पथिस्थस्तु रामः प्रेष्यानुवाच ह ।
संभारांस्तीर्थयात्रायां सर्वोपकरणानि च ।
आनयध्वं द्वारकाया अग्नीन्वै याजकांस्तथा ॥ १५
सुवर्णं रजतं चैव धेनूर्वासांसि वाजिनः ।
कुञ्जरांश्च रथांश्चैव खरोष्ट्रं वाहनानि च ।
क्षिप्रमानीयतां सर्वं तीर्थहेतोः परिच्छदम् ॥ १६
प्रतिस्रोतः सरस्वत्या गच्छध्वं शीघ्रगामिनः ।
ऋत्विजश्चानयध्वं वै शतशश्च द्विजर्षभान् ॥ १७
एवं संदिश्य तु प्रेष्यान्बलदेवो महाबलः ।
तीर्थयात्रां ययौ राजन्कुरूणां वैशसे तदा ।
सरस्वतीं प्रतिस्रोतः समुद्रादभिजग्मिवान् ॥ १८
ऋत्विग्भिश्च सुहृद्भिश्च तथान्यैर्द्विजसत्तमैः ।
रथैर्गजैस्तथाश्वैश्च प्रेष्यैश्च भरतर्षभ ।
गोखरोष्ट्रप्रयुक्तैश्च यानैश्च बहुभिर्वृतः ॥ १९
श्रान्तानां क्लान्तवपुषां शिशूनां विपुलायुषाम् ।
तानि यानानि देशेषु प्रतीक्ष्यन्ते स्म भारत ।
बुभुक्षितानामर्थाय क्लृप्तमन्नं समन्ततः ॥ २०
यो यो यत्र द्विजो भोक्तुं कामं कामयते तदा ।
तस्य तस्य तु तत्रैवमुपजह्रुस्तदा नृप ॥ २१
तत्र स्थिता नरा राजन्रौहिणेयस्य शासनात् ।
भक्ष्यपेयस्य कुर्वन्ति राशींस्तत्र समन्ततः ॥ २२
वासांसि च महार्हाणि पर्यङ्कास्तरणानि च ।
पूजार्थं तत्र क्लृप्तानि विप्राणां सुखमिच्छताम् ॥२३
यत्र यः स्वपते विप्रः क्षत्रियो वापि भारत ।
तत्र तत्र तु तस्यैव सर्वं क्लृप्तमदृश्यत ॥ २४
यथासुखं जनः सर्वस्तिष्ठते याति वा तदा ।
यातुकामस्य यानानि पानानि तृषितस्य च ॥ २५
बुभुक्षितस्य चान्नानि स्वादूनि भरतर्षभ ।
उपजह्रुर्नरास्तत्र वस्त्राण्याभरणानि च ॥ २६
स पन्थाः प्रबभौ राजन्सर्वस्यैव सुखावहः ।
स्वर्गोपमस्तदा वीर नराणां तत्र गच्छताम् ॥ २७
नित्यप्रमुदितोपेतः स्वादुभक्षः शुभान्वितः ।
विपण्यापणपण्यानां नानाजनशतैर्वृतः ।
नानाद्रुमलतोपेतो नानारत्नविभूषितः ॥ २८
ततो महात्मा नियमे स्थितात्मा
पुण्येषु तीर्थेषु वसूनि राजन् ।

दद‍ौ द्विजेभ्यः क्रतुदक्षिणाश्च
यदुप्रवीरो हलभृत्प्रतीतः ॥ २९
दोग्ध्रीश्च धेनूश्च सहस्रशो वै
सुवाससः काञ्चनबद्धशृङ्गीः ।
हयांश्च नानाविधदेशजाता-
न्यानानि दासीश्च तथा द्विजेभ्यः ॥ ३०
रत्नानि मुक्तामणिविद्रुमं च
शृङ्गीसुवर्णं रजतं च शुभ्रम् ।
अयस्मयं ताम्रमयं च भाण्डं
दद‍ौ द्विजातिप्रवरेषु रामः ॥ ३१
एवं स वित्तं प्रददौ महात्मा
सरस्वतीतीर्थवरेषु भूरि ।
ययौ क्रमेणाप्रतिमप्रभाव-
स्ततः कुरुक्षेत्रमुदारवृत्तः ॥ ३२

जनमेजय उवाच ।

स्वतानां तीर्थानां गुणोत्पत्तिं वदस्व मे ।
ं च द्विपदां श्रेष्ठ कर्मनिर्वृत्तिमेव च ॥ ३३
क्रमं च भगवंस्तीर्थानामनुपूर्वशः ।
ब्रह्मविदां श्रेष्ठ परं कौतूहलं हि मे ॥ ३४

वैशंपायन उवाच ।

र्थानां विस्तरं राजन्गुणोत्पत्तिं च सर्वशः ।
च्यमानां शृणु वै पुण्यां राजेन्द्र कृत्स्नशः ॥ ३५
पूर्वं महाराज यदुप्रवीर
ऋत्विक्सुहृद्विप्रगणैश्च सार्धम् ।
पुण्यं प्रभासं समुपाजगाम
यत्रोडुराड्यक्ष्मणा क्लिश्यमानः ॥ ३६
विमुक्तशापः पुनराप्य तेजः
सर्वं जगद्भासयते नरेन्द्र ।
एवं तु तीर्थप्रवरं पृथिव्यां
प्रभासनात्तस्य ततः प्रभासः ॥ ३७

जनमेजय उवाच ।

किमर्थं भगवान्सोमो यक्ष्मणा समगृह्यत ।
कथं च तीर्थप्रवरे तस्मिंश्चन्द्रो न्यमज्जत ॥ ३८
कथमाप्लुत्य तस्मिंस्तु पुनराप्यायितः शशी ।
एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ॥ ३९

वैशंपायन उवाच ।

दक्षस्य तनया यास्ताः प्रादुरासन्विशां पते ।
स सप्तविंशतिं कन्या दक्षः सोमाय वै ददौ ॥ ४०
नक्षत्रयोगनिरताः संख्यानार्थं च भारत ।
पत्न्यो वै तस्य राजेन्द्र सोमस्य शुभलक्षणाः ॥ ४१
तास्तु सर्वा विशालाक्ष्यो रूपेणाप्रतिमा भुवि ।
अत्यरिच्यत तासां तु रोहिणी रूपसंपदा ॥ ४२
ततस्तस्यां स भगवान्प्रीतिं चक्रे निशाकरः ।
सास्य हृद्या बभूवाथ तस्मात्तां बुभुजे सदा ॥ ४३
पुरा हि सोमो राजेन्द्र रोहिण्यामवसच्चिरम् ।
ततोऽस्य कुपितान्यासन्नक्षत्राणि महात्मनः ॥ ४४
ता गत्वा पितरं प्राहुः प्रजापतिमतन्द्रिताः ।
सोमो वसति नास्मासु रोहिणीं भजते सदा ॥ ४५
ता वयं सहिताः सर्वास्त्वत्सकाशे प्रजेश्वर ।
वत्स्यामो नियताहारास्तपश्चरणतत्पराः ॥ ४६
श्रुत्वा तासां तु वचनं दक्षः सोममथाब्रवीत् ।
समं वर्तस्व भार्यासु मा त्वाधर्मो महान्स्पृशेत् ॥ ४७
ताश्च सर्वाब्रवीद्दक्षो गच्छध्वं सोममन्तिकात् ।
समं वत्स्यति सर्वासु चन्द्रमा मम शासनात् ॥ ४८
विसृष्टास्तास्तदा जग्मुः शीतांशुभवनं तदा ।
तथापि सोमो भगवान्पुनरेव महीपते ।
रोहिणीं निवसत्येव प्रीयमाणो मुहुर्मुहुः ॥ ४९
ततस्ताः सहिताः सर्वा भूयः पितरमब्रुवन् ।
तव शुश्रूषणे युक्ता वत्स्यामो हि तवाश्रमे ।
सोमो वसति नास्मासु नाकरोद्वचनं तव ॥ ५०

तासां तद्वचनं श्रुत्वा दक्षः सोममथाब्रवीत् ।
समं वर्तस्व भार्यासु मा त्वां शप्स्ये विरोचन ॥ ५१
अनादृत्य तु तद्वाक्यं दक्षस्य भगवाञ्शशी ।
रोहिण्या सार्धमवसत्ततस्ताः कुपिताः पुनः ॥ ५२
गत्वा च पितरं प्राहुः प्रणम्य शिरसा तदा ।
सोमो वसति नास्मासु तस्मान्नः शरणं भव ॥ ५३
रोहिण्यामेव भगवन्सदा वसति चन्द्रमाः ।
तस्मान्नस्त्राहि सर्वा वै यथा नः सोम आविशेत् ॥ ५४
तच्छ्रुत्वा भगवान्क्रुद्धो यक्ष्माणं पृथिवीपते ।
ससर्ज रोषात्सोमाय स चोडुपतिमाविशत् ॥ ५५
स यक्ष्मणाभिभूतात्माक्षीयताहरहः शशी ।
यत्नं चाप्यकरोद्राजन्मोक्षार्थं तस्य यक्ष्मणः ॥ ५६
इष्टेष्टिभिर्महाराज विविधाभिर्निशाकरः ।
न चामुच्यत शापाद्वै क्षयं चैवाभ्यगच्छत ॥ ५७
क्षीयमाणे ततः सोमे ओषध्यो न प्रजज्ञिरे ।
निरास्वादरसाः सर्वा हतवीर्याश्च सर्वशः ॥ ५८
ओषधीनां क्षये जाते प्राणिनामपि संक्षयः ।
कृशाश्चासन्प्रजाः सर्वाः क्षीयमाणे निशाकरे ॥ ५९
ततो देवाः समागम्य सोममूचुर्महीपते ।
किमिदं भवतो रूपमीदृशं न प्रकाशते ॥ ६०
कारणं ब्रूहि नः सर्वं येनेदं ते महद्भयम् ।
श्रुत्वा तु वचनं त्वत्तो विधास्यामस्ततो वयम् ॥ ६१
एवमुक्तः प्रत्युवाच सर्वांस्ताञ्शशलक्षणः ।
शापं च कारणं चैव यक्ष्माणं च तथात्मनः ॥ ६२
देवास्तस्य वचः श्रुत्वा गत्वा दक्षमथाब्रुवन् ।
प्रसीद भगवन्सोमे शापश्चैष निवर्त्यताम् ॥ ६३
असौ हि चन्द्रमाः क्षीणः किंचिच्छेषो हि लक्ष्यते ।
क्षयाच्चैवास्य देवेश प्रजाश्चापि गताः क्षयम् ॥ ६४
वीरुदोषधयश्चैव बीजानि विविधानि च ।
तथा वयं लोकगुरो प्रसादं कर्तुमर्हसि ॥ ६५
एवमुक्तस्तदा चिन्त्य प्राह वाक्यं प्रजापतिः ।
नैतच्छक्यं मम वचो व्यावर्तयितुमन्यथा ।
हेतुना तु महाभागा निवर्तिष्यति केनचित् ॥ ६६
समं वर्ततु सर्वासु शशी भार्यासु नित्यशः ।
सरस्वत्या वरे तीर्थे उन्मज्जञ्शशलक्षणः ।
पुनर्वर्धिष्यते देवास्तद्वै सत्यं वचो मम ॥ ६७
मासार्धं च क्षयं सोमो नित्यमेव गमिष्यति ।
मासार्धं च सदा वृद्धिं सत्यमेतद्वचो मम ॥ ६८
सरस्वतीं ततः सोमो जगाम ऋषिशासनात् ।
प्रभासं परमं तीर्थं सरस्वत्या जगाम ह ॥ ६९
अमावास्यां महातेजास्तत्रोन्मज्जन्महाद्युतिः ।
लोकान्प्रभासयामास शीतांशुत्वमवाप च ॥ ७०
देवाश्च सर्वे राजेन्द्र प्रभासं प्राप्य पुष्कलम् ।
सोमेन सहिता भूत्वा दक्षस्य प्रमुखेऽभवन् ॥ ७१
ततः प्रजापतिः सर्वा विससर्जाथ देवताः ।
सोमं च भगवान्प्रीतो भूयो वचनमब्रवीत् ॥ ७२
मावमंस्थाः स्त्रियः पुत्र मा च विप्रान्कदाचन ।
गच्छ युक्तः सदा भूत्वा कुरु वै शासनं मम ॥ ७३
स विसृष्टो महाराज जगामाथ स्वमालयम् ।
प्रजाश्च मुदिता भूत्वा भोजने च यथा पुरा ॥ ७४
एतत्ते सर्वमाख्यातं यथा शप्तो निशाकरः ।
प्रभासं च यथा तीर्थं तीर्थानां प्रवरं ह्यभूत् ॥ ७५
अमावास्यां महाराज नित्यशः शशलक्षणः ।
स्नात्वा ह्याप्यायते श्रीमान्प्रभासे तीर्थ उत्तमे ॥ ७६
अतश्चैनं प्रजानन्ति प्रभासमिति भूमिप ।
प्रभां हि परमां लेभे तस्मिन्नुन्मज्ज्य चन्द्रमाः ॥ ७७
ततस्तु चमसोद्भेदमच्युतस्त्वगमद्बली ।
चमसोद्भेद इत्येवं यं जनाः कथयन्त्युत ॥ ७८
तत्र दत्त्वा च दानानि विशिष्टानि हलायुधः ।
उषित्वा रजनीमेकां स्नात्वा च विधिवत्तदा ॥ ७९

उदपानमथागच्छत्त्वरावान्केशवाग्रजः ।
आर्तं स्वस्त्ययनं चैव तत्रावाप्य महत्फलम् ॥ ८०
स्निग्धत्वादोषधीनां च भूमेश्च जनमेजय ।
जानन्ति सिद्धा राजेन्द्र नष्टामपि सरस्वतीम् ॥ ८१

इति श्रीमहाभारते शल्यपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

वैशंपायन उवाच ।

तस्मान्नदीगतं चापि उदपानं यशस्विनः ।
त्रितस्य च महाराज जगामाथ हलायुधः ॥ १
तत्र दत्त्वा बहु द्रव्यं पूजयित्वा तथा द्विजान् ।
उपस्पृश्य च तत्रैव प्रहृष्टो मुसलायुधः ॥ २
तत्र धर्मपरो ह्यासीत्त्रितः स सुमहातपाः ।
कूपे च वसता तेन सोमः पीतो महात्मना ॥ ३
तत्र चैनं समुत्सृज्य भ्रातरौ जग्मतुर्गृहान् ।
ततस्तौ वै शशापाथ त्रितो ब्राह्मणसत्तमः ॥ ४

जनमेजय उवाच ।

उदपानं कथं ब्रह्मन्कथं च सुमहातपाः ।
पतितः किं च संत्यक्तो भ्रातृभ्यां द्विजसत्तमः ॥ ५
कूपे कथं च हित्वैनं भ्रातरौ जग्मतुर्गृहान् ।
एतदाचक्ष्व मे ब्रह्मन्यदि श्राव्यं हि मन्यसे ॥ ६

वैशंपायन उवाच ।

आसन्पूर्वयुगे राजन्मुनयो भ्रातरस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसंनिभाः ॥ ७
सर्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ।
ब्रह्मलोकजितः सर्वे तपसा ब्रह्मवादिनः ॥ ८
तेषां तु तपसा प्रीतो नियमेन दमेन च ।
अभवद्गौतमो नित्यं पिता धर्मरतः सदा ॥ ९
स तु दीर्घेण कालेन तेषां प्रीतिमवाप्य च ।
जगाम भगवान्स्थानमनुरूपमिवात्मनः ॥ १०
राजानस्तस्य ये पूर्वे याज्या ह्यासन्महात्मनः ।
ते सर्वे स्वर्गते तस्मिंस्तस्य पुत्रानपूजयन् ॥ ११
तेषां तु कर्मणा राजंस्तथैवाध्ययनेन च ।
त्रितः स श्रेष्ठतां प्राप यथैवास्य पिता तथा ॥ १२
तं स्म सर्वे महाभागा मुनयः पुण्यलक्षणाः ।
अपूजयन्महाभागं तथा विद्वत्तयैव तु ॥ १३
कदाचिद्धि ततो राजन्भ्रातरावेकतद्वितौ ।
यज्ञार्थं चक्रतुश्चित्तं धनार्थं च विशेषतः ॥ १४
तयोश्चिन्ता समभवत्त्रितं गृह्य परंतप ।
याज्यान्सर्वानुपादाय प्रतिगृह्य पशूंस्ततः ॥ १५
सोमं पास्यामहे हृष्टाः प्राप्य यज्ञं महाफलम् ।
चक्रुश्चैव महाराज भ्रातरस्त्रय एव ह ॥ १६
तथा तु ते परिक्रम्य याज्यान्सर्वान्पशून्प्रति ।
याजयित्वा ततो याज्याँल्लब्ध्वा च सुबहून्पशून् ॥ १७
याज्येन कर्मणा तेन प्रतिगृह्य विधानतः ।
प्राचीं दिशं महात्मान आजग्मुस्ते महर्षयः ॥ १८
त्रितस्तेषां महाराज पुरस्ताद्याति हृष्टवत् ।
एकतश्च द्वितश्चैव पृष्ठतः कालयन्पशून् ॥ १९
तयोश्चिन्ता समभवद्दृष्ट्वा पशुगणं महत् ।
कथं न स्युरिमा गाव आवाभ्यां वै विना त्रितम् ॥ २०
तावन्योन्यं समाभाष्य एकतश्च द्वितश्च ह ।
यदूचतुर्मिथः पापौ तन्निबोध जनेश्वर ॥ २१
त्रितो यज्ञेषु कुशलस्त्रितो वेदेषु निष्ठितः ।
अन्यास्त्रितो बहुतरा गावः समुपलप्स्यते ॥ २२
तदावां सहितौ भूत्वा गाः प्रकाल्य व्रजावहे ।
त्रितोऽपि गच्छतां काममावाभ्यां वै विनाकृतः ॥
तेषामागच्छतां रात्रौ पथिस्थाने वृकोऽभवत् ।
तथा कूपोऽविदूरेऽभूत्सरस्वत्यास्तटे महान् ॥ २४
अथ त्रितो वृकं दृष्ट्वा पथि तिष्ठन्तमग्रतः ।

तद्भयादपसर्पन्वै तस्मिन्कूपे पपात ह ।
अगाधे सुमहाघोरे सर्वभूतभयंकरे ॥ २५
त्रितस्ततो महाभागः कूपस्थो मुनिसत्तमः ।
आर्तनादं ततश्चक्रे तौ तु शुश्रुवतुर्मुनी ॥ २६
तं ज्ञात्वा पतितं कूपे भ्रातरावेकतद्वितौ ।
वृकत्रासाच्च लोभाच्च समुत्सृज्य प्रजग्मतुः ॥ २७
भ्रातृभ्यां पशुलुब्धाभ्यामुत्सृष्टः स महातपाः ।
उदपाने महाराज निर्जले पांसुसंवृते ॥ २८
त्रित आत्मानमालक्ष्य कूपे वीरुत्तृणावृते ।
निमग्नं भरतश्रेष्ठ पापकृन्नरके यथा ॥ २९
बुद्ध्या ह्यगणयत्प्राज्ञो मृत्योर्भीतो ह्यसोमपः ।
सोमः कथं नु पातव्य इहस्थेन मया भवेत् ॥३०
स एवमनुसंचिन्त्य तस्मिन्कूपे महातपाः ।
ददर्श वीरुधं तत्र लम्बमानां यदृच्छया ॥ ३१
पांसुग्रस्ते ततः कूपे विचिन्त्य सलिलं मुनिः ।
अग्नीन्संकल्पयामास होत्रे चात्मानमेव च ॥ ३२
ततस्तां वीरुधं सोमं संकल्प्य सुमहातपाः ।
ऋचो यजूंषि सामानि मनसा चिन्तयन्मुनिः ।
ग्रावाणः शर्कराः कृत्वा प्रचक्रेऽभिषवं नृप ॥ ३३
आज्यं च सलिलं चक्रे भागांश्च त्रिदिवौकसाम् ।
सोमस्याभिषवं कृत्वा चकार तुमुलं ध्वनिम् ॥ ३४
स चाविशद्दिवं राजन्स्वरः शैक्षस्त्रितस्य वै ।
समवाप च तं यज्ञं यथोक्तं ब्रह्मवादिभिः ॥ ३५
वर्तमाने तथा यज्ञे त्रितस्य सुमहात्मनः ।
आविग्नं त्रिदिवं सर्वं कारणं च न बुध्यते ॥ ३६
ततः सुतुमुलं शब्दं शुश्रावाथ बृहस्पतिः ।
श्रुत्वा चैवाब्रवीद्देवान्सर्वान्देवपुरोहितः ॥ ३७
त्रितस्य वर्तते यज्ञस्तत्र गच्छामहे सुराः ।
स हि क्रुद्धः सृजेदन्यान्देवानपि महातपाः ॥ ३८
तच्छ्रुत्वा वचनं तस्य सहिताः सर्वदेवताः ।
प्रययुस्तत्र यत्रासौ त्रितयज्ञः प्रवर्तते ॥ ३९
ते तत्र गत्वा विबुधास्तं कूपं यत्र स त्रितः ।
ददृशुस्तं महात्मानं दीक्षितं यज्ञकर्मसु ॥ ४०
दृष्ट्वा चैनं महात्मानं श्रिया परमया युतम् ।
ऊचुश्चाथ महाभागं प्राप्ता भागार्थिनो वयम् ॥ ४१
अथाब्रवीदृषिर्देवान्पश्यध्वं मां दिवौकसः ।
अस्मिन्प्रतिभये कूपे निमग्नं नष्टचेतसम् ॥ ४२
ततस्त्रितो महाराज भागांस्तेषां यथाविधि ।
मन्त्रयुक्तान्समददात्ते च प्रीतास्तदाभवन् ॥ ४३
ततो यथाविधि प्राप्तान्भागान्प्राप्य दिवौकसः ।
प्रीतात्मानो ददुस्तस्मै वरान्यान्मनसेच्छति ॥ ४४
स तु वव्रे वरं देवांस्त्रातुमर्हथ मामितः ।
यश्चेहोपस्पृशेत्कूपे स सोमपगतिं लभेत् ॥ ४५
तत्र चोर्मिमती राजन्नुत्पपात सरस्वती ।
तयोत्क्षिप्तस्त्रितस्तस्थौ पूजयंस्त्रिदिवौकसः ॥ ४६
तथेति चोक्त्वा विबुधा जग्मू राजन्यथागतम् ।
त्रितश्चाप्यगमत्प्रीतः स्वमेव निलयं तदा ॥ ४७
क्रुद्धः स तु समासाद्य तावृषी भ्रातरौ तदा ।
उवाच परुषं वाक्यं शशाप च महातपाः ॥ ४८
पशुलुब्धौ युवां यस्मान्मामुत्सृज्य प्रधावितौ ।
तस्माद्रूपेण तेषां वै दंष्ट्रिणामभितश्चरौ ॥ ४९
भवितारौ मया शप्तौ पापेनानेन कर्मणा ।
प्रसवश्चैव युवयोर्गोलाङ्गूलर्क्षवानराः ॥ ५०
इत्युक्ते तु तदा तेन क्षणादेव विशां पते ।
तथाभूतावदृश्येतां वचनात्सत्यवादिनः ॥ ५१
तत्राप्यमितविक्रान्तः स्पृष्ट्वा तोयं हलायुधः ।
दत्त्वा च विविधान्दायान्पूजयित्वा च वै द्विजान् ॥
उदपानं च तं दृष्ट्वा प्रशस्य च पुनः पुनः ।
नदीगतमदीनात्मा प्राप्तो विनशनं तदा ॥ ५३

इति श्रीमहाभारते शल्यपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

वैशंपायन उवाच ।

ततो विनशनं राजन्नाजगाम हलायुधः ।
शूद्राभीरान्प्रति द्वेषाद्यत्र नष्टा सरस्वती ॥ १
यस्मात्सा भरतश्रेष्ठ द्वेषान्नष्टा सरस्वती ।
तस्मात्तदृषयो नित्यं प्राहुर्विनशनेति ह ॥ २
तच्चाप्युपस्पृश्य बलः सरस्वत्यां महाबलः ।
सुभूमिकं ततोऽगच्छत्सरस्वत्यास्तटे वरे ॥ ३
तत्र चाप्सरसः शुभ्रा नित्यकालमतन्द्रिताः ।
क्रीडाभिर्विमलाभिश्च क्रीडन्ति विमलाननाः ॥ ४
तत्र देवाः सगन्धर्वा मासि मासि जनेश्वर ।
अभिगच्छन्ति तत्तीर्थं पुण्यं ब्राह्मणसेवितम् ॥ ५
तत्रादृश्यन्त गन्धर्वास्तथैवाप्सरसां गणाः ।
समेत्य सहिता राजन्यथाप्राप्तं यथासुखम् ॥ ६
तत्र मोदन्ति देवाश्च पितरश्च सवीरुधः ।
पुण्यैः पुष्पैः सदा दिव्यैः कीर्यमाणाः पुनः पुनः ॥ ७
आक्रीडभूमिः सा राजंस्तासामप्सरसां शुभा ।
सुभूमिकेति विख्याता सरस्वत्यास्तटे वरे ॥ ८
तत्र स्नात्वा च दत्त्वा च वसु विप्रेषु माधवः ।
श्रुत्वा गीतं च तद्दिव्यं वादित्राणां च निःस्वनम् ॥ ९
छायाश्च विपुला दृष्ट्वा देवगन्धर्वरक्षसाम् ।
गन्धर्वाणां ततस्तीर्थमागच्छद्रोहिणीसुतः ॥ १०
विश्वावसुमुखास्तत्र गन्धर्वास्तपसान्विताः ।
नृत्तवादित्रगीतं च कुर्वन्ति सुमनोरमम् ॥ ११
तत्र दत्त्वा हलधरो विप्रेभ्यो विविधं वसु ।
अजाविकं गोखरोष्ट्रं सुवर्णं रजतं तथा ॥ १२
भोजयित्वा द्विजान्कामैः संतर्प्य च महाधनैः ।
प्रययौ सहितो विप्रैः स्तूयमानश्च माधवः ॥ १३
तस्माद्गन्धर्वतीर्थाच्च महाबाहुररिंदमः ।
गर्गस्रोतो महातीर्थमाजगामैककुण्डली ॥ १४
यत्र गर्गेण वृद्धेन तपसा भावितात्मना ।
कालज्ञानगतिश्चैव ज्योतिषां च व्यतिक्रमः ॥ १५
उत्पाता दारुणाश्चैव शुभाश्च जनमेजय ।
सरस्वत्याः शुभे तीर्थे विहिता वै महात्मना ।
तस्य नाम्ना च तत्तीर्थं गर्गस्रोत इति स्मृतम् ॥ १६
तत्र गर्गं महाभागमृषयः सुव्रता नृप ।
उपासांचक्रिरे नित्यं कालज्ञानं प्रति प्रभो ॥ १७
तत्र गत्वा महाराज बलः श्वेतानुलेपनः ।
विधिवद्धि धनं दत्त्वा मुनीनां भावितात्मनाम् ॥ १८
उच्चावचांस्तथा भक्ष्यान्द्विजेभ्यो विप्रदाय सः ।
नीलवासास्ततोऽगच्छच्छङ्खतीर्थं महायशाः ॥ १९
तत्रापश्यन्महाशङ्खं महामेरुमिवोच्छ्रितम् ।
श्वेतपर्वतसंकाशमृषिसंघैर्निषेवितम् ।
सरस्वत्यास्तटे जातं नगं तालध्वजो बली ॥ २०
यक्षा विद्याधराश्चैव राक्षसाश्चामितौजसः ।
पिशाचाश्चामितबला यत्र सिद्धाः सहस्रशः ॥ २१
ते सर्वे ह्यशनं त्यक्त्वा फलं तस्य वनस्पतेः ।
व्रतैश्च नियमैश्चैव काले काले स्म भुञ्जते ॥ २२
प्राप्तैश्च नियमैस्तैस्तैर्विचरन्तः पृथक्पृथक् ।
अदृश्यमाना मनुजैर्व्यचरन्पुरुषर्षभ ॥ २३
एवं ख्यातो नरपते लोकेऽस्मिन्स वनस्पतिः ।
तत्र तीर्थं सरस्वत्याः पावनं लोकविश्रुतम् ॥ २४
तस्मिंश्च यदुशार्दूलो दत्त्वा तीर्थे यशस्विनाम् ।
ताम्रायसानि भाण्डानि वस्त्राणि विविधानि च ॥ २५
पूजयित्वा द्विजांश्चैव पूजितश्च तपोधनैः ।
पुण्यं द्वैतवनं राजन्नाजगाम हलायुधः ॥ २६
तत्र गत्वा मुनीन्दृष्ट्वा नानावेषधरान्बलः ।
आप्लुत्य सलिले चापि पूजयामास वै द्विजान् ॥ २७
तथैव दत्त्वा विप्रेभ्यः परिभोगान्सुपुष्कलान् ।
ततः प्रायाद्बलो राजन्दक्षिणेन सरस्वतीम् ॥ २८

गत्वा चैव महाबाहुर्नातिदूरं महायशाः ।
धर्मात्मा नागधन्वानं तीर्थमागमदच्युतः ॥ २९
यत्र पन्नगराजस्य वासुकेः संनिवेशनम् ।
महाद्युतेर्महाराज बहुभिः पन्नगैर्वृतम् ।
यत्रासन्नृषयः सिद्धाः सहस्राणि चतुर्दश ॥ ३०
यत्र देवाः समागम्य वासुकिं पन्नगोत्तमम् ।
सर्वपन्नगराजानमभ्यषिञ्चन्यथाविधि ।
पन्नगेभ्यो भयं तत्र विद्यते न स्म कौरव ॥ ३१
तत्रापि विधिवद्दत्त्वा विप्रेभ्यो रत्नसंचयान् ।
प्रायात्प्राचीं दिशं राजन्दीप्यमानः स्वतेजसा ॥ ३२
आप्लुत्य बहुशो हृष्टस्तेषु तीर्थेषु लाङ्गली ।
दत्त्वा वसु द्विजातिभ्यो जगामाति तपस्विनः ॥ ३३
तत्रस्थानृषिसंघांस्तानभिवाद्य हलायुधः ।
ततो रामोऽगमत्तीर्थमृषिभिः सेवितं महत् ॥ ३४
यत्र भूयो निववृते प्राङ्मुखा वै सरस्वती ।
ऋषीणां नैमिषेयाणामवेक्षार्थं महात्मनाम् ॥ ३५
निवृत्तां तां सरिच्छ्रेष्ठां तत्र दृष्ट्वा तु लाङ्गली ।
बभूव विस्मितो राजन्बलः श्वेतानुलेपनः ॥ ३६

जनमेजय उवाच ।

कस्मात्सरस्वती ब्रह्मन्निवृत्ता प्राङ्मुखी ततः ।
व्याख्यातुमेतदिच्छामि सर्वमध्वर्युसत्तम ॥ ३७
कस्मिंश्च कारणे तत्र विस्मितो यदुनन्दनः ।
विनिवृत्ता सरिच्छ्रेष्ठा कथमेतद्द्विजोत्तम ॥ ३८

वैशंपायन उवाच ।

पूर्वं कृतयुगे राजन्नैमिषेयास्तपस्विनः ।
वर्तमाने सुबहुले सत्रे द्वादशवार्षिके ।
ऋषयो बहवो राजंस्तत्र संप्रतिपेदिरे ॥ ३९
उषित्वा च महाभागास्तस्मिन्सत्रे यथाविधि ।
निवृत्ते नैमिषेये वै सत्रे द्वादशवार्षिके ।
आजग्मुरृषयस्तत्र बहवस्तीर्थकारणात् ॥ ४०
ऋषीणां बहुलत्वात्तु सरस्वत्या विशां पते ।
तीर्थानि नगरायन्ते कूले वै दक्षिणे तदा ॥ ४१
समन्तपञ्चकं यावत्तावत्ते द्विजसत्तमाः ।
तीर्थलोभान्नरव्याघ्र नद्यास्तीरं समाश्रिताः ॥ ४२
जुह्वतां तत्र तेषां तु मुनीनां भावितात्मनाम् ।
स्वाध्यायेनापि महता बभूवुः पूरिता दिशः ॥ ४३
अग्निहोत्रैस्ततस्तेषां हूयमानैर्महात्मनाम् ।
अशोभत सरिच्छ्रेष्ठा दीप्यमानैः समन्ततः ॥ ४४
वालखिल्या महाराज अश्मकुट्टाश्च तापसाः ।
दन्तोलूखलिनश्चान्ये संप्रक्षालास्तथापरे ॥ ४५
वायुभक्षा जलाहाराः पर्णभक्षाश्च तापसाः ।
नानानियमयुक्ताश्च तथा स्थण्डिलशायिनः ॥ ४६
आसन्वै मुनयस्तत्र सरस्वत्याः समीपतः ।
शोभयन्तः सरच्छ्रेष्ठां गङ्गामिव दिवौकसः ॥ ४७
ततः पश्चात्समापेतुरृषयः सत्रयाजिनः ।
तेऽवकाशं न ददृशुः कुरुक्षेत्रे महाव्रताः ॥ ४८
ततो यज्ञोपवीतैस्ते तत्तीर्थं निर्मिमाय वै ।
जुहुवुश्चाग्निहोत्राणि चक्रुश्च विविधाः क्रियाः ॥४९
ततस्तमृषिसंघातं निराशं चिन्तयान्वितम् ।
दर्शयामास राजेन्द्र तेषामर्थे सरस्वती ॥ ५०
ततः कुञ्जान्बहून्कृत्वा संनिवृत्ता सरिद्वरा ।
ऋषीणां पुण्यतपसां कारुण्याज्जनमेजय ॥ ५१
ततो निवृत्य राजेन्द्र तेषामर्थे सरस्वती ।
भूयः प्रतीच्यभिमुखी सुस्राव सरितां वरा ॥ ५२
अमोघा गमनं कृत्वा तेषां भूयो व्रजाम्यहम् ।
इत्यद्भुतं महच्चक्रे ततो राजन्महानदी ॥ ५३
एवं स कुञ्जो राजेन्द्र नैमिषेय इति स्मृतः ।
कुरुक्षेत्रे कुरुश्रेष्ठ कुरुष्व महतीः क्रियाः ॥ ५४
तत्र कुञ्जान्बहून्दृष्ट्वा संनिवृत्तां च तां नदीम् ।
बभूव विस्मयस्तत्र रामस्याथ महात्मनः ॥ ५५

उपस्पृश्य तु तत्रापि विधिवद्यदुनन्दनः ।
दत्त्वा दायान्द्विजातिभ्यो भाण्डानि विविधानि च ।
भक्ष्यं पेयं च विविधं ब्राह्मणान्प्रत्यपादयत् ॥ ५६
ततः प्रायाद्बलो राजन्पूज्यमानो द्विजातिभिः ।
सरस्वतीतीर्थवरं नानाद्विजगणायुतम् ॥ ५७
बदरेङ्गुदकाश्मर्यप्लक्षाश्वत्थविभीतकैः ।
पनसैश्च पलाशैश्च करीरैः पीलुभिस्तथा ॥ ५८
सरस्वतीतीररुहैर्बन्धनैः स्यन्दनैस्तथा ।
परूषकवनैश्चैव बिल्वैराम्रातकैस्तथा ॥ ५९
अतिमुक्तकषण्डैश्च पारिजातैश्च शोभितम् ।
कदलीवनभूयिष्ठमिष्टं कान्तं मनोरमम् ॥ ६०
वाय्वम्बुफलपर्णादैर्दन्तोलूखलिकैरपि ।
तथाश्मकुट्टैर्वानेयैर्मुनिभिर्बहुभिर्वृतम् ॥ ६१
स्वाध्यायघोषसंघुष्टं मृगयूथशताकुलम् ।
अहिंस्रैर्धर्मपरमैर्नृभिरत्यन्तसेवितम् ॥ ६२
सप्तसारस्वतं तीर्थमाजगाम हलायुधः ।
यत्र मङ्कणकः सिद्धस्तपस्तेपे महामुनिः ॥ ६३

इति श्रीमहाभारते शल्यपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

जनमेजय उवाच ।

सप्तसारस्वतं कस्मात्कश्च मङ्कणको मुनिः ।
कथं सिद्धश्च भगवान्कश्चास्य नियमोऽभवत् ॥ १
कस्य वंशे समुत्पन्नः किं चाधीतं द्विजोत्तम ।
एतदिच्छाम्यहं श्रोतुं विधिवद्द्विजसत्तम ॥ २

वैशंपायन उवाच

राजन्सप्त सरस्वत्यो याभिर्व्याप्तमिदं जगत् ।
आहूता बलवद्भिर्हि तत्र तत्र सरस्वती ॥ ३
सुप्रभा काञ्चनाक्षी च विशाला मानसह्रदा ।
सरस्वती ओघवती सुवेणुर्विमलोदका ॥ ४
पितामहस्य महतो वर्तमाने महीतले ।
वितते यज्ञवाटे वै समेतेषु द्विजातिषु ॥ ५
पुण्याहघोषैर्विमलैर्वेदानां निनदैस्तथा ।
देवेषु चैव व्यग्रेषु तस्मिन्यज्ञविधौ तदा ॥ ६
तत्र चैव महाराज दीक्षिते प्रपितामहे ।
यजतस्तत्र सत्रेण सर्वकामसमृद्धिना ॥ ७
मनसा चिन्तिता ह्यर्था धर्मार्थकुशलैस्तदा ।
उपतिष्ठन्ति राजेन्द्र द्विजातींस्तत्र तत्र ह ॥ ८
जगुश्च तत्र गन्धर्वा ननृतुश्चाप्सरोगणाः ।
वादित्राणि च दिव्यानि वादयामासुरञ्जसा ॥ ९
तस्य यज्ञस्य संपत्त्या तुतुषुर्देवता अपि ।
विस्मयं परमं जग्मुः किमु मानुषयोनयः ॥ १०
वर्तमाने तथा यज्ञे पुष्करस्थे पितामहे ।
अब्रुवन्नृषयो राजन्नायं यज्ञो महाफलः ।
न दृश्यते सरिच्छ्रेष्ठा यस्मादिह सरस्वती ॥ ११
तच्छ्रुत्वा भगवान्प्रीतः सस्माराथ सरस्वतीम् ।
पितामहेन यजता आहूता पुष्करेषु वै ।
सुप्रभा नाम राजेन्द्र नाम्ना तत्र सरस्वती ॥ १२
तां दृष्ट्वा मुनयस्तुष्टा वेगयुक्तां सरस्वतीम् ।
पितामहं मानयन्तीं क्रतुं ते बहु मेनिरे ॥ १३
एवमेषा सरिच्छ्रेष्ठा पुष्करेषु सरस्वती ।
पितामहार्थं संभूता तुष्ट्यर्थं च मनीषिणाम् ॥ १४
नैमिषे मुनयो राजन्समागम्य समासते ।
तत्र चित्राः कथा ह्यासन्वेदं प्रति जनेश्वर ॥ १५
तत्र ते मुनयो ह्यासन्नानास्वाध्यायवेदिनः ।
ते समागम्य मुनयः सस्मरुर्वै सरस्वतीम् ॥ १६
सा तु ध्याता महाराज ऋषिभिः सत्रयाजिभिः ।
समागतानां राजेन्द्र सहायार्थं महात्मनाम् ।
आजगाम महाभागा तत्र पुण्या सरस्वती ॥ १७

नैमिषे काञ्चनाक्षी तु मुनीनां सत्रयाजिनाम् ।
आगता सरितां श्रेष्ठा तत्र भारत पूजिता ॥ १८
गयस्य यजमानस्य गयेष्वेव महाक्रतुम् ।
आहूता सरितां श्रेष्ठा गययज्ञे सरस्वती ॥ १९
विशालां तु गयेष्वाहुर्ऋषयः संशितव्रताः ।
सरित्सा हिमवत्पार्श्वात्प्रसूता शीघ्रगामिनी ॥ २०
औद्दालकेस्तथा यज्ञे यजतस्तत्र भारत ।
समेते सर्वतः स्फीते मुनीनां मण्डले तदा ॥ २१
उत्तरे कोसलाभागे पुण्ये राजन्महात्मनः ।
औद्दालकेन यजता पूर्वं ध्याता सरस्वती ॥ २२
आजगाम सरिच्छ्रेष्ठा तं देशमृषिकारणात् ।
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोह्रदेति विख्याता सा हि तैर्मनसा हृता ॥२३
सुवेणुर्ऋषभद्वीपे पुण्ये राजर्षिसेविते ।
कुरोश्च यजमानस्य कुरुक्षेत्रे महात्मनः ।
आजगाम महाभागा सरिच्छ्रेष्ठा सरस्वती ॥ २४
ओघवत्यपि राजेन्द्र वसिष्ठेन महात्मना ।
समाहूता कुरुक्षेत्रे दिव्यतोया सरस्वती ॥ २५
दक्षेण यजता चापि गङ्गाद्वारे सरस्वती ।
विमलोदा भगवती ब्रह्मणा यजता पुनः ।
समाहूता ययौ तत्र पुण्ये हैमवते गिरौ ॥ २६
एकीभूतास्ततस्तास्तु तस्मिंस्तीर्थे समागताः ।
सप्तसारस्वतं तीर्थं ततस्तत्प्रथितं भुवि ॥ २७
इति सप्त सरस्वत्यो नामतः परिकीर्तिताः ।
सप्तसारस्वतं चैव तीर्थं पुण्यं तथा स्मृतम् ॥ २८
शृणु मङ्कणकस्यापि कौमारब्रह्मचारिणः ।
आपगामवगाढस्य राजन्प्रक्रीडितं महत् ॥ २९
दृष्ट्वा यदृच्छया तत्र स्त्रियमम्भसि भारत ।
स्नायन्तीं रुचिरापाङ्गीं दिग्वाससमनिन्दिताम् ।
सरस्वत्यां महाराज चस्कन्दे वीर्यमम्भसि ॥ ३०
तद्रेतः स तु जग्राह कलशे वै महातपाः ।
सप्तधा प्रविभागं तु कलशस्थं जगाम ह ।
तत्रर्षयः सप्त जाता जज्ञिरे मरुतां गणाः ॥ ३१
वायुवेगो वायुबलो वायुहा वायुमण्डलः ।
वायुज्वालो वायुरेता वायुचक्रश्च वीर्यवान् ।
एवमेते समुत्पन्ना मरुतां जनयिष्णवः ॥ ३२
इदमन्यच्च राजेन्द्र शृण्वाश्चर्यतरं भुवि ।
महर्षेश्चरितं यादृक्त्रिषु लोकेषु विश्रुतम् ॥ ३३
पुरा मङ्कणकः सिद्धः कुशाग्रेणेति नः श्रुतम् ।
क्षतः किल करे राजंस्तस्य शाकरसोऽस्रवत् ।
स वै शाकरसं दृष्ट्वा हर्षाविष्टः प्रनृत्तवान् ॥ ३४
ततस्तस्मिन्प्रनृत्ते वै स्थावरं जङ्गमं च यत् ।
प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ॥ ३५
ब्रह्मादिभिः सुरैः राजन्नृषिभिश्च तपोधनैः ।
विज्ञप्तो वै महादेव ऋषेरर्थे नराधिप ।
नायं नृत्येद्यथा देव तथा त्वं कर्तुमर्हसि ॥ ३६
ततो देवो मुनिं दृष्ट्वा हर्षाविष्टमतीव ह ।
सुराणां हितकामार्थं महादेवोऽभ्यभाषत ॥ ३७
भो भो ब्राह्मण धर्मज्ञ किमर्थं नरिनर्ति वै ।
हर्षस्थानं किमर्थं वै तवेदं मुनिसत्तम ।
तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम ॥ ३८

ऋषिरुवाच ।

किं न पश्यसि मे ब्रह्मन्कराच्छाकरसं स्रुतम् ।
यं दृष्ट्वा वै प्रनृत्तोऽहं हर्षेण महता विभो ॥ ३९
तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितम् ।
अहं न विस्मयं विप्र गच्छामीति प्रपश्य माम् ॥४०
एवमुक्त्वा मुनिश्रेष्ठं महादेवेन धीमता ।
अङ्गुल्यग्रेण राजेन्द्र स्वाङ्गुष्ठस्ताडितोऽभवत् ॥ ४१
ततो भस्म क्षताद्राजन्निर्गतं हिमसंनिभम् ।
तद्दृष्ट्वा व्रीडितो राजन्स मुनिः पादयोर्गतः ॥ ४२

ऋषिरुवाच ।

नान्यं देवादहं मन्ये रुद्रात्परतरं महत् ।
सुरासुरस्य जगतो गतिस्त्वमसि शूलधृक् ॥ ४३
त्वया सृष्टमिदं विश्वं वदन्तीह मनीषिणः ।
त्वामेव सर्वं विशति पुनरेव युगक्षये ॥ ४४
देवैरपि न शक्यस्त्वं परिज्ञातुं कुतो मया ।
त्वयि सर्वे स्म दृश्यन्ते सुरा ब्रह्मादयोऽनघ ॥४५
सर्वस्त्वमसि देवानां कर्ता कारयिता च ह ।
त्वत्प्रसादात्सुराः सर्वे मोदन्तीहाकुतोभयाः ॥ ४६
एवं स्तुत्वा महादेवं स ऋषिः प्रणतोऽब्रवीत् ।
भगवंस्त्वत्प्रसादाद्धि तपो मे न क्षरेदिति ॥ ४७
ततो देवः प्रीतमनास्तमृषिं पुनरब्रवीत् ।
तपस्ते वर्धतां विप्र मत्प्रसादात्सहस्रधा ।
आश्रमे चेह वत्स्यामि त्वया सार्धमहं सदा ॥ ४८
सप्तसारस्वते चास्मिन्यो मामर्चिष्यते नरः ।
न तस्य दुर्लभं किंचिद्भवितेह परत्र च ।
सारस्वतं च लोकं ते गमिष्यन्ति न संशयः ॥ ४९
एतन्मङ्कणकस्यापि चरितं भूरितेजसः ।
स हि पुत्रः सुजन्यायामुत्पन्नो मातरिश्वना ॥ ५०

इति श्रीमहाभारते शल्यपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

वैशंपायन उवाच ।

उषित्वा तत्र रामस्तु संपूज्याश्रमवासिनः ।
तथा मङ्कणके प्रीतिं शुभां चक्रे हलायुधः ॥ १
दत्त्वा दानं द्विजातिभ्यो रजनीं तामुपोष्य च ।
पूजितो मुनिसंघैश्च प्रातरुत्थाय लाङ्गली ॥ २
अनुज्ञाप्य मुनीन्सर्वान्स्पृष्ट्वा तोयं च भारत ।
प्रययौ त्वरितो रामस्तीर्थहेतोर्महाबलः ॥ ३
तत औशनसं तीर्थमाजगाम हलायुधः ।
कपालमोचनं नाम यत्र मुक्तो महामुनिः ॥ ४
महता शिरसा राजन्ग्रस्तजङ्घो महोदरः ।
राक्षसस्य महाराज रामक्षिप्तस्य वै पुरा ॥ ५
तत्र पूर्वं तपस्तप्तं काव्येन सुमहात्मना ।
यत्रास्य नीतिरखिला प्रादुर्भूता महात्मनः ।
तत्रस्थश्चिन्तयामास दैत्यदानवविग्रहम् ॥ ६
तत्प्राप्य च बलो राजंस्तीर्थप्रवरमुत्तमम् ।
विधिवद्धि ददौ वित्तं ब्राह्मणानां महात्मनाम् ॥ ७

जनमेजय उवाच ।

कपालमोचनं ब्रह्मन्कथं यत्र महामुनिः ।
मुक्तः कथं चास्य शिरो लग्नं केन च हेतुना ॥ ८

वैशंपायन उवाच ।

पुरा वै दण्डकारण्ये राघवेण महात्मना ।
वसता राजशार्दूल राक्षसास्तत्र हिंसिताः ॥ ९
जनस्थाने शिरश्छिन्नं राक्षसस्य दुरात्मनः ।
क्षुरेण शितधारेण तत्पपात महावने ॥ १०
महोदरस्य तल्लग्नं जङ्घायां वै यदृच्छया ।
वने विचरतो राजन्नस्थि भित्त्वास्फुरत्तदा ॥ ११
स तेन लग्नेन तदा द्विजातिर्न शशाक ह ।
अभिगन्तुं महाप्राज्ञस्तीर्थान्यायतनानि च ॥ १२
स पूतिना विस्रवता वेदनार्तो महामुनिः ।
जगाम सर्वतीर्थानि पृथिव्यामिति नः श्रुतम् ॥१३
स गत्वा सरितः सर्वाः समुद्रांश्च महातपाः ।
कथयामास तत्सर्वमृषीणां भावितात्मनाम् ॥ १४
आप्लुतः सर्वतीर्थेषु न च मोक्षमवाप्तवान् ।
स तु शुश्राव विप्रेन्द्रो मुनीनां वचनं महत् ॥ १५
सरस्वत्यास्तीर्थवरं ख्यातमौशनसं तदा ।
सर्वपापप्रशमनं सिद्धक्षेत्रमनुत्तमम् ॥ १६

स तु गत्वा ततस्तत्र तीर्थमौशनसं द्विजः ।
तत औशनसे तीर्थे तस्योपस्पृशतस्तदा ।
तच्छिरश्चरणं मुक्त्वा पपातान्तर्जले तदा ॥ १७
ततः स विरुजो राजन्पूतात्मा वीतकल्मषः ।
आजगामाश्रमं प्रीतः कृतकृत्यो महोदरः ॥ १८
सोऽथ गत्वाश्रमं पुण्यं विप्रमुक्तो महातपाः ।
कथयामास तत्सर्वमृषीणां भावितात्मनाम् ॥ १९
ते श्रुत्वा वचनं तस्य ततस्तीर्थस्य मानद ।
कपालमोचनमिति नाम चक्रुः समागताः ॥ २०
तत्र दत्त्वा बहून्दायान्विप्रान्संपूज्य माधवः ।
जगाम वृष्णिप्रवरो रुषङ्गोराश्रमं तदा ॥ २१
यत्र तप्तं तपो घोरमार्ष्टिषेणेन भारत ।
ब्राह्मण्यं लब्धवांस्तत्र विश्वामित्रो महामुनिः ॥ २२
ततो हलधरः श्रीमान्ब्राह्मणैः परिवारितः ।
जगाम यत्र राजेन्द्र रुषङ्गुस्तनुमत्यजत् ॥ २३
रुषङ्गुर्ब्राह्मणो वृद्धस्तपोनित्यश्च भारत ।
देहन्यासे कृतमना विचिन्त्य बहुधा बहु ॥ २४
ततः सर्वानुपादाय तनयान्वै महातपाः ।
रुषङ्गुरब्रवीत्तत्र नयध्वं मा पृथूदकम् ॥ २५
विज्ञायातीतवयसं रुषङ्गुं ते तपोधनाः ।
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ॥ २६
स तैः पुत्रैस्तदा धीमानानीतो वै सरस्वतीम् ।
पुण्यां तीर्थशतोपेतां विप्रसंघैर्निषेविताम् ॥ २७
स तत्र विधिना राजन्नाप्लुतः सुमहातपाः ।
ज्ञात्वा तीर्थगुणांश्चैव प्राहेदमृषिसत्तमः ।
सुप्रीतः पुरुषव्याघ्र सर्वान्पुत्रानुपासतः ॥ २८
सरस्वत्युत्तरे तीरे यस्त्यजेदात्मनस्तनुम् ।
पृथूदके जप्यपरो नैनं श्वोमरणं तपेत् ॥ २९
तत्राप्लुत्य स धर्मात्मा उपस्पृश्य हलायुधः ।
दत्त्वा चैव बहून्दायान्विप्राणां विप्रवत्सलः ॥ ३०
ससर्ज यत्र भगवाँल्लोकाँल्लोकपितामहः ।
यत्रार्ष्टिषेणः कौरव्य ब्राह्मण्यं संशितव्रतः ।
तपसा महता राजन्प्राप्तवानृषिसत्तमः ॥ ३१
सिन्धुद्वीपश्च राजर्षिर्देवापिश्च महातपाः ।
ब्राह्मण्यं लब्धवान्यत्र विश्वामित्रो महामुनिः ।
महातपस्वी भगवानुग्रतेजा महातपाः ॥ ३२
तत्राजगाम बलवान्बलभद्रः प्रतापवान् ॥ ३३

इति श्रीमहाभारते शल्यपर्वणि
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

जनमेजय उवाच ।

कथमार्ष्टिषेणो भगवान्विपुलं तप्तवांस्तपः ।
सिन्धुद्वीपः कथं चापि ब्राह्मण्यं लब्धवांस्तदा ॥ १
देवापिश्च कथं ब्रह्मन्विश्वामित्रश्च सत्तम ।
तन्ममाचक्ष्व भगवन्परं कौतूहलं हि मे ॥ २

वैशंपायन उवाच ।

पुरा कृतयुगे राजन्नार्ष्टिषेणो द्विजोत्तमः ।
वसन्गुरुकुले नित्यं नित्यमध्ययने रतः ॥ ३
तस्य राजन्गुरुकुले वसतो नित्यमेव ह ।
समाप्तिं नागमद्विद्या नापि वेदा विशां पते ॥ ४
स निर्विण्णस्ततो राजंस्तपस्तेपे महातपाः ।
ततो वै तपसा तेन प्राप्य वेदाननुत्तमान् ॥ ५
स विद्वान्वेदयुक्तश्च सिद्धश्चाप्यृषिसत्तमः ।
तत्र तीर्थे वरान्प्रादात्त्रीनेव सुमहातपाः ॥ ६
अस्मिंस्तीर्थे महानद्या अद्यप्रभृति मानवः ।
आप्लुतो वाजिमेधस्य फलं प्राप्नोति पुष्कलम् ॥ ७
अद्यप्रभृति नैवात्र भयं व्यालाद्भविष्यति ।
अपि चाल्पेन यत्नेन फलं प्राप्स्यति पुष्कलम् ॥ ८
एवमुक्त्वा महातेजा जगाम त्रिदिवं मुनिः ।

एवं सिद्धः स भगवानार्ष्टिषेणः प्रतापवान् ॥ ९
तस्मिन्नेव तदा तीर्थे सिन्धुद्वीपः प्रतापवान् ।
देवापिश्च महाराज ब्राह्मण्यं प्रापतुर्महत् ॥ १०
तथा च कौशिकस्तात तपोनित्यो जितेन्द्रियः ।
तपसा वै सुतप्तेन ब्राह्मणत्वमवाप्तवान् ॥ ११
गाधिर्नाम महानासीत्क्षत्रियः प्रथितो भुवि ।
तस्य पुत्रोऽभवद्राजन्विश्वामित्रः प्रतापवान् ॥ १२
स राजा कौशिकस्तात महायोग्यभवत्किल ।
स पुत्रमभिषिच्याथ विश्वामित्रं महातपाः ॥ १३
देहन्यासे मनश्चक्रे तमूचुः प्रणताः प्रजाः ।
न गन्तव्यं महाप्राज्ञ त्राहि चास्मान्महाभयात् ॥ १४
एवमुक्तः प्रत्युवाच ततो गाधिः प्रजास्तदा ।
विश्वस्य जगतो गोप्ता भविष्यति सुतो मम ॥ १५
इत्युक्त्वा तु ततो गाधिर्विश्वामित्रं निवेश्य च ।
जगाम त्रिदिवं राजन्विश्वामित्रोऽभवन्नृपः ।
न च शक्नोति पृथिवीं यत्नवानपि रक्षितुम् ॥ १६
ततः शुश्राव राजा स राक्षसेभ्यो महाभयम् ।
निर्ययौ नगराच्चापि चतुरङ्गबलान्वितः ॥ १७
स गत्वा दूरमध्वानं वसिष्ठाश्रममभ्ययात् ।
तस्य ते सैनिका राजंश्चक्रुस्तत्रानयान्बहून् ॥ १८
ततस्तु भगवान्विप्रो वसिष्ठोऽऽश्रममभ्ययात् ।
ददृशे च ततः सर्वं भज्यमानं महावनम् ॥ १९
तस्य क्रुद्धो महाराज वसिष्ठो मुनिसत्तमः ।
सृजस्व शबरान्घोरानिति स्वां गामुवाच ह ॥ २०
तथोक्ता सासृजद्धेनुः पुरुषान्घोरदर्शनान् ।
ते च तद्बलमासाद्य बभञ्जुः सर्वतोदिशम् ॥ २१
तदृष्ट्वा विद्रुतं सैन्यं विश्वामित्रस्तु गाधिजः ।
तपः परं मन्यमानस्तपस्येव मनो दधे ॥ २२
सोऽस्मिंस्तीर्थवरे राजन्सरस्वत्याः समाहितः ।
नियमैश्चोपवासैश्च कर्शयन्देहमात्मनः ॥ २३
जलाहारो वायुभक्षः पर्णाहारश्च सोऽभवत् ।
तथा स्थण्डिलशायी च ये चान्ये नियमाः पृथक् ॥ २४
असकृत्तस्य देवास्तु व्रतविघ्नं प्रचक्रिरे ।
न चास्य नियमाद्बुद्धिरपयाति महात्मनः ॥ २५
ततः परेण यत्नेन तप्त्वा बहुविधं तपः ।
तेजसा भास्कराकारो गाधिजः समपद्यत ॥ २६
तपसा तु तथा युक्तं विश्वामित्रं पितामहः ।
अमन्यत महातेजा वरदो वरमस्य तत् ॥ २७
स तु वव्रे वरं राजन्स्यामहं ब्राह्मणस्त्विति ।
तथेति चाब्रवीद्ब्रह्मा सर्वलोकपितामहः ॥ २८
स लब्ध्वा तपसोग्रेण ब्राह्मणत्वं महायशाः ।
विचचार महीं कृत्स्नां कृतकामः सुरोपमः ॥ २९
तस्मिंस्तीर्थवरे रामः प्रदाय विविधं वसु ।
पयस्विनीस्तथा धेनूर्यानानि शयनानि च ॥ ३०
तथा वस्त्राण्यलंकारं भक्ष्यं पेयं च शोभनम् ।
अददान्मुदितो राजन्पूजयित्वा द्विजोत्तमान् ॥ ३१
ययौ राजंस्ततो रामो बकस्याश्रममन्तिकात् ।
यत्र तेपे तपस्तीव्रं दाल्भ्यो बक इति श्रुतिः ॥ ३२

इति श्रीमहाभारते शल्यपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

वैशंपायन उवाच ।

ब्रह्मयोनिभिराकीर्णं जगाम यदुनन्दनः ।
यत्र दाल्भ्यो बको राजन्पश्वर्थं सुमहातपाः ।
जुहाव धृतराष्ट्रस्य राष्ट्रं वैचित्रवीर्यिणः ॥ १
तपसा घोररूपेण कर्शयन्देहमात्मनः ।
क्रोधेन महताविष्टो धर्मात्मा वै प्रतापवान् ॥ २
पुरा हि नैमिषेयाणां सत्रे द्वादशवार्षिके ।
वृत्ते विश्वजितोऽन्ते वै पाञ्चालानृषयोऽगमन् ॥ ३
तत्रेश्वरमयाचन्त दक्षिणार्थं मनीषिणः ।

बलान्वितान्वत्सतरान्निर्व्याधीनेकविंशतिम् ॥ ४
तानब्रवीद्बको वृद्धो विभजध्वं पशूनिति ।
पशूनेतानहं त्यक्त्वा भिक्षिष्ये राजसत्तमम् ॥ ५
एवमुक्त्वा ततो राजन्नृषीन्सर्वान्प्रतापवान् ।
जगाम धृतराष्ट्रस्य भवनं ब्राह्मणोत्तमः ॥ ६
स समीपगतो भूत्वा धृतराष्ट्रं जनेश्वरम् ।
अयाचत पशून्दाल्भ्यः स चैनं रुषितोऽब्रवीत् ॥७
यदृच्छया मृता दृष्ट्वा गास्तदा नृपसत्तम ।
एतान्पशून्नय क्षिप्रं ब्रह्मबन्धो यदीच्छसि ॥ ८
ऋषिस्त्वथ वचः श्रुत्वा चिन्तयामास धर्मवित् ।
अहो बत नृशंसं वै वाक्यमुक्तोऽस्मि संसदि ॥ ९
चिन्तयित्वा मुहूर्तं च रोषाविष्टो द्विजोत्तमः ।
मतिं चक्रे विनाशाय धृतराष्ट्रस्य भूपतेः ॥ १०
स उत्कृत्य मृतानां वै मांसानि द्विजसत्तमः ।
जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतेः पुरा ॥ ११
अवकीर्णे सरस्वत्यास्तीर्थे प्रज्वाल्य पावकम् ।
बको दाल्भ्यो महाराज नियमं परमास्थितः ।
स तैरेव जुहावास्य राष्ट्रं मांसैर्महातपाः ॥ १२
तस्मिंस्तु विधिवत्सत्रे संप्रवृत्ते सुदारुणे ।
अक्षीयत ततो राष्ट्रं धृतराष्ट्रस्य पार्थिव ॥ १३
छिद्यमानं यथानन्तं वनं परशुना विभो ।
बभूवापहतं तच्चाप्यवकीर्णमचेतनम् ॥ १४
दृष्ट्वा तदवकीर्णं तु राष्ट्रं स मनुजाधिपः ।
बभूव दुर्मना राजंश्चिन्तयामास च प्रभुः ॥ १५
मोक्षार्थमकरोद्यत्नं ब्राह्मणैः सहितः पुरा ।
अथासौ पार्थिवः खिन्नस्ते च विप्रास्तदा नृप ॥१६
यदा चापि न शक्नोति राष्ट्रं मोचयितुं नृप ।
अथ वैप्राश्निकांस्तत्र पप्रच्छ जनमेजय ॥ १७
ततो वैप्राश्निकाः प्राहुः पशुविप्रकृतस्त्वया ।
मांसैरभिजुहोतीति तव राष्ट्रं मुनिर्बकः ॥ १८
तेन ते हूयमानस्य राष्ट्रस्यास्य क्षयो महान् ।
तस्यैतत्तपसः कर्म येन ते ह्यनयो महान् ।
अपां कुञ्जे सरस्वत्यास्तं प्रसादय पार्थिव ॥ १९
सरस्वतीं ततो गत्वा स राजा बकमब्रवीत् ।
निपत्य शिरसा भूमौ प्राञ्जलिर्भरतर्षभ ॥ २०
प्रसादये त्वा भगवन्नपराधं क्षमस्व मे ।
मम दीनस्य लुब्धस्य मौर्ख्येण हतचेतसः ।
त्वं गतिस्त्वं च मे नाथः प्रसादं कर्तुमर्हसि ॥ २१
तं तथा विलपन्तं तु शोकोपहतचेतसम् ।
दृष्ट्वा तस्य कृपा जज्ञे राष्ट्रं तच्च व्यमोचयत् ॥ २२
ऋषिः प्रसन्नस्तस्याभूत्संरम्भं च विहाय सः ।
मोक्षार्थं तस्य राष्ट्रस्य जुहाव पुनराहुतिम् ॥ २३
मोक्षयित्वा ततो राष्ट्रं प्रतिगृह्य पशून्बहून् ।
हृष्टात्मा नैमिषारण्यं जगाम पुनरेव ह ॥ २४
धृतराष्ट्रोऽपि धर्मात्मा स्वस्थचेता महामनाः ।
स्वमेव नगरं राजा प्रतिपेदे महर्द्धिमत् ॥ २५
तत्र तीर्थे महाराज बृहस्पतिरुदारधीः ।
असुराणामभावाय भावाय च दिवौकसाम् ॥ २६
मांसैरपि जुहावेष्टिमक्षीयन्त ततोऽसुराः ।
दैवतैरपि संभग्ना जितकाशिभिराहवे ॥ २७
तत्रापि विधिवद्दत्त्वा ब्राह्मणेभ्यो महायशाः ।
वाजिनः कुञ्जरांश्चैव रथांश्चाश्वतरीयुतान् ॥ २८
रत्नानि च महार्हाणि धनं धान्यं च पुष्कलम् ।
ययौ तीर्थं महाबाहुर्यायातं पृथिवीपते ॥ २९
यत्र यज्ञे ययातेस्तु महाराज सरस्वती ।
सर्पिः पयश्च सुस्राव नाहुषस्य महात्मनः ॥ ३०
तत्रेष्ट्वा पुरुषव्याघ्रो ययातिः पृथिवीपतिः ।
आक्रामदूर्ध्वं मुदितो लेभे लोकांश्च पुष्कलान् ॥३१
ययातेर्यजमानस्य यत्र राजन्सरस्वती ।
प्रसृता प्रददौ कामान्ब्राह्मणानां महात्मनाम् ॥ ३२

यत्र यत्र हि यो विप्रो यान्यान्कामानभीप्सति ।
तत्र तत्र सरिच्छ्रेष्ठा ससर्ज सुबहून्रसान् ॥ ३३
तत्र देवाः सगन्धर्वाः प्रीता यज्ञस्य संपदा ।
विस्मिता मानुषाश्चासन्दृष्ट्वा तां यज्ञसंपदम् ॥ ३४
ततस्तालकेतुर्महाधर्मसेतु-
महात्मा कृतात्मा महादाननित्यः ।
वसिष्ठापवाहं महाभीमवेगं
धृतात्मा जितात्मा समभ्याजगाम ॥ ३५

इति श्रीमहाभारते शल्यपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

जनमेजय उवाच ।

वसिष्ठस्यापवाहो वै भीमवेगः कथं नु सः ।
किमर्थं च सरिच्छ्रेष्ठा तमृषिं प्रत्यवाहयत् ॥ १
केन चास्याभवद्वैरं कारणं किं च तत्प्रभो ।
शंस पृष्टो महाप्राज्ञ न हि तृप्यामि कथ्यताम् ॥ २

वैशंपायन उवाच ।

विश्वामित्रस्य चैवर्षेर्वसिष्ठस्य च भारत ।
भृशं वैरमभूद्राजंस्तपःस्पर्धाकृतं महत् ॥ ३
आश्रमो वै वसिष्ठस्य स्थाणुतीर्थेऽभवन्महान् ।
पूर्वतः पश्चिमश्चासीद्विश्वामित्रस्य धीमतः ॥ ४
यत्र स्थाणुर्महाराज तप्तवान्सुमहत्तपः ।
यत्रास्य कर्म तद्घोरं प्रवदन्ति मनीषिणः ॥ ५
यत्रेष्ट्वा भगवान्स्थाणुः पूजयित्वा सरस्वतीम् ।
स्थापयामास तत्तीर्थं स्थाणुतीर्थमिति प्रभो ॥ ६
तत्र सर्वे सुराः स्कन्दमभ्यषिञ्चन्नराधिप ।
सैनापत्येन महता सुरारिविनिबर्हणम् ॥ ७
तस्मिन्सरस्वतीतीर्थे विश्वामित्रो महामुनिः ।
वसिष्ठं चालयामास तपसोग्रेण तच्छृणु ॥ ८

विश्वामित्रवसिष्ठौ तावहन्यहनि भारत ।
स्पर्धां तपःकृतां तीव्रां चक्रतुस्तौ तपोधनौ ॥ ९
तत्राप्यधिकसंतापो विश्वामित्रो महामुनिः ।
दृष्ट्वा तेजो वसिष्ठस्य चिन्तामभिजगाम ह ।
तस्य बुद्धिरियं ह्यासीद्धर्मनित्यस्य भारत ॥ १०
इयं सरस्वती तूर्णं मत्समीपं तपोधनम् ।
आनयिष्यति वेगेन वसिष्ठं जपतां वरम् ।
इहागतं द्विजश्रेष्ठं हनिष्यामि न संशयः ॥ ११
एवं निश्चित्य भगवान्विश्वामित्रो महामुनिः ।
सस्मार सरितां श्रेष्ठां क्रोधसंरक्तलोचनः ॥ १२
सा ध्याता मुनिना तेन व्याकुलत्वं जगाम ह ।
जज्ञे चैनं महावीर्यं महाकोपं च भामिनी ॥ १३
तत एनं वेपमाना विवर्णा प्राञ्जलिस्तदा ।
उपतस्थे मुनिवरं विश्वामित्रं सरस्वती ॥ १४
हतवीरा यथा नारी साभवद्दुःखिता भृशम् ।
ब्रूहि किं करवाणीति प्रोवाच मुनिसत्तमम् ॥ १५
तामुवाच मुनिः क्रुद्धो वसिष्ठं शीघ्रमानय ।
यावदेनं निहन्म्यद्य तच्छ्रुत्वा व्यथिता नदी ॥ १६
साञ्जलिं तु ततः कृत्वा पुण्डरीकनिभेक्षणा ।
विव्यथे सुविरूढेव लता वायुसमीरिता ॥ १७
तथागतां तु तां दृष्ट्वा वेपमानां कृताञ्जलिम् ।
विश्वामित्रोऽब्रवीत्क्रुद्धो वसिष्ठं शीघ्रमानय ॥ १८
ततो भीता सरिच्छ्रेष्ठा चिन्तयामास भारत ।
उभयोः शापयोर्भीता कथमेतद्भविष्यति ॥ १९
साभिगम्य वसिष्ठं तु इममर्थमचोदयत् ।
यदुक्ता सरितां श्रेष्ठा विश्वामित्रेण धीमता ॥ २०
उभयोः शापयोर्भीता वेपमाना पुनः पुनः ।
चिन्तयित्वा महाशापमृषिवित्रासिता भृशम् ॥ २१
तां कृशां च विवर्णां च दृष्ट्वा चिन्तासमन्विताम् ।
उवाच राजन्धर्मात्मा वसिष्ठो द्विपदां वरः ॥ २२

त्राह्यात्मानं सरिच्छ्रेष्ठे वह मां शीघ्रगामिनी ।
विश्वामित्रः शपेद्धि त्वां मा कृथास्त्वं विचारणाम् ॥
तस्य तद्वचनं श्रुत्वा कृपाशीलस्य सा सरित् ।
चिन्तयामास कौरव्य किं कृतं सुकृतं भवेत् ॥ २४
तस्याश्चिन्ता समुत्पन्ना वसिष्ठो मय्यतीव हि ।
कृतवान्हि दयां नित्यं तस्य कार्यं हितं मया ॥ २५
अथ कूले स्वके राजञ्जपन्तमृषिसत्तमम् ।
जुह्वानं कौशिकं प्रेक्ष्य सरस्वत्यभ्यचिन्तयत् ॥ २६
इदमन्तरमित्येव ततः सा सरितां वरा ।
कूलापहारमकरोत्स्वेन वेगेन सा सरित् ॥ २७
तेन कूलापहारेण मैत्रावरुणिरौह्यत ।
उह्यमानश्च तुष्टाव तदा राजन्सरस्वतीम् ॥ २८
पितामहस्य सरसः प्रवृत्तासि सरस्वति ।
व्याप्तं चेदं जगत्सर्वं तवैवाम्भोभिरुत्तमैः ॥ २९
त्वमेवाकाशगा देवि मेघेषूत्सृजसे पयः ।
सर्वाश्चापस्त्वमेवेति त्वत्तो वयमधीमहे ॥ ३०
पुष्टिर्द्युतिस्तथा कीर्तिः सिद्धिर्वृद्धिरुमा तथा ।
त्वमेव वाणी स्वाहा त्वं त्वय्यायत्तमिदं जगत् ।
त्वमेव सर्वभूतेषु वससीह चतुर्विधा ॥ ३१
एवं सरस्वती राजन्स्तूयमाना महर्षिणा ।
वेगेनोवाह तं विप्रं विश्वामित्राश्रमं प्रति ।
न्यवेदयत चाभीक्ष्णं विश्वामित्राय तं मुनिम् ॥ ३२
तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः ।
अथान्वेषत्प्रहरणं वसिष्ठान्तकरं तदा ॥ ३३
तं तु क्रुद्धमभिप्रेक्ष्य ब्रह्महत्याभयान्नदी ।
अपोवाह वसिष्ठं तु प्राचीं दिशमतन्द्रिता ।
उभयोः कुर्वती वाक्यं वञ्चयित्वा तु गाधिजम् ॥ ३४
ततोऽपवाहितं दृष्ट्वा वसिष्ठमृषिसत्तमम् ।
अब्रवीदथ संक्रुद्धो विश्वामित्रो ह्यमर्षणः ॥ ३५
यस्मान्मा त्वं सरिच्छ्रेष्ठे वञ्चयित्वा पुनर्गता ।
शोणितं वह कल्याणि रक्षोग्रामणिसंमतम् ॥ ३६
ततः सरस्वती शप्ता विश्वामित्रेण धीमता ।
अवहच्छोणितोन्मिश्रं तोयं संवत्सरं तदा ॥ ३७
अथर्षयश्च देवाश्च गन्धर्वाप्सरसस्तथा ।
सरस्वतीं तथा दृष्ट्वा बभूवुर्भृशदुःखिताः ॥ ३८
एवं वसिष्ठापवाहो लोके ख्यातो जनाधिप ।
आगच्छच्च पुनर्मार्गं स्वमेव सरितां वरा ॥ ३९

इति श्रीमहाभारते शल्यपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

वैशंपायन उवाच ।

सा शप्ता तेन क्रुद्धेन विश्वामित्रेण धीमता ।
तस्मिंस्तीर्थवरे शुभ्रे शोणितं समुपावहत् ॥ १
अथाजग्मुस्ततो राजन्राक्षसास्तत्र भारत ।
तत्र ते शोणितं सर्वे पिबन्तः सुखमासते ॥ २
तृप्ताश्च सुभृशं तेन सुखिता विगतज्वराः ।
नृत्यन्तश्च हसन्तश्च यथा स्वर्गजितस्तथा ॥ ३
कस्यचित्त्वथ कालस्य ऋषयः सतपोधनाः ।
तीर्थयात्रां समाजग्मुः सरस्वत्यां महीपते ॥ ४
तेषु सर्वेषु तीर्थेषु आप्लुत्य मुनिपुंगवाः ।
प्राप्य प्रीतिं परां चापि तपोलुब्धा विशारदाः ।
प्रययुर्हि ततो राजन्येन तीर्थं हि तत्तथा ॥ ५
अथागम्य महाभागास्तत्तीर्थं दारुणं तदा ।
दृष्ट्वा तोयं सरस्वत्याः शोणितेन परिप्लुतम् ।
पीयमानं च रक्षोभिर्बहुभिर्नृपसत्तम ॥ ६
तान्दृष्ट्वा राक्षसान्राजन्मुनयः संशितव्रताः ।
परित्राणे सरस्वत्याः परं यत्नं प्रचक्रिरे ॥ ७
ते तु सर्वे महाभागाः समागम्य महाव्रताः ।
आहूय सरितां श्रेष्ठामिदं वचनमब्रुवन् ॥ ८
कारणं ब्रूहि कल्याणि किमर्थं ते ह्रदो ह्ययम् ।

एवमाकुलतां यातः श्रुत्वा पास्यामहे वयम् ॥ ९
ततः सा सर्वमाचष्ट यथावृत्तं प्रवेपती ।
दुःखितामथ तां दृष्ट्वा त ऊचुर्वै तपोधनाः ॥ १०
कारणं श्रुतमस्माभिः शापश्चैव श्रुतोऽनघे ।
करिष्यन्ति तु यत्प्राप्तं सर्व एव तपोधनाः ११
एवमुक्त्वा सरिच्छ्रेष्ठामूचुस्तेऽथ परस्परम् ।
विमोचयामहे सर्वे शापादेतां सरस्वतीम् ॥ १२
तेषां तु वचनादेव प्रकृतिस्था सरस्वती ।
प्रसन्नसलिला जज्ञे यथा पूर्वं तथैव हि ।
विमुक्ता च सरिच्छ्रेष्ठा विबभौ सा यथा पुरा ॥१३
दृष्ट्वा तोयं सरस्वत्या मुनिभिस्तैस्तथा कृतम् ।
कृताञ्जलीस्ततो राजन्राक्षसाः क्षुधयार्दिताः ।
ऊचुस्तान्वै मुनीन्सर्वान्कृपायुक्तान्पुनः पुनः ॥ १४
वयं हि क्षुधिताश्चैव धर्माद्धीनाश्च शाश्वतात् ।
न च नः कामकारोऽयं यद्वयं पापकारिणः ॥ १५
युष्माकं चाप्रसादेन दुष्कृतेन च कर्मणा ।
पक्षोऽयं वर्धतेऽस्माकं यतः स्म ब्रह्मराक्षसाः ॥ १६
एवं हि वैश्यशूद्राणां क्षत्रियाणां तथैव च ।
ये ब्राह्मणान्प्रद्विषन्ति ते भवन्तीह राक्षसाः ॥ १७
आचार्यमृत्विजं चैव गुरुं वृद्धजनं तथा ।
प्राणिनो येऽवमन्यन्ते ते भवन्तीह राक्षसाः ।
योषितां चैव पापानां योनिदोषेण वर्धते ॥ १८
तत्कुरुध्वमिहास्माकं कारुण्यं द्विजसत्तमाः ।
शक्ता भवन्तः सर्वेषां लोकानामपि तारणे ॥ १९
तेषां ते मुनयः श्रुत्वा तुष्टुवुस्तां महानदीम् ।
मोक्षार्थं रक्षसां तेषामूचुः प्रयतमानसाः ॥ २०
क्षुतकीटावपन्नं च यच्चोच्छिष्टाशितं भवेत् ।
केशावपन्नमाधूतमारुग्णमपि यद्भवेत् ।
श्वभिः संस्पृष्टमन्नं च भागोऽसौ रक्षसामिह ॥२१
तस्माज्ज्ञात्वा सदा विद्वानेतान्यन्नानि वर्जयेत् ।
राक्षसान्नमसौ भुङ्क्ते यो भुङ्क्ते ह्यन्नमीदृशम् ॥ २२
शोधयित्वा ततस्तीर्थमृषयस्ते तपोधनाः ।
मोक्षार्थं राक्षसानां च नदीं तां प्रत्यचोदयन् ॥२३
महर्षीणां मतं ज्ञात्वा ततः सा सरितां वरा ।
अरुणामानयामास स्वां तनुं पुरुषर्षभ ॥ २४
तस्यां ते राक्षसाः स्नात्वा तनूस्त्यक्त्वा दिवं गताः ।
अरुणायां महाराज ब्रह्महत्यापहा हि सा ॥ २५
एतमर्थमभिज्ञाय देवराजः शतक्रतुः ।
तस्मिंस्तीर्थवरे स्नात्वा विमुक्तः पाप्मना किल ॥२६

जनमेजय उवाच ।

किमर्थं भगवाञ्शक्रो ब्रह्महत्यामवाप्तवान् ।
कथमस्मिंश्च तीर्थे वै आप्लुत्याकल्मषोऽभवत् ॥२७

वैशंपायन उवाच ।

शृणुष्वैतदुपाख्यानं यथावृत्तं जनेश्वर ।
यथा बिभेद समयं नमुचेर्वासवः पुरा ॥ २८
नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत् ।
तेनेन्द्रः सख्यमकरोत्समयं चेदमब्रवीत् ॥ २९
नार्द्रेण त्वा न शुष्केण न रात्रौ नापि वाहनि ।
वधिष्याम्यसुरश्रेष्ठ सखे सत्येन ते शपे ॥ ३०
एवं स कृत्वा समयं सृष्ट्वा नीहारमीश्वरः ।
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः ॥ ३१
तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वयात् ।
हे मित्रहन्पाप इति ब्रुवाणं शक्रमन्तिकात् ॥ ३२
एवं स शिरसा तेन चोद्यमानः पुनः पुनः ।
पितामहाय संतप्त एतमर्थं न्यवेदयत् ॥ ३३
तमब्रवील्लोकगुरुररुणायां यथाविधि ।
इष्ट्वोपस्पृश देवेन्द्र ब्रह्महत्यापहा हि सा ॥ ३४
इत्युक्तः स सरस्वत्याः कुञ्जे वै जनमेजय ।
इष्ट्वा यथावद्बलभिदरुणायामुपास्पृशत् ॥ ३५

स मुक्तः पाप्मना तेन ब्रह्महत्याकृतेन ह ।
जगाम संहृष्टमनास्त्रिदिवं त्रिदशेश्वरः ॥ ३६
शिरस्तच्चापि नमुचेस्तत्रैवाप्लुत्य भारत ।
लोकान्कामदुघान्प्राप्तमक्षयान्राजसत्तम ॥ ३७

तत्राप्युपस्पृश्य बलो महात्मा
दत्त्वा च दानानि पृथग्विधानि ।
अवाप्य धर्मं परमार्यकर्मा
जगाम सोमस्य महत्स तीर्थम् ॥ ३८
यत्रायजद्राजसूयेन सोमः
साक्षात्पुरा विधिवत्पार्थिवेन्द्र ।
अत्रिर्धीमान्विप्रमुख्यो बभूव
होता यस्मिन्क्रतुमुख्ये महात्मा ॥ ३९
यस्यान्तेऽभूत्सुमहान्दानवानां
दैतेयानां राक्षसानां च देवैः ।
स संग्रामस्तारकाख्यः सुतीव्रो
यत्र स्कन्दस्तारकाख्यं जघान ॥ ४०
सेनापत्यं लब्धवान्देवतानां
महासेनो यत्र दैत्यान्तकर्ता ।
साक्षाच्चात्र न्यवसत्कार्त्तिकेयः
सदा कुमारो यत्र स प्लक्षराजः ॥ ४१

इति श्रीमहाभारते शल्यपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

जनमेजय उवाच ।

सरस्वत्याः प्रभावोऽयमुक्तस्ते द्विजसत्तम ।
कुमारस्याभिषेकं तु ब्रह्मन्व्याख्यातुमर्हसि ॥ १
यस्मिन्काले च देशे च यथा च वदतां वर ।
यश्चाभिषिक्तो भगवान्विधिना येन च प्रभुः ॥ २
स्कन्दो यथा च दैत्यानामकरोत्कदनं महत् ।
तथा मे सर्वमाचक्ष्व परं कौतूहलं हि मे ॥ ३

वैशंपायन उवाच ।

कुरुवंशस्य सदृशमिदं कौतूहलं तव ।
हर्षमुत्पादयत्येतद्वचो मे जनमेजय ॥ ४
हन्त ते कथयिष्यामि शृण्वानस्य जनाधिप ।
अभिषेकं कुमारस्य प्रभावं च महात्मनः ॥ ५
तेजो माहेश्वरं स्कन्नमग्नौ प्रपतितं पुरा ।
तत्सर्वभक्षो भगवान्नाशकद्दग्धुमक्षयम् ॥ ६
तेनासीदति तेजस्वी दीप्तिमान्हव्यवाहनः ।
न चैव धारयामास गर्भं तेजोमयं तदा ॥ ७
स गङ्गामभिसंगम्य नियोगाद्ब्रह्मणः प्रभुः ।
गर्भमाहितवान्दिव्यं भास्करोपमतेजसम् ॥ ८
अथ गङ्गापि तं गर्भमसहन्ती विधारणे ।
उत्ससर्ज गिरौ रम्ये हिमवत्यमरार्चिते ॥ ९
स तत्र ववृधे लोकानावृत्य ज्वलनात्मजः ।
ददृशुर्ज्वलनाकारं तं गर्भमथ कृत्तिकाः ॥ १०
शरस्तम्बे महात्मानमनलात्मजमीश्वरम् ।
ममायमिति ताः सर्वाः पुत्रार्थिन्योऽभिचक्रमुः ॥ ११
तासां विदित्वा भावं तं मातॄणां भगवान्प्रभुः ।
प्रस्नुतानां पयः षड्भिर्वदनैरपिबत्तदा ॥ १२
तं प्रभावं समालक्ष्य तस्य बालस्य कृत्तिकाः ।
परं विस्मयमापन्ना देव्यो दिव्यवपुर्धराः ॥ १३
यत्रोत्सृष्टः स भगवान्गङ्गया गिरिमूर्धनि ।
स शैलः काञ्चनः सर्वः संबभौ कुरुसत्तम ॥ १४
वर्धता चैव गर्भेण पृथिवी तेन रञ्जिता ।
अतश्च सर्वे संवृत्ता गिरयः काञ्चनाकराः ॥ १५
कुमारश्च महावीर्यः कार्त्तिकेय इति स्मृतः ।
गाङ्गेयः पूर्वमभवन्महायोगबलान्वितः ॥ १६
स देवस्तपसा चैव वीर्येण च समन्वितः ।
ववृधेऽतीव राजेन्द्र चन्द्रवत्प्रियदर्शनः ॥ १७
स तस्मिन्काञ्चने दिव्ये शरस्तम्बे श्रिया वृतः ।

स्तूयमानस्तदा शेते गन्धर्वैर्मुनिभिस्तथा ॥ १८
तथैनमन्वनृत्यन्त देवकन्याः सहस्रशः ।
दिव्यवादित्रनृत्तज्ञाः स्तुवन्त्यश्चारुदर्शनाः ॥ १९
अन्वास्ते च नदी देवं गङ्गा वै सरितां वरा ।
दधार पृथिवी चैनं बिभ्रती रूपमुत्तमम् ॥ २०
जातकर्मादिकास्तस्य क्रियाश्चक्रे बृहस्पतिः ।
वेदश्चैनं चतुर्मूर्तिरुपतस्थे कृताञ्जलिः ॥ २१
धनुर्वेदश्चतुष्पादः शस्त्रग्रामः ससंग्रहः ।
तत्रैनं समुपातिष्ठत्साक्षाद्वाणी च केवला ॥ २२
स ददर्श महावीर्यं देवदेवमुमापतिम् ।
शैलपुत्र्या सहासीनं भूतसंघशतैर्वृतम् ॥ २३
निकाया भूतसंघानां परमाद्भुतदर्शनाः ।
विकृता विकृताकारा विकृताभरणध्वजाः ॥ २४
घ्रसिंहर्क्षवदना बिडालमकराननाः ।
दंशमुखाश्चान्ये गजोष्ट्रवदनास्तथा ॥ २५
कवदनाः केचिद्गृध्रगोमायुदर्शनाः ।
क्रौञ्चपारावतनिभैर्वदनै राङ्कवैरपि ॥ २६
श्वाविच्छल्यकगोधानां खरैडकगवां तथा ।
सदृशानि वपूंष्यन्ये तत्र तत्र व्यधारयन् ॥ २७
केचिच्छैलाम्बुदप्रख्याश्चक्रालातगदायुधाः ।
केचिदञ्जनपुञ्जाभाः केचिच्छ्वेताचलप्रभाः ॥ २८
सप्त मातृगणाश्चैव समाजग्मुर्विशां पते ।
साध्या विश्वेऽथ मरुतो वसवः पितरस्तथा ॥ २९
रुद्रादित्यास्तथा सिद्धा भुजगा दानवाः खगाः ।
ब्रह्मा स्वयंभूर्भगवान्सपुत्रः सह विष्णुना ॥ ३०
शक्रस्तथाभ्ययाद्द्रष्टुं कुमारवरमच्युतम् ।
नारदप्रमुखाश्चापि देवगन्धर्वसत्तमाः ॥ ३१
देवर्षयश्च सिद्धाश्च बृहस्पतिपुरोगमाः ।
ऋभवो नाम वरदा देवानामपि देवताः ।
तेऽपि तत्र समाजग्मुर्यामा धामाश्च सर्वशः ॥ ३२

स तु बालोऽपि भगवान्महायोगबलान्वितः ।
अभ्याजगाम देवेशं शूलहस्तं पिनाकिनम् ॥ ३३
तमाव्रजन्तमालक्ष्य शिवस्यासीन्मनोगतम् ।
युगपच्छैलपुत्र्याश्च गङ्गायाः पावकस्य च ॥ ३४
किं नु पूर्वमयं बालो गौरवादभ्युपैष्यति ।
अपि मामिति सर्वेषां तेषामासीन्मनोगतम् ॥ ३५
तेषामेतमभिप्रायं चतुर्णामुपलक्ष्य सः ।
युगपद्योगमास्थाय ससर्ज विविधास्तनूः ॥ ३६
ततोऽभवच्चतुर्मूर्तिः क्षणेन भगवान्प्रभुः ।
स्कन्दः शाखो विशाखश्च नैगमेषश्च पृष्ठतः ॥ ३७
एवं स कृत्वा ह्यात्मानं चतुर्धा भगवान्प्रभुः ।
यतो रुद्रस्ततः स्कन्दो जगामाद्भुतदर्शनः ॥ ३८
विशाखस्तु ययौ येन देवी गिरिवरात्मजा ।
शाखो ययौ च भगवान्वायुमूर्तिर्विभावसुम् ।
नैगमेषोऽगमद्गङ्गां कुमारः पावकप्रभः ॥ ३९
सर्वे भास्वरदेहास्ते चत्वारः समरूपिणः ।
तान्समभ्ययुरव्यग्रास्तदद्भुतमिवाभवत् ॥ ४०
हाहाकारो महानासीद्देवदानवरक्षसाम् ।
तद्दृष्ट्वा महदाश्चर्यमद्भुतं लोमहर्षणम् ॥ ४१
ततो रुद्रश्च देवी च पावकश्च पितामहम् ।
गङ्गया सहिताः सर्वे प्रणिपेतुर्जगत्पतिम् ॥ ४२
प्रणिपत्य ततस्ते तु विधिवद्राजपुंगव ।
इदमूचुर्वचो राजन्कार्त्तिकेयप्रियेप्सया ॥ ४३
अस्य बालस्य भगवन्नाधिपत्यं यथेप्सितम् ।
अस्मत्प्रियार्थं देवेश सदृशं दातुमर्हसि ॥ ४४
ततः स भगवान्धीमान्सर्वलोकपितामहः ।
मनसा चिन्तयामास किमयं लभतामिति ॥ ४५
ऐश्वर्याणि हि सर्वाणि देवगन्धर्वरक्षसाम् ।
भूतयक्षविहंगानां पन्नगानां च सर्वशः ॥ ४६
पूर्वमेवादिदेशासौ निकायेषु महात्मनाम् ।

समर्थं च तमैश्वर्ये महामतिरमन्यत ॥ ४७
ततो मुहूर्तं स ध्यात्वा देवानां श्रेयसि स्थितः ।
सेनापत्यं ददौ तस्मै सर्वभूतेषु भारत ॥ ४८
सर्वदेवनिकायानां ये राजानः परिश्रुताः ।
तान्सर्वान्व्यादिदेशास्मै सर्वभूतपितामहः ॥ ४९
ततः कुमारमादाय देवा ब्रह्मपुरोगमाः ।
अभिषेकार्थमाजग्मुः शैलेन्द्रं सहितास्ततः ॥ ५०
पुण्यां हैमवतीं देवीं सरिच्छ्रेष्ठां सरस्वतीम् ।
समन्तपञ्चके या वै त्रिषु लोकेषु विश्रुता ॥ ५१
तत्र तीरे सरस्वत्याः पुण्ये सर्वगुणान्विते ।
निषेदुर्देवगन्धर्वाः सर्वे संपूर्णमानसाः ॥ ५२

इति श्रीमहाभारते शल्यपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

वैशंपायन उवाच ।

ततोऽभिषेकसंभारान्सर्वान्संभृत्य शास्त्रतः ।
बृहस्पतिः समिद्धेऽग्नौ जुहावाज्यं यथाविधि ॥ १
ततो हिमवता दत्ते मणिप्रवरशोभिते ।
दिव्यरत्नाचिते दिव्ये निषण्णः परमासने ॥ २
सर्वमङ्गलसंभारैर्विधिमन्त्रपुरस्कृतम् ।
आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ॥ ३
इन्द्राविष्णू महावीर्यौ सूर्याचन्द्रमसौ तथा ।
धाता चैव विधाता च तथा चैवानिलानलौ ॥ ४
पूष्णा भगेनार्यम्णा च अंशेन च विवस्वता ।
रुद्रश्च सहितो धीमान्मित्रेण वरुणेन च ॥ ५
रुद्रैर्वसुभिरादित्यैरश्विभ्यां च वृतः प्रभुः ।
विश्वेदेवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥ ६
गन्धर्वैरप्सरोभिश्च यक्षराक्षसपन्नगैः ।
देवर्षिभिरसंख्येयैस्तथा ब्रह्मर्षिभिर्वरैः ॥ ७
वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः ।
भृगुभिश्चाङ्गिरोभिश्च यतिभिश्च महात्मभिः ।
सर्वैर्विद्याधरैः पुण्यैर्योगसिद्धैस्तथा वृतः ॥ ८
पितामहः पुलस्त्यश्च पुलहश्च महातपाः ।
अङ्गिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ॥ ९
क्रतुर्हरः प्रचेताश्च मनुर्दक्षस्तथैव च ।
ऋतवश्च ग्रहाश्चैव ज्योतींषि च विशां पते ॥ १०
मूर्तिमत्यश्च सरितो वेदाश्चैव सनातनाः ।
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च ।
पृथिवी द्यौर्दिशश्चैव पादपाश्च जनाधिप ॥ ११
अदितिर्देवमाता च ह्रीः श्रीः स्वाहा सरस्वती ।
उमा शची सिनीवाली तथा चानुमतिः कुहूः ।
राका च धिषणा चैव पत्न्यश्चान्या दिवौकसाम् ॥१२
हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकशृङ्गवान् ।
ऐरावतः सानुचरः कलाः काष्ठास्तथैव च ।
मासार्धमासा ऋतवस्तथा रात्र्यहनी नृप ॥ १३
उच्चैःश्रवा हयश्रेष्ठो नागराजश्च वामनः ।
अरुणो गरुडश्चैव वृक्षाश्चौषधिभिः सह ॥ १४
धर्मश्च भगवान्देवः समाजग्मुर्हि संगताः ।
कालो यमश्च मृत्युश्च यमस्यानुचराश्च ये ॥ १५
बहुलत्वाच्च नोक्ता ये विविधा देवतागणाः ।
ते कुमाराभिषेकार्थं समाजग्मुस्ततस्ततः ॥ १६
जगृहुस्ते तदा राजन्सर्व एव दिवौकसः ।
आभिषेचनिकं भाण्डं मङ्गलानि च सर्वशः ॥१७
दिव्यसंभारसंयुक्तैः कलशैः काञ्चनैर्नृप ।
सरस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेव तु ॥ १८
अभ्यषिञ्चन्कुमारं वै संप्रहृष्टा दिवौकसः ।
सेनापतिं महात्मानमसुराणां भयावहम् ॥ १९
पुरा यथा महाराज वरुणं वै जलेश्वरम् ।
तथाभ्यषिञ्चद्भगवान्ब्रह्मा लोकपितामहः ।
कश्यपश्च महातेजा ये चान्ये नानुकीर्तिताः ॥२०

तस्मै ब्रह्मा ददौ प्रीतो बलिनो वातरंहसः ।
कामवीर्यधरान्सिद्धान्महापारिषदान्प्रभुः ॥ २१
नन्दिषेणं लोहिताक्षं घण्टाकर्णं च संमतम् ।
चतुर्थमस्यानुचरं ख्यातं कुमुदमालिनम् ॥ २२
ततः स्थाणुं महावेगं महापारिषदं क्रतुम् ।
मायाशतधरं कामं कामवीर्यबलान्वितम् ।
ददौ स्कन्दाय राजेन्द्र सुरारिविनिबर्हणम् ॥ २३
स हि देवासुरे युद्धे दैत्यानां भीमकर्मणाम् ।
जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश ॥ २४
तथा देवा ददुस्तस्मै सेनां नैर्ऋतसंकुलाम् ।
देवशत्रुक्षयकरीमजय्यां विश्वरूपिणीम् ॥ २५
जयशब्दं ततश्चक्रुर्देवाः सर्वे सवासवाः ।
गन्धर्वयक्षरक्षांसि मुनयः पितरस्तथा ॥ २६
यमः प्रादादनुचरौ यमकालोपमावुभौ ।
उन्माथं च प्रमाथं च महावीर्यौ महाद्युती ॥ २७
सुभ्राजो भास्करश्चैव यौ तौ सूर्यानुयायिनौ ।
तौ सूर्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान् ॥ २८
कैलासशृङ्गसंकाशौ श्वेतमाल्यानुलेपनौ ।
सोमोऽप्यनुचरौ प्रादान्मणिं सुमणिमेव च ॥ २९
ज्वालाजिह्वं तथा ज्योतिरात्मजाय हुताशनः ।
ददावनुचरौ शूरौ परसैन्यप्रमाथिनौ ॥ ३०
परिघं च वटं चैव भीमं च सुमहाबलम् ।
दहतिं दहनं चैव प्रचण्डौ वीर्यसंमतौ ।
अंशोऽप्यनुचरान्पञ्च ददौ स्कन्दाय धीमते ॥ ३१
उत्क्रोशं पङ्कजं चैव वज्रदण्डधरावुभौ ।
ददावनलपुत्राय वासवः परवीरहा ।
तौ हि शत्रून्महेन्द्रस्य जघ्नतुः समरे बहून् ॥ ३२
चक्रं विक्रमकं चैव संक्रमं च महाबलम् ।
स्कन्दाय त्रीननुचरान्ददौ विष्णुर्महायशाः ॥ ३३
वर्धनं नन्दनं चैव सर्वविद्याविशारदौ ।
स्कन्दाय ददतुः प्रीतावश्विनौ भरतर्षभ ॥ ३४
कुन्दनं कुसुमं चैव कुमुदं च महायशाः ।
डम्बराडम्बरौ चैव ददौ धाता महात्मने ॥ ३५
वक्रानुवक्रौ बलिनौ मेषवक्त्रौ बलोत्कटौ ।
ददौ त्वष्टा महामायौ स्कन्दायानुचरौ वरौ ॥ ३६
सुव्रतं सत्यसंधं च ददौ मित्रो महात्मने ।
कुमाराय महात्मानौ तपोविद्याधरौ प्रभुः ॥ ३७
सुदर्शनीयौ वरदौ त्रिषु लोकेषु विश्रुतौ ।
सुप्रभं च महात्मानं शुभकर्माणमेव च ।
कार्त्तिकेयाय संप्रादाद्विधाता लोकविश्रुतौ ॥ ३८
पालितकं कालिकं च महामायाविनावुभौ ।
पूषा च पार्षदौ प्रादात्कार्त्तिकेयाय भारत ॥ ३९
बलं चातिबलं चैव महावक्त्रौ महाबलौ ।
प्रददौ कार्त्तिकेयाय वायुर्भरतसत्तम ॥ ४०
घसं चातिघसं चैव तिमिवक्त्रौ महाबलौ ।
प्रददौ कार्त्तिकेयाय वरुणः सत्यसंगरः ॥ ४१
सुवर्चसं महात्मानं तथैवाप्यतिवर्चसम् ।
हिमवान्प्रददौ राजन्हुताशनसुताय वै ॥ ४२
काञ्चनं च महात्मानं मेघमालिनमेव च ।
ददावनुचरौ मेरुरग्निपुत्राय भारत ॥ ४३
स्थिरं चातिस्थिरं चैव मेरुरेवापरौ ददौ ।
महात्मनेऽग्निपुत्राय महाबलपराक्रमौ ॥ ४४
उच्छ्रितं चातिशृङ्गं च महापाषाणयोधिनौ ।
प्रददावग्निपुत्राय विन्ध्यः पारिषदावुभौ ॥ ४५
संग्रहं विग्रहं चैव समुद्रोऽपि गदाधरौ ।
प्रददावग्निपुत्राय महापारिषदावुभौ ॥ ४६
उन्मादं पुष्पदन्तं च शङ्कुकर्णं तथैव च ।
प्रददावग्निपुत्राय पार्वती शुभदर्शना ॥ ४७
जयं महाजयं चैव नागौ ज्वलनसूनवे ।
प्रददौ पुरुषव्याघ्र वासुकिः पन्नगेश्वरः ॥ ४८

एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा ।
सागराः सरितश्चैव गिरयश्च महाबलाः ॥ ४९
ददुः सेनागणाध्यक्षाञ्शूलपट्टिशधारिणः ।
दिव्यप्रहरणोपेतान्नानावेषविभूषितान् ॥ ५०
शृणु नामानि चान्येषां येऽन्ये स्कन्दस्य सैनिकाः ।
विविधायुधसंपन्नाश्चित्राभरणवर्मिणः ॥ ५१
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च ।
अनन्तो द्वादशभुजस्तथा कृष्णोपकृष्णकौ ॥ ५२
द्रोणश्रवाः कपिस्कन्धः काञ्चनाक्षो जलंधमः ।
अक्षसंतर्जनो राजन्कुनदीकस्तमोभ्रकृत् ॥ ५३
एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ।
सहस्रबाहुर्विकटो व्याघ्राक्षः क्षितिकम्पनः ॥ ५४
पुण्यनामा सुनामा च सुवक्त्रः प्रियदर्शनः ।
परिश्रुतः कोकनदः प्रियमाल्यानुलेपनः ॥ ५५
अजोदरो गजशिराः स्कन्धाक्षः शतलोचनः ।
ज्वालाजिह्वः करालश्च सितकेशो जटी हरिः ॥ ५६
चतुर्दंष्ट्रोऽष्टजिह्वश्च मेघनादः पृथुश्रवाः ।
विद्युदक्षो धनुर्वक्त्रो जठरो मारुताशनः ॥ ५७
उदराक्षो झषाक्षश्च वज्रनाभो वसुप्रभः ।
समुद्रवेगो राजेन्द्र शैलकम्पी तथैव च ॥ ५८
पुत्रमेषः प्रवाहश्च तथा नन्दोपनन्दकौ ।
धूम्रः श्वेतः कलिङ्गश्च सिद्धार्थो वरदस्तथा ॥ ५९
प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान् ।
आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ॥ ६०
क्षेमवापः सुजातश्च सिद्धयात्रश्च भारत ।
गोव्रजः कनकापीडो महापारिषदेश्वरः ॥ ६१
गायनो हसनश्चैव बाणः खड्गश्च वीर्यवान् ।
वैताली चातिताली च तथा कतिकवातिकौ ॥ ६२
हंसजः पङ्कदिग्धाङ्गः समुद्रोन्मादनश्च ह ।
रणोत्कटः प्रहासश्च श्वेतशीर्षश्च नन्दकः ॥ ६३
कालकण्ठः प्रभासश्च तथा कुम्भाण्डकोऽपरः ।
कालकाक्षः सितश्चैव भूतलोन्मथनस्तथा ॥ ६४
यज्ञवाहः प्रवाहश्च देवयाजी च सोमपः ।
सजालश्च महातेजाः क्रथक्राथौ च भारत ॥ ६५
तुहनश्च तुहानश्च चित्रदेवश्च वीर्यवान् ।
मधुरः सुप्रसादश्च किरीटी च महाबलः ॥ ६६
वसनो मधुवर्णश्च कलशोदर एव च ।
धमन्तो मन्मथकरः सूचीवक्त्रश्च वीर्यवान् ॥ ६७
श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पाण्डुरः ।
दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा ॥ ६८
अचलः कनकाक्षश्च बालानामयिकः प्रभुः ।
संचारकः कोकनदो गृध्रवक्त्रश्च जम्बुकः ॥ ६९
लोहाशवक्त्रो जठरः कुम्भवक्त्रश्च कुण्डकः ।
मद्गुग्रीवश्च कृष्णौजा हंसवक्त्रश्च चन्द्रभाः ॥ ७०
पाणिकूर्मा च शम्बूकः पञ्चवक्त्रश्च शिक्षकः ।
चाषवक्त्रश्च जम्बूकः शाकवक्त्रश्च कुण्डकः ॥७१
योगयुक्ता महात्मानः सततं ब्राह्मणप्रियाः ।
पैतामहा महात्मानो महापारिषदाश्च ह ।
यौवनस्थाश्च बालाश्च वृद्धाश्च जनमेजय ॥ ७२
सहस्रशः पारिषदाः कुमारमुपतस्थिरे ।
वक्त्रैर्नानाविधैर्ये तु शृणु ताञ्जनमेजय ॥ ७३
कूर्मकुक्कुटवक्त्राश्च शशोलूकमुखास्तथा ।
खरोष्ट्रवदनाश्चैव वराहवदनास्तथा ॥ ७४
मनुष्यमेषवक्त्राश्च सृगालवदनास्तथा ।
भीमा मकरवक्त्राश्च शिंशुमारमुखास्तथा ॥ ७५
मार्जारशशवक्त्राश्च दीर्घवक्त्राश्च भारत ।
नकुलोलूकवक्त्राश्च श्ववक्त्राश्च तथापरे ॥ ७६
आखुबभ्रुकवक्त्राश्च मयूरवदनास्तथा ।
मत्स्यमेषाननाश्चान्ये अजाविमहिषाननाः ॥ ७७
ऋक्षशार्दूलवक्त्राश्च द्वीपिसिंहाननास्तथा ।

भीमा गजाननाश्चैव तथा नक्रमुखाः परे ॥ ७८
गरुडाननाः खड्गमुखा वृककाकमुखास्तथा ।
गोखरोष्ट्रमुखाश्चान्ये वृषदंशमुखास्तथा ॥ ७९
महाजठरपादाङ्गास्तारकाक्षाश्च भारत ।
पारावतमुखाश्चान्ये तथा वृषमुखाः परे ॥ ८०
कोकिलावदनाश्चान्ये श्येनतित्तिरिकाननाः ।
कृकलासमुखाश्चैव विरजोम्बरधारिणः ॥ ८१
व्यालवक्त्राः शूलमुखाश्चण्डवक्त्राः शताननाः ।
आशीविषाश्चीरधरा गोनासावरणास्तथा ॥ ८२
स्थूलोदराः कृशाङ्गाश्च स्थूलाङ्गाश्च कृशोदराः ।
ह्रस्वग्रीवा महाकर्णा नानाव्यालविभूषिताः ॥ ८३
गजेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः ।
स्कन्धेमुखा महाराज तथा ह्युदरतोमुखाः ॥ ८४
पृष्ठेमुखा हनुमुखास्तथा जङ्घामुखा अपि ।
पार्श्वाननाश्च बहवो नानादेशमुखास्तथा ॥ ८५
तथा कीटपतंगानां सदृशास्या गणेश्वराः ।
नानाव्यालमुखाश्चान्ये बहुबाहुशिरोधराः ॥ ८६
नानावृक्षभुजाः केचित्कटिशीर्षास्तथापरे ।
भुजंगभोगवदना नानागुल्मनिवासिनः ॥ ८७
चीरसंवृतगात्राश्च तथा फलकवाससः ।
नानावेषधराश्चैव चर्मवासस एव च ॥ ८८
उष्णीषिणो मुकुटिनः कम्बुग्रीवाः सुवर्चसः ।
किरीटिनः पञ्चशिखास्तथा कठिनमूर्धजाः ॥ ८९
त्रिशिखा द्विशिखाश्चैव तथा सप्तशिखाः परे ।
शिखण्डिनो मुकुटिनो मुण्डाश्च जटिलास्तथा ॥ ९०
चित्रमाल्यधराः केचित्केचिद्रोमाननास्तथा ।
दिव्यमाल्याम्बरधराः सततं प्रियविग्रहाः ॥ ९१
कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठा निरूदराः ।
स्थूलपृष्ठा ह्रस्वपृष्ठाः प्रलम्बोदरमेहनाः ॥ ९२
महाभुजा ह्रस्वभुजा ह्रस्वगात्राश्च वामनाः ।
कुब्जाश्च दीर्घजङ्घाश्च हस्तिकर्णशिरोधराः ॥ ९३
हस्तिनासाः कूर्मनासा वृकनासास्तथापरे ।
दीर्घोष्ठा दीर्घजिह्वाश्च विकराला ह्यधोमुखाः ॥ ९४
महादंष्ट्रा ह्रस्वदंष्ट्राश्चतुर्दंष्ट्रास्तथापरे ।
वारणेन्द्रनिभाश्चान्ये भीमा राजन्सहस्रशः ॥ ९५
सुविभक्तशरीराश्च दीप्तिमन्तः स्वलंकृताः ।
पिङ्गाक्षाः शङ्कुकर्णाश्च वक्रनासाश्च भारत ॥ ९६
पृथुदंष्ट्रा महादंष्ट्राः स्थूलौष्ठा हरिमूर्धजाः ।
नानापादौष्ठदंष्ट्राश्च नानाहस्तशिरोधराः ।
नानावर्मभिराच्छन्ना नानाभाषाश्च भारत ॥ ९७
कुशला देशभाषासु जल्पन्तोऽन्योन्यमीश्वराः ।
हृष्टाः परिपतन्ति स्म महापारिषदास्तथा ॥ ९८
दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ।
पिङ्गाक्षा नीलकण्ठाश्च लम्बकर्णाश्च भारत ॥ ९९
वृकोदरनिभाश्चैव केचिदञ्जनसंनिभाः ।
श्वेताङ्गा लोहितग्रीवाः पिङ्गाक्षाश्च तथापरे ।
कल्माषा बहवो राजंश्चित्रवर्णाश्च भारत ॥ १००
चामरापीडकनिभाः श्वेतलोहितराजयः ।
नानावर्णाः सवर्णाश्च मयूरसदृशप्रभाः ॥ १०१
पुनः प्रहरणान्येषां कीर्त्यमानानि मे शृणु ।
शेषैः कृतं पारिषदैरायुधानां परिग्रहम् ॥ १०२
पाशोद्यतकराः केचिद्व्यादितास्याः खराननाः ।
पृथ्वक्षा नीलकण्ठाश्च तथा परिघबाहवः ॥ १०३
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
शूलासिहस्ताश्च तथा महाकाया महाबलाः ॥ १०४
गदाभुशुण्डिहस्ताश्च तथा तोमरपाणयः ।
असिमुद्गरहस्ताश्च दण्डहस्ताश्च भारत ॥ १०५
आयुधैर्विविधैर्घोरैर्महात्मानो महाजवाः ।
महाबला महावेगा महापारिषदास्तथा ॥ १०६
अभिषेकं कुमारस्य दृष्ट्वा हृष्टा रणप्रियाः ।

घण्टाजालपिनद्धाङ्गा ननृतुस्ते महौजसः ॥ १०७
एते चान्ये च बहवो महापारिषदा नृप ।
उपतस्थुर्महात्मानं कार्त्तिकेयं यशस्विनम् ॥ १०८
दिव्याश्चाप्यान्तरिक्षाश्च पार्थिवाश्चानिलोपमाः ।
व्यादिष्टा दैवतैः शूराः स्कन्दस्यानुचराभवन् ॥ १०९
तादृशानां सहस्राणि प्रयुतान्यर्बुदानि च ।
अभिषिक्तं महात्मानं परिवार्योपतस्थिरे ॥ ११०

इति श्रीमहाभारते शल्यपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

वैशंपायन उवाच ।

शृणु मातृगणान्राजन्कुमारानुचरानिमान् ।
कीर्त्यमानान्मया वीर सपत्नगणसूदनान् ॥ १
यशस्विनीनां मातॄणां शृणु नामानि भारत ।
याभिर्व्याप्तास्त्रयो लोकाः कल्याणीभिश्चराचराः ॥२
प्रभावती विशालाक्षी पलिता गोनसी तथा ।
श्रीमती बहुला चैव तथैव बहुपुत्रिका ॥ ३
अप्सुजाता च गोपाली बृहदम्बालिका तथा ।
जयावती मालतिका ध्रुवरत्ना भयंकरी ॥ ४
वसुदामा सुदामा च विशोका नन्दिनी तथा ।
एकचूडा महाचूडा चक्रनेमिश्च भारत ॥ ५
उत्तेजनी जयत्सेना कमलाक्ष्यथ शोभना ।
शत्रुंजया तथा चैव क्रोधना शलभी खरी ॥ ६
माधवी शुभवक्त्रा च तीर्थनेमिश्च भारत ।
गीतप्रिया च कल्याणी कद्रुला चामिताशना ॥ ७
मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलाताक्षी वीर्यवती विद्युज्जिह्वा च भारत ॥ ८
पद्मावती सुनक्षत्रा कन्दरा बहुयोजना ।
संतानिका च कौरव्य कमला च महाबला ॥ ९
सुदामा बहुदामा च सुप्रभा च यशस्विनी ।
नृत्यप्रिया च राजेन्द्र शतोलूखलमेखला ॥ १०
शतघण्टा शतानन्दा भगनन्दा च भामिनी ।
वपुष्मती चन्द्रशीता भद्रकाली च भारत ॥ ११
संकारिका निष्कुटिका भ्रमा चत्वरवासिनी ।
सुमङ्गला स्वस्तिमती वृद्धिकामा जयप्रिया ॥ १२
धनदा सुप्रसादा च भवदा च जलेश्वरी ।
एडी भेडी समेडी च वेतालजननी तथा ।
कण्डूतिः कालिका चैव देवमित्रा च भारत ॥१३
लम्बसी केतकी चैव चित्रसेना तथा बला ।
कुक्कुटिका शङ्खनिका तथा जर्जरिका नृप ॥ १४
कुण्डारिका कोकलिका कण्डरा च शतोदरी ।
उत्क्राथिनी जरेणा च महावेगा च कङ्कणा ॥ १५
मनोजवा कण्टकिनी प्रघसा पूतना तथा ।
खशया चुर्व्युटिर्वामा क्रोशनाथ तडित्प्रभा ॥ १६
मण्डोदरी च तुण्डा च कोटरा मेघवासिनी ।
सुभगा लम्बिनी लम्बा वसुचूडा विकत्थनी ॥ १७
ऊर्ध्ववेणीधरा चैव पिङ्गाक्षी लोहमेखला ।
पृथुवक्त्रा मधुरिका मधुकुम्भा तथैव च ॥ १८
पक्षालिका मन्थनिका जरायुर्जर्जरानना ।
ख्याता दहदहा चैव तथा धमधमा नृप ॥ १९
खण्डखण्डा च राजेन्द्र पूषणा मणिकुण्डला ।
अमोचा चैव कौरव्य तथा लम्बपयोधरा ॥ २०
वेणुवीणाधरा चैव पिङ्गाक्षी लोहमेखला ।
शशोलूकमुखी कृष्णा खरजङ्घा महाजवा ॥ २१
शिशुमारमुखी श्वेता लोहिताक्षी विभीषणा ।
जटालिका कामचरी दीर्घजिह्वा बलोत्कटा ॥ २२
कालेडिका वामनिका मुकुटा चैव भारत ।
लोहिताक्षी महाकाया हरिपिण्डी च भूमिप ॥ २३
एकाक्षरा सुकुसुमा कृष्णकर्णी च भारत ।
क्षुरकर्णी चतुष्कर्णी कर्णप्रावरणा तथा ॥ २४

चतुष्पथनिकेता च गोकर्णी महिषानना ।
खरकर्णी महाकर्णी भेरीस्वनमहास्वना ॥ २५
शङ्खकुम्भस्वना चैव भङ्गदा च महाबला ।
गणा च सुगणा चैव तथाभीत्यथ कामदा ॥ २६
चतुष्पथरता चैव भूतितीर्थान्यगोचरा ।
पशुदा वित्तदा चैव सुखदा च महायशाः ।
पयोदा गोमहिषदा सुविषाणा च भारत ॥ २७
प्रतिष्ठा सुप्रतिष्ठा च रोचमाना सुरोचना ।
गोकर्णी च सुकर्णी च ससिरा स्थेरिका तथा ।
एकचक्रा मेघरवा मेघमाला विरोचना ॥ २८
एताश्चान्याश्च बहवो मातरो भरतर्षभ ।
कार्त्तिकेयानुयायिन्यो नानारूपाः सहस्रशः ॥ २९
दीर्घनख्यो दीर्घदन्त्यो दीर्घतुण्ड्यश्च भारत ।
सरला मधुराश्चैव यौवनस्थाः स्वलंकृताः ।
माहात्म्येन च संयुक्ताः कामरूपधरास्तथा ।
निर्मांसगात्र्यः श्वेताश्च तथा काञ्चनसंनिभाः ॥ ३१
कृष्णमेघनिभाश्चान्या धूम्राश्च भरतर्षभ ।
अरुणाभा महाभागा दीर्घकेश्यः सिताम्बराः ॥ ३२
ऊर्ध्ववेणीधराश्चैव पिङ्गाक्ष्यो लम्बमेखलाः ।
लम्बोदर्यो लम्बकर्णास्तथा लम्बपयोधराः ॥ ३३
ताम्राक्ष्यस्ताम्रवर्णाश्च हर्यक्ष्यश्च तथापराः ।
वरदाः कामचारिण्यो नित्यप्रमुदितास्तथा ॥ ३४
याम्यो रौद्र्यस्तथा सौम्याः कौबेर्योऽथ महाबलाः ।
वारुण्योऽथ च माहेन्द्र्यस्तथाग्नेय्यः परंतप ॥ ३५
वायव्यश्चाथ कौमार्यो ब्राह्म्यश्च भरतर्षभ ।
रूपेणाप्सरसां तुल्या जवे वायुसमास्तथा ॥ ३६
परपुष्टोपमा वाक्ये तथर्द्ध्या धनदोपमाः ।
शक्रवीर्योपमाश्चैव दीप्त्या वह्निसमास्तथा ॥ ३७
वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ।
गुहाश्मशानवासिन्यः शैलप्रस्रवणालयाः ॥ ३८
नानाभरणधारिण्यो नानामाल्याम्बरास्तथा ।
नानाविचित्रवेषाश्च नानाभाषास्तथैव च ॥ ३९
एते चान्ये च बहवो गणाः शत्रुभयंकराः ।
अनुजग्मुर्महात्मानं त्रिदशेन्द्रस्य संमते ॥ ४०
ततः शक्त्यस्त्रमददद्भगवान्पाकशासनः ।
गुहाय राजशार्दूल विनाशाय सुरद्विषाम् ॥ ४१
महास्वनां महाघण्टां द्योतमानां सितप्रभाम् ।
तरुणादित्यवर्णां च पताकां भरतर्षभ ॥ ४२
ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूम् ।
उग्रां नानाप्रहरणां तपोवीर्यबलान्विताम् ॥ ४३
विष्णुर्ददौ वैजयन्तीं मालां बलविवर्धिनीम् ।
उमा ददौ चारजसी वाससी सूर्यसप्रभे ॥ ४४
गङ्गा कमण्डलुं दिव्यममृतोद्भवमुत्तमम् ।
ददौ प्रीत्या कुमाराय दण्डं चैव बृहस्पतिः ॥ ४५
गरुडो दयितं पुत्रं मयूरं चित्रबर्हिणम् ।
अरुणस्ताम्रचूडं च प्रददौ चरणायुधम् ॥ ४६
पाशं तु वरुणो राजा बलवीर्यसमन्वितम् ।
कृष्णाजिनं तथा ब्रह्मा ब्रह्मण्याय ददौ प्रभुः ।
समरेषु जयं चैव प्रददौ लोकभावनः ॥ ४७
सेनापत्यमनुप्राप्य स्कन्दो देवगणस्य ह ।
शुशुभे ज्वलितोऽर्चिष्मान्द्वितीय इव पावकः ।
ततः पारिषदैश्चैव मातृभिश्च समन्वितः ॥ ४८
सा सेना नैर्ऋती भीमा सघण्टोच्छ्रितकेतना ।
सभेरीशङ्खमुरजा सायुधा सपताकिनी ।
शारदी द्यौरिवाभाति ज्योतिर्भिरुपशोभिता ॥ ४९
ततो देवनिकायास्ते भूतसेनागणास्तथा ।
वादयामासुरव्यग्रा भेरीशङ्खांश्च पुष्कलान् ॥ ५०
पटहाञ्झर्झरांश्चैव क्रकचान्गोविषाणिकान् ।
आडम्बरान्गोमुखांश्च डिण्डिमांश्च महास्वनान् ॥ ५१
तुष्टुवुस्ते कुमारं च सर्वे देवाः सवासवाः ।

जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ ५२
ततः प्रीतो महासेनस्त्रिदशेभ्यो वरं ददौ ।
रिपून्हन्तास्मि समरे ये वो वधचिकीर्षवः ॥ ५३
प्रतिगृह्य वरं देवास्तस्माद्विबुधसत्तमात् ।
प्रीतात्मानो महात्मानो मेनिरे निहतान्रिपून् ॥ ५४
सर्वेषां भूतसंघानां हर्षान्नादः समुत्थितः ।
अपूरयत लोकांस्त्रीन्वरे दत्ते महात्मना ॥ ५५
स निर्ययौ महासेनो महत्या सेनया वृतः ।
वधाय युधि दैत्यानां रक्षार्थं च दिवौकसाम् ॥ ५६
व्यवसायो जयो धर्मः सिद्धिर्लक्ष्मीर्धृतिः स्मृतिः ।
महासेनस्य सैन्यानामग्रे जग्मुर्नराधिप ॥ ५७
स तया भीमया देवः शूलमुद्गरहस्तया ।
गदामुसलनाराचशक्तितोमरहस्तया ।
दृप्तसिंहनिनादिन्या विनद्य प्रययौ गुहः ॥ ५८
तं दृष्ट्वा सर्वदैतेया राक्षसा दानवास्तथा ।
व्यद्रवन्त दिशः सर्वा भयोद्विग्नाः समन्ततः ।
अभ्यद्रवन्त देवास्तान्विविधायुधपाणयः ॥ ५९
दृष्ट्वा च स ततः क्रुद्धः स्कन्दस्तेजोबलान्वितः ।
शक्त्यस्त्रं भगवान्भीमं पुनः पुनरवासृजत् ।
आदधच्चात्मनस्तेजो हविषेद्ध इवानलः ॥ ६०
अभ्यस्यमाने शक्त्यस्त्रे स्कन्देनामिततेजसा ।
उल्काज्वाला महाराज पपात वसुधातले ॥ ६१
संह्रादयन्तश्च तथा निर्घाताश्चापतन्क्षितौ ।
यथान्तकालसमये सुघोराः स्युस्तथा नृप ॥ ६२
क्षिप्ता ह्येका तथा शक्तिः सुघोरानलसूनुना ।
ततः कोट्यो विनिष्पेतुः शक्तीनां भरतर्षभ ॥ ६३
स शक्त्यस्त्रेण संग्रामे जघान भगवान्प्रभुः ।
दैत्येन्द्रं तारकं नाम महाबलपराक्रमम् ।
वृतं दैत्यायुतैर्वीरैर्बलिभिर्दशभिर्नृप ॥ ६४
महिषं चाष्टभिः पद्मैर्वृतं संख्ये निजघ्निवान् ।
त्रिपादं चायुतशतैर्जघान दशभिर्वृतम् ॥ ६५
ह्रदोदरं निखर्वैश्च वृतं दशभिरीश्वरः ।
जघानानुचरैः सार्धं विविधायुधपाणिभिः ॥ ६६
तत्राकुर्वन्त विपुलं नादं वध्यत्सु शत्रुषु ।
कुमारानुचरा राजन्पूरयन्तो दिशो दश ॥ ६७
शक्त्यस्त्रस्य तु राजेन्द्र ततोऽर्चिर्भिः समन्ततः ।
दग्धाः सहस्रशो दैत्या नादैः स्कन्दस्य चापरे ॥ ६८
पताकयावधूताश्च हताः केचित्सुरद्विषः ।
केचिद्घण्टारवत्रस्ता निपेतुर्वसुधातले ।
केचित्प्रहरणैश्छिन्ना विनिपेतुर्गतासवः ॥ ६९
एवं सुरद्विषोऽनेकान्बलवानाततायिनः ।
जघान समरे वीरः कार्त्तिकेयो महाबलः ॥ ७०
बाणो नामाथ दैतेयो बलेः पुत्रो महाबलः ।
क्रौञ्चं पर्वतमासाद्य देवसंघानबाधत ॥ ७१
तमभ्ययान्महासेनः सुरशत्रुमुदारधीः ।
स कार्त्तिकेयस्य भयात्क्रौञ्चं शरणमेयिवान् ॥ ७२
ततः क्रौञ्चं महामन्युः क्रौञ्चनादनिनादितम् ।
शक्त्या बिभेद भगवान्कार्त्तिकेयोऽग्निदत्तया ॥ ७३
सशालस्कन्धसरलं त्रस्तवानरवारणम् ।
पुलिनत्रस्तविहगं विनिष्पतितपन्नगम् ॥ ७४
गोलाङ्गूलर्क्षसंघैश्च द्रवद्भिरनुनादितम् ।
कुरङ्गगतिनिर्घोषमुद्भ्रान्तसृमराचितम् ॥ ७५
विनिष्पतद्भिः शरभैः सिंहैश्च सहसा द्रुतैः ।
शोच्यामपि दशां प्राप्तो रराजैव स पर्वतः ॥ ७६
विद्याधराः समुत्पेतुस्तस्य शृङ्गनिवासिनः ।
किंनराश्च समुद्विग्नाः शक्तिपातरवोद्धताः ॥ ७७
ततो दैत्या विनिष्पेतुः शतशोऽथ सहस्रशः ।
प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः ॥ ७८
तान्निजघ्नुरतिक्रम्य कुमारानुचरा मृधे ।
बिभेद शक्त्या क्रौञ्चं च पावकिः परवीरहा ॥ ७९

बहुधा चैकधा चैव कृत्वात्मानं महात्मना ।
शक्तिः क्षिप्ता रणे तस्य पाणिमेति पुनः पुनः ॥ ८०
एवंप्रभावो भगवानतो भूयश्च पावकिः ।
क्रौञ्चस्तेन विनिर्भिन्नो दैत्याश्च शतशो हताः ॥ ८१
ततः स भगवान्देवो निहत्य विबुधद्विषः ।
सभाज्यमानो विबुधैः परं हर्षमवाप ह ॥ ८२
ततो दुन्दुभयो राजन्नेदुः शङ्खाश्च भारत ।
मुमुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमम् ॥ ८३
दिव्यगन्धमुपादाय ववौ पुण्यश्च मारुतः ।
गन्धर्वास्तुष्टुवुश्चैनं यज्वानश्च महर्षयः ॥ ८४
केचिदेनं व्यवस्यन्ति पितामहसुतं प्रभुम् ।
सनत्कुमारं सर्वेषां ब्रह्मयोनिं तमग्रजम् ॥ ८५
केचिन्महेश्वरसुतं केचित्पुत्रं विभावसोः ।
उमायाः कृत्तिकानां च गङ्गायाश्च वदन्त्युत ॥ ८६
एकधा च द्विधा चैव चतुर्धा च महाबलम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥ ८७
एतत्ते कथितं राजन्कार्त्तिकेयाभिषेचनम् ।
शृणु चैव सरस्वत्यास्तीर्थवंशस्य पुण्यताम् ॥ ८८
बभूव तीर्थप्रवरं हतेषु सुरशत्रुषु ।
कुमारेण महाराज त्रिविष्टपमिवापरम् ॥ ८९
ऐश्वर्याणि च तत्रस्थो ददावीशः पृथक्पृथक् ।
तदा नैर्ऋतमुख्येभ्यस्त्रैलोक्ये पावकात्मजः ॥ ९०
एवं स भगवांस्तस्मिंस्तीर्थे दैत्यकुलान्तकः ।
अभिषिक्तो महाराज देवसेनापतिः सुरैः ॥ ९१
औजसं नाम तत्तीर्थं यत्र पूर्वमपां पतिः ।
अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ ॥ ९२
तस्मिंस्तीर्थवरे स्नात्वा स्कन्दं चाभ्यर्च्य लाङ्गली ।
ब्राह्मणेभ्यो ददौ रुक्मं वासांस्याभरणानि च ॥ ९३
उषित्वा रजनीं तत्र माधवः परवीरहा ।
पूज्य तीर्थवरं तच्च स्पृष्ट्वा तोयं च लाङ्गली ।
हृष्टः प्रीतमनाश्चैव ह्यभवन्माधवोत्तमः ॥ ९४
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
यथाभिषिक्तो भगवान्स्कन्दो देवैः समागतैः ॥ ९५

इति श्रीमहाभारते शल्यपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

जनमेजय उवाच ।

अत्यद्भुतमिदं ब्रह्मञ्श्रुतवानस्मि तत्त्वतः ।
अभिषेकं कुमारस्य विस्तरेण यथाविधि ॥ १
यच्छ्रुत्वा पूतमात्मानं विजानामि तपोधन ।
प्रहृष्टानि च रोमाणि प्रसन्नं च मनो मम ॥ २
अभिषेकं कुमारस्य दैत्यानां च वधं तथा ।
श्रुत्वा मे परमा प्रीतिर्भूयः कौतूहलं हि मे ॥ ३
अपां पतिः कथं ह्यस्मिन्नभिषिक्तः सुरासुरैः ।
तन्मे ब्रूहि महाप्राज्ञ कुशलो ह्यसि सत्तम ॥ ४

वैशंपायन उवाच ।

शृणु राजन्निदं चित्रं पूर्वकल्पे यथातथम् ।
आदौ कृतयुगे तस्मिन्वर्तमाने यथाविधि ।
वरुणं देवताः सर्वाः समेत्येदमथाब्रुवन् ॥ ५
यथास्मान्सुरराट् शक्रो भयेभ्यः पाति सर्वदा ।
तथा त्वमपि सर्वासां सरितां वै पतिर्भव ॥ ६
वासश्च ते सदा देव सागरे मकरालये ।
समुद्रोऽयं तव वशे भविष्यति नदीपतिः ॥ ७
सोमेन सार्धं च तव हानिवृद्धी भविष्यतः ।
एवमस्त्विति तान्देवान्वरुणो वाक्यमब्रवीत् ॥ ८
समागम्य ततः सर्वे वरुणं सागरालयम् ।
अपां पतिं प्रचक्रुर्हि विधिदृष्टेन कर्मणा ॥ ९
अभिषिच्य ततो देवा वरुणं यादसां पतिम् ।
जग्मुः स्वान्येव स्थानानि पूजयित्वा जलेश्वरम् ॥ १०
अभिषिक्तस्ततो देवैर्वरुणोऽपि महायशाः ।

सरितः सागरांश्चैव नदांश्चैव सरांसि च ।
पालयामास विधिना यथा देवाञ्शतक्रतुः ॥ ११
ततस्तत्राप्युपस्पृश्य दत्त्वा च विविधं वसु ।
अग्नितीर्थं महाप्राज्ञः स जगाम प्रलम्बहा ।
नष्टो न दृश्यते यत्र शमीगर्भे हुताशनः ॥ १२
लोकालोकविनाशे च प्रादुर्भूते तदानघ ।
उपतस्थुर्महात्मानं सर्वलोकपितामहम् ॥ १३
अग्निः प्रनष्टो भगवान्कारणं च न विद्महे ।
सर्वलोकक्षयो मा भूत्संपादयतु नोऽनलम् ॥ १४

जनमेजय उवाच ।

किमर्थं भगवानग्निः प्रनष्टो लोकभावनः ।
विज्ञातश्च कथं देवैस्तन्ममाचक्ष्व तत्त्वतः ॥ १५

वैशंपायन उवाच ।

भृगोः शापाद्भृशं भीतो जातवेदाः प्रतापवान् ।
शमीगर्भमथासाद्य ननाश भगवांस्ततः ॥ १६
प्रनष्टे तु तदा वह्नौ देवाः सर्वे सवासवाः ।
अन्वेषन्त तदा नष्टं ज्वलनं भृशदुःखिताः ॥ १७
ततोऽग्नितीर्थमासाद्य शमीगर्भस्थमेव हि ।
ददृशुर्ज्वलनं तत्र वसमानं यथाविधि ॥ १८
देवाः सर्वे नरव्याघ्र बृहस्पतिपुरोगमाः ।
ज्वलनं तं समासाद्य प्रीताभूवन्सवासवाः ।
पुनर्यथागतं जग्मुः सर्वभक्षश्च सोऽभवत् ॥ १९
भृगोः शापान्महीपाल यदुक्तं ब्रह्मवादिना ।
तत्राप्याप्लुत्य मतिमान्ब्रह्मयोनिं जगाम ह ॥ २०
ससर्ज भगवान्यत्र सर्वलोकपितामहः ।
तत्राप्लुत्य ततो ब्रह्मा सह देवैः प्रभुः पुरा ।
ससर्ज चान्नानि तथा देवतानां यथाविधि ॥ २१
तत्र स्नात्वा च दत्त्वा च वसूनि विविधानि च ।
कौबेरं प्रययौ तीर्थं तत्र तप्त्वा महत्तपः ।
धनाधिपत्यं संप्राप्तो राजन्नैलबिलः प्रभुः ॥ २२
तत्रस्थमेव तं राजन्धनानि निधयस्तथा ।
उपतस्थुर्नरश्रेष्ठ तत्तीर्थं लाङ्गली ततः ।
गत्वा स्नात्वा च विधिवद्ब्राह्मणेभ्यो धनं ददौ ॥२३
ददृशे तत्र तत्स्थानं कौबेरे काननोत्तमे ।
पुरा यत्र तपस्तप्तं विपुलं सुमहात्मना ॥ २४
यत्र राज्ञा कुबेरेण वरा लब्धाश्च पुष्कलाः ।
धनाधिपत्यं सख्यं च रुद्रेणामिततेजसा ॥ २५
सुरत्वं लोकपालत्वं पुत्रं च नलकूबरम् ।
यत्र लेभे महाबाहो धनाधिपतिरञ्जसा ॥ २६
अभिषिक्तश्च तत्रैव समागम्य मरुद्गणैः ।
वाहनं चास्य तद्दत्तं हंसयुक्तं मनोरमम् ।
विमानं पुष्पकं दिव्यं नैर्ऋतैश्वर्यमेव च ॥ २७
तत्राप्लुत्य बलो राजन्दत्त्वा दायांश्च पुष्कलान् ।
जगाम त्वरितो रामस्तीर्थं श्वेतानुलेपनः ॥ २८
निषेवितं सर्वसत्त्वैर्नाम्ना बदरपाचनम् ।
नानर्तुकवनोपेतं सदापुष्पफलं शुभम् ॥ २९

इति श्रीमहाभारते शल्यपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

वैशंपायन उवाच ।

ततस्तीर्थवरं रामो ययौ बदरपाचनम् ।
तपस्विसिद्धचरितं यत्र कन्या धृतव्रता ॥ १
भरद्वाजस्य दुहिता रूपेणाप्रतिमा भुवि ।
स्रुचावती नाम विभो कुमारी ब्रह्मचारिणी ॥ २
तपश्चचार सात्युग्रं नियमैर्बहुभिर्नृप ।
भर्ता मे देवराजः स्यादिति निश्चित्य भामिनी ॥ ३
समास्तस्या व्यतिक्रान्ता बह्व्यः कुरुकुलोद्वह ।
चरन्त्या नियमांस्तांस्तान्स्त्रीभिस्तीव्रान्सुदुश्चरान् ॥ ४
तस्यास्तु तेन वृत्तेन तपसा च विशां पते ।
भक्त्या च भगवान्प्रीतः परया पाकशासनः ॥ ५

आजगामाश्रमं तस्यास्त्रिदशाधिपतिः प्रभुः ।
आस्थाय रूपं विप्रर्षेर्वसिष्ठस्य महात्मनः ॥ ६
सा तं दृष्ट्वोग्रतपसं वसिष्ठं तपतां वरम् ।
आचारैर्मुनिभिर्दृष्टैः पूजयामास भारत ॥ ७
उवाच नियमज्ञा च कल्याणी सा प्रियंवदा ।
भगवन्मुनिशार्दूल किमाज्ञापयसि प्रभो ॥ ८
सर्वमद्य यथाशक्ति तव दास्यामि सुव्रत ।
शक्रभक्त्या तु ते पाणिं न दास्यामि कथंचन ॥ ९
व्रतैश्च नियमैश्चैव तपसा च तपोधन ।
शक्रस्तोषयितव्यो वै मया त्रिभुवनेश्वरः ॥ १०
इत्युक्तो भगवान्देवः स्मयन्निव निरीक्ष्य ताम् ।
उवाच नियमज्ञां तां सान्त्वयन्निव भारत ॥ ११
उग्रं तपश्चरसि वै विदिता मेऽसि सुव्रते ।
यदर्थमयमारम्भस्तव कल्याणि हृद्गतः ॥ १२
तच्च सर्वं यथाभूतं भविष्यति वरानने ।
तपसा लभ्यते सर्वं सर्वं तपसि तिष्ठति ॥ १३
यानि स्थानानि दिव्यानि विबुधानां शुभानने ।
तपसा तानि प्राप्यानि तपोमूलं महत्सुखम् ॥ १४
इह कृत्वा तपो घोरं देहं संन्यस्य मानवाः ।
देवत्वं यान्ति कल्याणि शृणु चेदं वचो मम ॥ १५
पचस्वैतानि सुभगे बदराणि शुभव्रते ।
पचेत्युक्त्वा स भगवाञ्जगाम बलसूदनः ॥ १६
आमन्त्र्य तां तु कल्याणीं ततो जप्यं जजाप सः ।
अविदूरे ततस्तस्मादाश्रमात्तीर्थ उत्तमे ।
इन्द्रतीर्थे महाराज त्रिषु लोकेषु विश्रुते ॥ १७
तस्या जिज्ञासनार्थं स भगवान्पाकशासनः ।
बदराणामपचनं चकार विबुधाधिपः ॥ १८
ततः सा प्रयता राजन्वाग्यता विगतक्लमा ।
तत्परा शुचिसंवीता पावके समधिश्रयत् ।
अपचद्राजशार्दूल बदराणि महाव्रता ॥ १९
तस्याः पचन्त्याः सुमहान्कालोऽगात्पुरुषर्षभ ।
न च स्म तान्यपच्यन्त दिनं च क्षयमभ्यगात् ॥२०
हुताशनेन दग्धश्च यस्तस्याः काष्ठसंचयः ।
अकाष्ठमग्निं सा दृष्ट्वा स्वशरीरमथादहत् ॥ २१
पादौ प्रक्षिप्य सा पूर्वं पावके चारुदर्शना ।
दग्धौ दग्धौ पुनः पादावुपावर्तयतानघा ॥ २२
चरणौ दह्यमानौ च नाचिन्तयदनिन्दिता ।
दुःखं कमलपत्राक्षी महर्षेः प्रियकाम्यया ॥ २३
अथ तत्कर्म दृष्ट्वास्याः प्रीतस्त्रिभुवनेश्वरः ।
ततः संदर्शयामास कन्यायै रूपमात्मनः ॥ २४
उवाच च सुरश्रेष्ठस्तां कन्यां सुदृढव्रताम् ।
प्रीतोऽस्मि ते शुभे भक्त्या तपसा नियमेन च ॥२५
तस्माद्योऽभिमतः कामः स ते संपत्स्यते शुभे ।
देहं त्यक्त्वा महाभागे त्रिदिवे मयि वत्स्यसि ॥२६
इदं च ते तीर्थवरं स्थिरं लोके भविष्यति ।
सर्वपापापहं सुभ्रु नाम्ना बदरपाचनम् ।
विख्यातं त्रिषु लोकेषु ब्रह्मर्षिभिरभिप्लुतम् ॥ २७
अस्मिन्खलु महाभागे शुभे तीर्थवरे पुरा ।
त्यक्त्वा सप्तर्षयो जग्मुर्हिमवन्तमरुन्धतीम् ॥ २८
ततस्ते वै महाभागा गत्वा तत्र सुसंशिताः ।
वृत्त्यर्थं फलमूलानि समाहर्तुं ययुः किल ॥ २९
तेषां वृत्त्यर्थिनां तत्र वसतां हिमवद्वने ।
अनावृष्टिरनुप्राप्ता तदा द्वादशवार्षिकी ॥ ३०
ते कृत्वा चाश्रमं तत्र न्यवसन्त तपस्विनः ।
अरुन्धत्यपि कल्याणी तपोनित्याभवत्तदा ॥ ३१
अरुन्धतीं ततो दृष्ट्वा तीव्रं नियममास्थिताम् ।
अथागमत्त्रिनयनः सुप्रीतो वरदस्तदा ॥ ३२
ब्राह्मं रूपं ततः कृत्वा महादेवो महायशाः ।
तामभ्येत्याब्रवीद्देवो भिक्षामिच्छाम्यहं शुभे ॥३३
प्रत्युवाच ततः सा तं ब्राह्मणं चारुदर्शना ।

क्षीणोऽन्नसंचयो विप्र बदराणीह भक्षय ।
ततोऽब्रवीन्महादेवः पचस्वैतानि सुव्रते ॥ ३४
इत्युक्ता सापचत्तानि ब्राह्मणप्रियकाम्यया ।
अधिश्रित्य समिद्धेऽग्नौ बदराणि यशस्विनी ॥ ३५
दिव्या मनोरमाः पुण्याः कथाः शुश्राव सा तदा ।
अतीता सा त्वनावृष्टिर्घोरा द्वादशवार्षिकी ॥ ३६
अनश्नन्त्याः पचन्त्याश्च शृण्वन्त्याश्च कथाः शुभाः ।
अहःसमः स तस्यास्तु कालोऽतीतः सुदारुणः ॥ ३७
ततस्ते मुनयः प्राप्ताः फलान्यादाय पर्वतात् ।
ततः स भगवान्प्रीतः प्रोवाचारुन्धतीं तदा ॥ ३८
उपसर्पस्व धर्मज्ञे यथापूर्वमिमानृषीन् ।
प्रीतोऽस्मि तव धर्मज्ञे तपसा नियमेन च ॥ ३९
ततः संदर्शयामास स्वरूपं भगवान्हरः ।
ततोऽब्रवीत्तदा तेभ्यस्तस्यास्तच्चरितं महत् ॥ ४०
भवद्भिर्हिमवत्पृष्ठे यत्तपः समुपार्जितम् ।
अस्याश्च यत्तपो विप्रा न समं तन्मतं मम ॥ ४१
अनया हि तपस्विन्या तपस्तप्तं सुदुश्चरम् ।
अनश्नन्त्या पचन्त्या च समा द्वादश पारिताः ॥ ४२
ततः प्रोवाच भगवांस्तामेवारुन्धतीं पुनः ।
वरं वृणीष्व कल्याणि यत्तेऽभिलषितं हृदि ॥ ४३
साब्रवीत्पृथुताम्राक्षी देवं सप्तर्षिसंसदि ।
भगवान्यदि मे प्रीतस्तीर्थं स्यादिदमुत्तमम् ।
सिद्धदेवर्षिदयितं नाम्ना बदरपाचनम् ॥ ४४
तथास्मिन्देवदेवेश त्रिरात्रमुषितः शुचिः ।
प्राप्नुयादुपवासेन फलं द्वादशवार्षिकम् ।
एवमस्त्विति तां चोक्त्वा हरो यातस्तदा दिवम् ॥ ४५
ऋषयो विस्मयं जग्मुस्तां दृष्ट्वा चाप्यरुन्धतीम् ।
अश्रान्तां चाविवर्णां च क्षुत्पिपासासहां सतीम् ॥ ४६
एवं सिद्धिः परा प्राप्ता अरुन्धत्या विशुद्धया ।
यथा त्वया महाभागे मदर्थं संशितव्रते ॥ ४७
विशेषो हि त्वया भद्रे व्रते ह्यस्मिन्समर्पितः ।
तथा चेदं ददाम्यद्य नियमेन सुतोषितः ॥ ४८
विशेषं तव कल्याणि प्रयच्छामि वरं वरे ।
अरुन्धत्या वरस्तस्या यो दत्तो वै महात्मना ॥ ४९
तस्य चाहं प्रसादेन तव कल्याणि तेजसा ।
प्रवक्ष्याम्यपरं भूयो वरमत्र यथाविधि ॥ ५०
यस्त्वेकां रजनीं तीर्थे वत्स्यते सुसमाहितः ।
स स्नात्वा प्राप्स्यते लोकान्देहन्यासाच्च दुर्लभान् ॥
इत्युक्त्वा भगवान्देवः सहस्राक्षः प्रतापवान् ।
स्रुचावतीं ततः पुण्यां जगाम त्रिदिवं पुनः ॥ ५२
गते वज्रधरे राजंस्तत्र वर्षं पपात ह ।
पुष्पाणां भरतश्रेष्ठ दिव्यानां दिव्यगन्धिनाम् ॥ ५३
नेदुर्दुन्दुभयश्चापि समन्तात्सुमहास्वनाः ।
मारुतश्च ववौ युक्त्या पुण्यगन्धो विशां पते ॥ ५४
उत्सृज्य तु शुभं देहं जगामेन्द्रस्य भार्यताम् ।
तपसोग्रेण सा लब्ध्वा तेन रेमे सहाच्युत ॥ ५५

जनमेजय उवाच ।

का तस्या भगवन्माता क्व संवृद्धा च शोभना ।
श्रोतुमिच्छाम्यहं ब्रह्मन्परं कौतूहलं हि मे ॥ ५६

वैशंपायन उवाच ।

भारद्वाजस्य विप्रर्षेः स्कन्नं रेतो महात्मनः ।
दृष्ट्वाप्सरसमायान्तीं घृताचीं पृथुलोचनाम् ॥ ५७
स तु जग्राह तद्रेतः करेण जपतां वरः ।
तदावपत्पर्णपुटे तत्र सा संभवच्छुभा ॥ ५८
तस्यास्तु जातकर्मादि कृत्वा सर्वं तपोधनः ।
नाम चास्याः स कृतवान्भारद्वाजो महामुनिः ॥ ५९
स्रुचावतीति धर्मात्मा तदर्षिगणसंसदि ।
स च तामाश्रमे न्यस्य जगाम हिमवद्वनम् ॥ ६०
तत्राप्युपस्पृश्य महानुभावो
वसूनि दत्त्वा च महाद्विजेभ्यः ।

जगाम तीर्थं सुसमाहितात्मा
शक्रस्य वृष्णिप्रवरस्तदानीम् ॥ ६१

इति श्रीमहाभारते शल्यपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

वैशंपायन उवाच ।

इन्द्रतीर्थं ततो गत्वा यदूनां प्रवरो बली ।
विप्रेभ्यो धनरत्नानि ददौ स्नात्वा यथाविधि ॥ १
तत्र ह्यमरराजोऽसावीजे क्रतुशतेन ह ।
बृहस्पतेश्च देवेशः प्रददौ विपुलं धनम् ॥ २
निरर्गलान्सजारूथ्यान्सर्वान्विविधदक्षिणान् ।
आजहार क्रतूंस्तत्र यथोक्तान्वेदपारगैः ॥ ३
तान्क्रतून्भरतश्रेष्ठ शतकृत्वो महाद्युतिः ।
पूरयामास विधिवत्ततः ख्यातः शतक्रतुः ॥ ४
तस्य नाम्ना च तत्तीर्थं शिवं पुण्यं सनातनम् ।
इन्द्रतीर्थमिति ख्यातं सर्वपापप्रमोचनम् ॥ ५
उपस्पृश्य च तत्रापि विधिवन्मुसलायुधः ।
ब्राह्मणान्पूजयित्वा च पानाच्छादनभोजनैः ।
शुभं तीर्थवरं तस्माद्रामतीर्थं जगाम ह ॥ ६
यत्र रामो महाभागो भार्गवः सुमहातपाः ।
असकृत्पृथिवीं सर्वां हतक्षत्रियपुंगवाम् ॥ ७
उपाध्यायं पुरस्कृत्य कश्यपं मुनिसत्तमम् ।
अयजद्वाजपेयेन सोऽश्वमेधशतेन च ।
प्रददौ दक्षिणार्थं च पृथिवीं वै ससागराम् ॥ ८
रामो दत्त्वा धनं तत्र द्विजेभ्यो जनमेजय ।
उपस्पृश्य यथान्यायं पूजयित्वा तथा द्विजान् ॥ ९
पुण्ये तीर्थे शुभे देशे *वसु दत्त्वा शुभाननः ।*
मुनींश्चैवाभिवाद्याथ यमुनातीर्थमागमत् ॥ १०
यत्रानयामास तदा राजसूयं महीपते ।
पुत्रोऽदितेर्महाभागो वरुणो वै सितप्रभः ॥ ११
तत्र निर्जित्य संग्रामे मानुषान्दैवतांस्तथा ।
वरं क्रतुं समाजह्रे वरुणः परवीरहा ॥ १२
तस्मिन्क्रतुवरे वृत्ते संग्रामः समजायत ।
देवानां दानवानां च त्रैलोक्यस्य क्षयावहः ॥ १३
राजसूये क्रतुश्रेष्ठे निवृत्ते जनमेजय ।
जायते सुमहाघोरः संग्रामः क्षत्रियान्प्रति ॥ १४
सीरायुधस्तदा रामस्तस्मिंस्तीर्थवरे तदा ।
तत्र स्नात्वा च दत्त्वा च द्विजेभ्यो वसु माधवः॥१५
वनमाली ततो हृष्टः स्तूयमानो द्विजातिभिः ।
तस्मादादित्यतीर्थं च जगाम कमलेक्षणः ॥ १६
यत्रेष्ट्वा भगवाञ्ज्योतिर्भास्करो राजसत्तम ।
ज्योतिषामाधिपत्यं च प्रभावं चाभ्यपद्यत ॥ १७
तस्या नद्यास्तु तीरे वै सर्वे देवाः सवासवाः ।
विश्वेदेवाः समरुतो गन्धर्वाप्सरसश्च ह ॥ १८
द्वैपायनः शुकश्चैव कृष्णश्च मधुसूदनः ।
यक्षाश्च राक्षसाश्चैव पिशाचाश्च विशां पते ॥ १९
एते चान्ये च बहवो योगसिद्धाः सहस्रशः ।
तस्मिंस्तीर्थे सरस्वत्याः शिवे पुण्ये परंतप ॥ २०
तत्र हत्वा पुरा विष्णुरसुरौ मधुकैटभौ ।
आप्लुतो भरतश्रेष्ठ तीर्थप्रवर उत्तमे ॥ २१
द्वैपायनश्च धर्मात्मा तत्रैवाप्लुत्य भारत ।
संप्राप्तः परमं योगं सिद्धिं च परमां गतः ॥ २२
असितो देवलश्चैव तस्मिन्नेव महातपाः ।
परमं योगमास्थाय ऋषिर्योगमवाप्नवान् ॥ २३

इति श्रीमहाभारते शल्यपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

वैशंपायन उवाच

तस्मिन्नेव तु धर्मात्मा वसति स्म तपोधनः ।
गार्हस्थ्यं धर्ममास्थाय असितो देवलः पुरा ॥ १

धर्मनित्यः शुचिर्दान्तो न्यस्तदण्डो महातपाः ।
कर्मणा मनसा वाचा समः सर्वेषु जन्तुषु ॥ २
अक्रोधनो महाराज तुल्यनिन्दाप्रियाप्रियः ।
काञ्चने लोष्टके चैव समदर्शी महातपाः ॥ ३
देवताः पूजयन्नित्यमतिथींश्च द्विजैः सह ।
ब्रह्मचर्यरतो नित्यं सदा धर्मपरायणः ॥ ४
ततोऽभ्येत्य महाराज योगमास्थाय भिक्षुकः ।
जैगीषव्यो मुनिर्धीमांस्तस्मिंस्तीर्थे समाहितः ॥ ५
देवलस्याश्रमे राजन्न्यवसत्स महाद्युतिः ।
योगनित्यो महाराज सिद्धिं प्राप्तो महातपाः ॥ ६
तं तत्र वसमानं तु जैगीषव्यं महामुनिम् ।
देवलो दर्शयन्नेव नैवायुञ्जत धर्मतः ॥ ७
एवं तयोर्महाराज दीर्घकालो व्यतिक्रमत् ।
जैगीषव्यं मुनिं चैव न ददर्शाथ देवलः ॥ ८
आहारकाले मतिमान्परिव्राड् जनमेजय ।
उपातिष्ठत धर्मज्ञो भैक्षकाले स देवलम् ॥ ९
स दृष्ट्वा भिक्षुरूपेण प्राप्तं तत्र महामुनिम् ।
गौरवं परमं चक्रे प्रीतिं च विपुलां तथा ॥ १०
देवलस्तु यथाशक्ति पूजयामास भारत ।
ऋषिदृष्टेन विधिना समा बह्वयः समाहितः ॥ ११
कदाचित्तस्य नृपते देवलस्य महात्मनः ।
चिन्ता सुमहती जाता मुनिं दृष्ट्वा महाद्युतिम् ॥१२
समास्तु समतिक्रान्ता बह्वयः पूजयतो मम ।
न चायमलसो भिक्षुरभ्यभाषत किंचन ॥ १३
एवं विगणयन्नेव स जगाम महोदधिम् ।
अन्तरिक्षचरः श्रीमान्कलशं गृह्य देवलः ॥ १४
गच्छन्नेव स धर्मात्मा समुद्रं सरितां पतिम् ।
जैगीषव्यं ततोऽपश्यद्गतं प्रागेव भारत ॥ १५
ततः सविस्मयश्चिन्तां जगामाथासितः प्रभुः ।
कथं भिक्षुरयं प्राप्तः समुद्रे स्नात एव च ॥ १६
इत्येवं चिन्तयामास महर्षिरसितस्तदा ।
स्नात्वा समुद्रे विधिवच्छुचिर्जप्यं जजाप ह ॥ १७
कृतजप्याह्निकः श्रीमानाश्रमं च जगाम ह ।
कलशं जलपूर्णं वै गृहीत्वा जनमेजय ॥ १८
ततः स प्रविशन्नेव स्वमाश्रमपदं मुनिः ।
आसीनमाश्रमे तत्र जैगीषव्यमपश्यत ॥ १९
न व्याहरति चैवैनं जैगीषव्यः कथंचन ।
काष्ठभूतोऽऽश्रमपदे वसति स्म महातपाः ॥ २०
तं दृष्ट्वा चाप्लुतं तोये सागरे सागरोपमम् ।
प्रविष्टमाश्रमं चापि पूर्वमेव ददर्श सः ॥ २१
असितो देवलो राजंश्चिन्तयामास बुद्धिमान् ।
दृष्टः प्रभावं तपसो जैगीषव्यस्य योगजम् ॥ २२
चिन्तयामास राजेन्द्र तदा स मुनिसत्तमः ।
मया दृष्टः समुद्रे च आश्रमे च कथं त्वयम् ॥ २३
एवं विगणयन्नेव स मुनिर्मन्त्रपारगः ।
उत्पपाताश्रमात्तस्मादन्तरिक्षं विशां पते ।
जिज्ञासार्थं तदा भिक्षोर्जैगीषव्यस्य देवलः ॥ २४
सोऽन्तरिक्षचरान्सिद्धान्समपश्यत्समाहितान् ।
जैगीषव्यं च तैः सिद्धैः पूज्यमानमपश्यत ॥ २५
ततोऽसितः सुसंरब्धो व्यवसायी दृढव्रतः ।
अपश्यद्वै दिवं यान्तं जैगीषव्यं स देवलः ॥ २६
तस्माच्च पितृलोकं तं व्रजन्तं सोऽन्वपश्यत ।
पितृलोकाच्च तं यान्तं याम्यं लोकमपश्यत ॥ २७
तस्मादपि समुत्पत्य सोमलोकमभिष्टुतम् ।
व्रजन्तमन्वपश्यत्स जैगीषव्यं महामुनिम् ॥ २८
लोकान्समुत्पतन्तं च शुभानेकान्तयाजिनाम् ।
ततोऽग्निहोत्रिणां लोकांस्तेभ्यश्चाप्युत्पपात ह ॥ २९
दर्शं च पौर्णमासं च ये यजन्ति तपोधनाः ।
तेभ्यः स ददृशे धीमाँल्लोकेभ्यः पशुयाजिनाम् ।
व्रजन्तं लोकममलमपश्यद्देवपूजितम् ॥ ३०

चातुर्मास्यैर्बहुविधैर्यजन्ते ये तपोधनाः ।
तेषां स्थानं तथा यान्तं तथाग्निष्टोमयाजिनाम् ॥३१
अग्निष्टुतेन च तथा ये यजन्ति तपोधनाः ।
तत्स्थानमनुसंप्राप्तमन्वपश्यत देवलः ॥ ३२
वाजपेयं क्रतुवरं तथा बहुसुवर्णकम् ।
आहरन्ति महाप्राज्ञास्तेषां लोकेष्वपश्यत ॥ ३३
यजन्ते पुण्डरीकेण राजसूयेन चैव ये ।
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ॥ ३४
अश्वमेधं क्रतुवरं नरमेधं तथैव च ।
आहरन्ति नरश्रेष्ठास्तेषां लोकेष्वपश्यत ॥ ३५
सर्वमेधं च दुष्प्रापं तथा सौत्रामणिं च ये ।
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ॥ ३६
द्वादशाहैश्च सत्रैर्ये यजन्ते विविधैर्नृप ।
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ॥ ३७
मित्रावरुणयोर्लोकानादित्यानां तथैव च ।
सलोकतामनुप्राप्तमपश्यत ततोऽसितः ॥ ३८
रुद्राणां च वसूनां च स्थानं यच्च बृहस्पतेः ।
तानि सर्वाण्यतीतं च समपश्यत्ततोऽसितः ॥ ३९
आरुह्य च गवां लोकं प्रयान्तं ब्रह्मसत्रिणाम् ।
लोकानपश्यद्गच्छन्तं जैगीषव्यं ततोऽसितः ॥ ४०
त्रीँल्लोकानपरान्विप्रमुत्पतन्तं स्वतेजसा ।
पतिव्रतानां लोकांश्च व्रजन्तं सोऽन्वपश्यत ॥ ४१
ततो मुनिवरं भूयो जैगीषव्यमथासितः ।
नान्वपश्यत योगस्थमन्तर्हितमरिंदम ॥ ४२
सोऽचिन्तयन्महाभागो जैगीषव्यस्य देवलः ।
प्रभावं सुव्रतत्वं च सिद्धिं योगस्य चातुलाम् ॥४३
असितोऽपृच्छत तदा सिद्धाँल्लोकेषु सत्तमान् ।
प्रयतः प्राञ्जलिर्भूत्वा धीरस्तान्ब्रह्मसत्रिणः ॥ ४४
जैगीषव्यं न पश्यामि तं शंसत महौजसम् ।
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ॥ ४५

सिद्धा ऊचुः ।

शृणु देवल भूतार्थं शंसतां नो दृढव्रत ।
जैगीषव्यो गतो लोकं शाश्वतं ब्रह्मणोऽव्ययम् ॥४६
स श्रुत्वा वचनं तेषां सिद्धानां ब्रह्मसत्रिणाम् ।
असितो देवलस्तूर्णमुत्पपात पपात च ॥ ४७
ततः सिद्धास्त ऊचुर्हि देवलं पुनरेव ह ।
न देवल गतिस्तत्र तव गन्तुं तपोधन ।
ब्रह्मणः सदनं विप्र जैगीषव्यो यदाप्तवान् ॥ ४८
तेषां तद्वचनं श्रुत्वा सिद्धानां देवलः पुनः ।
आनुपूर्व्येण लोकांस्तान्सर्वानवततार ह ॥ ४९
स्वमाश्रमपदं पुण्यमाजगाम पतंगवत् ।
प्रविशन्नेव चापश्यज्जैगीषव्यं स देवलः ॥ ५०
ततो बुद्ध्या व्यगणयद्देवलो धर्मयुक्तया ।
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ॥ ५१
ततोऽब्रवीन्महात्मानं जैगीषव्यं स देवलः ।
विनयावनतो राजन्नुपसर्प्य महामुनिम् ।
मोक्षधर्मं समास्थातुमिच्छेयं भगवन्नहम् ॥ ५२
तस्य तद्वचनं श्रुत्वा उपदेशं चकार सः ।
विधिं च योगस्य परं कार्याकार्यं च शास्त्रतः ॥ ५३
संन्यासकृतबुद्धिं तं ततो दृष्ट्वा महातपाः ।
सर्वाश्चास्य क्रियाश्चक्रे विधिदृष्टेन कर्मणा ॥ ५४
संन्यासकृतबुद्धिं तं भूतानि पितृभिः सह ।
ततो दृष्ट्वा प्ररुरुदुः कोऽस्मान्संविभजिष्यति ॥ ५५
देवलस्तु वचः श्रुत्वा भूतानां करुणं तथा ।
दिशो दश व्याहरतां मोक्षं त्यक्तुं मनो दधे ॥ ५६
ततस्तु फलमूलानि पवित्राणि च भारत ।
पुष्पाण्योषधयश्चैव रोरूयन्ते सहस्रशः ॥ ५७
पुनर्नो देवलः क्षुद्रो नूनं छेत्स्यति दुर्मतिः ।
अभयं सर्वभूतेभ्यो यो दत्त्वा नावबुध्यते ॥ ५८
ततो भूयो व्यगणयत्स्वबुद्ध्या मुनिसत्तमः ।

मोक्षे गार्हस्थ्यधर्मे वा किं नु श्रेयस्करं भवेत् ॥५९
इति निश्चित्य मनसा देवलो राजसत्तम ।
त्यक्त्वा गार्हस्थ्यधर्मं स मोक्षधर्ममरोचयत् ॥ ६०
एवमादीनि संचिन्त्य देवलो निश्चयात्ततः ।
प्राप्तवान्परमां सिद्धिं परं योगं च भारत ॥ ६१
ततो देवाः समागम्य बृहस्पतिपुरोगमाः ।
जैगीषव्यं तपश्चास्य प्रशंसन्ति तपस्विनः ॥ ६२
अथाब्रवीदृषिवरो देवान्वै नारदस्तदा ।
जैगीषव्ये तपो नास्ति विस्मापयति योऽसितम् ॥६३
तमेवंवादिनं धीरं प्रत्यूचुस्ते दिवौकसः ।
मैवमित्येव शंसन्तो जैगीषव्यं महामुनिम् ॥ ६४

तत्राप्युपस्पृश्य ततो महात्मा
दत्त्वा च वित्तं हलभृद्द्विजेभ्यः ।
अवाप्य धर्मं परमार्यकर्मा
जगाम सोमस्य महत्स तीर्थम् ॥ ६५

इति श्रीमहाभारते शल्यपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

वैशंपायन उवाच ।

यत्रेजिवानुडुपती राजसूयेन भारत ।
तस्मिन्वृत्ते महानासीत्संग्रामस्तारकामयः ॥ १
तत्राप्युपस्पृश्य बलो दत्त्वा दानानि चात्मवान् ।
सारस्वतस्य धर्मात्मा मुनेस्तीर्थं जगाम ह ॥ २
यत्र द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ।
वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ३

जनमेजय उवाच ।

कथं द्वादशवार्षिक्यामनावृष्ट्यां तपोधनः ।
वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ४

वैशंपायन उवाच ।

आसीत्पूर्वं महाराज मुनिर्धीमान्महातपाः ।
दधीच इति विख्यातो ब्रह्मचारी जितेन्द्रियः ॥ ५
तस्यातितपसः शक्रो बिभेति सततं विभो ।
न स लोभयितुं शक्यः फलैर्बहुविधैरपि ॥ ६
प्रलोभनार्थं तस्याथ प्राहिणोत्पाकशासनः ।
दिव्यामप्सरसं पुण्यां दर्शनीयामलम्बुसाम् ॥ ७
तस्य तर्पयतो देवान्सरस्वत्यां महात्मनः ।
समीपतो महाराज सोपातिष्ठत भामिनी ॥ ८
तां दिव्यवपुषं दृष्ट्वा तस्यर्षेर्भावितात्मनः ।
रेतः स्कन्नं सरस्वत्यां तत्सा जग्राह निम्नगा ॥ ९
कुक्षौ चाप्यदधद्दृष्ट्वा तद्रेतः पुरुषर्षभ ।
सा दधार च तं गर्भं पुत्रहेतोर्महानदी ॥ १०
सुषुवे चापि समये पुत्रं सा सरितां वरा ।
जगाम पुत्रमादाय तमृषिं प्रति च प्रभो ॥ ११
ऋषिसंसदि तं दृष्ट्वा सा नदी मुनिसत्तमम् ।
ततः प्रोवाच राजेन्द्र ददती पुत्रमस्य तम् ।
ब्रह्मर्षे तव पुत्रोऽयं त्वद्भक्त्या धारितो मया ॥१२
दृष्ट्वा तेऽप्सरसं रेतो यत्स्कन्नं प्रागलम्बुसाम् ।
तत्कुक्षिणा वै ब्रह्मर्षे त्वद्भक्त्या धृतवत्यहम् ॥ १३
न विनाशमिदं गच्छेत्त्वत्तेज इति निश्चयात् ।
प्रतिगृह्णीष्व पुत्रं स्वं मया दत्तमनिन्दितम् ॥ १४
इत्युक्तः प्रतिजग्राह प्रीतिं चावाप उत्तमाम् ।
मन्त्रवच्चोपजिघ्रत्तं मूर्ध्नि प्रेम्णा द्विजोत्तमः ॥ १५
परिष्वज्य चिरं कालं तदा भरतसत्तम ।
सरस्वत्यै वरं प्रादात्प्रीयमाणो महामुनिः ॥ १६
विश्वे देवाः सपितरो गन्धर्वाप्सरसां गणाः ।
तृप्तिं यास्यन्ति सुभगे तर्प्यमाणास्तवाम्भसा ॥ १७
इत्युक्त्वा स तु तुष्टाव वचोभिर्वै महानदीम् ।
प्रीतः परमहृष्टात्मा यथावच्छृणु पार्थिव ॥ १८
प्रसृतासि महाभागे सरसो ब्रह्मणः पुरा ।
जानन्ति त्वां सरिच्छ्रेष्ठे मुनयः संशितव्रताः ॥ १९

मम प्रियकरी चापि सततं प्रियदर्शने ।
तस्मात्सारस्वतः पुत्रो महांस्ते वरवर्णिनि ॥ २०
तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः ।
सारस्वत इति ख्यातो भविष्यति महातपाः ॥ २१
एष द्वादशवार्षिक्यामनावृष्ट्यां द्विजर्षभान् ।
सारस्वतो महाभागे वेदानध्यापयिष्यति ॥ २२
पुण्याभ्यश्च सरिद्भ्यस्त्वं सदा पुण्यतमा शुभे ।
भविष्यसि महाभागे मत्प्रसादात्सरस्वति ॥ २३
एवं सा संस्तुता तेन वरं लब्ध्वा महानदी ।
पुत्रमादाय मुदिता जगाम भरतर्षभ ॥ २४
तस्मिन्नेव काले तु विरोधे देवदानवैः ।
शक्रः प्रहरणान्वेषी लोकांस्त्रीन्विचचार ह ॥ २५
न चोपलेभे भगवाञ्शक्रः प्रहरणं तदा ।
यद्वै तेषां भवेद्योग्यं वधाय विबुधद्विषाम् ॥ २६
ततोऽब्रवीत्सुराञ्शक्रो न मे शक्या महासुराः ।
ऋतेऽस्थिभिर्दधीचस्य निहन्तुं त्रिदशद्विषः ॥ २७
तस्माद्गत्वा ऋषिश्रेष्ठो याच्यतां सुरसत्तमाः ।
दधीचास्थीनि देहीति तैर्वधिष्यामहे रिपून् ॥ २८
स देवैर्याचितोऽस्थीनि यत्नादृषिवरस्तदा ।
प्राणत्यागं कुरुष्वेति चकारैवाविचारयन् ।
स लोकानक्षयान्प्राप्तो देवप्रियकरस्तदा ॥ २९
तस्यास्थिभिरथो शक्रः संप्रहृष्टमनास्तदा ।
कारयामास दिव्यानि नानाप्रहरणान्युत ।
वज्राणि चक्राणि गदा गुरुदण्डांश्च पुष्कलान् ॥ ३०
स हि तीव्रेण तपसा संभृतः परमर्षिणा ।
प्रजापतिसुतेनाथ भृगुणा लोकभावनः ॥ ३१
अतिकायः स तेजस्वी लोकसारविनिर्मितः ।
जज्ञे शैलगुरुः प्रांशुर्महिम्ना प्रथितः प्रभुः ।
नित्यमुद्विजते चास्य तेजसा पाकशासनः ॥ ३२
तेन वज्रेण भगवान्मन्त्रयुक्तेन भारत ।
भृशं क्रोधविसृष्टेन ब्रह्मतेजोभवेन च ।
दैत्यदानववीराणां जघान नवतीर्नव ॥ ३३
अथ काले व्यतिक्रान्ते महत्यतिभयंकरे ।
अनावृष्टिरनुप्राप्ता राजन्द्वादशवार्षिकी ॥ ३४
तस्यां द्वादशवार्षिक्यामनावृष्ट्यां महर्षयः ।
वृत्त्यर्थं प्राद्रवन्राजन्क्षुधार्ताः सर्वतोदिशम् ॥ ३५
दिग्भ्यस्तान्प्रद्रुतान्दृष्ट्वा मुनिः सारस्वतस्तदा ।
गमनाय मतिं चक्रे तं प्रोवाच सरस्वती ॥ ३६
न गन्तव्यमितः पुत्र तवाहारमहं सदा ।
दास्यामि मत्स्यप्रवरानुष्यतामिह भारत ॥ ३७
इत्युक्तस्तर्पयामास स पितॄन्देवतास्तथा ।
आहारमकरोन्नित्यं प्राणान्वेदांश्च धारयन् ॥ ३८
अथ तस्यामतीतायामनावृष्ट्यां महर्षयः ।
अन्योन्यं परिपप्रच्छुः पुनः स्वाध्यायकारणात् ॥३९
तेषां क्षुधापरीतानां नष्टा वेदा विधावताम् ।
सर्वेषामेव राजेन्द्र न कश्चित्प्रतिभानवान् ॥ ४०
अथ कश्चिदृषिस्तेषां सारस्वतमुपेयिवान् ।
कुर्वाणं संशितात्मानं स्वाध्यायमृषिसत्तमम् ॥ ४१
स गत्वाचष्ट तेभ्यश्च सारस्वतमतिप्रभम् ।
स्वाध्यायममरप्रख्यं कुर्वाणं विजने जने ॥ ४२
ततः सर्वे समाजग्मुस्तत्र राजन्महर्षयः ।
सारस्वतं मुनिश्रेष्ठमिदमूचुः समागताः ॥ ४३
अस्मानध्यापयस्वेति तानुवाच ततो मुनिः ।
शिष्यत्वमुपगच्छध्वं विधिवद्धो ममेत्युत ॥ ४४
ततोऽब्रवीदृषिगणो बालस्त्वमसि पुत्रक ।
स तानाह न मे धर्मो नश्येदिति पुनर्मुनीन् ॥ ४५
यो ह्यधर्मेण विब्रूयाद्गृह्णीयाद्वाप्यधर्मतः ।
म्रियतां तावुभौ क्षिप्रं स्यातां वा वैरिणावुभौ ॥ ४६
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥४७

एतच्छ्रुत्वा वचस्तस्य मुनयस्ते विधानतः ।
तस्माद्वेदाननुप्राप्य पुनर्धर्मं प्रचक्रिरे ॥ ४८
षष्टिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे ।
सारस्वतस्य विप्रर्षेर्वेदस्वाध्यायकारणात् ॥ ४९
मुष्टिं मुष्टिं ततः सर्वे दर्भाणां तेऽभ्युपाहरन् ।
तस्यासनार्थं विप्रर्षेर्बालस्यापि वशे स्थिताः ॥ ५०
तत्रापि दत्त्वा वसु रौहिणेयो
महाबलः केशवपूर्वजोऽथ ।
जगाम तीर्थं मुदितः क्रमेण
ख्यातं महद्वृद्धकन्या स्म यत्र ॥ ५१

इति श्रीमहाभारते शल्यपर्वणि
पञ्चाशोऽध्यायः ॥ ५० ॥

५१

जनमेजय उवाच ।

कथं कुमारी भगवंस्तपोयुक्ता ह्यभूत्पुरा ।
किमर्थं च तपस्तेपे को वास्या नियमोऽभवत् ॥ १
सुदुष्करमिदं ब्रह्मंस्त्वत्तः श्रुतमनुत्तमम् ।
आख्याहि तत्त्वमखिलं यथा तपसि सा स्थिता ॥ २

वैशंपायन उवाच ।

ऋषिरासीन्महावीर्यः कुणिर्गार्ग्यो महायशाः ।
स तप्त्वा विपुलं राजंस्तपो वै तपतां वरः ।
मानसीं स सुतां सुभ्रूं समुत्पादितवान्विभुः ॥ ३
तां च दृष्ट्वा भृशं प्रीतः कुणिर्गार्ग्यो महायशाः ।
जगाम त्रिदिवं राजन्संत्यज्येह कलेवरम् ॥ ४
सुभ्रूः सा ह्यथ कल्याणी पुण्डरीकनिभेक्षणा ।
महता तपसोग्रेण कृत्वाश्रममनिन्दिता ॥ ५
उपवासैः पूजयन्ती पितॄन्देवांश्च सा पुरा ।
तस्यास्तु तपसोग्रेण महान्कालोऽत्यगान्नृप ॥ ६
सा पित्रा दीयमानापि भर्त्रे नैच्छदनिन्दिता ।
आत्मनः सदृशं सा तु भर्तारं नान्वपश्यत ॥ ७
ततः सा तपसोग्रेण पीडयित्वात्मनस्तनुम् ।
पितृदेवार्चनरता बभूव विजने वने ॥ ८
सात्मानं मन्यमानापि कृतकृत्यं श्रमान्विता ।
वार्द्धकेन च राजेन्द्र तपसा चैव कर्शिता ॥ ९
सा नाशकद्यदा गन्तुं पदात्पदमपि स्वयम् ।
चकार गमने बुद्धिं परलोकाय वै तदा ॥ १०
मोक्तुकामां तु तां दृष्ट्वा शरीरं नारदोऽब्रवीत् ।
असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे ॥ ११
एवं हि श्रुतमस्माभिर्देवलोके महाव्रते ।
तपः परमकं प्राप्तं न तु लोकास्त्वया जिताः ॥ १२
तन्नारदवचः श्रुत्वा साब्रवीदृषिसंसदि ।
तपसोऽर्धं प्रयच्छामि पाणिग्राहस्य सत्तमाः ॥ १३
इत्युक्ते चास्या जग्राह पाणिं गालवसंभवः ।
ऋषिः प्राक्शृङ्गवान्नाम समयं चेदमब्रवीत् ॥ १४
समयेन तवाद्याहं पाणिं स्प्रक्ष्यामि शोभने ।
यद्येकरात्रं वस्तव्यं त्वया सह मयेति ह ॥ १५
तथेति सा प्रतिश्रुत्य तस्मै पाणिं ददौ तदा ।
चक्रे च पाणिग्रहणं तस्योद्वाहं च गालविः ॥ १६
सा रात्रावभवद्राजंस्तरुणी देववर्णिनी ।
दिव्याभरणवस्त्रा च दिव्यस्रगनुलेपना ॥ १७
तां दृष्ट्वा गालविः प्रीतो दीपयन्तीमिवात्मना ।
उवास च क्षपामेकां प्रभाते साब्रवीच्च तम् ॥ १८
यस्त्वया समयो विप्र कृतो मे तपतां वर ।
तेनोषितास्मि भद्रं ते स्वस्ति तेऽस्तु व्रजाम्यहम् ॥ १९
सानुज्ञाताब्रवीद्भूयो योऽस्मिंस्तीर्थे समाहितः ।
वत्स्यते रजनीमेकां तर्पयित्वा दिवौकसः ॥ २०
चत्वारिंशतमष्टौ च द्वे चाष्टौ सम्यगाचरेत् ।
यो ब्रह्मचर्यं वर्षाणि फलं तस्य लभेत सः ।
एवमुक्त्वा ततः साध्वी देहं त्यक्त्वा दिवं गता ॥ २१

ऋषिरप्यभवद्दीनस्तस्या रूपं विचिन्तयन् ।
समयेन तपोऽर्धं च कृच्छ्रात्प्रतिगृहीतवान् ॥ २२
साधयित्वा तदात्मानं तस्याः स गतिमन्वयात् ।
दुःखितो भरतश्रेष्ठ तस्या रूपबलात्कृतः ।
एतत्ते वृद्धकन्याया व्याख्यातं चरितं महत् ॥ २३
तत्रस्थश्चापि शुश्राव हतं शल्यं हलायुधः ।
तत्रापि दत्त्वा दानानि द्विजातिभ्यः परंतप ।
शुशोच शल्यं संग्रामे निहतं पाण्डवैस्तदा ॥ २४
समन्तपञ्चकद्वारात्ततो निष्क्रम्य माधवः ।
पप्रच्छर्षिगणान्रामः कुरुक्षेत्रस्य यत्फलम् ॥ २५
ते पृष्टा यदुसिंहेन कुरुक्षेत्रफलं विभो ।
समाचख्युर्महात्मानस्तस्मै सर्वं यथातथम् ॥ २६

इति श्रीमहाभारते शल्यपर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥

५२

ऋषय ऊचुः ।

प्रजापतेरुत्तरवेदिरुच्यते
सनातना राम समन्तपञ्चकम् ।
समीजिरे यत्र पुरा दिवौकसो
वरेण सत्रेण महावरप्रदाः ॥ १
पुरा च राजर्षिवरेण धीमता
बहूनि वर्षाण्यमितेन तेजसा ।
प्रकृष्टमेतत्कुरुणा महात्मना
ततः कुरुक्षेत्रमितीह पप्रथे ॥ २

राम उवाच ।

किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना ।
एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः ॥ ३

ऋषय ऊचुः ।

पुरा किल कुरुं राम कृषन्तं सततोत्थितम् ।
अभ्येत्य शक्रस्त्रिदिवात्पर्यपृच्छत कारणम् ॥ ४
किमिदं वर्तते राजन्प्रयत्नेन परेण च ।
राजर्षे किमभिप्रेतं येनेयं कृष्यते क्षितिः ॥ ५

कुरुरुवाच ।

इह ये पुरुषाः क्षेत्रे मरिष्यन्ति शतक्रतो ।
ते गमिष्यन्ति सुकृताँल्लोकान्पापविवर्जितान् ॥ ६
अवहस्य ततः शक्रो जगाम त्रिदिवं प्रभुः ।
राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुंधराम् ॥ ७
आगम्यागम्य चैवैनं भूयो भूयोऽवहस्य च ।
शतक्रतुरनिर्विण्णं पृष्ट्वा पृष्ट्वा जगाम ह ॥ ८
यदा तु तपसोग्रेण चकर्ष वसुधां नृपः ।
ततः शक्रोऽब्रवीद्देवान्राजर्षेर्यच्चिकीर्षितम् ॥ ९
तच्छ्रुत्वा चाब्रुवन्देवाः सहस्राक्षमिदं वचः ।
वरेण च्छन्द्यतां शक्र राजर्षिर्यदि शक्यते ॥ १०
यदि ह्यत्र प्रमीता वै स्वर्गं गच्छन्ति मानवाः ।
अस्माननिष्ट्वा क्रतुभिर्भागो नो न भविष्यति ॥ ११
आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत् ।
अलं खेदेन भवतः क्रियतां वचनं मम ॥ १२
मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः ।
युधि वा निहताः सम्यगपि तिर्यग्गता नृप ॥ १३
ते स्वर्गभाजो राजेन्द्र भवन्त्विति महामते ।
तथास्त्विति ततो राजा कुरुः शक्रमुवाच ह ॥ १४
ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनान्तरात्मना ।
जगाम त्रिदिवं भूयः क्षिप्रं बलनिषूदनः ॥ १५
एवमेतद्यदुश्रेष्ठ कृष्टं राजर्षिणा पुरा ।
शक्रेण चाप्यनुज्ञातं पुण्यं प्राणान्विमुञ्चताम् ॥ १६
अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः ।
कुरुक्षेत्रे निबद्धां वै तां शृणुष्व हलायुध ॥ १७
पांसवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः ।
अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् ॥ १८

सुरर्षभा ब्राह्मणसत्तमाश्च
तथा नृगाद्या नरदेवमुख्याः ।
इष्ट्वा महार्हैः क्रतुभिर्नृसिंह
संन्यस्य देहान्सुगतिं प्रपन्नाः ॥ १९
तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानां च मचक्रुकस्य ।
एतत्कुरुक्षेत्रसमन्तपञ्चकं
प्रजापतेरुत्तरवेदिरुच्यते ॥ २०
शिवं महत्पुण्यमिदं दिवौकसां
सुसंमतं स्वर्गगुणैः समन्वितम् ।
अतश्च सर्वेऽपि वसुंधराधिपा
हता गमिष्यन्ति महात्मनां गतिम् ॥ २१

इति श्रीमहाभारते शल्यपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

वैशंपायन उवाच ।

कुरुक्षेत्रं ततो दृष्ट्वा दत्त्वा दायांश्च सात्वतः ।
आश्रमं सुमहद्दिव्यमगमज्जनमेजय ॥ १
मधूकाम्रवनोपेतं प्लक्षन्यग्रोधसंकुलम् ।
चिरिबिल्वयुतं पुण्यं पनसार्जुनसंकुलम् ॥ २
तं दृष्ट्वा यादवश्रेष्ठः प्रवरं पुण्यलक्षणम् ।
पप्रच्छ तानृषीन्सर्वान्कस्याश्रमवरस्त्वयम् ॥ ३
ते तु सर्वे महात्मानमूचू राजन्हलायुधम् ।
शृणु विस्तरतो राम यस्यायं पूर्वमाश्रमः ॥ ४
अत्र विष्णुः पुरा देवस्तप्तवांस्तप उत्तमम् ।
अत्रास्य विधिवद्यज्ञाः सर्वे वृत्ताः सनातनाः ॥ ५
अत्रैव ब्राह्मणी सिद्धा कौमारब्रह्मचारिणी ।
योगयुक्ता दिवं याता तपःसिद्धा तपस्विनी ॥ ६
बभूव श्रीमती राजञ्शाण्डिल्यस्य महात्मनः ।
सुता धृतव्रता साध्वी नियता ब्रह्मचारिणी ॥ ७
सा तु प्राप्य परं योगं गता स्वर्गमनुत्तमम् ।
भुक्त्वाश्रमेऽश्वमेधस्य फलं फलवतां शुभा ।
गता स्वर्गं महाभागा पूजिता नियतात्मभिः ॥ ८
अभिगम्याश्रमं पुण्यं दृष्ट्वा च यदुपुंगवः ।
ऋषींस्तानभिवाद्याथ पार्श्वे हिमवतोऽच्युतः ।
स्कन्धावाराणि सर्वाणि निवर्त्यारुरुहेऽचलम् ॥ ९
नातिदूरं ततो गत्वा नगं तालध्वजो बली ।
पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गतः ॥ १०
प्रभवं च सरस्वत्याः प्लक्षप्रस्रवणं बलः ।
संप्राप्तः कारपचनं तीर्थप्रवरमुत्तमम् ॥ ११
हलायुधस्तत्र चापि दत्त्वा दानं महाबलः ।
आप्लुतः सलिले शीते तस्माच्चापि जगाम ह ।
आश्रमं परमप्रीतो मित्रस्य वरुणस्य च ॥ १२
इन्द्रोऽग्निरर्यमा चैव यत्र प्राक्प्रीतिमाप्नुवन् ।
तं देशं कारपचनाद्यमुनायां जगाम ह ॥ १३
स्नात्वा तत्रापि धर्मात्मा परां तुष्टिमवाप्य च ।
ऋषिभिश्चैव सिद्धैश्च सहितो वै महाबलः ।
उपविष्टः कथाः शुभ्राः शुश्रात्र यदुपुंगवः ॥ १४
तथा तु तिष्ठतां तेषां नारदो भगवानृषिः ।
आजगामाथ तं देशं यत्र रामो व्यवस्थितः ॥ १५
जटामण्डलसंवीतः स्वर्णचीरी महातपाः ।
हेमदण्डधरो राजन्कमण्डलुधरस्तथा ॥ १६
कच्छपीं सुखशब्दां तां गृह्य वीणां मनोरमाम् ।
नृत्ये गीते च कुशलो देवब्राह्मणपूजितः ॥ १७
प्रकर्ता कलहानां च नित्यं च कलहप्रियः ।
तं देशमगमद्यत्र श्रीमान्रामो व्यवस्थितः ॥ १८
प्रत्युत्थाय तु ते सर्वे पूजयित्वा यतव्रतम् ।
देवर्षिं पर्यपृच्छन्त यथावृत्तं कुरून्प्रति ॥ १९
ततोऽस्याकथयद्राजन्नारदः सर्वधर्मवित् ।
सर्वमेव यथावृत्तमतीतं कुरुसंक्षयम् ॥ २०

ततोऽब्रवीद्रौहिणेयो नारदं दीनया गिरा ।
किमवस्थं तु तत्क्षत्रं ये च तत्राभवन्नृपाः ॥ २१
श्रुतमेतन्मया पूर्वं सर्वमेव तपोधन ।
विस्तरश्रवणे जातं कौतूहलमतीव मे ॥ २२

नारद उवाच ।

पूर्वमेव हतो भीष्मो द्रोणः सिन्धुपतिस्तथा ।
हतो वैकर्तनः कर्णः पुत्राश्चास्य महारथाः ॥ २३
भूरिश्रवा रौहिणेय मद्रराजश्च वीर्यवान् ।
हते चान्ये च बहवस्तत्र तत्र महाबलाः ॥ २४
प्रियान्प्राणान्परित्यज्य प्रियार्थं कौरवस्य वै ।
राजानो राजपुत्राश्च समरेष्वनिवर्तिनः ॥ २५
अहतांस्तु महाबाहो शृणु मे तत्र माधव ।
धार्तराष्ट्रबले शेषाः कृपो भोजश्च वीर्यवान् ।
अश्वत्थामा च विक्रान्तो भग्नसैन्या दिशो गताः ॥२६
दुर्योधनो हते सैन्ये प्रद्रुतेषु कृपादिषु ।
ह्रदं द्वैपायनं नाम विवेश भृशदुःखितः ॥ २७
शयानं धार्तराष्ट्रं तु स्तम्भिते सलिले तदा ।
पाण्डवाः सह कृष्णेन वाग्भिरुग्राभिरार्दयन् ॥२८
स तुद्यमानो बलवान्वाग्मी राम समन्ततः ।
उत्थितः प्राग्घ्रदाद्वीरः प्रगृह्य महतीं गदाम् ॥ २९
स चाप्युपगतो युद्धं भीमेन सह सांप्रतम् ।
भविष्यति च तत्सद्यस्तयो राम सुदारुणम् ॥ ३०
यदि कौतूहलं तेऽस्ति व्रज माधव मा चिरम् ।
पश्य युद्धं महाघोरं शिष्ययोर्यदि मन्यसे ॥ ३१

वैशंपायन उवाच ।

नारदस्य वचः श्रुत्वा तानभ्यर्च्य द्विजर्षभान् ।
सर्वान्विसर्जयामास ये तेनाभ्यागताः सह ।
गम्यतां द्वारकां चेति सोऽन्वशादनुयायिनः ॥ ३२
सोऽवतीर्याचलश्रेष्ठात्प्लक्षप्रस्रवणाच्छुभात् ।
ततः प्रीतमना रामः श्रुत्वा तीर्थफलं महत् ।
विप्राणां संनिधौ श्लोकमगायदिदमच्युतः ॥ ३३
सरस्वतीवाससमा कुतो रतिः
सरस्वतीवाससमाः कुतो गुणाः ।
सरस्वतीं प्राप्य दिवं गता जनाः
सदा स्मरिष्यन्ति नदीं सरस्वतीम् ॥ ३४
सरस्वती सर्वनदीषु पुण्या
सरस्वती लोकसुखावहा सदा ।
सरस्वतीं प्राप्य जनाः सुदुष्कृताः
सदा न शोचन्ति परत्र चेह च ॥ ३५
ततो मुहुर्मुहुः प्रीत्या प्रेक्षमाणः सरस्वतीम् ।
हयैर्युक्तं रथं शुभ्रमातिष्ठत परंतपः ॥ ३६
स शीघ्रगामिना तेन रथेन यदुपुंगवः ।
दिदृक्षुरभिसंप्राप्तः शिष्ययुद्धमुपस्थितम् ॥ ३७

इति श्रीमहाभारते शल्यपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

॥ समाप्तं तीर्थयात्रापर्व ॥

५४

वैशंपायन उवाच ।

एवं तदभवद्युद्धं तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम् ॥ १
रामं संनिहितं दृष्ट्वा गदायुद्ध उपस्थिते ।
मम पुत्रः कथं भीमं प्रत्ययुध्यत संजय ॥ २

संजय उवाच ।

रामसांनिध्यमासाद्य पुत्रो दुर्योधनस्तव ।
युद्धकामो महाबाहुः समहृष्यत वीर्यवान् ॥ ३
दृष्ट्वा लाङ्गलिनं राजा प्रत्युत्थाय च भारत ।
प्रीत्या परमया युक्तो युधिष्ठिरमथाब्रवीत् ॥ ४
समन्तपञ्चकं क्षिप्रमितो याम विशां पते ।
प्रथितोत्तरवेदी सा देवलोके प्रजापतेः ॥ ५

तस्मिन्महापुण्यतमे त्रैलोक्यस्य सनातने ।
संग्रामे निधनं प्राप्य ध्रुवं स्वर्गो भविष्यति ॥ ६
तथेत्युक्त्वा महाराज कुन्तीपुत्रो युधिष्ठिरः ।
समन्तपञ्चकं वीरः प्रायादभिमुखः प्रभुः ॥ ७
ततो दुर्योधनो राजा प्रगृह्य महतीं गदाम् ।
पद्भ्याममर्षाद्द्युतिमानगच्छत्पाण्डवैः सह ॥ ८
तथा यान्तं गदाहस्तं वर्मणा चापि दंशितम् ।
अन्तरिक्षगता देवाः साधु साध्वित्यपूजयन् ।
वातिकाश्च नरा येऽत्र दृष्ट्वा ते हर्षमागताः ॥ ९
स पाण्डवैः परिवृतः कुरुराजस्तवात्मजः ।
मत्तस्येव गजेन्द्रस्य गतिमास्थाय सोऽव्रजत् ॥ १०
ततः शङ्खनिनादेन भेरीणां च महास्वनैः ।
सिंहनादैश्च शूराणां दिशः सर्वाः प्रपूरिताः ॥ ११
प्रतीच्यभिमुखं देशं यथोद्दिष्टं सुतेन ते ।
गत्वा च तैः परिक्षिप्तं समन्तात्सर्वतोदिशम् ॥ १२
दक्षिणेन सरस्वत्याः स्वयनं तीर्थमुत्तमम् ।
तस्मिन्देशे त्वनिरिणे तत्र युद्धमरोचयन् ॥ १३
ततो भीमो महाकोटिं गदां गृह्याथ वर्मभृत् ।
बिभ्रद्रूपं महाराज सदृशं हि गरुत्मतः ॥ १४
अवबद्धशिरस्त्राणः संख्ये काञ्चनवर्मभृत् ।
रराज राजन्पुत्रस्ते काञ्चनः शैलराडिव ॥ १५
वर्मभ्यां संवृतौ वीरौ भीमदुर्योधनावुभौ ।
संयुगे च प्रकाशेते संरब्धाविव कुञ्जरौ ॥ १६
रणमण्डलमध्यस्थौ भ्रातरौ तौ नरर्षभौ ।
अशोभेतां महाराज चन्द्रसूर्याविवोदितौ ॥ १७
तावन्योन्यं निरीक्षेतां क्रुद्धाविव महाद्विपौ ।
दहन्तौ लोचनै राजन्परस्परवधैषिणौ ॥ १८
संप्रहृष्टमना राजन्गदामादाय कौरवः ।
सृक्किणी संलिहन्राजन्क्रोधरक्तेक्षणः श्वसन् ॥ १९
ततो दुर्योधनो राजा गदामादाय वीर्यवान् ।
भीमसेनमभिप्रेक्ष्य गजो गजमिवाह्वयत् ॥ २०
अद्रिसारमयीं भीमस्तथैवादाय वीर्यवान् ।
आह्वयामास नृपतिं सिंहः सिंहं यथा वने ॥ २१
तावुद्यतगदापाणी दुर्योधनवृकोदरौ ।
संयुगे स्म प्रकाशेते गिरी सशिखराविव ॥ २२
तावुभावभिसंक्रुद्धावुभौ भीमपराक्रमौ ।
उभौ शिष्यौ गदायुद्धे रौहिणेयस्य धीमतः ॥ २३
उभौ सदृशकर्माणौ यमवासवयोरिव ।
तथा सदृशकर्माणौ वरुणस्य महाबलौ ॥ २४
वासुदेवस्य रामस्य तथा वैश्रवणस्य च ।
सदृशौ तौ महाराज मधुकैटभयोर्युधि ॥ २५
उभौ सदृशकर्माणौ रणे सुन्दोपसुन्दयोः ।
तथैव कालस्य समौ मृत्योश्चैव परंतपौ ॥ २६
अन्योन्यमभिधावन्तौ मत्ताविव महाद्विपौ ।
वाशितासंगमे दृप्तौ शरदीव मदोत्कटौ ॥ २७
मत्ताविव जिगीषन्तौ मातङ्गौ भरतर्षभौ ।
उभौ क्रोधविषं दीप्तं वमन्तावुरगाविव ॥ २८
अन्योन्यमभिसंरब्धौ प्रेक्षमाणावरिंदमौ ।
उभौ भरतशार्दूलौ विक्रमेण समन्वितौ ॥ २९
सिंहाविव दुराधर्षौ गदायुद्धे परंतपौ ।
नखदंष्ट्रायुधौ वीरौ व्याघ्राविव दुरुत्सहौ ॥ ३०
प्रजासंहरणे क्षुब्धौ समुद्राविव दुस्तरौ ।
लोहिताङ्गाविव क्रुद्धौ प्रतपन्तौ महारथौ ॥ ३१
रश्मिमन्तौ महात्मानौ दीप्तिमन्तौ महाबलौ ।
ददृशाते कुरुश्रेष्ठौ कालसूर्याविवोदितौ ॥ ३२
व्याघ्राविव सुसंरब्धौ गर्जन्ताविव तोयदौ ।
जहृषाते महाबाहू सिंहौ केसरिणाविव ॥ ३३
गजाविव सुसंरब्धौ ज्वलिताविव पावकौ ।
ददृशुस्तौ महात्मानौ सशृङ्गाविव पर्वतौ ॥ ३४
रोषात्प्रस्फुरमाणोष्ठौ निरीक्षन्तौ परस्परम् ।

तौ समेतौ महात्मानौ गदाहस्तौ नरोत्तमौ ॥ ३५
उभौ परमसंहृष्टावुभौ परमसंमतौ ।
सदश्वाविव हेषन्तौ बृंहन्ताविव कुञ्जरौ ॥ ३६
वृषभाविव गर्जन्तौ दुर्योधनवृकोदरौ ।
दैत्याविव बलोन्मत्तौ रेजतुस्तौ नरोत्तमौ ॥ ३७
ततो दुर्योधनो राजन्निदमाह युधिष्ठिरम् ।
सृञ्जयैः सह तिष्ठन्तं तपन्तमिव भास्करम् ॥ ३८
इदं व्यवसितं युद्धं मम भीमस्य चोभयोः ।
उपोपविष्टाः पश्यध्वं विमर्दं नृपसत्तमाः ॥ ३९
ततः समुपविष्टं तत्सुमहद्राजमण्डलम् ।
विराजमानं ददृशे दिवीवादित्यमण्डलम् ॥ ४०
तेषां मध्ये महाबाहुः श्रीमान्केशवपूर्वजः ।
उपविष्टो महाराज पूज्यमानः समन्ततः ॥ ४१
शुशुभे राजमध्यस्थो नीलवासाः सितप्रभः ।
नक्षत्रैरिव संपूर्णो वृतो निशि निशाकरः ॥ ४२
तौ तथा तु महाराज गदाहस्तौ दुरासदौ ।
अन्योन्यं वाग्भिरुग्राभिस्तक्षमाणौ व्यवस्थितौ ॥ ४३
अप्रियाणि ततोऽन्योन्यमुक्त्वा तौ कुरुपुंगवौ ।
उदीक्षन्तौ स्थितौ वीरौ वृत्रशक्राविवाहवे ॥ ४४

इति श्रीमहाभारते शल्यपर्वणि
चतुष्पञ्चाशोऽध्यायः ॥ ५४ ॥

५५

वैशंपायन उवाच ।

ततो वाग्युद्धमभवत्तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम् ॥ १
धिगस्तु खलु मानुष्यं यस्य निष्ठेयमीदृशी ।
एकादशचमूभर्ता यत्र पुत्रो ममाभिभूः ॥ २
आज्ञाप्य सर्वान्नृपतीन्भुक्त्वा चेमां वसुंधराम् ।
गदामादाय वेगेन पदातिः प्रस्थितो रणम् ॥ ३
भूत्वा हि जगतो नाथो ह्यनाथ इव मे सुतः ।
गदामुद्यम्य यो याति किमन्यद्भागधेयतः ॥ ४
अहो दुःखं महत्प्राप्तं पुत्रेण मम संजय ।
एवमुक्त्वा स दुःखार्तो विरराम जनाधिपः ॥ ५

संजय उवाच ।

स मेघनिनदो हर्षाद्विनदन्निव गोवृषः ।
आजुहाव ततः पार्थं युद्धाय युधि वीर्यवान् ॥ ६
भीममाह्वयमाने तु कुरुराजे महात्मनि ।
प्रादुरासन्सुघोराणि रूपाणि विविधान्युत ॥ ७
ववुर्वाताः सनिर्घाताः पांसुवर्षं पपात च ।
बभूवुश्च दिशः सर्वास्तिमिरेण समावृताः ॥ ८
महास्वनाः सनिर्घातास्तुमुला लोमहर्षणाः ।
पेतुस्तथोल्काः शतशः स्फोटयन्त्यो नभस्तलम् ॥ ९
राहुश्चाग्रसदादित्यमपर्वणि विशां पते ।
चकम्पे च महाकम्पं पृथिवी सवनद्रुमा ॥ १०
रूक्षाश्च वाताः प्रववुर्नीचैः शर्करवर्षिणः ।
गिरीणां शिखराण्येव न्यपतन्त महीतले ॥ ११
मृगा बहुविधाकाराः संपतन्ति दिशो दश ।
दीप्ताः शिवाश्चाप्यनदन्घोररूपाः सुदारुणाः ॥ १२
निर्घाताश्च महाघोरा बभूवुर्लोमहर्षणाः ।
दीप्तायां दिशि राजेन्द्र मृगाश्चाशुभवादिनः ॥ १३
उदपानगताश्चापो व्यवर्धन्त समन्ततः ।
अशरीरा महानादाः श्रूयन्ते स्म तदा नृप ॥ १४
एवमादीनि दृष्ट्वाथ निमित्तानि वृकोदरः ।
उवाच भ्रातरं ज्येष्ठं धर्मराजं युधिष्ठिरम् ॥ १५
नैष शक्तो रणे जेतुं मन्दात्मा मां सुयोधनः ।
अद्य क्रोधं विमोक्ष्यामि निगूढं हृदये चिरम् ।
सुयोधने कौरवेन्द्रे खाण्डवे पावको यथा ॥ १६
शल्यमद्योद्धरिष्यामि तव पाण्डव हृच्छयम् ।
निहत्य गदया पापमिमं कुरुकुलाधमम् ॥ १७
अद्य कीर्तिमयीं मालां प्रतिमोक्ष्याम्यहं त्वयि ।

हत्वेमं पापकर्माणं गदया रणमूर्धनि ॥ १८
अद्यास्य शतधा देहं भिनद्मि गदयानया ।
नायं प्रवेष्टा नगरं पुनर्वारणसाह्वयम् ॥ १९
सर्पोत्सर्गस्य शयने विषदानस्य भोजने ।
प्रमाणकोट्यां पातस्य दाहस्य जतुवेश्मनि ॥ २०
सभायामवहासस्य सर्वस्वहरणस्य च ।
वर्षमज्ञातवासस्य वनवासस्य चानघ ॥ २१
अद्यान्तमेषां दुःखानां गन्ता भरतसत्तम ।
एकाह्ना विनिहत्येमं भविष्याम्यात्मनोऽनृणः ॥ २२
अद्यायुर्धार्तराष्ट्रस्य दुर्मतेरकृतात्मनः ।
समाप्तं भरतश्रेष्ठ मातापित्रोश्च दर्शनम् ॥ २३
अद्यायं कुरुराजस्य शंतनोः कुलपांसनः ।
प्राणाञ्श्रियं च राज्यं च त्यक्त्वा शेष्यति भूतले॥२४
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं मया हतम् ।
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ॥ २५
इत्युक्त्वा राजशार्दूल गदामादाय वीर्यवान् ।
अवातिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ॥ २६
तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनः पुनः क्रुद्धो दुर्योधनमुवाच ह ॥ २७
राज्ञश्च धृतराष्ट्रस्य तथा त्वमपि चात्मनः ।
स्मर तद्दुष्कृतं कर्म यद्वृत्तं वारणावते ॥ २८
द्रौपदी च परिक्लिष्टा सभायां यद्रजस्वला ।
द्यूते च वञ्चितो राजा यत्त्वया सौबलेन च ॥ २९
वने दुःखं च यत्प्राप्तमस्माभिस्त्वत्कृतं महत् ।
विराटनगरे चैव योन्यन्तरगतैरिव ।
तत्सर्वं यातयाम्यद्य दिष्ट्या दृष्टोऽसि दुर्मते ॥ ३०
त्वत्कृतेऽसौ हतः शेते शरतल्पे प्रतापवान् ।
गाङ्गेयो रथिनां श्रेष्ठो निहतो याज्ञसेनिना ॥ ३१
हतो द्रोणश्च कर्णश्च तथा शल्यः प्रतापवान् ।
वैराग्नेरादिकर्ता च शकुनिः सौबलो हतः ॥ ३२
प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः ।
भ्रातरस्ते हताः सर्वे शूरा विक्रान्तयोधिनः ॥ ३३
एते चान्ये च बहवो निहतास्त्वत्कृते नृपाः ।
त्वामद्य निहनिष्यामि गदया नात्र संशयः ॥ ३४
इत्येवमुच्चै राजेन्द्र भाषमाणं वृकोदरम् ।
उवाच वीतभी राजन्पुत्रस्ते सत्यविक्रमः ॥ ३५
किं कत्थितेन बहुधा युध्यस्व त्वं वृकोदर ।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां कुलाधम ॥ ३६
नैव दुर्योधनः क्षुद्र केनचित्त्वद्विधेन वै ।
शक्यस्त्रासयितुं वाचा यथान्यः प्राकृतो नरः ॥३७
चिरकालेप्सितं दिष्ट्या हृदयस्थमिदं मम ।
त्वया सह गदायुद्धं त्रिदशैरुपपादितम् ॥ ३८
किं वाचा बहुनोक्तेन कत्थितेन च दुर्मते ।
वाणी संपद्यतामेषा कर्मणा मा चिरं कृथाः ॥ ३९
तस्य तद्वचनं श्रुत्वा सर्व एवाभ्यपूजयन् ।
राजानः सोमकाश्चैव ये तत्रासन्समागताः ॥ ४०
ततः संपूजितः सर्वैः संप्रहृष्टतनूरुहः ।
भूयो धीरं मनश्चक्रे युद्धाय कुरुनन्दनः ॥ ४१
तं मत्तमिव मातङ्गं तलतालैर्नराधिपाः ।
भूयः संहर्षयांचक्रुर्दुर्योधनममर्षणम् ॥ ४२
तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः ।
अभिदुद्राव वेगेन धार्तराष्ट्रं वृकोदरः ॥ ४३
बृंहन्ति कुञ्जरास्तत्र हया हेषन्ति चासकृत् ।
शस्त्राणि चाप्यदीप्यन्त पाण्डवानां जयैषिणाम् ॥

इति श्रीमहाभारते शल्यपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५॥

५६

संजय उवाच ।

ततो दुर्योधनो दृष्ट्वा भीमसेनं तथागतम् ।
प्रत्युद्ययावदीनात्मा वेगेन महता नदन् ॥ १

समापेततुरानद्य शृङ्गिणौ वृषभाविव ।
महानिर्घातघोषश्च संप्रहारस्तयोरभूत् ॥ २
अभवच्च तयोर्युद्धं तुमुलं लोमहर्षणम् ।
जिगीषतोर्युधान्योन्यमिन्द्रप्रह्रादयोरिव ॥ ३
रुधिरोक्षितसर्वाङ्गौ गदाहस्तौ मनस्विनौ ।
ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ॥ ४
तथा तस्मिन्महायुद्धे वर्तमाने सुदारुणे ।
खद्योतसंघैरिव खं दर्शनीयं व्यरोचत ॥ ५
तथा तस्मिन्वर्तमाने संकुले तुमुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिंदमौ ॥ ६
तौ मुहूर्तं समाश्वस्य पुनरेव परंतपौ ।
अभ्यहारयतां तत्र संप्रगृह्य गदे शुभे ॥ ७
तौ तु दृष्ट्वा महावीर्यौ समाश्वस्तौ नरर्षभौ ।
बलिनौ वारणौ यद्वद्वाशितार्थे मदोत्कटौ ॥ ८
अपारवीर्यौ संप्रेक्ष्य प्रगृहीतगदावुभौ ।
विस्मयं परमं जग्मुर्देवगन्धर्वदानवाः ॥ ९
प्रगृहीतगदौ दृष्ट्वा दुर्योधनवृकोदरौ ।
संशयः सर्वभूतानां विजये समपद्यत ॥ १०
समागम्य ततो भूयो भ्रातरौ बलिनां वरौ ।
अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति ॥ ११
यमदण्डोपमां गुर्वीमिन्द्राशनिमिवोद्यताम् ।
ददृशुः प्रेक्षका राजन्रौद्रीं विशसनीं गदाम् ॥ १२
आविध्यतो गदां तस्य भीमसेनस्य संयुगे ।
शब्दः सुतुमुलो घोरो मुहूर्तं समपद्यत ॥ १३
आविध्यन्तमभिप्रेक्ष्य धार्तराष्ट्रोऽथ पाण्डवम् ।
गदामलघुवेगां तां विस्मितः संबभूव ह ॥ १४
चरंश्च विविधान्मार्गान्मण्डलानि च भारत ।
अशोभत तदा वीरो भूय एव वृकोदरः ॥ १५
तौ परस्परमासाद्य यत्तावन्योन्यरक्षणे ।
मार्जाराविव भक्षार्थे ततक्षाते मुहुर्मुहुः ॥ १६
अचरद्भीमसेनस्तु मार्गान्बहुविधांस्तथा ।
मण्डलानि विचित्राणि स्थानानि विविधानि च ॥१७
गोमूत्रिकाणि चित्राणि गतप्रत्यागतानि च ।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ १८
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
परावर्तनसंवर्तमवप्लुतमथाप्लुतम् ।
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ॥ १९
एवं तौ विचरन्तौ तु न्यघ्नतां वै परस्परम् ।
वञ्चयन्तौ पुनश्चैव चेरतुः कुरुसत्तमौ ॥ २०
विक्रीडन्तौ सुबलिनौ मण्डलानि प्रचेरतुः ।
गदाहस्तौ ततस्तौ तु मण्डलावस्थितौ बली ॥ २१
दक्षिणं मण्डलं राजन्धार्तराष्ट्रोऽभ्यवर्तत ।
सव्यं तु मण्डलं तत्र भीमसेनोऽभ्यवर्तत ॥ २२
तथा तु चरतस्तस्य भीमस्य रणमूर्धनि ।
दुर्योधनो महाराज पार्श्वदेशेऽभ्यताडयत् ॥ २३
आहतस्तु तदा भीमस्तव पुत्रेण भारत ।
आविध्यत गदां गुर्वीं प्रहारं तमचिन्तयन् ॥ २४
इन्द्राशनिसमां घोरां यमदण्डमिवोद्यताम् ।
ददृशुस्ते महाराज भीमसेनस्य तां गदाम् ॥ २५
आविध्यन्तं गदां दृष्ट्वा भीमसेनं तवात्मजः ।
समुद्यम्य गदां घोरां प्रत्यविध्यदरिंदमः ॥ २६
गदामारुतवेगेन तव पुत्रस्य भारत ।
शब्द आसीत्सुतुमुलस्तेजश्च समजायत ॥ २७
स चरन्विविधान्मार्गान्मण्डलानि च भागशः ।
समशोभत तेजस्वी भूयो भीमात्सुयोधनः ॥ २८
आविद्धा सर्ववेगेन भीमेन महती गदा ।
सधूमं सार्चिषं चाग्निं मुमोचोग्रा महास्वना ॥ २९
आधूतां भीमसेनेन गदां दृष्ट्वा सुयोधनः ।
अद्रिसारमयीं गुर्वीमाविध्यन्बह्वशोभत ॥ ३०
गदामारुतवेगं हि दृष्ट्वा तस्य महात्मनः ।

भयं विवेश पाण्डूंस्वै सर्वानेव ससोमकान् ॥ ३१
तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ।
गदाभ्यां सहसान्योन्यमाजघ्नतुररिंदमौ ॥ ३२
तौ परस्परमासाद्य दंष्ट्राभ्यां द्विरदौ यथा ।
अशोभेतां महाराज शोणितेन परिप्लुतौ ॥ ३३
एवं तदभवद्युद्धं घोररूपमसंवृतम् ।
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ॥ ३४
दृष्ट्वा व्यवस्थितं भीमं तव पुत्रो महाबलः ।
चरंश्चित्रतरान्मार्गान्कौन्तेयमभिदुद्रुवे ॥ ३५
तस्य भीमो महावेगां जाम्बूनदपरिष्कृताम् ।
अभिक्रुद्धस्य क्रुद्धस्तु ताडयामास तां गदाम् ॥ ३६
सविस्फुलिङ्गो निर्ह्रादस्तयोस्तत्राभिघातजः ।
प्रादुरासीन्महाराज सृष्टयोर्वज्रयोरिव ॥ ३७
वेगवत्या तया तत्र भीमसेनप्रमुक्तया ।
निपतन्त्या महाराज पृथिवी समकम्पत ॥ ३८
तां नामृष्यत कौरव्यो गदां प्रतिहतां रणे ।
मत्तो द्विप इव क्रुद्धः प्रतिकुञ्जरदर्शनात् ॥ ३९
स सव्यं मण्डलं राजन्नुद्भ्राम्य कृतनिश्चयः ।
आजघ्ने मूर्ध्नि कौन्तेयं गदया भीमवेगया ॥ ४०
तया त्वभिहतो भीमः पुत्रेण तव पाण्डवः ।
नाकम्पत महाराज तदद्भुतमिवाभवत् ॥ ४१
आश्चर्यं चापि तद्राजन्सर्वसैन्यान्यपूजयन् ।
यद्गदाभिहतो भीमो नाकम्पत पदात्पदम् ॥ ४२
ततो गुरुतरां दीप्तां गदां हेमपरिष्कृताम् ।
दुर्योधनाय व्यसृजद्भीमो भीमपराक्रमः ॥ ४३
तं प्रहारमसंभ्रान्तो लाघवेन महाबलः ।
मोघं दुर्योधनश्चक्रे तत्राभूद्विस्मयो महान् ॥ ४४
सा तु मोघा गदा राजन्पतन्ती भीमचोदिता ।
चालयामास पृथिवीं महानिर्घातनिस्वना ॥ ४५
आस्थाय कौशिकान्मार्गानुत्पतन्स पुनः पुनः ।
गदानिपातं प्रज्ञाय भीमसेनमवञ्चयत् ॥ ४६
वञ्चयित्वा तथा भीमं गदया कुरुसत्तमः ।
ताडयामास संक्रुद्धो वक्षोदेशे महाबलः ॥ ४७
गदयाभिहतो भीमो मुह्यमानो महारणे ।
नाभ्यमन्यत कर्तव्यं पुत्रेणाभ्याहतस्तव ॥ ४८
तस्मिंस्तथा वर्तमाने राजन्सोमकपाण्डवाः ।
भृशोपहतसंकल्पा नहृष्टमनसोऽभवन् ॥ ४९
स तु तेन प्रहारेण मातङ्ग इव रोषितः ।
हस्तिवद्धस्तिसंकाशमभिदुद्राव ते सुतम् ॥ ५०
ततस्तु रभसो भीमो गदया तनयं तव ।
अभिदुद्राव वेगेन सिंहो वनगजं यथा ॥ ५१
उपसृत्य तु राजानं गदामोक्षविशारदः ।
आविध्यत गदां राजन्समुद्दिश्य सुतं तव ॥ ५२
अताडयद्भीमसेनः पार्श्वे दुर्योधनं तदा ।
स विह्वलः प्रहारेण जानुभ्यामगमन्महीम् ॥ ५३
तस्मिंस्तु भरतश्रेष्ठे जानुभ्यामवनीं गते ।
उदतिष्ठत्ततो नादः सृञ्जयानां जगत्पते ॥ ५४
तेषां तु निनदं श्रुत्वा सृञ्जयानां नरर्षभः ।
अमर्षाद्भरतश्रेष्ठ पुत्रस्ते समकुप्यत ॥ ५५
उत्थाय तु महाबाहुः क्रुद्धो नाग इव श्वसन् ।
दिधक्षन्निव नेत्राभ्यां भीमसेनमवैक्षत ॥ ५६
ततः स भरतश्रेष्ठो गदापाणिरभिद्रवत् ।
प्रमथिष्यन्निव शिरो भीमसेनस्य संयुगे ॥ ५७
स महात्मा महात्मानं भीमं भीमपराक्रमः ।
अताडयच्छङ्खदेशे स चचालाचलोपमः ॥ ५८
स भूयः शुशुभे पार्थस्ताडितो गदया रणे ।
उद्भिन्नरुधिरो राजन्प्रभिन्न इव कुञ्जरः ॥ ५९
ततो गदां वीरहणीमयस्मयीं
प्रगृह्य वज्राशनितुल्यनिस्वनाम् ।
अताडयच्छत्रुममित्रकर्शनो

बलेन विक्रम्य धनंजयाग्रजः ॥ ६०
स भीमसेनाभिहतस्तवात्मजः
पपात संकम्पितदेहबन्धनः ।
सुपुष्पितो मारुतवेगताडितो
महावने साल इवावघूर्णितः ॥ ६१
ततः प्रणेदुर्जहृषुश्च पाण्डवाः
समीक्ष्य पुत्रं पतितं क्षितौ तव ।
ततः सुतस्ते प्रतिलभ्य चेतनां
समुत्पपात द्विरदो यथा ह्रदात् ॥ ६२
स पार्थिवो नित्यममर्षितस्तदा
महारथः शिक्षितवत्परिभ्रमन् ।
अताडयत्पाण्डवमग्रतः स्थितं
स विह्वलाङ्गो जगतीमुपास्पृशत् ॥ ६३
स सिंहनादान्विननाद कौरवो
निपात्य भूमौ युधि भीममोजसा ।
बिभेद चैवाशनितुल्यतेजसा
गदानिपातेन शरीररक्षणम् ॥ ६४
ततोऽन्तरिक्षे निनदो महानभू-
द्दिवौकसामप्सरसां च नेदुषाम् ।
पपात चोच्चैरमरप्रवेरितं
विचित्रपुष्पोत्करवर्षमुत्तमम् ॥ ६५
ततः परानाविशदुत्तमं भयं
समीक्ष्य भूमौ पतितं नरोत्तमम् ।
अहीयमानं च बलेन कौरवं
निशम्य भेदं च दृढस्य वर्मणः ॥ ६६
ततो मुहूर्तादुपलभ्य चेतनां
प्रमृज्य वक्त्रं रुधिरार्द्रमात्मनः ।
धृतिं समालम्ब्य विवृत्तलोचनो
बलेन संस्तभ्य वृकोदरः स्थितः ॥ ६७

इति श्रीमहाभारते शल्यपर्वणि षट्पञ्चाशोऽध्यायः ॥५६॥

५७

संजय उवाच ।

समुदीर्णं ततो दृष्ट्वा संग्रामं कुरुमुख्ययोः ।
अथाब्रवीदर्जुनस्तु वासुदेवं यशस्विनम् ॥ १
अनयोर्वीरयोर्युद्धे को ज्यायान्भवतो मतः ।
कस्य वा को गुणो भूयानेतद्वद जनार्दन ॥ २

वासुदेव उवाच ।

उपदेशोऽनयोस्तुल्यो भीमस्तु बलवत्तरः ।
कृतयत्नतरस्त्वेष धार्तराष्ट्रो वृकोदरात् ॥ ३
भीमसेनस्तु धर्मेण युध्यमानो न जेष्यति ।
अन्यायेन तु युध्यन्वै हन्यादेष सुयोधनम् ॥ ४
मायया निर्जिता देवैरसुरा इति नः श्रुतम् ।
विरोचनश्च शक्रेण मायया निर्जितः सखे ।
मायया चाक्षिपत्तेजो वृत्रस्य बलसूदनः ॥ ५
प्रतिज्ञातं तु भीमेन द्यूतकाले धनंजय ।
ऊरू भेत्स्यामि ते संख्ये गदयेति सुयोधनम् ॥ ६
सोऽयं प्रतिज्ञां तां चापि पारयित्वारिकर्शनः ।
मायाविनं च राजानं माययैव निकृन्ततु ॥ ७
यद्येष बलमास्थाय न्यायेन प्रहरिष्यति ।
विषमस्थस्ततो राजा भविष्यति युधिष्ठिरः ॥ ८
पुनरेव च वक्ष्यामि पाण्डवेदं निबोध मे ।
धर्मराजापराधेन भयं नः पुनरागतम् ॥ ९
कृत्वा हि सुमहत्कर्म हत्वा भीष्ममुखान्कुरून् ।
जयः प्राप्तो यशश्चाग्र्यं वैरं च प्रतियातितम् ।
तदेवं विजयः प्राप्तः पुनः संशयितः कृतः ॥ १०
अबुद्धिरेषा महती धर्मराजस्य पाण्डव ।
यदेकविजये युद्धं पणितं कृतमीदृशम् ।
सुयोधनः कृती वीर एकायनगतस्तथा ॥ ११
अपि चोशनसा गीतः श्रूयतेऽयं पुरातनः ।

श्लोकस्तस्यार्थसहितस्तन्मे निगदतः शृणु ॥ १२
पुनरावर्तमानानां भग्नानां जीवितैषिणाम् ।
भेतव्यमरिशेषाणामेकायनगता हि ते ॥ १३
सुयोधनमिमं भग्नं हतसैन्यं ह्रदं गतम् ।
पराजितं वनप्रेप्सुं निराशं राज्यलम्भने ॥ १४
को न्वेष संयुगे प्राज्ञः पुनर्द्वंद्वे समाह्वयेत् ।
अपि वो निर्जितं राज्यं न हरेत सुयोधनः ॥ १५
यस्त्रयोदशवर्षाणि गदया कृतनिश्रमः ।
चरत्यूर्ध्वं च तिर्यक्च भीमसेनजिघांसया ॥ १६
एवं चेन्न महाबाहुरन्यायेन हनिष्यति ।
एष वः कौरवो राजा धार्तराष्ट्रो भविष्यति ॥ १७
धनंजयस्तु श्रुत्वैतत्केशवस्य महात्मनः ।
प्रेक्षतो भीमसेनस्य हस्तेनोरुमताडयत् ॥ १८
गृह्य संज्ञां ततो भीमो गदया व्यचरद्रणे ।
मण्डलानि विचित्राणि यमकानीतराणि च ॥ १९
दक्षिणं मण्डलं सव्यं गोमूत्रकमथापि च ।
व्यचरत्पाण्डवो राजन्नरिं संमोहयन्निव ॥ २०
तथैव तव पुत्रोपि गदामार्गविशारदः ।
व्यचरल्लघु चित्रं च भीमसेनजिघांसया ॥ २१
आधुन्वन्तौ गदे घोरे चन्दनागरुरूषिते ।
वैरस्यान्तं परीप्सन्तौ रणे क्रुद्धाविवान्तकौ ॥ २२
अन्योन्यं तौ जिघांसन्तौ प्रवीरौ पुरुषर्षभौ ।
युयुधाते गरुत्मन्तौ यथा नागामिषैषिणौ ॥ २३
मण्डलानि विचित्राणि चरतोर्नृपभीमयोः ।
गदासंपातजास्तत्र प्रजज्ञुः पावकार्चिषः ॥ २४
समं प्रहरतोस्तत्र शूरयोर्बलिनोर्मृधे ।
क्षुब्धयोर्वायुना राजन्द्वयोरिव समुद्रयोः ॥ २५
तयोः प्रहरतोस्तुल्यं मत्तकुञ्जरयोरिव ।
गदानिर्घातसंह्रादः प्रहाराणामजायत ॥ २६
तस्मिंस्तदा संप्रहारे दारुणे संकुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिंदमौ ॥ २७
तौ मुहूर्तं समाश्वस्य पुनरेव परंतपौ ।
अभ्यहारयतां क्रुद्धौ प्रगृह्य महती गदे ॥ २८
तयोः समभवद्युद्धं घोररूपमसंवृतम् ।
गदानिपातै राजेन्द्र तक्षतोर्वै परस्परम् ॥ २९
व्यायामप्रद्रुतौ तौ तु वृषभाक्षौ तरस्विनौ ।
अन्योन्यं जघ्नतुर्वीरौ पङ्कस्थौ महिषाविव ॥ ३०
जर्जरीकृतसर्वाङ्गौ रुधिरेणाभिसंप्लुतौ ।
ददृशाते हिमवति पुष्पिताविव किंशुकौ ॥ ३१
दुर्योधनेन पार्थस्तु विवरे संप्रदर्शिते ।
ईषदुत्स्मयमानस्तु सहसा प्रससार ह ॥ ३२
तमभ्याशगतं प्राज्ञो रणे प्रेक्ष्य वृकोदरः ।
अवाक्षिपद्गदां तस्मै वेगेन महता बली ॥ ३३
अवक्षेपं तु तं दृष्ट्वा पुत्रस्तव विशां पते ।
अपासर्पत्ततः स्थानात्सा मोघा न्यपतद्भुवि ॥ ३४
मोक्षयित्वा प्रहारं तं सुतस्तव स संभ्रमात् ।
भीमसेनं च गदया प्राहरत्कुरुसत्तमः ॥ ३५
तस्य विष्यन्दमानेन रुधिरेणामितौजसः ।
प्रहारगुरुपाताच्च मूर्छेव समजायत ॥ ३६
दुर्योधनस्तं न वेद पीडितं पाण्डवं रणे ।
धारयामास भीमोऽपि शरीरमतिपीडितम् ॥ ३७
अमन्यत स्थितं ह्येनं प्रहरिष्यन्तमाहवे ।
अतो न प्राहरत्तस्मै पुनरेव तवात्मजः ॥ ३८
ततो मुहूर्तमाश्वस्य दुर्योधनमवस्थितम् ।
वेगेनाभ्यद्रवद्राजन्भीमसेनः प्रतापवान् ॥ ३९
तमापतन्तं संप्रेक्ष्य संरब्धममितौजसम् ।
मोघमस्य प्रहारं तं चिकीर्षुर्भरतर्षभ ॥ ४०
अवस्थाने मतिं कृत्वा पुत्रस्तव महामनाः ।
इयेषोत्पतितुं राजंश्छलयिष्यन्वृकोदरम् ॥ ४१
अबुध्यद्भीमसेनस्तद्राज्ञस्तस्य चिकीर्षितम् ।

अथास्य समभिद्रुत्य समुत्क्रम्य च सिंहवत् ॥ ४२
सृत्या वञ्चयतो राजन्पुनरेवोत्पतिष्यतः ।
ऊरुभ्यां प्राहिणोद्राजन्गदां वेगेन पाण्डवः ॥ ४३
सा वज्रनिष्पेषसमा प्रहिता भीमकर्मणा ।
ऊरू दुर्योधनस्याथ बभञ्ज प्रियदर्शनौ ॥ ४४
स पपात नरव्याघ्रो वसुधामनुनादयन् ।
भग्नोरुर्भीमसेनेन पुत्रस्तव महीपते ॥ ४५
ववुर्वाताः सनिर्घाताः पांसुवर्षं पपात च ।
चचाल पृथिवी चापि सवृक्षक्षुपपर्वता ॥ ४६
तस्मिन्निपतिते वीरे पत्यौ सर्वमहीक्षिताम् ।
महास्वना पुनर्दीप्ता सनिर्घाता भयंकरी ।
पपात चोल्का महती पतिते पृथिवीपतौ ॥ ४७
तथा शोणितवर्षं च पांसुवर्षं च भारत ।
ववर्ष मघवांस्तत्र तव पुत्रे निपातिते ॥ ४८
यक्षाणां राक्षसानां च पिशाचानां तथैव च ।
अन्तरिक्षे महानादः श्रूयते भरतर्षभ ॥ ४९
तेन शब्देन घोरेण मृगाणामथ पक्षिणाम् ।
जज्ञे घोरतमः शब्दो बहूनां सर्वतोदिशम् ॥ ५०
ये तत्र वाजिनः शेषा गजाश्च मनुजैः सह ।
मुमुचुस्ते महानादं तव पुत्रे निपातिते ॥ ५१
भेरीशङ्खमृदङ्गानामभवच्च स्वनो महान् ।
अन्तर्भूमिगतश्चैव तव पुत्रे निपातिते ॥ ५२
बहुपादैर्बहुभुजैः कबन्धैर्घोरदर्शनैः ।
नृत्यद्भिर्भयदैर्व्याप्ता दिशस्तत्राभवन्नृप ॥ ५३
ध्वजवन्तोऽस्त्रवन्तश्च शस्त्रवन्तस्तथैव च ।
प्राकम्पन्त ततो राजंस्तव पुत्रे निपातिते ॥ ५४
ह्रदाः कूपाश्च रुधिरमुद्वेमुर्नृपसत्तम ।
नद्यश्च सुमहावेगाः प्रतिस्रोतोवहाभवन् ॥ ५५
पुलिङ्गा इव नार्यस्तु स्त्रीलिङ्गाः पुरुषाभवन् ।
दुर्योधने तदा राजन्पतिते तनये तव ॥ ५६
दृष्ट्वा तानद्भुतोत्पातान्पाञ्चालाः पाण्डवैः सह ।
आविग्नमनसः सर्वे बभूवुर्भरतर्षभ ॥ ५७
ययुर्देवा यथाकामं गन्धर्वाप्सरसस्तथा ।
कथयन्तोऽद्भुतं युद्धं सुतयोस्तव भारत ॥ ५८
तथैव सिद्धा राजेन्द्र तथा वातिकचारणाः ।
नरसिंहौ प्रशंसन्तौ विप्रजग्मुर्यथागतम् ॥ ५९

इति श्रीमहाभारते शल्यपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

संजय उवाच ।

तं पातितं ततो दृष्ट्वा महाशालमिवोद्गतम् ।
प्रहृष्टमनसः सर्वे बभूवुस्तत्र पाण्डवाः ॥ १
उन्मत्तमिव मातङ्गं सिंहेन विनिपातितम् ।
ददृशुर्हृष्टरोमाणः सर्वे ते चापि सोमकाः ॥ २
ततो दुर्योधनं हत्वा भीमसेनः प्रतापवान् ।
पतितं कौरवेन्द्रं तमुपगम्येदमब्रवीत् ॥ ३
गौर्गौरिति पुरा मन्द द्रौपदीमेकवाससम् ।
यत्सभायां हसन्नस्मांस्तदा वससि दुर्मते ।
तस्यावहासस्य फलमद्य त्वं समवाप्नुहि ॥ ४
एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत् ।
शिरश्च राजसिंहस्य पादेन समलोडयत् ॥ ५
तथैव क्रोधसंरक्तो भीमः परबलार्दनः ।
पुनरेवाब्रवीद्वाक्यं यत्तच्छृणु नराधिप ॥ ६
येऽस्मान्पुरोऽपनृत्यन्त पुनर्गौरिति गौरिति ।
तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ॥ ७
नास्माकं निकृतिर्वह्निर्नाक्षद्यूतं न वञ्चना ।
स्वबाहुबलमाश्रित्य प्रबाधामो वयं रिपून् ॥ ८
सोऽवाप्य वैरस्य परस्य पारं
वृकोदरः प्राह शनैः प्रहस्य ।
युधिष्ठिरं केशवसृञ्जयांश्च

धनंजयं माद्रवतीसुतौ च ॥ ९
रजस्वलां द्रौपदीमानयन्ये
ये चाप्यकुर्वन्त सदस्यवस्त्राम् ।
तान्पश्यध्वं पाण्डवैर्धार्तराष्ट्रा-
न्रणे हतांस्तपसा याज्ञसेन्याः ॥ १०
ये नः पुरा षण्ढतिलानवोच-
न्क्रूरा राज्ञो धृतराष्ट्रस्य पुत्राः ।
ते नो हताः सगणाः सानुबन्धाः
कामं स्वर्गं नरकं वा व्रजामः ॥ ११
पुनश्च राज्ञः पतितस्य भूमौ
स तां गदां स्कन्धगतां निरीक्ष्य ।
वामेन पादेन शिरः प्रमृद्य
दुर्योधनं नैकृतिकेत्यवोचत् ॥ १२
हृष्टेन राजन्कुरुपार्थिवस्य
क्षुद्रात्मना भीमसेनेन पादम् ।
दृष्ट्वा कृतं मूर्धनि नाभ्यनन्द-
न्धर्मात्मानः सोमकानां प्रबर्हाः ॥ १३
तव पुत्रं तथा हत्वा कत्थमानं वृकोदरम् ।
नृत्यमानं च बहुशो धर्मराजोऽब्रवीदिदम् ॥ १४
मा शिरोऽस्य पदा मर्दीर्मा धर्मस्तेऽत्यगान्महान् ।
राजा ज्ञातिर्हतश्चायं नैतन्न्याय्यं तवानघ ॥ १५
विध्वस्तोऽयं हतामात्यो हतभ्राता हतप्रजः ।
उत्सन्नपिण्डो भ्राता च नैतन्न्याय्यं कृतं त्वया ॥ १६
धार्मिको भीमसेनोऽसावित्याहुस्त्वां पुरा जनाः ।
स कस्माद्भीमसेन त्वं राजानमधितिष्ठसि ॥ १७
दृष्ट्वा दुर्योधनं राजा कुन्तीपुत्रस्तथागतम् ।
नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ १८
नूनमेतद्बलवता धात्रादिष्टं महात्मना ।
यद्वयं त्वां जिघांसामस्त्वं चास्मान्कुरुसत्तम ॥ १९
आत्मनो ह्यपराधेन महद्व्यसनमीदृशम् ।
प्राप्तवानसि यल्लोभान्मदाद्बाल्याच्च भारत ॥ २०
घातयित्वा वयस्यांश्च भ्रातॄनथ पितॄंस्तथा ।
पुत्रान्पौत्रांस्तथाचार्यांस्ततोऽसि निधनं गतः ॥ २१
तवापराधादस्माभिर्भ्रातरस्ते महारथाः ।
निहता ज्ञातयश्चान्ये दिष्टं मन्ये दुरत्ययम् ॥ २२
स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य विह्वलाः ।
गर्हयिष्यन्ति नो नूनं विधवाः शोककर्शिताः ॥ २३
एवमुक्त्वा सुदुःखार्तो निशश्वास स पार्थिवः ।
विललाप चिरं चापि धर्मपुत्रो युधिष्ठिरः ॥ २४

इति श्रीमहाभारते शल्यपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

धृतराष्ट्र उवाच ।

अधर्मेण हतं दृष्ट्वा राजानं माधवोत्तमः ।
किमब्रवीत्तदा सूत बलदेवो महाबलः ॥ १
गदायुद्धविशेषज्ञो गदायुद्धविशारदः ।
कृतवान्रौहिणेयो यत्तन्ममाचक्ष्व संजय ॥ २

संजय उवाच ।

शिरस्यभिहतं दृष्ट्वा भीमसेनेन ते सुतम् ।
रामः प्रहरतां श्रेष्ठश्चुक्रोध बलवद्बली ॥ ३
ततो मध्ये नरेन्द्राणामूर्ध्वबाहुर्हलायुधः ।
कुर्वन्नार्तस्वरं घोरं धिग्धिग्भीमेत्युवाच ह ॥ ४
अहो धिग्यदधो नाभेः प्रहृतं शुद्धविक्रमे ।
नैतद्दृष्टं गदायुद्धे कृतवान्यद्वृकोदरः ॥ ५
अधो नाभ्या न हन्तव्यमिति शास्त्रस्य निश्चयः ।
अयं त्वशास्त्रविन्मूढः स्वच्छन्दात्संप्रवर्तते ॥ ६
तस्य तत्तद्ब्रुवाणस्य रोषः समभवन्महान् ।
ततो लाङ्गलमुद्यम्य भीममभ्यद्रवद्बली ॥ ७
तस्योर्ध्वबाहोः सदृशं रूपमासीन्महात्मनः ।

बहुधातुविचित्रस्य श्वेतस्येव महागिरेः ॥ ८
तमुत्पतन्तं जग्राह केशवो विनयानतः ।
बाहुभ्यां पीनवृत्ताभ्यां प्रयत्नाद्बलवद्बली ॥ ९
सितासितौ यदुवरौ शुशुभातेऽधिकं ततः ।
नभोगतौ यथा राजंश्चन्द्रसूर्यौ दिनक्षये ॥ १०
उवाच चैनं संरब्धं शमयन्निव केशवः ।
आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा ।
विपरीतं द्विषत्स्वेतत्षड्विधा वृद्धिरात्मनः ॥ ११
आत्मन्यपि च मित्रेषु विपरीतं यदा भवेत् ।
तदा विद्यान्मनोज्यानिमाशु शान्तिकरो भवेत् ॥१२
अस्माकं सहजं मित्रं पाण्डवाः शुद्धपौरुषाः ।
स्वकाः पितृष्वसुः पुत्रास्ते परैर्निकृता भृशम् ॥ १३
प्रतिज्ञापारणं धर्मः क्षत्रियस्येति वेत्थ ह ।
सुयोधनस्य गदया भङ्क्तास्म्यूरू महाहवे ।
इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले ॥ १४
मैत्रेयेणाभिशप्तश्च पूर्वमेव महर्षिणा ।
ऊरू भेत्स्यति ते भीमो गदयेति परंतप ।
अतो दोषं न पश्यामि मा क्रुधस्त्वं प्रलम्बहन् ॥१५
यौनैर्हार्दैश्च संबन्धैः संबद्धाः स्मेह पाण्डवैः ।
तेषां वृद्ध्याभिवृद्धिर्नो मा क्रुधः पुरुषर्षभ ॥ १६

राम उवाच ।

धर्मः सुचरितः सद्भिः सह द्वाभ्यां नियच्छति ।
अर्थश्चात्यर्थलुब्धस्य कामश्चातिप्रसङ्गिनः ॥ १७
धर्मार्थौ धर्मकामौ च कामार्थौ चाप्यपीडयन् ।
धर्मार्थकामान्योऽभ्येति सोऽत्यन्तं सुखमश्नुते ॥१८
तदिदं व्याकुलं सर्वं कृतं धर्मस्य पीडनात् ।
भीमसेनेन गोविन्द कामं त्वं तु यथात्थ माम् ॥१९

वासुदेव उवाच ।

अरोषणो हि धर्मात्मा सततं धर्मवत्सलः ।
भवान्प्रख्यायते लोके तस्मात्संशाम्य मा क्रुधः ॥२०
प्राप्तं कलियुगं विद्धि प्रतिज्ञां पाण्डवस्य च ।
आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः ॥ २१

संजय उवाच ।

धर्मच्छलमपि श्रुत्वा केशवात्स विशां पते ।
नैव प्रीतमना रामो वचनं प्राह संसदि ॥ २२
हत्वाधर्मेण राजानं धर्मात्मानं सुयोधनम् ।
जिह्मयोधीति लोकेऽस्मिन्ख्यातिं यास्यति पाण्डवः ॥
दुर्योधनोऽपि धर्मात्मा गतिं यास्यति शाश्वतीम् ।
ऋजुयोधी हतो राजा धार्तराष्ट्रो नराधिपः ॥ २४
युद्धदीक्षां प्रविश्याजौ रणयज्ञं वितत्य च ।
हुत्वात्मानममित्राग्नौ प्राप चावभृथं यशः ॥ २५
इत्युक्त्वा रथमास्थाय रौहिणेयः प्रतापवान् ।
श्वेताभ्रशिखराकारः प्रययौ द्वारकां प्रति ॥ २६
पाञ्चालाश्च सवार्ष्णेयाः पाण्डवाश्च विशां पते ।
रामे द्वारवतीं याते नातिप्रमनसोऽभवन् ॥ २७
ततो युधिष्ठिरं दीनं चिन्तापरमधोमुखम् ।
शोकोपहतसंकल्पं वासुदेवोऽब्रवीदिदम् ॥ २८
धर्मराज किमर्थं त्वमधर्ममनुमन्यसे ।
हतबन्धोर्यदेतस्य पतितस्य विचेतसः ॥ २९
दुर्योधनस्य भीमेन मृद्यमानं शिरः पदा ।
उपप्रेक्षसि कस्मात्त्वं धर्मज्ञः सन्नराधिप ॥ ३०

युधिष्ठिर उवाच ।

न ममैतत्प्रियं कृष्ण यद्राजानं वृकोदरः ।
पदा मूर्ध्न्यस्पृशत्क्रोधान्न च हृष्ये कुलक्षये ॥ ३१
निकृत्या निकृता नित्यं धृतराष्ट्रसुतैर्वयम् ।
बहूनि परुषाण्युक्त्वा वनं प्रस्थापिताः स्म ह ॥ ३२
भीमसेनस्य तद्दुःखमतीव हृदि वर्तते ।
इति संचिन्त्य वार्ष्णेय मयैतत्समुपेक्षितम् ॥ ३३
तस्माद्धत्वाकृतप्रज्ञं लुब्धं कामवशानुगम् ।
लभतां पाण्डवः कामं धर्मेऽधर्मेऽपि वा कृते ॥ ३४

संजय उवाच ।

इत्युक्ते धर्मराजेन वासुदेवोऽब्रवीदिदम् ।
काममस्त्वेवमिति वै कृच्छ्राद्यदुकुलोद्वहः ॥ ३५
इत्युक्तो वासुदेवेन भीमप्रियहितैषिणा ।
अन्वमोदत तत्सर्वं यद्भीमेन कृतं युधि ॥ ३६
भीमसेनोऽपि हत्वाजौ तव पुत्रममर्षणः ।
अभिवाद्याग्रतः स्थित्वा संप्रहृष्टः कृताञ्जलिः ॥३७
प्रोवाच सुमहातेजा धर्मराजं युधिष्ठिरम् ।
हर्षादुत्फुल्लनयनो जितकाशी विशां पते ॥ ३८
तवाद्य पृथिवी राजन्क्षेमा निहतकण्टका ।
तां प्रशाधि महाराज स्वधर्ममनुपालयन् ॥ ३९
यस्तु कर्तास्य वैरस्य निकृत्या निकृतिप्रियः ।
सोऽयं विनिहतः शेते पृथिव्यां पृथिवीपते ॥ ४०
दुःशासनप्रभृतयः सर्वे ते चोग्रवादिनः ।
राधेयः शकुनिश्चापि निहतास्तव शत्रवः ॥ ४१
सेयं रत्नसमाकीर्णा मही सवनपर्वता ।
उपावृत्ता महाराज त्वामद्य निहतद्विषम् ॥ ४२

युधिष्ठिर उवाच ।

गतं वैरस्य निधनं हतो राजा सुयोधनः ।
कृष्णस्य मतमास्थाय विजितेयं वसुंधरा ॥ ४३
दिष्ट्या गतस्त्वमानृण्यं मातुः कोपस्य चोभयोः ।
दिष्ट्या जयसि दुर्धर्ष दिष्ट्या शत्रुर्निपातितः ॥४४

इति श्रीमहाभारते शल्यपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

धृतराष्ट्र उवाच ।

हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
पाण्डवाः सृञ्जयाश्चैव किमकुर्वत संजय ॥ १

संजय उवाच ।

हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
सिंहेनेव महाराज मत्तं वनगजं वने ॥ २
प्रहृष्टमनसस्तत्र कृष्णेन सह पाण्डवाः ।
पाञ्चालाः सृञ्जयाश्चैव निहते कुरुनन्दने ॥ ३
आविध्यन्नुत्तरीयाणि सिंहनादांश्च नेदिरे ।
नैतान्हर्षसमाविष्टानियं सेहे वसुंधरा ॥ ४
धनूंष्यन्ये व्याक्षिपन्त ज्याश्चाप्यन्ये तथाक्षिपन् ।
दध्मुरन्ये महाशङ्खानन्ये जघ्नुश्च दुन्दुभीः ॥ ५
चिक्रीडुश्च तथैवान्ये जहसुश्च तवाहिताः ।
अब्रुवंश्चासकृद्वीरा भीमसेनमिदं वचः ॥ ६
दुष्करं भवता कर्म रणेऽद्य सुमहत्कृतम् ।
कौरवेन्द्रं रणे हत्वा गदयातिकृतश्रमम् ॥ ७
इन्द्रेणेव हि वृत्रस्य वधं परमसंयुगे ।
त्वया कृतममन्यन्त शत्रोर्वधमिमं जनाः ॥ ८
चरन्तं विविधान्मार्गान्मण्डलानि च सर्वशः ।
दुर्योधनमिमं शूरं कोऽन्यो हन्याद्वृकोदरात् ॥ ९
वैरस्य च गतः पारं त्वमिहान्यैः सुदुर्गमम् ।
अशक्यमेतदन्येन संपादयितुमीदृशम् ॥ १०
कुञ्जरेणेव मत्तेन वीर संग्राममूर्धनि ।
दुर्योधनशिरो दिष्ट्या पादेन मृदितं त्वया ॥ ११
सिंहेन महिषस्येव कृत्वा संगरमद्भुतम् ।
दुःशासनस्य रुधिरं दिष्ट्या पीतं त्वयानघ ॥ १२
ये विप्रकुर्वन्राजानं धर्मात्मानं युधिष्ठिरम् ।
मूर्ध्नि तेषां कृतः पादो दिष्ट्या ते स्वेन कर्मणा ॥१३
अमित्राणामधिष्ठानाद्वधाद्दुर्योधनस्य च ।
भीम दिष्ट्या पृथिव्यां ते प्रथितं सुमहद्यशः ॥ १४
एवं नूनं हते वृत्रे शक्रं नन्दन्ति बन्दिनः ।
तथा त्वां निहतामित्रं वयं नन्दाम भारत ॥ १५
दुर्योधनवधे यानि रोमाणि हृषितानि नः ।

अद्यापि न विहृष्यन्ति तानि तद्विद्धि भारत ।
अब्रुवन्भीमसेनं वातिकास्तत्र संगताः ॥ १६
तान्हृष्टान्पुरुषव्याघ्रान्पाञ्चालान्पाण्डवैः सह ।
ब्रुवतः सदृशं तत्र प्रोवाच मधुसूदनः ॥ १७
न न्याय्यं निहतः शत्रुर्भूयो हन्तुं जनाधिपाः ।
असकृद्वाग्भिरुग्राभिर्निहतो ह्येष मन्दधीः ॥ १८
तदैवैष हतः पापो यदैव निरपत्रपः ।
लुब्धः पापसहायश्च सुहृदां शासनातिगः ॥ १९
बहुशो विदुरद्रोणकृपगाङ्गेयसृञ्जयैः ।
पाण्डुभ्यः प्रोच्यमानोऽपि पित्र्यमंशं न दत्तवान् ॥
नैष योग्योऽद्य मित्रं वा शत्रुर्वा पुरुषाधमः ।
किमनेनातिनुन्नेन वाग्भिः काष्ठसधर्मणा ॥ २१
रथेष्वारोहत क्षिप्रं गच्छामो वसुधाधिपाः ।
दिष्ट्या हतोऽयं पापात्मा सामात्यज्ञातिबान्धवः ॥ २२
इति श्रुत्वा त्वधिक्षेपं कृष्णाद्दुर्योधनो नृपः ।
अमर्षवशमापन्न उदतिष्ठद्विशां पते ॥ २३
स्फिग्देशेनोपविष्टः स दोर्भ्यां विष्टभ्य मेदिनीम् ।
दृष्टिं भ्रूसंकटां कृत्वा वासुदेवे न्यपातयत् ॥ २४
अर्धोन्नतशरीरस्य रूपमासीन्नृपस्य तत् ।
क्रुद्धस्याशीविषस्येव च्छिन्नपुच्छस्य भारत ॥ २५
प्राणान्तकरणीं घोरां वेदनामविचिन्तयन् ।
दुर्योधनो वासुदेवं वाग्भिरुग्राभिरार्दयत् ॥ २६
कंसदासस्य दायाद न ते लज्जास्त्यनेन वै ।
अधर्मेण गदायुद्धे यदहं विनिपातितः ॥ २७
ऊरू भिन्धीति भीमस्य स्मृतिं मिथ्या प्रयच्छता ।
किं न विज्ञातमेतन्मे यदर्जुनमवोचथाः ॥ २८
घातयित्वा महीपालानृजुयुद्धान्सहस्रशः ।
जिह्मैरुपायैर्बहुभिर्न ते लज्जा न ते घृणा ॥ २९
अहन्यहनि शूराणां कुर्वाणः कदनं महत् ।
शिखण्डिनं पुरस्कृत्य घातितस्ते पितामहः ॥ ३०
अश्वत्थाम्नः सनामानं हत्वा नागं सुदुर्मते ।
आचार्यो न्यासितः शस्त्रं किं तन्न विदितं मम ॥ ३१
स चानेन नृशंसेन धृष्टद्युम्नेन वीर्यवान् ।
पात्यमानस्त्वया दृष्टो न चैनं त्वमवारयः ॥ ३२
वधार्थं पाण्डुपुत्रस्य याचितां शक्तिमेव च ।
घटोत्कचे व्यंसयथाः कस्त्वत्तः पापकृत्तमः ॥ ३३
छिन्नबाहुः प्रायगतस्तथा भूरिश्रवा बली ।
त्वया निसृष्टेन हतः शैनेयेन दुरात्मना ॥ ३४
कुर्वाणश्चोत्तमं कर्म कर्णः पार्थजिगीषया ।
व्यंसनेनाश्वसेनस्य पन्नगेन्द्रसुतस्य वै ॥ ३५
पुनश्च पतिते चक्रे व्यसनार्तः पराजितः ।
पातितः समरे कर्णश्चक्रव्यग्रोऽग्रणीर्नृणाम् ॥ ३६
यदि मां चापि कर्णं च भीष्मद्रोणौ च संयुगे ।
ऋजुना प्रतियुध्येथा न ते स्याद्विजयो ध्रुवम् ॥ ३७
त्वया पुनरनार्येण जिह्ममार्गेण पार्थिवाः ।
स्वधर्ममनुतिष्ठन्तो वयं चान्ये च घातिताः ॥ ३८

वासुदेव उवाच ।

हतस्त्वमसि गान्धारे सभ्रातृसुतबान्धवः ।
सगणः ससुहृच्चैव पापमार्गमनुष्ठितः ॥ ३९
तवैव दुष्कृतैर्वीरौ भीष्मद्रोणौ निपातितौ ।
कर्णश्च निहतः संख्ये तव शीलानुवर्तकः ॥ ४०
याच्यमानो मया मूढ पित्र्यमंशं न दित्ससि ।
पाण्डवेभ्यः स्वराज्यार्धं लोभाच्छकुनिनिश्चयात् ॥
विषं ते भीमसेनाय दत्तं सर्वे च पाण्डवाः ।
प्रदीपिता जतुगृहे मात्रा सह सुदुर्मते ॥ ४२
सभायां याज्ञसेनी च कृष्टा द्यूते रजस्वला ।
तदैव तावद्दुष्टात्मन्वध्यस्त्वं निरपत्रपः ॥ ४३
अनक्षज्ञं च धर्मज्ञं सौबलेनाक्षवेदिना ।
निकृत्या यत्पराजैषीस्तस्मादसि हतो रणे ॥ ४४

जयद्रथेन पापेन यत्कृष्णा क्लेशिता वने ।
यातेषु मृगयां तेषु तृणबिन्दोरथाश्रमे ॥ ४५
अभिमन्युश्च यद्बाल एको बहुभिराहवे ।
त्वद्दोषैर्निहतः पाप तस्मादसि हतो रणे ॥ ४६

दुर्योधन उवाच ।

अधीतं विधिवद्दत्तं भूः प्रशास्ता ससागरा ।
मूर्ध्नि स्थितममित्राणां को नु स्वन्ततरो मया ॥४७
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुपश्यताम् ।
तदिदं निधनं प्राप्तं को नु स्वन्ततरो मया ॥ ४८
देवार्हा मानुषा भोगाः प्राप्ता असुलभा नृपैः ।
ऐश्वर्यं चोत्तमं प्राप्तं को नु स्वन्ततरो मया ॥ ४९
ससुहृत्सानुबन्धश्च स्वर्गं गन्ताहमच्युत ।
यूयं विहतसंकल्पाः शोचन्तो वर्तयिष्यथ ॥ ५०

संजय उवाच ।

अस्य वाक्यस्य निधने कुरुराजस्य भारत ।
अपतत्सुमहद्वर्षं पुष्पाणां पुण्यगन्धिनाम् ॥ ५१
अवादयन्त गन्धर्वा जगुश्चाप्सरसां गणाः ।
सिद्धाश्च मुमुचुर्वाचः साधु साध्विति भारत ॥५२
ववौ च सुरभिर्वायुः पुण्यगन्धो मृदुः सुखः ।
व्यराजतामलं चैव नभो वैडूर्यसंनिभम् ॥ ५३
अत्यद्भुतानि ते दृष्ट्वा वासुदेवपुरोगमाः ।
दुर्योधनस्य पूजां च दृष्ट्वा व्रीडामुपागमन् ॥ ५४
हतांश्चाधर्मतः श्रुत्वा शोकार्ताः शुशुचुर्हि ते ।
भीष्मं द्रोणं तथा कर्णं भूरिश्रवसमेव च ॥ ५५
तांस्तु चिन्तापरान्दृष्ट्वा पाण्डवान्दीनचेतसः ।
प्रोवाचेदं वचः कृष्णो मेघदुन्दुभिनिस्वनः ॥ ५६
नैष शक्योऽतिशीघ्रास्त्रस्ते च सर्वे महारथाः ।
ऋजुयुद्धेन विक्रान्ता हन्तुं युष्माभिराहवे ॥ ५७
उपाया विहिता ह्येते मया तस्मान्नराधिपाः ।
अन्यथा पाण्डवेयानां नाभविष्यज्जयः क्वचित् ॥५८
ते हि सर्वे महात्मानश्चत्वारोऽतिरथा भुवि ।
न शक्या धर्मतो हन्तुं लोकपालैरपि स्वयम् ॥ ५९
तथैवायं गदापाणिर्धार्तराष्ट्रो गतक्लमः ।
न शक्यो धर्मतो हन्तुं कालेनापीह दण्डिना ॥६०
न च वो हृदि कर्तव्यं यदयं घातितो नृपः ।
मिथ्यावध्यास्तथोपायैर्बहवः शत्रवोऽधिकाः ॥ ६१
पूर्वैरनुगतो मार्गो देवैरसुरघातिभिः ।
सद्भिश्चानुगतः पन्थाः स सर्वैरनुगम्यते ॥ ६२
कृतकृत्याः स्म सायाह्ने निवासं रोचयामहे ।
साश्वनागरथाः सर्वे विश्रमामो नराधिपाः ॥ ६३
वासुदेववचः श्रुत्वा तदानीं पाण्डवैः सह ।
पाञ्चाला भृशसंहृष्टा विनेदुः सिंहसंघवत् ॥ ६४
ततः प्राध्मापयञ्शङ्खान्पाञ्चजन्यं च माधवः ।
हृष्टा दुर्योधनं दृष्ट्वा निहतं पुरुषर्षभाः ॥ ६५

इति श्रीमहाभारते शल्यपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

संजय उवाच ।

ततस्ते प्रययुः सर्वे निवासाय महीक्षितः ।
शङ्खान्प्रध्मापयन्तो वै हृष्टाः परिघबाहवः ॥ १
पाण्डवान्गच्छतश्चापि शिबिरं नो विशां पते ।
महेष्वासोऽन्वगात्पश्चाद्युयुत्सुः सात्यकिस्तथा ॥ २
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाश्च सर्वशः ।
सर्वे चान्ये महेष्वासा ययुः स्वशिबिराण्युत ॥ ३
ततस्ते प्राविशन्पार्था हतत्विट्कं हतेश्वरम् ।
दुर्योधनस्य शिबिरं रङ्गवद्विसृते जने ॥ ४
गतोत्सवं पुरमिव हृतनागमिव ह्रदम् ।
स्त्रीवर्षवरभूयिष्ठं वृद्धामात्यैरधिष्ठितम् ॥ ५

ततस्तान्पर्युपातिष्ठन्दुर्योधनपुरःसराः ।
कृताञ्जलिपुटा राजन्काषायमलिनाम्बराः ॥ ६
शिबिरं समनुप्राप्य कुरुराजस्य पाण्डवाः ।
अवतेरुर्महाराज रथेभ्यो रथसत्तमाः ॥ ७
ततो गाण्डीवधन्वानमभ्यभाषत केशवः ।
स्थितः प्रियहिते नित्यमतीव भरतर्षभ ॥ ८
अवरोपय गाण्डीवमक्षय्यौ च महेषुधी ।
अथाहमवरोक्ष्यामि पश्चाद्भरतसत्तम ॥ ९
स्वयं चैवावरोह त्वमेतच्छ्रेयस्तवानघ ।
तच्चाकरोत्तथा वीरः पाण्डुपुत्रो धनंजयः ॥ १०
अथ पश्चात्ततः कृष्णो रश्मीनुत्सृज्य वाजिनाम् ।
अवारोहत मेधावी रथाद्गाण्डीवधन्वनः ॥ ११
अथावतीर्णे भूतानामीश्वरे सुमहात्मनि ।
कपिरन्तर्दधे दिव्यो ध्वजो गाण्डीवधन्वनः ॥ १२
स दग्धो द्रोणकर्णाभ्यां दिव्यैरस्त्रैर्महारथः ।
अथ दीप्तोऽग्निना ह्याशु प्रजज्वाल महीपते ॥ १३
सोपासङ्गः सरश्मिश्च साश्वः सयुगबन्धुरः ।
भस्मीभूतोऽपतद्भूमौ रथो गाण्डीवधन्वनः ॥ १४
तं तथा भस्मभूतं तु दृष्ट्वा पाण्डुसुताः प्रभो ।
अभवन्विस्मिता राजन्नर्जुनश्चेदमब्रवीत् ॥ १५
कृताञ्जलिः सप्रणयं प्रणिपत्याभिवाद्य च ।
गोविन्द कस्माद्भगवन्रथो दग्धोऽयमग्निना ॥ १६
किमेतन्महदाश्चर्यमभवद्यदुनन्दन ।
तन्मे ब्रूहि महाबाहो श्रोतव्यं यदि मन्यसे ॥ १७

वासुदेव उवाच ।

अस्त्रैर्बहुविधैर्दग्धः पूर्वमेवायमर्जुन ।
मदधिष्ठितत्वात्समरे न विशीर्णः परंतप ॥ १८
इदानीं तु विशीर्णोऽयं दग्धो ब्रह्मास्त्रतेजसा ।
मया विमुक्तः कौन्तेय त्वय्यद्य कृतकर्मणि ॥ १९

संजय उवाच ।

ईषदुत्स्मयमानश्च भगवान्केशवोऽरिहा ।
परिष्वज्य च राजानं युधिष्ठिरमभाषत ॥ २०
दिष्ट्या जयसि कौन्तेय दिष्ट्या ते शत्रवो जिताः ।
दिष्ट्या गाण्डीवधन्वा च भीमसेनश्च पाण्डवः ॥ २१
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ ।
मुक्ता वीरक्षयादस्मात्संग्रामान्निहतद्विषः ।
क्षिप्रमुत्तरकालानि कुरु कार्याणि भारत ॥ २२
उपयातमुपप्लव्यं सह गाण्डीवधन्वना ।
आनीय मधुपर्कं मां यत्पुरा त्वमवोचथाः ॥ २३
एष भ्राता सखा चैव तव कृष्ण धनंजयः ।
रक्षितव्यो महाबाहो सर्वास्वापत्स्विति प्रभो ।
तव चैवं ब्रुवाणस्य तथेत्येवाहमब्रुवम् ॥ २४
स सव्यसाची गुप्तस्ते विजयी च नरेश्वर ।
भ्रातृभिः सह राजेन्द्र शूरः सत्यपराक्रमः ।
मुक्तो वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् ॥ २५
एवमुक्तस्तु कृष्णेन धर्मराजो युधिष्ठिरः ।
हृष्टरोमा महाराज प्रत्युवाच जनार्दनम् ॥ २६
प्रमुक्तं द्रोणकर्णाभ्यां ब्रह्मास्त्रमरिमर्दन ।
कस्त्वदन्यः सहेत्साक्षादपि वज्री पुरंदरः ॥ २७
भवतस्तु प्रसादेन संग्रामे बहवो जिताः ।
महारणगतः पार्थो यच्च नासीत्पराङ्मुखः ॥ २८
तथैव च महाबाहो पर्यायैर्बहुभिर्मया ।
कर्मणामनुसंतानं तेजसश्च गतिः शुभा ॥ २९
उपप्लव्ये महर्षिर्मे कृष्णद्वैपायनोऽब्रवीत् ।
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥ ३०
इत्येवमुक्ते ते वीराः शिबिरं तव भारत ।
प्रविश्य प्रत्यपद्यन्त कोशरत्नर्द्धिसंचयान् ॥ ३१
रजतं जातरूपं च मणीनथ च मौक्तिकान् ।
भूषणान्यथ मुख्यानि कम्बलान्यजिनानि च ।

दासीदासमसंख्येयं राज्योपकरणानि च ॥ ३२
ते प्राप्य धनमक्षय्यं त्वदीयं भरतर्षभ ।
उदक्रोशन्महेष्वासा नरेन्द्र विजितारयः ॥ ३३
ते तु वीराः समाश्वस्य वाहनान्यवमुच्य च ।
अतिष्ठन्त मुहुः सर्वे पाण्डवाः सात्यकिस्तथा ॥३४
अथाब्रवीन्महाराज वासुदेवो महायशाः ।
अस्माभिर्मङ्गलार्थाय वस्तव्यं शिबिराद्बहिः ॥ ३५
तथेत्युक्त्वा च ते सर्वे पाण्डवाः सात्यकिस्तथा ।
वासुदेवेन सहिता मङ्गलार्थं ययुर्बहिः ॥ ३६
ते समासाद्य सरितं पुण्यामोघवतीं नृप ।
न्यवसन्नथ तां रात्रिं पाण्डवा हतशत्रवः ॥ ३७
ततः संप्रेषयामासुर्यादवं नागसाह्वयम् ।
स च प्रायाज्जवेनाशु वासुदेवः प्रतापवान् ।
दारुकं रथमारोप्य येन राजाम्बिकासुतः ॥ ३८
तमूचुः संप्रयास्यन्तं सैन्यसुग्रीववाहनम् ।
प्रत्याश्वासय गान्धारीं हतपुत्रां यशस्विनीम् ॥ ३९
स प्रायात्पाण्डवैरुक्तस्तत्पुरं सात्वतां वरः ।
आससादयिषुः क्षिप्रं गान्धारीं निहतात्मजाम् ॥४०

इति श्रीमहाभारते शल्यपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

जनमेजय उवाच ।

किमर्थं राजशार्दूलो धर्मराजो युधिष्ठिरः ।
गान्धार्याः प्रेषयामास वासुदेवं परंतपम् ॥ १
यदा पूर्वं गतः कृष्णः शमार्थं कौरवान्प्रति ।
न च तं लब्धवान्कामं ततो युद्धमभूदिदम् ॥ २
निहतेषु तु योधेषु हते दुर्योधने तथा ।
पृथिव्यां पाण्डवेयस्य निःसपत्ने कृते युधि ॥ ३
विद्रुते शिबिरे शून्ये प्राप्ते यशसि चोत्तमे ।
किं नु तत्कारणं ब्रह्मन्येन कृष्णो गतः पुनः ॥ ४
न चैतत्कारणं ब्रह्मन्नल्पं वै प्रतिभाति मे ।
यत्रागमदमेयात्मा स्वयमेव जनार्दनः ॥ ५
तत्त्वतो वै समाचक्ष्व सर्वमध्वर्युसत्तम ।
यच्चात्र कारणं ब्रह्मन्कार्यस्यास्य विनिश्चये ॥ ६

वैशंपायन उवाच ।

त्वद्युक्तोऽयमनुप्रश्नो यन्मां पृच्छसि पार्थिव ।
तत्तेऽहं संप्रवक्ष्यामि यथावद्भरतर्षभ ॥ ७
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
व्युत्क्रम्य समयं राजन्धार्तराष्ट्रं महाबलम् ॥ ८
अन्यायेन हतं दृष्ट्वा गदायुद्धेन भारत ।
युधिष्ठिरं महाराज महद्भयमथाविशत् ॥ ९
चिन्तयानो महाभागां गान्धारीं तपसान्विताम् ।
घोरेण तपसा युक्तां त्रैलोक्यमपि सा दहेत् ॥१०
तस्य चिन्तयमानस्य बुद्धिः समभवत्तदा ।
गान्धार्याः क्रोधदीप्तायाः पूर्वं प्रशमनं भवेत् ॥११
सा हि पुत्रवधं श्रुत्वा कृतमस्माभिरीदृशम् ।
मानसेनाग्निना क्रुद्धा भस्मसान्नः करिष्यति ॥ १२
कथं दुःखमिदं तीव्रं गान्धारी प्रसहिष्यति ।
श्रुत्वा विनिहतं पुत्रं छलेनाजिह्मयोधिनम् ॥ १३
एवं विचिन्त्य बहुधा भयशोकसमन्वितः ।
वासुदेवमिदं वाक्यं धर्मराजोऽभ्यभाषत ॥ १४
तव प्रसादाद्गोविन्द राज्यं निहतकण्टकम् ।
अप्राप्यं मनसापीह प्राप्तमस्माभिरच्युत ॥ १५
प्रत्यक्षं मे महाबाहो संग्रामे लोमहर्षणे ।
विमर्दः सुमहान्प्राप्तस्त्वया यादवनन्दन ॥ १६
त्वया देवासुरे युद्धे वधार्थममरद्विषाम् ।
यथा साह्यं पुरा दत्तं हताश्च विबुधद्विषः ॥ १७
साह्यं तथा महाबाहो दत्तमस्माकमच्युत ।

सारथ्येन च वार्ष्णेय भवता यद्धृता वयम् ॥ १८
यदि न त्वं भवेन्नाथः फल्गुनस्य महारणे ।
कथं शक्यो रणे जेतुं भवेदेष बलार्णवः ॥ १९
गदाप्रहारा विपुलाः परिघैश्चापि ताडनम् ।
शक्तिभिर्भिण्डिपालैश्च तोमरैः सपरश्वधैः ॥ २०
वाचश्च परुषाः प्राप्तास्त्वया ह्यस्मद्धितैषिणा ।
ताश्च ते सफलाः सर्वा हते दुर्योधनेऽच्युत ॥२१
गान्धार्या हि महाबाहो क्रोधं बुध्यस्व माधव ।
सा हि नित्यं महाभागा तपसोग्रेण कर्शिता ॥ २२
पुत्रपौत्रवधं श्रुत्वा ध्रुवं नः संप्रधक्ष्यति ।
तस्याः प्रसादनं वीर प्राप्तकालं मतं मम ॥ २३
कश्च तां क्रोधदीप्ताक्षीं पुत्रव्यसनकर्शिताम् ।
वीक्षितुं पुरुषः शक्तस्त्वामृते पुरुषोत्तम ॥ २४
तत्र मे गमनं प्राप्तं रोचते तत्र माधव ।
गान्धार्याः क्रोधदीप्तायाः प्रशमार्थमरिंदम ॥ २५
त्वं हि कर्ता विकर्ता च लोकानां प्रभवाप्ययः ।
हेतुकारणसंयुक्तैर्वाक्यैः कालसमीरितैः ॥ २६
क्षिप्रमेव महाप्राज्ञ गान्धारीं शमयिष्यसि ।
पितामहश्च भगवान्कृष्णस्तत्र भविष्यति ॥ २७
सर्वथा ते महाबाहो गान्धार्याः क्रोधनाशनम् ।
कर्तव्यं सात्वतश्रेष्ठ पाण्डवानां हितैषिणा ॥ २८
धर्मराजस्य वचनं श्रुत्वा यदुकुलोद्वहः ।
आमन्त्र्य दारुकं प्राह रथः सज्जो विधीयताम् ॥२९
केशवस्य वचः श्रुत्वा त्वरमाणोऽथ दारुकः ।
न्यवेदयद्रथं सज्जं केशवाय महात्मने ॥ ३०
तं रथं यादवश्रेष्ठः समारुह्य परंतपः ।
जगाम हास्तिनपुरं त्वरितः केशवो विभुः ॥ ३१
ततः प्रायान्महाराज माधवो भगवान्रथी ।
नागसाह्वयमासाद्य प्रविवेश च वीर्यवान् ॥ ३२
प्रविश्य नगरं वीरो रथघोषेण नादयन् ।
विदितो धृतराष्ट्रस्य सोऽवतीर्य रथोत्तमात् ॥ ३३
अभ्यगच्छददीनात्मा धृतराष्ट्रनिवेशनम् ।
पूर्वं चाभिगतं तत्र सोऽपश्यदृषिसत्तमम् ॥ ३४
पादौ प्रपीड्य कृष्णस्य राज्ञश्चापि जनार्दनः ।
अभ्यवादयदव्यग्रो गान्धारीं चापि केशवः ॥ ३५
ततस्तु यादवश्रेष्ठो धृतराष्ट्रमधोक्षजः ।
पाणिमालम्ब्य राज्ञः स सस्वरं प्ररुरोद ह ॥ ३६
स मुहूर्तमिवोत्सृज्य बाष्पं शोकसमुद्भवम् ।
प्रक्षाल्य वारिणा नेत्रे आचम्य च यथाविधि ।
उवाच प्रश्रितं वाक्यं धृतराष्ट्रमरिंदमः ॥ ३७
न तेऽस्त्यविदितं किंचिद्भूतभव्यस्य भारत ।
कालस्य च यथा वृत्तं तत्ते सुविदितं प्रभो ॥ ३८
यदिदं पाण्डवैः सर्वैस्तव चित्तानुरोधिभिः ।
कथं कुलक्षयो न स्यात्तथा क्षत्रस्य भारत ॥ ३९
भ्रातृभिः समयं कृत्वा क्षान्तवान्धर्मवत्सलः ।
द्यूतच्छलजितैः शक्तैर्वनवासोऽभ्युपागतः ॥ ४०
अज्ञातवासचर्या च नानावेशसमावृतैः ।
अन्ये च बहवः क्लेशास्त्वशक्तैरिव नित्यदा ॥ ४१
मया च स्वयमागम्य युद्धकाल उपस्थिते ।
सर्वलोकस्य सांनिध्ये ग्रामांस्त्वं पञ्च याचितः ॥ ४२
त्वया कालोपसृष्टेन लोभतो नापवर्जिताः ।
तवापराधान्नृपते सर्वं क्षत्रं क्षयं गतम् ॥ ४३
भीष्मेण सोमदत्तेन बाह्लिकेन कृपेण च ।
द्रोणेन च सपुत्रेण विदुरेण च धीमता ।
याचितस्त्वं शमं नित्यं न च तत्कृतवानसि ॥ ४४
कालोपहतचित्तो हि सर्वो मुह्यति भारत ।
यथा मूढो भवान्पूर्वमस्मिन्नर्थे समुद्यते ॥ ४५
किमन्यत्कालयोगाद्धि दिष्टमेव परायणम् ।
मा च दोषं महाराज पाण्डवेषु निवेशय ॥ ४६
अल्पोऽप्यतिक्रमो नास्ति पाण्डवानां महात्मनाम् ।

धर्मतो न्यायतश्चैव स्नेहतश्च परंतप ॥ ४७
एतत्सर्वं तु विज्ञाय आत्मदोषकृतं फलम् ।
असूयां पाण्डुपुत्रेषु न भवान्कर्तुमर्हति ॥ ४८
कुलं वंशश्च पिण्डश्च यच्च पुत्रकृतं फलम् ।
गान्धार्यास्तव चैवाद्य पाण्डवेषु प्रतिष्ठितम् ॥ ४९
एतत्सर्वमनुध्यात्वा आत्मनश्च व्यतिक्रमम् ।
शिवेन पाण्डवान्ध्याहि नमस्ते भरतर्षभ ॥ ५०
जानासि च महाबाहो धर्मराजस्य या त्वयि ।
भक्तिर्भरतशार्दूल स्नेहश्चापि स्वभावतः ॥ ५१
एतच्च कदनं कृत्वा शत्रूणामपकारिणाम् ।
दह्यते स्म दिवारात्रं न च शर्माधिगच्छति ॥ ५२
त्वां चैव नरशार्दूल गान्धारीं च यशस्विनीम् ।
स शोचन्भरतश्रेष्ठ न शान्तिमधिगच्छति ॥ ५३
ह्रिया च परयाविष्टो भवन्तं नाधिगच्छति ।
पुत्रशोकाभिसंतप्तं बुद्धिव्याकुलितेन्द्रियम् ॥ ५४
एवमुक्त्वा महाराज धृतराष्ट्रं यदूत्तमः ।
उवाच परमं वाक्यं गान्धारीं शोककर्शिताम् ॥ ५५
सौबलेयि निबोध त्वं यत्त्वां वक्ष्यामि सुव्रते ।
त्वत्समा नास्ति लोकेऽस्मिन्नद्य सीमन्तिनी शुभे ॥
जानामि च यथा राज्ञि सभायां मम संनिधौ ।
धर्मार्थसहितं वाक्यमुभयोः पक्षयोर्हितम् ।
उक्तवत्यसि कल्याणि न च ते तनयैः श्रुतम् ॥ ५७
दुर्योधनस्त्वया चोक्तो जयार्थी परुषं वचः ।
शृणु मूढ वचो मह्यं यतो धर्मस्ततो जयः ॥ ५८
तदिदं समनुप्राप्तं तव वाक्यं नृपात्मजे ।
एवं विदित्वा कल्याणि मा स्म शोके मनः कृथाः ।
पाण्डवानां विनाशाय मा ते बुद्धिः कदाचन ॥ ५९
शक्ता चासि महाभागे पृथिवीं सचराचराम् ।
चक्षुषा क्रोधदीप्तेन निर्दग्धुं तपसो बलात् ॥ ६०
वासुदेववचः श्रुत्वा गान्धारी वाक्यमब्रवीत् ।
एवमेतन्महाबाहो यथा वदसि केशव ॥ ६१
आधिभिर्दह्यमानाया मतिः संचलिता मम ।
सा मे व्यवस्थिता श्रुत्वा तव वाक्यं जनार्दन ॥ ६२
राज्ञस्त्वन्धस्य वृद्धस्य हतपुत्रस्य केशव ।
त्वं गतिः सह तैर्वीरैः पाण्डवैर्द्विपदां वर ॥ ६३
एतावदुक्त्वा वचनं मुखं प्रच्छाद्य वाससा ।
पुत्रशोकाभिसंतप्ता गान्धारी प्ररुरोद ह ॥ ६४
तत एनां महाबाहुः केशवः शोककर्शिताम् ।
हेतुकारणसंयुक्तैर्वाक्यैराश्वासयत्प्रभुः ॥ ६५
समाश्वास्य च गान्धारीं धृतराष्ट्रं च माधवः ।
द्रौणेः संकल्पितं भावमन्वबुध्यत केशवः ॥ ६६
ततस्त्वरित उत्थाय पादौ मूर्ध्ना प्रणम्य च ।
द्वैपायनस्य राजेन्द्र ततः कौरवमब्रवीत् ॥ ६७
आपृच्छे त्वां कुरुश्रेष्ठ मा च शोके मनः कृथाः ।
द्रौणेः पापोऽस्त्यभिप्रायस्तेनास्मि सहसोत्थितः ।
पाण्डवानां वधे रात्रौ बुद्धिस्तेन प्रदर्शिता ॥ ६८
एतच्छ्रुत्वा तु वचनं गान्धार्या सहितोऽब्रवीत् ।
धृतराष्ट्रो महाबाहुः केशवं केशिसूदनम् ॥ ६९
शीघ्रं गच्छ महाबाहो पाण्डवान्परिपालय ।
भूयस्त्वया समेष्यामि क्षिप्रमेव जनार्दन ।
प्रायात्ततस्तु त्वरितो दारुकेण सहाच्युतः ॥ ७०
वासुदेवे गते राजन्धृतराष्ट्रं जनेश्वरम् ।
आश्वासयदमेयात्मा व्यासो लोकनमस्कृतः ॥ ७१
वासुदेवोऽपि धर्मात्मा कृतकृत्यो जगाम ह ।
शिबिरं हास्तिनपुराद्दिदृक्षुः पाण्डवान्नृप ॥ ७२
आगम्य शिबिरं रात्रौ सोऽभ्यगच्छत पाण्डवान् ।
तच्च तेभ्यः समाख्याय सहितस्तैः समाविशत् ॥ ७३

इति श्रीमहाभारते शल्यपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

धृतराष्ट्र उवाच ।

अधिष्ठितः पदा मूर्ध्नि भग्नसक्थो महीं गतः ।
शौटीरमानी पुत्रो मे कान्यभाषत संजय ॥ १
अत्यर्थं कोपनो राजा जातवैरश्च पाण्डुषु ।
व्यसनं परमं प्राप्तः किमाह परमाहवे ॥ २

संजय उवाच ।

शृणु राजन्प्रवक्ष्यामि यथावृत्तं नराधिप ।
राज्ञा यदुक्तं भग्नेन तस्मिन्व्यसन आगते ॥ ३
भग्नसक्थो नृपो राजन्पांसुना सोऽवगुण्ठितः ।
यमयन्मूर्धजांस्तत्र वीक्ष्य चैव दिशो दश ॥ ४
केशान्नियम्य यत्नेन निःश्वसन्नुरगो यथा ।
संरम्भाश्रुपरीताभ्यां नेत्राभ्यामभिवीक्ष्य माम् ॥ ५
बाहू धरण्यां निष्पिष्य मुहुर्मत्त इव द्विपः ।
प्रकीर्णान्मूर्धजान्धुन्वन्दन्तैर्दन्तानुपस्पृशन् ।
गर्हयन्पाण्डवं ज्येष्ठं निःश्वस्येदमथाब्रवीत् ॥ ६
भीष्मे शांतनवे नाथे कर्णे चास्त्रभृतां वरे ।
गौतमे शकुनौ चापि द्रोणे चास्त्रभृतां वरे ॥ ७
अश्वत्थाम्नि तथा शल्ये शूरे च कृतवर्मणि ।
इमामवस्थां प्राप्तोऽस्मि कालो हि दुरतिक्रमः ॥ ८
एकादशचमूभर्ता सोऽहमेतां दशां गतः ।
कालं प्राप्य महाबाहो न कश्चिदतिवर्तते ॥ ९
आख्यातव्यं मदीयानां येऽस्मिञ्जीवन्ति संगरे ।
यथाहं भीमसेनेन व्युत्क्रम्य समयं हतः ॥ १०
बहूनि सुनृशंसानि कृतानि खलु पाण्डवैः ।
भूरिश्रवसि कर्णे च भीष्मे द्रोणे च श्रीमति ॥ ११
इदं चाकीर्तिजं कर्म नृशंसैः पाण्डवैः कृतम् ।
येन ते सत्सु निर्वेदं गमिष्यन्तीति मे मतिः ॥ १२
का प्रीतिः सत्त्वयुक्तस्य कृत्वोपधिकृतं जयम् ।
को वा समयभेत्तारं बुधः संमन्तुमर्हति ॥ १३
अधर्मेण जयं लब्ध्वा को नु हृष्येत पण्डितः ।
यथा संहृष्यते पापः पाण्डुपुत्रो वृकोदरः ॥ १४
किं नु चित्रमतस्त्वद्य भग्नसक्थस्य यन्मम ।
क्रुद्धेन भीमसेनेन पादेन मृदितं शिरः ॥ १५
प्रतपन्तं श्रिया जुष्टं वर्तमानं च बन्धुषु ।
एवं कुर्यान्नरो यो हि स वै संजय पूजितः ॥ १६
अभिज्ञौ क्षत्रधर्मस्य मम माता पिता च मे ।
तौ हि संजय दुःखार्तौ विज्ञाप्यौ वचनान्मम ॥ १७
इष्टं भृत्या भृताः सम्यग्भूः प्रशास्ता ससागरा ।
मूर्ध्नि स्थितममित्राणां जीवतामेव संजय ॥ १८
दत्ता दाया यथाशक्ति मित्राणां च प्रियं कृतम् ।
अमित्रा बाधिताः सर्वे को नु स्वन्ततरो मया ॥ १९
यातानि परराष्ट्राणि नृपा भुक्ताश्च दासवत् ।
प्रियेभ्यः प्रकृतं साधु को नु स्वन्ततरो मया ॥ २०
मानिता बान्धवाः सर्वे मान्यः संपूजितो जनः ।
त्रितयं सेवितं सर्वं को नु स्वन्ततरो मया ॥ २१
आज्ञप्तं नृपमुख्येषु मानः प्राप्तः सुदुर्लभः ।
आजानेयैस्तथा यातं को नु स्वन्ततरो मया ॥ २२
अधीतं विधिवद्दत्तं प्राप्तमायुर्निरामयम् ।
स्वधर्मेण जिता लोकाः को नु स्वन्ततरो मया ॥ २३
दिष्ट्या नाहं जितः संख्ये परान्प्रेष्यवदाश्रितः ।
दिष्ट्या मे विपुला लक्ष्मीर्मृते त्वन्यं गता विभो ॥ २४
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुतिष्ठताम् ।
निधनं तन्मया प्राप्तं को नु स्वन्ततरो मया ॥ २५
दिष्ट्या नाहं परावृत्तो वैरात्प्राकृतवज्जितः ।
दिष्ट्या न विमतिं कांचिद्भजित्वा तु पराजितः ॥ २६
सुप्तं वाथ प्रमत्तं वा यथा हन्याद्विषेण वा ।
एवं व्युत्क्रान्तधर्मेण व्युत्क्रम्य समयं हतः ॥ २७
अश्वत्थामा महाभागः कृतवर्मा च सात्वतः ।

कृपः शारद्वतश्चैव वक्तव्या वचनान्मम ॥ २८
अधर्मेण प्रवृत्तानां पाण्डवानामनेकशः ।
विश्वासं समयघ्नानां न यूयं गन्तुमर्हथ ॥ २९
वातिकांश्चाब्रवीद्राजा पुत्रस्ते सत्यविक्रमः ।
अधर्माद्भीमसेनेन निहतोऽहं यथा रणे ॥ ३०
सोऽहं द्रोणं स्वर्गगतं शल्यकर्णावुभौ तथा ।
वृषसेनं महावीर्यं शकुनिं चापि सौबलम् ॥ ३१
जलसंधं महावीर्यं भगदत्तं च पार्थिवम् ।
सौमदत्तिं महेष्वासं सैन्धवं च जयद्रथम् ॥ ३२
दुःशासनपुरोगांश्च भ्रातॄनात्मसमांस्तथा ।
दौःशासनिं च विक्रान्तं लक्ष्मणं चात्मजावुभौ ॥ ३३
एतांश्चान्यांश्च सुबहून्मदीयांश्च सहस्रशः ।
पृष्ठतोऽनुगमिष्यामि सार्थहीन इवाध्वगः ॥ ३४
कथं भ्रातॄन्हताञ्श्रुत्वा भर्तारं च स्वसा मम ।
रोरूयमाणा दुःखार्ता दुःशला सा भविष्यति ॥ ३५
स्नुषाभिः प्रस्नुषाभिश्च वृद्धो राजा पिता मम ।
गान्धारीसहितः क्रोशन्कां गतिं प्रतिपत्स्यते ॥ ३६
नूनं लक्ष्मणमातापि हतपुत्रा हतेश्वरा ।
विनाशं यास्यति क्षिप्रं कल्याणी पृथुलोचना ॥ ३७
यदि जानाति चार्वाकः परिव्राड्वाग्विशारदः ।
करिष्यति महाभागो ध्रुवं सोऽपचितिं मम ॥ ३८
समन्तपञ्चके पुण्ये त्रिषु लोकेषु विश्रुते ।
अहं निधनमासाद्य लोकान्प्राप्स्यामि शाश्वतान् ॥ ३९
ततो जनसहस्राणि बाष्पपूर्णानि मारिष ।
प्रलापं नृपतेः श्रुत्वा विद्रवन्ति दिशो दश ॥ ४०
ससागरवना घोरा पृथिवी सचराचरा ।
चचालाथ सनिर्ह्रादा दिशश्चैवाविलाभवन् ॥ ४१
ते द्रोणपुत्रमासाद्य यथावृत्तं न्यवेदयन् ।
व्यवहारं गदायुद्धे पार्थिवस्य च घातनम् ॥ ४२
तदाख्याय ततः सर्वे द्रोणपुत्रस्य भारत ।
ध्यात्वा च सुचिरं कालं जग्मुरार्ता यथागतम् ॥ ४३

इति श्रीमहाभारते शल्यपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

संजय उवाच ।

वातिकानां सकाशात्तु श्रुत्वा दुर्योधनं हतम् ।
हतशिष्टास्ततो राजन्कौरवाणां महारथाः ॥ १
विनिर्भिन्नाः शितैर्बाणैर्गदातोमरशक्तिभिः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
त्वरिता जवनैरश्वैरायोधनमुपागमन् ॥ २
तत्रापश्यन्महात्मानं धार्तराष्ट्रं निपातितम् ।
प्रभग्नं वायुवेगेन महाशालं यथा वने ॥ ३
भूमौ विचेष्टमानं तं रुधिरेण समुक्षितम् ।
महागजमिवारण्ये व्याधेन विनिपातितम् ॥ ४
विवर्तमानं बहुशो रुधिरौघपरिप्लुतम् ।
यदृच्छया निपतितं चक्रमादित्यगोचरम् ॥ ५
महावातसमुत्थेन संशुष्कमिव सागरम् ।
पूर्णचन्द्रमिव व्योम्नि तुषारावृतमण्डलम् ॥ ६
रेणुध्वस्तं दीर्घभुजं मातङ्गसमविक्रमम् ।
वृतं भूतगणैर्घोरैः क्रव्यादैश्च समन्ततः ।
यथा धनं लिप्समानैर्भृत्यैर्नृपतिसत्तमम् ॥ ७
भ्रुकुटीकृतवक्त्रान्तं क्रोधादुद्वृत्तचक्षुषम् ।
सामर्षं तं नरव्याघ्रं व्याघ्रं निपतितं यथा ॥ ८
ते तु दृष्ट्वा महेष्वासा भूतले पतितं नृपम् ।
मोहमभ्यागमन्सर्वे कृपप्रभृतयो रथाः ॥ ९
अवतीर्य रथेभ्यस्तु प्राद्रवन्राजसंनिधौ ।
दुर्योधनं च संप्रेक्ष्य सर्वे भूमावुपाविशन् ॥ १०
ततो द्रौणिर्महाराज बाष्पपूर्णेक्षणः श्वसन् ।
उवाच भरतश्रेष्ठं सर्वलोकेश्वरेश्वरम् ॥ ११

न नूनं विद्यतेऽसह्यं मानुष्ये किंचिदेव हि ।
यत्र त्वं पुरुषव्याघ्र शेषे पांसुषु रूषितः ॥ १२
भूत्वा हि नृपतिः पूर्वं समाज्ञाप्य च मेदिनीम् ।
कथमेकोऽद्य राजेन्द्र तिष्ठसे निर्जने वने ॥ १३
दुःशासनं न पश्यामि नापि कर्णं महारथम् ।
नापि तान्सुहृदः सर्वान्किमिदं भरतर्षभ ॥ १४
दुःखं नूनं कृतान्तस्य गतिं ज्ञातुं कथंचन ।
लोकानां च भवान्यत्र शेषे पांसुषु रूषितः ॥ १५
एष मूर्धावसिक्तानामग्रे गत्वा परंतपः ।
सतृणं ग्रसते पांसुं पश्य कालस्य पर्ययम् ॥ १६
क ते तदमलं छत्रं व्यजनं क च पार्थिव ।
सा च ते महती सेना क गता पार्थिवोत्तम ॥ १७
दुर्विज्ञेया गतिर्नूनं कार्याणां कारणान्तरे ।
यद्वै लोकगुरुर्भूत्वा भवानेतां दशां गतः ॥ १८
अध्रुवा सर्वमर्त्येषु ध्रुवं श्रीरुपलक्ष्यते ।
भवतो व्यसनं दृष्ट्वा शक्रविस्पर्धिनो भृशम् ॥ १९
तस्य तद्वचनं श्रुत्वा दुःखितस्य विशेषतः ।
उवाच राजन्पुत्रस्ते प्राप्तकालमिदं वचः ॥ २०
विमृज्य नेत्रे पाणिभ्यां शोकजं बाष्पमुत्सृजन् ।
कृपादींस्स तदा वीरान्सर्वानेव नराधिपः ॥ २१
ईदृशो मर्त्यधर्मोऽयं धात्रा निर्दिष्ट उच्यते ।
विनाशः सर्वभूतानां कालपर्यायकारितः ॥ २२
सोऽयं मां समनुप्राप्तः प्रत्यक्षं भवतां हि यः ।
पृथिवीं पालयित्वाहमेतां निष्ठामुपागतः ॥ २३
दिष्ट्या नाहं परावृत्तो युद्धे कस्यांचिदापदि ।
दिष्ट्याहं निहतः पापैश्छलेनैव विशेषतः ॥ २४
उत्साहश्च कृतो नित्यं मया दिष्ट्या युयुत्सता ।
दिष्ट्या चास्मि हतो युद्धे निहतज्ञातिबान्धवः ॥ २५
दिष्ट्या च वोऽहं पश्यामि मुक्तानस्माज्जनक्षयात् ।
स्वस्तियुक्तांश्च कल्यांश्च तन्मे प्रियमनुत्तमम् ॥ २६
मा भवन्तोऽनुतप्यन्तां सौहृदान्निधनेन मे ।
यदि वेदाः प्रमाणं वो जिता लोका मयाक्षयाः ॥ २७
मन्यमानः प्रभावं च कृष्णस्यामिततेजसः ।
तेन न च्यावितश्चाहं क्षत्रधर्मात्स्वनुष्ठितात् ॥ २८
स मया समनुप्राप्तो नास्मि शोच्यः कथंचन ।
कृतं भवद्भिः सदृशमनुरूपमिवात्मनः ।
यतितं विजये नित्यं दैवं तु दुरतिक्रमम् ॥ २९
एतावदुक्त्वा वचनं बाष्पव्याकुललोचनः ।
तूष्णीं बभूव राजेन्द्र रुजासौ विह्वलो भृशम् ॥ ३०
तथा तु दृष्ट्वा राजानं बाष्पशोकसमन्वितम् ।
द्रौणिः क्रोधेन जज्वाल यथा वह्निर्जगत्क्षये ॥ ३१
स तु क्रोधसमाविष्टः पाणौ पाणिं निपीड्य च ।
बाष्पविह्वलया वाचा राजानमिदमब्रवीत् ॥ ३२
पिता मे निहतः क्षुद्रैः सुनृशंसेन कर्मणा ।
न तथा तेन तप्यामि यथा राजंस्त्वयाद्य वै ॥ ३३
शृणु चेदं वचो मह्यं सत्येन वदतः प्रभो ।
इष्टापूर्तेन दानेन धर्मेण सुकृतेन च ॥ ३४
अद्याहं सर्वपाञ्चालान्वासुदेवस्य पश्यतः ।
सर्वोपायैर्हि नेष्यामि प्रेतराजनिवेशनम् ।
अनुज्ञां तु महाराज भवान्मे दातुमर्हति ॥ ३५
इति श्रुत्वा तु वचनं द्रोणपुत्रस्य कौरवः ।
मनसः प्रीतिजननं कृपं वचनमब्रवीत् ।
आचार्य शीघ्रं कलशं जलपूर्णं समानय ॥ ३६
स तद्वचनमाज्ञाय राज्ञो ब्राह्मणसत्तमः ।
कलशं पूर्णमादाय राज्ञोऽन्तिकमुपागमत् ॥ ३७
तमब्रवीन्महाराज पुत्रस्तव विशां पते ।
ममाज्ञया द्विजश्रेष्ठ द्रोणपुत्रोऽभिषिच्यताम् ।
सेनापत्येन भद्रं ते मम चेदिच्छसि प्रियम् ॥ ३८
राज्ञो नियोगाद्योद्धव्यं ब्राह्मणेन विशेषतः ।
वर्तता क्षत्रधर्मेण ह्येवं धर्मविदो विदुः ॥ ३९

राज्ञस्तु वचनं श्रुत्वा कृपः शारद्वतस्ततः ।
द्रौणिं राज्ञो नियोगेन सेनापत्येऽभ्यषेचयत् ।। ४०
सोऽभिषिक्तो महाराज परिष्वज्य नृपोत्तमम् ।
प्रययौ सिंहनादेन दिशः सर्वा विनादयन् ।। ४१
दुर्योधनोऽपि राजेन्द्र शोणितौघपरिप्लुतः ।
तां निशां प्रतिपेदेऽथ सर्वभूतभयावहाम् ।। ४२
अपक्रम्य तु ते तूर्णं तस्मादायोधनान्नृप ।
शोकसंविग्नमनसश्चिन्ताध्यानपराभवन् ।। ४३

इति श्रीमहाभारते शल्यपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥
॥ समाप्तं गदायुद्धपर्व ॥

॥ समाप्तं शल्यपर्व ॥

१०

सौप्तिकपर्व

संजय उवाच ।

ततस्ते सहिता वीराः प्रयाता दक्षिणामुखाः ।
उपास्तमयवेलायां शिबिराभ्याशमागताः ॥ १
विमुच्य वाहांस्त्वरिता भीताः समभवंस्तदा ।
गहनं देशमासाद्य प्रच्छन्ना न्यविशन्त ते ॥ २
सेनानिवेशमभितो नातिदूरमवस्थिताः ।
निकृत्ता निशितैः शस्त्रैः समन्तात्क्षतविक्षताः ॥ ३
दीर्घमुष्णं च निःश्वस्य पाण्डवानन्वचिन्तयन् ।
श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणाम् ॥ ४
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः ।
ते मुहूर्तं ततो गत्वा श्रान्तवाहाः पिपासिताः ॥ ५
नामृष्यन्त महेष्वासाः क्रोधामर्षवशं गताः ।
राज्ञो वधेन संतप्ता मुहूर्तं समवस्थिताः ॥ ६

धृतराष्ट्र उवाच ।

अश्रद्धेयमिदं कर्म कृतं भीमेन संजय ।
यत्स नागायुतप्राणः पुत्रो मम निपातितः ॥ ७
अवध्यः सर्वभूतानां वज्रसंहननो युवा ।
पाण्डवैः समरे पुत्रो निहतो मम संजय ॥ ८
न दिष्टमभ्यतिक्रान्तुं शक्यं गावल्गणे नरैः ।
यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः ॥ ९
अद्रिसारमयं नूनं हृदयं मम संजय ।
हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा ॥ १०
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति ।
न ह्यहं पाण्डवेयस्य विषये वस्तुमुत्सहे ॥ ११
कथं राज्ञः पिता भूत्वा स्वयं राजा च संजय ।
प्रेष्यभूतः प्रवर्तेयं पाण्डवेयस्य शासनात् ॥ १२
आज्ञाप्य पृथिवीं सर्वां स्थित्वा मूर्ध्नि च संजय ।
कथमद्य भविष्यामि प्रेष्यभूतो दुरन्तकृत् ॥ १३
कथं भीमस्य वाक्यानि श्रोतुं शक्ष्यामि संजय ।
येन पुत्रशतं पूर्णमेकेन निहतं मम ॥ १४
कृतं सत्यं वचस्तस्य विदुरस्य महात्मनः ।
अकुर्वता वचस्तेन मम पुत्रेण संजय ॥ १५
अधर्मेण हते तात पुत्रे दुर्योधने मम ।
कृतवर्मा कृपो द्रौणिः किमकुर्वत संजय ॥ १६

संजय उवाच ।

गत्वा तु तावका राजन्नातिदूरमवस्थिताः ।
अपश्यन्त वनं घोरं नानाद्रुमलताकुलम् ॥ १७
ते मुहूर्तं तु विश्रम्य लब्धतोयैर्हयोत्तमैः ।
सूर्यास्तमयवेलायामासेदुः सुमहद्वनम् ॥ १८
नानामृगगणैर्जुष्टं नानापक्षिसमाकुलम् ।
नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितम् ॥ १९
नानातोयसमाकीर्णं तडागैरुपशोभितम् ।
पद्मिनीशतसंछन्नं नीलोत्पलसमायुतम् ॥ २०
प्रविश्य तद्वनं घोरं वीक्षमाणाः समन्ततः ।
शाखासहस्रसंछन्नं न्यग्रोधं ददृशुस्ततः ॥ २१
उपेत्य तु तदा राजन्न्यग्रोधं ते महारथाः ।

ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिम् ॥ २२
तेऽवतीर्य रथेभ्यस्तु विप्रमुच्य च वाजिनः ।
उपस्पृश्य यथान्यायं संध्यामन्वासत प्रभो ॥ २३
ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
सर्वस्य जगतो धात्री शर्वरी समपद्यत ॥ २४
ग्रहनक्षत्रताराभिः प्रकीर्णाभिरलंकृतम् ।
नभोंऽशुकमिवाभाति प्रेक्षणीयं समन्ततः ॥ २५
ईषच्चापि प्रवल्गन्ति ये सत्त्वा रात्रिचारिणः ।
दिवाचराश्च ये सत्त्वास्ते निद्रावशमागताः ॥ २६
रात्रिचराणां सत्त्वानां निनादोऽभूत्सुदारुणः ।
क्रव्यादाश्च प्रमुदिता घोरा प्राप्ता च शर्वरी ॥ २७
तस्मिन्रात्रिमुखे घोरे दुःखशोकसमन्विताः ।
कृतवर्मा कृपो द्रौणिरुपोपविविशुः समम् ॥ २८
तत्रोपविष्टाः शोचन्तो न्यग्रोधस्य समन्ततः ।
तमेवार्थमतिक्रान्तं कुरुपाण्डवयोः क्षयम् ॥ २९
निद्रया च परीताङ्गा निषेदुर्धरणीतले ।
श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः ॥ ३०
ततो निद्रावशं प्राप्तौ कृपभोजौ महारथौ ।
सुखोचितावदुःखार्हौ निषण्णौ धरणीतले ।
तौ तु सुप्तौ महाराज श्रमशोकसमन्वितौ ॥ ३१
क्रोधामर्षवशं प्राप्तो द्रोणपुत्रस्तु भारत ।
नैव स्म स जगामाथ निद्रां सर्प इव श्वसन् ॥ ३२
न लेभे स तु निद्रां वै दह्यमानोऽतिमन्युना ।
वीक्षांचक्रे महाबाहुस्तद्वनं घोरदर्शनम् ॥ ३३
वीक्षमाणो वनोद्देशं नानासत्त्वैर्निषेवितम् ।
अपश्यत महाबाहुर्न्यग्रोधं वायसायुतम् ॥ ३४
तत्र काकसहस्राणि तां निशां पर्यणामयन् ।
सुखं स्वपन्तः कौरव्य पृथक्पृथगपाश्रयाः ॥ ३५
सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः ।
सोऽपश्यत्सहसायान्तमुलूकं घोरदर्शनम् ॥ ३६
महास्वनं महाकायं हर्यक्षं बभ्रुपिङ्गलम् ।
सुदीर्घघोणानखरं सुपर्णमिव वेगिनम् ॥ ३७
सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः ।
न्यग्रोधस्य ततः शाखां प्रार्थयामास भारत ॥ ३८
संनिपत्य तु शाखायां न्यग्रोधस्य विहंगमः ।
सुप्ताञ्जघान सुबहून्वायसान्वायसान्तकः ॥ ३९
केषांचिदच्छिनत्पक्षाञ्शिरांसि च चकर्त ह ।
चरणांश्चैव केषांचिद्बभञ्ज चरणायुधः ॥ ४०
क्षणेनाहन्स बलवान्येऽस्य दृष्टिपथे स्थिताः ।
तेषां शरीरावयवैः शरीरैश्च विशां पते ।
न्यग्रोधमण्डलं सर्वं संछन्नं सर्वतोऽभवत् ॥ ४१
तांस्तु हत्वा ततः काकान्कौशिको मुदितोऽभवत् ।
प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदनः ॥ ४२
तद्दृष्ट्वा सोपधं कर्म कौशिकेन कृतं निशि ।
तद्भावकृतसंकल्पो द्रौणिरेको व्यचिन्तयत् ॥ ४३
उपदेशः कृतोऽनेन पक्षिणा मम संयुगे ।
शत्रूणां क्षपणे युक्तः प्राप्तकालश्च मे मतः ॥ ४४
नाद्य शक्या मया हन्तुं पाण्डवा जितकाशिनः ।
बलवन्तः कृतोत्साहा लब्धलक्षाः प्रहारिणः ।
राज्ञः सकाशे तेषां च प्रतिज्ञातो वधो मया ॥४५
पतंगाग्निसमां वृत्तिमास्थायात्मविनाशिनीम् ।
न्यायतो युध्यमानस्य प्राणत्यागो न संशयः ।
छद्मना तु भवेत्सिद्धिः शत्रूणां च क्षयो महान् ॥ ४६
तत्र संशयितादर्थाद्योऽर्थो निःसंशयो भवेत् ।
तं जना बहु मन्यन्ते येऽर्थशास्त्रविशारदाः ॥ ४७
यच्चाप्यत्र भवेद्वाच्यं गर्हितं लोकनिन्दितम् ।
कर्तव्यं तन्मनुष्येण क्षत्रधर्मेण वर्तता ॥ ४८
निन्दितानि च सर्वाणि कुत्सितानि पदे पदे ।
सोपधानि कृतान्येव पाण्डवैरकृतात्मभिः ॥ ४९
अस्मिन्नर्थे पुरा गीतौ श्रूयेते धर्मचिन्तकैः ।

श्लोकौ न्यायमवेक्षद्भिस्तत्त्वार्थं तत्त्वदर्शिभिः ॥५०
परिश्रान्ते विदीर्णे च भुञ्जाने चापि शत्रुभिः ।
प्रस्थाने च प्रवेशे च प्रहर्तव्यं रिपोर्बलम् ॥ ५१
निद्रार्तमर्धरात्रे च तथा नष्टप्रणायकम् ।
भिन्नयोधं बलं यच्च द्विधा युक्तं च यद्भवेत् ॥ ५२
इत्येवं निश्चयं चक्रे सुप्तानां युधि मारणे ।
पाण्डूनां सह पाञ्चालैर्द्रोणपुत्रः प्रतापवान् ॥ ५३
स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः ।
सुप्तौ प्राबोधयत्तौ तु मातुलं भोजमेव च ॥ ५४
नोत्तरं प्रतिपेदे च तत्र युक्तं ह्रिया वृतः ।
स मुहूर्तमिव ध्यात्वा बाष्पविह्वलमब्रवीत् ॥ ५५
हतो दुर्योधनो राजा एकवीरो महाबलः ।
यस्यार्थे वैरमस्माभिरासक्तं पाण्डवैः सह ॥ ५६
एकाकी बहुभिः क्षुद्रैराहवे शुद्धविक्रमः ।
पातितो भीमसेनेन एकादशचमूपतिः ॥ ५७
वृकोदरेण क्षुद्रेण सुनृशंसमिदं कृतम् ।
मूर्धाभिषिक्तस्य शिरः पादेन परिमृद्नता ॥ ५८
विनर्दन्ति स्म पाञ्चालाः क्ष्वेडन्ति च हसन्ति च ।
धमन्ति शङ्खाञ्शतशो हृष्टा घ्नन्ति च दुन्दुभीन् ॥५९
वादित्रघोषस्तुमुलो विमिश्रः शङ्खनिस्वनैः ।
अनिलेनेरितो घोरो दिशः पूरयतीव हि ॥ ६०
अश्वानां हेषमाणानां गजानां चैव बृंहताम् ।
सिंहनादश्च शूराणां श्रूयते सुमहानयम् ॥ ६१
दिशं प्राचीं समाश्रित्य हृष्टानां गर्जतां भृशम् ।
रथनेमिस्वनाश्चैव श्रूयन्ते लोमहर्षणाः ॥ ६२
पाण्डवैर्धार्तराष्ट्राणां यदिदं कदनं कृतम् ।
वयमेव त्रयः शिष्टास्तस्मिन्महति वैशसे ॥ ६३
केचिन्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः ।
निहताः पाण्डवेयैः स्म मन्ये कालस्य पर्ययम् ॥६४
एवमेतेन भाव्यं हि नूनं कार्येण तत्त्वतः ।
यथा ह्यस्येदृशी निष्ठा कृते कार्येऽपि दुष्करे ॥ ६५
भवतोस्तु यदि प्रज्ञा न मोहादपचीयते ।
व्यापन्नेऽस्मिन्महत्यर्थे यन्नः श्रेयस्तदुच्यताम् ॥ ६६

इति श्रीमहाभारते सौप्तिकपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

कृप उवाच ।

श्रुतं ते वचनं सर्वं हेतुयुक्तं मया विभो ।
ममापि तु वचः किंचिच्छृणुष्वाद्य महाभुज ॥ १
आबद्धा मानुषाः सर्वे निर्बन्धाः कर्मणोर्द्वयोः ।
दैवे पुरुषकारे च परं ताभ्यां न विद्यते ॥ २
न हि दैवेन सिध्यन्ति कर्माण्येकेन सत्तम ।
न चापि कर्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः ॥ ३
ताभ्यामुभाभ्यां सर्वार्था निबद्धा ह्यधमोत्तमाः ।
प्रवृत्ताश्चैव दृश्यन्ते निवृत्ताश्चैव सर्वशः ॥ ४
पर्जन्यः पर्वते वर्षन्किं नु साधयते फलम् ।
कृष्टे क्षेत्रे तथावर्षन्किं नु साधयते फलम् ॥ ५
उत्थानं चाप्यदैवस्य ह्यनुत्थानस्य दैवतम् ।
व्यर्थं भवति सर्वत्र पूर्वं कस्तत्र निश्चयः ॥ ६
प्रवृष्टे च यथा देवे सम्यक्क्षेत्रे च कर्षिते ।
बीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी ॥ ७
तयोर्दैवं विनिश्चित्य स्ववशेनैव वर्तते ।
प्राज्ञाः पुरुषकारं तु घटन्ते दाक्ष्यमाश्रिताः ॥ ८
ताभ्यां सर्वे हि कार्यार्था मनुष्याणां नरर्षभ ।
विचेष्टन्तश्च दृश्यन्ते निवृत्ताश्च तथैव हि ॥ ९
कृतः पुरुषकारः सन्सोऽपि दैवेन सिध्यति ।
तथास्य कर्मणः कर्तुरभिनिर्वर्तते फलम् ॥ १०
उत्थानं तु मनुष्याणां दक्षाणां दैववर्जितम् ।
अफलं दृश्यते लोके सम्यगप्युपपादितम् ॥ ११
तत्रालसा मनुष्याणां ये भवन्त्यमनस्विनः ।

उत्थानं ते विगर्हन्ति प्राज्ञानां तन्न रोचते ॥ १२
प्रायशो हि कृतं कर्म अफलं दृश्यते भुवि ।
अकृत्वा च पुनर्दुःखं कर्म दृश्येन्महाफलम् ॥ १३
चेष्टामकुर्वँल्लभते यदि किंचिद्यदृच्छया ।
यो वा न लभते कृत्वा दुर्दशौ तावुभावपि ॥ १४
शक्नोति जीवितुं दक्षो नालसः सुखमेधते ।
दृश्यन्ते जीवलोकेऽस्मिन्दक्षाः प्रायो हितैषिणः ॥१५
यदि दक्षः समारम्भात्कर्मणां नाश्नुते फलम् ।
नास्य वाच्यं भवेत्किंचित्तत्त्वं चाप्यधिगच्छति ॥१६
अकृत्वा कर्म यो लोके फलं विन्दति विष्ठितः ।
स तु वक्तव्यतां याति द्वेष्यो भवति प्रायशः ॥ १७
एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा ।
स करोत्यात्मनोऽनर्थान्नैष बुद्धिमतां नयः ॥ १८
हीनं पुरुषकारेण यदा दैवेन वा पुनः ।
कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् ।
हीनं पुरुषकारेण कर्म त्विह न सिध्यति ॥ १९
दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्सम्यगीहते ।
दक्षो दाक्षिण्यसंपन्नो न स मोघं विहन्यते ॥ २०
सम्यगीहा पुनरियं यो वृद्धानुपसेवते ।
आपृच्छति च यच्छ्रेयः करोति च हितं वचः ॥२१
उत्थायोत्थाय हि सदा प्रष्टव्या वृद्धसंमताः ।
तेऽस्य योगे परं मूलं तन्मूला सिद्धिरुच्यते ॥ २२
वृद्धानां वचनं श्रुत्वा यो ह्युत्थानं प्रयोजयेत् ।
उत्थानस्य फलं सम्यक्तदा स लभतेऽचिरात् ॥२३
रागात्क्रोधाद्भयाल्लोभाद्योऽर्थानीहेत मानवः ।
अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः ॥ २४
सोऽयं दुर्योधनेनार्थो लुब्धेनादीर्घदर्शिना ।
असमर्थ्य समारब्धो मूढत्वादविचिन्तितः ॥ २५
हितबुद्धीननादृत्य संमन्त्र्यासाधुभिः सह ।
वार्यमाणोऽकरोद्वैरं पाण्डवैर्गुणवत्तरैः ॥ २६
पूर्वमप्यतिदुःशीलो न दैन्यं कर्तुमर्हति ।
तपत्यर्थे विपन्ने हि मित्राणामकृतं वचः ॥ २७
अन्वावर्तामहि वयं यत्तु तं पापपूरुषम् ।
अस्मानप्यनयस्तस्मात्प्राप्तोऽयं दारुणो महान् ॥ २
अनेन तु ममाद्यापि व्यसनेनोपतापिता ।
बुद्धिश्चिन्तयतः किंचित्स्वं श्रेयो नावबुध्यते ॥ २
मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो बुधाः ।
ते च पृष्टा यथा ब्रूयुस्तत्कर्तव्यं तथा भवेत् ॥ ३
ते वयं धृतराष्ट्रं च गान्धारीं च समेत्य ह ।
उपपृच्छामहे गत्वा विदुरं च महामतिम् ॥ ३१
ते पृष्टाश्च वदेयुर्यच्छ्रेयो नः समनन्तरम् ।
तदस्माभिः पुनः कार्यमिति मे नैष्ठिकी मतिः ॥३
अनारम्भात्तु कार्याणां नार्थः संपद्यते क्वचित् ।
कृते पुरुषकारे च येषां कार्यं न सिध्यति ।
दैवेनोपहतास्ते तु नात्र कार्या विचारणा ॥ ३३

इति श्रीमहाभारते सौप्तिकपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

संजय उवाच ।

कृपस्य वचनं श्रुत्वा धर्मार्थसहितं शुभम् ।
अश्वत्थामा महाराज दुःखशोकसमन्वितः ॥ १
दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा ।
क्रूरं मनस्ततः कृत्वा तावुभौ प्रत्यभाषत ॥ २
पुरुषे पुरुषे बुद्धिः सा सा भवति शोभना ।
तुष्यन्ति च पृथक्सर्वे प्रज्ञया ते स्वया स्वया ॥
सर्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरम् ।
सर्वस्यात्मा बहुमतः सर्वात्मानं प्रशंसति ॥ ४
सर्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता ।
परबुद्धिं च निन्दन्ति स्वां प्रशंसन्ति चासकृत् ॥
कारणान्तरयोगेन योगे येषां समा मतिः ।

तेऽन्योन्येन च तुष्यन्ति बहु मन्यन्ति चासकृत् ॥ ६
तस्यैव तु मनुष्यस्य सा सा बुद्धिस्तदा तदा ।
कालयोगविपर्यासं प्राप्यान्योन्यं विपद्यते ॥ ७
अचिन्त्यत्वाद्धि चित्तानां मनुष्याणां विशेषतः ।
चित्तवैकल्यमासाद्य सा सा बुद्धिः प्रजायते ॥ ८
यथा हि वैद्यः कुशलो ज्ञात्वा व्याधिं यथाविधि ।
भेषजं कुरुते योगात्प्रशमार्थमिहाभिभो ॥ ९
एवं कार्यस्य योगार्थं बुद्धिं कुर्वन्ति मानवाः ।
प्रज्ञया हि स्वया युक्तास्तां च निन्दन्ति मानवाः ॥ १०
अन्यया यौवने मर्त्यो बुद्ध्या भवति मोहितः ।
मध्येऽन्यया जरायां तु सोऽन्यां रोचयते मतिम् ॥ ११
व्यसनं वा पुनर्घोरं समृद्धिं वापि तादृशीम् ।
अवाप्य पुरुषो भोज कुरुते बुद्धिवैकृतम् ॥ १२
एकस्मिन्नेव पुरुषे सा सा बुद्धिस्तदा तदा ।
भवत्यनित्यप्रज्ञत्वात्सा तस्यैव न रोचते ॥ १३
निश्चित्य तु यथाप्रज्ञं यां मतिं साधु पश्यति ।
तस्यां प्रकुरुते भावं सा तस्योद्योगकारिका ॥ १४
सर्वो हि पुरुषो भोज साध्वेतदिति निश्चितः ।
कर्तुमारभते प्रीतो मरणादिषु कर्मसु ॥ १५
सर्वे हि युक्तिं विज्ञाय प्रज्ञां चापि स्वकां नराः ।
चेष्टन्ते विविधाश्चेष्टा हितमित्येव जानते ॥ १६
उपजाता व्यसनजा येयमद्य मतिर्मम ।
युवयोस्तां प्रवक्ष्यामि मम शोकविनाशिनीम् ॥ १७
प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च ।
वर्णे वर्णे समाधत्त एकैकं गुणवत्तरम् ॥ १८
ब्राह्मणे दममव्यग्रं क्षत्रिये तेज उत्तमम् ।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ॥ १९
अदान्तो ब्राह्मणोऽसाधुर्निस्तेजाः क्षत्रियोऽधमः ।
अदक्षो निन्द्यते वैश्यः शूद्रश्च प्रतिकूलवान् ॥ २०
सोऽस्मि जातः कुले श्रेष्ठे ब्राह्मणानां सुपूजिते ।
मन्दभाग्यतयास्म्येतं क्षत्रधर्ममनुष्ठितः ॥ २१
क्षत्रधर्मं विदित्वाहं यदि ब्राह्मण्यसंश्रितम् ।
प्रकुर्यां सुमहत्कर्म न मे तत्साधु संमतम् ॥ २२
धारयित्वा धनुर्दिव्यं दिव्यान्यस्त्राणि चाहवे ।
पितरं निहतं दृष्ट्वा किं नु वक्ष्यामि संसदि ॥ २३
सोऽहमद्य यथाकामं क्षत्रधर्ममुपास्य तम् ।
गन्तास्मि पदवीं राज्ञः पितुश्चापि महाद्युतेः ॥ २४
अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जितकाशिनः ।
विमुक्तयुग्यकवचा हर्षेण च समन्विताः ।
वयं जिता मताश्चैषां श्रान्ता व्यायमनेन च ॥ २५
तेषां निशि प्रसुप्तानां स्वस्थानां शिबिरे स्वके ।
अवस्कन्दं करिष्यामि शिबिरस्याद्य दुष्करम् ॥ २६
तानवस्कन्द्य शिबिरे प्रेतभूतान्विचेतसः ।
सूदयिष्यामि विक्रम्य मघवानिव दानवान् ॥ २७
अद्य तान्सहितान्सर्वान्धृष्टद्युम्नपुरोगमान् ।
सूदयिष्यामि विक्रम्य कक्षं दीप्त इवानलः ।
निहत्य चैव पाञ्चालाञ्शान्तिं लब्धास्मि सत्तम ॥ २८
पाञ्चालेषु चरिष्यामि सूदयन्नद्य संयुगे ।
पिनाकपाणिः संक्रुद्धः स्वयं रुद्रः पशुष्विव ॥ २९
अद्याहं सर्वपाञ्चालान्निहत्य च निकृत्य च ।
अर्दयिष्यामि संक्रुद्धो रणे पाण्डुसुतांस्तथा ॥ ३०
अद्याहं सर्वपाञ्चालैः कृत्वा भूमिं शरीरिणीम् ।
प्रहृत्यैकैकशस्तेभ्यो भविष्याम्यनृणः पितुः ॥ ३१
दुर्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि ।
गमयिष्यामि पाञ्चालान्पदवीमद्य दुर्गमाम् ॥ ३२
अद्य पाञ्चालराजस्य धृष्टद्युम्नस्य वै निशि ।
विरात्रे प्रमथिष्यामि पशोरिव शिरो बलात् ॥ ३३
अद्य पाञ्चालपाण्डूनां शयितानात्मजान्निशि ।
खड्गेन निशितेनाजौ प्रमथिष्यामि गौतम ॥ ३४
अद्य पाञ्चालसेनां तां निहत्य निशि सौप्तिके ।

कृतकृत्यः सुखी चैव भविष्यामि महामते ॥ ३५

इति श्रीमहाभारते सौप्तिकपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

कृप उवाच ।

दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत ।
न त्वा वारयितुं शक्तो वज्रपाणिरपि स्वयम् ॥ १
अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ ।
अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः ॥ २
अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः ।
परानभिमुखं यान्तं रथावास्थाय दंशितौ ॥ ३
आवाभ्यां सहितः शत्रूञ्श्वोऽसि हन्ता समागमे ।
विक्रम्य रथिनां श्रेष्ठ पाञ्चालान्सपदानुगान् ॥ ४
शक्तस्त्वमसि विक्रान्तुं विश्रमस्व निशामिमाम् ।
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमाम् ॥ ५
विश्रान्तश्च विनिद्रश्च स्वस्थचित्तश्च मानद ।
समेत्य समरे शत्रून्वधिष्यसि न संशयः ॥ ६
न हि त्वा रथिनां श्रेष्ठ प्रगृहीतवरायुधम् ।
जेतुमुत्सहते कश्चिदपि देवेषु पावकिः ॥ ७
कृपेण सहितं यान्तं युक्तं च कृतवर्मणा ।
को द्रौणिं युधि संरब्धं योधयेदपि देवराट् ॥ ८
ते वयं परिविश्रान्ता विनिद्रा विगतज्वराः ।
प्रभातायां रजन्यां वै निहनिष्याम शात्रवान् ॥ ९
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः ।
सात्वतोऽपि महेष्वासो नित्यं युद्धेषु कोविदः ॥१०
ते वयं सहितास्तात सर्वाञ्शत्रून्समागतान् ।
प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलाम् ।
विश्रमस्व त्वमव्यग्रः स्वप चेमां निशां सुखम् ॥ ११
अहं च कृतवर्मा च प्रयान्तं त्वां नरोत्तम ।
अनुयास्याव सहितौ धन्विनौ परतापिनौ ।
रथिनं त्वरया यान्तं रथावास्थाय दंशितौ ॥ १२
स गत्वा शिबिरं तेषां नाम विश्राव्य चाहवे ।
ततः कर्तासि शत्रूणां युध्यतां कदनं महत् ॥ १३
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि ।
विहरस्व यथा शक्रः सूदयित्वा महासुरान् ॥ १४
त्वं हि शक्तो रणे जेतुं पाञ्चालानां वरूथिनीम् ।
दैत्यसेनामिव क्रुद्धः सर्वदानवसूदनः ॥ १५
मया त्वां सहितं संख्ये गुप्तं च कृतवर्मणा ।
न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयम् ॥ १६
न चाहं समरे तात कृतवर्मा तथैव च ।
अनिर्जित्य रणे पाण्डून्व्यपयास्याव कर्हिचित् ॥१७
हत्वा च समरे क्षुद्रान्पाञ्चालान्पाण्डुभिः सह ।
निवर्तिष्यामहे सर्वे हता वा स्वर्गगा वयम् ॥ १८
सर्वोपायैः सहायास्ते प्रभाते वयमेव हि ।
सत्यमेतन्महाबाहो प्रब्रवीमि तवानघ ॥ १९
एवमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः ।
अब्रवीन्मातुलं राजन्क्रोधादुद्वृत्य लोचने ॥ २०
आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च ।
अर्थांश्चिन्तयतश्चापि कामयानस्य वा पुनः ॥ २१
तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ।
यस्य भागश्चतुर्थो मे स्वप्नमह्नाय नाशयेत् ॥ २२
किं नाम दुःखं लोकेऽस्मिन्पितुर्वधमनुस्मरन् ।
हृदयं निर्दहन्मेऽद्य रात्र्यहानि न शाम्यति ॥ २३
यथा च निहतः पापैः पिता मम विशेषतः ।
प्रत्यक्षमपि ते सर्वं तन्मे मर्माणि कृन्तति ॥ २४
कथं हि मादृशो लोके मुहूर्तमपि जीवति ।
द्रोणो हतेति यद्वाचः पाञ्चालानां शृणोम्यहम् ॥२५
धृष्टद्युम्नमहत्वाजौ नाहं जीवितुमुत्सहे ।
स मे पितृवधाद्वध्यः पाञ्चाला ये च संगताः ॥२६
विलापो भग्नसक्थस्य यस्तु राज्ञो मया श्रुतः ।

स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् ॥ २७
कस्य ह्यकरुणस्यापि नेत्राभ्यामश्रु नाव्रजेत् ।
नृपतेर्भग्नसक्थस्य श्रुत्वा तादृग्वचः पुनः ॥ २८
यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः ।
शोकं मे वर्धयत्येष वारिवेग इवार्णवम् ।
एकाग्रमनसो मेऽद्य कुतो निद्रा कुतः सुखम् ॥२९
वासुदेवार्जुनाभ्यां हि तानहं परिरक्षितान् ।
अविषह्यतमान्मन्ये महेन्द्रेणापि मातुल ॥ ३०
न चास्मि शक्यः संयन्तुमस्मात्कार्यात्कथंचन ।
न तं पश्यामि लोकेऽस्मिन्यो मां कार्यान्निवर्तयेत् ।
इति मे निश्चिता बुद्धिरेषा साधुमता च मे ॥३१
वार्तिकैः कथ्यमानस्तु मित्राणां मे पराभवः ।
पाण्डवानां च विजयो हृदयं दहतीव मे ॥ ३२
अहं तु कदनं कृत्वा शत्रूणामद्य सौप्तिके ।
ततो विश्रमिता चैव स्वप्ता च विगतज्वरः ॥ ३३

इति श्रीमहाभारते सौप्तिकपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

कृप उवाच ।

शुश्रूषुरपि दुर्मेधाः पुरुषोऽनियतेन्द्रियः ।
नालं वेदयितुं कृत्स्नौ धर्मार्थाविति मे मतिः ॥ १
तथैव तावन्मेधावी विनयं यो न शिक्षति ।
न च किंचन जानाति सोऽपि धर्मार्थनिश्चयम् ॥२
शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः ।
जानीयादागमान्सर्वान्ग्राह्यं च न विरोधयेत् ॥ ३
अनेयस्त्ववमानी यो दुरात्मा पापपूरुषः ।
दिष्टमुत्सृज्य कल्याणं करोति बहुपापकम् ॥ ४
नाथवन्तं तु सुहृदः प्रतिषेधन्ति पातकात् ।
निवर्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्तते ॥ ५
यथा ह्युच्चावचैर्वाक्यैः क्षिप्तचित्तो नियम्यते ।
तथैव सुहृदा शक्यो नशक्यस्त्ववसीदति ॥ ६
तथैव सुहृदं प्राज्ञं कुर्वाणं कर्म पापकम् ।
प्राज्ञाः संप्रतिषेधन्ते यथाशक्ति पुनः पुनः ॥ ७
स कल्याणे मतिं कृत्वा नियम्यात्मानमात्मना ।
कुरु मे वचनं तात येन पश्चान्न तप्यसे ॥ ८
न वधः पूज्यते लोके सुप्तानामिह धर्मतः ।
तथैव न्यस्तशस्त्राणां विमुक्तरथवाजिनाम् ॥ ९
ये च ब्रूयुस्तवास्मीति ये च स्युः शरणागताः ।
विमुक्तमूर्धजा ये च ये चापि हतवाहनाः ॥ १०
अद्य स्वप्स्यन्ति पाञ्चाला विमुक्तकवचा विभो ।
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः ॥ ११
यस्तेषां तदवस्थानां द्रुह्येत पुरुषोऽनृजुः ।
व्यक्तं स नरके मज्जेदगाधे विपुलेऽप्लवे ॥ १२
सर्वास्त्रविदुषां लोके श्रेष्ठस्त्वमसि विश्रुतः ।
न च ते जातु लोकेऽस्मिन्सुसूक्ष्ममपि किल्बिषम् ॥
त्वं पुनः सूर्यसंकाशः श्वोभूत उदिते रवौ ।
प्रकाशे सर्वभूतानां विजेता युधि शात्रवान् ॥ १४
असंभावितरूपं हि त्वयि कर्म विगर्हितम् ।
शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्मम ॥ १५

अश्वत्थामोवाच ।

एवमेतद्यथात्थ त्वमनुशास्मीह मातुल ।
तैस्तु पूर्वमयं सेतुः शतधा विदलीकृतः ॥ १६
प्रत्यक्षं भूमिपालानां भवतां चापि संनिधौ ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ १७
कर्णश्च पतिते चक्रे रथस्य रथिनां वरः ।
उत्तमे व्यसने सन्नो हतो गाण्डीवधन्वना ॥ १८
तथा शांतनवो भीष्मो न्यस्तशस्त्रो निरायुधः ।
शिखण्डिनं पुरस्कृत्य हतो गाण्डीवधन्वना ॥ १९
भूरिश्रवा महेष्वासस्तथा प्रायगतो रणे ।
क्रोशतां भूमिपालानां युयुधानेन पातितः ॥ २०

दुर्योधनश्च भीमेन समेत्य गदया मृधे ।
पश्यतां भूमिपालानामधर्मेण निपातितः ॥ २१
एकाकी बहुभिस्तत्र परिवार्य महारथैः ।
अधर्मेण नरव्याघ्रो भीमसेनेन पातितः ॥ २२
विलापो भग्नसक्थस्य यो मे राज्ञः परिश्रुतः ।
वार्त्तिकानां कथयतां स मे मर्माणि कृन्तति ॥ २३
एवमधार्मिकाः पापाः पाञ्चाला भिन्नसेतवः ।
तानेवं भिन्नमर्यादान्किं भवान्न विगर्हति ॥ २४
पितृहन्तॄनहं हत्वा पाञ्चालान्निशि सौप्तिके ।
कामं कीटः पतंगो वा जन्म प्राप्य भवामि वै ॥२५
त्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखम् ॥ २६
न स जातः पुमाँल्लोके कश्चिन्न च भविष्यति ।
यो मे व्यावर्तयेदेतां वधे तेषां कृतां मतिम् ॥ २७

संजय उवाच ।

एवमुक्त्वा महाराज द्रोणपुत्रः प्रतापवान् ।
एकान्ते योजयित्वाश्वान्प्रायादभिमुखः परान् ॥ २८
तमब्रूतां महात्मानौ भोजशारद्वतावुभौ ।
किमयं स्यन्दनो युक्तः किं च कार्यं चिकीर्षितम् ॥२९
एकसार्थं प्रयातौ स्वस्त्वया सह नरर्षभ ।
समदुःखसुखौ चैव नावां शङ्कितुमर्हसि ॥ ३०
अश्वत्थामा तु संक्रुद्धः पितुर्वधमनुस्मरन् ।
ताभ्यां तथ्यं तदाचख्यौ यदस्यात्मचिकीर्षितम् ॥३१
हत्वा शतसहस्राणि योधानां निशितैः शरैः ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ३२
तं तथैव हनिष्यामि न्यस्तवर्माणमद्य वै ।
पुत्रं पाञ्चालराजस्य पापं पापेन कर्मणा ॥ ३३
कथं च निहतः पापः पाञ्चालः पशुवन्मया ।
शस्त्राहवजितां लोकान्प्राप्नुयादिति मे मतिः ॥ ३४
क्षिप्रं संनद्धकवचौ सखड्गावात्तकार्मुकौ ।
समास्थाय प्रतीक्षेतां रथवर्यौ परंतपौ ॥ ३५
इत्युक्त्वा रथमास्थाय प्रायादभिमुखः परान् ।
तमन्वगात्कृपो राजन्कृतवर्मा च सात्वतः ॥ ३६
ते प्रयाता व्यरोचन्त परानभिमुखास्त्रयः ।
हूयमाना यथा यज्ञे समिद्धा हव्यवाहनाः ॥ ३७
ययुश्च शिबिरं तेषां संप्रसुप्तजनं विभो ।
द्वारदेशं तु संप्राप्य द्रौणिस्तस्थौ रथोत्तमे ॥ ३८

इति महाभारते सौप्तिकपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

धृतराष्ट्र उवाच ।

द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ ।
अकुर्वतां भोजकृपौ किं संजय वदस्व मे ॥ १

संजय उवाच ।

कृतवर्माणमामन्त्र्य कृपं च स महारथम् ।
द्रौणिर्मन्युपरीतात्मा शिबिरद्वारमासदत् ॥ २
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिम् ।
सोऽपश्यद्द्वारमावृत्य तिष्ठन्तं लोमहर्षणम् ॥ ३
वसानं चर्म वैयाघ्रं महारुधिरविस्रवम् ।
कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनम् ॥ ४
बाहुभिः स्वायतैः पीनैर्नानाप्रहरणोद्यतैः ।
बद्धाङ्गदमहासर्पं ज्वालामालाकुलाननम् ॥ ५
दंष्ट्राकरालवदनं व्यादितास्यं भयावहम् ।
नयनानां सहस्रैश्च विचित्रैरभिभूषितम् ॥ ६
नैव तस्य वपुः शक्यं प्रवक्तुं वेष एव वा ।
सर्वथा तु तदालक्ष्य स्फुटेयुरपि पर्वताः ॥ ७
तस्यास्यान्नासिकाभ्यां च श्रवणाभ्यां च सर्वशः ।
तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन्महार्चिषः ॥ ८
तथा तेजोमरीचिभ्यः शङ्खचक्रगदाधराः ।

प्रादुरासन्हृषीकेशाः शतशोऽथ सहस्रशः ॥ ९
तदत्यद्भुतमालोक्य भूतं लोकभयंकरम् ।
द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत् ॥ १०
द्रौणिमुक्ताञ्शरांस्तांस्तु तद्भूतं महदग्रसत् ।
उदधेरिव वार्योघान्पावको वडवामुखः ॥ ११
अश्वत्थामा तु संप्रेक्ष्य ताञ्शरौघान्निरर्थकान् ।
रथशक्तिं मुमोचास्मै दीप्तामग्निशिखामिव ॥ १२
सा तदाहत्य दीप्ताग्रा रथशक्तिरशीर्यत ।
युगान्ते सूर्यमाहत्य महोल्केव दिवश्च्युता ॥ १३
अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसम् ।
कोशात्समुद्बबर्हाशु बिलाद्दीप्तमिवोरगम् ॥ १४
ततः खड्गवरं धीमान्भूताय प्राहिणोत्तदा ।
स तदासाद्य भूतं वै विलयं तूलवद्ययौ ॥ १५
ततः स कुपितो द्रौणिरिन्द्रकेतुनिभां गदाम् ।
ज्वलन्तीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत् ॥ १६
ततः सर्वायुधाभावे वीक्षमाणस्ततस्ततः ।
अपश्यत्कृतमाकाशमनाकाशं जनार्दनैः ॥ १७
तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः ।
अब्रवीदभिसंतप्तः कृपवाक्यमनुस्मरन् ॥ १८
ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः ।
स शोचत्यापदं प्राप्य यथाहमतिवर्त्य तौ ॥ १९
शास्त्रदृष्टानवध्यान्यः समतीत्य जिघांसति ।
स पथः प्रच्युतो धर्म्यात्कुपथं प्रतिपद्यते ॥ २०
गोब्राह्मणनृपस्त्रीषु सख्युर्मातुर्गुरोस्तथा ।
वृद्धबालजडान्धेषु सुप्तभीतोत्थितेषु च ॥ २१
मत्तोन्मत्तप्रमत्तेषु न शस्त्राण्युपधारयेत् ।
इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा ॥ २२
सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनम् ।
अमार्गेणैवमारभ्य घोरामापदमागतः ॥ २३
तां चापदं घोरतरां प्रवदन्ति मनीषिणः ।
यदुद्यम्य महत्कृत्यं भयादपि निवर्तते ॥ २४
अशक्यं चैव कः कर्तुं शक्तः शक्तिबलादिह ।
न हि दैवाद्गरीयो वै मानुषं कर्म कथ्यते ॥ २५
मानुषं कुर्वतः कर्म यदि दैवान्न सिध्यति ।
स पथः प्रच्युतो धर्म्याद्विपदं प्रतिपद्यते ॥ २६
प्रतिघातं ह्यविज्ञातं प्रवदन्ति मनीषिणः ।
यदारभ्य क्रियां कांचिद्भयादिह निवर्तते ॥ २७
तदिदं दुष्प्रणीतेन भयं मां समुपस्थितम् ।
न हि द्रोणसुतः संख्ये निवर्तेत कथंचन ॥ २८
इदं च सुमहद्भूतं दैवदण्डमिवोद्यतम् ।
न चैतदभिजानामि चिन्तयन्नपि सर्वथा ॥ २९
ध्रुवं येयमधर्मे मे प्रवृत्ता कलुषा मतिः ।
तस्याः फलमिदं घोरं प्रतिघाताय दृश्यते ॥ ३०
तदिदं दैवविहितं मम संख्ये निवर्तनम् ।
नान्यत्र दैवादुद्यन्तुमिह शक्यं कथंचन ॥ ३१
सोऽहमद्य महादेवं प्रपद्ये शरणं प्रभुम् ।
दैवदण्डमिमं घोरं स हि मे नाशयिष्यति ॥ ३२
कपर्दिनं प्रपद्याथ देवदेवमुमापतिम् ।
कपालमालिनं रुद्रं भगनेत्रहरं हरम् ॥ ३३
स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च ।
तस्माच्छरणमभ्येष्ये गिरिशं शूलपाणिनम् ॥ ३४

इति श्रीमहाभारते सौप्तिकपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

संजय उवाच ।

स एवं चिन्तयित्वा तु द्रोणपुत्रो विशां पते ।
अवतीर्य रथोपस्थाद्दध्यौ संप्रयतः स्थितः ॥ १

द्रौणिरुवाच ।

उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरम् ।
गिरिशं वरदं देवं भवं भावनमव्ययम् ॥ २

शितिकण्ठमजं शक्रं क्रथं क्रतुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३
श्मशानवासिनं दृप्तं महागणपतिं प्रभुम् ।
खट्वाङ्गधारिणं मुण्डं जटिलं ब्रह्मचारिणम् ॥ ४
मनसाप्यसुचिन्त्येन दुष्करेणाल्पचेतसा ।
सोऽहमात्मोपहारेण यक्ष्ये त्रिपुरघातिनम् ॥ ५
स्तुतं स्तुत्यं स्तूयमानममोघं चर्मवाससम् ।
विलोहितं नीलकण्ठमपृक्तं दुर्निवारणम् ॥ ६
शुक्रं विश्वसृजं ब्रह्म ब्रह्मचारिणमेव च ।
व्रतवन्तं तपोनित्यमनन्तं तपतां गतिम् ॥ ७
बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियम् ।
गणाध्यक्षेक्षितमुखं गौरीहृदयवल्लभम् ॥ ८
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम् ।
तनुवाससमत्युग्रमुमाभूषणतत्परम् ॥ ९
परं परेभ्यः परमं परं यस्मान्न विद्यते ।
इष्वस्त्रोत्तमभर्तारं दिगन्तं चैव दक्षिणम् ॥ १०
हिरण्यकवचं देवं चन्द्रमौलिविभूषितम् ।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ ११
इमां चाप्यापदं घोरां तराम्यद्य सुदुस्तराम् ।
सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् ॥ १२
इति तस्य व्यवसितं ज्ञात्वा त्यागात्मकं मनः ।
पुरस्तात्काञ्चनी वेदिः प्रादुरासीन्महात्मनः ॥ १३
तस्यां वेद्यां तदा राजंश्चित्रभानुरजायत ।
द्यां दिशो विदिशः खं च ज्वालाभिरभिपूरयन् ॥ १४
दीप्तास्यनयनाश्चात्र नैकपादशिरोभुजाः ।
द्विपशैलप्रतीकाशाः प्रादुरासन्महाननाः ॥ १५
श्ववराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः ।
ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा ॥ १६
काकवक्त्राः प्लवमुखाः शुकवक्त्रास्तथैव च ।
महाजगरवक्त्राश्च हंसवक्त्राः सितप्रभाः ॥ १७
दार्वाघाटमुखाश्चैव चाषवक्त्राश्च भारत ।
कूर्मनक्रमुखाश्चैव शिशुमारमुखास्तथा ॥ १८
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च ।
हरिवक्त्राः क्रौञ्चमुखाः कपोतेभमुखास्तथा ॥ १९
पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ।
पाणिकर्णाः सहस्राक्षास्तथैव च शतोदराः ॥ २०
निर्मांसाः कोकवक्त्राश्च श्येनवक्त्राश्च भारत ।
तथैवाशिरसो राजनृक्षवक्त्राश्च भीषणाः ॥ २१
प्रदीप्तनेत्रजिह्वाश्च ज्वालावक्त्रास्तथैव च ।
मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप ॥ २२
शङ्खाभाः शङ्खवक्त्राश्च शङ्खकर्णास्तथैव च ।
शङ्खमालापरिकराः शङ्खध्वनिसमस्वनाः ॥ २३
जटाधराः पञ्चशिखास्तथा मुण्डाः कृशोदराः ।
चतुर्दंष्ट्राश्चतुर्जिह्वाः शङ्कुकर्णाः किरीटिनः ॥ २४
मौलीधराश्च राजेन्द्र तथाकुञ्चितमूर्धजाः ।
उष्णीषिणो मुकुटिनश्चारुवक्त्राः स्वलंकृताः ॥ २५
पद्मोत्पलापीडधरास्तथा कुमुदधारिणः ।
माहात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः ॥ २६
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
भुशुण्डीपाशहस्ताश्च गदाहस्ताश्च भारत ॥ २७
पृष्ठेषु बद्धेषुधयश्चित्रबाणा रणोत्कटाः ।
सध्वजाः सपताकाश्च सघण्टाः सपरश्वधाः ॥ २८
महापाशोद्यतकरास्तथा लगुडपाणयः ।
स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः ।
महासर्पाङ्गदधराश्चित्राभरणधारिणः ॥ २९
रजोध्वस्ताः पङ्कदिग्धाः सर्वे शुक्लाम्बरस्रजः ।
नीलाङ्गाः कमलाङ्गाश्च मुण्डवक्त्रास्तथैव च ॥ ३०
भेरीशङ्खमृदङ्गांस्ते झर्झरानकगोमुखान् ।
अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः ॥ ३१
गायमानास्तथैवान्ये नृत्यमानास्तथापरे ।

गायन्तः प्लवन्तश्च वल्गन्तश्च महाबलाः ॥ ३२
धावन्तो जवनाश्चण्डाः पवनोद्धूतमूर्धजाः ।
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः ३३
सुभीमा घोररूपाश्च शूलपट्टिशपाणयः ।
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः ॥ ३४
रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ।
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः ॥ ३५
पातारोऽसृग्वसाद्यानां मांसान्त्रकृतभोजनाः ।
चूडालाः कर्णिकालाश्च प्रकृशाः पिठरोदराः ॥ ३६
अतिह्रस्वातिदीर्घाश्च प्रबलाश्चातिभैरवाः ।
विकटाः काललम्बोष्ठा बृहच्छेफास्थिपिण्डिकाः ॥ ३७
महार्हनानामुकुटा मुण्डाश्च जटिलाः परे ।
सार्केन्दुग्रहनक्षत्रां द्यां कुर्युर्ये महीतले ॥ ३८
उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्विधम् ।
ये च वीतभया नित्यं हरस्य भ्रुकुटीभटाः ॥ ३९
कामकारकराः सिद्धास्त्रैलोक्यस्येश्वरेश्वराः ।
नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः ॥ ४०
प्राप्याष्टगुणमैश्वर्यं ये न यान्ति च विस्मयम ।
येषां विस्मयते नित्यं भगवान्कर्मभिर्हरः ॥ ४१
मनोवाक्कर्मभिर्भक्तैर्नित्यमाराधितश्च यैः ।
मनोवाक्कर्मभिर्भक्तान्पाति पुत्रानिवौरसान् ॥ ४२
पिबन्तोऽसृग्वसास्त्वन्ये क्रुद्धा ब्रह्मद्विषां सदा ।
चतुर्विंशात्मकं सोमं ये पिबन्ति च नित्यदा ॥ ४३
श्रुतेन ब्रह्मचर्येण तपसा च दमेन च ।
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः ॥ ४४
यैरात्मभूतैर्भगवान्पार्वत्या च महेश्वरः ।
सह भूतगणान्भुङ्क्ते भूतभव्यभवत्प्रभुः ॥ ४५
नानाविचित्रहसितक्ष्वेडितोत्कुष्टगर्जितैः ।
संनादयन्तस्ते विश्वमश्वत्थामानमभ्ययुः ॥ ४६
संस्तुवन्तो महादेवं भाः कुर्वाणाः सुवर्चसः ।
विवर्धयिषवो द्रौणेर्महिमानं महात्मनः ॥ ४७
जिज्ञासमानास्तत्तेजः सौप्तिकं च दिदृक्षवः ।
भीमोग्रपरिघालातशूलपट्टिशपाणयः ।
घोररूपाः समाजग्मुर्भूतसंघाः समन्ततः ॥ ४८
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात् ।
तान्प्रेक्षमाणोऽपि व्यथां न चकार महाबलः ॥ ४९
अथ द्रौणिर्धनुष्पाणिर्बद्धगोधाङ्गुलित्रवान् ।
स्वयमेवात्मनात्मानमुपहारमुपाहरत् ॥ ५०
धनूंषि समिधस्तत्र पवित्राणि शिताः शराः ।
हविरात्मवतश्चात्मा तस्मिन्भारत कर्मणि ॥ ५१
ततः सौम्येन मन्त्रेण द्रोणपुत्रः प्रतापवान् ।
उपहारं महामन्युरथात्मानमुपाहरत् ॥ ५२
तं रुद्रं रौद्रकर्माणं रौद्रैः कर्मभिरच्युतम् ।
अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः ॥ ५३
इममात्मानमद्याहं जातमाङ्गिरसे कुले ।
अग्नौ जुहोमि भगवन्प्रतिगृह्णीष्व मां बलिम् ॥ ५४
भवद्भक्त्या महादेव परमेण समाधिना ।
अस्यामापदि विश्वात्मन्नुपाकुर्मि तवाग्रतः ॥ ५५
त्वयि सर्वाणि भूतानि सर्वभूतेषु चासि वै ।
गुणानां हि प्रधानानामेकत्वं त्वयि तिष्ठति ॥ ५६
सर्वभूताशय विभो हविर्भूतमुपस्थितम् ।
प्रतिगृहाण मां देव यद्यशक्याः परे मया ॥ ५७
इत्युक्त्वा द्रौणिरास्थाय तां वेदीं दीप्तपावकाम् ।
संत्यक्तात्मा समारुह्य कृष्णवर्त्मन्युपाविशत् ॥ ५८
तमूर्ध्वबाहुं निश्चेष्टं दृष्ट्वा हविरुपस्थितम् ।
अब्रवीद्भगवान्साक्षान्महादेवो हसन्निव ॥ ५९
सत्यशौचार्जवत्यागैस्तपसा नियमेन च ।
क्षान्त्या भक्त्या च धृत्या च बुद्ध्या च वचसा तथा ॥
यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ॥ ६१

कुर्वता तस्य संमानं त्वां च जिज्ञासता मया ।
पाञ्चालाः सहसा गुप्ता मायाश्च बहुशः कृताः ॥६२
कृतस्तस्यैष संमानः पाञ्चालान्रक्षता मया ।
अभिभूतास्तु कालेन नैषामद्यास्ति जीवितम् ॥६३
एवमुक्त्वा महेष्वासं भगवानात्मनस्तनुम् ।
आविवेश ददौ चास्मै विमलं खड्गमुत्तमम् ॥ ६४
अथाविष्टो भगवता भूयो जज्वाल तेजसा ।
वर्ष्मवांश्चाभवद्युद्धे देवसृष्टेन तेजसा ॥ ६५
तमदृश्यानि भूतानि रक्षांसि च समाद्रवन् ।
अभितः शत्रुशिबिरं यान्तं साक्षादिवेश्वरम् ॥ ६६

इति श्रीमहाभारते सौप्तिकपर्वणि

सप्तमोऽध्यायः ॥ ७ ॥

८

धृतराष्ट्र उवाच ।

तथा प्रयाते शिबिरं द्रोणपुत्रे महारथे ।
कच्चित्कृपश्च भोजश्च भयार्तौ न न्यवर्तताम् ॥ १
कच्चिन्न वारितौ क्षुद्रै रक्षिभिर्नोपलक्षितौ ।
असह्यमिति वा मत्वा न निवृत्तौ महारथौ ॥ २
कच्चित्प्रमथ्य शिबिरं हत्वा सोमकपाण्डवान् ।
दुर्योधनस्य पदवीं गतौ परमिकां रणे ॥ ३
पाञ्चालैर्वा विनिहतौ कच्चिन्नास्वपतां क्षितौ ।
कच्चित्ताभ्यां कृतं कर्म तन्ममाचक्ष्व संजय ॥ ४

संजय उवाच ।

तस्मिन्प्रयाते शिबिरं द्रोणपुत्रे महात्मनि ।
कृपश्च कृतवर्मा च शिबिरद्वार्यतिष्ठताम् ॥ ५
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ ।
प्रहृष्टः शनकै राजन्निदं वचनमब्रवीत् ॥ ६
यत्तौ भवन्तौ पर्याप्तौ सर्वक्षत्रस्य नाशने ।
किं पुनर्योधशेषस्य प्रसुप्तस्य विशेषतः ॥ ७
अहं प्रवेक्ष्ये शिबिरं चरिष्यामि च कालवत् ।
यथा न कश्चिदपि मे जीवन्मुच्येत मानवः ॥ ८
इत्युक्त्वा प्राविशद्द्रौणिः पार्थानां शिबिरं महत् ।
अद्वारेणाभ्यवस्कन्द्य विहाय भयमात्मनः ॥ ९
स प्रविश्य महाबाहुरुद्देशज्ञश्च तस्य ह ।
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत् ॥ १०
ते तु कृत्वा महत्कर्म श्रान्ताश्च बलवद्रणे ।
प्रसुप्ता वै सुविश्वस्ताः स्वसैन्यपरिवारिताः ॥ ११
अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत ।
पाञ्चाल्यं शयने द्रौणिरपश्यत्सुप्तमन्तिकात् ॥ १२
क्षौमावदाते महति स्पर्ध्यास्तरणसंवृते ।
माल्यप्रवरसंयुक्ते धूपैश्चूर्णैश्च वासिते ॥ १३
तं शयानं महात्मानं विस्रब्धमकुतोभयम् ।
प्राबोधयत पादेन शयनस्थं महीपते ॥ १४
स बुद्ध्वा चरणस्पर्शमुत्थाय रणदुर्मदः ।
अभ्यजानदमेयात्मा द्रोणपुत्रं महारथम् ॥ १५
तमुत्पतन्तं शयनादश्वत्थामा महाबलः ।
केशेष्वालम्ब्य पाणिभ्यां निष्पिपेष महीतले ॥१६
स बलात्तेन निष्पिष्टः साध्वसेन च भारत ।
निद्रया चैव पाञ्चाल्यो नाशकच्चेष्टितुं तदा ॥ १७
तमाक्रम्य पदा राजन्कण्ठे चोरसि चोभयोः ।
नदन्तं विस्फुरन्तं च पशुमारममारयत् ॥ १८
तुदन्नखैस्तु स द्रौणिं नातिव्यक्तमुदाहरत् ।
आचार्यपुत्र शस्त्रेण जहि मा मा चिरं कृथाः ।
त्वत्कृते सुकृताँल्लोकान्गच्छेयं द्विपदां वर ॥ १९
तस्याव्यक्तां तु तां वाचं संश्रुत्य द्रौणिरब्रवीत् ।
आचार्यघातिनां लोका न सन्ति कुलपांसन ।
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्मते ॥ २०
एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपम् ।
मर्मस्वभ्यवधीत्क्रुद्धः पादाष्ठीलैः सुदारुणैः ॥ २१

तस्य वीरस्य शब्देन मार्यमाणस्य वेश्मनि ।
अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः ॥ २२
ते दृष्ट्वा वर्ष्मवन्तं तमतिमानुषविक्रमम् ।
भूतमेव व्यवस्यन्तो न स्म प्रव्याहरन्भयात् ॥ २३
तं तु तेनाभ्युपायेन गमयित्वा यमक्षयम् ।
अध्यतिष्ठत्स तेजस्वी रथं प्राप्य सुदर्शनम् ॥ २४
स तस्य भवनाद्राजन्निष्क्रम्यानादयन्दिशः ।
रथेन शिबिरं प्रायाज्जिघांसुर्द्विषतो बली ॥ २५
अपक्रान्ते ततस्तस्मिन्द्रोणपुत्रे महारथे ।
सह तै रक्षिभिः सर्वैः प्रणेदुर्योषितस्तदा ॥ २६
राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः ।
व्याक्रोशन्क्षत्रियाः सर्वे धृष्टद्युम्नस्य भारत ॥ २७
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः ।
क्षिप्रं च समनह्यन्त किमेतदिति चाब्रुवन् ॥ २८
स्त्रियस्तु राजन्वित्रस्ता भारद्वाजं निरीक्ष्य तम् ।
अब्रुवन्दीनकण्ठेन क्षिप्रमाद्रवतेति वै ॥ २९
राक्षसो वा मनुष्यो वा नैनं जानीमहे वयम् ।
हत्वा पाञ्चालराजं यो रथमारुह्य तिष्ठति ॥ ३०
ततस्ते योधमुख्यास्तं सहसा पर्यवारयन् ।
स तानापततः सर्वान्रुद्रास्त्रेण व्यपोथयत् ॥ ३१
धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ।
अपश्यच्छयने सुप्तमुत्तमौजसमन्तिके ॥ ३२
तमप्याक्रम्य पादेन कण्ठे चोरसि चौजसा ।
तथैव मारयामास विनर्दन्तमरिंदमम् ॥ ३३
युधामन्युस्तु संप्राप्तो मत्वा तं रक्षसा हतम् ।
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् ॥ ३४
तमभिद्रुत्य जग्राह क्षितौ चैनमपातयत् ।
विस्फुरन्तं च पशुवत्तथैवैनममारयत् ॥ ३५
तथा स वीरो हत्वा तं ततोऽन्यान्समुपाद्रवत् ।
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् ।
स्फुरतो वेपमानांश्च शमितेव पशून्मखे ॥ ३६
ततो निस्त्रिंशमादाय जघानान्यान्पृथग्जनान् ।
भागशो विचरन्मार्गानसियुद्धविशारदः ॥ ३७
तथैव गुल्मे संप्रेक्ष्य शयानान्मध्यगौल्मिकान् ।
श्रान्तान्न्यस्तायुधान्सर्वान्क्षणेनैव व्यपोथयत् ॥ ३८
योधानश्वान्द्विपांश्चैव प्राच्छिनत्स वरासिना ।
रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः ॥ ३९
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च ।
आक्षेपेण तथैवासेस्त्रिधा रक्तोक्षितोऽभवत् ॥ ४०
तस्य लोहितसिक्तस्य दीप्तखड्गस्य युध्यतः ।
अमानुष इवाकारो बभौ परमभीषणः ॥ ४१
ये त्वजाग्रत कौरव्य तेऽपि शब्देन मोहिताः ।
निरीक्ष्यमाणा अन्योन्यं द्रौणिं दृष्ट्वा प्रविव्यथुः ॥ ४२
तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्शनाः ।
राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ॥ ४३
स घोररूपो व्यचरत्कालवच्छिबिरे ततः ।
अपश्यद्द्रौपदीपुत्रानवशिष्टांश्च सोमकान् ॥ ४४
तेन शब्देन वित्रस्ता धनुर्हस्ता महारथाः ।
धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशां पते ।
अवाकिरञ्शरव्रातैर्भारद्वाजमभीतवत् ॥ ४५
ततस्तेन निनादेन संप्रबुद्धाः प्रभद्रकाः ।
शिलीमुखैः शिखण्डी च द्रोणपुत्रं समार्दयन् ॥ ४६
भारद्वाजस्तु तान्दृष्ट्वा शरवर्षाणि वर्षतः ।
ननाद बलवन्नादं जिघांसुस्तान्सुदुर्जयान् ॥ ४७
ततः परमसंक्रुद्धः पितुर्वधमनुस्मरन् ।
अवरुह्य रथोपस्थात्त्वरमाणोऽभिदुद्रुवे ॥ ४८
सहस्रचन्द्रं विपुलं गृहीत्वा चर्म संयुगे ।
खड्गं च विपुलं दिव्यं जातरूपपरिष्कृतम् ।
द्रौपदेयानभिद्रुत्य खड्गेन व्यचरद्बली ॥ ४९
ततः स नरशार्दूलः प्रतिविन्ध्यं तमाहवे ।

कुक्षिदेशेऽवधीद्राजन्स हतो न्यपतद्भुवि ॥ ५०
प्रासेन विद्ध्वा द्रौणिं तु सुतसोमः प्रतापवान् ।
पुनश्चासिं समुद्यम्य द्रोणपुत्रमुपाद्रवत् ॥ ५१
सुतसोमस्य सासिं तु बाहुं छित्त्वा नरर्षभः ।
पुनरभ्यहनत्पार्श्वे स भिन्नहृदयोऽपतत् ॥ ५२
नाकुलिस्तु शतानीको रथचक्रेण वीर्यवान् ।
दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत् ॥ ५३
अताडयच्छतानीकं मुक्तचक्रं द्विजस्तु सः ।
स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः ॥५४
श्रुतकर्मा तु परिघं गृहीत्वा समताडयत् ।
अभिद्रुत्य ततो द्रौणिं सव्ये स फलके भृशम् ॥ ५५
स तु तं श्रुतकर्माणमास्ये जघ्ने वरासिना ।
स हतो न्यपतद्भूमौ विमूढो विकृताननः ॥ ५६
तेन शब्देन वीरस्तु श्रुतकीर्तिर्महाधनुः ।
अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ॥ ५७
तस्यापि शरवर्षाणि चर्मणा प्रतिवार्य सः ।
सकुण्डलं शिरः कायाद्भ्राजमानमपाहरत् ॥ ५८
ततो भीष्मनिहन्ता तं सह सर्वैः प्रभद्रकैः ।
अहनत्सर्वतो वीरं नानाप्रहरणैर्बली ।
शिलीमुखेन चाप्येनं भ्रुवोर्मध्ये समार्दयत् ॥ ५९
स तु क्रोधसमाविष्टो द्रोणपुत्रो महाबलः ।
शिखण्डिनं समासाद्य द्विधा चिच्छेद सोऽसिना॥
शिखण्डिनं ततो हत्वा क्रोधाविष्टः परंतपः ।
प्रभद्रकगणान्सर्वानभिदुद्राव वेगवान् ।
यच्च शिष्टं विराटस्य बलं तच्च समाद्रवत् ॥ ६१
द्रुपदस्य च पुत्राणां पौत्राणां सुहृदामपि ।
चकार कदनं घोरं दृष्ट्वा दृष्ट्वा महाबलः ॥ ६२
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च ।
न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ॥ ६३
कालीं रक्तास्यनयनां रक्तमाल्यानुलेपनाम् ।
रक्ताम्बरधरामेकां पाशहस्तां शिखण्डिनीम् ॥ ६४
ददृशुः कालरात्रिं ते स्मयमानामवस्थिताम् ।
नराश्वकुञ्जरान्पाशैर्बद्ध्वा घोरैः प्रतस्थुषीम् ।
हरन्तीं विविधान्प्रेतान्पाशबद्धान्विमूर्धजान् ॥ ६५
स्वप्ने सुप्तान्नयन्तीं तां रात्रिष्वन्यासु मारिष ।
ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिं च नित्यदा ॥ ६६
यतः प्रवृत्तः संग्रामः कुरुपाण्डवसेनयोः ।
ततःप्रभृति तां कृत्यामपश्यन्द्रौणिमेव च ॥ ६७
तांस्तु दैवहतान्पूर्वं पश्चाद्द्रौणिर्न्यपातयत् ।
त्रासयन्सर्वभूतानि विनदन्भैरवान्रवान् ॥ ६८
तदनुस्मृत्य ते वीरा दर्शनं पौर्वकालिकम् ।
इदं तदित्यमन्यन्त दैवेनोपनिपीडिताः ॥ ६९
ततस्तेन निनादेन प्रत्यबुध्यन्त धन्विनः ।
शिबिरे पाण्डवेयानां शतशोऽथ सहस्रशः ॥ ७०
सोऽच्छिनत्कस्यचित्पादौ जघनं चैव कस्यचित् ।
कांश्चिद्बिभेद पार्श्वेषु कालसृष्ट इवान्तकः ॥ ७१
अत्युग्रप्रतिपिष्टैश्च नदद्भिश्च भृशातुरैः ।
गजाश्वमथितैश्चान्यैर्मही कीर्णाभवत्प्रभो ॥ ७२
क्रोशतां किमिदं कोऽयं किं शब्दः किं नु किं कृतम् ।
एवं तेषां तदा द्रौणिरन्तकः समपद्यत ॥ ७३
अपेतशस्त्रसंनाहान्संरब्धान्पाण्डुसृञ्जयान् ।
प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः ॥ ७४
ततस्तच्छस्त्रवित्रस्ता उत्पतन्तो भयातुराः ।
निद्रान्धा नष्टसंज्ञाश्च तत्र तत्र निलिल्यिरे ॥ ७५
ऊरुस्तम्भगृहीताश्च कश्मलाभिहतौजसः ।
विनदन्तो भृशं त्रस्ताः संन्यपेषन्परस्परम् ॥ ७६
ततो रथं पुनर्द्रौणिरास्थितो भीमनिस्वनम् ।
धनुष्पाणिः शरैरन्यान्प्रेषयद्वै यमक्षयम् ॥ ७७
पुनरुत्पततः कांश्चिद्दूरादपि नरोत्तमान् ।
शूरान्संपततश्चान्यान्कालरात्र्यै न्यवेदयत् ॥ ७८

तथैव स्यन्दनाग्रेण प्रमथन्स विधावति ।
शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ॥ ७९
पुनश्च सुविचित्रेण शतचन्द्रेण चर्मणा ।
तेन चाकाशवर्णेन तदाचरत सोऽसिना ॥ ८०
तथा स शिबिरं तेषां द्रौणिराहवदुर्मदः ।
व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः ॥ ८१
उत्पेतुस्तेन शब्देन योधा राजन्विचेतसः ।
निद्रार्ताश्च भयार्ताश्च व्यधावन्त ततस्ततः ॥ ८२
विस्वरं चक्रुशुश्चान्ये बह्वबद्धं तथावदन् ।
न च स्म प्रतिपद्यन्ते शस्त्राणि वसनानि च ॥ ८३
विमुक्तकेशाश्चाप्यन्ये नाभ्यजानन्परस्परम् ।
उत्पतन्तः परे भीताः केचित्तत्र तथाभ्रमन् ।
पुरीषमसृजन्केचित्केचिन्मूत्रं प्रसुस्रुवुः ॥ ८४
बन्धनानि च राजेन्द्र संछिद्य तुरगा द्विपाः ।
समं पर्यपतंश्चान्ये कुर्वन्तो महदाकुलम् ॥ ८५
तत्र केचिन्नरा भीता व्यलीयन्त महीतले ।
तथैव तान्निपतितानपिषन्गजवाजिनः ॥ ८६
तस्मिंस्तथा वर्तमाने रक्षांसि पुरुषर्षभ ।
हृष्टानि व्यनदन्नुच्चैर्मुदा भरतसत्तम ॥ ८७
स शब्दः प्रेरितो राजन्भूतसंघैर्मुदा युतैः ।
अपूरयद्दिशः सर्वा दिवं चापि महास्वनः ॥ ८८
तेषामार्तस्वरं श्रुत्वा वित्रस्ता गजवाजिनः ।
मुक्ताः पर्यपतन्राजन्मृद्नन्तः शिबिरे जनम् ॥ ८९
तैस्तत्र परिधावद्भिश्चरणोदीरितं रजः ।
अकरोच्छिबिरे तेषां रजन्यां द्विगुणं तमः ॥ ९०
तस्मिंस्तमसि संजाते प्रमूढाः सर्वतो जनाः ।
नाजानन्पितरः पुत्रान्भ्रातॄन्भ्रातर एव च ॥ ९१
गजा गजानतिक्रम्य निर्मनुष्या हया हयान् ।
अताडयंस्तथाभञ्जंस्तथामृद्नंश्च भारत ॥ ९२
ते भग्नाः प्रपतन्तश्च निघ्नन्तश्च परस्परम् ।
न्यपातयन्त च परान्पातयित्वा तथापिषन् ॥ ९३
विचेतसः सनिद्राश्च तमसा चावृता नराः ।
जघ्नुः स्वानेव तत्राथ कालेनाभिप्रचोदिताः ॥ ९४
त्यक्त्वा द्वाराणि च द्वाःस्थास्तथा गुल्मांश्च गौल्मिकाः ।
प्राद्रवन्त यथाशक्ति कांदिशीका विचेतसः ॥ ९५
विप्रनष्टाश्च तेऽन्योन्यं नाजानन्त तदा विभो ।
क्रोशन्तस्तात पुत्रेति दैवोपहतचेतसः ॥ ९६
पलायतां दिशस्तेषां स्वानप्युत्सृज्य बान्धवान् ।
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः ॥ ९७
हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ।
तान्बुद्ध्वा रणमत्तोऽसौ द्रोणपुत्रो व्यपोथयत् ॥ ९८
तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ।
शिबिरान्निष्पतन्ति स्म क्षत्रिया भयपीडिताः ॥ ९९
तांस्तु निष्पततस्त्रस्ताञ्शिबिराज्जीवितैषिणः ।
कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः ॥ १००
विशस्त्रयन्त्रकवचान्मुक्तकेशान्कृताञ्जलीन् ।
वेपमानान्क्षितौ भीतान्नैव कांश्चिदमुञ्चताम् ॥ १०१
नामुच्यत तयोः कश्चिन्निष्क्रान्तः शिबिराद्बहिः ।
कृपस्य च महाराज हार्दिक्यस्य च दुर्मतेः ॥ १०२
भूयश्चैव चिकीर्षन्तौ द्रोणपुत्रस्य तौ प्रियम् ।
त्रिषु देशेषु ददतुः शिबिरस्य हुताशनम् ॥ १०३
ततः प्रकाशे शिबिरे खड्गेन पितृनन्दनः ।
अश्वत्थामा महाराज व्यचरत्कृतहस्तवत् ॥ १०४
कांश्चिदापततो वीरानपरांश्च प्रधावतः ।
व्ययोजयत खड्गेन प्राणैर्द्विजवरो नरान् ॥ १०५
कांश्चिद्योधान्स खड्गेन मध्ये संछिद्य वीर्यवान् ।
अपातयद्द्रोणसुतः संरब्धस्तिलकाण्डवत् ॥ १०६
विनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः ।
पतितैरभवत्कीर्णा मेदिनी भरतर्षभ ॥ १०७
मानुषाणां सहस्रेषु हतेषु पतितेषु च ।

उदतिष्ठन्कबन्धानि बहून्युत्थाय चापतन् ॥ १०८
सायुधान्साङ्गदान्बाहून्निचकर्त शिरांसि च ।
हस्तिहस्तोपमानूरून्हस्तान्पादांश्च भारत ॥ १०९
पृष्ठच्छिन्नाञ्शिरश्छिन्नान्पार्श्वच्छिन्नांस्तथापरान् ।
समासाद्याकरोद्द्रौणिः कांश्चिच्चापि पराङ्मुखान् ॥
मध्यकायान्नरानन्यांश्चिच्छेदान्यांश्च कर्णतः ।
अंसदेशे निहत्यान्यान्काये प्रावेशयच्छिरः ॥ १११
एवं विचरतस्तस्य निघ्नतः सुबहून्नरान् ।
तमसा रजनी घोरा बभौ दारुणदर्शना ॥ ११२
किंचित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः ।
बहुना च गजाश्वेन भूरभूद्भीमदर्शना ॥ ११३
यक्षरक्षःसमाकीर्णे रथाश्वद्विपदारुणे ।
क्रुद्धेन द्रोणपुत्रेण संछिन्नाः प्रापतन्भुवि ॥ ११४
मातॄरन्ये पितॄनन्ये भ्रातॄनन्ये विचुक्रुशुः ।
केचिदूचुर्न तत्क्रुद्धैर्धार्तराष्ट्रैः कृतं रणे ॥ ११५
यत्कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्मभिः ।
असांनिध्याद्धि पार्थानामिदं नः कदनं कृतम् ॥
न देवासुरगन्धर्वैर्न यक्षैर्न च राक्षसैः ।
शक्यो विजेतुं कौन्तेयो गोप्ता यस्य जनार्दनः ॥ ११७
ब्रह्मण्यः सत्यवाग्दान्तः सर्वभूतानुकम्पकः ।
न च सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिम् ।
धावन्तं मुक्तकेशं वा हन्ति पार्थो धनंजयः ॥ ११८
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः ।
इति लालप्यमानाः स्म शेरते बहवो जनाः ॥ ११९
स्तनतां च मनुष्याणामपरेषां च कूजताम् ।
ततो मुहूर्तात्प्राशाम्यत्स शब्दस्तुमुलो महान् ॥ १२०
शोणितव्यतिषिक्तायां वसुधायां च भूमिप ।
तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत ॥ १२१
संवेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः ।
न्यपातयन्नरान्क्रुद्धः पशून्पशुपतिर्यथा ॥ १२२
अन्योन्यं संपरिष्वज्य शयानान्द्रवतोऽपरान् ।
संलीनान्युध्यमानांश्च सर्वान्द्रौणिरपोथयत् ॥ १२३
दह्यमाना हुताशेन वध्यमानाश्च तेन ते ।
परस्परं तदा योधा अनयन्यमसादनम् ॥ १२४
तस्या रजन्यास्त्वर्धेन पाण्डवानां महद्बलम् ।
गमयामास राजेन्द्र द्रौणिर्यमनिवेशनम् ॥ १२५
निशाचराणां सत्त्वानां सा रात्रिर्हर्षवर्धिनी ।
आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशम् ॥ १२६
तत्रादृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः ।
खादन्तो नरमांसानि पिबन्तः शोणितानि च ॥ १२७
करालाः पिङ्गला रौद्राः शैलदन्ता रजस्वलाः ।
जटिला दीर्घसक्थाश्च पञ्चपादा महोदराः ॥ १२८
पश्चादङ्गुलयो रूक्षा विरूपा भैरवस्वनाः ।
घटजानवोऽतिह्रस्वाश्च नीलकण्ठा विभीषणाः ॥
सपुत्रदाराः सुक्रूरा दुर्दर्शनसुनिर्घृणाः ।
विविधानि च रूपाणि तत्रादृश्यन्त रक्षसाम् ॥ १३०
पीत्वा च शोणितं हृष्टाः प्रानृत्यन्गणशोऽपरे ।
इदं वरमिदं मेध्यमिदं स्वाद्विति चाब्रुवन् ॥ १३१
मेदोमज्जास्थिरक्तानां वसानां च भृशाशिताः ।
परमांसानि खादन्तः क्रव्यादा मांसजीविनः ॥ १३२
वसां चाप्यपरे पीत्वा पर्यधावन्विकुक्षिलाः ।
नानावक्त्रास्तथा रौद्राः क्रव्यादाः पिशिताशिनः ॥
अयुतानि च तत्रासन्प्रयुतान्यर्बुदानि च ।
रक्षसां घोररूपाणां महतां क्रूरकर्मणाम् ॥ १३४
मुदिताना वितृप्तानां तस्मिन्महति वैशसे ।
समेतानि बहून्यासन्भूतानि च जनाधिप ॥ १३५
प्रत्यूषकाले शिबिरात्प्रतिगन्तुमियेष सः ।
नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ।
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो ॥ १३६
स निःशेषानरीन्कृत्वा विरराज जनक्षये ।

युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः ॥ १३७
यथाप्रतिज्ञं तत्कर्म कृत्वा द्रौणायनिः प्रभो ।
दुर्गमां पदवीं कृत्वा पितुरासीद्गतज्वरः ॥ १३८
यथैव संसुप्तजने शिबिरे प्राविशन्निशि ।
तथैव हत्वा निःशब्दे निश्चक्राम नरर्षभः ॥ १३९
निष्क्रम्य शिबिरात्तस्मात्ताभ्यां संगम्य वीर्यवान् ।
आचख्यौ कर्म तत्सर्वं हृष्टः संहर्षयन्विभो ॥ १४०
तावप्याचख्यतुस्तस्मै प्रियं प्रियकरौ तदा ।
पाञ्चालान्सृञ्जयांश्चैव विनिकृत्तान्सहस्रशः ।
प्रीत्या चोच्चैरुदक्रोशंस्तथैवास्फोटयंस्तलान् ॥ १४१
एवंविधा हि सा रात्रिः सोमकानां जनक्षये ।
प्रसुप्तानां प्रमत्तानामासीत्सुभृशदारुणा ॥ १४२
असंशयं हि कालस्य पर्यायो दुरतिक्रमः ।
तादृशा निहता यत्र कृत्वास्माकं जनक्षयम् ॥१४३

धृतराष्ट्र उवाच ।

प्रागेव सुमहत्कर्म द्रौणिरेतन्महारथः ।
नाकरोदीदृशं कस्मान्मत्पुत्रविजये धृतः ॥ १४४
अथ कस्माद्धते क्षत्रे कर्मेदं कृतवानसौ ।
द्रोणपुत्रो महेष्वासस्तन्मे शंसितुमर्हसि ॥ १४५

संजय उवाच ।

तेषां नूनं भयान्नासौ कृतवान्कुरुनन्दन ।
असांनिध्याद्धि पार्थानां केशवस्य च धीमतः ॥१४६
सात्यकेश्चापि कर्मेदं द्रोणपुत्रेण साधितम् ।
न हि तेषां समक्षं तान्हन्यादपि मरुत्पतिः ॥ १४७
एतदीदृशकं वृत्तं राजन्सुप्तजने विभो ।
ततो जनक्षयं कृत्वा पाण्डवानां महात्ययम् ।
दिष्ट्या दिष्ट्येति चान्योन्यं समेत्योचुर्महारथाः ॥
पर्यष्वजत्ततो द्रौणिस्ताभ्यां च प्रतिनन्दितः ।
इदं हर्षाच्च सुमहदाददे वाक्यमुत्तमम् ॥ १४९
पाञ्चाला निहताः सर्वे द्रौपदेयाश्च सर्वशः ।
सोमका मत्स्यशेषाश्च सर्वे विनिहता मया ॥१५०
इदानीं कृतकृत्याः स्म याम तत्रैव माचिरम् ।
यदि जीवति नो राजा तस्मै शंसामहे प्रियम् ॥

इति श्रीमहाभारते सौप्तिकपर्वणि

अष्टमोऽध्यायः ॥ ८ ॥

९

संजय उवाच ।

ते हत्वा सर्वपाञ्चालान्द्रौपदेयांश्च सर्वशः ।
अगच्छन्सहितास्तत्र यत्र दुर्योधनो हतः ॥ १
गत्वा चैनमपश्यंस्ते किंचित्प्राणं नराधिपम् ।
ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तवात्मजम् ॥ २
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसम् ।
वमन्तं रुधिरं वक्त्रादपश्यन्वसुधातले ॥ ३
वृतं समन्ताद्बहुभिः श्वापदैर्घोरदर्शनैः ।
शालावृकगणैश्चैव भक्षयिष्यद्भिरन्तिकात् ॥ ४
निवारयन्तं कृच्छ्रात्तांश्वापदान्संचिखादिषून् ।
विवेष्टमानं मह्यां च सुभृशं गाढवेदनम् ॥ ५
तं शयानं महात्मानं भूमौ स्वरुधिरोक्षितम् ।
हतशिष्टास्त्रयो वीराः शोकार्ताः पर्यवारयन् ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ ६
तैस्त्रिभिः शोणितादिग्धैर्निःश्वसद्भिर्महारथैः ।
शुशुभे संवृतो राजा वेदी त्रिभिरिवाग्निभिः ॥ ७
ते तं शयानं संप्रेक्ष्य राजानमतथोचितम् ।
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः ॥ ८
ततस्ते रुधिरं हस्तैर्मुखान्निर्मृज्य तस्य ह ।
रणे राज्ञः शयानस्य कृपणं पर्यदेवयन् ॥ ९

कृप उवाच ।

न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः ।
एकादशचमूभर्ता शेते दुर्योधनो हतः ॥ १०

पश्य चामीकराभस्य चामीकरविभूषिताम् ।
गदां गदाप्रियस्येमां समीपे पतितां भुवि ॥ ११
इयमेनं गदा शूरं न जहाति रणे रणे ।
स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनम् ॥१२
पश्येमां सह वीरेण जाम्बूनदविभूषिताम् ।
शयानां शयने धर्मे भार्यां प्रीतिमतीमिव ॥ १३
यो वै मूर्धावसिक्तानामग्रे यातः परंतपः ।
स हतो ग्रसते पांसून्पश्य कालस्य पर्ययम् ॥ १४
येनाजौ निहता भूमावशेरत पुरा द्विषः ।
स भूमौ निहतः शेते कुरुराजः परैरयम् ॥ १५
भयान्नमन्ति राजानो यस्य स्म शतसंघशः ।
स वीरशयने शेते क्रव्याद्भिः परिवारितः ॥ १६
उपासत नृपाः पूर्वमर्थहेतोर्यमीश्वरम् ।
धिक्सद्यो निहतः शेते पश्य कालस्य पर्ययम् ॥१७

संजय उवाच ।

तं शयानं नृपश्रेष्ठं ततो भरतसत्तम ।
अश्वत्थामा समालोक्य करुणं पर्यदेवयत् ॥ १८
आहुस्त्वां राजशार्दूल मुख्यं सर्वधनुष्मताम् ।
धनाध्यक्षोपमं युद्धे शिष्यं संकर्षणस्य ह ॥ १९
कथं विवरमद्राक्षीद्भीमसेनस्तवानघ ।
बलिनः कृतिनो नित्यं स च पापात्मवान्नृप ॥ २०
कालो नूनं महाराज लोकेऽस्मिन्बलवत्तरः ।
पश्यामो निहतं त्वां चेद्भीमसेनेन संयुगे ॥ २१
कथं त्वां सर्वधर्मज्ञं क्षुद्रः पापो वृकोदरः ।
निकृत्या हतवान्मन्दो नूनं कालो दुरत्ययः ॥ २२
धर्मयुद्धे ह्यधर्मेण समाहूयौजसा मृधे ।
गदया भीमसेनेन निर्भिन्ने सक्थिनी तव ॥ २३
अधर्मेण हतस्याजौ मृद्यमानं पदा शिरः ।
यदुपेक्षितवान्क्षुद्रो धिक्तमस्तु युधिष्ठिरम् ॥ २४
युद्धेष्वपवदिष्यन्ति योधा नूनं वृकोदरम् ।
यावत्स्थास्यन्ति भूतानि निकृत्या ह्यसि पातितः ॥२५
ननु रामोऽब्रवीद्राजंस्त्वां सदा यदुनन्दनः ।
दुर्योधनसमो नास्ति गदया इति वीर्यवान् ॥ २६
श्लाघते त्वां हि वार्ष्णेयो राजन्संसत्सु भारत ।
सुशिष्यो मम कौरव्यो गदायुद्ध इति प्रभो ॥२७
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः ।
हतस्याभिमुखस्याजौ प्राप्तस्त्वमसि तां गतिम् ॥२८
दुर्योधन न शोचामि त्वामहं पुरुषर्षभ ।
हतपुत्रां न शोचामि गान्धारीं पितरं च ते ।
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम् ॥२९
धिगस्तु कृष्णं वार्ष्णेयमर्जुनं चापि दुर्मतिम् ।
धर्मज्ञमानिनौ यौ त्वां वध्यमानमुपेक्षताम् ॥ ३०
पाण्डवाश्चापि ते सर्वे किं वक्ष्यन्ति नराधिपान् ।
कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः ॥ ३१
धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः ।
प्रयातोऽभिमुखः शत्रून्धर्मेण पुरुषर्षभ ॥ ३२
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ।
प्रज्ञाचक्षुश्च दुर्धर्षः कां गतिं प्रतिपत्स्यते ॥ ३३
धिगस्तु कृतवर्माणं मां कृपं च महारथम् ।
ये वयं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवम् ॥ ३४
दातारं सर्वकामानां रक्षितारं प्रजाहितम् ।
यद्वयं नानुगच्छामस्त्वां धिगस्मान्नराधमान् ॥ ३५
कृपस्य तव वीर्येण मम चैव पितुश्च मे ।
सभृत्यानां नरव्याघ्र रत्नवन्ति गृहाणि च ॥ ३६
भवत्प्रसादादस्माभिः समित्रैः सहबान्धवैः ।
अवाप्ताः क्रतवो मुख्या बहवो भूरिदक्षिणाः ॥ ३७
कुतश्चापीदृशं सार्थमुपलप्स्यामहे वयम् ।
यादृशेन पुरस्कृत्य त्वं गतः सर्वपार्थिवान् ॥ ३८
वयमेव त्रयो राजन्गच्छन्तं परमां गतिम् ।
यद्वै त्वां नानुगच्छामस्तेन तप्स्यामहे वयम् ॥ ३९

त्वत्स्वर्गहीना हीनार्थाः स्मरन्तः सुकृतस्य ते ।
किं नाम तद्भवेत्कर्म येन त्वानुव्रजेम वै ॥ ४०
दुःखं नूनं कुरुश्रेष्ठ चरिष्यामो महीमिमाम् ।
हीनानां नस्त्वया राजन्कुतः शान्तिः कुतः सुखम् ॥
गत्वैतांस्तु महाराज समेत्य त्वं महारथान् ।
यथाश्रेष्ठं यथाज्येष्ठं पूजयेर्वचनान्मम ॥ ४२
आचार्यं पूजयित्वा च केतुं सर्वधनुष्मताम् ।
हतं मयाद्य शंसेथा धृष्टद्युम्नं नराधिप ॥ ४३
परिष्वजेथा राजानं बाह्लिकं सुमहारथम् ।
सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ॥ ४४
तथा पूर्वगतानन्यान्स्वर्गं पार्थिवसत्तमान् ।
अस्मद्वाक्यात्परिष्वज्य पृच्छेथास्त्वमनामयम् ॥ ४५
इत्येवमुक्त्वा राजानं भग्नसक्थमचेतसम् ।
अश्वत्थामा समुद्वीक्ष्य पुनर्वचनमब्रवीत् ॥ ४६
दुर्योधन जीवसि चेद्वाचं श्रोत्रसुखां शृणु ।
सप्त पाण्डवतः शेषा धार्तराष्ट्रास्त्रयो वयम् ॥ ४७
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहं च कृतवर्मा च कृपः शारद्वतस्तथा ॥ ४८
द्रौपदेया हताः सर्वे धृष्टद्युम्नस्य चात्मजाः ।
पाञ्चाला निहताः सर्वे मत्स्यशेषं च भारत ॥ ४९
कृते प्रतिकृतं पश्य हतपुत्रा हि पाण्डवाः ।
सौप्तिके शिबिरं तेषां हतं सनरवाहनम् ॥ ५०
मया च पापकर्मासौ धृष्टद्युम्नो महीपते ।
प्रविश्य शिबिरं रात्रौ पशुमारेण मारितः ॥ ५१
दुर्योधनस्तु तां वाचं निशम्य मनसः प्रियाम् ।
प्रतिलभ्य पुनश्चेत इदं वचनमब्रवीत् ॥ ५२
न मेऽकरोत्तद्गाङ्गेयो न कर्णो न च ते पिता ।
यत्त्वया कृपभोजाभ्यां सहितेनाद्य मे कृतम् ॥५३
स चेत्सेनापतिः क्षुद्रो हतः सार्धं शिखण्डिना ।
तेन मन्ये मघवता सममात्मानमद्य वै ॥ ५४
स्वस्ति प्राप्नुत भद्रं वः स्वर्गे नः संगमः पुनः ।
इत्येवमुक्त्वा तूष्णीं स कुरुराजो महामनाः ।
प्राणानुदसृजद्वीरः सुहृदां शोकमादधत् ॥ ५५
तथेति ते परिष्वक्ताः परिष्वज्य च तं नृपम् ।
पुनः पुनः प्रेक्षमाणाः स्वकानारुरुहू रथान् ॥ ५६
इत्येवं तव पुत्रस्य निशम्य करुणां गिरम् ।
प्रत्यूषकाले शोकार्तः प्राधावं नगरं प्रति ॥ ५७
तव पुत्रे गते स्वर्गं शोकार्तस्य ममानघ ।
ऋषिदत्तं प्रनष्टं तद्दिव्यदर्शित्वमद्य वै ॥ ५८

वैशंपायन उवाच ।

इति श्रुत्वा स नृपतिः पुत्रज्ञातिवधं तदा ।
निःश्वस्य दीर्घमुष्णं च ततश्चिन्तापरोऽभवत् ॥ ५९

इति श्रीमहाभारते सौप्तिकपर्वणि
नवमोऽध्यायः ॥ ९ ॥
समाप्तं सौप्तिकपर्व ॥

१०

वैशंपायन उवाच ।

तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः ।
शशंस धर्मराजाय सौप्तिके कदनं कृतम् ॥ १
द्रौपदेया महाराज द्रुपदस्यात्मजैः सह ।
प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिबिरे स्वके ॥ २
कृतवर्मणा नृशंसेन गौतमेन कृपेण च ।
अश्वत्थाम्ना च पापेन हतं वः शिबिरं निशि ॥ ३
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वधैः ।
सहस्राणि निकृन्तद्भिर्निःशेषं ते बलं कृतम् ॥ ४
छिद्यमानस्य महतो वनस्येव परश्वधैः ।
शुश्रुवे सुमहाञ्शब्दो बलस्य तव भारत ॥ ५
अहमेकोऽवशिष्टस्तु तस्मात्सैन्यान्महीपते ।
मुक्तः कथंचिद्धर्मात्मन्व्यग्रस्य कृतवर्मणः ॥ ६
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्रो युधिष्ठिरः ।

पपात मह्यां दुर्धर्षः पुत्रशोकसमन्वितः ॥ ७
तं पतन्तमभिक्रम्य परिजग्राह सात्यकिः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥ ८
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा ।
जित्वा शत्रूञ्जितः पश्चात्पर्यदेवयदातुरः ॥ ९
दुर्विदा गतिरर्थानामपि ये दिव्यचक्षुषः ।
जीयमाना जयन्त्यन्ये जयमाना वयं जिताः ॥१०
हत्वा भ्रातॄन्वयस्यांश्च पितॄन्पुत्रान्सुहृद्गणान् ।
बन्धूनमात्यान्पौत्रांश्च जित्वा सर्वाञ्जिता वयम् ॥११
अनर्थो ह्यर्थसंकाशस्तथार्थोऽनर्थदर्शनः ।
जयोऽयमजयाकारो जयस्तस्मात्पराजयः ॥ १२
यं जित्वा तप्यते पश्चादापन्न इव दुर्मतिः ।
कथं मन्येत विजयं ततो जिततरः परैः ॥ १३
येषामर्थाय पापस्य धिग्जयस्य सुहृद्वधे ।
निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ॥ १४
कर्णिनालीकदंष्ट्रस्य खड्गजिह्वस्य संयुगे ।
चापव्यात्तस्य रौद्रस्य ज्यातलस्वननादिनः ॥ १५
क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिनः ।
ये व्यमुच्यन्त कर्णस्य प्रमादात्त इमे हताः ॥ १६

रथह्रदं शरवर्षोर्मिमन्तं
रत्नाचितं वाहनराजियुक्तम् ।
शक्त्यृष्टिमीनध्वजनागनक्रं
शरासनावर्तमहेषुफेनम् ॥ १७
संग्रामचन्द्रोदयवेगवेलं
द्रोणार्णवं ज्यातलनेमिघोषम् ।
ये तेरुरुच्चावचशस्त्रनौभि-
स्ते राजपुत्रा निहताः प्रमादात् ॥ १८
न हि प्रमादात्परमोऽस्ति कश्चि-
द्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्ता-
त्त्यजन्त्यनर्थाश्च समाविशन्ति ॥ १९
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं
शरार्चिषं कोपमहासमीरम् ।
महाधनुर्ज्यातलनेमिघोषं
तनुत्रनानाविधशस्त्रहोमम् ॥ २०
महाचमूकक्षवराभिपन्नं
महाहवे भीष्ममहादवाग्निम् ।
ये सेहुरात्तायतशस्त्रवेगं
ते राजपुत्रा निहताः प्रमादात् ॥ २१
न हि प्रमत्तेन नरेण लभ्या
विद्या तपः श्रीर्विपुलं यशो वा ।
पश्याप्रमादेन निहत्य शत्रू-
न्सर्वान्महेन्द्रं सुखमेधमानम् ॥ २२
इन्द्रोपमान्पार्थिवपुत्रपौत्रा-
न्पश्याविशेषेण हतान्प्रमादात् ।
तीर्त्वा समुद्रं वणिजः समृद्धाः
सन्नाः कुनद्यामिव हेलमानाः ।
अमर्षितैर्ये निहताः शयाना
निःसंशयं ते त्रिदिवं प्रपन्नाः ॥ २३
कृष्णां नु शोचामि कथं न साध्वीं
शोकार्णवे साद्य विनङ्क्ष्यतीति ।
भ्रातॄंश्च पुत्रांश्च हतान्निशम्य
पाञ्चालराजं पितरं च वृद्धम् ।
ध्रुवं विसंज्ञा पतिता पृथिव्यां
सा शेष्यते शोककृशाङ्गयष्टिः ॥ २४
तच्छोकजं दुःखमपारयन्ती
कथं भविष्यत्युचिता सुखानाम् ।
पुत्रक्षयभ्रातृवधप्रणुन्ना
प्रदह्यमानेव हुताशनेन ॥ २५
इत्येवमार्तः परिदेवयन्स

राजा कुरूणां नकुलं बभाषे ।
गच्छानयैनामिह मन्दभाग्यां
समातृपक्षामिति राजपुत्रीम् ॥ २६
माद्रीसुतस्तत्परिगृह्य वाक्यं
धर्मेण धर्मप्रतिमस्य राज्ञः ।
ययौ रथेनालयमाशु देव्याः
पाञ्चालराजस्य च यत्र दाराः ॥ २७
प्रस्थाप्य माद्रीसुतमाजमीढः
शोकार्दितस्तैः सहितः सुहृद्भिः ।
रोरूयमाणः प्रययौ सुताना-
मायोधनं भूतगणानुकीर्णम् ॥ २८
स तत्प्रविश्याशिवमुग्ररूपं
ददर्श पुत्रान्सुहृदः सखींश्च ।
भूमौ शयानान्रुधिरार्द्रगात्रा-
न्विभिन्नभग्नापहृतोत्तमाङ्गान् ॥ २९
स तांस्तु दृष्ट्वा भृशमार्तरूपो
युधिष्ठिरो धर्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः
पपात चोर्व्यां सगणो विसंज्ञः ॥ ३०

इति श्रीमहाभारते सौप्तिकपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

वैशंपायन उवाच ।

स दृष्ट्वा निहतान्संख्ये पुत्रान्भ्रातॄन्सखींस्तथा ।
महादुःखपरीतात्मा बभूव जनमेजय ॥ १
ततस्तस्य महाञ्शोकः प्रादुरासीन्महात्मनः ।
स्मरतः पुत्रपौत्राणां भ्रातॄणां स्वजनस्य ह ॥ २
तमश्रुपरिपूर्णाक्षं वेपमानमचेतसम् ।
सुहृदो भृशसंविग्नाः सान्त्वयांचक्रिरे तदा ॥ ३
ततस्तस्मिन्क्षणे काल्ये रथेनादित्यवर्चसा ।
नकुलः कृष्णया सार्धमुपायात्परमार्तया ॥ ४
उपप्लव्यगता सा तु श्रुत्वा सुमहदप्रियम् ।
तदा विनाशं पुत्राणां सर्वेषां व्यथिताभवत् ॥ ५
कम्पमानेव कदली वातेनाभिसमीरिता ।
कृष्णा राजानमासाद्य शोकार्ता न्यपतद्भुवि ॥ ६
बभूव वदनं तस्याः सहसा शोककर्शितम् ।
फुल्लपद्मपलाशाक्ष्यास्तमोध्वस्त इवांशुमान् ॥ ७
ततस्तां पतितां दृष्ट्वा संरम्भी सत्यविक्रमः ।
बाहुभ्यां परिजग्राह समुपेत्य वृकोदरः ॥ ८
सा समाश्वासिता तेन भीमसेनेन भामिनी ।
रुदती पाण्डवं कृष्णा सहभ्रातरमब्रवीत् ॥ ९
दिष्ट्या राजंस्त्वमद्येमामखिलां भोक्ष्यसे महीम् ।
आत्मजान्क्षत्रधर्मेण संप्रदाय यमाय वै ॥ १०
दिष्ट्या त्वं पार्थ कुशली मत्तमातङ्गगामिनम् ।
अवाप्य पृथिवीं कृत्स्नां सौभद्रं न स्मरिष्यसि ॥ ११
आत्मजांस्तेन धर्मेण श्रुत्वा शूरान्निपातितान् ।
उपप्लव्ये मया सार्धं दिष्ट्या त्वं न स्मरिष्यसि ॥ १२
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पापकर्मणा ।
शोकस्तपति मां पार्थ हुताशन इवाशयम् ॥ १३
तस्य पापकृतो द्रौणेर्न चेदद्य त्वया मृधे ।
ह्रियते सानुबन्धस्य युधि विक्रम्य जीवितम् ॥ १४
इहैव प्रायमासिष्ये तन्निबोधत पाण्डवाः ।
न चेत्फलमवाप्नोति द्रौणिः पापस्य कर्मणः ॥ १५
एवमुक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत् ।
युधिष्ठिरं याज्ञसेनी धर्मराजं यशस्विनी ॥ १६
दृष्ट्वोपविष्टां राजर्षिः पाण्डवो महिषीं प्रियाम् ।
प्रत्युवाच स धर्मात्मा द्रौपदीं चारुदर्शनाम् ॥ १७
धर्म्यं धर्मेण धर्मज्ञे प्राप्तास्ते निधनं शुभे ।
पुत्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि ॥ १८
द्रोणपुत्रः स कल्याणि वनं दूरमितो गतः ।

तस्य त्वं पातनं संख्ये कथं ज्ञास्यसि शोभने ॥ १९

द्रौपद्युवाच ।

द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः ।
निहत्य संख्ये तं पापं पश्येयं मणिमाहृतम् ।
राजञ्शिरसि तं कृत्वा जीवेयमिति मे मतिः ॥ २०

वैशंपायन उवाच ।

इत्युक्त्वा पाण्डवं कृष्णा राजानं चारुदर्शना ।
भीमसेनमथाभ्येत्य कुपिता वाक्यमब्रवीत् ॥ २१
त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् ।
जहि तं पापकर्माणं शम्बरं मघवानिव ।
न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन ॥ २२
श्रुतं तत्सर्वलोकेषु परमव्यसने यथा ।
द्वीपोऽभूस्त्वं हि पार्थानां नगरे वारणावते ।
हिडिम्बदर्शने चैव तथा त्वमभवो गतिः ॥ २३
तथा विराटनगरे कीचकेन भृशार्दिताम् ।
मामप्युद्धृतवान्कृच्छ्रात्पौलोमीं मघवानिव ॥ २४
यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा ।
तथा द्रौणिममित्रघ्न विनिहत्य सुखी भव ॥ २५
तस्या बहुविधं दुःखान्निशम्य परिदेवितम् ।
नामर्षयत कौन्तेयो भीमसेनो महाबलः ॥ २६
स काञ्चनविचित्राङ्गमारुरोह महारथम् ।
आदाय रुचिरं चित्रं समार्गणगुणं धनुः ॥ २७
नकुलं सारथिं कृत्वा द्रोणपुत्रवधे धृतः ।
विस्फार्य सशरं चापं तूर्णमश्वानचोदयत् ॥ २८
ते हयाः पुरुषव्याघ्र चोदिता वातरंहसः ।
वेगेन त्वरिता जग्मुर्हरयः शीघ्रगामिनः ॥ २९
शिबिरात्स्वाद्गृहीत्वा स रथस्य पदमच्युतः ।
द्रोणपुत्ररथस्याशु ययौ मार्गेण वीर्यवान् ॥ ३०

इति श्रीमहाभारते सौप्तिकपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

वैशंपायन उवाच ।

तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्ततः ।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ १
एष पाण्डव ते भ्राता पुत्रशोकमपारयन् ।
जिघांसुर्द्रौणिमाक्रन्दे याति भारत भारतः ॥ २
भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ ।
तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्यवपद्यसे ॥ ३
यत्तदाचष्ट पुत्राय द्रोणः परपुरंजयः ।
अस्त्रं ब्रह्मशिरो नाम दहेद्यत्पृथिवीमपि ॥ ४
तन्महात्मा महाभागः केतुः सर्वधनुष्मताम् ।
प्रत्यपादयदाचार्यः प्रीयमाणो धनंजयम् ॥ ५
तत्पुत्रोऽस्यैवमेवैनमन्वयाचदमर्षणः ।
ततः प्रोवाच पुत्राय नातिहृष्टमना इव ॥ ६
विदितं चापलं ह्यासीदात्मजस्य महात्मनः ।
सर्वधर्मविदाचार्यो नान्विषत्सततं सुतम् ॥ ७
परमापद्गतेनापि न स्म तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥ ८
इत्युक्तवान्गुरुः पुत्रं द्रोणः पश्चादथोक्तवान् ।
न त्वं जातु सतां मार्गे स्थातेति पुरुषर्षभ ॥ ९
स तदाज्ञाय दुष्टात्मा पितुर्वचनमप्रियम् ।
निराशः सर्वकल्याणैः शोचन्पर्यपतन्महीम् ॥ १०
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत ।
अवसद्द्वारकामेत्य वृष्णिभिः परमार्चितः ॥ ११
स कदाचित्समुद्रान्ते वसन्द्वारवतीमनु ।
एक एकं समागम्य मामुवाच हसन्निव ॥ १२
यत्तदुग्रं तपः कृष्ण चरन्सत्यपराक्रमः ।
अगस्त्याद्भारताचार्यः प्रत्यपद्यत मे पिता ॥ १३
अस्त्रं ब्रह्मशिरो नाम देवगन्धर्वपूजितम् ।
तदद्य मयि दाशार्ह यथा पितरि मे तथा ॥ १४

असमस्तस्तदुपादाय दिव्यमस्त्रं यदुत्तम ।
ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहरं रणे ॥ १५
स राजन्प्रीयमाणेन मयाप्युक्तः कृताञ्जलिः ।
याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ॥ १६
देवदानवगन्धर्वमनुष्यपतगोरगाः ।
न समा मम वीर्यस्य शतांशेनापि पिण्डिताः॥ १७
इदं धनुरियं शक्तिरिदं चक्रमियं गदा ।
यद्यदिच्छसि चेदस्त्रं मत्तस्तत्तद्ददानि ते ॥ १८
यच्छक्नोषि समुद्यन्तुं प्रयोक्तुमपि वा रणे ।
तद्गृहाण विनास्त्रेण यन्मे दातुमभीप्ससि ॥ १९
स सुनाभं सहस्रारं वज्रनाभमयस्मयम् ।
वव्रे चक्रं महाबाहो स्पर्धमानो मया सह ॥ २०
गृहाण चक्रमित्युक्तो मया तु तदनन्तरम् ।
जग्राहोपेत्य सहसा चक्रं सव्येन पाणिना ।
न चैतदशकत्स्थानात्संचालयितुमच्युत ॥ २१
अथ तद्दक्षिणेनापि ग्रहीतुमुपचक्रमे ।
सर्वयत्नेन तेनापि गृह्णन्नैतदकल्पयत् ॥ २२
ततः सर्वबलेनापि यच्चैतन्न शशाक सः ।
उद्धर्तुं वा चालयितुं द्रौणिः परमदुर्मनाः ।
कृत्वा यत्नं परं श्रान्तः स न्यवर्तत भारत ॥ २३
निवृत्तमथ तं तस्मादभिप्रायाद्विचेतसम् ।
अहमामन्त्र्य सुस्निग्धमश्वत्थामानमब्रुवम् ॥ २४
यः स देवमनुष्येषु प्रमाणं परमं गतः ।
गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः ॥ २५
यः साक्षाद्देवदेवेशं शितिकण्ठमुमापतिम् ।
द्वंद्वयुद्धे पराजिष्णुस्तोषयामास शंकरम् ॥ २६
यस्मात्प्रियतरो नास्ति ममान्यः पुरुषो भुवि ।
नादेयं यस्य मे किंचिदपि दाराः सुतास्तथा ॥ २७
तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा ।
नोक्तपूर्वमिदं वाक्यं यत्त्वं मामभिभाषसे ॥ २८
ब्रह्मचर्यं महद्घोरं चीर्त्वा द्वादशवार्षिकम् ।
हिमवत्पार्श्वमभ्येत्य यो मया तपसार्चितः ॥ २९
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत ।
सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः ॥ ३०
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं मम ।
न प्रार्थितमभून्मूढ यदिदं प्रार्थितं त्वया ॥ ३१
रामेणातिबलेनैतन्नोक्तपूर्वं कदाचन ।
न गदेन न साम्बेन यदिदं प्रार्थितं त्वया ॥ ३२
द्वारकावासिभिश्चान्यैर्वृष्ण्यन्धकमहारथैः ।
नोक्तपूर्वमिदं जातु यदिदं प्रार्थितं त्वया ॥ ३३
भारताचार्यपुत्रः सन्मानितः सर्वयादवैः ।
चक्रेण रथिनां श्रेष्ठ किं नु तात युयुत्ससे ॥ ३४
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह ।
प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वयेत्युत ॥ ३५
ततस्ते प्रार्थितं चक्रं देवदानवपूजितम् ।
अजेयः स्यामिति विभो सत्यमेतद्ब्रवीमि ते ॥ ३६
त्वत्तोऽहं दुर्लभं काममनवाप्यैव केशव ।
प्रतियास्यामि गोविन्द शिवेनाभिवदस्व माम् ॥ ३७
एतत्सुनाभं वृष्णीनामृषभेण त्वया धृतम् ।
चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते ॥ ३८
एतावदुक्त्वा द्रौणिर्मां युग्यमश्वान्धनानि च ।
आदायोपययौ बालो रत्नानि विविधानि च ॥ ३९
स संरम्भी दुरात्मा च चपलः क्रूर एव च ।
वेद चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः ॥ ४०

इति श्रीमहाभारते सौप्तिकपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

वैशंपायन उवाच ।

एवमुक्त्वा युधां श्रेष्ठः सर्वयादवनन्दनः ।
सर्वायुधवरोपेतमारुरोह महारथम् ।

युक्तं परमकाम्बोजैस्तुरगैर्हेममालिभिः ॥ १
आदित्योदयवर्णस्य धुरं रथवरस्य तु ।
दक्षिणामवहत्सैन्यः सुग्रीवः सव्यतोऽवहत् ।
पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पबलाहकौ ॥ २
विश्वकर्मकृता दिव्या नानारत्नविभूषिता ।
उच्छ्रितेव रथे माया ध्वजयष्टिरदृश्यत ॥ ३
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान् ।
तस्य सत्यवतः केतुर्भुजगारिरदृश्यत ॥ ४
अन्वारोहद्धृषीकेशः केतुः सर्वधनुष्मताम् ।
अर्जुनः सत्यकर्मा च कुरुराजो युधिष्ठिरः ॥ ५
अशोभेतां महात्मानौ दाशार्हमभितः स्थितौ ।
रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवम् ॥ ६
तावुपारोप्य दाशार्हः स्यन्दनं लोकपूजितम् ।
प्रतोदेन जवोपेतान्परमाश्वानचोदयत् ॥ ७
ते हयाः सहसोत्पेतुर्गृहीत्वा स्यन्दनोत्तमम् ।
आस्थितं पाण्डवेयाभ्यां यदूनामृषभेण च ॥ ८
वहतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनाम् ।
प्रादुरासीन्महाञ्शब्दः पक्षिणां पततामिव ॥ ९
ते समार्छन्नरव्याघ्राः क्षणेन भरतर्षभ ।
भीमसेनं महेष्वासं समनुद्रुत्य वेगिताः ॥ १०
क्रोधदीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम् ।
नाशक्नुवन्वारयितुं समेत्यापि महारथाः ॥ ११
स तेषां प्रेक्षतामेव श्रीमतां दृढधन्विनाम् ।
ययौ भागीरथीकच्छं हरिभिर्भृशवेगितैः ।
यत्र स्म श्रूयते द्रौणिः पुत्रहन्ता महात्मनाम् ॥ १२
स ददर्श महात्मानमुदकान्ते यशस्विनम् ।
कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह ॥ १३
तं चैव क्रूरकर्माणं घृताक्तं कुशचीरिणम् ।
रजसा ध्वस्तकेशान्तं ददर्श द्रौणिमन्तिके ॥ १४
तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः ।
भीमसेनो महाबाहुस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १५
स दृष्ट्वा भीमधन्वानं प्रगृहीतशरासनम् ।
भ्रातरौ पृष्ठतश्चास्य जनार्दनरथे स्थितौ ।
व्यथितात्माभवद्द्रौणिः प्राप्तं चेदममन्यत ॥ १६
स तद्दिव्यमदीनात्मा परमास्त्रमचिन्तयत् ।
जग्राह च स चैषीकां द्रौणिः सव्येन पाणिना ।
स तामापदमासाद्य दिव्यमस्त्रमुदीरयत् ॥ १७
अमृष्यमाणस्ताञ्शूरान्दिव्यायुधधरान्स्थितान् ।
अपाण्डवायेति रुषा व्यसृजद्दारुणं वचः ॥ १८
इत्युक्त्वा राजशार्दूल द्रोणपुत्रः प्रतापवान् ।
सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह ॥ १९
ततस्तस्यामिषीकायां पावकः समजायत ।
प्रधक्ष्यन्निव लोकांस्त्रीन्कालान्तकयमोपमः ॥ २०

इति श्रीमहाभारते सौप्तिकपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

वैशंपायन उवाच ।

इङ्गितेनैव दाशार्हस्तमभिप्रायमादितः ।
द्रौणेर्बुद्ध्वा महाबाहुरर्जुनं प्रत्यभाषत ॥ १
अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते ।
द्रोणोपदिष्टं तस्यायं कालः संप्रति पाण्डव ॥ २
भ्रातॄणामात्मनश्चैव परित्राणाय भारत ।
विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणम् ॥ ३
केशवेनैवमुक्तस्तु पाण्डवः परवीरहा ।
अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः ॥ ४
पूर्वमाचार्यपुत्राय ततोऽनन्तरमात्मने ।
भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परंतपः ॥ ५
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्वशः ।
उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यताम् ॥ ६
ततस्तदस्त्रं सहसा सृष्टं गाण्डीवधन्वना ।

प्रजज्वाल महार्चिष्मद्युगान्तानलसंनिभम् ॥ ७
तथैव द्रोणपुत्रस्य तदस्त्रं तिग्मतेजसः ।
प्रजज्वाल महाज्वालं तेजोमण्डलसंवृतम् ॥ ८
निर्घाता बहवश्चासन्पेतुरुल्काः सहस्रशः ।
महद्भयं च भूतानां सर्वेषां समजायत ॥ ९
सशब्दमभवद्व्योम ज्वालामालाकुलं भृशम् ।
चचाल च मही कृत्स्ना सपर्वतवनद्रुमा ॥ १०
ते अस्त्रे तेजसा लोकांस्तापयन्ती व्यवस्थिते ।
महर्षी सहितौ तत्र दर्शयामासतुस्तदा ॥ ११
नारदः स च धर्मात्मा भरतानां पितामहः ।
उभौ शमयितुं वीरौ भारद्वाजधनंजयौ ॥ १२
तौ मुनी सर्वधर्मज्ञौ सर्वभूतहितैषिणौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥ १३
तदन्तरमनाधृष्यावुपगम्य यशस्विनौ ।
आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ ॥ १४
प्राणभृद्भिरनाधृष्यौ देवदानवसंमतौ ।
अस्त्रतेजः शमयितुं लोकानां हितकाम्यया ॥ १५

ऋषी ऊचतुः ।

नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः ।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथंचन ॥ १६

इति श्रीमहाभारते सौप्तिकपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

वैशंपायन उवाच ।

दृष्ट्वैव नरशार्दूलस्तावग्निसमतेजसौ ।
संजहार शरं दिव्यं त्वरमाणो धनंजयः ॥ १
उवाच वदतां श्रेष्ठस्तावृषी प्राञ्जलिस्तदा ।
प्रयुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया ॥ २
संहृते परमास्त्रेऽस्मिन्सर्वानस्मानशेषतः ।
पापकर्मा ध्रुवं द्रौणिः प्रधक्ष्यत्यस्त्रतेजसा ॥ ३
अत्र यद्धितमस्माकं लोकानां चैव सर्वथा ।
भवन्तौ देवसंकाशौ तथा संहर्तुमर्हतः ॥ ४
इत्युक्त्वा संजहारास्त्रं पुनरेव धनंजयः ।
संहारो दुष्करस्तस्य देवैरपि हि संयुगे ॥ ५
विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे ।
न शक्तः पाण्डवादन्यः साक्षादपि शतक्रतुः ॥ ६
ब्रह्मतेजोभवं तद्धि विसृष्टमकृतात्मना ।
न शक्यमावर्तयितुं ब्रह्मचारिव्रतादृते ॥ ७
अचीर्णब्रह्मचर्यो यः सृष्ट्वावर्तयते पुनः ।
तदस्त्रं सानुबन्धस्य मूर्धानं तस्य कृन्तति ॥ ८
ब्रह्मचारी व्रती चापि दुरवापमवाप्य तत् ।
परमव्यसनार्तोऽपि नार्जुनोऽस्त्रं व्यमुञ्चत ॥ ९
सत्यव्रतधरः शूरो ब्रह्मचारी च पाण्डवः ।
गुरुवर्ती च तेनास्त्रं संजहारार्जुनः पुनः ॥ १०
द्रौणिरप्यथ संप्रेक्ष्य तावृषी पुरतः स्थितौ ।
न शशाक पुनर्घोरमस्त्रं संहर्तुमाहवे ॥ ११
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे ।
द्रौणिर्दीनमना राजन्द्वैपायनमभाषत ॥ १२
उत्तमव्यसनार्तेन प्राणत्राणमभीप्सुना ।
मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने ॥ १३
अधर्मश्च कृतोऽनेन धार्तराष्ट्रं जिघांसता ।
मिथ्याचारेण भगवन्भीमसेनेन संयुगे ॥ १४
अतः सृष्टमिदं ब्रह्मन्मयास्त्रमकृतात्मना ।
तस्य भूयोऽद्य संहारं कर्तुं नाहमिहोत्सहे ॥ १५
विसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदम् ।
अपाण्डवायेति मुने वह्नितेजोऽनुमन्त्र्य वै ॥ १६
तदिदं पाण्डवेयानामन्तकायाभिसंहितम् ।
अद्य पाण्डुसुतान्सर्वाञ्जीविताद्भ्रंशयिष्यति ॥ १७
कृतं पापमिदं ब्रह्मन्रोषाविष्टेन चेतसा ।

वधमाशास्य पार्थानां मयास्त्रं सृजता रणे ॥ १८

व्यास उवाच ।

अस्त्रं ब्रह्मशिरस्तात विद्वान्पार्थो धनंजयः ।
उत्सृष्टवान्न रोषेण न वधाय तवाहवे ॥ १९
अस्त्रमस्त्रेण तु रणे तव संशमयिष्यता ।
विसृष्टमर्जुनेनेदं पुनश्च प्रतिसंहृतम् ॥ २०
ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात्पितुस्तव ।
क्षत्रधर्मान्महाबाहुर्नाकम्पत धनंजयः ॥ २१
एवं धृतिमतः साधोः सर्वास्त्रविदुषः सतः ।
सभ्रातृबन्धोः कस्मात्त्वं वधमस्य चिकीर्षसि ॥ २२
अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समा द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति ॥ २३
एतदर्थं महाबाहुः शक्तिमानपि पाण्डवः ।
न विहन्त्येतदस्त्रं ते प्रजाहितचिकीर्षया ॥ २४
पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव नः ।
तस्मात्संहर दिव्यं त्वमस्त्रमेतन्महाभुज ॥ २५
अरोषस्तव चैवास्तु पार्थाः सन्तु निरामयाः ।
न ह्यधर्मेण राजर्षिः पाण्डवो जेतुमिच्छति ॥ २६
मणिं चैतं प्रयच्छैभ्यो यस्ते शिरसि तिष्ठति ।
एतदादाय ते प्राणान्प्रतिदास्यन्ति पाण्डवाः ॥ २७

द्रौणिरुवाच ।

पाण्डवैर्यानि रत्नानि यच्चान्यत्कौरवैर्धनम् ।
अवाप्तानीह तेभ्योऽयं मणिर्मम विशिष्यते ॥ २८
यमाबध्य भयं नास्ति शस्त्रव्याधिक्षुधाश्रयम् ।
देवेभ्यो दानवेभ्यो वा नागेभ्यो वा कथंचन ॥ २९
न च रक्षोगणभयं न तस्करभयं तथा ।
एवंवीर्यो मणिरयं न मे त्याज्यः कथंचन ॥ ३०
यत्तु मे भगवानाह तन्मे कार्यमनन्तरम् ।
अयं मणिरयं चाहमिषीका निपतिष्यति ।
गर्भेषु पाण्डवेयानाममोघं चैतदुद्यतम् ॥ ३१

व्यास उवाच ।

एवं कुरु न चान्या ते बुद्धिः कार्या कदाचन ।
गर्भेषु पाण्डवेयानां विसृज्यैतदुपारम ॥ ३२

वैशंपायन उवाच ।

ततः परममस्त्रं तदश्वत्थामा भृशातुरः ।
द्वैपायनवचः श्रुत्वा गर्भेषु प्रमुमोच ह ॥ ३३

इति श्रीमहाभारते सौप्तिकपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

वैशंपायन उवाच ।

तदाज्ञाय हृषीकेशो विसृष्टं पापकर्मणा ।
हृष्यमाण इदं वाक्यं द्रौणिं प्रत्यब्रवीत्तदा ॥ १
विराटस्य सुतां पूर्वं स्नुषां गाण्डीवधन्वनः ।
उपप्लव्यगतां दृष्ट्वा व्रतवान्ब्राह्मणोऽब्रवीत् ॥ २
परिक्षीणेषु कुरुषु पुत्रस्तव जनिष्यति ।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ॥ ३
तस्य तद्वचनं साधोः सत्यमेव भविष्यति ।
परिक्षिद्भविता ह्येषां पुनर्वंशकरः सुतः ॥ ४
एवं ब्रुवाणं गोविन्दं सात्वतप्रवरं तदा ।
द्रौणिः परमसंरब्धः प्रत्युवाचेदमुत्तरम् ॥ ५
नैतदेवं यथात्थ त्वं पक्षपातेन केशव ।
वचनं पुण्डरीकाक्ष न च मद्वाक्यमन्यथा ॥ ६
पतिष्यत्येतदस्त्रं हि गर्भे तस्या मयोद्यतम् ।
विराटदुहितुः कृष्ण यां त्वं रक्षितुमिच्छसि ॥ ७

वासुदेव उवाच ।

अमोघः परमास्त्रस्य पातस्तस्य भविष्यति ।
स तु गर्भो मृतो जातो दीर्घमायुरवाप्स्यति ॥ ८
त्वां तु कापुरुषं पापं विदुः सर्वे मनीषिणः ।
असकृत्पापकर्माणं बालजीवितघातकम् ॥ ९

तस्मात्त्वमस्य पापस्य कर्मणः फलमाप्नुहि ।
त्रीणि वर्षसहस्राणि चरिष्यसि महीमिमाम् ।
अप्राप्नुवन्क्वचित्कांचित्संविदं जातु केनचित् ॥ १०
निर्जनानसहायस्त्वं देशान्प्रविचरिष्यसि ।
भवित्री न हि ते क्षुद्र जनमध्येषु संस्थितिः ॥ ११
पूयशोणितगन्धी च दुर्गकान्तारसंश्रयः ।
विचरिष्यसि पापात्मन्सर्वव्याधिसमन्वितः ॥ १२
वयः प्राप्य परिक्षित्तु वेदव्रतमवाप्य च ।
कृपाच्छारद्वताद्वीरः सर्वास्त्राण्युपलप्स्यते ॥ १३
विदित्वा परमास्त्राणि क्षत्रधर्मव्रते स्थितः ।
षष्टिं वर्षाणि धर्मात्मा वसुधां पालयिष्यति ॥ १४
इतश्चोर्ध्वं महाबाहुः कुरुराजो भविष्यति ।
परिक्षिन्नाम नृपतिर्मिषतस्ते सुदुर्मते ।
पश्य मे तपसो वीर्यं सत्यस्य च नराधम ॥ १५

व्यास उवाच ।

यस्मादनादृत्य कृतं त्वयास्मान्कर्म दारुणम् ।
ब्राह्मणस्य सतश्चैव यस्मात्ते वृत्तमीदृशम् ॥ १६
तस्माद्यद्देवकीपुत्र उक्तवानुत्तमं वचः ।
असंशयं ते तद्भावि क्षुद्रकर्मन्व्रजाश्वितः ॥ १७

अश्वत्थामोवाच ।

सहैव भवता ब्रह्मन्स्थास्यामि पुरुषेष्वहम् ।
सत्यवागस्तु भगवानयं च पुरुषोत्तमः ॥ १८

वैशंपायन उवाच ।

प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां सर्वेषां पश्यतां वनम् ॥ १९
पाण्डवाश्चापि गोविन्दं पुरस्कृत्य हतद्विषः ।
कृष्णद्वैपायनं चैव नारदं च महामुनिम् ॥ २०
द्रोणपुत्रस्य सहजं मणिमादाय सत्वराः ।
द्रौपदीमभ्यधावन्त प्रायोपेतां मनस्विनीम् ॥ २१
ततस्ते पुरुषव्याघ्राः सदश्वैरनिलोपमैः ।
अभ्ययुः सहदाशार्हाः शिबिरं पुनरेव ह ॥ २२
अवतीर्य रथाभ्यां तु त्वरमाणा महारथाः ।
ददृशुर्द्रौपदीं कृष्णमार्तामार्ततराः स्वयम् ॥ २३
तामुपेत्य निरानन्दां दुःखशोकसमन्विताम् ।
परिवार्य व्यतिष्ठन्त पाण्डवाः सहकेशवाः ॥ २४
ततो राज्ञाभ्यनुज्ञातो भीमसेनो महाबलः ।
प्रददौ तु मणिं दिव्यं वचनं चेदमब्रवीत् ॥ २५
अयं भद्रे तव मणिः पुत्रहन्ता जितः स ते ।
उत्तिष्ठ शोकमुत्सृज्य क्षत्रधर्ममनुस्मर ॥ २६
प्रयाणे वासुदेवस्य शमार्थमसितेक्षणे ।
यान्युक्तानि त्वया भीरु वाक्यानि मधुघातिनः ॥ २७
नैव मे पतयः सन्ति न पुत्रा भ्रातरो न च ।
नैव त्वमपि गोविन्द शममिच्छति राजनि ॥ २८
उक्तवत्यसि धीराणि वाक्यानि पुरुषोत्तमम् ।
क्षत्रधर्मानुरूपाणि तानि संस्मर्तुमर्हसि ॥ २९
हतो दुर्योधनः पापो राज्यस्य परिपन्थकः ।
दुःशासनस्य रुधिरं पीतं विस्फुरतो मया ॥ ३०
वैरस्य गतमानृण्यं न स्म वाच्या विवक्षताम् ।
जित्वा मुक्तो द्रोणपुत्रो ब्राह्मण्याद्गौरवेण च ॥ ३१
यशोऽस्य पातितं देवि शरीरं त्ववशेषितम् ।
वियोजितश्च मणिना न्यासितश्चायुधं भुवि ॥ ३२

द्रौपद्युवाच ।

केवलानृण्यमाप्तास्मि गुरुपुत्रो गुरुर्मम ।
शिरस्येतं मणिं राजा प्रतिबध्नातु भारत ॥ ३३

वैशंपायन उवाच ।

तं गृहीत्वा ततो राजा शिरस्येवाकरोत्तदा ।
गुरोरुच्छिष्टमित्येव द्रौपद्या वचनादपि ॥ ३४
ततो दिव्यं मणिवरं शिरसा धारयन्प्रभुः ।
शुशुभे स महाराजः सचन्द्र इव पर्वतः ॥ ३५

उत्तस्थौ पुत्रशोकार्ता ततः कृष्णा मनस्विनी ।
कृष्णं चापि महाबाहुं पर्यपृच्छत धर्मराट् ॥ ३६

इति श्रीमहाभारते सौप्तिकपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

वैशंपायन उवाच ।

हतेषु सर्वसैन्येषु सौप्तिके तै रथैस्त्रिभिः ।
शोचन्युधिष्ठिरो राजा दाशार्हमिदमब्रवीत् ॥ १
कथं नु कृष्ण पापेन क्षुद्रेणाक्लिष्टकर्मणा ।
द्रौणिना निहताः सर्वे मम पुत्रा महारथाः ॥ २
तथा कृतास्त्रा विक्रान्ताः सहस्रशतयोधिनः ।
द्रुपदस्यात्मजाश्चैव द्रोणपुत्रेण पातिताः ॥ ३
यस्य द्रोणो महेष्वासो न प्रादादाहवे मुखम् ।
तं जघ्ने रथिनां श्रेष्ठं धृष्टद्युम्नं कथं नु सः ॥ ४
किं नु तेन कृतं कर्म तथायुक्तं नरर्षभ ।
यदेकः शिबिरं सर्वमवधीन्नो गुरोः सुतः ॥ ५

वासुदेव उवाच ।

नूनं स देवदेवानामीश्वरेश्वरमव्ययम् ।
जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून् ॥ ६
प्रसन्नो हि महादेवो दद्यादमरतामपि ।
वीर्यं च गिरिशो दद्याद्येनेन्द्रमपि शातयेत् ॥ ७
वेदाहं हि महादेवं तत्त्वेन भरतर्षभ ।
यानि चास्य पुराणानि कर्माणि विविधान्युत ॥ ८
आदिरेष हि भूतानां मध्यमन्तश्च भारत ।
विचेष्टते जगच्चेदं सर्वमस्यैव कर्मणा ॥ ९
एवं सिसृक्षुर्भूतानि ददर्श प्रथमं विभुः ।
पितामहोऽब्रवीच्चैनं भूतानि सृज माचिरम् ॥ १०
हरिकेशस्तथेत्युक्त्वा भूतानां दोषदर्शिवान् ।
दीर्घकालं तपस्तेपे मग्नोऽम्भसि महातपाः ॥ ११
सुमहान्तं ततः कालं प्रतीक्ष्यैनं पितामहः ।
स्रष्टारं सर्वभूतानां ससर्ज मनसापरम् ॥ १२
सोऽब्रवीत्पितरं दृष्ट्वा गिरिशं मग्नमम्भसि ।
यदि मे नाग्रजस्त्वन्यस्ततः स्रक्ष्याम्यहं प्रजाः ॥१३
तमब्रवीत्पिता नास्ति त्वदन्यः पुरुषोऽग्रजः ।
स्थाणुरेष जले मग्नो विस्रब्धः कुरु वै कृतिम् ॥१४
स भूतान्यसृजत्सप्त दक्षादींस्तु प्रजापतीन् ।
यैरिमं व्यकरोत्सर्वं भूतग्रामं चतुर्विधम् ॥ १५
ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ।
बिभक्षयिषवो राजन्सहसा प्राद्रवंस्तदा ॥ १६
स भक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ।
आभ्यो मां भगवान्पातु वृत्तिरासां विधीयताम् ॥१७
ततस्ताभ्यो ददावन्नमोषधीः स्थावराणि च ।
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ॥ १८
विहितान्नाः प्रजास्तास्तु जग्मुस्तुष्टा यथागतम् ।
ततो ववृधिरे राजन्प्रीतिमत्यः स्वयोनिषु ॥ १९
भूतग्रामे विवृद्धे तु तुष्टे लोकगुरावपि ।
उदतिष्ठज्जलाज्ज्येष्ठः प्रजाश्चेमा ददर्श सः ॥ २०
बहुरूपाः प्रजा दृष्ट्वा विवृद्धाः स्वेन तेजसा ।
चुक्रोध भगवान्रुद्रो लिङ्गं स्वं चाप्यविध्यत ॥२१
तत्प्रविद्धं तदा भूमौ तथैव प्रत्यतिष्ठत ।
तमुवाचाव्ययो ब्रह्मा वचोभिः शमयन्निव ॥ २२
किं कृतं सलिले शर्व चिरकालं स्थितेन ते ।
किमर्थं चैतदुत्पाद्य भूमौ लिङ्गं प्रवेरितम् ॥ २३
सोऽब्रवीज्जातसंरम्भस्तदा लोकगुरुर्गुरुम् ।
प्रजाः सृष्टाः परेणेमाः किं करिष्याम्यनेन वै ॥ २४
तपसाधिगतं चान्नं प्रजार्थं मे पितामह ।
ओषध्यः परिवर्तेरन्यथैव सततं प्रजाः ॥ २५
एवमुक्त्वा तु संक्रुद्धो जगाम विमना भवः ।
गिरेर्मुञ्जवतः पादं तपस्तप्तुं महातपाः ॥ २६

इति श्रीमहाभारते सौप्तिकपर्वणि सप्तदशोऽध्यायः ॥ १७॥

१८

वासुदेव उवाच ।

ततो देवयुगेऽतीते देवा वै समकल्पयन् ।
यज्ञं वेदप्रमाणेन विधिवद्यष्टुमीप्सवः ॥ १
कल्पयामासुरव्यग्रा देशान्यज्ञोचितांस्ततः ।
भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च ॥ २
ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः ।
नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप ॥ ३
सोऽकल्प्यमाने भागे तु कृत्तिवासा मखेऽमरैः ।
तरसा भागमन्विच्छन्धनुरादौ ससर्ज ह ॥ ४
लोकयज्ञः क्रियायज्ञो गृहयज्ञः सनातनः ।
पञ्चभूतमयो यज्ञो नृयज्ञश्चैव पञ्चमः ॥ ५
लोकयज्ञेन यज्ञैषी कपर्दी विदधे धनुः ।
धनुः सृष्टमभूत्तस्य पञ्चकिष्कुप्रमाणतः ॥ ६
वषट्कारोऽभवज्ज्या तु धनुषस्तस्य भारत ।
यज्ञाङ्गानि च चत्वारि तस्य संहननेऽभवन् ॥ ७
ततः क्रुद्धो महादेवस्तदुपादाय कार्मुकम् ।
आजगामाथ तत्रैव यत्र देवाः समीजिरे ॥ ८
तमात्तकार्मुकं दृष्ट्वा ब्रह्मचारिणमव्ययम् ।
विव्यथे पृथिवी देवी पर्वताश्च चकम्पिरे ॥ ९
न ववौ पवनश्चैव नाग्निर्जज्वाल चैधितः ।
व्यभ्रमच्चापि संविग्नं दिवि नक्षत्रमण्डलम् ॥ १०
न बभौ भास्करश्चापि सोमः श्रीमुक्तमण्डलः ।
तिमिरेणाकुलं सर्वमाकाशं चाभवद्वृतम् ॥ ११
अभिभूतास्ततो देवा विषयान्न प्रजज्ञिरे ।
न प्रत्यभाच्च यज्ञस्तान्वेदा बभ्रंशिरे तदा ॥ १२
ततः स यज्ञं रौद्रेण विव्याध हृदि पत्रिणा ।
अपक्रान्तस्ततो यज्ञो मृगो भूत्वा सपावकः ॥ १३
स तु तेनैव रूपेण दिवं प्राप्य व्यरोचत ।
अन्वीयमानो रुद्रेण युधिष्ठिर नभस्तले ॥ १४
अपक्रान्ते ततो यज्ञे संज्ञा न प्रत्यभात्सुरान् ।
नष्टसंज्ञेषु देवेषु न प्रज्ञायत किंचन ॥ १५
त्र्यम्बकः सवितुर्बाहू भगस्य नयने तथा ।
पूष्णश्च दशनान्क्रुद्धो धनुष्कोट्या व्यशातयत् ॥ १६
प्राद्रवन्त ततो देवा यज्ञाङ्गानि च सर्वशः ।
केचित्तत्रैव घूर्णन्तो गतासव इवाभवन् ॥ १७
स तु विद्राव्य तत्सर्वं शितिकण्ठोऽवहस्य च ।
अवष्टभ्य धनुष्कोटिं रुरोध विबुधांस्ततः ॥ १८
ततो वागमरैरुक्ता ज्यां तस्य धनुषोऽच्छिनत् ।
अथ तत्सहसा राजंश्छिन्नज्यं विस्फुरद्धनुः ॥ १९
ततो विधनुषं देवा देवश्रेष्ठमुपागमन् ।
शरणं सह यज्ञेन प्रसादं चाकरोत्प्रभुः ॥ २०
ततः प्रसन्नो भगवान्प्रास्यत्कोपं जलाशये ।
स जलं पावको भूत्वा शोषयत्यनिशं प्रभो ॥ २१
भगस्य नयने चैव बाहू च सवितुस्तथा ।
प्रादात्पूष्णश्च दशनान्पुनर्यज्ञं च पाण्डव ॥ २२
ततः सर्वमिदं स्वस्थं बभूव पुनरेव ह ।
सर्वाणि च हवींष्यस्य देवा भागमकल्पयन् ॥ २३
तस्मिन्क्रुद्धेऽभवत्सर्वमस्वस्थं भुवनं विभो ।
प्रसन्ने च पुनः स्वस्थं स प्रसन्नोऽस्य वीर्यवान् ॥ २४
ततस्ते निहताः सर्वे तव पुत्रा महारथाः ।
अन्ये च बहवः शूराः पाञ्चालाश्च सहानुगाः ॥ २५
न तन्मनसि कर्तव्यं न हि तद्द्रौणिना कृतम् ।
महादेवप्रसादः स कुरु कार्यमनन्तरम् ॥ २६

इति श्रीमहाभारते सौप्तिकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

॥ समाप्तं ऐषीकपर्व ॥

॥ समाप्तं सौप्तिकपर्व ॥

स्त्रीपर्व

१

जनमेजय उवाच ।

हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराजः श्रुत्वा किमकरोन्मुने ॥ १
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ २
अश्वत्थाम्नः श्रुतं कर्म शापश्चान्योन्यकारितः ।
वृत्तान्तमुत्तरं ब्रूहि यदभाषत संजयः ॥ ३

वैशंपायन उवाच ।

हते पुत्रशते दीनं छिन्नशाखमिव द्रुमम् ।
पुत्रशोकाभिसंतप्तं धृतराष्ट्रं महीपतिम् ॥ ४
ध्यानमूकत्वमापन्नं चिन्तया समभिप्लुतम् ।
अभिगम्य महाप्राज्ञः संजयो वाक्यमब्रवीत् ॥ ५
किं शोचसि महाराज नास्ति शोके सहायता ।
अक्षौहिण्यो हताश्चाष्टौ दश चैव विशां पते ।
निर्जनेयं वसुमती शून्या संप्रति केवला ॥ ६
नानादिग्भ्यः समागम्य नानादेश्या नराधिपाः ।
सहितास्तव पुत्रेण सर्वे वै निधनं गताः ॥ ७
पितॄणां पुत्रपौत्राणां ज्ञातीनां सुहृदां तथा ।
गुरूणां चानुपूर्व्येण प्रेतकार्याणि कारय ॥ ८

वैशंपायन उवाच ।

तच्छ्रुत्वा करुणं वाक्यं पुत्रपौत्रवधार्दितः ।
पपात भुवि दुर्धर्षो वाताहत इव द्रुमः ॥ ९

धृतराष्ट्र उवाच ।

हतपुत्रो हतामात्यो हतसर्वसुहृज्जनः ।
दुःखं नूनं भविष्यामि विचरन्पृथिवीमिमाम् ॥१०
किं नु बन्धुविहीनस्य जीवितेन ममाद्य वै ।
लूनपक्षस्य इव मे जराजीर्णस्य पक्षिणः ॥ ११
हतराज्यो हतसुहृद्धतचक्षुश्च वै तथा ।
न भ्राजिष्ये महाप्राज्ञ क्षीणरश्मिरिवांशुमान् ॥ १२
न कृतं सुहृदो वाक्यं जामदग्न्यस्य जल्पतः ।
नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ॥ १३
सभामध्ये तु कृष्णेन यच्छ्रेयोऽभिहितं मम ।
अलं वैरेण ते राजन्पुत्रः संगृह्यतामिति ॥ १४
तच्च वाक्यमकृत्वाहं भृशं तप्यामि दुर्मतिः ।
न हि श्रोतास्मि भीष्मस्य धर्मयुक्तं प्रभाषितम् ॥१५
दुर्योधनस्य च तथा वृषभस्येव नर्दतः ।
दुःशासनवधं श्रुत्वा कर्णस्य च विपर्ययम् ।
द्रोणसूर्योपरागं च हृदयं मे विदीर्यते ॥ १६
न स्मराम्यात्मनः किंचित्पुरा संजय दुष्कृतम् ।
यस्येदं फलमद्येह मया मूढेन भुज्यते ॥ १७
नूनं ह्यपकृतं किंचिन्मया पूर्वेषु जन्मसु ।
येन मां दुःखभागेषु धाता कर्मसु युक्तवान् ॥ १८
परिणामश्च वयसः सर्वबन्धुक्षयश्च मे ।

सुहृन्मित्रविनाशश्च दैवयोगादुपागतः ।
कोऽन्योऽस्ति दुःखिततरो मया लोके पुमानिह ॥ १९
तन्मामद्यैव पश्यन्तु पाण्डवाः संशितव्रतम् ।
विवृतं ब्रह्मलोकस्य दीर्घमध्वानमास्थितम् ॥ २०

वैशंपायन उवाच ।

तस्य लालप्यमानस्य बहुशोकं विचिन्वतः ।
शोकापहं नरेन्द्रस्य संजयो वाक्यमब्रवीत् ॥ २१
शोकं राजन्व्यपनुद श्रुतास्ते वेदनिश्चयाः ।
शास्त्रागमाश्च विविधा वृद्धेभ्यो नृपसत्तम ।
सृञ्जये पुत्रशोकार्ते यदूचुर्मुनयः पुरा ॥ २२
तथा यौवनजं दर्पमास्थिते ते सुते नृप ।
न त्वया सुहृदां वाक्यं ब्रुवतामवधारितम् ।
स्वार्थश्च न कृतः कश्चिल्लुब्धेन फलगृद्धिना ॥ २३
तव दुःशासनो मन्त्री राधेयश्च दुरात्मवान् ।
शकुनिश्चैव दुष्टात्मा चित्रसेनश्च दुर्मतिः ।
शल्यश्च येन वै सर्वं शल्यभूतं कृतं जगत् ॥ २४
कुरुवृद्धस्य भीष्मस्य गान्धार्या विदुरस्य च ।
न कृतं वचनं तेन तव पुत्रेण भारत ॥ २५
न धर्मः सत्कृतः कश्चिन्नित्यं युद्धमिति ब्रुवन् ।
क्षपिताः क्षत्रियाः सर्वे शत्रूणां वर्धितं यशः ॥२६
मध्यस्थो हि त्वमप्यासीर्न क्षमं किंचिदुक्तवान् ।
धूर्धरेण त्वया भारस्तुलया न समं धृतः ॥ २७
आदावेव मनुष्येण वर्तितव्यं यथा क्षमम् ।
यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ॥ २८
पुत्रगृद्ध्या त्वया राजन्प्रियं तस्य चिकीर्षता ।
पश्चात्तापमिदं प्राप्तं न त्वं शोचितुमर्हसि ॥ २९
मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति ।
स भ्रष्टो मधुलोभेन शोचत्येव यथा भवान् ॥३०
अर्थान्न शोचन्प्राप्नोति न शोचन्विन्दते सुखम् ।
न शोचञ्श्रियमाप्नोति न शोचन्विन्दते परम् ॥ ३१
स्वयमुत्पादयित्वाग्निं वस्त्रेण परिवेष्टयेत् ।
दह्यमानो मनस्तापं भजते न स पण्डितः ॥ ३२
त्वयैव ससुतेनायं वाक्यवायुसमीरितः ।
लोभाज्येन च संसिक्तो ज्वलितः पार्थपावकः ॥३३
तस्मिन्समिद्धे पतिताः शलभा इव ते सुताः ।
तान्केशवार्चिर्निर्दग्धान्न त्वं शोचितुमर्हसि ॥ ३४
यच्चाश्रुपातकलिलं वदनं वहसे नृप ।
अशास्त्रदृष्टमेतद्धि न प्रशंसन्ति पण्डिताः ॥ ३५
विस्फुलिङ्गा इव ह्येतान्दहन्ति किल मानवान् ।
जहीहि मन्युं बुद्ध्या वै धारयात्मानमात्मना ॥ ३६
एवमाश्वासितस्तेन संजयेन महात्मना ।
विदुरो भूय एवाह बुद्धिपूर्वं परंतप ॥ ३७

इति श्रीमहाभारते स्त्रीपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

ततोऽमृतसमैर्वाक्यैर्ह्लादयन्पुरुषर्षभम् ।
वैचित्रवीर्यं विदुरो यदुवाच निबोध तत् ॥ १

विदुर उवाच ।

उत्तिष्ठ राजन्किं शेषे धारयात्मानमात्मना ।
स्थिरजङ्गममर्त्यानां सर्वेषामेष निर्णयः ॥ २
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥ ३
यदा शूरं च भीरुं च यमः कर्षति भारत ।
तत्किं न योत्स्यन्ति हि ते क्षत्रियाः क्षत्रियर्षभ ॥ ४
अयुध्यमानो म्रियते युध्यमानश्च जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ ५
न चाप्येतान्हतान्युद्धे राजञ्शोचितुमर्हसि ।
प्रमाणं यदि शास्त्राणि गतास्ते परमां गतिम् ॥ ६
सर्वे स्वाध्यायवन्तो हि सर्वे च चरितव्रताः ।

सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ॥ ७
अदर्शनादापतिताः पुनश्चादर्शनं गताः ।
न ते तव न तेषां त्वं तत्र का परिदेवना ॥ ८
हतोऽपि लभते स्वर्गं हत्वा च लभते यशः ।
उभयं नो बहुगुणं नास्ति निष्फलता रणे ॥ ९
तेषां कामदुघाँल्लोकानिन्द्रः संकल्पयिष्यति ।
इन्द्रस्यातिथयो ह्येते भवन्ति पुरुषर्षभ ॥ १०
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
स्वर्गं यान्ति तथा मर्त्या यथा शूरा रणे हताः ॥ ११
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि कस्य ते कस्य वा वयम् ॥ १२
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ १३
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ।
न मध्यस्थः क्वचित्कालः सर्वं कालः प्रकर्षति ॥ १४
अनित्यं जीवितं रूपं यौवनं द्रव्यसंचयः ।
आरोग्यं प्रियसंवासो गृध्येदेषु न पण्डितः ॥ १५
न जानपदिकं दुःखमेकः शोचितुमर्हसि ।
अप्यभावेन युज्येत तच्चास्य न विवर्तते ॥ १६
अशोचन्प्रतिकुर्वीत यदि पश्येत्पराक्रमम् ।
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ।
चिन्त्यमानं हि न व्येति भूयश्चापि विवर्धते ॥ १७
अनिष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च ।
मनुष्या मानसैर्दुःखैर्युज्यन्ते येऽल्पबुद्धयः ॥ १८
नार्थो न धर्मो न सुखं यदेतदनुशोचसि ।
न च नापैति कार्यार्थात्त्रिवर्गाच्चैव भ्रश्यते ॥ १९
अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः ।
असंतुष्टाः प्रमुह्यन्ति संतोषं यान्ति पण्डिताः ॥ २०
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतज्ज्ञानस्य सामर्थ्यं न बालैः समतामियात् ॥ २१
शयानं चानुशयति तिष्ठन्तं चानुतिष्ठति ।
अनुधावति धावन्तं कर्म पूर्वकृतं नरम् ॥ २२
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां तत्तत्फलमुपाश्नुते ॥ २३

इति श्रीमहाभारते स्त्रीपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

धृतराष्ट्र उवाच ।

सुभाषितैर्महाप्राज्ञ शोकोऽयं विगतो मम ।
भूय एव तु वाक्यानि श्रोतुमिच्छामि तत्त्वतः ॥ १
अनिष्टानां च संसर्गादिष्टानां च विवर्जनात् ।
कथं हि मानसैर्दुःखैः प्रमुच्यन्तेऽत्र पण्डिताः ॥ २

विदुर उवाच ।

यतो यतो मनो दुःखात्सुखाद्वापि प्रमुच्यते ।
ततस्ततः शमं लब्ध्वा सुगतिं विन्दते बुधः ॥ ३
अशाश्वतमिदं सर्वं चिन्त्यमानं नरर्षभ ।
कदलीसंनिभो लोकः सारो ह्यस्य न विद्यते ॥ ४
गृहाण्येव हि मर्त्यानामाहुर्देहानि पण्डिताः ।
कालेन विनियुज्यन्ते सत्त्वमेकं तु शोभनम् ॥ ५
यथा जीर्णमजीर्णं वा वस्त्रं त्यक्त्वा तु वै नरः ।
अन्यद्रोचयते वस्त्रमेवं देहाः शरीरिणाम् ॥ ६
वैचित्रवीर्य वासं हि दुःखं वा यदि वा सुखम् ।
प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्मणा ॥ ७
कर्मणा प्राप्यते स्वर्गं सुखं दुःखं च भारत ।
ततो वहति तं भारमवशः स्ववशोऽपि वा ॥ ८
यथा च मृन्मयं भाण्डं चक्रारूढं विपद्यते ।
किंचित्प्रक्रियमाणं वा कृतमात्रमथापि वा ॥ ९
छिन्नं वाप्यवरोप्यन्तमवतीर्णमथापि वा ।
आर्द्रं वाप्यथ वा शुष्कं पच्यमानमथापि वा ॥ १०
अवतार्यमाणमा पाकादुद्धृतं वापि भारत ।

अथ वा परिभुज्यन्तमेवं देहाः शरीरिणाम् ॥ ११
गर्भस्थो वा प्रसूतो वाप्यथ वा दिवसान्तरः ।
अर्धमासगतो वापि मासमात्रगतोऽपि वा ॥ १२
संवत्सरगतो वापि द्विसंवत्सर एव वा ।
यौवनस्थोऽपि मध्यस्थो वृद्धो वापि विपद्यते ॥१३
प्राक्कर्मभिस्तु भूतानि भवन्ति न भवन्ति च ।
एवं सांसिद्धिके लोके किमर्थमनुतप्यसे ॥ १४
यथा च सलिले राजन्क्रीडार्थमनुसंचरन् ।
उन्मज्जेच्च निमज्जेच्च किंचित्सत्त्वं नराधिप ॥ १५
एवं संसारगहनादुन्मज्जननिमज्जनात् ।
कर्मभोगेन बध्यन्तः क्लिश्यन्ते येऽल्पबुद्धयः ॥ १६
ये तु प्राज्ञाः स्थिताः सत्ये संसारान्तगवेषिणः ।
समागमज्ञा भूतानां ते यान्ति परमां गतिम् ॥१७

इति श्रीमहाभारते स्त्रीपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

धृतराष्ट्र उवाच ।

कथं संसारगहनं विज्ञेयं वदतां वर ।
एतदिच्छाम्यहं श्रोतुं तत्त्वमाख्याहि पृच्छतः ॥ १

विदुर उवाच ।

जन्मप्रभृति भूतानां क्रियाः सर्वाः शृणु प्रभो ।
पूर्वमेवेह कलले वसते किंचिदन्तरम् ॥ २
ततः स पञ्चमेऽतीते मासे मांसं प्रकल्पयेत् ।
ततः सर्वाङ्गसंपूर्णो गर्भो मासे प्रजायते ॥ ३
अमेध्यमध्ये वसति मांसशोणितलेपने ।
ततस्तु वायुवेगेन ऊर्ध्वपादो ह्यधःशिराः ॥ ४
योनिद्वारमुपागम्य बहून्क्लेशान्समृच्छति ।
योनिसंपीडनाच्चैव पूर्वकर्मभिरन्वितः ॥ ५
तस्मान्मुक्तः स संसारादन्यान्पश्यत्युपद्रवान् ।
ग्रहास्तमुपसर्पन्ति सारमेया इवामिषम् ॥ ६
ततः प्राप्तोत्तरे काले व्याधयश्चापि तं तथा ।
उपसर्पन्ति जीवन्तं बध्यमानं स्वकर्मभिः ॥ ७
बद्धमिन्द्रियपाशैस्तं सङ्गस्वादुभिरातुरम् ।
व्यसनान्युपवर्तन्ते विविधानि नराधिप ।
बध्यमानश्च तैर्भूयो नैव तृप्तिमुपैति सः ॥ ८
अयं न बुध्यते तावद्यमलोकमथागतम् ।
यमदूतैर्विकृष्यंश्च मृत्युं कालेन गच्छति ॥ ९
वाग्घीनस्य च यन्मात्रमिष्टानिष्टं कृतं मुखे ।
भूय एवात्मनात्मानं बध्यमानमुपेक्षते ॥ १०
अहो विनिकृतो लोको लोभेन च वशीकृतः ।
लोभक्रोधमदोन्मत्तो नात्मानमवबुध्यते ॥ ११
कुलीनत्वेन रमते दुष्कुलीनान्विकुत्सयन् ।
धनदर्पेण दृप्तश्च दरिद्रान्परिकुत्सयन् ॥ १२
मूर्खानिति परानाह नात्मानं समवेक्षते ।
शिक्षां क्षिपति चान्येषां नात्मानं शास्तुमिच्छति ॥
अध्रुवे जीवलोकेऽस्मिन्यो धर्ममनुपालयन् ।
जन्मप्रभृति वर्तेत प्राप्नुयात्परमां गतिम् ॥ १४
एवं सर्वं विदित्वा वै यस्तत्त्वमनुवर्तते ।
स प्रमोक्षाय लभते पन्थानं मनुजाधिप ॥ १५

इति श्रीमहाभारते स्त्रीपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

धृतराष्ट्र उवाच ।

यदिदं धर्मगहनं बुद्ध्या समनुगम्यते ।
एतद्विस्तरशः सर्वं बुद्धिमार्गं प्रशंस मे ॥ १

विदुर उवाच ।

अत्र ते वर्तयिष्यामि नमस्कृत्वा स्वयंभुवे ।
यथा संसारगहनं वदन्ति परमर्षयः ॥ २
कश्चिन्महति संसारे वर्तमानो द्विजः किल ।
वनं दुर्गमनुप्राप्तो महत्क्रव्यादसंकुलम् ॥ ३

सिंहव्याघ्रगजाकारैरतिघोरैर्महाशनैः ।
समन्तात्संपरिक्षिप्तं मृत्योरपि भयप्रदम् ॥ ४
तदस्य दृष्ट्वा हृदयमुद्वेगमगमत्परम् ।
अभ्युच्छ्रयश्च रोम्णां वै विक्रियाश्च परंतप ॥ ५
स तद्वनं व्यनुसरन्विप्रधावन्नितस्ततः ।
वीक्षमाणो दिशः सर्वाः शरणं क भवेदिति ॥ ६
स तेषां छिद्रमन्विच्छन्प्रद्रुतो भयपीडितः ।
न च निर्याति वै दूरं न च तैर्विप्रयुज्यते ॥ ७
अथापश्यद्वनं घोरं समन्ताद्वागुरावृतम् ।
बाहुभ्यां संपरिष्वक्तं स्त्रिया परमघोरया ॥ ८
पञ्चशीर्षधरैर्नागैः शैलैरिव समुन्नतैः ।
नभःस्पृशैर्महावृक्षैः परिक्षिप्तं महावनम् ॥ ९
वनमध्ये च तत्राभूदुदपानः समावृतः ।
वल्लीभिस्तृणछन्नाभिर्गूढाभिरभिसंवृतः ॥ १०
पपात स द्विजस्तत्र निगूढे सलिलाशये ।
विलग्नश्चाभवत्तस्मिँल्लतासंतानसंकटे ॥ ११
पनसस्य यथा जातं वृन्तबद्धं महाफलम् ।
स तथा लम्बते तत्र ऊर्ध्वपादो ह्यधःशिराः ॥ १२
अथ तत्रापि चान्योऽस्य भूयो जात उपद्रवः ।
कूपवीनाहवेलायामपश्यत महागजम् ॥ १३
षड्वक्त्रं कृष्णशबलं द्विषट्कपदचारिणम् ।
क्रमेण परिसर्पन्तं वल्लीवृक्षसमावृतम् ॥ १४
तस्य चापि प्रशाखासु वृक्षशाखावलम्बिनः ।
नानारूपा मधुकरा घोररूपा भयावहाः ।
आसते मधु संभृत्य पूर्वमेव निकेतजाः ॥ १५
भूयो भूयः समीहन्ते मधूनि भरतर्षभ ।
स्वादनीयानि भूतानां न यैर्बालोऽपि तृप्यते ॥१६
तेषां मधूनां बहुधा धारा प्रस्रवते सदा ।
तां लम्बमानः स पुमान्धारां पिबति सर्वदा ।
न चास्य तृष्णा विरता पिबमानस्य संकटे ॥ १७
अभीप्सति च तां नित्यमतृप्तः स पुनः पुनः ।
न चास्य जीविते राजन्निर्वेदः समजायत ॥ १८
तत्रैव च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णाः श्वेताश्च तं वृक्षं कुट्टयन्ति स्म मूषकाः॥१९
व्यालैश्च वनदुर्गान्ते स्त्रिया च परमोग्रया ।
कूपाधस्ताच्च नागेन वीनाहे कुञ्जरेण च ॥ २०
वृक्षप्रपाताच्च भयं मूषकेभ्यश्च पञ्चमम् ।
मधुलोभान्मधुकरैः षष्ठमाहुर्महद्भयम् ॥ २१
एवं स वसते तत्र क्षिप्तः संसारसागरे ।
न चैव जीविताशायां निर्वेदमुपगच्छति ॥ २२

इति श्रीमहाभारते स्त्रीपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

धृतराष्ट्र उवाच ।

अहो खलु महद्दुःखं कृच्छ्रवासं वसत्यसौ ।
कथं तस्य रतिस्तत्र तुष्टिर्वा वदतां वर ॥ १
स देशः क नु यत्रासौ वसते धर्मसंकटे ।
कथं वा स विमुच्येत नरस्तस्मान्महाभयात् ॥ २
एतन्मे सर्वमाचक्ष्व साधु चेष्टामहे तथा ।
कृपा मे महती जाता तस्याभ्युद्धरणेन हि ॥ ३

विदुर उवाच ।

उपमानमिदं राजन्मोक्षविद्भिरुदाहृतम् ।
सुगतिं विन्दते येन परलोकेषु मानवः ॥ ४
यत्तदुच्यति कान्तारं महत्संसार एव सः ।
वनं दुर्गं हि यत्त्वेतत्संसारगहनं हि तत् ॥ ५
ये च ते कथिता व्याला व्याधयस्ते प्रकीर्तिताः ।
या सा नारी बृहत्काया अधितिष्ठति तत्र वै ।
तामाहुस्तु जरां प्राज्ञा वर्णरूपविनाशिनीम् ॥ ६
यस्तत्र कूपो नृपते स तु देहः शरीरिणाम् ।

यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः ।
अन्तकः सर्वभूतानां देहिनां सर्वहार्यसौ ॥ ७
कूपमध्ये च या जाता वल्ली यत्र स मानवः ।
प्रताने लम्बते सा तु जीविताशा शरीरिणाम् ॥ ८
स यस्तु कूपवीनाहे तं वृक्षं परिसर्पति ।
षड्वक्त्रः कुञ्जरो राजन्स तु संवत्सरः स्मृतः ।
मुखानि ऋतवो मासाः पादा द्वादश कीर्तिताः ॥९
ये तु वृक्षं निकृन्तन्ति मूषकाः सततोत्थिताः ।
राज्यहानि तु तान्याहुर्भूतानां परिचिन्तकाः ।
ये ते मधुकरास्तत्र कामास्ते परिकीर्तिताः ॥ १०
यास्तु ता बहुशो धाराः स्रवन्ति मधुनिस्रवम् ।
तांस्तु कामरसान्विद्याद्यत्र मज्जन्ति मानवाः ॥ ११
एवं संसारचक्रस्य परिवृत्तिं स्म ये विदुः ।
ते वै संसारचक्रस्य पाशांश्छिन्दन्ति वै बुधाः ॥१२

इति श्रीमहाभारते स्त्रीपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

धृतराष्ट्र उवाच ।

अहोऽभिहितमाख्यानं भवता तत्त्वदर्शिना ।
भूय एव तु मे हर्षः श्रोतुं वागमृतं तव ॥ १

विदुर उवाच ।

शृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरम् ।
यच्छ्रुत्वा विप्रमुच्यन्ते संसारेभ्यो विचक्षणाः ॥ २
यथा तु पुरुषो राजन्दीर्घमध्वानमास्थितः ।
क्वचित्क्वचिच्छ्रमात्स्थाता कुरुते वासमेव वा ॥ ३
एवं संसारपर्याये गर्भवासेषु भारत ।
कुर्वन्ति दुर्बुधा वासं मुच्यन्ते तत्र पण्डिताः ॥ ४
तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः ।
यत्तु संसारगहनं वनमाहुर्मनीषिणः ॥ ५
सोऽयं लोकसमावर्तो मर्त्यानां भरतर्षभ ।
चराणां स्थावराणां च गृध्येत्तत्र न पण्डितः ॥ ६
शारीरा मानसाश्चैव मर्त्यानां ये तु व्याधयः ।
प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः कथिता बुधैः ॥ ७
क्लिश्यमानाश्च तैर्नित्यं हन्यमानाश्च भारत ।
स्वकर्मभिर्महाव्यालैर्नोद्विजन्त्यल्पबुद्धयः ॥ ८
अथापि तैर्विमुच्येत व्याधिभिः पुरुषो नृप ।
आवृणोत्येव तं पश्चाज्जरा रूपविनाशिनी ॥ ९
शब्दरूपरसस्पर्शैर्गन्धैश्च विविधैरपि ।
मज्जमानं महापङ्के निरालम्बे समन्ततः ॥ १०
संवत्सरर्तवो मासाः पक्षाहोरात्रसंधयः ।
क्रमेणास्य प्रलुम्पन्ति रूपमायुस्तथैव च ॥ ११
एते कालस्य निधयो नैताञ्जानन्ति दुर्बुधाः ।
अत्राभिलिखितान्याहुः सर्वभूतानि कर्मणा ॥ १२
रथं शरीरं भूतानां सत्त्वमाहुस्तु सारथिम् ।
इन्द्रियाणि हयानाहुः कर्मबुद्धिश्च रश्मयः ॥ १३
तेषां हयानां यो वेगं धावतामनुधावति ।
स तु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्तते ॥ १४
यस्तान्यमयते बुद्ध्या स यन्ता न निवर्तते ।
याम्यमाहू रथं ह्येनं मुह्यन्ते येन दुर्बुधाः ॥ १५
स चैतत्प्राप्नुते राजन्यत्त्वं प्राप्तो नराधिप ।
राज्यनाशं सुहृन्नाशं सुतनाशं च भारत ॥ १६
अनुतर्षुलमेवैतद्दुःखं भवति भारत ।
साधुः परमदुःखानां दुःखभैषज्यमाचरेत् ॥ १७
न विक्रमो न चाप्यर्थो न मित्रं न सुहृज्जनः ।
तथोन्मोचयते दुःखाद्यथात्मा स्थिरसंयमः ॥ १८
तस्मान्मैत्रं समास्थाय शीलमापद्य भारत ।
दमस्त्यागोऽप्रमादश्च ते त्रयो ब्रह्मणो हयाः ॥ १९
शीलरश्मिसमायुक्ते स्थितो यो मानसे रथे ।
त्यक्त्वा मृत्युभयं राजन्ब्रह्मलोकं स गच्छति ॥२०

इति श्रीमहाभारते स्त्रीपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

८

वैशंपायन उवाच ।

विदुरस्य तु तद्वाक्यं निशम्य कुरुसत्तमः ।
पुत्रशोकाभिसंतप्तः पपात भुवि मूर्छितः ॥ १
तं तथा पतितं भूमौ निःसंज्ञं प्रेक्ष्य बान्धवाः ।
कृष्णद्वैपायनश्चैव क्षत्ता च विदुरस्तथा ॥ २
संजयः सुहृदश्चान्ये द्वाःस्था ये चास्य संमताः ।
जलेन सुखशीतेन तालवृन्तैश्च भारत ॥ ३
पस्पृशुश्च करैर्गात्रं वीजमानाश्च यत्नतः ।
अन्वासन्सुचिरं कालं धृतराष्ट्रं तथागतम् ॥ ४
अथ दीर्घस्य कालस्य लब्धसंज्ञो महीपतिः ।
विललाप चिरं कालं पुत्राधिभिरभिप्लुतः ॥ ५
धिगस्तु खलु मानुष्यं मानुष्ये च परिग्रहम् ।
यतोमूलानि दुःखानि संभवन्ति मुहुर्मुहुः ॥ ६
पुत्रनाशेऽर्थनाशे च ज्ञातिसंबन्धिनामपि ।
प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो ॥ ७
येन दह्यन्ति गात्राणि येन प्रज्ञा विनश्यति ।
येनाभिभूतः पुरुषो मरणं बहु मन्यते ॥ ८
तदिदं व्यसनं प्राप्तं मया भाग्यविपर्ययात् ।
तच्चैवाहं करिष्यामि अद्यैव द्विजसत्तम ॥ ९
इत्युक्त्वा तु महात्मानं पितरं ब्रह्मवित्तमम् ।
धृतराष्ट्रोऽभवन्मूढः शोकं च परमं गतः ।
अभूच्च तूष्णीं राजासौ ध्यायमानो महीपते ॥ १०
तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनः प्रभुः ।
पुत्रशोकाभिसंतप्तं पुत्रं वचनमब्रवीत् ॥ ११
धृतराष्ट्र महाबाहो यत्त्वां वक्ष्यामि तच्छृणु ।
श्रुतवानसि मेधावी धर्मार्थकुशलस्तथा ॥ १२
न तेऽस्त्यविदितं किंचिद्वेदितव्यं परंतप ।
अनित्यतां हि मर्त्यानां विजानासि न संशयः ॥ १३
अध्रुवे जीवलोके च स्थाने वाशाश्वते सति ।
जीविते मरणान्ते च कस्माच्छोचसि भारत ॥ १४
प्रत्यक्षं तव राजेन्द्र वैरस्यास्य समुद्भवः ।
पुत्रं ते कारणं कृत्वा कालयोगेन कारितः ॥ १५
अवश्यं भवितव्ये च कुरूणां वैशसे नृप ।
कस्माच्छोचसि ताञ्शूरान्गतान्परमिकां गतिम् ॥ १६
जानता च महाबाहो विदुरेण महात्मना ।
यतितं सर्वयत्नेन शमं प्रति जनेश्वर ॥ १७
न च दैवकृतो मार्गः शक्यो भूतेन केनचित् ।
घटतापि चिरं कालं नियन्तुमिति मे मतिः ॥ १८
देवतानां हि यत्कार्यं मया प्रत्यक्षतः श्रुतम् ।
तत्तेऽहं संप्रवक्ष्यामि कथं स्थैर्यं भवेत्तव ॥ १९
पुराहं त्वरितो यातः सभामैन्द्रीं जितक्लमः ।
अपश्यं तत्र च तदा समवेतान्दिवौकसः ।
नारदप्रमुखांश्चापि सर्वान्देवऋषींस्तथा ॥ २०
तत्र चापि मया दृष्टा पृथिवी पृथिवीपते ।
कार्यार्थमुपसंप्राप्ता देवतानां समीपतः ॥ २१
उपगम्य तदा धात्री देवानाह समागतान् ।
यत्कार्यं मम युष्माभिर्ब्रह्मणः सदने तदा ।
प्रतिज्ञातं महाभागास्तच्छीघ्रं संविधीयताम् ॥ २२
तस्यास्तद्वचनं श्रुत्वा विष्णुर्लोकनमस्कृतः ।
उवाच प्रहसन्वाक्यं पृथिवीं देवसंसदि ॥ २३
धृतराष्ट्रस्य पुत्राणां यस्तु ज्येष्ठः शतस्य वै ।
दुर्योधन इति ख्यातः स ते कार्यं करिष्यति ।
तं च प्राप्य महीपालं कृतकृत्या भविष्यसि ॥ २४
तस्यार्थे पृथिवीपालाः कुरुक्षेत्रे समागताः ।
अन्योन्यं घातयिष्यन्ति दृढैः शस्त्रैः प्रहारिणः ॥ २५
ततस्ते भविता देवि भारस्य युधि नाशनम् ।
गच्छ शीघ्रं स्वकं स्थानं लोकान्धारय शोभने ॥ २६
स एष ते सुतो राजँल्लोकसंहारकारणात् ।
कलेरंशः समुत्पन्नो गान्धार्या जठरे नृप ॥ २७

अमर्षी चपलश्चापि क्रोधनो दुष्प्रसाधनः ।
दैवयोगात्समुत्पन्ना भ्रातरश्चास्य तादृशाः ॥ २८
शकुनिर्मातुलश्चैव कर्णश्च परमः सखा ।
समुत्पन्ना विनाशार्थं पृथिव्यां सहिता नृपाः ।
एतमर्थं महाबाहो नारदो वेद तत्त्वतः ॥ २९
आत्मापराधात्पुत्रास्ते विनष्टाः पृथिवीपते ।
मा ताञ्शोचस्व राजेन्द्र न हि शोकेऽस्ति कारणम् ॥
न हि ते पाण्डवाः स्वल्पमपराध्यन्ति भारत ।
पुत्रास्तव दुरात्मानो यैरियं घातिता मही ॥ ३१
नारदेन च भद्रं ते पूर्वमेव न संशयः ।
युधिष्ठिरस्य समितौ राजसूये निवेदितम् ॥ ३२
पाण्डवाः कौरवाश्चैव समासाद्य परस्परम् ।
न भविष्यन्ति कौन्तेय यत्ते कृत्यं तदाचर ॥ ३३
नारदस्य वचः श्रुत्वा तदाशोचन्त पाण्डवाः ।
एतत्ते सर्वमाख्यातं देवगुह्यं सनातनम् ॥ ३४
कथं ते शोकनाशः स्यात्प्राणेषु च दया प्रभो ।
स्नेहश्च पाण्डुपुत्रेषु ज्ञात्वा दैवकृतं विधिम् ॥ ३५
एष चार्थो महाबाहो पूर्वमेव मया श्रुतः ।
कथितो धर्मराजस्य राजसूये क्रतूत्तमे ॥ ३६
यतितं धर्मपुत्रेण मया गुह्ये निवेदिते ।
अविग्रहे कौरवाणां दैवं तु बलवत्तरम् ॥ ३७
अनतिक्रमणीयो हि विधी राजन्कथंचन ।
कृतान्तस्य हि भूतेन स्थावरेण त्रसेन च ॥ ३८
भवान्कर्मपरो यत्र बुद्धिश्रेष्ठश्च भारत ।
मुह्यते प्राणिनां ज्ञात्वा गतिं चागतिमेव च ॥ ३९
त्वां तु शोकेन संतप्तं मुह्यमानं मुहुर्मुहुः ।
ज्ञात्वा युधिष्ठिरो राजा प्राणानपि परित्यजेत् ॥ ४०
कृपालुर्नित्यशो वीरस्तिर्यग्योनिगतेष्वपि ।
स कथं त्वयि राजेन्द्र कृपां वै न करिष्यति ॥ ४१
मम चैव नियोगेन विधेश्चाप्यनिवर्तनात् ।
पाण्डवानां च कारुण्यात्प्राणान्धारय भारत ॥ ४२
एवं ते वर्तमानस्य लोके कीर्तिर्भविष्यति ।
धर्मश्च सुमहांस्तात तप्तं स्याच्च तपश्चिरात् ॥ ४३
पुत्रशोकसमुत्पन्नं हुताशं ज्वलितं यथा ।
प्रज्ञाम्भसा महाराज निर्वापय सदा सदा ॥ ४४
एतच्छ्रुत्वा तु वचनं व्यासस्यामिततेजसः ।
मुहूर्तं समनुध्याय धृतराष्ट्रोऽभ्यभाषत ॥ ४५
महता शोकजालेन प्रणुन्नोऽस्मि द्विजोत्तम ।
नात्मानमवबुध्यामि मुह्यमानो मुहुर्मुहुः ॥ ४६
इदं तु वचनं श्रुत्वा तव देवनियोगजम् ।
धारयिष्याम्यहं प्राणान्यतिष्ये च नशोचितुम् ॥ ४७
एतच्छ्रुत्वा तु वचनं व्यासः सत्यवतीसुतः ।
धृतराष्ट्रस्य राजेन्द्र तत्रैवान्तरधीयत ॥ ४८

इति श्रीमहाभारते स्त्रीपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

॥ समाप्तं विशोकपर्व ॥

९

जनमेजय उवाच ।

गते भगवति व्यासे धृतराष्ट्रो महीपतिः ।
किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ १

वैशंपायन उवाच ।

एतच्छ्रुत्वा नरश्रेष्ठ चिरं ध्यात्वा त्वचेतनः ।
संजयं योजयेत्युक्त्वा विदुरं प्रत्यभाषत ॥ २
क्षिप्रमानय गान्धारीं सर्वाश्च भरतस्त्रियः ।
वधूं कुन्तीमुपादाय याश्चान्यास्तत्र योषितः ॥ ३
एवमुक्त्वा स धर्मात्मा विदुरं धर्मवित्तमम् ।
शोकविप्रहतज्ञानो यानमेवान्वपद्यत ॥ ४
गान्धारी चैव शोकार्ता भर्तुर्वचनचोदिता ।
सह कुन्त्या यतो राजा सह स्त्रीभिरुपाद्रवत् ॥ ५
ताः समासाद्य राजानं भृशं शोकसमन्विताः ।

आमन्त्र्यान्योन्यमीयुः स्म भृशमुच्चुक्रुशुस्ततः ॥ ६
ताः समाश्वासयन्क्षत्ता ताभ्यश्चार्ततरः स्वयम् ।
अश्रुकण्ठीः समारोप्य ततोऽसौ निर्ययौ पुरात् ॥ ७
ततः प्रणादः संजज्ञे सर्वेषु कुरुवेश्मसु ।
आकुमारं पुरं सर्वमभवच्छोककर्शितम् ॥ ८
अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि ।
पृथग्जनेन दृश्यन्त तास्तदा निहतेश्वराः ॥ ९
प्रकीर्य केशान्सुशुभान्भूषणान्यवमुच्य च ।
एकवस्त्रधरा नार्यः परिपेतुरनाथवत् ॥ १०
श्वेतपर्वतरूपेभ्यो गृहेभ्यस्तास्त्वपाक्रमन् ।
गुहाभ्य इव शैलानां पृषत्यो हतयूथपाः ॥ ११
तान्युदीर्णानि नारीणां तदा वृन्दान्यनेकशः ।
शोकार्तान्यद्रवन्राजन्किशोरीणामिवाङ्गने ॥ १२
प्रगृह्य बाहून्क्रोशन्त्यः पुत्रान्भ्रातॄन्पितॄनपि ।
दर्शयन्तीव ता ह स्म युगान्ते लोकसंक्षयम् ॥ १३
विलपन्त्यो रुदन्त्यश्च धावमानास्ततस्ततः ।
शोकेनाभ्याहतज्ञानाः कर्तव्यं न प्रजज्ञिरे ॥ १४
व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः ।
ता एकवस्त्रा निर्लज्जाः श्वश्रूणां पुरतोऽभवन् ॥ १५
परस्परं सुसूक्ष्मेषु शोकेष्वाश्वासयन्स्म याः ।
ताः शोकविह्वला राजन्नुपैक्षन्त परस्परम् ॥ १६
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः ।
निर्ययौ नगराद्दीनस्तूर्णमायोधनं प्रति ॥ १७
शिल्पिनो वणिजो वैश्याः सर्वकर्मोपजीविनः ।
ते पार्थिवं पुरस्कृत्य निर्ययुर्नगराद्बहिः ॥ १८
तासां विक्रोशमानानामार्तानां कुरुसंक्षये ।
प्रादुरासीन्महाञ्शब्दो व्यथयन्भुवनान्युत ॥ १९
युगान्तकाले संप्राप्ते भूतानां दह्यतामिव ।
अभावः स्यादयं प्राप्त इति भूतानि मेनिरे ॥ २०
भृशमुद्विग्नमनसस्ते पौराः कुरुसंक्षये ।
प्राक्रोशन्त महाराज स्वनुरक्तास्तदा भृशम् ॥ २१

इति श्रीमहाभारते स्त्रीपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

वैशंपायन उवाच ।

क्रोशमात्रं ततो गत्वा ददृशुस्तान्महारथान् ।
शारद्वतं कृपं द्रौणिं कृतवर्माणमेव च ॥ १
ते तु दृष्ट्वैव राजानं प्रज्ञाचक्षुषमीश्वरम् ।
अश्रुकण्ठा विनिःश्वस्य रुदन्तमिदमब्रुवन् ॥ २
पुत्रस्तव महाराज कृत्वा कर्म सुदुष्करम् ।
गतः सानुचरो राजञ्शक्रलोकं महीपतिः ॥ ३
दुर्योधनबलान्मुक्ता वयमेव त्रयो रथाः ।
सर्वमन्यत्परिक्षीणं सैन्यं ते भरतर्षभ ॥ ४
इत्येवमुक्त्वा राजानं कृपः शारद्वतस्तदा ।
गान्धारीं पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५
अभीता युध्यमानास्ते घ्नन्तः शत्रुगणान्बहून् ।
वीरकर्माणि कुर्वाणाः पुत्रास्ते निधनं गताः ॥ ६
ध्रुवं संप्राप्य लोकांस्ते निर्मलाञ्शस्त्रनिर्जितान् ।
भास्वरं देहमास्थाय विहरन्त्यमरा इव ॥ ७
न हि कश्चिद्धि शूराणां युध्यमानः पराङ्मुखः ।
शस्त्रेण निधनं प्राप्तो न च कश्चित्कृताञ्जलिः ॥ ८
एतां तां क्षत्रियस्याहुः पुराणां परमां गतिम् ।
शस्त्रेण निधनं संख्ये तान्न शोचितुमर्हसि ॥ ९
न चापि शत्रवस्तेषामृध्यन्ते राज्ञि पाण्डवाः ।
शृणु यत्कृतमस्माभिरश्वत्थामपुरोगमैः ॥ १०
अधर्मेण हतं श्रुत्वा भीमसेनेन ते सुतम् ।
सुप्तं शिबिरमाविश्य पाण्डूनां कदनं कृतम् ॥ ११
पाञ्चाला निहताः सर्वे धृष्टद्युम्नपुरोगमाः ।
द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः ॥ १२
तथा विशसनं कृत्वा पुत्रशत्रुगणस्य ते ।

प्राद्रवाम रणे स्थातुं न हि शक्यामहे त्रयः ॥ १३
ते हि शूरा महेष्वासाः क्षिप्रमेष्यन्ति पाण्डवाः ।
अमर्षवशमापन्ना वैरं प्रतिजिहीर्षवः ॥ १४
निहतानात्मजाञ्श्रुत्वा प्रमत्तान्पुरुषर्षभाः ।
निनीषन्तः पदं शूराः क्षिप्रमेव यशस्विनि ॥ १५
पाण्डूनां किल्बिषं कृत्वा संस्थातुं नोत्सहामहे ।
अनुजानीहि नो राज्ञि मा च शोके मनः कृथाः ॥
राजंस्त्वमनुजानीहि धैर्यमातिष्ठ चोत्तमम् ।
निष्ठान्तं पश्य चापि त्वं क्षत्रधर्मं च केवलम् ॥१७
इत्येवमुक्त्वा राजानं कृत्वा चाभिप्रदक्षिणम् ।
कृपश्च कृतवर्मा च द्रोणपुत्रश्च भारत ॥ १८
अवेक्षमाणा राजानं धृतराष्ट्रं मनीषिणम् ।
गङ्गामनु महात्मानस्तूर्णमश्वानचोदयन् ॥ १९
अपक्रम्य तु ते राजन्सर्व एव महारथाः ।
आमन्त्र्यान्योन्यमुद्विग्नास्त्रिधा ते प्रययुस्ततः ॥ २०
जगाम हास्तिनपुरं कृपः शारद्वतस्तदा ।
स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्व्यासाश्रमं ययौ ॥२१
एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परम् ।
भयार्ताः पाण्डुपुत्राणामागस्कृत्वा महात्मनाम् ॥२२
समेत्य वीरा राजानं तदा त्वनुदिते रवौ ।
विप्रजग्मुर्महाराज यथेच्छकमरिंदमाः ॥ २३

इति श्रीमहाभारते स्त्रीपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

वैशंपायन उवाच ।

हतेषु सर्वसैन्येषु धर्मराजो युधिष्ठिरः ।
शुश्रुवे पितरं वृद्धं निर्यातं गजसाह्वयात् ॥ १
सोऽभ्ययात्पुत्रशोकार्तः पुत्रशोकपरिप्लुतम् ।
शोचमानो महाराज भ्रातृभिः सहितस्तदा ॥ २
अन्वीयमानो वीरेण दाशार्हेण महात्मना ।
युयुधानेन च तथा तथैव च युयुत्सुना ॥ ३
तमन्वगात्सुदुःखार्ता द्रौपदी शोककर्शिता ।
सह पाञ्चालयोषिद्भिर्यास्तत्रासन्समागताः ॥ ४
स गङ्गामनु वृन्दानि स्त्रीणां भरतसत्तम ।
कुररीणामिवार्तानां क्रोशन्तीनां ददर्श ह ॥ ५
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः ।
ऊर्ध्वबाहुभिरार्ताभिर्ब्रुवतीभिः प्रियाप्रिये ॥ ६
क नु धर्मज्ञता राज्ञः क नु साद्यानृशंसता ।
यदावधीत्पितॄन्भ्रातॄन्गुरून्पुत्रान्सखीनपि ॥ ७
घातयित्वा कथं द्रोणं भीष्मं चापि पितामहम् ।
मनस्तेऽभून्महाबाहो हत्वा चापि जयद्रथम् ॥ ८
किं नु राज्येन ते कार्यं पितॄन्भ्रातॄनपश्यतः ।
अभिमन्युं च दुर्धर्षं द्रौपदेयांश्च भारत ॥ ९
अतीत्य ता महाबाहुः क्रोशन्तीः कुररीरिव ।
ववन्दे पितरं ज्येष्ठं धर्मराजो युधिष्ठिरः ॥ १०
ततोऽभिवाद्य पितरं धर्मेणामित्रकर्शनाः ।
न्यवेदयन्त नामानि पाण्डवास्तेऽपि सर्वशः ॥ ११
तमात्मजान्तकरणं पिता पुत्रवधार्दितः ।
अप्रीयमाणः शोकार्तः पाण्डवं परिषस्वजे ॥ १२
धर्मराजं परिष्वज्य सान्त्वयित्वा च भारत ।
दुष्टात्मा भीममन्वैच्छद्दिधक्षुरिव पावकः ॥ १३
स कोपपावकस्तस्य शोकवायुसमीरितः ।
भीमसेनमयं दावं दिधक्षुरिव दृश्यते ॥ १४
तस्य संकल्पमाज्ञाय भीमं प्रत्यशुभं हरिः ।
भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसम् ॥१५
प्रागेव तु महाबुद्धिर्बुद्ध्वा तस्येङ्गितं हरिः ।
संविधानं महाप्राज्ञस्तत्र चक्रे जनार्दनः ॥ १६
तं तु गृह्यैव पाणिभ्यां भीमसेनमयस्मयम् ।
बभञ्ज बलवान्राजा मन्यमानो वृकोदरम् ॥ १७
नागायुतबलप्राणः स राजा भीममायसम् ।

भङ्क्त्वा विमथितोरस्कः सुस्राव रुधिरं मुखात्॥
ततः पपात मेदिन्यां तथैव रुधिरोक्षितः ।
प्रपुष्पिताग्रशिखरः पारिजात इव द्रुमः ॥ १९
पर्यगृह्णत तं विद्वान्सूतो गावल्गणिस्तदा ।
मैवमित्यब्रवीच्चैनं शमयन्सान्त्वयन्निव ॥ २०
स तु कोपं समुत्सृज्य गतमन्युर्महामनाः ।
हा हा भीमेति चुक्रोश भूयः शोकसमन्वितः ॥२१
तं विदित्वा गतक्रोधं भीमसेनवधार्दितम् ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ २२
मा शुचो धृतराष्ट्र त्वं नैष भीमस्त्वया हतः ।
आयसी प्रतिमा ह्येषा त्वया राजन्निपातिता ॥ २३
त्वां क्रोधवशमापन्नं विदित्वा भरतर्षभ ।
मयापकृष्टः कौन्तेयो मृत्योर्दंष्ट्रान्तरं गतः ॥ २४
न हि ते राजशार्दूल बले तुल्योऽस्ति कश्चन ।
कः सहेत महाबाहो बाह्वोर्निग्रहणं नरः ॥ २५
यथान्तकमनुप्राप्य जीवन्कश्चिन्न मुच्यते ।
एवं बाह्वन्तरं प्राप्य तव जीवेन्न कश्चन ॥ २६
तस्मात्पुत्रेण या सा ते प्रतिमा कारितायसी ।
भीमस्य सेयं कौरव्य तवैवोपहृता मया ॥ २७
पुत्रशोकाभिसंतापाद्धर्मादपहृतं मनः ।
तव राजेन्द्र तेन त्वं भीमसेनं जिघांससि ॥ २८
न च ते तत्क्षमं राजन्हन्यास्त्वं यद्वृकोदरम् ।
न हि पुत्रा महाराज जीवेयुस्ते कथंचन ॥ २९
तस्माद्यत्कृतमस्माभिर्मन्यमानैः क्षमं प्रति ।
अनुमन्यस्व तत्सर्वं मा च शोके मनः कृथाः ॥३०

इति श्रीमहाभारते स्त्रीपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

वैशंपायन उवाच ।

तत एनमुपातिष्ठञ्शौचार्थं परिचारकाः ।
कृतशौचं पुनश्चैनं प्रोवाच मधुसूदनः ॥ १
राजन्नधीता वेदास्ते शास्त्राणि विविधानि च ।
श्रुतानि च पुराणानि राजधर्माश्च केवलाः ॥ २
एवं विद्वान्महाप्राज्ञ नाकार्षीर्वचनं तदा ।
पाण्डवानधिकाञ्जानन्बले शौर्ये च कौरव ॥ ३
राजा हि यः स्थिरप्रज्ञः स्वयं दोषानवेक्षते ।
देशकालविभागं च परं श्रेयः स विन्दति ॥ ४
उच्यमानं च यः श्रेयो गृह्णीते नो हिताहिते ।
आपदं समनुप्राप्य स शोचत्यनये स्थितः ॥ ५
ततोऽन्यवृत्तमात्मानं समवेक्षस्व भारत ।
राजंस्त्वं ह्यविधेयात्मा दुर्योधनवशे स्थितः ॥ ६
आत्मापराधादायस्तस्तत्किं भीमं जिघांससि ।
तस्मात्संयच्छ कोपं त्वं स्वमनुस्मृत्य दुष्कृतम् ॥ ७
यस्तु तां स्पर्धया क्षुद्रः पाञ्चालीमानयत्सभाम् ।
स हतो भीमसेनेन वैरं प्रतिचिकीर्षता ॥ ८
आत्मनोऽतिक्रमं पश्य पुत्रस्य च दुरात्मनः ।
यदनागसि पाण्डूनां परित्यागः परंतप ॥ ९
एवमुक्तः स कृष्णेन सर्वं सत्यं जनाधिप ।
उवाच देवकीपुत्रं धृतराष्ट्रो महीपतिः ॥ १०
एवमेतन्महाबाहो यथा वदसि माधव ।
पुत्रस्नेहस्तु धर्मात्मन्धैर्यान्मां समचालयत् ॥ ११
दिष्ट्या तु पुरुषव्याघ्रो बलवान्सत्यविक्रमः ।
त्वद्गुप्तो नागमत्कृष्ण भीमो बाह्वन्तरं मम ॥ १२
इदानीं त्वहमेकाग्रो गतमन्युर्गतज्वरः ।
मध्यमं पाण्डवं वीरं स्प्रष्टुमिच्छामि केशव ॥ १३
हतेषु पार्थिवेन्द्रेषु पुत्रेषु निहतेषु च ।
पाण्डुपुत्रेषु मे शर्म प्रीतिश्चाप्यवतिष्ठते ॥ १४
ततः स भीमं च धनंजयं च
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
पस्पर्श गात्रैः प्ररुदन्सुगात्रा-

नाश्वास्य कल्याणमुवाच चैनान् ॥ १५

इति श्रीमहाभारते स्त्रीपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

वैशंपायन उवाच ।

धृतराष्ट्राभ्यनुज्ञातास्ततस्ते कुरुपुंगवाः ।
अभ्ययुर्भ्रातरः सर्वे गान्धारीं सहकेशवाः ॥ १
ततो ज्ञात्वा हतामित्रं धर्मराजं युधिष्ठिरम् ।
गान्धारी पुत्रशोकार्ता शप्तुमैच्छदनिन्दिता ॥ २
तस्याः पापमभिप्रायं विदित्वा पाण्डवान्प्रति ।
ऋषिः सत्यवतीपुत्रः प्रागेव समबुध्यत ॥ ३
स गङ्गायामुपस्पृश्य पुण्यगन्धं पयः शुचि ।
तं देशमुपसंपेदे परमर्षिर्मनोजवः ॥ ४
दिव्येन चक्षुषा पश्यन्मनसानुद्धतेन च ।
सर्वप्राणभृतां भावं स तत्र समबुध्यत ॥ ५
स स्नुषामब्रवीत्काले कल्यवादी महातपाः ।
शापकालमवाक्षिप्य शमकालमुदीरयन् ॥ ६
न कोपः पाण्डवे कार्यो गान्धारि शममाप्नुहि ।
रजो निगृह्यतामेतच्छृणु चेदं वचो मम ॥ ७
उक्तास्यष्टादशाहानि पुत्रेण जयमिच्छता ।
शिवमाशास्स्व मे मातर्युध्यमानस्य शत्रुभिः ॥ ८
सा तथा याच्यमाना त्वं काले काले जयैषिणा ।
उक्तवत्यसि गान्धारि यतो धर्मस्ततो जयः ॥ ९
न चाप्यतीतां गान्धारि वाचं ते वितथामहम् ।
स्मरामि भाषमाणायास्तथा प्रणिहिता ह्यसि ॥ १०
सा त्वं धर्मं परिस्मृत्य वाचा चोक्त्वा मनस्विनि ।
कोपं संयच्छ गान्धारि मैवं भूः सत्यवादिनि ॥ ११

गान्धार्युवाच ।

भगवन्नाभ्यसूयामि नैतानिच्छामि नश्यतः ।
पुत्रशोकेन तु बलान्मनो विह्वलतीव मे ॥ १२
यथैव कुन्त्या कौन्तेया रक्षितव्यास्तथा मया ।
यथैव धृतराष्ट्रेण रक्षितव्यास्तथा मया ॥ १३
दुर्योधनापराधेन शकुनेः सौबलस्य च ।
कर्णदुःशासनाभ्यां च वृत्तोऽयं कुरुसंक्षयः ॥ १४
नापराध्यति बीभत्सुर्न च पार्थो वृकोदरः ।
नकुलः सहदेवो वा नैव जातु युधिष्ठिरः ॥ १५
युध्यमाना हि कौरव्याः कृन्तमानाः परस्परम् ।
निहताः सहिताश्चान्यैस्तत्र नास्त्यप्रियं मम ॥ १६
यत्तु कर्माकरोद्भीमो वासुदेवस्य पश्यतः ।
दुर्योधनं समाहूय गदायुद्धे महामनाः ॥ १७
शिक्षयाभ्यधिकं ज्ञात्वा चरन्तं बहुधा रणे ।
अधो नाभ्यां प्रहृतवांस्तन्मे कोपमवर्धयत् ॥ १८
कथं नु धर्मं धर्मज्ञैः समुद्दिष्टं महात्मभिः ।
त्यजेयुराहवे शूराः प्राणहेतोः कथंचन ॥ १९

इति श्रीमहाभारते स्त्रीपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

वैशंपायन उवाच ।

तच्छ्रुत्वा वचनं तस्या भीमसेनोऽथ भीतवत् ।
गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा ॥ १
अधर्मो यदि वा धर्मस्त्रासात्तत्र मया कृतः ।
आत्मानं त्रातुकामेन तन्मे त्वं क्षन्तुमर्हसि ॥ २
न हि युद्धेन पुत्रस्ते धर्मेण स महाबलः ।
शक्यः केनचिदुद्यन्तुमतो विषममाचरम् ॥ ३
सैन्यस्यैकोऽवशिष्टोऽयं गदायुद्धे च वीर्यवान् ।
मां हत्वा न हरेद्राज्यमिति चैतत्कृतं मया ॥ ४
राजपुत्रीं च पाञ्चालीमेकवस्त्रां रजस्वलाम् ।
भवत्या विदितं सर्वमुक्तवान्यत्सुतस्तव ॥ ५
सुयोधनमसंगृह्य न शक्या भूः ससागरा ।
केवला भोक्तुमस्माभिरतश्चैतत्कृतं मया ॥ ६

तत्राप्यप्रियमस्माकं पुत्रस्ते समुपाचरत् ।
द्रौपद्या यत्सभामध्ये सव्यमूरुमदर्शयत् ॥ ७
तत्रैव वध्यः सोऽस्माकं दुराचारोऽम्ब ते सुतः ।
धर्मराजाज्ञया चैव स्थिताः स्म समये तदा ॥ ८
वैरमुद्धुक्षितं राज्ञि पुत्रेण तव तन्महत् ।
क्लेशिताश्च वने नित्यं तत एतत्कृतं मया ॥ ९
वैरस्यास्य गतः पारं हत्वा दुर्योधनं रणे ।
राज्यं युधिष्ठिरः प्राप्तो वयं च गतमन्यवः ॥ १०

गान्धार्युवाच ।

न तस्यैष वधस्तात यत्प्रशंससि मे सुतम् ।
कृतवांश्चापि तत्सर्वं यदिदं भाषसे मयि ॥ ११
हताश्वे नकुले यत्तद्वृषसेनेन भारत ।
अपिबः शोणितं संख्ये दुःशासनशरीरजम् ॥ १२
सद्भिर्विगर्हितं घोरमनार्यजनसेवितम् ।
क्रूरं कर्माकरोः कस्मात्तदयुक्तं वृकोदर ॥ १३

भीमसेन उवाच ।

अन्यस्यापि न पातव्यं रुधिरं किं पुनः स्वकम् ।
यथैवात्मा तथा भ्राता विशेषो नास्ति कश्चन ॥ १४
रुधिरं न व्यतिक्रामद्दन्तोष्ठं मेऽम्ब मा शुचः ।
वैवस्वतस्तु तद्वेद हस्तौ मे रुधिरोक्षितौ ॥ १५
हताश्वं नकुलं दृष्ट्वा वृषसेनेन संयुगे ।
भ्रातॄणां संप्रहृष्टानां त्रासः संजनितो मया ॥ १६
केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते ।
क्रोधाद्यदब्रुवं चाहं तच्च मे हृदि वर्तते ॥ १७
क्षत्रधर्माच्च्युतो राज्ञि भवेयं शाश्वतीः समाः ।
प्रतिज्ञां तामनिस्तीर्य ततस्तत्कृतवानहम् ॥ १८
न मामर्हसि गान्धारि दोषेण परिशङ्कितुम् ।
अनिगृह्य पुरा पुत्रानस्मास्वनपकारिषु ॥ १९

गान्धार्युवाच ।

वृद्धस्यास्य शतं पुत्रान्निघ्नंस्त्वमपराजितः ।
कस्मान्न शेषयः कंचिद्येनाल्पमपराधितम् ॥ २०
संतानमावयोस्तात वृद्धयोर्हृतराज्ययोः ।
कथमन्धद्वयस्यास्य यष्टिरेका न वर्जिता ॥ २१
शेषे ह्यवस्थिते तात पुत्राणामन्तके त्वयि ।
न मे दुःखं भवेदेतद्यदि त्वं धर्ममाचरः ॥ २२

इति श्रीमहाभारते स्त्रीपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

वैशंपायन उवाच ।

एवमुक्त्वा तु गान्धारी युधिष्ठिरमपृच्छत ।
क्व स राजेति सक्रोधा पुत्रपौत्रवधार्दिता ॥ १
तामभ्यगच्छद्राजेन्द्रो वेपमानः कृताञ्जलिः ।
युधिष्ठिर इदं चैनां मधुरं वाक्यमब्रवीत् ॥ २
पुत्रहन्ता नृशंसोऽहं तव देवि युधिष्ठिरः ।
शापार्हः पृथिवीनाशे हेतुभूतः शपस्व माम् ॥ ३
न हि मे जीवितेनार्थो न राज्येन धनेन वा ।
तादृशान्सुहृदो हत्वा मूढस्यास्य सुहृद्द्रुहः ॥ ४
तमेवंवादिनं भीतं संनिकर्षगतं तदा ।
नोवाच किंचिद्गान्धारी निःश्वासपरमा भृशम् ॥ ५
तस्यावनतदेहस्य पादयोर्निपतिष्यतः ।
युधिष्ठिरस्य नृपतेर्धर्मज्ञा धर्मदर्शिनी ।
अङ्गुल्यग्राणि ददृशे देवी पट्टान्तरेण सा ॥ ६
ततः स कुनखीभूतो दर्शनीयनखो नृपः ।
तं दृष्ट्वा चार्जुनोऽगच्छद्वासुदेवस्य पृष्ठतः ॥ ७
एवं संचेष्टमानांस्तानितश्चेतश्च भारत ।
गान्धारी विगतक्रोधा सान्त्वयामास मातृवत् ॥ ८
तया ते समनुज्ञाता मातरं वीरमातरम् ।
अभ्यगच्छन्त सहिताः पृथां पृथुलवक्षसः ॥ ९
चिरस्य दृष्ट्वा पुत्रान्सा पुत्राधिभिरभिप्लुता ।
बाष्पमाहारयद्देवी वस्त्रेणावृत्य वै मुखम् ॥ १०

ततो बाष्पं समुत्सृज्य सह पुत्रैस्तथा पृथा ।
अपश्यदेतान्शस्त्रौघैर्बहुधा परिविक्षतान् ॥ ११
सा तानेकैकशः पुत्रान्संस्पृशन्ती पुनः पुनः ।
अन्वशोचत दुःखार्ता द्रौपदीं च हतात्मजाम् ।
रुदतीमथ पाञ्चालीं ददर्श पतितां भुवि ॥ १२

द्रौपद्युवाच ।

आर्ये पौत्राः क्व ते सर्वे सौभद्रसहिता गताः ।
न त्वां तेऽद्याभिगच्छन्ति चिरदृष्टां तपस्विनीम् ।
किं नु राज्येन वै कार्यं विहीनायाः सुतैर्मम ॥१३

वैशंपायन उवाच ।

तां समाश्वासयामास पृथा पृथुललोचना ।
उत्थाप्य याज्ञसेनीं तु रुदतीं शोककर्शिताम् ॥ १४
तयैव सहिता चापि पुत्रैरनुगता पृथा ।
अभ्यगच्छत गान्धारीमार्तामार्ततरा स्वयम् ॥ १५
तामुवाचाथ गान्धारी सह वध्वा यशस्विनीम् ।
मैवं पुत्रीति शोकार्ता पश्य मामपि दुःखिताम् ॥
मन्ये लोकविनाशोऽयं कालपर्यायचोदितः ।
अवश्यभावी संप्राप्तः स्वभावाल्लोमहर्षणः ॥ १७
इदं तत्समनुप्राप्तं विदुरस्य वचो महत् ।
असिद्धानुनये कृष्णे यदुवाच महामतिः ॥ १८
तस्मिन्नपरिहार्येऽर्थे व्यतीते च विशेषतः ।
मा शुचो न हि शोच्यास्ते संग्रामे निधनं गताः ॥१९
यथैव त्वं तथैवाहं को वा माश्वासयिष्यति ।
ममैव ह्यपराधेन कुलमग्र्यं विनाशितम् ॥ २०

इति श्रीमहाभारते स्त्रीपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

वैशंपायन उवाच ।

एवमुक्त्वा तु गान्धारी कुरूणामाविकर्तनम् ।
अपश्यत्तत्र तिष्ठन्ती सर्वं दिव्येन चक्षुषा ॥ १
पतिव्रता महाभागा समानव्रतचारिणी ।
उग्रेण तपसा युक्ता सततं सत्यवादिनी ॥ २
वरदानेन कृष्णस्य महर्षेः पुण्यकर्मणः ।
दिव्यज्ञानबलोपेता विविधं पर्यदेवयत् ॥ ३
ददर्श सा बुद्धिमती दूरादपि यथान्तिके ।
रणाजिरं नृवीराणामद्भुतं लोमहर्षणम् ॥ ४
अस्थिकेशपरिस्तीर्णं शोणितौघपरिप्लुतम् ।
शरीरैर्बहुसाहस्रैर्विनिकीर्णं समन्ततः ॥ ५
गजाश्वरथयोधानामावृतं रुधिराविलैः ।
शरीरैरशिरस्कैश्च विदेहैश्च शिरोगणैः ॥ ६
गजाश्वनरवीराणां निःसत्त्वैरभिसंवृतम् ।
सृगालबडकाकोलकङ्ककाकनिषेवितम् ॥ ७
रक्षसां पुरुषादानां मोदनं कुरराकुलम् ।
अशिवाभिः शिवाभिश्च नादितं गृध्रसेवितम् ॥ ८
ततो व्यासाभ्यनुज्ञातो धृतराष्ट्रो महीपतिः ।
पाण्डुपुत्राश्च ते सर्वे युधिष्ठिरपुरोगमाः ॥ ९
वासुदेवं पुरस्कृत्य हतबन्धुं च पार्थिवम् ।
कुरुस्त्रियः समासाद्य जग्मुरायोधनं प्रति ॥ १०
समासाद्य कुरुक्षेत्रं ताः स्त्रियो निहतेश्वराः ।
अपश्यन्त हतांस्तत्र पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ ११
क्रव्यादैर्भक्ष्यमाणान्वै गोमायुबडवायसैः ।
भूतैः पिशाचै रक्षोभिर्विविधैश्च निशाचरैः ॥ १२
रुद्राक्रीडनिभं दृष्ट्वा तदा विशसनं स्त्रियः ।
महार्हेभ्योऽथ यानेभ्यो विक्रोशन्त्यो निपेतिरे ॥१३
अदृष्टपूर्वं पश्यन्त्यो दुःखार्ता भरतस्त्रियः ।
शरीरेष्वस्खलन्नन्या न्यपतंश्चापरा भुवि ॥ १४
श्रान्तानां चाप्यनाथानां नासीत्काचन चेतना ।
पाञ्चालकुरुयोषाणां कृपणं तदभून्महत् ॥ १५
दुःखोपहतचित्ताभिः समन्तादनुनादितम् ।
दृष्ट्वायोधनमत्युग्रं धर्मज्ञा सुबलात्मजा ॥ १६

ततः सा पुण्डरीकाक्षमामन्त्र्य पुरुषोत्तमम् ।
कुरूणां वैशसं दृष्ट्वा दुःखाद्वचनमब्रवीत् ॥ १७
पश्यैताः पुण्डरीकाक्ष स्नुषा मे निहतेश्वराः ।
प्रकीर्णकेशाः क्रोशन्तीः कुररीरिव माधव ॥ १८
अमूस्त्वभिसमागम्य स्मरन्त्यो भरतर्षभान् ।
पृथगेवाभ्यधावन्त पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ १९
वीरसूभिर्महाबाहो हतपुत्राभिरावृतम् ।
क्वचिच्च वीरपत्नीभिर्हतवीराभिराकुलम् ॥ २०
शोभितं पुरुषव्याघ्रैर्भीष्मकर्णाभिमन्युभिः ।
द्रोणद्रुपदशल्यैश्च ज्वलद्भिरिव पावकैः ॥ २१
काञ्चनैः कवचैर्निष्कैर्मणिभिश्च महात्मनाम् ।
अङ्गदैर्हस्तकेयूरैः स्रग्भिश्च समलंकृतम् ॥ २२
वीरबाहुविसृष्टाभिः शक्तिभिः परिघैरपि ।
खड्गैश्च विमलैस्तीक्ष्णैः सशरैश्च शरासनैः ॥ २३
क्रव्यादसंघैर्मुदितैस्तिष्ठद्भिः सहितैः क्वचित् ।
क्वचिदाक्रीडमानैश्च शयानैरपरैः क्वचित् ॥ २४
एतदेवंविधं वीर संपश्यायोधनं विभो ।
पश्यमाना च दह्यामि शोकेनाहं जनार्दन ॥ २५
पाञ्चालानां कुरूणां च विनाशं मधुसूदन ।
पञ्चानामिव भूतानां नाहं वधमचिन्तयम् ॥ २६
तान्सुपर्णाश्च गृध्राश्च निष्कर्षन्त्यसृगुक्षितान् ।
निगृह्य कवचेषूग्रा भक्षयन्ति सहस्रशः ॥ २७
जयद्रथस्य कर्णस्य तथैव द्रोणभीष्मयोः ।
अभिमन्योर्विनाशं च कश्चिन्तयितुमर्हति ॥ २८
अवध्यकल्पान्निहतान्दृष्ट्वाहं मधुसूदन ।
गृध्रकङ्कवडश्येनश्वसृगालादनीकृतान् ॥ २९
अमर्षवशमापन्नान्दुर्योधनवशे स्थितान् ।
पश्येमान्पुरुषव्याघ्रान्संशान्तान्पावकानिव ॥ ३०
शयनान्युचिताः सर्वे मृदूनि विमलानि च ।
विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ॥ ३१
बन्दिभिः सततं काले स्तुवद्भिरभिनन्दिताः ।
शिवानामशिवा घोराः शृण्वन्ति विविधा गिरः ॥ ३२
ये पुरा शेरते वीराः शयनेषु यशस्विनः ।
चन्दनागुरुदिग्धाङ्गास्तेऽद्य पांसुषु शेरते ॥ ३३
तेषामाभरणान्येते गृध्रगोमायुवायसाः ।
आक्षिपन्त्यशिवा घोरा विनदन्तः पुनः पुनः ॥ ३४
चापानि विशिखान्पीतान्निस्त्रिंशान्विमला गदाः ।
युद्धाभिमानिनः प्रीता जीवन्त इव बिभ्रति ॥ ३५
सुरूपवर्णा बहवः क्रव्यादैरवघट्टिताः ।
ऋषभप्रतिरूपाक्षाः शेरते हरितस्रजः ॥ ३६
अपरे पुनरालिङ्ग्य गदाः परिघबाहवः ।
शेरतेऽभिमुखाः शूरा दयिता इव योषितः ॥ ३७
बिभ्रतः कवचान्यन्ये विमलान्यायुधानि च ।
न धर्षयन्ति क्रव्यादा जीवन्तीति जनार्दन ॥ ३८
क्रव्यादैः कृष्यमाणानामपरेषां महात्मनाम् ।
शातकौम्भ्यः स्रजश्चित्रा विप्रकीर्णाः समन्ततः ॥ ३९
एते गोमायवो भीमा निहतानां यशस्विनाम् ।
कण्ठान्तरगतान्हारानाक्षिपन्ति सहस्रशः ॥ ४०
सर्वेष्वपररात्रेषु याननन्दन्त बन्दिनः ।
स्तुतिभिश्च परार्ध्याभिरुपचारैश्च शिक्षिताः ॥ ४१
तानिमाः परिदेवन्ति दुःखार्ताः परमाङ्गनाः ।
कृपणं वृष्णिशार्दूल दुःखशोकार्दिता भृशम् ॥ ४२
रक्तोत्पलवनानीव विभान्ति रुचिराणि वै ।
मुखानि परमस्त्रीणां परिशुष्काणि केशव ॥ ४३
रुदितोपरता ह्येता ध्यायन्त्यः संपरिप्लुताः ।
कुरुस्त्रियोऽभिगच्छन्ति तेन तेनैव दुःखिताः ॥ ४४
एतान्यादित्यवर्णानि तपनीयनिभानि च ।
रोषरोदनताम्राणि वक्त्राणि कुरुयोषिताम् ॥ ४५
आसामपरिपूर्णार्थं निशम्य परिदेवितम् ।
इतरेतरसंक्रन्दान्न विजानन्ति योषितः ॥ ४६

एता दीर्घमिवोच्छ्वस्य विक्रुश्य च विलप्य च ।
विस्पन्दमाना दुःखेन वीरा जहति जीवितम् ॥ ४७
बह्व्यो दृष्ट्वा शरीराणि क्रोशन्ति विलपन्ति च ।
पाणिभिश्चापरा घ्नन्ति शिरांसि मृदुपाणयः ॥ ४८
शिरोभिः पतितैर्हस्तैः सर्वाङ्गैर्यूथशः कृतैः ।
इतरेतरसंपृक्तैराकीर्णा भाति मेदिनी ॥ ४९
विशिरस्कानथो कायान्दृष्ट्वा घोराभिनन्दिनः ।
मुह्यन्त्यनुचिता नार्यो विदेहानि शिरांसि च ॥ ५०
शिरः कायेन संधाय प्रेक्षमाणा विचेतसः ।
अपश्यन्त्यो परं तत्र नेदमस्येति दुःखिताः ॥ ५१
बाहूरुचरणानन्यान्विशिखोन्मथितान्पृथक् ।
संदधत्योऽसुखाविष्टा मूर्छन्त्येताः पुनः पुनः ॥ ५२
उत्कृत्तशिरसश्चान्यान्विजग्धान्मृगपक्षिभिः ।
दृष्ट्वा काश्चिन्न जानन्ति भर्तॄन्भरतयोषितः ॥ ५३
पाणिभिश्चापरा घ्नन्ति शिरांसि मधुसूदन ।
प्रेक्ष्य भ्रातॄन्पितॄन्पुत्रान्पतींश्च निहतान्परैः ॥ ५४
बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुण्डलैः ।
अगम्यकल्पा पृथिवी मांसशोणितकर्दमा ॥ ५५
न दुःखेषूचिताः पूर्वं दुःखं गाहन्त्यनिन्दिताः ।
भ्रातृभिः पितृभिः पुत्रैरुपकीर्णां वसुंधराम् ॥ ५६
यूथानीव किशोरीणां सुकेशीनां जनार्दन ।
स्नुषाणां धृतराष्ट्रस्य पश्य वृन्दान्यनेकशः ॥ ५७
अतो दुःखतरं किं नु केशव प्रतिभाति मे ।
यदिमाः कुर्वते सर्वा रूपमुच्चावचं स्त्रियः ॥ ५८
नूनमाचरितं पापं मया पूर्वेषु जन्मसु ।
या पश्यामि हतान्पुत्रान्पौत्रान्भ्रातॄंश्च केशव ।
एवमार्ता विलपती ददर्श निहतं सुतम् ॥ ५९

इति श्रीमहाभारते स्त्रीपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

वैशंपायन उवाच

ततो दुर्योधनं दृष्ट्वा गान्धारी शोककर्शिता ।
सहसा न्यपतद्भूमौ छिन्नेव कदली वने ॥ १
सा तु लब्ध्वा पुनः संज्ञां विक्रुश्य च पुनः पुनः ।
दुर्योधनमभिप्रेक्ष्य शयानं रुधिरोक्षितम् ॥ २
परिष्वज्य च गान्धारी कृपणं पर्यदेवयत् ।
हा हा पुत्रेति शोकार्ता विललापाकुलेन्द्रिया ॥ ३
सुगूढजत्रु विपुलं हारनिष्कनिषेवितम् ।
वारिणा नेत्रजेनोरः सिञ्चन्ती शोकतापिता ।
समीपस्थं हृषीकेशमिदं वचनमब्रवीत् ॥ ४
उपस्थितेऽस्मिन्संग्रामे ज्ञातीनां संक्षये विभो ।
मामयं प्राह वार्ष्णेय प्राञ्जलिर्नृपसत्तमः ।
अस्मिञ्ज्ञातिसमुद्धर्षे जयमम्बा ब्रवीतु मे ॥ ५
इत्युक्ते जानती सर्वमहं स्वं व्यसनागमम् ।
अब्रुवं पुरुषव्याघ्र यतो धर्मस्ततो जयः ॥ ६
यथा न युध्यमानस्त्वं संप्रमुह्यसि पुत्रक ।
ध्रुवं शस्त्रजिताँल्लोकान्प्राप्तास्यमरवद्विभो ॥ ७
इत्येवमब्रुवं पूर्वं नैनं शोचामि वै प्रभो ।
धृतराष्ट्रं तु शोचामि कृपणं हतबान्धवम् ॥ ८
अमर्षणं युधां श्रेष्ठं कृतास्त्रं युद्धदुर्मदम् ।
शयानं वीरशयने पश्य माधव मे सुतम् ॥ ९
योऽयं मूर्धावसिक्तानामग्रे याति परंतपः ।
सोऽयं पांसुषु शेतेऽद्य पश्य कालस्य पर्ययम् ॥ १०
ध्रुवं दुर्योधनो वीरो गतिं नसुलभां गतः ।
तथा ह्यभिमुखः शेते शयने वीरसेविते ॥ ११
यं पुरा पर्युपासीना रमयन्ति महीक्षितः ।
महीतलस्थं निहतं गृध्रास्तं पर्युपासते ॥ १२
यं पुरा व्यजनैरग्र्यैरुपवीजन्ति योषितः ।
तमद्य पक्षव्यजनैरुपवीजन्ति पक्षिणः ॥ १३

एष शेते महाबाहुर्बलवान्सत्यविक्रमः ।
सिंहेनेव द्विपः संख्ये भीमसेनेन पातितः ॥ १४
पश्य दुर्योधनं कृष्ण शयानं रुधिरोक्षितम् ।
निहतं भीमसेनेन गदामुद्यम्य भारत ॥ १५
अक्षौहिणीर्महाबाहुर्दश चैकां च केशव ।
अनयद्यः पुरा संख्ये सोऽनयान्निधनं गतः ॥ १६
एष दुर्योधनः शेते महेष्वासो महारथः ।
शार्दूल इव सिंहेन भीमसेनेन पातितः ॥ १७
विदुरं ह्यवमन्यैष पितरं चैव मन्दभाक् ।
बालो वृद्धावमानेन मन्दो मृत्युवशं गतः ॥ १८
निःसपत्ना मही यस्य त्रयोदश समाः स्थिता ।
स शेते निहतो भूमौ पुत्रो मे पृथिवीपतिः ॥ १९
अपश्यं कृष्ण पृथिवीं धार्तराष्ट्रानुशासनात् ।
पूर्णां हस्तिगवाश्वस्य वार्ष्णेय न तु तच्चिरम् ॥ २०
तामेवाद्य महाबाहो पश्याम्यन्यानुशासनात् ।
हीनां हस्तिगवाश्वेन किं नु जीवामि माधव ॥ २१
इदं कृच्छ्रतरं पश्य पुत्रस्यापि वधान्मम ।
यदिमां पर्युपासन्ते हताञ्शूरान्रणे स्त्रियः ॥ २२
प्रकीर्णकेशां सुश्रोणीं दुर्योधनभुजाङ्कगाम् ।
रुक्मवेदीनिभां पश्य कृष्ण लक्ष्मणमातरम् ॥ २३
नूनमेषा पुरा बाला जीवमाने महाभुजे ।
भुजावाश्रित्य रमते सुभुजस्य मनस्विनी ॥ २४
कथं तु शतधा नेदं हृदयं मम दीर्यते ।
पश्यन्त्या निहतं पुत्रं पुत्रेण सहितं रणे ॥ २५
पुत्रं रुधिरसंसिक्तमुपजिघ्रत्यनिन्दिता ।
दुर्योधनं तु वामोरूः पाणिना परिमार्जति ॥ २६
किं नु शोचति भर्तारं पुत्रं चैषा मनस्विनी ।
तथा ह्यवस्थिता भाति पुत्रं चाप्यभिवीक्ष्य सा ॥ २७
स्वशिरः पञ्चशाखाभ्यामभिहत्यायतेक्षणा ।
पतत्युरसि वीरस्य कुरुराजस्य माधव ॥ २८
पुण्डरीकनिभा भाति पुण्डरीकान्तरप्रभा ।
मुखं विमृज्य पुत्रस्य भर्तुश्चैव तपस्विनी ॥ २९
यदि चाप्यागमाः सन्ति यदि वा श्रुतयस्तथा ।
ध्रुवं लोकानवाप्तोऽयं नृपो बाहुबलार्जितान् ॥ ३०

इति महाभारते स्त्रीपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

गान्धार्युवाच ।

पश्य माधव पुत्रान्मे शतसंख्याञ्जितक्लमान् ।
गदया भीमसेनेन भूयिष्ठं निहतान्रणे ॥ १
इदं दुःखतरं मेऽद्य यदिमा मुक्तमूर्धजाः ।
हतपुत्रा रणे बालाः परिधावन्ति मे स्नुषाः ॥ २
प्रासादतलचारिण्यश्चरणैर्भूषणान्वितैः ।
आपन्ना यत्स्पृशन्तीमा रुधिरार्द्रां वसुंधराम् ॥ ३
गृध्रानुत्सारयन्त्यश्च गोमायून्वायसांस्तथा ।
शोकेनार्ता विघूर्णन्त्यो मत्ता इव चरन्त्युत ॥ ४
एषान्या त्वनवद्याङ्गी करसंमितमध्यमा ।
घोरं तद्वैशसं दृष्ट्वा निपतत्यतिदुःखिता ॥ ५
दृष्ट्वा मे पार्थिवसुतामेतां लक्ष्मणमातरम् ।
राजपुत्रीं महाबाहो मनो न व्युपशाम्यति ॥ ६
भ्रातॄंश्चान्याः पतींश्चान्याः पुत्रांश्च निहतान्भुवि ।
दृष्ट्वा परिपतन्त्येताः प्रगृह्य सुभुजा भुजान् ॥ ७
मध्यमानां तु नारीणां वृद्धानां चापराजित ।
आक्रन्दं हतबन्धूनां दारुणे वैशसे शृणु ॥ ८
रथनीडानि देहांश्च हतानां गजवाजिनाम् ।
आश्रिताः श्रममोहार्ताः स्थिताः पश्य महाबल ॥ ९
अन्या चापहृतं कायाच्चारुकुण्डलमुन्नसम् ।
स्वस्य बन्धोः शिरः कृष्ण गृहीत्वा पश्य तिष्ठति ॥ १०
पूर्वजातिकृतं पापं मन्ये नाल्पमिवानघ ।
एताभिरनवद्याभिर्मया चैवाल्पमेधया ॥ ११

तदिदं धर्मराजेन यातितं नो जनार्दन ।
न हि नाशोऽस्ति वार्ष्णेय कर्मणोः शुभपापयोः ॥१२
प्रथमवयसः पश्य दर्शनीयकुचोदराः ।
कुलेषु जाता ह्रीमत्यः कृष्णपक्ष्माक्षिमूर्धजाः ॥ १३
हंसगद्गदभाषिण्यो दुःखशोकप्रमोहिताः ।
सारस्य इव वाशन्त्यः पतिताः पश्य माधव ॥ १४
फुल्लपद्मप्रकाशानि पुण्डरीकाक्ष योषिताम् ।
अनवद्यानि वक्त्राणि तपत्यसुखरश्मिवान् ॥ १५
ईर्षूणां मम पुत्राणां वासुदेवावरोधनम् ।
मत्तमातङ्गदर्पाणां पश्यन्त्यद्य पृथग्जनाः ॥ १६
शतचन्द्राणि चर्माणि ध्वजांश्चादित्यसंनिभान् ।
रौक्माणि चैव वर्माणि निष्कानपि च काञ्चनान् ॥
शीर्षत्राणानि चैतानि पुत्राणां मे महीतले ।
पश्य दीप्तानि गोविन्द पावकान्सुहुतानिव ॥ १८
एष दुःशासनः शेते शूरेणामित्रघातिना ।
पीतशोणितसर्वाङ्गो भीमसेनेन पातितः ॥ १९
गदया वीरघातिन्या पश्य माधव मे सुतम् ।
द्यूतक्लेशाननुस्मृत्य द्रौपद्या चोदितेन च ॥ २०
उक्ता ह्यनेन पाञ्चाली सभायां द्यूतनिर्जिता ।
प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन ॥ २१
सहैव सहदेवेन नकुलेनार्जुनेन च ।
दासभार्यासि पाञ्चालि क्षिप्रं प्रविश नो गृहान् ॥२२
ततोऽहमब्रुवं कृष्ण तदा दुर्योधनं नृपम् ।
मृत्युपाशपरिक्षिप्तं शकुनिं पुत्र वर्जय ॥ २३
निबोधैनं सुदुर्बुद्धिं मातुलं कलहप्रियम् ।
क्षिप्रमेनं परित्यज्य पुत्र शाम्यस्व पाण्डवैः ॥ २४
न बुध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणम् ।
वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरिव कुञ्जरम् ॥ २५
तानेष रभसः क्रूरो वाक्शल्यानवधारयन् ।
उत्ससर्ज विषं तेषु सर्पो गोवृषभेष्विव ॥ २६
एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ ।
निहतो भीमसेनेन सिंहेनेव महर्षभः ॥ २७
अत्यर्थमकरोद्रौद्रं भीमसेनोऽत्यमर्षणः ।
दुःशासनस्य यत्क्रुद्धोऽपिबच्छोणितमाहवे ॥ २८

इति श्रीमहाभारते स्त्रीपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

गान्धार्युवाच ।

एष माधव पुत्रो मे विकर्णः प्राज्ञसंमतः ।
भूमौ विनिहतः शेते भीमेन शतधा कृतः ॥ १
गजमध्यगतः शेते विकर्णो मधुसूदन ।
नीलमेघपरिक्षिप्तः शरदीव दिवाकरः ॥ २
अस्य चापग्रहेणैष पाणिः कृतकिणो महान् ।
कथंचिच्छिद्यते गृध्रैरत्तुकामैस्तलत्रवान् ॥ ३
अस्य भार्यामिषप्रेप्सून्गृध्रानेतांस्तपस्विनी ।
वारयत्यनिशं बाला न च शक्नोति माधव ॥ ४
युवा वृन्दारकः शूरो विकर्णः पुरुषर्षभ ।
सुखोचितः सुखार्हश्च शेते पांसुषु माधव ॥ ५
कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे ।
अद्यापि न जहात्येनं लक्ष्मीर्भरतसत्तमम् ॥ ६
एष संग्रामशूरेण प्रतिज्ञां पालयिष्यता ।
दुर्मुखोऽभिमुखः शेते हतोऽरिगणहा रणे ॥ ७
तस्यैतद्वदनं कृष्ण श्वापदैरर्धभक्षितम् ।
विभात्यभ्यधिकं तात सप्तम्यामिव चन्द्रमाः ॥ ८
शूरस्य हि रणे कृष्ण यस्याननमथेदृशम् ।
स कथं निहतोऽमित्रैः पांसून्ग्रसति मे सुतः ॥ ९
यस्याहवमुखे सौम्य स्थाता नैवोपपद्यते ।
स कथं दुर्मुखोऽमित्रैर्हतो विबुधलोकजित् ॥ १०
चित्रसेनं हतं भूमौ शयानं मधुसूदन ।

धार्तराष्ट्रमिमं पश्य प्रतिमानं धनुष्मताम् ॥ ११
तं चित्रमाल्याभरणं युवत्यः शोककर्शिताः ।
क्रव्यादसंघैः सहिता रुदन्त्यः पर्युपासते ॥ १२
स्त्रीणां रुदितनिर्घोषः श्वापदानां च गर्जितम् ।
चित्ररूपमिदं कृष्ण विचित्रं प्रतिभाति मे ॥ १३
युवा वृन्दारको नित्यं प्रवरस्त्रीनिषेवितः ।
विविंशतिरसौ शेते ध्वस्तः पांसुषु माधव ॥ १४
शरसंकृत्तवर्माणं वीरं विशसने हतम् ।
परिवार्यासते गृध्राः परिविंशा विविंशतिम् ॥ १५
प्रविश्य समरे वीरः पाण्डवानामनीकिनीम् ।
आविश्य शयने शेते पुनः सत्पुरुषोचितम् ॥ १६
स्मितोपपन्नं सुनसं सुभ्रु ताराधिपोपमम् ।
अतीव शुभ्रं वदनं पश्य कृष्ण विविंशतेः ॥ १७
यं स्म तं पर्युपासन्ते वसुं वासवयोषितः ।
क्रीडन्तमिव गन्धर्वं देवकन्याः सहस्रशः ॥ १८
हन्तारं वीरसेनानां शूरं समितिशोभनम् ।
निबर्हणममित्राणां दुःसहं विषहेत कः ॥ १९
दुःसहस्यैतदाभाति शरीरं संवृतं शरैः ।
गिरिरात्मरुहैः फुल्लैः कर्णिकारैरिवावृतः ॥ २०
शातकौम्भ्या स्रजा भाति कवचेन च भास्वता ।
अग्निनेव गिरिः श्वेतो गतासुरपि दुःसहः ॥ २१

इति श्रीमहाभारते स्त्रीपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

गान्धार्युवाच ।

अध्यर्धगुणमाहुर्यं बले शौर्ये च माधव ।
पित्रा त्वया च दाशार्ह दृप्तं सिंहमिवोत्कटम् ॥ १
यो बिभेद चमूमेको मम पुत्रस्य दुर्भिदाम् ।
स भूत्वा मृत्युरन्येषां स्वयं मृत्युवशं गतः ॥ २
तस्योपलक्षये कृष्ण कार्ष्णेरमिततेजसः ।
अभिमन्योर्हतस्यापि प्रभा नैवोपशाम्यति ॥ ३
एषा विराटदुहिता स्नुषा गाण्डीवधन्वनः ।
आर्ता बाला पतिं वीरं शोच्या शोचत्यनिन्दिता ॥
तमेषा हि समासाद्य भार्या भर्तारमन्तिके ।
विराटदुहिता कृष्ण पाणिना परिमार्जति ॥ ५
तस्य वक्त्रमुपाघ्राय सौभद्रस्य यशस्विनी ।
विबुद्धकमलाकारं कम्बुवृत्तशिरोधरम् ॥ ६
काम्यरूपवती चैषा परिष्वजति भामिनी ।
लज्जमाना पुरेवैनं माध्वीकमदमूर्छिता ॥ ७
तस्य क्षतजसंदिग्धं जातरूपपरिष्कृतम् ।
विमुच्य कवचं कृष्ण शरीरमभिवीक्षते ॥ ८
अवेक्षमाणा तं बाला कृष्ण त्वामभिभाषते ।
अयं ते पुण्डरीकाक्ष सदृशाक्षो निपातितः ॥ ९
बले वीर्ये च सदृशस्तेजसा चैव तेऽनघ ।
रूपेण च तवात्यर्थं शेते भुवि निपातितः ॥ १०
अत्यन्तसुकुमारस्य राङ्कवाजिनशायिनः ।
कच्चिदद्य शरीरं ते भूमौ न परितप्यते ॥ ११
मातङ्गभुजवर्ष्माणौ ज्याक्षेपकठिनत्वचौ ।
काञ्चनाङ्गदिनौ शेषे निक्षिप्य विपुलौ भुजौ ॥१
व्यायम्य बहुधा नूनं सुखसुप्तः श्रमादिव ।
एवं विलपतीमार्तां न हि मामभिभाषसे ॥ १३
आर्यामार्य सुभद्रां त्वमिमांश्च त्रिदशोपमान् ।
पितॄन्मां चैव दुःखार्तां विहाय क्व गमिष्यसि ॥
तस्य शोणितसंदिग्धान्केशानुन्नाम्य पाणिना ।
उत्सङ्गे वक्त्रमाधाय जीवन्तमिव पृच्छति ।
स्वस्रीयं वासुदेवस्य पुत्रं गाण्डीवधन्वनः ॥ १५
कथं त्वां रणमध्यस्थं जघ्नुरेते महारथाः ।
धिगस्तु क्रूरकर्तॄंस्तान्कृपकर्णजयद्रथान् ॥ १६
द्रोणद्रौणायनी चोभौ यैरसि व्यसनीकृतः ।

रथर्षभाणां सर्वेषां कथमासीत्तदा मनः ॥ १७
बालं त्वां परिवार्यैकं मम दुःखाय जघ्नुषाम् ।
कथं नु पाण्डवानां च पाञ्चालानां च पश्यताम् ।
त्वं वीर निधनं प्राप्तो नाथवान्सन्ननाथवत् ॥ १८
दृष्ट्वा बहुभिराक्रन्दे निहतं त्वामनाथवत् ।
वीरः पुरुषशार्दूलः कथं जीवति पाण्डवः ॥ १९
न राज्यलाभो विपुलः शत्रूणां वा पराभवः ।
प्रीतिं दास्यति पार्थानां त्वामृते पुष्करेक्षण ॥ २०
तव शस्त्रजिताँल्लोकान्धर्मेण च दमेन च ।
क्षिप्रमन्वागमिष्यामि तत्र मां प्रतिपालय ॥ २१
दुर्मरं पुनरप्राप्ते काले भवति केनचित् ।
यदहं त्वां रणे दृष्ट्वा हतं जीवामि दुर्भगा ॥ २२
कामिदानीं नरव्याघ्र श्लक्ष्णया स्मितया गिरा ।
पितृलोके समेत्यान्यां मामिवामन्त्रयिष्यसि ॥ २३
नूनमप्सरसां स्वर्गे मनांसि प्रमथिष्यसि ।
परमेण च रूपेण गिरा च स्मितपूर्वया ॥ २४
प्राप्य पुण्यकृताँल्लोकानप्सरोभिः समेयिवान् ।
सौभद्र विहरन्काले स्मरेथाः सुकृतानि मे ॥ २५
एतावानिह संवासो विहितस्ते मया सह ।
षण्मासान्सप्तमे मासि त्वं वीर निधनं गतः ॥ २६
इत्युक्तवचनामेतामपकर्षन्ति दुःखिताम् ।
उत्तरां मोघसंकल्पां मत्स्यराजकुलस्त्रियः ॥ २७
उत्तरामपकृष्यैनामार्तामार्ततराः स्वयम् ।
विराटं निहतं दृष्ट्वा क्रोशन्ति विलपन्ति च ॥ २८
द्रोणास्त्रशरसंकृत्तं शयानं रुधिरोक्षितम् ।
विराटं वितुदन्त्येते गृध्रगोमायुवायसाः ॥ २९
वितुद्यमानं विहगैर्विराटमसितेक्षणाः ।
न शक्नुवन्ति विवशा निवर्तयितुमातुराः ॥ ३०
आसामातपतप्तानामायासेन च योषिताम् ।
श्रमेण च विवर्णानां रूपाणां विगतं वपुः ॥ ३१
उत्तरं चाभिमन्युं च काम्बोजं च सुदक्षिणम् ।
शिशूनेतान्हतान्पश्य लक्ष्मणं च सुदर्शनम् ।
आयोधनशिरोमध्ये शयानं पश्य माधव ॥ ३२

इति श्रीमहाभारते स्त्रीपर्वणि
विंशतितमोऽध्यायः ॥ २० ॥

२१

गान्धार्युवाच ।

एष वैकर्तनः शेते महेष्वासो महारथः ।
ज्वलितानलवत्संख्ये संशान्तः पार्थतेजसा ॥ १
पश्य वैकर्तनं कर्णं निहत्यातिरथान्बहून् ।
शोणितौघपरीताङ्गं शयानं पतितं भुवि ॥ २
अमर्षी दीर्घरोषश्च महेष्वासो महारथः ।
रणे विनिहतः शेते शूरो गाण्डीवधन्वना ॥ ३
यं स्म पाण्डवसंत्रासान्मम पुत्रा महारथाः ।
प्रायुध्यन्त पुरस्कृत्य मातङ्गा इव यूथपम् ॥ ४
शार्दूलमिव सिंहेन समरे सव्यसाचिना ।
मातङ्गमिव मत्तेन मातङ्गेन निपातितम् ॥ ५
समेताः पुरुषव्याघ्र निहतं शूरमाहवे ।
प्रकीर्णमूर्धजाः पत्न्यो रुदत्यः पर्युपासते ॥ ६
उद्विग्नः सततं यस्माद्धर्मराजो युधिष्ठिरः ।
त्रयोदश समा निद्रां चिन्तयन्नाध्यगच्छत ॥ ७
अनाधृष्यः परैर्युद्धे शत्रुभिर्मघवानिव ।
युगान्ताग्निरिवार्चिष्मान्हिमवानिव च स्थिरः ॥ ८
स भूत्वा शरणं वीरो धार्तराष्ट्रस्य माधव ।
भूमौ विनिहतः शेते वातरुग्ण इव द्रुमः ॥ ९
पश्य कर्णस्य पत्नीं त्वं वृषसेनस्य मातरम् ।
लालप्यमानां करुणं रुदतीं पतितां भुवि ॥ १०
आचार्यशापोऽनुगतो ध्रुवं त्वां
यदग्रसच्चक्रमियं धरा ते ।

ततः शरेणापहृतं शिरस्ते
धनंजयेनाहवे शत्रुमध्ये ॥ ११
अहो धिगेषा पतिता विसंज्ञा
समीक्ष्य जाम्बूनदबद्धनिष्कम् ।
कर्णं महाबाहुमदीनसत्त्वं
सुषेणमाता रुदती भृशार्ता ॥ १२
अल्पावशेषो हि कृतो महात्मा
शरीरभक्षैः परिभक्षयद्भिः ।
द्रष्टुं न संप्रीतिकरः शशीव
कृष्णस्य पक्षस्य चतुर्दशाहे ॥ १३
सावर्तमाना पतिता पृथिव्या-
मुत्थाय दीना पुनरेव चैषा ।
कर्णस्य वक्त्रं परिजिघ्रमाणा
रोरूयते पुत्रवधाभितप्ता ॥ १४

इति श्रीमहाभारते स्त्रीपर्वणि
एकविंशतितमोऽध्यायः ॥ २१ ॥

२२

गान्धार्युवाच ।

आवन्त्यं भीमसेनेन भक्षयन्ति निपातितम् ।
गृध्रगोमायवः शूरं बहुबन्धमबन्धुवत् ॥ १
तं पश्य कदनं कृत्वा शत्रूणां मधुसूदन ।
शयानं वीरशयने रुधिरेण समुक्षितम् ॥ २
तं सृगालाश्च कङ्काश्च क्रव्यादाश्च पृथग्विधाः ।
तेन तेन विकर्षन्ति पश्य कालस्य पर्ययम् ॥ ३
शयानं वीरशयने वीरमाक्रन्दसारिणम् ।
आवन्त्यमभितो नार्यो रुदत्यः पर्युपासते ॥ ४
प्रातिपीयं महेष्वासं हतं भल्लेन बाह्लिकम् ।
प्रसुप्तमिव शार्दूलं पश्य कृष्ण मनस्विनम् ॥ ५
अतीव मुखवर्णोऽस्य निहतस्यापि शोभते ।
सोमस्येवाभिपूर्णस्य पौर्णमास्यां समुद्यतः ॥ ६
पुत्रशोकाभितप्तेन प्रतिज्ञां परिरक्षता ।
पाकशासनिना संख्ये वार्द्धक्षत्रिर्निपातितः ॥ ७
एकादश चमूर्जित्वा रक्ष्यमाणं महात्मना ।
सत्यं चिकीर्षता पश्य हतमेनं जयद्रथम् ॥ ८
सिन्धुसौवीरभर्तारं दर्पपूर्णं मनस्विनम् ।
भक्षयन्ति शिवा गृध्रा जनार्दन जयद्रथम् ॥ ९
संरक्ष्यमाणं भार्याभिरनुरक्ताभिरच्युत ।
भषन्तो व्यपकर्षन्ति गहनं निम्नमन्तिकात् ॥ १०
तमेताः पर्युपासन्ते रक्षमाणा महाभुजम् ।
सिन्धुसौवीरगान्धारकाम्बोजयवनस्त्रियः ॥ ११
यदा कृष्णामुपादाय प्राद्रवत्केकयैः सह ।
तदैव वध्यः पाण्डूनां जनार्दन जयद्रथः ॥ १२
दुःशलां मानयद्भिस्तु यदा मुक्तो जयद्रथः ।
कथमद्य न तां कृष्ण मानयन्ति स्म ते पुनः ॥१३
सैषा मम सुता बाला विलपन्ती सुदुःखिता ।
प्रमापयति चात्मानमाक्रोशति च पाण्डवान् ॥ १४
किं नु दुःखतरं कृष्ण परं मम भविष्यति ।
यत्सुता विधवा बाला स्नुषाश्च निहतेश्वराः ॥ १५
अहो धिग्दुःशलां पश्य वीतशोकभयामिव ।
शिरो भर्तुरनासाद्य धावमानामितस्ततः ॥ १६
वारयामास यः सर्वान्पाण्डवान्पुत्रगृद्धिनः ।
स हत्वा विपुलाः सेनाः स्वयं मृत्युवशं गतः ॥१७
तं मत्तमिव मातङ्गं वीरं परमदुर्जयम् ।
परिवार्य रुदन्त्येताः स्त्रियश्चन्द्रोपमाननाः ॥ १८

इति श्रीमहाभारते स्त्रीपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

गान्धार्युवाच ।

एष शल्यो हतः शेते साक्षान्नकुलमातुलः ।
धर्मज्ञेन सता तात धर्मराजेन संयुगे ॥ १
यस्त्वया स्पर्धते नित्यं सर्वत्र पुरुषर्षभ ।
स एष निहतः शेते मद्रराजो महारथः ॥ २
येन संगृह्णता तात रथमाधिरथेर्युधि ।
जयार्थं पाण्डुपुत्राणां तथा तेजोवधः कृतः ॥ ३
अहो धिक्पश्य शल्यस्य पूर्णचन्द्रसुदर्शनम् ।
मुखं पद्मपलाशाक्षं वडैरादष्टमव्रणम् ॥ ४
एषा चामीकराभस्य तप्तकाञ्चनसप्रभा ।
आस्याद्विनिःसृता जिह्वा भक्ष्यते कृष्ण पक्षिभिः ॥
युधिष्ठिरेण निहतं शल्यं समितिशोभनम् ।
रुदन्त्यः पर्युपासन्ते मद्रराजकुलस्त्रियः ॥ ६
एताः सुसूक्ष्मवसना मद्रराजं नरर्षभम् ।
क्रोशन्त्यभिसमासाद्य क्षत्रियाः क्षत्रियर्षभम् ॥ ७
शल्यं निपतितं नार्यः परिवार्याभितः स्थिताः ।
वाशिता गृष्टयः पङ्के परिमग्नमिवर्षभम् ॥ ८
शल्यं शरणदं शूरं पश्यैनं रथसत्तमम् ।
शयानं वीरशयने शरैर्विशकलीकृतम् ॥ ९
एष शैलालयो राजा भगदत्तः प्रतापवान् ।
गजाङ्कुशधरः श्रेष्ठः शेते भुवि निपातितः ॥ १०
यस्य रुक्ममयी माला शिरस्येषा विराजते ।
श्वापदैर्भक्ष्यमाणस्य शोभयन्तीव मूर्धजान् ॥ ११
एतेन किल पार्थस्य युद्धमासीत्सुदारुणम् ।
लोमहर्षणमत्युग्रं शक्रस्य बलिना यथा ॥ १२
योधयित्वा महाबाहुरेष पार्थं धनंजयम् ।
संशयं गमयित्वा च कुन्तीपुत्रेण पातितः ॥ १३
यस्य नास्ति समो लोके शौर्ये वीर्ये च कश्चन ।
स एष निहतः शेते भीष्मो भीष्मकृदाहवे ॥ १४
पश्य शांतनवं कृष्ण शयानं सूर्यवर्चसम् ।
युगान्त इव कालेन पातितं सूर्यमम्बरात् ॥ १५
एष तप्त्वा रणे शत्रूञ्शस्त्रतापेन वीर्यवान् ।
नरसूर्योऽस्तमभ्येति सूर्योऽस्तमिव केशव ॥ १६
शरतल्पगतं वीरं धर्मे देवापिना समम् ।
शयानं वीरशयने पश्य शूरनिषेविते ॥ १७
कर्णिनालीकनाराचैरास्तीर्य शयनोत्तमम् ।
आविश्य शेते भगवान्स्कन्दः शरवणं यथा ॥ १८
अतूलपूर्णं गाङ्गेयस्त्रिभिर्बाणैः समन्वितम् ।
उपधायोपधानाग्र्यं दत्तं गाण्डीवधन्वना ॥ १९
पालयानः पितुः शास्त्रमूर्ध्वरेता महायशाः ।
एष शांतनवः शेते माधवाप्रतिमो युधि ॥ २०
धर्मात्मा तात धर्मज्ञः पारंपर्येण निर्णये ।
अमर्त्य इव मर्त्यः सन्नेष प्राणानधारयत् ॥ २१
नास्ति युद्धे कृती कश्चिन्न विद्वान्न पराक्रमी ।
यत्र शांतनवो भीष्मः शेतेऽद्य निहतः परैः ॥ २२
स्वयमेतेन शूरेण पृच्छ्यमानेन पाण्डवैः ।
धर्मज्ञेनाहवे मृत्युराख्यातः सत्यवादिना ॥ २३
प्रनष्टः कुरुवंशश्च पुनर्येन समुद्धृतः ।
स गतः कुरुभिः सार्धं महाबुद्धिः पराभवम् ॥ २४
धर्मेषु कुरवः कं नु परिप्रक्ष्यन्ति माधव ।
गते देवव्रते स्वर्गं देवकल्पे नरर्षभे ॥ २५
अर्जुनस्य विनेतारमाचार्यं सात्यकेस्तथा ।
तं पश्य पतितं द्रोणं कुरूणां गुरुसत्तमम् ॥ २६
अस्त्रं चतुर्विधं वेद यथैव त्रिदशेश्वरः ।
भार्गवो वा महावीर्यस्तथा द्रोणोऽपि माधव ॥ २७
यस्य प्रसादाद्बीभत्सुः पाण्डवः कर्म दुष्करम् ।
चकार स हतः शेते नैनमस्त्राण्यपालयन् ॥ २८
यं पुरोधाय कुरव आह्वयन्ति स्म पाण्डवान् ।

सोऽयं शस्त्रभृतां श्रेष्ठो द्रोणः शस्त्रैः पृथक्कृतः ॥ २९
यस्य निर्दहतः सेनां गतिरग्नेरिवाभवत् ।
स भूमौ निहतः शेते शान्तार्चिरिव पावकः ॥ ३०
धनुर्मुष्टिरशीर्णश्च हस्तावापश्च माधव ।
द्रोणस्य निहतस्यापि दृश्यते जीवतो यथा ॥ ३१
वेदा यस्माच्च चत्वारः सर्वास्त्राणि च केशव ।
अनपेतानि वै शूराद्यथैवादौ प्रजापतेः ॥ ३२
वन्दनार्हाविमौ तस्य बन्दिभिर्वन्दितौ शुभौ ।
गोमायवो विकर्षन्ति पादौ शिष्यशतार्चितौ ॥ ३३
द्रोणं द्रुपदपुत्रेण निहतं मधुसूदन ।
कृपी कृपणमन्वास्ते दुःखोपहतचेतना ॥ ३४
तां पश्य रुदतीमार्तां मुक्तकेशीमधोमुखीम् ।
हतं पतिमुपासन्तीं द्रोणं शस्त्रभृतां वरम् ॥ ३५
बाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव ।
उपास्ते वै मृधे द्रोणं जटिला ब्रह्मचारिणी ॥ ३६
प्रेतकृत्ये च यतते कृपी कृपणमातुरा ।
हतस्य समरे भर्तुः सुकुमारी यशस्विनी ॥ ३७
अग्नीनाहृत्य विधिवच्चितां प्रज्वाल्य सर्वशः ।
द्रोणमाधाय गायन्ति त्रीणि सामानि सामगाः ॥ ३८
किरन्ति च चितामेते जटिला ब्रह्मचारिणः ।
धनुर्भिः शक्तिभिश्चैव रथनीडैश्च माधव ॥ ३९
शस्त्रैश्च विविधैरन्यैर्धक्ष्यन्ते भूरितेजसम् ।
त एते द्रोणमाधाय शंसन्ति च रुदन्ति च ॥ ४०
सामभिस्त्रिभिरन्तःस्थैरनुशंसन्ति चापरे ।
अग्नावग्निमिवाधाय द्रोणं हुत्वा हुताशने ॥ ४१
गच्छन्त्यभिमुखा गङ्गां द्रोणशिष्या द्विजातयः ।
अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं तदा ॥ ४२

इति महाभारते स्त्रीपर्वणि

त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

गान्धार्युवाच ।

सोमदत्तसुतं पश्य युयुधानेन पातितम् ।
वितुद्यमानं विहगैर्बहुभिर्माधवान्तिके ॥ १
पुत्रशोकाभिसंतप्तः सोमदत्तो जनार्दन ।
युयुधानं महेष्वासं गर्हयन्निव दृश्यते ॥ २
असौ तु भूरिश्रवसो माता शोकपरिप्लुता ।
आश्वासयति भर्तारं सोमदत्तमनिन्दिता ॥ ३
दिष्ट्या नेदं महाराज दारुणं भरतक्षयम् ।
कुरुसंक्रन्दनं घोरं युगान्तमनुपश्यसि ॥ ४
दिष्ट्या यूपध्वजं वीरं पुत्रं भूरिसहस्रदम् ।
अनेकक्रतुयज्वानं निहतं नाद्य पश्यसि ॥ ५
दिष्ट्या स्नुषाणामाक्रन्दे घोरं विलपितं बहु ।
न शृणोषि महाराज सारसीनामिवार्णवे ॥ ६
एकवस्त्रानुसंवीताः प्रकीर्णासितमूर्धजाः ।
स्नुषास्ते परिधावन्ति हतापत्या हतेश्वराः ॥ ७
श्वापदैर्भक्ष्यमाणं त्वमहो दिष्ट्या न पश्यसि ।
छिन्नबाहुं नरव्याघ्रमर्जुनेन निपातितम् ॥ ८
शलं विनिहतं संख्ये भूरिश्रवसमेव च ।
स्नुषाश्च विधवाः सर्वा दिष्ट्या नाद्येह पश्यसि ॥ ९
दिष्ट्या तत्काञ्चनं छत्रं यूपकेतोर्महात्मनः ।
विनिकीर्णं रथोपस्थे सौमदत्तेर्न पश्यसि ॥ १०
अमूस्तु भूरिश्रवसो भार्याः सात्यकिना हतम् ।
परिवार्यानुशोचन्ति भर्तारमसितेक्षणाः ॥ ११
एता विलप्य बहुलं भर्तृशोकेन कर्शिताः ।
पतन्त्यभिमुखा भूमौ कृपणं बत केशव ॥ १२
बीभत्सुरतिबीभत्सं कर्मेदमकरोत्कथम् ।
प्रमत्तस्य यदच्छैत्सीद्बाहुं शूरस्य यज्वनः ॥ १३
ततः पापतरं कर्म कृतवानपि सात्यकिः ।
यस्मात्प्रायोपविष्टस्य प्राहार्षीत्संशितात्मनः ॥ १४

एको द्वाभ्यां हतः शेषे त्वमधर्मेण धार्मिकः ।
इति यूपध्वजस्यैताः स्त्रियः क्रोशन्ति माधव ॥ १५
भार्या यूपध्वजस्यैषा करसंमितमध्यमा ।
कृत्वोत्सङ्गे भुजं भर्तुः कृपणं पर्यदेवयत् ॥ १६
अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ १७
वासुदेवस्य सांनिध्ये पार्थेनाक्लिष्टकर्मणा ।
युध्यतः समरेऽन्येन प्रमत्तस्य निपातितः ॥ १८
किं नु वक्ष्यसि संसत्सु कथासु च जनार्दन ।
अर्जुनस्य महत्कर्म स्वयं वा स किरीटवान् ॥ १९
इत्येवं गर्हयित्वैषा तूष्णीमास्ते वराङ्गना ।
तामेतामनुशोचन्ति सपत्न्यः स्वामिव स्नुषाम् ॥२०
गान्धारराजः शकुनिर्बलवान्सत्यविक्रमः ।
निहतः सहदेवेन भागिनेयेन मातुलः ॥ २१
यः पुरा हेमदण्डाभ्यां व्यजनाभ्यां स्म वीज्यते ।
स एष पक्षिभिः पक्षैः शयान उपवीज्यते ॥ २२
यः स्म रूपाणि कुरुते शतशोऽथ सहस्रशः ।
तस्य मायाविनो माया दग्धाः पाण्डवतेजसा ॥ २३
मायया निकृतिप्रज्ञो जितवान्यो युधिष्ठिरम् ।
सभायां विपुलं राज्यं स पुनर्जीवितं जितः ॥ २४
शकुन्ताः शकुनिं कृष्ण समन्तात्पर्युपासते ।
कितवं मम पुत्राणां विनाशायोपशिक्षितम् ॥ २५
एतेनैतन्महद्वैरं प्रसक्तं पाण्डवैः सह ।
वधाय मम पुत्राणामात्मनः सगणस्य च ॥ २६
यथैव मम पुत्राणां लोकाः शस्त्रजिताः प्रभो ।
एवमस्यापि दुर्बुद्धेर्लोकाः शस्त्रेण वै जिताः ॥ २७
कथं च नायं तत्रापि पुत्रान्मे भ्रातृभिः सह ।
विरोधयेदृजुप्रज्ञाननृजुर्मधुसूदन ॥ २८

इति महाभारते स्त्रीपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

गान्धार्युवाच ।

काम्बोजं पश्य दुर्धर्षं काम्बोजास्तरणोचितम् ।
शयानमृषभस्कन्धं हतं पांसुषु माधव ॥ १
यस्य क्षतजसंदिग्धौ बाहू चन्दनरूषितौ ।
अवेक्ष्य कृपणं भार्या विलपत्यतिदुःखिता ॥ २
इमौ तौ परिघप्रख्यौ बाहू शुभतलाङ्गुली ।
ययोर्विवरमापन्नां न रतिर्मां पुराजहत् ॥ ३
कां गतिं नु गमिष्यामि त्वया हीना जनेश्वर ।
दूरबन्धुरनाथेव अतीव मधुरस्वरा ॥ ४
आतपे क्लाम्यमानानां विविधानामिव स्रजाम् ।
क्लान्तानामपि नारीणां न श्रीर्जहति वै तनुम् ॥ ५
शयानमभितः शूरं कालिङ्गं मधुसूदन ।
पश्य दीप्ताङ्गदयुगप्रतिबद्धमहाभुजम् ॥ ६
मागधानामधिपतिं जयत्सेनं जनार्दन ।
परिवार्य प्ररुदिता मागध्यः पश्य योषितः ॥ ७
आसामायतनेत्राणां सुस्वराणां जनार्दन ।
मनःश्रुतिहरो नादो मनो मोहयतीव मे ॥ ८
प्रकीर्णसर्वाभरणा रुदन्त्यः शोककर्शिताः ।
स्वास्तीर्णशयनोपेता मागध्यः शेरते भुवि ॥ ९
कोसलानामधिपतिं राजपुत्रं बृहद्बलम् ।
भर्तारं परिवार्यैताः पृथक्प्ररुदिताः स्त्रियः ॥ १०
अस्य गात्रगतान्बाणान्कार्ष्णिबाहुबलार्पितान् ।
उद्धरन्त्यसुखाविष्टा मूर्छमानाः पुनः पुनः ॥ ११
आसां सर्वानवद्यानामातपेन परिश्रमात् ।
प्रम्लाननलिनाभानि भान्ति वक्त्राणि माधव ॥१२
द्रोणेन निहताः शूराः शेरते रुचिराङ्गदाः ।
द्रोणेनाभिमुखाः सर्वे भ्रातरः पञ्च केकयाः ॥ १३
तप्तकाञ्चनवर्माणस्ताम्रध्वजरथस्रजः ।
भासयन्ति महीं भासा ज्वलिता इव पावकाः ॥ १४

द्रोणेन द्रुपदं संख्ये पश्य माधव पातितम् ।
महाद्विपमिवारण्ये सिंहेन महता हतम् ॥ १५
पाञ्चालराज्ञो विपुलं पुण्डरीकाक्ष पाण्डुरम् ।
आतपत्रं समाभाति शरदीव दिवाकरः ॥ १६
एतास्तु द्रुपदं वृद्धं स्नुषा भार्याश्च दुःखिताः ।
दग्ध्वा गच्छन्ति पाञ्चाल्यं राजानमपसव्यतः ॥१७
धृष्टकेतुं महेष्वासं चेदिपुंगवमङ्गनाः ।
द्रोणेन निहतं शूरं हरन्ति हृतचेतसः ॥ १८
द्रोणास्त्रमभिहत्यैष विमर्दे मधुसूदन ।
महेष्वासो हतः शेते नद्या हृत इव द्रुमः ॥ १९
एष चेदिपतिः शूरो धृष्टकेतुर्महारथः ।
शेते विनिहतः संख्ये हत्वा शत्रून्सहस्रशः ॥ २०
वितुद्यमानं विहगैस्तं भार्याः प्रत्युपस्थिताः ।
चेदिराजं हृषीकेश हतं सबलबान्धवम् ॥ २१
दाशार्हीपुत्रजं वीरं शयानं सत्यविक्रमम् ।
आरोप्याङ्के रुदन्त्येताश्चेदिराजवराङ्गनाः ॥ २२
अस्य पुत्रं हृषीकेश सुवक्त्रं चारुकुण्डलम् ।
द्रोणेन समरे पश्य निकृत्तं बहुधा शरैः ॥ २३
पितरं नूनमाजिस्थं युध्यमानं परैः सह ।
नाजहात्पृष्ठतो वीरमद्यापि मधुसूदन ॥ २४
एवं ममापि पुत्रस्य पुत्रः पितरमन्वगात् ।
दुर्योधनं महाबाहो लक्ष्मणः परवीरहा ॥ २५
विन्दानुविन्दावावन्त्यौ पतितौ पश्य माधव ।
हिमान्ते पुष्पितौ शालौ मरुता गलिताविव ॥ २६
काञ्चनाङ्गदवर्माणौ बाणखड्गधनुर्धरौ ।
ऋषभप्रतिरूपाक्षौ शयानौ विमलस्रजौ ॥ २७
अवध्याः पाण्डवाः कृष्ण सर्व एव त्वया सह ।
ये मुक्ता द्रोणभीष्माभ्यां कर्णाद्वैकर्तनात्कृपात् ॥२८
दुर्योधनाद्द्रोणसुतात्सैन्धवाच्च महारथात् ।
सोमदत्ताद्विकर्णाच्च शूराच्च कृतवर्मणः ।
ये हन्युः शस्त्रवेगेन देवानपि नरर्षभाः ॥ २९
त इमे निहताः संख्ये पश्य कालस्य पर्ययम् ।
नातिभारोऽस्ति दैवस्य ध्रुवं माधव कश्चन ।
यदिमे निहताः शूराः क्षत्रियैः क्षत्रियर्षभाः ॥ ३०
तदैव निहताः कृष्ण मम पुत्रास्तरस्विनः ।
यदैवाकृतकामस्त्वमुपप्लव्यं गतः पुनः ॥ ३१
शंतनोश्चैव पुत्रेण प्राज्ञेन विदुरेण च ।
तदैवोक्तासि मा स्नेहं कुरुष्वात्मसुतेष्विति ॥ ३२
तयोर्न दर्शनं तात मिथ्या भवितुमर्हति ।
अचिरेणैव मे पुत्रा भस्मीभूता जनार्दन ॥ ३३

वैशंपायन उवाच ।

इत्युक्त्वा न्यपतद्भूमौ गान्धारी शोककर्शिता ।
दुःखोपहतविज्ञाना धैर्यमुत्सृज्य भारत ॥ ३४
ततः कोपपरीताङ्गी पुत्रशोकपरिप्लुता ।
जगाम शौरिं दोषेण गान्धारी व्यथितेन्द्रिया ॥३५

गान्धार्युवाच ।

पाण्डवा धार्तराष्ट्राश्च द्रुग्धाः कृष्ण परस्परम् ।
उपेक्षिता विनश्यन्तस्त्वया कस्माज्जनार्दन ॥ ३६
शक्तेन बहुभृत्येन विपुले तिष्ठता बले ।
उभयत्र समर्थेन श्रुतवाक्येन चैव ह ॥ ३७
इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन ।
यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि ॥ ३८
पतिशुश्रूषया यन्मे तपः किंचिदुपार्जितम् ।
तेन त्वां दुरवापात्मञ्शप्स्ये चक्रगदाधर ॥ ३९
यस्मात्परस्परं घ्नन्तो ज्ञातयः कुरुपाण्डवाः ।
उपेक्षितास्ते गोविन्द तस्माज्ज्ञातीन्वधिष्यसि ॥४०
त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन ।
हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः ।
कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि ॥ ४१
तवाप्येवं हतसुता निहतज्ञातिबान्धवाः ।

स्त्रियः परिपतिष्यन्ति यथैता भरतस्त्रियः ॥ ४२

वैशंपायन उवाच ।

तच्छ्रुत्वा वचनं घोरं वासुदेवो महामनाः ।
उवाच देवीं गान्धारीमीषदभ्युत्स्मयन्निव ॥ ४३
संहर्ता वृष्णिचक्रस्य नान्यो मद्विद्यते शुभे ।
जानेऽहमेतदप्येवं चीर्णं चरसि क्षत्रिये ॥ ४४
अवध्यास्ते नरैरन्यैरपि वा देवदानवैः ।
परस्परकृतं नाशमतः प्राप्स्यन्ति यादवाः ॥ ४५
इत्युक्तवति दाशार्हे पाण्डवास्त्रस्तचेतसः ।
बभूवुर्भृशसंविग्ना निराशाश्चापि जीविते ॥ ४६

इति श्रीमहाभारते स्त्रीपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ समाप्तं स्त्रीपर्व ॥

२६

वासुदेव उवाच ।

उत्तिष्ठोत्तिष्ठ गान्धारि मा च शोके मनः कृथाः ।
तवैव ह्यपराधेन कुरवो निधनं गताः ॥ १
या त्वं पुत्रं दुरात्मानमीर्षुमत्यन्तमानिनम् ।
दुर्योधनं पुरस्कृत्य दुष्कृतं साधु मन्यसे ॥ २
निष्ठुरं वैरपुरुषं वृद्धानां शासनातिगम् ।
कथमात्मकृतं दोषं मय्याधातुमिहेच्छसि ॥ ३
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति ।
दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते ॥ ४
तपोर्थीयं ब्राह्मणी धत्त गर्भं
गौर्वोढारं धावितारं तुरंगी ।
शूद्रा दासं पशुपालं तु वैश्या
वधार्थीयं त्वद्विधा राजपुत्री ॥ ५

वैशंपायन उवाच ।

तच्छ्रुत्वा वासुदेवस्य पुनरुक्तं वचोऽप्रियम् ।
तूष्णीं बभूव गान्धारी शोकव्याकुललोचना ॥ ६
धृतराष्ट्रस्तु राजर्षिर्निगृह्याबुद्धिजं तमः ।
पर्यपृच्छत धर्मात्मा धर्मराजं युधिष्ठिरम् ॥ ७
जीवतां परिमाणज्ञः सैन्यानामसि पाण्डव ।
हतानां यदि जानीषे परिमाणं वदस्व मे ॥ ८

युधिष्ठिर उवाच ।

दशायुतानामयुतं सहस्राणि च विंशतिः ।
कोट्यः षष्टिश्च षट् चैव येऽस्मिन्राजमृधे हताः ॥ ९
अलक्ष्याणां तु वीराणां सहस्राणि चतुर्दश ।
दश चान्यानि राजेन्द्र शतं षष्टिश्च पञ्च च ॥ १०

धृतराष्ट्र उवाच ।

युधिष्ठिर गतिं कां ते गताः पुरुषसत्तमाः ।
आचक्ष्व मे महाबाहो सर्वज्ञो ह्यसि मे मतः ॥ ११

युधिष्ठिर उवाच ।

यैर्हुतानि शरीराणि हृष्टैः परमसंयुगे ।
देवराजसमाँल्लोकान्गतास्ते सत्यविक्रमाः ॥ १२
ये त्वहृष्टेन मनसा मर्तव्यमिति भारत ।
युध्यमाना हताः संख्ये ते गन्धर्वैः समागताः ॥ १३
ये तु संग्रामभूमिष्ठा याचमानाः पराङ्मुखाः ।
शस्त्रेण निधनं प्राप्ता गतास्ते गुह्यकान्प्रति ॥ १४
पीड्यमानाः परैर्ये तु हीयमाना निरायुधाः ।
ह्रीनिषेधा महात्मानः परानभिमुखा रणे ॥ १५
छिद्यमानाः शितैः शस्त्रैः क्षत्रधर्मपरायणाः ।
गतास्ते ब्रह्मसदनं हता वीराः सुवर्चसः ॥ १६
ये तत्र निहता राजन्नन्तरायोधनं प्रति ।
यथाकथंचित्ते राजन्संप्राप्ता उत्तरान्कुरून् ॥ १७

धृतराष्ट्र उवाच ।

केन ज्ञानबलेनैवं पुत्र पश्यसि सिद्धवत् ।
तन्मे वद महाबाहो श्रोतव्यं यदि वै मया ॥ १८

युधिष्ठिर उवाच ।

निदेशाद्भवतः पूर्वं वने विचरता मया ।
तीर्थयात्राप्रसङ्गेन संप्राप्तोऽयमनुग्रहः ॥ १९
देवर्षिर्लोमशो दृष्टस्ततः प्राप्तोऽस्म्यनुस्मृतिम् ।
दिव्यं चक्षुरपि प्राप्तं ज्ञानयोगेन वै पुरा ॥ २०

धृतराष्ट्र उवाच ।

येऽत्रानाथा जनस्यास्य सनाथा ये च भारत ।
कच्चित्तेषां शरीराणि धक्ष्यन्ति विधिपूर्वकम् ॥२१
न येषां सन्ति कर्तारो न च येऽत्राहिताग्नयः ।
वयं च कस्य कुर्यामो बहुत्वात्तात कर्मणः ॥ २२
यान्सुपर्णाश्च गृध्राश्च विकर्षन्ति ततस्ततः ।
तेषां तु कर्मणा लोका भविष्यन्ति युधिष्ठिर ॥ २३

वैशंपायन उवाच ।

एवमुक्तो महाप्राज्ञः कुन्तीपुत्रो युधिष्ठिरः ।
आदिदेश सुधर्माणं धौम्यं सूतं च संजयम् ॥ २४
विदुरं च महाबुद्धिं युयुत्सुं चैव कौरवम् ।
इन्द्रसेनमुखांश्चैव भृत्यान्सूतांश्च सर्वशः ॥ २५
भवन्तः कारयन्त्वेषां प्रेतकार्याणि सर्वशः ।
यथा चानाथवत्किंचिच्छरीरं न विनश्यति ॥ २६
शासनाद्धर्मराजस्य क्षत्ता सूतश्च संजयः ।
सुधर्मा धौम्यसहित इन्द्रसेनादयस्तथा ॥ २७
चन्दनागुरुकाष्ठानि तथा कालीयकान्युत ।
घृतं तैलं च गन्धांश्च क्षौमाणि वसनानि च ॥ २८
समाहृत्य महार्हाणि दारूणां चैव संचयान् ।
रथांश्च मृदितांस्तत्र नानाप्रहरणानि च ॥ २९
चिताः कृत्वा प्रयत्नेन यथामुख्यान्नराधिपान् ।
दाहयामासुरव्यग्रा विधिदृष्टेन कर्मणा ॥ ३०
दुर्योधनं च राजानं भ्रातॄंश्चास्य शताधिकान् ।
शल्यं शलं च राजानं भूरिश्रवसमेव च ॥ ३१
जयद्रथं च राजानमभिमन्युं च भारत ।
दौःशासनिं लक्ष्मणं च धृष्टकेतुं च पार्थिवम् ॥३२
बृहन्तं सोमदत्तं च सृञ्जयांश्च शताधिकान् ।
राजानं क्षेमधन्वानं विराटद्रुपदौ तथा ॥ ३३
शिखण्डिनं च पाञ्चाल्यं धृष्टद्युम्नं च पार्षतम् ।
युधामन्युं च विक्रान्तमुत्तमौजसमेव च ॥ ३४
कौसल्यं द्रौपदेयांश्च शकुनिं चापि सौबलम् ।
अचलं वृषकं चैव भगदत्तं च पार्थिवम् ॥ ३५
कर्णं वैकर्तनं चैव सहपुत्रममर्षणम् ।
केकयांश्च महेष्वासांस्त्रिगर्तांश्च महारथान् ॥ ३६
घटोत्कचं राक्षसेन्द्रं बकभ्रातरमेव च ।
अलम्बुसं च राजानं जलसंधं च पार्थिवम् ॥ ३७
अन्यांश्च पार्थिवान्राजञ्शतशोऽथ सहस्रशः ।
घृतधाराहुतैर्दीप्तैः पावकैः समदाहयन् ॥ ३८
पितृमेधाश्च केषांचिदवर्तन्त महात्मनाम् ।
सामभिश्चाप्यगायन्त तेऽन्वशोच्यन्त चामरैः ॥३९
साम्नामृचां च नादेन स्त्रीणां च रुदितस्वनैः ।
कश्मलं सर्वभूतानां निशायां समपद्यत ॥ ४०
ते विधूमाः प्रदीप्ताश्च दीप्यमानाश्च पावकाः ।
नभसीवान्वदृश्यन्त ग्रहास्तन्वभ्रसंवृताः ॥ ४१
ये चाप्यनाथास्तत्रासन्नानादेशसमागताः ।
तांश्च सर्वान्समानाय्य राशीन्कृत्वा सहस्रशः ॥४२
चित्वा दारुभिरव्यग्रः प्रभूतैः स्नेहतापितैः ।
दाहयामास विदुरो धर्मराजस्य शासनात् ॥ ४३
कारयित्वा क्रियास्तेषां कुरुराजो युधिष्ठिरः ।
धृतराष्ट्रं पुरस्कृत्य गङ्गामभिमुखोऽगमत् ॥ ४४

इति श्रीमहाभारते स्त्रीपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

॥ श्राद्धपर्व समाप्तम् ॥

२७

वैशंपायन उवाच ।

ते समासाद्य गङ्गां तु शिवां पुण्यजनोचिताम् ।
ह्रदिनीं वप्रसंपन्नां महानूपां महावनाम् ॥ १
भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्य च ।
ततः पितॄणां पौत्राणां भ्रातॄणां स्वजनस्य च ॥ २
पुत्राणामार्यकाणां च पतीनां च कुरुस्त्रियः ।
उदकं चक्रिरे सर्वा रुदन्त्यो भृशदुःखिताः ।
सुहृदां चापि धर्मज्ञाः प्रचक्रुः सलिलक्रियाः ॥ ३
उदके क्रियमाणे तु वीराणां वीरपत्निभिः ।
सूपतीर्थाभवद्गङ्गा भूयो विप्रससार च ॥ ४
तन्महोदधिसंकाशं निरानन्दमनुत्सवम् ।
वीरपत्नीभिराकीर्णं गङ्गातीरमशोभत ॥ ५
ततः कुन्ती महाराज सहसा शोककर्शिता ।
रुदती मन्दया वाचा पुत्रान्वचनमब्रवीत् ॥ ६
यः स शूरो महेष्वासो रथयूथपयूथपः ।
अर्जुनेन हतः संख्ये वीरलक्षणलक्षितः ॥ ७
यं सूतपुत्रं मन्यध्वं राधेयमिति पाण्डवाः ।
यो व्यराजच्चमूमध्ये दिवाकर इव प्रभुः ॥ ८
प्रत्ययुध्यत यः सर्वान्पुरा वः सपदानुगान् ।
दुर्योधनबलं सर्वं यः प्रकर्षन्व्यरोचत ॥ ९
यस्य नास्ति समो वीर्ये पृथिव्यामपि कश्चन ।
सत्यसंधस्य शूरस्य संग्रामेष्वपलायिनः ॥ १०
कुरुध्वमुदकं तस्य भ्रातुरक्लिष्टकर्मणः ।
स हि वः पूर्वजो भ्राता भास्करान्मय्यजायत ।
कुण्डली कवची शूरो दिवाकरसमप्रभः ॥ ११
श्रुत्वा तु पाण्डवाः सर्वे मातुर्वचनमप्रियम् ।
कर्णमेवानुशोचन्त भूयश्चार्ततराभवन् ॥ १२
ततः स पुरुषव्याघ्रः कुन्तीपुत्रो युधिष्ठिरः ।
उवाच मातरं वीरो निःश्वसन्निव पन्नगः ॥ १३
यस्येषुपातमासाद्य नान्यस्तिष्ठेद्धनंजयात् ।
कथं पुत्रो भवत्यां स देवगर्भः पुराभवत् ॥ १४
यस्य बाहुप्रतापेन तापिताः सर्वतो वयम् ।
तमग्निमिव वस्त्रेण कथं छादितवत्यसि ।
यस्य बाहुबलं घोरं धार्तराष्ट्रैरुपासितम् ॥ १५
नान्यः कुन्तीसुतात्कर्णादगृह्णाद्रथिनां रथी ।
स नः प्रथमजो भ्राता सर्वशस्त्रभृतां वरः ।
असूत तं भवत्यग्रे कथमद्भुतविक्रमम् ॥ १६
अहो भवत्या मन्त्रस्य पिधानेन वयं हताः ।
निधनेन हि कर्णस्य पीडिताः स्म सबान्धवाः ॥ १७
अभिमन्योर्विनाशेन द्रौपदेयवधेन च ।
पाञ्चालानां च नाशेन कुरूणां पतनेन च ॥ १८
ततः शतगुणं दुःखमिदं मामस्पृशद्भृशम् ।
कर्णमेवानुशोचन्हि दह्याम्यग्नाविवाहितः ॥ १९
न हि स्म किंचिदप्राप्यं भवेदपि दिवि स्थितम् ।
न च स्म वैशसं घोरं कौरवान्तकरं भवेत् ॥ २०
एवं विलप्य बहुलं धर्मराजो युधिष्ठिरः ।
विनदञ्शनकै राजंश्चकारास्योदकं प्रभुः ॥ २१
ततो विनेदुः सहसा स्त्रीपुंसास्तत्र सर्वशः ।
अभितो ये स्थितास्तत्र तस्मिन्नुदककर्मणि ॥ २२
तत आनाययामास कर्णस्य सपरिच्छदम् ।
स्त्रियः कुरुपतिर्धीमान्भ्रातुः प्रेम्णा युधिष्ठिरः ॥ २३
स ताभिः सह धर्मात्मा प्रेतकृत्यमनन्तरम् ।
कृत्वोत्ततार गङ्गायाः सलिलादाकुलेन्द्रियः ॥ २४

इति श्रीमहाभारते स्त्रीपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

॥ समाप्तं जलप्रदानिकपर्व ॥

॥ समाप्तं स्त्रीपर्व ॥

॥ समाप्तं स्त्रीपर्व ॥

१२

शान्तिपर्व

१

वैशंपायन उवाच ।

कृतोदकास्ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।
विदुरो धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥ १
तत्र ते सुमहात्मानो न्यवसन्कुरुनन्दनाः ।
शौचं निवर्तयिष्यन्तो मासमेकं बहिः पुरात् ॥ २
कृतोदकं तु राजानं धर्मात्मानं युधिष्ठिरम् ।
अभिजग्मुर्महात्मानः सिद्धा ब्रह्मर्षिसत्तमाः ॥ ३
द्वैपायनो नारदश्च देवलश्च महानृषिः ।
देवस्थानश्च कण्वश्च तेषां शिष्याश्च सत्तमाः ॥ ४
अन्ये च वेदविद्वांसः कृतप्रज्ञा द्विजातयः ।
गृहस्थाः स्नातकाः सर्वे ददृशुः कुरुसत्तमम् ॥ ५
अभिगम्य महात्मानः पूजिताश्च यथाविधि ।
आसनेषु महार्हेषु विविशुस्ते महर्षयः ॥ ६
प्रतिगृह्य ततः पूजां तत्कालसदृशीं तदा ।
पर्युपासन्यथान्यायं परिवार्य युधिष्ठिरम् ॥ ७
पुण्ये भागीरथीतीरे शोकव्याकुलचेतसम् ।
आश्वासयन्तो राजानं विप्राः शतसहस्रशः ॥ ८
नारदस्त्वब्रवीत्काले धर्मात्मानं युधिष्ठिरम् ।
विचार्य मुनिभिः सार्धं तत्कालसदृशं वचः ॥ ९
भवतो बाहुवीर्येण प्रसादान्माधवस्य च ।
जितेयमवनिः कृत्स्ना धर्मेण च युधिष्ठिर ॥ १०
दिष्ट्या मुक्ताः स्म संग्रामादस्माल्लोकभयंकरात् ।
क्षत्रधर्मरतश्चापि कच्चिन्मोदसि पाण्डव ॥ ११
कच्चिच्च निहतामित्रः प्रीणासि सुहृदो नृप ।
कच्चिच्छ्रियमिमां प्राप्य न त्वां शोकः प्रबाधते ॥ १२

युधिष्ठिर उवाच ।

विजितेयं मही कृत्स्ना कृष्णबाहुबलाश्रयात् ।
ब्राह्मणानां प्रसादेन भीमार्जुनबलेन च ॥ १३
इदं तु मे महद्दुःखं वर्तते हृदि नित्यदा ।
कृत्वा ज्ञातिक्षयमिमं महान्तं लोभकारितम् ॥ १४
सौभद्रं द्रौपदेयांश्च घातयित्वा प्रियान्सुतान् ।
जयोऽयमजयाकारो भगवन्प्रतिभाति मे ॥ १५
किं नु वक्ष्यति वार्ष्णेयी वधूर्मे मधुसूदनम् ।
द्वारकावासिनी कृष्णमितः प्रतिगतं हरिम् ॥ १६
द्रौपदी हतपुत्रेयं कृपणा हतबान्धवा ।
अस्मत्प्रियहिते युक्ता भूयः पीडयतीव माम् ॥ १७
इदमन्यच्च भगवन्यत्त्वां वक्ष्यामि नारद ।
मन्त्रसंवरणेनास्मि कुन्त्या दुःखेन योजितः ॥ १८
योऽसौ नागायुतबलो लोकेऽप्रतिरथो रणे ।
सिंहखेलगतिर्धीमान्घृणी दान्तो यतव्रतः ॥ १९
आश्रयो धार्तराष्ट्राणां मानी तीक्ष्णपराक्रमः ।
अमर्षी नित्यसंरम्भी क्षेप्तास्माकं रणे रणे ॥ २०
शीघ्रास्त्रश्चित्रयोधी च कृती चाद्भुतविक्रमः ।
गूढोत्पन्नः सुतः कुन्त्या भ्रातास्माकं च सोदरः ॥ २१
तोयकर्मणि यं कुन्ती कथयामास सूर्यजम् ।
पुत्रं सर्वगुणोपेतमवकीर्णं जले पुरा ॥ २२

यं सूतपुत्रं लोकोऽयं राधेयं चाप्यमन्यत ।
स ज्येष्ठपुत्रः कुन्त्या वै भ्रातास्माकं च मातृजः ॥२३
अजानता मया संख्ये राज्यलुब्धेन घातितः ।
तन्मे दहति गात्राणि तूलराशिमिवानलः ॥ २४
न हि तं वेद पार्थोऽपि भ्रातरं श्वेतवाहनः ।
नाहं न भीमो न यमौ स त्वस्मान्वेद सुव्रतः ॥२५
गता किल पृथा तस्य सकाशमिति नः श्रुतम् ।
अस्माकं शमकामा वै त्वं च पुत्रो ममेत्यथ ॥ २६
पृथाया न कृतः कामस्तेन चापि महात्मना ।
अतिपश्चादिदं मातर्यवोचदिति नः श्रुतम् ॥ २७
न हि शक्ष्याम्यहं त्यक्तुं नृपं दुर्योधनं रणे ।
अनार्यं च नृशंसं च कृतघ्नं च हि मे भवेत् ॥२८
युधिष्ठिरेण संधिं च यदि कुर्यां मते तव ।
भीतो रणे श्वेतवाहादिति मां मंस्यते जनः ॥ २९
सोऽहं निर्जित्य समरे विजयं सहकेशवम् ।
संधास्ये धर्मपुत्रेण पश्चादिति च सोऽब्रवीत् ॥३०
तमवोचत्किल पृथा पुनः पृथुलवक्षसम् ।
चतुर्णामभयं देहि कामं युध्यस्व फल्गुनम् ॥ ३१
सोऽब्रवीन्मातरं धीमान्वेपमानः कृताञ्जलिः ।
प्राप्तान्विषह्यांश्चतुरो न हनिष्यामि ते सुतान् ॥ ३२
पञ्चैव हि सुता मातर्भविष्यन्ति हि ते ध्रुवम् ।
सकर्णा वा हते पार्थे सार्जुना वा हते मयि ॥ ३३
तं पुत्रगृद्धिनी भूयो माता पुत्रमथाब्रवीत् ।
भ्रातॄणां स्वस्ति कुर्वीथा येषां स्वस्ति चिकीर्षसि ॥३४
तमेवमुक्त्वा तु पृथा विसृज्योपययौ गृहान् ।
सोऽर्जुनेन हतो वीरो भ्राता भ्रात्रा सहोदरः ॥३५
न चैव विवृतो मन्त्रः पृथायास्तस्य वा मुने ।
अथ शूरो महेष्वासः पार्थेनासौ निपातितः ॥ ३६
अहं त्वज्ञासिषं पश्चात्स्वसोदर्यं द्विजोत्तम ।
पूर्वजं भ्रातरं कर्णं पृथाया वचनात्प्रभो ॥ ३७
तेन मे दूयतेऽतीव हृदयं भ्रातृघातिनः ।
कर्णार्जुनसहायोऽहं जयेयमपि वासवम् ॥ ३८
सभायां क्लिश्यमानस्य धार्तराष्ट्रैर्दुरात्मभिः ।
सहसोत्पतितः क्रोधः कर्णं दृष्ट्वा प्रशाम्यति ॥ ३९
यदा ह्यस्य गिरो रूक्षाः शृणोमि कटुकोदयाः ।
सभायां गदतो द्यूते दुर्योधनहितैषिणः ॥ ४०
तदा नश्यति मे क्रोधः पादौ तस्य निरीक्ष्य ह ।
कुन्त्या हि सदृशौ पादौ कर्णस्येति मतिर्मम ॥ ४१
सादृश्यहेतुमन्विच्छन्पृथायास्तव चैव ह ।
कारणं नाधिगच्छामि कथंचिदपि चिन्तयन् ॥ ४२
कथं नु तस्य संग्रामे पृथिवी चक्रमग्रसत् ।
कथं च शप्तो भ्राता मे तत्त्वं वक्तुमिहार्हसि ॥ ४३
श्रोतुमिच्छामि भगवंस्त्वत्तः सर्वं यथातथम् ।
भवान्हि सर्वविद्विद्वाँल्लोके वेद कृताकृतम् ॥ ४४

इति श्रीमहाभारते शान्तिपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

स एवमुक्तस्तु मुनिर्नारदो वदतां वरः ।
कथयामास तत्सर्वं यथा शप्तः स सूतजः ॥ १
एवमेतन्महाबाहो यथा वदसि भारत ।
न कर्णार्जुनयोः किंचिदविषह्यं भवेद्रणे ॥ २
गुह्यमेतत्तु देवानां कथयिष्यामि ते नृप ।
तन्निबोध महाराज यथा वृत्तमिदं पुरा ॥ ३
क्षत्रं स्वर्गं कथं गच्छेच्छस्त्रपूतमिति प्रभो ।
संघर्षजननस्तस्मात्कन्यागर्भो विनिर्मितः ॥ ४
स बालस्तेजसा युक्तः सूतपुत्रत्वमागतः ।
चकाराङ्गिरसां श्रेष्ठे धनुर्वेदं गुरौ तव ॥ ५
स बलं भीमसेनस्य फल्गुनस्य च लाघवम् ।
बुद्धिं च तव राजेन्द्र यमयोर्विनयं तथा ॥ ६

सख्यं च वासुदेवेन बाल्ये गाण्डीवधन्वनः ।
प्रजानामनुरागं च चिन्तयानो व्यदह्यत ॥ ७
स सख्यमगमद्बाल्ये राज्ञा दुर्योधनेन वै ।
युष्माभिर्नित्यसंद्विष्टो दैवाच्चापि स्वभावतः ॥ ८
विद्याधिकमथालक्ष्य धनुर्वेदे धनंजयम् ।
द्रोणं रहस्युपागम्य कर्णो वचनमब्रवीत् ॥ ९
ब्रह्मास्त्रं वेत्तुमिच्छामि सरहस्यनिवर्तनम् ।
अर्जुनेन समो युद्धे भवेयमिति मे मतिः ॥ १०
समः पुत्रेषु च स्नेहः शिष्येषु च तव ध्रुवम् ।
त्वत्प्रसादान्न मां ब्रूयुरकृतास्त्रं विचक्षणाः ॥ ११
द्रोणस्तथोक्तः कर्णेन सापेक्षः फल्गुनं प्रति ।
दौरात्म्यं चापि कर्णस्य विदित्वा तमुवाच ह ॥ १२
ब्रह्मास्त्रं ब्राह्मणो विद्याद्यथावच्चरितव्रतः ।
क्षत्रियो वा तपस्वी यो नान्यो विद्यात्कथंचन ॥ १३
इत्युक्तोऽङ्गिरसां श्रेष्ठमामन्त्र्य प्रतिपूज्य च ।
जगाम सहसा रामं महेन्द्रं पर्वतं प्रति ॥ १४
स तु राममुपागम्य शिरसाभिप्रणम्य च ।
ब्राह्मणो भार्गवोऽस्मीति गौरवेणाभ्यगच्छत ॥ १५
रामस्तं प्रतिजग्राह पृष्ट्वा गोत्रादि सर्वशः ।
उष्यतां स्वागतं चेति प्रीतिमांश्चाभवद्भृशम् ॥ १६
तत्र कर्णस्य वसतो महेन्द्रे पर्वतोत्तमे ।
गन्धर्वै राक्षसैर्यक्षैर्देवैश्चासीत्समागमः ॥ १७
स तत्रेष्वस्त्रमकरोद्भृगुश्रेष्ठाद्यथाविधि ।
प्रियश्चाभवदत्यर्थं देवगन्धर्वरक्षसाम् ॥ १८
स कदाचित्समुद्रान्ते विचरन्नाश्रमान्तिके ।
एकः खड्गधनुष्पाणिः परिचक्राम सूतजः ॥ १९
सोऽग्निहोत्रप्रसक्तस्य कस्यचिद्ब्रह्मवादिनः ।
जघानाज्ञानतः पार्थ होमधेनुं यदृच्छया ॥ २०
तदज्ञानकृतं मत्वा ब्राह्मणाय न्यवेदयत् ।
कर्णः प्रसादयंश्चैनमिदमित्यब्रवीद्वचः ॥ २१
अबुद्धिपूर्वं भगवन्धेनुरेषा हता तव ।
मया तत्र प्रसादं मे कुरुष्वेति पुनः पुनः ॥ २२
तं स विप्रोऽब्रवीत्क्रुद्धो वाचा निर्भर्त्सयन्निव ।
दुराचार वधार्हस्त्वं फलं प्राप्नुहि दुर्मते ॥ २३
येन विस्पर्धसे नित्यं यदर्थं घटसेऽनिशम् ।
युध्यतस्तेन ते पाप भूमिश्चक्रं ग्रसिष्यति ॥ २४
ततश्चक्रे महीग्रस्ते मूर्धानं ते विचेतसः ।
पातयिष्यति विक्रम्य शत्रुर्गच्छ नराधम ॥ २५
यथेयं गौर्हता मूढ प्रमत्तेन त्वया मम ।
प्रमत्तस्यैवमेवान्यः शिरस्ते पातयिष्यति ॥ २६
ततः प्रसादयामास पुनस्तं द्विजसत्तमम् ।
गोभिर्धनैश्च रत्नैश्च स चैनं पुनरब्रवीत् ॥ २७
नेदं मद्व्याहृतं कुर्यात्सर्वलोकोऽपि वै मृषा ।
गच्छ वा तिष्ठ वा यद्वा कार्यं ते तत्समाचार ॥ २८
इत्युक्तो ब्राह्मणेनाथ कर्णो दैन्यादधोमुखः ।
राममभ्यागमद्भीतस्तदेव मनसा स्मरन् ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

नारद उवाच ।

कर्णस्य बाहुवीर्येण प्रश्रयेण दमेन च ।
तुतोष भृगुशार्दूलो गुरुशुश्रूषया तथा ॥ १
तस्मै स विधिवत्कृत्स्नं ब्रह्मास्त्रं सनिवर्तनम् ।
प्रोवाचाखिलमव्यग्रं तपस्वी सुतपस्विने ॥ २
विदितास्त्रस्ततः कर्णो रममाणोऽऽश्रमे भृगोः ।
चकार वै धनुर्वेदे यत्नमद्भुतविक्रमः ॥ ३
ततः कदाचिद्रामस्तु चरन्नाश्रममन्तिकात् ।
कर्णेन सहितो धीमानुपवासेन कर्शितः ॥ ४
सुष्वाप जामदग्न्यो वै विस्रम्भोत्पन्नसौहृदः ।
कर्णस्योत्सङ्ग आधाय शिरः क्लान्तमना गुरुः ॥ ५

अथ कृमिः श्लेष्ममयो मांसशोणितभोजनः ।
दारुणो दारुणस्पर्शः कर्णस्याभ्याशमागमत् ॥ ६
स तस्योरुमथासाद्य बिभेद रुधिराशनः ।
न चैनमशकत्क्षेप्तुं हन्तुं वापि गुरोर्भयात् ॥ ७
संदश्यमानोऽपि तथा कृमिणा तेन भारत ।
गुरुप्रबोधशङ्की च तमुपैक्षत सूतजः ॥ ८
कर्णस्तु वेदनां धैर्यादसह्यां विनिगृह्य ताम् ।
अकम्पन्नव्यथंश्चैव धारयामास भार्गवम् ॥ ९
यदा तु रुधिरेणाङ्गे परिस्पृष्टो भृगूद्वहः ।
तदाबुध्यत तेजस्वी संतप्तश्चेदमब्रवीत् ॥ १०
अहोऽस्म्यशुचितां प्राप्तः किमिदं क्रियते त्वया ।
कथयस्व भयं त्यक्त्वा याथातथ्यमिदं मम ॥ ११
तस्य कर्णस्तदाचष्ट कृमिणा परिभक्षणम् ।
ददर्श रामस्तं चापि कृमिं सूकरसंनिभम् ॥ १२
अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतम् ।
रोमभिः संनिरुद्धाङ्गमलर्कं नाम नामतः ॥ १३
स दृष्टमात्रो रामेण कृमिः प्राणानवासृजत् ।
तस्मिन्नेवासृक्संक्लिन्ने तदद्भुतमिवाभवत् ॥ १४
ततोऽन्तरिक्षे ददृशे विश्वरूपः करालवान् ।
राक्षसो लोहितग्रीवः कृष्णाङ्गो मेघवाहनः ॥ १५
स रामं प्राञ्जलिर्भूत्वा बभाषे पूर्णमानसः ।
स्वस्ति ते भृगुशार्दूल गमिष्यामि यथागतम् ॥ १६
मोक्षितो नरकादस्मि भवता मुनिसत्तम ।
भद्रं च तेऽस्तु नन्दिश्च प्रियं मे भवता कृतम् ॥ १७
तमुवाच महाबाहुर्जामदग्न्यः प्रतापवान् ।
कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत् ॥ १८
सोऽब्रवीदहमासं प्राग्गृत्सो नाम महासुरः ।
पुरा देवयुगे तात भृगोस्तुल्यवया इव ॥ १९
सोऽहं भृगोः सुदयितां भार्यामपहरं बलात् ।
महर्षेरभिशापेन कृमिभूतोऽपतं भुवि ॥ २०
अब्रवीत्तु स मां क्रोधात्तव पूर्वपितामहः ।
मूत्रश्लेष्माशनः पाप निरयं प्रतिपत्स्यसे ॥ २१
शापस्यान्तो भवेद्ब्रह्मन्नित्येवं तमथाब्रुवम् ।
भविता भार्गवे राम इति मामब्रवीद्भृगुः ॥ २२
सोऽहमेतां गतिं प्राप्तो यथा नकुशलं तथा ।
त्वया साधो समागम्य विमुक्तः पापयोनितः ॥ २३
एवमुक्त्वा नमस्कृत्य ययौ रामं महासुरः ।
रामः कर्णं तु सक्रोधमिदं वचनमब्रवीत् ॥ २४
अतिदुःखमिदं मूढ न जातु ब्राह्मणः सहेत् ।
क्षत्रियस्यैव ते धैर्यं कामया सत्यमुच्यताम् ॥ २५
तमुवाच ततः कर्णः शापभीतः प्रसादयन् ।
ब्रह्मक्षत्रान्तरे सूतं जातं मां विद्धि भार्गव ॥ २६
राधेयः कर्ण इति मां प्रवदन्ति जना भुवि ।
प्रसादं कुरु मे ब्रह्मन्नस्त्रलुब्धस्य भार्गव ॥ २७
पिता गुरुर्न संदेहो वेदविद्याप्रदः प्रभुः ।
अतो भार्गव इत्युक्तं मया गोत्रं तवान्तिके ॥ २८
तमुवाच भृगुश्रेष्ठः सरोषः प्रहसन्निव ।
भूमौ निपतितं दीनं वेपमानं कृताञ्जलिम् ॥ २९
यस्मान्मिथ्योपचरितो अस्त्रलोभादिह त्वया ।
तस्मादेतद्धि ते मूढ ब्रह्मास्त्रं प्रतिभास्यति ॥ ३०
अन्यत्र वधकालात्ते सदृशेन समेयुषः ।
अब्राह्मणे न हि ब्रह्म ध्रुवं तिष्ठेत्कदाचन ॥ ३१
गच्छेदानीं न ते स्थानमनृतस्येह विद्यते ।
न त्वया सदृशो युद्धे भविता क्षत्रियो भुवि ॥ ३२
एवमुक्तस्तु रामेण न्यायेनोपजगाम सः ।
दुर्योधनमुपागम्य कृतास्त्रोऽस्मीति चाब्रवीत् ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

नारद उवाच ।

कर्णस्तु समवाप्यैतदस्त्रं भार्गवनन्दनात् ।
दुर्योधनेन सहितो मुमुदे भरतर्षभ ॥ १
ततः कदाचिद्राजानः समाजग्मुः स्वयंवरे ।
कलिङ्गविषये राजन्राज्ञश्चित्राङ्गदस्य च ॥ २
श्रीमद्राजपुरं नाम नगरं तत्र भारत ।
राजानः शतशस्तत्र कन्यार्थं समुपागमन् ॥ ३
श्रुत्वा दुर्योधनस्तत्र समेतान्सर्वपार्थिवान् ।
रथेन काञ्चनाङ्गेन कर्णेन सहितो ययौ ॥ ४
ततः स्वयंवरे तस्मिन्संप्रवृत्ते महोत्सवे ।
समापेतुर्नृपतयः कन्यार्थे नृपसत्तम ॥ ५
शिशुपालो जरासंधो भीष्मको वक्र एव च ।
कपोतरोमा नीलश्च रुक्मी च दृढविक्रमः ॥ ६
सृगालश्च महाराज स्त्रीराज्याधिपतिश्च यः ।
अशोकः शतधन्वा च भोजो वीरश्च नामतः ॥ ७
एते चान्ये च बहवो दक्षिणां दिशमाश्रिताः ।
म्लेच्छाचार्याश्च राजानः प्राच्योदीच्याश्च भारत ॥ ८
काञ्चनाङ्गदिनः सर्वे बद्धजाम्बूनदस्रजः ।
सर्वे भास्वरदेहाश्च व्याघ्रा इव मदोत्कटाः ॥ ९
ततः समुपविष्टेषु तेषु राजसु भारत ।
विवेश रङ्गं सा कन्या धात्रीवर्षधरान्विता ॥ १०
ततः संश्राव्यमाणेषु राज्ञां नामसु भारत ।
अत्यक्रामद्धार्तराष्ट्रं सा कन्या वरवर्णिनी ॥ ११
दुर्योधनस्तु कौरव्यो नामर्षयत लङ्घनम् ।
प्रत्यषेधच्च तां कन्यामसत्कृत्य नराधिपान् ॥ १२
स वीर्यमदमत्तत्वाद्भीष्मद्रोणावुपाश्रितः ।
रथमारोप्य तां कन्यामाजुहाव नराधिपान् ॥ १३
तमन्वयाद्रथी खड्गी बद्धगोधाङ्गुलित्रवान् ।
कर्णः शस्त्रभृतां श्रेष्ठः पृष्ठतः पुरुषर्षभ ॥ १४
ततो विमर्दः सुमहान्राज्ञामासीद्युधिष्ठिर ।
संनह्यतां तनुत्राणि रथान्योजयतामपि ॥ १५
तेऽभ्यधावन्त संक्रुद्धाः कर्णदुर्योधनावुभौ ।
शरवर्षाणि मुञ्चन्तो मेघाः पर्वतयोरिव ॥ १६
कर्णस्तेषामापततामेकैकेन क्षुरेण ह ।
धनूंषि सशरावापान्यपातयत भूतले ॥ १७
ततो विधनुषः कांश्चित्कांश्चिदुद्यतकार्मुकान् ।
कांश्चिदुद्वहतो बाणान्रथशक्तिगदास्तथा ॥ १८
लाघवादाकुलीकृत्य कर्णः प्रहरतां वरः ।
हतसूतांश्च भूयिष्ठानवजिग्ये नराधिपान् ॥ १९
ते स्वयं त्वरयन्तोऽश्वान्याहि याहीति वादिनः ।
व्यपेयुस्ते रणं हित्वा राजानो भग्नमानसाः ॥ २०
दुर्योधनस्तु कर्णेन पाल्यमानोऽभ्ययात्तदा ।
हृष्टः कन्यामुपादाय नगरं नागराह्वयम् ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

नारद उवाच ।

आविष्कृतबलं कर्णं ज्ञात्वा राजा तु मागधः ।
आह्वयद्द्वैरथेनाजौ जरासंधो महीपतिः ॥ १
तयोः समभवद्युद्धं दिव्यास्त्रविदुषोर्द्वयोः ।
युधि नानाप्रहरणैरन्योन्यमभिवर्षतोः ॥ २
क्षीणबाणौ विधनुषौ भग्नखड्गौ महीं गतौ ।
बाहुभिः समसज्जेतामुभावपि बलान्वितौ ॥ ३
बाहुकण्टकयुद्धेन तस्य कर्णोऽथ युध्यतः ।
बिभेद संधिं देहस्य जरया श्लेषितस्य ह ॥ ४
स विकारं शरीरस्य दृष्ट्वा नृपतिरात्मनः ।
प्रीतोऽस्मीत्यब्रवीत्कर्णं वैरमुत्सृज्य भारत ॥ ५
प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ ।
अङ्गेषु नरशार्दूल स राजासीत्सपत्नजित् ॥ ६

पालयामास चम्पां तु कर्णः परबलार्दनः ।
दुर्योधनस्यानुमते तवापि विदितं तथा ॥ ७
एवं शस्त्रप्रतापेन प्रथितः सोऽभवत्क्षितौ ।
त्वद्धितार्थं सुरेन्द्रेण भिक्षितो वर्मकुण्डले ॥ ८
स दिव्ये सहजे प्रादात्कुण्डले परमार्चिते ।
सहजं कवचं चैव मोहितो देवमायया ॥ ९
विमुक्तः कुण्डलाभ्यां च सहजेन च वर्मणा ।
निहतो विजयेनाजौ वासुदेवस्य पश्यतः ॥ १०
ब्राह्मणस्याभिशापेन रामस्य च महात्मनः ।
कुन्त्याश्च वरदानेन मायया च शतक्रतोः ॥ ११
भीष्मावमानात्संख्यायां रथानामर्धकीर्तनात् ।
शल्यात्तेजोवधाच्चापि वासुदेवनयेन च ॥ १२
रुद्रस्य देवराजस्य यमस्य वरुणस्य च ।
कुबेरद्रोणयोश्चैव कृपस्य च महात्मनः ॥ १३
अस्त्राणि दिव्यान्यादाय युधि गाण्डीवधन्वना ।
हतो वैकर्तनः कर्णो दिवाकरसमद्युतिः ॥ १४
एवं शप्तस्तव भ्राता बहुभिश्चापि वञ्चितः ।
न शोच्यः स नरव्याघ्रो युद्धे हि निधनं गतः ॥ १५

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

वैशंपायन उवाच ।

एतावदुक्त्वा देवर्षिर्विरराम स नारदः ।
युधिष्ठिरस्तु राजर्षिर्दध्यौ शोकपरिप्लुतः ॥ १
तं दीनमनसं वीरमधोवदनमातुरम् ।
निःश्वसन्तं यथा नागं पर्यश्रुनयनं तथा ॥ २
कुन्ती शोकपरीताङ्गी दुःखोपहतचेतना ।
अब्रवीन्मधुराभाषा काले वचनमर्थवत् ॥ ३
युधिष्ठिर महाबाहो नैनं शोचितुमर्हसि ।
जहि शोकं महाप्राज्ञ शृणु चेदं वचो मम ॥ ४
यतितः स मया पूर्वं भ्रात्र्यं ज्ञापयितुं तव ।
भास्करेण च देवेन पित्रा धर्मभृतां वर ॥ ५
यद्वाच्यं हितकामेन सुहृदा भूतिमिच्छता ।
तथा दिवाकरेणोक्तः स्वप्नान्ते मम चाग्रतः ॥ ६
न चैनमशकद्भानुरहं वा स्नेहकारणैः ।
पुरा प्रत्यनुनेतुं वा नेतुं वाप्येकतां त्वया ॥ ७
ततः कालपरीतः स वैरस्योद्धुक्षणे रतः ।
प्रतीपकारी युष्माकमिति चोपेक्षितो मया ॥ ८
इत्युक्तो धर्मराजस्तु मात्रा बाष्पाकुलेक्षणः ।
उवाच वाक्यं धर्मात्मा शोकव्याकुलचेतनः ॥ ९
भवत्या गूढमन्त्रत्वात्पीडितोऽस्मीत्युवाच ताम् ।
शशाप च महातेजाः सर्वलोकेषु च स्त्रियः ।
न गुह्यं धारयिष्यन्तीत्यतिदुःखसमन्वितः ॥ १०
स राजा पुत्रपौत्राणां संबन्धिसुहृदां तथा ।
स्मरन्नुद्विग्नहृदयो बभूवास्वस्थचेतनः ॥ ११
ततः शोकपरीतात्मा सधूम इव पावकः ।
निर्वेदमकरोद्धीमान्राजा संतापपीडितः ॥ १२

इति श्रीमहाभारते शान्तिपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

वैशंपायन उवाच ।

युधिष्ठिरस्तु धर्मात्मा शोकव्याकुलचेतनः ।
शुशोच दुःखसंतप्तः स्मृत्वा कर्णं महारथम् ॥ १
आविष्टो दुःखशोकाभ्यां निःश्वसंश्च पुनः पुनः ।
दृष्ट्वार्जुनमुवाचेदं वचनं शोककर्शितः ॥ २
यद्भैक्षमाचरिष्याम वृष्ण्यन्धकपुरे वयम् ।
ज्ञातीन्निष्पुरुषान्कृत्वा नेमां प्राप्स्याम दुर्गतिम् ॥ ३
अमित्रा नः समृद्धार्था वृत्तार्थाः कुरवः किल ।
आत्मानमात्मना हत्वा किं धर्मफलमाप्नुमः ॥ ४
धिगस्तु क्षात्रमाचारं धिगस्तु बलमौरसम् ।

धिगस्त्वमर्षं येनेमामापदं गमिता वयम् ।। ५
साधु क्षमा दमः शौचमवैरोध्यममत्सरः ।
अहिंसा सत्यवचनं नित्यानि वनचारिणाम् ।। ६
वयं तु लोभान्मोहाच्च स्तम्भं मानं च संश्रिताः ।
इमामवस्थामापन्ना राज्यलेशबुभुक्षया ।। ७
त्रैलोक्यस्यापि राज्येन नास्मान्कश्चित्प्रहर्षयेत् ।
बान्धवान्निहतान्दृष्ट्वा पृथिव्यामामिषैषिणः ।। ८
ते वयं पृथिवीहेतोरवध्यान्पृथिवीसमान् ।
संपरित्यज्य जीवामो हीनार्था हतबान्धवाः ।। ९
आमिषे गृध्यमानानामशुनां नः शुनामिव ।
आमिषं चैव नो नष्टमामिषस्य च भोजिनः ।। १०
न पृथिव्या सकलया न सुवर्णस्य राशिभिः ।
न गवाश्वेन सर्वेण ते त्याज्या य इमे हताः ।। ११
संयुक्ताः काममन्युभ्यां क्रोधामर्षसमन्विताः ।
मृत्युयानं समारुह्य गता वैवस्वतक्षयम् ।। १२
बहु कल्याणमिच्छन्त ईहन्ते पितरः सुतान् ।
तपसा ब्रह्मचर्येण वन्दनेन तितिक्षया ।। १३
उपवासैस्तथेज्याभिर्व्रतकौतुकमङ्गलैः ।
लभन्ते मातरो गर्भांस्तान्मासान्दश बिभ्रति ।। १४
यदि स्वस्ति प्रजायन्ते जाता जीवन्ति वा यदि ।
संभाविता जातबलास्ते दद्युर्यदि नः सुखम् ।
इह चामुत्र चैवेति कृपणाः फलहेतुकाः ।। १५
तासामयं समारम्भो निवृत्तः केवलोऽफलः ।
यदासां निहताः पुत्रा युवानो मृष्टकुण्डलाः ।। १६
अभुक्त्वा पार्थिवान्भोगानृणान्यनवदाय च ।
पितृभ्यो देवताभ्यश्च गता वैवस्वतक्षयम् ।। १७
यदैषामङ्ग पितरौ जातौ काममयाविव ।
संजातबलरूपेषु तदैव निहता नृपाः ।। १८
संयुक्ताः काममन्युभ्यां क्रोधहर्षासमञ्जसाः ।
न ते जन्मफलं किंचिद्भोक्तारो जातु कर्हिचित् ।। १९
पाञ्चालानां कुरूणां च हता एव हि येऽहताः ।
ते वयं स्वधमाँल्लोकान्प्रपद्येम स्वकर्मभिः ।। २०
वयमेवास्य लोकस्य विनाशे कारणं स्मृताः ।
धृतराष्ट्रस्य पुत्रेण निकृत्या प्रत्यपत्स्महि ।। २१
सदैव निकृतिप्रज्ञो द्वेष्टा मायोपजीवनः ।
मिथ्यावृत्तः स सततमस्मास्वनपकारिषु ।। २२
अंशकामा वयं ते च न चास्माभिर्न तैर्जितम् ।
न तैर्भुक्तेयमवनिर्न नार्यो गीतवादितम् ।। २३
नामात्यसमितौ कथ्यं न च श्रुतवतां श्रुतम् ।
न रत्नानि परार्ध्यानि न भूर्न द्रविणागमः ।। २४
ऋद्धिमस्मासु तां दृष्ट्वा विवर्णो हरिणः कृशः ।
धृतराष्ट्रस्य नृपतेः सौबलेन निवेदितः ।। २५
तं पिता पुत्रगृद्धित्वादनुमेनेऽनये स्थितम् ।
अनवेक्ष्यैव पितरं गाङ्गेयं विदुरं तथा ।
असंशयं धृतराष्ट्रो यथैवाहं तथा गतः ।। २६
अनियम्याशुचिं लुब्धं पुत्रं कामवशानुगम् ।
पतितो यशसो दीप्ताद्घातयित्वा सहोदरान् ।। २७
इमौ वृद्धौ च शोकाग्नौ प्रक्षिप्य स सुयोधनः ।
अस्मत्प्रद्वेषसंयुक्तः पापबुद्धिः सदैव हि ।। २८
को हि बन्धुः कुलीनः संस्तथा ब्रूयात्सुहृज्जने ।
यथासावुक्तवान्क्षुद्रो युयुत्सुर्वृष्णिसंनिधौ ।। २९
आत्मनो हि वयं दोषाद्विनष्टाः शाश्वतीः समाः ।
प्रदहन्तो दिशः सर्वास्तेजसा भास्करा इव ।। ३०
सोऽस्माकं वैरपुरुषो दुर्मन्त्रिप्रग्रहं गतः ।
दुर्योधनकृते ह्येतत्कुलं नो विनिपातितम् ।
अवध्यानां वधं कृत्वा लोके प्राप्ताः स्म वाच्यताम् ।।
कुलस्यास्यान्तकरणं दुर्मतिं पापकारिणम् ।
राजा राष्ट्रेश्वरं कृत्वा धृतराष्ट्रोऽद्य शोचति ।। ३२
हताः शूराः कृतं पापं विषयः स्वो विनाशितः ।
हत्वा नो विगतो मन्युः शोको मां रुन्धयत्ययम् ।। ३३

धनंजय कृतं पापं कल्याणेनोपहन्यते ।
त्यागवांश्च पुनः पापं नालं कर्तुमिति श्रुतिः ॥ ३४
त्यागवाञ्जन्ममरणे नाप्नोतीति श्रुतिर्यदा ।
प्राप्तवर्त्मा कृतमतिर्ब्रह्म संपद्यते तदा ॥ ३५
स धनंजय निर्द्वंद्वो मुनिर्ज्ञानसमन्वितः ।
वनमामन्त्र्य वः सर्वान्गमिष्यामि परंतप ॥ ३६
न हि कृत्स्नतमो धर्मः शक्यः प्राप्तुमिति श्रुतिः ।
परिग्रहवता तन्मे प्रत्यक्षमरिसूदन ॥ ३७
मया निसृष्टं पापं हि परिग्रहमभीप्सता ।
जन्मक्षयनिमित्तं च शक्यं प्राप्तुमिति श्रुतिः ॥ ३८
स परिग्रहमुत्सृज्य कृत्स्नं राज्यं तथैव च ।
गमिष्यामि विनिर्मुक्तो विशोको विज्वरस्तथा ॥ ३९
प्रशाधि त्वमिमामुर्वीं क्षेमां निहतकण्टकाम् ।
न ममार्थोऽस्ति राज्येन न भोगैर्वा कुरूत्तम ॥४०
एतावदुक्त्वा वचनं धर्मराजो युधिष्ठिरः ।
व्युपारमत्ततः पार्थः कनीयान्प्रत्यभाषत ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

वैशंपायन उवाच ।

अथार्जुन उवाचेदमधिक्षिप्त इवाक्षमी ।
अभिनीततरं वाक्यं दृढवादपराक्रमः ॥ १
दर्शयन्नैन्द्रिरात्मानमुग्रमुग्रपराक्रमः ।
स्मयमानो महातेजाः सृक्किणी संलिहन्मुहुः ॥ २
अहो दुःखमहो कृच्छ्रमहो वैक्लव्यमुत्तमम् ।
यत्कृत्वामानुषं कर्म त्यजेथाः श्रियमुत्तमाम् ॥ ३
शत्रून्हत्वा महीं लब्ध्वा स्वधर्मेणोपपादिताम् ।
हतामित्रः कथं सर्वं त्यजेथा बुद्धिलाघवात् ॥ ४
क्लीबस्य हि कुतो राज्यं दीर्घसूत्रस्य वा पुनः ।
किमर्थं च महीपालानवधीः क्रोधमूर्छितः ॥ ५
यो ह्याजिजीविषेद्भैक्ष्यं कर्मणा नैव केनचित् ।
समारम्भान्बुभूषेत हतस्वस्तिरकिंचनः ।
सर्वलोकेषु विख्यातो न पुत्रपशुसंहितः ॥ ६
कापालीं नृप पापिष्ठां वृत्तिमास्थाय जीवतः ।
संत्यज्य राज्यमृद्धं ते लोकोऽयं किं वदिष्यति ॥ ७
सर्वारम्भान्समुत्सृज्य हतस्वस्तिरकिंचनः ।
कस्मादाशंससे भैक्ष्यं चर्तुं प्राकृतवत्प्रभो ॥ ८
अस्मिन्राजकुले जातो जित्वा कृत्स्नां वसुंधराम् ।
धर्मार्थावखिलौ हित्वा वनं मौढ्यात्प्रतिष्ठसे ॥ ९
यदीमानि हवींषीह विमथिष्यन्त्यसाधवः ।
भवता विप्रहीणानि प्राप्तं त्वामेव किल्बिषम् ॥१०
आकिंचन्यमनाशास्यमिति वै नहुषोऽब्रवीत् ।
कृत्या नृशंसा ह्यधने धिगस्त्वधनतामिह ॥ ११
अश्वस्तनमृषीणां हि विद्यते वेद तद्भवान् ।
यं त्विमं धर्ममित्याहुर्धनादेष प्रवर्तते ॥ १२
धर्मं संहरते तस्य धनं हरति यस्य यः ।
ह्रियमाणे धने राजन्वयं कस्य क्षमेमहि ॥ १३
अभिशस्तवत्प्रपश्यन्ति दरिद्रं पार्श्वतः स्थितम् ।
दारिद्र्यं पातकं लोके कस्तच्छंसितुमर्हति ॥ १४
पतितः शोच्यते राजन्निर्धनश्चापि शोच्यते ।
विशेषं नाधिगच्छामि पतितस्याधनस्य च ॥ १५
अर्थेभ्यो हि विवृद्धेभ्यः संभृतेभ्यस्ततस्ततः ।
क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ॥ १६
अर्थाद्धर्मश्च कामश्च स्वर्गश्चैव नराधिप ।
प्राणयात्रा हि लोकस्य विनार्थं न प्रसिध्यति ॥ १७
अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः ।
व्युच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा॥१८
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥
अधनेनार्थकामेन नार्थः शक्यो विवित्सता ।

अर्थैरर्था निबध्यन्ते गजैरिव महागजाः ॥ २०
धर्मः कामश्च स्वर्गश्च हर्षः क्रोधः श्रुतं दमः ।
अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप ॥ २१
धनात्कुलं प्रभवति धनाद्धर्मः प्रवर्तते ।
नाधनस्यास्त्ययं लोको न परः पुरुषोत्तम ॥ २२
नाधनो धर्मकृत्यानि यथावदनुतिष्ठति ।
धनाद्धि धर्मः स्रवति शैलाद्गिरिनदी यथा ॥ २३
यः कृशाश्वः कृशगवः कृशभृत्यः कृशातिथिः ।
स वै राजन्कृशो नाम न शरीरकृशः कृशः ॥ २४
अवेक्षस्व यथान्यायं पश्य देवासुरं यथा ।
राजन्किमन्यज्ज्ञातीनां वधादृध्यन्ति देवताः ॥ २५
न चेद्धर्तव्यमन्यस्य कथं तद्धर्ममारभेत् ।
एतावानेव वेदेषु निश्चयः कविभिः कृतः ॥ २६
अध्येतव्या त्रयी विद्या भवितव्यं विपश्चिता ।
सर्वथा धनमाहार्यं यष्टव्यं चापि यत्नतः ॥ २७
द्रोहाद्देवैरवाप्तानि दिवि स्थानानि सर्वशः ।
इति देवा व्यवसिता वेदवादाश्च शाश्वताः ॥ २८
अधीयन्ते तपस्यन्ति यजन्ते याजयन्ति च ।
कृत्स्नं तदेव च श्रेयो यदप्याददतेऽन्यतः ॥ २९
न पश्यामोऽनपहृतं धनं किंचित्क्वचिद्वयम् ।
एवमेव हि राजानो जयन्ति पृथिवीमिमाम् ॥ ३०
जित्वा ममत्वं ब्रुवते पुत्रा इव पितुर्धने ।
राजर्षयो जितस्वर्गा धर्मो ह्येषां निगद्यते ॥ ३१
यथैव पूर्णादुदधेः स्यन्दन्त्यापो दिशो दश ।
एवं राजकुलाद्वित्तं पृथिवीं प्रतितिष्ठति ॥ ३२
आसीदियं दिलीपस्य नृगस्य नहुषस्य च ।
अम्बरीषस्य मान्धातुः पृथिवी सा त्वयि स्थिता ॥
स त्वां द्रव्यमयो यज्ञः संप्राप्तः सर्वदक्षिणः ।
तं चेन्न यजसे राजन्प्राप्तस्त्वं देवकिल्बिषम् ॥ ३४
येषां राजाश्वमेधेन यजते दक्षिणावता ।
उपेत्य तस्यावभृथं पूताः सर्वे भवन्ति ते ॥ ३५
विश्वरूपो महादेवः सर्वमेधे महामखे ।
जुहाव सर्वभूतानि तथैवात्मानमात्मना ॥ ३६
शाश्वतोऽयं भूतिपथो नास्यान्तमनुशुश्रुम ।
महान्दाशरथः पन्था मा राजन्कापथं गमः ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

युधिष्ठिर उवाच ।

मुहूर्तं तावदेकाग्रो मनःश्रोत्रेऽन्तरात्मनि ।
धारयित्वापि ते श्रुत्वा रोचतां वचनं मम ॥ १
सार्थगम्यमहं मार्गं न जातु त्वत्कृते पुनः ।
गच्छेयं तद्गमिष्यामि हित्वा ग्राम्यसुखान्युत ॥ २
क्षेम्यश्चैकाकिना गम्यः पन्थाः कोऽस्तीति पृच्छ माम्।
अथ वा नेच्छसि प्रष्टुमपृच्छन्नपि मे शृणु ॥ ३
हित्वा ग्राम्यसुखाचारं तप्यमानो महत्तपः ।
अरण्ये फलमूलाशी चरिष्यामि मृगैः सह ॥ ४
जुह्वानोऽग्निं यथाकालमुभौ कालावुपस्पृशन् ।
कृशः परिमिताहारश्चर्मचीरजटाधरः ॥ ५
शीतवातातपसहः क्षुत्पिपासाश्रमक्षमः ।
तपसा विधिदृष्टेन शरीरमुपशोषयन् ॥ ६
मनःकर्णसुखा नित्यं शृण्वन्नुच्चावचा गिरः ।
मुदितानामरण्येषु वसतां मृगपक्षिणाम् ॥ ७
आजिघ्रन्पेशलान्गन्धान्फुल्लानां वृक्षवीरुधाम् ।
नानारूपान्वने पश्यन्रमणीयान्वनौकसः ॥ ८
वानप्रस्थजनस्यापि दर्शनं कुलवासिनः ।
नाप्रियाण्याचरिष्यामि किं पुनर्ग्रामवासिनाम् ॥ ९
एकान्तशीली विमृशन्पक्वापक्वेन वर्तयन् ।
पितॄन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ॥ १०
एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिम् ।

सेवमानः प्रतीक्षिष्ये देहस्यास्य समापनम् ॥ ११
अथ वैकोऽहमेकाहमेकैकस्मिन्वनस्पतौ ।
चरन्भैक्ष्यं मुनिर्मुण्डः क्षपयिष्ये कलेवरम् ॥ १२
पांसुभिः समवच्छन्नः शून्यागारप्रतिश्रयः ।
वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ॥ १३
न शोचन्न प्रहृष्यंश्च तुल्यनिन्दात्मसंस्तुतिः ।
निराशीर्निर्ममो भूत्वा निर्द्वंद्वो निष्परिग्रहः ॥ १४
आत्मारामः प्रसन्नात्मा जडान्धबधिराकृतिः ।
अकुर्वाणः परैः कांचित्संविदं जातु केनचित् ॥ १५
जङ्गमाजङ्गमान्सर्वान्नविहिंसंश्चतुर्विधान् ।
प्रजाः सर्वाः स्वधर्मस्थाः समः प्राणभृतः प्रति ॥ १६
न चाप्यवहसन्कंचिन्न कुर्वन्भ्रुकुटीं क्वचित् ।
प्रसन्नवदनो नित्यं सर्वेन्द्रियसुसंयतः ॥ १७
अपृच्छन्कस्यचिन्मार्गं व्रजन्येनैव केनचित् ।
न देशं न दिशं कांचिद्गन्तुमिच्छन्विशेषतः ॥ १८
गमने निरपेक्षश्च पश्चादनवलोकयन् ।
ऋजुः प्रणिहितो गच्छंस्त्रसस्थावरवर्जकः ॥ १९
स्वभावस्तु प्रयात्यग्रे प्रभवन्त्यशनान्यपि ।
द्वंद्वानि च विरुद्धानि तानि सर्वाण्यचिन्तयन् ॥ २०
अल्पं वास्वादु वा भोज्यं पूर्वालाभेन जातुचित् ।
अन्येष्वपि चरँल्लाभमलाभे सप्त पूरयन् ॥ २१
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीतपात्रसंचारे काले विगतभिक्षुके ॥ २२
एककालं चरन्भैक्ष्यं गृहे द्वे चैव पञ्च च ।
स्पृहापाशान्विमुच्याहं चरिष्यामि महीमिमाम् ॥ २३
न जिजीविषुवत्किंचिन्न मुमूर्षुवदाचरन् ।
जीवितं मरणं चैव नाभिनन्दन्न च द्विषन् ॥ २४
वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः ।
नाकल्याणं न कल्याणं चिन्तयन्नुभयोस्तयोः ॥ २५
याः काश्चिज्जीवता शक्याः कर्तुमभ्युदयक्रियाः ।
सर्वास्ताः समभित्यज्य निमेषादिव्यवस्थितः ॥ २६
तेषु नित्यमसक्तश्च त्यक्तसर्वेन्द्रियक्रियः ।
सुपरित्यक्तसंकल्पः सुनिर्णिक्तात्मकल्मषः ॥ २७
विमुक्तः सर्वसङ्गेभ्यो व्यतीतः सर्ववागुराः ।
न वशे कस्यचित्तिष्ठन्सधर्मा मातरिश्वनः ॥ २८
वीतरागश्चरन्नेवं तुष्टिं प्राप्स्यामि शाश्वतीम् ।
तृष्णया हि महत्पापमज्ञानादस्मि कारितः ॥ २९
कुशलाकुशलान्येके कृत्वा कर्माणि मानवाः ।
कार्यकारणसंश्लिष्टं स्वजनं नाम बिभ्रति ॥ ३०
आयुषोऽन्ते प्रहायेदं क्षीणप्रायं कलेवरम् ।
प्रतिगृह्णाति तत्पापं कर्तुः कर्मफलं हि तत् ॥ ३१
एवं संसारचक्रेऽस्मिन्व्याविद्धे रथचक्रवत् ।
समेति भूतग्रामोऽयं भूतग्रामेण कार्यवान् ॥ ३२
जन्ममृत्युजराव्याधिवेदनाभिरुपद्रुतम् ।
असारमिममस्वन्तं संसारं त्यजतः सुखम् ॥ ३३
दिवः पतत्सु देवेषु स्थानेभ्यश्च महर्षिषु ।
को हि नाम भवेनार्थी भवेत्कारणतत्त्ववित् ॥ ३४
कृत्वा हि विविधं कर्म तत्तद्विविधलक्षणम् ।
पार्थिवैर्नृपतिः स्वल्पैः कारणैरेव बध्यते ॥ ३५
तस्मात्प्रज्ञामृतमिदं चिरान्मां प्रत्युपस्थितम् ।
तत्प्राप्य प्रार्थये स्थानमव्ययं शाश्वतं ध्रुवम् ॥ ३६
एतया सततं वृत्त्या चरन्नेवंप्रकारया ।
देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

भीम उवाच ।

श्रोत्रियस्येव ते राजन्मन्दकस्याविपश्चितः ।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥ १
आलस्ये कृतचित्तस्य राजधर्मानसूयतः ।

विनाशे धार्तराष्ट्राणां किं फलं भरतर्षभ ॥ २
क्षमानुकम्पा कारुण्यमानृशंस्यं न विद्यते ।
क्षात्रमाचरतो मार्गमपि बन्धोस्त्वदन्तरे ॥ ३
यदीमां भवतो बुद्धिं विद्याम वयमीदृशीम् ।
शस्त्रं नैव ग्रहीष्यामो न वधिष्याम कंचन ॥ ४
भैक्ष्यमेवाचरिष्याम शरीरस्या विमोक्षणात् ।
न चेदं दारुणं युद्धमभविष्यन्महीक्षिताम् ॥ ५
प्राणस्यान्नमिदं सर्वमिति वै कवयो विदुः ।
स्थावरं जङ्गमं चैव सर्वं प्राणस्य भोजनम् ॥ ६
आददानस्य चेद्राज्यं ये केचित्परिपन्थिनः ।
हन्तव्यास्त इति प्राज्ञाः क्षत्रधर्मविदो विदुः ॥ ७
ते सदोषा हतास्माभी राज्यस्य परिपन्थिनः ।
तान्हत्वा भुङ्क्ष्व धर्मेण युधिष्ठिर महीमिमाम् ॥ ८
यथा हि पुरुषः खात्वा कूपमप्राप्य चोदकम् ।
पङ्कदिग्धो निवर्तेत कर्मेदं नस्तथोपमम् ॥ ९
यथारुह्य महावृक्षमपहृत्य ततो मधु ।
अप्राश्य निधनं गच्छेत्कर्मेदं नस्तथोपमम् ॥ १०
यथा महान्तमध्वानमाशया पुरुषः पतन् ।
स निराशो निवर्तेत कर्मेदं नस्तथोपमम् ॥ ११
यथा शत्रून्घातयित्वा पुरुषः कुरुसत्तम ।
आत्मानं घातयेत्पश्चात्कर्मेदं नस्तथाविधम् ॥ १२
यथान्नं क्षुधितो लब्ध्वा न भुञ्जीत यदृच्छया ।
कामी च कामिनीं लब्ध्वा कर्मेदं नस्तथाविधम् ॥ १३
वयमेवात्र गर्ह्या हि ये वयं मन्दचेतसः ।
त्वां राजन्ननुगच्छामो ज्येष्ठोऽयमिति भारत ॥ १४
वयं हि बाहुबलिनः कृतविद्या मनस्विनः ।
क्लीबस्य वाक्ये तिष्ठामो यथैवाशक्तयस्तथा ॥ १५
अगतीन्कागतीनस्मान्नष्टार्थानर्थसिद्धये ।
कथं वै नानुपश्येयुर्जनाः पश्यन्ति यादृशम् ॥ १६
आपत्काले हि संन्यासः कर्तव्य इति शिष्यते ।
जरयाभिपरीतेन शत्रुभिर्व्यंसितेन च ॥ १७
तस्मादिह कृतप्रज्ञास्त्यागं न परिचक्षते ।
धर्मव्यतिक्रमं चेदं मन्यन्ते सूक्ष्मदर्शिनः ॥ १८
कथं तस्मात्समुत्पन्नस्तन्निष्ठस्तदुपाश्रयः ।
तदेव निन्दन्नासीत श्रद्धा वान्यत्र गृह्यते ॥ १९
श्रिया विहीनैरधनैर्नास्तिकैः संप्रवर्तितम् ।
वेदवादस्य विज्ञानं सत्याभासमिवानृतम् ॥ २०
शक्यं तु मौण्ड्यमास्थाय बिभ्रतात्मानमात्मना ।
धर्मच्छद्म समास्थाय आसितुं न तु जीवितुम् ॥ २१
शक्यं पुनररण्येषु सुखमेकेन जीवितुम् ।
अबिभ्रता पुत्रपौत्रान्देवर्षीनतिथीन्पितॄन् ॥ २२
नेमे मृगाः स्वर्गजितो न वराहा न पक्षिणः ।
अथैतेन प्रकारेण पुण्यमाहुर्न ताञ्जनाः ॥ २३
यदि संन्यासतः सिद्धिं राजन्कश्चिदवाप्नुयात् ।
पर्वताश्च द्रुमाश्चैव क्षिप्रं सिद्धिमवाप्नुयुः ॥ २४
एते हि नित्यसंन्यासा दृश्यन्ते निरुपद्रवाः ।
अपरिग्रहवन्तश्च सततं चात्मचारिणः ॥ २५
अथ चेदात्मभाग्येषु नान्येषां सिद्धिमश्नुते ।
तस्मात्कर्मैव कर्तव्यं नास्ति सिद्धिरकर्मणः ॥ २६
औदकाः सृष्टयश्चैव जन्तवः सिद्धिमाप्नुयुः ।
येषामात्मैव भर्तव्यो नान्यः कश्चन विद्यते ॥ २७
अवेक्षस्व यथा स्वैः स्वैः कर्मभिर्व्यापृतं जगत् ।
तस्मात्कर्मैव कर्तव्यं नास्ति सिद्धिरकर्मणः ॥ २८

इति श्रीमहाभारते शान्तिपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

अर्जुन उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
तापसैः सह संवादं शक्रस्य भरतर्षभ ॥ १
केचिद्गृहान्परित्यज्य वनमभ्यगमन्द्विजाः ।

अजातश्मश्रवो मन्दाः कुले जाताः प्रवव्रजुः ॥ २
धर्मोऽयमिति मन्वाना ब्रह्मचर्ये व्यवस्थिताः ।
त्यक्त्वा गृहान्पितॄंश्चैव तानिन्द्रोऽन्वकृपायत ॥ ३
तानाबभाषे भगवान्पक्षी भूत्वा हिरण्मयः ।
सुदुष्करं मनुष्यैश्च यत्कृतं विघसाशिभिः ॥ ४
पुण्यं च बत कर्मैषां प्रशस्तं चैव जीवितम् ।
संसिद्धास्ते गतिं मुख्यां प्राप्ता धर्मपरायणाः ॥ ५

ऋषय ऊचुः ।

अहो बतायं शकुनिर्विघसाशान्प्रशंसति ।
अस्मान्नूनमयं शास्ति वयं च विघसाशिनः ॥ ६

शकुनिरुवाच ।

नाहं युष्मान्प्रशंसामि पङ्कदिग्धान्रजस्वलान् ।
उच्छिष्टभोजिनो मन्दानन्ये वै विघसाशिनः ॥ ७

ऋषय ऊचुः ।

इदं श्रेयः परमिति वयमेवाभ्युपास्महे ।
शकुने ब्रूहि यच्छ्रेयो भृशं वै श्रद्दधाम ते ॥ ८

शकुनिरुवाच ।

यदि मां नाभिशङ्कध्वं विभज्यात्मानमात्मना ।
ततोऽहं वः प्रवक्ष्यामि याथातथ्यं हितं वचः ॥ ९

ऋषय ऊचुः ।

शृणुमस्ते वचस्तात पन्थानो विदितास्तव ।
नियोगे चैव धर्मात्मन्स्थातुमिच्छाम शाधि नः ॥१०

शकुनिरुवाच ।

चतुष्पदां गौः प्रवरा लोहानां काञ्चनं वरम् ।
शब्दानां प्रवरो मन्त्रो ब्राह्मणो द्विपदां वरः ॥ ११
मन्त्रोऽयं जातकर्मादि ब्राह्मणस्य विधीयते ।
जीवतो यो यथाकालं श्मशाननिधनादिति ॥ १२
कर्माणि वैदिकान्यस्य स्वर्ग्यः पन्थास्त्वनुत्तमः ।
अथ सर्वाणि कर्माणि मन्त्रसिद्धानि चक्षते ॥ १३
आम्नायदृढवादीनि तथा सिद्धिरिहेष्यते ।
मासार्धमासा ऋतव आदित्यशशितारकम् ॥ १४
ईहन्ते सर्वभूतानि तदृतं कर्मसङ्गिनाम् ।
सिद्धिक्षेत्रमिदं पुण्यमयमेवाश्रमो महान् ॥ १५
अथ ये कर्म निन्दन्तो मनुष्याः कापथं गताः ।
मूढानामर्थहीनानां तेषामेनस्तु विद्यते ॥ १६
देववंशान्पितृवंशान्ब्रह्मवंशांश्च शाश्वतान् ।
संत्यज्य मूढा वर्तन्ते ततो यान्त्यश्रुतीपथम् ॥ १७
एतद्वोऽस्तु तपो युक्तं ददानीत्यृषिचोदितम् ।
तस्मात्तदध्यवसतस्तपस्वि तप उच्यते ॥ १८
देववंशान्पितृवंशान्ब्रह्मवंशांश्च शाश्वतान् ।
संविभज्य गुरोश्चर्यां तद्वै दुष्करमुच्यते ॥ १९
देवा वै दुष्करं कृत्वा विभूतिं परमां गताः ।
तस्माद्गार्हस्थ्यमुद्वोढुं दुष्करं प्रब्रवीमि वः ॥ २०
तपः श्रेष्ठं प्रजानां हि मूलमेतन्न संशयः ।
कुटुम्बविधिनानेन यस्मिन्सर्वं प्रतिष्ठितम् ॥ २१
एतद्विदुस्तपो विप्रा द्वंद्वातीता विमत्सराः ।
तस्माद्वनं मध्यमं च लोकेषु तप उच्यते ॥ २२
दुराधर्षं पदं चैव गच्छन्ति विघसाशिनः ।
सायंप्रातर्विभज्यान्नं स्वकुटुम्बे यथाविधि ॥ २३
दत्त्वातिथिभ्यो देवेभ्यः पितृभ्यः स्वजनस्य च ।
अवशिष्टानि येऽश्नन्ति तानाहुर्विघसाशिनः ॥ २४
तस्मात्स्वधर्ममास्थाय सुव्रताः सत्यवादिनः ।
लोकस्य गुरवो भूत्वा ते भवन्त्यनुपस्कृताः ॥ २५
त्रिदिवं प्राप्य शक्रस्य स्वर्गलोके विमत्सराः ।
वसन्ति शाश्वतीर्वर्षा जना दुष्करकारिणः ॥ २६
ततस्ते तद्वचः श्रुत्वा तस्य धर्मार्थसंहितम् ।
उत्सृज्य नास्तिकगतिं गार्हस्थ्यं धर्ममाश्रिताः ॥२७
तस्मात्त्वमपि दुर्धर्ष धैर्यमालम्ब्य शाश्वतम् ।
प्रशाधि पृथिवीं कृत्स्नां हतामित्रां नरोत्तम ॥ २८

इति श्रीमहाभारते शान्तिपर्वणि एकादशोऽध्यायः ॥ ११॥

१२

वैशंपायन उवाच ।

अर्जुनस्य वचः श्रुत्वा नकुलो वाक्यमब्रवीत् ।
राजानमभिसंप्रेक्ष्य सर्वधर्मभृतां वरम् ॥ १
अनुरुध्य महाप्राज्ञो भ्रातुश्चित्तमरिंदमः ।
व्यूढोरस्को महाबाहुस्ताम्रास्यो मितभाषिता ॥ २
विशाखयूपे देवानां सर्वेषामग्नयश्चिताः ।
तस्माद्विद्धि महाराज देवान्कर्मपथि स्थितान् ॥ ३
अनास्तिकानास्तिकानां प्राणदाः पितरश्च ये ।
तेऽपि कर्मैव कुर्वन्ति विधिं पश्यस्व पार्थिव ।
वेदवादापविद्धांस्तु तान्विद्धि भृशनास्तिकान् ॥ ४
न हि वेदोक्तमुत्सृज्य विप्रः सर्वेषु कर्मसु ।
देवयानेन नाकस्य पृष्ठमाप्नोति भारत ॥ ५
अत्याश्रमानयं सर्वानित्याहुर्वेदनिश्चयाः ।
ब्राह्मणाः श्रुतिसंपन्नास्तान्निबोध जनाधिप ॥ ६
वित्तानि धर्मलब्धानि क्रतुमुख्येष्ववासृजन् ।
कृतात्मसु महाराज स वै त्यागी स्मृतो नरः ॥ ७
अनवेक्ष्य सुखादानं तथैवोर्ध्वं प्रतिष्ठितः ।
आत्मत्यागी महाराज स त्यागी तामसः प्रभो ॥
अनिकेतः परिपतन्वृक्षमूलाश्रयो मुनिः ।
अपाचकः सदा योगी स त्यागी पार्थ भिक्षुकः ॥
क्रोधहर्षावनादृत्य पैशुन्यं च विशां पते ।
विप्रो वेदानधीते यः स त्यागी गुरुपूजकः ॥ १०
आश्रमांस्तुलया सर्वान्धृतानाहुर्मनीषिणः ।
एकतस्ते त्रयो राजन्गृहस्थाश्रम एकतः ॥ ११
समीक्षते तु योऽर्थं वै कामं स्वर्गं च भारत ।
अयं पन्था महर्षीणामियं लोकविदां गतिः ॥ १२
इति यः कुरुते भावं स त्यागी भरतर्षभ ।
न यः परित्यज्य गृहान्वनमेति विमूढवत् ॥ १३
यदा कामान्समीक्षेत धर्मवैतंसिकोऽनृजुः ।
अथैनं मृत्युपाशेन कण्ठे बध्नाति मृत्युराट् ॥ १४
अभिमानकृतं कर्म नैतत्फलवदुच्यते ।
त्यागयुक्तं महाराज सर्वमेव महाफलम् ॥ १५
शमो दमस्तपो दानं सत्यं शौचमथार्जवम् ।
यज्ञो धृतिश्च धर्मश्च नित्यमार्षो विधिः स्मृतः ॥१६
पितृदेवातिथिकृते समारम्भोऽत्र शस्यते ।
अत्रैव हि महाराज त्रिवर्गः केवलं फलम् ॥ १७
एतस्मिन्वर्तमानस्य विधौ विप्रनिषेविते ।
त्यागिनः प्रसृतस्येह नोच्छित्तिर्विद्यते क्वचित् ॥१८
असृजद्धि प्रजा राजन्प्रजापतिरकल्मषः ।
मां यक्ष्यन्तीति शान्तात्मा यज्ञैर्विविधदक्षिणैः ॥१९
वीरुधश्चैव वृक्षांश्च यज्ञार्थं च तथौषधीः ।
पशूंश्चैव तथा मेध्यान्यज्ञार्थानि हवींषि च ॥ २०
गृहस्थाश्रमिणस्तच्च यज्ञकर्म विरोधकम् ।
तस्माद्गार्हस्थ्यमेवेह दुष्करं दुर्लभं तथा ॥ २१
तत्संप्राप्य गृहस्था ये पशुधान्यसमन्विताः ।
न यजन्ते महाराज शाश्वतं तेषु किल्बिषम् ॥ २२
स्वाध्याययज्ञा ऋषयो ज्ञानयज्ञास्तथापरे ।
अथापरे महायज्ञान्मनसैव वितन्वते ॥ २३
एवं दानसमाधानं मार्गमातिष्ठतो नृप ।
द्विजातेर्ब्रह्मभूतस्य स्पृहयन्ति दिवौकसः ॥ २४
स रत्नानि विचित्राणि संभृतानि ततस्ततः ।
मखेष्वनभिसंत्यज्य नास्तिक्यमभिजल्पसि ।
कुटुम्बमास्थिते त्यागं न पश्यामि नराधिप ॥ २५
राजसूयाश्वमेधेषु सर्वमेधेषु वा पुनः ।
ये चान्ये क्रतवस्तात ब्राह्मणैरभिपूजिताः ।
तैर्यजस्व महाराज शक्रो देवपतिर्यथा ॥ २६
राज्ञः प्रमाददोषेण दस्युभिः परिमुष्यताम् ।
अशरण्यः प्रजानां यः स राजा कलिरुच्यते ॥ २७
अश्वान्गाश्चैव दासीश्च करेणूश्च स्वलंकृताः ।

ग्रामाञ्जनपदांश्चैव क्षेत्राणि च गृहाणि च ॥ २८
अप्रदाय द्विजातिभ्यो मात्सर्याविष्टचेतसः ।
वयं ते राजकलयो भविष्यामो विशां पते ॥ २९
अदातारोऽशरण्याश्च राजकिल्बिषभागिनः ।
दुःखानामेव भोक्तारो न सुखानां कदाचन ॥ ३०
अनिष्ट्वा च महायज्ञैरकृत्वा च पितृस्वधाम् ।
तीर्थेष्वनभिसंत्यज्य प्रव्रजिष्यसि चेदथ ॥ ३१
छिन्नाभ्रमिव गन्तासि विलयं मारुतेरितम् ।
लोकयोरुभयोर्भ्रष्टो ह्यन्तराले व्यवस्थितः ॥ ३२
अन्तर्बहिश्च यत्किंचिन्मनोव्यासङ्गकारकम् ।
परित्यज्य भवेत्त्यागी न यो हित्वा प्रतिष्ठते ॥ ३३
एतस्मिन्वर्तमानस्य विधौ विप्रनिषेविते ।
ब्राह्मणस्य महाराज नोच्छित्तिर्विद्यते क्वचित् ॥ ३४

निहत्य शत्रूंस्तरसा समृद्धा-
न्शक्रो यथा दैत्यबलानि संख्ये ।
कः पार्थ शोचेन्निरतः स्वधर्मे
पूर्वैः स्मृते पार्थिव शिष्टजुष्टे ॥ ३५
क्षात्रेण धर्मेण पराक्रमेण
जित्वा महीं मन्त्रविद्भ्यः प्रदाय ।
नाकस्य पृष्ठेऽसि नरेन्द्र गन्ता
न शोचितव्यं भवताद्य पार्थ ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

सहदेव उवाच ।

न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत ।
शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा ॥ १
बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृध्यतः ।
यो धर्मो यत्सुखं वा स्याद्द्विषतां तत्तथास्तु नः ॥ २
शारीरं द्रव्यमुत्सृज्य पृथिवीमनुशासतः ।
यो धर्मो यत्सुखं वा स्यात्सुहृदां तत्तथास्तु नः ॥ ३
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ॥ ४
ब्रह्ममृत्यू च तौ राजन्नात्मन्येव समाश्रितौ ।
अदृश्यमानौ भूतानि योधयेतामसंशयम् ॥ ५
अविनाशोऽस्य सत्त्वस्य नियतो यदि भारत ।
भित्त्वा शरीरं भूतानां न हिंसा प्रतिपत्स्यते ॥ ६
अथापि च सहोत्पत्तिः सत्त्वस्य प्रलयस्तथा ।
नष्टे शरीरे नष्टं स्याद्वृथा च स्यात्क्रियापथः ॥ ७
तस्मादेकान्तमुत्सृज्य पूर्वैः पूर्वतरैश्च यः ।
पन्था निषेवितः सद्भिः स निषेव्यो विजानता ॥८
लब्ध्वापि पृथिवीं कृत्स्नां सहस्थावरजङ्गमाम् ।
न भुङ्क्ते यो नृपः सम्यङ्निष्फलं तस्य जीवितम् ॥ ९
अथ वा वसतो राजन्वने वन्येन जीवतः ।
द्रव्येषु यस्य ममता मृत्योरास्ये स वर्तते ॥ १०
बाह्याभ्यन्तरभूतानां स्वभावं पश्य भारत ।
ये तु पश्यन्ति तद्भावं मुच्यन्ते महतो भयात् ॥ ११
भवान्पिता भवान्माता भवान्भ्राता भवान्गुरुः ।
दुःखप्रलापानार्तस्य तस्मान्मे क्षन्तुमर्हसि ॥ १२
तथ्यं वा यदि वातथ्यं यन्मयैतत्प्रभाषितम् ।
तद्विद्धि पृथिवीपाल भक्त्या भरतसत्तम ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

वैशंपायन उवाच ।

अव्याहरति कौन्तेये धर्मराजे युधिष्ठिरे ।
भ्रातॄणां ब्रुवतां तांस्तान्विविधान्वेदनिश्चयान् ॥ १
महाभिजनसंपन्ना श्रीमत्यायतलोचना ।
अभ्यभाषत राजेन्द्रं द्रौपदी योषितां वरा ॥ २
आसीनमृषभं राज्ञां भ्रातृभिः परिवारितम् ।

सिंहशार्दूलसदृशैर्वारणैरिव यूथपम् ॥ ३
अभिमानवती नित्यं विशेषेण युधिष्ठिरे ।
लालिता सततं राज्ञा धर्मज्ञा धर्मदर्शिनी ॥ ४
आमन्त्र्य विपुलश्रोणी साम्ना परमवल्गुना ।
भर्तारमभिसंप्रेक्ष्य ततो वचनमब्रवीत् ॥ ५
इमे ते भ्रातरः पार्थ शुष्यन्त स्तोकका इव ।
वावाश्यमानास्तिष्ठन्ति न चैनानभिनन्दसे ॥ ६
नन्दयैतान्महाराज मत्तानिव महाद्विपान् ।
उपपन्नेन वाक्येन सततं दुःखभागिनः ॥ ७
कथं द्वैतवने राजन्पूर्वमुक्त्वा तथा वचः ।
भ्रातॄनेतान्स्म सहिताञ्शीतवातातपार्दितान् ॥ ८
वयं दुर्योधनं हत्वा मृधे भोक्ष्याम मेदिनीम् ।
संपूर्णां सर्वकामानामाहवे विजयैषिणः ॥ ९
विरथांश्च रथान्कृत्वा निहत्य च महागजान् ।
संस्तीर्य च रथैर्भूमिं ससादिभिररिंदमाः ॥ १०
यजतां विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः ।
वनवासकृतं दुःखं भविष्यति सुखाय नः ॥ ११
इत्येतानेवमुक्त्वा त्वं स्वयं धर्मभृतां वर ।
कथमद्य पुनर्वीर विनिहंसि मनांस्युत ॥ १२
न क्लीबो वसुधां भुङ्क्ते न क्लीबो धनमश्नुते ।
न क्लीबस्य गृहे पुत्रा मत्स्याः पङ्क इवासते ॥ १३
नादण्डः क्षत्रियो भाति नादण्डो भूतिमश्नुते ।
नादण्डस्य प्रजा राज्ञः सुखमेधन्ति भारत ॥ १४
मित्रता सर्वभूतेषु दानमध्ययनं तपः ।
ब्राह्मणस्यैष धर्मः स्यान्न राज्ञो राजसत्तम ॥ १५
असतां प्रतिषेधश्च सतां च परिपालयन् ।
एष राज्ञां परो धर्मः समरे चापलायनम् ॥ १६
यस्मिन्क्षमा च क्रोधश्च दानादाने भयाभये ।
निग्रहानुग्रहौ चोभौ स वै धर्मविदुच्यते ॥ १७
न श्रुतेन न दानेन न सान्त्वेन न चेज्यया ।
त्वयेयं पृथिवी लब्धा नोत्कोचेन तथाप्युत ॥ १८
यत्तद्बलममित्राणां तथा वीरसमुद्यतम् ।
हस्त्यश्वरथसंपन्नं त्रिभिरङ्गैर्महत्तरम् ॥ १९
रक्षितं द्रोणकर्णाभ्यामश्वत्थाम्ना कृपेण च ।
तत्त्वया निहतं वीर तस्माद्भुङ्क्ष्व वसुंधराम् ॥ २०
जम्बूद्वीपो महाराज नानाजनपदायुतः ।
त्वया पुरुषशार्दूल दण्डेन मृदितः प्रभो ॥ २१
जम्बूद्वीपेन सदृशः क्रौञ्चद्वीपो नराधिप ।
अपरेण महामेरोर्दण्डेन मृदितस्त्वया ॥ २२
क्रौञ्चद्वीपेन सदृशः शाकद्वीपो नराधिप ।
पूर्वेण तु महामेरोर्दण्डेन मृदितस्त्वया ॥ २३
उत्तरेण महामेरोः शाकद्वीपेन संमितः ।
भद्राश्वः पुरुषव्याघ्र दण्डेन मृदितस्त्वया ॥ २४
द्वीपाश्च सान्तरद्वीपा नानाजनपदालयाः ।
विगाह्य सागरं वीर दण्डेन मृदितास्त्वया ॥ २५
एतान्यप्रतिमानि त्वं कृत्वा कर्माणि भारत ।
न प्रीयसे महाराज पूज्यमानो द्विजातिभिः ॥ २६
स त्वं भ्रातॄनिमान्दृष्ट्वा प्रतिनन्दस्व भारत ।
ऋषभानिव संमत्तान्गजेन्द्रानूर्जितानिव ॥ २७
अमरप्रतिमाः सर्वे शत्रुसाहाः परंतपाः ।
एकोऽपि हि सुखायैषां क्षमः स्यादिति मे मतिः ॥ २८
किं पुनः पुरुषव्याघ्राः पतयो मे नरर्षभाः ।
समस्तानीन्द्रियाणीव शरीरस्य विचेष्टने ॥ २९
अनृतं माब्रवीच्छ्वश्रूः सर्वज्ञा सर्वदर्शिनी ।
युधिष्ठिरस्त्वां पाञ्चालि सुखे धास्यत्यनुत्तमे ॥ ३०
हत्वा राजसहस्राणि बहून्याशुपराक्रमः ।
तद्व्यर्थं संप्रपश्यामि मोहात्तव जनाधिप ॥ ३१
येषामुन्मत्तको ज्येष्ठः सर्वे तस्योपचारिणः ।
तवोन्मादेन राजेन्द्र सोन्मादाः सर्वपाण्डवाः ॥ ३२
यदि हि स्युरनुन्मत्ता भ्रातरस्ते जनाधिप ।

बद्ध्वा त्वां नास्तिकैः सार्धं प्रशासेयुर्वसुंधराम् ॥ ३३
कुरुते मूढमेवं हि यः श्रेयो नाधिगच्छति ।
धूपैरञ्जनयोगैश्च नस्यकर्मभिरेव च ।
भेषजैः स चिकित्स्यः स्याद्य उन्मार्गेण गच्छति ॥३४
साहं सर्वाधमा लोके स्त्रीणां भरतसत्तम ।
तथा विनिकृतामित्रैर्याहमिच्छामि जीवितुम् ॥ ३५
एतेषां यतमानानामुत्पद्यन्ते तु संपदः ।
त्वं तु सर्वां महीं लब्ध्वा कुरुषे स्वयमापदम् ॥३६
यथास्तां संमतौ राज्ञां पृथिव्यां राजसत्तमौ ।
मान्धाता चाम्बरीषश्च तथा राजन्विराजसे ॥ ३७
प्रशाधि पृथिवीं देवीं प्रजा धर्मेण पालयन् ।
सपर्वतवनद्वीपां मा राजन्विमना भव ॥ ३८
यजस्व विविधैर्यज्ञैर्जुह्वन्नग्नीन्प्रयच्छ च ।
पुराणि भोगान्वासांसि द्विजातिभ्यो नृपोत्तम ॥३९

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

वैशंपायन उवाच ।

याज्ञसेन्या वचः श्रुत्वा पुनरेवार्जुनोऽब्रवीत् ।
अनुमान्य महाबाहुं ज्येष्ठं भ्रातरमीश्वरम् ॥ १
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥ २
धर्मं संरक्षते दण्डस्तथैवार्थं नराधिप ।
कामं संरक्षते दण्डस्त्रिवर्गो दण्ड उच्यते ॥ ३
दण्डेन रक्ष्यते धान्यं धनं दण्डेन रक्ष्यते ।
एतद्विद्वन्नुपादत्स्व स्वभावं पश्य लौकिकम् ॥ ४
राजदण्डभयादेके पापाः पापं न कुर्वते ।
यमदण्डभयादेके परलोकभयादपि ॥ ५
परस्परभयादेके पापाः पापं न कुर्वते ।
एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम् ॥ ६
दण्डस्यैव भयादेके न खादन्ति परस्परम् ।
अन्धे तमसि मज्जेयुर्यदि दण्डो न पालयेत् ॥ ७
यस्माददान्तान्दमयत्यशिष्टान्दण्डयत्यपि ।
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥ ८
वाचि दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम् ।
दानदण्डः स्मृतो वैश्यो निर्दण्डः शूद्र उच्यते ॥ ९
असंमोहाय मर्त्यानामर्थसंरक्षणाय च ।
मर्यादा स्थापिता लोके दण्डसंज्ञा विशां पते ॥ १०
यत्र श्यामो लोहिताक्षो दण्डश्चरति सूनृतः ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥ ११
ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
दण्डस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः ॥ १२
नाभीतो यजते राजन्नाभीतो दातुमिच्छति ।
नाभीतः पुरुषः कश्चित्समये स्थातुमिच्छति ॥ १३
नाच्छित्त्वा परमर्माणि नाकृत्वा कर्म दारुणम् ।
नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियम् ॥ १४
नाघ्नतः कीर्तिरस्तीह न वित्तं न पुनः प्रजाः ।
इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत ॥ १५
य एव देवा हन्तारस्ताँल्लोकोऽर्चयते भृशम् ।
हन्ता रुद्रस्तथा स्कन्दः शक्रोऽग्निर्वरुणो यमः ॥ १६
हन्ता कालस्तथा वायुर्मृत्युर्वैश्रवणो रविः ।
वसवो मरुतः साध्या विश्वेदेवाश्च भारत ॥ १७
एतान्देवान्नमस्यन्ति प्रतापप्रणता जनाः ।
न ब्रह्माणं न धातारं न पूषाणं कथंचन ॥ १८
मध्यस्थान्सर्वभूतेषु दान्ताञ्शमपरायणान् ।
यजन्ते मानवाः केचित्प्रशान्ताः सर्वकर्मसु ॥ १९
न हि पश्यामि जीवन्तं लोके कंचिदहिंसया ।
सत्त्वैः सत्त्वानि जीवन्ति दुर्बलैर्बलवत्तराः ॥ २०
नकुलो मूषकानत्ति बिडालो नकुलं तथा ।
बिडालमत्ति श्वा राजञ्श्वानं व्यालमृगस्तथा ॥२१

तानत्ति पुरुषः सर्वान्पश्य धर्मो यथागतः ।
प्राणस्यान्नमिदं सर्वं जङ्गमं स्थावरं च यत् ॥ २२

विधानं देवविहितं तत्र विद्वान्न मुह्यति ।
यथा सृष्टोऽसि राजेन्द्र तथा भवितुमर्हसि ॥ २३

विनीतक्रोधहर्षा हि मन्दा वनमुपाश्रिताः ।
विना वधं न कुर्वन्ति तापसाः प्राणयापनम् ॥ २४

उदके बहवः प्राणाः पृथिव्यां च फलेषु च ।
न च कश्चिन्न तान्हन्ति किमन्यत्प्राणयापनात् ॥२५

सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित् ।
पक्ष्मणोऽपि निपातेन येषां स्यात्स्कन्धपर्ययः ॥ २६

ग्रामान्निष्क्रम्य मुनयो विगतक्रोधमत्सराः ।
वने कुटुम्बधर्माणो दृश्यन्ते परिमोहिताः ॥ २७

भूमिं भित्त्वौषधीश्छित्त्वा वृक्षादीनण्डजान्पशून् ।
मनुष्यास्तन्वते यज्ञांस्ते स्वर्गं प्राप्नुवन्ति च ॥ २८

दण्डनीत्यां प्रणीतायां सर्वे सिध्यन्त्युपक्रमाः ।
कौन्तेय सर्वभूतानां तत्र मे नास्ति संशयः ॥ २९

दण्डश्चेन्न भवेल्लोके व्यनशिष्यन्निमाः प्रजाः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥ ३०

सत्यं चेदं ब्रह्मणा पूर्वमुक्तं
दण्डः प्रजा रक्षति साधु नीतः ।
पश्याग्नयश्च प्रतिशाम्यन्त्यभीताः
संतर्जिता दण्डभयाज्ज्वलन्ति ॥ ३१

अन्धं तम इवेदं स्यान्न प्रज्ञायेत किंचन ।
दण्डश्चेन्न भवेल्लोके विभजन्साध्वसाधुनी ॥ ३२

येऽपि संभिन्नमर्यादा नास्तिका वेदनिन्दकाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनोपनिपीडिताः ॥३३

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ।
दण्डस्य हि भयाद्भीतो भोगायेह प्रकल्पते ॥ ३४

चातुर्वर्ण्याप्रमोहाय सुनीतनयनाय च ।
दण्डो विधात्रा विहितो धर्मार्थाविभिरक्षितुम् ॥३५

यदि दण्डान्न बिभ्येयुर्वयांसि श्वापदानि च ।
अद्युः पशून्मनुष्यांश्च यज्ञार्थानि हवींषि च ॥३६

न ब्रह्मचार्यधीयीत कल्याणी गौर्न दुह्यते ।
न कन्योद्वहनं गच्छेद्यदि दण्डो न पालयेत् ॥ ३७

विश्वलोपः प्रवर्तेत भिद्येरन्सर्वसेतवः ।
ममत्वं न प्रजानीयुर्यदि दण्डो न पालयेत् ॥ ३८

न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः ।
विधिवद्दक्षिणावन्ति यदि दण्डो न पालयेत् ॥ ३९

चरेयुर्नाश्रमे धर्मं यथोक्तं विधिमाश्रिताः ।
न विद्यां प्राप्नुयात्कश्चिद्यदि दण्डो न पालयेत् ॥४०

न चोष्ट्रा न बलीवर्दा नाश्वाश्वतरगर्दभाः ।
युक्ता वहेयुर्यानानि यदि दण्डो न पालयेत् ॥ ४१

न प्रेष्या वचनं कुर्युर्न बालो जातु कर्हिचित् ।
तिष्ठेत्पितृमते धर्मे यदि दण्डो न पालयेत् ॥ ४२

दण्डे स्थिताः प्रजाः सर्वा भयं दण्डं विदुर्बुधाः ।
दण्डे स्वर्गो मनुष्याणां लोकोऽयं च प्रतिष्ठितः ॥४३

न तत्र कूटं पापं वा वञ्चना वापि दृश्यते ।
यत्र दण्डः सुविहितश्चरत्यरिविनाशनः ॥ ४४

हविः श्वा प्रपिबेद्धृष्टो दण्डश्चेन्नोद्यतो भवेत् ।
हरेत्काकः पुरोडाशं यदि दण्डो न पालयेत् ॥ ४५

यदिदं धर्मतो राज्यं विहितं यद्यधर्मतः ।
कार्यस्तत्र न शोको वै भुङ्क्ष्व भोगान्यजस्व च ॥ ४६

सुखेन धर्मं श्रीमन्तश्चरन्ति शुचिवाससः ।
संवसन्तः प्रियैर्दारैर्भुञ्जानाश्चान्नमुत्तमम् ॥ ४७

अर्थे सर्वे समारम्भाः समायत्ता न संशयः ।
स च दण्डे समायत्तः पश्य दण्डस्य गौरवम् ॥४८

लोकयात्रार्थमेवेह धर्मप्रवचनं कृतम् ।
अहिंसा साधुहिंसेति श्रेयान्धर्मपरिग्रहः ॥ ४९

नात्यन्तगुणवान्कश्चिन्न चाप्यत्यन्तनिर्गुणः ।
उभयं सर्वकार्येषु दृश्यते साध्वसाधु च ॥ ५०

पशूनां वृषणं छित्त्वा ततो भिन्दन्ति नस्तकान् ।
वहन्ति बहवो भारान्बध्नन्ति दमयन्ति च ॥ ५१
एवं पर्याकुले लोके विपथे जर्जरीकृते ।
तैस्तैर्न्यायैर्महाराज पुराणं धर्ममाचर ॥ ५२
यज देहि प्रजा रक्ष धर्मं समनुपालय ।
अमित्राञ्जहि कौन्तेय मित्राणि परिपालय ॥ ५३
मा च ते निघ्नतः शत्रून्मन्युर्भवतु भारत ।
न तत्र किल्बिषं किंचित्कर्तुर्भवति भारत ॥ ५४
आततायी हि यो हन्यादाततायिनमागतम् ।
न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमृच्छति ॥५५
अवध्यः सर्वभूतानामन्तरात्मा न संशयः ।
अवध्ये चात्मनि कथं वध्यो भवति केनचित् ॥५६
यथा हि पुरुषः शालां पुनः संप्रविशेन्नवाम् ।
एवं जीवः शरीराणि तानि तानि प्रपद्यते ॥ ५७
देहान्पुराणानुत्सृज्य नवान्संप्रतिपद्यते ।
एवं मृत्युमुखं प्राहुर्ये जनास्तत्त्वदर्शिनः ॥ ५८

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

वैशंपायन उवाच ।

अर्जुनस्य वचः श्रुत्वा भीमसेनोऽत्यमर्षणः ।
धैर्यमास्थाय तेजस्वी ज्येष्ठं भ्रातरमब्रवीत् ॥ १
राजन्विदितधर्मोऽसि न तेऽस्त्यविदितं भुवि ।
उपशिक्षाम ते वृत्तं सदैव न च शक्नुमः ॥ २
न वक्ष्यामि न वक्ष्यामीत्येवं मे मनसि स्थितम् ।
अतिदुःखात्तु वक्ष्यामि तन्निबोध जनाधिप ॥ ३
भवतस्तु प्रमोहेन सर्वं संशयितं कृतम् ।
विक्लवत्वं च नः प्राप्तमबलत्वं तथैव च ॥ ४
कथं हि राजा लोकस्य सर्वशास्त्रविशारदः ।
मोहमापद्यते दैन्याद्यथा कुपुरुषस्तथा ॥ ५
आगतिश्च गतिश्चैव लोकस्य विदिता तव ।
आयत्यां च तदात्वे च न तेऽस्त्यविदितं प्रभो ॥ ६
एवं गते महाराज राज्यं प्रति जनाधिप ।
हेतुमत्र प्रवक्ष्यामि तदिहैकमनाः शृणु ॥ ७
द्विविधो जायते व्याधिः शारीरो मानसस्तथा ।
परस्परं तयोर्जन्म निर्द्वंद्वं नोपलभ्यते ॥ ८
शारीराज्जायते व्याधिर्मानसो नात्र संशयः ।
मानसाज्जायते व्याधिः शारीर इति निश्चयः ॥ ९
शारीरमानसे दुःखे योऽतीते अनुशोचति ।
दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते ॥ १०
शीतोष्णे चैव वायुश्च त्रयः शारीरजा गुणाः ।
तेषां गुणानां साम्यं च तदाहुः स्वस्थलक्षणम् ॥११
तेषामन्यतमोत्सेके विधानमुपदिश्यते ।
उष्णेन बाध्यते शीतं शीतेनोष्णं प्रबाध्यते ॥ १२
सत्त्वं रजस्तमश्चैव मानसाः स्युस्त्रयो गुणाः ।
हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ॥ १३
कश्चित्सुखे वर्तमानो दुःखस्य स्मर्तुमिच्छति ।
कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छति ॥ १४
स त्वं न दुःखी दुःखस्य न सुखी च सुखस्य च ।
न दुःखी सुखजातस्य न सुखी दुःखजस्य वा ॥१५
स्मर्तुमर्हसि कौरव्य दिष्टं तु बलवत्तरम् ।
अथ वा ते स्वभावोऽयं येन पार्थिव कृष्यसे ॥१६
दृष्ट्वा सभागतां कृष्णामेकवस्त्रां रजस्वलाम् ।
मिषतां पाण्डुपुत्राणां न तस्य स्मर्तुमर्हसि ॥ १७
प्रव्राजनं च नगरादजिनैश्च निवासनम् ।
महारण्यनिवासश्च न तस्य स्मर्तुमर्हसि ॥ १८
जटासुरात्परिक्लेशं चित्रसेनेन चाहवम् ।
सैन्धवाच्च परिक्लेशं कथं विस्मृतवानसि ।
पुनरज्ञातचर्यायां कीचकेन पदा वधम् ॥ १९
यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिंदम ।

मनसैकेन ते युद्धमिदं घोरमुपस्थितम् ॥ २०
यत्र नास्ति शरैः कार्यं न मित्रैर्न च बन्धुभिः ।
आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् ॥ २१
तस्मिन्ननिर्जिते युद्धे प्राणान्यदि ह मोक्ष्यसे ।
अन्यं देहं समास्थाय पुनस्तेनैव योत्स्यसे ॥ २२
तस्मादद्यैव गन्तव्यं युद्धस्य भरतर्षभ ।
एतज्जित्वा महाराज कृतकृत्यो भविष्यसि ॥ २३
एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिम् ।
पितृपैतामहे वृत्ते शाधि राज्यं यथोचितम् ॥ २४
दिष्ट्या दुर्योधनः पापो निहतः सानुगो युधि ।
द्रौपद्याः केशपक्षस्य दिष्ट्या त्वं पदवीं गतः ॥ २५
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
वयं ते किंकराः पार्थ वासुदेवश्च वीर्यवान् ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

युधिष्ठिर उवाच ।

असंतोषः प्रमादश्च मदो रागोऽप्रशान्तता ।
बलं मोहोऽभिमानश्च उद्वेगश्चापि सर्वशः ॥ १
एभिः पाप्मभिराविष्टो राज्यं त्वमभिकाङ्क्षसि ।
निरामिषो विनिर्मुक्तः प्रशान्तः सुसुखी भव ॥ २
य इमामखिलां भूमिं शिष्यादेको महीपतिः ।
तस्याप्युदरमेवैकं किमिदं त्वं प्रशंससि ॥ ३
नाह्ना पूरयितुं शक्या न मासेन नरर्षभ ।
अपूर्यां पूरयन्निच्छामायुषापि न शक्नुयात् ॥ ४
यथेद्धः प्रज्वलत्यग्निरसमिद्धः प्रशाम्यति ।
अल्पाहारतया त्वग्निं शमयौदर्यमुत्थितम् ।
जयोदरं पृथिव्या ते श्रेयो निर्जितया जितम् ॥ ५
मानुषान्कामभोगांस्त्वमैश्वर्यं च प्रशंससि ।
अभोगिनोऽबलाश्चैव यान्ति स्थानमनुत्तमम् ॥ ६
योगक्षेमौ च राष्ट्रस्य धर्माधर्मौ त्वयि स्थितौ ।
मुच्यस्व महतो भारात्त्यागमेवाभिसंश्रय ॥ ७
एकोदरकृते व्याघ्रः करोति विघसं बहु ।
तमन्येऽप्युपजीवन्ति मन्दवेगचरा मृगाः ॥ ८
विषयान्प्रतिसंहृत्य संन्यासं कुरुते यतिः ।
न च तुष्यन्ति राजानः पश्य बुद्ध्यन्तरं यथा ॥ ९
पत्राहारैरश्मकुट्टैर्दन्तोलूखलिकैस्तथा ।
अब्भक्षैर्वायुभक्षैश्च तैरयं नरको जितः ॥ १०
यश्चेमां वसुधां कृत्स्नां प्रशासेदखिलां नृपः ।
तुल्याश्मकाञ्चनो यश्च स कृतार्थो न पार्थिवः ॥ ११
संकल्पेषु निरारम्भो निराशो निर्ममो भव ।
विशोकं स्थानमातिष्ठ इह चामुत्र चाव्ययम् ॥ १२
निरामिषा न शोचन्ति शोचसि त्वं किमामिषम् ।
परित्यज्यामिषं सर्वं मृषावादात्प्रमोक्ष्यसे ॥ १३
पन्थानौ पितृयानश्च देवयानश्च विश्रुतौ ।
ईजानाः पितृयानेन देवयानेन मोक्षिणः ॥ १४
तपसा ब्रह्मचर्येण स्वाध्यायेन च पाविताः ।
विमुच्य देहान्वै भान्ति मृत्योरविषयं गताः ॥ १५
आमिषं बन्धनं लोके कर्मेहोक्तं तथामिषम् ।
ताभ्यां विमुक्तः पाशाभ्यां पदमाप्नोति तत्परम् ॥ १६
अपि गाथामिमां गीतां जनकेन वदन्त्युत ।
निर्द्वंद्वेन विमुक्तेन मोक्षं समनुपश्यता ॥ १७
अनन्तं बत मे वित्तं यस्य मे नास्ति किंचन ।
मिथिलायां प्रदीप्तायां न मे दह्यति किंचन ॥ १८
प्रज्ञाप्रासादमारुह्य नशोच्याञ्शोचतो जनान् ।
जगतीस्थानिवाद्रिस्थो मन्दबुद्धीनवेक्षते ॥ १९
दृश्यं पश्यति यः पश्यन्स चक्षुष्मान्स बुद्धिमान् ।
अज्ञातानां च विज्ञानात्संबोधाद्बुद्धिरुच्यते ॥ २०
यस्तु वाचं विजानाति बहुमानमियात्स वै ।
ब्रह्मभावप्रसूतानां वैद्यानां भावितात्मनाम् ॥ २१

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ २२
ते जनानां गतिं यान्ति नाविद्वांसोऽल्पचेतसः ।
नाबुद्धयो नातपसः सर्वं बुद्धौ प्रतिष्ठितम् ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

वैशंपायन उवाच ।

तूष्णींभूतं तु राजानं पुनरेवार्जुनोऽब्रवीत् ।
संतप्तः शोकदुःखाभ्यां राज्ञो वाक्शल्यपीडितः ॥१
कथयन्ति पुरावृत्तमितिहासमिमं जनाः ।
विदेहराज्ञः संवादं भार्यया सह भारत ॥ २
उत्सृज्य राज्यं भैक्षार्थं कृतबुद्धिं जनेश्वरम् ।
विदेहराजं महिषी दुःखिता प्रत्यभाषत ॥ ३
धनान्यपत्यं मित्राणि रत्नानि विविधानि च ।
पन्थानं पावनं हित्वा जनको मौण्ड्यमास्थितः ॥ ४
तं ददर्श प्रिया भार्या भैक्ष्यवृत्तिमकिंचनम् ।
धानामुष्टिमुपासीनं निरीहं गतमत्सरम् ॥ ५
तमुवाच समागम्य भर्तारमकुतोभयम् ।
क्रुद्धा मनस्विनी भार्या विविक्ते हेतुमद्वचः ॥ ६
कथमुत्सृज्य राज्यं स्वं धनधान्यसमाचितम् ।
कापालीं वृत्तिमास्थाय धानामुष्टिर्वनेऽचरः ॥ ७
प्रतिज्ञा तेऽन्यथा राजन्विचेष्टा चान्यथा तव ।
यद्राज्यं महदुत्सृज्य स्वल्पे तुष्यसि पार्थिव ॥ ८
नैतेनातिथयो राजन्देवर्षिपितरस्तथा ।
शक्यमद्य त्वया भर्तुं मोघस्तेऽयं परिश्रमः ॥ ९
देवतातिथिभिश्चैव पितृभिश्चैव पार्थिव ।
सर्वैरेतैः परित्यक्तः परिव्रजसि निष्क्रियः ॥ १०
यस्त्वं त्रैविद्यवृद्धानां ब्राह्मणानां सहस्रशः ।
भर्ता भूत्वा च लोकस्य सोऽद्यान्यैर्भृतिमिच्छसि ॥
श्रियं हित्वा प्रदीप्तां त्वं श्ववत्संप्रति वीक्ष्यसे ।
अपुत्रा जननी तेऽद्य कौसल्या चापतिस्त्वया ॥१२
अशीतिर्धर्मकामास्त्वां क्षत्रियाः पर्युपासते ।
त्वदाशामभिकाङ्क्षन्त्यः कृपणाः फलहेतुकाः ॥ १३
ताश्च त्वं विफलाः कुर्वन्कांल्लोकान्नु गमिष्यसि ।
राजन्संशयिते मोक्षे परतन्त्रेषु देहिषु ॥ १४
नैव तेऽस्ति परो लोको नापरः पापकर्मणः ।
धर्म्यान्दारान्परित्यज्य यस्त्वमिच्छसि जीवितुम् ॥
स्रजो गन्धानलंकारान्वासांसि विविधानि च ।
किमर्थमभिसंत्यज्य परिव्रजसि निष्क्रियः ॥ १६
निपानं सर्वभूतानां भूत्वा त्वं पावनं महत् ।
आढ्यो वनस्पतिर्भूत्वा सोऽद्यान्यान्पर्युपाससे ॥१७
खादन्ति हस्तिनं न्यासे क्रव्यादा बहवोऽप्युत ।
बहवः कृमयश्चैव किं पुनस्त्वामनर्थकम् ॥ १८
य इमां कुण्डिकां भिन्द्यात्त्रिविष्टब्धं च ते हरेत् ।
वासश्चापहरेत्तस्मिन्कथं ते मानसं भवेत् ॥ १९
यस्त्वयं सर्वमुत्सृज्य धानामुष्टिपरिग्रहः ।
यदानेन समं सर्वं किमिदं मम दीयते ।
धानामुष्टिरिहार्थश्चेत्प्रतिज्ञा ते विनश्यति ॥ २०
का वाहं तव को मे त्वं कोऽद्य ते मय्यनुग्रहः ।
प्रशाधि पृथिवीं राजन्यत्र तेऽनुग्रहो भवेत् ।
प्रासादं शयनं यानं वासांस्याभरणानि च ॥ २१
श्रिया निराशैरधनैस्त्यक्तमित्रैरकिंचनैः ।
सौखिकैः संभृतानर्थान्यः संत्यजसि किं नु तत् ॥२२
योऽत्यन्तं प्रतिगृह्णीयाद्यश्च दद्यात्सदैव हि ।
तयोस्त्वमन्तरं विद्धि श्रेयांस्ताभ्यां क उच्यते ॥२३
सदैव याचमानेषु सत्सु दम्भविवर्जिषु ।
एतेषु दक्षिणा दत्ता दावाग्नाविव दुर्हुतम् ॥ २४
जातवेदा यथा राजन्नादग्ध्वैवोपशाम्यति ।
सदैव याचमानो वै तथा शाम्यति न द्विजः ॥२५

सतां च वेदा अन्नं च लोकेऽस्मिन्प्रकृतिर्ध्रुवा ।
न चेद्दाता भवेद्दाता कुतः स्युर्मोक्षकाङ्क्षिणः ॥ २६
अन्नाद्गृहस्था लोकेऽस्मिन्भिक्षवस्तत एव च ।
अन्नात्प्राणः प्रभवति अन्नदः प्राणदो भवेत् ॥ २७
गृहस्थेभ्योऽभिनिर्वृत्ता गृहस्थानेव संश्रिताः ।
प्रभवं च प्रतिष्ठां च दान्ता निन्दन्त आसते ॥ २८
त्यागान्न भिक्षुकं विद्यान्न मौण्ड्यान्न च याचनात् ।
ऋजुस्तु योऽर्थं त्यजति तं सुखं विद्धि भिक्षुकम् ॥ २९
असक्तः सक्तवद्गच्छन्निःसङ्गो मुक्तबन्धनः ।
समः शत्रौ च मित्रे च स वै मुक्तो महीपते ॥ ३०
परिव्रजन्ति दानार्थं मुण्डाः काषायवाससः ।
सिता बहुविधैः पाशैः संचिन्वन्तो वृथामिषम् ॥ ३१
त्रयीं च नाम वार्तां च त्यक्त्वा पुत्रांस्त्यजन्ति ये ।
त्रिविष्टब्धं च वासश्च प्रतिगृह्णन्त्यबुद्धयः ॥ ३२
अनिष्कषाये काषायमीहार्थमिति विद्धि तत् ।
धर्मध्वजानां मुण्डानां वृत्त्यर्थमिति मे मतिः ॥ ३३
काषायैरजिनैश्चीरैर्नग्नान्मुण्डाञ्जटाधरान् ।
बिभ्रत्साधून्महाराज जय लोकाञ्जितेन्द्रियः ॥ ३४
अग्न्याधेयानि गुर्वर्थान्क्रतून्सपशुदक्षिणान् ।
ददात्यहरहः पूर्वं को नु धर्मतरस्ततः ॥ ३५
तत्त्वज्ञो जनको राजा लोकेऽस्मिन्निति गीयते ।
सोऽप्यासीन्मोहसंपन्नो मा मोहवशमन्वगाः ॥ ३६
एवं धर्ममनुक्रान्तं सदा दानपरैर्नरैः ।
आनृशंस्यगुणोपेतैः कामक्रोधविवर्जिताः ॥ ३७
पालयन्तः प्रजाश्चैव दानमुत्तममास्थिताः ।
इष्टाँल्लोकानवाप्स्यामो ब्रह्मण्याः सत्यवादिनः ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

युधिष्ठिर उवाच ।

वेदाहं तात शास्त्राणि अपराणि पराणि च ।
उभयं वेदवचनं कुरु कर्म त्यजेति च ॥ १
आकुलानि च शास्त्राणि हेतुभिश्चित्रितानि च ।
निश्चयश्चैव यन्मात्रो वेदाहं तं यथाविधि ॥ २
त्वं तु केवलमस्त्रज्ञो वीरव्रतमनुष्ठितः ।
शास्त्रार्थं तत्त्वतो गन्तुं न समर्थः कथंचन ॥ ३
शास्त्रार्थसूक्ष्मदर्शी यो धर्मनिश्चयकोविदः ।
तेनाप्येवं न वाच्योऽहं यदि धर्मं प्रपश्यसि ॥ ४
भ्रातृसौहृदमास्थाय यदुक्तं वचनं त्वया ।
न्याय्यं युक्तं च कौन्तेय प्रीतोऽहं तेन तेऽर्जुन ॥ ५
युद्धधर्मेषु सर्वेषु क्रियाणां नैपुणेषु च ।
न त्वया सदृशः कश्चित्त्रिषु लोकेषु विद्यते ॥ ६
धर्मसूक्ष्मं तु यद्वाक्यं तत्र दुष्प्रतरं त्वया ।
धनंजय न मे बुद्धिमभिशङ्कितुमर्हसि ॥ ७
युद्धशास्त्रविदेव त्वं न वृद्धाः सेवितास्त्वया ।
समासविस्तरविदां न तेषां वेत्सि निश्चयम् ॥ ८
तपस्त्यागो विधिरिति निश्चयस्तात धीमताम् ।
परं परं ज्याय एषां सैषा नैःश्रेयसी गतिः ॥ ९
न त्वेतन्मन्यसे पार्थ न ज्यायोऽस्ति धनादिति ।
अत्र ते वर्तयिष्यामि यथा नैतत्प्रधानतः ॥ १०
तपःस्वाध्यायशीला हि दृश्यन्ते धार्मिका जनाः ।
ऋषयस्तपसा युक्ता येषां लोकाः सनातनाः ॥ ११
अजातश्मश्रवो धीरास्तथान्ये वनवासिनः ।
अनन्ता अधना एव स्वाध्यायेन दिवं गताः ॥ १२
उत्तरेण तु पन्थानमार्या विषयनिग्रहात् ।
अबुद्धिजं तमस्त्यक्त्वा लोकांस्त्यागवतां गताः ॥ १३
दक्षिणेन तु पन्थानं यं भास्वन्तं प्रपश्यसि ।
एते क्रियावतां लोका ये श्मशानानि भेजिरे ॥ १४

अनिर्देश्या गतिः सा तु यां प्रपश्यन्ति मोक्षिणः ।
तस्मात्त्यागः प्रधानेष्टः स तु दुःखः प्रवेदितुम् ॥१५
अनुसृत्य तु शास्त्राणि कवयः समवस्थिताः ।
अपीह स्यादपीह स्यात्सारासारदिदृक्षया ॥ १६
वेदवादानतिक्रम्य शास्त्राण्यारण्यकानि च ।
विपाट्य कदलीस्कन्धं सारं ददृशिरे न ते ॥ १७
अथैकान्तव्युदासेन शरीरे पञ्चभौतिके ।
इच्छाद्वेषसमायुक्तमात्मानं प्राहुरिङ्गितैः ॥ १८
अग्राह्यश्चक्षुषा सोऽपि अनिर्देश्यं च तद्गिरा ।
कर्महेतुपुरस्कारं भूतेषु परिवर्तते ॥ १९
कल्याणगोचरं कृत्वा मनस्तृष्णां निगृह्य च ।
कर्मसंततिमुत्सृज्य स्यान्निरालम्बनः सुखी ॥ २०
अस्मिन्नेवं सूक्ष्मगम्ये मार्गे सद्भिर्निषेविते ।
कथमर्थमनर्थाढ्यमर्जुन त्वं प्रशंससि ॥ २१
पूर्वशास्त्रविदो *ह्येवं जनाः पश्यन्ति भारत ।*
क्रियासु निरता नित्यं दाने यज्ञे च कर्मणि ॥२२
भवन्ति सुदुरावर्ता हेतुमन्तोऽपि पण्डिताः ।
दृढपूर्वश्रुता मूढा नैतदस्तीति वादिनः ॥ २३
अमृतस्यावमन्तारो वक्तारो जनसंसदि ।
चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः ॥ २४
यान्वयं नाभिजानीमः कस्ताञ्ज्ञातुमिहार्हति ।
एवं प्राज्ञान्सतश्चापि महतः शास्त्रवित्तमान् ॥ २५
तपसा महदाप्नोति बुद्ध्या वै विन्दते महत् ।
त्यागेन सुखमाप्नोति सदा कौन्तेय धर्मवित् ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

वैशंपायन उवाच ।

तस्मिन्वाक्यान्तरे वक्ता देवस्थानो महातपाः ।
अभिनीततरं वाक्यमित्युवाच युधिष्ठिरम् ॥ १
यद्वचः फल्गुनेनोक्तं न ज्यायोऽस्ति धनादिति ।
अत्र ते वर्तयिष्यामि तदेकाग्रमनाः शृणु ॥ २
अजातशत्रो धर्मेण कृत्स्ना ते वसुधा जिता ।
तां जित्वा न वृथा राजंस्त्वं परित्यक्तुमर्हसि ॥ ३
चतुष्पदी हि निःश्रेणी कर्मण्येषा प्रतिष्ठिता ।
तां क्रमेण महाबाहो यथावज्जय पार्थिव ॥ ४
तस्मात्पार्थ महायज्ञैर्यजस्व बहुदक्षिणैः ।
स्वाध्याययज्ञा ऋषयो ज्ञानयज्ञास्तथापरे ॥ ५
कर्मनिष्ठांस्तु बुध्येथास्तपोनिष्ठांश्च भारत ।
वैखानसानां राजेन्द्र वचनं श्रूयते यथा ॥ ६
ईहते धनहेतोर्यस्तस्यानीहा गरीयसी ।
भूयान्दोषः प्रवर्धेत यस्तं धनमपाश्रयेत् ॥ ७
कृच्छ्राच्च द्रव्यसंहारं कुर्वन्ति धनकारणात् ।
धनेन तृषितोऽबुद्ध्या भ्रूणहत्यां न बुध्यते ॥ ८
अनर्हते यद्ददाति न ददाति यदर्हते ।
अनर्हार्हापरिज्ञानाद्दानधर्मोऽपि दुष्करः ॥ ९
यज्ञाय सृष्टानि धनानि धात्रा
यष्टादिष्टः पुरुषो रक्षिता च ।
तस्मात्सर्वं यज्ञ एवोपयोज्यं
धनं ततोऽनन्तर एव कामः ॥ १०
यज्ञैरिन्द्रो विविधैरन्नवद्भि-
र्देवान्सर्वानभ्ययान्महौजाः ।
तेनेन्द्रत्वं प्राप्य विभ्राजतेऽसौ
तस्माद्यज्ञे सर्वमेवोपयोज्यम् ॥ ११
महादेवः सर्वमेधे महात्मा
हुत्वात्मानं देवदेवो विभूतः ।
विश्वाँल्लोकान्व्याप्य विष्टभ्य कीर्त्या
विरोचते द्युतिमान्कृत्तिवासाः ॥ १२
आविक्षितः पार्थिवो वै मरुत्तः
स्वृद्ध्या मर्त्यो योऽजयद्देवराजम् ।

यज्ञे यस्य श्रीः स्वयं संनिविष्टा
यस्मिन्भाण्डं काञ्चनं सर्वमासीत् ॥ १३
हरिश्चन्द्रः पार्थिवेन्द्रः श्रुतस्ते
यज्ञैरिष्ट्वा पुण्यकृद्वीतशोकः ।
ऋद्ध्या शक्रं योऽजयन्मानुषः सं-
स्तस्माद्यज्ञे सर्वमेवोपयोज्यम् ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
विंशतितमोऽध्यायः ॥ २० ॥

२१

देवस्थान उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
इन्द्रेण समये पृष्टो यदुवाच बृहस्पतिः ॥ १
संतोषो वै स्वर्गतमः संतोषः परमं सुखम् ।
तुष्टेर्न किंचित्परतः सुसम्यक्परितिष्ठति ॥ २
यदा संहरते कामान्कूर्मोऽङ्गानीव सर्वशः ।
तदात्मज्योतिरात्मैव स्वात्मनैव प्रसीदति ॥ ३
न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
कामद्वेषौ च जयति तदात्मानं प्रपश्यति ॥ ४
यदासौ सर्वभूतानां न क्रुध्यति न दुष्यति ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ५
एवं कौन्तेय भूतानि तं तं धर्मं तथा तथा ।
तदा तदा प्रपश्यन्ति तस्माद्बुध्यस्व भारत ॥ ६
अन्ये शमं प्रशंसन्ति व्यायाममपरे तथा ।
नैकं न चापरं केचिदुभयं च तथापरे ॥ ७
यज्ञमेके प्रशंसन्ति संन्यासमपरे जनाः ।
दानमेके प्रशंसन्ति केचिदेव प्रतिग्रहम् ।
केचित्सर्वं परित्यज्य तूष्णीं ध्यायन्त आसते ॥ ८
राज्यमेके प्रशंसन्ति सर्वेषां परिपालनम् ।
हत्वा भित्त्वा च छित्त्वा च केचिदेकान्तशीलिनः ॥
एतत्सर्वं समालोक्य बुधानामेष निश्चयः ।
अद्रोहेणैव भूतानां यो धर्मः स सतां मतः ॥ १०
अद्रोहः सत्यवचनं संविभागो धृतिः क्षमा ।
प्रजनः स्वेषु दारेषु मार्दवं ह्रीरचापलम् ॥ ११
धनं धर्मप्रधानेष्टं मनुः स्वायंभुवोऽब्रवीत् ।
तस्मादेतं प्रयत्नेन कौन्तेय परिपालय ॥ १२
यो हि राज्ये स्थितः शश्वद्वशी तुल्यप्रियाप्रियः ।
क्षत्रियो यज्ञशिष्टाशी राजशास्त्रार्थतत्त्ववित् ॥ १३
असाधुनिग्रहरतः साधूनां प्रग्रहे रतः ।
धर्मे वर्त्मनि संस्थाप्य प्रजा वर्तेत धर्मवित् ॥ १४
पुत्रसंक्रामितश्रीस्तु वने वन्येन वर्तयन् ।
विधिना श्रामणेनैव कुर्यात्कालमतन्द्रितः ॥ १५
य एवं वर्तते राजा राजधर्मविनिश्चितः ।
तस्यायं च परश्चैव लोकः स्यात्सफलो नृप ।
निर्वाणं तु सुदुष्पारं बहुविघ्नं च मे मतम् ॥ १६
एवं धर्ममनुक्रान्ताः सत्यदानतपःपराः ।
आनृशंस्यगुणैर्युक्ताः कामक्रोधविवर्जिताः ॥ १७
प्रजानां पालने युक्ता दममुत्तममास्थिताः ।
गोब्राह्मणार्थं युद्धेन संप्राप्ता गतिमुत्तमाम् ॥ १८
एवं रुद्राः सवसवस्तथादित्याः परंतप ।
साध्या राजर्षिसंघाश्च धर्ममेतं समाश्रिताः ।
अप्रमत्तास्ततः स्वर्गं प्राप्ताः पुण्यैः स्वकर्मभिः ॥ १९

इति श्रीमहाभारते शान्तिपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

वैशंपायन उवाच ।

तस्मिन्वाक्यान्तरे वाक्यं पुनरेवार्जुनोऽब्रवीत् ।
विषण्णमनसं ज्येष्ठमिदं भ्रातरमीश्वरम् ॥ १
क्षत्रधर्मेण धर्मज्ञ प्राप्य राज्यमनुत्तमम् ।
जित्वा चारीन्नरश्रेष्ठ तप्यते किं भवान्भृशम् ॥ २
क्षत्रियाणां महाराज संग्रामे निधनं स्मृतम् ।

विशिष्टं बहुभिर्यज्ञैः क्षत्रधर्ममनुस्मर ॥ ३
ब्राह्मणानां तपस्त्यागः प्रेत्यधर्मविधिः स्मृतः ।
क्षत्रियाणां च विहितं संग्रामे निधनं विभो ॥ ४
क्षत्रधर्मो महारौद्रः शस्त्रनित्य इति स्मृतः ।
वधश्च भरतश्रेष्ठ काले शस्त्रेण संयुगे ॥ ५
ब्राह्मणस्यापि चेद्राजन्क्षत्रधर्मेण तिष्ठतः ।
प्रशस्तं जीवितं लोके क्षत्रं हि ब्रह्मसंस्थितम् ॥ ६
न त्यागो न पुनर्याच्ञा न तपो मनुजेश्वर ।
क्षत्रियस्य विधीयन्ते न परस्वोपजीवनम् ॥ ७
स भवान्सर्वधर्मज्ञः सर्वात्मा भरतर्षभ ।
राजा मनीषी निपुणो लोके दृष्टपरावरः ॥ ८
त्यक्त्वा संतापजं शोकं दंशितो भव कर्मणि ।
क्षत्रियस्य विशेषेण हृदयं वज्रसंहतम् ॥ ९
जित्वारीन्क्षत्रधर्मेण प्राप्य राज्यमकण्टकम् ।
विजितात्मा मनुष्येन्द्र यज्ञदानपरो भव ॥ १०
इन्द्रो वै ब्रह्मणः पुत्रः कर्मणा क्षत्रियोऽभवत् ।
ज्ञातीनां पापवृत्तीनां जघान नवतीर्नव ॥ ११
तच्चास्य कर्म पूज्यं हि प्रशस्यं च विशां पते ।
तेन चेन्द्रत्वमापेदे देवानामिति नः श्रुतम् ॥ १२
स त्वं यज्ञैर्महाराज यजस्व बहुदक्षिणैः ।
यथैवेन्द्रो मनुष्येन्द्र चिराय विगतज्वरः ॥ १३
मा त्वमेवंगते किंचित्क्षत्रियर्षभ शोचिथाः ।
गतास्ते क्षत्रधर्मेण शस्त्रपूताः परां गतिम् ॥ १४
भवितव्यं तथा तच्च यद्वृत्तं भरतर्षभ ।
दिष्टं हि राजशार्दूल न शक्यमतिवर्तितुम् ॥ १५

इति श्रीमहाभारते शान्तिपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

वैशंपायन उवाच ।

२३

एवमुक्तस्तु कौन्तेयो गुडाकेशेन भारत ।
नोवाच किंचित्कौरव्यस्ततो द्वैपायनोऽब्रवीत् ॥ १
बीभत्सोर्वचनं सम्यक्सत्यमेतद्युधिष्ठिर ।
शास्त्रदृष्टः परो धर्मः स्मृतो गार्हस्थ्य आश्रमः ॥ २
स्वधर्मं चर धर्मज्ञ यथाशास्त्रं यथाविधि ।
न हि गार्हस्थ्यमुत्सृज्य तवारण्यं विधीयते ॥ ३
गृहस्थं हि सदा देवाः पितर ऋषयस्तथा ।
भृत्याश्चैवोपजीवन्ति तान्भजस्व महीपते ॥ ४
वयांसि पशवश्चैव भूतानि च महीपते ।
गृहस्थैरेव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ॥ ५
सोऽयं चतुर्णामेतेषामाश्रमाणां दुराचरः ।
तं चराविमनाः पार्थ दुश्चरं दुर्बलेन्द्रियैः ॥ ६
वेदज्ञानं च ते कृत्स्नं तपश्च चरितं महत् ।
पितृपैतामहे राज्ये धुरमुद्वोढुमर्हसि ॥ ७
तपो यज्ञस्तथा विद्या भैक्षमिन्द्रियनिग्रहः ।
ध्यानमेकान्तशीलत्वं तुष्टिर्दानं च शक्तितः ॥ ८
ब्राह्मणानां महाराज चेष्टाः संसिद्धिकारिकाः ।
क्षत्रियाणां च वक्ष्यामि तवापि विदितं पुनः ॥ ९
यज्ञो विद्या समुत्थानमसंतोषः श्रियं प्रति ।
दण्डधारणमत्युग्रं प्रजानां परिपालनम् ॥ १०
वेदज्ञानं तथा कृत्स्नं तपः सुचरितं तथा ।
द्रविणोपार्जनं भूरि पात्रेषु प्रतिपादनम् ॥ ११
एतानि राज्ञां कर्माणि सुकृतानि विशां पते ।
इमं लोकममुं लोकं साधयन्तीति नः श्रुतम् ॥ १२
तेषां ज्यायस्तु कौन्तेय दण्डधारणमुच्यते ।
बलं हि क्षत्रिये नित्यं बले दण्डः समाहितः ॥ १३
एताश्चेष्टाः क्षत्रियाणां राजन्संसिद्धिकारिकाः ।
अपि गाथामिमां चापि बृहस्पतिरभाषत ॥ १४
भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ १५
सुद्युम्नश्चापि राजर्षिः श्रूयते दण्डधारणात् ।

प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

युधिष्ठिर उवाच ।

भगवन्कर्मणा केन सुद्युम्नो वसुधाधिपः ।
संसिद्धिं परमां प्राप्तः श्रोतुमिच्छामि तं नृपम् ॥१

व्यास उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शङ्खश्च लिखितश्चास्तां भ्रातरौ संयतव्रतौ ॥ २
तयोरावसथावास्तां रमणीयौ पृथक्पृथक् ।
नित्यपुष्पफलैर्वृक्षैरुपेतौ बाहुदामनु ॥ ३
ततः कदाचिल्लिखितः शङ्खस्याश्रममागमत् ।
यदृच्छयापि शङ्खोऽथ निष्क्रान्तोऽभवदाश्रमात् ॥४
सोऽभिगम्याश्रमं भ्रातुः शङ्खस्य लिखितस्तदा ।
फलानि शातयामास सम्यक्परिणतान्युत ॥ ५
तान्युपादाय विस्रब्धो भक्षयामास स द्विजः ।
तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागमत् ॥ ६
भक्षयन्तं तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत् ।
कुतः फलान्यवाप्तानि हेतुना केन खादसि ॥ ७
सोऽब्रवीद्भ्रातरं ज्येष्ठमुपस्पृश्याभिवाद्य च ।
इत एव गृहीतानि मयेति प्रहसन्निव ॥ ८
तमब्रवीत्तदा शङ्खस्तीव्रकोपसमन्वितः ।
स्तेयं त्वया कृतमिदं फलान्याददता स्वयम् ।
गच्छ राजानमासाद्य स्वकर्म प्रथयस्व वै ॥ ९
अदत्तादानमेवेदं कृतं पार्थिवसत्तम ।
स्तेनं मां त्वं विदित्वा च स्वधर्ममनुपालय ।
शीघ्रं धारय चौरस्य मम दण्डं नराधिप ॥ १०
इत्युक्तस्तस्य वचनात्सुद्युम्नं वसुधाधिपम् ।
अभ्यगच्छन्महाबाहो लिखितः संशितव्रतः ॥ ११
सुद्युम्नस्त्वन्तपालेभ्यः श्रुत्वा लिखितमागतम् ।
अभ्यगच्छत्सहामात्यः पद्भ्यामेव नरेश्वरः ॥ १२
तमब्रवीत्समागत्य स राजा ब्रह्मवित्तमम् ।
किमागमनमाचक्ष्व भगवन्कृतमेव तत् ॥ १३
एवमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत् ।
प्रतिश्रौषि करिष्येति श्रुत्वा तत्कर्तुमर्हसि ॥ १४
अनिसृष्टानि गुरुणा फलानि पुरुषर्षभ ।
भक्षितानि मया राजंस्तत्र मां शाधि माचिरम् ॥१५

सुद्युम्न उवाच ।

प्रमाणं चेन्मतो राजा भवतो दण्डधारणे ।
अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ ॥ १६
स भवानभ्यनुज्ञातः शुचिकर्मा महाव्रतः ।
ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वचः ॥१७

व्यास उवाच ।

छन्द्यमानोऽपि ब्रह्मर्षिः पार्थिवेन महात्मना ।
नान्यं वै वरयामास तस्माद्दण्डादृते वरम् ॥ १८
ततः स पृथिवीपालो लिखितस्य महात्मनः ।
करौ प्रच्छेदयामास धृतदण्डो जगाम सः ॥१९
स गत्वा भ्रातरं शङ्खमार्तरूपोऽब्रवीदिदम् ।
धृतदण्डस्य दुर्बुद्धेर्भगवन्क्षन्तुमर्हसि ॥ २०

शङ्ख उवाच ।

न कुप्ये तव धर्मज्ञ न च दूषयसे मम ।
धर्मस्तु ते व्यतिक्रान्तस्ततस्ते निष्कृतिः कृता ॥२१
स गत्वा बाहुदां शीघ्रं तर्पयस्व यथाविधि ।
देवान्पितॄनृषींश्चैव मा चाधर्मे मनः कृथाः ॥ २२

व्यास उवाच ।

तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा ।
अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे ॥ २३
प्रादुरास्तां ततस्तस्य करौ जलजसंनिभौ ।
ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ॥२४

ततस्तमब्रवीच्छङ्खस्तपसेदं कृतं मया ।
मा च तेऽत्र विशङ्का भूद्दैवमेव विधीयते ॥ २५

लिखित उवाच ।

किं नु नाहं त्वया पूतः पूर्वमेव महाद्युते ।
यस्य ते तपसो वीर्यमीदृशं द्विजसत्तम ॥ २६

शङ्ख उवाच ।

एवमेतन्मया कार्यं नाहं दण्डधरस्तव ।
स च पूतो नरपतिस्त्वं चापि पितृभिः सह ॥ २७

व्यास उवाच ।

स राजा पाण्डवश्रेष्ठ श्रेष्ठो वै तेन कर्मणा ।
प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा ॥ २८
एष धर्मः क्षत्रियाणां प्रजानां परिपालनम् ।
उत्पथेऽस्मिन्महाराज मा च शोके मनः कृथाः ॥२९
भ्रातुरस्य हितं वाक्यं शृणु धर्मज्ञसत्तम ।
दण्ड एव हि राजेन्द्र क्षत्रधर्मो न मुण्डनम् ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

वैशंपायन उवाच ।

पुनरेव महर्षिस्तं कृष्णद्वैपायनोऽब्रवीत् ।
अजातशत्रुं कौन्तेयमिदं वचनमर्थवत् ॥ १
अरण्ये वसतां तात भ्रातॄणां ते तपस्विनाम् ।
मनोरथा महाराज ये तत्रासन्युधिष्ठिर ॥ २
तानिमे भरतश्रेष्ठ प्राप्नुवन्तु महारथाः ।
प्रशाधि पृथिवीं पार्थ ययातिरिव नाहुषः ॥ ३
अरण्ये दुःखवसतिरनुभूता तपस्विभिः ।
दुःखस्यान्ते नरव्याघ्राः सुखं त्वनुभवन्त्विमे ॥ ४
धर्ममर्थं च कामं च भ्रातृभिः सह भारत ।
अनुभूय ततः पश्चात्प्रस्थातासि विशां पते ॥ ५
अतिथीनां च पितॄणां देवतानां च भारत ।
आनृण्यं गच्छ कौन्तेय ततः स्वर्गं गमिष्यसि ॥ ६
सर्वमेधाश्वमेधाभ्यां यजस्व कुरुनन्दन ।
ततः पश्चान्महाराज गमिष्यसि परां गतिम् ॥ ७
भ्रातॄंश्च सर्वान्क्रतुभिः संयोज्य बहुदक्षिणैः ।
संप्राप्तः कीर्तिमतुलां पाण्डवेय भविष्यसि ॥ ८
विद्म ते पुरुषव्याघ्र वचनं कुरुनन्दन ।
शृणु मच्च यथा कुर्वन्धर्मान्न च्यवते नृपः ॥ ९
आददानस्य च धनं निग्रहं च युधिष्ठिर ।
समानं धर्मकुशलाः स्थापयन्ति नरेश्वर ॥ १०
देशकालप्रतीक्षे यो दस्योर्दर्शयते नृपः ।
शास्त्रजां बुद्धिमास्थाय नैनसा स हि युज्यते ॥ ११
आदाय बलिषड्भागं यो राष्ट्रं नाभिरक्षति ।
प्रतिगृह्णाति तत्पापं चतुर्थांशेन पार्थिवः ॥ १२
निबोध च यथातिष्ठन्धर्मान्न च्यवते नृपः ।
निग्रहाद्धर्मशास्त्राणामनुरुध्यन्नपेतभीः ।
कामक्रोधावनादृत्य पितेव समदर्शनः ॥ १३
दैवेनोपहते राजा कर्मकाले महाद्युते ।
प्रमादयति तत्कर्म न तत्राहुरतिक्रमम् ॥ १४
तरसा बुद्धिपूर्वं वा निग्राह्या एव शत्रवः ।
पापैः सह न संदध्याद्राष्ट्रं पण्यं न कारयेत् ॥१५
शूराश्चार्याश्च सत्कार्या विद्वांसश्च युधिष्ठिर ।
गोमतो धनिनश्चैव परिपाल्या विशेषतः ॥ १६
व्यवहारेषु धर्म्येषु नियोज्याश्च बहुश्रुताः ।
गुणयुक्तेऽपि नैकस्मिन्विश्वस्याच्च विचक्षणः ॥ १७
अरक्षिता दुर्विनीतो मानी स्तब्धोऽभ्यसूयकः ।
एनसा युज्यते राजा दुर्दान्त इति चोच्यते ॥ १८
येऽरक्ष्यमाणा हीयन्ते दैवेनोपहते नृपे ।
तस्करैश्चापि हन्यन्ते सर्वं तद्राजकिल्बिषम् ॥ १९
सुमन्त्रिते सुनीते च विधिवच्चोपपादिते ।
पौरुषे कर्मणि कृते नास्त्यधर्मो युधिष्ठिर ॥ २०

विपचन्ते समारम्भाः सिध्यन्त्यपि च दैवतः ।
कृते पुरुषकारे तु नैनः स्पृशति पार्थिवम् ॥ २१
अत्र ते राजशार्दूल वर्तयिष्ये कथामिमाम् ।
यद्वृत्तं पूर्वराजर्षेर्हयग्रीवस्य पार्थिव ॥ २२
शत्रून्हत्वा हतस्याजौ शूरस्याक्लिष्टकर्मणः ।
असहायस्य धीरस्य निर्जितस्य युधिष्ठिर ॥ २३
यत्कर्म वै निग्रहे शात्रवाणां
योगश्चाग्र्यः पालने मानवानाम् ।
कृत्वा कर्म प्राप्य कीर्तिं सुयुद्धे
वाजिग्रीवो मोदते देवलोके ॥ २४
संत्यक्तात्मा समरेष्वाततायी
शस्त्रैश्छिन्नो दस्युभिरर्द्यमानः ।
अश्वग्रीवः कर्मशीलो महात्मा
संसिद्धात्मा मोदते देवलोके ॥ २५
धनुर्यूपो रशना ज्या शरः स्रु-
क्स्रुवः खड्गो रुधिरं यत्र चाज्यम् ।
रथो वेदी कामगो युद्धमग्नि-
श्चातुर्होत्रं चतुरो वाजिमुख्याः ॥ २६
हुत्वा तस्मिन्यज्ञवह्नावथारी-
न्पापान्मुक्तो राजसिंहस्तरस्वी ।
प्राणान्हुत्वा चावभृथे रणे स
वाजिग्रीवो मोदते देवलोके ॥ २७
राष्ट्रं रक्षन्बुद्धिपूर्वं नयेन
संत्यक्तात्मा यज्ञशीलो महात्मा ।
सर्वाँल्लोकान्व्याप्य कीर्त्या मनस्वी
वाजिग्रीवो मोदते देवलोके ॥ २८
दैवीं सिद्धिं मानुषीं दण्डनीतिं
योगन्यायैः पालयित्वा महीं च ।
तस्माद्राजा धर्मशीलो महात्मा
हयग्रीवो मोदते स्वर्गलोके ॥ २९
विद्वांस्त्यागी श्रद्दधानः कृतज्ञ-
स्त्यक्त्वा लोकं मानुषं कर्म कृत्वा ।
मेधाविनां विदुषां संमतानां
तनुत्यजां लोकमाक्रम्य राजा ॥ ३०
सम्यग्वेदान्प्राप्य शास्त्राण्यधीत्य
सम्यग्राष्ट्रं पालयित्वा महात्मा ।
चातुर्वर्ण्यं स्थापयित्वा स्वधर्मे
वाजिग्रीवो मोदते देवलोके ॥ ३१
जित्वा संग्रामान्पालयित्वा प्रजाश्च
सोमं पीत्वा तर्पयित्वा द्विजाग्र्यान् ।
युक्त्या दण्डं धारयित्वा प्रजानां
युद्धे क्षीणो मोदते देवलोके ॥ ३२
वृत्तं यस्य श्लाघनीयं मनुष्याः
सन्तो विद्वांसश्चार्हयन्त्यर्हणीयाः ।
स्वर्गं जित्वा वीरलोकांश्च गत्वा
सिद्धिं प्राप्तः पुण्यकीर्तिर्महात्मा ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

वैशंपायन उवाच ।

द्वैपायनवचः श्रुत्वा कुपिते च धनंजये ।
व्यासमामन्त्र्य कौन्तेयः प्रत्युवाच युधिष्ठिरः ॥ १
न पार्थिवमिदं राज्यं न च भोगाः पृथग्विधाः ।
प्रीणयन्ति मनो मेऽद्य शोको मां नर्दयत्ययम् ॥ २
श्रुत्वा च वीरहीनानामपुत्राणां च योषिताम् ।
परिदेवयमानानां शान्तिं नोपलभे मुने ॥ ३
इत्युक्तः प्रत्युवाचेदं व्यासो योगविदां वरः ।
युधिष्ठिरं महाप्राज्ञं धर्मज्ञो वेदपारगः ॥ ४
न कर्मणा लभ्यते चिन्तया वा
नाप्यस्य दाता पुरुषस्य कश्चित् ।

पर्याययोगाद्विहितं विधात्रा
कालेन सर्वं लभते मनुष्यः ॥ ५
न बुद्धिशास्त्राध्ययनेन शक्यं
प्राप्तुं विशेषैर्मनुजैरकाले ।
मूर्खोऽपि प्राप्नोति कदाचिदर्था-
न्कालो हि कार्यं प्रति निर्विशेषः ॥ ६
नाभूतिकाले च फलं ददाति
शिल्पं न मन्त्राश्च तथौषधानि ।
तान्येव कालेन समाहितानि
सिध्यन्ति चेध्यन्ति च भूतकाले ॥ ७
कालेन शीघ्राः प्रविवान्ति वाताः
कालेन वृष्टिर्जलदानुपैति ।
कालेन पद्मोत्पलवज्जलं च
कालेन पुष्यन्ति नगा वनेषु ॥ ८
कालेन कृष्णाश्च सिताश्च रात्र्यः
कालेन चन्द्रः परिपूर्णबिम्बः ।
नाकालतः पुष्पफलं नगानां
नाकालवेगाः सरितो वहन्ति ॥ ९
नाकालमत्ताः खगपन्नगाश्च
मृगद्विपाः शैलमहाग्रहाश्च ।
नाकालतः स्त्रीषु भवन्ति गर्भा
नायान्त्यकाले शिशिरोष्णवर्षाः ॥ १०
नाकालतो म्रियते जायते वा
नाकालतो व्याहरते च बालः ।
नाकालतो यौवनमभ्युपैति
नाकालतो रोहति बीजमुप्तम् ॥ ११
नाकालतो भानुरुपैति योगं
नाकालतोऽस्तं गिरिमभ्युपैति ।
नाकालतो वर्धते हीयते च
चन्द्रः समुद्रश्च महोर्मिमाली ॥ १२

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गीतं राज्ञा सेनजिता दुःखार्तेन युधिष्ठिर ॥ १३
सर्वानेवैष पर्यायो मर्त्यान्स्पृशति दुस्तरः ।
कालेन परिपक्वा हि म्रियन्ते सर्वमानवाः ॥ १४
घ्नन्ति चान्यान्नरा राजंस्तानप्यन्ये नरास्तथा ।
संज्ञैषा लौकिकी राजन्न हिनस्ति न हन्यते ॥ १५
हन्तीति मन्यते कश्चिन्न हन्तीत्यपि चापरे ।
स्वभावतस्तु नियतौ भूतानां प्रभवाप्ययौ ॥ १६
नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
अहो कष्टमिति ध्यायञ्शोकस्यापचितिं चरेत् ॥ १७
स किं शोचसि मूढः सञ्शोच्यः किमनुशोचसि ।
पश्य दुःखेषु दुःखानि भयेषु च भयान्यपि ॥ १८
आत्मापि चायं न मम सर्वापि पृथिवी मम ।
यथा मम तथान्येषामिति पश्यन्न मुह्यति ॥ १९
शोकस्थानसहस्राणि हर्षस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ २०
एवमेतानि कालेन प्रियद्वेष्याणि भागशः ।
जीवेषु परिवर्तन्ते दुःखानि च सुखानि च ॥ २१
दुःखमेवास्ति न सुखं तस्मात्तदुपलभ्यते ।
तृष्णार्तिप्रभवं दुःखं दुःखार्तिप्रभवं सुखम् ॥ २२
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
न नित्यं लभते दुःखं न नित्यं लभते सुखम् ॥ २३
सुखमन्ते हि दुःखानां दुःखमन्ते सुखस्य च ।
तस्मादेतद्द्वयं जह्याद्य इच्छेच्छाश्वतं सुखम् ॥ २४
यन्निमित्तं भवेच्छोकस्तापो वा दुःखमूर्छितः ।
आयासो वापि यन्मूलस्तदेकाङ्गमपि त्यजेत् ॥ २५
सुखं वा यदि वा दुःखं प्रियं वा यदि वाप्रियम् ।
प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः ॥ २६
ईषदप्यङ्ग दाराणां पुत्राणां वा चराप्रियम् ।
ततो ज्ञास्यसि कः कस्य केन वा कथमेव वा ॥ २७

ये च मूढतमा लोके ये च बुद्धेः परं गताः ।
त एव सुखमेधन्ते मध्यः क्लेशेन युज्यते ॥ २८
इत्यब्रवीन्महाप्राज्ञो युधिष्ठिर स सेनजित् ।
परावरज्ञो लोकस्य धर्मवित्सुखदुःखवित् ॥ २९
सुखी परस्य यो दुःखे न जातु स सुखी भवेत् ।
दुःखानां हि क्षयो नास्ति जायते ह्यपरात्परम् ॥ ३०

सुखं च दुःखं च भवाभवौ च
लाभालाभौ मरणं जीवितं च ।
पर्यायशः सर्वमिह स्पृशन्ति
तस्माद्धीरो नैव हृष्येन्न कुप्येत् ॥ ३१
दीक्षां यज्ञे पालनं युद्धमाहु-
र्योगं राष्ट्रे दण्डनीत्या च सम्यक् ।
वित्तत्यागं दक्षिणानां च यज्ञे
सम्यग्ज्ञानं पावनानीति विद्यात् ॥ ३२
रक्षन्राष्ट्रं बुद्धिपूर्वं नयेन
संत्यक्तात्मा यज्ञशीलो महात्मा ।
सर्वाँल्लोकान्धर्ममूर्त्या चरंश्चा-
प्यूर्ध्वं देहान्मोदते देवलोके ॥ ३३
जित्वा संग्रामान्पालयित्वा च राष्ट्रं
सोमं पीत्वा वर्धयित्वा प्रजाश्च ।
युक्त्या दण्डं धारयित्वा प्रजानां
युद्धे क्षीणो मोदते देवलोके ॥ ३४
सम्यग्वेदान्प्राप्य शास्त्राण्यधीत्य
सम्यग्राष्ट्रं पालयित्वा च राजा ।
चातुर्वर्ण्यं स्थापयित्वा स्वधर्मे
पूतात्मा वै मोदते देवलोके ॥ ३५

यस्य वृत्तं नमस्यन्ति स्वर्गस्थस्यापि मानवाः ।
पौरजानपदामात्याः स राजा राजसत्तमः ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

युधिष्ठिर उवाच ।

अभिमन्यौ हते बाले द्रौपद्यास्तनयेषु च ।
धृष्टद्युम्ने विराटे च द्रुपदे च महीपतौ ॥ १
वसुषेणे च धर्मज्ञे धृष्टकेतौ च पार्थिवे ।
तथान्येषु नरेन्द्रेषु नानादेश्येषु संयुगे ॥ २
न विमुञ्चति मां शोको ज्ञातिघातिनमातुरम् ।
राज्यकामुकमत्युग्रं स्ववंशोच्छेदकारकम् ॥ ३
यस्याङ्के क्रीडमानेन मया वै परिवर्तितम् ।
स मया राज्यलुब्धेन गाङ्गेयो विनिपातितः ॥ ४
यदा ह्येनं विघूर्णन्तमपश्यं पार्थसायकैः ।
कम्पमानं यथा वज्रैः प्रेक्षमाणं शिखण्डिनम् ॥ ५
जीर्णं सिंहमिव प्रांशुं नरसिंहं पितामहम् ।
कीर्यमाणं शरैस्तीक्ष्णैर्दृष्ट्वा मे व्यथितं मनः ॥ ६
प्राङ्मुखं सीदमानं च रथादपच्युतं शरैः ।
घूर्णमानं यथा शैलं तदा मे कश्मलोऽभवत् ॥ ७
यः स बाणधनुष्पाणिर्योधयामास भार्गवम् ।
बहून्यहानि कौरव्यः कुरुक्षेत्रे महामृधे ॥ ८
समेतं पार्थिवं क्षत्रं वाराणस्यां नदीसुतः ।
कन्यार्थमाह्वयद्वीरो रथेनैकेन संयुगे ॥ ९
येन चोग्रायुधो राजा चक्रवर्ती दुरासदः ।
दग्धः शस्त्रप्रतापेन स मया युधि घातितः ॥ १०
स्वयं मृत्युं रक्षमाणः पाञ्चाल्यं यः शिखण्डिनम् ।
न बाणैः पातयामास सोऽर्जुनेन निपातितः ॥ ११
यदैनं पतितं भूमावपश्यं रुधिरोक्षितम् ।
तदैवाविशदत्युग्रो ज्वरो मे मुनिसत्तम ॥ १२
येन संवर्धिता बाला येन स्म परिरक्षिताः ।
स मया राज्यलुब्धेन पापेन गुरुघातिना ।
अल्पकालस्य राज्यस्य कृते मूढेन घातितः ॥ १३
आचार्यश्च महेष्वासः सर्वपार्थिवपूजितः ।

अभिगम्य रणे मिथ्या पापेनोक्तः सुतं प्रति ॥ १४
तन्मे दहति गात्राणि यन्मां गुरुरभाषत ।
सत्यवाक्यो हि राजंस्त्वं यदि जीवति मे सुतः ।
सत्यं मा मर्शयन्विप्रो मयि तत्परिपृष्टवान् ॥ १५
कुञ्जरं चान्तरं कृत्वा मिथ्योपचरितं मया ।
सुभृशं राज्यलुब्धेन पापेन गुरुघातिना ॥ १६
सत्यकञ्चुकमास्थाय मयोक्तो गुरुराहवे ।
अश्वत्थामा हत इति कुञ्जरे विनिपातिते ।
कान्लोकान्गमिष्यामि कृत्वा तत्कर्म दारुणम् ॥ १७
अघातयं च यत्कर्णं समरेष्वपलायिनम् ।
ज्येष्ठं भ्रातरमत्युग्रं को मत्तः पापकृत्तमः ॥ १८
अभिमन्युं च यद्बालं जातं सिंहमिवाद्रिषु ।
प्रावेशयमहं लुब्धो वाहिनीं द्रोणपालिताम् ॥ १९
तदाप्रभृति बीभत्सुं न शक्नोमि निरीक्षितुम् ।
कृष्णं च पुण्डरीकाक्षं किल्बिषी भ्रूणहा यथा ॥ २०
द्रौपदीं चाप्यदुःखार्हां पञ्चपुत्रविनाकृताम् ।
शोचामि पृथिवीं हीनां पञ्चभिः पर्वतैरिव ॥ २१
सोऽहमागस्करः पापः पृथिवीनाशकारकः ।
आसीन एवमेवेदं शोषयिष्ये कलेवरम् ॥ २२
प्रायोपविष्टं जानीध्वमद्य मां गुरुघातिनम् ।
जातिष्वन्यास्वपि यथा न भवेयं कुलान्तकृत् ॥ २३
न भोक्ष्ये न च पानीयमुपयोक्ष्ये कथंचन ।
शोषयिष्ये प्रियान्प्राणानिहस्थोऽहं तपोधन ॥ २४
यथेष्टं गम्यतां काममनुजाने प्रसाद्य वः ।
सर्वे मामनुजानीत त्यक्ष्यामीदं कलेवरम् ॥ २५

वैशंपायन उवाच ।

तमेवंवादिनं पार्थं बन्धुशोकेन विह्वलम् ।
मैवमित्यब्रवीद्व्यासो निगृह्य मुनिसत्तमः ॥ २६
अतिवेलं महाराज न शोकं कर्तुमर्हसि ।
पुनरुक्तं प्रवक्ष्यामि दिष्टमेतदिति प्रभो ॥ २७
संयोगा विप्रयोगाश्च जातानां प्राणिनां ध्रुवम् ।
बुद्बुदा इव तोयेषु भवन्ति न भवन्ति च ॥ २८
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥ २९
सुखं दुःखान्तमालस्यं दाक्ष्यं दुःखं सुखोदयम् ।
भूतिः श्रीर्ह्रीर्धृतिः सिद्धिर्नादक्षे निवसन्त्युत ॥ ३०
नालं सुखाय सुहृदो नालं दुःखाय दुर्हृदः ।
न च प्रज्ञालमर्थेभ्यो न सुखेभ्योऽप्यलं धनम् ॥ ३१
यथा सृष्टोऽसि कौन्तेय धात्रा कर्मसु तत्कुरु ।
अत एव हि सिद्धिस्ते नेशस्त्वमात्मना नृप ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

वैशंपायन उवाच

ज्ञातिशोकाभितप्तस्य प्राणानभ्युत्सिसृक्षतः ।
ज्येष्ठस्य पाण्डुपुत्रस्य व्यासः शोकमपानुदत् ॥ १

व्यास उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अश्मगीतं नरव्याघ्र तन्निबोध युधिष्ठिर ॥ २
अश्मानं ब्राह्मणं प्राज्ञं वैदेहो जनको नृपः ।
संशयं परिपप्रच्छ दुःखशोकपरिप्लुतः ॥ ३

जनक उवाच ।

आगमे यदि वापाये ज्ञातीनां द्रविणस्य च ।
नरेण प्रतिपत्तव्यं कल्याणं कथमिच्छता ॥ ४

अश्मोवाच ।

उत्पन्नमिममात्मानं नरस्यानन्तरं ततः ।
तानि तान्यभिवर्तन्ते दुःखानि च सुखानि च ॥ ५
तेषामन्यतरापत्तौ यद्यदेवोपसेवते ।
तत्तद्धि चेतनामस्य हरत्यभ्रमिवानिलः ॥ ६

अभिजातोऽस्मि सिद्धोऽस्मि नास्मि केवलमानुषः ।
इत्येवं हेतुभिस्तस्य त्रिभिश्चित्तं प्रसिच्यति ॥ ७
स प्रसिक्तमना भोगान्विसृज्य पितृसंचितान् ।
परिक्षीणः परस्वानामादानं साधु मन्यते ॥ ८
तमतिक्रान्तमर्यादमाददानमसांप्रतम् ।
प्रतिषेधन्ति राजानो लुब्धा मृगमिवेषुभिः ॥ ९
ये च विंशतिवर्षा वा त्रिंशद्वर्षाश्च मानवाः ।
परेण ते वर्षशतान्न भविष्यन्ति पार्थिव ॥ १०
तेषां परमदुःखानां बुद्ध्या भेषजमादिशेत् ।
सर्वप्राणभृतां वृत्तं प्रेक्षमाणस्ततस्ततः ॥ ११
मानसानां पुनर्योनिर्दुःखानां चित्तविभ्रमः ।
अनिष्टोपनिपातो वा तृतीयं नोपपद्यते ॥ १२
एवमेतानि दुःखानि तानि तानीह मानवम् ।
विविधान्युपवर्तन्ते तथा सांस्पर्शकानि च ॥ १३
जरामृत्यू ह भूतानि खादितारौ वृकाविव ।
बलिनां दुर्बलानां च ह्रस्वानां महतामपि ॥ १४
न कश्चिज्जात्वतिक्रामेज्जरामृत्यू ह मानवः ।
अपि सागरपर्यन्तां विजित्येमां वसुंधराम् ॥ १५
सुखं वा यदि वा दुःखं भूतानां पर्युपस्थितम् ।
प्राप्तव्यमवशैः सर्वं परिहारो न विद्यते ॥ १६
पूर्वे वयसि मध्ये वाप्युत्तमे वा नराधिप ।
अवर्जनीयास्तेऽर्था वै काङ्क्षिताश्च ततोऽन्यथा ॥ १७
सुप्रियैर्विप्रयोगश्च संप्रयोगस्तथाप्रियैः ।
अर्थानर्थौ सुखं दुःखं विधानमनुवर्तते ॥ १८
प्रादुर्भावश्च भूतानां देहन्यासस्तथैव च ।
प्राप्तिव्यायामयोगश्च सर्वमेतत्प्रतिष्ठितम् ॥ १९
गन्धवर्णरसस्पर्शा निवर्तन्ते स्वभावतः ।
तथैव सुखदुःखानि विधानमनुवर्तते ॥ २०
आसनं शयनं यानमुत्थानं पानभोजनम् ।
नियतं सर्वभूतानां कालेनैव भवन्त्युत ॥ २१
वैद्याश्चाप्यातुराः सन्ति बलवन्तः सुदुर्बलाः ।
स्त्रीमन्तश्च तथा षण्ढा विचित्रः कालपर्ययः ॥ २२
कुले जन्म तथा वीर्यमारोग्यं धैर्यमेव च ।
सौभाग्यमुपभोगश्च भवितव्येन लभ्यते ॥ २३
सन्ति पुत्राः सुबहवो दरिद्राणामनिच्छताम् ।
बहूनामिच्छतां नास्ति समृद्धानां विचेष्टताम् ॥ २४
व्याधिरग्निर्जलं शस्त्रं बुभुक्षा श्वापदं विषम् ।
रज्ज्वा च मरणं जन्तोरुच्चाच्च पतनं तथा ॥ २५
निर्याणं यस्य यद्दिष्टं तेन गच्छति हेतुना ।
दृश्यते नाभ्यतिक्रामन्नतिक्रान्तो न वा पुनः ॥ २६
दृश्यते हि युवैवेह विनश्यन्वसुमान्नरः ।
दरिद्रश्च परिक्लिष्टः शतवर्षो जनाधिप ॥ २७
अकिंचनाश्च दृश्यन्ते पुरुषाश्चिरजीविनः ।
समृद्धे च कुले जाता विनश्यन्ति पतंगवत् ॥ २८
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
काष्ठान्यपि हि जीर्यन्ते दरिद्राणां नराधिप ॥ २९
अहमेतत्करोमीति मन्यते कालचोदितः ।
यद्यदिष्टमसंतोषादुरात्मा पापमाचरन् ॥ ३०
स्त्रियोऽक्षा मृगया पानं प्रसङ्गान्निन्दिता बुधैः ।
दृश्यन्ते चापि बहवः संप्रसक्ता बहुश्रुताः ॥ ३१
इति कालेन सर्वार्थानीप्सितानीप्सितानि च ।
स्पृशन्ति सर्वभूतानि निमित्तं नोपलभ्यते ॥ ३२
वायुमाकाशमग्निं च चन्द्रादित्यावहःक्षपे ।
ज्योतींषि सरितः शैलान्कः करोति बिभर्ति वा ॥ ३३
शीतमुष्णं तथा वर्षं कालेन परिवर्तते ।
एवमेव मनुष्याणां सुखदुःखे नरर्षभ ॥ ३४
नौषधानि न शास्त्राणि न होमा न पुनर्जपाः ।
त्रायन्ते मृत्युनोपेतं जरया चापि मानवम् ॥ ३५
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यतीयातां तद्वद्भूतसमागमः ॥ ३६

ये चापि पुरुषैः स्त्रीभिर्गीतवाद्यैरुपस्थिताः ।
ये चानाथाः परान्नादाः कालस्तेषु समक्रियः ॥३७
मातृपितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि कस्य ते कस्य वा वयम् ॥ ३८
नैवास्य कश्चिद्भविता नायं भवति कस्यचित् ।
पथि संगतमेवेदं दारबन्धुसुहृद्गणैः ॥ ३९
क्वासं क्वास्मि गमिष्यामि को न्वहं किमिहास्थितः।
कस्मात्कमनुशोचेयमित्येवं स्थापयेन्मनः ।
अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ ॥ ४०
न दृष्टपूर्वं प्रत्यक्षं परलोकं विदुर्बुधाः ।
आगमांस्त्वनतिक्रम्य श्रद्धातव्यं बुभूषता ॥ ४१
कुर्वीत पितृदैवत्यं धर्माणि च समाचरेत् ।
यजेच्च विद्वान्विधिवत्त्रिवर्गं चाप्यनुव्रजेत् ॥ ४२
संनिमज्जज्जगदिदं गम्भीरे कालसागरे ।
जरामृत्युमहाग्राहे न कश्चिदवबुध्यते ॥ ४३
आयुर्वेदमधीयानाः केवलं सपरिग्रहम् ।
दृश्यन्ते बहवो वैद्या व्याधिभिः समभिप्लुताः ॥४४
ते पिबन्तः कषायांश्च सर्पींषि विविधानि च ।
न मृत्युमतिवर्तन्ते वेलामिव महोदधिः ॥ ४५
रसायनविदश्चैव सुप्रयुक्तरसायनाः ।
दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः ॥ ४६
तथैव तपसोपेताः स्वाध्यायाभ्यसने रताः ।
दातारो यज्ञशीलाश्च न तरन्ति जरान्तकौ ॥ ४७
न ह्यहानि निवर्तन्ते न मासा न पुनः समाः ।
जातानां सर्वभूतानां न पक्षा न पुनः क्षपाः ॥४८
सोऽयं विपुलमध्वानं कालेन ध्रुवमध्रुवः ।
नरोऽवशः समभ्येति सर्वभूतनिषेवितम् ॥ ४९
देहो वा जीवतोऽभ्येति जीवो वाभ्येति देहतः ।
पथि संगतमेवेदं दारैरन्यैश्च बन्धुभिः ॥ ५०
नायमत्यन्तसंवासो लभ्यते जातु केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ ५१
क्व नु तेऽद्य पिता राजन्क्व नु तेऽद्य पितामहः ।
न त्वं पश्यसि तानद्य न त्वां पश्यन्ति तेऽपि च ॥
न ह्येव पुरुषो द्रष्टा स्वर्गस्य नरकस्य वा ।
आगमस्तु सतां चक्षुर्नृपते तमिहाचर ॥ ५३
चरितब्रह्मचर्यो हि प्रजायेत यजेत च ।
पितृदेवमहर्षीणामानृण्यायानसूयकः ॥ ५४

स यज्ञशीलः प्रजने निविष्टः
प्रागब्रह्मचारी प्रविभक्तपक्षः ।
आराधयन्स्वर्गमिमं च लोकं
परं च मुक्त्वा हृदयव्यलीकम् ॥ ५५
सम्यग्घि धर्मं चरतो नृपस्य
द्रव्याणि चाप्याहरतो यथावत् ।
प्रवृत्तचक्रस्य यशोऽभिवर्धते
सर्वेषु लोकेषु चराचरेषु ॥ ५६

व्यास उवाच ।

इत्येवमाज्ञाय विदेहराजो
वाक्यं समग्रं परिपूर्णहेतुः ।
अश्मानमामन्त्र्य विशुद्धबुद्धि-
र्ययौ गृहं स्वं प्रति शान्तशोकः ॥ ५७
तथा त्वमप्यच्युत मुञ्च शोक-
मुत्तिष्ठ शक्रोपम हर्षमेहि ।
क्षात्रेण धर्मेण मही जिता ते
तां भुङ्क्ष्व कुन्तीसुत मा विषादीः ॥ ५८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

वैशंपायन उवाच ।

अव्याहरति कौन्तेये धर्मपुत्रे युधिष्ठिरे ।
गुडाकेशो हृषीकेशमभ्यभाषत पाण्डवः ॥ १

ज्ञातिशोकाभिसंतप्तो धर्मराजः परंतपः ।
एष शोकार्णवे मग्नस्तमाश्वासय माधव ॥ २
सर्वे स्म ते संशयिताः पुनरेव जनार्दन ।
अस्य शोकं महाबाहो प्रणाशयितुमर्हसि ॥ ३
एवमुक्तस्तु गोविन्दो विजयेन महात्मना ।
पर्यवर्तत राजानं पुण्डरीकेक्षणोऽच्युतः ॥ ४
अनतिक्रमणीयो हि धर्मराजस्य केशवः ।
बाल्यात्प्रभृति गोविन्दः प्रीत्या चाभ्यधिकोऽर्जुनात्॥
संप्रगृह्य महाबाहुर्भुजं चन्दनभूषितम् ।
शैलस्तम्भोपमं शौरिरुवाचाभिविनोदयन् ॥ ६
शुशुभे वदनं तस्य सुदंष्ट्रं चारुलोचनम् ।
व्याकोशमिव विस्पष्टं पद्मं सूर्यविबोधितम् ॥ ७
मा कृथाः पुरुषव्याघ्र शोकं त्वं गात्रशोषणम् ।
न हि ते सुलभा भूयो ये हतास्मिन्रणाजिरे ॥ ८
स्वप्नलब्धा यथा लाभा वितथाः प्रतिबोधने ।
एवं ते क्षत्रिया राजन्ये व्यतीता महारणे ॥ ९
सर्वे ह्यभिमुखाः शूरा विगता रणशोभिनः ।
नैषां कश्चित्पृष्ठतो वा पलायन्वापि पातितः ॥ १०
सर्वे त्यक्त्वात्मनः प्राणान्युद्ध्वा वीरा महाहवे ।
शस्त्रपूता दिवं प्राप्ता न ताञ्शोचितुमर्हसि ॥ ११
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
सृञ्जयं पुत्रशोकार्तं यथायं प्राह नारदः ॥ १२
सुखदुःखैरहं त्वं च प्रजाः सर्वाश्च सृञ्जय ।
अविमुक्तं चरिष्यामस्तत्र का परिदेवना ॥ १३
महाभाग्यं परं राज्ञां कीर्त्यमानं मया शृणु ।
गच्छावधानं नृपते ततो दुःखं प्रहास्यसि ॥ १४
मृतान्महानुभावांस्त्वं श्रुत्वैव तु महीपतीन् ।
श्रुत्वापनय संतापं शृणु विस्तरशश्च मे ॥ १५
[१] आविक्षितं मरुत्तं मे मृतं सृञ्जय शुश्रुहि ।
यस्य सेन्द्राः सवरुणा बृहस्पतिपुरोगमाः ।
देवा विश्वसृजो राज्ञो यज्ञमीयुर्महात्मनः ॥ १६
यः स्पर्धामनयच्छक्रं देवराजं शतक्रतुम् ।
शक्रप्रियैषी यं विद्वान्प्रत्याचष्ट बृहस्पतिः ।
संवर्तो याजयामास यं पीडार्थं बृहस्पतेः ॥ १७
यस्मिन्प्रशासति सतां नृपतौ नृपसत्तम ।
अकृष्टपच्या पृथिवी विबभौ चैत्यमालिनी ॥ १८
आविक्षितस्य वै सत्रे विश्वे देवाः सभासदः ।
मरुतः परिवेष्टारः साध्याश्चासन्महात्मनः ॥ १९
मरुद्गणा मरुत्तस्य यत्सोममपिबन्त ते ।
देवान्मनुष्यान्गन्धर्वानत्यरिच्यन्त दक्षिणाः ॥ २०
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ २१
[२] सुहोत्रं चैद्वैतिथिनं मृतं सृञ्जय शुश्रुम ।
यस्मै हिरण्यं ववृषे मघवान्परिवत्सरम् ॥ २२
सत्यनामा वसुमती यं प्राप्यासीज्जनाधिप ।
हिरण्यमवहन्नद्यस्तस्मिञ्जनपदेश्वरे ॥ २३
कूर्मान्कर्कटकान्नक्रान्मकराञ्शिशुकानपि ।
नदीष्वपातयद्राजन्मघवा लोकपूजितः ॥ २४
हैरण्यान्पतितान्दृष्ट्वा मत्स्यान्मकरकच्छपान् ।
सहस्रशोऽथ शतशस्ततोऽस्मयत वैतिथिः ॥ २५
तद्धिरण्यमपर्यन्तमावृत्तं कुरुजाङ्गले ।
ईजानो वितते यज्ञे ब्राह्मणेभ्यः समाहितः ॥ २६
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।
अदक्षिणमयज्वानं श्वैत्य संशाम्य मा शुचः ॥ २७
[३] अङ्गं बृहद्रथं चैव मृतं शुश्रुम सृञ्जय ।
यः सहस्रं सहस्राणां श्वेतानश्वानवासृजत् ॥ २८
सहस्रं च सहस्राणां कन्या हेमविभूषिताः ।
ईजानो वितते यज्ञे दक्षिणामत्यकालयत् ॥ २९
शतं शतसहस्राणां वृषाणां हेममालिनाम् ।

गवां सहस्रानुचरं दक्षिणामत्यकालयन् ॥ ३०
अङ्गस्य यजमानस्य तदा विष्णुपदे गिरौ ।
अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ ३१
यस्य यज्ञेषु राजेन्द्र शतसंख्येषु वै पुनः ।
देवान्मनुष्यान्गन्धर्वानत्यरिच्यन्त दक्षिणाः ॥ ३२
न जातो जनिता चान्यः पुमान्यस्तत्प्रदास्यति ।
यदङ्गः प्रददौ वित्तं सोमसंस्थासु सप्तसु ॥ ३३
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ३४
[४] शिबिमौशीनरं चैव मृतं शुश्रुम सृञ्जय ।
य इमां पृथिवीं कृत्स्नां चर्मवत्समवेष्टयत् ॥ ३५
महता रथघोषेण पृथिवीमनुनादयन् ।
एकच्छत्रां महीं चक्रे जैत्रेणैकरथेन यः ॥ ३६
यावदद्य गवाश्वं स्यादारण्यैः पशुभिः सह ।
तावतीः प्रददौ गाः स शिबिरौशीनरोऽध्वरे ॥३७
नोद्यन्तारं धुरं तस्य कंचिन्मेने प्रजापतिः ।
न भूतं न भविष्यन्तं सर्वराजसु भारत ।
अन्यत्रौशीनराच्छैब्याद्राजर्षेरिन्द्रविक्रमात् ॥ ३८
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।
अदक्षिणमयज्वानं तं वै संशाम्य मा शुचः ॥ ३९
[५] भरतं चैव दौःषन्तिं मृतं सृञ्जय शुश्रुम ।
शाकुन्तलिं महेष्वासं भूरिद्रविणतेजसम् ॥ ४०
यो बद्ध्वा त्रिशतो ह्यश्वान्देवेभ्यो यमुनामनु ।
सरस्वतीं विंशतिं च गङ्गामनु चतुर्दश ॥ ४१
अश्वमेधसहस्रेण राजसूयशतेन च ।
इष्टवान्स महातेजा दौःषन्तिर्भरतः पुरा ॥ ४२
भरतस्य महत्कर्म सर्वराजसु पार्थिवाः ।
खं मर्त्या इव बाहुभ्यां नानुगन्तुमशक्नुवन् ॥ ४३
परं सहस्राद्यो बद्ध्वा हयान्वेदीं विचित्य च ।
सहस्रं यत्र पद्मानां कण्वाय भरतो ददौ ॥ ४४
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ४५
[६] रामं दाशरथिं चैव मृतं शुश्रुम सृञ्जय ।
योऽन्वकम्पत वै नित्यं प्रजाः पुत्रानिवौरसान् ॥४६
विधवा यस्य विषये नानाथाः काश्चनाभवन् ।
सर्वस्यासीत्पितृसमो रामो राज्यं यदान्वशात् ॥४७
कालवर्षाश्च पर्जन्याः सस्यानि रसवन्ति च ।
नित्यं सुभिक्षमेवासीद्रामे राज्यं प्रशासति ॥ ४८
प्राणिनो नाप्सु मज्जन्ति नानर्थे पावकोऽदहत् ।
न व्यालजं भयं चासीद्रामे राज्यं प्रशासति ॥४९
आसन्वर्षसहस्राणि तथा पुत्रसहस्रिकाः ।
अरोगाः सर्वसिद्धार्थाः प्रजा रामे प्रशासति ॥५०
नान्योन्येन विवादोऽभूत्स्त्रीणामपि कुतो नृणाम् ।
धर्मनित्याः प्रजाश्चासन्रामे राज्यं प्रशासति ॥ ५१
नित्यपुष्पफलाश्चैव पादपा निरुपद्रवाः ।
सर्वा द्रोणदुघा गावो रामे राज्यं प्रशासति ॥ ५२
स चतुर्दश वर्षाणि वने प्रोष्य महातपाः ।
दशाश्वमेधाञ्जारूथ्यानाजहार निरर्गलान् ॥ ५३
श्यामो युवा लोहिताक्षो मत्तवारणविक्रमः ।
दश वर्षसहस्राणि रामो राज्यमकारयत् ॥ ५४
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ५५
[७] भगीरथं च राजानं मृतं शुश्रुम सृञ्जय ।
यस्येन्द्रो वितते यज्ञे सोमं पीत्वा मदोत्कटः ॥ ५६
असुराणां सहस्राणि बहूनि सुरसत्तमः ।
अजयद्बाहुवीर्येण भगवान्पाकशासनः ॥ ५७
यः सहस्रं सहस्राणां कन्या हेमविभूषिताः ।
ईजानो वितते यज्ञे दक्षिणामत्यकालयत् ॥ ५८
सर्वा रथगताः कन्या रथाः सर्वे चतुर्युजः ।

रथे रथे शतं नागाः पद्मिनो हेममालिनः ॥ ५९
सहस्रमश्वा एकैकं हस्तिनं पृष्ठतोऽन्वयुः ।
गवां सहस्रमश्वेऽश्वे सहस्रं गव्यजाविकम् ॥ ६०
उपह्वरे निवसतो यस्याङ्के निषसाद ह ।
गङ्गा भागीरथी तस्मादुर्वशी ह्यभवत्पुरा ॥ ६१
भूरिदक्षिणमिक्ष्वाकुं यजमानं भगीरथम् ।
त्रिलोकपथगा गङ्गा दुहितृत्वमुपेयुषी ॥ ६२
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ६३
[८] दिलीपं चैवैलविलं मृतं शुश्रुम सृञ्जय ।
यस्य कर्माणि भूरीणि कथयन्ति द्विजातयः ॥ ६४
इमां वै वसुसंपन्नां वसुधां वसुधाधिपः ।
ददौ तस्मिन्महायज्ञे ब्राह्मणेभ्यः समाहितः ॥ ६५
तस्येह यजमानस्य यज्ञे यज्ञे पुरोहितः ।
सहस्रं वारणान्हैमान्दक्षिणामत्यकालयत् ॥ ६६
यस्य यज्ञे महानासीद्यूपः श्रीमान्हिरण्मयः ।
तं देवाः कर्म कुर्वाणाः शक्रज्येष्ठा उपाश्रयन् ॥ ६७
चषालो यस्य सौवर्णस्तस्मिन्यूपे हिरण्मये ।
ननृतुर्देवगन्धर्वाः षट्सहस्राणि सप्तधा ॥ ६८
अवादयत्तत्र वीणां मध्ये विश्वावसुः स्वयम् ।
सर्वभूतान्यमन्यन्त मम वादयतीत्ययम् ॥ ६९
एतद्राज्ञो दिलीपस्य राजानो नानुचक्रिरे ।
यत्स्त्रियो हेमसंपन्नाः पथि मत्ताः स्म शेरते ॥७०
राजानमुग्रधन्वानं दिलीपं सत्यवादिनम् ।
येऽपश्यन्सुमहात्मानं तेऽपि स्वर्गजितो नराः ॥७१
त्रयः शब्दा न जीर्यन्ते दिलीपस्य निवेशने ।
स्वाध्यायघोषो ज्याघोषो दीयतामिति चैव हि ॥७२
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ७३
[९] मांधातारं यौवनाश्वं मृतं शुश्रुम सृञ्जय ।
यं देवा मरुतो गर्भं पितुः पार्श्वादपाहरन् ॥ ७४
संवृद्धो युवनाश्वस्य जठरे यो महात्मनः ।
पृषदाज्योद्भवः श्रीमांस्त्रिलोकविजयी नृप ॥ ७५
यं दृष्ट्वा पितुरुत्सङ्गे शयानं देवरूपिणम् ।
अन्योन्यमब्रुवन्देवाः कमयं धास्यतीति वै ॥ ७६
मामेव धास्यतीत्येवमिन्द्रो अभ्यवपद्यत ।
मांधातेति ततस्तस्य नाम चक्रे शतक्रतुः ॥ ७७
ततस्तु पयसो धारां पुष्टिहेतोर्महात्मनः ।
तस्यास्ये यौवनाश्वस्य पाणिरिन्द्रस्य चास्रवत् ॥७८
तं पिबन्पाणिमिन्द्रस्य समामह्ना व्यवर्धत ।
स आसीद्द्वादशसमो द्वादशाहेन पार्थिव ॥ ७९
तमियं पृथिवी सर्वा एकाह्ना समपद्यत ।
धर्मात्मानं महात्मानं शूरमिन्द्रसमं युधि ॥ ८०
य आङ्गारं हि नृपतिं मरुत्तमसितं गयम् ।
अङ्गं बृहद्रथं चैव मांधाता समरेऽजयत् ॥ ८१
यौवनाश्वो यदाङ्गारं समरे समयोधयत् ।
विस्फारैर्धनुषो देवा द्यौरभेदीति मेनिरे ॥ ८२
यतः सूर्य उदेति स्म यत्र च प्रतितिष्ठति ।
सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ॥ ८३
अश्वमेधशतेनेष्ट्वा राजसूयशतेन च ।
अददाद्रोहितान्मत्स्यान्ब्राह्मणेभ्यो महीपतिः ॥ ८४
हैरण्यान्योजनोत्सेधानायतान्दशयोजनम् ।
अतिरिक्तान्द्विजातिभ्यो व्यभजन्नितरे जनाः ॥८५
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ८६
[१०] ययातिं नाहुषं चैव मृतं शुश्रुम सृञ्जय ।
य इमां पृथिवीं सर्वां विजित्य सहसागराम् ॥ ८७
शम्यापातेनाभ्यतीयाद्वेदीभिश्चित्रयन्नृप ।
ईजानः क्रतुभिः पुण्यैः पर्यगच्छद्वसुंधराम् ॥ ८८
इष्ट्वा क्रतुसहस्रेण वाजिमेधशतेन च ।

तर्पयामास देवेन्द्रं त्रिभिः काञ्चनपर्वतैः ॥ ८९
व्यूढे देवासुरे युद्धे हत्वा दैतेयदानवान् ।
अभजत्पृथिवीं कृत्स्नां ययातिर्नहुषात्मजः ॥ ९०
अन्त्येषु पुत्रान्निक्षिप्य यदुद्रुह्युपुरोगमान् ।
पूरुं राज्येऽभिषिच्य स्वे सदारः प्रस्थितो वनम् ॥ ९१
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥९२
[११] अम्बरीषं च नाभागं मृतं शुश्रुम सृञ्जय ।
यं प्रजा वव्रिरे पुण्यं गोप्तारं नृपसत्तम ॥ ९३
यः सहस्रं सहस्राणां राज्ञामयुत याजिनाम् ।
ईजानो वितते यज्ञे ब्राह्मणेभ्यः समाहितः ॥ ९४
नैतत्पूर्वं जनाश्चक्रुर्न करिष्यन्ति चापरे ।
इत्यम्बरीषं नाभागमन्वमोदन्त दक्षिणाः ॥ ९५
शतं राजसहस्राणि शतं राजशतानि च ।
सर्वेऽश्वमेधैरीजानास्तेऽभ्ययुर्दक्षिणायनम् ॥ ९६
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ९७
[१२] शशबिन्दुं चैत्ररथं मृतं शुश्रुम सृञ्जय ।
यस्य भार्यासहस्राणां शतमासीन्महात्मनः ॥ ९८
सहस्रं तु सहस्राणां यस्यासञ्शाशबिन्दवः ।
हिरण्यकवचाः सर्वे सर्वे चोत्तमधन्विनः ॥ ९९
शतं कन्या राजपुत्रमेकैकं पृष्ठतोऽन्वयुः ।
कन्यां कन्यां शतं नागा नागं नागं शतं रथाः ॥१००
रथं रथं शतं चाश्वा देशजा हेममालिनः ।
अश्वमश्वं शतं गावो गां गां तद्वदजाविकम् ॥१०१
एतद्धनमपर्यन्तमश्वमेधे महामखे ।
शशबिन्दुर्महाराज ब्राह्मणेभ्यः समादिशत् ॥ १०२
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १०३
[१३] गयमामूर्तरयसं मृतं शुश्रुम सृञ्जय ।
यः स वर्षशतं राजा हुतशिष्टाशनोऽभवत् ॥ १०४
यस्मै वह्निर्वरान्प्रादात्ततो वव्रे वरान्गयः ।
ददतो मेऽक्षया चास्तु धर्मे श्रद्धा च वर्धताम् ॥१०५
मनो मे रमतां सत्ये त्वत्प्रसादाद्धुताशन ।
लेभे च कामांस्तान्सर्वान्पावकादिति नः श्रुतम् ॥
दर्शेन पौर्णमासेन चातुर्मास्यैः पुनः पुनः ।
अयजत्स महातेजाः सहस्रं परिवत्सरान् ॥ १०७
शतं गवां सहस्राणि शतमश्वशतानि च ।
उत्थायोत्थाय वै प्रादात्सहस्रं परिवत्सरान् ॥१०८
तर्पयामास सोमेन देवान्वित्तैर्द्विजानपि ।
पितॄन्स्वधाभिः कामैश्च स्त्रियः स्वाः पुरुषर्षभ ॥
सौवर्णां पृथिवीं कृत्वा दशव्यामां द्विरायताम् ।
दक्षिणामददद्राजा वाजिमेधमहामखे ॥ ११०
यावत्यः सिकता राजन्गङ्गायाः पुरुषर्षभ ।
तावतीरेव गाः प्रादादामूर्तरयसो गयः ॥ १११
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ११२
[१४] रन्तिदेवं च साङ्कृत्यं मृतं शुश्रुम सृञ्जय ।
सम्यगाराध्य यः शक्रं वरं लेभे महायशाः ॥११३
अन्नं च नो बहु भवेदतिथींश्च लभेमहि ।
श्रद्धा च नो मा व्यगमन्मा च याचिष्म कंचन ॥
उपातिष्ठन्त पशवः स्वयं तं संशितव्रतम् ।
ग्राम्यारण्या महात्मानं रन्तिदेवं यशस्विनम् ॥११५
महानदी चर्मराशेरुत्क्लेदात्सुस्रुवे यतः ।
ततश्चर्मण्वतीत्येवं विख्याता सा महानदी ॥ ११६
ब्राह्मणेभ्यो ददौ निष्कान्सदसि प्रतते नृपः ।
तुभ्यं तुभ्यं निष्कमिति यत्राक्रोशन्ति वै द्विजाः ।
सहस्रं तुभ्यमित्युक्त्वा ब्राह्मणान्स्म प्रपद्यते ॥११७
अन्वाहार्योपकरणं द्रव्योपकरणं च यत् ।
घटाः स्थाल्यः कटाहाश्च पात्र्यश्च पिठरा अपि ।

न तत्किंचिदसौवर्णं रन्तिदेवस्य धीमतः ॥ ११८
साङ्कृते रन्तिदेवस्य यां रात्रिमवसद्गृहे ।
आलभ्यन्त शतं गावः सहस्राणि च विंशतिः ॥११९
तत्र स्म सूदाः क्रोशन्ति सुमृष्टमणिकुण्डलाः ।
सूपभूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा ॥ १२०
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १२१
[१५] सगरं च महात्मानं मृतं शुश्रुम सृञ्जय ।
ऐक्ष्वाकं पुरुषव्याघ्रमतिमानुषविक्रमम् ॥ १२२
षष्टिः पुत्रसहस्राणि यं यान्तं पृष्ठतोऽन्वयुः ।
नक्षत्रराजं वर्षान्ते व्यभ्रे ज्योतिर्गणा इव ॥ १२३
एकच्छत्रा मही यस्य प्रणता ह्यभवत्पुरा ।
योऽश्वमेधसहस्रेण तर्पयामास देवताः ॥ १२४
यः प्रादात्काञ्चनस्तम्भं प्रासादं सर्वकाञ्चनम् ।
पूर्णं पद्मदलाक्षीणां स्त्रीणां शयनसंकुलम् ॥ १२५
द्विजातिभ्योऽनुरूपेभ्यः कामानुच्चावचांस्तथा ।
यस्यादेशेन तद्वित्तं व्यभजन्त द्विजातयः ॥ १२६
खानयामास यः कोपात्पृथिवीं सागराङ्किताम् ।
यस्य नाम्ना समुद्रश्च सागरत्वमुपागतः ॥ १२७
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १२८
[१६] राजानं च पृथुं वैन्यं मृतं शुश्रुम सृञ्जय ।
यमभ्यषिञ्चन्संभूय महारण्ये महर्षयः ॥ १२९
प्रथयिष्यति वै लोकान्पृथुरित्येव शब्दितः ।
क्षताच्च नस्त्रायतीति स तस्मात्क्षत्रियः स्मृतः ॥१३०
पृथुं वैन्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् ।
ततो राजेति नामास्य अनुरागादजायत ॥ १३१
अकृष्टपच्या पृथिवी पुटके पुटके मधु ।
सर्वा द्रोणदुघा गावो वैन्यस्यासन्प्रशासतः ॥१३२
अरोगाः सर्वसिद्धार्था मनुष्या अकुतोभयाः ।
यथाभिकाममवसन्क्षेत्रेषु च गृहेषु च ॥ १३३
आपः संस्तम्भिरे यस्य समुद्रस्य वियासतः ।
सरितश्चानुदीर्यन्त ध्वजसङ्गश्च नाभवत् ॥ १३४
हैरण्यांस्त्रिनलोत्सेधान्पर्वतानेकविंशतिम् ।
ब्राह्मणेभ्यो ददौ राजा योऽश्वमेधे महामखे ॥ १३५
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १३६

किं वै तूष्णीं ध्यायसि सृञ्जय त्वं
न मे राजन्वाचमिमां शृणोषि ।
न चेन्मोघं विप्रलप्तं मयेदं
पथ्यं मुमूर्षोरिव सम्यगुक्तम् ॥ १३७

सृञ्जय उवाच ।

शृणोमि ते नारद वाचमेतां
विचित्रार्थां स्रजमिव पुण्यगन्धाम् ।
राजर्षीणां पुण्यकृतां महात्मनां
कीर्त्या युक्तां शोकनिर्णाशनार्थम् ॥ १३८
न ते मोघं विप्रलप्तं महर्षे
दृष्ट्वैव त्वां नारदाहं विशोकः ।
शुश्रूषे ते वचनं ब्रह्मवादि-
न्न ते तृप्याम्यमृतस्येव पानात् ॥ १३९
अमोघदर्शिन्मम चेत्प्रसादं
सुताघदग्धस्य विभो प्रकुर्याः ।
मृतस्य संजीवनमद्य मे स्या-
त्तव प्रसादात्सुतसंगमश्च ॥ १४०

नारद उवाच ।

यस्ते पुत्रो दयितोऽयं वियातः
स्वर्णष्ठीवी यमदात्पर्वतस्ते ।
पुनस्ते तं पुत्रमहं ददामि
हिरण्यनाभं वर्षसहस्रिणं च ॥ १४१

इति श्रीमहाभारते शान्तिपर्वणि एकोनत्रिंशोऽध्यायः ॥

३०

युधिष्ठिर उवाच ।

स कथं काञ्चनष्ठीवी सृञ्जयस्य सुतोऽभवत् ।
पर्वतेन किमर्थं च दत्तः केन ममार च ॥ १
यदा वर्षसहस्रायुस्तदा भवति मानवः ।
कथमप्राप्तकौमारः सृञ्जयस्य सुतो मृतः ॥ २
उताहो नाममात्रं वै सुवर्णष्ठीविनोऽभवत् ।
तथ्यं वा काञ्चनष्ठीवीत्येतदिच्छामि वेदितुम् ॥ ३

वासुदेव उवाच ।

अत्र ते कथयिष्यामि यथा वृत्तं जनेश्वर ।
नारदः पर्वतश्चैव प्रागृषी लोकपूजितौ ॥ ४
मातुलो भागिनेयश्च देवलोकादिहागतौ ।
विहर्तुकामौ संप्रीत्या मानुष्येषु पुरा प्रभू ॥ ५
हविःपवित्रभोज्येन देवभोज्येन चैव ह ।
नारदो मातुलश्चैव भागिनेयश्च पर्वतः ॥ ६
तावुभौ तपसोपेताववनीतलचारिणौ ।
भुञ्जानौ मानुषान्भोगान्यथावत्पर्यधावताम् ॥ ७
प्रीतिमन्तौ मुदा युक्तौ समयं तत्र चक्रतुः ।
यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः ।
अन्योन्यस्य स आख्येयो मृषा शापोऽन्यथा भवेत् ॥
तौ तथेति प्रतिज्ञाय महर्षी लोकपूजितौ ।
सृञ्जयं श्वैत्यमभ्येत्य राजानमिदमूचतुः ॥ ९
आवां भवति वत्स्यावः कंचित्कालं हिताय ते ।
यथावत्पृथिवीपाल आवयोः प्रगुणीभव ।
तथेति कृत्वा तौ राजा सत्कृत्योपचचार ह ॥ १०
ततः कदाचित्तौ राजा महात्मानौ तथागतौ ।
अब्रवीत्परमप्रीतः सुतेयं वरवर्णिनी ॥ ११
एकैव मम कन्यैषा युवां परिचरिष्यति ।
दर्शनीयानवद्याङ्गी शीलवृत्तसमन्विता ।
सुकुमारी कुमारी च पद्मकिञ्जल्कसंनिभा ॥ १२
परमं सौम्य इत्युक्तस्ताभ्यां राजा शशास ताम् ।
कन्ये विप्रावुपचर देववत्पितृवच्च ह ॥ १३
सा तु कन्या तथेत्युक्त्वा पितरं धर्मचारिणी ।
यथानिदेशं राज्ञस्तौ सत्कृत्योपचचार ह ॥ १४
तस्यास्तथोपचारेण रूपेणाप्रतिमेन च ।
नारदं हृच्छयस्तूर्णं सहसैवान्वपद्यत ॥ १५
ववृधे च ततस्तस्य हृदि कामो महात्मनः ।
यथा शुक्लस्य पक्षस्य प्रवृत्तावुडुराट्छनैः ॥ १६
न च तं भागिनेयाय पर्वताय महात्मने ।
शशंस मन्मथं तीव्रं व्रीडमानः स धर्मवित् ॥१७
तपसा चेङ्गितेनाथ पर्वतोऽथ बुबोध तत् ।
कामार्तं नारदं क्रुद्धः शशापैनं ततो भृशम् ॥ १८
कृत्वा समयमव्यग्रो भवान्वै सहितो मया ।
यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः ॥ १९
अन्योन्यस्य स आख्येय इति तद्वै मृषा कृतम् ।
भवता वचनं ब्रह्मंस्तस्मादेतद्वदाम्यहम् ॥ २०
न हि कामं प्रवर्तन्तं भवानाचष्ट मे पुरा ।
सुकुमार्यां कुमार्यां ते तस्मादेष शपाम्यहम् ॥ २१
ब्रह्मवादी गुरुर्यस्मात्तपस्वी ब्राह्मणश्च सन् ।
अकार्षीः समयभ्रंशमावाभ्यां यः कृतो मिथः ॥२२
शप्स्ये तस्मात्सुसंक्रुद्धो भवन्तं तं निबोध मे ।
सुकुमारी च ते भार्या भविष्यति न संशयः ॥२३
वानरं चैव कन्या त्वां विवाहात्प्रभृति प्रभो ।
संद्रक्ष्यन्ति नराश्चान्ये स्वरूपेण विनाकृतम् ॥ २४
स तद्वाक्यं तु विज्ञाय नारदः पर्वतात्तदा ।
अशपत्तमपि क्रोधाद्भागिनेयं स मातुलः ॥ २५
तपसा ब्रह्मचर्येण सत्येन च दमेन च ।
युक्तोऽपि धर्मनित्यश्च न स्वर्गवासमाप्स्यसि ॥ २६
तौ तु शप्त्वा भृशं क्रुद्धौ परस्परममर्षणौ ।
प्रतिजग्मतुरन्योन्यं क्रुद्धाविव गजोत्तमौ ॥ २७

पर्वतः पृथिवीं कृत्स्नां विचचार महामुनिः ।
पूज्यमानो यथान्यायं तेजसा स्वेन भारत ॥ २८
अथ तामलभत्कन्यां नारदः सृञ्जयात्मजाम् ।
धर्मेण धर्मप्रवरः सुकुमारीमनिन्दिताम् ॥ २९
सा तु कन्या यथाशापं नारदं तं ददर्श ह ।
पाणिग्रहणमन्त्राणां प्रयोगादेव वानरम् ॥ ३०
सुकुमारी च देवर्षिं वानरप्रतिमाननम् ।
नैवावमन्यत तदा प्रीतिमत्येव चाभवत् ॥ ३१
उपतस्थे च भर्तारं न चान्यं मनसाप्यगात् ।
देवं मुनिं वा यक्षं वा पतित्वे पतिवत्सला ॥ ३२
ततः कदाचिद्भगवान्पर्वतोऽनुससार ह ।
वनं विरहितं किंचित्तत्रापश्यत्स नारदम् ॥ ३३
ततोऽभिवाद्य प्रोवाच नारदं पर्वतस्तदा ।
भवान्प्रसादं कुरुतां स्वर्गादेशाय मे प्रभो ॥ ३४
तमुवाच ततो दृष्ट्वा पर्वतं नारदस्तदा ।
कृताञ्जलिमुपासीनं दीनं दीनतरः स्वयम् ॥ ३५
त्वयाहं प्रथमं शप्तो वानरस्त्वं भविष्यसि ।
इत्युक्तेन मया पश्चाच्छप्तस्त्वमपि मत्सरात् ।
अद्यप्रभृति वै वासं स्वर्गे नावाप्स्यसीति ह ॥ ३६
तव नैतद्धि सदृशं पुत्रस्थाने हि मे भवान् ।
निवर्तयेतां तौ शापमन्योऽन्येन तदा मुनी ॥ ३७
श्रीसमृद्धं तदा दृष्ट्वा नारदं देवरूपिणम् ।
सुकुमारी प्रदुद्राव परपत्यभिशङ्कया ॥ ३८
तां पर्वतस्ततो दृष्ट्वा प्रद्रवन्तीमनिन्दिताम् ।
अब्रवीत्तव भर्तैष नात्र कार्या विचारणा ॥ ३९
ऋषिः परमधर्मात्मा नारदो भगवान्प्रभुः ।
तवैवाभेद्यहृदयो मा ते भूदत्र संशयः ॥ ४०
सानुनीता बहुविधं पर्वतेन महात्मना ।
शापदोषं च तं भर्तुः श्रुत्वा स्वां प्रकृतिं गता ।
पर्वतोऽथ ययौ स्वर्गं नारदोऽथ ययौ गृहान् ॥ ४१
प्रत्यक्षकर्मा सर्वस्य नारदोऽयं महानृषिः ।
एष वक्ष्यति वै पृष्टो यथा वृत्तं नरोत्तम ॥ ४२

इति श्रीमहाभारते शान्तिपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

वैशंपायन उवाच ।

ततो राजा पाण्डुसुतो नारदं प्रत्यभाषत ।
भगवञ्श्रोतुमिच्छामि सुवर्णष्ठीविसंभवम् ॥ १
एवमुक्तः स च मुनिर्धर्मराजेन नारदः ।
आचचक्षे यथा वृत्तं सुवर्णष्ठीविनं प्रति ॥ २
एवमेतन्महाराज यथायं केशवोऽब्रवीत् ।
कार्यस्यास्य तु यच्छेषं तत्ते वक्ष्यामि पृच्छतः ॥ ३
अहं च पर्वतश्चैव स्वस्रीयो मे महामुनिः ।
वस्तुकामावभिगतौ सृञ्जयं जयतां वरम् ॥ ४
तत्र संपूजितौ तेन विधिदृष्टेन कर्मणा ।
सर्वकामैः सुविहितौ निवसावोऽस्य वेश्मनि ॥ ५
व्यतिक्रान्तासु वर्षासु समये गमनस्य च ।
पर्वतो मामुवाचेदं काले वचनमर्थवत् ॥ ६
आवामस्य नरेन्द्रस्य गृहे परमपूजितौ ।
उषितौ समये ब्रह्मंश्चिन्त्यतामत्र सांप्रतम् ॥ ७
ततोऽहमब्रुवं राजन्पर्वतं शुभदर्शनम् ।
सर्वमेतत्त्वयि विभो भागिनेयोपपद्यते ॥ ८
वरेण छन्द्यतां राजा लभतां यद्यदिच्छति ।
आवयोस्तपसा सिद्धिं प्राप्नोतु यदि मन्यसे ॥ ९
तत आहूय राजानं सृञ्जयं शुभदर्शनम् ।
पर्वतोऽनुमतं वाक्यमुवाच मुनिपुंगवः ॥ १०
प्रीतौ स्वो नृप सत्कारैस्तव ह्यार्जवसंभृतैः ।
आवाभ्यामभ्यनुज्ञातो वरं नृवर चिन्तय ॥ ११
देवानामविहिंसायां यद्भवेन्मानुषक्षमम् ।
तद्गृहाण महाराज पूजार्हो नौ मतो भवान् ॥ १२

सृञ्जय उवाच ।

प्रीतौ भवन्तौ यदि मे कृतमेतावता मम ।
एष एव परो लाभो निर्वृत्तो मे महाफलः ॥ १३

नारद उवाच ।

तमेवंवादिनं भूयः पर्वतः प्रत्यभाषत ।
वृणीष्व राजन्संकल्पो यस्ते हृदि चिरं स्थितः ॥ १४

सृञ्जय उवाच ।

अभीप्सामि सुतं वीरं वीर्यवन्तं दृढव्रतम् ।
आयुष्मन्तं महाभागं देवराजसमद्युतिम् ॥ १५

पर्वत उवाच ।

भविष्यत्येष ते कामो न त्वायुष्मान्भविष्यति ।
देवराजाभिभूत्यर्थं संकल्पो ह्येष ते हृदि ॥ १६
सुवर्णष्ठीवनाच्चैव स्वर्णष्ठीवी भविष्यति ।
रक्ष्यश्च देवराजात्स देवराजसमद्युतिः ॥ १७

नारद उवाच ।

तच्छ्रुत्वा सृञ्जयो वाक्यं पर्वतस्य महात्मनः ।
प्रसादयामास तदा नैतदेवं भवेदिति ॥ १८
आयुष्मान्मे भवेत्पुत्रो भवतस्तपसा मुने ।
न च तं पर्वतः किंचिदुवाचेन्द्रव्यपेक्षया ॥ १९
तमहं नृपतिं दीनमब्रुवं पुनरेव तु ।
स्मर्तव्योऽहं महाराज दर्शयिष्यामि ते स्मृतः ॥ २०
अहं ते दयितं पुत्रं प्रेतराजवशं गतम् ।
पुनर्दास्यामि तद्रूपं मा शुचः पृथिवीपते ॥ २१
एवमुक्त्वा तु नृपतिं प्रयातौ स्वो यथेप्सितम् ।
सृञ्जयश्च यथाकामं प्रविवेश स्वमन्दिरम् ॥ २२
सृञ्जयस्याथ राजर्षेः कस्मिंश्चित्कालपर्यये ।
जज्ञे पुत्रो महावीर्यस्तेजसा प्रज्वलन्निव ॥ २३
ववृधे स यथाकालं सरसीव महोत्पलम् ।
बभूव काञ्चनष्ठीवी यथार्थं नाम तस्य तत् ॥ २४
तदद्भुततमं लोके पप्रथे कुरुसत्तम ।
बुबुधे तच्च देवेन्द्रो वरदानं महात्मनोः ॥ २५
ततस्त्वभिभवाद्भीतो बृहस्पतिमते स्थितः ।
कुमारस्यान्तरप्रेक्षी बभूव बलवृत्रहा ॥ २६
चोदयामास वज्रं स दिव्यास्त्रं मूर्तिसंस्थितम् ।
व्याघ्रो भूत्वा जहीमं त्वं राजपुत्रमिति प्रभो ॥ २७
विवृद्धः किल वीर्येण मामेषोऽभिभविष्यति ।
सृञ्जयस्य सुतो वज्र यथैनं पर्वतो ददौ ॥ २८
एवमुक्तस्तु शक्रेण वज्रः परपुरंजयः ।
कुमारस्यान्तरप्रेक्षी नित्यमेवान्वपद्यत ॥ २९
सृञ्जयोऽपि सुतं प्राप्य देवराजसमद्युतिम् ।
हृष्टः सान्तःपुरो राजा वननित्योऽभवत्तदा ॥ ३०
ततो भागीरथीतीरे कदाचिद्वननिर्झरे ।
धात्रीद्वितीयो बालः स क्रीडार्थं पर्यधावत ॥ ३१
पञ्चवर्षकदेशीयो बालो नागेन्द्रविक्रमः ।
सहसोत्पतितं व्याघ्रमाससाद महाबलः ॥ ३२
तेन चैव विनिष्पिष्टो वेपमानो नृपात्मजः ।
व्यसुः पपात मेदिन्यां ततो धात्री विचुक्रुशे ॥ ३३
हत्वा तु राजपुत्रं स तत्रैवान्तरधीयत ।
शार्दूलो देवराजस्य माययान्तर्हितस्तदा ॥ ३४
धात्र्यास्तु निनदं श्रुत्वा रुदत्याः परमार्तवत् ।
अभ्यधावत तं देशं स्वयमेव महीपतिः ॥ ३५
स ददर्श गतासुं तं शयानं पीतशोणितम् ।
कुमारं विगतानन्दं निशाकरमिव च्युतम् ॥ ३६
स तमुत्सङ्गमारोप्य परिपीडितवक्षसम् ।
पुत्रं रुधिरसंसिक्तं पर्यदेवयदातुरः ॥ ३७
ततस्ता मातरस्तस्य रुदन्त्यः शोककर्शिताः ।
अभ्यधावन्त तं देशं यत्र राजा स सृञ्जयः ॥ ३८
ततः स राजा सस्मार मामन्तर्गतमानसः ।
तच्चाहं चिन्तितं ज्ञात्वा गतवांस्तस्य दर्शनम् ॥ ३९

स मय्यैतानि वाक्यानि श्रावितः शोकलालसः ।
यानि ते यदुवीरेण कथितानि महीपते ॥ ४०
संजीवितश्चापि मया वासवानुमते तदा ।
भवितव्यं तथा तच्च न तच्छक्यमतोऽन्यथा ॥४१
अत ऊर्ध्वं कुमारः स स्वर्णष्ठीवी महायशाः ।
चित्तं प्रसादयामास पितुर्मातुश्च वीर्यवान् ॥ ४२
कारयामास राज्यं स पितरि स्वर्गते विभुः ।
वर्षाणामेकशतवत्सहस्रं भीमविक्रमः ॥ ४३
तत इष्ट्वा महायज्ञैर्बहुभिर्भूरिदक्षिणैः ।
तर्पयामास देवांश्च पितॄंश्चैव महाद्युतिः ॥ ४४
उत्पाद्य च बहून्पुत्रान्कुलसंतानकारिणः ।
कालेन महता राजन्कालधर्ममुपेयिवान् ॥ ४५
स त्वं राजेन्द्र संजातं शोकमेतन्निवर्तय ।
यथा त्वां केशवः प्राह व्यासश्च सुमहातपाः ॥४६
पितृपैतामहं राज्यमास्थाय धुरमुद्वह ।
इष्ट्वा पुण्यैर्महायज्ञैरिष्टाँल्लोकानवाप्स्यसि ॥ ४७

इति श्रीमहाभारते शान्तिपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

वैशंपायन उवाच ।

तूष्णींभूतं तु राजानं शोचमानं युधिष्ठिरम् ।
तपस्वी धर्मतत्त्वज्ञः कृष्णद्वैपायनोऽब्रवीत् ॥ १
प्रजानां पालनं धर्मो राज्ञां राजीवलोचन ।
धर्मः प्रमाणं लोकस्य नित्यं धर्मानुवर्तनम् ॥ २
अनुतिष्ठस्व वै राजन्पितृपैतामहं पदम् ।
ब्राह्मणेषु च यो धर्मः स नित्यो वेदनिश्चितः ॥ ३
तत्प्रमाणं प्रमाणानां शाश्वतं भरतर्षभ ।
तस्य धर्मस्य कृत्स्नस्य क्षत्रियः परिरक्षिता ॥ ४
तथा यः प्रतिहन्त्यस्य शासनं विषये नरः ।
स बाहुभ्यां विनिग्राह्यो लोकयात्राविघातकः ॥ ५
प्रमाणमप्रमाणं यः कुर्यान्मोहवशं गतः ।
भृत्यो वा यदि वा पुत्रस्तपस्वी वापि कश्चन ।
पापान्सर्वैरुपायैस्तान्नियच्छेद्धातयेत वा ॥ ६
अतोऽन्यथा वर्तमानो राजा प्राप्नोति किल्बिषम् ।
धर्मं विनश्यमानं हि यो न रक्षेत्स धर्महा ॥ ७
ते त्वया धर्महन्तारो निहताः सपदानुगाः ।
स्वधर्मे वर्तमानस्त्वं किं नु शोचसि पाण्डव ।
राजा हि हन्याद्दद्याच्च प्रजा रक्षेच्च धर्मतः ॥ ८

युधिष्ठिर उवाच ।

न तेऽभिशङ्के वचनं यद्ब्रवीषि तपोधन ।
अपरोक्षो हि ते धर्मः सर्वधर्मभृतां वर ॥ ९
मया ह्यवध्या बहवो घातिता राज्यकारणात् ।
तान्यकार्याणि मे ब्रह्मन्दहन्ति च तपन्ति च ॥१०

व्यास उवाच ।

ईश्वरो वा भवेत्कर्ता पुरुषो वापि भारत ।
हठो वा वर्तते लोके कर्मजं वा फलं स्मृतम् ॥११
ईश्वरेण नियुक्ता हि साध्वसाधु च पार्थिव ।
कुर्वन्ति पुरुषाः कर्म फलमीश्वरगामि तत् ॥ १२
यथा हि पुरुषश्छिन्द्याद्वृक्षं परशुना वने ।
छेत्तुरेव भवेत्पापं परशोर्न कथंचन ॥ १३
अथ वा तदुपादानात्प्राप्नुयुः कर्मणः फलम् ।
दण्डशस्त्रकृतं पापं पुरुषे तन्न विद्यते ॥ १४
न चैतदिष्टं कौन्तेय यदन्येन फलं कृतम् ।
प्राप्नुयादिति तस्माच्च ईश्वरे तन्निवेशय ॥ १५
अथ वा पुरुषः कर्ता कर्मणोः शुभपापयोः ।
न परं विद्यते तस्मादेवमन्यच्छुभं कुरु ॥ १६
न हि कश्चित्क्वचिद्राजन्दिष्टात्प्रतिनिवर्तते ।
दण्डशस्त्रकृतं पापं पुरुषे तन्न विद्यते ॥ १७
यदि वा मन्यसे राजन्हठे लोकं प्रतिष्ठितम् ।
एवमप्यशुभं कर्म न भूतं न भविष्यति ॥ १८

यथाभिपत्तिर्लोकस्य कर्तव्या शुभपापयोः ।
अभिपन्नतमं लोके राज्ञामुद्यतदण्डनम् ॥ १९
यथापि लोके कर्माणि समावर्तन्त भारत ।
शुभाशुभफलं चेमे प्राप्नुवन्तीति मे मतिः ॥ २०
एवं सत्यं शुभादेशं कर्मणस्तत्फलं ध्रुवम् ।
त्यज तद्राजशार्दूल मैवं शोके मनः कृथाः ॥ २१
स्वधर्मे वर्तमानस्य सापवादेऽपि भारत ।
एवमात्मपरित्यागस्तव राजन्न शोभनः ॥ २२
विहितानीह कौन्तेय प्रायश्चित्तानि कर्मिणाम् ।
शरीरवांस्तानि कुर्यादशरीरः पराभवेत् ॥ २३
तद्राजञ्जीवमानस्त्वं प्रायश्चित्तं चरिष्यसि ।
प्रायश्चित्तमकृत्वा तु प्रेत्य तप्तासि भारत ॥ २४

इति श्रीमहाभारते शान्तिपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

युधिष्ठिर उवाच ।

हताः पुत्राश्च पौत्राश्च भ्रातरः पितरस्तथा ।
श्वशुरा गुरवश्चैव मातुलाः सपितामहाः ॥ १
क्षत्रियाश्च महात्मानः संबन्धिसुहृदस्तथा ।
वयस्या ज्ञातयश्चैव भ्रातरश्च पितामह ॥ २
बहवश्च मनुष्येन्द्रा नानादेशसमागताः ।
घातिता राज्यलुब्धेन मयैकेन पितामह ॥ ३
तांस्तादृशानहं हत्वा धर्मनित्यान्महीक्षितः ।
असकृत्सोमपान्वीरान्किं प्राप्स्यामि तपोधन ॥ ४
दह्याम्यनिशमद्याहं चिन्तयानः पुनः पुनः ।
हीनां पार्थिवसिंहैस्तैः श्रीमद्भिः पृथिवीमिमाम् ॥५
दृष्ट्वा ज्ञातिवधं घोरं हतांश्च शतशः परान् ।
कोटिशश्च नरानन्यान्परितप्ये पितामह ॥ ६
का नु तासां वरस्त्रीणामवस्थाद्य भविष्यति ।
विहीनानां स्वतनयैः पतिभिर्भ्रातृभिस्तथा ॥ ७
अस्मानन्तकरान्घोरान्पाण्डवान्वृष्णिसंहितान् ।
आक्रोशन्त्यः कृशा दीना निपतन्त्यश्च भूतले ॥ ८
अपश्यन्त्यः पितॄन्भ्रातॄन्पतीन्पुत्रांश्च योषितः ।
त्यक्त्वा प्राणान्प्रियान्सर्वा गमिष्यन्ति यमक्षयम् ॥९
वत्सलत्वाद्द्विजश्रेष्ठ तत्र मे नास्ति संशयः ।
व्यक्तं सौक्ष्म्याच्च धर्मस्य प्राप्स्यामः स्त्रीवधं वयम् ॥
ते वयं सुहृदो हत्वा कृत्वा पापमनन्तकम् ।
नरके निपतिष्यामो ह्यधःशिरस एव च ॥ ११
शरीराणि विमोक्ष्यामस्तपसोग्रेण सत्तम ।
आश्रमांश्च विशेषांस्त्वं ममाचक्ष्व पितामह ॥ १२

इति श्रीमहाभारते शान्तिपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

वैशंपायन उवाच ।

युधिष्ठिरस्य तद्वाक्यं श्रुत्वा द्वैपायनस्तदा ।
समीक्ष्य निपुणं बुद्ध्या ऋषिः प्रोवाच पाण्डवम् ॥१
मा विषादं कृथा राजन्क्षत्रधर्ममनुस्मर ।
स्वधर्मेण हता ह्येते क्षत्रियाः क्षत्रियर्षभ ॥ २
काङ्क्षमाणाः श्रियं कृत्स्नां पृथिव्यां च महद्यशः ।
कृतान्तविधिसंयुक्ताः कालेन निधनं गताः ॥ ३
न त्वं हन्ता न भीमोऽपि नार्जुनो न यमावपि ।
कालः पर्यायधर्मेण प्राणानादत्त देहिनाम् ॥ ४
न यस्य मातापितरौ नानुग्राह्योऽस्ति कश्चन ।
कर्मसाक्षी प्रजानां यस्तेन कालेन संहृताः ॥ ५
हेतुमात्रमिदं तस्य कालस्य पुरुषर्षभ ।
यद्धन्ति भूतैर्भूतानि तदस्मै रूपमैश्वरम् ॥ ६
कर्ममूर्त्यात्मकं विद्धि साक्षिणं शुभपापयोः ।
सुखदुःखगुणोदर्कं कालं कालफलप्रदम् ॥ ७
तेषामपि महाबाहो कर्माणि परिचिन्तय ।
विनाशहेतुकारित्वे यैस्ते कालवशं गताः ॥ ८

आत्मनश्च विजानीहि नियमव्रतशीलताम् ।
यदा त्वमीदृशं कर्म विधिनाक्रम्य कारितः ॥ ९
त्वष्ट्रेव विहितं यन्त्रं यथा स्थापयितुर्वशे ।
कर्मणा कालयुक्तेन तथेदं भ्राम्यते जगत् ॥ १०
पुरुषस्य हि दृष्ट्वेमामुत्पत्तिमनिमित्ततः ।
यदृच्छया विनाशं च शोकहर्षावनर्थकौ ॥ ११
व्यलीकं चापि यत्त्वत्र चित्तवैतंसिकं तव ।
तदर्थमिष्यते राजन्प्रायश्चित्तं तदाचर ॥ १२
इदं च श्रूयते पार्थ युद्धे देवासुरे पुरा ।
असुरा भ्रातरो ज्येष्ठा देवाश्चापि यवीयसः ॥ १३
तेषामपि श्रीनिमित्तं महानासीत्समुच्छ्रयः ।
युद्धं वर्षसहस्राणि द्वात्रिंशदभवत्किल ॥ १४
एकार्णवां महीं कृत्वा रुधिरेण परिप्लुताम् ।
जघ्नुर्दैत्यांस्तदा देवास्त्रिदिवं चैव लेभिरे ॥ १५
तथैव पृथिवीं लब्ध्वा ब्राह्मणा वेदपारगाः ।
संश्रिता दानवानां वै साह्यार्थे दर्पमोहिताः ॥ १६
शालावृका इति ख्यातास्त्रिषु लोकेषु भारत ।
अष्टाशीतिसहस्राणि ते चापि विबुधैर्हताः ॥ १७
धर्मव्युच्छित्तिमिच्छन्तो येऽधर्मस्य प्रवर्तकाः ।
हन्तव्यास्ते दुरात्मानो देवैर्दैत्या इवोल्बणाः ॥ १८
एकं हत्वा यदि कुले शिष्टानां स्यादनामयम् ।
कुलं हत्वाथ राष्ट्रं वा न तद्वृत्तोपघातकम् ॥ १९
अधर्मरूपो धर्मो हि कश्चिदस्ति नराधिप ।
धर्मश्चाधर्मरूपोऽस्ति तच्च ज्ञेयं विपश्चिता ॥ २०
तस्मात्संस्तम्भयात्मानं श्रुतवानसि पाण्डव ।
देवैः पूर्वगतं मार्गमनुयातोऽसि भारत ॥ २१
न हीदृशा गमिष्यन्ति नरकं पाण्डवर्षभ ।
भ्रातॄनाश्वासयैतांस्त्वं सुहृदश्च परंतप ॥ २२
यो हि पापसमारम्भे कार्ये तद्भावभावितः ।
कुर्वन्नपि तथैव स्यात्कृत्वा च निरपत्रपः ॥ २३
तस्मिंस्तत्कलुषं सर्वं समाप्तमिति शब्दितम् ।
प्रायश्चित्तं न तस्यास्ति ह्रासो वा पापकर्मणः ॥ २४
त्वं तु शुक्लाभिजातीयः परदोषेण कारितः ।
अनिच्छमानः कर्मेदं कृत्वा च परितप्यसे ॥ २५
अश्वमेधो महायज्ञः प्रायश्चित्तमुदाहृतम् ।
तमाहर महाराज विपाप्मैवं भविष्यसि ॥ २६
मरुद्भिः सह जित्वारीन्मघवान्पाकशासनः ।
एकैकं क्रतुमाहृत्य शतकृत्वः शतक्रतुः ॥ २७
पूतपाप्मा जितस्वर्गो लोकान्प्राप्य सुखोदयान् ।
मरुद्गणवृतः शक्रः शुशुभे भासयन्दिशः ॥ २८
स्वर्गलोके महीयन्तमप्सरोभिः शचीपतिम् ।
ऋषयः पर्युपासन्ते देवाश्च विबुधेश्वरम् ॥ २९
सोऽयं त्वमिह संक्रान्तो विक्रमेण वसुंधराम् ।
निर्जिताश्च महीपाला विक्रमेण त्वयानघ ॥ ३०
तेषां पुराणि राष्ट्राणि गत्वा राजन्सुहृद्वृतः ।
भ्रातॄन्पुत्रांश्च पौत्रांश्च स्वे स्वे राज्येऽभिषेचय ॥ ३१
बालानपि च गर्भस्थान्सान्त्वानि समुदाचरन् ।
रञ्जयन्प्रकृतीः सर्वाः परिपाहि वसुंधराम् ॥ ३२
कुमारो नास्ति येषां च कन्यास्तत्राभिषेचय ।
कामाशयो हि स्त्रीवर्गः शोकमेवं प्रहास्यति ॥ ३३
एवमाश्वासनं कृत्वा सर्वराष्ट्रेषु भारत ।
यजस्व वाजिमेधेन यथेन्द्रो विजयी पुरा ॥ ३४
अशोच्यास्ते महात्मानः क्षत्रियाः क्षत्रियर्षभ ।
स्वकर्मभिर्गता नाशं कृतान्तबलमोहिताः ॥ ३५
अवाप्तः क्षत्रधर्मस्ते राज्यं प्राप्तमकल्मषम् ।
चरस्व धर्मं कौन्तेय श्रेयान्यः प्रेत्य भाविकः ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

युधिष्ठिर उवाच ।

कानि कृत्वेह कर्माणि प्रायश्चित्तीयते नरः ।
किं कृत्वा चैव मुच्येत तन्मे ब्रूहि पितामह ॥ १

व्यास उवाच ।

अकुर्वन्विहितं कर्म प्रतिषिद्धानि चाचरन् ।
प्रायश्चित्तीयते ह्येवं नरो मिथ्या च वर्तयन् ॥ २
सूर्येणाभ्युदितो यश्च ब्रह्मचारी भवत्युत ।
तथा सूर्याभिनिर्मुक्तः कुनखी श्यावदन्नपि ॥ ३
परिवित्तिः परिवेत्ता ब्रह्मोज्झो यश्च कुत्सकः ।
दिधिषूपतिस्तथा यः स्यादग्रेदिधिषुरेव च ॥ ४
अवकीर्णी भवेद्यश्च द्विजातिवधकस्तथा ।
अतीर्थे ब्रह्मणस्त्यागी तीर्थे चाप्रतिपादकः ॥ ५
ग्रामयाजी च कौन्तेय राज्ञश्च परिविक्रयी ।
शूद्रस्त्रीवधको यश्च पूर्वः पूर्वस्तु गर्हितः ॥ ६
वृथापशुसमालम्भी वनदाहस्य कारकः ।
अनृतेनोपचर्ता च प्रतिरोद्धा गुरोस्तथा ॥ ७
अग्नीनपविध्येत तथैव ब्रह्मविक्रयी ।
एतान्येनांसि सर्वाणि व्युत्क्रान्तसमयश्च यः ॥ ८
अकार्याण्यपि वक्ष्यामि यानि तानि निबोध मे ।
लोकवेदविरुद्धानि तान्येकाग्रमनाः शृणु ॥ ९
स्वधर्मस्य परित्यागः परधर्मस्य च क्रिया ।
अयाज्ययाजनं चैव तथाभक्ष्यस्य भक्षणम् ॥ १०
शरणागतसंत्यागो भृत्यस्याभरणं तथा ।
रसानां विक्रयश्चापि तिर्यग्योनिवधस्तथा ॥ ११
आधानादीनि कर्माणि शक्तिमान्न करोति यः ।
अप्रयच्छंश्च सर्वाणि नित्यं देयानि भारत ॥ १२
दक्षिणानामदानं च ब्राह्मणस्वाभिमर्शनम् ।
सर्वाण्येतान्यकार्याणि प्राहुर्धर्मविदो जनाः ॥ १३
पित्रा विभजते पुत्रो यश्च स्याद्गुरुतल्पगः ।
अप्रजायन्नधर्मेण भवत्याधर्मिको जनः ॥ १४
उक्तान्येतानि कर्माणि विस्तरेणेतरेण च ।
यानि कुर्वन्नकुर्वंश्च प्रायश्चित्तीयते जनः ॥ १५
एतान्येव तु कर्माणि क्रियमाणानि मानवान् ।
येषु येषु निमित्तेषु न लिम्पन्त्यथ तच्छृणु ॥ १६
प्रगृह्य शस्त्रमायान्तमपि वेदान्तगं रणे ।
जिघांसन्तं निहत्याजौ न तेन ब्रह्महा भवेत् ॥१७
अपि चाप्यत्र कौन्तेय मन्त्रो वेदेषु पठ्यते ।
वेदप्रमाणविहितं तं धर्मं प्रब्रवीमि ते ॥ १८
अपेतं ब्राह्मणं वृत्ताद्यो हन्यादाततायिनम् ।
न तेन ब्रह्महा स स्यान्मन्युस्तं मन्युमृच्छति ॥ १९
प्राणात्यये तथाज्ञानादाचरन्मदिरामपि ।
अचोदितो धर्मपरः पुनः संस्कारमर्हति ॥ २०
एतत्ते सर्वमाख्यातं कौन्तेयाभक्ष्यभक्षणम् ।
प्रायश्चित्तविधानेन सर्वमेतेन शुध्यति ॥ २१
गुरुतल्पं हि गुर्वर्थे न दूषयति मानवम् ।
उद्दालकः श्वेतकेतुं जनयामास शिष्यतः ॥ २२
स्तेयं कुर्वंस्तु गुर्वर्थमापत्सु न निबध्यते ।
बहुशः कामकारेण न चेद्यः संप्रवर्तते ॥ २३
अन्यत्र ब्राह्मणस्वेभ्य आददानो न दुष्यति ।
स्वयमप्राशिता यश्च न स पापेन लिप्यते ॥ २४
प्राणत्राणेऽनृतं वाच्यमात्मनो वा परस्य वा ।
गुर्वर्थे स्त्रीषु चैव स्याद्विवाहकरणेषु च ॥ २५
नावर्तते व्रतं स्वप्ने शुक्रमोक्षे कथंचन ।
आज्यहोमः समिद्धेऽग्नौ प्रायश्चित्तं विधीयते ॥२६
पारिवित्त्यं च पतिते नास्ति प्रव्रजिते तथा ।
भिक्षिते पारदार्यं च न तद्धर्मस्य दूषकम् ॥ २७
वृथापशुसमालम्भं नैव कुर्यान्न कारयेत् ।
अनुग्रहः पशूनां हि संस्कारो विधिचोदितः ॥ २८
अनर्हे ब्राह्मणे दत्तमज्ञानात्तत्र दूषकम् ।

सकारणं तथा तीर्थेऽतीर्थे वा प्रतिपादनम् ॥ २९
स्त्रियस्तथापचारिण्यो निष्कृतिः स्याददूषिका ।
अपि सा पूयते तेन न तु भर्ता प्रदुष्यते ॥ ३०
तत्त्वं ज्ञात्वा तु सोमस्य विक्रयः स्याददूषकः ।
असमर्थस्य भृत्यस्य विसर्गः स्याददोषवान् ।
वनदाहो गवामर्थे क्रियमाणो न दूषकः ॥ ३१
उक्तान्येतानि कर्माणि यानि कुर्वन्न दुष्यति ।
प्रायश्चित्तानि वक्ष्यामि विस्तरेणैव भारत ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

व्यास उवाच ।

तपसा कर्मभिश्चैव प्रदानेन च भारत ।
पुनाति पापं पुरुषः पूतश्चेन्न प्रवर्तते ॥ १
एककालं तु भुञ्जानश्चरन्भैक्षं स्वकर्मकृत् ।
कपालपाणिः खट्वाङ्गी ब्रह्मचारी सदोत्थितः ॥ २
अनसूयुरधःशायी कर्म लोके प्रकाशयन् ।
पूर्णैर्द्वादशभिर्वर्षैर्ब्रह्महा विप्रमुच्यते ॥ ३
षड्भिर्वर्षैः कृच्छ्रभोजी ब्रह्महा पूयते नरः ।
मासे मासे समश्नंस्तु त्रिभिर्वर्षैः प्रमुच्यते ॥ ४
संवत्सरेण मासाशी पूयते नात्र संशयः ।
तथैवोपरमन्राजन्स्वल्पेनापि प्रमुच्यते ॥ ५
क्रतुना चाश्वमेधेन पूयते नात्र संशयः ।
ये चास्यावभृथे स्नान्ति केचिदेवंविधा नराः ॥ ६
ते सर्वे पूतपाप्मानो भवन्तीति परा श्रुतिः ।
ब्राह्मणार्थे हतो युद्धे मुच्यते ब्रह्महत्यया ॥ ७
गवां शतसहस्रं तु पात्रेभ्यः प्रतिपादयन् ।
ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव च ॥ ८
कपिलानां सहस्राणि यो दद्यात्पञ्चविंशतिम् ।
दोग्ध्रीणां स च पापेभ्यः सर्वेभ्यो विप्रमुच्यते ॥९
गोसहस्रं सवत्सानां दोग्ध्रीणां प्राणसंशये ।
साधुभ्यो वै दरिद्रेभ्यो दत्त्वा मुच्येत किल्बिषात्॥
शतं वै यस्तु काम्बोजान्ब्राह्मणेभ्यः प्रयच्छति ।
नियतेभ्यो महीपाल स च पापात्प्रमुच्यते ॥ ११
मनोरथं तु यो दद्यादेकस्मा अपि भारत ।
न कीर्तयेत दत्त्वा यः स च पापात्प्रमुच्यते ॥१२
सुरापानं सकृत्पीत्वा योऽग्निवर्णां पिबेद्द्विजः ।
स पावयत्यथात्मानमिह लोके परत्र च ॥ १३
मेरुप्रपातं प्रपतञ्ज्वलनं वा समाविशन् ।
महाप्रस्थानमातिष्ठन्मुच्यते सर्वकिल्बिषैः ॥ १४
बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः ।
समितिं ब्राह्मणैर्गच्छेदिति वै ब्राह्मणी श्रुतिः ॥१५
भूमिप्रदानं कुर्याद्यः सुरां पीत्वा विमत्सरः ।
पुनर्न च पिबेद्राजन्संस्कृतः शुध्यते नरः ॥ १६
गुरुतल्पी शिलां तप्तामायसीमधिसंविशेत् ।
पाणावाधाय वा शेफं प्रव्रजेदूर्ध्वदर्शनः ॥ १७
शरीरस्य विमोक्षेण मुच्यते कर्मणोऽशुभात् ।
कर्मभ्यो विप्रमुच्यन्ते यत्ताः संवत्सरं स्त्रियः ॥१८
महाव्रतं चरेद्यस्तु दद्यात्सर्वस्वमेव तु ।
गुर्वर्थे वा हतो युद्धे स मुच्येत्कर्मणोऽशुभात् ॥१९
अनृतेनोपचर्ता च प्रतिरोद्धा गुरोस्तथा ।
उपहृत्य प्रियं तस्मै तस्मात्पापात्प्रमुच्यते ॥ २०
अवकीर्णिनिमित्तं तु ब्रह्महत्याव्रतं चरेत् ।
खरचर्मवासाः षण्मासं तथा मुच्येत किल्बिषात्॥
परदारापहारी च परस्यापहरन्वसु ।
संवत्सरं व्रती भूत्वा तथा मुच्येत किल्बिषात्॥ २२
स्तेयं तु यस्यापहरेत्तस्मै दद्यात्समं वसु ।
विविधेनाभ्युपायेन तेन मुच्येत किल्बिषात् ॥ २३
कृच्छ्राद्द्वादशरात्रेण स्वभ्यस्तेन दशावरम् ।
परिवेत्ता भवेत्पूतः परिवित्तिश्च भारत ॥ २४

निवेश्यं तु भवेत्तेन सदा तारयिता पितॄन् ।
न तु स्त्रिया भवेद्दोषो न तु सा तेन लिप्यते ॥ २५
भजने ह्यृतुना शुद्धं चातुर्मास्यं विधीयते ।
स्त्रियस्तेन विशुध्यन्ति इति धर्मविदो विदुः ॥ २६
स्त्रियस्त्वाशङ्किताः पापैर्नोपगम्या हि जानता ।
रजसा ता विशुध्यन्ते भस्मना भाजनं यथा ॥ २७
चतुष्पात्सकलो धर्मो ब्राह्मणानां विधीयते ।
पादावकृष्टो राजन्ये तथा धर्मो विधीयते ॥ २८
तथा वैश्ये च शूद्रे च पादः पादो विधीयते ।
विद्याद्देवंविधेनैषां गुरुलाघवनिश्चयम् ॥ २९
तिर्यग्योनिवधं कृत्वा द्रुमांश्छित्त्वेतरान्बहून् ।
त्रिरात्रं वायुभक्षः स्यात्कर्म च प्रथयेन्नरः ॥ ३०
अगम्यागमने राजन्प्रायश्चित्तं विधीयते ।
आर्द्रवस्त्रेण षण्मासं विहार्यं भस्मशायिना ॥ ३१
एष एव तु सर्वेषामकार्याणां विधिर्भवेत् ।
ब्राह्मणोक्तेन विधिना दृष्टान्तागमहेतुभिः ॥ ३२
सावित्रीमप्यधीयानः शुचौ देशे मिताशनः ।
अहिंस्रोऽमन्दकोऽजल्पन्मुच्यते सर्वकिल्बिषैः ॥ ३३
अहःसु सततं तिष्ठेदभ्याकाशं निशि स्वपेत् ।
त्रिरह्नस्त्रिर्निशायाश्च सवासा जलमाविशेत् ॥ ३४
स्त्रीशूद्रपतितांश्चापि नाभिभाषेद्व्रतान्वितः ।
पापान्यज्ञानतः कृत्वा मुच्येदेवंव्रतो द्विजः ॥ ३५
शुभाशुभफलं प्रेत्य लभते भूतसाक्षिकः ।
अतिरिच्येत्तयोर्यत्तु तत्कर्ता लभते फलम् ॥ ३६
तस्माद्दानेन तपसा कर्मणा च शुभं फलम् ।
वर्धयेदशुभं कृत्वा यथा स्यादतिरेकवान् ॥ ३७
कुर्याच्छुभानि कर्माणि निमित्ते पापकर्मणाम् ।
दद्यान्नित्यं च वित्तानि तथा मुच्येत किल्बिषात् ॥ ३८
अनुरूपं हि पापस्य प्रायश्चित्तमुदाहृतम् ।
महापातकवर्जं तु प्रायश्चित्तं विधीयते ॥ ३९
भक्ष्याभक्ष्येषु सर्वेषु वाच्यावाच्ये तथैव च ।
अज्ञानज्ञानयो राजन्विहितान्यनुजानते ॥ ४०
जानता तु कृतं पापं गुरु सर्वं भवत्युत ।
अज्ञानात्स्खलिते दोषे प्रायश्चित्तं विधीयते ॥ ४१
शक्यते विधिना पापं यथोक्तेन व्यपोहितुम् ।
आस्तिके श्रद्दधाने तु विधिरेष विधीयते ॥ ४२
नास्तिकाश्रद्दधानेषु पुरुषेषु कदाचन ।
दम्भदोषप्रधानेषु विधिरेष न दृश्यते ॥ ४३
शिष्टाचारश्च शिष्टश्च धर्मो धर्मभृतां वर ।
सेवितव्यो नरव्याघ्र प्रेत्य चेह सुखार्थिना ॥ ४४
स राजन्मोक्ष्यसे पापात्तेन पूर्वेण हेतुना ।
त्राणार्थं वा वधेनैषामथ वा नृपकर्मणा ॥ ४५
अथ वा ते घृणा काचित्प्रायश्चित्तं चरिष्यसि ।
मा त्वेवानार्यजुष्टेन कर्मणा निधनं गमः ॥ ४६

इति श्रीमहाभारते शान्तिपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

वैशंपायन उवाच ।

एवमुक्तो भगवता धर्मराजो युधिष्ठिरः ।
चिन्तयित्वा मुहूर्तं तु प्रत्युवाच तपोधनम् ॥ १
किं भक्ष्यं किमभक्ष्यं च किं च देयं प्रशस्यते ।
किं च पात्रमपात्रं वा तन्मे ब्रूहि पितामह ॥ २

व्यास उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सिद्धानां चैव संवादं मनोश्चैव प्रजापतेः ॥ ३
सिद्धास्तपोव्रतपराः समागम्य पुरा विभुम् ।
धर्मं पप्रच्छुरासीनमादिकाले प्रजापतिम् ॥ ४
कथमन्नं कथं दानं कथमध्ययनं तपः ।
कार्याकार्यं च नः सर्वं शंस वै त्वं प्रजापते ॥ ५
तैरेवमुक्तो भगवान्मनुः स्वायंभुवोऽब्रवीत् ।

शुश्रूषध्वं यथावृत्तं धर्मं व्याससमासतः ॥ ६
अदत्तस्यानुपादानं दानमध्ययनं तपः ।
अहिंसा सत्यमक्रोधः क्षमेज्या धर्मलक्षणम् ॥ ७
य एव धर्मः सोऽधर्मोऽदेशेऽकाले प्रतिष्ठितः ।
आदानमनृतं हिंसा धर्मो व्यावस्थिकः स्मृतः ॥ ८
द्विविधौ चाप्युभावेतौ धर्माधर्मौ विजानताम् ।
अप्रवृत्तिः प्रवृत्तिश्च द्वैविध्यं लोकवेदयोः ॥ ९
अप्रवृत्तेरमर्त्यत्वं मर्त्यत्वं कर्मणः फलम् ।
अशुभस्याशुभं विद्याच्छुभस्य शुभमेव च ॥ १०
एतयोश्चोभयोः स्यातां शुभाशुभतया तथा ।
दैवं च दैवयुक्तं च प्राणश्च प्रलयश्च ह ॥ ११
अप्रेक्षापूर्वकरणादशुभानां शुभं फलम् ।
ऊर्ध्वं भवति संदेहादिह दृष्टार्थमेव वा ।
अप्रेक्षापूर्वकरणात्प्रायश्चित्तं विधीयते ॥ १२
क्रोधमोहकृते चैव दृष्टान्तागमहेतुभिः ।
शरीराणामुपक्लेशो मनसश्च प्रियाप्रिये ।
तदौषधैश्च मन्त्रैश्च प्रायश्चित्तैश्च शाम्यति ॥ १३
जातिश्रेण्यधिवासानां कुलधर्मांश्च सर्वतः ।
वर्जयेन्न हि तं धर्मं येषां धर्मो न विद्यते ॥ १४
दश वा वेदशास्त्रज्ञास्त्रयो वा धर्मपाठकाः ।
यद्ब्रूयुः कार्य उत्पन्ने स धर्मो धर्मसंशये ॥ १५
अरुणा मृत्तिका चैव तथा चैव पिपीलकाः ।
श्लेष्मातकस्तथा विप्रैरभक्ष्यं विषमेव च ॥ १६
अभक्ष्या ब्राह्मणैर्मत्स्याः शकलैर्ये विवर्जिताः ।
चतुष्पात्कच्छपादन्यो मण्डूका जलजाश्च ये ॥१७
भासा हंसाः सुपर्णाश्च चक्रवाकाः बकाः प्लवाः ।
कङ्को मद्गुश्च गृध्राश्च काकोलूकं तथैव च ॥ १८
क्रव्यादाः पक्षिणः सर्वे चतुष्पादाश्च दंष्ट्रिणः ।
येषां चोभयतो दन्ताश्चतुर्दंष्ट्राश्च सर्वशः ॥ १९
एडकाश्वखरोष्ट्रीणां सूतिकानां गवामपि ।
मानुषीणां मृगीणां च न पिबेद्ब्राह्मणः पयः ॥ २०
प्रेतान्नं सूतिकान्नं च यच्च किंचिदनिर्दशम् ।
अभोज्यं चाप्यपेयं च धेन्वा दुग्धमनिर्दशम् ॥ २१
तक्षणश्चर्मविकर्तुश्च पुंश्चल्या रजकस्य च ।
चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा ॥ २२
गणग्रामाभिशस्तानां रङ्गस्त्रीजीविनश्च ये ।
परिवित्तिनपुंसां च बन्दिद्यूतविदां तथा ॥ २३
वार्यमाणाहृतं चान्नं शुक्तं पर्युषितं च यत् ।
सुरानुगतमुच्छिष्टमभोज्यं शेषितं च यत् ॥ २४
पिष्टमांसेक्षुशाकानां विकाराः पयसस्तथा ।
सक्तुधानाकरम्भाश्च नोपभोज्याश्चिरस्थिताः ॥ २५
पायसं कृसरं मांसमपूपाश्च वृथा कृताः ।
अभोज्याश्चाप्यभक्ष्याश्च ब्राह्मणैर्गृहमेधिभिः ॥२६
देवान्पितॄन्मनुष्यांश्च मुनीन्गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चाद्गृहस्थो भोक्तुमर्हति ॥ २७
यथा प्रव्रजितो भिक्षुर्गृहस्थः स्वगृहे वसेत् ।
एवंवृत्तः प्रियैर्दारैः संवसन्धर्ममाप्नुयात् ॥ २८
न दद्याद्यशसे दानं न भयान्नोपकारिणे ।
न नृत्तगीतशीलेषु हासकेषु च धार्मिकः ॥ २९
न मत्ते नैव चोन्मत्ते न स्तेने न चिकित्सके ।
न वाग्घीने विवर्णे वा नाङ्गहीने न वामने ॥ ३०
न दुर्जने दौष्कुले वा व्रतैर्वा यो न संस्कृतः ।
अश्रोत्रिये मृतं दानं ब्राह्मणेऽब्रह्मवादिनि ॥ ३१
असम्यक्चैव यद्दत्तमसम्यक्च प्रतिग्रहः ।
उभयोः स्यादनर्थाय दातुरादातुरेव च ॥ ३२
यथा खदिरमालम्ब्य शिलां वाप्यर्णवं तरन् ।
मज्जते मज्जते तद्वद्दाता यश्च प्रतीच्छकः ॥ ३३
काष्ठैरार्द्रैर्यथा वह्निरुपस्तीर्णो न दीप्यते ।
तपःस्वाध्यायचारित्रैरेवं हीनः प्रतिग्रही ॥ ३४
कपाले यद्वदापः स्युः श्वदृतौ वा यथा पयः ।

आश्रयस्थानदोषेण वृत्तहीने तथा श्रुतम् ॥ ३५
निर्मन्त्रो निर्व्रतो यः स्यादशास्त्रज्ञोऽनसूयकः ।
अनुक्रोशात्प्रदातव्यं दीनेष्वेवं नरेष्वपि ॥ ३६
न वै देयमनुक्रोशाद्दीनायाप्यपकारिणे ।
आप्ताचरितमित्येव धर्म इत्येव वा पुनः ॥ ३७
निष्कारणं स्म तद्दत्तं ब्राह्मणे धर्मवर्जिते ।
भवेदपात्रदोषेण न मेऽत्रास्ति विचारणा ॥ ३८
यथा दारुमयो हस्ती यथा चर्ममयो मृगः ।
ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ॥ ३९
यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला ।
शकुनिर्वाप्यपक्षः स्यान्निर्मन्त्रो ब्राह्मणस्तथा ॥ ४०
ग्रामधान्यं यथा शून्यं यथा कूपश्च निर्जलः ।
यथा हुतमनग्नौ च तथैव स्यान्निराकृतौ ॥ ४१
देवतानां पितॄणां च हव्यकव्यविनाशनः ।
शत्रुरर्थहरो मूर्खो न लोकान्प्राप्तुमर्हति ॥ ४२
एतत्ते कथितं सर्वं यथा वृत्तं युधिष्ठिर ।
समासेन महद्ध्येतच्छ्रोतव्यं भरतर्षभ ॥ ४३

इति श्रीमहाभारते शान्तिपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

युधिष्ठिर उवाच ।

श्रोतुमिच्छामि भगवन्विस्तरेण महामुने ।
राजधर्मान्द्विजश्रेष्ठ चातुर्वर्ण्यस्य चाखिलान् ॥ १
आपत्सु च यथा नीतिर्विधातव्या महीक्षिता ।
धर्म्यमालम्ब्य पन्थानं विजयेयं कथं महीम् ॥ २
प्रायश्चित्तकथा ह्येषा भक्ष्याभक्ष्यविवर्धिता ।
कौतूहलानुप्रवणा हर्षं जनयतीव मे ॥ ३
धर्मचर्या च राज्यं च नित्यमेव विरुध्यते ।
येन मुह्यति मे चेतश्चिन्तयानस्य नित्यशः ॥ ४

वैशंपायन उवाच ।

तमुवाच महातेजा व्यासो वेदविदां वरः ।
नारदं समभिप्रेक्ष्य सर्वं जानन्पुरातनम् ॥ ५
श्रोतुमिच्छसि चेद्धर्मानखिलेन युधिष्ठिर ।
प्रैहि भीष्मं महाबाहो वृद्धं कुरुपितामहम् ॥ ६
स ते सर्वरहस्येषु संशयान्मनसि स्थितान् ।
छेत्ता भागीरथीपुत्रः सर्वज्ञः सर्वधर्मवित् ॥ ७
जनयामास यं देवी दिव्या त्रिपथगा नदी ।
साक्षाद्ददर्श यो देवान्सर्वाञ्शक्रपुरोगमान् ॥ ८
बृहस्पतिपुरोगांश्च देवर्षीनसकृत्प्रभुः ।
तोषयित्वोपचारेण राजनीतिमधीतवान् ॥ ९
उशना वेद यच्छास्त्रं देवासुरगुरुर्द्विजः ।
तच्च सर्वं सवैयाख्यं प्राप्तवान्कुरुसत्तमः ॥ १०
भार्गवाच्च्यवनाच्चापि वेदानङ्गोपबृंहितान् ।
प्रतिपेदे महाबुद्धिर्वसिष्ठाच्च यतव्रतात् ॥ ११
पितामहसुतं ज्येष्ठं कुमारं दीप्ततेजसम् ।
अध्यात्मगतितत्त्वज्ञमुपाशिक्षत यः पुरा ॥ १२
मार्कण्डेयमुखात्कृत्स्नं यतिधर्ममवाप्तवान् ।
रामादस्त्राणि शक्राच्च प्राप्तवान्भरतर्षभ ॥ १३
मृत्युरात्मेच्छया यस्य जातस्य मनुजेष्वपि ।
तथानपत्यस्य सतः पुण्यलोका दिवि श्रुताः ॥ १४
यस्य ब्रह्मर्षयः पुण्याः नित्यमासन्सभासदः ।
यस्य नाविदितं किंचिज्ज्ञानज्ञेयेषु विद्यते ॥ १५
स ते वक्ष्यति धर्मज्ञः सूक्ष्मधर्मार्थतत्त्ववित् ।
तमभ्येहि पुरा प्राणान्स विमुञ्चति धर्मवित् ॥ १६
एवमुक्तस्तु कौन्तेयो दीर्घप्रज्ञो महाद्युतिः ।
उवाच वदतां श्रेष्ठं व्यासं सत्यवतीसुतम् ॥ १७
वैशसं सुमहत्कृत्वा ज्ञातीनां लोमहर्षणम् ।
आगस्कृत्सर्वलोकस्य पृथिवीनाशकारकः ॥ १८
घातयित्वा तमेवाजौ छलेनाजिह्मयोधिनम् ।

उपसंप्रष्टुमर्हामि तमहं केन हेतुना ॥ १९
ततस्तं नृपतिश्रेष्ठं चातुर्वर्ण्यहितेप्सया ।
पुनराह महाबाहुर्यदुश्रेष्ठो महाद्युतिः ॥ २०
नेदानीमतिनिर्बन्धं शोके कर्तुमिहार्हसि ।
यदाह भगवान्व्यासस्तत्कुरुष्व नृपोत्तम ॥ २१
ब्राह्मणास्त्वां महाबाहो भ्रातरश्च महौजसः ।
पर्जन्यमिव घर्मार्ता आशंसाना उपासते ॥ २२
हतशिष्टाश्च राजानः कृत्स्नं चैव समागतम् ।
चातुर्वर्ण्यं महाराज राष्ट्रं ते कुरुजाङ्गलम् ॥ २३
प्रियार्थमपि चैतेषां ब्राह्मणानां महात्मनाम् ।
नियोगादस्य च गुरोर्व्यासस्यामिततेजसः ॥ २४
सुहृदां चास्मदादीनां द्रौपद्याश्च परंतप ।
कुरु प्रियममित्रघ्न लोकस्य च हितं कुरु ॥ २५
एवमुक्तस्तु कृष्णेन राजा राजीवलोचनः ।
हितार्थं सर्वलोकस्य समुत्तस्थौ महातपाः ॥ २६
सोऽनुनीतो नरव्याघ्रो विष्टरश्रवसा स्वयम् ।
द्वैपायनेन च तथा देवस्थानेन जिष्णुना ॥ २७
एतैश्चान्यैश्च बहुभिरनुनीतो युधिष्ठिरः ।
व्यजहान्मानसं दुःखं संतापं च महामनाः ॥ २८
श्रुतवाक्यः श्रुतनिधिः श्रुतश्रव्यविशारदः ।
व्यवस्य मनसः शान्तिमगच्छत्पाण्डुनन्दनः ॥ २९
स तैः परिवृतो राजा नक्षत्रैरिव चन्द्रमाः ।
धृतराष्ट्रं पुरस्कृत्य स्वपुरं प्रविवेश ह ॥ ३०
प्रविविक्षुः स धर्मज्ञः कुन्तीपुत्रो युधिष्ठिरः ।
अर्चयामास देवांश्च ब्राह्मणांश्च सहस्रशः ॥ ३१
ततो रथं नवं शुभ्रं कम्बलाजिनसंवृतम् ।
युक्तं षोडशभिर्गोभिः पाण्डुरैः शुभलक्षणैः ॥ ३२
मन्त्रैरभ्यर्चितः पुण्यैः स्तूयमानो महर्षिभिः ।
आरुरोह यथा देवः सोमोऽमृतमयं रथम् ॥ ३३
जग्राह रश्मीन्कौन्तेयो भीमो भीमपराक्रमः ।
अर्जुनः पाण्डुरं छत्रं धारयामास भानुमत् ॥ ३४
ध्रियमाणं तु तच्छत्रं पाण्डुरं तस्य मूर्धनि ।
शुशुभे तारकाराजसितमभ्रमिवाम्बरे ॥ ३५
चामरव्यजने चास्य वीरौ जगृहतुस्तदा ।
चन्द्ररश्मिप्रभे शुभ्रे माद्रीपुत्रावलंकृते ॥ ३६
ते पञ्च रथमास्थाय भ्रातरः समलंकृताः ।
भूतानीव समस्तानि राजन्ददृशिरे तदा ॥ ३७
आस्थाय तु रथं शुभ्रं युक्तमश्वैर्महाजवैः ।
अन्वयात्पृष्ठतो राजन्युयुत्सुः पाण्डवाग्रजम् ॥ ३८
रथं हेममयं शुभ्रं सैन्यसुग्रीवयोजितम् ।
सह सात्यकिना कृष्णः समास्थायान्वयात्कुरून् ॥ ३९
नरयानेन तु ज्येष्ठः पिता पार्थस्य भारत ।
अग्रतो धर्मराजस्य गान्धारीसहितो ययौ ॥ ४०
कुरुस्त्रियश्च ताः सर्वाः कुन्ती कृष्णा च द्रौपदी ।
यानैरुच्चावचैर्जग्मुर्विदुरेण पुरस्कृताः ॥ ४१
ततो रथाश्च बहुला नागाश्च समलंकृताः ।
पादाताश्च हयाश्चैव पृष्ठतः समनुव्रजन् ॥ ४२
ततो वैतालिकैः सूतैर्मागधैश्च सुभाषितैः ।
स्तूयमानो ययौ राजा नगरं नागसाह्वयम् ॥ ४३
तत्प्रयाणं महाबाहोर्बभूवाप्रतिमं भुवि ।
आकुलाकुलमुत्सृष्टं हृष्टपुष्टजनान्वितम् ॥ ४४
अभियाने तु पार्थस्य नरैर्नगरवासिभिः ।
नगरं राजमार्गश्च यथावत्समलंकृतम् ॥ ४५
पाण्डुरेण च माल्येन पताकाभिश्च वेदिभिः ।
संवृतो राजमार्गश्च धूपनैश्च सुधूपितः ॥ ४६
अथ चूर्णैश्च गन्धानां नानापुष्पैः प्रियङ्गुभिः ।
माल्यदामभिरासक्तै राजवेश्माभिसंवृतम् ॥ ४७
कुम्भाश्च नगरद्वारि वारिपूर्णा दृढा नवाः ।
कन्याः सुमनसश्छागाः स्थापितास्तत्र तत्र ह ॥४८
तथा स्वलंकृतद्वारं नगरं पाण्डुनन्दनः ।

स्तूयमानः शुभैर्वाक्यैः प्रविवेश सुहृद्वृतः ॥ ४९

इति श्रीमहाभारते शान्तिपर्वणि
अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

३९

वैशंपायन उवाच ।

प्रवेशने तु पार्थानां जनस्य पुरवासिनः ।
दिदृक्षूणां सहस्राणि समाजग्मुर्बहून्यथ ॥ १
स राजमार्गः शुशुभे समलंकृतचत्वरः ।
यथा चन्द्रोदये राजन्वर्धमानो महोदधिः ॥ २
गृहाणि राजमार्गे तु रत्नवन्ति बृहन्ति च ।
प्राकम्पन्तेव भारेण स्त्रीणां पूर्णानि भारत ॥ ३
ताः शनैरिव सव्रीडं प्रशशंसुर्युधिष्ठिरम् ।
भीमसेनार्जुनौ चैव माद्रीपुत्रौ च पाण्डवौ ॥ ४
धन्या त्वमसि पाञ्चालि या त्वं पुरुषसत्तमान् ।
उपतिष्ठसि कल्याणि महर्षीनिव गौतमी ॥ ५
तव कर्माण्यमोघानि व्रतचर्या च भामिनि ।
इति कृष्णां महाराज प्रशशंसुस्तदा स्त्रियः ॥ ६
प्रशंसावचनैस्तासां मिथःशब्दैश्च भारत ।
प्रीतिजैश्च तदा शब्दैः पुरमासीत्समाकुलम् ॥ ७
तमतीत्य यथायुक्तं राजमार्गं युधिष्ठिरः ।
अलंकृतं शोभमानमुपायाद्राजवेश्म ह ॥ ८
ततः प्रकृतयः सर्वाः पौरजानपदास्तथा ।
ऊचुः कथाः कर्णसुखाः समुपेत्य ततस्ततः ॥ ९
दिष्ट्या जयसि राजेन्द्र शत्रूञ्शत्रुनिसूदन ।
दिष्ट्या राज्यं पुनः प्राप्तं धर्मेण च बलेन च ॥ १०
भव नस्त्वं महाराज राजेह शरदां शतम् ।
प्रजाः पालय धर्मेण यथेन्द्रस्त्रिदिवं नृप ॥ ११
एवं राजकुलद्वारि मङ्गलैरभिपूजितः ।
आशीर्वादान्द्विजैरुक्तान्प्रतिगृह्य समन्ततः ॥ १२
प्रविश्य भवनं राजा देवराजगृहोपमम् ।
श्रुत्वा विजयसंयुक्तं रथात्पश्चादवातरत् ॥ १३
प्रविश्याभ्यन्तरं श्रीमान्दैवतान्यभिगम्य च ।
पूजयामास रत्नैश्च गन्धैर्माल्यैश्च सर्वशः ॥ १४
निश्चक्राम ततः श्रीमान्पुनरेव महायशाः ।
ददर्श ब्राह्मणांश्चैव सोऽभिरूपानुपस्थितान् ॥ १५
स संवृतस्तदा विप्रैराशीर्वादविवक्षुभिः ।
शुशुभे विमलश्चन्द्रस्तारागणवृतो यथा ॥ १६
तान्स संपूजयामास कौन्तेयो विधिवद्द्विजान् ।
धौम्यं गुरुं पुरस्कृत्य ज्येष्ठं पितरमेव च ॥ १७
सुमनोमोदकै रत्नैर्हिरण्येन च भूरिणा ।
गोभिर्वस्त्रैश्च राजेन्द्र विविधैश्च किमिच्छकैः ॥ १८
ततः पुण्याहघोषोऽभूद्दिवं स्तब्ध्वेव भारत ।
सुहृदां हर्षजननः पुण्यः श्रुतिसुखावहः ॥ १९
हंसवन्नेदुषां राजन्द्विजानां तत्र भारती ।
शुश्रुवे वेदविदुषां पुष्कलार्थपदाक्षरा ॥ २०
ततो दुन्दुभिनिर्घोषः शङ्खानां च मनोरमः ।
जयं प्रवदतां तत्र स्वनः प्रादुरभून्नृप ॥ २१
निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः ।
राजानं ब्राह्मणच्छद्मा चार्वाको राक्षसोऽब्रवीत् ॥ २२
तत्र दुर्योधनसखा भिक्षुरूपेण संवृतः ।
सांख्यः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः ॥
वृतः सर्वैस्तदा विप्रैराशीर्वादविवक्षुभिः ।
परःसहस्रै राजेन्द्र तपोनियमसंस्थितैः ॥ २४
स दुष्टः पापमाशंसन्पाण्डवानां महात्मनाम् ।
अनामन्त्र्यैव तान्विप्रांस्तमुवाच महीपतिम् ॥ २५
इमे प्राहुर्द्विजाः सर्वे समारोप्य वचो मयि ।
धिग्भवन्तं कुनृपतिं ज्ञातिघातिनमस्तु वै ॥ २६
किं ते राज्येन कौन्तेय कृत्वेमं ज्ञातिसंक्षयम् ।
घातयित्वा गुरूंश्चैव मृतं श्रेयो न जीवितम् ॥ २७

इति ते वै द्विजाः श्रुत्वा तस्य घोरस्य रक्षसः ।
विव्यथुश्चुक्रुशुश्चैव तस्य वाक्यप्रधर्षिताः ॥ २८
ततस्ते ब्राह्मणाः सर्वे स च राजा युधिष्ठिरः ।
व्रीडिताः परमोद्विग्नास्तूष्णीमासन्विशां पते ॥ २९

युधिष्ठिर उवाच ।

प्रसीदन्तु भवन्तो मे प्रणतस्याभियाचतः ।
प्रत्यापन्नं व्यसनिनं न मां धिक्कर्तुमर्हथ ॥ ३०

वैशंपायन उवाच ।

ततो राजन्ब्राह्मणास्ते सर्व एव विशां पते ।
ऊचुर्नैतद्वचोऽस्माकं श्रीरस्तु तव पार्थिव ॥ ३१
जज्ञुश्चैव महात्मानस्ततस्तं ज्ञानचक्षुषा ।
ब्राह्मणा वेदविद्वांसस्तपोभिर्विमलीकृताः ॥ ३२

ब्राह्मणा ऊचुः ।

एष दुर्योधनसखा चार्वाको नाम राक्षसः ।
परिव्राजकरूपेण हितं तस्य चिकीर्षति ॥ ३३
न वयं ब्रूम धर्मात्मन्व्येतु ते भयमीदृशम् ।
उपतिष्ठतु कल्याणं भवन्तं भ्रातृभिः सह ॥ ३४

वैशंपायन उवाच ।

ततस्ते ब्राह्मणाः सर्वे हुंकारैः क्रोधमूर्छिताः ।
निर्भर्त्सयन्तः शुचयो निजघ्नुः पापराक्षसम् ॥ ३५
स पपात विनिर्दग्धस्तेजसा ब्रह्मवादिनाम् ।
महेन्द्राशनिनिर्दग्धः पादपोऽङ्कुरवानिव ॥ ३६
पूजिताश्च ययुर्विप्रा राजानमभिनन्द्य तम् ।
राजा च हर्षमापेदे पाण्डवः ससुहृज्जनः ॥ ३७

वासुदेव उवाच ।

ब्राह्मणास्तात लोकेऽस्मिन्नर्चनीयाः सदा मम ।
एते भूमिचरा देवा वाग्विषाः सुप्रसादकाः ॥ ३८
पुरा कृतयुगे तात चार्वाको नाम राक्षसः ।
तपस्तेपे महाबाहो बदर्यां बहुवत्सरम् ॥ ३९
छन्द्यमानो वरेणाथ ब्रह्मणा स पुनः पुनः ।
अभयं सर्वभूतेभ्यो वरयामास भारत ॥ ४०
द्विजावमानादन्यत्र प्रादाद्वरमनुत्तमम् ।
अभयं सर्वभूतेभ्यस्ततस्तस्मै जगत्प्रभुः ॥ ४१
स तु लब्धवरः पापो देवानमितविक्रमः ।
राक्षसस्तापयामास तीव्रकर्मा महाबलः ॥ ४२
ततो देवाः समेत्याथ ब्रह्माणमिदमब्रुवन् ।
वधाय रक्षसस्तस्य बलविप्रकृतास्तदा ॥ ४३
तानुवाचाव्ययो देवो विहितं तत्र वै मया ।
यथास्य भविता मृत्युरचिरेणैव भारत ॥ ४४
राजा दुर्योधनो नाम सखास्य भविता नृप ।
तस्य स्नेहावबद्धोऽसौ ब्राह्मणानवमंस्यते ॥ ४५
तत्रैनं रुषिता विप्रा विप्रकारप्रधर्षिताः ।
धक्ष्यन्ति वाग्बलाः पापं ततो नाशं गमिष्यति ॥४
स एष निहतः शेते ब्रह्मदण्डेन राक्षसः ।
चार्वाको नृपतिश्रेष्ठ मा शुचो भरतर्षभ ॥ ४७
हतास्ते क्षत्रधर्मेण ज्ञातयस्तव पार्थिव ।
स्वर्गताश्च महात्मानो वीराः क्षत्रियपुंगवाः ॥ ४८
स त्वमातिष्ठ कल्याणं मा ते भूद्ग्लानिरच्युत ।
शत्रूञ्जहि प्रजा रक्ष द्विजांश्च प्रतिपालय ॥ ४९

इति श्रीमहाभारते शान्तिपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

वैशंपायन उवाच ।

ततः कुन्तीसुतो राजा गतमन्युर्गतज्वरः ।
काञ्चने प्राङ्मुखो हृष्टो न्यषीदत्परमासने ॥ १
तमेवाभिमुखौ पीठे सेव्यास्तरणसंवृते ।
सात्यकिर्वासुदेवश्च निषीदतुररिंदमौ ॥ २
मध्ये कृत्वा तु राजानं भीमसेनार्जुनावुभौ ।
निषीदतुर्महात्मानौ श्लक्ष्णयोर्मणिपीठयोः ॥ ३

दान्ते शय्यासने शुभ्रे जाम्बूनदविभूषिते ।
पृथापि सहदेवेन सहास्ते नकुलेन च ॥ ४
सुधर्मा विदुरो धौम्यो धृतराष्ट्रश्च कौरवः ।
निषेदुर्ज्वलनाकारेष्वासनेषु पृथक्पृथक् ॥ ५
युयुत्सुः संजयश्चैव गान्धारी च यशस्विनी ।
धृतराष्ट्रो यतो राजा ततः सर्व उपाविशन् ॥ ६
तत्रोपविष्टो धर्मात्मा श्वेताः सुमनसोऽस्पृशत् ।
स्वस्तिकानक्षतान्भूमिं सुवर्णं रजतं मणीन् ॥ ७
ततः प्रकृतयः सर्वाः पुरस्कृत्य पुरोहितम् ।
ददृशुर्धर्मराजानमादाय बहु मङ्गलम् ॥ ८
पृथिवीं च सुवर्णं च रत्नानि विविधानि च ।
आभिषेचनिकं भाण्डं सर्वसंभारसंभृतम् ॥ ९
काञ्चनौदुम्बरास्तत्र राजताः पृथिवीमयाः ।
पूर्णकुम्भाः सुमनसो लाजा बर्हींषि गोरसाः ॥१०
शमीपलाशपुंनागाः समिधो मधुसर्पिषी ।
स्रुव औदुम्बरः शङ्खास्तथा हेमविभूषिताः ॥ ११
दाशार्हेणाभ्यनुज्ञातस्तत्र धौम्यः पुरोहितः ।
प्रागुदक्प्रवणां वेदीं लक्षणेनोपलिप्य ह ॥ १२
व्याघ्रचर्मोत्तरे श्लक्ष्णे सर्वतोभद्र आसने ।
दृढपादप्रतिष्ठाने हुताशनसमत्विषि ॥ १३
उपवेश्य महात्मानं कृष्णां च द्रुपदात्मजाम् ।
जुहाव पावकं धीमान्विधिमन्त्रपुरस्कृतम् ॥ १४
अभ्यषिञ्चत्पतिं पृथ्व्याः कुन्तीपुत्रं युधिष्ठिरम् ।
धृतराष्ट्रश्च राजर्षिः सर्वाः प्रकृतयस्तथा ॥ १५
ततोऽनुवादयामासुः पणवानकदुन्दुभीः ।
धर्मराजोऽपि तत्सर्वं प्रतिजग्राह धर्मतः ॥ १६
पूजयामास तांश्चापि विधिवद्भूरिदक्षिणः ।
ततो निष्कसहस्रेण ब्राह्मणान्स्वस्ति वाचयत् ।
वेदाध्ययनसंपन्नाञ्शीलवृत्तसमन्वितान् ॥ १७
ते प्रीता ब्राह्मणा राजन्स्वस्त्यूचुर्जयमेव च ।
हंसा इव च नर्दन्तः प्रशशंसुर्युधिष्ठिरम् ॥ १८
युधिष्ठिर महाबाहो दिष्ट्या जयसि पाण्डव ।
दिष्ट्या स्वधर्मं प्राप्तोऽसि विक्रमेण महाद्युते ॥ १९
दिष्ट्या गाण्डीवधन्वा च भीमसेनश्च पाण्डवः ।
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ ॥२०
मुक्ता वीरक्षयादस्मात्संग्रामान्निहतद्विषः ।
क्षिप्रमुत्तरकालानि कुरु कार्याणि पाण्डव ॥ २१
ततः प्रत्यर्चितः सद्भिर्धर्मराजो युधिष्ठिरः ।
प्रतिपेदे महद्राज्यं सुहृद्भिः सह भारत ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

वैशंपायन उवाच ।

प्रकृतीनां तु तद्वाक्यं देशकालोपसंहितम् ।
श्रुत्वा युधिष्ठिरो राजाथोत्तरं प्रत्यभाषत ॥ १
धन्याः पाण्डुसुता लोके येषां ब्राह्मणपुंगवाः ।
तथ्यान्वाप्यथ वातथ्यान्गुणानाहुः समागताः ॥ २
अनुग्राह्या वयं नूनं भवतामिति मे मतिः ।
यत्रैवं गुणसंपन्नानस्मान्ब्रूथ विमत्सराः ॥ ३
धृतराष्ट्रो महाराजः पिता नो दैवतं परम् ।
शासनेऽस्य प्रिये चैव स्थेयं मत्प्रियकाङ्क्षिभिः ॥ ४
एतदर्थं हि जीवामि कृत्वा ज्ञातिवधं महत् ।
अस्य शुश्रूषणं कार्यं मया नित्यमतन्द्रिणा ॥ ५
यदि चाहमनुग्राह्यो भवतां सुहृदां ततः ।
धृतराष्ट्रे यथापूर्वं वृत्तिं वर्तितुमर्हथ ॥ ६
एष नाथो हि जगतो भवतां च मया सह ।
अस्यैव पृथिवी कृत्स्ना पाण्डवाः सर्व एव च ।
एतन्मनसि कर्तव्यं भवद्भिर्वचनं मम ॥ ७
अनुगम्य च राजानं यथेष्टं गम्यतामिति ।
पौरजानपदान्सर्वान्विसृज्य कुरुनन्दनः ।

यौवराज्येन कौरव्यो भीमसेनमयोजयत् ॥ ८
मन्त्रे च निश्चये चैव षाड्गुण्यस्य च चिन्तने ।
विदुरं बुद्धिसंपन्नं प्रीतिमान्वै समादिशत् ॥ ९
कृताकृतपरिज्ञाने तथायव्ययचिन्तने ।
संजयं योजयामास वृद्धगृद्धैर्गुणैर्युतम् ॥ १०
बलस्य परिमाणे च भक्तवेतनयोस्तथा ।
नकुलं व्यादिशद्राजा कर्मिणामन्ववेक्षणे ॥ ११
परचक्रोपरोधे च दृप्तानां चावमर्दने ।
युधिष्ठिरो महाराजः फल्गुनं व्यादिदेश ह ॥ १२
द्विजानां वेदकार्येषु कार्येष्वन्येषु चैव हि ।
धौम्यं पुरोधसां श्रेष्ठं व्यादिदेश परंतपः ॥ १३
सहदेवं समीपस्थं नित्यमेव समादिशत् ।
तेन गोप्यो हि नृपतिः सर्वावस्थो विशां पते ॥ १४
यान्यानमन्यद्योग्यांश्च येषु येष्विह कर्मसु ।
तांस्तांस्तेष्वेव युयुजे प्रीयमाणो महीपतिः १५
विदुरं संजयं चैव युयुत्सुं च महामतिम् ।
अब्रवीत्परवीरघ्नो धर्मात्मा धर्मवत्सलः ॥ १६
उत्थायोत्थाय यत्कार्यमस्य राज्ञः पितुर्मम ।
सर्वं भवद्भिः कर्तव्यमप्रमत्तैर्यथातथम् ॥ १७
पौरजानपदानां च यानि कार्याणि नित्यशः ।
राजानं समनुज्ञाप्य तानि कार्याणि धर्मतः ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

वैशंपायन उवाच ।

ततो युधिष्ठिरो राजा ज्ञातीनां ये हता मृधे ।
श्राद्धानि कारयामास तेषां पृथगुदारधीः ॥ १
धृतराष्ट्रो ददौ राजा पुत्राणामौर्ध्वदेहिकम् ।
सर्वकामगुणोपेतमन्नं गाश्च धनानि च ।
रत्नानि च विचित्राणि महार्हाणि महायशाः ॥ २
युधिष्ठिरस्तु कर्णस्य द्रोणस्य च महात्मनः ।
धृष्टद्युम्नाभिमन्युभ्यां हैडिम्बस्य च रक्षसः ॥ ३
विराटप्रभृतीनां च सुहृदामुपकारिणाम् ।
द्रुपदद्रौपदेयानां द्रौपद्या सहितो ददौ ॥ ४
ब्राह्मणानां सहस्राणि पृथगेकैकमुद्दिशन् ।
धनैश्च वस्त्रै रत्नैश्च गोभिश्च समतर्पयत् ॥ ५
ये चान्ये पृथिवीपाला येषां नास्ति सुहृज्जनः ।
उद्दिश्योद्दिश्य तेषां च चक्रे राजौर्ध्वदैहिकम् ॥ ६
सभाः प्रपाश्च विविधास्तडागानि च पाण्डवः ।
सुहृदां कारयामास सर्वेषामौर्ध्वदैहिकम् ॥ ७
स तेषामनृणो भूत्वा गत्वा लोकेष्ववाच्यताम् ।
कृतकृत्योऽभवद्राजा प्रजा धर्मेण पालयन् ॥ ८
धृतराष्ट्रं यथापूर्वं गान्धारीं विदुरं तथा ।
सर्वांश्च कौरवामात्यान्भृत्यांश्च समपूजयत् ॥ ९
याश्च तत्र स्त्रियः काश्चिद्धतवीरा हतात्मजाः ।
सर्वास्ताः कौरवो राजा संपूज्यापालयद्घृणी ॥ १०
दीनान्धकृपणानां च गृहाच्छादनभोजनैः ।
आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः ॥ ११
स विजित्य महीं कृत्स्नामानृण्यं प्राप्य वैरिषु ।
निःसपत्नः सुखी राजा विजहार युधिष्ठिरः ॥ १२

इति श्रीमहाभारते शान्तिपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

वैशंपायन उवाच ।

अभिषिक्तो महाप्राज्ञो राज्यं प्राप्य युधिष्ठिरः ।
दाशार्हं पुण्डरीकाक्षमुवाच प्राञ्जलिः शुचिः ॥ १
तव कृष्ण प्रसादेन नयेन च बलेन च ।
बुद्ध्या च यदुशार्दूल तथा विक्रमणेन च ॥ २
पुनः प्राप्तमिदं राज्यं पितृपैतामहं मया ।
नमस्ते पुण्डरीकाक्ष पुनः पुनररिंदम ॥ ३

त्वामेकमाहुः पुरुषं त्वामाहुः सात्वतां पतिम् ।
नामभिस्त्वां बहुविधैः स्तुवन्ति परमर्षयः ॥ ४
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसंभव ।
विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम ॥ ५
अदित्याः सप्तरात्रं तु पुराणे गर्भतां गतः ।
पृश्निगर्भस्त्वमेवैकस्त्रियुगं त्वां वदन्त्यपि ॥ ६
शुचिश्रवा हृषीकेशो घृतार्चिर्हंस उच्यसे ।
त्रिचक्षुः शंभुरेकस्त्वं विभुर्दामोदरोऽपि च ॥ ७
वराहोऽग्निर्बृहद्भानुर्वृषणस्तार्क्ष्यलक्षणः ।
अनीकसाहः पुरुषः शिपिविष्ट उरुक्रमः ॥ ८
वाचिष्ठ उग्रः सेनानीः सत्यो वाजसनिर्गुहः ।
अच्युतश्च्यावनोऽरीणां संकृतिर्विकृतिर्वृषः ॥ ९
कृतवर्मा त्वमेवाद्रिर्वृषगर्भो वृषाकपिः ।
सिन्धुक्षिदूर्मिस्त्रिककुत्त्रिधामा त्रिवृदच्युतः ॥ १०
सम्राड्विराट् स्वराट्चैव सुरराड् धर्मदो भवः ।
विभुर्भूरभिभूः कृष्णः कृष्णवर्मा त्वमेव च ॥ ११
स्विष्टकृद्भिषगावर्तः कपिलस्त्वं च वामनः ।
यज्ञो ध्रुवः पतंगश्च जयत्सेनस्त्वमुच्यसे ॥ १२
शिखण्डी नहुषो बभ्रुर्दिवस्पृक्त्वं पुनर्वसुः ।
सुबभ्रुरुक्षो रुक्मस्त्वं सुषेणो दुन्दुभिस्तथा ॥ १३
गभस्तिनेमिः श्रीपद्मं पुष्करं पुष्पधारणः ।
ऋभुर्विभुः सर्वसूक्ष्मस्त्वं सावित्रं च पठ्यसे ॥ १४
अम्भोनिधिस्त्वं ब्रह्म त्वं पवित्रं धाम धन्व च ।
हिरण्यगर्भं त्वामाहुः स्वधा स्वाहा च केशव ॥ १५
योनिस्त्वमस्य प्रलयश्च कृष्ण
त्वमेवेदं सृजसि विश्वमग्रे ।
विश्वं चेदं त्वद्वशे विश्वयोने
नमोऽस्तु ते शार्ङ्गचक्रासिपाणे ॥ १६
एवं स्तुतो धर्मराजेन कृष्णः
सभामध्ये प्रीतिमान्पुष्कराक्षः ।
तमभ्यनन्दद्भारतं पुष्कलाभि-
र्वाग्भिर्ज्येष्ठं पाण्डवं यादवाग्र्यः ॥ १७

इति श्रीमहाभारते शान्तिपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

वैशंपायन उवाच ।

ततो विसर्जयामास सर्वाः प्रकृतयो नृपः ।
विविशुश्चाभ्यनुज्ञाता यथास्वानि गृहाणि च ॥ १
ततो युधिष्ठिरो राजा भीमं भीमपराक्रमम् ।
सान्त्वयन्नब्रवीद्धीमानर्जुनं यमजौ तथा ॥ २
शत्रुभिर्विविधैः शस्त्रैः कृत्तदेहा महारणे ।
श्रान्ता भवन्तः सुभृशं तापिताः शोकमन्युभिः ॥ ३
अरण्ये दुःखवसतीर्मत्कृते पुरुषोत्तमाः ।
भवद्भिरनुभूताश्च यथा कुपुरुषैस्तथा ॥ ४
यथासुखं यथाजोषं जयोऽयमनुभूयताम् ।
विश्रान्ताँल्लब्धविज्ञानाञ्श्वः समेतास्मि वः पुनः ॥ ५
ततो दुर्योधनगृहं प्रासादैरुपशोभितम् ।
बहुरत्नसमाकीर्णं दासीदाससमाकुलम् ॥ ६
धृतराष्ट्राभ्यनुज्ञातं भ्रात्रा दत्तं वृकोदरः ।
प्रतिपेदे महाबाहुर्मन्दरं मघवानिव ॥ ७
यथा दुर्योधनगृहं तथा दुःशासनस्य च ।
प्रासादमालासंयुक्तं हेमतोरणभूषितम् ॥ ८
दासीदाससुसंपूर्णं प्रभूतधनधान्यवत् ।
प्रतिपेदे महाबाहुरर्जुनो राजशासनात् ॥ ९
दुर्मर्षणस्य भवनं दुःशासनगृहाद्वरम् ।
कुबेरभवनप्रख्यं मणिहेमविभूषितम् ॥ १०
नकुलाय वरार्हाय कर्शिताय महावने ।
ददौ प्रीतो महाराज धर्मराजो युधिष्ठिरः ॥ ११
दुर्मुखस्य च वेश्माग्र्यं श्रीमत्कनकभूषितम् ।
पूर्णं पद्मदलाक्षीणां स्त्रीणां शयनसंकुलम् ॥ १२

प्रददौ सहदेवाय सततं प्रियकारिणे ।
मुमुदे तच्च लब्ध्वा स कैलासं धनदो यथा ॥ १३
युयुत्सुर्विदुरश्चैव संजयश्च महाद्युतिः ।
सुधर्मा चैव धौम्यश्च यथास्वं जग्मुरालयान् ॥ १४
सह सात्यकिना शौरिरर्जुनस्य निवेशनम् ।
विवेश पुरुषव्याघ्रो व्याघ्रो गिरिगुहामिव ॥ १५
तत्र भक्ष्यान्नपानैस्ते समुपेताः सुखोषिताः ।
सुखप्रबुद्धा राजानमुपतस्थुर्युधिष्ठिरम् ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

जनमजेय उवाच ।

प्राप्य राज्यं महातेजा धर्मराजो युधिष्ठिरः ।
यदन्यदकरोद्विप्र तन्मे वक्तुमिहार्हसि ॥ १
भगवान्वा हृषीकेशस्त्रैलोक्यस्य परो गुरुः ।
ऋषे यदकरोद्वीरस्तच्च व्याख्यातुमर्हसि ॥ २

वैशंपायन उवाच ।

शृणु राजेन्द्र तत्त्वेन कीर्त्यमानं मयानघ ।
वासुदेवं पुरस्कृत्य यदकुर्वत पाण्डवाः ॥ ३
प्राप्य राज्यं महातेजा धर्मराजो युधिष्ठिरः ।
चातुर्वर्ण्यं यथायोगं स्वे स्वे धर्मे न्यवेशयत् ॥ ४
ब्राह्मणानां सहस्रं च स्नातकानां महात्मनाम् ।
सहस्रनिष्कमेकैकं वाचयामास पाण्डवः ॥ ५
तथानुजीविनो भृत्यान्संश्रितानतिथीनपि ।
कामैः संतर्पयामास कृपणांस्तर्ककानपि ॥ ६
पुरोहिताय धौम्याय प्रादादयुतशः स गाः ।
धनं सुवर्णं रजतं वासांसि विविधानि च ॥ ७
कृपाय च महाराज गुरुवृत्तिमवर्तत ।
विदुराय च धर्मात्मा पूजां चक्रे यतव्रतः ॥ ८
भक्ष्यान्नपानैर्विविधैर्वासोभिः शयनासनैः ।
सर्वान्संतोषयामास संश्रितान्ददतां वरः ॥ ९
लब्धप्रशमनं कृत्वा स राजा राजसत्तम ।
युयुत्सोर्धार्तराष्ट्रस्य पूजां चक्रे महायशाः ॥ १०
धृतराष्ट्राय तद्राज्यं गान्धार्यै विदुराय च ।
निवेद्य स्वस्थवद्राजन्नास्ते राजा युधिष्ठिरः ॥ ११
तथा सर्वं स नगरं प्रसाद्य जनमेजय ।
वासुदेवं महात्मानमभ्यगच्छत्कृताञ्जलिः ॥ १२
ततो महति पर्यङ्के मणिकाञ्चनभूषिते ।
ददर्श कृष्णमासीनं नीलं मेराविवाम्बुदम् ॥ १३
जाज्वल्यमानं वपुषा दिव्याभरणभूषितम् ।
पीतकौशेयसंवीतं हेम्नीवोपहितं मणिम् ॥ १४
कौस्तुभेन उरःस्थेन मणिनाभिविराजितम् ।
उद्यतेवोदयं शैलं सूर्येणाप्तकिरीटिनम् ।
नौपम्यं विद्यते यस्य त्रिषु लोकेषु किंचन ॥ १५
सोऽभिगम्य महात्मानं विष्णुं पुरुषविग्रहम् ।
उवाच मधुराभाषः स्मितपूर्वमिदं तदा ॥ १६
सुखेन ते निशा कच्चिद्व्युष्टा बुद्धिमतां वर ।
कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवाच्युत ॥ १७
तव ह्याश्रित्य तां देवीं बुद्धिं बुद्धिमतां वर ।
वयं राज्यमनुप्राप्ताः पृथिवी च वशे स्थिता ॥ १८
भवत्प्रसादाद्भगवंस्त्रिलोकगतिविक्रम ।
जयः प्राप्तो यशश्चाग्र्यं न च धर्माच्च्युता वयम् ॥ १९
तं तथा भाषमाणं तु धर्मराजं युधिष्ठिरम् ।
नोवाच भगवान्किंचिद्ध्यानमेवान्वपद्यत ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

युधिष्ठिर उवाच ।

किमिदं परमाश्चर्यं ध्यायस्यमितविक्रम ।

कच्चिल्लोकत्रयस्यास्य स्वस्ति लोकपरायण ॥ १
चतुर्थं ध्यानमार्गं त्वमालम्ब्य पुरुषोत्तम ।
अपक्रान्तो यतो देव तेन मे विस्मितं मनः ॥ २
निगृहीतो हि वायुस्ते पञ्चकर्मा शरीरगः ।
इन्द्रियाणि च सर्वाणि मनसि स्थापितानि ते ॥ ३
इन्द्रियाणि मनश्चैव बुद्धौ संवेशितानि ते ।
सर्वश्चैव गणो देव क्षेत्रज्ञे ते निवेशितः ॥ ४
नेङ्गन्ति तव रोमाणि स्थिरा बुद्धिस्तथा मनः ।
स्थाणुकुड्यशिलाभूतो निरीहश्चासि माधव ॥ ५
यथा दीपो निवातस्थो निरिङ्गो ज्वलतेऽच्युत ।
तथासि भगवन्देव निश्चलो दृढनिश्चयः ॥ ६
यदि श्रोतुमिहार्हामि न रहस्यं च ते यदि ।
छिन्धि मे संशयं देव प्रपन्नायाभियाचते ॥ ७
त्वं हि कर्ता विकर्ता च त्वं क्षरं चाक्षरं च हि ।
अनादिनिधनश्चाद्यस्त्वमेव पुरुषोत्तम ॥ ८
त्वत्प्रपन्नाय भक्ताय शिरसा प्रणताय च ।
ध्यानस्यास्य यथातत्त्वं ब्रूहि धर्मभृतां वर ॥ ९

वैशंपायन उवाच ।

ततः स्वगोचरे न्यस्य मनो बुद्धीन्द्रियाणि च ।
स्मितपूर्वमुवाचेदं भगवान्वासवानुजः ॥ १०
शरतल्पगतो भीष्मः शाम्यन्निव हुताशनः ।
मां ध्याति पुरुषव्याघ्रस्ततो मे तद्गतं मनः ॥ ११
यस्य ज्यातलनिर्घोषं विस्फूर्जितमिवाशनेः ।
न सहेद्देवराजोऽपि तमस्मि मनसा गतः ॥ १२
येनाभिद्रुत्य तरसा समस्तं राजमण्डलम् ।
ऊढास्तिस्रः पुरा कन्यास्तमस्मि मनसा गतः ॥ १३
त्रयोविंशतिरात्रं यो योधयामास भार्गवम् ।
न च रामेण निस्तीर्णस्तमस्मि मनसा गतः ॥ १४
यं गङ्गा गर्भविधिना धारयामास पार्थिवम् ।
वसिष्ठशिष्यं तं तात मनसास्मि गतो नृप ॥ १५
दिव्यास्त्राणि महातेजा यो धारयति बुद्धिमान् ।
साङ्गांश्च चतुरो वेदांस्तमस्मि मनसा गतः ॥ १६
रामस्य दयितं शिष्यं जामदग्न्यस्य पाण्डव ।
आधारं सर्वविद्यानां तमस्मि मनसा गतः ॥ १७
एकीकृत्येन्द्रियग्रामं मनः संयम्य मेधया ।
शरणं मामुपागच्छत्ततो मे तद्गतं मनः ॥ १८
स हि भूतं च भव्यं च भवच्च पुरुषर्षभ ।
वेत्ति धर्मभृतां श्रेष्ठस्ततो मे तद्गतं मनः ॥ १९
तस्मिन्हि पुरुषव्याघ्रे कर्मभिः स्वैर्दिवं गते ।
भविष्यति मही पार्थ नष्टचन्द्रेव शर्वरी ॥ २०
तद्युधिष्ठिर गाङ्गेयं भीष्मं भीमपराक्रमम् ।
अभिगम्योपसंगृह्य पृच्छ यत्ते मनोगतम् ॥ २१
चातुर्वेद्यं चातुर्होत्रं चातुराश्रम्यमेव च ।
चातुर्वर्ण्यस्य धर्मं च पृच्छैनं पृथिवीपते ॥ २२
तस्मिन्नस्तमिते भीष्मे कौरवाणां धुरंधरे ।
ज्ञानान्यल्पीभविष्यन्ति तस्मात्त्वां चोदयाम्यहम् ॥
तच्छ्रुत्वा वासुदेवस्य तथ्यं वचनमुत्तमम् ।
साश्रुकण्ठः स धर्मज्ञो जनार्दनमुवाच ह ॥ २४
यद्भवानाह भीष्मस्य प्रभावं प्रति माधव ।
तथा तन्नात्र संदेहो विद्यते मम मानद ॥ २५
महाभाग्यं हि भीष्मस्य प्रभावश्च महात्मनः ।
श्रुतं मया कथयतां ब्राह्मणानां महात्मनाम् ॥ २६
भवांश्च कर्ता लोकानां यद्ब्रवीष्यरिसूदन ।
तथा तदनभिध्येयं वाक्यं यादवनन्दन ॥ २७
यतस्त्वनुग्रहकृता बुद्धिस्ते मयि माधव ।
त्वामग्रतः पुरस्कृत्य भीष्मं पश्यामहे वयम् ॥ २८
आवृत्ते भगवत्यर्के स हि लोकान्गमिष्यति ।
त्वद्दर्शनं महाबाहो तस्मादर्हति कौरवः ॥ २९
तव ह्याद्यस्य देवस्य क्षरस्यैवाक्षरस्य च ।
दर्शनं तस्य लाभः स्यात्त्वं हि ब्रह्ममयो निधिः ॥ ३०

श्रुत्वैतद्धर्मराजस्य वचनं मधुसूदनः ।
पार्श्वस्थं सात्यकिं प्राह रथो मे युज्यतामिति ॥ ३१
सात्यकिस्तूपनिष्क्रम्य केशवस्य समीपतः ।
दारुकं प्राह कृष्णस्य युज्यतां रथ इत्युत ॥ ३२
स सात्यकेराशु वचो निशम्य
रथोत्तमं काञ्चनभूषिताङ्गम् ।
मसारगल्वर्कमयैर्विभङ्गै-
र्विभूषितं हेमपिनद्धचक्रम् ॥ ३३
दिवाकरांशुप्रभमाशुगामिनं
विचित्रनानामणिरत्नभूषितम् ।
नवोदितं सूर्यमिव प्रतापिनं
विचित्रतार्क्ष्यध्वजिनं पताकिनम् ॥ ३४
सुग्रीवसैन्यप्रमुखैर्वराश्वै-
र्मनोजवैः काञ्चनभूषिताङ्गैः ।
सुयुक्तमावेदयदच्युताय
कृताञ्जलिर्दारुको राजसिंह ॥ ३५

इति श्रीमहाभारते शान्तिपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

जनमेजय उवाच ।

शरतल्पे शयानस्तु भरतानां पितामहः ।
कथमुत्सृष्टवान्देहं कं च योगमधारयत् ॥ १

वैशंपायन उवाच ।

शृणुष्वावहितो राजञ्शुचिर्भूत्वा समाहितः ।
भीष्मस्य कुरुशार्दूल देहोत्सर्गं महात्मनः ॥ २
निवृत्तमात्रे त्वयन उत्तरे वै दिवाकरे ।
समावेशयदात्मानमात्मन्येव समाहितः ॥ ३
विकीर्णांशुरिवादित्यो भीष्मः शरशतैश्चितः ।
शिश्ये परमया लक्ष्म्या वृतो ब्राह्मणसत्तमैः ॥ ४
व्यासेन वेदश्रवसा नारदेन सुरर्षिणा ।
देवस्थानेन वात्स्येन तथाश्मकसुमन्तुना ॥ ५
एतैश्चान्यैर्मुनिगणैर्महाभागैर्महात्मभिः ।
श्रद्धादमपुरस्कारैर्वृतश्चन्द्र इव ग्रहैः ॥ ६
भीष्मस्तु पुरुषव्याघ्रः कर्मणा मनसा गिरा ।
शरतल्पगतः कृष्णं प्रदध्यौ प्राञ्जलिः स्थितः ॥ ७
स्वरेण पुष्टनादेन तुष्टाव मधुसूदनम् ।
योगेश्वरं पद्मनाभं विष्णुं जिष्णुं जगत्पतिम् ॥ ८
कृताञ्जलिः शुचिर्भूत्वा वाग्विदां प्रवरः प्रभुम् ।
भीष्मः परमधर्मात्मा वासुदेवमथास्तुवत् ॥ ९
आरिराधयिषुः कृष्णं वाचं जिगमिषामि याम् ।
तया व्याससमासिन्या प्रीयतां पुरुषोत्तमः ॥ १०
शुचिः शुचिषदं हंसं तत्परः परमेष्ठिनम् ।
युक्त्वा सर्वात्मनात्मानं तं प्रपद्ये प्रजापतिम् ॥ ११
यस्मिन्विश्वानि भूतानि तिष्ठन्ति च विशन्ति च ।
गुणभूतानि भूतेशे सूत्रे मणिगणा इव ॥ १२
यस्मिन्नित्ये तते तन्तौ दृढे स्रगिव तिष्ठति ।
सदसद्ग्रथितं विश्वं विश्वाङ्गे विश्वकर्मणि ॥ १३
हरिं सहस्रशिरसं सहस्रचरणेक्षणम् ।
प्राहुर्नारायणं देवं यं विश्वस्य परायणम् ॥ १४
अणीयसामणीयांसं स्थविष्ठं च स्थवीयसाम् ।
गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि ॥ १५
यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्माणं सत्यं सत्येषु सामसु ॥ १६
चतुर्भिश्चतुरात्मानं सत्त्वस्थं सात्वतां पतिम् ।
यं दिव्यैर्देवमर्चन्ति गुह्यैः परमनामभिः ॥ १७
यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः ॥ १८
यमनन्यो व्यपेताशीरात्मानं वीतकल्मषम् ।
दृष्ट्वानन्त्याय गोविन्दं पश्यत्यात्मन्यवस्थितम् ॥ १९
पुराणे पुरुषः प्रोक्तो ब्रह्मा प्रोक्तो युगादिषु ।

क्षये संकर्षणः प्रोक्तस्तमुपास्यमुपास्महे ॥ २०
अतिवाय्विन्द्रकर्माणमतिसूर्याग्नितेजसम् ।
अतिबुद्धीन्द्रियात्मानं तं प्रपद्ये प्रजापतिम् ॥ २१
यं वै विश्वस्य कर्तारं जगतस्तस्थुषां पतिम् ।
वदन्ति जगतोऽध्यक्षमक्षरं परमं पदम् ॥ २२
हिरण्यवर्णं यं गर्भमदितिर्दैत्यनाशनम् ।
एकं द्वादशधा जज्ञे तस्मै सूर्यात्मने नमः ॥ २३
शुक्ले देवान्पितॄन्कृष्णे तर्पयत्यमृतेन यः ।
यश्च राजा द्विजातीनां तस्मै सोमात्मने नमः ॥ २४
महतस्तमसः पारे पुरुषं ज्वलनद्युतिम् ।
यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः ॥२५
यं बृहन्तं बृहत्युक्थे यमग्नौ यं महाध्वरे ।
यं विप्रसंघा गायन्ति तस्मै वेदात्मने नमः ॥ २६
ऋग्यजुःसामधामानं दशार्धहविराकृतिम् ।
यं सप्ततन्तुं तन्वन्ति तस्मै यज्ञात्मने नमः ॥ २७
यः सुपर्णो यजुर्नाम छन्दोगात्रस्त्रिवृच्छिराः ।
रथंतरबृहत्यक्षस्तस्मै स्तोत्रात्मने नमः ॥ २८
ः सहस्रसवे सत्रे जज्ञे विश्वसृजामृषिः ।
हैरण्यवर्णः शकुनिस्तस्मै हंसात्मने नमः ॥ २९
पदाङ्गं संधिपर्वाणं स्वरव्यञ्जनलक्षणम् ।
यमाहुरक्षरं नित्यं तस्मै वागात्मने नमः ॥ ३०
यश्चिनोति सतां सेतुमृतेनामृतयोनिना ।
धर्मार्थव्यवहाराङ्गैस्तस्मै सत्यात्मने नमः ॥ ३१
यं पृथग्धर्मचरणाः पृथग्धर्मफलैषिणः ।
पृथग्धर्मैः समर्चन्ति तस्मै धर्मात्मने नमः ॥ ३२
यं तं व्यक्तस्थमव्यक्तं विचिन्वन्ति महर्षयः ।
क्षेत्रे क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः ॥ ३३
यं दृगात्मानमात्मस्थं वृतं षोडशभिर्गुणैः ।
प्राहुः सप्तदशं सांख्यास्तस्मै सांख्यात्मने नमः ॥ ३४
यं विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥३५
अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ॥
योऽसौ युगसहस्रान्ते प्रदीप्तार्चिर्विभावसुः ।
संभक्षयति भूतानि तस्मै घोरात्मने नमः ॥ ३७
संभक्ष्य सर्वभूतानि कृत्वा चैकार्णवं जगत् ।
बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः ॥ ३८
सहस्रशिरसे तस्मै पुरुषायामितात्मने ।
चतुःसमुद्रपर्याययोगनिद्रात्मने नमः ॥ ३९
अजस्य नाभावध्येकं यस्मिन्विश्वं प्रतिष्ठितम् ।
पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः ॥ ४०
यस्य केशेषु जीमूता नद्यः सर्वाङ्गसंधिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥ ४१
युगेष्वावर्तते योऽशैर्दिनर्त्वयनहायनैः ।
सर्गप्रलययोः कर्ता तस्मै कालात्मने नमः ॥ ४२
ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः ।
पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने नमः ॥४३
यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः ।
सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः ॥ ४४
विषये वर्तमानानां यं तं वैशेषिकैर्गुणैः ।
प्राहुर्विषयगोप्तारं तस्मै गोप्त्रात्मने नमः ॥ ४५
अन्नपानेन्धनमयो रसप्राणविवर्धनः ।
यो धारयति भूतानि तस्मै प्राणात्मने नमः ॥ ४६
परः कालात्परो यज्ञात्परः सदसतोश्च यः ।
अनादिरादिर्विश्वस्य तस्मै विश्वात्मने नमः ॥ ४७
यो मोहयति भूतानि स्नेहरागानुबन्धनैः ।
सर्गस्य रक्षणार्थाय तस्मै मोहात्मने नमः ॥ ४८
आत्मज्ञानमिदं ज्ञानं ज्ञात्वा पञ्चस्ववस्थितम् ।
यं ज्ञानिनोऽधिगच्छन्ति तस्मै ज्ञानात्मने नमः ॥४९
अप्रमेयशरीराय सर्वतोऽनन्तचक्षुषे ।

अपारपरिमेयाय तस्मै चिन्त्यात्मने नमः ॥ ५०
जटिने दण्डिने नित्यं लम्बोदरशरीरिणे ।
कमण्डलुनिषङ्गाय तस्मै ब्रह्मात्मने नमः ॥ ५१
शूलिने त्रिदशेशाय त्र्यम्बकाय महात्मने ।
भस्मदिग्धोर्ध्वलिङ्गाय तस्मै रुद्रात्मने नमः ॥ ५२
पञ्चभूतात्मभूताय भूतादिनिधनात्मने ।
अक्रोधद्रोहमोहाय तस्मै शान्तात्मने नमः ॥ ५३
यस्मिन्सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।
यश्च सर्वमयो नित्यं तस्मै सर्वात्मने नमः ॥ ५४
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसंभव ।
अपवर्गोऽसि भूतानां पञ्चानां परतः स्थितः ॥ ५५
नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु ।
नमस्ते दिक्षु सर्वासु त्वं हि सर्वपरायणम् ॥ ५६
नमस्ते भगवन्विष्णो लोकानां प्रभवाप्यय ।
त्वं हि कर्ता हृषीकेश संहर्ता चापराजितः ॥ ५७
तेन पश्यामि ते दिव्यान्भावान्हि त्रिषु वर्त्मसु ।
तच्च पश्यामि तत्त्वेन यत्ते रूपं सनातनम् ॥ ५८
दिवं ते शिरसा व्याप्तं पद्भ्यां देवी वसुंधरा ।
विक्रमेण त्रयो लोकाः पुरुषोऽसि सनातनः ॥ ५९
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ ६०
यथा विष्णुमयं सत्यं यथा विष्णुमयं हविः ।
यथा विष्णुमयं सर्वं पाप्मा मे नश्यतां तथा ॥ ६१
त्वां प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे ।
यच्छ्रेयः पुण्डरीकाक्ष तद्ध्यायस्व सुरोत्तम ॥ ६२
इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः ।
वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥ ६३
एतावदुक्त्वा वचनं भीष्मस्तद्गतमानसः ।
नम इत्येव कृष्णाय प्रणाममकरोत्तदा ॥ ६४
अभिगम्य तु योगेन भक्तिं भीष्मस्य माधवः ।
त्रैकाल्यदर्शनं ज्ञानं दिव्यं दातुं ययौ हरिः ॥ ६५
तस्मिन्नुपरते शब्दे ततस्ते ब्रह्मवादिनः ।
भीष्मं वाग्भिर्बाष्पकण्ठास्तमानर्चुर्महामतिम् ॥ ६६
ते स्तुवन्तश्च विप्राग्र्याः केशवं पुरुषोत्तमम् ।
भीष्मं च शनकैः सर्वे प्रशशंसुः पुनः पुनः ॥ ६७
विदित्वा भक्तियोगं तु भीष्मस्य पुरुषोत्तमः ।
सहसोत्थाय संहृष्टो यानमेवान्वपद्यत ॥ ६८
केशवः सात्यकिश्चैव रथेनैकेन जग्मतुः ।
अपरेण महात्मानौ युधिष्ठिरधनंजयौ ॥ ६९
भीमसेनो यमौ चोभौ रथमेकं समास्थितौ ।
कृपो युयुत्सुः सूतश्च संजयश्चापरं रथम् ॥ ७०
ते रथैर्नगराकारैः प्रयाताः पुरुषर्षभाः ।
नेमिघोषेण महता कम्पयन्तो वसुंधराम् ॥ ७१
ततो गिरः पुरुषवरस्तवान्विता
द्विजेरिताः पथि सुमनाः स शुश्रुवे ।
कृताञ्जलिं प्रणतमथापरं जनं
स केशिहा मुदितमनाभ्यनन्दत ॥ ७२

इति श्रीमहाभारते शान्तिपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

वैशंपायन उवाच ।

ततः स च हृषीकेशः स च राजा युधिष्ठिरः ।
कृपादयश्च ते सर्वे चत्वारः पाण्डवाश्च ह ॥ १
रथैस्ते नगराकारैः पताकाध्वजशोभितैः ।
ययुराशु कुरुक्षेत्रं वाजिभिः शीघ्रगामिभिः ॥ २
तेऽवतीर्य कुरुक्षेत्रं केशमज्जास्थिसंकुलम् ।
देहन्यासः कृतो यत्र क्षत्रियैस्तैर्महात्मभिः ॥ ३
गजाश्वदेहास्थिचयैः पर्वतैरिव संचितम् ।
नरशीर्षकपालैश्च शङ्खैरिव समाचितम् ॥ ४
चितासहस्रैर्निचितं वर्मशस्त्रसमाकुलम् ।

आपानभूमिं कालस्य तदा भुक्तोज्झितामिव ॥ ५
भूतसंघानुचरितं रक्षोगणनिषेवितम् ।
पश्यन्तस्ते कुरुक्षेत्रं ययुराशु महारथाः ॥ ६
गच्छन्नेव महाबाहुः सर्वयादवनन्दनः ।
युधिष्ठिराय प्रोवाच जामदग्न्यस्य विक्रमम् ॥ ७
अमी रामह्रदाः पञ्च दृश्यन्ते पार्थ दूरतः ।
येषु संतर्पयामास पूर्वान्क्षत्रियशोणितैः ॥ ८
त्रिःसप्तकृत्वो वसुधां कृत्वा निःक्षत्रियां प्रभुः ।
इहेदानीं ततो रामः कर्मणो विरराम ह ॥ ९

युधिष्ठिर उवाच ।

त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया तदा ।
रामेणेति यदात्थ त्वमत्र मे संशयो महान् ॥ १०
क्षत्रबीजं यदा दग्धं रामेण यदुपुंगव ।
कथं भूयः समुत्पत्तिः क्षत्रस्यामितविक्रम ॥ ११
महात्मना भगवता रामेण यदुपुंगव ।
कथमुत्सादितं क्षत्रं कथं वृद्धिं पुनर्गतम् ॥ १२
महाभारतयुद्धे हि कोटिशः क्षत्रिया हताः ।
तथाभूच्च मही कीर्णा क्षत्रियैर्वदतां वर ॥ १३
एवं मे छिन्धि वार्ष्णेय संशयं तार्क्ष्यकेतन ।
आगमो हि परः कृष्ण त्वत्तो नो वासवानुज ॥ १४

वैशंपायन उवाच ।

ततो व्रजन्नेव गदाग्रजः प्रभुः
शशंस तस्मै निखिलेन तत्त्वतः ।
युधिष्ठिरायाप्रतिमौजसे तदा
यथाभवत्क्षत्रियसंकुला मही ॥ १५

इति श्रीमहाभारते शान्तिपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

वासुदेव उवाच ।

शृणु कौन्तेय रामस्य मया यावत्परिश्रुतम् ।
महर्षीणां कथयतां कारणं तस्य जन्म च ॥ १
यथा च जामदग्न्येन कोटिशः क्षत्रिया हताः ।
उद्भूता राजवंशेषु ये भूयो भारते हताः ॥ २
जह्नोरजह्नुस्तनयो बल्लवस्तस्य चात्मजः ।
कुशिको नाम धर्मज्ञस्तस्य पुत्रो महीपतिः ॥ ३
उग्रं तपः समातिष्ठत्सहस्राक्षसमो भुवि ।
पुत्रं लभेयमजितं त्रिलोकेश्वरमित्युत ॥ ४
तमुग्रतपसं दृष्ट्वा सहस्राक्षः पुरंदरः ।
समर्थः पुत्रजनने स्वयमेवैत्य भारत ॥ ५
पुत्रत्वमगमद्राजंस्तस्य लोकेश्वरेश्वरः ।
गाधिर्नामाभवत्पुत्रः कौशिकः पाकशासनः ॥ ६
तस्य कन्याभवद्राजन्नाम्ना सत्यवती प्रभो ।
तां गाधिः कविपुत्राय सोर्चीकाय ददौ प्रभुः ॥ ७
ततः प्रीतस्तु कौन्तेय भार्गवः कुरुनन्दन ।
पुत्रार्थे श्रपयामास चरुं गाधेस्तथैव च ॥ ८
आहूय चाह तां भार्यामृचीको भार्गवस्तदा ।
उपयोज्यश्चरुरयं त्वया मात्राप्ययं तव ॥ ९
तस्या जनिष्यते पुत्रो दीप्तिमान्क्षत्रियर्षभः ।
अजय्यः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः ॥ १०
तवापि पुत्रं कल्याणि धृतिमन्तं तपोन्वितम् ।
शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति ॥ ११
इत्येवमुक्त्वा तां भार्यामृचीको भृगुनन्दनः ।
तपस्यभिरतो धीमाञ्जगामारण्यमेव ह ॥ १२
एतस्मिन्नेव काले तु तीर्थयात्रापरो नृपः ।
गाधिः सदारः संप्राप्त ऋचीकस्याश्रमं प्रति ॥ १३
चरुद्वयं गृहीत्वा तु राजन्सत्यवती तदा ।
भर्तुर्वाक्यादथाव्यग्रा मात्रे हृष्टा न्यवेदयत् ॥ १४
माता तु तस्याः कौन्तेय दुहित्रे स्वं चरुं ददौ ।
तस्याश्चरुमथाज्ञातमात्मसंस्थं चकार ह ॥ १५
अथ सत्यवती गर्भं क्षत्रियान्तकरं तदा ।

धारयामास दीप्तेन वपुषा घोरदर्शनम् ॥ १६
तामृचीकस्तदा दृष्ट्वा ध्यानयोगेन वै ततः ।
अब्रवीद्राजशार्दूल स्वां भार्यां वरवर्णिनीम् ॥ १७
मात्रासि व्यंसिता भद्रे चरुव्यत्यासहेतुना ।
जनिष्यते हि ते पुत्रः क्रूरकर्मा महाबलः ॥ १८
जनिष्यते हि ते भ्राता ब्रह्मभूतस्तपोधनः ।
विश्वं हि ब्रह्म तपसा मया तत्र समर्पितम् ॥ १९
सैवमुक्ता महाभागा भर्त्रा सत्यवती तदा ।
पपात शिरसा तस्मै वेपन्ती चाब्रवीदिदम् ॥ २०
नार्होऽसि भगवन्नद्य वक्तुमेवंविधं वचः ।
ब्राह्मणापसदं पुत्रं प्राप्स्यसीति महामुने ॥ २१

ऋचीक उवाच ।

नैष संकल्पितः कामो मया भद्रे तथा त्वयि ।
उग्रकर्मा भवेत्पुत्रश्चरुर्माता च कारणम् ॥ २२

सत्यवत्युवाच ।

इच्छँल्लोकानपि मुने सृजेथाः किं पुनर्मम ।
शमात्मकमृजुं पुत्रं लभेयं जपतां वर ॥ २३

ऋचीक उवाच ।

नोक्तपूर्वं मया भद्रे स्वैरेष्वप्यनृतं वचः ।
किमुताग्निं समाधाय मन्त्रवच्चरुसाधने ॥ २४

सत्यवत्युवाच ।

काममेवं भवेत्पौत्रो ममेह तव चैव ह ।
शमात्मकमृजुं पुत्रं लभेयं जपतां वर ॥ २५

ऋचीक उवाच ।

पुत्रे नास्ति विशेषो मे पौत्रे वा वरवर्णिनि ।
यथा त्वयोक्तं तु वचस्तथा भद्रे भविष्यति ॥ २६

वासुदेव उवाच ।

ततः सत्यवती पुत्रं जनयामास भार्गवम् ।
तपस्यभिरतं शान्तं जमदग्निं शमात्मकम् ॥ २७
विश्वामित्रं च दायादं गाधिः कुशिकनन्दनः ।
प्राप ब्रह्मर्षिसमितं विश्वेन ब्रह्मणा युतम् ॥ २८
आर्चीको जनयामास जमदग्निः सुदारुणम् ।
सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदे च पारगम् ।
रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकम् ॥ २९
एतस्मिन्नेव काले तु कृतवीर्यात्मजो बली ।
अर्जुनो नाम तेजस्वी क्षत्रियो हैहयान्वयः ॥ ३०
ददाह पृथिवीं सर्वां सप्तद्वीपां सपत्तनाम् ।
स्वबाहुबलेनाजौ धर्मेण परमेण च ॥ ३१
तृषितेन स कौरव्य भिक्षितश्चित्रभानुना ।
सहस्रबाहुर्विक्रान्तः प्रादाद्भिक्षामथाग्नये ॥ ३२
ग्रामान्पुराणि घोषांश्च पत्तनानि च वीर्यवान् ।
जज्वाल तस्य बाणैस्तु चित्रभानुर्दिधक्षया ॥ ३३
स तस्य पुरुषेन्द्रस्य प्रभावेन महातपाः ।
ददाह कार्तवीर्यस्य शैलानथ वनानि च ॥ ३४
स शून्यमाश्रमारण्यं वरुणस्यात्मजस्य तत् ।
ददाह पवनेनेद्धश्चित्रभानुः सहैहयः ॥ ३५
आपवस्तं ततो रोषाच्छशापार्जुनमच्युत ।
दग्धेऽऽश्रमे महाराज कार्तवीर्येण वीर्यवान् ॥ ३६
त्वया न वर्जितं मोहाद्यस्माद्वनमिदं मम ।
दग्धं तस्माद्रणे रामो बाहूंस्ते छेत्स्यतेऽर्जुन ॥ ३७
अर्जुनस्तु महाराज बली नित्यं शमात्मकः ।
ब्रह्मण्यश्च शरण्यश्च दाता शूरश्च भारत ॥ ३८
तस्य पुत्राः सुबलिनः शापेनासन्पितुर्वधे ।
निमित्तमवलिप्ता वै नृशंसाश्चैव नित्यदा ॥ ३९
जमदग्निधेन्वास्ते वत्समानिन्युर्भरतर्षभ ।
अज्ञातं कार्तवीर्यस्य हैहयेन्द्रस्य धीमतः ॥ ४०
ततोऽर्जुनस्य बाहूंस्तु छित्त्वा वै पौरुषान्वितः ।
तं रुवन्तं ततो वत्सं जामदग्न्यः स्वमाश्रमम् ।
प्रत्यानयत राजेन्द्र तेषामन्तःपुरात्प्रभुः ॥ ४१
अर्जुनस्य सुतास्ते तु संभूयाबुद्धयस्तदा ।

गत्वाश्रममसंबुद्धं जमदग्नेर्महात्मनः ॥ ४२
अपातयन्त भल्लाग्रैः शिरः कायान्नराधिप ।
समित्कुशार्थं रामस्य निर्गतस्य महात्मनः ॥ ४३
ततः पितृवधामर्षाद्रामः परममन्युमान् ।
निःक्षत्रियां प्रतिश्रुत्य महीं शस्त्रमगृह्णत ॥ ४४
ततः स भृगुशार्दूलः कार्तवीर्यस्य वीर्यवान् ।
विक्रम्य निजघानाशु पुत्रान्पौत्रांश्च सर्वशः ॥ ४५
स हैहयसहस्राणि हत्वा परममन्युमान् ।
चकार भार्गवो राजन्महीं शोणितकर्दमाम् ॥ ४६
स तथा सुमहातेजाः कृत्वा निःक्षत्रियां महीम् ।
कृपया परयाविष्टो वनमेव जगाम ह ॥ ४७
ततो वर्षसहस्रेषु समतीतेषु केषुचित् ।
क्षोभं संप्राप्तवांस्तीव्रं प्रकृत्या कोपनः प्रभुः ॥ ४८
विश्वामित्रस्य पौत्रस्तु रैभ्यपुत्रो महातपाः ।
परावसुर्महाराज क्षिप्त्वाह जनसंसदि ॥ ४९
ये ते ययातिपतने यज्ञे सन्तः समागताः ।
प्रतर्दनप्रभृतयो राम किं क्षत्रिया न ते ॥ ५०
मिथ्याप्रतिज्ञो राम त्वं कत्थसे जनसंसदि ।
भयात्क्षत्रियवीराणां पर्वतं समुपाश्रितः ॥ ५१
स पुनः क्षत्रियशतैः पृथिवीमनुसंतताम् ।
परावसोस्तदा श्रुत्वा शस्त्रं जग्राह भार्गवः ॥ ५२
ततो ये क्षत्रिया राजञ्शतशस्तेन जीविताः ।
ते विवृद्धा महावीर्याः पृथिवीपतयोऽभवन् ॥ ५३
स पुनस्ताञ्जघानाशु बालानपि नराधिप ।
गर्भस्थैस्तु मही व्याप्ता पुनरेवाभवत्तदा ॥ ५४
जातं जातं स गर्भं तु पुनरेव जघान ह ।
अरक्षंश्च सुतान्कांश्चित्तदा क्षत्रिययोषितः ॥ ५५
त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
दक्षिणामश्वमेधान्ते कश्यपायाददत्ततः ॥ ५६
क्षत्रियाणां तु शेषार्थं करेणोद्दिश्य कश्यपः ।
स्रुक्प्रग्रहवता राजञ्श्रीमान्वाक्यमथाब्रवीत् ॥ ५७
गच्छ पारं समुद्रस्य दक्षिणस्य महामुने ।
न ते मद्विषये राम वस्तव्यमिह कर्हिचित् ॥ ५८
ततः शूर्पारकं देशं सागरस्तस्य निर्ममे ।
संत्रासाज्जामदग्न्यस्य सोऽपरान्तं महीतलम् ॥ ५९
कश्यपस्तु *महाराज प्रतिगृह्य महीमिमाम्* ।
कृत्वा ब्राह्मणसंस्थां वै प्रविवेश महावनम् ॥ ६०
ततः शूद्राश्च वैश्याश्च यथास्वैरप्रचारिणः ।
अवर्तन्त द्विजाग्र्याणां दारेषु भरतर्षभ ॥ ६१
अराजके जीवलोके दुर्बला बलवत्तरैः ।
बाध्यन्ते न च वित्तेषु प्रभुत्वमिह कस्यचित् ॥ ६२
ततः कालेन पृथिवी प्रविवेश रसातलम् ।
अरक्ष्यमाणा विधिवत्क्षत्रियैर्धर्मरक्षिभिः ॥ ६३
ऊरुणा धारयामास कश्यपः पृथिवीं ततः ।
निमज्जन्तीं तदा राजंस्तेनोर्वीति मही स्मृता ॥ ६४
रक्षिणश्च समुद्दिश्य प्रायाचत्पृथिवी तदा ।
प्रसाद्य कश्यपं देवी क्षत्रियान्बाहुशालिनः ॥ ६५
सन्ति ब्रह्मन्मया गुप्ता नृषु क्षत्रियपुंगवाः ।
हैहयानां कुले जातास्ते संरक्षन्तु मां मुने ॥ ६६
अस्ति पौरवदायादो विडूरथसुतः प्रभो ।
ऋक्षैः संवर्धितो विप्र ऋक्षवत्येव पर्वते ॥ ६७
तथानुकम्पमानेन यज्वनाथामितौजसा ।
पराशरेण दायादः सौदासस्याभिरक्षितः ॥ ६८
सर्वकर्माणि कुरुते तस्यर्षेः शूद्रवद्धि सः ।
सर्वकर्मेत्यभिख्यातः स मां रक्षतु पार्थिव ॥ ६९
शिबेः पुत्रो महातेजा गोपतिर्नाम नामतः ।
वने संरक्षितो गोभिः सोऽभिरक्षतु मां मुने ॥ ७०
प्रतर्दनस्य पुत्रस्तु वत्सो नाम महायशाः ।
वत्सैः संवर्धितो गोष्ठे स मां रक्षतु पार्थिवः ॥ ७१
दधिवाहनपौत्रस्तु पुत्रो दिविरथस्य ह ।

अङ्गः स गौतमेनापि गङ्गाकूलेऽभिरक्षितः ॥ ७२
बृहद्रथो महाबाहुर्भुवि भूतिपुरस्कृतः ।
गोलाङ्गूलैर्महाभागो गृध्रकूटेऽभिरक्षितः ॥ ७३
मरुत्तस्यान्ववाये तु क्षत्रियास्तुर्वसोऽन्वयः ।
मरुत्पतिसमा वीर्ये समुद्रेणाभिरक्षिताः ॥ ७४
एते क्षत्रियदायादास्तत्र तत्र परिश्रुताः ।
सम्यग्ग्राममभिरक्षन्तु ततः स्थास्यामि निश्चला ॥ ७५
एतेषां पितरश्चैव तथैव च पितामहाः ।
मदर्थं निहता युद्धे रामेणाक्लिष्टकर्मणा ॥ ७६
तेषामपचितिश्चैव मया कार्या न संशयः ।
न ह्यहं कामये नित्यमविक्रान्तेन रक्षणम् ॥ ७७
ततः पृथिव्या निर्दिष्टांस्तान्समानीय कश्यपः ।
अभ्यषिञ्चन्महीपालान्क्षत्रियान्वीर्यसंमतान् ॥ ७८
तेषां पुत्राश्च पौत्राश्च येषां वंशाः प्रतिष्ठिताः ।
एवमेतत्पुरा वृत्तं यन्मां पृच्छसि पाण्डव ॥ ७९

वैशंपायन उवाच ।

एवं ब्रुवन्नेव यदुप्रवीरो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ।
रथेन तेनाशु ययौ यथार्को
विशन्प्रभाभिर्भगवांस्त्रिलोकम् ॥ ८०

इति श्रीमहाभारते शान्तिपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

वैशंपायन उवाच ।

ततो रामस्य तत्कर्म श्रुत्वा राजा युधिष्ठिरः ।
विस्मयं परमं गत्वा प्रत्युवाच जनार्दनम् ॥ १
अहो रामस्य वार्ष्णेय शक्रस्येव महात्मनः ।
विक्रमो येन वसुधा क्रोधान्निःक्षत्रिया कृता ॥ २
गोभिः समुद्रेण तथा गोलाङ्गूलर्क्षवानरैः ।
गुप्ता रामभयोद्विग्नाः क्षत्रियाणां कुलोद्वहाः ॥ ३
अहो धन्यो हि लोकोऽयं सभाग्याश्च नरा भुवि ।
यत्र कर्मेदृशं धर्म्यं द्विजेन कृतमच्युत ॥ ४
तथा यान्तौ तदा तात तावच्युतयुधिष्ठिरौ ।
जग्मतुर्यत्र गाङ्गेयः शरतल्पगतः प्रभुः ॥ ५
ततस्ते ददृशुर्भीष्मं शरप्रस्तरशायिनम् ।
स्वरश्मिजालसंवीतं सायंसूर्यमिवानलम् ॥ ६
उपास्यमानं मुनिभिर्देवैरिव शतक्रतुम् ।
देशे परमधर्मिष्ठे नदीमोघवतीमनु ॥ ७
दूरादेव तमालोक्य कृष्णो राजा च धर्मराट् ।
चत्वारः पाण्डवाश्चैव ते च शारद्वतादयः ॥ ८
अवस्कन्द्याथ वाहेभ्यः संयम्य प्रचलं मनः ।
एकीकृत्येन्द्रियग्राममुपतस्थुर्महामुनीन् ॥ ९
अभिवाद्य च गोविन्दः सात्यकिस्ते च कौरवाः ।
व्यासादींस्तानृषीन्पश्चाद्गाङ्गेयमुपतस्थिरे ॥ १०
तपोवृद्धिं ततः पृष्ट्वा गाङ्गेयं यदुकौरवाः ।
परिवार्य ततः सर्वे निषेदुः पुरुषर्षभाः ॥ ११
ततो निशम्य गाङ्गेयं शाम्यमानमिवानलम् ।
किंचिद्दीनमना भीष्ममिति होवाच केशवः ॥ १२
कच्चिज्ज्ञानानि ते राजन्प्रसन्नानि यथा पुरा ।
कच्चिदव्याकुला चैव बुद्धिस्ते वदतां वर ॥ १३
शराभिघातदुःखात्ते कच्चिद्गात्रं न दूयते ।
मानसादपि दुःखाद्धि शारीरं बलवत्तरम् ॥ १४
वरदानात्पितुः कामं छन्दमृत्युरसि प्रभो ।
शंतनोर्धर्मशीलस्य न त्वेतच्छमकारणम् ॥ १५
सुसूक्ष्मोऽपीह देहे वै शल्यो जनयते रुजम् ।
किं पुनः शरसंघातैश्चितस्य तव भारत ॥ १६
कामं नैतत्तवाख्येयं प्राणिनां प्रभवाप्ययौ ।
भवान्ह्युपदिशेच्छ्रेयो देवानामपि भारत ॥ १७
यद्धि भूतं भविष्यच्च भवच्च पुरुषर्षभ ।
सर्वं तज्ज्ञानवृद्धस्य तव पाणाविवाहितम् ॥ १८

संसारश्चैव भूतानां धर्मस्य च फलोदयः ।
विदितस्ते महाप्राज्ञ त्वं हि ब्रह्ममयो निधिः ॥१९
त्वां हि राज्ये स्थितं स्फीते समग्राङ्गमरोगिणम् ।
स्त्रीसहस्रैः परिवृतं पश्यामीहोर्ध्वरेतसम् ॥ २०
ऋते शांतनवाद्भीष्मात्त्रिषु लोकेषु पार्थिव ।
सत्यसंधान्महावीर्याच्छूराद्धर्मैकतत्परात् ॥ २१
मृत्युमावार्य तरसा शरप्रस्तरशायिनः ।
निसर्गप्रभवं किंचिन्न च तातानुशुश्रुम ॥ २२
सत्ये तपसि दाने च यज्ञाधिकरणे तथा ।
धनुर्वेदे च वेदे च नित्यं चैवान्ववेक्षणे ॥ २३
अनृशंसं शुचिं दान्तं सर्वभूतहिते रतम् ।
महारथं त्वत्सदृशं न कंचिदनुशुश्रुम ॥ २४
त्वं हि देवान्सगन्धर्वान्ससुरासुरराक्षसान् ।
शक्त एकरथेनैव विजेतुं नात्र संशयः ॥ २५
त्वं हि भीष्म महाबाहो वसूनां वासवोपमः ।
नित्यं विप्रैः समाख्यातो नवमोऽनवमो गुणैः ॥२६
अहं हि त्वाभिजानामि यस्त्वं पुरुषसत्तम ।
त्रिदशेष्वपि विख्यातः स्वशक्त्या सुमहाबलः ॥२७
मनुष्येषु मनुष्येन्द्र न दृष्टो न च मे श्रुतः ।
भवतो यो गुणैस्तुल्यः पृथिव्यां पुरुषः क्वचित् ॥२८
त्वं हि सर्वैर्गुणै राजन्देवानप्यतिरिच्यसे ।
तपसा हि भवाञ्शक्तः स्रष्टुं लोकांश्चराचरान् ॥ २९
तदस्य तप्यमानस्य ज्ञातीनां संक्षयेण वै ।
ज्येष्ठस्य पाण्डुपुत्रस्य शोकं भीष्म व्यपानुद ॥ ३०
ये हि धर्माः समाख्याताश्चातुर्वर्ण्यस्य भारत ।
चातुराश्रम्यसंसृष्टास्ते सर्वे विदितास्तव ॥ ३१
चातुर्वेद्ये च ये प्रोक्ताश्चातुर्होत्रे च भारत ।
सांख्ये योगे च नियता ये च धर्माः सनातनाः ॥३२
चातुर्वर्ण्येन यश्चैको धर्मो न स्म विरुध्यते ।
सेव्यमानः स चैवाद्यो गाङ्गेय विदितस्तव ॥ ३३
इतिहासपुराणं च कार्त्स्न्येन विदितं तव ।
धर्मशास्त्रं च सकलं नित्यं मनसि ते स्थितम् ॥३४
ये च केचन लोकेऽस्मिन्नर्थाः संशयकारकाः ।
तेषां छेत्ता नास्ति लोके त्वदन्यः पुरुषर्षभ ॥ ३५
स पाण्डवेयस्य मनःसमुत्थितं
नरेन्द्र शोकं व्यपकर्ष मेधया ।
भवद्विधा ह्युत्तमबुद्धिविस्तरा
विमुह्यमानस्य जनस्य शान्तये ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशोऽध्यायः ॥ ५० ॥

५१

वैशंपायन उवाच ।

श्रुत्वा तु वचनं भीष्मो वासुदेवस्य धीमतः ।
किंचिदुन्नाम्य वदनं प्राञ्जलिर्वाक्यमब्रवीत् ॥ १
नमस्ते भगवन्विष्णो लोकानां निधनोद्भव ।
त्वं हि कर्ता हृषीकेश संहर्ता चापराजितः ॥ २
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसंभव ।
अपवर्गोऽसि भूतानां पञ्चानां परतः स्थितः ॥ ३
नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु ।
योगेश्वर नमस्तेऽस्तु त्वं हि सर्वपरायणम् ॥ ४
मत्संश्रितं यदात्थ त्वं वचः पुरुषसत्तम ।
तेन पश्यामि ते दिव्यान्भावान्हि त्रिषु वर्त्मसु ॥५
तच्च पश्यामि तत्त्वेन यत्ते रूपं सनातनम् ।
सप्त मार्गा निरुद्धास्ते वायोरमिततेजसः ॥ ६
दिवं ते शिरसा व्याप्तं पद्भ्यां देवी वसुंधरा ।
दिशो भुजौ रविश्चक्षुर्वीर्ये शक्रः प्रतिष्ठितः ॥ ७
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
वपुर्ह्यनुमिमीमस्ते मेघस्येव सविद्युतः ॥ ८
त्वत्प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे ।
यच्छ्रेयः पुण्डरीकाक्ष तद्ध्यायस्व सुरोत्तम ॥ ९

वासुदेव उवाच ।

यतः खलु परा भक्तिर्मयि ते पुरुषर्षभ ।
ततो वपुर्मया दिव्यं तव राजन्प्रदर्शितम् ॥ १०
न ह्यभक्ताय राजेन्द्र भक्तायानृजवे न च ।
दर्शयाम्यहमात्मानं न चादान्ताय भारत ॥ ११
भवांस्तु मम भक्तश्च नित्यं चार्जवमास्थितः ।
दमे तपसि सत्ये च दाने च निरतः शुचिः ॥ १२
अर्हस्त्वं भीष्म मां द्रष्टुं तपसा स्वेन पार्थिव ।
तव ह्युपस्थिता लोका येभ्यो नावर्तते पुनः ॥ १३
पञ्चाशतं षट् च कुरुप्रवीर
शेषं दिनानां तव जीवितस्य ।
ततः शुभैः कर्मफलोदयैस्त्वं
समेष्यसे भीष्म विमुच्य देहम् ॥ १४
एते हि देवा वसवो विमाना-
न्यास्थाय सर्वे ज्वलिताग्निकल्पाः ।
अन्तर्हितास्त्वां प्रतिपालयन्ति
काष्ठां प्रपद्यन्तमुदक्पतंगम् ॥ १५
व्यावृत्तमात्रे भगवत्युदीचीं
सूर्ये दिशं कालवशात्प्रपन्ने ।
गन्तासि लोकान्पुरुषप्रवीर
नावर्तते यानुपलभ्य विद्वान् ॥ १६
अमुं च लोकं त्वयि भीष्म याते
ज्ञानानि नङ्क्ष्यन्त्यखिलेन वीर ।
अतः स्म सर्वे त्वयि संनिकर्षं
समागता धर्मविवेचनाय ॥ १७
तज्ज्ञातिशोकोपहतश्रुताय
सत्याभिसंधाय युधिष्ठिराय ।
प्रब्रूहि धर्मार्थसमाधियुक्त-
मर्थ्यं वचोऽस्यापनुदास्य शोकम् ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि एकपञ्चाशोऽध्यायः ॥

५२

वैशंपायन उवाच ।

ततः कृष्णस्य तद्वाक्यं धर्मार्थसहितं हितम् ।
श्रुत्वा शांतनवो भीष्मः प्रत्युवाच कृताञ्जलिः ॥ १
लोकनाथ महाबाहो शिव नारायणाच्युत ।
तव वाक्यमभिश्रुत्य हर्षेणास्मि परिप्लुतः ॥ २
किं चाहमभिधास्यामि वाक्पते तव संनिधौ ।
यदा वाचोगतं सर्वं तव वाचि समाहितम् ॥ ३
यद्धि किंचित्कृतं लोके कर्तव्यं क्रियते च यत् ।
त्वत्तस्तन्निःसृतं देव लोका बुद्धिमया हि ते ॥ ४
कथयेद्देवलोकं यो देवराजसमीपतः ।
धर्मकामार्थशास्त्राणां सोऽर्थान्ब्रूयात्तवाग्रतः ॥ ५
शराभिघाताद्व्यथितं मनो मे मधुसूदन ।
गात्राणि चावसीदन्ति न च बुद्धिः प्रसीदति ॥ ६
न च मे प्रतिभा काचिदस्ति किंचित्प्रभाषितुम् ।
पीड्यमानस्य गोविन्द विषानलसमैः शरैः ॥ ७
बलं मेधा प्रजरति प्राणाः संत्वरयन्ति च ।
मर्माणि परितप्यन्ते भ्रान्तं चेतस्तथैव च ॥ ८
दौर्बल्यात्सज्जते वाङ्मे स कथं वक्तुमुत्सहे ।
साधु मे त्वं प्रसीदस्व दाशार्हकुलनन्दन ॥ ९
तत्क्षमस्व महाबाहो न ब्रूयां किंचिदच्युत ।
त्वत्संनिधौ च सीदेत वाचस्पतिरपि ब्रुवन् ॥ १०
न दिशः संप्रजानामि नाकाशं न च मेदिनीम् ।
केवलं तव वीर्येण तिष्ठामि मधुसूदन ॥ ११
स्वयमेव प्रभो तस्माद्धर्मराजस्य यद्धितम् ।
तद्ब्रवीह्याशु सर्वेषामागमानां त्वमागमः ॥ १२
कथं त्वयि स्थिते लोके शाश्वते लोककर्तरि ।
प्रब्रूयान्मद्विधः कश्चिद्गुरौ शिष्य इव स्थिते ॥ १३

वासुदेव उवाच ।

उपपन्नमिदं वाक्यं कौरवाणां धुरंधरे ।

महावीर्ये महासत्त्वे स्थिते सर्वार्थदर्शिनि ॥ १४
यत्र मामात्थ गाङ्गेय बाणघातरुजं प्रति ।
गृहाणात्र वरं भीष्म मत्प्रसादकृतं विभो ॥ १५
न ते ग्लानिर्न ते मूर्छा न दाहो न च ते रुजा ।
प्रभविष्यन्ति गाङ्गेय क्षुत्पिपासे न चाप्युत ॥ १६
ज्ञानानि च समग्राणि प्रतिभास्यन्ति तेऽनघ ।
न च ते क्वचिदासक्तिर्बुद्धेः प्रादुर्भविष्यति ॥ १७
सत्त्वस्थं च मनो नित्यं तव भीष्म भविष्यति ।
रजस्तमोभ्यां रहितं घनैर्मुक्त इवोडुराट् ॥ १८
यद्यच्च धर्मसंयुक्तमर्थयुक्तमथापि वा ।
चिन्तयिष्यसि तत्राग्र्या बुद्धिस्तव भविष्यति ॥१९
इमं च राजशार्दूल भूतग्रामं चतुर्विधम् ।
चक्षुर्दिव्यं समाश्रित्य द्रक्ष्यस्यमितविक्रम ॥ २०
चतुर्विधं प्रजाजालं संयुक्तो ज्ञानचक्षुषा ।
भीष्म द्रक्ष्यसि तत्त्वेन जले मीन इवामले॥ २१

वैशंपायन उवाच ।

ततस्ते व्याससहिताः सर्व एव महर्षयः ।
ऋग्यजुःसामसंयुक्तैर्वचोभिः कृष्णमर्चयन् ॥ २२
ततः सर्वार्तवं दिव्यं पुष्पवर्षं नभस्तलात् ।
पपात यत्र वार्ष्णेयः सगाङ्गेयः सपाण्डवः ॥ २३
वादित्राणि च दिव्यानि जगुश्चाप्सरसां गणाः ।
न चाहितमनिष्टं वा किंचित्तत्र व्यदृश्यत ॥ २४
ववौ शिवः सुखो वायुः सर्वगन्धवहः शुचिः ।
शान्तायां दिशि शान्ताश्च प्रावदन्मृगपक्षिणः ॥२५
ततो मुहूर्ताद्भगवान्सहस्रांशुर्दिवाकरः ।
दहन्वनमिवैकान्ते प्रतीच्यां प्रत्यदृश्यत ॥ २६
ततो महर्षयः सर्वे समुत्थाय जनार्दनम् ।
भीष्ममामन्त्रयांचक्रू राजानं च युधिष्ठिरम् ॥ २७
ततः प्रणाममकरोत्केशवः पाण्डवस्तथा ।
सात्यकिः संजयश्चैव स च शारद्वतः कृपः ॥ २८
ततस्ते धर्मनिरताः सम्यक्तैरभिपूजिताः ।
श्वः समेष्याम इत्युक्त्वा यथेष्टं त्वरिता ययुः ॥ २९
तथैवामन्त्र्य गाङ्गेयं केशवस्ते च पाण्डवाः ।
प्रदक्षिणमुपावृत्य रथानारुरुहुः शुभान् ॥ ३०
ततो रथैः काञ्चनदन्तकूबरै-
र्महीधराभैः समदैश्च दन्तिभिः ।
हयैः सुपर्णैरिव चाशुगामिभिः ।
पदातिभिश्चात्तशरासनादिभिः ॥ ३१
ययौ रथानां पुरतो हि सा चमू-
स्तथैव पश्चादतिमात्रसारिणी ।
पुरश्च पश्चाच्च यथा महानदी
पुरर्क्षवन्तं गिरिमेत्य नर्मदा ॥ ३२
ततः पुरस्ताद्भगवान्निशाकरः
समुत्थितस्तामभिहर्षयंश्चमूम् ।
दिवाकरापीतरसास्तथौषधीः
पुनः स्वकेनैव गुणेन योजयन् ॥ ३३
ततः पुरं सुरपुरसंनिभद्युति
प्रविश्य ते यदुवृषपाण्डवास्तदा ।
यथोचितान्भवनवरान्समाविश-
ञ्श्रमान्विता मृगपतयो गुहा इव ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

वैशंपायन उवाच

ततः प्रविश्य भवनं प्रसुप्तो मधुसूदनः ।
याममात्रावशेषायां यामिन्यां प्रत्यबुध्यत ॥ १
स ध्यानपथमाश्रित्य सर्वज्ञानानि माधवः ।
अवलोक्य ततः पश्चाद्दध्यौ ब्रह्म सनातनम् ॥ २
ततः श्रुतिपुराणज्ञाः शिक्षिता रक्तकण्ठिनः ।
अस्तुवन्विश्वकर्माणं वासुदेवं प्रजापतिम् ॥ ३

पठन्ति पाणिस्वनिकास्तथा गायन्ति गायनाः ।
शङ्खानकमृदङ्गांश्च प्रवाद्यन्त सहस्रशः ॥ ४
वीणापणववेणूनां स्वनश्चातिमनोरमः ।
प्रहास इव विस्तीर्णः शुश्रुवे तस्य वेश्मनः ॥ ५
तथा युधिष्ठिरस्यापि राज्ञो मङ्गलसंहिताः ।
उच्चेरुर्मधुरा वाचो गीतवादित्रसंहिताः ॥ ६
तत उत्थाय दाशार्हः स्नातः प्राञ्जलिरच्युतः ।
जप्त्वा गुह्यं महाबाहुरग्नीनाश्रित्य तस्थिवान् ॥ ७
ततः सहस्रं विप्राणां चतुर्वेदविदां तथा ।
गवां सहस्रेणैकैकं वाचयामास माधवः ॥ ८
मङ्गलालम्भनं कृत्वा आत्मानमवलोक्य च ।
आदर्शे विमले कृष्णस्ततः सात्यकिमब्रवीत् ॥ ९
गच्छ शैनेय जानीहि गत्वा राजनिवेशनम् ।
अपि सज्जो महातेजा भीष्मं द्रष्टुं युधिष्ठिरः ॥ १०
ततः कृष्णस्य वचनात्सात्यकिस्त्वरितो ययौ ।
उपगम्य च राजानं युधिष्ठिरमुवाच ह ॥ ११
युक्तो रथवरो राजन्वासुदेवस्य धीमतः ।
समीपमापगेयस्य प्रयास्यति जनार्दनः ॥ १२
भवत्प्रतीक्षः कृष्णोऽसौ धर्मराज महाद्युते ।
यदत्रानन्तरं कृत्यं तद्भवान्कर्तुमर्हति ॥ १३

युधिष्ठिर उवाच ।

युज्यतां मे रथवरः फल्गुनाप्रतिमद्युते ।
न सैनिकैश्च यातव्यं यास्यामो वयमेव हि ॥ १४
न च पीडयितव्यो मे भीष्मो धर्मभृतां वरः ।
अतः पुरःसराश्चापि निवर्तन्तु धनंजय ॥ १५
अद्यप्रभृति गाङ्गेयः परं गुह्यं प्रवक्ष्यति ।
ततो नेच्छामि कौन्तेय पृथग्जनसमागमम् ॥ १६

वैशंपायन उवाच ।

तद्वाक्यमाकर्ण्य तथा कुन्तीपुत्रो धनंजयः ।
युक्तं रथवरं तस्मा आचचक्षे नरर्षभ ॥ १७
ततो युधिष्ठिरो राजा यमौ भीमार्जुनावपि ।
भूतानीव समस्तानि ययुः कृष्णनिवेशनम् ॥ १८
आगच्छत्स्वथ कृष्णोऽपि पाण्डवेषु महात्मसु ।
शैनेयसहितो धीमान्रथमेवान्वपद्यत ॥ १९
रथस्थाः संविदं कृत्वा सुखां पृष्ट्वा च शर्वरीम् ।
मेघघोषै रथवरैः प्रययुस्ते महारथाः ॥ २०
मेघपुष्पं बलाहं च सैन्यं सुग्रीवमेव च ।
दारुकश्चोदयामास वासुदेवस्य वाजिनः ॥ २१
ते हया वासुदेवस्य दारुकेण प्रचोदिताः ।
गां खुराग्रैस्तथा राजँल्लिखन्तः प्रययुस्तदा ॥ २२
ते ग्रसन्त इवाकाशं वेगवन्तो महाबलाः ।
क्षेत्रं धर्मस्य कृत्स्नस्य कुरुक्षेत्रमवातरन् ॥ २३
ततो ययुर्यत्र भीष्मः शरतल्पगतः प्रभुः ।
आस्ते ब्रह्मर्षिभिः सार्धं ब्रह्मा देवगणैर्यथा ॥ २४
ततोऽवतीर्य गोविन्दो रथात्स च युधिष्ठिरः ।
भीमो गाण्डीवधन्वा च यमौ सात्यकिरेव च ।
ऋषीनभ्यर्चयामासुः करानुद्यम्य दक्षिणान् ॥ २५
स तैः परिवृतो राजा नक्षत्रैरिव चन्द्रमाः ।
अभ्याजगाम गाङ्गेयं ब्रह्माणमिव वासवः ॥ २६
शरतल्पे शयानं तमादित्यं पतितं यथा ।
ददर्श स महाबाहुर्भयादागतसाध्वसः ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

५४

जनमेजय उवाच ।

धर्मात्मनि महासत्त्वे सत्यसंधे जितात्मनि ।
देवव्रते महाभागे शरतल्पगतेऽच्युते ॥ १
शयाने वीरशयने भीष्मे शंतनुनन्दने ।
गाङ्गेये पुरुषव्याघ्रे पाण्डवैः पर्युपस्थिते ॥ २
काः कथाः समवर्तन्त तस्मिन्वीरसमागमे ।

हतेषु सर्वसैन्येषु तन्मे शंस महामुने ॥ ३

वैशंपायन उवाच ।

शरतल्पगते भीष्मे कौरवाणां धुरंधरे ।
आजग्मुर्ऋषयः सिद्धा नारदप्रमुखा नृप ॥ ४
हतशिष्टाश्च राजानो युधिष्ठिरपुरोगमाः ।
धृतराष्ट्रश्च कृष्णश्च भीमार्जुनयमास्तथा ॥ ५
तेऽभिगम्य महात्मानो भरतानां पितामहम् ।
अन्वशोचन्त गाङ्गेयमादित्यं पतितं यथा ॥ ६
मुहूर्तमिव च ध्यात्वा नारदो देवदर्शनः ।
उवाच पाण्डवान्सर्वान्हतशिष्टांश्च पार्थिवान् ॥ ७
प्राप्तकालं च आचक्षे भीष्मोऽयमनुयुज्यताम् ।
अस्तमेति हि गाङ्गेयो भानुमानिव भारत ॥ ८
अयं प्राणानुत्सिसृक्षुस्तं सर्वेऽभ्येत्य पृच्छत ।
कृत्स्नान्हि विविधान्धर्मांश्चातुर्वर्ण्यस्य वेत्त्ययम् ॥९
एष वृद्धः पुरा लोकान्संप्राप्नोति तनुत्यजाम् ।
तं शीघ्रमनुयुञ्जध्वं संशयान्मनसि स्थितान् ॥ १०
एवमुक्ता नारदेन भीष्ममीयुर्नराधिपाः ।
प्रष्टुं चाशक्नुवन्तस्ते वीक्षांचक्रुः परस्परम् ॥ ११
अथोवाच हृषीकेशं पाण्डुपुत्रो युधिष्ठिरः ।
नान्यस्त्वद्देवकीपुत्र शक्तः प्रष्टुं पितामहम् ॥ १२
प्रव्याहरय दुर्धर्ष त्वमग्रे मधुसूदन ।
त्वं हि नस्तात सर्वेषां सर्वधर्मविदुत्तमः ॥ १३
एवमुक्तः पाण्डवेन भगवान्केशवस्तदा ।
अभिगम्य दुराधर्षं प्रव्याहारयदच्युतः १४

वासुदेव उवाच ।

कच्चित्सुखेन रजनी व्युष्टा ते राजसत्तम ।
विस्पष्टलक्षणा बुद्धिः कच्चिच्चोपस्थिता तव ॥ १५
कच्चिज्ज्ञानानि सर्वाणि प्रतिभान्ति च तेऽनघ ।
न ग्लायते च हृदयं न च ते व्याकुलं मनः ॥१६

भीष्म उवाच ।

दमो मोहः श्रमश्चैव क्लमो ग्लानिस्तथा रुजा ।
तव प्रसादाद्गोविन्द सद्यो व्यपगतानघ ॥ १७
यच्च भूतं भविष्यच्च भवच्च परमद्युते ।
तत्सर्वमनुपश्यामि पाणौ फलमिवाहितम् ॥ १८
वेदोक्ताश्चैव ये धर्मा वेदान्तनिहिताश्च ये ।
तान्सर्वान्संप्रपश्यामि वरदानात्तवाच्युत ॥ १९
शिष्टैश्च धर्मो यः प्रोक्तः स च मे हृदि वर्तते ।
देशजातिकुलानां च धर्मज्ञोऽस्मि जनार्दन ॥ २०
चतुर्ष्वाश्रमधर्मेषु योऽर्थः स च हृदि स्थितः ।
राजधर्मांश्च सकलानवगच्छामि केशव ॥ २१
यत्र यत्र च वक्तव्यं तद्वक्ष्यामि जनार्दन ।
तव प्रसादाद्धि शुभा मनो मे बुद्धिराविशत् ॥२२
युवेव चास्मि संवृत्तस्त्वदनुध्यानबृंहितः ।
वक्तुं श्रेयः समर्थोऽस्मि त्वत्प्रसादाज्जनार्दन ॥ २३
स्वयं किमर्थं तु भवाञ्छ्रेयो न प्राह पाण्डवम् ।
किं ते विवक्षितं चात्र तदाशु वद माधव ॥ २४

वासुदेव उवाच ।

यशसः श्रेयसश्चैव मूलं मां विद्धि कौरव ।
मत्तः सर्वेऽभिनिर्वृत्ता भावाः सदसदात्मकाः ॥२५
शीतांशुश्चन्द्र इत्युक्ते को लोके विस्मयिष्यति ।
तथैव यशसा पूर्णे मयि को विस्मयिष्यति ॥ २६
आधेयं तु मया भूयो यशस्तव महाद्युते ।
ततो मे विपुला बुद्धिस्त्वयि भीष्म समाहिता ॥२७
यावद्धि पृथिवीपाल पृथिवी स्थास्यते ध्रुवा ।
तावत्तवाक्षया कीर्तिर्लोकाननु चरिष्यति ॥ २८
यच्च त्वं वक्ष्यसे भीष्म पाण्डवायानुपृच्छते ।
वेदप्रवादा इव ते स्थास्यन्ति वसुधातले ॥ २९
यश्चैतेन प्रमाणेन योक्ष्यत्यात्मानमात्मना ।
स फलं सर्वपुण्यानां प्रेत्य चानुभविष्यति ॥ ३०

एतस्मात्कारणाद्भीष्म मतिर्दिव्या मया हि ते ।
दत्ता यशो विप्रथेत कथं भूयस्तवेति ह ॥ ३१
यावद्धि प्रथते लोके पुरुषस्य यशो भुवि ।
तावत्तस्याक्षयं स्थानं भवतीति विनिश्चितम् ॥ ३२
राजानो हतशिष्टास्त्वां राजन्नभित आसते ।
धर्माननुयुयुक्षन्तस्तेभ्यः प्रब्रूहि भारत ॥ ३३
भवान्हि वयसा वृद्धः श्रुताचारसमन्वितः ।
कुशलो राजधर्माणां पूर्वेषामपराश्च ये ॥ ३४
जन्मप्रभृति ते कश्चिद्वृजिनं न ददर्श ह ।
ज्ञातारमनुधर्माणां त्वां विदुः सर्वपार्थिवाः ॥ ३५
तेभ्यः पितेव पुत्रेभ्यो राजन्ब्रूहि परं नयम् ।
ऋषयश्च हि देवाश्च त्वया नित्यमुपासिताः ॥ ३६
तस्माद्वक्तव्यमेवेह त्वया पश्याम्यशेषतः ।
धर्माञ्शुश्रूषमाणेभ्यः पृष्टेन च सता पुनः ॥ ३७
वक्तव्यं विदुषा चेति धर्ममाहुर्मनीषिणः ।
अप्रतिब्रुवतः कष्टो दोषो हि भवति प्रभो ॥ ३८
तस्मात्पुत्रैश्च पौत्रैश्च धर्मान्पृष्टः सनातनान् ।
विद्वाञ्जिज्ञासमानैस्त्वं प्रब्रूहि भरतर्षभ ॥ ३९

इति श्रीमहाभारते शान्तिपर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

५५

वैशंपायन उवाच ।

अथाब्रवीन्महातेजा वाक्यं कौरवनन्दनः ।
हन्त धर्मान्प्रवक्ष्यामि दृढे वाङ्मनसी मम ।
तव प्रसादाद्गोविन्द भूतात्मा ह्यसि शाश्वतः ॥ १
युधिष्ठिरस्तु मां राजा धर्मान्समनुपृच्छतु ।
एवं प्रीतो भविष्यामि धर्मान्वक्ष्यामि चानघ ॥ २
यस्मिन्राजर्षभे जाते धर्मात्मनि महात्मनि ।
अहृष्यन्नृषयः सर्वे स मां पृच्छतु पाण्डवः ॥ ३
सर्वेषां दीप्तयशसां कुरूणां धर्मचारिणाम् ।
यस्य नास्ति समः कश्चित्स मां पृच्छतु पाण्डवः ॥४
धृतिर्दमो ब्रह्मचर्यं क्षमा धर्मश्च नित्यदा ।
यस्मिन्नोजश्च तेजश्च स मां पृच्छतु पाण्डवः ॥ ५
सत्यं दानं तपः शौचं शान्तिर्दाक्ष्यमसंभ्रमः ।
यस्मिन्नेतानि सर्वाणि स मां पृच्छतु पाण्डवः ॥ ६
यो न कामान्न संरम्भान्न भयान्नार्थकारणात् ।
कुर्यादधर्मं धर्मात्मा स मां पृच्छतु पाण्डवः ॥ ७
संबन्धिनोऽतिथीन्भृत्यान्संश्रितोपाश्रितांश्च यः ।
संमानयति सत्कृत्य स मां पृच्छतु पाण्डवः ॥ ८
सत्यनित्यः क्षमानित्यो ज्ञाननित्योऽतिथिप्रियः ।
यो ददाति सतां नित्यं स मां पृच्छतु पाण्डवः ॥९
इज्याध्ययननित्यश्च धर्मे च निरतः सदा ।
शान्तः श्रुतरहस्यश्च स मां पृच्छतु पाण्डवः ॥ १०

वासुदेव उवाच ।

लज्जया परयोपेतो धर्मात्मा स युधिष्ठिरः ।
अभिशापभयाद्भीतो भवन्तं नोपसर्पति ॥ ११
लोकस्य कदनं कृत्वा लोकनाथो विशां पते ।
अभिशापभयाद्भीतो भवन्तं नोपसर्पति ॥ १२
पूज्यान्मान्यांश्च भक्तांश्च गुरून्संबन्धिबान्धवान् ।
अर्घ्यार्हानिषुभिर्हत्वा भवन्तं नोपसर्पति ॥ १३

भीष्म उवाच ।

ब्राह्मणानां यथा धर्मो दानमध्ययनं तपः ।
क्षत्रियाणां तथा कृष्ण समरे देहपातनम् ॥ १४
पितॄन्पितामहान्पुत्रान्गुरून्संबन्धिबान्धवान् ।
मिथ्याप्रवृत्तान्यः संख्ये निहन्याद्धर्म एव सः ॥ १५
समयत्यागिनो लुब्धान्गुरूनपि च केशव ।
निहन्ति समरे पापान्क्षत्रियो यः स धर्मवित् ॥१६
आहूतेन रणे नित्यं योद्धव्यं क्षत्रबन्धुना ।
धर्म्यं स्वर्ग्यं च लोक्यं च युद्धं हि मनुरब्रवीत् ॥ १७

वैशंपायन उवाच ।

एवमुक्तस्तु भीष्मेण धर्मराजो युधिष्ठिरः ।
विनीतवदुपागम्य तस्थौ संदर्शनेऽग्रतः ॥ १८
अथास्य पादौ जग्राह भीष्मश्चाभिननन्द तम् ।
मूर्ध्नि चैनमुपाघ्राय निषीदेत्यब्रवीत्तदा ॥ १९
तमुवाचाथ गाङ्गेय ऋषभः सर्वधन्विनाम् ।
पृच्छ मां तात विस्रब्धं मा भैस्त्वं कुरुसत्तम ॥२०

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

५६

वैशंपायन उवाच ।

प्रणिपत्य हृषीकेशमभिवाद्य पितामहम् ।
अनुमान्य गुरून्सर्वान्पर्यपृच्छद्युधिष्ठिरः ॥ १
राज्यं वै परमो धर्म इति धर्मविदो विदुः ।
महान्तमेतं भारं च मन्ये तद्ब्रूहि पार्थिव ॥ २
राजधर्मान्विशेषेण कथयस्व पितामह ।
सर्वस्य जीवलोकस्य राजधर्माः परायणम् । ३
त्रिवर्गोऽत्र समासक्तो राजधर्मेषु कौरव ।
मोक्षधर्मश्च विस्पष्टः सकलोऽत्र समाहितः ॥ ४
यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा ।
नरेन्द्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतम् ॥ ५
तत्र वै संप्रमूढे तु धर्मे राजर्षिसेविते ।
लोकस्य संस्था न भवेत्सर्वं च व्याकुलं भवेत् ॥ ६
उदयन्हि यथा सूर्यो नाशयत्यासुरं तमः ।
राजधर्मास्तथालोक्यामाक्षिपन्त्यशुभां गतिम् ॥ ७
तदग्रे राजधर्माणामर्थतत्त्वं पितामह ।
प्रब्रूहि भरतश्रेष्ठ त्वं हि बुद्धिमतां वरः ॥ ८
आगमश्च परस्त्वत्तः सर्वेषां नः परंतप ।
भवन्तं हि परं बुद्धौ वासुदेवोऽभिमन्यते ॥ ९

भीष्म उवाच ।

नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान् ॥१०
शृणु कार्त्स्न्येन मत्तस्त्वं राजधर्मान्युधिष्ठिर ।
निरुच्यमानान्नियतो यच्चान्यदभिवाञ्छसि ॥ ११
आदावेव कुरुश्रेष्ठ राज्ञा रञ्जनकाम्यया ।
देवतानां द्विजानां च वर्तितव्यं यथाविधि ॥ १२
दैवतान्यर्चयित्वा हि ब्राह्मणांश्च कुरूद्वह ।
आनृण्यं याति धर्मस्य लोकेन च स मान्यते ॥१३
उत्थाने च सदा पुत्र प्रयतेथा युधिष्ठिर ।
न ह्युत्थानमृते दैवं राज्ञामर्थप्रसिद्धये ॥ १४
साधारणं द्वयं ह्येतद्दैवमुत्थानमेव च ।
पौरुषं हि परं मन्ये दैवं निश्चित्यमुच्यते ॥ १५
विपन्ने च समारम्भे संतापं मा स्म वै कृथाः ।
घटते विनयस्तात राज्ञामेष नयः परः ॥ १६
न हि सत्यादृते किंचिद्राज्ञां वै सिद्धिकारणम् ।
सत्ये हि राजा निरतः प्रेत्य चेह हि नन्दति ॥ १७
ऋषीणामपि राजेन्द्र सत्यमेव परं धनम् ।
तथा राज्ञः परं सत्यान्नान्यद्विश्वासकारणम् ॥ १८
गुणवाञ्शीलवान्दान्तो मृदुर्धर्म्यो जितेन्द्रियः ।
सुदर्शः स्थूललक्ष्यश्च न भ्रश्येत सदा श्रियः ॥१९
आर्जवं सर्वकार्येषु श्रयेथाः कुरुनन्दन ।
पुनर्नयविचारेण त्रयीसंवरणेन च ॥ २०
मृदुर्हि राजा सततं लङ्घ्यो भवति सर्वशः ।
तीक्ष्णाच्चोद्विजते लोकस्तस्मादुभयमाचर ॥ २१
अदण्ड्याश्चैव ते नित्यं विप्राः स्युर्ददतां वर ।
भूतमेतत्परं लोके ब्राह्मणा नाम भारत ॥ २२
मनुना चापि राजेन्द्र गीतौ श्लोकौ महात्मना ।
धर्मेषु स्वेषु कौरव्य हृदि तौ कर्तुमर्हसि ॥ २३
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।

तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ २४
अयो हन्ति यदाश्मानमग्निश्चापोऽभिपद्यते ।
ब्रह्म च क्षत्रियो द्वेष्टि तदा सीदन्ति ते त्रयः ॥२५
एतज्ज्ञात्वा महाराज नमस्या एव ते द्विजाः ।
भौमं ब्रह्म द्विजश्रेष्ठा धारयन्ति शमान्विताः ॥२६
एवं चैव नरव्याघ्र लोकतन्त्रविघातकाः ।
निग्राह्या एव सततं बाहुभ्यां ये स्युरीदृशाः ॥ २७
श्लोकौ चोशनसा गीतौ पुरा तात महर्षिणा ।
तौ निबोध महाप्राज्ञ त्वमेकाग्रमना नृप ॥ २८
उद्यम्य शस्त्रमायान्तमपि वेदान्तगं रणे ।
निगृह्णीयात्स्वधर्मेण धर्मापेक्षी नरेश्वरः ॥ २९
विनश्यमानं धर्मं हि यो रक्षति स धर्मवित् ।
न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमृच्छति ॥३०
एवं चैव नरश्रेष्ठ रक्ष्या एव द्विजातयः ।
स्वपराद्धानपि हि तान्विषयान्ते समुत्सृजेत् ॥ ३१
अभिशस्तमपि ह्येषां कृपायीत विशां पते ।
ब्रह्मघ्ने गुरुतल्पे च भ्रूणहत्ये तथैव च ॥ ३२
राजद्विष्टे च विप्रस्य विषयान्ते विसर्जनम् ।
विधीयते न शारीरं भयमेषां कदाचन ॥ ३३
दयिताश्च नरास्ते स्युर्नित्यं पुरुषसत्तम ।
न कोशः परमो ह्यन्यो राज्ञां पुरुषसंचयात् ॥ ३४
दुर्गेषु च महाराज षट्सु ये शास्त्रनिश्चिताः ।
सर्वेषु तेषु मन्यन्ते नरदुर्गं सुदुस्तरम् ॥ ३५
तस्मान्नित्यं दया कार्या चातुर्वर्ण्ये विपश्चिता ।
धर्मात्मा सत्यवाक्चैव राजा रञ्जयति प्रजाः ॥ ३६
न च क्षान्तेन ते भाव्यं नित्यं पुरुषसत्तम ।
अधर्म्यो हि मृदू राजा क्षमावानिव कुञ्जरः ॥ ३७
बार्हस्पत्ये च शास्त्रे वै श्लोका विनियताः पुरा ।
अस्मिन्नर्थे महाराज तन्मे निगदतः शृणु ॥ ३८
क्षममाणं नृपं नित्यं नीचः परिभवेज्जनः ।
हस्तियन्ता गजस्येव शिर एवारुरुक्षति ॥ ३९
तस्मान्नैव मृदुर्नित्यं तीक्ष्णो वापि भवेन्नृपः ।
वसन्तेऽर्क इव श्रीमान्न शीतो न च घर्मदः ॥४०
प्रत्यक्षेणानुमानेन तथौपम्योपदेशतः ।
परीक्ष्यास्ते महाराज स्वे परे चैव सर्वदा ॥ ४१
व्यसनानि च सर्वाणि त्यजेथा भूरिदक्षिण ।
न चैव न प्रयुञ्जीत सङ्गं तु परिवर्जयेत् ॥ ४२
नित्यं हि व्यसनी लोके परिभूतो भवत्युत ।
उद्वेजयति लोकं चाप्यतिद्वेषी महीपतिः ॥ ४३
भवितव्यं सदा राज्ञा गर्भिणीसहधर्मिणा ।
कारणं च महाराज शृणु येनेदमिष्यते ॥ ४४
यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगम् ।
गर्भस्य हितमाधत्ते तथा राज्ञाप्यसंशयम् ॥ ४५
वर्तितव्यं कुरुश्रेष्ठ नित्यं धर्मानुवर्तिना ।
स्वं प्रियं समभित्यज्य यद्यल्लोकहितं भवेत् ॥ ४६
न संत्याज्यं च ते धैर्यं कदाचिदपि पाण्डव ।
धीरस्य स्पष्टदण्डस्य न ह्याज्ञा प्रतिहन्यते ॥ ४७
परिहासश्च भृत्यैस्ते न नित्यं वदतां वर ।
कर्तव्यो राजशार्दूल दोषमत्र हि मे शृणु ॥ ४८
अवमन्यन्ति भर्तारं संहर्षादुपजीविनः ।
स्वे स्थाने न च तिष्ठन्ति लङ्घयन्ति हि तद्वचः ॥४९
प्रेष्यमाणा विकल्पन्ते गुह्यं चाप्यनुयुञ्जते ।
अयाच्यं चैव याचन्तेऽभोज्यान्याहारयन्ति च ॥ ५०
क्रुध्यन्ति परिदीप्यन्ति भूमिमध्यासतेऽस्य च ।
उत्कोचैर्वञ्चनाभिश्च कार्याण्यनुविहन्ति च ॥ ५१
जर्जरं चास्य विषयं कुर्वन्ति प्रतिरूपकैः ।
स्त्रीरक्षिभिश्च सज्जन्ते तुल्यवेषा भवन्ति च ॥ ५२
वातं च ष्ठीवनं चैव कुर्वते चास्य संनिधौ ।
निर्लज्जा नरशार्दूल व्याहरन्ति च तद्वचः ॥ ५३
हयं वा दन्तिनं वापि रथं नृपतिसंमतम् ।

अधिरोहन्त्यनादृत्य हर्षुले पार्थिवे मृदौ ॥ ५४
इदं ते दुष्करं राजन्निदं ते दुर्विचेष्टितम् ।
इत्येवं सुहृदो नाम ब्रुवन्ति परिषद्गताः ॥ ५५
क्रुद्धे चास्मिन्हसन्त्येव न च हृष्यन्ति पूजिताः ।
संघर्षशीलाश्च सदा भवन्त्यन्योन्यकारणात् ॥ ५६
विस्रंसयन्ति मन्त्रं च विवृण्वन्ति च दुष्कृतम् ।
लीलया चैव कुर्वन्ति सावज्ञास्तस्य शासनम् ।
अलंकरणभोज्यं च तथा स्नानानुलेपनम् ॥ ५७
हेलमाना नरव्याघ्र स्वस्थास्तस्योपशृण्वते ।
निन्दन्ति स्वानधीकारान्संत्यजन्ति च भारत ॥ ५८
न वृत्त्या परितुष्यन्ति राजदेयं हरन्ति च ।
क्रीडितुं तेन चेच्छन्ति ससूत्रेणेव पक्षिणा ।
अस्मत्प्रणेयो राजेति लोके चैव वदन्त्युत ॥ ५९
एते चैवापरे चैव दोषाः प्रादुर्भवन्त्युत ।
नृपतौ मार्दवोपेते हर्षुले च युधिष्ठिर ॥ ६०

इति श्रीमहाभारते शान्तिपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

५७

भीष्म उवाच ।

नित्योद्युक्तेन वै राज्ञा भवितव्यं युधिष्ठिर ।
प्रशाम्यते च राजा हि नारीवोद्यमवर्जितः ॥ १
भगवानुशना चाह श्लोकमत्र विशां पते ।
तमिहैकमना राजन्गदतस्त्वं निबोध मे ॥ २
द्वावेतौ ग्रसते भूमिः सर्पो बिलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ ३
तदेतन्नरशार्दूल हृदि त्वं कर्तुमर्हसि ।
संधेयानपि संधत्स्व विरोध्यांश्च विरोधय ॥ ४
सप्ताङ्गे यश्च ते राज्ये वैपरीत्यं समाचरेत् ।
गुरुर्वा यदि वा मित्रं प्रतिहन्तव्य एव सः ॥ ५
मरुत्तेन हि राज्ञायं गीतः श्लोकः पुरातनः ।
राज्याधिकारे राजेन्द्र बृहस्पतिमतः पुरा ॥ ६
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ७
बाहोः पुत्रेण राज्ञा च सगरेणेह धीमता ।
असमञ्जाः सुतो ज्येष्ठस्त्यक्तः पौरहितैषिणा ॥ ८
असमञ्जाः सरय्वां प्राक्पौराणां बालकान्नृप ।
न्यमज्जयदतः पित्रा निर्भर्त्स्य स विवासितः ॥ ९
ऋषिणोद्दालकेनापि श्वेतकेतुर्महातपाः ।
मिथ्या विप्रानुपचरन्संत्यक्तो दयितः सुतः ॥ १०
लोकरञ्जनमेवात्र राज्ञां धर्मः सनातनः ।
सत्यस्य रक्षणं चैव व्यवहारस्य चार्जवम् ॥ ११
न हिंस्यात्परवित्तानि देयं काले च दापयेत् ।
विक्रान्तः सत्यवाक्क्षान्तो नृपो न चलते पथः ॥ १२
गुप्तमन्त्रो जितक्रोधो शास्त्रार्थगतनिश्चयः ।
धर्मे चार्थे च कामे च मोक्षे च सततं रतः ॥ १३
त्रय्या संवृतरन्ध्रश्च राजा भवितुमर्हति ।
वृजिनस्य नरेन्द्राणां नान्यत्संवरणात्परम् ॥ १४
चातुर्वर्ण्यस्य धर्माश्च रक्षितव्या महीक्षिता ।
धर्मसंकररक्षा हि राज्ञां धर्मः सनातनः ॥ १५
न विश्वसेच्च नृपतिर्न चात्यर्थं न विश्वसेत् ।
षाड्गुण्यगुणदोषांश्च नित्यं बुद्ध्यावलोकयेत् ॥ १६
द्विट्छिद्रदर्शी नृपतिर्नित्यमेव प्रशस्यते ।
त्रिवर्गविदितार्थश्च युक्तचारोपधिश्च यः ॥ १७
कोशस्योपार्जनरतिर्यमवैश्रवणोपमः ।
वेत्ता च दशवर्गस्य स्थानवृद्धिक्षयात्मनः ॥ १८
अभृतानां भवेद्भर्ता भृतानां चान्ववेक्षकः ।
नृपतिः सुमुखश्च स्यात्स्मितपूर्वाभिभाषिता ॥ १९
उपासिता च वृद्धानां जिततन्द्रीरलोलुपः ।
सतां वृत्ते स्थितमतिः सन्तो ह्याचारदर्शिनः ॥ २०
न चाददीत वित्तानि सतां हस्तात्कदाचन ।

असद्भ्यस्तु समादद्यात्सद्भ्यः संप्रतिपादयेत्॥ २१
स्वयं प्रहर्तादाता च वश्यात्मा वश्यसाधनः ।
काले दाता च भोक्ता च शुद्धाचारस्तथैव च ॥ २२
शूरान्भक्तानसंहार्यान्कुले जातानरोगिणः ।
शिष्टाञ्शिष्टाभिसंबन्धान्मानिनो नावमानिनः ॥२३
विद्याविदो लोकविदः परलोकान्ववेक्षकान् ।
धर्मेषु निरतान्साधूनचलानचलानिव ॥ २४
सहायान्सततं कुर्याद्राजा भूतिपुरस्कृतः ।
तैस्तुल्यश्च भवेद्भोगैश्छत्रमात्राज्ञयाधिकः ॥ २५
प्रत्यक्षा च परोक्षा च वृत्तिश्चास्य भवेत्सदा ।
एवं कृत्वा नरेन्द्रो हि न खेदमिह बिन्दति ॥ २६
सर्वातिशङ्की नृपतिर्यश्च सर्वहरो भवेत् ।
स क्षिप्रमनृजुर्लुब्धः स्वजनेनैव बाध्यते ॥ २७
शुचिस्तु पृथिवीपालो लोकचित्तग्रहे रतः ।
न पतत्यरिभिर्ग्रस्तः पतितश्चावतिष्ठते ॥ २८
अक्रोधनोऽथाव्यसनी मृदुदण्डो जितेन्द्रियः ।
राजा भवति भूतानां विश्वास्यो हिमवानिव ॥२९
प्राज्ञो न्यायगुणोपेतः पररन्ध्रेषु तत्परः ।
सुदर्शः सर्ववर्णानां नयापनयवित्तथा ॥ ३०
क्षिप्रकारी जितक्रोधः सुप्रसादो महामनाः ।
अरोगप्रकृतिर्युक्तः क्रियावानविकत्थनः ॥ ३१
आरब्धान्येव कार्याणि न पर्यवसितानि च ।
यस्य राज्ञः प्रदृश्यन्ते स राजा राजसत्तमः ॥ ३२
पुत्रा इव पितुर्गेहे विषये यस्य मानवाः ।
निर्भया विचरिष्यन्ति स राजा राजसत्तमः ॥ ३३
अगूढविभवा यस्य पौरा राष्ट्रनिवासिनः ।
नयापनयवेत्तारः स राजा राजसत्तमः ॥ ३४
स्वकर्मनिरता यस्य जना विषयवासिनः ।
असंघातरता दान्ताः पाल्यमाना यथाविधि ॥ ३५
वश्या नेया विनीताश्च न च संघर्षशीलिनः ।
विषये दानरुचयो नरा यस्य स पार्थिवः ॥ ३६
न यस्य कूटकपटं न माया न च मत्सरः ।
विषये भूमिपालस्य तस्य धर्मः सनातनः ॥ ३७
यः सत्करोति ज्ञानानि नेयः पौरहिते रतः ।
सतां धर्मानुगस्त्यागी स राजा राज्यमर्हति ॥ ३८
यस्य चारश्च मन्त्रश्च नित्यं चैव कृताकृते ।
न ज्ञायते हि रिपुभिः स राजा राज्यमर्हति ॥ ३९
श्लोकश्चायं पुरा गीतो भार्गवेण महात्मना ।
आख्याते रामचरिते नृपतिं प्रति भारत ॥ ४०
राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ।
राजन्यसति लोकस्य कुतो भार्या कुतो धनम् ॥ ४१
तद्राजन्राजसिंहानां नान्यो धर्मः सनातनः ।
ऋते रक्षां सुविस्पष्टां रक्षा लोकस्य धारणम् ॥ ४२
प्राचेतसेन मनुना श्लोकौ चेमावुदाहृतौ ।
राजधर्मेषु राजेन्द्र ताविहैकमनाः शृणु ॥ ४३
षडेतान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ४४
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ४५

इति श्रीमहाभारते शान्तिपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

भीष्म उवाच ।

एतत्ते राजधर्माणां नवनीतं युधिष्ठिर ।
बृहस्पतिर्हि भगवान्नान्यं धर्मं प्रशंसति ॥ १
विशालाक्षश्च भगवान्काव्यश्चैव महातपाः ।
सहस्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः ॥ २
भरद्वाजश्च भगवांस्तथा गौरशिरा मुनिः ।
राजशास्त्रप्रणेतारो ब्रह्मण्या ब्रह्मवादिनः ॥ ३
रक्षामेव प्रशंसन्ति धर्मं धर्मभृतां वर ।

राज्ञां राजीवताम्राक्ष साधनं चात्र वै शृणु ॥ ४
चारश्च प्रणिधिश्चैव काले दानममत्सरः ।
युक्त्यादानं न चादानमयोगेन युधिष्ठिर ॥ ५
सतां संग्रहणं शौर्यं दाक्ष्यं सत्यं प्रजाहितम् ।
अनार्जवैरार्जवैश्च शत्रुपक्षस्य भेदनम् ॥ ६
साधूनामपरित्यागः कुलीनानां च धारणम् ।
निचयश्च निचेयानां सेवा बुद्धिमतामपि ॥ ७
बलानां हर्षणं नित्यं प्रजानामन्ववेक्षणम् ।
कार्येष्वखेदः कोशस्य तथैव च विवर्धनम् ॥ ८
पुरगुप्तिरविश्वासः पौरसंघातभेदनम् ।
केतनानां च जीर्णानामवेक्षा चैव सीदताम् ॥ ९
द्विविधस्य च दण्डस्य प्रयोगः कालचोदितः ।
अरिमध्यस्थमित्राणां यथावच्चान्ववेक्षणम् ॥ १०
उपजापश्च भृत्यानामात्मनः परदर्शनात् ।
अविश्वासः स्वयं चैव परस्याश्वासनं तथा ॥ ११
नीतिधर्मानुसरणं नित्यमुत्थानमेव च ।
रिपूणामनवज्ञानं नित्यं चानार्यवर्जनम् ॥ १२
उत्थानं हि नरेन्द्राणां बृहस्पतिरभाषत ।
राजधर्मस्य यन्मूलं श्लोकांश्चात्र निबोध मे ॥ १३
उत्थानेनामृतं लब्धमुत्थानेनासुरा हताः ।
उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह च ॥ १४
उत्थानधीरः पुरुषो वाग्धीरानधितिष्ठति ।
उत्थानधीरं वाग्धीरा रमयन्त उपासते ॥ १५
उत्थानहीनो राजा हि बुद्धिमानपि नित्यशः ।
धर्षणीयो रिपूणां स्याद्भुजंग इव निर्विषः ॥ १६
न च शत्रुरवज्ञेयो दुर्बलोऽपि बलीयसा ।
अल्पोऽपि हि दहत्यग्निर्विषमल्पं हिनस्ति च ॥ १७
एकाश्वेनापि संभूतः शत्रुर्दुर्गसमाश्रितः ।
तं तं तापयते देशमपि राज्ञः समृद्धिनः ॥ १८
राज्ञो रहस्यं यद्वाक्यं जयार्थं लोकसंग्रहः ।
हृदि यच्चास्य जिह्मं स्यात्कारणार्थं च यद्भवेत् ॥ १९
यच्चास्य कार्यं वृजिनमार्जवेनैव धार्यते ।
दम्भनार्थाय लोकस्य धर्मिष्ठामाचरेत्क्रियाम् ॥ २०
राज्यं हि सुमहत्तन्त्रं दुर्धार्यमकृतात्मभिः ।
न शक्यं मृदुना वोढुमायासस्थानमुत्तमम् ॥ २१
राज्यं सर्वामिषं नित्यमार्जवेनेह धार्यते ।
तस्मान्मिश्रेण सततं वर्तितव्यं युधिष्ठिर ॥ २२
यद्यप्यस्य विपत्तिः स्याद्रक्षमाणस्य वै प्रजाः ।
सोऽप्यस्य विपुलो धर्म एवंवृत्ता हि भूमिपाः ॥ २३
एष ते राजधर्माणां लेशः समनुवर्णितः ।
भूयस्ते यत्र संदेहस्तद्ब्रूहि वदतां वर ॥ २४

वैशंपायन उवाच ।

ततो व्यासश्च भगवान्देवस्थानोऽश्मना सह ।
वासुदेवः कृपश्चैव सात्यकिः संजयस्तथा ॥ २५
साधु साध्विति संहृष्टाः पुष्यमाणैरिवाननैः ।
अस्तुवंस्ते नरव्याघ्रं भीष्मं धर्मभृतां वरम् ॥ २६
ततो दीनमना भीष्ममुवाच कुरुसत्तमः ।
नेत्राभ्यामश्रुपूर्णाभ्यां पादौ तस्य शनैः स्पृशन् ॥ २७
श्व इदानीं स्वसंदेहं प्रक्ष्यामि त्वा पितामह ।
उपैति सविताप्यस्तं रसमापीय पार्थिवम् ॥ २८

ततो द्विजातीनभिवाद्य केशवः
कृपश्च ते चैव युधिष्ठिरादयः ।
प्रदक्षिणीकृत्य महानदीसुतं
ततो रथानारुरुहुर्मुदा युताः ॥ २९
दृषद्वतीं चाप्यवगाह्य सुव्रताः
कृतोदकार्याः कृतजप्यमङ्गलाः ।
उपास्य संध्यां विधिवत्परंतपा-
स्ततः पुरं ते विविशुर्गजाह्वयम् ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

वैशंपायन उवाच ।

ततः काल्यं समुत्थाय कृतपौर्वाह्णिकक्रियाः ।
ययुस्ते नगराकारै रथैः पाण्डवयादवाः ॥ १
प्रपद्य च कुरुक्षेत्रं भीष्ममासाद्य चानघम् ।
सुखां च रजनीं पृष्ट्वा गाङ्गेयं रथिनां वरम् ॥ २
व्यासादीनभिवाद्यर्षीन्सर्वैस्तैश्चाभिनन्दिताः ।
निषेदुरभितो भीष्मं परिवार्य समन्ततः ॥ ३
ततो राजा महातेजा धर्मराजो युधिष्ठिरः ।
अब्रवीत्प्राञ्जलिर्भीष्मं प्रतिपूज्याभिवाद्य च ॥ ४
य एष राजा-राजेति शब्दश्चरति भारत ।
कथमेष समुत्पन्नस्तन्मे ब्रूहि पितामह ॥ ५
तुल्यपाणिशिरोग्रीवस्तुल्यबुद्धीन्द्रियात्मकः ।
तुल्यदुःखसुखात्मा च तुल्यपृष्ठभुजोदरः ६
तुल्यशुक्रास्थिमज्जश्च तुल्यमांसासृगेव च ।
निःश्वासोच्छ्वासतुल्यश्च तुल्यप्राणशरीरवान् ॥ ७
समानजन्ममरणः समः सर्वगुणैर्नृणाम् ।
विशिष्टबुद्धीञ्शूरांश्च कथमेकोऽधितिष्ठति ॥ ८
कथमेको महीं कृत्स्नां वीरशूरार्यसंकुलाम् ।
रक्षत्यपि च लोकोऽस्य प्रसादमभिवाञ्छति ॥ ९
एकस्य च प्रसादेन कृत्स्नो लोकः प्रसीदति ।
व्याकुलेनाकुलः सर्वो भवतीति विनिश्चयः ॥ १०
एतदिच्छाम्यहं सर्वं तत्त्वेन भरतर्षभ ।
श्रोतुं तन्मे यथातत्त्वं प्रब्रूहि वदतां वर ॥ ११
नैतत्कारणमल्पं हि भविष्यति विशां पते ।
यदेकस्मिञ्जगत्सर्वं देववद्याति संनतिम् ॥ १२

भीष्म उवाच ।

नियतस्त्वं नरश्रेष्ठ शृणु सर्वमशेषतः ।
यथा राज्यं समुत्पन्नमादौ कृतयुगेऽभवत् ॥ १३
नैव राज्यं न राजासीन्न दण्डो न च दाण्डिकः ।
धर्मेणैव प्रजाः सर्वा रक्षन्ति च परस्परम् ॥ १४
पालयानास्तथान्योन्यं नरा धर्मेण भारत ।
खेदं परममाजग्मुस्ततस्तान्मोह आविशत् ॥ १५
ते मोहवशमापन्ना मानवा मनुजर्षभ ।
प्रतिपत्तिविमोहाच्च धर्मस्तेषामनीनशत् ॥ १६
नष्टायां प्रतिपत्तौ तु मोहवश्या नरास्तदा ।
लोभस्य वशमापन्नाः सर्वे भारतसत्तम ॥ १७
अप्राप्तस्याभिमर्शं तु कुर्वन्तो मनुजास्ततः ।
कामो नामापरस्तत्र समपद्यत वै प्रभो ॥ १८
तांस्तु कामवशं प्राप्तान्रागो नाम समस्पृशत् ।
रक्ताश्च नाभ्यजानन्त कार्याकार्यं युधिष्ठिर ॥ १९
अगम्यागमनं चैव वाच्यावाच्यं तथैव च ।
भक्ष्याभक्ष्यं च राजेन्द्र दोषादोषं च नात्यजन् ॥२०
विप्लुते नरलोकेऽस्मिंस्ततो ब्रह्म ननाश ह ।
नाशाच्च ब्रह्मणो राजन्धर्मो नाशमथागमत् ॥ २१
नष्टे ब्रह्मणि धर्मे च देवास्त्रासमथागमन् ।
ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः ॥ २२
प्रपद्य भगवन्तं ते देवा लोकपितामहम् ।
ऊचुः प्राञ्जलयः सर्वे दुःखशोकभयार्दिताः ॥ २३
भगवन्नरलोकस्थं नष्टं ब्रह्म सनातनम् ।
लोभमोहादिभिर्भावैस्ततो नो भयमाविशत् ॥ २४
ब्रह्मणश्च प्रणाशेन धर्मोऽप्यनशदीश्वर ।
ततः स्म समतां याता मर्त्यैस्त्रिभुवनेश्वर ॥ २५
अधो हि वर्षमस्माकं मर्त्यास्तूर्ध्वप्रवर्षिणः ।
क्रियाव्युपरमात्तेषां ततोऽगच्छाम संशयम् ॥ २६
अत्र निःश्रेयसं यन्नस्तद्ध्यायस्व पितामह ।
त्वत्प्रभावसमुत्थोऽसौ प्रभावो नो विनश्यति ॥२७
तानुवाच सुरान्सर्वान्स्वयंभूर्भगवांस्ततः ।
श्रेयोऽहं चिन्तयिष्यामि व्येतु वो भीः सुरर्षभाः॥२८
ततोऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् ।

यत्र धर्मस्तथैवार्थः कामश्चैवानुवर्णितः ॥ २९
त्रिवर्ग इति विख्यातो गण एष स्वयंभुवा ।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गणः ॥ ३०
मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः ।
स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः ॥ ३१
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च ।
सहायाः कारणं चैव षड्वर्गो नीतिजः स्मृतः ॥ ३२
त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभ ।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ॥ ३३
अमात्यरक्षाप्रणिधी राजपुत्रस्य रक्षणम् ।
चारश्च विविधोपायः प्रणिधिश्च पृथग्विधः ॥ ३४
साम चोपप्रदानं च भेदो दण्डश्च पाण्डव ।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता ॥ ३५
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च ।
विभ्रंशश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत्फलम् ॥३६
संधिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तमः ।
भयसत्कारवित्ताख्यः कार्त्स्न्येन परिवर्णितः ॥ ३७
यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः ।
विजयो धर्मयुक्तश्च तथार्थविजयश्च ह ॥ ३८
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः ।
लक्षणं पञ्चवर्गस्य त्रिविधं चात्र वर्णितम् ॥ ३९
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः ।
प्रकाशोऽष्टविधस्तत्र गुह्यस्तु बहुविस्तरः ॥ ४०
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव ।
विष्टिर्नावश्चराश्चैव देशिकाः पथि चाष्टकम् ॥ ४१
अङ्गान्येतानि कौरव्य प्रकाशानि बलस्य तु ।
जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः ॥ ४२
स्पर्शे चाभ्यवहार्ये चाप्युपांशुस्त्रिविधः स्मृतः ।
अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः ॥ ४३
कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह ।
आत्मरक्षणमाश्वासः स्पशानां चान्ववेक्षणम् ॥ ४४
कल्पना विविधाश्चापि नृनागरथवाजिनाम् ।
व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलम् ॥
उत्पाताश्च निपाताश्च सुयुद्धं सुपलायनम् ।
शस्त्राणां पायनज्ञानं तथैव भरतर्षभ ॥ ४६
बलव्यसनमुक्तं च तथैव बलहर्षणम् ।
पीडनास्कन्दकालश्च भयकालश्च पाण्डव ॥ ४७
तथा खातविधानं च योगसंचार एव च ।
चौराटव्यबलैश्चोग्रैः परराष्ट्रस्य पीडनम् ॥ ४८
अग्निदैर्गरदैश्चैव प्रतिरूपकचारकैः ।
श्रेणिमुख्योपजापेन वीरुधश्छेदनेन च ॥ ४९
दूषणेन च नागानामाशङ्काजननेन च ।
आरोधनेन भक्तस्य पथश्चोपार्जनेन च ॥ ५०
सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धिसमञ्जसम् ।
दूतसामर्थ्ययोगश्च राष्ट्रस्य च विवर्धनम् ॥ ५१
अरिमध्यस्थमित्राणां सम्यक्चोक्तं प्रपञ्चनम् ।
अवमर्दः प्रतीघातस्तथैव च बलीयसाम् ॥ ५२
व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम् ।
शमो व्यायामयोगश्च योगो द्रव्यस्य संचयः ॥५३
अभृतानां च भरणं भृतानां चान्ववेक्षणम् ।
अर्थकाले प्रदानं च व्यसनेष्वप्रसङ्गिता ॥ ५४
तथा राजगुणाश्चैव सेनापतिगुणाश्च ये ।
कारणस्य च कर्तुश्च गुणदोषास्तथैव च ॥ ५५
दुष्टेङ्गितं च विविधं वृत्तिश्चैवानुजीविनाम् ।
शङ्कितत्वं च सर्वस्य प्रमादस्य च वर्जनम् ॥ ५६
अलब्धलिप्सा लब्धस्य तथैव च विवर्धनम् ।
प्रदानं च विवृद्धस्य पात्रेभ्यो विधिवत्तथा ॥ ५७
विसर्गोऽर्थस्य धर्मार्थमर्थार्थं कामहेतुना ।
चतुर्थो व्यसनाघाते तथैवात्रानुवर्णितः ॥ ५८
क्रोधजानि तथोग्राणि कामजानि तथैव च ।

दशोक्तानि कुरुश्रेष्ठ व्यसनान्यत्र चैव ह ॥ ५९
मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ ।
कामजान्याहुराचार्याः प्रोक्तानीह स्वयंभुवा ॥ ६०
वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च ।
आत्मनो निग्रहस्त्यागोऽथार्थदूषणमेव च ॥ ६१
यन्त्राणि विविधान्येव क्रियास्तेषां च वर्णिताः ।
अवमर्दः प्रतीघातः केतनानां च भञ्जनम् ॥ ६२
चैत्यद्रुमाणामामर्दो रोधःकर्मान्तनाशनम् ।
अपस्करोऽथ गमनं तथोपास्या च वर्णिता ॥ ६३
पणवानकशङ्खानां भेरीणां च युधां वर ।
उपार्जनं च द्रव्याणां परमर्म च तानि षट् ॥ ६४
लब्धस्य च प्रशमनं सतां चैव हि पूजनम् ।
विद्वद्भिरेकीभावश्च प्रातर्होमविधिज्ञता ॥ ६५
मङ्गलालम्भनं चैव शरीरस्य प्रतिक्रिया ।
आहारयोजनं चैव नित्यमास्तिक्यमेव च ॥ ६६
एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः ।
उत्सवानां समाजानां क्रियाः केतनजास्तथा ॥ ६७
प्रत्यक्षा च परोक्षा च सर्वाधिकरणेषु च ।
वृत्तिर्भरतशार्दूल नित्यं चैवान्ववेक्षणम् ॥ ६८
अदण्ड्यत्वं च विप्राणां युक्त्या दण्डनिपातनम् ।
अनुजीविस्वजातिभ्यो गुणेषु परिरक्षणम् ॥ ६९
रक्षणं चैव पौराणां स्वराष्ट्रस्य विवर्धनम् ।
मण्डलस्था च या चिन्ता राजन्द्वादशराजिका ॥ ७०
द्वासप्ततिमतिश्चैव प्रोक्ता या च स्वयंभुवा ।
देशजातिकुलानां च धर्माः समनुवर्णिताः ॥ ७१
धर्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः ।
उपायश्चार्थलिप्सा च विविधा भूरिदक्षिणाः ॥ ७२
मूलकर्मक्रिया चात्र माया योगश्च वर्णितः ।
दूषणं स्रोतसामत्र वर्णितं च स्थिराम्भसाम् ॥ ७३
यैर्यैरुपायैर्लोकश्च न चलेदार्यवर्त्मनः ।
तत्सर्वं राजशार्दूल नीतिशास्त्रेऽनुवर्णितम् ॥ ७४
एतत्कृत्वा शुभं शास्त्रं ततः स भगवान्प्रभुः ।
देवानुवाच संहृष्टः सर्वाञ्शक्रपुरोगमान् ॥ ७५
उपकाराय लोकस्य त्रिवर्गस्थापनाय च ।
नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता ॥ ७६
दण्डेन सहिता ह्येषा लोकरक्षणकारिका ।
निग्रहानुग्रहरता लोकाननु चरिष्यति ॥ ७७
दण्डेन नीयते चेयं दण्डं नयति चाप्युत ।
दण्डनीतिरिति प्रोक्ता त्रीँल्लोकाननुवर्तते ॥ ७८
षाड्गुण्यगुणसारैषा स्थास्यत्यग्रे महात्मसु ।
महत्त्वात्तस्य दण्डस्य नीतिर्विस्पष्टलक्षणा ॥ ७९
नयचारश्च विपुलो येन सर्वमिदं ततम् ।
आगमश्च पुराणानां महर्षीणां च संभवः ॥ ८०
तीर्थवंशश्च वंशश्च नक्षत्राणां युधिष्ठिर ।
सकलं चातुराश्रम्यं चातुर्होत्रं तथैव च ॥ ८१
चातुर्वर्ण्यं तथैवात्र चातुर्वेद्यं च वर्णितम् ।
इतिहासोपवेदाश्च न्यायः कृत्स्नश्च वर्णितः ॥ ८२
तपो ज्ञानमहिंसा च सत्यासत्ये नयः परः ।
वृद्धोपसेवा दानं च शौचमुत्थानमेव च ॥ ८३
सर्वभूतानुकम्पा च सर्वमत्रोपवर्णितम् ।
भुवि वाचोगतं यच्च तच्च सर्वं समर्पितम् ॥ ८४
तस्मिन्पैतामहे शास्त्रे पाण्डवैतदसंशयम् ।
धर्मार्थकाममोक्षाश्च सकला ह्यत्र शब्दिताः ॥ ८५
ततस्तां भगवान्नीतिं पूर्वं जग्राह शंकरः ।
बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः ॥ ८६
युगानामायुषो ह्रासं विज्ञाय भगवाञ्शिवः ।
संचिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम् ॥ ८७
वैशालाक्षमिति प्रोक्तं तदिन्द्रः प्रत्यपद्यत ।
दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः ॥ ८८
भगवानपि तच्छास्त्रं संचिक्षेप पुरंदरः ।

सहस्रैः पञ्चभिस्तात यदुक्तं बाहुदन्तकम् ॥ ८९
अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः ।
संचिक्षेपेश्वरो बुद्ध्या बार्हस्पत्यं तदुच्यते ॥ ९०
अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत् ।
तच्छास्त्रममितप्रज्ञो योगाचार्यो महातपाः ॥ ९१
एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः ।
संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासि पाण्डव ॥ ९२
अथ देवाः समागम्य विष्णुमूचुः प्रजापतिम् ।
एको योऽर्हति मर्त्येभ्यः श्रैष्ठ्यं तं वै समादिश ॥
तथा संचिन्त्य भगवान्देवो नारायणः प्रभुः ।
तैजसं वै विरजसं सोऽसृजन्मानसं सुतम् ॥ ९४
विरजास्तु महाभाग विभुत्वं भुवि नैच्छत ।
न्यासायैवाभवद्बुद्धिः प्रणीता तस्य पाण्डव ॥ ९५
कीर्तिमांस्तस्य पुत्रोऽभूत्सोऽपि पञ्चातिगोऽभवत् ।
कर्दमस्तस्य च सुतः सोऽप्यतप्यन्महत्तपः ॥ ९६
प्रजापतेः कर्दमस्य अनङ्गो नाम वै सुतः ।
प्रजानां रक्षिता साधुर्दण्डनीतिविशारदः ॥ ९७
अनङ्गपुत्रोऽतिबलो नीतिमानधिगम्य वै ।
अभिपेदे महीराज्यमथेन्द्रियवशोऽभवत् ॥ ९८
मृत्योस्तु दुहिता राजन्सुनीथा नाम मानसी ।
प्रख्याता त्रिषु लोकेषु या सा वेनमजीजनत् ॥९९
तं प्रजासु विधर्माणं रागद्वेषवशानुगम् ।
मन्त्रपूतैः कुशैर्जघ्नुर्ऋषयो ब्रह्मवादिनः ॥ १००
ममन्थुर्दक्षिणं चोरुमृषयस्तस्य मन्त्रतः ।
ततोऽस्य विकृतो जज्ञे ह्रस्वाङ्गः पुरुषो भुवि ॥१०१
दग्धस्थाणुप्रतीकाशो रक्ताक्षः कृष्णमूर्धजः ।
निषीदेत्येवमूचुस्तमृषयो ब्रह्मवादिनः ॥ १०२
तस्मान्निषादाः संभूताः क्रूराः शैलवनाश्रयाः ।
ये चान्ये विन्ध्यनिलया म्लेच्छाः शतसहस्रशः ॥
भूयोऽस्य दक्षिणं पाणिं ममन्थुस्ते महर्षयः ।
ततः पुरुष उत्पन्नो रूपेणेन्द्र इवापरः ॥ १०४
कवची बद्धनिस्त्रिंशः सशरः सशरासनः ।
वेदवेदाङ्गविच्चैव धनुर्वेदे च पारगः ॥ १०५
तं दण्डनीतिः सकला श्रिता राजन्नरोत्तमम् ।
ततः स प्राञ्जलिर्वैन्यो महर्षींस्तानुवाच ह ॥ १०६
सुसूक्ष्मा मे समुत्पन्ना बुद्धिर्धर्मार्थदर्शिनी ।
अनया किं मया कार्यं तन्मे तत्त्वेन शंसत ॥ १०७
यन्मां भवन्तो वक्ष्यन्ति कार्यमर्थसमन्वितम् ।
तदहं वै करिष्यामि नात्र कार्या विचारणा ॥१०८
तमूचुरथ देवास्ते ते चैव परमर्षयः ।
नियतो यत्र धर्मो वै तमशङ्कः समाचर ॥ १०९
प्रियाप्रिये परित्यज्य समः सर्वेषु जन्तुषु ।
कामक्रोधौ च लोभं च मानं चोत्सृज्य दूरतः ॥११०
यश्च धर्मात्प्रविचलेल्लोके कश्चन मानवः ।
निग्राह्यस्ते स बाहुभ्यां शश्वद्धर्ममवेक्षतः ॥ १११
प्रतिज्ञां चाधिरोहस्व मनसा कर्मणा गिरा ।
पालयिष्याम्यहं भौमं ब्रह्म इत्येव चासकृत् ॥११२
यश्चात्र धर्मनीत्युक्तो दण्डनीतिव्यपाश्रयः ।
तमशङ्कः करिष्यामि स्ववशो न कदाचन ॥ ११३
अदण्ड्या मे द्विजाश्चेति प्रतिजानीष्व चाभिभो ।
लोकं च संकरात्कृत्स्नात्त्रातास्मीति परंतप ॥ ११४
वैन्यस्ततस्तानुवाच देवानृषिपुरोगमान् ।
ब्राह्मणा मे सहायाश्चेदेवमस्तु सुरर्षभाः ॥ ११५
एवमस्त्विति वैन्यस्तु तैरुक्तो ब्रह्मवादिभिः ।
पुरोधाश्चाभवत्तस्य शुक्रो ब्रह्ममयो निधिः ॥ ११६
मन्त्रिणो वालखिल्यास्तु सारस्वत्यो गणो ह्यभूत् ।
महर्षिर्भगवान्गर्गस्तस्य सांवत्सरोऽभवत् ॥ ११७
आत्मनाष्टम इत्येव श्रुतिरेषा परा नृषु ।
उत्पन्नौ बन्दिनौ चास्य तत्पूर्वौ सूतमागधौ ॥ ११८
समतां वसुधायाश्च स सम्यगुपपादयत् ।

वैषम्यं हि परं भूमेरासीदिति ह नः श्रुतम् ॥ ११९
स विष्णुना च देवेन शक्रेण विबुधैः सह ।
ऋषिभिश्च प्रजापाल्ये ब्रह्मणा चाभिषेचितः ॥ १२०
तं साक्षात्पृथिवी भेजे रत्नान्यादाय पाण्डव ।
सागरः सरितां भर्ता हिमवांश्चाचलोत्तमः ॥ १२१
शक्रश्च धनमक्षय्यं प्रादात्तस्य युधिष्ठिर ।
रुक्मं चापि महामेरुः स्वयं कनकपर्वतः ॥ १२२
यक्षराक्षसभर्ता च भगवान्नरवाहनः ।
धर्मे चार्थे च कामे च समर्थं प्रददौ धनम् ॥ १२३
हया रथाश्च नागाश्च कोटिशः पुरुषास्तथा ।
प्रादुर्बभूवुर्वैन्यस्य चिन्तनादेव पाण्डव ।
न जरा न च दुर्भिक्षं नाधयो व्याधयस्तथा ॥१२४
सरीसृपेभ्यः स्तेनेभ्यो न चान्योन्यात्कदाचन ।
भयमुत्पद्यते तत्र तस्य राज्ञोऽभिरक्षणात् ॥ १२५
तेनेयं पृथिवी दुग्धा सस्यानि दश सप्त च ।
यक्षराक्षसनागैश्चापीप्सितं यस्य यस्य यत् ॥ १२६
तेन धर्मोत्तरश्चायं कृतो लोको महात्मना ।
रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते ॥१२७
ब्राह्मणानां क्षतत्राणात्ततः क्षत्रिय उच्यते ।
प्रथिता धनतश्चेयं पृथिवी साधुभिः स्मृता ॥ १२८
स्थापनं चाकरोद्विष्णुः स्वयमेव सनातनः ।
नातिवर्तिष्यते कश्चिद्राजंस्त्वामिति पार्थिव ॥१२९
तपसा भगवान्विष्णुराविवेश च भूमिपम् ।
देववन्नरदेवानां नमते यज्जगन्नृप ॥ १३०
दण्डनीत्या च सततं रक्षितं तं नरेश्वर ।
नाधर्षयत्ततः कश्चिच्चारनित्याच्च दर्शनात् ॥ १३१
आत्मना करणैश्चैव समस्येह महीक्षितः ।
को हेतुर्यद्वशे तिष्ठेल्लोको दैवादृते गुणात् ॥ १३२
विष्णोर्ललाटात्कमलं सौवर्णमभवत्तदा ।
श्रीः संभूता यतो देवी पत्नी धर्मस्य धीमतः ॥१३३
श्रियः सकाशादर्थश्च जातो धर्मेण पाण्डव ।
अथ धर्मस्तथैवार्थः श्रीश्च राज्ये प्रतिष्ठिता ॥१३४
सुकृतस्य क्षयाच्चैव स्वर्लोकादेत्य मेदिनीम् ।
पार्थिवो जायते तात दण्डनीतिवशानुगः ॥ १३५
महत्त्वेन च संयुक्तो वैष्णवेन नरो भुवि ।
बुद्ध्या भवति संयुक्तो माहात्म्यं चाधिगच्छति ॥
स्थापनामथ देवानां न कश्चिदतिवर्तते ।
तिष्ठत्येकस्य च वशे तं चेदनुविधीयते ॥ १३७
शुभं हि कर्म राजेन्द्र शुभत्वायोपकल्पते ।
तुल्यस्यैकस्य यस्यायं लोको वचसि तिष्ठति ॥१३८
यो ह्यस्य मुखमद्राक्षीत्सोम्य सोऽस्य वशानुगः ।
सुभगं चार्थवन्तं च रूपवन्तं च पश्यति ॥ १३९
ततो जगति राजेन्द्र सततं शब्दितं बुधैः ।
देवाश्च नरदेवाश्च तुल्या इति विशां पते ॥ १४०
एतत्ते सर्वमाख्यातं महत्त्वं प्रति राजसु ।
कार्त्स्न्येन भरतश्रेष्ठ किमन्यदिह वर्तताम् ॥ १४१

इति श्रीमहाभारते शान्तिपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

वैशंपायन उवाच ।

ततः पुनः स गाङ्गेयमभिवाद्य पितामहम् ।
प्राञ्जलिर्नियतो भूत्वा पर्यपृच्छद्युधिष्ठिरः ॥ १
के धर्माः सर्ववर्णानां चातुर्वर्ण्यस्य के पृथक् ।
चतुर्णामाश्रमाणां च राजधर्माश्च के मताः ॥ २
केन स्विद्वर्धते राष्ट्रं राजा केन विवर्धते ।
केन पौराश्च भृत्याश्च वर्धन्ते भरतर्षभ ॥ ३
कोशं दण्डं च दुर्गं च सहायान्मन्त्रिणस्तथा ।
ऋत्विक्पुरोहिताचार्यान्कीदृशान्वर्जयेन्नृपः ॥ ४
केषु विश्वसितव्यं स्याद्राज्ञां कस्यांचिदापदि ।
कुतो वात्मा दृढो रक्ष्यस्तन्मे ब्रूहि पितामह ॥ ५

भीष्म उवाच ।

नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्वा धर्मान्वक्ष्यामि शाश्वतान् ॥ ६
अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।
प्रजनः स्वेषु दारेषु शौचमद्रोह एव च ॥ ७
आर्जवं भृत्यभरणं नवैते सार्ववर्णिकाः ।
ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम् ॥ ८
दममेव महाराज धर्ममाहुः पुरातनम् ।
स्वाध्यायोऽध्यापनं चैव तत्र कर्म समाप्यते ॥ ९
तं चेद्वित्तमुपागच्छेद्वर्तमानं स्वकर्मणि ।
अकुर्वाणं विकर्माणि शान्तं प्रज्ञानतर्पितम् ॥ १०
कुर्वीतापत्यसंतानमथो दद्याद्यजेत च ।
संविभज्य हि भोक्तव्यं धनं सद्भिरितीष्यते ॥ ११
परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ १२
क्षत्रियस्यापि यो धर्मस्तं ते वक्ष्यामि भारत ।
दद्याद्राजा न याचेत यजेत न तु याजयेत् ॥ १३
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्यात्पराक्रमम् ॥ १४
ये च क्रतुभिरीजानाः श्रुतवन्तश्च भूमिपाः ।
य एवाहवजेतारस्त एषां लोकजित्तमाः ॥ १५
अविक्षतेन देहेन समराद्यो निवर्तते ।
क्षत्रियो नास्य तत्कर्म प्रशंसन्ति पुराविदः ॥ १६
वधं हि क्षत्रबन्धूनां धर्ममाहुः प्रधानतः ।
नास्य कृत्यतमं किंचिदन्यद्दस्युनिबर्हणात् ॥ १७
दानमध्ययनं यज्ञो योगः क्षेमो विधीयते ।
तस्माद्राज्ञा विशेषेण योद्धव्यं धर्ममीप्सता ॥ १८
स्वेषु धर्मेष्ववस्थाप्य प्रजाः सर्वा महीपतिः ।
धर्मेण सर्वकृत्यानि समनिष्ठानि कारयेत् ॥ १९
परिनिष्ठितकार्यः स्यान्नृपतिः परिपालनात् ।
कुर्यादन्यन्न वा कुर्यादैन्द्रो राजन्य उच्यते ॥ २०
वैश्यस्यापीह यो धर्मस्तं ते वक्ष्यामि भारत ।
दानमध्ययनं यज्ञः शौचेन धनसंचयः ॥ २१
पितृवत्पालयेद्वैश्यो युक्तः सर्वपशूनिह ।
विकर्म तद्भवेदन्यत्कर्म यद्यत्समाचरेत् ।
रक्षया स हि तेषां वै महत्सुखमवाप्नुयात् ॥ २२
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥२३
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं हरेत् ॥ २४
लये च सप्तमो भागस्तथा शृङ्गे कला खुरे ।
सस्यस्य सर्वबीजानामेषा सांवत्सरी भृतिः ॥ २५
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन ॥ २६
शूद्रस्यापि हि यो धर्मस्तं ते वक्ष्यामि भारत ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयन् ॥ २७
तस्माच्छूद्रस्य वर्णानां परिचर्या विधीयते ।
तेषां शुश्रूषणाच्चैव महत्सुखमवाप्नुयात् ॥ २८
शूद्र एतान्परिचरेत्त्रीन्वर्णाननसूयकः ।
संचयांश्च न कुर्वीत जातु शूद्रः कथंचन ॥ २९
पापीयान्हि धनं लब्ध्वा वशे कुर्याद्गरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः ॥३०
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
अवश्यभरणीयो हि वर्णानां शूद्र उच्यते ॥ ३१
छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ॥ ३२
अधार्याणि विशीर्णानि वसनानि द्विजातिभिः ।
शूद्रायैव विधेयानि तस्य धर्मधनं हि तत् ॥ ३३
यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्प्यां तस्य तु तेनाहुर्वृत्तिं धर्मविदो जनाः ।

देयः पिण्डोऽनपेताय भर्तव्यौ वृद्धदुर्बलौ ॥ ३४
शूद्रेण च न हातव्यो भर्ता कस्यांचिदापदि ।
अतिरेकेण भर्तव्यो भर्ता द्रव्यपरिक्षये ।
न हि स्वमस्ति शूद्रस्य भर्तृहार्यधनो ह्यसौ ॥ ३५
उक्तस्त्रयाणां वर्णानां यज्ञस्त्र्यैव भारत ।
स्वाहाकारनमस्कारौ मन्त्रः शूद्रे विधीयते ॥ ३६
ताभ्यां शूद्रः पाकयज्ञैर्यजेत व्रतवान्स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ॥ ३७
शूद्रः पैजवनो नाम सहस्राणां शतं ददौ ।
ऐन्द्राग्नेन विधानेन दक्षिणामिति नः श्रुतम् ॥ ३८
अतो हि सर्ववर्णानां श्रद्धायज्ञो विधीयते ।
दैवतं हि महच्छ्रद्धा पवित्रं यजतां च यत् ॥ ३९
दैवतं परमं विप्राः स्वेन स्वेन परस्परम् ।
अयजन्निह सत्रैस्ते तैस्तैः कामैः सनातनैः ॥ ४०
संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः ।
देवानामपि ये देवा यद्ब्रूयुस्ते परं हि तत् ।
तस्माद्वर्णैः सर्वयज्ञाः संसृज्यन्ते न काम्यया ॥४१
ऋग्यजुःसामवित्पूज्यो नित्यं स्याद्देववद्द्विजः ।
अनृग्यजुरसामा तु प्राजापत्य उपद्रवः ॥ ४२
यज्ञो मनीषया तात सर्ववर्णेषु भारत ।
नास्य यज्ञहनो देवा ईहन्ते नेतरे जनाः ।
तस्मात्सर्वेषु वर्णेषु श्रद्धायज्ञो विधीयते ॥ ४३
स्वं दैवतं ब्राह्मणाः स्वेन नित्यं
परान्वर्णानयजन्नेवमासीत् ।
आरोचिता नः सुमहान्स धर्मः
सृष्टो ब्रह्मणा त्रिषु वर्णेषु दृष्टः ॥ ४४
तस्माद्वर्णा ऋजवो जातिधर्माः
संसृज्यन्ते तस्य विपाक एषः ।
एकं साम यजुरेकमृगेका
विप्रश्चैकोऽनिश्चयस्तेषु दृष्टः ॥ ४५
अत्र गाथा यज्ञगीताः कीर्तयन्ति पुराविदः ।
वैखानसानां राजेन्द्र मुनीनां यष्टुमिच्छताम् ॥ ४६
उदितेऽनुदिते वापि श्रद्दधानो जितेन्द्रियः ।
वह्निं जुहोति धर्मेण श्रद्धा वै कारणं महत् ॥ ४७
यत्स्कन्नमस्य तत्पूर्वं यदस्कन्नं तदुत्तरम् ।
बहूनि यज्ञरूपाणि नानाकर्मफलानि च ॥ ४८
तानि यः संविजानाति ज्ञाननिश्चयनिश्चितः ।
द्विजातिः श्रद्धयोपेतः स यष्टुं पुरुषोऽर्हति ॥ ४९
स्तेनो वा यदि वा पापो यदि वा पापकृत्तमः ।
यष्टुमिच्छति यज्ञं यः साधुमेव वदन्ति तम् ॥५०
ऋषयस्तं प्रशंसन्ति साधु चैतदसंशयम् ।
सर्वथा सर्ववर्णैर्हि यष्टव्यमिति निश्चयः ।
न हि यज्ञसमं किंचित्त्रिषु लोकेषु विद्यते ॥ ५१
तस्माद्यष्टव्यमित्याहुः पुरुषेणानसूयता ।
श्रद्धापवित्रमाश्रित्य यथाशक्ति प्रयच्छता ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

भीष्म उवाच ।

आश्रमाणां महाबाहो शृणु सत्यपराक्रम ।
चतुर्णामिह वर्णानां कर्माणि च युधिष्ठिर ॥ १
वानप्रस्थं भैक्षचर्यां गार्हस्थ्यं च महाश्रमम् ।
ब्रह्मचर्याश्रमं प्राहुश्चतुर्थं ब्राह्मणैर्वृतम् ॥ २
जटाकरणसंस्कारं द्विजातित्वमवाप्य च ।
आधानादीनि कर्माणि प्राप्य वेदमधीत्य च ॥ ३
सदारो वाप्यदारो वा आत्मवान्संयतेन्द्रियः ।
वानप्रस्थाश्रमं गच्छेत्कृतकृत्यो गृहाश्रमात् ॥ ४
तत्रारण्यकशास्त्राणि समधीत्य स धर्मवित् ।
ऊर्ध्वरेताः प्रजायित्वा गच्छत्यक्षरसात्मताम् ॥ ५
एतान्येव निमित्तानि मुनीनामूर्ध्वरेतसाम् ।

कर्तव्यानीह विप्रेण राजन्नादौ विपश्चिता ॥ ६
चरितब्रह्मचर्यस्य ब्राह्मणस्य विशां पते ।
भैक्षचर्यास्वधीकारः प्रशस्त इह मोक्षिणः ॥ ७
यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः ।
यथोपलब्धजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ॥ ८
निराशीः स्यात्सर्वसमो निर्भोगो निर्विकारवान् ।
विप्रः क्षेमाश्रमं प्राप्तो गच्छत्यक्षरसात्मताम् ॥ ९

अधीत्य वेदान्कृतसर्वकृत्यः
संतानमुत्पाद्य सुखानि भुक्त्वा ।
समाहितः प्रचरेद्दुश्चरं तं
गार्हस्थ्यधर्मं मुनिधर्मदृष्टम् ॥ १०
स्वदारतुष्ट ऋतुकालगामी
नियोगसेवी नशठो नजिह्मः ।
मिताशनो देवपरः कृतज्ञः
सत्यो मृदुश्चानृशंसः क्षमावान् ॥ ११
दान्तो विधेयो हव्यकव्येऽप्रमत्तो
अन्नस्य दाता सततं द्विजेभ्यः ।
अमत्सरी सर्वलिङ्गिप्रदाता
वैताननित्यश्च गृहाश्रमी स्यात् ॥ १२
अथात्र नारायणगीतमाहु-
र्महर्षयस्तात महानुभावाः ।
महार्थमत्यर्थतपःप्रयुक्तं
तदुच्यमानं हि मया निबोध ॥ १३
सत्यार्जवं चातिथिपूजनं च
धर्मस्तथार्थश्च रतिश्च दारे ।
निषेवितव्यानि सुखानि लोके
ह्यस्मिन्परे चैव मतं ममैतत् ॥ १४

भरणं पुत्रदाराणां वेदानां पारणं तथा ।
सतां तमाश्रमं श्रेष्ठं वदन्ति परमर्षयः ॥ १५

एवं हि यो ब्राह्मणो यज्ञशीलो
गार्हस्थ्यमध्यावसते यथावत् ।
गृहस्थवृत्तिं प्रविशोध्य सम्य-
क्स्वर्गे विशुद्धं फलमाप्नुते सः ॥ १६

तस्य देहपरित्यागादिष्टाः कामाक्षया मताः ।
आनन्त्यायोपतिष्ठन्ति सर्वतोक्षिशिरोमुखाः ॥ १७
स्वादन्नेको जपन्नेकः सर्पन्नेको युधिष्ठिर ।
एकस्मिन्नेव आचार्ये शुश्रूषुर्मलपङ्कवान् ॥ १८
ब्रह्मचारी व्रती नित्यं नित्यं दीक्षापरो वशी ।
अविचार्य तथा वेदं कृत्यं कुर्वन्वसेत्सदा ॥ १९
शुश्रूषां सततं कुर्वन्गुरोः संप्रणमेत च ।
षट्कर्मस्वनिवृत्तश्च नप्रवृत्तश्च सर्वशः ॥ २०
न चरत्यधिकारेण सेवितं द्विषतो न च ।
एषोऽऽश्रमपदस्तात ब्रह्मचारिण इष्यते ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

युधिष्ठिर उवाच ।

शिवान्सुखान्महोदर्कानहिंस्राँल्लोकसंमतान् ।
ब्रूहि धर्मान्सुखोपायान्मद्विधानां सुखावहान् ॥ १

भीष्म उवाच ।

ब्राह्मणस्येह चत्वार आश्रमा विहिताः प्रभो ।
वर्णास्ताननुवर्तन्ते त्रयो भरतसत्तम ॥ २

उक्तानि कर्माणि बहूनि राज-
न्स्वर्ग्याणि राजन्यपरायणानि ।
नेमानि दृष्टान्तविधौ स्मृतानि
क्षात्रे हि सर्वं विहितं यथावत् ॥ ३
क्षात्राणि वैश्यानि च सेवमानः
शौद्राणि कर्माणि च ब्राह्मणः सन् ।
अस्मिँल्लोके निन्दितो मन्दचेताः

परे च लोके निरयं प्रयाति ॥ ४
या संज्ञा विहिता लोके दासे शुनि वृके पशौ ।
विकर्मणि स्थिते विप्रे तां संज्ञां कुरु पाण्डव ॥ ५
षट्कर्मसंप्रवृत्तस्य आश्रमेषु चतुर्ष्वपि ।
सर्वधर्मोपपन्नस्य संभूतस्य कृतात्मनः ॥ ६
ब्राह्मणस्य विशुद्धस्य तपस्यभिरतस्य च ।
निराशिषो वदान्यस्य लोका ह्यक्षरसंज्ञिताः ॥ ७
यो यस्मिन्कुरुते कर्म यादृशं येन यत्र च ।
तादृशं तादृशेनैव स गुणं प्रतिपद्यते ॥ ८
वृद्धया कृषिवणिक्त्वेन जीवसंजीवनेन च ।
वेत्तुमर्हसि राजेन्द्र स्वाध्यायगणितं महत् ॥ ९
कालसंचोदितः कालः कालपर्यायनिश्चितः ।
उत्तमाधममध्यानि कर्माणि कुरुतेऽवशः ॥ १०
अन्तवन्ति प्रदानानि पुरा श्रेयस्कराणि च ।
स्वकर्मनिरतो लोको ह्यक्षरः सर्वतोमुखः ॥ ११

इति श्रीमहाभारते शान्तिपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

भीष्म उवाच ।

ज्याकर्षणं शत्रुनिबर्हणं च
कृषिर्वणिज्या पशुपालनं च ।
शुश्रूषणं चापि तथार्थहेतो-
रकार्यमेतत्परमं द्विजस्य ॥ १
सेव्यं तु ब्रह्मषट्कर्म गृहस्थेन मनीषिणा ।
कृतकृत्यस्य चारण्ये वासो विप्रस्य शस्यते ॥ २
राजप्रैष्यं कृषिधनं जीवनं च वणिज्यया ।
कौटिल्यं कौलटेयं च कुसीदं च विवर्जयेत् ॥ ३
शूद्रो राजन्भवति ब्रह्मबन्धु-
र्दुश्चारित्र्यो यश्च धर्मादपेतः ।
वृषलीपतिः पिशुनो नर्तकश्च
ग्रामप्रैष्यो यश्च भवेद्विकर्मा ॥ ४
जपन्वेदानजपंश्चापि राज-
न्समः शूद्रैर्दासवच्चापि भोज्यः ।
एते सर्वे शूद्रसमा भवन्ति
राजन्नेतान्वर्जयेद्देवकृत्ये ॥ ५
निर्मर्यादे चाशने क्रूरवृत्तौ
हिंसात्मके त्यक्तधर्मस्ववृत्ते ।
हव्यं कव्यं यानि चान्यानि राज-
न्देयान्यदेयानि भवन्ति तस्मिन् ॥ ६
तस्माद्धर्मो विहितो ब्राह्मणस्य
दमः शौचं चार्जवं चापि राजन् ।
तथा विप्रस्याश्रमाः सर्व एव
पुरा राजन्ब्रह्मणा वै निसृष्टाः ॥ ७
यः स्याद्दान्तः सोमप आर्यशीलः
सानुक्रोशः सर्वसहो निराशीः ।
ऋजुर्मृदुरनृशंसः क्षमावा-
न्स वै विप्रो नेतरः पापकर्मा ॥ ८
शूद्रं वैश्यं राजपुत्रं च राज-
ँल्लोकाः सर्वे संश्रिता धर्मकामाः ।
तस्माद्वर्णाञ्जातिधर्मेषु सक्ता-
न्मत्वा विष्णुर्नेच्छति पाण्डुपुत्र ॥ ९
लोके चेदं सर्वलोकस्य न स्या-
च्चातुर्वर्ण्यं वेदवादाश्च न स्युः ।
सर्वाश्चेज्याः सर्वलोकक्रियाश्च
सद्यः सर्वे चाश्रमस्था न वै स्युः ॥ १०
यश्च त्रयाणां वर्णानामिच्छेदाश्रमसेवनम् ।
कर्तुमाश्रमदृष्टांश्च धर्मांस्ताञ्शृणु पाण्डव ॥ ११
शुश्रूषाकृतकृत्यस्य कृतसंतानकर्मणः ।
अभ्यनुज्ञाप्य राजानं शूद्रस्य जगतीपते ॥ १२
अल्पान्तरगतस्यापि दशधर्मगतस्य वा ।

आश्रमा विहिताः सर्वे वर्जयित्वा निराशिषम् ॥१३
भैक्षचर्यां न तु प्राहुस्तस्य तद्धर्मचारिणः ।
तथा वैश्यस्य राजेन्द्र राजपुत्रस्य चैव हि ॥ १४
कृतकृत्यो वयोतीतो राज्ञः कृतपरिश्रमः ।
वैश्यो गच्छेदनुज्ञातो नृपेणाश्रममण्डलम् ॥ १५
वेदानधीत्य धर्मेण राजशास्त्राणि चानघ ।
संतानादीनि कर्माणि कृत्वा सोमं निषेव्य च ॥१६
पालयित्वा प्रजाः सर्वा धर्मेण वदतां वर ।
राजसूयाश्वमेधादीन्मखानन्यांस्तथैव च ॥ १७
समानीय यथापाठं विप्रेभ्यो दत्तदक्षिणः ।
संग्रामे विजयं प्राप्य तथाल्पं यदि वा बहु ॥ १८
स्थापयित्वा प्रजापालं पुत्रं राज्ये च पाण्डव ।
अन्यगोत्रं प्रशस्तं वा क्षत्रियं क्षत्रियर्षभ ॥ १९
अर्चयित्वा पितॄन्सम्यक्पितृयज्ञैर्यथाविधि ।
देवान्यज्ञैरृषीन्वेदैरर्चित्वा चैव यत्नतः ॥ २०
अन्तकाले च संप्राप्ते य इच्छेदाश्रमान्तरम् ।
आनुपूर्व्याश्रमान्राजन्गत्वा सिद्धिमवाप्नुयात् ॥ २१
राजर्षित्वेन राजेन्द्र भैक्षचर्याध्वसेवया ।
अपेतगृहधर्मोऽपि चरेज्जीवितकाम्यया ॥ २२
न चैतन्नैष्ठिकं कर्म त्रयाणां भरतर्षभ ।
चतुर्णां राजशार्दूल प्राहुराश्रमवासिनाम् ॥ २३

बह्वायत्तं क्षत्रियैर्मानवानां
लोकश्रेष्ठं धर्ममासेवमानैः ।
सर्वे धर्माः सोपधर्मास्त्रयाणां
राज्ञो धर्मादिति वेदाच्छृणोमि ॥ २४
यथा राजन्हस्तिपदे पदानि
संलीयन्ते सर्वसत्त्वोद्भवानि ।
एवं धर्मान्राजधर्मेषु सर्वा-
न्सर्वावस्थं संप्रलीनान्निबोध ॥ २५
अल्पाश्रयानल्पफलान्वदन्ति
धर्मानन्यान्धर्मविदो मनुष्याः ।
महाश्रयं बहुकल्याणरूपं
क्षात्रं धर्मं नेतरं प्राहुरार्याः ॥ २६
सर्वे धर्मा राजधर्मप्रधानाः
सर्वे धर्माः पाल्यमाना भवन्ति ।
सर्वत्यागो राजधर्मेषु राजं-
स्त्यागे चाहुर्धर्ममग्र्यं पुराणम् ॥ २७
मज्जेत्त्रयी दण्डनीतौ हतायां
सर्वे धर्मा न भवेयुर्विरुद्धाः ।
सर्वे धर्माश्चाश्रमाणां गताः स्युः
क्षात्रे त्यक्ते राजधर्मे पुराणे ॥ २८
सर्वे त्यागा राजधर्मेषु दृष्टाः
सर्वा दीक्षा राजधर्मेषु चोक्ताः ।
सर्वे योगा राजधर्मेषु चोक्ताः
सर्वे लोका राजधर्मान्प्रविष्टाः ॥ २९
यथा जीवाः प्रकृतौ वध्यमाना
धर्माश्रितानामुपपीडनाय ।
एवं धर्मा राजधर्मैर्वियुक्ताः
सर्वावस्थं नाद्रियन्ते स्वधर्मम् ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

भीष्म उवाच ।

चातुराश्रम्यधर्माश्च जातिधर्माश्च पाण्डव ।
लोकपालोत्तराश्चैव क्षात्रे धर्मे व्यवस्थिताः ॥ १
सर्वाण्येतानि धर्माणि क्षात्रे भरतसत्तम ।
निराशिषो जीवलोके क्षात्रे धर्मे व्यवस्थिताः ॥ २
अप्रत्यक्षं बहुद्वारं धर्ममाश्रमवासिनाम् ।
प्ररूपयन्ति तद्भावमागमैरेव शाश्वतम् ॥ ३
अपरे वचनैः पुण्यैर्वादिनो लोकनिश्चयम् ।

अनिश्चयज्ञा धर्माणामदृष्टान्ते परे रताः ॥ ४
प्रत्यक्षसुखभूयिष्ठमात्मसाक्षिकमच्छलम् ।
सर्वलोकहितं धर्मं क्षत्रियेषु प्रतिष्ठितम् ॥ ५
धर्माश्रमव्यवसिनां ब्राह्मणानां युधिष्ठिर ।
यथा त्रयाणां वर्णानां संख्यातोपश्रुतिः पुरा ।
राजधर्मेष्वनुपमा लोक्या सुचरितैरिह ॥ ६
उदाहृतं ते राजेन्द्र यथा विष्णुं महौजसम् ।
सर्वभूतेश्वरं देवं प्रभुं नारायणं पुरा ।
जग्मुः सुबहवः शूरा राजानो दण्डनीतये ॥ ७
एकैकमात्मनः कर्म तुलयित्वाश्रमे पुरा ।
राजानः पर्युपातिष्ठन्दृष्टान्तवचने स्थिताः ॥ ८

साध्या देवा वसवश्चाश्विनौ च
रुद्राश्च विश्वे मरुतां गणाश्च ।
सृष्टाः पुरा आदिदेवेन देवा
क्षात्रे धर्मे वर्तयन्ते च सिद्धाः ॥ ९

अत्र ते वर्तयिष्यामि धर्ममर्थविनिश्चयम् ।
निर्मर्यादे वर्तमाने दानवैकायने कृते ।
बभूव राजा राजेन्द्र मान्धाता नाम वीर्यवान् ॥१०
पुरा वसुमतीपालो यज्ञं चक्रे दिदृक्षया ।
अनादिमध्यनिधनं देवं नारायणं प्रति ॥ ११
स राजा राजशार्दूल मान्धाता परमेष्ठिनः ।
जग्राह शिरसा पादौ यज्ञे विष्णोर्महात्मनः ॥ १२
दर्शयामास तं विष्णू रूपमास्थाय वासवम् ।
स पार्थिवैर्वृतः सद्भिरर्चयामास तं प्रभुम् ॥ १३
तस्य पार्थिवसंघस्य तस्य चैव महात्मनः ।
संवादोऽयं महानासीद्विष्णुं प्रति महाद्युते ॥ १४

इन्द्र उवाच ।

किमिष्यते धर्मभृतां वरिष्ठ
यद्द्रष्टुकामोऽसि तमप्रमेयम् ।
अनन्तमायामितसत्त्ववीर्यं
नारायणं ह्यादिदेवं पुराणम् ॥ १५
नासौ देवो विश्वरूपो मयापि
शक्यो द्रष्टुं ब्रह्मणा वापि साक्षात् ।
येऽन्ये कामास्तव राजन्हृदिस्था
दास्यामि तांस्त्वं हि मर्त्येषु राजा ॥ १६
सत्ये स्थितो धर्मपरो जितेन्द्रियः
शूरो दृढं प्रीतिरतः सुराणाम् ।
बुद्ध्या भक्त्या चोत्तमश्रद्धया च
ततस्तेऽहं दद्मि वरं यथेष्टम् ॥ १७

मान्धातोवाच ।

असंशयं भगवन्नादिदेवं
द्रक्ष्याम्यहं शिरसाहं प्रसाद्य ।
त्यक्त्वा भोगान्धर्मकामो ह्यरण्य-
मिच्छे गन्तुं सत्पथं लोकजुष्टम् ॥ १८
क्षात्राद्धर्माद्विपुलादप्रमेया-
ल्लोकाः प्राप्ताः स्थापितं स्वं यशश्च ।
धर्मो योऽसावादिदेवात्प्रवृत्तो
लोकज्येष्ठस्तं न जानामि कर्तुम् ॥ १९

इन्द्र उवाच ।

असैनिकोऽधर्मपरश्चरेथाः
परां गतिं लप्स्यसे चाप्रमत्तः ।
क्षात्रो धर्मो ह्यादिदेवात्प्रवृत्तः
पश्चादन्ये शेषभूताश्च धर्माः ॥ २०
शेषाः सृष्टा ह्यन्तवन्तो ह्यनन्ताः
सुप्रस्थानाः क्षत्रधर्माविशिष्टाः ।
अस्मिन्धर्मे सर्वधर्माः प्रविष्टा-
स्तस्माद्धर्मं श्रेष्ठमिमं वदन्ति ॥ २१
कर्मणा वै पुरा देवा ऋषयश्चामितौजसः ।
त्राताः सर्वे प्रमथ्यारीन्क्षत्रधर्मेण विष्णुना ॥ २२
यदि ह्यसौ भगवान्नाहनिष्य-

द्रिपून्सर्वान्वसुमानप्रमेयः ।
न ब्राह्मणा न च लोकादिकर्ता
न सद्धर्मा नादिधर्मा भवेयुः ॥ २३
इमामुर्वीं न जयेद्विक्रमेण
देवश्रेष्ठोऽसौ पुरा चेदमेयः ।
चातुर्वर्ण्यं चातुराश्रम्यधर्माः
सर्वे न स्युर्ब्रह्मणो वै विनाशात् ॥ २४
दृष्टा धर्माः शतधा शाश्वतेन
क्षात्रेण धर्मेण पुनः प्रवृत्ताः ।
युगे युगे ह्यादिधर्माः प्रवृत्ता
लोकज्येष्ठं क्षत्रधर्मं वदन्ति ॥ २५
आत्मत्यागः सर्वभूतानुकम्पा
लोकज्ञानं मोक्षणं पालनं च ।
विषण्णानां मोक्षणं पीडितानां
क्षात्रे धर्मे विद्यते पार्थिवानाम् ॥ २६
निर्मर्यादाः काममन्युप्रवृत्ता
भीता राज्ञो नाधिगच्छन्ति पापम् ।
शिष्टाश्चान्ये सर्वधर्मोपपन्नाः
साध्वाचाराः साधु धर्मं चरन्ति ॥ २७
[illegible]वत्परिपाल्यानि लिङ्गधर्मेण पार्थिवैः ।
[illegible]के भूतानि सर्वाणि विचरन्ति न संशयः ॥ २८
[illegible]र्वधर्मपरं क्षत्रं लोकज्येष्ठं सनातनम् ।
[illegible]दक्षरपर्यन्तमक्षरं सर्वतोमुखम् ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

इन्द्र उवाच ।

एवंवीर्यः सर्वधर्मोपपन्नः
क्षात्रः श्रेष्ठः सर्वधर्मेषु धर्मः ।
पाल्यो युष्माभिर्लोकसिंहैरुदारै-
र्विपर्यये स्यादभावः प्रजानाम् ॥ १
भुवः संस्कारं राजसंस्कारयोग-
मभैक्षचर्यां पालनं च प्रजानाम् ।
विद्याद्राजा सर्वभूतानुकम्पां
देहत्यागं चाहवे धर्ममग्र्यम् ॥ २
त्यागं श्रेष्ठं मुनयो वै वदन्ति
सर्वश्रेष्ठो यः शरीरं त्यजेत ।
नित्यं त्यक्तं राजधर्मेषु सर्वं
प्रत्यक्षं ते भूमिपालाः सदैते ॥ ३
बहुश्रुत्या गुरुशुश्रूषया वा
परस्य वा संहननाद्वदन्ति ।
नित्यं धर्मं क्षत्रियो ब्रह्मचारी
चरेदेको ह्याश्रमं धर्मकामः ॥ ४
सामान्यार्थे व्यवहारे प्रवृत्ते
प्रियाप्रिये वर्जयन्नेव यत्नात् ।
चातुर्वर्ण्यस्थापनात्पालनाच्च
तैस्तैर्योगैर्नियमैरौरसैश्च ॥ ५
सर्वोद्योगैराश्रमं धर्ममाहुः
क्षात्रं ज्येष्ठं सर्वधर्मोपपन्नम् ।
स्वं स्वं धर्मं ये न चरन्ति वर्णा-
स्तांस्तान्धर्मानयथावद्वदन्ति ॥ ६
निर्मर्यादे नित्यमर्थे विनष्टा-
नाहुस्तान्वै पशुभूतान्मनुष्यान् ।
यथा नीतिं गमयत्यर्थलोभा-
च्छ्रेयांस्तस्मादाश्रमः क्षत्रधर्मः ॥ ७
त्रैविद्यानां या गतिर्ब्राह्मणानां
यश्चैवोक्तोऽथाश्रमो ब्राह्मणानाम् ।
एतत्कर्म ब्राह्मणस्याहुरग्र्य-
मन्यत्कुर्वञ्शूद्रवच्छस्त्रवध्यः ॥ ८

चातुराश्रम्यधर्माश्च वेदधर्माश्च पार्थिव ।
ब्राह्मणेनानुगन्तव्या नान्यो विद्यात्कथंचन ॥ ९
अन्यथा वर्तमानस्य न सा वृत्तिः प्रकल्प्यते ।
कर्मणा व्यज्यते धर्मो यथैव श्वा तथैव सः ॥ १०
यो विकर्मस्थितो विप्रो न स सन्मानमर्हति ।
कर्मस्वनुपयुञ्जानमविश्वास्यं हि तं विदुः ॥ ११
एते धर्माः सर्ववर्णाश्च वीरै-
रुत्क्रष्टव्याः क्षत्रियैरेष धर्मः ।
तस्माज्ज्येष्ठा राजधर्मा न चान्ये
वीर्यज्येष्ठा वीरधर्मा मता ये ॥ १२

मान्धातोवाच ।

यवनाः किराता गान्धाराश्चीनाः शबरबर्बराः ।
शकास्तुषाराः कह्वाश्च पह्लवाश्चान्ध्रमद्रकाः ॥ १३
ओड्राः पुलिन्दा रमठाः काचा म्लेच्छाश्च सर्वशः ।
ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः ॥ १४
कथं धर्मं चरेयुस्ते सर्वे विषयवासिनः ।
मद्विधैश्च कथं स्थाप्याः सर्वे ते दस्युजीविनः ॥१५
एतदिच्छाम्यहं श्रोतुं भगवंस्तद्ब्रवीहि मे ।
त्वं बन्धुभूतो ह्यस्माकं क्षत्रियाणां सुरेश्वर ॥ १६

इन्द्र उवाच ।

मातापित्रोर्हि कर्तव्या शुश्रूषा सर्वदस्युभिः ।
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम् ॥ १७
भूमिपालानां च शुश्रूषा कर्तव्या सर्वदस्युभिः ।
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ॥ १८
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ।
दानानि च यथाकालं द्विजेषु दद्युरेव ते ॥ १९
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम् ।
भरणं पुत्रदाराणां शौचमद्रोह एव च ॥ २०
दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता ।
पाकयज्ञा महार्हाश्च कर्तव्याः सर्वदस्युभिः ॥ २१
एतान्येवंप्रकाराणि विहितानि पुरानघ ।
सर्वलोकस्य कर्माणि कर्तव्यानीह पार्थिव ॥ २२

मान्धातोवाच ।

दृश्यन्ते मानवा लोके सर्ववर्णेषु दस्यवः ।
लिङ्गान्तरे वर्तमाना आश्रमेषु चतुर्ष्वपि ॥ २३

इन्द्र उवाच ।

विनष्टायां दण्डनीतौ राजधर्मे निराकृते ।
संप्रमुह्यन्ति भूतानि राजदौरात्म्यतो नृप ॥ २४
असंख्याता भविष्यन्ति भिक्षवो लिङ्गिनस्तथा ।
आश्रमाणां विकल्पाश्च निवृत्तेऽस्मिन्कृते युगे ॥२५
अशृण्वानाः पुराणानां धर्माणां प्रवरा गतीः ।
उत्पथं प्रतिपत्स्यन्ते काममन्युसमीरिताः ॥ २६
यदा निवर्त्यते पापो दण्डनीत्या महात्मभिः ।
तदा धर्मो न चलते सद्भूतः शाश्वतः परः ॥ २७
परलोकगुरुं चैव राजानं योऽवमन्यते ।
न तस्य दत्तं न हुतं न श्राद्धं फलति कचित् ॥२८
मानुषाणामधिपतिं देवभूतं सनातनम् ।
देवाश्च बहु मन्यन्ते धर्मकामं नरेश्वरम् ॥ २९
प्रजापतिर्हि भगवान्यः सर्वमसृजज्जगत् ।
स प्रवृत्तिनिवृत्त्यर्थं धर्माणां क्षत्रमिच्छति ॥ ३०
प्रवृत्तस्य हि धर्मस्य बुद्ध्या यः स्मरते गतिम् ।
स मे मान्यश्च पूज्यश्च तत्र क्षत्रं प्रतिष्ठितम् ॥३१

भीष्म उवाच ।

एवमुक्त्वा स भगवान्मरुद्गणवृतः प्रभुः ।
जगाम भवनं विष्णुरक्षरं परमं पदम् ॥ ३२
एवं प्रवर्तिते धर्मे पुरा सुचरितेऽनघ ।
कः क्षत्रमवमन्येत चेतनावान्बहुश्रुतः ॥ ३३
अन्यायेन प्रवृत्तानि निवृत्तानि तथैव ।
अन्तरा विलयं यान्ति यथा पथि विचक्षुषः ॥३४

आदौ प्रवर्तिते चक्रे तथैवादिपरायणे ।
वर्तस्व पुरुषव्याघ्र संविजानामि तेऽनघ ॥ ३५

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

युधिष्ठिर उवाच ।

श्रुता मे कथिताः पूर्वैश्चत्वारो मानवाश्रमाः ।
व्याख्यानमेषामाचक्ष्व पृच्छतो मे पितामह ॥ १

भीष्म उवाच ।

विदिताः सर्व एवेह धर्मास्तव युधिष्ठिर ।
यथा मम महाबाहो विदिताः साधुसंमताः ॥ २
यत्तु लिङ्गान्तरगतं पृच्छसे मां युधिष्ठिर ।
धर्मं धर्मभृतां श्रेष्ठ तन्निबोध नराधिप ॥ ३
सर्वाण्येतानि कौन्तेय विद्यन्ते मनुजर्षभ ।
साध्वाचारप्रवृत्तानां चातुराश्रम्यकर्मणाम् ॥ ४
अकामद्वेषयुक्तस्य दण्डनीत्या युधिष्ठिर ।
समेक्षिणश्च भूतेषु भैक्षाश्रमपदं भवेत् ॥ ५
वेत्त्यादानविसर्गं यो निग्रहानुग्रहौ तथा ।
यथोक्तवृत्तेर्वीरस्य क्षेमाश्रमपदं भवेत् ॥ ६
ज्ञातिसंबन्धिमित्राणि व्यापन्नानि युधिष्ठिर ।
समभ्युद्धरमाणस्य दीक्षाश्रमपदं भवेत् ॥ ७
आह्निकं भूतयज्ञांश्च पितृयज्ञांश्च मानुषान् ।
कुर्वतः पार्थ विपुलान्वन्याश्रमपदं भवेत् ॥ ८
पालनात्सर्वभूतानां स्वराष्ट्रपरिपालनात् ।
दीक्षा बहुविधा राज्ञो वन्याश्रमपदं भवेत् ॥ ९
वेदाध्ययननित्यत्वं क्षमाथाचार्यपूजनम् ।
तथोपाध्यायशुश्रूषा ब्रह्माश्रमपदं भवेत् ॥ १०
अजिह्ममशठं मार्गं सेवमानस्य भारत ।
सर्वदा सर्वभूतेषु ब्रह्माश्रमपदं भवेत् ॥ ११
वानप्रस्थेषु विप्रेषु त्रैविद्येषु च भारत ।
प्रयच्छतोऽर्थान्विपुलान्वन्याश्रमपदं भवेत् ॥ १२
सर्वभूतेष्वनुक्रोशं कुर्वतस्तस्य भारत ।
आनृशंस्यप्रवृत्तस्य सर्वावस्थं पदं भवेत् ॥ १३
बालवृद्धेषु कौरव्य सर्वावस्थं युधिष्ठिर ।
अनुक्रोशं विदधतः सर्वावस्थं पदं भवेत् ॥ १४
बलात्कृतेषु भूतेषु परित्राणं कुरूद्वह ।
शरणागतेषु कौरव्य कुर्वन्गार्हस्थ्यमावसेत् ॥ १५
चराचराणां भूतानां रक्षामपि च सर्वशः ।
यथार्हपूजां च सदा कुर्वन्गार्हस्थ्यमावसेत् ॥ १६
ज्येष्ठानुज्येष्ठपत्नीनां भ्रातॄणां पुत्रनप्तृणाम् ।
निग्रहानुग्रहौ पार्थ गार्हस्थ्यमिति तत्तपः ॥ १७
साधूनामर्चनीयानां प्रजासु विदितात्मनाम् ।
पालनं पुरुषव्याघ्र गृहाश्रमपदं भवेत् ॥ १८
आश्रमस्थानि सर्वाणि यस्तु वेश्मनि भारत ।
आददीतेह भोज्येन तद्गार्हस्थ्यं युधिष्ठिर ॥ १९
यः स्थितः पुरुषो धर्मे धात्रा सृष्टे यथार्थवत् ।
आश्रमाणां स सर्वेषां फलं प्राप्नोत्यनुत्तमम् ॥ २०
यस्मिन्न नश्यन्ति गुणाः कौन्तेय पुरुषे सदा ।
आश्रमस्थं तमप्याहुर्नरश्रेष्ठं युधिष्ठिर ॥ २१
स्थानमानं वयोमानं कुलमानं तथैव च ।
कुर्वन्वसति सर्वेषु ह्याश्रमेषु युधिष्ठिर ॥ २२
देशधर्मांश्च कौन्तेय कुलधर्मांस्तथैव च ।
पालयन्पुरुषव्याघ्र राजा सर्वाश्रमी भवेत् ॥ २३
काले विभूतिं भूतानामुपहारांस्तथैव च ।
अर्हयन्पुरुषव्याघ्र साधूनामाश्रमे वसेत् ॥ २४
दशधर्मगतश्चापि यो धर्मं प्रत्यवेक्षते ।
सर्वलोकस्य कौन्तेय राजा भवति सोऽऽश्रमी ॥२५
ये धर्मकुशला लोके धर्मं कुर्वन्ति साधवः ।
पालिता यस्य विषये पादोंऽशस्तस्य भूपतेः ॥ २६

धर्मारामान्धर्मपरान्ये न रक्षन्ति मानवान् ।
पार्थिवाः पुरुषव्याघ्र तेषां पापं हरन्ति ते ॥ २७
ये च रक्षासहायाः स्युः पार्थिवानां युधिष्ठिर ।
ते चैवांशहराः सर्वे धर्मे परकृतेऽनघ ॥ २८
सर्वाश्रमपदे ह्याहुर्गार्हस्थ्यं दीप्तनिर्णयम् ।
पावनं पुरुषव्याघ्र यं वयं पर्युपास्महे ॥ २९
आत्मोपमस्तु भूतेषु यो वै भवति मानवः ।
न्यस्तदण्डो जितक्रोधः स प्रेत्य लभते सुखम्॥३०
धर्मोत्थिता सत्त्ववीर्या धर्मसेतुवटाकरा ।
त्यागवाताध्वगा शीघ्रा नौस्त्वा संतारयिष्यति॥३१
यदा निवृत्तः सर्वस्मात्कामो योऽस्य हृदि स्थितः ।
तदा भवति सत्त्वस्थस्ततो ब्रह्म समश्नुते ॥ ३२
सुप्रसन्नस्तु भावेन योगेन च नराधिप ।
धर्मं पुरुषशार्दूल प्राप्स्यसे पालने रतः ॥ ३३
वेदाध्ययनशीलानां विप्राणां साधुकर्मणाम् ।
पालने यत्नमातिष्ठ सर्वलोकस्य चानघ ॥ ३४
वने चरति यो धर्ममाश्रमेषु च भारत ।
रक्षया तच्छतगुणं धर्मं प्राप्नोति पार्थिवः ॥ ३५
एष ते विविधो धर्मः पाण्डवश्रेष्ठ कीर्तितः ।
अनुतिष्ठ त्वमेनं वै पूर्वैर्दृष्टं सनातनम् ॥ ३६
चातुराश्रम्यमेकाग्रः चातुर्वर्ण्यं च पाण्डव ।
धर्मं पुरुषशार्दूल प्राप्स्यसे पालने रतः ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

युधिष्ठिर उवाच ।

चातुराश्रम्य उक्तोऽत्र चातुर्वर्ण्यस्तथैव च ।
राष्ट्रस्य यत्कृत्यतमं तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

राष्ट्रस्यैतत्कृत्यतमं राज्ञ एवाभिषेचनम् ।
अनिन्द्रमबलं राष्ट्रं दस्यवोऽभिभवन्ति च ॥ २
अराजकेषु राष्ट्रेषु धर्मो न व्यवतिष्ठते ।
परस्परं च खादन्ति सर्वथा धिगराजकम् ॥ ३
इन्द्रमेनं प्रवृणुते यद्राजानमिति श्रुतिः ।
यथैवेन्द्रस्तथा राजा संपूज्यो भूतिमिच्छता ॥ ४
नाराजकेषु राष्ट्रेषु वस्तव्यमिति वैदिकम् ।
नाराजकेषु राष्ट्रेषु हव्यमग्निर्वहत्यपि ॥ ५
अथ चेदभिवर्तेत राज्यार्थी बलवत्तरः ।
अराजकानि राष्ट्राणि हतराजानि वा पुनः ॥ ६
प्रत्युद्गम्याभिपूज्यः स्यादेतदत्र सुमन्त्रितम् ।
न हि पापात्पापतरमस्ति किंचिदराजकात् ॥ ७
स चेत्समनुपश्येत समग्रं कुशलं भवेत् ।
बलवान्हि प्रकुपितः कुर्यान्निःशेषतामपि ॥ ८
भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा ।
सुदुहा या तु भवति नैव तां क्लेशयन्त्युत ॥ ९
यदतप्तं प्रणमति न तत्संतापयन्त्युत ।
यच्च स्वयं नतं दारु न तत्संनामयन्त्यपि ॥ १०
एतयोपमया धीरः संनमेत बलीयसे ।
इन्द्राय स प्रणमते नमते यो बलीयसे ॥ ११
तस्माद्राजैव कर्तव्यः सततं भूतिमिच्छता ।
न धनार्थो न दारार्थस्तेषां येषामराजकम् ॥ १२
प्रीयते हि हरन्पापः परवित्तमराजके ।
यदास्य उद्धरन्त्यन्ये तदा राजानमिच्छति ॥ १३
पापा अपि तदा क्षेमं न लभन्ते कदाचन ।
एकस्य हि द्वौ हरतो द्वयोश्च बहवोऽपरे ॥ १४
अदासः क्रियते दासो ह्रियन्ते च बलात्स्त्रियः ।
एतस्मात्कारणाद्देवाः प्रजापालान्प्रचक्रिरे ॥ १५
राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥ १६
अराजकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतम् ।

परस्परं भक्षयन्तो मत्स्या इव जले कृशान् ॥ १७
ताः समेत्य ततश्चक्रुः समयानिति नः श्रुतम् ।
वाक्क्रूरो दण्डपरुषो यश्च स्यात्पारदारिकः ।
यश्च नस्वमथादद्यात्त्याज्या नस्तादृशा इति ॥ १८
विश्वासनार्थं वर्णानां सर्वेषामविशेषतः ।
तास्तथा समयं कृत्वा समये नावतस्थिरे ॥ १९
सहितास्तास्तदा जग्मुरसुखार्ताः पितामहम् ।
अनीश्वरा विनश्यामो भगवन्नीश्वरं दिश ॥ २०
यं पूजयेम संभूय यश्च नः परिपालयेत् ।
ताभ्यो मनुं व्यादिदेश मनुर्नाभिननन्द ताः ॥२१

मनुरुवाच ।

बिभेमि कर्मणः क्रूराद्राज्यं हि भृशदुष्करम् ।
विशेषतो मनुष्येषु मिथ्यावृत्तिषु नित्यदा ॥ २२

भीष्म उवाच ।

तमब्रुवन्प्रजा मा भैः कर्तॄनेनो गमिष्यति ।
पशूनामधिपञ्चाशद्धिरण्यस्य तथैव च ।
धान्यस्य दशमं भागं दास्यामः कोशवर्धनम् ॥ २३
मुख्येन शस्त्रपत्रेण ये मनुष्याः प्रधानतः ।
भवन्तं तेऽनुयास्यन्ति महेन्द्रमिव देवताः ॥ २४
स त्वं जातबलो राजन्दुष्प्रधर्षः प्रतापवान् ।
सुखे धास्यसि नः सर्वान्कुबेर इव नैर्ऋतान् ॥ २५
यं च धर्मं चरिष्यन्ति प्रजा राज्ञा सुरक्षिताः ।
चतुर्थं तस्य धर्मस्य त्वत्संस्थं नो भविष्यति ॥२६
तेन धर्मेण महता सुखलब्धेन भावितः ।
पाह्यस्मान्सर्वतो राजन्देवानिव शतक्रतुः ॥ २७
विजयायाशु निर्याहि प्रतपन्रश्मिमानिव ।
मानं विधम शत्रूणां धर्मो जयतु नः सदा ॥ २८
स निर्ययौ महातेजा बलेन महता वृतः ।
महाभिजनसंपन्नस्तेजसा प्रज्वलन्निव ॥ २९
तस्य तां महिमां दृष्ट्वा महेन्द्रस्येव देवताः ।
अपतत्रसिरे सर्वे स्वधर्मे च दधुर्मनः ॥ ३०
ततो महीं परिययौ पर्जन्य इव वृष्टिमान् ।
शमयन्सर्वतः पापान्स्वकर्मसु च योजयन् ॥ ३१
एवं ये भूतिमिच्छेयुः पृथिव्यां मानवाः क्वचित् ।
कुर्यू राजानमेवाग्रे प्रजानुग्रहकारणात् ॥ ३२
नमस्येयुश्च तं भक्त्या शिष्या इव गुरुं सदा ।
देवा इव सहस्राक्षं प्रजा राजानमन्तिके ॥ ३३
सत्कृतं स्वजनेनेह परोऽपि बहु मन्यते ।
स्वजनेन त्ववज्ञातं परे परिभवन्त्युत ॥ ३४
राज्ञः परैः परिभवः सर्वेषामसुखावहः ।
तस्माच्छत्रं च पत्रं च वासांस्याभरणानि च ॥ ३५
भोजनान्यथ पानानि राज्ञे दद्युर्गृहाणि च ।
आसनानि च शय्याश्च सर्वोपकरणानि च ॥ ३६
गुप्तात्मा स्याद्दुराधर्षः स्मितपूर्वाभिभाषिता ।
आभाषितश्च मधुरं प्रतिभाषेत मानवान् ॥ ३७
कृतज्ञो दृढभक्तिः स्यात्संविभागी जितेन्द्रियः ।
ईक्षितः प्रतिवीक्षेत मृदु चर्जु च वल्गु च ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

युधिष्ठिर उवाच ।

किमाहुर्दैवतं विप्रा राजानं भरतर्षभ ।
मनुष्याणामधिपतिं तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतिं वसुमना यथा पप्रच्छ भारत ॥ २
राजा वसुमना नाम कौसल्यो धीमतां वरः ।
महर्षिं परिपप्रच्छ कृतप्रज्ञो बृहस्पतिम् ॥ ३
सर्वं वैनयिकं कृत्वा विनयज्ञो बृहस्पतेः ।
दक्षिणानन्तरो भूत्वा प्रणम्य विधिपूर्वकम् ॥ ४

विधिं पप्रच्छ राज्यस्य सर्वभूतहिते रतः ।
प्रजानां हितमन्विच्छन्धर्ममूलं विशां पते ॥ ५
केन भूतानि वर्धन्ते क्षयं गच्छन्ति केन च ।
कमर्चन्तो महाप्राज्ञ सुखमत्यन्तमाप्नुयुः ॥ ६
इति पृष्टो महाराज्ञा कौसल्येनामितौजसा ।
राजसत्कारमव्यग्रः शशंसास्मै बृहस्पतिः ॥ ७
राजमूलो महाराज धर्मो लोकस्य लक्ष्यते ।
प्रजा राजभयादेव न खादन्ति परस्परम् ॥ ८
राजा ह्येवाखिलं लोकं समुदीर्णं समुत्सुकम् ।
प्रसादयति धर्मेण प्रसाद्य च विराजते ॥ ९
यथा ह्यनुदये राजन्भूतानि शशिसूर्ययोः ।
अन्धे तमसि मज्जेयुरपश्यन्तः परस्परम् ॥ १०
यथा ह्यनुदके मत्स्या निराक्रन्दे विहंगमाः ।
विहरेयुर्यथाकाममभिसृत्य पुनः पुनः ॥ ११
विमथ्यातिक्रमेरंश्च विषह्यापि परस्परम् ।
अभावमचिरेणैव गच्छेयुर्नात्र संशयः ॥ १२
एवमेव विना राज्ञा विनश्येयुरिमाः प्रजाः ।
अन्धे तमसि मज्जेयुरगोपाः पशवो यथा ॥ १३
हरेयुर्बलवन्तो हि दुर्बलानां परिग्रहान् ।
हन्युर्व्यायच्छमानांश्च यदि राजा न पालयेत् ॥१४
यानं वस्त्रमलंकारान्रत्नानि विविधानि च ।
हरेयुः सहसा पापा यदि राजा न पालयेत् ॥ १५
ममेदमिति लोकेऽस्मिन्न भवेत्संपरिग्रहः ।
विश्वलोपः प्रवर्तेत यदि राजा न पालयेत् ॥ १६
मातरं पितरं वृद्धमाचार्यमतिथिं गुरुम् ।
क्लिश्नीयुरपि हिंस्युर्वा यदि राजा न पालयेत् ॥१७
पतेद्बहुविधं शस्त्रं बहुधा धर्मचारिषु ।
अधर्मः प्रगृहीतः स्याद्यदि राजा न पालयेत् ॥१८
वधबन्धपरिक्लेशो नित्यमर्थवतां भवेत् ।
ममत्वं च न विन्देयुर्यदि राजा न पालयेत् ॥१९
अन्तश्चाकाशमेव स्याल्लोकोऽयं दस्युसाद्भवेत् ।
पतेच्च नरकं घोरं यदि राजा न पालयेत् ॥ २०
न योनिपोषो वर्तेत न कृषिर्न वणिक्पथः ।
मज्जेद्धर्मस्त्रयी न स्याद्यदि राजा न पालयेत् ॥२१
न यज्ञाः संप्रवर्तेरन्विधिवत्स्वाप्तदक्षिणाः ।
न विवाहाः समाजा वा यदि राजा न पालयेत् ॥
न वृषाः संप्रवर्तेरन्न मथ्येरंश्च गर्गराः ।
घोषाः प्रणाशं गच्छेयुर्यदि राजा न पालयेत् ॥२३
त्रस्तमुद्विग्नहृदयं हाहाभूतमचेतनम् ।
क्षणेन विनश्येत्सर्वं यदि राजा न पालयेत् ॥ २४
न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः ।
विधिवद्दक्षिणावन्ति यदि राजा न पालयेत् ॥ २५
ब्राह्मणाश्चतुरो वेदान्नाधीयेरंस्तपस्विनः ।
विद्यास्नातास्तपःस्नाता यदि राजा न पालयेत् ॥२६
हस्तो हस्तं स मुष्णीयाद्भिद्येरन्सर्वसेतवः ।
भयार्तं विद्रवेत्सर्वं यदि राजा न पालयेत् ॥ २७
न लभेद्धर्मसंश्लेषं हतविप्रहतो जनः ।
कर्ता स्वेच्छेन्द्रियो गच्छेद्यदि राजा न पालयेत् ।
अनयाः संप्रवर्तेरन्भवेद्वै वर्णसंकरः ।
दुर्भिक्षमाविशेद्राष्ट्रं यदि राजा न पालयेत् ॥ २९
विवृत्य हि यथाकामं गृहद्वाराणि शेरते ।
मनुष्या रक्षिता राज्ञा समन्तादकुतोभयाः ॥ ३०
नाक्रुष्टं सहते कश्चित्कुतो हस्तस्य लङ्घनम् ।
यदि राजा मनुष्येषु त्राता भवति धार्मिकः ॥ ३१
स्त्रियश्चापुरुषा मार्गं सर्वालंकारभूषिताः ।
निर्भयाः प्रतिपद्यन्ते यदा रक्षति भूमिपः ॥ ३२
धर्ममेव प्रपद्यन्ते न हिंसन्ति परस्परम् ।
अनुगृह्णन्ति चान्योन्यं यदा रक्षति भूमिपः ॥ ३३
यजन्ते च त्रयो वर्णा महायज्ञैः पृथग्विधैः ।
युक्ताश्चाधीयते शास्त्रं यदा रक्षति भूमिपः ॥ ३४

वार्तामूलो ह्ययं लोकस्त्रय्या वै धार्यते सदा ।
तत्सर्वं वर्तते सम्यग्यदा रक्षति भूमिपः ॥ ३५
यदा राजा धुरं श्रेष्ठामादाय वहति प्रजाः ।
महता बलयोगेन तदा लोकः प्रसीदति ॥ ३६
यस्याभावे च भूतानामभावः स्यात्समन्ततः ।
भावे च भावो नित्यः स्यात्कस्तं न प्रतिपूजयेत् ॥
तस्य यो वहते भारं सर्वलोकसुखावहम् ।
तिष्ठेत्प्रियहिते राज्ञ उभौ लोकौ हि यो जयेत् ॥
यस्तस्य पुरुषः पापं मनसाप्यनुचिन्तयेत् ।
असंशयमिह क्लिष्टः प्रेत्यापि नरकं पतेत् ॥ ३९
न हि जात्ववमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ४०
कुरुते पञ्च रूपाणि कालयुक्तानि यः सदा ।
भवत्यग्निस्तथादित्यो मृत्युर्वैश्रवणो यमः ॥ ४१
यदा ह्यासीदतः पापान्दहत्युग्रेण तेजसा ।
मिथ्योपचरितो राजा तदा भवति पावकः ॥ ४२
यदा पश्यति चारेण सर्वभूतानि भूमिपः ।
क्षेमं च कृत्वा व्रजति तदा भवति भास्करः ॥४३
अशुचींश्च यदा क्रुद्धः क्षिणोति शतशो नरान् ।
सपुत्रपौत्रान्सामात्यांस्तदा भवति सोऽन्तकः ॥ ४४
यदा त्वधार्मिकान्सर्वांस्तीक्ष्णैर्दण्डैर्नियच्छति ।
धार्मिकांश्चानुगृह्णाति भवत्यथ यमस्तदा ॥ ४५
यदा तु धनधाराभिस्तर्पयत्युपकारिणः ।
आच्छिनत्ति च रत्नानि विविधान्यपकारिणाम् ॥
श्रियं ददाति कस्मैचित्कस्माच्चिदपकर्षति ।
तदा वैश्रवणो राजँल्लोके भवति भूमिपः ॥ ४७
नास्यापवादे स्थातव्यं दक्षेणाक्लिष्टकर्मणा ।
धर्म्यमाकाङ्क्षता लाभमीश्वरस्यानसूयता ॥ ४८
न हि राज्ञः प्रतीपानि कुर्वन्सुखमवाप्नुयात् ।
पुत्रो भ्राता वयस्यो वा यश्चाप्यात्मसमो भवेत् ॥४९
कुर्यात्कृष्णगतिः शेषं ज्वलितोऽनिलसारथिः ।
न तु राज्ञाभिपन्नस्य शेषं क्वचन विद्यते ॥ ५०
तस्य सर्वाणि रक्ष्याणि दूरतः परिवर्जयेत् ।
मृत्योरिव जुगुप्सेत राजस्वहरणान्नरः ॥ ५१
नश्येदभिमृशन्सद्यो मृगः कूटमिव स्पृशन् ।
आत्मस्वमिव संरक्षेद्राजस्वमिह बुद्धिमान् ॥ ५२
महान्तं नरकं घोरमप्रतिष्ठमचेतसः ।
पतन्ति चिररात्राय राजवित्तापहारिणः ॥ ५३
राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ।
य एवं स्तूयते शब्दैः कस्तं नार्चितुमिच्छति ॥५४
तस्माद्बुभूषुर्नियतो जितात्मा संयतेन्द्रियः ।
मेधावी स्मृतिमान्दक्षः संश्रयेत महीपतिम् ॥ ५५
कृतज्ञं प्राज्ञमक्षुद्रं दृढभक्तिं जितेन्द्रियम् ।
धर्मनित्यं स्थितं स्थित्यां मन्त्रिणं पूजयेन्नृपः ॥ ५६
दृढभक्तिं कृतप्रज्ञं धर्मज्ञं संयतेन्द्रियम् ।
शूरमक्षुद्रकर्माणं निषिद्धजनमाश्रयेत् ॥ ५७

राजा प्रगल्भं पुरुषं करोति
राजा कृशं बृंहयते मनुष्यम् ।
राजाभिपन्नस्य कुतः सुखानि
राजाभ्युपेतं सुखिनं करोति ॥ ५८
राजा प्रजानां हृदयं गरीयो
गतिः प्रतिष्ठा सुखमुत्तमं च ।
यमाश्रिता लोकमिमं परं च
जयन्ति सम्यक्पुरुषा नरेन्द्रम् ॥ ५९
नराधिपश्चाप्यनुशिष्य मेदिनीं
दमेन सत्येन च सौहृदेन ।
महद्भिरिष्ट्वा क्रतुभिर्महायशा-
स्त्रिविष्टपे स्थानमुपैति सत्कृतम् ॥ ६०

स एवमुक्तो गुरुणा कौसल्यो राजसत्तमः ।

प्रयत्नात्कृतवान्वीरः प्रजानां परिपालनम् ॥ ६१

इति श्रीमहाभारते शान्तिपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

युधिष्ठिर उवाच ।

पार्थिवेन विशेषेण किं कार्यमवशिष्यते ।
कथं रक्ष्यो जनपदः कथं रक्ष्याश्च शत्रवः ॥ १
कथं चारं प्रयुञ्जीत वर्णान्विश्वासयेत्कथम् ।
कथं भृत्यान्कथं दारान्कथं पुत्रांश्च भारत ॥ २

भीष्म उवाच ।

राजवृत्तं महाराज शृणुष्वावहितोऽखिलम् ।
यत्कार्यं पार्थिवेनादौ पार्थिवप्रकृतेन वा ॥ ३
आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ।
अजितात्मा नरपतिर्विजयेत कथं रिपून् ॥ ४
एतावानात्मविजयः पञ्चवर्गविनिग्रहः ।
जितेन्द्रियो नरपतिर्बाधितुं शक्नुयादरीन् ॥ ५
न्यसेत गुल्मान्दुर्गेषु संधौ च कुरुनन्दन ।
नगरोपवने चैव पुरोद्यानेषु चैव ह ॥ ६
संस्थानेषु च सर्वेषु पुरेषु नगरस्य च ।
मध्ये च नरशार्दूल तथा राजनिवेशने ॥ ७
प्रणिधींश्च ततः कुर्याज्जडान्धबधिराकृतीन् ।
पुंसः परीक्षितान्प्राज्ञान्क्षुत्पिपासातपक्षमान् ॥ ८
अमात्येषु च सर्वेषु मित्रेषु त्रिविधेषु च ।
पुत्रेषु च महाराज प्रणिदध्यात्समाहितः ॥ ९
पुरे जनपदे चैव तथा सामन्तराजसु ।
यथा न विद्युरन्योन्यं प्रणिधेयास्तथा हि ते ॥ १०
चारांश्च विद्यात्प्रहितान्परेण भरतर्षभ ।
आपणेषु विहारेषु समवायेषु भिक्षुषु ॥ ११
आरामेषु तथोद्याने पण्डितानां समागमे ।
वेशेषु चत्वरे चैव सभास्वावसथेषु च ॥ १२
एवं विहन्याच्चारेण परचारं विचक्षणः ।
चारेण विहितं सर्वं हतं भवति पाण्डव ॥ १३
यदा तु हीनं नृपतिर्विद्यादात्मानमात्मना ।
अमात्यैः सह संमन्त्र्य कुर्यात्संधिं बलीयसा ॥ १४
अज्ञायमानो हीनत्वे कुर्यात्संधिं परेण वै ।
लिप्सुर्वा कंचिदेवार्थं त्वरमाणो विचक्षणः ॥ १५
गुणवन्तो महोत्साहा धर्मज्ञाः साधवश्च ये ।
संदधीत नृपस्तैश्च राष्ट्रं धर्मेण पालयन् ॥ १६
उच्छिद्यमानमात्मानं ज्ञात्वा राजा महामतिः ।
पूर्वापकारिणो हन्याल्लोकद्विष्टांश्च सर्वशः ॥ १७
यो नोपकर्तुं शक्नोति नापकर्तुं महीपतिः ।
अशक्यरूपश्चोद्धर्तुमुपेक्ष्यस्तादृशो भवेत् ॥ १८
यात्रां यायादविज्ञातमनाक्रन्दमनन्तरम् ।
व्यासक्तं च प्रमत्तं च दुर्बलं च विचक्षणः ॥ १९
यात्रामाज्ञापयेद्वीरः कल्यपुष्टबली सुखी ।
पूर्वं कृत्वा विधानं च यात्रायां नगरे तथा ॥ २०
न च वश्यो भवेदस्य नृपो यद्यपि वीर्यवान् ।
हीनश्च बलवीर्याभ्यां कर्शयंस्तं परावसेत् ॥ २१
राष्ट्रं च पीडयेत्तस्य शस्त्राग्निविषमूर्छनैः ।
अमात्यवल्लभानां च विवादांस्तस्य कारयेत् ।
वर्जनीयं सदा युद्धं राज्यकामेन धीमता ॥ २२
उपायैस्त्रिभिरादानमर्थस्याह बृहस्पतिः ।
सान्त्वेनानुप्रदानेन भेदेन च नराधिप ।
यमर्थं शक्नुयात्प्राप्तुं तेन तुष्येद्धि पण्डितः ॥ २३
आददीत बलिं चैव प्रजाभ्यः कुरुनन्दन ।
षड्भागममितप्रज्ञस्तासामेवाभिगुप्तये ॥ २४
दशधर्मगतेभ्यो यद्वसु बह्वल्पमेव च ।
तन्नाददीत सहसा पौराणां रक्षणाय वै ॥ २५
यथा पुत्रास्तथा पौरा द्रष्टव्यास्ते न संशयः ।
भक्तिश्चैषां प्रकर्तव्या व्यवहारे प्रदर्शिते ॥ २६

सुतं च स्थापयेद्राजा प्राज्ञं सर्वार्थदर्शिनं ।
व्यवहारेषु सततं तत्र राज्यं व्यवस्थितम् ॥ २७
आकरे लवणे शुल्के तरे नागवने तथा ।
न्यसेदमात्यान्नृपतिः स्वाप्तान्वा पुरुषान्हितान् ॥२८
सम्यग्दण्डधरो नित्यं राजा धर्ममवाप्नुयात् ।
नृपस्य सततं दण्डः सम्यग्धर्मे प्रशस्यते ॥ २९
वेदवेदाङ्गवित्प्राज्ञः सुतपस्वी नृपो भवेत् ।
दानशीलश्च सततं यज्ञशीलश्च भारत ॥ ३०
एते गुणाः समस्ताः स्युर्नृपस्य सततं स्थिराः ।
क्रियालोपे तु नृपतेः कुतः स्वर्गः कुतो यशः ॥३१
यदा तु पीडितो राजा भवेद्राज्ञा बलीयसा ।
त्रिधा त्वाक्रन्द्य मित्राणि विधानमुपकल्पयेत् ॥३२
घोषान्न्यसेत मार्गेषु ग्रामानुत्थापयेदपि ।
प्रवेशयेच्च तान्सर्वाञ्शाखानगरकेष्वपि ॥ ३३
ये गुप्ताश्चैव दुर्गाश्च देशास्तेषु प्रवेशयेत् ।
धनिनो बलमुख्यांश्च सान्त्वयित्वा पुनः पुनः ॥३४
सस्याभिहारं कुर्याच्च स्वयमेव नराधिपः ।
असंभवे प्रवेशस्य दाहयेदग्निना भृशम् ॥ ३५
क्षेत्रस्थेषु च सस्येषु शत्रोरुपजपेन्नरान् ।
विनाशयेद्वा सर्वस्वं बलेनाथ स्वकेन वै ॥ ३६
नदीषु मार्गेषु सदा संक्रमानवसादयेत् ।
जलं निस्रावयेत्सर्वमनिस्राव्यं च दूषयेत् ॥ ३७
तदात्वेनायतीभिश्च विवदन्भूम्यनन्तरम् ।
प्रतीघातः परस्याजौ मित्रकालेऽप्युपस्थिते ॥ ३८
दुर्गाणां चाभितो राजा मूलच्छेदं प्रकारयेत् ।
सर्वेषां क्षुद्रवृक्षाणां चैत्यवृक्षान्विवर्जयेत् ॥ ३९
प्रवृद्धानां च वृक्षाणां शाखाः प्रच्छेदयेत्तथा ।
चैत्यानां सर्वथा वर्ज्यमपि पत्रस्य पातनम् ॥ ४०
प्रगण्डीः कारयेत्सम्यगाकाशजननीस्तथा ।
आपूरयेच्च परिखाः स्थाणुनक्रझषाकुलाः ॥ ४१

कडङ्गद्वारकाणि स्युरुच्छ्वासार्थे पुरस्य ह ।
तेषां च द्वारवद्गुप्तिः कार्या सर्वात्मना भवेत् ॥४२
द्वारेषु च गुरूण्येव यन्त्राणि स्थापयेत्सदा ।
आरोपयेच्छतघ्नीश्च स्वाधीनानि च कारयेत् ॥ ४३
काष्ठानि चाभिहार्याणि तथा कूपांश्च खानयेत् ।
संशोधयेत्तथा कूपान्कृतान्पूर्वं पयोर्थिभिः ॥ ४४
तृणच्छन्नानि वेश्मानि पङ्केनापि प्रलेपयेत् ।
निर्हरेच्च तृणं मासे चैत्रे वह्निभयात्पुरः ॥ ४५
नक्तमेव च भक्तानि पाचयेत नराधिपः ।
न दिवाग्निर्ज्वलेद्गेहे वर्जयित्वाग्निहोत्रिकम् ॥ ४६
कर्मारारिष्टशालासु ज्वलेदग्निः समाहितः ।
गृहाणि च प्रविश्याथ विधेयः स्याद्धुताशनः ॥४७
महादण्डश्च तस्य स्याद्यस्याग्निर्वै दिवा भवेत् ।
प्रघोषयेदथैवं च रक्षणार्थं पुरस्य वै ॥ ४८
भिक्षुकांश्चाक्रिकांश्चैव क्षीबोन्मत्तान्कुशीलवान् ।
बाह्यान्कुर्यान्नरश्रेष्ठ दोषाय स्युर्हि तेऽन्यथा ॥ ४९
चत्वरेषु च तीर्थेषु सभास्वावसथेषु च ।
यथार्हवर्णं प्रणिधिं कुर्यात्सर्वत्र पार्थिवः ॥ ५०
विशालान्राजमार्गांश्च कारयेत नराधिपः ।
प्रपाश्च विपणीश्चैव यथोद्देशं समादिशेत् ॥ ५१
भाण्डागारायुधागारान्धान्यागारांश्च सर्वशः ।
अश्वागारान्गजागारान्बलाधिकरणानि च ॥ ५२
परिखाश्चैव कौरव्य प्रतोलीः संकटानि च ।
न जातु कश्चित्पश्येत्तु गुह्यमेतद्युधिष्ठिर ॥ ५३
अथ संनिचयं कुर्याद्राजा परबलार्दितः ।
तैलं मधु घृतं सस्यमौषधानि च सर्वशः ॥ ५४
अङ्गारकुशमुञ्जानां पलाशशरपर्णिनाम् ।
यवसेन्धनदिग्धानां कारयेत च संचयान् ॥ ५५
आयुधानां च सर्वेषां शक्त्यृष्टिप्रासवर्मणाम् ।
संचयानेवमादीनां कारयेत नराधिपः ॥ ५६

औषधानि च सर्वाणि मूलानि च फलानि च ।
चतुर्विधांश्च वैद्यान्वै संगृह्णीयाद्विशेषतः ॥ ५७
नटाश्च नर्तकाश्चैव मल्ला मायाविनस्तथा ।
शोभयेयुः पुरवरं मोदयेयुश्च सर्वशः ॥ ५८
यतः शङ्का भवेच्चापि भृत्यतो वापि मन्त्रितः ।
पौरेभ्यो नृपतेर्वापि स्वाधीनान्कारयेत तान् ॥ ५९
कृते कर्मणि राजेन्द्र पूजयेद्धनसंचयैः ।
मानेन च यथार्हेण सान्त्वेन विविधेन च ॥ ६०
निर्वेदयित्वा तु परं हत्वा वा कुरुनन्दन ।
गतानृण्यो भवेद्राजा यथा शास्त्रेषु दर्शितम् ॥ ६१
राज्ञा सप्तैव रक्ष्याणि तानि चापि निबोध मे ।
आत्मामात्यश्च कोशश्च दण्डो मित्राणि चैव हि ॥ ६२
तथा जनपदश्चैव पुरं च कुरुनन्दन ।
एतत्सप्तात्मकं राज्यं परिपाल्यं प्रयत्नतः ॥ ६३
षाड्गुण्यं च त्रिवर्गं च त्रिवर्गमपरं तथा ।
यो वेत्ति पुरुषव्याघ्र स भुनक्ति महीमिमाम् ॥ ६४
षाड्गुण्यमिति यत्प्रोक्तं तन्निबोध युधिष्ठिर ।
संधायासनमित्येव यात्रासंधानमेव च ॥ ६५
विगृह्यासनमित्येव यात्रां संपरिगृह्य च ।
द्वैधीभावस्तथान्येषां संश्रयोऽथ परस्य च ॥ ६६
त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु ।
क्षयः स्थानं च वृद्धिश्च त्रिवर्गमपरं तथा ॥ ६७
धर्मश्चार्थश्च कामश्च सेवितव्योऽथ कालतः ।
धर्मेण हि महीपालश्चिरं पालयते महीम् ॥ ६८
अस्मिन्नर्थे च यौ श्लोकौ गीतावङ्गिरसा स्वयम् ।
यादवीपुत्र भद्रं ते श्रोतुमर्हसि तावपि ॥ ६९
कृत्वा सर्वाणि कार्याणि सम्यक्संपाल्य मेदिनीम् ।
पालयित्वा तथा पौरान्परत्र सुखमेधते ॥ ७०
किं तस्य तपसा राज्ञः किं च तस्याध्वरैरपि ।
अपालिताः प्रजा यस्य सर्वा धर्मविनाकृताः ॥ ७१

इति श्रीमहाभारते शान्तिपर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

युधिष्ठिर उवाच ।

दण्डनीतिश्च राजा च समस्तौ तावुभावपि ।
कस्य किं कुर्वतः सिद्ध्यै तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

महाभाग्यं दण्डनीत्याः सिद्धैः शब्दैः सहेतुकैः ।
शृणु मे शंसतो राजन्यथावदिह भारत ॥ २
दण्डनीतिः स्वधर्मेभ्यश्चातुर्वर्ण्यं नियच्छति ।
प्रयुक्ता स्वामिना सम्यगधर्मेभ्यश्च यच्छति ॥ ३
चातुर्वर्ण्ये स्वधर्मस्थे मर्यादानामसंकरे ।
दण्डनीतिकृते क्षेमे प्रजानामकुतोभये ॥ ४
सोमे प्रयत्नं कुर्वन्ति त्रयो वर्णा यथाविधि ।
तस्माद्देवमनुष्याणां सुखं विद्धि समाहितम् ॥ ५
कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो मा भूद्राजा कालस्य कारणम् ॥ ६
दण्डनीत्या यदा राजा सम्यक्कार्त्स्न्येन वर्तते ।
तदा कृतयुगं नाम कालः श्रेष्ठः प्रवर्तते ॥ ७
भवेत्कृतयुगे धर्मो नाधर्मो विद्यते क्वचित् ।
सर्वेषामेव वर्णानां नाधर्मे रमते मनः ॥ ८
योगक्षेमाः प्रवर्तन्ते प्रजानां नात्र संशयः ।
वैदिकानि च कर्माणि भवन्त्यविगुणान्युत ॥ ९
ऋतवश्च सुखाः सर्वे भवन्त्युत निरामयाः ।
प्रसीदन्ति नराणां च स्वरवर्णमनांसि च ॥ १०
व्याधयो न भवन्त्यत्र नाल्पायुर्दृश्यते नरः ।
विधवा न भवन्त्यत्र नृशंसो नाभिजायते ॥ ११
अकृष्टपच्या पृथिवी भवन्त्योषधयस्तथा ।
त्वक्पत्रफलमूलानि वीर्यवन्ति भवन्ति च ॥ १२

नाधर्मो विद्यते तत्र धर्म एव तु केवलः ।
इति कार्तयुगानेतान्गुणान्विद्धि युधिष्ठिर ॥ १३
दण्डनीत्या यदा राजा त्रीनंशाननुवर्तते ।
चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्तते ॥ १४
अशुभस्य चतुर्थांशस्त्रीनंशाननुवर्तते ।
कृष्टपच्यैव पृथिवी भवन्त्योषधयस्तथा ॥ १५
अर्धं त्यक्त्वा यदा राजा नीत्यर्धमनुवर्तते ।
ततस्तु द्वापरं नाम स कालः संप्रवर्तते ॥ १६
अशुभस्य तदा अर्धं द्वावंशावनुवर्तते ।
कृष्टपच्यैव पृथिवी भवत्यल्पफला तथा ॥ १७
दण्डनीतिं परित्यज्य यदा कार्त्स्न्येन भूमिपः ।
प्रजा क्लिश्नात्ययोगेन प्रविश्यति तदा कलिः ॥ १८
कलावधर्मो भूयिष्ठं धर्मो भवति तु क्वचित् ।
सर्वेषामेव वर्णानां स्वधर्माच्च्यवते मनः ॥ १९
शूद्रा भैक्षेण जीवन्ति ब्राह्मणाः परिचर्यया ।
योगक्षेमस्य नाशश्च वर्तते वर्णसंकरः ॥ २०
वैदिकानि च कर्माणि भवन्ति विगुणान्युत ।
ऋतवो नसुखाः सर्वे भवन्त्यामयिनस्तथा ॥ २१
ह्रसन्ति च मनुष्याणां स्वरवर्णमनांस्युत ।
व्याधयश्च भवन्त्यत्र म्रियन्ते चागतायुषः ॥ २२
विधवाश्च भवन्त्यत्र नृशंसा जायते प्रजा ।
क्वचिद्वर्षति पर्जन्यः क्वचित्सस्यं प्ररोहति ॥ २३
रसाः सर्वे क्षयं यान्ति यदा नेच्छति भूमिपः ।
प्रजाः संरक्षितुं सम्यग्दण्डनीतिसमाहितः ॥ २४
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम् ॥ २५
कृतस्य करणाद्राजा स्वर्गमत्यन्तमश्नुते ।
त्रेतायाः करणाद्राजा स्वर्गं नात्यन्तमश्नुते ॥ २६
प्रवर्तनाद्द्वापरस्य यथाभागमुपाश्नुते ।
कलेः प्रवर्तनाद्राजा पापमत्यन्तमश्नुते ॥ २७
ततो वसति दुष्कर्मा नरके शाश्वतीः समाः ।
प्रजानां कल्मषे मग्नोऽकीर्तिं पापं च विन्दति ॥२८
दण्डनीतिं पुरस्कृत्य विजानन्क्षत्रियः सदा ।
अनवाप्तं च लिप्सेत लब्धं च परिपालयेत् ॥ २९
लोकस्य सीमन्तकरी मर्यादा लोकभावनी ।
सम्यङ्नीता दण्डनीतिर्यथा माता यथा पिता ॥३०
यस्यां भवन्ति भूतानि तद्विद्धि भरतर्षभ ।
एष एव परो धर्मो यद्राजा दण्डनीतिमान् ॥ ३१
तस्मात्कौरव्य धर्मेण प्रजाः पालय नीतिमान् ।
एवंवृत्तः प्रजा रक्षन्स्वर्गं जेतासि दुर्जयम् ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

युधिष्ठिर उवाच ।

केन वृत्तेन वृत्तज्ञ वर्तमानो महीपतिः ।
सुखेनार्थान्सुखोदर्कानिह च प्रेत्य चाप्नुयात् ॥ १

भीष्म उवाच ।

इयं गुणानां षट्त्रिंशत्षट्त्रिंशद्गुणसंयुता ।
यान्गुणांस्तु गुणोपेतः कुर्वन्गुणमवाप्नुयात् ॥ २
चरेद्धर्मानकटुको मुञ्चेत्स्नेहं न नास्तिकः ।
अनृशंसश्चरेदर्थं चरेत्काममनुद्धतः ॥ ३
प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी स्यात्प्रगल्भः स्यादनिष्ठुरः ॥ ४
संदधीत न चानार्यैर्विगृह्णीयान्न बन्धुभिः ।
नानाप्तैः कारयेच्चारं कुर्यात्कार्यमपीडया ॥ ५
अर्थान्ब्रूयान्न चासत्सु गुणान्ब्रूयान्न चात्मनः ।
आदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत् ॥ ६
नापरीक्ष्य नयेद्दण्डं न च मन्त्रं प्रकाशयेत् ।
विसृजेन्न च लुब्धेभ्यो विश्वसेन्नापकारिषु ॥ ७

अनीर्षुर्गुप्तदारः स्याच्चोक्षः स्यादघृणी नृपः ।
स्त्रियं सेवेत नात्यर्थं मृष्टं भुञ्जीत नाहितम् ॥ ८
अस्तब्धः पूजयेन्मान्यान्गुरून्सेवेदमायया ।
अर्चेद्देवान्नदम्भेन श्रियमिच्छेदकुत्सिताम् ॥ ९
सेवेत प्रणयं हित्वा दक्षः स्यान्न त्वकालवित् ।
सान्त्वयेन्न च भोगार्थमनुगृह्णन्न चाक्षिपेत् ॥ १०
प्रहरेन्न त्वविज्ञाय हत्वा शत्रून्न शेषयेत् ।
क्रोधं कुर्यान्न चाकस्मान्मृदुः स्यान्नापकारिषु ॥ ११
एवं चरस्व राज्यस्थो यदि श्रेय इहेच्छसि ।
अतोऽन्यथा नरपतिर्भयमृच्छत्यनुत्तमम् ॥ १२
इति सर्वान्गुणानेतान्यथोक्तान्योऽनुवर्तते ।
अनुभूयेह भद्राणि प्रेत्य स्वर्गे महीयते ॥ १३

वैशंपायन उवाच ।

इदं वचः शांतनवस्य शुश्रुवा-
न्युधिष्ठिरः पाण्डवमुख्यसंवृतः ।
तदा ववन्दे च पितामहं नृपो
यथोक्तमेतच्च चकार बुद्धिमान् ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

युधिष्ठिर उवाच ।

कथं राजा प्रजा रक्षन्नाधिबन्धेन युज्यते ।
धर्मे च नापराध्नोति तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

समासेनैव ते तात धर्मान्वक्ष्यामि निश्चितान् ।
विस्तरेण हि धर्माणां न जात्वन्तमवाप्नुयात् ॥ २
धर्मनिष्ठाञ्श्रुतवतो वेदव्रतसमाहितान् ।
अर्चितान्वासयेथास्त्वं गृहे गुणवतो द्विजान् ॥ ३
प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च ।
अथ सर्वाणि कुर्वीथाः कार्याणि सपुरोहितः ॥ ४
धर्मकार्याणि निर्वर्त्य मङ्गलानि प्रयुज्य च ।
ब्राह्मणान्वाचयेथास्त्वमर्थसिद्धिजयाशिषः ॥ ५
आर्जवेन च संपन्नो धृत्या बुद्ध्या च भारत ।
अर्थार्थं परिगृह्णीयात्कामक्रोधौ च वर्जयेत् ॥ ६
कामक्रोधौ पुरस्कृत्य योऽर्थं राजानुतिष्ठति ।
न स धर्मं न चाप्यर्थं परिगृह्णाति बालिशः ॥ ७
मा स्म लुब्धांश्च मूर्खांश्च कामे चार्थेषु यूयुजः ।
अलुब्धान्बुद्धिसंपन्नान्सर्वकर्मसु योजयेत् ॥ ८
मूर्खो ह्यधिकृतोऽर्थेषु कार्याणामविशारदः ।
प्रजाः क्लिश्नात्ययोगेन कामद्वेषसमन्वितः ॥ ९
बलिषष्ठेन शुल्केन दण्डेनाथापराधिनाम् ।
शास्त्रनीतेन लिप्सेथा वेतनेन धनागमम् ॥ १०
दापयित्वा करं धर्म्यं राष्ट्रं नित्यं यथाविधि ।
अशेषान्कल्पयेद्राजा योगक्षेमानतन्द्रितः ॥ ११
गोपायितारं दातारं धर्मनित्यमतन्द्रितम् ।
अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः ॥ १२
मा स्माधर्मेण लाभेन लिप्सेथास्त्वं धनागमम् ।
धर्मार्थावध्रुवौ तस्य योऽपशास्त्रपरो भवेत् ॥ १३
अपशास्त्रपरो राजा संचयान्नाधिगच्छति ।
अस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति ॥ १४
अर्थमूलोऽपहिंसां च कुरुते स्वयमात्मनः ।
करैरशास्त्रदृष्टैर्हि मोहात्संपीडयन्प्रजाः ॥ १५
ऊधश्छिन्द्याद्धि यो धेन्वाः क्षीरार्थी न लभेत्पयः ।
एवं राष्ट्रमयोगेन पीडितं न विवर्धते ॥ १६
यो हि दोग्ध्रीमुपास्ते तु स नित्यं लभते पयः ।
एवं राष्ट्रमुपायेन भुञ्जानो लभते फलम् ॥ १७
अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितम् ।
जनयत्यतुलां नित्यं कोशवृद्धिं युधिष्ठिर ॥ १८
दोग्धि धान्यं हिरण्यं च प्रजा राज्ञि सुरक्षिता ।

नित्यं स्वेभ्यः परेभ्यश्च तृप्ता माता यथा पयः ॥ १९
मालाकारोपमो राजन्भव माङ्गारिकोपमः ।
तथा युक्तश्चिरं राष्ट्रं भोक्तुं शक्ष्यसि पालयन् ॥ २०
परचक्राभियानेन यदि ते स्याद्धनक्षयः ।
अथ साम्नैव लिप्सेथा धनमब्राह्मणेषु यत् ॥ २१
मा स्म ते ब्राह्मणं दृष्ट्वा धनस्थं प्रचलेन्मनः ।
अन्त्यायामप्यवस्थायां किमु स्फीतस्य भारत ॥ २२
धनानि तेभ्यो दद्यास्त्वं यथाशक्ति यथार्हतः ।
सान्त्वयन्परिरक्षंश्च स्वर्गमाप्स्यसि दुर्जयम् ॥ २३
एवं धर्मेण वृत्तेन प्रजास्त्वं परिपालयन् ।
स्वन्तं पुण्यं यशोवन्तं प्राप्स्यसे कुरुनन्दन ॥ २४
धर्मेण व्यवहारेण प्रजाः पालय पाण्डव ।
युधिष्ठिर तथा युक्तो नाधिबन्धेन योक्ष्यसे ॥ २५
एष एव परो धर्मो यद्राजा रक्षते प्रजाः ।
भूतानां हि यथा धर्मे रक्षणं च परा दया ॥ २६
तस्मादेवं परं धर्मं मन्यन्ते धर्मकोविदाः ।
यद्राजा रक्षणे युक्तो भूतेषु कुरुते दयाम् ॥ २७
यदह्ना कुरुते पापमरक्षन्भयतः प्रजाः ।
राजा वर्षसहस्रेण तस्यान्तमधिगच्छति ॥ २८
यदह्ना कुरुते पुण्यं प्रजा धर्मेण पालयन् ।
दश वर्षसहस्राणि तस्य भुङ्क्ते फलं दिवि ॥ २९
स्विष्टिः स्वधीतिः सुतपा लोकाञ्जयति यावतः ।
क्षणेन तानवाप्नोति प्रजा धर्मेण पालयन् ॥ ३०
एवं धर्मं प्रयत्नेन कौन्तेय परिपालयन् ।
इह पुण्यफलं लब्ध्वा नाधिबन्धेन योक्ष्यसे ॥ ३१
स्वर्गलोके च महतीं श्रियं प्राप्स्यसि पाण्डव ।
असंभवश्च धर्माणामीदृशानामराजसु ।
तस्माद्राजैव नान्योऽस्ति यो महत्फलमाप्नुयात् ॥ ३२
स राज्यमृद्धिमत्प्राप्य धर्मेण परिपालयन् ।
इन्द्रं तर्पय सोमेन कामैश्च सुहृदो जनान् ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

भीष्म उवाच ।

य एव तु सतो रक्षेदसतश्च निवर्हयेत् ।
स एव राजा कर्तव्यो राजन्राजपुरोहितः ॥ १
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पुरूरवस ऐलस्य संवादं मातरिश्वनः ॥ २

ऐल उवाच ।

कुतः स्विद्ब्राह्मणो जातो वर्णाश्चापि कुतस्त्रयः ।
कस्माच्च भवति श्रेयानेतद्वायो विचक्ष्व मे ॥ ३

वायुरुवाच ।

ब्रह्मणो मुखतः सृष्टो ब्राह्मणो राजसत्तम ।
बाहुभ्यां क्षत्रियः सृष्ट ऊरुभ्यां वैश्य उच्यते ॥ ४
वर्णानां परिचर्यार्थं त्रयाणां पुरुषर्षभ ।
वर्णश्चतुर्थः पश्चात्तु पद्भ्यां शूद्रो विनिर्मितः ॥ ५
ब्राह्मणो जातमात्रस्तु पृथिवीमन्वजायत ।
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ ६
ततः पृथिव्या गोप्तारं क्षत्रियं दण्डधारिणम् ।
द्वितीयं वर्णमकरोत्प्रजानामनुगुप्तये ॥ ७
वैश्यस्तु धनधान्येन त्रीन्वर्णान्बिभृयादिमान् ।
शूद्रो ह्येनान्परिचरेदिति ब्रह्मानुशासनम् ॥ ८

ऐल उवाच ।

द्विजस्य क्षत्रबन्धोर्वा कस्येयं पृथिवी भवेत् ।
धर्मतः सह वित्तेन सम्यग्वायो प्रचक्ष्व मे ॥ ९

वायुरुवाच ।

विप्रस्य सर्वमेवैतद्यत्किंचिज्जगतीगतम् ।
ज्येष्ठेनाभिजनेनेह तद्धर्मकुशला विदुः ॥ १०

स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
गुरुर्हि सर्ववर्णानां ज्येष्ठः श्रेष्ठश्च वै द्विजः ॥ ११
पत्यभावे यथा स्त्री हि देवरं कुरुते पतिम् ।
आनन्तर्यात्तथा क्षत्रं पृथिवी कुरुते पतिम् ॥ १२
एष ते प्रथमः कल्प आपद्यन्यो भवेदतः ।
यदि स्वर्गे परं स्थानं धर्मतः परिमार्गसि ॥ १३
यः कश्चिद्विजयेद्भूमिं ब्राह्मणाय निवेदयेत् ।
श्रुतवृत्तोपपन्नाय धर्मज्ञाय तपस्विने ॥ १४
स्वधर्मपरितृप्ताय यो न वित्तपरो भवेत् ।
यो राजानं नयेद्बुद्ध्या सर्वतः परिपूर्णया ॥ १५
ब्राह्मणो हि कुले जातः कृतप्रज्ञो विनीतवाक् ।
श्रेयो नयति राजानं ब्रुवंश्चित्रां सरस्वतीम् ॥ १६
राजा चरति यं धर्मं ब्राह्मणेन निदर्शितम् ।
शुश्रूषुरनहंवादी क्षत्रधर्मव्रते स्थितः ॥ १७
तावता स कृतप्रज्ञश्चिरं यशसि तिष्ठति ।
तस्य धर्मस्य सर्वस्य भागी राजपुरोहितः ॥ १८
एवमेव प्रजाः सर्वा राजानमभिसंश्रिताः ।
सम्यग्वृत्ताः स्वधर्मस्था न कुतश्चिद्भयान्विताः ॥१९
राष्ट्रे चरन्ति यं धर्मं राज्ञा साध्वभिरक्षिताः ।
चतुर्थं तस्य धर्मस्य राजा भागं स विन्दति ॥ २०
देवा मनुष्याः पितरो गन्धर्वोरगराक्षसाः ।
यज्ञमेवोपजीवन्ति नास्ति चेष्टमराजके ॥ २१
इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
राजन्येवास्य धर्मस्य योगक्षेमः प्रतिष्ठितः ॥ २२
छायायामप्सु वायौ च सुखमुष्णेऽधिगच्छति ।
अग्नौ वाससि सूर्ये च सुखं शीतेऽधिगच्छति ॥ २३
शब्दे स्पर्शे रसे रूपे गन्धे च रमते मनः ।
तेषु भोगेषु सर्वेषु नभीतो लभते सुखम् ॥ २४
अभयस्यैव यो दाता तस्यैव सुमहत्फलम् ।
न हि प्राणसमं दानं त्रिषु लोकेषु विद्यते ॥ २५
इन्द्रो राजा यमो राजा धर्मो राजा तथैव च ।
राजा बिभर्ति रूपाणि राज्ञा सर्वमिदं धृतम् ॥२६

इति श्रीमहाभारते शान्तिपर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

भीष्म उवाच ।

राज्ञा पुरोहितः कार्यो भवेद्विद्वान्बहुश्रुतः ।
उभौ समीक्ष्य धर्मार्थावप्रमेयावनन्तरम् ॥ १
धर्मात्मा धर्मविद्येषां राज्ञां राजन्पुरोहितः ।
राजा चैवंगुणो येषां कुशलं तेषु सर्वशः ॥ २
उभौ प्रजा वर्धयतो देवान्पूर्वान्परान्पितॄन् ।
यौ समेयास्थितौ धर्मे श्रद्धेयौ सुतपस्विनौ ॥ ३
परस्परस्य सुहृदौ संमतौ समचेतसौ ।
ब्रह्मक्षत्रस्य संमानात्प्रजाः सुखमवाप्नुयुः ॥ ४
विमाननात्तयोरेव प्रजा नश्येयुरेव ह ।
ब्रह्मक्षत्रं हि सर्वेषां धर्माणां मूलमुच्यते ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऐलकश्यपसंवादं तं निबोध युधिष्ठिर ॥ ६

ऐल उवाच ।

यदा हि ब्रह्म प्रजहाति क्षत्रं
क्षत्रं यदा प्रजहाति ब्रह्म ।
अन्वग्बलं कतमेऽस्मिन्भजन्ते
तथाबल्यं कतमेऽस्मिन्वियन्ति ॥ ७

कश्यप उवाच ।

व्यृद्धं राष्ट्रं भवति क्षत्रियस्य
ब्रह्म क्षत्रं यत्र विरुध्यते ह ।
अन्वग्बलं दस्यवस्तद्भजन्ते-
ऽबल्यं तथा तत्र वियन्ति सन्तः ॥ ८
नैषामुक्षा वर्धते नोत उस्रा
न गर्गरो मथ्यते नो यजन्ते ।

नैषां पुत्रा वेदमधीयते च
यदा ब्रह्म क्षत्रियाः संत्यजन्ति ॥ ९
नैषामुक्षा वर्धते जातु गेहे
नाधीयते सप्रजा नो यजन्ते ।
अपध्वस्ता दस्युभूता भवन्ति
ये ब्राह्मणाः क्षत्रियान्संत्यजन्ति ॥ १०
एतौ हि नित्यसंयुक्तावितरेतरधारणे ।
क्षत्रं हि ब्रह्मणो योनिर्योनिः क्षत्रस्य च द्विजाः ॥ ११
उभावेतौ नित्यमभिप्रपन्नौ
संप्रापतुर्महतीं श्रीप्रतिष्ठाम् ।
तयोः संधिर्भिद्यते चेत्पुराण-
स्ततः सर्वं भवति हि संप्रमूढम् ॥ १२
नात्र प्लवं लभते पारगामी
महागाधे नौरिव संप्रणुन्ना ।
चातुर्वर्ण्यं भवति च संप्रमूढं
ततः प्रजा क्षयसंस्था भवन्ति ॥ १३
ब्रह्मवृक्षो रक्ष्यमाणो मधु हेम च वर्षति ।
अरक्ष्यमाणः सततमश्रु पापं च वर्षति ॥ १४
अब्रह्मचारी चरणादपेतो
यदा ब्रह्मा ब्रह्मणि त्राणमिच्छेत् ।
आश्चर्यशो वर्षति तत्र देव-
स्तत्राभीक्ष्णं दुःसहाश्चाविशन्ति ॥ १५
स्त्रियं हत्वा ब्राह्मणं वापि पापः
सभायां यत्र लभतेऽनुवादम् ।
राज्ञः सकाशे न बिभेति चापि
ततो भयं जायते क्षत्रियस्य ॥ १६
पापैः पापे क्रियमाणेऽतिवेलं
ततो रुद्रो जायते देव एषः ।
पापैः पापाः संजनयन्ति रुद्रं
ततः सर्वान्साध्वसाधून्हिनस्ति ॥ १७

ऐल उवाच ।

कुतो रुद्रः कीदृशो वापि रुद्रः
सत्त्वैः सत्त्वं दृश्यते वध्यमानम् ।
एतद्विद्वन्कश्यप मे प्रचक्ष्व
यतो रुद्रो जायते देव एषः ॥ १८

कश्यप उवाच ।

आत्मा रुद्रो हृदये मानवानां
स्वं स्वं देहं परदेहं च हन्ति ।
वातोत्पातैः सदृशं रुद्रमाहु-
र्दावैर्जीमूतैः सदृशं रूपमस्य ॥ १९

ऐल उवाच ।

न वै वातं परिवृणोति कश्चि-
न्न जीमूतो वर्षति नैव दावः ।
तथायुक्तो दृश्यते मानवेषु
कामद्वेषाद्बध्यते मुच्यते च ॥ २०

कश्यप उवाच ।

यथैकगेहे जातवेदाः प्रदीप्तः
कृत्स्नं ग्रामं प्रदहेत्स त्वरावान् ।
विमोहनं कुरुते देव एष
ततः सर्वं स्पृश्यते पुण्यपापैः ॥ २१

ऐल उवाच ।

यदि दण्डः स्पृशते पुण्यभाजं
पापैः पापे क्रियमाणेऽविशेषात् ।
कस्य हेतोः सुकृतं नाम कुर्या-
द्दुष्कृतं वा कस्य हेतोर्न कुर्यात् ॥ २२

कश्यप उवाच ।

असंत्यागात्पापकृतामपापां-
स्तुल्यो दण्डः स्पृश्यते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावा-

न मिश्रः स्यात्पापकृद्भिः कथंचित् ॥ २३

ऐल उवाच ।

साध्वसाधून्धारयतीह भूमिः
साध्वसाधूंस्तापयतीह सूर्यः ।
साध्वसाधून्वातयतीह वायु-
रापस्तथा साध्वसाधून्वहन्ति ॥ २४

कश्यप उवाच ।

एवमस्मिन्वर्तते लोक एव
नामुत्रैवं वर्तते राजपुत्र ।
प्रेत्यैतयोरन्तरवान्विशेषो
यो वै पुण्यं चरते यश्च पापम् ॥ २५
पुण्यस्य लोको मधुमान्घृतार्चि-
र्हिरण्यज्योतिरमृतस्य नाभिः ।
तत्र प्रेत्य मोदते ब्रह्मचारी
न तत्र मृत्युर्न जरा नोत दुःखम् ॥ २६
पापस्य लोको निरयोऽप्रकाशो
नित्यं दुःखः शोकभूयिष्ठ एव ।
तत्रात्मानं शोचते पापकर्मा
बह्वीः समाः प्रपतन्नप्रतिष्ठः ॥ २७
मिथो भेदाद्ब्राह्मणक्षत्रियाणां
प्रजा दुःखं दुःसहं चाविशन्ति ।
एवं ज्ञात्वा कार्य एवेह विद्वा-
न्पुरोहितो नैकविद्यो नृपेण ॥ २८
तं चैवान्वभिषिच्येत तथा धर्मो विधीयते ।
अग्र्यो हि ब्राह्मणः प्रोक्तः सर्वस्यैवेह धर्मतः ॥२९
पूर्वं हि ब्राह्मणाः सृष्टा इति धर्मविदो विदुः ।
ज्येष्ठेनाभिजनेनास्य प्राप्तं सर्वं यदुत्तरम् ॥ ३०
तस्मान्मान्यश्च पूज्यश्च ब्राह्मणः प्रसृताग्रभुक् ।
सर्वं श्रेष्ठं वरिष्ठं च निवेद्यं तस्य धर्मतः ॥ ३१
अवश्यमेतत्कर्तव्यं राज्ञा बलवतापि हि ।
ब्रह्म वर्धयति क्षत्रं क्षत्रतो ब्रह्म वर्धते ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

भीष्म उवाच ।

योगक्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते ।
योगक्षेमश्च राज्ञोऽपि समायत्तः पुरोहिते ॥ १
यत्रादृष्टं भयं ब्रह्म प्रजानां शमयत्युत ।
दृष्टं च राजा बाहुभ्यां तद्राष्ट्रं सुखमेधते ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मुचुकुन्दस्य संवादं राज्ञो वैश्रवणस्य च ॥ ३
मुचुकुन्दो विजित्येमां पृथिवीं पृथिवीपतिः ।
जिज्ञासमानः स्वबलमभ्ययादलकाधिपम् ॥ ४
ततो वैश्रवणो राजा रक्षांसि समवासृजत् ।
ते बलान्यवमृद्नन्तः प्राचरंस्तस्य नैर्ऋताः ॥ ५
स हन्यमाने सैन्ये स्वे मुचुकुन्दो नराधिपः ।
गर्हयामास विद्वांसं पुरोहितमरिंदमः ॥ ६
तत उग्रं तपस्तप्त्वा वसिष्ठो ब्रह्मवित्तमः ।
रक्षांस्यपावधीत्तत्र पन्थानं चाप्यविन्दत ॥ ७
ततो वैश्रवणो राजा मुचुकुन्दमदर्शयत् ।
वध्यमानेषु सैन्येषु वचनं चेदमब्रवीत् ॥ ८
त्वत्तो हि बलिनः पूर्वे राजानः सपुरोहिताः ।
न चैवं समवर्तंस्ते यथा त्वमिह वर्तसे ॥ ९
ते खल्वपि कृतास्त्राश्च बलवन्तश्च भूमिपाः ।
आगम्य पर्युपासन्ते मामीशं सुखदुःखयोः ॥ १०
यद्यस्ति बाहुवीर्यं ते तद्दर्शयितुमर्हसि ।
किं ब्राह्मणबलेन त्वमतिमात्रं प्रवर्तसे ॥ ११
मुचुकुन्दस्ततः क्रुद्धः प्रत्युवाच धनेश्वरम् ।
न्यायपूर्वमसंरब्धमसंभ्रान्तमिदं वचः ॥ १२
ब्रह्मक्षत्रमिदं सृष्टमेकयोनि स्वयंभुवा ।

पृथग्बलविधानं च तल्लोकं परिरक्षति ॥ १३
तपोमन्त्रबलं नित्यं ब्राह्मणेषु प्रतिष्ठितम् ।
अस्त्रबाहुबलं नित्यं क्षत्रियेषु प्रतिष्ठितम् ॥ १४
ताभ्यां संभूय कर्तव्यं प्रजानां परिपालनम् ।
तथा च मां प्रवर्तन्तं गर्हयस्यलकाधिप ॥ १५
ततोऽब्रवीद्वैश्रवणो राजानं सपुरोहितम् ।
नाहं राज्यमनिर्दिष्टं कस्मैचिद्विदधाम्युत ॥ १६
नाच्छिन्दे चापि निर्दिष्टमिति जानीहि पार्थिव ।
प्रशाधि पृथिवीं वीर मद्दत्तामखिलामिमाम् ॥ १७

मुचुकुन्द उवाच ।

नाहं राज्यं भवद्दत्तं भोक्तुमिच्छामि पार्थिव ।
बाहुवीर्यार्जितं राज्यमश्नीयामिति कामये ॥ १८

भीष्म उवाच ।

ततो वैश्रवणो राजा विस्मयं परमं ययौ ।
क्षत्रधर्मे स्थितं दृष्ट्वा मुचुकुन्दमसंभ्रमम् ॥ १९
ततो राजा मुचुकुन्दः सोऽन्वशासद्वसुंधराम् ।
बाहुवीर्यार्जितां सम्यक्क्षत्रधर्ममनुव्रतः ॥ २०
एवं यो ब्रह्मविद्राजा ब्रह्मपूर्वं प्रवर्तते ।
जयत्यविजितामुर्वीं यशश्च महदश्नुते ॥ २१
नित्योदको ब्राह्मणः स्यान्नित्यशस्त्रश्च क्षत्रियः ।
तयोर्हि सर्वमायत्तं यत्किंचिज्जगतीगतम् ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

युधिष्ठिर उवाच ।

यया वृत्त्या महीपालो विवर्धयति मानवान् ।
पुण्यांश्च लोकाञ्जयति तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

दानशीलो भवेद्राजा यज्ञशीलश्च भारत ।
उपवासतपःशीलः प्रजानां पालने रतः ॥ २
सर्वाश्चैव प्रजा नित्यं राजा धर्मेण पालयेत् ।
उत्थानेनाप्रमादेन पूजयेच्चैव धार्मिकान् ॥ ३
राज्ञा हि पूजितो धर्मस्ततः सर्वत्र पूज्यते ।
यद्यदाचरते राजा तत्प्रजानां हि रोचते ॥ ४
नित्यमुद्यतदण्डश्च भवेन्मृत्युरिवारिषु ।
निहन्यात्सर्वतो दस्यून्न कामात्कस्यचित्क्षमेत् ॥ ५
यं हि धर्मं चरन्तीह प्रजा राज्ञा सुरक्षिताः ।
चतुर्थं तस्य धर्मस्य राजा भारत विन्दति ॥ ६
यदधीते यद्यजते यद्ददाति यदर्चति ।
राजा चतुर्थभाक्तस्य प्रजा धर्मेण पालयन् ॥ ७
यद्राष्ट्रेऽकुशलं किंचिद्राज्ञोऽरक्षयतः प्रजाः ।
चतुर्थं तस्य पापस्य राजा भारत विन्दति ॥ ८
अप्याहुः सर्वमेवेति भूयोऽर्धमिति निश्चयः ।
कर्मणः पृथिवीपाल नृशंसोऽनृतवागपि ।
तादृशात्किल्बिषाद्राजा शृणु येन प्रमुच्यते ॥ ९
प्रत्याहर्तुमशक्यं स्याद्धनं चोरैर्हृतं यदि ।
स्वकोशात्तत्प्रदेयं स्यादशक्तेनोपजीवता ॥ १०
सर्ववर्णैः सदा रक्ष्यं ब्रह्मस्वं ब्राह्मणास्तथा ।
न स्थेयं विषये तेषु योऽपकुर्याद्द्विजातिषु ॥ ११
ब्रह्मस्वे रक्ष्यमाणे हि सर्वं भवति रक्षितम् ।
तेषां प्रसादे निर्वृत्ते कृतकृत्यो भवेन्नृपः ॥ १२
पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः ।
नरास्तमुपजीवन्ति नृपं सर्वार्थसाधकम् ॥ १३
न हि कामात्मना राज्ञा सततं शठबुद्धिना ।
नृशंसेनातिलुब्धेन शक्याः पालयितुं प्रजाः ॥ १४

युधिष्ठिर उवाच ।

नाहं राज्यसुखान्वेषी राज्यमिच्छाम्यपि क्षणम् ।
धर्मार्थं रोचये राज्यं धर्मश्चात्र न विद्यते ॥ १५
तदलं मम राज्येन यत्र धर्मो न विद्यते ।

वनमेव गमिष्यामि तस्माद्धर्मचिकीर्षया ॥ १६
तत्र मेध्येष्वरण्येषु न्यस्तदण्डो जितेन्द्रियः ।
धर्ममाराधयिष्यामि मुनिर्मूलफलाशनः ॥ १७

भीष्म उवाच ।

वेदाहं तव या बुद्धिरानृशंस्यगुणैव सा ।
न च शुद्धानृशंस्येन शक्यं महदुपासितुम् ॥ १८
अपि तु त्वा मृदुं दान्तमत्यार्यमतिधार्मिकम् ।
क्लीबं धर्मघृणायुक्तं न लोको बहु मन्यते ॥ १९
राजधर्मानवेक्षस्व पितृपैतामहोचितान् ।
नैतद्राज्ञामथो वृत्तं यथा त्वं स्थातुमिच्छसि ॥ २०
न हि वैक्लव्यसंसृष्टमानृशंस्यमिहास्थितः ।
प्रजापालनसंभूतं प्राप्ता धर्मफलं ह्यसि ॥ २१
न ह्येतामाशिषं पाण्डुर्न च कुन्त्यन्वयाचत ।
न चैतां प्राज्ञतां तात यया चरसि मेधया ॥ २२
शौर्यं बलं च सत्त्वं च पिता तव सदाब्रवीत् ।
माहात्म्यं बलमौदार्यं तव कुन्त्यन्वयाचत ॥ २३
नित्यं स्वाहा स्वधा नित्यमुभे मानुषदैवते ।
पुत्रेष्वाशासते नित्यं पितरो दैवतानि च ॥ २४
दानमध्ययनं यज्ञः प्रजानां परिपालनम् ।
धर्ममेतमधर्मं वा जन्मनैवाभ्यजायिथाः ॥ २५
काले धुरि नियुक्तानां वहतां भार आहिते ।
सीदतामपि कौन्तेय न कीर्तिरवसीदति ॥ २६
समन्ततो विनियतो वहत्यस्खलितो हि यः ।
निर्दोषकर्मवचनात्सिद्धिः कर्मण एव सा ॥ २७
नैकान्तविनिपातेन विचचारेह कश्चन ।
धर्मी गृही वा राजा वा ब्रह्मचार्यथ वा पुनः ॥२८
अल्पं तु साधुभूयिष्ठं यत्कर्मोदारमेव तत् ।
कृतमेवाकृताच्छ्रेयो न पापीयोऽस्त्यकर्मणः ॥ २९
यदा कुलीनो धर्मज्ञः प्राप्नोत्यैश्वर्यमुत्तमम् ।
योगक्षेमस्तदा राजन्कुशलायैव कल्पते ॥ ३०
दानेनान्यं बलेनान्यमन्यं सूनृतया गिरा ।
सर्वतः परिगृह्णीयाद्राज्यं प्राप्येह धार्मिकः ॥ ३१
यं हि वैद्याः कुले जाता अवृत्तिभयपीडिताः ।
प्राप्य तृप्ताः प्रतिष्ठन्ति धर्मः कोऽभ्यधिकस्ततः ॥ ३

युधिष्ठिर उवाच ।

किं न्वतः परमं स्वर्ग्यं का न्यतः प्रीतिरुत्तमा ।
किं न्वतः परमैश्वर्यं ब्रूहि मे यदि मन्यसे ॥ ३

भीष्म उवाच ।

यस्मिन्प्रतिष्ठिताः सम्यक्क्षेमं विन्दन्ति तत्क्षणम् ।
स स्वर्गजित्तमोऽस्माकं सत्यमेतद्ब्रवीमि ते ॥ ३४
त्वमेव प्रीतिमांस्तस्मात्कुरूणां कुरुसत्तम ।
भव राजा जय स्वर्गं सतो रक्षासतो जहि ॥ ३
अनु त्वा तात जीवन्तु सुहृदः साधुभिः सह ।
पर्जन्यमिव भूतानि स्वादुद्रुममिवाण्डजाः ॥ ३६
धृष्टं शूरं प्रहर्तारमनृशंसं जितेन्द्रियम् ।
वत्सलं संविभक्तारमनु जीवन्तु त्वां जनाः ॥ ३

इति श्रीमहाभारते शान्तिपर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

युधिष्ठिर उवाच ।

स्वकर्मण्यपरे युक्तास्तथैवान्ये विकर्मणि ।
तेषां विशेषमाचक्ष्व ब्राह्मणानां पितामह ॥ १

भीष्म उवाच ।

विद्यालक्षणसंपन्नाः सर्वत्राम्नायदर्शिनः ।
एते ब्रह्मसमा राजन्ब्राह्मणाः परिकीर्तिताः ॥ २
ऋत्विगाचार्यसंपन्नाः स्वेषु कर्मस्ववस्थिताः ।
एते देवसमा राजन्ब्राह्मणानां भवन्त्युत ॥ ३
ऋत्विक्पुरोहितो मन्त्री दूतोऽथार्थानुशासकः ।
एते क्षत्रसमा राजन्ब्राह्मणानां भवन्त्युत ॥ ४

अश्वारोहा गजारोहा रथिनोऽथ पदातयः ।
एते वैश्यसमा राजन्ब्राह्मणानां भवन्त्युत ॥ ५
जन्मकर्मविहीना ये कदर्या ब्रह्मबन्धवः ।
एते शूद्रसमा राजन्ब्राह्मणानां भवन्त्युत ॥ ६
अश्रोत्रियाः सर्व एव सर्वे चानाहिताग्नयः ।
तान्सर्वान्धार्मिको राजा बलिं विष्टिं च कारयेत् ॥
आह्वायका देवलका नक्षत्रग्रामयाजकाः ।
एते ब्राह्मणचण्डाला महापथिकपञ्चमाः ॥ ८
एतेभ्यो बलिमादद्याद्धीनकोशो महीपतिः ।
ऋते ब्रह्मसमेभ्यश्च देवकल्पेभ्य एव च ॥ ९
अब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकम् ।
ब्राह्मणानां च ये केचिद्विकर्मस्था भवन्त्युत ॥ १०
विकर्मस्थास्तु नोपेक्ष्या जातु राज्ञा कथंचन ।
नियम्याः संविभज्याश्च धर्मानुग्रहकाम्यया ॥ ११
यस्य स्म विषये राज्ञः स्तेनो भवति वै द्विजः ।
राज्ञ एवापराधं तं मन्यन्ते तद्विदो जनाः ॥ १२
अवृत्त्या यो भवेत्स्तेनो वेदवित्स्नातकस्तथा ।
राजन्स राज्ञा भर्तव्य इति धर्मविदो विदुः ॥१३
स चेन्नो परिवर्तेत कृतवृत्तिः परंतप ।
ततो निर्वासनीयः स्यात्तस्माद्देशात्सबान्धवः ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

युधिष्ठिर उवाच ।

केषां राजा प्रभवति वित्तस्य भरतर्षभ ।
कया च वृत्त्या वर्तेत तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकम् ।
ब्राह्मणानां च ये केचिद्विकर्मस्था भवन्त्युत ॥ २
विकर्मस्थाश्च नोपेक्ष्या विप्रा राज्ञा कथंचन ।
इति राज्ञां पुरावृत्तमभिजल्पन्ति साधवः ॥ ३
यस्य स्म विषये राज्ञः स्तेनो भवति वै द्विजः ।
राज्ञ एवापराधं तं मन्यन्ते किल्बिषं नृप ॥ ४
अभिशस्तमिवात्मानं मन्यन्ते तेन कर्मणा ।
तस्माद्राजर्षयः सर्वे ब्राह्मणानन्वपालयन् ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गीतं केकयराजेन ह्रियमाणेन रक्षसा ॥ ६
केकयानामधिपतिं रक्षो जग्राह दारुणम् ।
स्वाध्यायेनान्वितं राजन्नरण्ये संशितव्रतम् ॥ ७

राजोवाच ।

न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नानाहिताग्निर्नायज्वा मामकान्तरमाविशः ॥ ८
न च मे ब्राह्मणोऽविद्वान्नाव्रती नाप्यसोमपः ।
नानाहिताग्निर्विषये मामकान्तरमाविशः ॥ ९
नानाप्रदक्षिणैर्यज्ञैर्यजन्ते विषये मम ।
अधीते नाव्रती कश्चिन्मामकान्तरमाविशः ॥ १०
अधीयतेऽध्यापयन्ति यजन्ते याजयन्ति च ।
ददति प्रतिगृह्णन्ति षट्सु कर्मस्ववस्थिताः ॥ ११
पूजिताः संविभक्ताश्च मृदवः सत्यवादिनः ।
ब्राह्मणा मे स्वकर्मस्था मामकान्तरमाविशः ॥ १२
न याचन्ते प्रयच्छन्ति सत्यधर्मविशारदाः ।
नाध्यापयन्त्यधीयन्ते यजन्ते न च याजकाः ॥१३
ब्राह्मणान्परिरक्षन्ति संग्रामेष्वपलायिनः ।
क्षत्रिया मे स्वकर्मस्था मामकान्तरमाविशः ॥ १४
कृषिगोरक्षवाणिज्यमुपजीवन्त्यमायया ।
अप्रमत्ताः क्रियावन्तः सुव्रताः सत्यवादिनः ॥ १५
संविभागं दमं शौचं सौहृदं च व्यपाश्रिताः ।
मम वैश्याः स्वकर्मस्था मामकान्तरमाविशः ॥ १६
त्रीन्वर्णाननुतिष्ठन्ति यथावदनसूयकाः ।
मम शूद्राः स्वकर्मस्था मामकान्तरमाविशः ॥ १७

कृपणानाथवृद्धानां दुर्बलातुरयोषिताम् ।
संविभक्तास्मि सर्वेषां मामकान्तरमाविशः ॥ १८
कुलदेशादिधर्माणां प्रथितानां यथाविधि ।
अव्युच्छेत्तास्मि सर्वेषां मामकान्तरमाविशः ॥ १९
तपस्विनो मे विषये पूजिताः परिपालिताः ।
संविभक्ताश्च सत्कृत्य मामकान्तरमाविशः ॥ २०
नासंविभज्य भोक्तास्मि न विशामि परस्त्रियम् ।
स्वतन्त्रो जातु न क्रीडे मामकान्तरमाविशः ॥ २१
नाब्रह्मचारी भिक्षावान्भिक्षुर्वाब्रह्मचारिकः ।
अनृत्विजं हुतं नास्ति मामकान्तरमाविशः ॥ २२
नावजानाम्यहं वृद्धान्न वैद्यान्न तपस्विनः ।
राष्ट्रे स्वपति जागर्मि मामकान्तरमाविशः ॥ २३
वेदाध्ययनसंपन्नस्तपस्वी सर्वधर्मवित् ।
स्वामी सर्वस्य राज्यस्य श्रीमान्मम पुरोहितः ॥ २४

दानेन दिव्यानभिवाञ्छामि लोका-
न्सत्येनाथो ब्राह्मणानां च गुप्त्या ।
शुश्रूषया चापि गुरूनुपैमि
न मे भयं विद्यते राक्षसेभ्यः ॥ २५
न मे राष्ट्रे विधवा ब्रह्मबन्धु-
र्न ब्राह्मणः कृपणो नोत चोरः ।
न पारजायी न च पापकर्मा
न मे भयं विद्यते राक्षसेभ्यः ॥ २६

न मे शस्त्रैरनिर्भिन्नमङ्गे ह्यङ्गुलमन्तरम् ।
धर्मार्थं युध्यमानस्य मामकान्तरमाविशः ॥ २७
गोब्राह्मणे च यज्ञे च नित्यं स्वस्त्ययनं मम ।
आशासते जना राष्ट्रे मामकान्तरमाविशः ॥ २८

राक्षस उवाच ।

यस्मात्सर्वास्ववस्थासु धर्ममेवान्ववेक्षसे ।
तस्मात्प्राप्नुहि कैकेय गृहान्स्वस्ति व्रजाम्यहम् ॥ २९
येषां गोब्राह्मणा रक्ष्याः प्रजा रक्ष्याश्च केकय ।
न रक्षोभ्यो भयं तेषां कुत एव तु मानुषात् ॥३०
येषां पुरोगमा विप्रा येषां ब्रह्मबलं बलम् ।
प्रियातिथ्यास्तथा दारास्ते वै स्वर्गजितो नराः ॥३१

भीष्म उवाच ।

तस्माद्द्विजातीन्रक्षेत ते हि रक्षन्ति रक्षिताः ।
आशीरेषां भवेद्राज्ञां राष्ट्रं सम्यक्प्रवर्धते ॥ ३२
तस्माद्राज्ञा विशेषेण विकर्मस्था द्विजातयः ।
नियम्याः संविभज्याश्च प्रजानुग्रहकारणात् ॥ ३३
य एवं वर्तते राजा पौरजानपदेष्विह ।
अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकताम् ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

युधिष्ठिर उवाच ।

व्याख्याता क्षत्रधर्मेण वृत्तिरापत्सु भारत ।
कथंचिद्वैश्यधर्मेण जीवेद्वा ब्राह्मणो न वा ॥ १

भीष्म उवाच ।

अशक्तः क्षत्रधर्मेण वैश्यधर्मेण वर्तयेत् ।
कृषिगोरक्षमास्थाय व्यसने वृत्तिसंक्षये ॥ २

युधिष्ठिर उवाच ।

कानि पण्यानि विक्रीणन्स्वर्गलोकान्न हीयते ।
ब्राह्मणो वैश्यधर्मेण वर्तयन्भरतर्षभ ॥ ३

भीष्म उवाच ।

सुरा लवणमित्येव तिलान्केसरिणः पशून् ।
ऋषभान्मधु मांसं च कृतान्नं च युधिष्ठिर ॥ ४
सर्वास्ववस्थास्वेतानि ब्राह्मणः परिवर्जयेत् ।
एतेषां विक्रयात्तात ब्राह्मणो नरकं व्रजेत् ॥ ५
अजोऽग्निर्वरुणो मेषः सूर्योऽश्वः पृथिवी विराट् ।
धेनुर्यज्ञश्च सोमश्च न विक्रेयाः कथंचन ॥ ६

पक्वेनामस्य निमयं न प्रशंसन्ति साधवः ।
निमयेत्पक्वमामेन भोजनार्थाय भारत ॥ ७
वयं सिद्धमशिष्यामो भवान्साधयतामिदम् ।
एवं समीक्ष्य निमयन्नाधर्मोऽस्ति कदाचन ॥ ८
अत्र ते वर्तयिष्यामि यथा धर्मः पुरातनः ।
व्यवहारप्रवृत्तानां तन्निबोध युधिष्ठिर ॥ ९
भवतेऽहं ददानीदं भवानेतत्प्रयच्छतु ।
रुचिते वर्तते धर्मो न बलात्संप्रवर्तते ॥ १०
इत्येवं संप्रवर्तन्त व्यवहाराः पुरातनाः ।
ऋषीणामितरेषां च साधु चेदमसंशयम् ॥ ११

युधिष्ठिर उवाच ।

अथ तात यदा सर्वाः शस्त्रमाददते प्रजाः ।
व्युत्क्रामन्ति स्वधर्मेभ्यः क्षत्रस्य क्षीयते बलम् ॥ १२
राजा त्राता न लोके स्यात्किं तदा स्यात्परायणम् ।
एतन्मे संशयं ब्रूहि विस्तरेण पितामह ॥ १३

भीष्म उवाच ।

दानेन तपसा यज्ञैरद्रोहेण दमेन च ।
ब्राह्मणप्रमुखा वर्णाः क्षेममिच्छेयुरात्मनः ॥ १४
तेषां ये वेदबलिनस्त उत्थाय समन्ततः ।
राज्ञो बलं वर्धयेयुर्महेन्द्रस्येव देवताः ॥ १५
राज्ञो हि क्षीयमाणस्य ब्रह्मैवाहुः परायणम् ।
तस्माद्ब्रह्मबलेनैव समुत्थेयं विजानता ॥ १६
यदा तु विजयी राजा क्षेमं राष्ट्रेऽभिसंदधेत् ।
तदा वर्णा यथाधर्ममाविशेयुः स्वकर्मसु ॥ १७
उन्मर्यादे प्रवृत्ते तु दस्युभिः संकरे कृते ।
सर्वे वर्णा न दुष्येयुः शस्त्रवन्तो युधिष्ठिर ॥ १८

युधिष्ठिर उवाच ।

अथ चेत्सर्वतः क्षत्रं प्रदुष्येद्ब्राह्मणान्प्रति ।
कस्तस्य ब्राह्मणस्त्राता को धर्मः किं परायणम् ॥१९

भीष्म उवाच ।

तपसा ब्रह्मचर्येण शस्त्रेण च बलेन च ।
अमायया मायया च नियन्तव्यं तदा भवेत् ॥२०
क्षत्रस्याभिप्रवृद्धस्य ब्राह्मणेषु विशेषतः ।
ब्रह्मैव संनियन्तृ स्यात्क्षत्रं हि ब्रह्मसंभवम् ॥ २१
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ २२
यदा छिनत्त्ययोऽश्मानमग्निश्चापोऽभिपद्यते ।
क्षत्रं च ब्राह्मणं द्वेष्टि तदा शाम्यन्ति ते त्रयः ॥ २३
तस्माद्ब्रह्मणि शाम्यन्ति क्षत्रियाणां युधिष्ठिर ।
समुदीर्णान्यजेयानि तेजांसि च बलानि च ॥ २४
ब्रह्मवीर्ये मृदूभूते क्षत्रवीर्ये च दुर्बले ।
दुष्टेषु सर्ववर्णेषु ब्राह्मणान्प्रति सर्वशः ॥ २५
ये तत्र युद्धं कुर्वन्ति त्यक्त्वा जीवितमात्मनः ।
ब्राह्मणान्परिरक्षन्तो धर्ममात्मानमेव च ॥ २६
मनस्विनो मन्युमन्तः पुण्यलोका भवन्ति ते ।
ब्राह्मणार्थं हि सर्वेषां शस्त्रग्रहणमिष्यते ॥ २७
अति स्विष्टस्वधीतानां लोकानति तपस्विनाम् ।
अनाशकाग्न्योर्विशतां शूरा यान्ति परां गतिम् ।
एवमेवात्मनस्त्यागान्नान्यं धर्मं विदुर्जनाः ॥ २८
तेभ्यो नमश्च भद्रं च ये शरीराणि जुह्वति ।
ब्रह्मद्विषो नियच्छन्तस्तेषां नोऽस्तु सलोकता ।
ब्रह्मलोकजितः स्वर्ग्यान्वीरांस्तान्मनुरब्रवीत् ॥ २९
यथाश्वमेधावभृथे स्नाताः पूता भवन्त्युत ।
दुष्कृतः सुकृतश्चैव तथा शस्त्रहता रणे ॥ ३०
भवत्यधर्मो धर्मो हि धर्माधर्मावुभावपि ।
कारणाद्देशकालस्य देशकालः स तादृशः ॥ ३१
मैत्राः क्रूराणि कुर्वन्तो जयन्ति स्वर्गमुत्तमम् ।
धर्म्याः पापानि कुर्वन्तो गच्छन्ति परमां गतिम् ॥३२
ब्राह्मणस्त्रिषु कालेषु शस्त्रं गृह्णन्न दुष्यति ।

आत्मत्राणे वर्णदोषे दुर्गस्य नियमेषु च ॥ ३३

युधिष्ठिर उवाच ।

अभ्युत्थिते दस्युबले क्षत्रार्थे वर्णसंकरे ।
संप्रमूढेषु वर्णेषु यद्यन्योऽभिभवेद्बली ॥ ३४
ब्राह्मणो यदि वा वैश्यः शूद्रो वा राजसत्तम ।
दस्युभ्योऽथ प्रजा रक्षेद्दण्डं धर्मेण धारयन् ॥ ३५
कार्यं कुर्यान्न वा कुर्यात्संवार्यो वा भवेन्न वा ।
न स्म शस्त्रं ग्रहीतव्यमन्यत्र क्षत्रबन्धुतः ॥ ३६

भीष्म उवाच ।

अपारे यो भवेत्पारमप्लवे यः प्लवो भवेत् ।
शूद्रो वा यदि वाप्यन्यः सर्वथा मानमर्हति ॥ ३७
यमाश्रित्य नरा राजन्वर्तयेयुर्यथासुखम् ।
अनाथाः पाल्यमाना वै दस्युभिः परिपीडिताः॥३८
तमेव पूजयेरंस्ते प्रीत्या स्वमिव बान्धवम् ।
महद्ध्यभीक्ष्णं कौरव्य कर्ता सन्मानमर्हति ॥ ३९
किमुक्ष्णावहता कृत्यं किं धेन्वा चाप्यदुग्धया ।
वन्ध्यया भार्यया कोऽर्थः कोऽर्थो राज्ञाप्यरक्षता ॥
यथा दारुमयो हस्ती यथा चर्ममयो मृगः ।
यथा ह्यनेत्रः शकटः पथि क्षेत्रं यथोषरम् ॥ ४१
एवं ब्रह्मानधीयानं राजा यश्च न रक्षिता ।
न वर्षति च यो मेघः सर्व एते निरर्थकाः ॥ ४२
नित्यं यस्तु सतो रक्षेदसतश्च निबर्हयेत् ।
स एव राजा कर्तव्यस्तेन सर्वमिदं धृतम् ॥ ४३

इति श्रीमहाभारते शान्तिपर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

युधिष्ठिर उवाच ।

कसमुत्थाः कथंशीला ऋत्विजः स्युः पितामह ।
कथंविधाश्च राजेन्द्र तद्ब्रूहि वदतां वर ॥ १

भीष्म उवाच ।

प्रतिकर्म पुराचार ऋत्विजां स्म विधीयते ।
आदौ छन्दांसि विज्ञाय द्विजानां श्रुतमेव च ॥ २
ये त्वेकरतयो नित्यं धीरा नाप्रियवादिनः ।
परस्परस्य सुहृदः संमताः समदर्शिनः ॥ ३
येष्वानृशंस्यं सत्यं चाप्यहिंसा तप आर्जवम् ।
अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा दमः शमः ॥ ४
ह्रीमान्सत्यधृतिर्दान्तो भूतानामविहिंसकः ।
अकामद्वेषसंयुक्तस्त्रिभिः शुक्लैः समन्वितः ॥ ५
अहिंसको ज्ञानतृप्तः स ब्रह्मासनमर्हति ।
एते महर्त्विजस्तात सर्वे मान्या यथातथम् ॥ ६

युधिष्ठिर उवाच ।

यदिदं वेदवचनं दक्षिणासु विधीयते ।
इदं देयमिदं देयं न कचिद्व्यवतिष्ठते ॥ ७
नेदं प्रति धनं शास्त्रमापद्धर्ममशास्त्रतः ।
आज्ञा शास्त्रस्य घोरेयं न शक्तिं समवेक्षते ॥ ८
श्रद्धामारभ्य यष्टव्यमित्येषा वैदिकी श्रुतिः ।
मिथ्योपेतस्य यज्ञस्य किमु श्रद्धा करिष्यति ॥ ९

भीष्म उवाच ।

न वेदानां परिभवान्न शाठ्येन न मायया ।
कश्चिन्महदवाप्नोति मा ते भूद्बुद्धिरीदृशी ॥ १०
यज्ञाङ्गं दक्षिणास्तात वेदानां परिबृंहणम् ।
न मन्त्रा दक्षिणाहीनास्तारयन्ति कथंचन ॥ ११
शक्तिस्तु पूर्णपात्रेण संमितानवमा भवेत् ।
अवश्यं तात यष्टव्यं त्रिभिर्वर्णैर्यथाविधि ॥ १२
सोमो राजा ब्राह्मणानामित्येषा वैदिकी श्रुतिः ।
तं च विक्रेतुमिच्छन्ति न वृथा वृत्तिरिष्यते ।
तेन क्रीतेन धर्मेण ततो यज्ञः प्रतायते ॥ १३
इत्येवं धर्मतः ख्यातमृषिभिर्धर्मवादिभिः ।
पुमान्यज्ञश्च सोमश्च न्यायवृत्तो यथा भवेत् ।

अन्यायवृत्तः पुरुषो न परस्य न चात्मनः ॥ १४
शरीरं यज्ञपात्राणि इत्येषा श्रूयते श्रुतिः ।
तानि सम्यक्प्रणीतानि ब्राह्मणानां महात्मनाम् ॥ १५
तपो यज्ञादपि श्रेष्ठमित्येषा परमा श्रुतिः ।
तत्ते तपः प्रवक्ष्यामि विद्वंस्तदपि मे शृणु ॥ १६
अहिंसा सत्यवचनमानृशंस्यं दमो घृणा ।
एतत्तपो विदुर्धीरा न शरीरस्य शोषणम् ॥ १७
अप्रामाण्यं च वेदानां शास्त्राणां चातिलङ्घनम् ।
अव्यवस्था च सर्वत्र तद्वै नाशनमात्मनः ॥ १८
निबोध दशहोतॄणां विधानं पार्थ यादृशम् ।
चित्तिः स्रुक्चित्तमाज्यं च पवित्रं ज्ञानमुत्तमम् ॥ १९
सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम् ।
एतावाञ्ज्ञानविषयः किं प्रलापः करिष्यति ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
अशीतितमोऽध्यायः ॥ ८० ॥

८१

युधिष्ठिर उवाच ।

यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।
पुरुषेणासहायेन किमु राज्यं पितामह ॥ १
किंशीलः किंसमाचारो राज्ञोऽर्थसचिवो भवेत् ।
कीदृशे विश्वसेद्राजा कीदृशे नापि विश्वसेत् ॥ २

भीष्म उवाच ।

चतुर्विधानि मित्राणि राज्ञां राजन्भवन्त्युत ।
सहार्थो भजमानश्च सहजः कृत्रिमस्तथा ॥ ३
धर्मात्मा पञ्चमं मित्रं स तु नैकस्य न द्वयोः ।
यतो धर्मस्ततो वा स्यान्मध्यस्थो वा ततो भवेत् ॥ ४
यस्तस्यार्थो न रोचेत न तं तस्य प्रकाशयेत् ।
धर्माधर्मेण राजानश्चरन्ति विजिगीषवः ॥ ५
चतुर्णां मध्यमौ श्रेष्ठौ नित्यं शङ्क्यौ तथापरौ ।
सर्वे नित्यं शङ्कितव्याः प्रत्यक्षं कार्यमात्मनः ॥ ६
न हि राज्ञा प्रमादो वै कर्तव्यो मित्ररक्षणे ।
प्रमादिनं हि राजानं लोकाः परिभवन्त्युत ॥ ७
असाधुः साधुतामेति साधुर्भवति दारुणः ।
अरिश्च मित्रं भवति मित्रं चापि प्रदुष्यति ॥ ८
अनित्यचित्तः पुरुषस्तस्मिन्को जातु विश्वसेत् ।
तस्मात्प्रधानं यत्कार्यं प्रत्यक्षं तत्समाचरेत् ॥ ९
एकान्तेन हि विश्वासः कृत्स्नो धर्मार्थनाशकः ।
अविश्वासश्च सर्वत्र मृत्युना न विशिष्यते ॥ १०
अकालमृत्युर्विश्वासो विश्वसन्हि विपद्यते ।
यस्मिन्करोति विश्वासमिच्छतस्तस्य जीवति ॥ ११
तस्माद्विश्वसितव्यं च शङ्कितव्यं च केषुचित् ।
एषा नीतिगतिस्तात लक्ष्मीश्चैव सनातनी ॥ १२
यं मन्येत ममाभावादिममर्थागमः स्पृशेत् ।
नित्यं तस्माच्छङ्कितव्यममित्रं तं विदुर्बुधाः ॥ १३
यस्य क्षेत्रादप्युदकं क्षेत्रमन्यस्य गच्छति ।
न तत्रानिच्छतस्तस्य भिद्येरन्सर्वसेतवः ॥ १४
तथैवात्युदकाद्भीतस्तस्य भेदनमिच्छति ।
यमेवंलक्षणं विद्यात्तममित्रं विनिर्दिशेत् ॥ १५
यः समृद्ध्या न तुष्येत क्षये दीनतरो भवेत् ।
एतदुत्तममित्रस्य निमित्तमभिचक्षते ॥ १६
यं मन्येत ममाभावादस्याभावो भवेदिति ।
तस्मिन्कुर्वीत विश्वासं यथा पितरि वै तथा ॥ १७
तं शक्त्या वर्धमानश्च सर्वतः परिबृंहयेत् ।
नित्यं क्षताद्वारयति यो धर्मेष्वपि कर्मसु ॥ १८
क्षताद्भीतं विजानीयादुत्तमं मित्रलक्षणम् ।
ये तस्य क्षतमिच्छन्ति ते तस्य रिपवः स्मृताः ॥ १९
व्यसनान्नित्यभीतोऽसौ समृद्ध्यामेव तृप्यते ।
यत्स्यादेवंविधं मित्रं तदात्मसममुच्यते ॥ २०
रूपवर्णस्वरोपेतस्तितिक्षुरनसूयकः ।

कुलीनः शीलसंपन्नः स ते स्यात्प्रत्यनन्तरः ॥ २१
मेधावी स्मृतिमान्दक्षः प्रकृत्या चानृशंसवान् ।
यो मानितोऽमानितो वा न संदूष्येत्कदाचन ॥ २२
ऋत्विग्वा यदि वाचार्यः सखा वात्यन्तसंस्तुतः ।
गृहे वसेदमात्यस्ते यः स्यात्परमपूजितः ॥ २३
स ते विद्यात्परं मन्त्रं प्रकृतिं चार्थधर्मयोः ।
विश्वासस्ते भवेत्तत्र यथा पितरि वै तथा ॥ २४
नैव द्वौ न त्रयः कार्या न मृष्येरन्परस्परम् ।
एकार्थादेव भूतानां भेदो भवति सर्वदा ॥ २५
कीर्तिप्रधानो यश्च स्याद्यश्च स्यात्समये स्थितः ।
समर्थान्यश्च न द्वेष्टि समर्थान्कुरुते च यः ॥ २६
यो न कामाद्भयाल्लोभात्क्रोधाद्वा धर्ममुत्सृजेत् ।
दक्षः पर्याप्तवचनः स ते स्यात्प्रत्यनन्तरः ॥ २७
शूरश्चार्यश्च विद्वांश्च प्रतिपत्तिविशारदः ।
कुलीनः शीलसंपन्नस्तितिक्षुरनसूयकः ॥ २८
एते ह्यमात्याः कर्तव्याः सर्वकर्मस्ववस्थिताः ।
पूजिताः संविभक्ताश्च सुसहायाः स्वनुष्ठिताः ॥२९
कृत्स्नमेते विनिक्षिप्ताः प्रतिरूपेषु कर्मसु ।
युक्ता महत्सु कार्येषु श्रेयांस्युत्पादयन्ति च ॥ ३०
एते कर्माणि कुर्वन्ति स्पर्धमाना मिथः सदा ।
अनुतिष्ठन्ति चैवार्थानाचक्षाणाः परस्परम् ॥ ३१
ज्ञातिभ्यश्चैव बिभ्येथा मृत्योरिव यतः सदा ।
उपराजेव राजर्धिं ज्ञातिर्न सहते सदा ॥ ३२
ऋजोर्मृदोर्वदान्यस्य ह्रीमतः सत्यवादिनः ।
नान्यो ज्ञातेर्महाबाहो विनाशमभिनन्दति ॥ ३३
अज्ञातिता नातिसुखा नावज्ञेयास्त्वतः परम् ।
अज्ञातिमन्तं पुरुषं परे परिभवन्त्युत ॥ ३४
निकृतस्य नरैरन्यैर्ज्ञातिरेव परायणम् ।
नान्यैर्निकारं सहते ज्ञातेर्ज्ञातिः कदाचन ॥ ३५
आत्मानमेव जानाति विकृतं बान्धवैरपि ।
तेषु सन्ति गुणाश्चैव नैर्गुण्यं तेषु लक्ष्यते ॥ ३६
नाज्ञातिरनुगृह्णाति नाज्ञातिर्दिग्धमस्यति ।
उभयं ज्ञातिलोकेषु दृश्यते साध्वसाधु च ॥ ३७
तान्मानयेत्पूजयेच्च नित्यं वाचा च कर्मणा ।
कुर्याच्च प्रियमेतेभ्यो नाप्रियं किंचिदाचरेत् ॥ ३८
विश्वस्तवदविश्वस्तस्तेषु वर्तेत सर्वदा ।
न हि दोषो गुणो वेति निस्पृक्तस्तेषु दृश्यते ॥३९
तस्यैवं वर्तमानस्य पुरुषस्याप्रमादिनः ।
अमित्राः संप्रसीदन्ति तथा मित्रीभवन्त्यपि ॥ ४०
य एवं वर्तते नित्यं ज्ञातिसंबन्धिमण्डले ।
मित्रेष्वमित्रेष्वैश्वर्ये चिरं यशसि तिष्ठति ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

युधिष्ठिर उवाच ।

एवमग्राह्यके तस्मिञ्ज्ञातिसंबन्धिमण्डले ।
मित्रेष्वमित्रेष्वपि च कथं भावो विभाव्यते ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वासुदेवस्य संवादं सुरर्षेर्नारदस्य च ॥ २

वासुदेव उवाच ।

नासुहृत्परमं मन्त्रं नारदार्हति वेदितुम् ।
अपण्डितो वापि सुहृत्पण्डितो वापि नात्मवान् ॥३
स ते सौहृदमास्थाय किंचिद्वक्ष्यामि नारद ।
कृत्स्नां च बुद्धिं संप्रेक्ष्य संपृच्छे त्रिदिवंगम ॥ ४
दास्यमैश्वर्यवादेन ज्ञातीनां वै करोम्यहम् ।
अर्धभोक्तास्मि भोगानां वाग्दुरुक्तानि च क्षमे ॥५
अरणीमग्निकामो वा मथ्नाति हृदयं मम ।
वाचा दुरुक्तं देवर्षे तन्मे दहति नित्यदा ॥ ६

बलं संकर्षणे नित्यं सौकुमार्यं पुनर्गदे ।
रूपेण मत्तः प्रद्युम्नः सोऽसहायोऽस्मि नारद ॥ ७
अन्ये हि सुमहाभागा बलवन्तो दुरासदाः ।
नित्योत्थानेन संपन्ना नारदान्धकवृष्णयः ॥ ८
यस्य न स्युर्न वै स स्याद्यस्य स्युः कृत्स्नमेव तत् ।
द्वाभ्यां निवारितो नित्यं वृणोम्येकतरं न च ॥ ९
स्यातां यस्याहुकाक्रूरौ किं नु दुःखतरं ततः ।
यस्य वापि न तौ स्यातां किं नु दुःखतरं ततः ॥ १०
सोऽहं कितवमातेव द्वयोरपि महामुने ।
एकस्य जयमाशंसे द्वितीयस्यापराजयम् ॥ ११
ममैवं क्लिश्यमानस्य नारदोभयतः सदा ।
वक्तुमर्हसि यच्छ्रेयो ज्ञातीनामात्मनस्तथा ॥ १२

नारद उवाच ।

आपदो द्विविधाः कृष्ण बाह्याश्चाभ्यन्तराश्च ह ।
प्रादुर्भवन्ति वार्ष्णेय स्वकृता यदि वान्यतः ॥ १३
सेयमाभ्यन्तरा तुभ्यमापत्कृच्छ्रा स्वकर्मजा ।
अक्रूरभोजप्रभवाः सर्वे ह्येते तदन्वयाः ॥ १४
अर्थहेतोर्हि कामाद्वा द्वारा बीभत्सयापि वा ।
आत्मना प्राप्तमैश्वर्यमन्यत्र प्रतिपादितम् ॥ १५
कृतमूलमिदानीं तज्जातशब्दं सहायवत् ।
न शक्यं पुनरादातुं वान्तमन्नमिव त्वया ॥ १६
बभ्रूग्रसेनयो राज्यं नाप्तुं शक्यं कथंचन ।
ज्ञातिभेदभयात्कृष्ण त्वया चापि विशेषतः ॥ १७
तच्च सिध्येत्प्रयत्नेन कृत्वा कर्म सुदुष्करम् ।
महाक्षयव्ययं वा स्याद्विनाशो वा पुनर्भवेत् ॥ १८
अनायसेन शस्त्रेण मृदुना हृदयच्छिदा ।
जिह्वामुद्धर सर्वेषां परिमृज्यानुमृज्य च ॥ १९

वासुदेव उवाच ।

अनायसं मुने शस्त्रं मृदु विद्यामहं कथम् ।
येनैषामुद्धरे जिह्वां परिमृज्यानुमृज्य च ॥ २०

नारद उवाच ।

शक्त्यान्नदानं सततं तितिक्षा दम आर्जवम् ।
यथार्हप्रतिपूजा च शस्त्रमेतदनायसम् ॥ २१
ज्ञातीनां वक्तुकामानां कटूनि च लघूनि च ।
गिरा त्वं हृदयं वाचं शमयस्व मनांसि च ॥ २२
नामहापुरुषः कश्चिन्नानात्मा नासहायवान् ।
महतीं धुरमादत्ते तामुद्यम्योरसा वह ॥ २३
सर्व एव गुरुं भारमनड्वान्वहते समे ।
दुर्गे प्रतीकः सुगवो भारं वहति दुर्वहम् ॥ २४
भेदाद्विनाशः संघानां संघमुख्योऽसि केशव ।
यथा त्वां प्राप्य नोत्सीदेदयं संघस्तथा कुरु ॥२५
नान्यत्र बुद्धिक्षान्तिभ्यां नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र धनसंत्यागाद्गणः प्राज्ञेऽवतिष्ठते ॥ २६
धन्यं यशस्यमायुष्यं स्वपक्षोद्भावनं शुभम् ।
ज्ञातीनामविनाशः स्याद्यथा कृष्ण तथा कुरु ॥२७
आयत्यां च तदात्वे च न तेऽस्त्यविदितं प्रभो ।
षाड्गुण्यस्य विधानेन यात्रायानविधौ तथा ॥ २८
माधवाः कुकुरा भोजाः सर्वे चान्धकवृष्णयः ।
त्वय्यासक्ता महाबाहो लोका लोकेश्वराश्च ये ॥२९
उपासते हि तद्बुद्धिमृषयश्चापि माधव ।
त्वं गुरुः सर्वभूतानां जानीषे त्वं गतागतम् ।
त्वामासाद्य यदुश्रेष्ठमेधन्ते ज्ञातिनः सुखम् ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

भीष्म उवाच ।

एषा प्रथमतो वृत्तिर्द्वितीयां शृणु भारत ।
यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः स मानवः ॥ १
ह्रियमाणममात्येन भृतो वा यदि वाभृतः ।
यो राजकोशं नश्यन्तमाचक्षीत युधिष्ठिर ॥ २

श्रोतव्यं तस्य च रहो रक्ष्यश्चामात्यतो भवेत् ।
अमात्या ह्युपहन्तारं भूयिष्ठं घ्नन्ति भारत ॥ ३
राजकोशस्य गोप्तारं राजकोशविलोपकाः ।
समेत्य सर्वे बाधन्ते स विनश्यत्यरक्षितः ॥ ४
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मुनिः कालकवृक्षीयः कौसल्यं यदुवाच ह ॥ ५
कोसलानामाधिपत्यं संप्राप्ते क्षेमदर्शिनि ।
मुनिः कालकवृक्षीय आजगामेति नः श्रुतम् ॥ ६
स काकं पञ्जरे बद्ध्वा विषयं क्षेमदर्शिनः ।
पूर्वं पर्यचरद्युक्तः प्रवृत्त्यर्थी पुनः पुनः ॥ ७
अधीये वायसीं विद्यां शंसन्ति मम वायसाः ।
अनागतमतीतं च यच्च संप्रति वर्तते ॥ ८
इति राष्ट्रे परिपतन्बहुशः पुरुषैः सह ।
सर्वेषां राजयुक्तानां दुष्कृतं परिदृष्टवान् ॥ ९
स बुद्ध्वा तस्य राष्ट्रस्य व्यवसायं हि सर्वशः ।
राजयुक्तापचारांश्च सर्वान्बुद्ध्वा ततस्ततः ॥ १०
तमेव काकमादाय राजानं द्रष्टुमागमत् ।
सर्वज्ञोऽस्मीति वचनं ब्रुवाणः संशितव्रतः ॥ ११
स स्म कौसल्यमागम्य राजामात्यमलंकृतम् ।
प्राह काकस्य वचनादमुत्रेदं त्वया कृतम् ॥ १२
असौ चासौ च जानीते राजकोशस्त्वया हृतः ।
एवमाख्याति काकोऽयं तच्छीघ्रमनुगम्यताम् ॥ १३
तथान्यानपि स प्राह राजकोशहरान्सदा ।
न चास्य वचनं किंचिदकृतं श्रूयते क्वचित् ॥ १४
तेन विप्रकृताः सर्वे राजयुक्ताः कुरूद्वह ।
तमतिक्रम्य सुप्तस्य निशि काकमपोथयन् ॥ १५
वायसं तु विनिर्भिन्नं दृष्ट्वा बाणेन पञ्जरे ।
पूर्वाह्णे ब्राह्मणो वाक्यं क्षेमदर्शिनमब्रवीत् ॥ १६
राजंस्त्वामभयं याचे प्रभुं प्राणधनेश्वरम् ।
अनुज्ञातस्त्वया ब्रूयां वचनं त्वत्पुरो हितम् ॥ १७
मित्रार्थमभिसंतप्तो भक्त्या सर्वात्मना गतः ।
अयं तवार्थं हरते यो ब्रूयादक्षमान्वितः ॥ १८
संबुबोधयिषुर्मित्रं सदश्वमिव सारथिः ।
अतिमन्युप्रसक्तो हि प्रसज्य हितकारणम् ॥ १९
तथाविधस्य सुहृदः क्षन्तव्यं संविजानता ।
ऐश्वर्यमिच्छता नित्यं पुरुषेण बुभूषता ॥ २०
तं राजा प्रत्युवाचेदं यन्मा किंचिद्भवान्वदेत् ।
कस्मादहं न क्षमेयमाकाङ्क्षन्नात्मनो हितम् ॥ २१
ब्राह्मण प्रतिजानीहि प्रब्रूहि यदि चेच्छसि ।
करिष्यामि हि ते वाक्यं यत्त्वन्मां विप्र वक्ष्यसि ॥२२

मुनिरुवाच ।

ज्ञात्वा नयानपायांश्च भृत्यतस्ते भयानि च ।
भक्त्या वृत्तिं समाख्यातुं भवतोऽन्तिकमागमम् ॥२३
प्रागेवोक्तश्च दोषोऽयमाचार्यैर्नृपसेविनाम् ।
अगतीकगतिर्ह्येषा या राज्ञा सह जीविका ॥ २४
आशीविषैश्च तस्याहुः संगमं यस्य राजभिः ।
बहुमित्राश्च राजानो बह्वमित्रास्तथैव च ॥ २५
तेभ्यः सर्वेभ्य एवाहुर्भयं राजोपसेविनाम् ।
अथैषामेकतो राजन्मुहूर्तादेव भीर्भवेत् ॥ २६
नैकान्तेनाप्रमादो हि कर्तुं शक्यो महीपतौ ।
न तु प्रमादः कर्तव्यः कथंचिद्भूतिमिच्छता ॥ २७
प्रमादाद्धि स्खलेद्राजा स्खलिते नास्ति जीवितम् ।
अग्निं दीप्तमिवासीदेद्राजानमुपशिक्षितः ॥ २८
आशीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरम् ।
यत्नेनोपचरेन्नित्यं नाहमस्मीति मानवः ॥ २९
दुर्व्याहृताच्छङ्कमानो दुष्कृताद्दुरधिष्ठितात् ।
दुरासिताद्दुर्व्रजितादिङ्गितादङ्गचेष्टितात् ॥ ३०
देवतेव हि सर्वार्थान्कुर्याद्राजा प्रसादितः ।
वैश्वानर इव क्रुद्धः समूलमपि निर्दहेत् ।
इति राजन्यमः प्राह वर्तते च तथैव तत् ॥ ३१

अथ भूयांसमेवार्थं करिष्यामि पुनः पुनः ।
ददात्यसद्विधोऽमात्यो बुद्धिसाहाय्यमापदि ॥ ३२
वायसश्चैव मे राजन्नन्तकायाभिसंहितः ।
न च मेऽत्र भवान्गर्ह्यो न च येषां भवान्प्रियः ।
हिताहितांस्तु बुध्येथा मा परोक्षमतिर्भव ॥ ३३
ये त्वादानपरा एव वसन्ति भवतो गृहे ।
अभूतिकामा भूतानां तादृशैर्मेऽभिसंहितम् ॥ ३४
ये वा भवद्विनाशेन राज्यमिच्छन्त्यनन्तरम् ।
अन्तरैरभिसंधाय राजन्सिध्यन्ति नान्यथा ॥ ३५
तेषामहं भयाद्राजन्गमिष्याम्यन्यमाश्रमम् ।
तैर्हि मे संधितो बाणः काके निपतितः प्रभो ॥३६
छद्मना मम काकश्च गमितो यमसादनम् ।
दृष्टं ह्येतन्मया राजंस्तपोदीर्घेण चक्षुषा ॥ ३७
बहुनक्रझषग्राहां तिमिंगिलगणायुताम् ।
काकेन बडिशेनेमामतार्षं त्वामहं नदीम् ॥ ३८
स्थाण्वश्मकण्टकवतीं व्याघ्रसिंहगजाकुलाम् ।
दुरासदां दुष्प्रवेशां गुहां हैमवतीमिव ॥ ३९
अग्निना तामसं दुर्गं नौभिराप्यं च गम्यते ।
राजदुर्गावतरणे नोपायं पण्डिता विदुः ॥ ४०
गहनं भवतो राज्यमन्धकारतमोवृतम् ।
नेह विश्वसितुं शक्यं भवतापि कुतो मया ॥ ४१
अतो नायं शुभो वासस्तुल्ये सदसती इह ।
वधो ह्येवात्र सुकृते दुष्कृते न च संशयः ॥ ४२
न्यायतो दुष्कृते घातः सुकृते स्यात्कथं वधः ।
नेह युक्तं चिरं स्थातुं जवेनातो व्रजेद्बुधः ॥ ४३
सीता नाम नदी राजन्प्लवो यस्यां निमज्जति ।
तथोपमामिमां मन्ये वागुरां सर्वघातिनीम् ॥ ४४
मधुप्रपातो हि भवान्भोजनं विषसंयुतम् ।
असतामिव ते भावो वर्तते न सतामिव ।
आशीविषैः परिवृतः कूपस्त्वमिव पार्थिव ॥ ४५
दुर्गतीर्था बृहत्कूला करीरीवेत्रसंयुता ।
नदी मधुरपानीया यथा राजंस्तथा भवान् ।
श्वगृध्रगोमायुयुतो राजहंससमो ह्यसि ॥ ४६
यथाश्रित्य महावृक्षं कक्षः संवर्धते महान् ।
ततस्तं संवृणोत्येव तमतीत्य च वर्धते ॥ ४७
तेनैवोपेन्धनो नूनं दावो दहति दारुणः ।
तथोपमा ह्यमात्यास्ते राजंस्तान्परिशोधय ॥ ४८
भवतैव कृता राजन्भवता परिपालिताः ।
भवन्तं पर्यवज्ञाय जिघांसन्ति भवत्प्रियम् ॥ ४९
उषितं शङ्कमानेन प्रमादं परिरक्षता ।
अन्तःसर्प इवागारे वीरपत्न्या इवालये ।
शीलं जिज्ञासमानेन राज्ञश्च सहजीविना ॥ ५०
कच्चिज्जितेन्द्रियो राजा कच्चिदभ्यन्तरा जिताः ।
कच्चिदेषां प्रियो राजा कच्चिद्राज्ञः प्रियाः प्रजाः॥५१
जिज्ञासुरिह संप्राप्तस्तवाहं राजसत्तम ।
तस्य मे रोचसे राजन्क्षुधितस्येव भोजनम् ॥ ५२
अमात्या मे न रोचन्ते वितृष्णस्य यथोदकम् ।
भवतोऽर्थकृदित्येव मयि दोषो हि तैः कृतः ।
विद्यते कारणं नान्यदिति मे नात्र संशयः ॥ ५३
न हि तेषामहं द्रुग्धस्तत्तेषां दोषवद्गतम् ।
अरेर्हि दुर्हृताद्भेयं भग्नपृष्ठादिवोरगात् ॥ ५४

राजोवाच ।

भूयसा परिबर्हेण सत्कारेण च भूयसा ।
पूजितो ब्राह्मणश्रेष्ठ भूयो वस गृहे मम ॥ ५५
ये त्वां ब्राह्मण नेच्छन्ति न ते वत्स्यन्ति मे गृहे ।
भवतैव हि तज्ज्ञेयं यदिदानीमनन्तरम् ॥ ५६
यथा स्याद्दुष्कृतो दण्डो यथा च सुकृतं कृतम् ।
तथा समीक्ष्य भगवञ्श्रेयसे विनियुङ्क्ष्व माम् ॥५७

मुनिरुवाच ।

अदर्शयन्निमं दोषमेकैकं दुर्बलं कुरु ।

ततः कारणमाज्ञाय पुरुषं पुरुषं जहि ॥ ५८
एकदोषा हि बहवो मृद्गीयुरपि कण्टकान् ।
मन्त्रभेदभयाद्राजंस्तस्मादेतद्ब्रवीमि ते ॥ ५९
वयं तु ब्राह्मणा नाम मृदुदण्डाः कृपालवः ।
स्वस्ति चेच्छामि भवतः परेषां च यथात्मनः ॥६०
राजन्नात्मानमाचक्षे संबन्धी भवतो ह्यहम् ।
मुनिः कालकवृक्षीय इत्येवमभिसंज्ञितः ॥ ६१
पितुः सखा च भवतः संमतः सत्यसंगरः ।
व्यापन्ने भवतो राज्ये राजन्पितरि संस्थिते ॥ ६२
सर्वकामान्परित्यज्य तपस्तप्तं तदा मया ।
स्नेहात्त्वां प्रब्रवीम्येतन्मा भूयो विभ्रमेदिति ॥ ६३
उभे दृष्ट्वा दुःखसुखे राज्यं प्राप्य यदृच्छया ।
राज्येनामात्यसंस्थेन कथं राजन्प्रमाद्यसि ॥ ६४

भीष्म उवाच ।

ततो राजकुले नान्दी संजज्ञे भूयसी पुनः ।
पुरोहितकुले चैव संप्राप्ते ब्राह्मणर्षभे ॥ ६५
एकच्छत्रां महीं कृत्वा कौसल्याय यशस्विने ।
मुनिः कालकवृक्षीय ईजे क्रतुभिरुत्तमैः ॥ ६६
हितं तद्वचनं श्रुत्वा कौसल्योऽन्वशिषन्महीम् ।
तथा च कृतवान्राजा यथोक्तं तेन भारत ॥ ६७

इति श्रीमहाभारते शान्तिपर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

भीष्म उवाच ।

ह्रीनिषेधाः सदा सन्तः सत्यार्जवसमन्विताः ।
शक्ताः कथयितुं सम्यक्ते तव स्युः सभासदः ॥ १
अत्याढ्यांश्चातिशूरांश्च ब्राह्मणांश्च बहुश्रुतान् ।
सुसंतुष्टांश्च कौन्तेय महोत्साहांश्च कर्मसु ॥ २
एतान्सहायाँल्लिप्सेथाः सर्वास्वापत्सु भारत ।
कुलीनः पूजितो नित्यं न हि शक्तिं निगूहति ॥ ३
प्रसन्नं ह्यप्रसन्नं वा पीडितं हृतमेव वा ।
आवर्तयति भूयिष्ठं तदेको ह्यनुपालितः ॥ ४
कुलीना देशजाः प्राज्ञा रूपवन्तो बहुश्रुताः ।
प्रगल्भाश्चानुरक्ताश्च ते तव स्युः परिच्छदाः ॥ ५
दौष्कुलेयाश्च लुब्धाश्च नृशंसा निरपत्रपाः ।
ते त्वां तात निषेवेयुर्यावदार्द्रकपाणयः ॥ ६
अर्थमानार्घ्यसत्कारैर्भोगैरुच्चावचैः प्रियान् ।
यानर्थभाजो मन्येथास्ते ते स्युः सुखभागिनः ॥ ७
अभिन्नवृत्ता विद्वांसः सद्वृत्ताश्चरितव्रताः ।
न त्वां नित्यार्थिनो जह्युरक्षुद्राः सत्यवादिनः ॥ ८
अनार्या ये न जानन्ति समयं मन्दचेतसः ।
तेभ्यः प्रतिजुगुप्सेथा जानीयाः समयच्युतान् ॥ ९
नैकमिच्छेद्गणं हित्वा स्याच्चेदन्यतरग्रहः ।
यस्त्वेको बहुभिः श्रेयान्कामं तेन गणं त्यजेत् ॥१०
श्रेयसो लक्षणं ह्येतद्विक्रमो यस्य दृश्यते ।
कीर्तिप्रधानो यश्च स्यात्समये यश्च तिष्ठति ॥ ११
समर्थान्पूजयेद्यश्च नास्पर्ध्यैः स्पर्धते च यः ।
न च कामाद्भयात्क्रोधाल्लोभाद्वा धर्ममुत्सृजेत् ॥१२
अमानी सत्यवाक्शक्तो जितात्मा मान्यमानिता ।
स ते मन्त्रसहायः स्यात्सर्वावस्थं परीक्षितः ॥ १३
कुलीनः सत्यसंपन्नस्तितिक्षुर्दक्ष आत्मवान् ।
शूरः कृतज्ञः सत्यश्च श्रेयसः पार्थ लक्षणम् ॥ १४
तस्यैवं वर्तमानस्य पुरुषस्य विजानतः ।
अमित्राः संप्रसीदन्ति ततो मित्रीभवन्त्यपि ॥ १५
अत ऊर्ध्वममात्यानां परीक्षेत गुणागुणान् ।
संयतात्मा कृतप्रज्ञो भूतिकामश्च भूमिपः ॥ १६
संबद्धाः पुरुषैराप्तैरभिजातैः स्वदेशजैः ।
अहार्यैरव्यभीचारैः सर्वतः सुपरीक्षितैः ॥ १७
योधाः स्त्रौवास्तथा मौलास्तथैवान्येऽप्यवस्कृताः ।
कर्तव्या भूतिकामेन पुरुषेण बुभूषता ॥ १८

येषां वैनयिकी बुद्धिः प्रकृता चैव शोभना ।
तेजो धैर्यं क्षमा शौचमनुरागः स्थितिर्धृतिः ॥ १९
परीक्षितगुणान्नित्यं प्रौढभावान्धुरंधरान् ।
पञ्चोपधाव्यतीतांश्च कुर्याद्राजार्थकारिणः ॥ २०
पर्याप्तवचनान्वीरान्प्रतिपत्तिविशारदान् ।
कुलीनान्सत्यसंपन्नानिङ्गितज्ञाननिष्ठुरान् ॥ २१
देशकालविधानज्ञान्भर्तृकार्यहितैषिणः ।
नित्यमर्थेषु सर्वेषु राजा कुर्वीत मन्त्रिणः ॥ २२
हीनतेजा ह्यसंहृष्टो नैव जातु व्यवस्यति ।
अवश्यं जनयत्येव सर्वकर्मसु संशयान् ॥ २३
एवमल्पश्रुतो मन्त्री कल्याणाभिजनोऽप्युत ।
धर्मार्थकामयुक्तोऽपि नालं मन्त्रं परीक्षितुम् ॥ २४
तथैवानभिजातोऽपि काममस्तु बहुश्रुतः ।
अनायक इवाचक्षुर्मुह्यत्यूह्येषु कर्मसु ॥ २५
यो वा ह्यस्थिरसंकल्पो बुद्धिमानागतागमः ।
उपायज्ञोऽपि नालं स कर्म यापयितुं चिरम् ॥ २६
केवलात्पुनराचारात्कर्मणो नोपपद्यते ।
परिमर्शो विशेषाणामश्रुतस्येह दुर्मतेः ॥ २७
मन्त्रिण्यननुरक्ते तु विश्वासो न हि विद्यते ।
तस्मादननुरक्ताय नैव मन्त्रं प्रकाशयेत् ॥ २८
व्यथयेद्धि स राजानं मन्त्रिभिः सहितोऽनृजुः ।
मारुतोपहतच्छिद्रैः प्रविश्याग्निरिव द्रुमम् ॥ २९
संक्रुध्यत्येकदा स्वामी स्थानाच्चैवापकर्षति ।
वाचा क्षिपति संरब्धस्ततः पश्चात्प्रसीदति ॥ ३०
तानि तान्यनुरक्तेन शक्यान्यनुतितिक्षितुम् ।
मन्त्रिणां च भवेत्क्रोधो विस्फूर्जितमिवाशनेः ॥ ३१
यस्तु संहरते तानि भर्तुः प्रियचिकीर्षया ।
समानसुखदुःखं तं पृच्छेदर्थेषु मानवम् ॥ ३२
अनृजुस्त्वनुरक्तोऽपि संपन्नश्चेतरैर्गुणैः ।
राज्ञः प्रज्ञानयुक्तोऽपि न मन्त्रं श्रोतुमर्हति ॥ ३३
योऽमित्रैः सह संबद्धो न पौरान्बहु मन्यते ।
स सुहृत्तादृशो राज्ञो न मन्त्रं श्रोतुमर्हति ॥ ३४
अविद्वानशुचिः स्तब्धः शत्रुसेवी विकत्थनः ।
स सुहृत्क्रोधनो लुब्धो न मन्त्रं श्रोतुमर्हति ॥ ३५
आगन्तुश्चानुरक्तोऽपि काममस्तु बहुश्रुतः ।
सत्कृतः संविभक्तो वा न मन्त्रं श्रोतुमर्हति ॥ ३६
यस्त्वल्पेनापि कार्येण सकृदाक्षारितो भवेत् ।
पुनरन्यैर्गुणैर्युक्तो न मन्त्रं श्रोतुमर्हति ॥ ३७
कृतप्रज्ञश्च मेधावी बुधो जानपदः शुचिः ।
सर्वकर्मसु यः शुद्धः स मन्त्रं श्रोतुमर्हति ॥ ३८
ज्ञानविज्ञानसंपन्नः प्रकृतिज्ञः परात्मनोः ।
सुहृदात्मसमो राज्ञः स मन्त्रं श्रोतुमर्हति ॥ ३९
सत्यवाक्शीलसंपन्नो गम्भीरः सत्रपो मृदुः ।
पितृपैतामहो यः स्यात्स मन्त्रं श्रोतुमर्हति ॥ ४०
संतुष्टः संमतः सत्यः शौटीरो द्वेष्यपापकः ।
मन्त्रवित्कालविच्छूरः स मन्त्रं श्रोतुमर्हति ॥ ४१
सर्वलोकं समं शक्तः सान्त्वेन कुरुते वशे ।
तस्मै मन्त्रः प्रयोक्तव्यो दण्डमाधित्सता नृप ॥ ४२
पौरजानपदा यस्मिन्विश्वासं धर्मतो गताः ।
योद्धा नयविपश्चिच्च स मन्त्रं श्रोतुमर्हति ॥ ४३
तस्मात्सर्वैर्गुणैरेतैरुपपन्नाः सुपूजिताः ।
मन्त्रिणः प्रकृतिज्ञाः स्युस्त्र्यवरा महदीप्सवः ॥ ४४
स्वासु प्रकृतिषु छिद्रं लक्षयेरन्परस्य च ।
मन्त्रिणो मन्त्रमूलं हि राज्ञो राष्ट्रं विवर्धते ॥ ४५
नास्य छिद्रं परः पश्येच्छिद्रेषु परमन्वियात् ।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥ ४६
मन्त्रग्राहा हि राज्यस्य मन्त्रिणो ये मनीषिणः ।
मन्त्रसंहननो राजा मन्त्राङ्गानीतरो जनः ॥ ४७
राज्यं प्रणिधिमूलं हि मन्त्रसारं प्रचक्षते ।
स्वामिनं त्वनुवर्तन्ति वृत्त्यर्थमिह मन्त्रिणः ॥ ४८

स विनीय मदक्रोधौ मानमीर्ष्यां च निर्वृतः ।
नित्यं पञ्चोपधातीतैर्मन्त्रयेत्सह मन्त्रिभिः ॥ ४९

तेषां त्रयाणां विविधं विमर्शं
बुध्येत चित्तं विनिवेश्य तत्र ।
स्वनिश्चयं तं परनिश्चयं च
निवेदयेदुत्तरमन्त्रकाले ॥ ५०

धर्मार्थकामज्ञमुपेत्य पृच्छे-
द्युक्तो गुरुं ब्राह्मणमुत्तमार्थम् ।
निष्ठा कृता तेन यदा सह स्या-
त्तं तत्र मार्गं प्रणयेदसक्तम् ॥ ५१

एवं सदा मन्त्रयितव्यमाहु-
र्ये मन्त्रतत्त्वार्थविनिश्चयज्ञाः ।
तस्मात्त्वमेवं प्रणयेः सदैव
मन्त्रं प्रजासंग्रहणे समर्थम् ॥ ५२

न वामनाः कुब्जकृशा न खञ्जा
नान्धा जडाः स्त्री न नपुंसकं च ।
न चात्र तिर्यङ्न पुरो न पश्चा-
न्नोर्ध्वं न चाधः प्रचरेत कश्चित् ॥ ५३

आरुह्य वातायनमेव शून्यं
स्थलं प्रकाशं कुशकाशहीनम् ।
वागङ्गदोषान्परिहृत्य मन्त्रं
संमन्त्रयेत्कार्यमहीनकालम् ॥ ५४

इति श्रीमहाभारते शान्तिपर्वणि
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतेश्च संवादं शक्रस्य च युधिष्ठिर ॥ १

शक्र उवाच ।

किं स्विदेकपदं ब्रह्मन्पुरुषः सम्यगाचरन् ।
प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् ॥ २

बृहस्पतिरुवाच ।

सान्त्वमेकपदं शक्र पुरुषः सम्यगाचरन् ।
प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् ॥ ३
एतदेकपदं शक्र सर्वलोकसुखावहम् ।
आचरन्सर्वभूतेषु प्रियो भवति सर्वदा ॥ ४
यो हि नाभाषते किंचित्सततं भ्रुकुटीमुखः ।
द्वेष्यो भवति भूतानां स सान्त्वमिह नाचरन् ॥ ५
यस्तु पूर्वमभिप्रेक्ष्य पूर्वमेवाभिभाषते ।
स्मितपूर्वाभिभाषी च तस्य लोकः प्रसीदति ॥ ६
दानमेव हि सर्वत्र सान्त्वेनानभिजल्पितम् ।
न प्रीणयति भूतानि निर्व्यञ्जनमिवाशनम् ॥ ७
अदाता ह्यपि भूतानां मधुरामीरयन्गिरम् ।
सर्वलोकमिमं शक्र सान्त्वेन कुरुते वशे ॥ ८
तस्मात्सान्त्वं प्रकर्तव्यं दण्डमाधित्सतामिह ।
फलं च जनयत्येवं न चास्योद्विजते जनः ॥ ९
सुकृतस्य हि सान्त्वस्य श्लक्ष्णस्य मधुरस्य च ।
सम्यगासेव्यमानस्य तुल्यं जातु न विद्यते ॥ १०

भीष्म उवाच ।

इत्युक्तः कृतवान्सर्वं तथा शक्रः पुरोधसा ।
तथा त्वमपि कौन्तेय सम्यगेतत्समाचर ॥ ११

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

युधिष्ठिर उवाच ।

कथं स्विदिह राजेन्द्र पालयन्पार्थिवः प्रजाः ।
प्रति धर्मं विशेषेण कीर्तिमाप्नोति शाश्वतीम् ॥ १

भीष्म उवाच ।

व्यवहारेण शुद्धेन प्रजापालनतत्परः ।
प्राप्य धर्मं च कीर्तिं च लोकावाप्नोत्युभौ शुचिः ॥ २

युधिष्ठिर उवाच ।
कीदृशं व्यवहारं तु कैश्च व्यवहरेन्नृपः ।
एतत्पृष्टो महाप्राज्ञ यथावद्वक्तुमर्हसि ॥ ३
ये चैते पूर्वकथिता गुणास्ते पुरुषं प्रति ।
नैकस्मिन्पुरुषे ह्येते विद्यन्त इति मे मतिः ॥ ४
भीष्म उवाच ।
एवमेतन्महाप्राज्ञ यथा वदसि बुद्धिमान् ।
दुर्लभः पुरुषः कश्चिदेभिर्गुणगणैर्युतः ॥ ५
किं तु संक्षेपतः शीलं प्रयत्ने नेह दुर्लभम् ।
वक्ष्यापि तु यथामात्यान्यादृशांश्च करिष्यसि ॥ ६
चतुरो ब्राह्मणान्वैद्यान्प्रगल्भान्सात्त्विकाञ्शुचीन् ।
त्रींश्च शूद्रान्विनीतांश्च शुचीन्कर्मणि पूर्वके ॥ ७
अष्टाभिश्च गुणैर्युक्तं सूतं पौराणिकं चरेत् ।
पञ्चाशद्वर्षवयसं प्रगल्भमनसूयकम् ॥ ८
मतिस्मृतिसमायुक्तं विनीतं समदर्शनम् ।
कार्ये विवदमानानां शक्तमर्थेष्वलोलुपम् ॥ ९
विवर्जितानां व्यसनैः सुघोरैः सप्तभिर्भृशम् ।
अष्टानां मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत् ॥ १०
ततः संप्रेषयेद्राष्ट्रे राष्ट्रायाथ च दर्शयेत् ।
अनेन व्यवहारेण द्रष्टव्यास्ते प्रजाः सदा ॥ ११
न चापि गूढं कार्यं ते ग्राह्यं कार्योपघातकम् ।
कार्ये खलु विपन्ने त्वां सोऽधर्मस्तांश्च पीडयेत् ॥ १२
विद्रवेच्चैव राष्ट्रं ते श्येनात्पक्षिगणा इव ।
परिस्रवेच्च सततं नौर्विशीर्णेव सागरे ॥ १३
प्रजाः पालयतोऽसम्यगधर्मेणेह भूपतेः ।
हार्दं भयं संभवति स्वर्गश्चास्य विरुध्यते ॥ १४
अथ योऽधर्मतः पाति राजामात्योऽथ वात्मजः ।
धर्मासने नियुक्तः सन्धर्ममूलं नरर्षभ ॥ १५
कार्येष्वधिकृताः सम्यगकुर्वन्तो नृपानुगाः ।
आत्मानं पुरतः कृत्वा यान्त्यधः सहपार्थिवाः ॥ १६
बलात्कृतानां बलिभिः कृपणं बहु जल्पताम् ।
नाथो वै भूमिपो नित्यमनाथानां नृणां भवेत् ॥ १७
ततः साक्षिबलं साधु द्वैधे वादकृतं भवेत् ।
असाक्षिकमनाथं वा परीक्ष्यं तद्विशेषतः ॥ १८
अपराधानुरूपं च दण्डं पापेषु पातयेत् ।
उद्वेजयेद्धनैर्ऋद्धान्दरिद्रान्वधबन्धनैः ॥ १९
विनयैरपि दुर्वृत्तान्प्रहारैरपि पार्थिवः ।
सान्त्वेनोपप्रदानेन शिष्टांश्च परिपालयेत् ॥ २०
राज्ञो वधं चिकीर्षेद्यस्तस्य चित्रो वधो भवेत् ।
आजीवकस्य स्तेनस्य वर्णसंकरकस्य च ॥ २१
सम्यक्प्रणयतो दण्डं भूमिपस्य विशां पते ।
युक्तस्य वा नास्त्यधर्मो धर्म एवेह शाश्वतः ॥ २२
कामकारेण दण्डं तु यः कुर्यादविचक्षणः ।
स इहाकीर्तिसंयुक्तो मृतो नरकमाप्नुयात् ॥ २३
न परस्य श्रवादेव परेषां दण्डमर्पयेत् ।
आगमानुगमं कृत्वा बध्नीयान्मोक्षयेत वा ॥ २४
न तु हन्यान्नृपो जातु दूतं कस्यांचिदापदि ।
दूतस्य हन्ता निरयमाविशेत्सचिवैः सह ॥ २५
यथोक्तवादिनं दूतं क्षत्रधर्मरतो नृपः ।
यो हन्यात्पितरस्तस्य भ्रूणहत्यामवाप्नुयुः ॥ २६
कुलीनः शीलसंपन्नो वाग्मी दक्षः प्रियंवदः ।
यथोक्तवादी स्मृतिमान्दूतः स्यात्सप्तभिर्गुणैः ॥ २७
एतैरेव गुणैर्युक्तः प्रतीहारोऽस्य रक्षिता ।
शिरोरक्षश्च भवति गुणैरेतैः समन्वितः ॥ २८
धर्मार्थशास्त्रतत्त्वज्ञः संधिविग्रहको भवेत् ।
मतिमान्धृतिमान्धीमान्रहस्यविनिगूहिता ॥ २९
कुलीनः सत्यसंपन्नः शक्तोऽमात्यः प्रशंसितः ।
एतैरेव गुणैर्युक्तस्तथा सेनापतिर्भवेत् ॥ ३०
व्यूहयन्त्रायुधीयानां तत्त्वज्ञो विक्रमान्वितः ।
वर्षशीतोष्णवातानां सहिष्णुः पररन्ध्रवित् ॥ ३१

विश्वासयेत्परांश्चैव विश्वसेन्न तु कस्यचित् ।
पुत्रेष्वपि हि राजेन्द्र विश्वासो न प्रशस्यते ॥ ३२
एतच्छास्त्रार्थतत्त्वं तु तवाख्यातं मयानघ ।
अविश्वासो नरेन्द्राणां गुह्यं परममुच्यते ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

युधिष्ठिर उवाच ।

कथंविधं पुरं राजा स्वयमावस्तुमर्हति ।
कृतं वा कारयित्वा वा तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

यत्र कौन्तेय वस्तव्यं सपुत्रभ्रातृबन्धुना ।
न्याय्यं तत्र परिप्रष्टुं गुप्तिं वृत्तिं च भारत ॥ २
तस्मात्ते वर्तयिष्यामि दुर्गकर्म विशेषतः ।
श्रुत्वा तथा विधातव्यमनुष्ठेयं च यत्नतः ॥ ३
षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत् ।
सर्वसंपत्प्रधानं यद्बाहुल्यं वापि संभवेत् ॥ ४
धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गमब्दुर्गं वनदुर्गं च तानि षट् ॥ ५
यत्पुरं दुर्गसंपन्नं धान्यायुधसमन्वितम् ।
दृढप्राकारपरिखं हस्त्यश्वरथसंकुलम् ॥ ६
विद्वांसः शिल्पिनो यत्र निचयाश्च सुसंचिताः ।
धार्मिकश्च जनो यत्र दाक्ष्यमुत्तममास्थितः ॥ ७
ऊर्जस्विनरनागाश्वं चत्वरापणशोभितम् ।
प्रसिद्धव्यवहारं च प्रशान्तमकुतोभयम् ॥ ८
सुप्रभं सानुनादं च सुप्रशस्तनिवेशनम् ।
शूराढ्यजनसंपन्नं ब्रह्मघोषानुनादितम् ॥ ९
समाजोत्सवसंपन्नं सदापूजितदैवतम् ।
वश्यामात्यबलो राजा तत्पुरं स्वयमावसेत् ॥ १०
तत्र कोशं बलं मित्रं व्यवहारं च वर्धयेत् ।
पुरे जनपदे चैव सर्वदोषान्निवर्तयेत् ॥ ११
भाण्डागारायुधागारं प्रयत्नेनाभिवर्धयेत् ।
निचयान्वर्धयेत्सर्वांस्तथा यन्त्रगदागदान् ॥ १२
काष्ठलोहतुषाङ्गारदारुशृङ्गास्थिवैणवान् ।
मज्जास्नेहवसाक्षौद्रमौषधग्राममेव च ॥ १३
शणं सर्जरसं धान्यमायुधानि शरांस्तथा ।
चर्म स्नायु तथा वेत्रं मुञ्जबल्वजधन्वनान् ॥ १४
आशयाश्चोदपानाश्च प्रभूतसलिला वराः ।
निरोद्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः ॥१५
सत्कृताश्च प्रयत्नेन आचार्यर्त्विक्पुरोहिताः ।
महेष्वासाः स्थपतयः सांवत्सरचिकित्सकाः ॥ १६
प्राज्ञा मेधाविनो दान्ता दक्षाः शूरा बहुश्रुताः ।
कुलीनाः सत्त्वसंपन्ना युक्ताः सर्वेषु कर्मसु ॥ १७
पूजयेद्धार्मिकान्राजा निगृह्णीयादधार्मिकान् ।
नियुञ्ज्याच्च प्रयत्नेन सर्ववर्णान्स्वकर्मसु ॥ १८
बाह्यमाभ्यन्तरं चैव पौरजानपदं जनम् ।
चारैः सुविदितं कृत्वा ततः कर्म प्रयोजयेत् ॥ १९
चारान्मन्त्रं च कोशं च मन्त्रं चैव विशेषतः ।
अनुतिष्ठेत्स्वयं राजा सर्वं ह्यत्र प्रतिष्ठितम् ॥ २०
उदासीनारिमित्राणां सर्वमेव चिकीर्षितम् ।
पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा ॥ २१
ततस्तथा विधातव्यं सर्वमेवाप्रमादतः ।
भक्तान्पूजयता नित्यं द्विषतश्च निगृह्णता ॥ २२
यष्टव्यं क्रतुभिर्नित्यं दातव्यं चाप्यपीडया ।
प्रजानां रक्षणं कार्यं न कार्यं कर्म गर्हितम् ॥ २३
कृपणानाथवृद्धानां विधवानां च योषिताम् ।
योगक्षेमं च वृत्तिं च नित्यमेव प्रकल्पयेत् ॥ २४
आश्रमेषु यथाकालं चेलभाजनभोजनम् ।
सदैवोपहरेद्राजा सत्कृत्यानवमन्य च ॥ २५
आत्मानं सर्वकार्याणि तापसे राज्यमेव च ।

निवेदयेत्प्रयत्नेन तिष्ठेत्प्रह्वश्च सर्वदा ॥ २६
सर्वार्थत्यागिनं राजा कुले जातं बहुश्रुतम् ।
पूजयेत्तादृशं दृष्ट्वा शयनासनभोजनैः ॥ २७
तस्मिन्कुर्वीत विश्वासं राजा कस्यांचिदापदि ।
तापसेषु हि विश्वासमपि कुर्वन्ति दस्यवः ॥ २८
तस्मिन्निधीनादधीत प्रज्ञां पर्याददीत च ।
न चाप्यभीक्ष्णं सेवेत भृशं वा प्रतिपूजयेत् ॥२९
अन्यः कार्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः ।
अटवीष्वपरः कार्यः सामन्तनगरेषु च ॥ ३०
तेषु सत्कारसंस्कारान्संविभागांश्च कारयेत् ।
परराष्ट्राटवीस्थेषु यथा स्वविषये तथा ॥ ३१
ते कस्यांचिदवस्थायां शरणं शरणार्थिने ।
राज्ञे दद्युर्यथाकामं तापसाः संशितव्रताः ॥ ३२
एष ते लक्षणोद्देशः संक्षेपेण प्रकीर्तितः ।
यादृशं नगरं राजा स्वयमावस्तुमर्हति ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

युधिष्ठिर उवाच ।

राष्ट्रगुप्तिं च मे राजन्राष्ट्रस्यैव च संग्रहम् ।
सम्यग्जिज्ञासमानाय प्रब्रूहि भरतर्षभ ॥ १

भीष्म उवाच ।

राष्ट्रगुप्तिं च ते सम्यग्राष्ट्रस्यैव च संग्रहम् ।
हन्त सर्वं प्रवक्ष्यामि तत्त्वमेकमनाः शृणु ॥ २
ग्रामस्याधिपतिः कार्यो दशग्राम्यस्तथापरः ।
द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत् ॥ ३
ग्रामे यान्ग्रामदोषांश्च ग्रामिकः परिपालयेत् ।
तान्ब्रूयाद्दशपायासौ स तु विंशतिपाय वै ॥ ४
सोऽपि विंशत्यधिपतिर्वृत्तं जानपदे जने ।
ग्रामाणां शतपालाय सर्वमेव निवेदयेत् ॥ ५
यानि ग्रामीणभोज्यानि ग्रामिकस्तान्युपाश्नुयात् ।
दशपस्तेन भर्तव्यस्तेनापि द्विगुणाधिपः ॥ ६
ग्रामं ग्रामशताध्यक्षो भोक्तुमर्हति सत्कृतः ।
महान्तं भरतश्रेष्ठ सुस्फीतजनसंकुलम् ।
तत्र ह्यनेकमायत्तं राज्ञो भवति भारत ॥ ७
शाखानगरमर्हस्तु सहस्रपतिरुत्तमम् ।
धान्यहैरण्यभोगेन भोक्तुं राष्ट्रिय उद्यतः ॥ ८
तथा यद्ग्रामकृत्यं स्याद्ग्रामिकृत्यं च ते स्वयम् ।
धर्मज्ञः सचिवः कश्चित्तत्प्रपश्येदतन्द्रितः ॥ ९
नगरे नगरे च स्यादेकः सर्वार्थचिन्तकः ।
उच्चैःस्थाने घोररूपो नक्षत्राणामिव ग्रहः ।
भवेत्स तान्परिक्रामेत्सर्वानेव सदा स्वयम् ॥ १०
विक्रमं क्रयमध्वानं भक्तं च सपरिव्ययम् ।
योगक्षेमं च संप्रेक्ष्य वणिजः कारयेत्करान् ॥ ११
उत्पत्तिं दानवृत्तिं च शिल्पं संप्रेक्ष्य चासकृत् ।
शिल्पप्रतिकरानेव शिल्पिनः प्रति कारयेत् ॥ १२
उच्चावचकरा न्याय्याः पूर्वराज्ञां युधिष्ठिर ।
यथा यथा न हीयेरंस्तथा कुर्यान्महीपतिः ॥ १३
फलं कर्म च संप्रेक्ष्य ततः सर्वं प्रकल्पयेत् ।
फलं कर्म च निर्हेतु न कश्चित्संप्रवर्तयेत् ॥ १४
यथा राजा च कर्ता च स्यातां कर्मणि भागिनौ ।
समवेक्ष्य तथा राज्ञा प्रणेयाः सततं कराः ॥ १५
नोच्छिन्द्यादात्मनो मूलं परेषां वापि तृष्णया ।
ईहाद्वाराणि संरुध्य राजा संप्रीतिदर्शनः ॥ १६
प्रद्विष्यन्ति परिख्यातं राजानमतिखादनम् ।
प्रद्विष्टस्य कुतः श्रेयः संप्रियो लभते प्रियम् ॥ १७
वत्सौपम्येन दोग्धव्यं राष्ट्रमक्षीणबुद्धिना ।
भृतो वत्सो जातबलः पीडां सहति भारत ॥ १८
न कर्म कुरुते वत्सो भृशं दुग्धो युधिष्ठिर ।

राष्ट्रमप्यतिदुग्धं हि न कर्म कुरुते महत् ॥ १९
यो राष्ट्रमनुगृह्णाति परिगृह्य स्वयं नृपः ।
संजातमुपजीवन्स लभते सुमहत्फलम् ॥ २०
आपदर्थं हि निचयान्राजान इह चिन्वते ।
राष्ट्रं च कोशभूतं स्यात्कोशो वेश्मगतस्तथा ॥ २१
पौरजानपदान्सर्वान्संश्रितोपाश्रितांस्तथा ।
यथाशक्त्यनुकम्पेत सर्वानभ्यन्तरानपि ॥ २२
बाह्यं जनं भेदयित्वा भोक्तव्यो मध्यमः सुखम् ।
एवं न संप्रकुप्यन्ते जनाः सुखितदुःखिताः ॥ २३
प्रागेव तु करादानमनुभाष्य पुनः पुनः ।
संनिपत्य स्वविषये भयं राष्ट्रे प्रदर्शयेत् ॥ २४
इयमापत्समुत्पन्ना परचक्रभयं महत् ।
अपि नान्ताय कल्पेत वेणोरिव फलागमः ॥ २५
अरयो मे समुत्थाय बहुभिर्दस्युभिः सह ।
इदमात्मवधायैव राष्ट्रमिच्छन्ति बाधितुम् ॥ २६
अस्यामापदि घोरायां संप्राप्ते दारुणे भये ।
परित्राणाय भवतां प्रार्थयिष्ये धनानि वः ॥ २७
प्रतिदास्ये च भवतां सर्वं चाहं भयक्षये ।
नारयः प्रतिदास्यन्ति यद्धरेयुर्बलादितः ॥ २८
कलत्रमादितः कृत्वा नश्येत्स्वं स्वयमेव हि ।
अपि चेत्पुत्रदारार्थमर्थसंचय इष्यते ॥ २९
नन्दामि वः प्रभावेन पुत्राणामिव चोदये ।
यथाशक्त्यनुगृह्णामि राष्ट्रस्यापीडया च वः ॥ ३०
आपत्स्वेव च वोढव्यं भवद्भिः सद्गवैरिव ।
न वः प्रियतरं कार्यं धनं कस्यांचिदापदि ॥ ३१
इति वाचा मधुरया श्लक्ष्णया सोपचारया ।
स्वरश्मीनभ्यवसृजेद्युगमादाय कालवित् ॥ ३२
प्रचारं भृत्यभरणं व्ययं गोग्रामतो भयम् ।
योगक्षेमं च संप्रेक्ष्य गोमिनः कारयेत्करान् ॥ ३३
उपेक्षिता हि नश्येयुर्गोमिनोऽरण्यवासिनः ।
तस्मात्तेषु विशेषेण मृदुपूर्वं समाचरेत् ॥ ३४
सान्त्वनं रक्षणं दानमवस्था चाप्यभीक्ष्णशः ।
गोमिनां पार्थ कर्तव्यं संविभागाः प्रियाणि च ॥३५
अजस्रमुपयोक्तव्यं फलं गोमिषु सर्वतः ।
प्रभावयति राष्ट्रं च व्यवहारं कृषिं तथा ॥ ३६
तस्माद्गोमिषु यत्नेन प्रीतिं कुर्याद्विचक्षणः ।
दयावानप्रमत्तश्च करान्संप्रणयन्मृदून् ॥ ३७
सर्वत्र क्षेमचरणं सुलभं तात गोमिभिः ।
न ह्यतः सदृशं किंचिद्धनमस्ति युधिष्ठिर ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

युधिष्ठिर उवाच ।

यदा राजा समर्थोऽपि कोशार्थी स्यान्महामते ।
कथं प्रवर्तेत तदा तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

यथादेशं यथाकालमपि चैव यथाबलम् ।
अनुशिष्यात्प्रजा राजा धर्मार्थी तद्धिते रतः ॥ २
यथा तासां च मन्येत श्रेय आत्मन एव च ।
तथा धर्म्याणि सर्वाणि राजा राष्ट्रे प्रवर्तयेत् ॥ ३
मधुदोहं दुहेद्राष्ट्रं भ्रमरान्न विपातयेत् ।
वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत् ॥ ४
जलौकावत्पिबेद्राष्ट्रं मृदुनैव नराधिप ।
व्याघ्रीव च हरेत्पुत्रमदष्ट्वा मा पतेदिति ॥ ५
अल्पेनाल्पेन देयेन वर्धमानं प्रदापयेत् ।
ततो भूयस्ततो भूयः कामं वृद्धिं समाचरेत् ॥ ६
दमयन्निव दम्यानां शश्वद्भारं प्रवर्धयेत् ।
मृदुपूर्वं प्रयत्नेन पाशानभ्यवहारयेत् ॥ ७
सकृत्पाशावकीर्णास्ते न भविष्यन्ति दुर्दमाः ।

उचितेनेव भोक्तव्यास्ते भविष्यन्ति यत्नतः ॥ ८
तस्मात्सर्वसमारम्भो दुर्लभः पुरुषव्रजः ।
यथामुख्यान्सान्त्वयित्वा भोक्तव्य इतरो जनः ॥९
ततस्तान्भेदयित्वाथ परस्परविवक्षितान् ।
भुञ्जीत सान्त्वयित्वैव यथासुखमयत्नतः ॥ १०
न चास्थाने न चाकाले करानेभ्योऽनुपातयेत् ।
आनुपूर्व्येण सान्त्वेन यथाकालं यथाविधि ॥ ११
उपायान्प्रब्रवीम्येतान्न मे माया विवक्षिता ।
अनुपायेन दमयन्प्रकोपयति वाजिनः ॥ १२
पानागाराणि वेशाश्च वेशप्रापणिकास्तथा ।
कुशीलवाः सकितवा ये चान्ये केचिदीदृशाः ॥ १३
नियम्याः सर्व एवैते ये राष्ट्रस्योपघातकाः ।
एते राष्ट्रे हि तिष्ठन्तो बाधन्ते भद्रिकाः प्रजाः ॥१४
न केनचिद्याचितव्यः कश्चित्किंचिदनापदि ।
इति व्यवस्था भूतानां पुरस्तान्मनुना कृता ॥ १५
सर्वे तथा न जीवेयुर्न कुर्युः कर्म चेदिह ।
सर्व एव त्रयो लोका न भवेयुरसंशयम् ॥ १६
प्रभुर्नियमने राजा य एतान्न नियच्छति ।
भुङ्क्ते स तस्य पापस्य चतुर्भागमिति श्रुतिः ।
तथा कृतस्य धर्मस्य चतुर्भागमुपाश्नुते ॥ १७
स्थानान्येतानि संगम्य प्रसङ्गे भूतिनाशनः ।
कामप्रसक्तः पुरुषः किमकार्यं विवर्जयेत् ॥ १८
आपन्नेव तु याचेरन्येषां नास्ति परिग्रहः ।
दातव्यं धर्मतस्तेभ्यस्त्वनुक्रोशाद्दयार्थिना ॥ १९
मा ते राष्ट्रे याचनका मा ते भूयुश्च दस्यवः ।
इष्टादातार एवैते नैते भूतस्य भावकाः ॥ २०
ये भूतान्यनुगृह्णन्ति वर्धयन्ति च ये प्रजाः ।
ते ते राष्ट्रे प्रवर्तन्तां मा भूतानामभावकाः ॥ २१
दण्ड्यास्ते च महाराज धनादानप्रयोजनाः ।
प्रयोगं कारयेयुस्तान्यथा बलिकरांस्तथा ॥ २२
कृषिगोरक्ष्यवाणिज्यं यच्चान्यत्किंचिदीदृशम् ।
पुरुषैः कारयेत्कर्म बहुभिः सह कर्मिभिः ॥ २३
नरश्चेत्कृषिगोरक्ष्यं वाणिज्यं चाप्यनुष्ठितः ।
संशयं लभते किंचित्तेन राजा विगर्ह्यते ॥ २४
धनिनः पूजयेन्नित्यं यानाच्छादनभोजनैः ।
वक्तव्याश्चानुगृह्णीध्वं पूजाः सह मयेति ह ॥ २५
अङ्गमेतन्महद्राज्ञां धनिनो नाम भारत ।
ककुदं सर्वभूतानां धनस्थो नात्र संशयः ॥ २६
प्राज्ञः शूरो धनस्थश्च स्वामी धार्मिक एव च ।
तपस्वी सत्यवादी च बुद्धिमांश्चाभिरक्षति ॥ २७
तस्मादेतेषु सर्वेषु प्रीतिमान्भव पार्थिव ।
सत्यमार्जवमक्रोधमानृशंस्यं च पालय ॥ २८
एवं दण्डं च कोशं च मित्रं भूमिं च लप्स्यसे ।
सत्यार्जवपरो राजन्मित्रकोशसमन्वितः ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

भीष्म उवाच ।

वनस्पतीन्भक्ष्यफलान्न छिन्द्युर्विषये तव ।
ब्राह्मणानां मूलफलं धर्म्यमाहुर्मनीषिणः ॥ १
ब्राह्मणेभ्योऽतिरिक्तं च भुञ्जीरन्नितरे जनाः ।
न ब्राह्मणोपरोधेन हरेदन्यः कथंचन ॥ २
विप्रश्चेत्त्यागमातिष्ठेदाख्यायावृत्तिकर्शितः ।
परिकल्प्यास्य वृत्तिः स्यात्सदारस्य नराधिप ॥ ३
स चेन्नोपनिवर्तेत वाच्यो ब्राह्मणसंसदि ।
कस्मिन्निदानीं मर्यादामयं लोकः करिष्यति ॥ ४
असंशयं निवर्तेत न चेद्वक्ष्यत्यतः परम् ।
पूर्वं परोक्षं कर्तव्यमेतत्कौन्तेय शासनम् ॥ ५
आहुरेतज्जना ब्रह्मन्न चैतच्छ्रद्दधाम्यहम् ।
निमन्त्र्यश्च भवेद्भोगैरवृत्त्या चेत्तदाचरेत् ॥ ६

कृषिगोरक्ष्यवाणिज्यं लोकानामिह जीवनम् ।
ऊर्ध्वं चैव त्रयी विद्या सा भूतान्भावयत्युत ॥ ७
तस्यां प्रयतमानायां ये स्युस्तत्परिपन्थिनः ।
दस्यवस्तद्वधायेह ब्रह्मा क्षत्रमथासृजत् ॥ ८
शत्रूञ्जहि प्रजा रक्ष यजस्व क्रतुभिर्नृप ।
युध्यस्व समरे वीरो भूत्वा कौरवनन्दन ॥ ९
संरक्ष्यान्पालयेद्राजा यः स राजार्यकृत्तमः ।
ये केचित्तान्न रक्षन्ति तैरर्थो नास्ति कश्चन ॥ १०
सदैव राज्ञा बोद्धव्यं सर्वलोकाद्युधिष्ठिर ।
तस्माद्धेतोर्हि भुञ्जीत मनुष्यानेव मानवः ॥ ११
अन्तरेभ्यः परान्रक्षन्परेभ्यः पुनरन्तरान् ।
परान्परेभ्यः स्वान्स्वेभ्यः सर्वान्पालय नित्यदा ॥१२
आत्मानं सर्वतो रक्षन्राजा रक्षेत मेदिनीम् ।
आत्ममूलमिदं सर्वमाहुर्हि विदुषो जनाः ॥ १३
किं छिद्रं कोऽनुषङ्गो मे किं वास्त्यविनिपातितम् ।
कुतो मामास्रवेद्दोष इति नित्यं विचिन्तयेत् ॥ १४
गुप्तैश्चारैरनुमतैः पृथिवीमनुचारयेत् ।
सुनीतं यदि मे वृत्तं प्रशंसन्ति न वा पुनः ।
कच्चिद्रोचेज्जनपदे कच्चिद्राष्ट्रे च मे यशः ॥ १५
धर्मज्ञानां धृतिमतां संग्रामेष्वपलायिनाम् ।
राष्ट्रं च येऽनुजीवन्ति ये च राज्ञोऽनुजीविनः ॥१६
अमात्यानां च सर्वेषां मध्यस्थानां च सर्वशः ।
ये च त्वाभिप्रशंसेयुर्निन्देयुरथ वा पुनः ।
सर्वान्सुपरिणीतांस्तान्कारयेत युधिष्ठिर ॥ १७
एकान्तेन हि सर्वेषां न शक्यं तात रोचितुम् ।
मित्रामित्रमथो मध्यं सर्वभूतेषु भारत ॥ १८
तुल्यबाहुबलानां च गुणैरपि निषेविनाम् ।
कथं स्यादधिकः कश्चित्स तु भुञ्जीत मानवान् ॥१९
ये चरा ह्यचरानद्युरदंष्ट्रान्दंष्ट्रिणस्तथा ।
आशीविषा इव क्रुद्धा भुजगा भुजगानिव ॥ २०
एतेभ्यश्चाप्रमत्तः स्यात्सदा यत्तो युधिष्ठिर ।
भारुण्डसदृशा ह्येते निपतन्ति प्रमाद्यतः ॥ २१
कच्चित्ते वणिजो राष्ट्रे नोद्विजन्ते करार्दिताः ।
क्रीणन्तो बहु वाल्पेन कान्तारकृतनिश्रमाः ॥ २२
कच्चित्कृषिकरा राष्ट्रं न जहत्यतिपीडिताः ।
ये वहन्ति धुरं राज्ञां संभरन्तीतरानपि ॥ २३
इतो दत्तेन जीवन्ति देवा पितृगणास्तथा ।
मनुष्योरगरक्षांसि वयांसि पशवस्तथा ॥ २४
एषा ते राष्ट्रवृत्तिश्च राष्ट्रगुप्तिश्च भारत ।
एतमेवार्थमाश्रित्य भूयो वक्ष्यामि पाण्डव ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

९१

भीष्म उवाच ।

यानङ्गिराः क्षत्रधर्मानुतथ्यो ब्रह्मवित्तमः ।
मान्धात्रे यौवनाश्वाय प्रीतिमानभ्यभाषत ॥ १
स यथानुशशासैनमुतथ्यो ब्रह्मवित्तमः ।
तत्ते सर्वं प्रवक्ष्यामि निखिलेन युधिष्ठिर ॥ २

उतथ्य उवाच ।

धर्माय राजा भवति न कामकरणाय तु ।
मान्धातरेवं जानीहि राजा लोकस्य रक्षिता ॥ ३
राजा चरति वै धर्मं देवत्वायैव गच्छति ।
न चेद्धर्मं स चरति नरकायैव गच्छति ॥ ४
धर्मे तिष्ठन्ति भूतानि धर्मो राजनि तिष्ठति ।
तं राजा साधु यः शास्ति स राजा पृथिवीपतिः ॥ ५
राजा परमधर्मात्मा लक्ष्मीवान्पाप उच्यते ।
देवाश्च गर्हां गच्छन्ति धर्मो नास्तीति चोच्यते ॥६
अधर्मे वर्तमानानामर्थसिद्धिः प्रदृश्यते ।
तदेव मङ्गलं सर्वं लोकः समनुवर्तते ॥ ७
उच्छिद्यते धर्मवृत्तमधर्मो वर्तते महान् ।

भयमाहुर्दिवारात्रं यदा पापो न वार्यते ॥ ८
न वेदाननुवर्तन्ति व्रतवन्तो द्विजातयः ।
न यज्ञांस्तन्वते विप्रा यदा पापो न वार्यते ॥ ९
वध्यानामिह सर्वेषां मनो भवति विह्वलम् ।
मनुष्याणां महाराज यदा पापो न वार्यते ॥ १०
उभौ लोकावभिप्रेक्ष्य राजानमृषयः स्वयम् ।
असृजन्सुमहद्भूतमयं धर्मो भविष्यति ॥ ११
यस्मिन्धर्मो विराजेत तं राजानं प्रचक्षते ।
यस्मिन्विलीयते धर्मस्तं देवा वृषलं विदुः ॥ १२
वृषो हि भगवान्धर्मो यस्तस्य कुरुते ह्यलम् ।
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् ॥ १३
धर्मे वर्धति वर्धन्ति सर्वभूतानि सर्वदा ।
तस्मिन्ह्रसति हीयन्ते तस्माद्धर्मं प्रवर्धयेत् ॥ १४
धनात्स्रवति धर्मो हि धारणाद्वेति निश्चयः ।
अकार्याणां मनुष्येन्द्र स सीमान्तकरः स्मृतः ॥१५
प्रभवार्थं हि भूतानां धर्मः सृष्टः स्वयंभुवा ।
तस्मात्प्रवर्धयेद्धर्मं प्रजानुग्रहकारणात् ॥ १६
तस्माद्धि राजशार्दूल धर्मः श्रेष्ठ इति स्मृतः ।
स राजा यः प्रजाः शास्ति साधुकृत्पुरुषर्षभः ॥१७
कामक्रोधावनादृत्य धर्ममेवानुपालयेत् ।
धर्मः श्रेयस्करतमो राज्ञां भरतसत्तम ॥ १८
धर्मस्य ब्राह्मणा योनिस्तस्मात्तान्पूजयेत्सदा ।
ब्राह्मणानां च मान्धातः कामान्कुर्यादमत्सरी ॥१९
तेषां ह्यकामकरणाद्राज्ञः संजायते भयम् ।
मित्राणि च न वर्धन्ते तथामित्रीभवन्त्यपि ॥ २०
ब्राह्मणान्वै तदासूयाद्यदा वैरोचनो बलिः ।
अथास्माच्छ्रीरपाक्रामद्यास्मिन्नासीत्प्रतापिनी ॥ २१
ततस्तस्मादपक्रम्य सागच्छत्पाकशासनम् ।
अथ सोऽन्वतपत्पश्चाच्छ्रियं दृष्ट्वा पुरंदरे ॥ २२
एतत्फलमसूयाया अभिमानस्य चाभिभो ।
तस्माद्बुध्यस्व मान्धातर्मा त्वा जह्यात्प्रतापिनी ॥२३
दर्पो नाम श्रियः पुत्रो जज्ञेऽधर्मादिति श्रुतिः ।
तेन देवासुरा राजन्नीताः सुबहुशो वशम् ॥ २४
राजर्षयश्च बहवस्तस्माद्बुध्यस्व पार्थिव ।
राजा भवति तं जित्वा दासस्तेन पराजितः ॥ २५
स यथा दर्पसहितमधर्मं नानुसेवते ।
तथा वर्तस्व मान्धातश्चिरं चेत्स्थातुमिच्छसि ॥ २६
मत्तात्प्रमत्तात्पोगण्डादुन्मत्ताच्च विशेषतः ।
तदभ्यासादुपावर्तादहितानां च सेवनात् ॥ २७
निगृहीतादमात्याच्च स्त्रीभ्यश्चैव विशेषतः ।
पर्वताद्विषमाद्दुर्गाद्धस्तिनोऽश्वात्सरीसृपात् ॥ २८
एतेभ्यो नित्ययत्तः स्यान्नक्तं चर्यां च वर्जयेत् ।
अत्यायं चातिमानं च दम्भं क्रोधं च वर्जयेत् ॥ २९
अविज्ञातासु च स्त्रीषु क्लीबासु स्वैरिणीषु च ।
परभार्यासु कन्यासु नाचरेन्मैथुनं नृपः ॥ ३०
कुलेषु पापरक्षांसि जायन्ते वर्णसंकरात् ।
अपुमांसोऽङ्गहीनाश्च स्थूलजिह्वा विचेतसः ॥ ३१
एते चान्ये च जायन्ते यदा राजा प्रमाद्यति ।
तस्माद्राज्ञा विशेषेण वर्तितव्यं प्रजाहिते ॥ ३२
क्षत्रियस्य प्रमत्तस्य दोषः संजायते महान् ।
अधर्माः संप्रवर्तन्ते प्रजासंकरकारकाः ॥ ३३
अशीते विद्यते शीतं शीते शीतं न विद्यते ।
अवृष्टिरतिवृष्टिश्च व्याधिश्चाविशति प्रजाः ॥ ३४
नक्षत्राण्युपतिष्ठन्ति ग्रहा घोरास्तथापरे ।
उत्पाताश्चात्र दृश्यन्ते बहवो राजनाशनाः ॥ ३५
अरक्षितात्मा यो राजा प्रजाश्चापि न रक्षति ।
प्रजाश्च तस्य क्षीयन्ते ताश्च सोऽनु विनश्यति ॥३६
द्वावाददाते ह्येकस्य द्वयोश्च बहवोऽपरे ।
कुमार्यः संप्रलुप्यन्ते तदाहुर्नृपदूषणम् ॥ ३७
ममैतदिति नैकस्य मनुष्येष्ववतिष्ठते ।

त्यक्त्वा धर्मं यदा राजा प्रमादमनुतिष्ठति ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

उतथ्य उवाच ।

कालवर्षी च पर्जन्यो धर्मचारी च पार्थिवः ।
संपद्यदैषा भवति सा बिभर्ति सुखं प्रजाः ॥ १
यो न जानाति निर्हन्तुं वस्त्राणां रजको मलम् ।
रक्तानि वा शोधयितुं यथा नास्ति तथैव सः ॥ २
एवमेव द्विजेन्द्राणां क्षत्रियाणां विशामपि ।
शूद्राश्चतुर्णां वर्णानां नानाकर्मस्ववस्थिताः ॥ ३
कर्म शूद्रे कृषिर्वैश्ये दण्डनीतिश्च राजनि ।
ब्रह्मचर्यं तपो मन्त्राः सत्यं चापि द्विजातिषु ॥ ४
तेषां यः क्षत्रियो वेद वस्त्राणामिव शोधनम् ।
शीलदोषान्विनिर्हन्तुं स पिता स प्रजापतिः ॥ ५
कृतं त्रेता द्वापरश्च कलिश्च भरतर्षभ ।
राजवृत्तानि सर्वाणि राजैव युगमुच्यते ॥ ६
चातुर्वर्ण्यं तथा वेदाश्चातुराश्रम्यमेव च ।
सर्वं प्रमुह्यते ह्येतद्यदा राजा प्रमाद्यति ॥ ७
राजैव कर्ता भूतानां राजैव च विनाशकः ।
धर्मात्मा यः स कर्ता स्यादधर्मात्मा विनाशकः ॥८
राज्ञो भार्याश्च पुत्राश्च बान्धवाः सुहृदस्तथा ।
समेत्य सर्वे शोचन्ति यदा राजा प्रमाद्यति ॥ ९
हस्तिनोऽश्वाश्च गावश्चाप्युष्ट्राश्वतरगर्दभाः ।
अधर्मवृत्ते नृपतौ सर्वे सीदन्ति पार्थिव ॥ १०
दुर्बलार्थं बलं सृष्टं धात्रा मान्धातरुच्यते ।
अबलं तन्महद्भूतं यस्मिन्सर्वं प्रतिष्ठितम् ॥ ११
यच्च भूतं स भजते भूता ये च तदन्वयाः ।
अधर्मस्थे हि नृपतौ सर्वे सीदन्ति पार्थिव ॥ १२
दुर्बलस्य हि यच्चक्षुर्मुनेराशीविषस्य च ।
अविषह्यतमं मन्ये मा स्म दुर्बलमासदः ॥ १३
दुर्बलांस्तात बुध्येथा नित्यमेवाविमानितान् ।
मा त्वां दुर्बलचक्षूंषि प्रदहेयुः सबान्धवम् ॥ १४
न हि दुर्बलदग्धस्य कुले किंचित्प्ररोहति ।
आमूलं निर्दहत्येव मा स्म दुर्बलमासदः ॥ १५
अबलं वै बलाच्छ्रेयो यच्चातिबलवद्बलम् ।
बलस्याबलदग्धस्य न किंचिदवशिष्यते ॥ १६
विमानितो हतोत्क्रुष्टस्त्रातारं चेन्न विन्दति ।
अमानुषकृतस्तत्र दण्डो हन्ति नराधिपम् ॥ १७
मा स्म तात बले स्थेया बाधिष्ठा मापि दुर्बलम् ।
मा त्वा दुर्बलचक्षूंषि धक्ष्यन्त्यग्निरिवाश्रयम् ॥ १८
यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि रोदताम् ।
तानि पुत्रान्पशून्घ्नन्ति तेषां मिथ्याभिशासताम् ॥१९
यदि नात्मनि पुत्रेषु न चेत्पौत्रेषु नप्तृषु ।
न हि पापं कृतं कर्म सद्यः फलति गौरिव ॥ २०
यत्राबलो वध्यमानस्त्रातारं नाधिगच्छति ।
महान्दैवकृतस्तत्र दण्डः पतति दारुणः ॥ २१
युक्ता यदा जानपदा भिक्षन्ते ब्राह्मणा इव ।
अभीक्ष्णं भिक्षुदोषेण राजानं घ्नन्ति तादृशाः ॥२२
राज्ञो यदा जनपदे बहवो राजपूरुषाः ।
अनयेनोपवर्तन्ते तद्राज्ञः किल्बिषं महत् ॥ २३
यदा युक्ता नयन्त्यर्थान्कामादर्थवशेन वा ।
कृपणं याचमानानां तद्राज्ञो वैशसं महत् ॥ २४

महावृक्षो जायते वर्धते च
तं चैव भूतानि समाश्रयन्ति ।
यदा वृक्षश्छिद्यते दह्यते वा
तदाश्रया अनिकेता भवन्ति ॥ २५
यदा राष्ट्रे धर्मसग्र्यं चरन्ति
संस्कारं वा राजगुणं ब्रुवाणाः ।
तैरेवाधर्मश्चरितो धर्ममोहा-

नूर्णं जह्यात्सुकृतं दुष्कृतं च ॥ २६
यत्र पापा ज्ञायमानाश्चरन्ति
सतां कलिर्विन्दति तत्र राज्ञः ।
यदा राजा शास्ति नरान्नशिष्या-
न्न तद्राज्यं वर्धते भूमिपाल ॥ २७
यश्चामात्यं मानयित्वा यथार्हं
मन्त्रे च युद्धे च नृपो नियुञ्ज्यात् ।
प्रवर्धते तस्य राष्ट्रं नृपस्य
भुङ्क्ते महीं चाप्यखिलां चिराय ॥ २८
अत्रापि सुकृतं कर्म वाचं चैव सुभाषिताम् ।
समीक्ष्य पूजयन्राजा धर्मं प्राप्नोत्यनुत्तमम् ॥ २९
संविभज्य यदा भुङ्क्ते न चान्यानवमन्यते ।
निहन्ति बलिनं दृप्तं स राज्ञो धर्म उच्यते ॥ ३०
त्रायते हि यदा सर्वं वाचा कायेन कर्मणा ।
पुत्रस्यापि न मृष्येच्च स राज्ञो धर्म उच्यते ॥ ३१
यदा शारणिकान्राजा पुत्रवत्परिरक्षति ।
भिनत्ति न च मर्यादां स राज्ञो धर्म उच्यते ॥ ३२
यदाप्तदक्षिणैर्यज्ञैर्यजते श्रद्धयान्वितः ।
कामद्वेषावनादृत्य स राज्ञो धर्म उच्यते ॥ ३३
कृपणानाथवृद्धानां यदाश्रु व्यपमार्ष्टि वै ।
हर्षं संजनयन्नृणां स राज्ञो धर्म उच्यते ॥ ३४
विवर्धयति मित्राणि तथारींश्चापकर्षति ।
संपूजयति साधूंश्च स राज्ञो धर्म उच्यते ॥ ३५
सत्यं पालयति प्राप्त्या नित्यं भूमिं प्रयच्छति ।
पूजयत्यतिथीन्भृत्यान्स राज्ञो धर्म उच्यते ॥ ३६
निग्रहानुग्रहौ चोभौ यत्र स्यातां प्रतिष्ठितौ ।
अस्मिँल्लोके परे चैव राजा तत्प्राप्नुते फलम् ॥ ३७
यमो राजा धार्मिकाणां मान्धातः परमेश्वरः ।
संयच्छन्भवति प्राणान्नसंयच्छंस्तु पापकः ॥ ३८
ऋत्विक्पुरोहिताचार्यान्सत्कृत्यानवमन्य च ।
यदा सम्यक्प्रगृह्णाति स राज्ञो धर्म उच्यते ॥ ३९
यमो यच्छति भूतानि सर्वाण्येवाविशेषतः ।
तस्य राज्ञानुकर्तव्यं यन्तव्या विधिवत्प्रजाः ॥ ४०
सहस्राक्षेण राजा हि सर्व एवोपमीयते ।
स पश्यति हि यं धर्मं स धर्मः पुरुषर्षभ ॥ ४१
अप्रमादेन शिक्षेथाः क्षमां बुद्धिं धृतिं मतिम् ।
भूतानां सत्त्वजिज्ञासां साध्वसाधु च सर्वदा ॥४२
संग्रहः सर्वभूतानां दानं च मधुरा च वाक् ।
पौरजानपदाश्चैव गोप्तव्याः स्वा यथा प्रजाः ॥४३
न जात्वदक्षो नृपतिः प्रजाः शक्नोति रक्षितुम् ।
भारो हि सुमहांस्तात राज्यं नाम सुदुष्करम् ॥४४
तद्दण्डविन्नृपः प्राज्ञः शूरः शक्नोति रक्षितुम् ।
न हि शक्यमदण्डेन क्लीबेनाबुद्धिनापि वा ॥ ४५
अभिरूपैः कुले जातैर्दक्षैर्भक्तैर्बहुश्रुतैः ।
सर्वा बुद्धीः परीक्षेथास्तापसाश्रमिणामपि ॥ ४६
ततस्त्वं सर्वभूतानां धर्मं वेत्स्यसि वै परम् ।
स्वदेशे परदेशे वा न ते धर्मो विनश्यति ॥ ४७
धर्मश्चार्थश्च कामश्च धर्म एवोत्तरो भवेत् ।
अस्मिँल्लोके परे चैव धर्मवित्सुखमेधते ॥ ४८
त्यजन्ति दारान्प्राणांश्च मनुष्याः प्रतिपूजिताः ।
संग्रहश्चैव भूतानां दानं च मधुरा च वाक् ॥ ४९
अप्रमादश्च शौचं च तात भूतिकरं महत् ।
एतेभ्यश्चैव मान्धातः सततं मा प्रमादिथाः ॥ ५०
अप्रमत्तो भवेद्राजा छिद्रदर्शी परात्मनोः ।
नास्य छिद्रं परः पश्येच्छिद्रेषु परमन्वियात् ॥ ५१
एतद्वृत्तं वासवस्य यमस्य वरुणस्य च ।
राजर्षीणां च सर्वेषां तत्त्वमप्यनुपालय ॥ ५२
तत्कुरुष्व महाराज वृत्तं राजर्षिसेवितम् ।
आतिष्ठ दिव्यं पन्थानमह्नाय भरतर्षभ ॥ ५३
धर्मवृत्तं हि राजानं प्रेत्य चेह च भारत ।

देवर्षिपितृगन्धर्वाः कीर्तयन्त्यमितौजसः ॥ ५४

भीष्म उवाच ।

स एवमुक्तो मान्धाता तेनोतथ्येन भारत ।
कृतवानविशङ्कस्तदेकः प्राप च मेदिनीम् ॥ ५५
भवानपि तथा सम्यङ्मान्धातेव महीपतिः ।
धर्मं कृत्वा महीं रक्षन्स्वर्गे स्थानमवाप्स्यसि ॥ ५६

इति श्रीमहाभारते शान्तिपर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

युधिष्ठिर उवाच ।

कथं धर्मे स्थातुमिच्छन्राजा वर्तेत धार्मिकः ।
पृच्छामि त्वा कुरुश्रेष्ठ तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गीतं दृष्टार्थतत्त्वेन वामदेवेन धीमता ॥ २
राजा वसुमना नाम कौसल्यो बलवाञ्शुचिः ।
महर्षिं परिपप्रच्छ वामदेवं यशस्विनम् ॥ ३
धर्मार्थसहितं वाक्यं भगवन्ननुशाधि माम् ।
येन वृत्तेन वै तिष्ठन्न च्यवेयं स्वधर्मतः ॥ ४
तमब्रवीद्वामदेवस्तपस्वी जपतां वरः ।
हेमवर्णमुपासीनं ययातिमिव नाहुषम् ॥ ५
धर्ममेवानुवर्तस्व न धर्माद्विद्यते परम् ।
धर्मे स्थिता हि राजानो जयन्ति पृथिवीमिमाम् ॥६
अर्थसिद्धेः परं धर्मं मन्यते यो महीपतिः ।
ऋतां च कुरुते बुद्धिं स धर्मेण विरोचते ॥ ७
अधर्मदर्शी यो राजा बलादेव प्रवर्तते ।
क्षिप्रमेवापयातोऽस्मादुभौ प्रथममध्यमौ ॥ ८
असत्पापिष्ठसचिवो वध्यो लोकस्य धर्महा ।
सहैव परिवारेण क्षिप्रमेवावसीदति ॥ ९
अर्थानामननुष्ठाता कामचारी विकत्थनः ।
अपि सर्वां महीं लब्ध्वा क्षिप्रमेव विनश्यति ॥१०
अथाददानः कल्याणमनसूयुर्जितेन्द्रियः ।
वर्धते मतिमान्राजा स्रोतोभिरिव सागरः ॥ ११
न पूर्णोऽस्मीति मन्येत धर्मतः कामतोऽर्थतः ।
बुद्धितो मित्रतश्चापि सततं वसुधाधिपः ॥ १२
एतेष्वेव हि सर्वेषु लोकयात्रा प्रतिष्ठिता ।
एतानि शृण्वँल्लभते यशः कीर्तिं श्रियः प्रजाः ॥१३
एवं यो धर्मसंरम्भी धर्मार्थपरिचिन्तकः ।
अर्थान्समीक्ष्यारभते स ध्रुवं महदश्नुते ॥ १४
अदाता ह्यनतिस्नेहो दण्डेनावर्तयन्प्रजाः ।
साहसप्रकृती राजा क्षिप्रमेव विनश्यति ॥ १५
अथ पापं कृतं बुद्ध्या न च पश्यत्यबुद्धिमान् ।
अकीर्त्यापि समायुक्तो मृतो नरकमश्नुते ॥ १६
अथ मानयितुर्दातुः शुक्लस्य रसवेदिनः ।
व्यसनं स्वमिवोत्पन्नं विजिघांसन्ति मानवाः ॥१७
यस्य नास्ति गुरुर्धर्मे न चान्याननुपृच्छति ।
सुखतन्त्रोऽर्थलाभेषु न चिरं महदश्नुते ॥ १८
गुरुप्रधानो धर्मेषु स्वयमर्थान्यवेक्षिता ।
धर्मप्रधानो लोकेषु सुचिरं महदश्नुते ॥ १९

इति श्रीमहाभारते शान्तिपर्वणि
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

वामदेव उवाच ।

यत्राधर्मं प्रणयते दुर्बले बलवत्तरः ।
तां वृत्तिमुपजीवन्ति ये भवन्ति तदन्वयाः ॥ १
राजानमनुवर्तन्ते तं पापाभिप्रवर्तकम् ।
अविनीतमनुष्यं तत्क्षिप्रं राष्ट्रं विनश्यति ॥ २
यद्वृत्तिमुपजीवन्ति प्रकृतिस्थस्य मानवाः ।
तदेव विषमस्थस्य स्वजनोऽपि न मृष्यते ॥ ३

साहसप्रकृतिर्यत्र कुरुते किंचिदुल्बणम् ।
अशास्त्रलक्षणो राजा क्षिप्रमेव विनश्यति ॥ ४
योऽत्यन्ताचरितां वृत्तिं क्षत्रियो नानुवर्तते ।
जितानामजितानां च क्षत्रधर्मादपैति सः ॥ ५
द्विषन्तं कृतकर्माणं गृहीत्वा नृपती रणे ।
यो न मानयते द्वेषात्क्षत्रधर्मादपैति सः ॥ ६
शक्तः स्यात्सुमुखो राजा कुर्यात्कारुण्यमापदि ।
प्रियो भवति भूतानां न च विभ्रश्यते श्रियः ॥७
अप्रियं यस्य कुर्वीत भूयस्तस्य प्रियं चरेत् ।
नचिरेण प्रियः स स्याद्योऽप्रियः प्रियमाचरेत् ॥८
मृषावादं परिहरेत्कुर्यात्प्रियमयाचितः ।
न च कामान्न संरम्भान्न द्वेषाद्धर्ममुत्सृजेत् ॥ ९
नापत्रपेत प्रश्नेषु नाभिभव्यां गिरं सृजेत् ।
न त्वरेत न चासूयेत्तथा संगृह्यते परः ॥ १०
प्रिये नातिभृशं हृष्येदप्रिये न च संज्वरेत् ।
न मुह्येदर्थकृच्छ्रेषु प्रजाहितमनुस्मरन् ॥ ११
यः प्रियं कुरुते नित्यं गुणतो वसुधाधिपः ।
तस्य कर्माणि सिध्यन्ति न च संत्यज्यते श्रिया ॥१२
निवृत्तं प्रतिकूलेभ्यो वर्तमानमनुप्रिये ।
भक्तं भजेत नृपतिस्तद्वै वृत्तं सतामिह ॥ १३
अप्रकीर्णेन्द्रियं प्राज्ञमत्यन्तानुगतं शुचिम् ।
शक्तं चैवानुरक्तं च युञ्ज्यान्महति कर्मणि ॥ १४
एवमेव गुणैर्युक्तो यो न रज्यति भूमिपम् ।
भर्तुरर्थेष्वसूयन्तं न तं युञ्जीत कर्मणि ॥ १५
मूढमैन्द्रियकं लुब्धमनार्यचरितं शठम् ।
अनतीतोपधं हिंस्रं दुर्बुद्धिमबहुश्रुतम् ॥ १६
त्यक्तोपात्तं मद्यरतं द्यूतस्त्रीमृगयापरम् ।
कार्ये महति यो युञ्ज्याद्धीयते स नृपः श्रियः ॥ १७
रक्षितात्मा तु यो राजा रक्ष्यान्यश्चानुरक्षति ।
प्रजाश्च तस्य वर्धन्ते ध्रुवं च महदश्नुते ॥ १८

ये केचिद्भूमिपतयस्तान्सर्वानन्ववेक्षयेत् ।
सुहृद्भिरनभिख्यातैस्तेन राजा न रिष्यते ॥ १९
अपकृत्य बलस्थस्य दूरस्थोऽस्मीति नाश्वसेत् ।
श्येनानुचरितैर्ह्येते निपतन्ति प्रमाद्यतः ॥ २०
दृढमूलस्त्वदुष्टात्मा विदित्वा बलमात्मनः ।
अबलानभियुञ्जीत न तु ये बलवत्तराः ॥ २१
विक्रमेण महीं लब्ध्वा प्रजा धर्मेण पालयन् ।
आहवे निधनं कुर्याद्राजा धर्मपरायणः ॥ २२
मरणान्तमिदं सर्वं नेह किंचिदनामयम् ।
तस्माद्धर्मे स्थितो राजा प्रजा धर्मेण पालयेत् ॥२३
रक्षाधिकरणं युद्धं तथा धर्मानुशासनम् ।
मन्त्रचिन्त्यं सुखं काले पञ्चभिर्वर्धते मही ॥ २४
एतानि यस्य गुप्तानि स राजा राजसत्तम ।
सततं वर्तमानोऽत्र राजा भुङ्क्ते महीमिमाम् ॥ २५
नैतान्येकेन शक्यानि सातत्येनान्ववेक्षितुम् ।
एतेष्वाप्तान्प्रतिष्ठाप्य राजा भुङ्क्ते महीं चिरम् ॥ २६
दातारं संविभक्तारं मार्दवोपगतं शुचिम् ।
असंत्यक्तमनुष्यं च तं जनाः कुर्वते प्रियम् ॥ २७
यस्तु निःश्रेयसं ज्ञात्वा ज्ञानं तत्प्रतिपद्यते ।
आत्मनो मतमुत्सृज्य तं लोकोऽनुविधीयते ॥ २८
योऽर्थकामस्य वचनं प्रातिकूल्यान्न मृष्यते ।
शृणोति प्रतिकूलानि विमना नचिरादिव ॥ २९
अग्राम्यचरितां बुद्धिमत्यन्तं यो न बुध्यते ।
जितानामजितानां च क्षत्रधर्मादपैति सः ॥ ३०
मुख्यानमात्यान्यो हित्वा निहीनान्कुरुते प्रियान् ।
स वै व्यसनमासाद्य गाधमार्तो न विन्दति ॥३१
यः कल्याणगुणाञ्ज्ञातीन्द्वेषान्नैवाभिमन्यते ।
अदृढात्मा दृढक्रोधो नास्यार्थो रमतेऽन्तिके ॥ ३२
अथ यो गुणसंपन्नान्हृदयस्याप्रियानपि ।
प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ॥ ३३

नाकाले प्रणयेदर्थान्नाप्रिये जातु संज्वरेत् ।
प्रिये नातिभृशं हृष्येद्युज्येतारोग्यकर्मणि ॥ ३४
के मानुरक्ता राजान के भयात्समुपाश्रिताः ।
मध्यस्थदोषाः के चैषामिति नित्यं विचिन्तयेत् ॥
न जातु बलवान्भूत्वा दुर्बले विश्वसेत्कचित् ।
भारुण्डसदृशा ह्येते निपतन्ति प्रमाद्यतः ॥ ३६
अपि सर्वैर्गुणैर्युक्तं भर्तारं प्रियवादिनम् ।
अभिद्रुह्यति पापात्मा तस्माद्धि विभिषेज्जनात् ॥ ३७
एतां राजोपनिषदं ययातिः स्माह नाहुषः ।
मनुष्यविजये युक्तो हन्ति शत्रूननुत्तमान् ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

वामदेव उवाच ।

अयुद्धेनैव विजयं वर्धयेद्वसुधाधिपः ।
जघन्यमाहुर्विजयं यो युद्धेन नराधिप ॥ १
न चाप्यलब्धं लिप्सेत मूले नातिदृढे सति ।
न हि दुर्बलमूलस्य राज्ञो लाभो विधीयते ॥ २
यस्य स्फीतो जनपदः संपन्नः प्रियराजकः ।
संतुष्टपुष्टसचिवो दृढमूलः स पार्थिवः ॥ ३
यस्य योधाः सुसंतुष्टाः सान्त्विताः सूपधास्थिताः ।
अल्पेनापि स दण्डेन महीं जयति भूमिपः ॥ ४
पौरजानपदा यस्य स्वनुरक्ताः सुपूजिताः ।
सधना धान्यवन्तश्च दृढमूलः स पार्थिवः ॥ ५
प्रभावकालावधिकौ यदा मन्येत चात्मनः ।
तदा लिप्सेत मेधावी परभूमिं धनान्युत ॥ ६
भोगेष्वदयमानस्य भूतेषु च दयावतः ।
वर्धते त्वरमाणस्य विषयो रक्षितात्मनः ॥ ७
तक्षत्यात्मानमेवैष वनं परशुना यथा ।
यः सम्यग्वर्तमानेषु स्वेषु मिथ्या प्रवर्तते ॥ ८
न वै द्विषन्तः क्षीयन्ते राज्ञो नित्यमपि घ्नतः ।
क्रोधं नियन्तुं यो वेद तस्य द्वेष्टा न विद्यते ॥ ९
यदार्यजनविद्विष्टं कर्म तन्नाचरेद्बुधः ।
यत्कल्याणमभिध्यायेत्तत्रात्मानं नियोजयेत् ॥ १०
नैनमन्येऽवजानन्ति नात्मना परितप्यते ।
कृत्यशेषेण यो राजा सुखान्यनुबुभूषति ॥ ११
इदंवृत्तं मनुष्येषु वर्तते यो महीपतिः ।
उभौ लोकौ विनिर्जित्य विजये संप्रतिष्ठते ॥ १२

भीष्म उवाच ।

इत्युक्तो वामदेवेन सर्वं तत्कृतवान्नृपः ।
तथा कुर्वंस्त्वमप्येतौ लोकौ जेता न संशयः ॥१३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

युधिष्ठिर उवाच ।

अथ यो विजिगीषेत क्षत्रियः क्षत्रियं युधि ।
कस्तस्य धर्म्यो विजय एतत्पृष्टो ब्रवीहि मे ॥ १

भीष्म उवाच ।

ससहायोऽसहायो वा राष्ट्रमागम्य भूमिपः ।
ब्रूयादहं वो राजेति रक्षिष्यामि च वः सदा ॥ २
मम धर्म्यं बलिं दत्त किं वा मां प्रतिपत्स्यथ ।
ते चेत्तमागतं तत्र वृणुयुः कुशलं भवेत् ॥ ३
ते चेदक्षत्रियाः सन्तो विरुध्येयुः कथंचन ।
सर्वोपायैर्नियन्तव्या विकर्मस्था नराधिप ॥ ४
अशक्तं क्षत्रियं मत्वा शस्त्रं गृह्णात्यथापरः ।
त्राणायाप्यसमर्थं तं मन्यमानमतीव च ॥ ५

युधिष्ठिर उवाच ।

अथ यः क्षत्रियो राजा क्षत्रियं प्रत्युपाव्रजेत् ।
कथं स प्रतियोद्धव्यस्तन्मे ब्रूहि पितामह ॥ ६

भीष्म उवाच ।
नासंनद्धो नाकवचो योद्धव्यः क्षत्रियो रणे ।
एक एकेन वाच्यश्च विसृजस्व क्षिपामि च ॥ ७
स चेत्संनद्ध आगच्छेत्संनद्धव्यं ततो भवेत् ।
स चेत्ससैन्य आगच्छेत्ससैन्यस्तमथाह्वयेत् ॥ ८
स चेन्निकृत्या युध्येत निकृत्या तं प्रयोधयेत् ।
अथ चेद्धर्मतो युध्येद्धर्मेणैव निवारयेत् ॥ ९
नाश्वेन रथिनं यायादुदियाद्रथिनं रथी ।
व्यसने न प्रहर्तव्यं न भीताय जिताय च ॥ १०
नेषुर्लिप्तो न कर्णी स्यादसतामेतदायुधम् ।
जयार्थमेव योद्धव्यं न क्रुध्येदजिघांसतः ॥ ११
साधूनां तु मिथोभेदात्साधुश्चेद्व्यसनी भवेत् ।
सव्रणो नाभिहन्तव्यो नानपत्यः कथंचन ॥ १२
भग्नशस्त्रो विपन्नाश्वश्छिन्नज्यो हतवाहनः ।
चिकित्स्यः स्यात्स्वविषये प्राप्यो वा स्वगृहान्भवेत् ।
निर्व्रणोऽपि च मोक्तव्य एष धर्मः सनातनः ॥ १३
तस्माद्धर्मेण योद्धव्यं मनुः स्वायंभुवोऽब्रवीत् ।
सत्सु नित्यं सतां धर्मस्तमास्थाय न नाशयेत् ॥ १४
यो वै जयत्यधर्मेण क्षत्रियो वर्धमानकः ।
आत्मानमात्मना हन्ति पापो निकृतिजीवनः ॥ १५
कर्म चैतदसाधूनामसाधुं साधुना जयेत् ।
धर्मेण निधनं श्रेयो न जयः पापकर्मणा ॥ १६
नाधर्मश्चरितो राजन्सद्यः फलति गौरिव ।
मूलान्यस्य प्रशाखाश्च दहन्समनुगच्छति ॥ १७
पापेन कर्मणः वित्तं लब्ध्वा पापः प्रहृष्यति ।
स वर्धमानः स्तेयेन पापः पापे प्रसज्जति ॥ १८
न धर्मोऽस्तीति मन्वानः शुचीनवहसन्निव ।
अश्रद्दधानभावाच्च विनाशमुपगच्छति ॥ १९
स बद्धो वारुणैः पाशैरमर्त्य इव मन्यते ।
महादृतिरिवाध्मातः स्वकृतेन विवर्धते ॥ २०
ततः समूलो ह्रियते नदीकूलादिव द्रुमः ।
अथैनमभिनिन्दन्ति भिन्नं कुम्भमिवाश्मनि ।
तस्माद्धर्मेण विजयं कामं लिप्सेत भूमिपः ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

भीष्म उवाच ।
नाधर्मेण महीं जेतुं लिप्सेत जगतीपतिः ।
अधर्मविजयं लब्ध्वा कोऽनुमन्येत भूमिपः ॥ १
अधर्मयुक्तो विजयो ह्यध्रुवोऽस्वर्ग्य एव च ।
सादयत्येष राजानं महीं च भरतर्षभ ॥ २
विशीर्णकवचं चैव तवास्मीति च वादिनम् ।
कृताञ्जलिं न्यस्तशस्त्रं गृहीत्वा न विहिंसयेत् ॥ ३
बलेनावजितो यश्च न तं युध्येत भूमिपः ।
संवत्सरं विप्रणयेत्तस्माज्जातः पुनर्भवेत् ॥ ४
नार्वाक्संवत्सरात्कन्या स्प्रष्टव्या विक्रमाहृता ।
एवमेव धनं सर्वं यच्चान्यत्सहसाहृतम् ॥ ५
न तु वन्ध्यं धनं तिष्ठेत्पिबेयुर्ब्राह्मणाः पयः ।
युञ्जीरन्वाप्यनडुहः क्षन्तव्यं वा तदा भवेत् ॥ ६
राज्ञा राजैव योद्धव्यस्तथा धर्मो विधीयते ।
नान्यो राजानमभ्यसेदराजन्यः कथंचन ॥ ७
अनीकयोः संहतयोर्यदीयाद्ब्राह्मणोऽन्तरा ।
शान्तिमिच्छन्नुभयतो न योद्धव्यं तदा भवेत् ।
मर्यादां शाश्वतीं भिन्द्याद्ब्राह्मणं योऽभिलङ्घयेत् ॥ ८
अथ चेल्लङ्घयेदेनां मर्यादां क्षत्रियब्रुवः ।
अप्रशस्यस्तदूर्ध्वं स्यादनादेयश्च संसदि ॥ ९
या तु धर्मविलोपेन मर्यादाभेदनेन च ।
तां वृत्तिं नानुवर्तेत विजिगीषुर्महीपतिः ।
धर्मलब्धाद्धि विजयात्को लाभोऽभ्यधिको भवेत् ॥
सहसा नाम्य भूतानि क्षिप्रमेव प्रसादयेत् ।

सान्त्वेन भोगदानेन स राज्ञां परमो नयः ॥ ११
भुज्यमाना ह्ययोगेन स्वराष्ट्रादभितापिताः ।
अमित्रान्पर्युपासीरन्व्यसनौघप्रतीक्षिणः ॥ १२
अमित्रोपग्रहं चास्य ते कुर्युः क्षिप्रमापदि ।
संदुष्टाः सर्वतो राजन्राजव्यसनकाङ्क्षिणः ॥ १३
नामित्रो विनिकर्तव्यो नातिच्छेद्यः कथंचन ।
जीवितं ह्यप्यतिच्छिन्नः संत्यजत्येकदा नरः ॥ १४
अल्पेनापि हि संयुक्तस्तुष्यत्येवापराधिकः ।
शुद्धं जीवितमेवापि तादृशो बहु मन्यते ॥ १५
यस्य स्फीतो जनपदः संपन्नः प्रियराजकः ।
संतुष्टभृत्यसचिवो दृढमूलः स पार्थिवः ॥ १६
ऋत्विक्पुरोहिताचार्या ये चान्ये श्रुतसंमताः ।
पूजार्हाः पूजिता यस्य स वै लोकजिदुच्यते ॥१७
एतेनैव च वृत्तेन महीं प्राप सुरोत्तमः ।
अन्वेव चैन्द्रं विजयं व्यजिगीषन्त पार्थिवाः ॥१८
भूमिवर्जं पुरं राजा जित्वा राजानमाहवे ।
अमृताश्चौषधीः शश्वदाजहार प्रतर्दनः ॥ १९
अग्निहोत्राण्यग्निशेषं हविर्भाजनमेव च ।
आजहार दिवोदासस्ततो विप्रकृतोऽभवत् ॥ २०
सराजकानि राष्ट्राणि नाभागो दक्षिणां ददौ ।
अन्यत्र श्रोत्रियस्वाच्च तापसस्वाच्च भारत ॥ २१
उच्चावचानि वृत्तानि धर्मज्ञानां युधिष्ठिर ।
आसन्राज्ञां पुराणानां सर्वं तन्मम रोचते ॥ २२
सर्वविद्यातिरेकाद्वा जयमिच्छेन्महीपतिः ।
न मायया न दम्भेन य इच्छेद्भूतिमात्मनः ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
सप्तनवतितमोऽध्यायः ॥ ९७ ॥

९८

युधिष्ठिर उवाच ।

क्षत्रधर्मान्न पापीयान्धर्मोऽस्ति भरतर्षभ ।
अभियाने च युद्धे च राजा हन्ति महाजनम् ॥ १
अथ स कर्मणा येन लोकाञ्जयति पार्थिवः ।
विद्वञ्जिज्ञासमानाय प्रब्रूहि भरतर्षभ ॥ २

भीष्म उवाच ।

निग्रहेण च पापानां साधूनां प्रग्रहेण च ।
यज्ञैर्दानैश्च राजानो भवन्ति शुचयोऽमलाः ॥ ३
उपरुन्धन्ति राजानो भूतानि विजयार्थिनः ।
त एव विजयं प्राप्य वर्धयन्ति पुनः प्रजाः ॥ ४
अपविध्यन्ति पापानि दानयज्ञतपोबलैः ।
अनुग्रहेण भूतानां पुण्यमेषां प्रवर्धते ॥ ५
यथैव क्षेत्रनिर्दाता निर्दन्वै क्षेत्रमेकदा ।
हिनस्ति कक्षं धान्यं च न च धान्यं विनश्यति ॥६
एवं शस्त्राणि मुञ्चन्तो घ्नन्ति वध्यानथैकदा ।
तस्यैषा निष्कृतिः कृत्स्ना भूतानां भावनं पुनः॥ ७
यो भूतानि धनज्यानाद्वधात्क्लेशाच्च रक्षति ।
दस्युभ्यः प्राणदानात्स धनदः सुखदो विराट् ॥ ८
स सर्वयज्ञैरीजानो राजाथाभयदक्षिणैः ।
अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकताम् ॥ ९
ब्राह्मणार्थे समुत्पन्ने योऽभिनिःसृत्य युध्यते ।
आत्मानं यूपमुच्छ्रित्य स यज्ञोऽनन्तदक्षिणः ॥१०
अभीतो विकिरञ्शत्रून्प्रतिगृह्णञ्शरांस्तथा ।
न तस्मात्त्रिदशाः श्रेयो भुवि पश्यन्ति किंचन ॥११
तस्य यावन्ति शस्त्राणि त्वचं भिन्दन्ति संयुगे ।
तावतः सोऽश्नुते लोकान्सर्वकामदुहोऽक्षयान् ॥१२
न तस्य रुधिरं गात्रादाविधेभ्यः प्रवर्तते ।
स ह तेनैव रक्तेन सर्वपापैः प्रमुच्यते ॥ १३
यानि दुःखानि सहते व्रणानामभितापने ।
न ततोऽस्ति तपो भूय इति धर्मविदो विदुः ॥१४
पृष्ठतो भीरवः संख्ये वर्तन्तेऽधमपूरुषाः ।
शूराच्छरणमिच्छन्तः पर्जन्यादिव जीवनम् ॥ १५

यदि शूरस्तथा क्षेमे प्रतिरक्षेत्तथा भये ।
प्रतिरूपं जनाः कुर्युर्न च तद्वर्तते तथा ॥ १६
यदि ते कृतमाज्ञाय नमस्कुर्युः सदैव तम् ।
युक्तं न्याय्यं च कुर्युस्ते न च तद्वर्तते तथा ॥ १७
पुरुषाणां समानानां दृश्यते महदन्तरम् ।
संग्रामेऽनीकवेलायामुत्क्रुष्टेऽभिपतत्सु च ॥ १८
पतत्यभिमुखः शूरः परान्भीरुः पलायते ।
आस्थायास्वर्ग्यमध्वानं सहायान्विषमे त्यजन् ॥१९
मा स्म तांस्तादृशांस्तात जनिष्ठाः पुरुषाधमान् ।
ये सहायान्रणे हित्वा स्वस्तिमन्तो गृहान्ययुः ॥२०
अस्वस्ति तेभ्यः कुर्वन्ति देवा इन्द्रपुरोगमाः ।
त्यागेन यः सहायानां स्वान्प्राणांस्त्रातुमिच्छति ॥२१
तं हन्युः काष्ठलोष्टैर्वा दहेयुर्वा कटाग्निना ।
पशुवन्मारयेयुर्वा क्षत्रिया ये स्युरीदृशाः ॥ २२
अधर्मः क्षत्रियस्यैष यच्छय्यामरणं भवेत् ।
विसृजञ्श्लेष्ममूत्राणि कृपणं परिदेवयन् ॥ २३
अविक्षतेन देहेन प्रलयं योऽधिगच्छति ।
क्षत्रियो नास्य तत्कर्म प्रशंसन्ति पुराविदः ॥ २४
न गृहे मरणं तात क्षत्रियाणां प्रशस्यते ।
शौटीराणामशौटीरमधर्म्यं कृपणं च तत् ॥ २५
इदं दुःखमहो कष्टं पापीय इति निष्टनन् ।
प्रतिध्वस्तमुखः पूतिरमात्यान्बहु शोचयन् ॥ २६
अरोगाणां स्पृहयते मुहुर्मृत्युमपीच्छति ।
वीरो दृप्तोऽभिमानी च नेदृशं मृत्युमर्हति ॥ २७
रणेषु कदनं कृत्वा ज्ञातिभिः परिवारितः ।
तीक्ष्णैः शस्त्रैः सुनिक्लिष्टः क्षत्रियो मृत्युमर्हति ॥२८
शूरो हि सत्यमन्युभ्यामाविष्टो युध्यते भृशम् ।
कृत्यमानानि गात्राणि परैर्नैवावबुध्यते ॥ २९
स संख्ये निधनं प्राप्य प्रशस्तं लोकपूजितम् ।
स्वधर्मं विपुलं प्राप्य शक्रस्यैति सलोकताम् ॥ ३०
सर्वो योधः परं त्यक्तुमाविष्टस्त्यक्तजीवितः ।
प्राप्नोतीन्द्रस्य सालोक्यं शूरः पृष्ठमदर्शयन् ॥ ३१

इति श्रीमहाभारते शान्तिपर्वणि
अष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

युधिष्ठिर उवाच ।

के लोका युध्यमानानां शूराणामनिवर्तिनाम् ।
भवन्ति निधनं प्राप्य तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अम्बरीषस्य संवादमिन्द्रस्य च युधिष्ठिर ॥ २
अम्बरीषो हि नाभागः स्वर्गं गत्वा सुदुर्लभम् ।
ददर्श सुरलोकस्थं शक्रेण सचिवं सह ॥ ३
सर्वतेजोमयं दिव्यं विमानवरमास्थितम् ।
उपर्युपरि गच्छन्तं स्वं वै सेनापतिं प्रभुम् ॥ ४
स दृष्ट्वोपरि गच्छन्तं सेनापतिमुदारधीः ।
ऋद्धिं दृष्ट्वा सुदेवस्य विस्मितः प्राह वासवम् ॥ ५
सागरान्तां महीं कृत्स्नामनुशिष्य यथाविधि ।
चातुर्वर्ण्ये यथाशास्त्रं प्रवृत्तो धर्मकाम्यया ॥ ६
ब्रह्मचर्येण घोरेण आचार्यकुलसेवया ।
वेदानधीत्य धर्मेण राजशास्त्रं च केवलम् ॥ ७
अतिथीनन्नपानेन पितॄंश्च स्वधया तथा ।
ऋषीन्स्वाध्यायदीक्षाभिर्देवान्यज्ञैरनुत्तमैः ॥ ८
क्षत्रधर्मे स्थितो भूत्वा यथाशास्त्रं यथाविधि ।
उदीक्षमाणः पृतनां जयामि युधि वासव ॥ ९
देवराज सुदेवोऽयं मम सेनापतिः पुरा ।
आसीद्योधः प्रशान्तात्मा सोऽयं कस्मादतीव माम् ॥
नानेन क्रतुभिर्मुख्यैरिष्टं नैव द्विजातयः ।
तर्पिता विधिवच्छक्र सोऽयं कस्मादतीव माम् ॥ ११

इन्द्र उवाच ।
एतस्य वितत्तस्तात सुदेवस्य बभूव ह ।
संग्रामयज्ञः सुमहान्यश्चान्यो युध्यते नरः ॥ १२
संनद्धो दीक्षितः सर्वो योधः प्राप्य चमूमुखम् ।
युद्धयज्ञाधिकारस्थो भवतीति विनिश्चयः ॥ १३

अम्बरीष उवाच ।
कानि यज्ञे हवींष्यत्र किमाज्यं का च दक्षिणा ।
ऋत्विजश्चात्र के प्रोक्तास्तन्मे ब्रूहि शतक्रतो ॥ १४

इन्द्र उवाच ।
ऋत्विजः कुञ्जरास्तत्र वाजिनोऽध्वर्यवस्तथा ।
हवींषि परमांसानि रुधिरं त्वाज्यमेव च ॥ १५
सृगालगृध्रकाकोलाः सदस्यास्तत्र सत्रिणः ।
आज्यशेषं पिबन्त्येते हविः प्राश्नन्ति चाध्वरे ॥१६
प्रासतोमरसंघाताः खड्गशक्तिपरश्वधाः ।
ज्वलन्तो निशिताः पीताः स्रुचस्तस्याथ सत्रिणः॥१७
चापवेगायतस्तीक्ष्णः परकायावदारणः ।
ऋजुः सुनिशितः पीतः सायकोऽस्य स्रुवो महान् ॥
द्वीपिचर्मावनद्धश्च नागदन्तकृतत्सरुः ।
हस्तिहस्तगतः खड्गः स्फ्यो भवेत्तस्य संयुगे ॥ १९
ज्वलितैर्निशितैः पीतैः प्रासशक्तिपरश्वधैः ।
शैक्यायसमयैस्तीक्ष्णैरभिघातो भवेद्वसु ॥ २०
आवेगाद्यत्तु रुधिरं संग्रामे स्यन्दते भुवि ।
सास्य पूर्णाहुतिर्होत्रे समृद्धा सर्वकामधुक् ॥ २१
छिन्धि भिन्धीति यस्यैतच्छ्रूयते वाहिनीमुखे ।
सामानि सामगास्तस्य गायन्ति यमसादने ॥ २२
हविर्धानं तु तस्याहुः परेषां वाहिनीमुखम् ।
कुञ्जराणां हयानां च वर्मिणां च समुच्चयः ।
अग्निः श्येनचितो नाम तस्य यज्ञे विधीयते ॥२३
उत्तिष्ठति कबन्धोऽत्र सहस्रे निहते तु यः ।
स यूपस्तस्य शूरस्य खादिरोऽष्टाश्रिरुच्यते ॥ २४
इडोपहूतं क्रोशन्ति कुञ्जरा अङ्कुशेरिताः ।
व्याघुष्टतलनादेन वषट्कारेण पार्थिव ।
उद्गाता तव संग्रामे त्रिसामा दुन्दुभिः स्मृतः ॥२५
ब्रह्मस्वे ह्रियमाणे यः प्रियां युद्धे तनुं त्यजेत् ।
आत्मानं यूपमुच्छ्रित्य स यज्ञोऽनन्तदक्षिणः ॥ २६
भर्तुरर्थे तु यः शूरो विक्रमेद्वाहिनीमुखे ।
भयान्न च निवर्तेत तस्य लोका यथा मम ॥ २७
नीलचन्द्राकृतैः खड्गैर्बाहुभिः परिघोपमैः ।
यस्य वेदिरुपस्तीर्णा तस्य लोका यथा मम ॥ २८
यस्तु नावेक्षते कंचित्सहायं विजये स्थितः ।
विगाह्य वाहिनीमध्यं तस्य लोका यथा मम ॥ २९
यस्य तोमरसंघाटा भेरीमण्डूककच्छपा ।
वीरास्थिशर्करा दुर्गा मांसशोणितकर्दमा ॥ ३०
असिचर्मप्लवा सिन्धुः केशशैवलशाद्वला ।
अश्वनागरथैश्चैव संभिन्नैः कृतसंक्रमा ॥ ३१
पताकाध्वजवानीरा हतवाहनवाहिनी ।
शोणितोदा सुसंपूर्णा दुस्तरा पारगैर्नरैः ॥ ३२
हतनागमहानक्रा परलोकवहाशिवा ।
ऋष्टिखड्गध्वजानूका गृध्रकङ्कवडप्लवा ॥ ३३
पुरुषादानुचरिता भीरूणां कश्मलावहा ।
नदी योधमहायज्ञे तदस्यावभृथं स्मृतम् ॥ ३४
वेदी यस्य त्वमित्राणां शिरोभिरवकीर्यते ।
अश्वस्कन्धैर्गजस्कन्धैस्तस्य लोका यथा मम ॥ ३५
पत्नीशाला कृता यस्य परेषां वाहिनीमुखम् ।
हविर्धानं स्ववाहिन्यस्तदस्याहुर्मनीषिणः ॥ ३६
सदश्चान्तरयोधाग्निराग्नीध्रश्चोत्तरां दिशम् ।
शत्रुसेनाकलत्रस्य सर्वलोकानदूरतः ॥ ३७
यदा तूभयतो व्यूहो भवत्याकाशमग्रतः ।
सास्य वेदी तथा यज्ञे नित्यं वेदास्त्रयोऽग्नयः ॥३८
यस्तु योधः परावृत्तः संत्रस्तो हन्यते परैः ।

अप्रतिष्ठं स नरकं याति नास्त्यत्र संशयः ॥ ३९
यस्य शोणितवेगेन नदी स्यात्समभिप्लुता ।
केशमांसास्थिसंकीर्णा स गच्छेत्परमां गतिम् ॥४०
यस्तु सेनापतिं हत्वा तद्यानमधिरोहति ।
स विष्णुविक्रमक्रामी बृहस्पतिसमः क्रतुः ॥ ४१
नायकं वा प्रमाणं वा यो वा स्यात्तत्र पूजितः ।
जीवग्राहं निगृह्णाति तस्य लोका यथा मम ॥ ४२
आहवे निहतं शूरं न शोचेत कदाचन ।
अशोच्यो हि हतः शूरः स्वर्गलोके महीयते ॥ ४३
न ह्यन्नं नोदकं तस्य न स्नानं नाप्यशौचकम् ।
हतस्य कर्तुमिच्छन्ति तस्य लोकाञ्शृणुष्व मे ॥४४
वराप्सरःसहस्राणि शूरमायोधने हतम् ।
त्वरमाणा हि धावन्ति मम भर्ता भवेदिति ॥ ४५
एतत्तपश्च पुण्यं च धर्मश्चैव सनातनः ।
चत्वारश्चाश्रमास्तस्य यो युद्धे न पलायते ॥ ४६
वृद्धं बलं न हन्तव्यं नैव स्त्री न च वै द्विजः ।
तृणपूर्णमुखश्चैव तवास्मीति च यो वदेत् ॥ ४७
अहं वृत्रं बलं पाकं शतमायं विरोचनम् ।
दुरावार्यं च नमुचिं नैकमायं च शम्बरम् ॥ ४८
विप्रचित्तिं च दैतेयं दनोः पुत्रांश्च सर्वशः ।
प्रह्लादं च निहत्याजौ ततो देवाधिपोऽभवम् ॥ ४९

भीष्म उवाच ।

इत्येतच्छक्रवचनं निशम्य प्रतिगृह्य च ।
योधानामात्मनः सिद्धिमम्बरीषोऽभिपन्नवान् ॥५०

इति श्रीमहाभारते शान्तिपर्वणि
एकोनशततमोऽध्यायः ॥ ९९ ॥

१००

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रतर्दनो मैथिलश्च संग्रामं यत्र चक्रतुः ॥ १
यज्ञोपवीती संग्रामे जनको मैथिलो यथा ।
योधानुद्धर्षयामास तन्निबोध युधिष्ठिर ॥ २
जनको मैथिलो राजा महात्मा सर्वतत्त्ववित् ।
योधान्स्वान्दर्शयामास स्वर्गं नरकमेव च ॥ ३
अभीतानामिमे लोका भास्वन्तो हन्त पश्यत ।
पूर्णा गन्धर्वकन्याभिः सर्वकामदुहोऽक्षयाः ॥ ४
इमे पलायमानानां नरकाः प्रत्युपस्थिताः ।
अकीर्तिः शाश्वती चैव पतितव्यमनन्तरम् ॥ ५
तान्दृष्ट्वारीन्विजयतो भूत्वा संत्यागबुद्धयः ।
नरकस्याप्रतिष्ठस्य मा भूत वशवर्तिनः ॥ ६
त्यागमूलं हि शूराणां स्वर्गद्वारमनुत्तमम् ।
इत्युक्तास्ते नृपतिना योधाः परपुरंजय ॥ ७
व्यजयन्त रणे शत्रून्हर्षयन्तो जनेश्वरम् ।
तस्मादात्मवता नित्यं स्थातव्यं रणमूर्धनि ॥ ८
गजानां रथिनो मध्ये रथानामनु सादिनः ।
सादिनामन्तरा स्थाप्यं पादातमिह दंशितम् ॥ ९
य एवं व्यूहते राजा स नित्यं जयते द्विषः ।
तस्मादेवं विधातव्यं नित्यमेव युधिष्ठिर ॥ १०
सर्वे सुकृतमिच्छन्तः सुयुद्धेनातिमन्यवः ।
क्षोभयेयुरनीकानि सागरं मकरा इव ॥ ११
हर्षयेयुर्विषण्णांश्च व्यवस्थाप्य परस्परम् ।
जितां च भूमिं रक्षेत भग्नान्नात्यनुसारयेत् ॥ १२
पुनरावर्तमानानां निराशानां च जीविते ।
न वेगः सुसहो राजंस्तस्मान्नात्यनुसारयेत् ॥ १३
न हि प्रहर्तुमिच्छन्ति शूराः प्राद्रवतां भयात् ।
तस्मात्पलायमानानां कुर्यान्नात्यनुसारणम् ॥ १४
चराणामचरा ह्यन्नमदंष्ट्रा दंष्ट्रिणामपि ।
अपाणयः पाणिमतामन्नं शूरस्य कातराः ॥ १५
समानपृष्ठोदरपाणिपादाः
पश्चाच्छूरं भीरवोऽनुव्रजन्ति ।

अतो भयार्ताः प्रणिपत्य भूयः
कृत्वाञ्जलीनुपतिष्ठन्ति शूरान् ॥ १६
शूरबाहुषु लोकोऽयं लम्बते पुत्रवत्सदा ।
तस्मात्सर्वास्ववस्थासु शूरः संमानमर्हति ॥ १७
न हि शौर्यात्परं किंचित्त्रिषु लोकेषु विद्यते ।
शूरः सर्वं पालयति सर्वं शूरे प्रतिष्ठितम् ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
शततमोऽध्यायः ॥ १०० ॥

१०१

युधिष्ठिर उवाच ।

यथा जयार्थिनः सेनां नयन्ति भरतर्षभ ।
ईषद्धर्मं प्रपीड्यापि तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

सत्येन हि स्थिता धर्मा उपपत्त्या तथापरे ।
साध्वाचारतया केचित्तथैवौपयिका अपि ।
उपायधर्मान्वक्ष्यामि सिद्धार्थानर्थधर्मयोः ॥ २
निर्मर्यादा दस्यवस्तु भवन्ति परिपन्थिनः ।
तेषां प्रतिविघातार्थं प्रवक्ष्याम्यथ नैगमम् ।
कार्याणां संप्रसिद्ध्यर्थं तानुपायान्निबोध मे ॥ ३
उभे प्रज्ञे वेदितव्ये ऋज्वी वक्रा च भारत ।
जानन्वक्रां न सेवेत प्रतिबाधेत चागताम् ॥ ४
अमित्रा एव राजानं भेदेनोपचरन्त्युत ।
तां राजा निकृतिं जानन्यथामित्रान्प्रबाधते ॥ ५
गजानां पार्श्वचर्माणि गोवृषाजगराणि च ।
शल्यकङ्कटलोहानि तनुत्राणि मतानि च ॥ ६
शितपीतानि शस्त्राणि संनाहाः पीतलोहिताः ।
नानारञ्जनरक्ताः स्युः पताकाः केतवश्च ते ॥ ७
ऋष्टयस्तोमराः खड्गा निशिताश्च परश्वधाः ।
फलकान्यथ चर्माणि प्रतिकल्प्यान्यनेकशः ।
अभिनीतानि शस्त्राणि योधाश्च कृतनिश्रमाः ॥ ८
चैत्र्यां वा मार्गशीर्ष्यां वा सेनायोगः प्रशस्यते ।
पक्वसस्या हि पृथिवी भवत्यम्बुमती तथा ॥ ९
नैवातिशीतो नात्युष्णः कालो भवति भारत ।
तस्मात्तदा योजयेत परेषां व्यसनेषु वा ।
एतेषु योगाः सेनायाः प्रशस्ताः परबाधने ॥ १०
जलवांस्तृणवान्मार्गः समो गम्यः प्रशस्यते ।
चारैर्हि विहिताभ्यासः कुशलैर्वनगोचरैः ॥ ११
नव्यारण्यैर्न शक्येत गन्तुं मृगगणैरिव ।
तस्मात्सर्वासु सेनासु योजयन्ति जयार्थिनः ॥ १२
आवासस्तोयवान्दुर्गः पर्याकाशः प्रशस्यते ।
परेषामुपसर्पाणां प्रतिषेधस्तथा भवेत् ॥ १३
आकाशं तु वनाभ्याशे मन्यन्ते गुणवत्तरम् ।
बहुभिर्गुणजातैस्तु ये युद्धकुशला जनाः ॥ १४
उपन्यासोऽपसर्पाणां पदातीनां च गूहनम् ।
अथ शत्रुप्रतीघातमापदर्थं परायणम् ॥ १५
सप्तर्षीन्पृष्ठतः कृत्वा युध्येरन्नचला इव ।
अनेन विधिना राजञ्जिगीषेतापि दुर्जयान् ॥ १६
यतो वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः ।
पूर्वं पूर्वं ज्याय एषां संनिपाते युधिष्ठिर ॥ १७
अकर्दमामनुदकाममर्यादामलोष्टकाम् ।
अश्वभूमिं प्रशंसन्ति ये युद्धकुशला जनाः ॥ १८
समा निरुदकाकाशा रथभूमिः प्रशस्यते ।
नीचद्रुमा महाकक्षा सोदका हस्तियोधिनाम् ॥ १९
बहुदुर्गा महावृक्षा वेत्रवेणुभिरास्तृता ।
पदातीनां क्षमा भूमिः पर्वतोपवनानि च ॥ २०
पदातिबहुला सेना दृढा भवति भारत ।
रथाश्वबहुला सेना सुदिनेषु प्रशस्यते ॥ २१
पदातिनागबहुला प्रावृट्काले प्रशस्यते ।
गुणानेतान्प्रसंख्याय देशकालौ प्रयोजयेत् ॥ २२

एवं संचिन्त्य यो याति तिथिनक्षत्रपूजितः ।
विजयं लभते नित्यं सेनां सम्यक्प्रयोजयन् ॥ २३
प्रसुप्तांस्तृषितान्श्रान्तान्प्रकीर्णान्नाभिघातयेत् ।
मोक्षे प्रयाणे चलने पानभोजनकालयोः ॥ २४
अतिक्षिप्तान्व्यतिक्षिप्तान्विहतान्प्रतनूकृतान् ।
सुविस्रम्भान्कृतारम्भानुपन्यासप्रतापितान् ।
बहिश्चरानुपन्यासान्कृत्वा वेश्मानुसारिणः ॥ २५
पारंपर्यागते द्वारे ये केचिदनुवर्तिनः ।
परिचर्यावरोद्धारो ये च केचन वल्गिनः ॥ २६
अनीकं ये प्रभिन्दन्ति भिन्नं ये स्थगयन्ति च ।
समानाशनपानास्ते कार्या द्विगुणवेतनाः ॥ २७
दशाधिपतयः कार्याः शताधिपतयस्तथा ।
तेषां सहस्राधिपतिं कुर्याच्छूरमतन्द्रितम् ॥ २८
यथामुख्यं संनिपात्य वक्तव्याः स्म शपामहे ।
यथा जयार्थं संग्रामे न जह्याम परस्परम् ॥ २९
इहैव ते निवर्तन्तां ये नः केचन भीरवः ।
न घातयेयुः प्रदरं कुर्वाणास्तुमुले सति ॥ ३०
आत्मानं च स्वपक्षं च पलायन्हन्ति संयुगे ।
द्रव्यनाशो वधोऽकीर्तिरयशश्च पलायने ॥ ३१
अमनोज्ञासुखा वाचः पुरुषस्य पलायतः ।
प्रतिस्पन्दौष्ठदन्तस्य न्यस्तसर्वायुधस्य च ॥ ३२
हित्वा पलायमानस्य सहायान्प्राणसंशये ।
अमित्रैरनुबद्धस्य द्विषतामस्तु नस्तथा ॥ ३३
मनुष्यापसदा ह्येते ये भवन्ति पराङ्मुखाः ।
राशिवर्धनमात्रास्ते नैव ते प्रेत्य नो इह ॥ ३४
अमित्रा हृष्टमनसः प्रत्युद्यान्ति पलायिनम् ।
जयिनं सुहृदस्तात वन्दनैर्मङ्गलेन च ॥ ३५
यस्य स्म व्यसने राजन्ननुमोदन्ति शत्रवः ।
तदसह्यतरं दुःखमहं मन्ये वधादपि ॥ ३६
श्रियं जानीत धर्मस्य मूलं सर्वसुखस्य च ।
सा भीरूणां परान्याति शूरस्तामधिगच्छति ॥ ३७
ते वयं स्वर्गमिच्छन्तः संग्रामे त्यक्तजीविताः ।
जयन्तो वध्यमाना वा प्राप्तुमर्हाम सद्गतिम् ॥ ३८
एवं संशप्तशपथाः समभित्यक्तजीविताः ।
अमित्रवाहिनीं वीराः संप्रगाहन्त्यभीरवः ॥ ३९
अग्रतः पुरुषानीकमसिचर्मवतां भवेत् ।
पृष्ठतः शकटानीकं कलत्रं मध्यतस्तथा ॥ ४०
परेषां प्रतिघातार्थं पदातीनां च गूहनम् ।
अपि ह्यस्मिन्परे गृद्धा भवेयुर्ये पुरोगमाः ॥ ४१
ये पुरस्तादभिमताः सत्त्ववन्तो मनस्विनः ।
ते पूर्वमभिवर्तेरंस्तानन्वगितरे जनाः ॥ ४२
अपि चोद्धर्षणं कार्यं भीरूणामपि यत्नतः ।
स्कन्धदर्शनमात्रं तु तिष्ठेयुर्वा समीपतः ॥ ४३
संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् ।
सूचीमुखमनीकं स्यादल्पानां बहुभिः सह ॥ ४४
संप्रयुद्धे प्रहृष्टे वा सत्यं वा यदि वानृतम् ।
प्रगृह्य बाहून्क्रोशेत भग्ना भग्नाः परा इति ॥ ४५
आगतं नो मित्रबलं प्रहरध्वमभीतवत् ।
शब्दवन्तोऽनुधावेयुः कुर्वन्तो भैरवं रवम् ॥ ४६
क्ष्वेडाः किलकिलाः शङ्खाः क्रकचा गोविषाणिकान् ।
भेरीमृदङ्गपणवान्नादयेयुश्च कुञ्जरान् ॥ ४७

इति श्रीमहाभारते शान्तिपर्वणि
एकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

युधिष्ठिर उवाच ।

किंशीलाः किंसमुत्थानाः कथंरूपाश्च भारत ।
किंसंनाहाः कथंशस्त्रा जनाः स्युः संयुगे नृप ॥ १

भीष्म उवाच ।

यथाचरितमेवात्र शस्त्रपत्रं विधीयते ।
आचारादेव पुरुषस्तथा कर्मसु वर्तते ॥ २

गान्धाराः सिन्धुसौवीरा नखरप्रासयोधिनः ।
आभीरवः सुबलिनस्तद्बलं सर्वपारगम् ॥ ३
सर्वशस्त्रेषु कुशलाः सत्त्ववन्तो ह्युशीनराः ।
प्राच्या मातङ्गयुद्धेषु कुशलाः शठयोधिनः ॥ ४
तथा यवनकाम्बोजा मथुरामभितश्च ये ।
एते नियुद्धकुशला दाक्षिणात्यासिचर्मिणः ॥ ५
सर्वत्र शूरा जायन्ते महासत्त्वा महाबलाः ।
प्राय एष समुद्दिष्टो लक्षणानि तु मे शृणु ॥ ६
सिंहशार्दूलवाङ्नेत्राः सिंहशार्दूलगामिनः ।
पारावतकुलिङ्गाक्षाः सर्वे शूराः प्रमाथिनः ॥ ७
मृगस्वरा द्वीपिनेत्रा ऋषभाक्षास्तथापरे ।
प्रवादिनः सुचण्डाश्च क्रोधिनः किंनरीस्वनाः ॥ ८
मेघस्वनाः क्रुद्धमुखाः केचित्करभनिस्वनाः ।
जिह्मनासानुजङ्घाश्च दूरगा दूरपातिनः ॥ ९
बिडालकुब्जास्तनवस्तनुकेशास्तनुत्वचः ।
शूराश्चपलचित्ताश्च ते भवन्ति दुरासदाः ॥ १०
गोधानिमीलिताः केचिन्मृदुप्रकृतयोऽपि च ।
तुरंगगतिनिर्घोषास्ते नराः पारयिष्णवः ॥ ११
सुसंहताः प्रतनवो व्यूढोरस्काः सुसंस्थिताः ।
प्रवादितेन नृत्यन्ति हृष्यन्ति कलहेषु च ॥ १२
गम्भीराक्षा निःसृताक्षाः पिङ्गला भ्रुकुटीमुखाः ।
नकुलाक्षास्तथा चैव सर्वे शूरास्तनुत्यजः ॥ १३
जिह्माक्षाः प्रललाटाश्च निर्मांसहनवोऽपि च ।
वक्रबाह्वङ्गुलीसक्ताः कृशा धमनिसंतताः ॥ १४
प्रविशन्त्यतिवेगेन संपरायेऽभ्युपस्थिते ।
वारणा इव संमत्तास्ते भवन्ति दुरासदाः ॥ १५
दीप्तस्फुटितकेशान्ताः स्थूलपार्श्वहनूमुखाः ।
उन्नतांसाः पृथुग्रीवा विकटाः स्थूलपिण्डिकाः॥ १६
उद्वृत्ताश्चैव सुग्रीवा विनता विहगा इव ।
पिण्डशीर्षाहिवक्त्राश्च वृषदंशमुखा इव ॥ १७
उग्रस्वना मन्युमन्तो युद्धेष्वारावसारिणः ।
अधर्मज्ञावलिप्ताश्च घोरा रौद्रप्रदर्शिनः ॥ १८
त्यक्तात्मानः सर्व एते अन्त्यजा ह्यनिवर्तिनः ।
पुरस्कार्याः सदा सैन्ये हन्यन्ते घ्नन्ति चापि ते ॥१९
अधार्मिका भिन्नवृत्ताः साध्वेवैषां पराभवः ।
एवमेव प्रकुप्यन्ति राज्ञोऽप्येते ह्यभीक्ष्णशः ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

युधिष्ठिर उवाच ।

जैत्र्या वा कानि रूपाणि भवन्ति पुरुषर्षभ ।
पृतनायाः प्रशस्तानि तानीहेच्छामि वेदितुम् ॥ १

भीष्म उवाच ।

जैत्र्या वा यानि रूपाणि भवन्ति पुरुषर्षभ ।
पृतनायाः प्रशस्तानि तानि वक्ष्यामि सर्वशः ॥ २
दैवं पूर्वं विकुरुते मानुषे कालचोदिते ।
तद्विद्वांसोऽनुपश्यन्ति ज्ञानदीर्घेण चक्षुषा ॥ ३
प्रायश्चित्तविधिं चात्र जपहोमांश्च तद्विदः ।
मङ्गलानि च कुर्वन्तः शमयन्त्यहितान्यपि ॥ ४
उदीर्णमनसो योधा वाहनानि च भारत ।
यस्यां भवन्ति सेनायां ध्रुवं तस्यां जयं वदेत् ॥ ५
अन्वेनां वायवो वान्ति तथैवेन्द्रधनूंषि च ।
अनुप्लवन्ते मेघाश्च तथादित्यस्य रश्मयः ॥ ६
गोमायवश्चानुलोमा वडा गृध्राश्च सर्वशः ।
आचरेयुर्यदा सेनां तदा सिद्धिरनुत्तमा ॥ ७

प्रसन्नभाः पावक ऊर्ध्वरश्मिः
प्रदक्षिणावर्तशिखो विधूमः ।
पुण्या गन्धाश्चाहुतीनां प्रवान्ति
जयस्यैतद्भाविनो रूपमाहुः ॥ ८
गम्भीरशब्दाश्च महास्वनाश्च-

शङ्खाश्च भेर्यश्च नदन्ति यत्र ।
युयुत्सवश्चाप्रतीपा भवन्ति
जयस्यैतद्भाविनो रूपमाहुः ॥ ९
इष्टा मृगाः पृष्ठतो वामतश्च
संप्रस्थितानां च गमिष्यतां च ।
जिघांसतां दक्षिणाः सिद्धिमाहु-
र्ये त्वग्रतस्ते प्रतिषेधयन्ति ॥ १०
मङ्गल्यशब्दाः शकुना वदन्ति
हंसाः क्रौञ्चाः शतपत्राश्च चाषाः ।
हृष्टा योधाः सत्त्ववन्तो भवन्ति
जयस्यैतद्भाविनो रूपमाहुः ॥ ११
शस्त्रैः पत्रैः कवचैः केतुभिश्च
सुभानुभिर्मुखवर्णैश्च यूनाम् ।
भ्राजिष्मती दुष्प्रतिप्रेक्षणीया
येषां चमूस्तेऽभिभवन्ति शत्रून् ॥ १२
शुश्रूषवश्चानभिमानिनश्च
परस्परं सौहृदमास्थिताश्च ।
येषां योधाः शौचमनुष्ठिताश्च
जयस्यैतद्भाविनो रूपमाहुः ॥ १३
शब्दाः स्पर्शास्तथा गन्धा विचरन्ति मनःप्रियाः ।
धैर्यं चाविशते योधान्विजयस्य मुखं तु तत् ॥१४
इष्टो वामः प्रविष्टस्य दक्षिणः प्रविविक्षतः ।
पश्चात्संसाधयत्यर्थं पुरस्तात्प्रतिषेधति ॥ १५
संभृत्य महतीं सेनां चतुरङ्गां युधिष्ठिर ।
साम्नैवावर्तने पूर्वं प्रयतेथास्ततो युधि ॥ १६
जघन्य एष विजयो यद्युद्धं नाम भारत ।
याद‍ृच्छिको युधि जयो दैवो वेति विचारणम् ॥१७
अपामिव महावेगस्त्रस्ता मृगगणा इव ।
दुर्निवार्यतमा चैव प्रभग्ना महती चमूः ॥ १८
भग्ना इत्येव भज्यन्ते विद्वांसोऽपि नकारणम् ।
उदारसारा महती रुरुसंघोपमा चमूः ॥ १९
परस्परज्ञाः संहृष्टास्त्यक्तप्राणाः सुनिश्चिताः ।
अपि पञ्चाशतिः शूरा मृद्नन्ति परवाहिनीम् ॥ २०
अथ वा पञ्च षट् सप्त सहिताः कृतनिश्चयाः ।
कुलीनाः पूजिताः सम्यग्विजयन्तीह शात्रवान् ॥२१
संनिपातो न गन्तव्यः शक्ये सति कथंचन ।
सान्त्वभेदप्रदानानां युद्धमुत्तरमुच्यते ॥ २२
संसर्पणाद्धि सेनायां भयं भीरून्प्रबाधते ।
वज्रादिव प्रज्वलितादियं क्व नु पतिष्यति ॥ २३
अभिप्रयातां समितिं ज्ञात्वा ये प्रतियान्त्यथ ।
तेषां स्पन्दन्ति गात्राणि योधानां विषयस्य च ॥२४
विषयो व्यथते राजन्सर्वः सस्थाणुजङ्गमः ।
शस्त्रप्रतापतप्तानां मज्जा सीदति देहिनाम् ॥ २५
तेषां सान्त्वं क्रूरमिश्रं प्रणेतव्यं पुनः पुनः ।
संपीड्यमाना हि परे योगमायान्ति सर्वशः ॥ २६
अन्तराणां च भेदार्थं चारानभ्यवचारयेत् ।
यश्च तस्मात्परो राजा तेन संधिः प्रशस्यते ॥ २७
न हि तस्यान्यथा पीडा शक्या कर्तुं तथाविधा ।
यथा सार्धममित्रेण सर्वतः प्रतिबाधनम् ॥ २८
क्षमा वै साधुमाया हि न हि साध्वक्षमा सदा ।
क्षमायाश्चाक्षमायाश्च विद्धि पार्थ प्रयोजनम् ॥२९
विजित्य क्षममाणस्य यशो राज्ञोऽभिवर्धते ।
महापराधा ह्यप्यस्मिन्विश्वसन्ति हि शत्रवः ॥ ३०
मन्यते कर्शयित्वा तु क्षमा साध्विति शम्बरः ।
असंतप्तं तु यद्दारु प्रत्येति प्रकृतिं पुनः ॥ ३१
नैतत्प्रशंसन्त्याचार्या न च साधु निदर्शनम् ।
अक्लेशेनाविनाशेन नियन्तव्याः स्वपुत्रवत् ॥ ३२
द्वेष्यो भवति भूतानामुग्रो राजा युधिष्ठिर ।
मृदुमप्यवमन्यन्ते तस्मादुभयभाग्भवेत् ॥ ३३
प्रहरिष्यन्प्रियं ब्रूयात्प्रहरन्नपि भारत ।

प्रहृत्य च कृपायेत शोचन्निव रुदन्निव ॥ ३४
न मे प्रियं यत्स हतः संप्राहैवं पुरो वचः ।
न चकार्थ च मे वाक्यमुच्यमानः पुनः पुनः ॥३५
अहो जीवितमाकाङ्क्षे नेदृशो वधमर्हति ।
सुदुर्लभाः सुपुरुषाः संग्रामेष्वपलायिनः ॥ ३६
कृतं ममाप्रियं तेन येनायं निहतो मृधे ।
इति वाचा वदन्हन्तॄन्पूजयेत रहोगतः ॥ ३७
हन्तॄणां चाहतानां च यत्कुर्युरपराधिनः ।
क्रोशेद्बाहुं प्रगृह्यापि चिकीर्षञ्जनसंग्रहम् ॥ ३८
एवं सर्वास्ववस्थासु सान्त्वपूर्वं समाचरन् ।
प्रियो भवति भूतानां धर्मज्ञो वीतभीर्नृपः ॥ ३९
विश्वासं चात्र गच्छन्ति सर्वभूतानि भारत ।
विश्वस्तः शक्यते भोक्तुं यथाकाममुपस्थितः ॥ ४०
तस्माद्विश्वासयेद्राजा सर्वभूतान्यमायया ।
सर्वतः परिरक्षेच्च यो महीं भोक्तुमिच्छति ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

युधिष्ठिर उवाच ।

कथं मृदौ कथं तीक्ष्णे महापक्षे च पार्थिव ।
अरौ वर्तेत नृपतिस्तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतेश्च संवादमिन्द्रस्य च युधिष्ठिर ॥ २
बृहस्पतिं देवपतिरभिवाद्य कृताञ्जलिः ।
उपसंगम्य पप्रच्छ वासवः परवीरहा ॥ ३
अहितेषु कथं ब्रह्मन्वर्तेयमतन्द्रितः ।
असमुच्छिद्य चैवैनान्नियच्छेयमुपायतः ॥ ४
सेनयोर्व्यतिषङ्गेण जयः साधारणो भवेत् ।
किं कुर्वाणं न मां जह्याज्ज्वलिता श्रीः प्रतापिनी ॥
ततो धर्मार्थकामानां कुशलः प्रतिभानवान् ।
राजधर्मविधानज्ञः प्रत्युवाच पुरंदरम् ॥ ६
न जातु कलहेनेच्छेन्नियन्तुमपकारिणः ।
बालसंसेवितं ह्येतद्यदमर्षो यदक्षमा ।
न शत्रुर्विवृतः कार्यो वधमस्याभिकाङ्क्षता ॥ ७
क्रोधं बलममर्षं च नियम्यात्मजमात्मनि ।
अमित्रमुपसेवेत विश्वस्तवदविश्वसन् ॥ ८
प्रियमेव वदेन्नित्यं नाप्रियं किंचिदाचरेत् ।
विरमेच्छुष्कवैरेभ्यः कण्ठायासं च वर्जयेत् ॥ ९
यथा वैतंसिको युक्तो द्विजानां सदृशस्वनः ।
तान्द्विजान्कुरुते वश्यांस्तथा युक्तो महीपतिः ।
वशं चोपनयेच्छत्रून्निहन्याच्च पुरंदर ॥ १०
न नित्यं परिभूयारीन्सुखं स्वपिति वासव ।
जागर्त्येव च दुष्टात्मा संकरेऽग्निरिवोत्थितः ॥ ११
न संनिपातः कर्तव्यः सामान्ये विजये सति ।
विश्वास्यैवोपसंन्यास्यो वशे कृत्वा रिपुः प्रभो ॥१२
संप्रधार्य सहामात्यैर्मन्त्रविद्भिर्महात्मभिः ।
उपेक्षमाणोऽवज्ञाते हृदयेनापराजितः ॥ १३
अथास्य प्रहरेत्काले किंचिद्विचलिते पदे ।
दण्डं च दूषयेदस्य पुरुषैराप्तकारिभिः ॥ १४
आदिमध्यावसानज्ञः प्रच्छन्नं च विचारयेत् ।
बलानि दूषयेदस्य जानंश्चैव प्रमाणतः ॥ १५
भेदेनोपप्रदानेन संसृजन्नौषधैस्तथा ।
न त्वेव चैलसंसर्गं रचयेदरिभिः सह ॥ १६
दीर्घकालमपि क्षान्त्वा विहन्यादेव शात्रवान् ।
कालाकाङ्क्षी यामयेच्च यथा विस्रम्भमाप्नुयुः ॥ १७
न सद्योऽरीन्विनिर्हन्याद्दृष्टस्य विजयोऽज्वरः ।
न यः शल्यं घट्टयति नवं च कुरुते व्रणम् ॥ १८
प्राप्ते च प्रहरेत्काले न स संवर्तते पुनः ।
हन्तुकामस्य देवेन्द्र पुरुषस्य रिपुं प्रति ॥ १९

यः कालो हि व्यतिक्रामेत्पुरुषं कालकाङ्क्षिणम् ।
दुर्लभः स पुनः कालः कालधर्मचिकीर्षुणा ॥ २०
औजेस्थ्यं विजयेदेवं संगृह्णन्साधुसंमतान् ।
कालेन साधयेन्नित्यं नाप्राप्तेऽभिनिपीडयेत् ॥ २१
विहाय कामं क्रोधं च तथाहंकारमेव च ।
युक्तो विवरमन्विच्छेदहितानां पुरंदर ॥ २२
मार्दवं दण्ड आलस्यं प्रमादश्च सुरोत्तम ।
मायाश्च विविधाः शक्र साधयन्त्यविचक्षणम् ॥२३
निहत्यैतानि चत्वारि मायां प्रतिविधाय च ।
ततः शक्नोति शत्रूणां प्रहर्तुमविचारयन् ॥ २४
यदैवैकेन शक्येत गुह्यं कर्तुं तदाचरेत् ।
यच्छन्ति सचिवा गुह्यं मिथो विद्रावयन्त्यपि ॥२५
अशक्यमिति कृत्वा वा ततोऽन्यैः संविदं चरेत् ।
ब्रह्मदण्डमदृष्टेषु दृष्टेषु चतुरङ्गिणीम् ॥ २६
भेदं च प्रथमं युञ्ज्यात्तूष्णींदण्डं तथैव च ।
काले प्रयोजयेद्राजा तस्मिंस्तस्मिंस्तदा तदा ॥ २७
प्रणिपातं च गच्छेत काले शत्रोर्बलीयसः ।
युक्तोऽस्य वधमन्विच्छेदप्रमत्तः प्रमाद्यतः ॥ २८
प्रणिपातेन दानेन वाचा मधुरया ब्रुवन् ।
अमित्रमुपसेवेत न तु जातु विशङ्कयेत् ॥ २९
स्थानानि शङ्कितानां च नित्यमेव विवर्जयेत् ।
न च तेष्वाश्वसेद्द्रुग्ध्वा जाग्रतीह निराकृताः ॥३०
न ह्यतो दुष्करं कर्म किंचिदस्ति सुरोत्तम ।
यथा विविधवृत्तानामैश्वर्यममराधिप ॥ ३१
तथा विविधशीलानामपि संभव उच्यते ।
यतेत योगमास्थाय मित्रामित्रानवारयन् ॥ ३२
मृदुमप्यवमन्यन्ते तीक्ष्णादुद्विजते जनः ।
मातीक्ष्णो मामृदुर्भूस्त्वं तीक्ष्णो भव मृदुर्भव ॥ ३३
यथा वप्रे वेगवति सर्वतःसंप्लुतोदके ।
नित्यं विवरणाद्बाधस्तथा राज्यं प्रमाद्यतः ॥ ३४

न बहूनभियुञ्जीत यौगपद्येन शात्रवान् ।
साम्ना दानेन भेदेन दण्डेन च पुरंदर ॥ ३५
एकैकमेषां निष्पिंषञ्शिष्टेषु निपुणं चरेत् ।
न च शक्तोऽपि मेधावी सर्वानेवारभेन्नृपः ॥ ३६
यदा स्यान्महती सेना हयनागरथाकुला ।
पदातियन्त्रबहुला स्वनुरक्ता षडङ्गिनी ॥ ३७
यदा बहुविधां वृद्धिं मन्यते प्रतिलोमतः ।
तदा विवृत्य प्रहरेद्दस्यूनामविचारयन् ॥ ३८
न साम दण्डोपनिषत्प्रशस्यते
न मार्दवं शत्रुषु यात्रिकं सदा ।
स सस्यघातो न च संकरक्रिया
न चापि भूयः प्रकृतेर्विचारणा ॥ ३९
मायाविभेदानुपसर्जनानि
पापं तथैव स्पशसंप्रयोगात् ।
आप्तैर्मनुष्यैरुपचारयेत
पुरेषु राष्ट्रेषु च संप्रयुक्तः ॥ ४०
पुराणि चैषामनुसृत्य भूमिपाः
पुरेषु भोगान्निखिलानिहाजयन् ।
पुरेषु नीतिं विहितां यथाविधि
प्रयोजयन्तो बलवृत्रसूदन ॥ ४१
प्रदाय गूढानि वसूनि नाम
प्रच्छिद्य भोगानवधाय च स्वान् ।
दुष्टाः स्वदोषैरिति कीर्तयित्वा
पुरेषु राष्ट्रेषु च योजयन्ति ॥ ४२
तथैव चान्यै रतिशास्त्रवेदिभिः
स्वलंकृतैः शास्त्रविधानदृष्टिभिः ।
सुशिक्षितैर्भाष्यकथाविशारदैः
परेषु कृत्यानुपधारयस्व ॥ ४३
इन्द्र उवाच ।
कानि लिङ्गानि दुष्टस्य भवन्ति द्विजसत्तम ।

कथं दुष्टं विजानीयादेतत्पृष्टो ब्रवीहि मे ॥ ४४
बृहस्पतिरुवाच ।
परोक्षमगुणानाह सद्गुणानभ्यसूयति ।
परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः ॥ ४५
तूष्णींभावेऽपि हि ज्ञातं न चेद्भवति कारणम् ।
विश्वासमोष्ठसंदंशं शिरसश्च प्रकम्पनम् ॥ ४६
करोत्यभीक्ष्णं संसृष्टमसंसृष्टश्च भाषते ।
अदृष्टितो विकुरुते दृष्ट्वा वा नाभिभाषते ॥ ४७
पृथगेत्य समश्नाति नेदमद्य यथाविधि ।
आसने शयने याने भावा लक्ष्या विशेषतः ॥४८
आर्तिरार्ते प्रिये प्रीतिरेतावन्मित्रलक्षणम् ।
विपरीतं तु बोद्धव्यमरिलक्षणमेव तत् ॥ ४९
एतान्येवं यथोक्तानि बुध्येथास्त्रिदशाधिप ।
पुरुषाणां प्रदुष्टानां स्वभावो बलवत्तरः ॥ ५०
इति दुष्टस्य विज्ञानमुक्तं ते सुरसत्तम ।
निशाम्य शास्त्रतत्त्वार्थं यथावदमरेश्वर ॥ ५१
भीष्म उवाच ।
स तद्वचः शत्रुनिबर्हणे रत-
स्तथा चकारावितथं बृहस्पतेः ।
चचार काले विजयाय चारिहा
वशं च शत्रूननयत्पुरंदरः ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
चतुरधिकशततमोऽध्यायः ॥१०४॥

१०५

युधिष्ठिर उवाच ।
धार्मिकोऽर्थानसंप्राप्य राजामात्यैः प्रबाधितः ।
च्युतः कोशाच्च दण्डाच्च सुखमिच्छन्कथं चरेत् ॥१
भीष्म उवाच ।
अत्रायं क्षेमदर्शीयमितिहासोऽनुगीयते ।
तत्तेऽहं संप्रवक्ष्यामि तन्निबोध युधिष्ठिर ॥ २
क्षेमदर्शं नृपसुतं यत्र क्षीणबलं पुरा ।
मुनिः कालकवृक्षीय आजगामेति नः श्रुतम् ।
तं पप्रच्छोपसंगृह्य कृच्छ्रामापदमास्थितः ॥ ३
अर्थेषु भागी पुरुषः ईहमानः पुनः पुनः ।
अलब्ध्वा मद्विधो राज्यं ब्रह्मन्किं कर्तुमर्हति ॥ ४
अन्यत्र मरणात्स्तेयादन्यत्र परसंश्रयात् ।
क्षुद्रादन्यत्र चाचारात्तन्ममाचक्ष्व सत्तम ॥ ५
व्याधिना चाभिपन्नस्य मानसेनेतरेण वा ।
बहुश्रुतः कृतप्रज्ञस्त्वद्विधः शरणं भवेत् ॥ ६
निर्विद्य हि नरः कामान्नियम्य सुखमेधते ।
त्यक्त्वा प्रीतिं च शोकं च लब्ध्वाप्रीतिमयं वसु॥७
सुखमर्थाश्रयं येषामनुशोचामि तानहम् ।
मम ह्यर्थाः सुबहवो नष्टाः स्वप्न इवागताः ॥ ८
दुष्करं बत कुर्वन्ति महतोऽर्थांस्त्यजन्ति ये ।
वयं त्वेनान्परित्यक्तुमसतोऽपि न शक्नुमः ॥ ९
इमामवस्थां संप्राप्तं दीनमार्तं श्रियश्च्युतम् ।
यदन्यत्सुखमस्तीह तद्ब्रह्मन्ननुशाधि माम् ॥ १०
कौसल्येनैवमुक्तस्तु राजपुत्रेण धीमता ।
मुनिः कालकवृक्षीयः प्रत्युवाच महाद्युतिः ॥ ११
पुरस्तादेव ते बुद्धिरियं कार्या विजानतः ।
अनित्यं सर्वमेवेदमहं च मम चास्ति यत् ॥ १२
यत्किंचिन्मन्यसेऽस्तीति सर्वं नास्तीति विद्धि तत् ।
एवं न व्यथते प्राज्ञः कृच्छ्रामप्यापदं गतः ॥ १३
यद्धि भूतं भविष्यच्च ध्रुवं तन्न भविष्यति ।
एवं विदितवेद्यस्त्वमधर्मेभ्यः प्रमोक्ष्यसे ॥ १४
यच्च पूर्वे समाहारे यच्च पूर्वतरे परे ।
सर्वं तन्नास्ति तच्चैव तज्ज्ञात्वा कोऽनुसंज्वरेत् ॥१५
भूत्वा च न भवत्येतदभूत्वा च भवत्यपि ।
शोके न ह्यस्ति सामर्थ्यं शोकं कुर्यात्कथं नरः ॥१६
क्व नु तेऽद्य पिता राजन्क्व नु तेऽद्य पितामहः ।

न त्वं पश्यसि तानद्य न त्वा पश्यन्ति तेऽपि च ॥१७
आत्मनोऽध्रुवतां पश्यंस्तांस्त्वं किमनुशोचसि ।
बुद्ध्या चैवानुबुध्यस्व ध्रुवं हि न भविष्यसि ॥१८
अहं च त्वं च नृपते शत्रवः सुहृदश्च ते ।
अवश्यं न भविष्यामः सर्वं च न भविष्यति ॥१९
ये तु विंशतिवर्षा वै त्रिंशद्वर्षाश्च मानवाः ।
अर्वागेव हि ते सर्वे मरिष्यन्ति शरच्छतात् ॥२०
अपि चेन्महतो वित्ताद्विप्रमुच्येत पूरुषः ।
नैतन्ममेति तन्मत्वा कुर्वीत प्रियमात्मनः ॥ २१
अनागतं यन्न ममेति विद्या-
दतिक्रान्तं यन्न ममेति विद्यात् ।
दिष्टं बलीय इति मन्यमाना-
स्ते पण्डितास्तत्सतां स्थानमाहुः ॥ २२
अनाढ्याश्चापि जीवन्ति राज्यं चाप्यनुशासते ।
बुद्धिपौरुषसंपन्नास्त्वया तुल्याधिका जनाः ॥ २३
न च त्वमिव शोचन्ति तस्मात्त्वमपि मा शुचः ।
किं नु त्वं तैर्न वै श्रेयांस्तुल्यो वा बुद्धिपौरुषैः ॥ २४

राजपुत्र उवाच ।

यादृच्छिकं ममासीत्तद्राज्यमित्येव चिन्तये ।
ह्रियते सर्वमेवेदं कालेन महता द्विज ॥ २५
तस्यैवं ह्रियमाणस्य स्रोतसेव तपोधन ।
फलमेतत्प्रपश्यामि यथालब्धेन वर्तये ॥ २६

मुनिरुवाच ।

अनागतमतीतं च यथा तथ्यविनिश्चयात् ।
नानुशोचसि कौसल्य सर्वार्थेषु तथा भव ॥ २७
अवाप्यान्कामयस्वार्थान्नानवाप्यान्कदाचन ।
प्रत्युत्पन्नाननुभवन्मा शुचस्त्वमनागतान् ॥ २८
यथा लब्धोपपन्नार्थस्तथा कौसल्य रंस्यसे ।
कच्चिच्छुद्धस्वभावेन श्रिया हीनो न शोचसि ॥२९
पुरस्ताद्भूतपूर्वत्वाद्धीनभाग्यो हि दुर्मतिः ।
धातारं गर्हते नित्यं लब्धार्थांश्च न मृष्यते ॥ ३०
अनर्हानपि चैवान्यान्मन्यते श्रीमतो जनान् ।
एतस्मात्कारणादेतद्दुःखं भूयोऽनुवर्तते ॥ ३१
ईर्ष्यातिच्छेदसंपन्ना राजन्पुरुषमानिनः ।
कच्चित्त्वं न तथा प्राज्ञ मत्सरी कोसलाधिप ॥३२
सहस्व श्रियमन्येषां यद्यपि त्वयि नास्ति सा ।
अन्यत्रापि सतीं लक्ष्मीं कुशला भुञ्जते जनाः ।
अभिविष्यन्दते श्रीर्हि सत्यपि द्विषतो जनात् ॥३३
श्रियं च पुत्रपौत्रं च मनुष्या धर्मचारिणः ।
त्यागधर्मविदो धीराः स्वयमेव त्यजन्त्युत ॥ ३४
बहु संकसुकं दृष्ट्वा विवित्सासाधनेन च ।
तथान्ये संत्यजन्त्येनं मत्वा परमदुर्लभम् ॥ ३५
त्वं पुनः प्राज्ञरूपः सन्कृपणं परितप्यसे ।
अकाम्यान्कामयानोऽर्थान्पराचीनानुपद्रुतान् ॥ ३६
तां बुद्धिमुपजिज्ञासुस्त्वमेवैनान्परित्यज ।
अनर्थांश्चार्थरूपेण अर्थांश्चानर्थरूपतः ॥ ३७
अर्थायैव हि केषांचिद्धननाशो भवत्युत ।
अनन्यं तं सुखं मत्वा श्रियमन्यः परीक्षते ॥ ३८
रममाणः श्रिया कश्चिन्नान्यच्छ्रेयोऽभिमन्यते ।
तथा तस्येहमानस्य समारम्भो विनश्यति ॥ ३९
कृच्छ्राल्लब्धमभिप्रेतं यदा कौसल्य नश्यति ।
तदा निर्विद्यते सोऽर्थात्परिभग्नक्रमो नरः ॥ ४०
धर्ममेकेऽभिपद्यन्ते कल्याणाभिजना नराः ।
परत्र सुखमिच्छन्तो निर्विद्येयुश्च लौकिकात् ॥४१
जीवितं संत्यजन्त्येके धनलोभपरा नराः ।
न जीवितार्थं मन्यन्ते पुरुषा हि धनादृते ॥ ४२
पश्य तेषां कृपणतां पश्य तेषामबुद्धिताम् ।
अध्रुवे जीविते मोहादर्थतृष्णामुपाश्रिताः ॥ ४३
संचये च विनाशान्ते मरणान्ते च जीविते ।
संयोगे विप्रयोगान्ते को नु विप्रणयेन्मनः ॥ ४४

धनं वा पुरुषं राजन्पुरुषो वा पुनर्धनम् ।
अवश्यं प्रजहात्येतत्तद्विद्वान्कोऽनुसंज्वरेत् ॥ ४५
अन्येषामपि नश्यन्ति सुहृदश्च धनानि च ।
पश्य बुद्ध्या मनुष्याणां राजन्नापदमात्मनः ।
नियच्छ यच्छ संयच्छ इन्द्रियाणि मनो गिरम् ॥४६
प्रतिषिद्धानवाप्येषु दुर्लभेष्वहितेषु च ।
प्रतिकृष्टेषु भावेषु व्यतिकृष्टेष्वसंभवे ।
प्रज्ञानतृप्तो विक्रान्तस्त्वद्विधो नानुशोचति ॥ ४७
अल्पमिच्छन्नचपलो मृदुर्दान्तः सुसंशितः ।
ब्रह्मचर्योपपन्नश्च त्वद्विधो नैव मुह्यति ॥ ४८
न त्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि ।
नृशंसवृत्तिं पापिष्ठां दुःखां कापुरुषोचिताम् ॥ ४९
अपि मूलफलाजीवो रमस्वैको महावने ।
वाग्यतः संगृहीतात्मा सर्वभूतदयान्वितः ॥ ५०
सदृशं पण्डितस्यैतदीषादन्तेन दन्तिना ।
यदेको रमतेऽरण्ये यच्चाप्यल्पेन तुष्यति ॥ ५१
महाह्रदः संक्षुभित आत्मनैव प्रसीदति ।
एतदेवंगतस्याहं सुखं पश्यामि केवलम् ॥ ५२
असंभवे श्रियो राजन्हीनस्य सचिवादिभिः ।
दैवे प्रतिनिविष्टे च किं श्रेयो मन्यते भवान् ॥५३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

मुनिरुवाच ।

अथ चेत्पौरुषं किंचित्क्षत्रियात्मनि पश्यसि ।
ब्रवीमि हन्त ते नीतिं राज्यस्य प्रतिपत्तये ॥ १
तां चेच्छक्ष्यस्यनुष्ठातुं कर्म चैव करिष्यसि ।
शृणु सर्वमशेषेण यत्त्वां वक्ष्यामि तत्त्वतः ॥ २
आचरिष्यसि चेत्कर्म महतोऽर्थानवाप्स्यसि ।
राज्यं राज्यस्य मन्त्रं वा महतीं वा पुनः श्रियम् ।
यद्येतद्रोचते राजन्पुनर्ब्रूहि ब्रवीमि ते ॥ ३

राजपुत्र उवाच ।

ब्रवीतु भगवान्नीतिमुपपन्नोऽस्म्यहं प्रभो ।
अमोघमिदमद्यास्तु त्वया सह समागतम् ॥ ४

मुनिरुवाच ।

हित्वा स्तम्भं च मानं च क्रोधहर्षौ भयं तथा ।
प्रत्यमित्रं निषेवस्व प्रणिपत्य कृताञ्जलिः ॥ ५
तमुत्तमेन शौचेन कर्मणा चाभिराधय ।
दातुमर्हति ते वृत्तिं वैदेहः सत्यसंगरः ॥ ६
प्रमाणं सर्वभूतेषु प्रग्रहं च गमिष्यसि ।
ततः सहायान्सोत्साहाँल्लप्स्यसेऽव्यसनाञ्शुचीन् ॥
वर्तमानः स्वशास्त्रे वै संयतात्मा जितेन्द्रियः ।
अभ्युद्धरति चात्मानं प्रसादयति च प्रजाः ॥ ८
तेनैव त्वं धृतिमता श्रीमता चाभिसत्कृतः ।
प्रमाणं सर्वभूतेषु गत्वा प्रग्रहणं महत् ॥ ९
ततः सुहृद्बलं लब्ध्वा मन्त्रयित्वा सुमन्त्रितम् ।
अन्तरैर्भेदयित्वारीन्बिल्वं बिल्वेन शातय ।
परैर्वा संविदं कृत्वा बलमप्यस्य घातय ॥ १०
अलभ्या ये शुभा भावाः स्त्रियश्चाच्छादनानि च ।
शय्यासनानि यानानि महार्हाणि गृहाणि च ॥११
पक्षिणो मृगजातानि रसा गन्धाः फलानि च ।
तेष्वेव सज्जयेथास्त्वं यथा नश्येत्स्वयं परः ॥ १२
यद्येव प्रतिषेद्धव्यो यद्युपेक्षणमर्हति ।
न जातु विवृतः कार्यः शत्रुर्विनयमिच्छता ॥ १३
वसस्व परमामित्रविषये प्राज्ञसंमते ।
भजस्व श्वेतकाकीयैर्मित्राधममनर्थकैः ॥ १४
आरम्भांश्चास्य महतो दुष्करांस्त्वं प्रयोजय ।
नदीबन्धविरोधांश्च बलवद्भिर्विरुध्यताम् ॥ १५
उद्यानानि महार्हाणि शयनान्यासनानि च ।
प्रतिभोगसुखेनैव कोशमस्य विरेचय ॥ १६

यज्ञदानप्रशंसास्मै ब्राह्मणेष्वनुवर्ण्यताम् ।
ते त्वत्प्रियं करिष्यन्ति तं चेष्यन्ति वृका इव ॥१७
असंशयं पुण्यशीलः प्राप्नोति परमां गतिम् ।
त्रिविष्टपे पुण्यतमं स्थानं प्राप्नोति पार्थिवः ।
कोशक्षये त्वमित्राणां वशं कौसल्य गच्छति ॥१८
उभयत्र प्रसक्तस्य धर्मे चाधर्म एव च ।
बलार्थमूलं व्युच्छिद्येत्तेन नन्दन्ति शत्रवः ॥ १९
निन्दास्य मानुषं कर्म दैवमस्योपवर्णय ।
असंशयं दैवपरः क्षिप्रमेव विनश्यति ॥ २०
याजयैनं विश्वजिता सर्वस्वेन वियुज्यताम् ।
ततो गच्छत्वसिद्धार्थः पीड्यमानो महाजनम् ॥२१
त्यागधर्मविदं मुण्डं कंचिदस्योपवर्णय ।
अपि त्यागं बुभूषेत कच्चिद्गच्छेदनामयम् ॥ २२
सिद्धेनौषधयोगेन सर्वशत्रुविनाशिना ।
नागानश्वान्मनुष्यांश्च कृतकैरुपघातय ॥ २३
एते चान्ये च बहवो दम्भयोगाः सुनिश्चिताः ।
शक्या विषहता कर्तुं नक्लीबेन नृपात्मज ॥ २४

इति श्रीमहाभारते शान्तिपर्वणि
षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

राजपुत्र उवाच ।

न निकृत्या न दम्भेन ब्रह्मन्निच्छामि जीवितुम् ।
नाधर्मयुक्तानिच्छेयमर्थान्सुमहतोऽप्यहम् ॥ १
पुरस्तादेव भगवन्मयैतदपवर्जितम् ।
येन मां नाभिशङ्केत यद्वा कृत्स्नं हितं भवेत् ॥ २
आनृशंस्येन धर्मेण लोके ह्यस्मिञ्जिजीविषुः ।
नाहमेतदलं कर्तुं नैतन्मय्युपपद्यते ॥ ३

मुनिरुवाच ।

उपपन्नस्त्वमेतेन यथा क्षत्रिय भाषसे ।
प्रकृत्या ह्युपपन्नोऽसि बुद्ध्या चाद्भुतदर्शन ॥ ४
उभयोरेव वामर्थे यतिष्ये तव तस्य च ।
संश्लेषं वा करिष्यामि शाश्वतं ह्यनपायिनम् ॥ ५
त्वादृशं हि कुले जातमनृशंसं बहुश्रुतम् ।
अमात्यं को न कुर्वीत राज्यप्रणयकोविदम् ॥ ६
यस्त्वं प्रव्रजितो राज्याद्व्यसनं चोत्तमं गतः ।
आनृशंस्येन वृत्तेन क्षत्रियेच्छसि जीवितुम् ॥ ७
आगन्ता मद्गृहं तात वैदेहः सत्यसंगरः ।
यथाहं तं नियोक्ष्यामि तत्करिष्यत्यसंशयम् ॥ ८

भीष्म उवाच ।

तत आहूय वैदेहं मुनिर्वचनमब्रवीत् ।
अयं राजकुले जातो विदिताभ्यन्तरो मम ॥ ९
आदर्श इव शुद्धात्मा शारदश्चन्द्रमा इव ।
नास्मिन्पश्यामि वृजिनं सर्वतो मे परीक्षितः ॥१०
तेन ते संधिरेवास्तु विश्वसास्मिन्यथा मयि ।
न राज्यमनमात्येन शक्यं शास्तुममित्रहन् ॥ ११
अमात्यः शूर एव स्याद्बुद्धिसंपन्न एव च ।
ताभ्यां चैव भयं राज्ञः पश्य राज्यस्य योजनम् ।
धर्मात्मनां कच्चिल्लोके नान्यास्ति गतिरीदृशी ॥१२
कृतात्मा राजपुत्रोऽयं सतां मार्गमनुष्ठितः ।
सुसंगृहीतस्त्वेवैष त्वया धर्मपुरोगमः ।
संसेव्यमानः शत्रूंस्ते गृह्णीयान्महतो गणान् ॥ १३
यद्ययं प्रतियुध्येत्त्वां स्वकर्म क्षत्रियस्य तत् ।
जिगीषमाणस्त्वां युद्धे पितृपैतामहे पदे ॥ १४
त्वं चापि प्रतियुध्येथा विजिगीषुव्रते स्थितः ।
अयुद्ध्वैव नियोगान्मे वशे वैदेह ते स्थितः ॥ १५
स त्वं धर्ममवेक्षस्व त्यक्त्वाधर्ममसांप्रतम् ।
न हि कामान्न च द्रोहात्स्वधर्मं हातुमर्हसि ॥ १६
नैव नित्यं जयस्तात नैव नित्यं पराजयः ।
तस्माद्भोजयितव्यश्च भोक्तव्यश्च परो जनः ॥१७
आत्मन्येव हि संदृश्यावुभौ जयपराजयौ ।

निःशेषकारिणां तात निःशेषकरणाद्भयम् ॥ १८
इत्युक्तः प्रत्युवाचेदं वचनं ब्राह्मणर्षभम् ।
अभिपूज्याभिसत्कृत्य पूजार्हमनुमान्य च ॥ १९
यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयाद्बहुश्रुतः ।
श्रेयस्कामो यथा ब्रूयादुभयोर्यत्क्षमं भवेत् ॥ २०
तथा वचनमुक्तोऽसि करिष्यामि च तत्तथा ।
एतद्धि परमं श्रेयो न मेऽत्रास्ति विचारणा ॥ २१
ततः कौसल्यमाहूय वैदेहो वाक्यमब्रवीत् ।
धर्मतो नीतितश्चैव बलेन च जितो मया ॥ २२
सोऽहं त्वया त्वात्मगुणैर्जितः पार्थिवसत्तम ।
आत्मानमनवज्ञाय जितवद्वर्ततां भवान् ॥ २३
नावमन्ये च ते बुद्धिं नावमन्ये च पौरुषम् ।
नावमन्ये जयामीति जितवद्वर्ततां भवान् ॥ २४
यथावत्पूजितो राजन्गृहं गन्तासि मे गृहात् ।
ततः संपूज्य तौ विप्रं विश्वस्तौ जग्मतुर्गृहान् ॥ २५
वैदेहस्त्वथ कौसल्यं प्रवेश्य गृहमञ्जसा ।
पाद्यार्घ्यमधुपर्कैस्तं पूजार्हं प्रत्यपूजयत् ॥ २६
ददौ दुहितरं चास्मै रत्नानि विविधानि च ।
एष राज्ञां परो धर्मः सह्यौ जयपराजयौ ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

१०८

युधिष्ठिर उवाच ।

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
धर्मो वृत्तं च वृत्तिश्च वृत्त्युपायफलानि च ॥ १
राज्ञां वृत्तं च कोशश्च कोशसंजननं महत् ।
अमात्यगुणवृद्धिश्च प्रकृतीनां च वर्धनम् ॥ २
षाड्गुण्यगुणकल्पश्च सेनानीतिस्तथैव च ।
दुष्टस्य च परिज्ञानमदुष्टस्य च लक्षणम् ॥ ३
समहीनाधिकानां च यथावल्लक्षणोच्चयः ।
मध्यमस्य च तुष्ट्यर्थं यथा स्थेयं विवर्धता ॥ ४
क्षीणसंग्रहवृत्तिश्च यथावत्संप्रकीर्तिता ।
लघुनादेशरूपेण ग्रन्थयोगेन भारत ॥ ५
विजिगीषोस्तथा वृत्तमुक्तं चैव तथैव ते ।
गणानां वृत्तिमिच्छामि श्रोतुं मतिमतां वर ॥ ६
यथा गणाः प्रवर्धन्ते न भिद्यन्ते च भारत ।
अरीन्हि विजिगीषन्ते सुहृदः प्राप्नुवन्ति च ॥ ७
भेदमूलो विनाशो हि गणानामुपलभ्यते ।
मन्त्रसंवरणं दुःखं बहूनामिति मे मतिः ॥ ८
एतदिच्छाम्यहं श्रोतुं निखिलेन परंतप ।
यथा च ते न भिद्येरंस्तच्च मे ब्रूहि पार्थिव ॥ ९

भीष्म उवाच ।

गणानां च कुलानां च राज्ञां च भरतर्षभ ।
वैरसंदीपनावेतौ लोभामर्षौ जनाधिप ॥ १०
लोभमेको हि वृणुते ततोऽमर्षमनन्तरम् ।
तौ क्षयव्ययसंयुक्तावन्योन्यजनिताश्रयौ ॥ ११
चारमन्त्रबलादानैः सामदामविभेदनैः ।
क्षयव्ययभयोपायैः कर्शयन्तीतरेतरम् ॥ १२
तत्र दानेन भिद्यन्ते गणाः संघातवृत्तयः ।
भिन्ना विमनसः सर्वे गच्छन्त्यरिवशं भयात् ॥ १३
भेदाद्गणा विनश्यन्ति भिन्नाः सूपजपाः परैः ।
तस्मात्संघातयोगेषु प्रयतेरन्गणाः सदा ॥ १४
अर्था ह्येवाधिगम्यन्ते संघातबलपौरुषात् ।
बाह्याश्च मैत्रीं कुर्वन्ति तेषु संघातवृत्तिषु ॥ १५
ज्ञानवृद्धान्प्रशंसन्तः शुश्रूषन्तः परस्परम् ।
विनिवृत्ताभिसंधानाः सुखमेधन्ति सर्वशः ॥ १६
धर्मिष्ठान्व्यवहारांश्च स्थापयन्तश्च शास्त्रतः ।
यथावत्संप्रवर्तन्तो विवर्धन्ते गणोत्तमाः ॥ १७
पुत्रान्भ्रातॄन्निगृह्णन्तो विनये च सदा रताः ।
विनीतांश्च प्रगृह्णन्तो विवर्धन्ते गणोत्तमाः ॥ १८

चारमन्त्रविधानेषु कोशसंनिचयेषु च ।
नित्ययुक्ता महाबाहो वर्धन्ते सर्वतो गणाः ॥ १९
प्राज्ञाञ्शूरान्महेष्वासान्कर्मसु स्थिरपौरुषान् ।
मानयन्तः सदा युक्ता विवर्धन्ते गणा नृप ॥ २०
द्रव्यवन्तश्च शूराश्च शस्त्रज्ञाः शास्त्रपारगाः ।
कृच्छ्रास्वापत्सु संमूढान्गणानुत्तारयन्ति ते ॥ २१
क्रोधो भेदो भयो दण्डः कर्शनं निग्रहो वधः ।
नयन्त्यरिवशं सद्यो गणान्भरतसत्तम ॥ २२
तस्मान्मानयितव्यास्ते गणमुख्याः प्रधानतः ।
लोकयात्रा समायत्ता भूयसी तेषु पार्थिव ॥ २३
मन्त्रगुप्तिः प्रधानेषु चारश्चामित्रकर्शन ।
न गणाः कृत्स्नशो मन्त्रं श्रोतुमर्हन्ति भारत ॥ २४
गणमुख्यैस्तु संभूय कार्यं गणहितं मिथः ।
पृथग्गणस्य भिन्नस्य विमतस्य ततोऽन्यथा ।
अर्थाः प्रत्यवसीदन्ति तथानर्था भवन्ति च ॥२५
तेषामन्योन्यभिन्नानां स्वशक्तिमनुतिष्ठताम् ।
निग्रहः पण्डितैः कार्यः क्षिप्रमेव प्रधानतः ॥ २६
कुलेषु कलहा जाताः कुलवृद्धैरुपेक्षिताः ।
गोत्रस्य राजन्कुर्वन्ति गणसंभेदकारिकाम् ॥ २७
आभ्यन्तरं भयं रक्ष्यं सुरक्ष्यं बाह्यतो भयम् ।
अभ्यन्तराद्भयं जातं सद्यो मूलं निकृन्तति ॥ २८
अकस्मात्क्रोधलोभाद्वा मोहाद्वापि स्वभावजात् ।
अन्योन्यं नाभिभाषन्ते तत्पराभवलक्षणम् ॥ २९
जात्या च सदृशाः सर्वे कुलेन सदृशास्तथा ।
न तु शौर्येण बुद्ध्या वा रूपद्रव्येण वा पुनः ॥३०
भेदाच्चैव प्रमादाच्च नाम्यन्ते रिपुभिर्गणाः ।
तस्मात्संघातमेवाहुर्गणानां शरणं महत् ॥ ३१

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

१०९

युधिष्ठिर उवाच ।

महानयं धर्मपथो बहुशाखश्च भारत ।
किं स्विदेवेह धर्माणामनुष्ठेयतमं मतम् ॥ १
किं कार्यं सर्वधर्माणां गरीयो भवतो मतम् ।
यथायं पुरुषो धर्ममिह च प्रेत्य चाप्नुयात् ॥ २

भीष्म उवाच ।

मातापित्रोर्गुरूणां च पूजा बहुमता मम ।
अत्र युक्तो नरो लोकान्यशश्च महदश्नुते ॥ ३
यदेते ह्यभिजानीयुः कर्म तात सुपूजिताः ।
धर्म्यं धर्मविरुद्धं वा तत्कर्तव्यं युधिष्ठिर ॥ ४
न तैरनभ्यनुज्ञातो धर्ममन्यं प्रकल्पयेत् ।
यमेतेऽभ्यनुजानीयुः स धर्म इति निश्चयः ॥ ५
एत एव त्रयो लोका एत एवाश्रमास्त्रयः ।
एत एव त्रयो वेदा एत एव त्रयोऽग्नयः ॥ ६
पिता ह्यग्निर्गार्हपत्यो माताग्निर्दक्षिणः स्मृतः ।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ ७
त्रिष्वप्रमाद्यन्नेतेषु त्रीँल्लोकानवजेष्यसि ।
पितृवृत्त्या त्विमं लोकं मातृवृत्त्या तथापरम् ।
ब्रह्मलोकं गुरोर्वृत्त्या नित्यमेव चरिष्यसि ॥ ८
सम्यगेतेषु वर्तस्व त्रिषु लोकेषु भारत ।
यशः प्राप्स्यसि भद्रं ते धर्मं च सुमहाफलम् ॥ ९
नैतानतिशयेज्जातु नात्यश्नीयान्न दूषयेत् ।
नित्यं परिचरेच्चैव तद्वै सुकृतमुत्तमम् ।
कीर्तिं पुण्यं यशो लोकान्प्राप्स्यसे च जनाधिप ॥१०
सर्वे तस्यादृता लोका यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥११
नैवायं न परो लोकस्तस्य चैव परंतप ।
अमानिता नित्यमेव यस्यैते गुरवस्त्रयः ॥ १२
न चास्मिन्न परे लोके यशस्तस्य प्रकाशते ।

न चान्यदपि कल्याणं पारत्रं समुदाहृतम् ॥ १३
तेभ्य एव तु तत्सर्वं कृत्यया विसृजाम्यहम् ।
तदासीन्मे शतगुणं सहस्रगुणमेव च ।
तस्मान्मे संप्रकाशन्ते त्रयो लोका युधिष्ठिर ॥ १४
दशैव तु सदाचार्यः श्रोत्रियानतिरिच्यते ।
दशचार्यानुपाध्याय उपाध्यायान्पिता दश ॥ १५
पितॄन्दश तु मातैका सर्वां वा पृथिवीमपि ।
गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः ।
गुरुर्गरीयान्पितृतो मातृतश्चेति मे मतिः ॥ १६
उभौ हि मातापितरौ जन्मनि व्युपयुज्यतः ।
शरीरमेतौ सृजतः पिता माता च भारत ।
आचार्यशिष्टा या जातिः सा दिव्या साजरामरा॥१७
अवध्या हि सदा माता पिता चाप्यपकारिणौ ।
न संदुष्यति तत्कृत्वा न च ते दूषयन्ति तम् ।
धर्माय यतमानानां विदुर्देवाः सहर्षिभिः ॥ १८
य आवृणोत्यवितथेन कर्णा-
वृतं ब्रुवन्नमृतं संप्रयच्छन् ।
तं वै मन्ये पितरं मातरं च
तस्मै न द्रुह्येत्कृतमस्य जानन् ॥ १९
विद्यां श्रुत्वा ये गुरुं नाद्रियन्ते
प्रत्यासन्नं मनसा कर्मणा वा ।
यथैव ते गुरुभिर्भावनीया-
स्तथा तेषां गुरवोऽप्यर्चनीयाः ॥ २०
तस्मात्पूजयितव्याश्च संविभज्याश्च यत्नतः ।
गुरवोऽर्चयितव्याश्च पुराणं धर्ममिच्छता ॥ २१
येन प्रीताश्च पितरस्तेन प्रीतः पितामहः ।
प्रीणाति मातरं येन पृथिवी तेन पूजिता ॥ २२
येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितम् ।
मातृतः पितृतश्चैव तस्मात्पूज्यतमो गुरुः ।
ऋषयश्च हि देवाश्च प्रीयन्ते पितृभिः सह ॥ २३
न केनचन वृत्तेन ह्यवज्ञेयो गुरुर्भवेत् ।
न च माता न च पिता तादृशो यादृशो गुरुः ॥ २४
न तेऽवमानमर्हन्ति न च ते दूषयन्ति तम् ।
गुरूणामेव सत्कारं विदुर्देवाः सहर्षिभिः ॥ २५
उपाध्यायं पितरं मातरं च
येऽभिद्रुह्यन्ति मनसा कर्मणा वा ।
तेषां पापं भ्रूणहत्याविशिष्टं
तस्मान्नान्यः पापकृदस्ति लोके ॥ २६
मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य पिशुनस्य च ।
चतुर्णां वयमेतेषां निष्कृतिं नानुशुश्रुमः ॥ २७
एतत्सर्वमतिदेशेन सृष्टं
यत्कर्तव्यं पुरुषेणेह लोके ।
एतच्छ्रेयो नान्यदस्माद्विशिष्टं
सर्वान्धर्माननुसृत्यैतदुक्तम् ॥ २८

इति श्रीमहाभारते शान्तिपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

युधिष्ठिर उवाच ।

कथं धर्मे स्थातुमिच्छन्नरो वर्तेत भारत ।
विद्वञ्जिज्ञासमानाय प्रब्रूहि भरतर्षभ ॥ १
सत्यं चैवानृतं चोभे लोकानावृत्य तिष्ठतः ।
तयोः किमाचरेद्राजन्पुरुषो धर्मनिश्चितः ॥ २
किं स्वित्सत्यं किमनृतं किं स्विद्धर्म्यं सनातनम् ।
कस्मिन्काले वदेत्सत्यं कस्मिन्कालेऽनृतं वदेत् ॥ ३

भीष्म उवाच ।

सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
यद्भूलोके सुदुर्ज्ञातं तत्ते वक्ष्यामि भारत ॥ ४
भवेत्सत्यं न वक्तव्यं वक्तव्यमनृतं भवेत् ।
यत्रानृतं भवेत्सत्यं सत्यं वाप्यनृतं भवेत् ॥ ५
तादृशे मुह्यते बालो यत्र सत्यमनिष्ठितम् ।

सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ॥ ६
अप्यनार्योऽकृतप्रज्ञः पुरुषोऽपि सुदारुणः ।
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ॥ ७
किमाश्चर्यं च यन्मूढो धर्मकामोऽप्यधर्मवित् ।
सुमहत्प्राप्नुयात्पापं गङ्गायामिव कौशिकः ॥ ८
तादृशोऽयमनुप्रश्नो यत्र धर्मः सुदुर्वचः ।
दुष्करः प्रतिसंख्यातुं तर्केणात्र व्यवस्यति ॥ ९
प्रभावार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यत्स्यादहिंसासंयुक्तं स धर्म इति निश्चयः ॥ १०
धारणाद्धर्म इत्याहुर्धर्मेण विधृताः प्रजाः ।
यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ॥ ११
श्रुतिधर्म इति ह्येके नेत्याहुरपरे जनाः ।
न तु तत्प्रत्यसूयामो न हि सर्वं विधीयते ॥ १२
येऽन्यायेन जिहीर्षन्तो धनमिच्छन्ति कर्हिचित् ।
तेभ्यस्तन्न तदाख्येयं स धर्म इति निश्चयः ॥ १३
अकूजनेन चेन्मोक्षो नात्र कूजेत्कथंचन ।
अवश्यं कूजितव्यं वा शङ्केरन्वाप्यकूजनात् ॥ १४
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विचारितम् ।
यः पापैः सह संबन्धान्मुच्यते शपथादिति ॥ १५
न च तेभ्यो धनं देयं शक्ये सति कथंचन ।
पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत् ॥ १६
स्वशरीरोपरोधेन वरमादातुमिच्छतः ।
सत्यसंप्रतिपत्त्यर्थं ये ब्रूयुः साक्षिणः क्वचित् ।
अनुक्त्वा तत्र तद्वाच्यं सर्वे तेऽनृतवादिनः ॥ १७
प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत् ।
अर्थस्य रक्षणार्थाय परेषां धर्मकारणात् ।
परेषां धर्ममाकाङ्क्षन्नीचः स्याद्धर्मभिक्षुकः ॥ १८
प्रतिश्रुत्य तु दातव्यं श्वःकार्यस्तु बलात्कृतः ।
यः कश्चिद्धर्मसमयात्प्रच्युतोऽधर्ममास्थितः ॥ १९
शठः स्वधर्ममुत्सृज्य तमिच्छेदुपजीवितुम् ।
सर्वोपायैर्निहन्तव्यः पापो निकृतिजीवनः ॥ २०
धनमित्येव पापानां सर्वेषामिह निश्चयः ।
येऽविषह्या ह्यसंभोज्या निकृत्या पतनं गताः ॥ २१
च्युता देवमनुष्येभ्यो यथा प्रेतास्तथैव ते ।
धनादानाद्दुःखतरं जीविताद्विप्रयोजनम् ॥ २२
अयं वो रोचतां धर्म इति वाच्यः प्रयत्नतः ।
न कश्चिदस्ति पापानां धर्म इत्येष निश्चयः ॥ २३
तथागतं च यो हन्यान्नासौ पापेन लिप्यते ।
स्वकर्मणा हतं हन्ति हत एव स हन्यते ।
तेषु यः समयं कश्चित्कुर्वीत हतबुद्धिषु ॥ २४
यथा काकश्च गृध्रश्च तथैवोपधिजीविनः ।
ऊर्ध्वं देहविमोक्षान्ते भवन्त्येतासु योनिषु ॥ २५
यस्मिन्यथा वर्तते यो मनुष्य-
स्तस्मिंस्तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः
साध्वाचारः साधुना प्रत्युदेयः ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

१११

युधिष्ठिर उवाच ।

क्लिश्यमानेषु भूतेषु तैस्तैर्भावैस्ततस्ततः ।
दुर्गाण्यतितरेद्येन तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः ।
वर्तन्ते संयतात्मानो दुर्गाण्यतितरन्ति ते ॥ २
ये दम्भान्न जपन्ति स्म येषां वृत्तिश्च संवृता ।
विषयांश्च निगृह्णन्ति दुर्गाण्यतितरन्ति ते ॥ ३
वासयन्त्यतिथीन्नित्यं नित्यं ये चानसूयकाः ।
नित्यं स्वाध्यायशीलाश्च दुर्गाण्यतितरन्ति ते ॥ ४

मातापित्रोश्च ये वृत्तिं वर्तन्ते धर्मकोविदाः ।
वर्जयन्ति दिवास्वप्नं दुर्गाण्यतितरन्ति ते ॥ ५
स्वेषु दारेषु वर्तन्ते न्यायवृत्तेष्वृतावृतौ ।
अग्निहोत्रपराः सन्तो दुर्गाण्यतितरन्ति ते ॥ ६
ये न लोभान्नयन्त्यर्थान्राजानो रजसावृताः ।
विषयान्परिरक्षन्तो दुर्गाण्यतितरन्ति ते ॥ ७
आहवेषु च ये शूरास्त्यक्त्वा मरणजं भयम् ।
धर्मेण जयमिच्छन्तो दुर्गाण्यतितरन्ति ते ॥ ८
ये पापानि न कुर्वन्ति कर्मणा मनसा गिरा ।
निक्षिप्तदण्डा भूतेषु दुर्गाण्यतितरन्ति ते ॥ ९
ये वदन्तीह सत्यानि प्राणत्यागेऽप्युपस्थिते ।
प्रमाणभूता भूतानां दुर्गाण्यतितरन्ति ते ॥ १०
अनध्यायेषु ये विप्राः स्वाध्यायं नैव कुर्वते ।
तपोनित्याः सुतपसो दुर्गाण्यतितरन्ति ते ॥ ११
कर्माण्यकुहकार्थानि येषां वाचश्च सूनृताः ।
येषामर्थाश्च साध्वर्था दुर्गाण्यतितरन्ति ते ॥ १२
ये तपश्च तपस्यन्ति कौमारब्रह्मचारिणः ।
विद्यावेदव्रतस्नाता दुर्गाण्यतितरन्ति ते ॥ १३
ये च संशान्तरजसः संशान्ततमसश्च ये ।
सत्ये स्थिता महात्मानो दुर्गाण्यतितरन्ति ते ॥१४
येषां न कश्चित्त्रसति त्रसन्ति न च कस्यचित् ।
येषामात्मसमो लोको दुर्गाण्यतितरन्ति ते ॥ १५
परश्रिया न तप्यन्ते ये सन्तः पुरुषर्षभाः ।
ग्राम्यादन्नान्निवृत्ताश्च दुर्गाण्यतितरन्ति ते ॥ १६
सर्वान्देवान्नमस्यन्ति सर्वान्धर्मांश्च शृण्वते ।
ये श्रद्दधाना दान्ताश्च दुर्गाण्यतितरन्ति ते ॥ १७
ये न मानितमिच्छन्ति मानयन्ति च ये परम् ।
मान्यमाना न मन्यन्ते दुर्गाण्यतितरन्ति ते ॥ १८
ये श्राद्धानि च कुर्वन्ति तिथ्यां तिथ्यां प्रजार्थिनः ।
सुविशुद्धेन मनसा दुर्गाण्यतितरन्ति ते ॥ १९
ये क्रोधं नैव कुर्वन्ति क्रुद्धान्संशमयन्ति च ।
न च कुप्यन्ति भृत्येभ्यो दुर्गाण्यतितरन्ति ते ॥२०
मधु मांसं च ये नित्यं वर्जयन्तीह मानवाः ।
जन्मप्रभृति मद्यं च दुर्गाण्यतितरन्ति ते ॥ २१
यात्रार्थं भोजनं येषां संतानार्थं च मैथुनम् ।
वाक्सत्यवचनार्थाय दुर्गाण्यतितरन्ति ते ॥ २२
ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययम् ।
भक्ता नारायणं ये च दुर्गाण्यतितरन्ति ते ॥ २३
य एष रक्तपद्माक्षः पीतवासा महाभुजः ।
सुहृद्भ्राता च मित्रं च संबन्धी च तवाच्युतः ॥२४
य इमान्सकलाँल्लोकांश्चर्मवत्परिवेष्टयेत् ।
इच्छन्प्रभुरचिन्त्यात्मा गोविन्दः पुरुषोत्तमः ॥ २५
स्थितः प्रियहिते जिष्णोः स एव पुरुषर्षभ ।
राजंस्तव च दुर्धर्षो वैकुण्ठः पुरुषोत्तमः ॥ २६
य एनं संश्रयन्तीह भक्त्या नारायणं हरिम् ।
ते तरन्तीह दुर्गाणि न मेऽत्राऽस्ति विचारणा ॥२७
दुर्गातितरणं ये च पठन्ति श्रावयन्ति च ।
पाठयन्ति च विप्रेभ्यो दुर्गाण्यतितरन्ति ते ॥ २८
इति कृत्यसमुद्देशः कीर्तितस्ते मयानघ ।
संतरेद्येन दुर्गाणि परत्रेह च मानवः ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

युधिष्ठिर उवाच ।

असौम्याः सौम्यरूपेण सौम्याश्चासौम्यदर्शिनः ।
ईदृशान्पुरुषांस्तात कथं विद्यामहे वयम् ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
व्याघ्रगोमायुसंवादं तं निबोध युधिष्ठिर ॥ २
पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः ।

परहिंसारुचिः क्रूरो बभूव पुरुषाधमः ॥ ३
स त्वायुषि परिक्षीणे जगामानीप्सितां गतिम् ।
गोमायुत्वं च संप्राप्तो दूषितः पूर्वकर्मणा ॥ ४
संस्मृत्य पूर्वजातिं स निर्वेदं परमं गतः ।
न भक्षयति मांसानि परैरुपहृतान्यपि ॥ ५
अहिंस्रः सर्वभूतेषु सत्यवाक्सुदृढव्रतः ।
चकार च यथाकाममाहारं पतितैः फलैः ॥ ६
श्मशाने तस्य चावासो गोमायोः संमतोऽभवत् ।
जन्मभूम्यनुरोधाच्च नान्यद्वासमरोचयत् ॥ ७
तस्य शौचममृष्यन्तः सर्वे ते सहजातयः ।
चालयन्ति स्म तां बुद्धिं वचनैः प्रश्रयोत्तरैः ॥ ८
वसन्पितृवने रौद्रे शौचं लप्सितुमिच्छसि ।
इयं विप्रतिपत्तिस्ते यदा त्वं पिशिताशनः ॥ ९
तत्समो वा भवास्माभिर्भक्ष्यान्दास्यामहे वयम् ।
भुङ्क्ष्व शौचं परित्यज्य यद्धि भुक्तं तदस्ति ते ॥ १०
इति तेषां वचः श्रुत्वा प्रत्युवाच समाहितः ।
मधुरैः प्रश्रितैर्वाक्यैर्हेतुमद्भिरनिष्ठुरैः ॥ ११
अप्रमाणं प्रसूतिर्मे शीलतः क्रियते कुलम् ।
प्रार्थयिष्ये तु तत्कर्म येन विस्तीर्यते यशः ॥ १२
श्मशाने यदि वासो मे समाधिर्मे निशाम्यताम् ।
आत्मा फलति कर्माणि नाश्रमो धर्मलक्षणम् ॥ १३
आश्रमे यो द्विजं हन्याद्गां वा दद्यादनाश्रमे ।
किं नु तत्पातकं न स्यात्तद्वा दत्तं वृथा भवेत् ॥ १४
भवन्तः सर्वलोभेन केवलं भक्षणे रताः ।
अनुबन्धे तु ये दोषास्तान्न पश्यन्ति मोहिताः ॥ १५
अप्रत्ययकृतां गर्ह्यामर्थापनयदूषिताम् ।
इह चामुत्र चानिष्टां तस्माद्वृत्तिं न रोचये ॥ १६
तं शुचिं पण्डितं मत्वा शार्दूलः ख्यातविक्रमः ।
कृत्वात्मसदृशां पूजां साचिव्येऽवर्धयत्स्वयम् ॥ १७
सौम्य विज्ञातरूपस्त्वं गच्छ यात्रां मया सह ।
व्रियन्तामीप्सिता भोगाः परिहार्याश्च पुष्कलाः ॥ १८
तीक्ष्णा वयमिति ख्याता भवतो ज्ञापयामहे ।
मृदुपूर्वं घातिनस्ते श्रेयश्चाधिगमिष्यति ॥ १९
अथ संपूज्य तद्वाक्यं मृगेन्द्रस्य महात्मनः ।
गोमायुः प्रश्रितं वाक्यं बभाषे किंचिदानतः ॥ २०
सदृशं मृगराजैतत्तव वाक्यं मदन्तरे ।
यत्सहायान्मृगयसे धर्मार्थकुशलाञ्शुचीन् ॥ २१
न शक्यमनमात्येन महत्त्वमनुशासितुम् ।
दुष्टामात्येन वा वीर शरीरपरिपन्थिना ॥ २२
सहायाननुरक्तांस्तु यतेतानुपसंहितान् ।
परस्परमसंघुष्टान्विजिगीषूनलोलुपान् ॥ २३
तानतीतोपधान्प्राज्ञान्हिते युक्तान्मनस्विनः ।
पूजयेथा महाभागान्यथाचार्यान्यथा पितॄन् ॥ २४
न त्वेवं मम संतोषाद्रोचतेऽन्यन्मृगाधिप ।
न कामये सुखान्भोगानैश्वर्यं वा त्वदाश्रयम् ॥ २५
न योक्ष्यति हि मे शीलं तव भृत्यैः पुरातनैः ।
ते त्वां विभेदयिष्यन्ति दुःखशीला मदन्तरे ॥ २६
संश्रयः श्लाघनीयस्त्वमन्येषामपि भास्वताम् ।
कृतात्मा सुमहाभागः पापकेष्वप्यदारुणः ॥ २७
दीर्घदर्शी महोत्साहः स्थूललक्ष्यो महाबलः ।
कृती चामोघकर्तासि भाव्यैश्च समलंकृतः ॥ २८
किं तु स्वेनास्मि संतुष्टो दुःखा वृत्तिरनुष्ठिता ।
सेवायाश्चापि नाभिज्ञः स्वच्छन्देन वनेचरः ॥ २९
राजोपक्रोशदोषाश्च सर्वे संश्रयवासिनाम् ।
वनचर्या च निःसङ्गा निर्भया निरवग्रहा ॥ ३०
नृपेणाहूयमानस्य यत्तिष्ठति भयं हृदि ।
न तत्तिष्ठति तुष्टानां वने मूलफलाशिनाम् ॥ ३१
पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥ ३२
अपराधैर्न तावन्तो भृत्याः शिष्टा नराधिपैः ।

उपघातैर्यथा भृत्या दूषिता निधनं गताः ॥ ३३
यदि त्वेतन्मया कार्यं मृगेन्द्रो यदि मन्यते ।
समयं कृतमिच्छामि वर्तितव्यं यथा मयि ॥ ३४
मदीया माननीयास्ते श्रोतव्यं च हितं वचः ।
कल्पिता या च ते वृत्तिः सा भवेत्तव सुस्थिरा ॥ ३५
न मन्त्रयेयमन्यैस्ते सचिवैः सह कर्हिचित् ।
नीतिमन्तः परीप्सन्तो वृथा ब्रूयुः परे मयि ॥ ३६
एक एकेन संगम्य रहो ब्रूयां हितं तव ।
न च ते ज्ञातिकार्येषु प्रष्टव्योऽहं हिताहिते ॥ ३७
मया संमन्त्र्य पश्चाच्च न हिंस्याः सचिवास्त्वया ।
मदीयानां च कुपितो मा त्वं दण्डं निपातयेः ॥ ३८
एवमस्त्विति तेनासौ मृगेन्द्रेणाभिपूजितः ।
प्राप्तवान्मतिसाचिव्यं गोमायुर्व्याघ्रयोनितः ॥ ३९
तं तथा सत्कृतं दृष्ट्वा युज्यमानं च कर्मणि ।
प्राद्विषन्कृतसंघाताः पूर्वभृत्या मुहुर्मुहुः ॥ ४०
मित्रबुद्ध्या च गोमायुं सान्त्वयित्वा प्रवेश्य च ।
दोषेषु समतां नेतुमैच्छन्नशुभबुद्धयः ॥ ४१
अन्यथा ह्युचिताः पूर्वं परद्रव्यापहारिणः ।
अशक्ताः किंचिदादातुं द्रव्यं गोमायुयन्त्रिताः ॥ ४२
व्युत्थानं चात्र काङ्क्षद्भिः कथाभिः प्रविलोभ्यते ।
धनेन महता चैव बुद्धिरस्य विलोभ्यते ॥ ४३
न चापि स महाप्राज्ञस्तस्माद्धैर्याच्चचाल ह ।
अथास्य समयं कृत्वा विनाशाय स्थिताः परे ॥ ४४
ईप्सितं च मृगेन्द्रस्य मांसं यत्तत्र संस्कृतम् ।
अपनीय स्वयं तद्धि तैर्न्यस्तं तत्र वेश्मनि ॥ ४५
यदर्थं चाप्यपहृतं येन यच्चैव मन्त्रितम् ।
तस्य तद्विदितं सर्वं कारणार्थं च मर्षितम् ॥ ४६
समयोऽयं कृतस्तेन साचिव्यमुपगच्छता ।
नोपघातस्त्वया ग्राह्यो राजन्मैत्रीमिहेच्छता ॥ ४७
भोजने चोपहर्तव्ये तन्मांसं न स्म दृश्यते ।
मृगराजेन चाज्ञप्तं मृग्यतां चोर इत्युत ॥ ४८
कृतकैश्चापि तन्मांसं मृगेन्द्रायोपवर्णितम् ।
सचिवेनोपनीतं ते विदुषा प्राज्ञमानिना ॥ ४९
सरोषस्त्वथ शार्दूलः श्रुत्वा गोमायुचापलम् ।
बभूवामर्षितो राजा वधं चास्याभ्यरोचयत् ॥ ५०
छिद्रं तु तस्य तद्दृष्ट्वा प्रोचुस्ते पूर्वमन्त्रिणः ।
सर्वेषामेव सोऽस्माकं वृत्तिभङ्गेषु वर्तते ॥ ५१
इदं चास्येदृशं कर्म वाल्लभ्येन तु रक्ष्यते ।
श्रुतश्च स्वामिना पूर्वं यादृशो नैव तादृशः ॥ ५२
वाङ्मात्रेणैव धर्मिष्ठः स्वभावेन तु दारुणः ।
धर्मच्छद्मा ह्ययं पापो वृथाचारपरिग्रहः ।
कार्यार्थं भोजनार्थेषु व्रतेषु कृतवाञ्श्रमम् ॥ ५३
मांसापनयनं ज्ञात्वा व्याघ्रस्तेषां तु तद्वचः ।
आज्ञापयामास तदा गोमायुर्वध्यतामिति ॥ ५४
शार्दूलवचनं श्रुत्वा शार्दूलजननी ततः ।
मृगराजं हितैर्वाक्यैः संबोधयितुमागमत् ॥ ५५
पुत्र नैतत्त्वया ग्राह्यं कपटारम्भसंवृतम् ।
कर्मसंघर्षजैर्दोषैर्दुष्यत्यशुचिभिः शुचिः ॥ ५६
नोच्छ्रितं सहते कश्चित्प्रक्रिया वैरकारिका ।
शुचेरपि हि युक्तस्य दोष एव निपात्यते ॥ ५७
लुब्धानां शुचयो द्वेष्याः कातराणां तरस्विनः ।
मूर्खाणां पण्डिता द्वेष्या दरिद्राणां महाधनाः ।
अधार्मिकाणां धर्मिष्ठा विरूपाणां सुरूपकाः ॥ ५८
बहवः पण्डिता लुब्धाः सर्वे मायोपजीविनः ।
कुर्युर्दोषमदोषस्य बृहस्पतिमतेरपि ॥ ५९
शून्यात्तच्च गृहान्मांसं यदद्यापहृतं तव ।
नेच्छते दीयमानं च साधु तावद्विमृश्यताम् ॥ ६०
असत्याः सत्यसंकाशाः सत्याश्चासत्यदर्शिनः ।
दृश्यन्ते विविधा भावास्तेषु युक्तं परीक्षणम् ॥ ६१
तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव ।

न चैवास्ति तलं व्योम्नि न खद्योते हुताशनः ॥६२
तस्मात्प्रत्यक्षदृष्टोऽपि युक्तमर्थः परीक्षितुम् ।
परीक्ष्य ज्ञापयन्ह्यर्थान्न पश्चात्परितप्यते ॥ ६३
न दुष्करमिदं पुत्र यत्प्रभुर्घातयेत्परम् ।
श्लाघनीया च वर्या च लोके प्रभवतां क्षमा ॥६४
स्थापितोऽयं पुत्र त्वया सामन्तेष्वपि विश्रुतः ।
दुःखेनासाद्यते पात्रं धार्यतामेष ते सुहृत् ॥ ६५
दूषितं परदोषैर्हि गृह्णीते योऽन्यथा शुचिम् ।
स्वयं संदूषितामात्यः क्षिप्रमेव विनश्यति ॥ ६६
तस्मादथारिसंघाताद्गोमायोः कश्चिदागतः ।
धर्मात्मा तेन चाख्यातं यथैतत्कपटं कृतम् ॥ ६७
ततो विज्ञातचारित्रः सत्कृत्य स विमोक्षितः ।
परिष्वक्तश्च सस्नेहं मृगेन्द्रेण पुनः पुनः ॥ ६८
अनुज्ञाप्य मृगेन्द्रं तु गोमायुर्नीतिशास्त्रवित् ।
तेनामर्षेण संतप्तः प्रायमासितुमैच्छत ॥ ६९
शार्दूलस्तत्र गोमायुं स्नेहात्प्रस्रुतलोचनः ।
अवारयत्स धर्मिष्ठं पूजया प्रतिपूजयन् ॥ ७०
तं स गोमायुरालोक्य स्नेहादागतसंभ्रमम् ।
बभाषे प्रणतो वाक्यं बाष्पगद्गदया गिरा ॥ ७१
पूजितोऽहं त्वया पूर्वं पश्चाच्चैव विमानितः ।
परेषामास्पदं नीतो वस्तुं नार्हाम्यहं त्वयि ॥ ७२
स्वसंतुष्टाश्च्युताः स्थानान्मानात्प्रत्यवरोपिताः ।
स्वयं चोपहृता भृत्या ये चाप्युपहृताः परैः ॥ ७३
परिक्षीणाश्च लुब्धाश्च क्रूराः काराभितापिताः ।
हृतस्वा मानिनो ये च त्यक्तोपात्ता महेप्सवः ॥७४
संतापिताश्च ये केचिद्व्यसनौघप्रतीक्षिणः ।
अन्तर्हिताः सोपहिताः सर्वे ते परसाधनाः ॥ ७५
अवमानेन युक्तस्य स्थापितस्य च मे पुनः ।
कथं यास्यसि विश्वासमहमेष्यामि वा पुनः ॥ ७६
समर्थ इति संगृह्य स्थापयित्वा परीक्ष्य च ।
कृतं च समयं भित्त्वा त्वयाहमवमानितः ॥ ७७
प्रथमं यः समाख्यातः शीलवानिति संसदि ।
न वाच्यं तस्य वैगुण्यं प्रतिज्ञां परिरक्षता ॥ ७८
एवं चावमतस्येह विश्वासं किं प्रयास्यसि ।
त्वयि चैव ह्यविश्वासे ममोद्वेगो भविष्यति ॥ ७९
शङ्कितस्त्वमहं भीतः परे छिद्रानुदर्शिनः ।
अस्निग्धाश्चैव दुस्तोषाः कर्म चैतद्बहुच्छलम् ॥८०
दुःखेन श्लेष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते ।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्तते ॥ ८१
कश्चिदेव हि भीतस्तु दृश्यते न परात्मनोः ।
कार्यापेक्षा हि वर्तन्ते भावाः स्निग्धास्तु दुर्लभाः ॥
सुदुःखं पुरुषज्ञानं चित्तं ह्येषां चलाचलम् ।
समर्थो वाप्यशक्तो वा शतेष्वेकोऽधिगम्यते ॥ ८३
अकस्मात्प्रक्रिया नृणामकस्माच्चापकर्षणम् ।
शुभाशुभे महत्त्वं च प्रकर्तुं बुद्धिलाघवात् ॥ ८४
एवं बहुविधं सान्त्वमुक्त्वा धर्मार्थहेतुमत् ।
प्रसादयित्वा राजानं गोमायुर्वनमभ्यगात् ॥ ८५
अगृह्यानुनयं तस्य मृगेन्द्रस्य स बुद्धिमान् ।
गोमायुः प्रायमासीनस्त्यक्त्वा देहं दिवं ययौ ॥८६

इति श्रीमहाभारते शान्तिपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

युधिष्ठिर उवाच ।

किं पार्थिवेन कर्तव्यं किं च कृत्वा सुखी भवेत् ।
तन्ममाचक्ष्व तत्त्वेन सर्वं धर्मभृतां वर ॥ १

भीष्म उवाच ।

हन्त तेऽहं प्रवक्ष्यामि शृणु कार्यैकनिश्चयम् ।
यथा राज्ञेह कर्तव्यं यच्च कृत्वा सुखी भवेत् ॥ २
न त्वेवं वर्तितव्यं स यथेदमनुशुश्रुमः ।

उष्ट्रस्य सुमहद्वृत्तं तन्निबोध युधिष्ठिर ॥ ३
जातिस्मरो महानुष्ट्रः प्राजापत्ययुगोद्भवः ।
तपः सुमहदातिष्ठदरण्ये संशितव्रतः ॥ ४
तपसस्तस्य चान्ते वै प्रीतिमानभवत्प्रभुः ।
परेण छन्दयामास ततश्चैनं पितामहः ॥ ५

उष्ट्र उवाच ।

भगवंस्त्वत्प्रसादान्मे दीर्घा ग्रीवा भवेदियम् ।
योजनानां शतं साग्रं या गच्छेच्चरितुं विभो ॥ ६

भीष्म उवाच ।

एवमस्त्विति चोक्तः स वरदेन महात्मना ।
प्रतिलभ्य वरं श्रेष्ठं ययावुष्ट्रः स्वकं वनम् ॥ ७
स चकार तदालस्यं वरदानात्स दुर्मतिः ।
न चैच्छच्चरितुं गन्तुं दुरात्मा कालमोहितः ॥ ८
स कदाचित्प्रसार्यैवं तां ग्रीवां शतयोजनाम् ।
चचाराश्रान्तहृदयो वातश्चागात्ततो महान् ॥ ९
स गुहायां शिरोग्रीवं निधाय पशुरात्मनः ।
आस्ताथ वर्षमभ्यागात्सुमहत्प्लावयज्जगत् ॥ १०
अथ शीतपरीताङ्गो जम्बुकः क्षुच्छ्रमान्वितः ।
सदारस्तां गुहामाशु प्रविवेश जलार्दितः ॥ ११
स दृष्ट्वा मांसजीवी तु सुभृशं क्षुच्छ्रमान्वितः ।
अभक्षयत्ततो ग्रीवामुष्ट्रस्य भरतर्षभ ॥ १२
यदा त्वबुध्यतात्मानं भक्ष्यमाणं स वै पशुः ।
तदा संकोचने यत्नमकरोद्भृशदुःखितः ॥ १३
यावदूर्ध्वमधश्चैव ग्रीवां संक्षिपते पशुः ।
तावत्तेन सदारेण जम्बुकेन स भक्षितः ॥ १४
स हत्वा भक्षयित्वा च जम्बुकोष्ट्रं ततस्तदा ।
विगते वातवर्षे च निश्चक्राम गुहामुखात् ॥ १५
एवं दुर्बुद्धिना प्राप्तमुष्ट्रेण निधनं तदा ।
आलस्यस्य क्रमात्पश्य महद्दोषमुपागतम् ॥ १६
त्वमप्येतं विधिं त्यक्त्वा योगेन नियतेन्द्रियः ।
वर्तस्व बुद्धिमूलं हि विजयं मनुरब्रवीत् ॥ १७
बुद्धिश्रेष्ठानि कर्माणि बाहुमध्यानि भारत ।
तानि जङ्घाजघन्यानि भारप्रत्यवराणि च ॥ १८
राज्यं तिष्ठति दक्षस्य संगृहीतेन्द्रियस्य च ।
गुप्तमन्त्रश्रुतवतः सुसहायस्य चानघ ॥ १९
परीक्ष्यकारिणोऽर्थाश्च तिष्ठन्तीह युधिष्ठिर ।
सहाययुक्तेन मही कृत्स्ना शक्या प्रशासितुम् ॥२०
इदं हि सद्भिः कथितं विधिज्ञैः
पुरा महेन्द्रप्रतिमप्रभाव ।
मयापि चोक्तं तव शास्त्रदृष्ट्या
त्वमत्र युक्तः प्रचरस्व राजन् ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

युधिष्ठिर उवाच ।

राजा राज्यमनुप्राप्य दुर्बलो भरतर्षभ ।
अमित्रस्यातिवृद्धस्य कथं तिष्ठेदसाधनः ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सरितां चैव संवादं सागरस्य च भारत ॥ २
सुरारिनिलयः शश्वत्सागरः सरितां पतिः ।
पप्रच्छ सरितः सर्वाः संशयं जातमात्मनः ॥ ३
समूलशाखान्पश्यामि निहतांश्छायिनो द्रुमान् ।
युष्माभिरिह पूर्णाभिरन्यांस्तत्र न वेतसम् ॥ ४
अकायश्चाल्पसारश्च वेतसः कूलजश्च वः ।
अवज्ञाय नशक्यो वा किंचिद्वा तेन वा कृतम् ॥५
तदहं श्रोतुमिच्छामि सर्वासामेव वो मतम् ।
यथा कूलानि चेमानि भित्त्वा नानीयते वशम् ॥६
ततः प्राह नदी गङ्गा वाक्यमुत्तरमर्थवत् ।
हेतुमद्ग्राहकं चैव सागरं सरितां पतिम् ॥ ७

तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ।
ततस्त्यजन्ति तत्स्थानं प्रातिलोम्यादचेतसः ॥ ८
वेतसो वेगमायान्तं दृष्ट्वा नमति नेतरः ।
स च वेगेऽभ्यतिक्रान्ते स्थानमासाद्य तिष्ठति ॥ ९
कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्रुमः ।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ॥ १०
मारुतोदकवेगेन ये नमन्त्युन्नमन्ति च ।
ओषध्यः पादपा गुल्मा न ते यान्ति पराभवम् ॥ ११
यो हि शत्रोर्विवृद्धस्य प्रभोर्वधविनाशने ।
पूर्वं न सहते वेगं क्षिप्रमेव स नश्यति ॥ १२
सारासारं बलं वीर्यमात्मनो द्विषतश्च यः ।
जानन्विचरति प्राज्ञो न स याति पराभवम् ॥ १३
एवमेव यदा विद्वान्मन्येतातिबलं रिपुम् ।
संश्रयेद्वैतसीं वृत्तिमेवं प्रज्ञानलक्षणम् ॥ १४
इति श्रीमहाभारते शान्तिपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

युधिष्ठिर उवाच ।

विद्वान्मूर्खप्रगल्भेन मृदुस्तीक्ष्णेन भारत ।
आक्रुश्यमानः सदसि कथं कुर्यादरिंदम ॥ १

भीष्म उवाच ।

श्रूयतां पृथिवीपाल यथैषोऽर्थोऽनुगीयते ।
सदा सुचेताः सहते नरस्येहाल्पचेतसः ॥ २
अरुष्यन्क्रुश्यमानस्य सुकृतं नाम विन्दति ।
दुष्कृतं चात्मनो मर्षी रुष्यत्येवापमार्ष्टि वै ॥ ३
टिट्टिभं तमुपेक्षेत वाशमानमिवातुरम् ।
लोकविद्वेषमापन्नो निष्फलं प्रतिपद्यते ॥ ४
इति स श्लाघते नित्यं तेन पापेन कर्मणा ।
इदमुक्तो मया कश्चित्संमतो जनसंसदि ।
स तत्र व्रीडितः शुष्को मृतकल्पोऽवतिष्ठति ॥ ५
श्लाघन्नश्लाघनीयेन कर्मणा निरपत्रपः ।
उपेक्षितव्यो दान्तेन तादृशः पुरुषाधमः ॥ ६
यद्यद्ब्रूयादल्पमतिस्तत्तदस्य सहेत्सदा ।
प्राकृतो हि प्रशंसन्वा निन्दन्वा किं करिष्यति ।
वने काक इवाबुद्धिर्वाशमानो निरर्थकम् ॥ ७
यदि वाग्भिः प्रयोगः स्यात्प्रयोगे पापकर्मणः ।
वागेवार्थो भवेत्तस्य न ह्येवार्थो जिघांसतः ॥ ८
निषेकं विपरीतं स आचष्टे वृत्तचेष्टया ।
मयूर इव कौपीनं नृत्यन्संदर्शयन्निव ॥ ९
यस्यावाच्यं न लोकेऽस्ति नाकार्यं वापि किंचन ।
वाचं तेन न संदध्याच्छुचिः संक्लिष्टकर्मणा ॥ १०
प्रत्यक्षं गुणवादी यः परोक्षं तु विनिन्दकः ।
स मानवः श्ववल्लोके नष्टलोकपरायणः ॥ ११
तादृग्जनशतस्यापि यद्ददाति जुहोति च ।
परोक्षेणापवादेन तन्नाशयति स क्षणात् ॥ १२
तस्मात्प्राज्ञो नरः सद्यस्तादृशं पापचेतसम् ।
वर्जयेत्साधुभिर्वर्ज्यं सारमेयामिषं यथा ॥ १३
परिवादं ब्रुवाणो हि दुरात्मा वै महात्मने ।
प्रकाशयति दोषान्स्वान्सर्पः फणमिवोच्छ्रितम् ॥ १४
तं स्वकर्माणि कुर्वाणं प्रतिकर्तुं य इच्छति ।
भस्मकूट इवाबुद्धिः खरो रजसि मज्जति ॥ १५

मनुष्यशालावृकमप्रशान्तं
जनापवादे सततं निविष्टम् ।
मातङ्गमुन्मत्तमिवोन्नदन्तं
त्यजेत तं श्वानमिवातिरौद्रम् ॥ १६
अधीरजुष्टे पथि वर्तमानं
दमादपेतं विनयाच्च पापम् ।
अरिव्रतं नित्यमभूतिकामं
धिगस्तु तं पापमतिं मनुष्यम् ॥ १७
प्रत्युच्यमानस्तु हि भूय एभि-

निशाम्य मा भूस्त्वमथार्तरूपः ।
उच्चस्य नीचेन हि संप्रयोगं
विगर्हयन्ति स्थिरबुद्धयो ये ॥ १८
क्रुद्धो दशार्धेन हि ताडयेद्वा
स पांसुभिर्वापकिरेत्तुषैर्वा ।
विवृत्य दन्तांश्च विभीषयेद्वा
सिद्धं हि मूर्खे कुपिते नृशंसे ॥ १९
विगर्हणां परमदुरात्मना कृतां
सहेत यः संसदि दुर्जनान्नरः ।
पठेदिदं चापि निदर्शनं सदा
न वाङ्मयं स लभति किंचिदप्रियम् ॥२०

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ संशयो मे महानयम् ।
स च्छेत्तव्यस्त्वया राजन्भवान्कुलकरो हि नः ॥ १
पुरुषाणामयं तात दुर्वृत्तानां दुरात्मनाम् ।
कथितो वाक्यसंचारस्ततो विज्ञापयामि ते ॥ २
यद्धितं राज्यतन्त्रस्य कुलस्य च सुखोदयम् ।
आयत्यां च तदात्वे च क्षेमवृद्धिकरं च यत् ॥ ३
पुत्रपौत्राभिरामं च राष्ट्रवृद्धिकरं च यत् ।
अन्नपाने शरीरे च हितं यत्तद्ब्रवीहि मे ॥ ४
अभिषिक्तो हि यो राजा राज्यस्थो मित्रसंवृतः ।
असुहृत्समुपेतो वा स कथं रञ्जयेत्प्रजाः ॥ ५
यो ह्यसत्प्रग्रहरतिः स्नेहरागबलात्कृतः ।
इन्द्रियाणामनीशत्वादसज्जनबुभूषकः ॥ ६
तस्य भृत्या विगुणतां यान्ति सर्वे कुलोद्गताः ।
न च भृत्यफलैरर्थैः स राजा संप्रयुज्यते ॥ ७
एतान्मे संशयस्थस्य राजधर्मान्सुदुर्लभान् ।
बृहस्पतिसमो बुद्ध्या भवाञ्शंसितुमर्हति ॥ ८
शंसिता पुरुषव्याघ्र त्वं नः कुलहिते रतः ।
क्षत्ता चैव पटुप्रज्ञो यो नः शंसति सर्वदा ॥ ९
त्वत्तः कुलहितं वाक्यं श्रुत्वा राज्यहितोदयम् ।
अमृतस्याव्ययस्येव तृप्तः स्वप्स्याम्यहं सुखम् ॥ १०
कीदृशाः संनिकर्षस्था भृत्याः स्युर्वा गुणान्विताः ।
कीदृशैः किंकुलीनैर्वा सह यात्रा विधीयते ॥ ११
न ह्येको भृत्यरहितो राजा भवति रक्षिता ।
राज्यं चेदं जनः सर्वस्तत्कुलीनोऽभिशंसति ॥ १२
न हि प्रशास्तुं राज्यं हि शक्यमेकेन भारत ।
असहायवता तात नैवार्थाः केचिदप्युत ।
लब्धुं लब्ध्वा चापि सदा रक्षितुं भरतर्षभ ॥ १३

भीष्म उवाच ।

यस्य भृत्यजनः सर्वो ज्ञानविज्ञानकोविदः ।
हितैषी कुलजः स्निग्धः स राज्यफलमश्नुते ॥ १४
मन्त्रिणो यस्य कुलजा असंहार्याः सहोषिताः ।
नृपतेर्मतिदाः सन्ति संबन्धज्ञानकोविदाः ॥ १५
अनागतविधातारः कालज्ञानविशारदाः ।
अतिक्रान्तमशोचन्तः स राज्यफलमश्नुते ॥ १६
समदुःखसुखा यस्य सहायाः सत्यकारिणः ।
अर्थचिन्तापरा यस्य स राज्यफलमश्नुते ॥ १७
यस्य नार्ता जनपदः संनिकर्षगतः सदा ।
अक्षुद्रः सत्पथालम्बी स राज्यफलभाग्भवेत् ॥ १८
कोशाक्षपटलं यस्य कोशवृद्धिकरैर्जनैः ।
आप्तैस्तुष्टैश्च सततं धार्यते स नृपोत्तमः ॥ १९
कोष्ठागारमसंहार्यैराप्तैः संचयतत्परैः ।
पात्रभूतैरलुब्धैश्च पाल्यमानं गुणीभवेत् ॥ २०
व्यवहारश्च नगरे यस्य कर्मफलोदयः ।
दृश्यते शङ्खलिखितः स धर्मफलभाग्भवेत् ॥ २१
संगृहीतमनुष्यश्च यो राजा राजधर्मवित् ।

षड्भागं प्रतिगृह्णन्स धर्मात्फलमुपाश्नुते ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निदर्शनकरं लोके सज्जनाचरितं सदा ॥ १
अस्यैवार्थस्य सदृशं यच्छ्रुतं मे तपोवने ।
जामदग्न्यस्य रामस्य यदुक्तमृषिसत्तमैः ॥ २
वने महति कस्मिंश्चिदमनुष्यनिषेविते ।
ऋषिर्मूलफलाहारो नियतो नियतेन्द्रियः ॥ ३
दीक्षादमपरः शान्तः स्वाध्यायपरमः शुचिः ।
उपवासविशुद्धात्मा सततं सत्पथे स्थितः ॥ ४
तस्य संदृश्य सद्भावमुपविष्टस्य धीमतः ।
सर्वसत्त्वाः समीपस्था भवन्ति वनचारिणः ॥ ५
सिंहव्याघ्राः सशरभा मत्ताश्चैव महागजाः ।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः ॥ ६
ते सुखप्रश्नदाः सर्वे भवन्ति क्षतजाशनाः ।
तस्यर्षेः शिष्यवच्चैव न्यग्भूताः प्रियकारिणः ॥ ७
दत्त्वा च ते सुखप्रश्नं सर्वे यान्ति यथागतम् ।
ग्राम्यस्त्वेकः पशुस्तत्र नाजहाच्छ्वा महामुनिम् ॥ ८
भक्तोऽनुरक्तः सततमुपवासकृशोऽबलः ।
फलमूलोत्कराहारः शान्तः शिष्टाकृतिर्यथा ॥ ९
तस्यर्षेरुपविष्टस्य पादमूले महामुनेः ।
मनुष्यवद्गतो भावः स्नेहबद्धोऽभवद्भृशम् ॥ १०
ततोऽभ्ययान्महावीर्यो द्वीपी क्षतजभोजनः ।
श्वार्थमत्यन्तसंदुष्टः क्रूरः काल इवान्तकः ॥ ११
लेलिह्यमानस्तृषितः पुच्छास्फोटनतत्परः ।
व्यादितास्यः क्षुधाभग्नः प्रार्थयानस्तदामिषम् ॥ १२
तं दृष्ट्वा क्रूरमायान्तं जीवितार्थी नराधिप ।
प्रोवाच श्वा मुनिं तत्र यत्तच्छृणु महामते ॥ १३
श्वशत्रुर्भगवन्नत्र द्वीपी मां हन्तुमिच्छति ।
त्वत्प्रसादाद्भयं न स्यात्तस्मान्मम महामुने ॥ १४

मुनिरुवाच ।

न भयं द्वीपिनः कार्यं मृत्युतस्ते कथंचन ।
एष श्वरूपरहितो द्वीपी भवसि पुत्रक ॥ १५

भीष्म उवाच ।

ततः श्वा द्वीपितां नीतो जाम्बूनदनिभाकृतिः ।
चित्राङ्गो विस्फुरन्हृष्टो वने वसति निर्भयः ॥ १६
ततोऽभ्ययान्महारौद्रो व्यादितास्यः क्षुधान्वितः ।
द्वीपिनं लेलिहद्वक्त्रो व्याघ्रो रुधिरलालसः ॥ १७
व्याघ्रं दृष्ट्वा क्षुधाभग्नं दंष्ट्रिणं वनगोचरम् ।
द्वीपी जीवितरक्षार्थमृषिं शरणमेयिवान् ॥ १८
ततः संवासजं स्नेहमृषिणा कुर्वता सदा ।
स द्वीपी व्याघ्रतां नीतो रिपुभिर्बलवत्तरः ।
ततो दृष्ट्वा स शार्दूलो नाभ्यहंस्तं विशां पते ॥ १९
स तु श्वा व्याघ्रतां प्राप्य बलवान्पिशिताशनः ।
न मूलफलभोगेषु स्पृहामप्यकरोत्तदा ॥ २०
यथा मृगपतिर्नित्यं प्रकाङ्क्षति वनौकसः ।
तथैव स महाराज व्याघ्रः समभवत्तदा ॥ २१
व्याघ्रस्तूटजमूलस्थस्तृप्तः सुप्तो हतैर्मृगैः ।
नागश्चागात्तमुद्देशं मत्तो मेघ इवोत्थितः ॥ २२
प्रभिन्नकरटः प्रांशुः पद्मी विततमस्तकः ।
सुविषाणो महाकायो मेघगम्भीरनिस्वनः ॥ २३
तं दृष्ट्वा कुञ्जरं मत्तमायान्तं मदगर्वितम् ।
व्याघ्रो हस्तिभयात्त्रस्तस्तमृषिं शरणं ययौ ॥ २४
ततोऽनयत्कुञ्जरतां तं व्याघ्रमृषिसत्तमः ।
महामेघोपमं दृष्ट्वा तं स भीतोऽभवद्गजः ॥ २५
ततः कमलषण्डानि शल्लकीगहनानि च ।
व्यचरत्स मुदा युक्तः पद्मरेणुविभूषितः ॥ २६

कदाचिद्रममाणस्य हस्तिनः सुमुखं तदा ।
ऋषेस्तस्योटजस्थस्य कालोऽगच्छन्निशानिशम् ॥२७
अथाजगाम तं देशं केसरी केसरारुणः ।
गिरिकन्दरजो भीमः सिंहो नागकुलान्तकः ॥२८
तं दृष्ट्वा सिंहमायान्तं नागः सिंहभयाकुलः ।
ऋषिं शरणमापेदे वेपमानो भयातुरः ॥ २९
ततः स सिंहतां नीतो नागेन्द्रो मुनिना तदा ।
वन्यं नागणयत्सिंहं तुल्यजातिसमन्वयात् ॥ ३०
दृष्ट्वा च सोऽनशत्सिंहो वन्यो भीसन्नवाग्बलः ।
स चाश्रमेऽवसत्सिंहस्तस्मिन्नेव वने सुखी ॥ ३१
न त्वन्ये क्षुद्रपशवस्तपोवननिवासिनः ।
व्यदृश्यन्त भयत्रस्ता जीविताकाङ्क्षिणः सदा ॥३२
कदाचित्कालयोगेन सर्वप्राणिविहिंसकः ।
बलवान्क्षतजाहारो नानासत्त्वभयंकरः ॥ ३३
अष्टपादूर्ध्वचरणः शरभो वनगोचरः ।
तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनम् ॥ ३४
तं मुनिः शरभं चक्रे बलोत्कटमरिंदम ।
ततः स शरभो वन्यो मुने शरभमग्रतः ।
दृष्ट्वा बलिनमत्युग्रं द्रुतं संप्राद्रवद्भयात् ॥ ३५
स एवं शरभस्थाने न्यस्तो वै मुनिना तदा ।
मुनेः पार्श्वगतो नित्यं शारभ्यं सुखमाप्तवान् ॥३६
ततः शरभसंत्रस्ताः सर्वे मृगगणा वनात् ।
दिशः संप्राद्रवन्राजन्भयाजीवितकाङ्क्षिणः ॥ ३७
शरभोऽप्यतिसंदुष्टो नित्यं प्राणिवधे रतः ।
फलमूलाशनं शान्तं नैच्छत्स पिशिताशनः ॥ ३८
ततो रुधिरतर्षेण बलिना शरभोऽन्वितः ।
इयेष तं मुनिं हन्तुमकृतज्ञः श्वयोनिजः ॥ ३९
ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा ।
विज्ञाय च महाप्राज्ञो मुनिः श्वानं तमुक्तवान् ॥४०
श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः ।
व्याघ्रो नागो मदपटुर्नागः सिंहत्वमाप्तवान् ॥४१
सिंहोऽतिबलसंयुक्तो भूयः शरभतां गतः ।
मया स्नेहपरीतेन न विमृष्टः कुलान्वयः ॥ ४२
यस्मादेवमपापं मां पाप हिंसितुमिच्छसि ।
तस्मात्स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि ॥४३
ततो मुनिजनद्वेषाद्दुष्टात्मा श्वाकृतोऽबुधः ।
ऋषिणा शरभः शप्तः स्वं रूपं पुनराप्तवान् ॥ ४४

इति श्रीमहाभारते शान्तिपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७

११८

भीष्म उवाच ।

स श्वा प्रकृतिमापन्नः परं दैन्यमुपागमत् ।
ऋषिणा हुंकृतः पापस्तपोवनबहिष्कृतः ॥ १
एवं राज्ञा मतिमता विदित्वा शीलशौचताम् ।
आर्जवं प्रकृतिं सत्त्वं कुलं वृत्तं श्रुतं दमम् ॥ २
अनुक्रोशं बलं वीर्यं भावं संप्रशमं क्षमाम् ।
भृत्या ये यत्र योग्याः स्युस्तत्र स्थाप्याः सुशिक्षिताः
नापरीक्ष्य महीपालः प्रकर्तुं भृत्यमर्हति ।
अकुलीननराकीर्णो न राजा सुखमेधते ॥ ४
कुलजः प्रकृतो राजा तत्कुलीनतया सदा ।
न पापे कुरुते बुद्धिं निन्द्यमानोऽप्यनागसि ॥ ५
अकुलीनस्तु पुरुषः प्रकृतः साधुसंक्षयात् ।
दुर्लभैश्वर्यतां प्राप्तो निन्दितः शत्रुतां व्रजेत् ॥ ६
कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानकोविदम् ।
सर्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं देशजं तथा ॥ ७
कृतज्ञं बलवन्तं च क्षान्तं दान्तं जितेन्द्रियम् ।
अलुब्धं लब्धसंतुष्टं स्वामिमित्रबुभूषकम् ॥ ८
सचिवं देशकालज्ञं सर्वसंग्रहणे रतम् ।
सत्कृतं युक्तमनसं हितैषिणमतन्द्रितम् ॥ ९
युक्ताचारं स्वविषये संधिविग्रहकोविदम् ।

राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियम् ॥ १०
खातकव्यूहतत्त्वज्ञं बलहर्षणकोविदम् ।
इङ्गिताकारतत्त्वज्ञं यात्रायानविशारदम् ॥ ११
हस्तिशिक्षासु तत्त्वज्ञमहंकारविवर्जितम् ।
प्रगल्भं दक्षिणं दान्तं बलिनं युक्तकारिणम् ॥ १२
चोक्षं चोक्षजनाकीर्णं सुवेषं सुखदर्शनम् ।
नायकं नीतिकुशलं गुणषष्ट्या समन्वितम् ॥ १३
अस्तब्धं प्रश्रितं शक्तं मृदुवादिनमेव च ।
धीरं श्लक्ष्णं महर्द्धिं च देशकालोपपादकम् ॥ १४
सचिवं यः प्रकुरुते न चैनमवमन्यते ।
तस्य विस्तीर्यते राज्यं ज्योत्स्ना ग्रहपतेरिव ॥ १५
एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः ।
एष्टव्यो धर्मपरमः प्रजापालनतत्परः ॥ १६
धीरो मर्षी शुचिः शीघ्रः काले पुरुषकारवित् ।
शुश्रूषुः श्रुतवाञ्श्रोता ऊहापोहविशारदः ॥ १७
मेधावी धारणायुक्तो यथान्यायोपपादकः ।
दान्तः सदा प्रियाभाषी क्षमावांश्च विपर्यये ॥ १८
दानाच्छेदे स्वयंकारी सुद्वारः सुखदर्शनः ।
आर्तहस्तप्रदो नित्यमाप्तंमन्यो नये रतः ॥ १९
नाहंवादी न निर्द्वंद्वो न यत्किंचनकारकः ।
कृते कर्मण्यमोघानां कर्ता भृत्यजनप्रियः ॥ २०
संगृहीतजनोऽस्तब्धः प्रसन्नवदनः सदा ।
दाता भृत्यजनावेक्षी न क्रोधी सुमहामनाः ॥ २१
युक्तदण्डो न निर्दण्डो धर्मकार्यानुशासकः ।
चारनेत्रः परावेक्षी धर्मार्थकुशलः सदा ॥ २२
राजा गुणशताकीर्ण एष्टव्यस्तादृशो भवेत् ।
योधाश्चैव मनुष्येन्द्र सर्वैर्गुणगणैर्वृताः ॥ २३
अन्वेष्टव्याः सुपुरुषाः सहाया राज्यधारणाः ।
न विमानयितव्याश्च राज्ञा वृद्धिमभीप्सता ॥ २४
योधाः समरशौटीराः कृतज्ञाः शस्त्रकोविदाः ।
धर्मशास्त्रसमायुक्ताः पदातिजनसंयुताः ॥ २५
अर्थमानविवृद्धाश्च रथचर्याविशारदाः ।
इष्वस्त्रकुशला यस्य तस्येयं नृपतेर्मही ॥ २६
सर्वसंग्रहणे युक्तो नृपो भवति यः सदा ।
उत्थानशीलो मित्राढ्यः स राजा राजसत्तमः ॥२७
शक्या अश्वसहस्रेण वीरारोहेण भारत ।
संगृहीतमनुष्येण कृत्स्ना जेतुं वसुंधरा ॥ २८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

भीष्म उवाच ।

एवं शुनासमान्भृत्यान्स्वस्थाने यो नराधिपः ।
नियोजयति कृत्येषु स राज्यफलमश्नुते ॥ १
न श्वा स्वस्थानमुत्क्रम्य प्रमाणमभि सत्कृतः ।
आरोप्यः श्वा स्वकात्स्थानादुत्क्रम्यान्यत्प्रपद्यते ॥ २
स्वजातिकुलसंपन्नाः स्वेषु कर्मस्ववस्थिताः ।
प्रकर्तव्या बुधा भृत्या नास्थाने प्रक्रिया क्षमा ॥ ३
अनुरूपाणि कर्माणि भृत्येभ्यो यः प्रयच्छति ।
स भृत्यगुणसंपन्नं राजा फलमुपाश्नुते ॥ ४
शरभः शरभस्थाने सिंहः सिंह इवोर्जितः ।
व्याघ्रो व्याघ्र इव स्थाप्यो द्वीपी द्वीपी यथा तथा ॥ ५
कर्मस्विहानुरूपेषु न्यस्या भृत्या यथाविधि ।
प्रतिलोमं न भृत्यास्ते स्थाप्याः कर्मफलैषिणा ॥ ६
यः प्रमाणमतिक्रम्य प्रतिलोमं नराधिपः ।
भृत्यान्स्थापयतेऽबुद्धिर्न स रञ्जयते प्रजाः ॥ ७
न बालिशा न च क्षुद्रा न चाप्रतिमितेन्द्रियाः ।
नाकुलीना नरा पार्श्वे स्थाप्या राज्ञा हितैषिणा ॥ ८
साधवः कुशलाः शूरा ज्ञानवन्तोऽनसूयकाः ।
अक्षुद्राः शुचयो दक्षा नराः स्युः पारिपार्श्वकाः ॥९
न्यग्भूतास्तत्पराः क्षान्ताश्चौक्षाः प्रकृतिजाः शुभाः ।

स्वे स्वे स्थानेऽपरिक्रुष्टास्ते स्यू राज्ञो बहिश्चराः ॥१०
सिंहस्य सततं पार्श्वे सिंह एव जनो भवेत् ।
असिंहः सिंहसहितः सिंहवल्लभते फलम् ॥ ११
यस्तु सिंहः श्वभिः कीर्णः सिंहकर्मफले रतः ।
न स सिंहफलं भोक्तुं शक्तः श्वभिरुपासितः ॥१२
एवमेतैर्मनुष्येन्द्र शूरैः प्राज्ञैर्बहुश्रुतैः ।
कुलीनैः सह शक्येत कृत्स्नां जेतुं वसुंधराम् ॥१३
नावैद्यो नानृजुः पार्श्वे नाविद्यो नामहाधनः ।
संग्राह्यो वसुधापालैर्भृत्यो भृत्यवतां वर ॥ १४
बाणवद्विसृता यान्ति स्वामिकार्यपरा जनाः ।
ये भृत्याः पार्थिवहितास्तेषां सान्त्वं प्रयोजयेत् ॥१५
कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभिः ।
कोशमूला हि राजानः कोशमूलकरो भव ॥ १६
कोष्ठागारं च ते नित्यं स्फीतं धान्यैः सुसंचितम् ।
सदास्तु सत्सु संन्यस्तं धनधान्यपरो भव ॥ १७
नित्ययुक्ताश्च ते भृत्या भवन्तु रणकोविदाः ।
वाजिनां च प्रयोगेषु वैशारद्यमिहेष्यते ॥ १८
ज्ञातिबन्धुजनावेक्षी मित्रसंबन्धिसंवृतः ।
पौरकार्यहितान्वेषी भव कौरवनन्दन ॥ १९
एषा ते नैष्ठिकी बुद्धिः प्रज्ञा चाभिहिता मया ।
श्वा ते निदर्शनं तात किं भूयः श्रोतुमिच्छसि ॥२०

इति श्रीमहाभारते शान्तिपर्वणि
एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

युधिष्ठिर उवाच ।

राजवृत्तान्यनेकानि त्वया प्रोक्तानि भारत ।
पूर्वैः पूर्वनियुक्तानि राजधर्मार्थवेदिभिः ॥ १
तदेव विस्तरेणोक्तं पूर्वैर्दृष्टं सतां मतम् ।
प्रणयं राजधर्माणां प्रब्रूहि भरतर्षभ ॥ २

भीष्म उवाच ।

रक्षणं सर्वभूतानामिति क्षत्रे परं मतम् ।
तद्यथा रक्षणं कुर्यात्तथा शृणु महीपते ॥ ३
यथा बर्हाणि चित्राणि बिभर्ति भुजगाशनः ।
तथा बहुविधं राजा रूपं कुर्वीत धर्मवित् ॥ ४
तैक्ष्ण्यं जिह्मत्वमादान्त्यं सत्यमार्जवमेव च ।
मध्यस्थः सत्त्वमातिष्ठंस्तथा वै सुखमृच्छति ॥ ५
यस्मिन्नर्थे हितं यत्स्यात्तद्वर्णं रूपमाविशेत् ।
बहुरूपस्य राज्ञो हि सूक्ष्मोऽप्यर्थो न सीदति ॥६
नित्यं रक्षितमन्त्रः स्याद्यथा मूकः शरच्छिखी ।
श्लक्ष्णाक्षरतनुः श्रीमान्भवेच्छास्त्रविशारदः ॥ ७
आपद्द्वारेषु यत्तः स्याज्जलप्रस्रवणेष्विव ।
शैलवर्षोदकानीव द्विजान्सिद्धान्समाश्रयेत् ॥ ८
अर्थकामः शिखां राजा कुर्याद्धर्मध्वजोपमाम् ।
नित्यमुद्यतदण्डः स्यादाचरेच्चाप्रमादतः ।
लोके चायव्ययौ दृष्ट्वा वृक्षाद्वृक्षमिवाप्लवन् ॥ ९
मृजावान्स्यात्स्वयूथ्येषु भावानि चरणैः क्षिपेत् ।
जातपक्षः परिस्पन्देद्रक्षेद्वैकल्यमात्मनः ॥ १०
दोषान्विवृणुयाच्छत्रोः परपक्षान्विधूनयेत् ।
काननेष्विव पुष्पाणि बर्हिवार्थान्समाचरेत् ॥ १
उच्छ्रितानाश्रयेत्स्फीतान्नरेन्द्रानचलोपमान् ।
श्रयेच्छायामविज्ञातां गुप्तं शरणमाश्रयेत् ॥ १२
प्रावृषीवासितग्रीवो मज्जेत निशि निर्जने ।
मायूरेण गुणेनैव स्त्रीभिश्चालक्षितश्चरेत् ।
न जह्याच्च तनुत्राणं रक्षेदात्मानमात्मना ॥ १३
चारभूमिष्वभिगमान्पाशांश्च परिवर्जयेत् ।
पीडयेच्चापि तां भूमिं प्रणश्येद्गहने पुनः ॥ १४
हन्यात्क्रुद्धानतिविषान्ये जिह्मगतयोऽहितान् ।
नाश्रयेद्बालबर्हाणि सन्निवासानि वासयेत् ॥ १
सदा बर्हिनिभः कामं प्रसक्तिकृतमाचरेत् ।

सर्वतश्चाददेत्प्रज्ञां पतंगान्गहनेष्विव ।
एवं मयूरवद्राजा स्वराष्ट्रं परिपालयेत् ॥ १६
आत्मवृद्धिकरीं नीतिं विदधीत विचक्षणः ।
आत्मसंयमनं बुद्ध्या परबुद्ध्यावतारणम् ।
बुद्ध्या चात्मगुणप्राप्तिरेतच्छास्त्रनिदर्शनम् ॥ १७
परं चाश्वासयेत्साम्ना स्वशक्तिं चोपलक्षयेत् ।
आत्मनः परिमर्शेन बुद्धिं बुद्ध्या विचारयेत् ।
सान्त्वयोगमतिः प्राज्ञः कार्याकार्यविचारकः ॥ १८
निगूढबुद्धिर्धीरः स्याद्वक्तव्ये वक्ष्यते तथा ।
संनिकृष्टां कथां प्राज्ञो यदि बुद्ध्या बृहस्पतिः ।
स्वभावमेष्यते तप्तं कृष्णायसमिवोदके ॥ १९
अनुयुञ्जीत कृत्यानि सर्वाण्येव महीपतिः ।
आगमैरुपदिष्टानि स्वस्य चैव परस्य च ॥ २०
क्षुद्रं क्रूरं तथा प्राज्ञं शूरं चार्थविशारदम् ।
स्वकर्मणि नियुञ्जीत ये चान्ये वचनाधिकाः ॥२१
अप्यदृष्ट्वा नियुक्तानि अनुरूपेषु कर्मसु ।
सर्वांस्ताननुवर्तेत स्वरांस्तन्त्रीरिवायता ॥ २२
धर्माणामविरोधेन सर्वेषां प्रियमाचरेत् ।
ममायमिति राजा यः स पर्वत इवाचलः ॥ २३
व्यवसायं समाधाय सूर्यो रश्मिमिवायताम् ।
धर्ममेवाभिरक्षेत कृत्वा तुल्ये प्रियाप्रिये ॥ २४
कुलप्रकृतिदेशानां धर्मज्ञान्मृदुभाषिणः ।
मध्ये वयसि निर्दोषान्हिते युक्ताञ्जितेन्द्रियान् ॥
अलुब्धाञ्शिक्षितान्दान्तान्धर्मेषु परिनिष्ठितान् ।
स्थापयेत्सर्वकार्येषु राजा धर्मार्थरक्षिणः ॥ २६
एतेनैव प्रकारेण कृत्यानामागतिं गतिम् ।
युक्तः समनुतिष्ठेत तुष्टश्चारैरुपस्कृतः ॥ २७
अमोघक्रोधहर्षस्य स्वयं कृत्यान्ववेक्षिणः ।
आत्मप्रत्ययकोशस्य वसुधैव वसुंधरा ॥ २८
व्यक्तश्चानुग्रहो यस्य यथार्थश्चापि निग्रहः ।
गुप्तात्मा गुप्तराष्ट्रश्च स राजा राजधर्मवित् ॥ २९
नित्यं राष्ट्रमवेक्षेत गोभिः सूर्य इवोत्पतन् ।
चारांश्च नचरान्विद्यात्तथा बुद्ध्या न संज्वरेत् ॥
कालप्राप्तमुपादद्यान्नार्थं राजा प्रसूचयेत् ।
अहन्यहनि संदुह्यान्महीं गामिव बुद्धिमान् ॥ ३१
यथा क्रमेण पुष्पेभ्यश्चिनोति मधु षट्पदः ।
तथा द्रव्यमुपादाय राजा कुर्वीत संचयम् ॥ ३२
यद्धि गुप्तावशिष्टं स्यात्तद्धितं धर्मकामयोः ।
संचयानुविसर्गी स्याद्राजा शास्त्रविदात्मवान् ॥ ३३
नाल्पमर्थं परिभवेन्नावमन्येत शात्रवान् ।
बुद्ध्यावबुध्येदात्मानं न चाबुद्धिषु विश्वसेत् ॥३४

धृतिर्दाक्ष्यं संयमो बुद्धिरग्र्या
धैर्यं शौर्यं देशकालोऽप्रमादः ।
स्वल्पस्य वा महतो वापि वृद्धौ
धनस्यैतान्यष्ट समिन्धनानि ॥ ३५
अग्निस्तोको वर्धते ह्याज्यसिक्तो
बीजं चैकं बहुसाहस्रमेति ।
क्षयोदयौ विपुलौ संनिशाम्य
तस्मादल्पं नावमन्येत विद्वान् ॥ ३६
बालोऽबालः स्थविरो वा रिपुर्यः
सदा प्रमत्तं पुरुषं निहन्यात् ।
कालेनान्यस्तस्य मूलं हरेत
कालज्ञाता पार्थिवानां वरिष्ठः ॥ ३७
हरेत्कीर्तिं धर्ममस्योपरुन्ध्या-
दर्थे दीर्घं वीर्यमस्योपहन्यात् ।
रिपुर्द्वेष्टा दुर्बलो वा बली वा
तस्माच्छत्रौ नैव हेडेद्यतात्मा ॥ ३८
क्षयं शत्रोः संचयं पालनं चा-
प्युभौ चार्थौ सहितौ धर्मकामौ ।
अतश्चान्यन्मतिमान्संदधीत

तस्माद्राजा बुद्धिमन्तं श्रयेत ॥ ३९
बुद्धिर्दीप्ता बलवन्तं हिनस्ति
बलं बुद्धया वर्धते पाल्यमानम् ।
शत्रुर्बुद्धया सीदते वर्धमानो
बुद्धेः पश्चात्कर्म यत्तत्प्रशस्तम् ॥ ४०
सर्वान्कामान्कामयानो हि धीरः
सत्त्वेनाल्पेनाप्लुतो हीनदेहः ।
यथात्मानं प्रार्थयतेऽर्थमानैः
श्रेयःपात्रं पूरयते ह्यनल्पम् ॥ ४१
तस्माद्राजा प्रगृहीतः परेषु
मूलं लक्ष्म्याः सर्वतोऽभ्याददीत ।
दीर्घं कालमपि संपीड्यमानो
विद्युत्संपातमिव मानोर्जितः स्यात् ॥ ४२
विद्या तपो वा विपुलं धनं वा
सर्वमेतद्व्यवसायेन शक्यम् ।
ब्रह्म यत्तं निवसति देहवत्सु
तस्माद्विद्याद्व्यवसायं प्रभूतम् ॥ ४३
यत्रासते मतिमन्तो मनस्विनः
शक्रो विष्णुर्यत्र सरस्वती च ।
वसन्ति भूतानि च यत्र नित्यं
तस्माद्विद्वान्नावमन्येत देहम् ॥ ४४
लुब्धं हन्यात्संप्रदानेन नित्यं
लुब्धस्तृप्तिं परवित्तस्य नैति ।
सर्वो लुब्धः कर्मगुणोपभोगे
योऽर्थैर्हीनो धर्मकामौ जहाति ॥ ४५
धनं भोज्यं पुत्रदारं समृद्धिं
सर्वो लुब्धः प्रार्थयते परेषाम् ।
लुब्धे दोषाः संभवन्तीह सर्वे
तस्माद्राजा न प्रगृह्णीत लुब्धान् ॥ ४६
संदर्शने सत्पुरुषं जघन्यमपि चोदयेत् ।
आरम्भान्द्विषतां प्राज्ञः सर्वानर्थांस्तु सूदयेत् ॥४७
धर्मान्वितेषु विज्ञातो मन्त्री गुप्तश्च पाण्डव ।
आप्तो राजन्कुलीनश्च पर्याप्तो राज्यसंग्रहे ॥ ४८
विधिप्रवृत्तान्नरदेवधर्मा-
नुक्तान्समासेन निबोध बुद्धया ।
इमान्विदध्याद्व्यनुसृत्य यो वै
राजा महीं पालयितुं स शक्तः ॥ ४९
अनीतिजं यद्यविधानजं सुखं
हठप्रणीतं विविधं प्रदृश्यते ।
न विद्यते तस्य गतिर्महीपते-
र्न विद्यते राष्ट्रजमुत्तमं सुखम् ॥ ५०
धनैर्विशिष्टान्मतिशीलपूजिता-
न्गुणोपपन्नान्युधि दृष्टविक्रमान् ।
गुणेषु दृष्टानचिरादिहात्मवा-
न्सतोऽभिसंधाय निहन्ति शात्रवान् ॥ ५१
पश्येदुपायान्विविधैः क्रियापथै-
र्न चानुपायेन मतिं निवेशयेत् ।
श्रियं विशिष्टां विपुलं यशो धनं
न दोषदर्शी पुरुषः समश्नुते ॥ ५२
प्रीतिप्रवृत्तौ विनिवर्तने तथा
सुहृत्सु विज्ञाय निवृत्य चोभयोः ।
यदेव मित्रं गुरुभारमावहे-
त्तदेव सुस्निग्धमुदाहरेद्बुधः ॥ ५३
एतान्मयोक्तांस्तव राजधर्मा-
न्नृणां च गुप्तौ मतिमादधस्व ।
अवाप्स्यसे पुण्यफलं सुखेन
सर्वो हि लोकोत्तमधर्ममूलः ॥ ५४

इति श्रीमहाभारते शान्तिपर्वणि
विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

१२१

युधिष्ठिर उवाच ।

अयं पितामहेनोक्तो राजधर्मः सनातनः ।
ईश्वरश्च महादण्डो दण्डे सर्वं प्रतिष्ठितम् ॥ १
देवतानामृषीणां च पितॄणां च महात्मनाम् ।
यक्षरक्षःपिशाचानां मर्त्यानां च विशेषतः ॥ २
सर्वेषां प्राणिनां लोके तिर्यक्ष्वपि निवासिनाम् ।
सर्वव्यापी महातेजा दण्डः श्रेयानिति प्रभो ॥ ३
इत्येतदुक्तं भवता सर्वं दण्डे चराचरम् ।
दृश्यते लोकमासक्तं ससुरासुरमानुषम् ॥ ४
एतदिच्छाम्यहं ज्ञातुं तत्त्वेन भरतर्षभ ।
को दण्डः कीदृशो दण्डः किंरूपः किंपरायणः ॥५
किमात्मकः कथंभूतः कतिमूर्तिः कथंप्रभुः ।
जागर्ति स कथं दण्डः प्रजास्ववहितात्मकः ॥ ६
कश्च पूर्वापरमिदं जागर्ति परिपालयन् ।
कश्च विज्ञायते पूर्वं कोऽपरो दण्डसंज्ञितः ।
किंसंस्थश्च भवेद्दण्डः का चास्य गतिरिष्यते ॥ ७

भीष्म उवाच ।

शृणु कौरव्य यो दण्डो व्यवहार्यो यथा च सः ।
यस्मिन्हि सर्वमायत्तं स दण्ड इह केवलः ॥ ८
धर्मस्याख्या महाराज व्यवहार इतीष्यते ।
तस्य लोपः कथं न स्याल्लोकेष्ववहितात्मनः ।
इत्यर्थं व्यवहारस्य व्यवहारत्वमिष्यते ॥ ९
अपि चैतत्पुरा राजन्मनुना प्रोक्तमादितः ।
सुप्रणीतेन दण्डेन प्रियाप्रियसमात्मना ।
प्रजा रक्षति यः सम्यग्धर्म एव स केवलः ॥ १०
अथोक्तमेतद्वचनं प्रागेव मनुना पुरा ।
जन्म चोक्तं वसिष्ठेन ब्रह्मणो वचनं महत् ॥ ११
प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः ।
व्यवहारस्य चाख्यानाद्व्यवहार इहोच्यते ॥ १२
दण्डात्त्रिवर्गः सततं सुप्रणीतात्प्रवर्तते ।
दैवं हि परमो दण्डो रूपतोऽग्निरिवोच्छिखः ॥१३
नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ।
अष्टपान्नैकनयनः शङ्कुकर्णोर्ध्वरोमवान् ॥ १४
जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः ।
एतद्रूपं बिभर्त्युग्रं दण्डो नित्यं दुरावरः ॥ १५
असिर्गदा धनुः शक्तिस्त्रिशूलं मुद्गरः शरः ।
मुसलं परशुश्चक्रं प्रासो दण्डर्ष्टितोमराः ॥ १६
सर्वप्रहरणीयानि सन्ति यानीह कानिचित् ।
दण्ड एव हि सर्वात्मा लोके चरति मूर्तिमान् ॥
भिन्दंश्छिन्दन्रुजन्कृन्तन्दारयन्पाटयंस्तथा ।
घातयन्नभिधावंश्च दण्ड एव चरत्युत ॥ १८
असिर्विशसनो धर्मस्तीक्ष्णवर्मा दुरासदः ।
श्रीगर्भो विजयः शास्ता व्यवहारः प्रजागरः ॥१९
शास्त्रं ब्राह्मणमन्त्रश्च शास्ता प्राग्वचनं गतः ।
धर्मपालोऽक्षरो देवः सत्यगो नित्यगो ग्रहः ॥ २०
असङ्गो रुद्रतनयो मनुर्ज्येष्ठः शिवंकरः ।
नामान्येतानि दण्डस्य कीर्तितानि युधिष्ठिर ॥ २१
दण्डो हि भगवान्विष्णुर्यज्ञो नारायणः प्रभुः ।
शश्वद्रूपं महद्बिभ्रन्महापुरुष उच्यते ॥ २२
यथोक्ता ब्रह्मकन्येति लक्ष्मीर्नीतिः सरस्वती ।
दण्डनीतिर्जगद्धात्री दण्डो हि बहुविग्रहः ॥ २३
अर्थानर्थौ सुखं दुःखं धर्माधर्मौ बलाबले ।
दौर्भाग्यं भागधेयं च पुण्यापुण्ये गुणागुणौ ॥२४
कामाकामावृतुर्मासः शर्वरी दिवसः क्षणः ।
अप्रसादः प्रसादश्च हर्षः क्रोधः शमो दमः ॥ २५
दैवं पुरुषकारश्च मोक्षामोक्षौ भयाभये ।
हिंसाहिंसे तपो यज्ञः संयमोऽथ विषाविषम् ॥२६
अन्तश्चादिश्च मध्यं च कृत्यानां च प्रपञ्चनम् ।
मदः प्रमादो दर्पश्च दम्भो धैर्यं नयानयौ ॥ २७

अशक्तिः शक्तिरित्येव मानस्तम्भौ व्ययाव्ययौ ।
विनयश्च विसर्गश्च कालाकालौ च भारत ॥ २८
अनृतं ज्ञाज्ञता सत्यं श्रद्धाश्रद्धे तथैव च ।
क्लीबता व्यवसायश्च लाभालाभौ जयाजयौ ॥ २९
तीक्ष्णता मृदुता मृत्युरागमानागमौ तथा ।
विराद्धिश्चैव राद्धिश्च कार्याकार्ये बलाबले ॥ ३०
असूया चानसूया च धर्माधर्मौ तथैव च ।
अपत्रपानपत्रपे ह्रीश्च संपद्विपच्च ह ॥ ३१
तेजः कर्मणि पाण्डित्यं वाक्शक्तिस्तत्त्वबुद्धिता ।
एवं दण्डस्य कौरव्य लोकेऽस्मिन्बहुरूपता ॥ ३२
न स्याद्यदीह दण्डो वै प्रमथेयुः परस्परम् ।
भयाद्दण्डस्य चान्योन्यं घ्नन्ति नैव युधिष्ठिर ॥ ३३
दण्डेन रक्ष्यमाणा हि राजन्नहरहः प्रजाः ।
राजानं वर्धयन्तीह तस्माद्दण्डः परायणम् । ३४
व्यवस्थापयति क्षिप्रमिमं लोकं नरेश्वर ।
सत्ये व्यवस्थितो धर्मो ब्राह्मणेष्ववतिष्ठते ॥ ३५
धर्मयुक्ता द्विजाः श्रेष्ठा वेदयुक्ता भवन्ति च ।
बभूव यज्ञो वेदेभ्यो यज्ञः प्रीणाति देवताः ॥ ३६
प्रीताश्च देवता नित्यमिन्द्रे परिददत्युत ।
अन्नं ददाति शक्रश्चाप्यनुगृह्णन्निमाः प्रजाः ॥ ३७
प्राणाश्च सर्वभूतानां नित्यमन्ने प्रतिष्ठिताः ।
तस्मात्प्रजाः प्रतिष्ठन्ते दण्डो जागर्ति तासु च ॥ ३८
एवंप्रयोजनश्चैव दण्डः क्षत्रियतां गतः ।
रक्षन्प्रजाः प्रजागर्ति नित्यं सुविहितोऽक्षरः ॥ ३९
ईश्वरः पुरुषः प्राणः सत्त्वं वित्तं प्रजापतिः ।
भूतात्मा जीव इत्येव नामभिः प्रोच्यतेऽष्टभिः ॥ ४०
अददद्दण्ड एवास्मै ध्रुवमैश्वर्यमेव च ।
बले नयश्च संयुक्तः सदा पञ्चविधात्मकः ॥ ४१
कुलबाहुधनामात्याः प्रज्ञा चोक्ता बलानि च ।
आहार्यं चाष्टकैर्द्रव्यैर्बलमन्यद्युधिष्ठिर ॥ ४२
हस्तिनोऽश्वा रथाः पत्तिर्नावो विष्टिस्तथैव च ।
दैशिकाश्चारकाश्चैव तदष्टाङ्गं बलं स्मृतम् ॥ ४३
अष्टाङ्गस्य तु युक्तस्य हस्तिनो हस्तियायिनः ।
अश्वारोहाः पदाताश्च मन्त्रिणो रसदाश्च ये ॥ ४४
भिक्षुकाः प्राड्विवाकाश्च मौहूर्ता दैवचिन्तकाः ।
कोशो मित्राणि धान्यं च सर्वोपकरणानि च ॥ ४५
सप्तप्रकृति चाष्टाङ्गं शरीरमिह यद्विदुः ।
राज्यस्य दण्ड एवाङ्गं दण्डः प्रभव एव च ॥ ४६
ईश्वरेण प्रयत्नेन धारणे क्षत्रियस्य हि ।
दण्डो दत्तः समानात्मा दण्डो हीदं सनातनम् ।
राज्ञां पूज्यतमो नान्यो यथाधर्मप्रदर्शनः ॥ ४७
ब्रह्मणा लोकरक्षार्थं स्वधर्मस्थापनाय च ।
भर्तृप्रत्यय उत्पन्नो व्यवहारस्तथापरः ।
तस्माद्यः सहितो दृष्टो भर्तृप्रत्ययलक्षणः ॥ ४८
व्यवहारस्तु वेदात्मा वेदप्रत्यय उच्यते ।
मौलश्च नरशार्दूल शास्त्रोक्तश्च तथापरः ॥ ४९
उक्तो यश्चापि दण्डोऽसौ भर्तृप्रत्ययलक्षणः ।
ज्ञेयो न स नरेन्द्रस्थो दण्डप्रत्यय एव च ॥ ५०
दण्डप्रत्ययदृष्टोऽपि व्यवहारात्मकः स्मृतः ।
व्यवहारः स्मृतो यश्च स वेदविषयात्मकः ॥ ५१
यश्च वेदप्रसूतात्मा स धर्मो गुणदर्शकः ।
धर्मप्रत्यय उत्पन्नो यथाधर्मः कृतात्मभिः ॥ ५२
व्यवहारः प्रजागोप्ता ब्रह्मदिष्टो युधिष्ठिर ।
त्रीन्धारयति लोकान्वै सत्यात्मा भूतिवर्धनः ॥ ५३
यश्च दण्डः स दृष्टो नो व्यवहारः सनातनः ।
व्यवहारश्च यो दृष्टः स धर्म इति नः श्रुतः ।
यश्च वेदः स वै धर्मो यश्च धर्मः स सत्पथः ॥ ५४
ब्रह्मा प्रजापतिः पूर्वं बभूवाथ पितामहः ।
लोकानां स हि सर्वेषां ससुरासुररक्षसाम् ।
समनुष्योरगवतां कर्ता चैव स भूतकृत् ॥ ५५

ततो नो व्यवहारोऽयं भर्तृप्रत्ययलक्षणः ।
तस्मादिदमवोचाम व्यवहारनिदर्शनम् ॥ ५६
माता पिता च भ्राता च भार्या चाथ पुरोहितः ।
नादण्ड्यो विद्यते राज्ञां यः स्वधर्मे न तिष्ठति ॥५७

इति श्रीमहाभारते शान्तिपर्वणि
एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

१२२

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अङ्गेषु राजा द्युतिमान्वसुहोम इति श्रुतः ॥ १
स राजा धर्मनित्यः सन्सह पत्न्या महातपाः ।
मुञ्जपृष्ठं जगामाथ देवर्षिगणपूजितम् ॥ २
तत्र शृङ्गे हिमवतो मेरौ कनकपर्वते ।
यत्र मुञ्जवटे रामो जटाहरणमादिशत् ॥ ३
तदाप्रभृति राजेन्द्र ऋषिभिः संशितव्रतैः ।
मुञ्जपृष्ठ इति प्रोक्तः स देशो रुद्रसेवितः ॥ ४
स तत्र बहुभिर्युक्तः सदा श्रुतिमयैर्गुणैः ।
ब्राह्मणानामनुमतो देवर्षिसदृशोऽभवत् ॥ ५
तं कदाचिददीनात्मा सखा शक्रस्य मानितः ।
अभ्यागच्छन्महीपालो मान्धाता शत्रुकर्शनः ॥ ६
सोऽभिसृत्य तु मान्धाता वसुहोमं नराधिपम् ।
दृष्ट्वा प्रकृष्टं तपसा विनयेनाभ्यतिष्ठत ॥ ७
वसुहोमोऽपि राज्ञो वै गामर्घ्यं च न्यवेदयत् ।
अष्टाङ्गस्य च राज्यस्य पप्रच्छ कुशलं तदा ॥ ८
सद्भिराचरितं पूर्वं यथावदनुयायिनम् ।
अपृच्छद्वसुहोमस्तं राजन्किं करवाणि ते ॥ ९
सोऽब्रवीत्परमप्रीतो मान्धाता राजसत्तमम् ।
वसुहोमं महाप्राज्ञमासीनं कुरुनन्दन ॥ १०
बृहस्पतेर्मतं राजन्नधीतं सकलं त्वया ।
तथैवौशनसं शास्त्रं विज्ञातं ते नराधिप ॥ ११
तदहं श्रोतुमिच्छामि दण्ड उत्पद्यते कथम् ।
किं वापि पूर्वं जागर्ति किं वा परममुच्यते ॥ १२
कथं क्षत्रियसंस्थश्च दण्डः संप्रत्यवस्थितः ।
ब्रूहि मे सुमहाप्राज्ञ ददाम्याचार्यवेतनम् ॥ १३

वसुहोम उवाच ।

शृणु राजन्यथा दण्डः संभूतो लोकसंग्रहः ।
प्रजाविनयरक्षार्थं धर्मस्यात्मा सनातनः ॥ १४
ब्रह्मा यियक्षुर्भगवान्सर्वलोकपितामहः ।
ऋत्विजं नात्मना तुल्यं ददर्शेति हि नः श्रुतम् ॥१५
स गर्भं शिरसा देवो वर्षपूगानधारयत् ।
पूर्णे वर्षसहस्रे तु स गर्भः क्षुवतोऽपतत् ॥ १६
स क्षुपो नाम संभूतः प्रजापतिररिंदम ।
ऋत्विगासीत्तदा राजन्यज्ञे तस्य महात्मनः ॥ १७
तस्मिन्प्रवृत्ते सत्रे तु ब्रह्मणः पार्थिवर्षभ ।
हृष्टरूपप्रचारत्वाद्दण्डः सोऽन्तर्हितोऽभवत् ॥ १८
तस्मिन्नन्तर्हिते चाथ प्रजानां संकरोऽभवत् ।
नैव कार्यं न चाकार्यं भोज्याभोज्यं न विद्यते ॥१९
पेयापेयं कुतः सिद्धिर्हिंसन्ति च परस्परम् ।
गम्यागम्यं तदा नासीत्परस्वं स्वं च वै समम् ॥२०
परस्परं विलुम्पन्ते सारमेया इवामिषम् ।
अबलं बलिनो जघ्नुर्निर्मर्यादमवर्तत ॥ २१
ततः पितामहो विष्णुं भगवन्तं सनातनम् ।
संपूज्य वरदं देवं महादेवमथाब्रवीत् ॥ २२
अत्र साध्वनुकम्पां वै कर्तुमर्हसि केवलम् ।
संकरो न भवेदत्र यथा वै तद्विधीयताम् ॥ २३
ततः स भगवान्ध्यात्वा चिरं शूलजटाधरः ।
आत्मानमात्मना दण्डमसृजद्देवसत्तमः ॥ २४
तस्माच्च धर्मचरणां नीतिं देवीं सरस्वतीम् ।
असृजद्दण्डनीतिः सा त्रिषु लोकेषु विश्रुता ॥ २५
भूयः स भगवान्ध्यात्वा चिरं शूलवरायुधः ।

तस्य तस्य निकायस्य चकारैकैकमीश्वरम् ॥ २६
देवानामीश्वरं चक्रे देवं दशशतेक्षणम् ।
यमं वैवस्वतं चापि पितॄणामकरोत्पतिम् ॥ २७
धनानां रक्षसां चापि कुबेरमपि चेश्वरम् ।
पर्वतानां पतिं मेरुं सरितां च महोदधिम् ॥२८
अपां राज्ये सुराणां च विदधे वरुणं प्रभुम् ।
मृत्युं प्राणेश्वरमथो तेजसां च हुताशनम् ॥ २९
रुद्राणामपि चेशानं गोप्तारं विदधे प्रभुः ।
महात्मानं महादेवं विशालाक्षं सनातनम् ॥ ३०
वसिष्ठमीशं विप्राणां वसूनां जातवेदसम् ।
तेजसां भास्करं चक्रे नक्षत्राणां निशाकरम् ॥ ३१
वीरुधामंशुमन्तं च भूतानां च प्रभुं वरम् ।
कुमारं द्वादशभुजं स्कन्दं राजानमादिशत् ॥ ३२
कालं सर्वेशमकरोत्संहारविनयात्मकम् ।
मृत्योश्चतुर्विभागस्य दुःखस्य च सुखस्य च ॥ ३३
ईश्वरः सर्वदेहस्तु राजराजो धनाधिपः ।
सर्वेषामेव रुद्राणां शूलपाणिरिति श्रुतिः ॥ ३४
तमेकं ब्रह्मणः पुत्रमनुजातं क्षुपं ददौ ।
प्रजानामधिपं श्रेष्ठं सर्वधर्मभृतामपि ॥ ३५
महादेवस्ततस्तस्मिन्वृत्ते यज्ञे यथाविधि ।
दण्डं धर्मस्य गोप्तारं विष्णवे सत्कृतं ददौ ॥ ३६
विष्णुरङ्गिरसे प्रादादङ्गिरा मुनिसत्तमः ।
प्रादादिन्द्रमरीचिभ्यां मरीचिर्भृगवे ददौ ॥ ३७
भृगुर्ददावृषिभ्यस्तु तं दण्डं धर्मसंहितम् ।
ऋषयो लोकपालेभ्यो लोकपालाः क्षुपाय च ॥३८
क्षुपस्तु मनवे प्रादादादित्यतनयाय च ।
पुत्रेभ्यः श्राद्धदेवस्तु सूक्ष्मधर्मार्थकारणात् ।
तं ददौ सूर्यपुत्रस्तु मनुर्वै रक्षणात्मकम् ॥ ३९
विभज्य दण्डः कर्तव्यो धर्मेण न यदृच्छया ।
दुर्वाचा निग्रहो बन्धो हिरण्यं बाह्यतःक्रिया ॥ ४०
व्यङ्गत्वं च शरीरस्य वधो वा नाल्पकारणात् ।
शरीरपीडास्तास्तास्तु देहत्यागो विवासनम् ॥ ४१
आनुपूर्व्या च दण्डोऽसौ प्रजा जागर्ति पालयन् ।
इन्द्रो जागर्ति भगवानिन्द्रादग्निर्विभावसुः ॥ ४२
अग्नेर्जागर्ति वरुणो वरुणाच्च प्रजापतिः ।
प्रजापतेस्ततो धर्मो जागर्ति विनयात्मकः ॥ ४३
धर्माच्च ब्रह्मणः पुत्रो व्यवसायः सनातनः ।
व्यवसायात्ततस्तेजो जागर्ति परिपालयन् ॥ ४४
ओषध्यस्तेजसस्तस्मादोषधिभ्यश्च पर्वताः ।
पर्वतेभ्यश्च जागर्ति रसो रसगुणात्तथा ॥ ४५
जागर्ति निर्ऋतिर्देवी ज्योतींषि निर्ऋतेरपि ।
वेदाः प्रतिष्ठा ज्योतिर्भ्यस्ततो हयशिराः प्रभुः ॥४६
ब्रह्मा पितामहस्तस्माज्जागर्ति प्रभुरव्ययः ।
पितामहान्महादेवो जागर्ति भगवाञ्शिवः ॥ ४७
विश्वेदेवाः शिवाच्चापि विश्वेभ्यश्च तथर्षयः ।
ऋषिभ्यो भगवान्सोमः सोमाद्देवाः सनातनाः ॥४८
देवेभ्यो ब्राह्मणा लोके जाग्रतीत्युपधारय ।
ब्राह्मणेभ्यश्च राजन्या लोकान्रक्षन्ति धर्मतः ।
स्थावरं जङ्गमं चैव क्षत्रियेभ्यः सनातनम् ॥ ४९
प्रजा जाग्रति लोकेऽस्मिन्दण्डो जागर्ति तासु च ।
सर्वसंक्षेपको दण्डः पितामहसमः प्रभुः ॥ ५०
जागर्ति कालः पूर्वं च मध्ये चान्ते च भारत ।
ईश्वरः सर्वलोकस्य महादेवः प्रजापतिः ॥ ५१
देवदेवः शिवः शर्वो जागर्ति सततं प्रभुः ।
कपर्दी शंकरो रुद्रो भवः स्थाणुरुमापतिः ॥ ५२
इत्येष दण्डो विख्यात आदौ मध्ये तथावरे ।
भूमिपालो यथान्यायं वर्तेतानेन धर्मवित् ॥ ५३

भीष्म उवाच ।

इतीदं वसुहोमस्य शृणुयाद्यो मतं नरः ।
श्रुत्वा च सम्यग्वर्तेत स कामानाप्नुयान्नृपः ॥ ५४

इति ते सर्वमाख्यातं यो दण्डो मनुजर्षभ ।
नियन्ता सर्वलोकस्य धर्माक्रान्तस्य भारत ॥ ५५

इति श्रीमहाभारते शान्तिपर्वणि
द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

१२३

युधिष्ठिर उवाच ।

तात धर्मार्थकामानां श्रोतुमिच्छामि निश्चयम् ।
लोकयात्रा हि कार्त्स्न्येन त्रिष्वेतेषु प्रतिष्ठिता ॥ १
धर्मार्थकामाः किंमूलास्त्रयाणां प्रभवश्च कः ।
अन्योन्यं चानुषज्जन्ते वर्तन्ते च पृथक्पृथक् ॥ २

भीष्म उवाच ।

यदा ते स्युः सुमनसो लोकसंस्थार्थनिश्चये ।
कालप्रभवसंस्थासु सज्जन्ते च त्रयस्तदा ॥ ३
धर्ममूलस्तु देहोऽर्थः कामोऽर्थफलमुच्यते ।
संकल्पमूलास्ते सर्वे संकल्पो विषयात्मकः ॥ ४
विषयाश्चैव कार्त्स्न्येन सर्व आहारसिद्धये ।
मूलमेतत्त्रिवर्गस्य निवृत्तिर्मोक्ष उच्यते ॥ ५
धर्मः शरीरसंगुप्तिर्धर्मार्थं चार्थ इष्यते ।
कामो रतिफलश्चात्र सर्वे चैते रजस्वलाः ॥ ६
संनिकृष्टांश्चरेदेनान्न चैनान्मनसा त्यजेत् ।
विमुक्तस्तमसा सर्वान्धर्मादीन्कामनैष्ठिकान् ॥ ७
श्रेष्ठबुद्धिस्त्रिवर्गस्य यदयं प्राप्नुयात्क्षणात् ।
बुद्ध्या बुध्येदिहार्थे न तदर्हा तु निकृष्टया ॥ ८
अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम् ।
संप्रमोदमलः कामो भूयः स्वगुणवर्तितः ॥ ९
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
कामन्दस्य च संवादमङ्गारिष्ठस्य चोभयोः ॥ १०
कामन्दमृषिमासीनमभिवाद्य नराधिपः ।
अङ्गारिष्ठोऽथ पप्रच्छ कृत्वा समयपर्ययम् ॥ ११
यः पापं कुरुते राजा काममोहबलात्कृतः ।
प्रत्यासन्नस्य तस्यर्षे किं स्यात्पापप्रणाशनम् ॥ १२
अधर्मो धर्म इति ह योऽज्ञानादाचरेदिह ।
तं चापि प्रथितं लोके कथं राजा निवर्तयेत् ॥ १३

कामन्द उवाच ।

यो धर्मार्थौ समुत्सृज्य काममेवानुवर्तते ।
स धर्मार्थपरित्यागात्प्रज्ञानाशमिहार्छति ॥ १४
प्रज्ञाप्रणाशको मोहस्तथा धर्मार्थनाशकः ।
तस्मान्नास्तिकता चैव दुराचारश्च जायते ॥ १५
दुराचारान्यदा राजा प्रदुष्टान्न नियच्छति ।
तस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव ॥ १६
तं प्रजा नानुवर्तन्ते ब्राह्मणा न च साधवः ।
ततः संक्षयमाप्नोति तथा वध्यत्वमेति च ॥ १७
अपध्वस्तस्त्ववमतो दुःखं जीवति जीवितम् ।
जीवेच्च यदपध्वस्तस्तच्छुद्धं मरणं भवेत् ॥ १८
अत्रैतदाहुराचार्याः पापस्य च निबर्हणम् ।
सेवितव्या त्रयी विद्या सत्कारो ब्राह्मणेषु च ॥ १९
महामना भवेद्धर्मे विवहेच्च महाकुले ।
ब्राह्मणांश्चापि सेवेत क्षमायुक्तान्मनस्विनः ॥ २०
जपेदुदकशीलः स्यात्सुमुखो नान्यदाश्रितः ।
धर्मान्वितान्संप्रविशेद्बहिः कृत्वैव दुष्कृतीन् ॥ २१
प्रसादयेन्मधुरया वाचाप्यथ च कर्मणा ।
इत्यस्मीति वदेन्नित्यं परेषां कीर्तयन्गुणान् ॥ २२
अपापो ह्येवमाचारः क्षिप्रं बहुमतो भवेत् ।
पापान्यपि च कृच्छ्राणि शमयेन्नात्र संशयः ॥ २३
गुरवोऽपि परं धर्मं यद्ब्रूयुस्तत्तथा कुरु ।
गुरूणां हि प्रसादाद्धि श्रेयः परमवाप्स्यसि ॥ २४

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

१२४

युधिष्ठिर उवाच ।

इमे जना नरश्रेष्ठ प्रशंसन्ति सदा भुवि ।
धर्मस्य शीलमेवादौ ततो मे संशयो महान् ॥ १
यदि तच्छक्यमस्माभिर्ज्ञातुं धर्मभृतां वर ।
श्रोतुमिच्छामि तत्सर्वं यथैतदुपलभ्यते ॥ २
कथं नु प्राप्यते शीलं श्रोतुमिच्छामि भारत ।
किंलक्षणं च तत्प्रोक्तं ब्रूहि मे वदतां वर ॥ ३

भीष्म उवाच ।

पुरा दुर्योधनेनेह धृतराष्ट्राय मानद ।
आख्यातं तप्यमानेन श्रियं दृष्ट्वा तथागताम् ॥ ४
इन्द्रप्रस्थे महाराज तव सभ्रातृकस्य ह ।
सभायां चावहसनं तत्सर्वं शृणु भारत ॥ ५
भवतस्तां सभां दृष्ट्वा समृद्धिं चाप्यनुत्तमाम् ।
दुर्योधनस्तदासीनः सर्वं पित्रे न्यवेदयत् ॥ ६
श्रुत्वा च धृतराष्ट्रोऽपि दुर्योधनवचस्तदा ।
अब्रवीत्कर्णसहितं दुर्योधनमिदं वचः ॥ ७
किमर्थं तप्यसे पुत्र श्रोतुमिच्छामि तत्त्वतः ।
श्रुत्वा त्वामनुनेष्यामि यदि सम्यग्भविष्यसि ॥ ८
यथा त्वं महदैश्वर्यं प्राप्तः परपुरंजय ।
किंकरा भ्रातरः सर्वे मित्राः संबन्धिनस्तथा ॥ ९
आच्छादयसि प्रावारानश्नासि पिशितोदनम् ।
आजानेया वहन्ति त्वां कस्माच्छोचसि पुत्रक ॥१०

दुर्योधन उवाच ।

दश तानि सहस्राणि स्नातकानां महात्मनाम् ।
भुञ्जते रुक्मपात्रीषु युधिष्ठिरनिवेशने ॥ ११
दृष्ट्वा च तां सभां दिव्यां दिव्यपुष्पफलान्विताम् ।
अश्वांस्तित्तिरकल्माषान्रत्नानि विविधानि च ॥१२
दृष्ट्वा तां पाण्डवेयानामृद्धिमिन्द्रोपमां शुभाम् ।
अमित्राणां सुमहतीमनुशोचामि मानद ॥ १३

धृतराष्ट्र उवाच ।

यदीच्छसि श्रियं तात यादृशीं तां युधिष्ठिरे ।
विशिष्टां वा नरव्याघ्र शीलवान्भव पुत्रक ॥ १४
शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः ।
न हि किंचिदसाध्यं वै लोके शीलवतां भवेत् ॥१५
एकरात्रेण मान्धाता त्र्यहेण जनमेजयः ।
सप्तरात्रेण नाभागः पृथिवीं प्रतिपेदिवान् ॥ १६
एते हि पार्थिवाः सर्वे शीलवन्तो दमान्विताः ।
अतस्तेषां गुणक्रीता वसुधा स्वयमागमत् ॥ १७
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदेन पुरा प्रोक्तं शीलमाश्रित्य भारत ॥ १८
प्रह्लादेन हृतं राज्यं महेन्द्रस्य महात्मनः ।
शीलमाश्रित्य दैत्येन त्रैलोक्यं च वशीकृतम् ॥१९
ततो बृहस्पतिं शक्रः प्राञ्जलिः समुपस्थितः ।
उवाच च महाप्राज्ञः श्रेय इच्छामि वेदितुम् ॥२०
ततो बृहस्पतिस्तस्मै ज्ञानं नैःश्रेयसं परम् ।
कथयामास भगवान्देवेन्द्राय कुरूद्वह ॥ २१
एतावच्छ्रेय इत्येव बृहस्पतिरभाषत ।
इन्द्रस्तु भूयः पप्रच्छ क विशेषो भवेदिति ॥ २२

बृहस्पतिरुवाच ।

विशेषोऽस्ति महांस्तात भार्गवस्य महात्मनः ।
तत्रागमय भद्रं ते भूय एव पुरंदर ॥ २३

धृतराष्ट्र उवाच ।

आत्मनस्तु ततः श्रेयो भार्गवात्सुमहायशाः ।
ज्ञानमागमयत्प्रीत्या पुनः स परमद्युतिः ॥ २४
तेनापि समनुज्ञातो भार्गवेण महात्मना ।
श्रेयोऽस्तीति पुनर्भूयः शुक्रमाह शतक्रतुः ॥ २५
भार्गवस्त्वाह धर्मज्ञः प्रह्लादस्य महात्मनः ।
ज्ञानमस्ति विशेषेण ततो हृष्टश्च सोऽभवत् ॥२६

स ततो ब्राह्मणो भूत्वा प्रह्रादं पाकशासनः ।
गत्वा प्रोवाच मेधावी श्रेय इच्छामि वेदितुम् ॥ २७
प्रह्रादस्त्वब्रवीद्विप्रं क्षणो नास्ति द्विजर्षभ ।
त्रैलोक्यराज्ये सक्तस्य ततो नोपदिशामि ते ॥ २८
ब्राह्मणस्त्वब्रवीद्वाक्यं कस्मिन्काले क्षणो भवेत् ।
ततोपदिष्टमिच्छामि यद्यत्कार्यान्तरं भवेत् ॥ २९
ततः प्रीतोऽभवद्राजा प्रह्रादो ब्रह्मवादिने ।
तथेत्युक्त्वा शुभे काले ज्ञानतत्त्वं ददौ तदा ॥ ३०
ब्राह्मणोऽपि यथान्यायं गुरुवृत्तिमनुत्तमाम् ।
चकार सर्वभावेन यद्वत्स मनसेच्छति ॥ ३१
पृष्टश्च तेन बहुशः प्राप्तं कथमरिंदम ।
त्रैलोक्यराज्यं धर्मज्ञ कारणं तद्ब्रवीहि मे ॥ ३२

प्रह्राद उवाच ।

नासूयामि द्विजश्रेष्ठ राजास्मीति कदाचन ।
कव्यानि वदतां तात संयच्छामि वहामि च ॥ ३३
ते विस्रब्धाः प्रभाषन्ते संयच्छन्ति च मां सदा ।
ते मा कव्यपदे सक्तं शुश्रूषुमनसूयकम् ॥ ३४
धर्मात्मानं जितक्रोधं संयतं संयतेन्द्रियम् ।
समाचिन्वन्ति शास्तारः क्षौद्रं मध्विव मक्षिकाः ॥ ३५
सोऽहं वागग्रपिष्टानां रसानामवलेहिता ।
स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥ ३६
एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमम् ।
यद्ब्राह्मणमुखे कव्यमेतच्छ्रुत्वा प्रवर्तते ॥ ३७

धृतराष्ट्र उवाच ।

एतावच्छ्रेय इत्याह प्रह्रादो ब्रह्मवादिनम् ।
शुश्रूषितस्तेन तदा दैत्येन्द्रो वाक्यमब्रवीत् ॥ ३८
यथावद्गुरुवृत्त्या ते प्रीतोऽस्मि द्विजसत्तम ।
वरं वृणीष्व भद्रं ते प्रदातास्मि न संशयः ॥ ३९
कृतमित्येव दैत्येन्द्रमुवाच स च वै द्विजः ।
प्रह्रादस्त्वब्रवीत्प्रीतो गृह्यतां वर इत्युत ॥ ४०

ब्राह्मण उवाच ।

यदि राजन्प्रसन्नस्त्वं मम चेच्छसि चेद्धितम् ।
भवतः शीलमिच्छामि प्राप्तुमेष वरो मम ॥ ४१

धृतराष्ट्र उवाच ।

ततः प्रीतश्च दैत्येन्द्रो भयं चास्याभवन्महत् ।
वरे प्रदिष्टे विप्रेण नाल्पतेजायमित्युत ॥ ४२
एवमस्त्विति तं प्राह प्रह्रादो विस्मितस्तदा ।
उपाकृत्य तु विप्राय वरं दुःखान्वितोऽभवत् ॥ ४३
दत्ते वरे गते विप्रे चिन्तासीन्महती ततः ।
प्रह्रादस्य महाराज निश्चयं न च जग्मिवान् ॥ ४४
तस्य चिन्तयतस्तात छायाभूतं महाद्युते ।
तेजो विग्रहवत्तात शरीरमजहात्तदा ॥ ४५
तमपृच्छन्महाकायं प्रह्रादः को भवानिति ।
प्रत्याह ननु शीलोऽस्मि त्यक्तो गच्छाम्यहं त्वया ॥ ४६
तस्मिन्द्विजवरे राजन्वत्स्याम्यहमनिन्दितम् ।
योऽसौ शिष्यत्वमागम्य त्वयि नित्यं समाहितः ।
इत्युक्त्वान्तर्हितं तद्वै शक्रं चान्वविशत्प्रभो ॥ ४७
तस्मिंस्तेजसि याते तु तादृग्रूपस्ततोऽपरः ।
शरीरान्निःसृतस्तस्य को भवानिति चाब्रवीत् ॥ ४८
धर्मं प्रह्राद मां विद्धि यत्रासौ द्विजसत्तमः ।
तत्र यास्यामि दैत्येन्द्र यतः शीलं ततो ह्यहम् ॥ ४९
ततोऽपरो महाराज प्रज्वलन्निव तेजसा ।
शरीरान्निःसृतस्तस्य प्रह्रादस्य महात्मनः ॥ ५०
को भवानिति पृष्टश्च तमाह स महाद्युतिः ।
सत्यमस्म्यसुरेन्द्राग्र्य यास्येऽहं धर्ममन्विह ॥ ५१
तस्मिन्ननुगते धर्मं पुरुषे पुरुषोऽपरः ।
निश्चक्राम ततस्तस्मात्पृष्टश्चाह महात्मना ।
वृत्तं प्रह्राद मां विद्धि यतः सत्यं ततो ह्यहम् ॥ ५२
तस्मिन्गते महाश्वेतः शरीरात्तस्य निर्ययौ ।
पृष्टश्चाह बलं विद्धि यतो वृत्तमहं ततः ।

इत्युक्त्वा च ययौ तत्र यतो वृत्तं नराधिप ॥ ५३
ततः प्रभामयी देवी शरीरात्तस्य निर्ययौ ।
तामपृच्छत्स दैत्येन्द्रः सा श्रीरित्येवमब्रवीत् ॥ ५४
उषितास्मि सुखं वीर त्वयि सत्यपराक्रमे ।
त्वया त्यक्ता गमिष्यामि बलं यत्र ततो ह्यहम् ॥५५
ततो भयं प्रादुरासीत्प्रह्लादस्य महात्मनः ।
अपृच्छत च तां भूयः क यासि कमलालये ॥५६
त्वं हि सत्यव्रता देवी लोकस्य परमेश्वरी ।
कश्चासौ ब्राह्मणश्रेष्ठस्तत्त्वमिच्छामि वेदितुम् ॥५७

श्रीरुवाच ।

स शक्रो ब्रह्मचारी च यस्त्वया चोपशिक्षितः ।
त्रैलोक्ये ते यदैश्वर्यं तत्तेनापहृतं प्रभो ॥ ५८
शीलेन हि त्वया लोकाः सर्वे धर्मज्ञ निर्जिताः ।
तद्विज्ञाय महेन्द्रेण तव शीलं हृतं प्रभो ॥ ५९
धर्मः सत्यं तथा वृत्तं बलं चैव तथा ह्यहम् ।
शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः ॥ ६०

भीष्म उवाच ।

एवमुक्त्वा गता तु श्रीस्ते च सर्वे युधिष्ठिर ।
दुर्योधनस्तु पितरं भूय एवाब्रवीदिदम् ॥ ६१
शीलस्य तत्त्वमिच्छामि वेत्तुं कौरवनन्दन ।
प्राप्यते च यथा शीलं तमुपायं वदस्व मे ॥ ६२

धृतराष्ट्र उवाच ।

सोपायं पूर्वमुद्दिष्टं प्रह्लादेन महात्मना ।
संक्षेपतस्तु शीलस्य शृणु प्राप्तिं नराधिप ॥ ६३
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते ॥ ६४
यदन्येषां हितं न स्यादात्मनः कर्म पौरुषम् ।
अपत्रपेत वा येन न तत्कुर्यात्कथंचन ॥ ६५
तत्तु कर्म तथा कुर्याद्येन श्लाघेत संसदि ।
एतच्छीलं समासेन कथितं कुरुसत्तम ॥ ६६
यद्यप्यशीला नृपते प्राप्नुवन्ति क्वचिच्छ्रियम् ।
न भुञ्जते चिरं तात समूलाश्च पतन्ति ते ॥ ६७
एतद्विदित्वा तत्त्वेन शीलवान्भव पुत्रक ।
यदीच्छसि श्रियं तात सुविशिष्टां युधिष्ठिरात् ॥६८

भीष्म उवाच ।

एतत्कथितवान्पुत्रे धृतराष्ट्रो नराधिप ।
एतत्कुरुष्व कौन्तेय ततः प्राप्स्यसि तत्फलम् ॥ ६९

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

१२५

युधिष्ठिर उवाच ।

शीलं प्रधानं पुरुषे कथितं ते पितामह ।
कथमाशा समुत्पन्ना या च सा तद्वदस्व मे ॥ १
संशयो मे महानेष समुत्पन्नः पितामह ।
छेत्ता च तस्य नान्योऽस्ति त्वत्तः परपुरंजय ॥ २
पितामहाशा महती ममासीद्धि सुयोधने ।
प्राप्ते युद्धे तु यद्युक्तं तत्कर्तायमिति प्रभो ॥ ३
सर्वस्याशा सुमहती पुरुषस्योपजायते ।
तस्यां विहन्यमानायां दुःखो मृत्युरसंशयम् ॥ ४
सोऽहं हताशो दुर्बुद्धिः कृतस्तेन दुरात्मना ।
धार्तराष्ट्रेण राजेन्द्र पश्य मन्दात्मतां मम ॥ ५
आशां महत्तरां मन्ये पर्वतादपि सद्रुमात् ।
आकाशादपि वा राजन्नप्रमेयैव वा पुनः ॥ ६
एषा चैव कुरुश्रेष्ठ दुर्विचिन्त्या सुदुर्लभा ।
दुर्लभत्वाच्च पश्यामि किमन्यद्दुर्लभं ततः ॥ ७

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि युधिष्ठिर निबोध तत् ।
इतिहासं सुमित्रस्य निर्वृत्तमृषभस्य च ॥ ८
सुमित्रो नाम राजर्षिर्हैहयो मृगयां गतः ।
ससार स मृगं विद्ध्वा बाणेन नतपर्वणा ॥ ९

स मृगो बाणमादाय यथाबमितविक्रमः ।
स च राजा बली तूर्णं ससार मृगमन्तिकात् ॥१०
ततो निम्नं स्थलं चैव स मृगोऽद्रवदाशुगः ।
मुहूर्तमेव राजेन्द्र समेन स पथागमत् ॥ ११
ततः स राजा तारुण्यादौरसेन बलेन च ।
ससार बाणासनभृत्सखड्गो हंसवत्तदा ॥ १२
तीर्त्वा नदान्नदीश्चैव पल्वलानि वनानि च ।
अतिक्रम्याभ्यतिक्रम्य ससारैव वने चरन् ॥ १३
स तु कामान्मृगो राजन्नासाद्यासाद्य तं नृपम् ।
पुनरभ्येति जवनो जवेन महता ततः ॥ १४
स तस्य बाणैर्बहुभिः समभ्यस्तो वनेचरः ।
प्रक्रीडन्निव राजेन्द्र पुनरभ्येति चान्तिकम् ॥ १५
पुनश्च जवमास्थाय जवनो मृगयूथपः ।
अतीत्यातीत्य राजेन्द्र पुनरभ्येति चान्तिकम् ॥ १६
तस्य मर्मच्छिदं घोरं सुमित्रोऽमित्रकर्शनः ।
समादाय शरश्रेष्ठं कार्मुकान्निरवासृजत् ॥ १७
ततो गव्यूतिमात्रेण मृगयूथपयूथपः ।
तस्य बाणपथं त्यक्त्वा तस्थिवान्प्रहसन्निव ॥ १८
तस्मिन्निपतिते बाणे भूमौ प्रज्वलिते ततः ।
प्रविवेश महारण्यं मृगो राजाप्यथाद्रवत् ॥ १९
प्रविश्य तु महारण्यं तापसानामथाश्रमम् ।
आससाद ततो राजा श्रान्तश्चोपाविशत्पुनः ॥ २०
तं कार्मुकधरं दृष्ट्वा श्रमार्तं क्षुधितं तदा ।
समेत्य ऋषयस्तस्मिन्पूजां चक्रुर्यथाविधि ॥ २१
ऋषयो राजशार्दूलमपृच्छन्स्वं प्रयोजनम् ।
केन भद्रमुखार्थेन संप्राप्तोऽसि तपोवनम् ॥ २२
पदातिर्बद्धनिस्त्रिंशो धन्वी बाणी नरेश्वर ।
एतदिच्छाम विज्ञातुं कुतः प्राप्तोऽसि मानद ।
कस्मिन्कुले हि जातस्त्वं किं नामासि ब्रवीहि नः॥२३
ततः स राजा सर्वेभ्यो द्विजेभ्यः पुरुषर्षभ ।
आचख्यौ तद्यथान्यायं परिचर्यां च भारत ॥ २४
हैहयानां कुले जातः सुमित्रो मित्रनन्दनः ।
चरामि मृगयूथानि निघ्नन्बाणैः सहस्रशः ।
बलेन महता गुप्तः सामात्यः सावरोधनः ॥ २५
मृगस्तु विद्धो बाणेन मया सरति शल्यवान् ।
तं द्रवन्तमनु प्राप्तो वनमेतद्यदृच्छया ।
भवत्सकाशे नष्टश्रीर्हताशः श्रमकर्शितः ॥ २६
किं नु दुःखमतोऽन्यद्वै यदहं श्रमकर्शितः ।
भवतामाश्रमं प्राप्तो हताशो नष्टलक्षणः ॥ २७
न राज्यलक्षणत्यागो न पुरस्य तपोधनाः ।
दुःखं करोति तत्तीव्रं यथाशा विहता मम ॥ २८
हिमवान्वा महाशैलः समुद्रो वा महोदधिः ।
महत्त्वान्नान्वपद्येतां रोदस्योरन्तरं यथा ।
आशायास्तपसि श्रेष्ठास्तथा नान्तमहं गतः ॥ २९
भवतां विदितं सर्वं सर्वज्ञा हि तपोधनाः ।
भवन्तः सुमहाभागास्तस्माद्वक्ष्यामि संशयम् ॥३०
आशावान्पुरुषो यः स्यादन्तरिक्षमथापि वा ।
किं नु ज्यायस्तरं लोके महत्त्वात्प्रतिभाति वः ।
एतदिच्छामि तत्त्वेन श्रोतुं किमिह दुर्लभम् ॥ ३१
यदि गुह्यं तपोनित्या न वो ब्रूतेह माचिरम् ।
न हि गुह्यमतः श्रोतुमिच्छामि द्विजपुंगवाः ॥ ३२
भवत्तपोविघातो वा येन स्याद्विरमे ततः ।
यदि वास्ति कथायोगो योऽयं प्रश्नो मयेरितः ॥३३
एतत्कारणसामग्र्यं श्रोतुमिच्छामि तत्त्वतः ।
भवन्तो हि तपोनित्या ब्रूयुरेतत्समाहिताः ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

भीष्म उवाच ।

ततस्तेषां समस्तानामृषीणामृषिसत्तमः ।

ऋषभो नाम विप्रर्षिः स्मयन्निव ततोऽब्रवीत् ॥ १
पुराहं राजशार्दूल तीर्थान्यनुचरन्प्रभो ।
समासादितवान्दिव्यं नरनारायणाश्रमम् ॥ २
यत्र सा बदरी रम्या ह्रदो वैहायसस्तथा ।
यत्र चाश्वशिरा राजन्वेदान्पठति शाश्वतान् ॥ ३
तस्मिन्सरसि कृत्वाहं विधिवत्तर्पणं पुरा ।
पितॄणां देवतानां च ततोऽऽश्रममियां तदा ॥ ४
रेमाते यत्र तौ नित्यं नरनारायणावृषी ।
अदूरादाश्रमं कंचिद्वासार्थमगमं ततः ॥ ५
ततश्चीराजिनधरं कृशमुच्चमतीव च ।
अद्राक्षमृषिमायान्तं तनुं नाम तपोनिधिम् ॥ ६
अन्यैर्नरैर्महाबाहो वपुषाष्टगुणान्वितम् ।
कृशता चापि राजर्षे न दृष्टा तादृशी क्वचित् ॥ ७
शरीरमपि राजेन्द्र तस्य कानिष्ठिकासमम् ।
ग्रीवा बाहू तथा पादौ केशाश्चाद्भुतदर्शनाः ॥ ८
शिरः कायानुरूपं च कर्णौ नेत्रे तथैव च ।
तस्य वाक्चैव चेष्टा स सामान्ये राजसत्तम ॥ ९
दृष्ट्वाहं तं कृशं विप्रं भीतः परमदुर्मनाः ।
पादौ तस्याभिवाद्याथ स्थितः प्राञ्जलिरग्रतः ॥ १०
निवेद्य नाम गोत्रं च पितरं च नरर्षभ ।
प्रदिष्टे चासने तेन शनैरहमुपाविशम् ॥ ११
ततः स कथयामास कथा धर्मार्थसंहिताः ।
ऋषिमध्ये महाराज तत्र धर्मभृतां वरः ॥ १२
तस्मिंस्तु कथयत्येव राजा राजीवलोचनः ।
उपायाज्जवनैरश्वैः सबलः सावरोधनः ॥ १३
स्मरन्पुत्रमरण्ये वै नष्टं परमदुर्मनाः ।
भूरिद्युम्नपिता धीमान्रघुश्रेष्ठो महायशाः ॥ १४
इह द्रक्ष्यामि तं पुत्रं द्रक्ष्यामीहेति पार्थिवः ।
एवमाशाकृतो राजंश्चरन्वनमिदं पुरा ॥ १५
दुर्लभः स मया द्रष्टुं नूनं परमधार्मिकः ।
एकः पुत्रो महारण्ये नष्ट इत्यसकृत्तदा ॥ १६
दुर्लभः स मया द्रष्टुमाशा च महती मम ।
तया परीतगात्रोऽहं मुमूर्षुर्नात्र संशयः ॥ १७
एतच्छ्रुत्वा स भगवांस्तनुर्मुनिवरोत्तमः ।
अवाक्शिरा ध्यानपरो मुहूर्तमिव तस्थिवान् ॥ १८
तमनुध्यान्तमालक्ष्य राजा परमदुर्मनाः ।
उवाच वाक्यं दीनात्मा मन्दं मन्दमिवासकृत् ॥ १९
दुर्लभं किं नु विप्रर्षे आशायाश्चैव किं भवेत् ।
ब्रवीतु भगवानेतद्यदि गुह्यं न तन्मयि ॥ २०
महर्षिर्भगवांस्तेन पूर्वमासीद्विमानितः ।
बालिशां बुद्धिमास्थाय मन्दभाग्यतयात्मनः ॥ २१
अर्थयन्कलशं राजन्काञ्चनं वल्कलानि च ।
निर्विण्णः स तु विप्रर्षिर्निराशः समपद्यत ॥ २२
एवमुक्त्वाभिवाद्याथ तमृषिं लोकपूजितम् ।
श्रान्तो न्यषीदद्धर्मात्मा यथा त्वं नरसत्तम ॥ २३
अर्घ्यं ततः समानीय पाद्यं चैव महानृषिः ।
आरण्यकेन विधिना राज्ञे सर्वं न्यवेदयत् ॥ २४
ततस्ते मुनयः सर्वे परिवार्य नरर्षभम् ।
उपाविशन्पुरस्कृत्य सप्तर्षय इव ध्रुवम् ॥ २५
अपृच्छंश्चैव ते तत्र राजानमपराजितम् ।
प्रयोजनमिदं सर्वमाश्रमस्य प्रवेशनम् ॥ २६

राजोवाच ।

वीरद्युम्न इति ख्यातो राजाहं दिक्षु विश्रुतः ।
भूरिद्युम्नं सुतं नष्टमन्वेष्टुं वनमागतः ॥ २७
एकपुत्रः स विप्राग्र्य बाल एव च सोऽनघ ।
न दृश्यते वने चास्मिंस्तमन्वेष्टुं चराम्यहम् ॥ २८

ऋषभ उवाच ।

एवमुक्ते तु वचने राज्ञा मुनिरधोमुखः ।
तूष्णीमेवाभवत्तत्र न च प्रत्युक्तवान्नृपम् ॥ २९
स हि तेन पुरा विप्रो राज्ञा नात्यर्थमानितः ।

आशाकृशं च राजेन्द्र तपो दीर्घं समास्थितः ॥३०
प्रतिग्रहमहं राज्ञां न करिष्ये कथंचन ।
अन्येषां चैव वर्णानामिति कृत्वा धियं तदा ॥३१
आशा हि पुरुषं बालं लालापयति तस्थुषी ।
तामहं व्यपनेष्यामि इति कृत्वा व्यवस्थितः ॥ ३२

राजोवाच ।

आशायाः किं कृशत्वं च किं चेह भुवि दुर्लभम् ।
ब्रवीतु भगवानेतत्त्वं हि धर्मार्थदर्शिवान् ॥ ३३

ऋषभ उवाच ।

ततः संस्मृत्य तत्सर्वं स्मारयिष्यन्निवाब्रवीत् ।
राजानं भगवान्विप्रस्ततः कृशतनुस्तनुः ॥ ३४
कृशत्वे न समं राजन्नाशाया विद्यते नृप ।
तस्या वै दुर्लभत्वात्तु प्रार्थिताः पार्थिवा मया ॥३५

राजोवाच ।

कृशाकृशे मया ब्रह्मन्गृहीते वचनात्तव ।
दुर्लभत्वं च तस्यैव वेदवाक्यमिव द्विज ॥ ३६
संशयस्तु महाप्राज्ञ संजातो हृदये मम ।
तन्मे सत्तम तत्त्वेन वक्तुमर्हसि पृच्छतः ॥ ३७
त्वत्तः कृशतरं किं नु ब्रवीतु भगवानिदम् ।
यदि गुह्यं न ते विप्र लोकेऽस्मिन्किं नु दुर्लभम् ॥ ३८

कृशतनुरुवाच ।

दुर्लभोऽप्यथ वा नास्ति योऽर्थी धृतिमवाप्नुयात् ।
सुदुर्लभतरस्तात योऽर्थिनं नावमन्यते ॥ ३९
संश्रुत्य नोपक्रियते परं शक्त्या यथार्हतः ।
सक्ता या सर्वभूतेषु साशा कृशतरी मया ॥ ४०
एकपुत्रः पिता पुत्रे नष्टे वा प्रोषिते तथा ।
प्रवृत्तिं यो न जानाति साशा कृशतरी मया ॥४१
प्रसवे चैव नारीणां वृद्धानां पुत्रकारिता ।
तथा नरेन्द्र धनिनामाशा कृशतरी मया ॥ ४२

ऋषभ उवाच ।

एतच्छ्रुत्वा ततो राजन्स राजा सावरोधनः ।
संस्पृश्य पादौ शिरसा निपपात द्विजर्षभे ॥ ४३

राजोवाच ।

प्रसादये त्वा भगवन्पुत्रेणेच्छामि संगतिम् ।
वृणीष्व च वरं विप्र यमिच्छसि यथाविधि ॥ ४४

ऋषभ उवाच ।

अब्रवीच्च हि तं वाक्यं राजा राजीवलोचनः ।
सत्यमेतद्यथा विप्र त्वयोक्तं नास्त्यतो मृषा ॥ ४५
ततः प्रहस्य भगवांस्तनुर्धर्मभृतां वरः ।
पुत्रमस्यानयत्क्षिप्रं तपसा च श्रुतेन च ॥ ४६
तं समानाय्य पुत्रं तु तदोपालभ्य पार्थिवम् ।
आत्मानं दर्शयामास धर्मं धर्मभृतां वरः ॥ ४७
संदर्शयित्वा चात्मानं दिव्यमद्भुतदर्शनम् ।
विपाप्मा विगतक्रोधश्चचार वनमन्तिकात् ॥ ४८
एतद्दृष्टं मया राजंस्ततश्च वचनं श्रुतम् ।
आशामपनयस्वाशु ततः कृशतरीमिमाम् ॥ ४९

भीष्म उवाच ।

स तत्रोक्तो महाराज ऋषभेण महात्मना ।
सुमित्रोऽपनयत्क्षिप्रमाशां कृशतरीं तदा ॥ ५०
एवं त्वमपि कौन्तेय श्रुत्वा वाणीमिमां मम ।
स्थिरो भव यथा राजन्हिमवानचलोत्तमः ॥ ५१
त्वं हि द्रष्टा च श्रोता च कृच्छ्रेष्वर्थकृतेष्विह ।
श्रुत्वा मम महाराज न संतप्तुमिहार्हसि ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

१२७

युधिष्ठिर उवाच ।

नामृतस्येव पर्याप्तिर्ममास्ति ब्रुवति त्वयि ।
तस्मात्कथय भूयस्त्वं धर्ममेव पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गौतमस्य च संवादं यमस्य च महात्मनः ॥ २
पारियात्रगिरिं प्राप्य गौतमस्याश्रमो महान् ।
उवास गौतमो यत्र कालं तदपि मे शृणु ॥ ३
षष्टिं वर्षसहस्राणि सोऽतप्यद्गौतमस्तपः ।
तमुग्रतपसं युक्तं तपसा भावितं मुनिम् ॥ ४
उपयातो नरव्याघ्र लोकपालो यमस्तदा ।
तमपश्यत्सुतपसमृषिं वै गौतमं मुनिम् ॥ ५
स तं विदित्वा ब्रह्मर्षिर्यममागतमोजसा ।
प्राञ्जलिः प्रयतो भूत्वा उपसृप्तस्तपोधनः ॥ ६
तं धर्मराजो दृष्ट्वैव नमस्कृत्य नरर्षभम् ।
न्यमन्त्रयत धर्मेण क्रियतां किमिति ब्रुवन् ॥ ७

गौतम उवाच ।

मातापितृभ्यामानृण्यं किं कृत्वा समवाप्नुयात् ।
कथं च लोकानश्नाति पुरुषो दुर्लभाञ्शुभान् ॥ ८

यम उवाच ।

तपःशौचवता नित्यं सत्यधर्मरतेन च ।
मातापित्रोरहरहः पूजनं कार्यमञ्जसा ॥ ९
अश्वमेधैश्च यष्टव्यं बहुभिः स्वाप्तदक्षिणैः ।
तेन लोकानुपाश्नाति पुरुषोऽद्भुतदर्शनान् ॥ १०

इति श्रीमहाभारते शान्तिपर्वणि
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

युधिष्ठिर उवाच ।

मित्रैः प्रहीयमाणस्य बह्वमित्रस्य का गतिः ।
राज्ञः संक्षीणकोशस्य बलहीनस्य भारत ॥ १
दुष्टामात्यसहायस्य स्रुतमन्त्रस्य सर्वतः ।
राज्यात्प्रच्यवमानस्य गतिमन्यामपश्यतः ॥ २
परचक्राभियातस्य दुर्बलस्य बलीयसा ।
असंविहितराष्ट्रस्य देशकालावजानतः ॥ ३
अप्राप्यं च भवेत्सान्त्वं भेदो वाप्यतिपीडनात् ।
जीवितं चार्थहेतोर्वा तत्र किं सुकृतं भवेत् ॥ ४

भीष्म उवाच ।

गुह्यं मा धर्ममप्राक्षीरतीव भरतर्षभ ।
अपृष्टो नोत्सहे वक्तुं धर्ममेनं युधिष्ठिर ॥ ५
धर्मो ह्यणीयान्वचनाद्बुद्धेश्च भरतर्षभ ।
श्रुत्वोपास्य सदाचारैः साधुर्भवति स क्वचित् ॥ ६
कर्मणा बुद्धिपूर्वेण भवत्याढ्यो न वा पुनः ।
तादृशोऽयमनुप्रश्नः स व्यवस्यस्त्वया धिया ॥ ७
उपायं धर्मबहुलं यात्रार्थं शृणु भारत ।
नाहमेतादृशं धर्मं बुभूषे धर्मकारणात् ।
दुःखादान इहाढ्येषु स्यात्तु पश्चात्क्षमो मतः ॥ ८
अनुगम्य गतीनां च सर्वासामेव निश्चयम् ।
यथा यथा हि पुरुषो नित्यं शास्त्रमवेक्षते ।
तथा तथा विजानाति विज्ञानं चास्य रोचते ॥ ९
अविज्ञानाद्योगश्च पुरुषस्योपजायते ।
अविज्ञानादयोगो हि योगो भूतिकरः पुनः ॥ १०
अशङ्कमानो वचनमनसूयुरिदं शृणु ।
राज्ञः कोशक्षयादेव जायते बलसंक्षयः ॥ ११
कोशं संजनयेद्राजा निर्जलेभ्यो यथा जलम् ।
कालं प्राप्यानुगृह्णीयादेष धर्मोऽत्र सांप्रतम् ॥ १२
उपायधर्मं प्राप्यैनं पूर्वैराचरितं जनैः ।
अन्यो धर्मः समर्थानामापत्स्वन्यश्च भारत ॥ १३
प्राक्कोशः प्रोच्यते धर्मो बुद्धिर्धर्माद्गरीयसी ।
धर्मं प्राप्य न्यायवृत्तिमबलीयान्न विन्दति ॥ १४
यस्माद्धनस्योपपत्तिरेकान्तेन न विद्यते ।
तस्मादापद्यधर्मोऽपि श्रूयते धर्मलक्षणः ॥ १५
अधर्मो जायते यस्मिन्निति वै कवयो विदुः ।

अनन्तरः क्षत्रियस्य इति वै विचिकित्ससे ॥ १६
यथास्य धर्मो न ग्लायेन्नेयाच्छत्रुवशं यथा ।
तत्कर्तव्यमिहेत्याहुर्नात्मानमवसादयेत् ॥ १७
सन्नात्मा नैव धर्मस्य न परस्य न चात्मनः ।
सर्वोपायैरुज्जिहीर्षेदात्मानमिति निश्चयः ॥ १८
तत्र धर्मविदां तात निश्चयो धर्मनैपुणे ।
उद्यमो जीवनं क्षत्रे बाहुवीर्यादिति श्रुतिः ॥ १९
क्षत्रियो वृत्तिसंरोधे कस्य नादातुमर्हति ।
अन्यत्र तापसस्वाच्च ब्राह्मणस्वाच्च भारत ॥ २०
यथा वै ब्राह्मणः सीदन्नयाज्यमपि याजयेत् ।
अभोज्यान्नानि चाश्नीयात्तथेदं नात्र संशयः ॥ २१
पीडितस्य किमद्वारमुत्पथो निधृतस्य वा ।
अद्वारतः प्रद्रवति यदा भवति पीडितः ॥ २२
तस्य कोशबलज्यान्या सर्वलोकपराभवः ।
भैक्षचर्या न विहिता न च विट्शूद्रजीविका ॥२३
स्वधर्मानन्तरा वृत्तिर्यान्यानुपजीवतः ।
वहतः प्रथमं कल्पमनुकल्पेन जीवनम् ॥ २४
आपद्गतेन धर्माणामन्यायेनोपजीवनम् ।
अपि ह्येतद्ब्राह्मणेषु दृष्टं वृत्तिपरिक्षये ॥ २५
क्षत्रिये संशयः कः स्यादित्येतन्निश्चितं सदा ।
आददीत विशिष्टेभ्यो नावसीदेत्कथंचन ॥ २६
हन्तारं रक्षितारं च प्रजानां क्षत्रियं विदुः ।
तस्मात्संरक्षता कार्यमादानं क्षत्रबन्धुना ॥ २७
अन्यत्र राजन्हिंसाया वृत्तिर्नेहास्ति कस्यचित् ।
अप्यरण्यसमुत्थस्य एकस्य चरतो मुनेः ॥ २८
न शङ्खलिखितां वृत्तिं शक्यमास्थाय जीवितुम् ।
विशेषतः कुरुश्रेष्ठ प्रजापालनमीप्सता ॥ २९
परस्पराभिसंरक्षा राज्ञा राष्ट्रेण चापदि ।
नित्यमेवेह कर्तव्या एष धर्मः सनातनः ॥ ३०
राजा राष्ट्रं यथापत्सु द्रव्यौघैः परिरक्षति ।
राष्ट्रेण राजा व्यसने परिरक्ष्यस्तथा भवेत् ॥ ३१
कोशं दण्डं बलं मित्रं यदन्यदपि संचितम् ।
न कुर्वीतान्तरं राष्ट्रे राजा परिगते क्षुधा ॥ ३२
बीजं भक्तेन संपाद्यमिति धर्मविदो विदुः ।
अत्रैतच्छम्बरस्याहुर्महामायस्य दर्शनम् ॥ ३३
धिक्तस्य जीवितं राज्ञो राष्ट्रे यस्यावसीदति ।
अवृत्त्यान्त्यमनुष्योऽपि यो वै वेद शिबेर्वचः ॥३४
राज्ञः कोशबलं मूलं कोशमूलं पुनर्बलम् ।
तन्मूलं सर्वधर्माणां धर्ममूलाः पुनः प्रजाः ॥ ३५
नान्यानपीडयित्वेह कोशः शक्यः कुतो बलम् ।
तदर्थं पीडयित्वा च दोषं न प्राप्तुमर्हति ॥ ३६
अकार्यमपि यज्ञार्थं क्रियते यज्ञकर्मसु ।
एतस्मात्कारणाद्राजा न दोषं प्राप्तुमर्हति ॥ ३७
अर्थार्थमन्यद्भवति विपरीतमथापरम् ।
अनर्थार्थमथाप्यन्यत्तत्सर्वं ह्यर्थलक्षणम् ।
एवं बुद्ध्या संप्रपश्येन्मेधावी कार्यनिश्चयम् ॥ ३८
यज्ञार्थमन्यद्भवति यज्ञे नार्थस्तथापरः ।
यज्ञस्यार्थार्थमेवान्यत्तत्सर्वं यज्ञसाधनम् ॥ ३९
उपमामत्र वक्ष्यामि धर्मतत्त्वप्रकाशिनीम् ।
यूपं छिन्दन्ति यज्ञार्थं तत्र ये परिपन्थिनः ॥ ४०
द्रुमाः केचन सामन्ता ध्रुवं छिन्दन्ति तानपि ।
ते चापि निपतन्तोऽन्यान्निघ्नन्ति च वनस्पतीन् ॥४१
एवं कोशस्य महतो ये नराः परिपन्थिनः ।
तानहत्वा न पश्यामि सिद्धिमत्र परंतप ॥ ४२
धनेन जयते लोकावुभौ परमिमं तथा ।
सत्यं च धर्मवचनं यथा नास्त्यधनस्तथा ॥ ४३
सर्वोपायैराददीत धनं यज्ञप्रयोजनम् ।
न तुल्यदोषः स्यादेवं कार्याकार्येषु भारत ॥ ४४
नैतौ संभवतो राजन्कथंचिदपि भारत ।
न ह्यरण्येषु पश्यामि धनवृद्धानहं क्वचित् ॥ ४५

यदिदं दृश्यते वित्तं पृथिव्यामिह किंचन ।
ममेदं स्यान्ममेदं स्यादित्ययं काङ्क्षते जनः ॥ ४६
न च राज्यसमो धर्मः कश्चिदस्ति परंतप ।
धर्मं शंसन्ति ते राज्ञामापदर्थमितोऽन्यथा ॥ ४७
दानेन कर्मणा चान्ये तपसान्ये तपस्विनः ।
बुद्ध्या दाक्ष्येण चाप्यन्ये चिन्वन्ति धनसंचयान् ॥
अधनं दुर्बलं प्राहुर्धनेन बलवान्भवेत् ।
सर्वं धनवतः प्राप्यं सर्वं तरति कोशवान् ।
कोशाद्धर्मश्च कामश्च परो लोकस्तथाप्ययम् ॥ ४९

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

॥ समाप्तं राजधर्मपर्व ॥

१२९

युधिष्ठिर उवाच ।

क्षीणस्य दीर्घसूत्रस्य सानुक्रोशस्य बन्धुषु ।
विरक्तपौरराष्ट्रस्य निर्द्रव्यनिचयस्य च ॥ १
परिशङ्कितमुख्यस्य स्रुतमन्त्रस्य भारत ।
असंभावितमित्रस्य भिन्नामात्यस्य सर्वशः ॥ २
परचक्राभियातस्य दुर्बलस्य बलीयसा ।
आपन्नचेतसो ब्रूहि किं कार्यमवशिष्यते ॥ ३

भीष्म उवाच ।

बाह्यश्चेद्विजिगीषुः स्याद्धर्मार्थकुशलः शुचिः ।
जवेन संधिं कुर्वीत पूर्वान्पूर्वान्विमोक्षयन् ॥ ४
अधर्मविजिगीषुश्चेद्बलवान्पापनिश्चयः ।
आत्मनः संनिरोधेन संधिं तेनाभियोजयेत् ॥ ५
अपास्य राजधानीं वा तरेदन्येन वापदम् ।
तद्भावभावे द्रव्याणि जीवन्पुनरुपार्जयेत् ॥ ६
यास्तु स्युः केवलत्यागाच्छक्यास्तरितुमापदः ।
कस्तत्राधिकमात्मानं संत्यजेदर्थधर्मवित् ॥ ७
अवरोधाज्जुगुप्सेत का सपत्नधने दया ।
न त्वेवात्मा प्रदातव्यः शक्ये सति कथंचन ॥ ८

युधिष्ठिर उवाच ।

आभ्यन्तरे प्रकुपिते बाह्ये चोपनिपीडिते ।
क्षीणे कोशे स्रुते मन्त्रे किं कार्यमवशिष्यते ॥ ९

भीष्म उवाच ।

क्षिप्रं वा संधिकामः स्यात्क्षिप्रं वा तीक्ष्णविक्रमः ।
पदापनयनं क्षिप्रमेतावत्सांपरायिकम् ॥ १०
अनुरक्तेन पुष्टेन हृष्टेन जगतीपते ।
अल्पेनापि हि सैन्येन महीं जयति पार्थिवः ॥ ११
हतो वा दिवमारोहेद्विजयी क्षितिमावसेत् ।
युद्धे तु संत्यजन्प्राणाञ्शक्रस्यैति सलोकताम् ॥ १२
सर्वलोकागमं कृत्वा मृदुत्वं गन्तुमेव च ।
विश्वासाद्विनयं कुर्याद्व्यवस्येद्वाप्युपानहौ ॥ १३
अपक्रमितुमिच्छेद्वा यथाकामं तु सान्त्वयेत् ।
विलिङ्गमित्वा मित्रेण ततः स्वयमुपक्रमेत् ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
एकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥

१३०

युधिष्ठिर उवाच ।

हीने परमके धर्मे सर्वलोकातिलङ्घिनि ।
सर्वस्मिन्दस्युसाद्भूते पृथिव्यामुपजीवने ॥ १
केनास्मिन्ब्राह्मणो जीवेज्जघन्ये काल आगते ।
असंत्यजन्पुत्रपौत्राननुक्रोशात्पितामह ॥ २

भीष्म उवाच ।

विज्ञानबलमास्थाय जीवितव्यं तथागते ।
सर्वं साध्वर्थमेवेदमसाध्वर्थं न किंचन ॥ ३
असाधुभ्यो निरादाय साधुभ्यो यः प्रयच्छति ।
आत्मानं संक्रमं कृत्वा कृत्स्नधर्मविदेव सः ॥ ४

सुरोपेणात्मनो राजन्राज्ये स्थितिमकोपयन् ।
अदत्तमप्याददीत दातुर्वित्तं ममेति वा ॥ ५
विज्ञानबलपूतो यो वर्तते निन्दितेष्वपि ।
वृत्तविज्ञानवान्धीरः कस्तं किं वक्तुमर्हसि ॥ ६
येषां बलकृता वृत्तिर्नैषामन्याभिरोचते ।
तेजसाभिप्रवर्धन्ते बलवन्तो युधिष्ठिर ॥ ७
यदेव प्रकृतं शास्त्रमविशेषेण विन्दति ।
तदेव मध्याः सेवन्ते मेधावी चाप्यथोत्तरम् ॥ ८
ऋत्विक्पुरोहिताचार्यान्सत्कृतैरभिपूजितान् ।
न ब्राह्मणान्यातयेत दोषान्प्राप्नोति यातयन् ॥ ९
एतत्प्रमाणं लोकस्य चक्षुरेतत्सनातनम् ।
तत्प्रमाणोऽवगाहेत तेन तत्साध्वसाधु वा ॥ १०
बहूनि ग्रामवास्तव्या रोषाद्ब्रूयुः परस्परम् ।
न तेषां वचनाद्राजा सत्कुर्याद्यातयेत वा ॥ ११
न वाच्यः परिवादो वै न श्रोतव्यः कथंचन ।
कर्णावेव पिधातव्यौ प्रस्थेयं वा ततोऽन्यतः ॥१२
न वै सतां वृत्तमेतत्परिवादो न पैशुनम् ।
गुणानामेव वक्तारः सन्तः सत्सु युधिष्ठिर ॥ १३
यथा समधुरौ दम्यौ सुदान्तौ साधुवाहिनौ ।
धुरमुद्यम्य वहतस्तथा वर्तेत वै नृपः ।
यथा यथास्य वहतः सहायाः स्युस्तथापरे ॥ १४
आचारमेव मन्यन्ते गरीयो धर्मलक्षणम् ।
अपरे नैवमिच्छन्ति ये शङ्खलिखितप्रियाः ।
मार्दवादथ लोभाद्वा ते ब्रूयुर्वाक्यमीदृशम् ॥ १५
आर्षमप्यत्र पश्यन्ति विकर्मस्थस्य यापनम् ।
न चार्षात्सदृशं किंचित्प्रमाणं विद्यते क्वचित् ॥१६
देवा अपि विकर्मस्थं यातयन्ति नराधमम् ।
व्याजेन विन्दन्वित्तं हि धर्मात्तु परिहीयते ॥ १७
सर्वतः सत्कृतः सद्भिर्भूतिप्रभवकारणैः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं व्यवस्यति ॥ १८
यश्चतुर्गुणसंपन्नं धर्मं वेद स धर्मवित् ।
अहेरिव हि धर्मस्य पदं दुःखं गवेषितुम् ॥ १९
यथा मृगस्य विद्धस्य मृगव्याधः पदं नयेत् ।
कक्षे रुधिरपातेन तथा धर्मपदं नयेत् ॥ २०
एवं सद्भिर्विनीतेन पथा गन्तव्यमच्युत ।
राजर्षीणां वृत्तमेतदवगच्छ युधिष्ठिर ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

भीष्म उवाच ।

स्वराष्ट्रात्परराष्ट्राच्च कोशं संजनयेन्नृपः ।
कोशाद्धि धर्मः कौन्तेय राज्यमूलः प्रवर्तते ॥ १
तस्मात्संजनयेत्कोशं संहृत्य परिपालयेत् ।
परिपाल्यानुगृह्णीयादेष धर्मः सनातनः ॥ २
न कोशः शुद्धशौचेन न नृशंसेन जायते ।
पदं मध्यममास्थाय कोशसंग्रहणं चरेत् ॥ ३
अबलस्य कुतः कोशो ह्यकोशस्य कुतो बलम् ।
अबलस्य कुतो राज्यमराज्ञः श्रीः कुतो भवेत् ॥ ४
उच्चैर्वृत्तेः श्रियो हानिर्यथैव मरणं तथा ।
तस्मात्कोशं बलं मित्राण्यथ राजा विवर्धयेत् ॥ ५
हीनकोशं हि राजानमवजानन्ति मानवाः ।
न चास्याल्पेन तुष्यन्ति कार्यमभ्युत्सहन्ति च ॥ ६
श्रियो हि कारणाद्राजा सत्क्रियां लभते पराम् ।
सास्य गूहति पापानि वासो गुह्यमिव स्त्रियाः ॥ ७
ऋद्धिमस्यानुवर्तन्ते पुरा विप्रकृता जनाः ।
शालावृका इवाजस्रं जिघांसूनिव विन्दति ।
ईदृशस्य कुतो राज्ञः सुखं भरतसत्तम ॥ ८
उद्यच्छेदेव न ग्लायेदुद्यमो ह्येव पौरुषम् ।
अप्यपर्वणि भज्येत न नमेतेह कस्यचित् ॥ ९
अप्यरण्यं समाश्रित्य चरेद्दस्युगणैः सह ।

न त्वेवोद्धृतमर्यादैर्दस्युभिः सहितश्चरेत् ।
दस्यूनां सुलभा सेना रौद्रकर्मसु भारत ॥ १०
एकान्तेन ह्यमर्यादात्सर्वोऽप्युद्विजते जनः ।
दस्यवोऽप्युपशङ्कन्ते निरनुक्रोशकारिणः ॥ ११
स्थापयेदेव मर्यादां जनचित्तप्रसादिनीम् ।
अल्पाप्यथेह मर्यादा लोके भवति पूजिता ॥ १२
नायं लोकोऽस्ति न पर इति व्यवसितो जनः ।
नालं गन्तुं च विश्वासं नास्तिके भयशङ्किनि ॥१३
यथा सद्भिः परादानमहिंसा दस्युभिस्तथा ।
अनुरज्यन्ति भूतानि समर्यादेषु दस्युषु ॥ १४
अयुध्यमानस्य वधो दारामर्शः कृतघ्नता ।
ब्रह्मवित्तस्य चादानं निःशेषकरणं तथा ।
स्त्रिया मोषः परिस्थानं दस्युष्वेतद्विगर्हितम् ॥ १५
स एष एव भवति दस्युरेतानि वर्जयन् ।
अभिसंदधते ये न विनाशायास्य भारत ।
नशेषमेवोपालभ्य न कुर्वन्तीति निश्चयः ॥ १६
तस्मात्सशेषं कर्तव्यं स्वाधीनमपि दस्युभिः ।
न बलस्थोऽहमस्मीति नृशंसानि समाचरेत् ॥ १७
सशेषकारिणस्तात शेषं पश्यन्ति सर्वतः ।
निःशेषकारिणो नित्यमशेषकरणाद्भयम् ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

१३२

भीष्म उवाच ।

अत्र कर्मान्तवचनं कीर्तयन्ति पुराविदः ।
प्रत्यक्षावेव धर्मार्थौ क्षत्रियस्य विजानतः ।
तत्र न व्यवधातव्यं परोक्षा धर्मयापना ॥ १
अधर्मो धर्म इत्येतद्यथा वृकपदं तथा ।
धर्माधर्मफले जातु न ददर्शेह कश्चन ॥ २
बुभूषेद्बलवानेव सर्वं बलवतो वशे ।
श्रियं बलममात्यांश्च बलवानिह विन्दति ॥ ३
यो ह्यनाढ्यः स पतितस्तदुच्छिष्टं यदल्पकम् ।
बह्वपथ्यं बलवति न किंचित्त्रायते भयात् ॥ ४
उभौ सत्याधिकारौ तौ त्रायेते महतो भयात् ।
अति धर्माद्बलं मन्ये बलाद्धर्मः प्रवर्तते ॥ ५
बले प्रतिष्ठितो धर्मो धरण्यामिव जङ्गमः ।
धूमो वायोरिव वशं बलं धर्मोऽनुवर्तते ॥ ६
अनीश्वरे बलं धर्मो द्रुमं वल्लीव संश्रिता ।
वश्यो बलवतां धर्मः सुखं भोगवतामिव ।
नास्त्यसाध्यं बलवतां सर्वं बलवतां शुचि ॥ ७
दुराचारः क्षीणबलः परिमाणं नियच्छति ।
अथ तस्मादुद्विजते सर्वो लोको वृकादिव ॥ ८
अपध्वस्तो ह्यवमतो दुःखं जीवति जीवितम् ।
जीवितं यदवक्षिप्तं यथैव मरणं तथा ॥ ९
यदेनमाहुः पापेन चारित्रेण विनिक्षतम् ।
स भृशं तप्यतेऽनेन वाक्शल्येन परिक्षतः ॥ १०
अत्रैतदाहुराचार्याः पापस्य परिमोक्षणे ।
त्रयीं विद्यां निषेवेत तथोपासीत स द्विजान् ॥११
प्रसादयेन्मधुरया वाचाप्यथ च कर्मणा ।
महामनाश्चैव भवेद्विवहेच्च महाकुले ॥ १२
इत्यस्मीति वदेदेवं परेषां कीर्तयन्गुणान् ।
जपेदुदकशीलः स्यात्पेशलो नातिजल्पनः ॥ १३
ब्रह्मक्षत्रं संप्रविशेद्बहु कृत्वा सुदुष्करम् ।
उच्यमानोऽपि लोकेन बहु तत्तदचिन्तयन् ॥ १४
अपापो ह्येवमाचारः क्षिप्रं बहुमतो भवेत् ।
सुखं वित्तं च भुञ्जीत वृत्तेनैतेन गोपयेत् ।
लोके च लभते पूजां परत्र च महाफलम् ॥ १५

इति श्रीमहाभारते शान्तिपर्वणि
द्वात्रिंशदधिकशततमोऽध्यायः ॥ ॥१३२

१३३

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा दस्युः समर्यादः प्रेत्यभावे न नश्यति ॥ १
प्रहर्ता मतिमाञ्शूरः श्रुतवानन्नृशंसवान् ।
रक्षन्नक्षयिणं धर्मं ब्रह्मण्यो गुरुपूजकः ॥ २
निषाद्यां क्षत्रियाज्जातः क्षत्रधर्मानुपालकः ।
कापव्यो नाम नैषादिर्दस्युत्वात्सिद्धिमाप्तवान् ॥ ३
अरण्ये सायपूर्वाह्णे मृगयूथप्रकोपिता ।
विधिज्ञो मृगजातीनां निपानानां च कोविदः ॥ ४
सर्वकाननदेशज्ञः पारियात्रचरः सदा ।
धर्मज्ञः सर्वभूतानाममोघेषुर्दृढायुधः ॥ ५
अप्यनेकशताः सेना एक एव जिगाय सः ।
स वृद्धावन्धपितरौ महारण्येऽभ्यपूजयत् ॥ ६
मधुमांसैर्मूलफलैरन्नैरुच्चावचैरपि ।
सत्कृत्य भोजयामास सम्यक्परिचचार च ॥ ७
आरण्यकान्प्रव्रजितान्ब्राह्मणान्परिपालयन् ।
अपि तेभ्यो मृगान्हत्वा निनाय च महावने ॥ ८
ये स्म न प्रतिगृह्णन्ति दस्युभोजनशङ्कया ।
तेषामासज्य गेहेषु काल्य एव स गच्छति ॥ ९
तं बहूनि सहस्राणि ग्रामणित्वेऽभिवव्रिरे ।
निर्मर्यादानि दस्यूनां निरनुक्रोशकारिणाम् ॥ १०

दस्यव ऊचुः ।

मुहूर्तदेशकालज्ञ प्राज्ञ शीलदृढायुध ।
ग्रामणीर्भव नो मुख्यः सर्वेषामेव संमतः ॥ ११
यथा यथा वक्ष्यसि नः करिष्यामस्तथा तथा ।
पालयास्मान्यथान्यायं यथा माता यथा पिता ॥१२

कापव्य उवाच ।

मा वधीस्त्वं स्त्रियं भीरुं मा शिशुं मा तपस्विनम् ।
नायुध्यमानो हन्तव्यो न च ग्राह्या बलात्स्त्रियः ॥१३
सर्वथा स्त्री न हन्तव्या सर्वसत्त्वेषु युध्यता ।
नित्यं गोब्राह्मणे स्वस्ति योद्धव्यं च तदर्थतः ॥१४
सस्यं च नापहन्तव्यं सीरविघ्नं च मा कृथाः ।
पूज्यन्ते यत्र देवाश्च पितरोऽतिथयस्तथा ॥ १५
सर्वभूतेष्वपि च वै ब्राह्मणो मोक्षमर्हति ।
कार्या चापचितिस्तेषां सर्वस्वेनापि या भवेत् ॥१६
यस्य ह्येते संप्ररुष्टा मन्त्रयन्ति पराभवम् ।
न तस्य त्रिषु लोकेषु त्राता भवति कश्चन ॥ १७
यो ब्राह्मणान्परिभवेद्विनाशं वापि रोचयेत् ।
सूर्योदय इवावश्यं ध्रुवं तस्य पराभवः ॥ १८
इहैव फलमासीनः प्रत्याकाङ्क्षति शक्तितः ।
ये ये नो न प्रदास्यन्ति तांस्तान्सेनाभियास्यति ॥१९
शिष्ट्यर्थं विहितो दण्डो न वधार्थं विनिश्चयः ।
ये च शिष्टान्प्रबाधन्ते धर्मस्तेषां वधः स्मृतः ॥२०
ये हि राष्ट्रोपरोधेन वृत्तिं कुर्वन्ति केचन ।
तदेव तेऽनु मीयन्ते कुणपं कृमयो यथा ॥ २१
ये पुनर्धर्मशास्त्रेण वर्तेरन्निह दस्यवः ।
अपि ते दस्यवो भूत्वा क्षिप्रं सिद्धिमवाप्नुयुः ॥२२

भीष्म उवाच ।

तत्सर्वमुपचक्रुस्ते कापव्यस्यानुशासनम् ।
वृत्तिं च लेभिरे सर्वे पापेभ्यश्चाप्युपारमन् ॥ २३
कापव्यः कर्मणा तेन महतीं सिद्धिमाप्तवान् ।
साधूनामाचरन्क्षेमं दस्यून्पापान्निवर्तयन् ॥ २४
इदं कापव्यचरितं यो नित्यमनुकीर्तयेत् ।
नारण्येभ्यः स भूतेभ्यो भयमार्छेत्कदाचन ॥ २५
भयं तस्य न मर्त्येभ्यो नामर्त्येभ्यः कथंचन ।
न सतो नासतो राजन्स ह्यरण्येषु गोपतिः ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

१३४

भीष्म उवाच ।

अत्र गाथा ब्रह्मगीताः कीर्तयन्ति पुराविदः ।
येन मार्गेण राजानः कोशं संजनयन्ति च ॥ १
न धनं यज्ञशीलानां हार्यं देवस्वमेव तत् ।
दस्यूनां निष्क्रियाणां च क्षत्रियो हर्तुमर्हति ॥ २
इमाः प्रजाः क्षत्रियाणां रक्ष्याश्चाद्याश्च भारत ।
धनं हि क्षत्रियस्येह द्वितीयस्य न विद्यते ॥ ३
तदस्य स्याद्बलार्थं वा धनं यज्ञार्थमेव वा ।
अभोग्या ह्योषधीश्छित्त्वा भोग्या एव पचन्त्युत ॥४
यो वै न देवान्न पितॄन्न मर्त्यान्हविषार्चति ।
आनन्तिकां तां धनितामाहुर्वेदविदो जनाः ॥ ५
हरेतद्द्रविणं राजन्धार्मिकः पृथिवीपतिः ।
न हि तत्प्रीणयेल्लोकान्न कोशं तद्विधं नृप ॥ ६
असाधुभ्यो निरादाय साधुभ्यो यः प्रयच्छति ।
आत्मानं संक्रमं कृत्वा मन्ये धर्मविदेव सः ॥ ७
औद्भिज्जा जन्तवः केचिद्युक्तवाचो यथा तथा ।
अनिष्टतः संभवन्ति तथायज्ञः प्रतायते ॥ ८
यथैव दंशमशकं यथा चाण्डपिपीलिकम् ।
सैव वृत्तिरयज्ञेषु तथा धर्मो विधीयते ॥ ९
यथा ह्यकस्माद्भवति भूमौ पांसुतृणोलपम् ।
तथैवेह भवेद्धर्मः सूक्ष्मः सूक्ष्मतरोऽपि च ॥ १०

इति श्रीमहाभारते शान्तिपर्वणि
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

१३५

भीष्म उवाच ।

अत्रैव चेदमव्यग्रः शृण्वाख्यानमनुत्तमम् ।
दीर्घसूत्रं समाश्रित्य कार्याकार्यविनिश्चये ॥ १
नातिगाधे जलस्थाये सुहृदः शकुलास्त्रयः ।
प्रभूतमत्स्ये कौन्तेय बभूवुः सहचारिणः ॥ २
अत्रैकः प्राप्तकालज्ञो दीर्घदर्शी तथापरः ।
दीर्घसूत्रश्च तत्रैकस्त्रयाणां जलचारिणाम् ॥ ३
कदाचित्तज्जलस्थायं मत्स्यबन्धाः समन्ततः ।
निःस्रावयामासुरथो निम्नेषु विविधैर्मुखैः ॥ ४
प्रक्षीयमाणं तं बुद्ध्वा जलस्थायं भयागमे ।
अब्रवीद्दीर्घदर्शी तु तावुभौ सुहृदौ तदा ॥ ५
इयमापत्समुत्पन्ना सर्वेषां सलिलौकसाम् ।
शीघ्रमन्यत्र गच्छामः पन्था यावन्न दुष्यति ॥ ६
अनागतमनर्थं हि सुनयैर्यः प्रबाधते ।
न स संशयमाप्नोति रोचतां वां व्रजामहे ॥ ७
दीर्घसूत्रस्तु यस्तत्र सोऽब्रवीत्सम्यगुच्यते ।
न तु कार्या त्वरा यावदिति मे निश्चिता मतिः ॥ ८
अथ संप्रतिपत्तिज्ञः प्राब्रवीद्दीर्घदर्शिनम् ।
प्राप्ते काले न मे किंचिन्न्यायतः परिहास्यते ॥ ९
एवमुक्तो निराक्रामद्दीर्घदर्शी महामतिः ।
जगाम स्रोतसैकेन गम्भीरसलिलाशयम् ॥ १०
ततः प्रस्रुततोयं तं समीक्ष्य सलिलाशयम् ।
बबन्धुर्विविधैर्योगैर्मत्स्यान्मत्स्योपजीविनः ॥ ११
विलोड्यमाने तस्मिंस्तु स्रुततोये जलाशये ।
अगच्छद्ग्रहणं तत्र दीर्घसूत्रः सहापरैः ॥ १२
उद्दानं क्रियमाणं च मत्स्यानां वीक्ष्य रज्जुभिः ।
प्रविश्यान्तरमन्येषामग्रसत्प्रतिपत्तिमान् ॥ १३
ग्रस्तमेव तदुद्दानं गृहीत्वास्त तथैव सः ।
सर्वानेव तु तांस्तत्र ते विदुर्ग्रथिता इति ॥ १४
ततः प्रक्षाल्यमानेषु मत्स्येषु विमले जले ।
त्यक्त्वा रज्जुं विमुक्तोऽभूच्छीघ्रं संप्रतिपत्तिमान् ॥
दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः ।
मरणं प्राप्तवान्मूढो यथैवोपहतेन्द्रियः ॥ १६
एवं प्राप्ततमं कालं यो मोहान्नावबुध्यते ।
स विनश्यति वै क्षिप्रं दीर्घसूत्रो यथा झषः ॥१७

आदौ न कुरुते श्रेयः कुशलोऽस्मीति यः पुमान् ।
स संशयमवाप्नोति यथा संप्रतिपत्तिमान् ॥ १८
अनागतविधानं तु यो नरः कुरुते क्षमम् ।
श्रेयः प्राप्नोति सोऽत्यर्थं दीर्घदर्शी यथा ह्यसौ ॥ १९
कलाः काष्ठा मुहूर्ताश्च दिना नाड्यः क्षणा लवाः ।
पक्षा मासाश्च ऋतवस्तुल्याः संवत्सराणि च ॥२०
पृथिवी देश इत्युक्तः कालः स च न दृश्यते ।
अभिप्रेतार्थसिद्ध्यर्थं न्यायतो यच्च तत्तथा ॥ २१
एतौ धर्मार्थशास्त्रेषु मोक्षशास्त्रेषु चर्षिभिः ।
प्रधानाविति निर्दिष्टौ कामेशाभिमतौ नृणाम् ॥२२
परीक्ष्यकारी युक्तस्तु सम्यक्समुपपादयेत् ।
देशकालावभिप्रेतौ ताभ्यां फलमवाप्नुयात् ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

युधिष्ठिर उवाच ।

सर्वत्र बुद्धिः कथिता श्रेष्ठा ते भरतर्षभ ।
अनागता तथोत्पन्ना दीर्घसूत्रा विनाशिनी ॥ १
तदिच्छामि परां बुद्धिं श्रोतुं भरतसत्तम ।
यथा राजन्न मुह्येत शत्रुभिः परिवारितः ॥ २
धर्मार्थकुशल प्राज्ञ सर्वशास्त्रविशारद ।
पृच्छामि त्वा कुरुश्रेष्ठ तन्मे व्याख्यातुमर्हसि ॥ ३
शत्रुभिर्बहुभिर्ग्रस्तो यथा वर्तेत पार्थिवः ।
एतदिच्छाम्यहं श्रोतुं सर्वमेव यथाविधि ॥ ४
विषमस्थं हि राजानं शत्रवः परिपन्थिनः ।
बहवोऽप्येकमुद्धर्तुं यतन्ते पूर्वतापिताः ॥ ५
सर्वतः प्रार्थ्यमानेन दुर्बलेन महाबलैः ।
एकेनैवासहायेन शक्यं स्थातुं कथं भवेत् ॥ ६
कथं मित्रमरिं चैव विन्देत भरतर्षभ ।
चेष्टितव्यं कथं चाथ शत्रोर्मित्रस्य चान्तरे ॥ ७
प्रज्ञातलक्षणे राजन्नमित्रे मित्रतां गते ।
कथं नु पुरुषः कुर्यात्किं वा कृत्वा सुखी भवेत् ॥ ८
विग्रहं केन वा कुर्यात्संधिं वा केन योजयेत् ।
कथं वा शत्रुमध्यस्थो वर्तेताबलवानिति ॥ ९
एतद्वै सर्वकृत्यानां परं कृत्यं परंतप ।
नैतस्य कश्चिद्वक्तास्ति श्रोता चापि सुदुर्लभः ॥ १०
ऋते शांतनवाद्भीष्मात्सत्यसंधाज्जितेन्द्रियात् ।
तदन्विष्य महाबाहो सर्वमेतद्वदस्व मे ॥ ११

भीष्म उवाच ।

त्वद्युक्तोऽयमनुप्रश्नो युधिष्ठिर गुणोदयः ।
शृणु मे पुत्र कार्त्स्न्येन गुह्यमापत्सु भारत ॥ १२
अमित्रो मित्रतां याति मित्रं चापि प्रदुष्यति ।
सामर्थ्ययोगात्कार्याणां तद्गत्या हि सदा गतिः ॥१३
तस्माद्विश्वसितव्यं च विग्रहं च समाचरेत् ।
देशं कालं च विज्ञाय कार्याकार्यविनिश्चये ॥ १४
संधातव्यं बुधैर्नित्यं व्यवस्यं च हितार्थिभिः ।
अमित्रैरपि संधेयं प्राणा रक्ष्याश्च भारत ॥ १५
यो ह्यमित्रैर्नरो नित्यं न संदध्यादपण्डितः ।
न सोऽर्थमाप्नुयात्किंचित्फलान्यपि च भारत ॥१६
यस्त्वमित्रेण संधत्ते मित्रेण च विरुध्यते ।
अर्थयुक्तिं समालोक्य सुमहद्विन्दते फलम् ॥ १७
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मार्जारस्य च संवादं न्यग्रोधे मूषकस्य च ॥ १८
वने महति कस्मिंश्चिन्न्यग्रोधः सुमहानभूत् ।
लताजालपरिच्छन्नो नानाद्विजगणायुतः ॥ १९
स्कन्धवान्मेघसंकाशः शीतच्छायो मनोरमः ।
वैरन्त्यमभितो जातस्तरुर्व्यालमृगाकुलः ॥ २०
तस्य मूलं समाश्रित्य कृत्वा शतमुखं बिलम् ।
वसति स्म महाप्राज्ञः पलितो नाम मूषकः ॥ २१
शाखाश्च तस्य संश्रित्य वसति स्म सुखं पुरः ।

लोमशो नाम मार्जारः पक्षिसत्त्वावसादकः ॥ २२
तत्र चागत्य चाण्डालो वैरन्त्यकृतकेतनः ।
अयोजयत्तमुन्माथं नित्यमस्तं गते रवौ ॥ २३
तत्र स्नायुमयान्पाशान्यथावत्संनिधाय सः ।
गृहं गत्वा सुखं शेते प्रभातामेति शर्वरीम् ॥ २४
तत्र स्म नित्यं बध्यन्ते नक्तं बहुविधा मृगाः ।
कदाचित्तत्र मार्जारस्त्वप्रमत्तोऽप्यबध्यत ॥ २५
तस्मिन्बद्धे महाप्राज्ञः शत्रौ नित्याततायिनि ।
तं कालं पलितो ज्ञात्वा विचचार सुनिर्भयः ॥२६
तेनानुचरता तस्मिन्वने विश्वस्तचारिणा ।
भक्ष्यं विचरमाणेन नचिराद्दृष्टमामिषम् ॥ २७
स तमुन्माथमारुह्य तदामिषमभक्षयत् ।
तस्योपरि सपत्नस्य बद्धस्य मनसा हसन् ॥ २८
आमिषे तु प्रसक्तः स कदाचिदवलोकयन् ।
अपश्यदपरं घोरमात्मनः शत्रुमागतम् ॥ २९
शरप्रसूनसंकाशं महीविवरशायिनम् ।
नकुलं हरिकं नाम चपलं ताम्रलोचनम् ॥ ३०
तेन मूषकगन्धेन त्वरमाणमुपागतम् ।
भक्षार्थं लेलिहद्वक्त्रं भूमावूर्ध्वमुखं स्थितम् ॥ ३१
शाखागतमरिं चान्यदपश्यत्कोटरालयम् ।
उलूकं चन्द्रकं नाम तीक्ष्णतुण्डं क्षपाचरम् ॥ ३२
गतस्य विषयं तस्य नकुलोलूकयोस्तदा ।
अथास्यासीदियं चिन्ता तत्प्राप्य सुमहद्भयम् ॥३३
आपद्यस्यां सुकष्टायां मरणे समुपस्थिते ।
समन्ताद्भय उत्पन्ने कथं कार्यं हितैषिणा ॥ ३४
स तथा सर्वतो रुद्धः सर्वत्र समदर्शनः ।
अभवद्भयसंतप्तश्चक्रे चेमां परां गतिम् ॥ ३५
आपद्विनाशभूयिष्ठा शतैकीयं च जीवितम् ।
समन्तसंशया चेयमस्मानापदुपस्थिता ॥ ३६
गतं हि सहसा भूमिं नकुलो मां समाप्नुयात् ।
उलूकश्चेह तिष्ठन्तं मार्जारः पाशसंक्षयात् ॥ ३७
न त्वेवास्मद्विधः प्राज्ञः संमोहं गन्तुमर्हति ।
करिष्ये जीविते यत्नं यावदुच्छ्वासनिग्रहम् ॥ ३८
न हि बुद्ध्यान्विताः प्राज्ञा नीतिशास्त्रविशारदाः ।
संभ्रमन्त्यापदं प्राप्य महतोऽर्थानवाप्य च ॥ ३९
न त्वन्यामिह मार्जाराद्गतिं पश्यामि सांप्रतम् ।
विषमस्थो ह्ययं जन्तुः कृत्यं चास्य महन्मया ॥४०
जीवितार्थी कथं त्वद्य प्रार्थितः शत्रुभिस्त्रिभिः ।
तस्मादिममहं शत्रुं मार्जारं संश्रयामि वै ॥ ४१
क्षत्रविद्यां समाश्रित्य हितमस्योपधारये ।
येनेमं शत्रुसंघातं मतिपूर्वेण वञ्चये ॥ ४२
अयमत्यन्तशत्रुर्मे वैषम्यं परमं गतः ।
मूढो ग्राहयितुं स्वार्थं संगत्या यदि शक्यते ॥४३
कदाचिद्व्यसनं प्राप्य संधिं कुर्यान्मया सह ।
बलिना संनिविष्टस्य शत्रोरपि परिग्रहः ।
कार्य इत्याहुराचार्या विषमे जीवितार्थिना ॥ ४४
श्रेयान्हि पण्डितः शत्रुर्न च मित्रमपण्डितम् ।
मम ह्यमित्रे मार्जारे जीवितं संप्रतिष्ठितम् ॥ ४५
हन्तैनं संप्रवक्ष्यामि हेतुमात्माभिरक्षणे ।
अपीदानीमयं शत्रुः संगत्या पण्डितो भवेत् ॥ ४६
ततोऽर्थगतितत्त्वज्ञः संधिविग्रहकालवित् ।
सान्त्वपूर्वमिदं वाक्यं मार्जारं मूषकोऽब्रवीत् ॥४७
सौहृदेनाभिभाषे त्वा कच्चिन्मार्जार जीवसि ।
जीवितं हि तवेच्छामि श्रेयः साधारणं हि नौ ॥४८
न ते सौम्य विषत्तव्यं जीविष्यसि यथा पुरा ।
अहं त्वामुद्धरिष्यामि प्राणाञ्जह्यां हि ते कृते ॥४९
अस्ति कश्चिदुपायोऽत्र पुष्कलः प्रतिभाति माम् ।
येन शक्यस्त्वया मोक्षः प्राप्तुं श्रेयो यथा मया ॥५०
मया ह्युपायो दृष्टोऽयं विचार्य मतिमात्मनः ।
आत्मार्थं च त्वदर्थं च श्रेयः साधारणं हि नो ॥५१

इदं हि नकुलोलूकं पापबुद्ध्यभितः स्थितम् ।
न धर्षयति मार्जार तेन मे स्वस्ति सांप्रतम् ॥५२
कूजंश्चपलनेत्रोऽयं कौशिको मां निरीक्षते ।
नगशाखाग्रहस्तिष्ठंस्तस्याहं भृशमुद्विजे ॥ ५३
सतां साप्तपदं सख्यं सवासो मेऽसि पण्डितः ।
सांवास्यकं करिष्यामि नास्ति ते मृत्युतो भयम् ॥ ५४
न हि शक्नोषि मार्जार पाशं छेत्तुं विना मया ।
अहं छेत्स्यामि ते पाशं यदि मां त्वं न हिंससि ॥५५
त्वमाश्रितो नगस्याग्रं मूलं त्वहमुपाश्रितः ।
चिरोषिताविहावां वै वृक्षेऽस्मिन्विदितं हि ते ॥५६
यस्मिन्नाश्वसते कश्चिद्यश्च नाश्वसते क्वचित् ।
न तौ धीराः प्रशंसन्ति नित्यमुद्विग्नचेतसौ ॥ ५७
तस्माद्विवर्धतां प्रीतिः सत्या संगतिरस्तु नौ ।
कालातीतमपार्थं हि न प्रशंसंति पण्डिताः ॥ ५८
अर्थयुक्तिमिमां तावद्यथाभूतां निशामय ।
तव जीवितमिच्छामि त्वं ममेच्छसि जीवितम् ॥५९
कश्चित्तरति काष्ठेन सुगम्भीरां महानदीम् ।
स तारयति तत्काष्ठं स च काष्ठेन तार्यते ॥ ६०
ईदृशो नौ समायोगो भविष्यति सुनिस्तरः ।
अहं त्वां तारयिष्यामि त्वं च मां तारयिष्यसि॥६१
एवमुक्त्वा तु पलितस्तदर्थमुभयोर्हितम् ।
हेतुमद्ग्रहणीयं च कालाकाङ्क्षी व्यपैक्षत ॥ ६२
अथ सुव्याहृतं तस्य श्रुत्वा शत्रुर्विचक्षणः ।
हेतुमद्ग्रहणीयार्थं मार्जारो वाक्यमब्रवीत् ॥ ६३
बुद्धिमान्वाक्यसंपन्नस्तद्वाक्यमनुवर्णयन् ।
तामवस्थामवेक्ष्यात्मनः साम्नैव प्रत्यपूजयत् ॥ ६४
ततस्तीक्ष्णाग्रदशनो वैडूर्यमणिलोचनः ।
मूषकं मन्दमुद्वीक्ष्य मार्जारो लोमशोऽब्रवीत् ॥६५
नन्दामि सौम्य भद्रं ते यो मां जीवन्तमिच्छसि ।
श्रेयश्च यदि जानीषे क्रियतां मा विचारय ॥ ६६
अहं हि दृढमापन्नस्त्वमापन्नतरो मया ।
द्वयोरापन्नयोः संधिः क्रियतां मा विचारय ॥ ६७
विधत्स्व प्राप्तकालं यत्कार्यं सिध्यतु चावयोः ।
मयि कृच्छ्राद्विनिर्मुक्ते न विनङ्क्ष्यति ते कृतम् ॥६८
न्यस्तमानोऽस्मि भक्तोऽस्मि शिष्यस्त्वद्धितकृत्तथा ।
निदेशवशवर्ती च भवन्तं शरणं गतः ॥ ६९
इत्येवमुक्तः पलितो मार्जारं वशमागतम् ।
वाक्यं हितमुवाचेदमभिनीतार्थमर्थवत् ॥ ७०
उदारं यद्भवानाह नैतच्चित्रं भवद्विधे ।
विदितो यस्तु मार्गो मे हितार्थं शृणु तं मम ॥७१
अहं त्वानुप्रवेक्ष्यामि नकुलान्मे महद्भयम् ।
त्रायस्व मां मा वधीश्च शक्तोऽस्मि तव मोक्षणे ॥७२
उलूकाच्चैव मां रक्ष क्षुद्रः प्रार्थयते हि माम् ।
अहं छेत्स्यामि ते पाशान्सखे सत्येन ते शपे ॥७३
तद्वचः संगतं श्रुत्वा लोमशो युक्तमर्थवत् ।
हर्षादुद्वीक्ष्य पलितं स्वागतेनाभ्यपूजयत् ॥ ७४
स तं संपूज्य पलितं मार्जारः सौहृदे स्थितः ।
सुविचिन्त्याब्रवीद्धीरः प्रीतस्त्वरित एव हि ॥ ७५
क्षिप्रमागच्छ भद्रं ते त्वं मे प्राणसमः सखा ।
तव प्राज्ञ प्रसादाद्धि क्षिप्रं प्राप्स्यामि जीवितम् ॥७६
यद्यदेवंगतेनाद्य शक्यं कर्तुं मया तव ।
तदाज्ञापय कर्ताहं संधिरेवास्तु नौ सखे ॥ ७७
अस्मात्ते संशयान्मुक्तः समित्रगणबान्धवः ।
सर्वकार्याणि कर्ताहं प्रियाणि च हितानि च ॥७८
मुक्तश्च व्यसनादस्मात्सौम्याहमपि नाम ते ।
प्रीतिमुत्पादयेयं च प्रतिकर्तुं च शक्नुयाम् ॥ ७९
ग्राहयित्वा तु यं स्वार्थं मार्जारं मूषकस्तदा ।
प्रविवेश सुविस्रब्धः सम्यगर्थांश्चचार ह ॥ ८०
एवमाश्वासितो विद्वान्मार्जारेण स मूषकः ।
मार्जारोरसि विस्रब्धः सुष्वाप पितृमातृवत् ॥ ८१

लीनं तु तस्य गात्रेषु मार्जारस्याथ मूषकम् ।
तौ दृष्ट्वा नकुलोलूकौ निराशौ जग्मतुर्गृहान् ॥ ८२
लीनस्तु तस्य गात्रेषु पलितो देशकालवित् ।
चिच्छेद पाशान्नृपते कालाकाङ्क्षी शनैः शनैः ॥८३
अथ बन्धपरिक्लिष्टो मार्जारो वीक्ष्य मूषकम् ।
छिन्दन्तं वै तदा पाशानत्वरन्तं त्वरान्वितः ॥ ८४
तमत्वरन्तं पलितं पाशानां छेदने तदा ।
संचोदयितुमारेभे मार्जारो मूषकं तदा ॥ ८५
किं सौम्य नाभित्वरसे किं कृतार्थोऽवमन्यसे ।
छिन्धि पाशानमित्रघ्न पुरा श्वपच एति सः ॥ ८६
इत्युक्तस्त्वरता तेन मतिमान्पलितोऽब्रवीत् ।
मार्जारमकृतप्रज्ञं वश्यमात्महितं वचः ॥ ८७
तूष्णीं भव न ते सौम्य त्वरा कार्या न संभ्रमः ।
वयमेवात्र कालज्ञा न कालः परिहास्यते ॥ ८८
अकाले कृत्यमारब्धं कर्तुं नार्थाय कल्पते ।
तदेव काल आरब्धं महतेऽर्थाय कल्पते ॥ ८९
अकालविप्रमुक्तान्मे त्वत्त एव भयं भवेत् ।
तस्मात्कालं प्रतीक्षस्व किमिति त्वरसे सखे ॥ ९०
यावत्पश्यामि चण्डालमायान्तं शस्त्रपाणिनम् ।
ततश्छेत्स्यामि ते पाशं प्राप्ते साधारणे भये ॥ ९१
तस्मिन्काले प्रमुक्तस्त्वं तरुमेवाधिरोहसि ।
न हि ते जीवितादन्यत्किंचित्कृत्यं भविष्यति ॥९२
ततो भवत्यतिक्रान्ते त्रस्ते भीते च लोमश ।
अहं बिलं प्रवेक्ष्यामि भवाञ्शाखां गमिष्यति ॥९३
एवमुक्तस्तु मार्जारो मूषकेणात्मनो हितम् ।
वचनं वाक्यतत्त्वज्ञो जीवितार्थी महामतिः ॥ ९४
अथात्मकृत्यत्वरितः सम्यक्प्रश्रयमाचरन् ।
उवाच लोमशो वाक्यं मूषकं चिरकारिणम् ॥ ९५
न ह्येवं मित्रकार्याणि प्रीत्या कुर्वन्ति साधवः ।
यथा त्वं मोक्षितः कृच्छ्रात्त्वरमाणेन वै मया ॥९६
तथैव त्वरमाणेन त्वया कार्यं हितं मम ।
यत्नं कुरु महाप्राज्ञ यथा स्वस्त्यावयोर्भवेत् ॥ ९७
अथ वा पूर्ववैरं त्वं स्मरन्कालं विकर्षसि ।
पश्य दुष्कृतकर्मत्वं व्यक्तमायुःक्षयो मम ॥ ९८
यच्च किंचिन्मयाज्ञानात्पुरस्ताद्विप्रियं कृतम् ।
न तन्मनसि कर्तव्यं क्षमये त्वां प्रसीद मे ॥ ९९
तमेवंवादिनं प्राज्ञः शास्त्रविद्बुद्धिसंमतः ।
उवाचेदं वचः श्रेष्ठं मार्जारं मूषकस्तदा ॥ १००
श्रुतं मे तव मार्जार स्वमर्थं परिगृह्णतः ।
ममापि त्वं विजानीहि स्वमर्थं परिगृह्णतः ॥ १०१
यन्मित्रं भीतवत्साध्यं यन्मित्रं भयसंहितम् ।
सुरक्षितं ततः कार्यं पाणिः सर्पमुखादिव ॥ १०२
कृत्वा बलवता संधिमात्मानं यो न रक्षति ।
अपथ्यमिव तद्भुक्तं तस्यानर्थाय कल्पते ॥ १०३
न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचित्सुहृत् ।
अर्थैरर्था निबध्यन्ते गजैर्वनगजा इव ॥ १०४
न हि कश्चित्कृते कार्ये कर्तारं समवेक्षते ।
तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत्॥१०५
तस्मिन्कालेऽपि च भवान्दिवाकीर्तिभयान्वितः ।
मम न ग्रहणे शक्तः पलायनपरायणः ॥ १०६
छिन्नं तु तन्तुबाहुल्यं तन्तुरेकोऽवशेषितः ।
छेत्स्याम्यहं तदप्याशु निर्वृतो भव लोमश ॥१०७
तयोः संवदतोरेवं तथैवापन्नयोर्द्वयोः ।
क्षयं जगाम सा रात्रिर्लोमशं चाविशद्भयम् ॥१०८
ततः प्रभातसमये विकृतः कृष्णपिङ्गलः ।
स्थूलस्फिग्विकचो रूक्षः श्वयूथपरिवारितः ॥ १०९
शङ्कुकर्णो महावक्त्रः पलितो घोरदर्शनः ।
परिघो नाम चण्डालः शस्त्रपाणिरदृश्यत ॥ ११०
तं दृष्ट्वा यमदूताभं मार्जारस्त्रस्तचेतनः ।
उवाच पलितं भीतः किमिदानीं करिष्यसि ॥१११

अथ चापि सुसंत्रस्तौ तं दृष्ट्वा घोरदर्शनम् ।
क्षणेन नकुलोलूकौ नैराश्यं जग्मतुस्तदा ॥ ११२
बलिनौ मतिमन्तौ च संघातं चाप्युपागतौ ।
अशक्तौ सुनयात्तस्मात्संप्रधर्षयितुं बलात् ॥११३
कार्यार्थे कृतसंधी तौ दृष्ट्वा मार्जारमूषकौ ।
उलूकनकुलौ तूर्णं जग्मतुः स्वं स्वमालयम् ॥११४
ततश्चिच्छेद तं तन्तुं मार्जारस्य स मूषकः ।
विप्रमुक्तोऽथ मार्जारस्तमेवाभ्यपतद्द्रुमम् ॥ ११५
स च तस्माद्भयान्मुक्तो मुक्तो घोरेण शत्रुणा ।
बिलं विवेश पलितः शाखां भेजे च लोमशः ॥ ११६
उन्माथमप्यथादाय चण्डालो वीक्ष्य सर्वशः ।
विहताशः क्षणेनाथ तस्माद्देशादपाक्रमत् ।
जगाम च स्वभवनं चण्डालो भरतर्षभ ॥ ११७
ततस्तस्माद्भयान्मुक्तो दुर्लभं प्राप्य जीवितम् ।
बिलस्थं पादपाग्रस्थः पलितं लोमशोऽब्रवीत् ॥११८
अकृत्वा संविदं कांचित्सहसाहमुपप्लुतः ।
कृतज्ञं कृतकल्याणं कच्चिन्मां नाभिशङ्कसे ॥ ११९
गत्वा च मम विश्वासं दत्त्वा च मम जीवितम् ।
मित्रोपभोगसमये किं त्वं नैवोपसर्पसि ॥ १२०
कृत्वा हि पूर्वं मित्राणि यः पश्चान्नानुतिष्ठति ।
न स मित्राणि लभते कृच्छ्रास्वापत्सु दुर्मतिः ॥१२१
तत्कृतोऽहं त्वया मित्रं सामर्थ्यादात्मनः सखे ।
स मां मित्रत्वमापन्नमुपभोक्तुं त्वमर्हसि ॥ १२२
यानि मे सन्ति मित्राणि ये च मे सन्ति बान्धवाः ।
सर्वे त्वां पूजयिष्यन्ति शिष्या गुरुमिव प्रियम् ॥
अहं च पूजयिष्ये त्वां समित्रगणबान्धवम् ।
जीवितस्य प्रदातारं कृतज्ञः को न पूजयेत् ॥१२४
ईश्वरो मे भवानस्तु शरीरस्य गृहस्य च ।
अर्थानां चैव सर्वेषामनुशास्ता च मे भव ॥१२५
अमात्यो मे भव प्राज्ञ पितेव हि प्रशाधि माम् ।
न तेऽस्ति भयमस्मत्तो जीवितेनात्मनः शपे ॥ १२६
बुद्ध्या त्वमुशनाः साक्षाद्बले त्वधिकृता वयम् ।
त्वन्मन्त्रबलयुक्तो हि विन्देत जयमेव ह ॥ १२७
एवमुक्तः परं सान्त्वं मार्जारेण स मूषकः ।
उवाच परमार्थज्ञः श्लक्ष्णमात्महितं वचः ॥ १२८
यद्भवानाह तत्सर्वं मया ते लोमश श्रुतम् ।
ममापि तावद्ब्रुवतः शृणु यत्प्रतिभाति माम् ॥१२९
वेदितव्यानि मित्राणि बोद्धव्याश्चापि शत्रवः ।
एतत्सुसूक्ष्मं लोकेऽस्मिन्दृश्यते प्राज्ञसंमतम् ॥१३०
शत्रुरूपाश्च सुहृदो मित्ररूपाश्च शत्रवः ।
सान्त्वितास्ते न बुध्यन्ते रागलोभवशं गताः ॥ १३१
नास्ति जात्या रिपुर्नाम मित्रं नाम न विद्यते ।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा ॥१३२
यो यस्मिञ्जीवति स्वार्थं पश्येत्तावत्स जीवति ।
स तस्य तावन्मित्रं स्याद्यावन्न स्याद्विपर्ययः ॥१३३
नास्ति मैत्री स्थिरा नाम न च ध्रुवमसौहृदम् ।
अर्थयुक्त्या हि जायन्ते मित्राणि रिपवस्तथा ॥१३४
मित्रं च शत्रुतामेति कस्मिंश्चित्कालपर्यये ।
शत्रुश्च मित्रतामेति स्वार्थो हि बलवत्तरः ॥ १३५
यो विश्वसति मित्रेषु न चाश्वसति शत्रुषु ।
अर्थयुक्तिमविज्ञाय चलितं तस्य जीवितम् ॥१३६
अर्थयुक्तिमविज्ञाय यः शुभे कुरुते मतिम् ।
मित्रे वा यदि वा शत्रौ तस्यापि चलिता मतिः ॥१३७
न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ १३८
अर्थयुक्त्या हि दृश्यन्ते पिता माता सुतास्तथा ।
मातुला भागिनेयाश्च तथा संबन्धिबान्धवाः ॥ १३९
पुत्रं हि मातापितरौ त्यजतः पतितं प्रियम् ।
लोको रक्षति चात्मानं पश्य स्वार्थस्य सारताम् ॥
तं मन्ये निकृतिप्रज्ञं यो मोक्षं प्रत्यनन्तरम् ।

कृत्यं मृगयसे कर्तुं सुखोपायमसंशयम् ॥ १४१
अस्मिन्निलय एव त्वं न्यग्रोधादवतारितः ।
पूर्वं निविष्टमुन्माथं चपलत्वान्न बुद्धवान् ॥ १४२
आत्मनश्चपलो नास्ति कुतोऽन्येषां भविष्यति ।
तस्मात्सर्वाणि कार्याणि चपलो हन्त्यसंशयम् ॥ १४३
ब्रवीति मधुरं कंचित्प्रियो मे ह भवानिति ।
तन्मिथ्याकरणं सर्वं विस्तरेणापि मे शृणु ॥ १४४
कारणात्प्रियतामेति द्वेष्यो भवति कारणात् ।
अर्थार्थी जीवलोकोऽयं न कश्चित्कस्यचित्प्रियः ॥
सख्यं सोदरयोर्भ्रात्रोर्दम्पत्योर्वा परस्परम् ।
कस्यचिन्नाभिजानामि प्रीतिं निष्कारणामिह ॥ १४६
यद्यपि भ्रातरः क्रुद्धा भार्या वा कारणान्तरे ।
स्वभावतस्ते प्रीयन्ते नेतरः प्रीयते जनः ॥ १४७
प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रहोमजपैरन्यः कार्यार्थं प्रीयते जनः ॥ १४८
उत्पन्ने कारणे प्रीतिर्नास्ति नौ कारणान्तरे ।
प्रध्वस्ते कारणस्थाने सा प्रीतिर्विनिवर्तते ॥ १४९
किं नु तत्कारणं मन्ये येनाहं भवतः प्रियः ।
अन्यत्राभ्यवहारार्थत्तत्रापि च बुधा वयम् ॥ १५०
कालो हेतुं विकुरुते स्वार्थस्तमनुवर्तते ।
स्वार्थं प्राज्ञोऽभिजानाति प्राज्ञं लोकोऽनुवर्तते ॥
न त्वीदृशं त्वया वाच्यं विदुषि स्वार्थपण्डिते ।
अकालेऽविषमस्थस्य स्वार्थहेतुरयं तव ॥ १५२
तस्मान्नाहं चले स्वार्थात्सुस्थितः संधिविग्रहे ।
अभ्राणामिव रूपाणि विकुर्वन्ति क्षणे क्षणे ॥ १५३
अद्यैव हि रिपुर्भूत्वा पुनरद्यैव सौहृदम् ।
पुनश्च रिपुरद्यैव युक्तीनां पश्य चापलम् ॥ १५४
आसीत्तावत्तु मैत्री नौ यावद्धेतुरभूत्पुरा ।
सा गता सह तेनैव कालयुक्तेन हेतुना ॥ १५५
त्वं हि मेऽत्यन्ततः शत्रुः सामर्थ्यान्मित्रतां गतः ।
तत्कृत्यमभिनिर्वृत्तं प्रकृतिः शत्रुतां गता ॥ १५६
सोऽहमेवं प्रणीतानि ज्ञात्वा शास्त्राणि तत्त्वतः ।
प्रविशेयं कथं पाशं त्वत्कृतं तद्वदस्व मे ॥ १५७
त्वद्वीर्येण विमुक्तोऽहं मद्वीर्येण तथा भवान् ।
अन्योन्यानुग्रहे वृत्ते नास्ति भूयः समागमः ॥ १५८
त्वं हि सौम्य कृतार्थोऽद्य निर्वृत्तार्थास्तथा वयम् ।
न तेऽस्त्यन्यन्मया कृत्यं किंचिदन्यत्र भक्षणात् ॥
अहमन्नं भवान्भोक्ता दुर्बलोऽहं भवान्बली ।
नावयोर्विद्यते संधिर्वियुक्ते विषमे बले ॥ १६०
संमन्येऽहं तव प्रज्ञां यन्मोक्षात्प्रत्यनन्तरम् ।
भक्ष्यं मृगयसे नूनं सुखोपायमसंशयम् ॥ १६१
भक्ष्यार्थमेव बद्धस्त्वं स मुक्तः प्रसृतः क्षुधा ।
शास्त्रज्ञमभिसंधाय नूनं भक्षयिताद्य माम् ॥ १६२
जानामि क्षुधितं हि त्वामाहारसमयश्च ते ।
स त्वं मामभिसंधाय भक्ष्यं मृगयसे पुनः ॥ १६३
यच्चापि पुत्रदारं स्वं तत्संनिसृजसे मयि ।
शुश्रूषां नाम मे कर्तुं सखे मम न तत्क्षमम् ॥ १६४
त्वया मां सहितं दृष्ट्वा प्रिया भार्या सुताश्च ये ।
कस्मान्मां ते न खादेयुर्हृष्टाः प्रणयिनस्त्वयि ॥ १६५
नाहं त्वया समेष्यामि वृत्तो हेतुः समागमे ।
शिवं ध्यायस्व मेऽत्रस्थः सुकृतं स्मर्यते यदि ॥ १६६
शत्रोरन्नाद्यभूतः सन्क्लिष्टस्य क्षुधितस्य च ।
भक्ष्यं मृगयमाणस्य कः प्राज्ञो विषयं व्रजेत् ॥ १६७
स्वस्ति तेऽस्तु गमिष्यामि दूरादपि तवोद्विजे ।
नाहं त्वया समेष्यामि निर्वृतो भव लोमश ॥ १६८
बलवत्संनिकर्षो हि न कदाचित्प्रशस्यते ।
प्रशान्तादपि मे प्राज्ञ भेतव्यं बलिनः सदा ॥ १६९
यदि त्वर्थेन मे कार्यं ब्रूहि किं करवाणि ते ।
कामं सर्वं प्रदास्यामि न त्वात्मानं कदाचन ॥ १७०
आत्मार्थे संततिस्त्याज्या राज्यं रत्नं धनं तथा ।

अपि सर्वस्वमुत्सृज्य रक्षेदात्मानमात्मना ॥ १७१
ऐश्वर्यधनरत्नानां प्रत्यमित्रेऽपि तिष्ठताम् ।
दृष्टा हि पुनरावृत्तिर्जीवतामिति नः श्रुतम् ॥ १७२
न त्वात्मनः संप्रदानं धनरत्नवदिष्यते ।
आत्मा तु सर्वतो रक्ष्यो दारैरपि धनैरपि ॥ १७३
आत्मरक्षितमन्त्राणां सुपरीक्षितकारिणाम् ।
आपदो नोपपद्यन्ते पुरुषाणां स्वदोषजाः ॥ १७४
शत्रून्सम्यग्विजानन्ति दुर्बला ये बलीयसः ।
तेषां न चाल्यते बुद्धिरात्मार्थं कृतनिश्चया ॥१७५
इत्यभिव्यक्तमेवासौ पलितेनावभर्त्सितः ।
मार्जारो व्रीडितो भूत्वा मूषकं वाक्यमब्रवीत् ॥१७६
संमन्येऽहं तव प्रज्ञां यस्त्वं मम हिते रतः ।
उक्तवानर्थतत्त्वेन मया संभिन्नदर्शनः ॥ १७७
न तु मामन्यथा साधो त्वं विज्ञातुमिहार्हसि ।
प्राणप्रदानजं त्वत्तो मम सौहृदमागतम् ॥ १७८
धर्मज्ञोऽस्मि गुणज्ञोऽस्मि कृतज्ञोऽस्मि विशेषतः ।
मित्रेषु वत्सलश्चास्मि त्वद्विधेषु विशेषतः ॥ १७९
तन्मामेवंगते साधो न यावयितुमर्हसि ।
त्वया हि याव्यमानोऽहं प्राणाञ्जह्यां सबान्धवः ॥
धिक्शब्दो हि बुधैर्दृष्टो मद्विधेषु मनस्विषु ।
मरणं धर्मतत्त्वज्ञ न मां शङ्कितुमर्हसि ॥ १८१
इति संस्तूयमानो हि मार्जारेण स मूषकः ।
मनसा भावगम्भीरं मार्जारं वाक्यमब्रवीत् ॥१८२
साधुर्भवाञ्श्रुतार्थोऽस्मि प्रीयते न च विश्वसे ।
संस्तवैर्वा धनौघैर्वा नाहं शक्यः पुनस्त्वया ॥१८३
न ह्यमित्रवशं यान्ति प्राज्ञा निष्कारणं सखे ।
अस्मिन्नर्थे च गाथे द्वे निबोधोशनसा कृते ॥१८४
शत्रुसाधारणे कृत्ये कृत्वा संधिं बलीयसा ।
समाहितश्चरेद्युक्त्या कृतार्थश्च न विश्वसेत् ॥१८५
तस्मात्सर्वास्ववस्थासु रक्षेज्जीवितमात्मनः ।
द्रव्याणि संततिश्चैव सर्वं भवति जीवतः ॥ १८६
संक्षेपो नीतिशास्त्राणामविश्वासः परो मतः ।
नृषु तस्मादविश्वासः पुष्कलं हितमात्मनः ॥ १८७
वध्यन्ते न ह्यविश्वस्ताः शत्रुभिर्दुर्बला अपि ।
विश्वस्तास्त्वाशु वध्यन्ते बलवन्तोऽपि दुर्बलैः ॥१८८
त्वद्विधेभ्यो मया ह्यात्मा रक्ष्यो मार्जार सर्वदा ।
रक्ष त्वमपि चात्मानं चण्डालाज्जातिकिल्बिषात् ॥
स तस्य ब्रुवतस्त्वेवं संत्रासाज्जातसाध्वसः ।
स्वबिलं हि जवेनाशु मार्जारः प्रययौ ततः ॥१९०
ततः शास्त्रार्थतत्त्वज्ञो बुद्धिसामर्थ्यमात्मनः ।
विश्राव्य पलितः प्राज्ञो बिलमन्यज्जगाम ह ॥१९१
एवं प्रज्ञावता बुद्ध्या दुर्बलेन महाबलाः ।
एकेन बहवोऽमित्राः पलितेनाभिसंधिताः ॥ १९२
अरिणापि समर्थेन संधिं कुर्वीत पण्डितः ।
मूषकश्च बिडालश्च मुक्तावन्योन्यसंश्रयात् ॥ १९३
इत्येष क्षत्रधर्मस्य मया मार्गोऽनुदर्शितः ।
विस्तरेण महीपाल संक्षेपेण पुनः शृणु ॥ १९४
अन्योन्यकृतवैरौ तु चक्रतुः प्रीतिमुत्तमाम् ।
अन्योन्यमभिसंधातुमभूच्चैव तयोर्मतिः ॥ १९५
तत्र प्राज्ञोऽभिसंधत्ते सम्यग्बुद्धिबलाश्रयात् ।
अभिसंधीयते प्राज्ञः प्रमादादपि चाबुधैः ॥ १९६
तस्मादभीतवद्भीतो विश्वस्तवदविश्वसन् ।
न ह्यप्रमत्तश्चलति चलितो वा विनश्यति ॥ १९७
कालेन रिपुणा संधिः काले मित्रेण विग्रहः ।
कार्य इत्येव तत्त्वज्ञाः प्राहुर्नित्यं युधिष्ठिर ॥ १९८
एवं मत्वा महाराज शास्त्रार्थमभिगम्य च ।
अभियुक्तोऽप्रमत्तश्च प्राग्भयाद्भीतवच्चरेत् ॥ १९९
भीतवत्संविधिः कार्यः प्रतिसंधिस्तथैव च ।
भयादुत्पद्यते बुद्धिरप्रमत्ताभियोगजा ॥ २००
न भयं विद्यते राजन्भीतस्यानागते भये ।

अभीतस्य तु विस्रम्भात्सुमहज्जायते भयम् ॥२०१
न भीरुरिति चात्यन्तं मन्त्रोऽदेयः कथंचन ।
अविज्ञानाद्धि विज्ञाते गच्छेदास्पददर्शिषु ॥ २०२
तस्मादभीतवद्भीतो विश्वस्तवदविश्वसन् ।
कार्याणां गुरुतां बुद्ध्वा नानृतं किंचिदाचरेत् ॥ २०३
एवमेतन्मया प्रोक्तमितिहासं युधिष्ठिर ।
श्रुत्वा त्वं सुहृदां मध्ये यथावत्समुपाचर ॥ २०४
उपलभ्य मतिं चाग्र्यामरिमित्रान्तरं तथा ।
संधिविग्रहकालं च मोक्षोपायं तथापदि ॥ २०५
शत्रुसाधारणे कृत्ये कृत्वा संधिं बलीयसा ।
समागमं चरेद्युक्त्या कृतार्थो न च विश्वसेत् ॥२०६
अविरुद्धां त्रिवर्गेण नीतिमेतां युधिष्ठिर ।
अभ्युत्तिष्ठ श्रुतादस्माद्भूयस्त्वं रञ्जयन्प्रजाः ॥२०७
ब्राह्मणैश्चापि ते सार्धं यात्रा भवतु पाण्डव ।
ब्राह्मणा हि परं श्रेयो दिवि चेह च भारत ॥२०८
एते धर्मस्य वेत्तारः कृतज्ञाः सततं प्रभो ।
पूजिताः शुभकर्माणः पूर्वजित्या नराधिप ॥ २०९
राज्यं श्रेयः परं राजन्यशः कीर्तिं च लप्स्यसे ।
कुलस्य संततिं चैव यथान्यायं यथाक्रमम् ॥ २१०

द्वयोरिमं भारत संधिविग्रहं
सुभाषितं बुद्धिविशेषकारितम् ।
तथान्ववेक्ष्य क्षितिपेन सर्वदा
निषेवितव्यं नृप शत्रुमण्डले ॥ २११

इति श्रीमहाभारते शान्तिपर्वणि
षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

१३७

युधिष्ठिर उवाच ।

उक्तो मन्त्रो महाबाहो न विश्वासोऽस्ति शत्रुषु ।
कथं हि राजा वर्तेत यदि सर्वत्र नाश्वसेत् ॥ १
विश्वासाद्धि परं राज्ञो राजन्नुत्पद्यते भयम् ।
कथं वै नाश्वसन्राजा शत्रूञ्जयति पार्थिव ॥ २
एतन्मे संशयं छिन्धि मनो मे संप्रमुह्यति ।
अविश्वासकथामेतामुपश्रुत्य पितामह ॥ ३

भीष्म उवाच ।

शृणु कौन्तेय यो वृत्तो ब्रह्मदत्तनिवेशने ।
पूजन्या सह संवादो ब्रह्मदत्तस्य पार्थिव ॥ ४
काम्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी ।
पूजनी नाम शकुनी दीर्घकालं सहोषिता ॥ ५
रुतज्ञा सर्वभूतानां यथा वै जीवजीवकः ।
सर्वज्ञा सर्वधर्मज्ञा तिर्यग्योनिगतापि सा ॥ ६
अभिप्रजाता सा तत्र पुत्रमेकं सुवर्चसम् ।
समकालं च राज्ञोऽपि देव्याः पुत्रो व्यजायत ॥७
समुद्रतीरं गत्वा सा त्वाजहार फलद्वयम् ।
पुष्ट्यर्थं च स्वपुत्रस्य राजपुत्रस्य चैव ह ॥ ८
फलमेकं सुतायादाद्राजपुत्राय चापरम् ।
अमृतास्वादसदृशं बलतेजोविवर्धनम् ।
तत्रागच्छत्परां वृद्धिं राजपुत्रः फलाशनात् ॥ ९
धात्र्या हस्तगतश्चापि तेनाक्रीडत पक्षिणा ।
शून्ये तु तमुपादाय पक्षिणं समजातकम् ।
हत्वा ततः स राजेन्द्र धात्र्या हस्तमुपागमत् ॥१०
अथ सा शकुनी राजन्नागमत्फलहारिका ।
अपश्यन्निहतं पुत्रं तेन बालेन भूतले ॥ ११
बाष्पपूर्णमुखी दीना दृष्ट्वा सा तु हतं सुतम् ।
पूजनी दुःखसंतप्ता रुदती वाक्यमब्रवीत् ॥ १२
क्षत्रिये संगतं नास्ति न प्रीतिर्न च सौहृदम् ।
कारणे संभजन्तीह कृतार्थाः संत्यजन्ति च ॥ १३
क्षत्रियेषु न विश्वासः कार्यः सर्वोपघातिषु ।
अपकृत्यापि सततं सान्त्वयन्ति निरर्थकम् ॥ १४
अहमस्य करोम्यद्य सदृशीं वैरयातनाम् ।
कृतघ्नस्य नृशंसस्य भृशं विश्वासघातिनः ॥ १५

सहसंजातवृद्धस्य तथैव सहभोजिनः ।
शरणागतस्य च वधस्त्रिविधं ह्यस्य किल्बिषम् ॥ १६
इत्युक्त्वा चरणाभ्यां तु नेत्रे नृपसुतस्य सा ।
भित्त्वा स्वस्था तत इदं पूजनी वाक्यमब्रवीत् ॥ १७
इच्छयैव कृतं पापं सद्य एवोपसर्पति ।
कृतप्रतिक्रियं तेषां न नश्यति शुभाशुभम् ॥ १८
पापं कर्म कृतं किंचिन्न तस्मिन्यदि विद्यते ।
निपात्यतेऽस्य पुत्रेषु न चेत्पौत्रेषु नप्तृषु ॥ १९

ब्रह्मदत्त उवाच ।

अस्ति वै कृतमस्माभिरस्ति प्रतिकृतं त्वया ।
उभयं तत्समीभूतं वस पूजनि मा गमः ॥ २०

पूजन्युवाच ।

सकृत्कृतापराधस्य तत्रैव परिलम्बतः ।
न तद्बुधाः प्रशंसन्ति श्रेयस्तत्रापसर्पणम् ॥ २१
सान्त्वे प्रयुक्ते नृपते कृतवैरे न विश्वसेत् ।
क्षिप्रं प्रबध्यते मूढो न हि वैरं प्रशाम्यति ॥ २२
अन्योन्यं कृतवैराणां पुत्रपौत्रं निगच्छति ।
पुत्रपौत्रे विनष्टे तु परलोकं निगच्छति ॥ २३
सर्वेषां कृतवैराणामविश्वासः सुखावहः ।
एकान्ततो न विश्वासः कार्यो विश्वासघातकः ॥ २४
न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
कामं विश्वासयेदन्यान्परेषां तु न विश्वसेत् ॥ २५

माता पिता बान्धवानां वरिष्ठौ
भार्या जरा बीजमात्रं तु पुत्रः ।
भ्राता शत्रुः क्लिन्नपाणिर्वयस्य
आत्मा ह्येकः सुखदुःखस्य वेत्ता ॥ २६

अन्योन्यकृतवैराणां न संधिरुपपद्यते ।
स च हेतुरतिक्रान्तो यदर्थमहमावसम् ॥ २७
पूजितस्यार्थमानाभ्यां जन्तोः पूर्वापकारिणः ।
चेतो भवत्यविश्वस्तं पूर्वं त्रासयते बलात् ॥ २८
पूर्वं संमानना यत्र पश्चाच्चैव विमानना ।
जह्यात्तं सत्त्ववान्वासं संमानितविमानितः ॥ २९
उषितास्मि तवागारे दीर्घकालमहिंसिता ।
तदिदं वैरमुत्पन्नं सुखमास्स्व व्रजाम्यहम् ॥ ३०

ब्रह्मदत्त उवाच ।

यत्कृते प्रतिकुर्याद्वै न स तत्रापराध्नुयात् ।
अनृणस्तेन भवति वस पूजनि मा गमः ॥ ३१

पूजन्युवाच ।

न कृतस्य न कर्तुश्च सख्यं संधीयते पुनः ।
हृदयं तत्र जानाति कर्तुश्चैव कृतस्य च ॥ ३२

ब्रह्मदत्त उवाच ।

कृतस्य चैव कर्तुश्च सख्यं संधीयते पुनः ।
वैरस्योपशमो दृष्टः पापं नोपाश्नुते पुनः ॥ ३३

पूजन्युवाच ।

नास्ति वैरमुपक्रान्तं सान्त्वितोऽस्मीति नाश्वसेत् ।
विश्वासाद्बध्यते बालस्तस्माच्छ्रेयो ह्यदर्शनम् ॥ ३४
तरसा ये न शक्यन्ते शस्त्रैः सुनिशितैरपि ।
साम्ना ते विनिगृह्यन्ते गजा इव करेणुभिः ॥ ३५

ब्रह्मदत्त उवाच ।

संवासाज्जायते स्नेहो जीवितान्तकरेष्वपि ।
अन्योन्यस्य च विश्वासः श्वपचेन शुनो यथा ॥ ३६
अन्योन्यकृतवैराणां संवासान्मृदुतां गतम् ।
नैव तिष्ठति तद्वैरं पुष्करस्थमिवोदकम् ॥ ३७

पूजन्युवाच ।

वैरं पञ्चसमुत्थानं तच्च बुध्यन्ति पण्डिताः ।
स्त्रीकृतं वास्तुजं वाग्जं ससपत्नापराधजम् ॥ ३८
तत्र दाता निहन्तव्यः क्षत्रियेण विशेषतः ।
प्रकाशं वाप्रकाशं वा बुद्ध्वा देशबलादिकम् ॥ ३९
कृतवैरे न विश्वासः कार्यस्त्विह सुहृद्यपि ।
छन्नं संतिष्ठते वैरं गूढोऽग्निरिव दारुषु ॥ ४०

न वित्तेन न पारुष्यैर्न सान्त्वेन न च श्रुतैः ।
वैराग्निः शाम्यते राजन्नौर्वाग्निरिव सागरे ॥ ४१
न हि वैराग्निरुद्भूतः कर्म वाप्यपराधजम् ।
शाम्यत्यदग्ध्वा नृपते विना ह्येकतरक्षयात् ॥ ४२
सत्कृतस्यार्थमानाभ्यां स्यात्तु पूर्वापकारिणः ।
नैव शान्तिर्न विश्वासः कर्म त्रासयते बलात् ॥४३
नैवापकारे कस्मिंश्चिदहं त्वयि तथा भवान् ।
विश्वासादुषिता पूर्वं नेदानीं विश्वसाम्यहम् ॥ ४४

ब्रह्मदत्त उवाच ।

कालेन क्रियते कार्यं तथैव विविधाः क्रियाः ।
कालेनैव प्रवर्तन्ते कः कस्येहापराध्यति ॥ ४५
तुल्यं चोभे प्रवर्तेते मरणं जन्म चैव ह ।
कार्यते चैव कालेन तन्निमित्तं हि जीवति ॥ ४६
बध्यन्ते युगपत्केचिदेकैकस्य न चापरे ।
कालो दहति भूतानि संप्राप्याग्निरिवेन्धनम् ॥ ४७
नाहं प्रमाणं नैव त्वमन्योन्यकरणे शुभे ।
कालो नित्यमुपाधत्ते सुखं दुःखं च देहिनाम् ॥४८
एवं वसेह सस्नेहा यथाकालमहिंसिता ।
यत्कृतं तच्च मे क्षान्तं त्वं चैव क्षम पूजनि ॥ ४९

पूजन्युवाच ।

यदि कालः प्रमाणं ते न वैरं कस्यचिद्भवेत् ।
कस्मात्त्वपचितिं यान्ति बान्धवा बान्धवे हते ॥५०
कस्माद्देवासुराः पूर्वमन्योन्यमभिजघ्निरे ।
यदि कालेन निर्याणं सुखदुःखे भवाभवौ ॥ ५१
भिषजो भेषजं कर्तुं कस्मादिच्छन्ति रोगिणे ।
यदि कालेन पच्यन्ते भेषजैः किं प्रयोजनम् ॥५२
प्रलापः क्रियते कस्मात्सुमहाञ्शोकमूर्छितैः ।
यदि कालः प्रमाणं ते कस्माद्धर्मोऽस्ति कर्तृषु ॥५३
तव पुत्रो ममापत्यं हतवान्हिंसितो मया ।
अनन्तरं त्वया चाहं बन्धनीया महीपते ॥ ५४
अहं हि पुत्रशोकेन कृतपापा तवात्मजे ।
तथा त्वया प्रहर्तव्यं मयि तत्त्वं च मे शृणु ॥५५
भक्षार्थं क्रीडनार्थं वा नरा वाञ्छन्ति पक्षिणः ।
तृतीयो नास्ति संयोगो वधबन्धादृते क्षमः ॥ ५६
वधबन्धभयादेके मोक्षतन्त्रमुपागताः ।
मरणोत्पातजं दुःखमाहुर्धर्मविदो जनाः ॥ ५७
सर्वस्य दयिताः प्राणाः सर्वस्य दयिताः सुताः ।
दुःखादुद्विजते सर्वः सर्वस्य सुखमीप्सितम् ॥५८
दुःखं जरा ब्रह्मदत्त दुःखमर्थविपर्ययः ।
दुःखं चानिष्टसंवासो दुःखमिष्टवियोगजम् ॥ ५९
वैरबन्धकृतं दुःखं हिंसाजं स्त्रीकृतं तथा ।
दुःखं सुखेन सततं जनाद्विपरिवर्तते ॥ ६०
न दुःखं परदुःखे वै केचिदाहुरबुद्धयः ।
यो दुःखं नाभिजानाति स जल्पति महाजने ॥६१
यस्तु शोचति दुःखार्तः स कथं वक्तुमुत्सहेत् ।
रसज्ञः सर्वदुःखस्य यथात्मनि तथा परे ॥ ६२
यत्कृतं ते मया राजंस्त्वया च मम यत्कृतम् ।
न तद्वर्षशतैः शक्यं व्यपोहितुमरिंदम् ॥ ६३
आवयोः कृतमन्योन्यं तत्र संधिर्न विद्यते ।
स्मृत्वा स्मृत्वा हि ते पुत्रं नवं वैरं भविष्यति ॥६४
वैरमन्तिकमासज्य यः प्रीतिं कर्तुमिच्छति ।
मृन्मयस्येव भग्नस्य तस्य संधिर्न विद्यते ॥ ६५
निश्चितश्चार्थशास्त्रज्ञैरविश्वासः सुखोदयः ।
उशनाश्चाथ गाथे द्वे प्रह्रादायाब्रवीत्पुरा ॥ ६६
ये वैरिणः श्रद्दधते सत्ये सत्येतरेऽपि वा ।
ते श्रद्दधाना वध्यन्ते मधु शुष्कतृणैर्यथा ॥ ६७
न हि वैराणि शाम्यन्ति कुलेष्वा दशमाद्युगात् ।
आख्यातारश्च विद्यन्ते कुले चेद्विद्यते पुमान् ॥६८
उपगुह्य हि वैराणि सान्त्वयन्ति नराधिपाः ।
अथैनं प्रतिपिंषन्ति पूर्णं घटमिवाश्मनि ॥ ६९

सदा न विश्वसेद्राजन्पापं कृत्वेह कस्यचित् ।
अपकृत्य परेषां हि विश्वासाद्दुःखमश्नुते ॥ ७०

ब्रह्मदत्त उवाच ।

नाविश्वासाच्चिन्वतेऽर्थान्नेहन्ते चापि किंचन ।
भयादेकतरान्नित्यं मृतकल्पा भवन्ति च ॥ ७१

पूजन्युवाच ।

यस्येह व्रणिनौ पादौ पद्भ्यां च परिसर्पति ।
क्षण्येते तस्य तौ पादौ सुगुप्तमभिधावतः ॥ ७२
नेत्राभ्यां सरुजाभ्यां यः प्रतिवातमुदीक्षते ।
तस्य वायुरुजात्यर्थं नेत्रयोर्भवति ध्रुवम् ॥ ७३
दुष्टं पन्थानमाश्रित्य यो मोहादभिपद्यते ।
आत्मनो बलमज्ञात्वा तदन्तं तस्य जीवितम् ॥ ७४
यस्तु वर्षमविज्ञाय क्षेत्रं कृषति मानवः ।
हीनं पुरुषकारेण सस्यं नैवाप्नुते पुनः ॥ ७५
यश्च तिक्तं कषायं वाप्यास्वादविधुरं हितम् ।
आहारं कुरुते नित्यं सोऽमृतत्वाय कल्पते ॥ ७६
पथ्यं भुक्त्वा नरो लोभाद्योऽन्यदश्नाति भोजनम् ।
परिणाममविज्ञाय तदन्तं तस्य जीवितम् ॥ ७७
दैवं पुरुषकारश्च स्थितावन्योन्यसंश्रयात् ।
उदात्तानां कर्म तन्त्रं दैवं क्लीबा उपासते ॥ ७८
कर्म चात्महितं कार्यं तीक्ष्णं वा यदि वा मृदु ।
ग्रस्यतेऽकर्मशीलस्तु सदानर्थैरकिंचनः ॥ ७९
तस्मात्संशयितेऽप्यर्थे कार्य एव पराक्रमः ।
सर्वस्वमपि संत्यज्य कार्यमात्महितं नरैः ॥ ८०
विद्या शौर्यं च दाक्ष्यं च बलं धैर्यं च पञ्चकम् ।
मित्राणि सहजान्याहुर्वर्तयन्तीह यैर्बुधाः ॥ ८१
निवेशनं च कुप्यं च क्षेत्रं भार्या सुहृज्जनः ।
एतान्युपचितान्याहुः सर्वत्र लभते पुमान् ॥ ८२
सर्वत्र रमते प्राज्ञः सर्वत्र च विरोचते ।
न विभीषयते कंचिद्भीषितो न बिभेति च ॥ ८३
नित्यं बुद्धिमतो ह्यर्थः स्वल्पकोऽपि विवर्धते ।
दाक्ष्येण कुरुते कर्म संयमात्प्रतितिष्ठति ॥ ८४
गृहस्नेहावबद्धानां नराणामल्पमेधसाम् ।
कुस्त्री खादति मांसानि माघमा सेगवामिव ॥ ८५
गृहं क्षेत्राणि मित्राणि स्वदेश इति चापरे ।
इत्येवमवसीदन्ति नरा बुद्धिविपर्यये ॥ ८६
उत्पतेत्सरुजाद्देशाद्व्याधिदुर्भिक्षपीडितात् ।
अन्यत्र वस्तुं गच्छेद्वा वसेद्वा नित्यमानितः ॥ ८७
तस्मादन्यत्र यास्यामि वस्तुं नाहमिहोत्सहे ।
कृतमेतदनाहार्यं तव पुत्रेण पार्थिव ॥ ८८
कुभार्यां च कुपुत्रं च कुराजानं कुसौहृदम् ।
कुसंबन्धं कुदेशं च दूरतः परिवर्जयेत् ॥ ८९
कुमित्रे नास्ति विश्वासः कुभार्यायां कुतो रतिः ।
कुराज्ये निर्वृतिर्नास्ति कुदेशे न प्रजीव्यते ॥ ९०
कुमित्रे संगतं नास्ति नित्यमस्थिरसौहृदे ।
अवमानः कुसंबन्धे भवत्यर्थविपर्यये ॥ ९१
सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥ ९२
यत्र नास्ति बलात्कारः स राजा तीव्रशासनः ।
न चैव ह्यभिसंबन्धो दरिद्रं यो बुभूषति ॥ ९३
भार्या देशोऽथ मित्राणि पुत्रसंबन्धिबान्धवाः ।
एतत्सर्वं गुणवति धर्मनेत्रे महीपतौ ॥ ९४
अधर्मज्ञस्य विलयं प्रजा गच्छन्त्यनिग्रहात् ।
राजा मूलं त्रिवर्गस्य अप्रमत्तोऽनुपालयन् ॥ ९५
बलिषड्भागमुद्धृत्य बलिं तमुपयोजयेत् ।
न रक्षति प्रजाः सम्यग्यः स पार्थिवतस्करः ॥ ९६

दत्त्वाभयं यः स्वयमेव राजा
न तत्प्रमाणं कुरुते यथावत् ।
स सर्वलोकादुपलभ्य पाप-
मधर्मबुद्धिर्निरयं प्रयाति ॥ ९७

दत्त्वाभयं यः स राजा प्रमाणं कुरुते सदा ।
स सर्वसुखकृज्ज्ञेयः प्रजा धर्मेण पालयन् ॥ ९८
पिता माता गुरुर्गोप्ता वह्निर्वैश्रवणो यमः ।
सप्त राज्ञो गुणानेतान्मनुराह प्रजापतिः ॥ ९९
पिता हि राजा राष्ट्रस्य प्रजानां योऽनुकम्पकः ।
तस्मिन्मिथ्याप्रणीते हि तिर्यग्गच्छति मानवः ॥
संभावयति मातेव दीनमभ्यवपद्यते ।
दहत्यग्निरिवानिष्टान्यमयन्भवते यमः ॥ १०१
इष्टेषु विसृजत्यर्थान्कुबेर इव कामदः ।
गुरुर्धर्मोपदेशेन गोप्ता च परिपालनात् ॥ १०२
यस्तु रञ्जयते राजा पौरजानपदान्गुणैः ।
न तस्य भ्रश्यते राज्यं गुणधर्मानुपालनात् ॥१०३
स्वयं समुपजानन्हि पौरजानपदक्रियाः ।
स सुखं मोदते भूप इहलोके परत्र च ॥ १०४
नित्योद्विग्नाः प्रजा यस्य करभारप्रपीडिताः ।
अनर्थैर्विप्रलुप्यन्ते स गच्छति पराभवम् ॥ १०५
प्रजा यस्य विवर्धन्ते सरसीव महोत्पलम् ।
स सर्वयज्ञफलभाग्राजा लोके महीयते ॥ १०६
बलिना विग्रहो राजन्न कथंचित्प्रशस्यते ।
बलिना विगृहीतस्य कुतो राज्यं कुतः सुखम् ॥१०७

भीष्म उवाच ।

सैवमुक्त्वा शकुनिका ब्रह्मदत्तं नराधिपम् ।
राजानं समनुज्ञाप्य जगामाथेप्सितां दिशम् ॥१०८
एतत्ते ब्रह्मदत्तस्य पूजन्या सह भाषितम् ।
मयोक्तं भरतश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥ १०९

इति श्रीमहाभारते शान्तिपर्वणि
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

१३८

युधिष्ठिर उवाच ।

युगक्षयात्परिक्षीणे धर्मे लोके च भारत ।
दस्युभिः पीड्यमाने च कथं स्थेयं पितामह ॥ १

भीष्म उवाच ।

हन्त ते कथयिष्यामि नीतिमापत्सु भारत ।
उत्सृज्यापि घृणां काले यथा वर्तेत भूमिपः ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
भरद्वाजस्य संवादं राज्ञः शत्रुंतपस्य च ॥ ३
राजा शत्रुंतपो नाम सौवीराणां महारथः ।
कणिङ्कमुपसंगम्य पप्रच्छार्थविनिश्चयम् ॥ ४
अलब्धस्य कथं लिप्सा लब्धं केन विवर्धते ।
वर्धितं पालयेत्केन पालितं प्रणयेत्कथम् ॥ ५
तस्मै विनिश्चयार्थं स परिपृष्टार्थनिश्चयः ।
उवाच ब्राह्मणो वाक्यमिदं हेतुमदुत्तरम् ॥ ६
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ।
अच्छिद्रश्छिद्रदर्शी च परेषां विवरानुगः ॥ ७
नित्यमुद्यतदण्डस्य भृशमुद्विजते जनः ।
तस्मात्सर्वाणि भूतानि दण्डेनैव प्ररोधयेत् ॥ ८
एवमेव प्रशंसन्ति पण्डितास्तत्त्वदर्शिनः ।
तस्माच्चतुष्टये तस्मिन्प्रधानो दण्ड उच्यते ॥ ९
छिन्नमूले ह्यधिष्ठाने सर्वे तज्जीविनो हताः ।
कथं हि शाखास्तिष्ठेयुश्छिन्नमूले वनस्पतौ ॥ १०
मूलमेवादितश्छिन्द्यात्परपक्षस्य पण्डितः ।
ततः सहायान्पक्षं च सर्वमेवानुसारयेत् ॥ ११
सुमन्त्रितं सुविक्रान्तं सुयुद्धं सुपलायितम् ।
आपदां पदकालेषु कुर्वीत न विचारयेत् ॥ १२
वाङ्मात्रेण विनीतः स्याद्धृदयेन यथा क्षुरः ।
श्लक्ष्णपूर्वाभिभाषी च कामक्रोधौ विवर्जयेत् ॥१३
सपत्नसहिते कार्ये कृत्वा संधिं न विश्वसेत् ।
अपक्रामेत्ततः क्षिप्रं कृतकार्यो विचक्षणः ॥ १४
शत्रुं च मित्ररूपेण सान्त्वेनैवाभिसान्त्वयेत् ।
नित्यशश्चोद्विजेत्तस्मात्सर्पाद्वेश्मगतादिव ॥ १५

यस्य बुद्धिं परिभवेत्तमतीतेन सान्त्वयेत् ।
अनागतेन दुष्प्रज्ञं प्रत्युत्पन्नेन पण्डितम् ॥ १६
अञ्जलिं शपथं सान्त्वं प्रणम्य शिरसा वदेत् ।
अश्रुप्रपातनं चैव कर्तव्यं भूतिमिच्छता ॥ १७
वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः ।
अथैनमागते काले भिन्द्याद्घटमिवाश्मनि ॥ १८
मुहूर्तमपि राजेन्द्र तिन्दुकालातवज्ज्वलेत् ।
न तुषाग्निरिवानर्चिर्धूमायेत नरश्चिरम् ॥ १९
नानर्थकेनार्थवत्त्वं कृतघ्नेन समाचरेत् ।
अर्थे तु शक्यते भोक्तुं कृतकार्योऽवमन्यते ।
तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत् ॥२०
कोकिलस्य वराहस्य मेरोः शून्यस्य वेश्मनः ।
व्यालस्य भक्तिचित्रस्य यच्छ्रेष्ठं तत्समाचरेत् ॥२१
उत्थायोत्थाय गच्छेच्च नित्ययुक्तो रिपोर्गृहान् ।
कुशलं चापि पृच्छेत यद्यप्यकुशलं भवेत् ॥ २२
नालसाः प्राप्नुवन्त्यर्थान्न क्लीबा न च मानिनः ।
न च लोकरवाद्भीता न च शश्वत्प्रतीक्षिणः ॥ २३
नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु ।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥ २४
बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥ २५
पानमक्षास्तथा नार्यो मृगया गीतवादितम् ।
एतानि युक्त्या सेवेत प्रसङ्गो ह्यत्र दोषवान् ॥२६
कुर्यात्तृणमयं चापं शयीत मृगशायिकाम् ।
अन्धः स्यादन्धवेलायां बाधिर्यमपि संश्रयेत् ॥२७
देशं कालं समासाद्य विक्रमेत विचक्षणः ।
देशकालाभ्यतीतो हि विक्रमो निष्फलो भवेत् ॥२८
कालाकालौ संप्रधार्य बलाबलमथात्मनः ।
परस्परबलं ज्ञात्वा तथात्मानं नियोजयेत् ॥ २९
दण्डेनोपनतं शत्रुं यो राजा न नियच्छति ।
स मृत्युमुपगूह्यास्ते गर्भमश्वतरी यथा ॥ ३०
सुपुष्पितः स्यादफलः फलवान्स्याद्दुरारुहः ।
आमः स्यात्पक्वसंकाशो न च शीर्येत कस्यचित् ॥
आशां कालवतीं कुर्यात्तां न विघ्नेन योजयेत् ।
विघ्नं निमित्ततो ब्रूयान्निमित्तं चापि हेतुतः ॥ ३२
भीतवत्संविधातव्यं यावद्भयमनागतम् ।
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥ ३३
न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ ३४
अनागतं विजानीयाद्यच्छेद्भयमुपस्थितम् ।
पुनर्वृद्धिक्षयात्किंचिदभिवृत्तं निशामयेत् ॥ ३५
प्रत्युपस्थितकालस्य सुखस्य परिवर्जनम् ।
अनागतसुखाशा च नैष बुद्धिमतां नयः ॥ ३६
योऽरिणा सह संधाय सुखं स्वपिति विश्वसन् ।
स वृक्षाग्रप्रसुप्तो वा पतितः प्रतिबुध्यते ॥ ३७
कर्मणा येन तेनेह मृदुना दारुणेन वा ।
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ॥ ३८
ये सपत्नाः सपत्नानां सर्वांस्तानपवत्सयेत् ।
आत्मनश्चापि बोद्धव्याश्चाराः प्रणिहिताः परैः ॥ ३९
चारः सुविहितः कार्य आत्मनोऽथ परस्य च ।
पाषण्डांस्तापसादींश्च परराष्ट्रं प्रवेशयेत् ॥ ४०
उद्यानेषु विहारेषु प्रपास्वावसथेषु च ।
पानागारेषु वेशेषु तीर्थेषु च सभासु च ॥ ४१
धर्माभिचारिणः पापाश्चारा लोकस्य कण्टकाः ।
समागच्छन्ति तान्बुद्ध्वा नियच्छेच्छमयेदपि ॥ ४२
न विश्वसेदविश्वस्ते विश्वस्ते नापि विश्वसेत् ।
विश्वस्तं भयमन्वेति नापरीक्ष्य च विश्वसेत् ॥ ४३
विश्वासयित्वा तु परं तत्त्वभूतेन हेतुना ।
अथास्य प्रहरेत्काले किंचिद्विचलिते पदे ॥ ४४
अशङ्क्यमपि शङ्केत नित्यं शङ्केत शङ्कितात् ।

भयं हि शङ्किताज्जातं समूलमपि कृन्तति ॥ ४५
अवधानेन मौनेन काषायेण जटाजिनैः ।
विश्वासयित्वा द्वेष्टारमवलुम्पेद्यथा वृकः ॥ ४६
पुत्रो वा यदि वा भ्राता पिता वा यदि वा सुहृत् ।
अर्थस्य विघ्नं कुर्वाणा हन्तव्या भूतिवर्धनाः ॥ ४७
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य दण्डो भवति शासनम् ॥ ४८
प्रत्युत्थानाभिवादाभ्यां संप्रदानेन कस्यचित् ।
प्रतिपुष्कलघाती स्यात्तीक्ष्णतुण्ड इव द्विजः ॥ ४९
नाच्छित्त्वा परमर्माणि नाकृत्वा कर्म दारुणम् ।
नाहत्वा मत्स्यघातीव प्राप्नोति परमां श्रियम् ॥५०
नास्ति जात्या रिपुर्नाम मित्रं नाम न विद्यते ।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा ॥ ५१
अमित्रं नैव मुञ्चेत ब्रुवन्तं करुणान्यपि ।
दुःखं तत्र न कुर्वीत हन्यात्पूर्वापकारिणम् ॥ ५२
संग्रहानुग्रहे यत्नः सदा कार्योऽनसूयता ।
निग्रहश्चापि यत्नेन कर्तव्यो भूतिमिच्छता ॥ ५३
प्रहरिष्यन्प्रियं ब्रूयात्प्रहृत्यापि प्रियोत्तरम् ।
अपि चास्य शिरश्छित्त्वा रुद्याच्छोचेदथापि वा॥५४
निमन्त्रयेत सान्त्वेन संमानेन तितिक्षया ।
आशाकारणमित्येतत्कर्तव्यं भूतिमिच्छता ॥ ५५
न शुष्कवैरं कुर्वीत न बाहुभ्यां नदीं तरेत् ।
अपार्थकमनायुष्यं गोविषाणस्य भक्षणम् ।
दन्ताश्च परिघृष्यन्ते रसश्चापि न लभ्यते ॥ ५६
त्रिवर्गे त्रिविधा पीडानुबन्धास्त्रय एव च ।
अनुबन्धवधौ ज्ञात्वा पीडां हि परिवर्जयेत् ॥ ५७
ऋणशेषोऽग्निशेषश्च शत्रुशेषस्तथैव च ।
पुनः पुनर्विवर्धेत स्वल्पोऽप्यनिवारितः ॥ ५८
वर्धमानमृणं तिष्ठत्परिभूताश्च शत्रवः ।
आवहन्त्यनयं तीव्रं व्याधयश्चाप्युपेक्षिताः ॥ ५९
नासम्यक्कृतकारी स्यादप्रमत्तः सदा भवेत् ।
कण्टकोऽपि हि दुश्छिन्नो विकारं कुरुते चिरम् ॥
वधेन च मनुष्याणां मार्गाणां दूषणेन च ।
आकराणां विनाशैश्च परराष्ट्रं विनाशयेत् ॥ ६१
गृध्रदृष्टिर्बकालीनः श्वचेष्टः सिंहविक्रमः ।
अनुद्विग्नः काकशङ्की भुजंगचरितं चरेत् ॥ ६२
श्रेणिमुख्योपजापेषु वल्लभानुनयेषु च ।
अमात्यान्परिरक्षेत भेदसंघातयोरपि ॥ ६३
मृदुरित्यवमन्यन्ते तीक्ष्ण इत्युद्विजन्ति च ।
तीक्ष्णकाले च तीक्ष्णः स्यान्मृदुकाले मृदुर्भवेत् ॥
मृदुना सुमृदुं हन्ति मृदुना हन्ति दारुणम् ।
नासाध्यं मृदुना किंचित्तस्मात्तीक्ष्णतरं मृदु ॥ ६५
काले मृदुर्यो भवति काले भवति दारुणः ।
न साधयति कृत्यानि शत्रूंश्चैवाधितिष्ठति ॥ ६६
पण्डितेन विरुद्धः सन्दूरेऽस्मीति न विश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ॥६७

न तत्तरेद्यस्य न पारमुत्तरे-
न्न तद्धरेद्यत्पुनराहरेत्परः ।
न तत्खनेद्यस्य न मूलमुत्खने-
न्न तं हन्याद्यस्य शिरो न पातयेत् ॥ ६८
इतीदमुक्तं वृजिनाभिसंहितं
न चैतदेवं पुरुषः समाचरेत् ।
परप्रयुक्तं तु कथं निशामये-
दतो मयोक्तं भवतो हितार्थिना ॥ ६९
यथावदुक्तं वचनं हितं तदा
निशम्य विप्रेण सुवीरराष्ट्रियः ।
तथाकरोद्वाक्यमदीनचेतनः
श्रियं च दीप्तां बुभुजे सबान्धवः ॥ ७०

इति श्रीमहाभारते शान्तिपर्वणि
अष्टात्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

१३९

युधिष्ठिर उवाच ।

हीने परमके धर्मे सर्वलोकातिलङ्घिनि ।
अधर्मे धर्मतां नीते धर्मे चाधर्मतां गते ॥ १
मर्यादासु प्रभिन्नासु क्षुभिते धर्मनिश्चये ।
राजभिः पीडिते लोके चोरैर्वापि विशां पते ॥ २
सर्वाश्रमेषु मूढेषु कर्मसूपहतेषु च ।
कामान्मोहाच्च लोभाच्च भयं पश्यत्सु भारत ॥ ३
अविश्वस्तेषु सर्वेषु नित्यभीतेषु पार्थिव ।
निकृत्या हन्यमानेषु वञ्चयत्सु परस्परम् ॥ ४
संप्रदीप्तेषु देशेषु ब्राह्मण्ये चाभिपीडिते ।
अवर्षति च पर्जन्ये मिथो भेदे समुत्थिते ॥ ५
सर्वस्मिन्दस्युसाद्भूते पृथिव्यामुपजीवने ।
केन स्विद्ब्राह्मणो जीवेज्जघन्ये काल आगते ॥ ६
अतितिक्षुः पुत्रपौत्राननुक्रोशान्नराधिप ।
कथमापत्सु वर्तेत तन्मे ब्रूहि पितामह ॥ ७
कथं च राजा वर्तेत लोके कलुषतां गते ।
कथमर्थाच्च धर्माच्च न हीयेत परंतप ॥ ८

भीष्म उवाच ।

राजमूला महाराज योगक्षेमसुवृष्टयः ।
प्रजासु व्याधयश्चैव मरणं च भयानि च ॥ ९
कृतं त्रेता द्वापरश्च कलिश्च भरतर्षभ ।
राजमूलानि सर्वाणि मम नास्त्यत्र संशयः ॥ १०
तस्मिंस्त्वभ्यागते काले प्रजानां दोषकारके ।
विज्ञानबलमास्थाय जीवितव्यं तदा भवेत् ॥ ११
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
विश्वामित्रस्य संवादं चण्डालस्य च पक्कणे ॥ १२
त्रेताद्वापरयोः संधौ पुरा दैवविधिक्रमात् ।
अनावृष्टिरभूद्घोरा राजन्द्वादशवार्षिकी ॥ १३
प्रजानामभिवृद्धानां युगान्ते पर्युपस्थिते ।
त्रेतानिर्मोक्षसमये द्वापरप्रतिपादने ॥ १४
न ववर्ष सहस्राक्षः प्रतिलोमोऽभवद्गुरुः ।
जगाम दक्षिणं मार्गं सोमो व्यावृत्तलक्षणः ॥ १५
नावश्यायोऽपि रात्र्यन्ते कुत एवाभ्रराजयः ।
नद्यः संक्षिप्ततोयौघाः क्वचिदन्तर्गताभवन् ॥ १६
सरांसि सरितश्चैव कूपाः प्रस्रवणानि च ।
हतत्विट्कान्यलक्ष्यन्त निसर्गाद्दैवकारितात् ॥ १७
उपशुष्कजलस्थाया विनिवृत्तसभाप्रपा ।
निवृत्तयज्ञस्वाध्याया निर्वषट्कारमङ्गला ॥ १८
उत्सन्नकृषिगोरक्ष्या निवृत्तविपणापणा ।
निवृत्तपूगसमया संप्रनष्टमहोत्सवा ॥ १९
अस्थिकङ्कालसंकीर्णा हाहाभूतजनाकुला ।
शून्यभूयिष्ठनगरा दग्धग्रामनिवेशना ॥ २०
क्वचिच्चोरैः क्वचिच्छस्त्रैः क्वचिद्राजभिरातुरैः ।
परस्परभयाच्चैव शून्यभूयिष्ठनिर्जना ॥ २१
गतदैवतसंकल्पा वृद्धबालविनाकृता ।
गोजाविमहिषैर्हीना परस्परहराहरा ॥ २२
हतविप्रा हतारक्षा प्रनष्टौषधिसंचया ।
श्यावभूतनरप्राया बभूव वसुधा तदा ॥ २३
तस्मिन्प्रतिभये काले क्षीणे धर्मे युधिष्ठिर ।
बभ्रमुः क्षुधिता मर्त्याः खादन्तः स्म परस्परम् ॥
ऋषयो नियमांस्त्यक्त्वा परित्यक्ताग्निदैवताः ।
आश्रमान्संपरित्यज्य पर्यधावन्नितस्ततः ॥ २५
विश्वामित्रोऽथ भगवान्महर्षिरनिकेतनः ।
क्षुधा परिगतो धीमान्समन्तात्पर्यधावत ॥ २६
स कदाचित्परिपतञ्श्वपचानां निवेशनम् ।
हिंस्राणां प्राणिहन्तॄणामाससाद वने क्वचित् ॥२७
विभिन्नकलशाकीर्णं श्वचर्माच्छादनायुतम् ।
वराहखरभग्नास्थिकपालघटसंकुलम् ॥ २८
मृतचेलपरिस्तीर्णं निर्माल्यकृतभूषणम् ।

सर्पनिर्मोकमालाभिः कृतचिह्नकुटीमठम् ॥ २९
उलूकपक्षध्वजिभिर्देवतायतनैर्वृतम् ।
लोहघण्टापरिष्कारं श्वयूथपरिवारितम् ॥ ३०
तत्प्रविश्य क्षुधाविष्टो गाधेः पुत्रो महानृषिः ।
आहारान्वेषणे युक्तः परं यत्नं समास्थितः ॥ ३१
न च क्वचिदविन्दत्स भिक्षमाणोऽपि कौशिकः ।
मांसमन्नं मूलफलमन्यद्वा तत्र किंचन ॥ ३२
अहो कृच्छ्रं मया प्राप्तमिति निश्चित्य कौशिकः ।
पपात भूमौ दौर्बल्यात्तस्मिंश्चण्डालपक्कणे ॥ ३३
चिन्तयामास स मुनिः किं नु मे सुकृतं भवेत् ।
कथं वृथा न मृत्युः स्यादिति पार्थिवसत्तम ॥ ३४
स ददर्श श्वमांसस्य कुतन्तीं विततां मुनिः ।
चण्डालस्य गृहे राजन्सद्यः शस्त्रहतस्य च ॥ ३५
स चिन्तयामास तदा स्तेयं कार्यमितो मया ।
न हीदानीमुपायोऽन्यो विद्यते प्राणधारणे ॥ ३६
आपत्सु विहितं स्तेयं विशिष्टसमहीनतः ।
परं परं भवेत्पूर्वमस्तेयमिति निश्चयः ॥ ३७
हीनादादेयमादौ स्यात्समानात्तदनन्तरम् ।
असंभवादाददीत विशिष्टादपि धार्मिकात् ॥ ३८
सोऽहमन्त्यावसानानां हरमाणः परिग्रहान् ।
न स्तेयदोषं पश्यामि हरिष्यामेतदामिषम् ॥ ३९
एतां बुद्धिं समास्थाय विश्वामित्रो महामुनिः ।
तस्मिन्देशे प्रसुष्वाप पतितो यत्र भारत ॥ ४०
स विगाढां निशां दृष्ट्वा सुप्ते चण्डालपक्कणे ।
शनैरुत्थाय भगवान्प्रविवेश कुटीमठम् ॥ ४१
स सुप्त एव चण्डालः श्लेष्मापिहितलोचनः ।
परिभिन्नस्वरो रूक्ष उवाचाप्रियदर्शनः ॥ ४२
कः कुतन्तीं घट्टयति सुप्ते चण्डालपक्कणे ।
जागर्मि नावसुप्तोऽस्मि हतोऽसीति च दारुणः ॥४३
विश्वामित्रोऽहमित्येव सहसा तमुवाच सः ।
सहसाभ्यागतभयः सोद्वेगस्तेन कर्मणा ॥ ४४
चण्डालस्तद्वचः श्रुत्वा महर्षेर्भावितात्मनः ।
शयनादुपसंभ्रान्त इयेषोत्पतितुं ततः ॥ ४५
स विसृज्याश्रु नेत्राभ्यां बहुमानात्कृताञ्जलिः ।
उवाच कौशिकं रात्रौ ब्रह्मन्किं ते चिकीर्षितम् ॥
विश्वामित्रस्तु मातङ्गमुवाच परिसान्त्वयन् ।
क्षुधितोऽहं गतप्राणो हरिष्यामि श्वजाघनीम् ॥४७
अवसीदन्ति मे प्राणाः स्मृतिर्मे नश्यति क्षुधा ।
स्वधर्मं बुध्यमानोऽपि हरिष्यामि श्वजाघनीम् ॥४८
अटन्भैक्षं न विन्दामि यदा युष्माकमालये ।
तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीम् ॥४९
तृषितः कलुषं पाता नास्ति ह्रीरशनार्थिनः ।
क्षुद्धर्मं दूषयत्यत्र हरिष्यामि श्वजाघनीम् ॥ ५०
अग्निर्मुखं पुरोधाश्च देवानां शुचिपाड्विभुः ।
यथा स सर्वभुग्ब्रह्मा तथा मां विद्धि धर्मतः ॥ ५१
तमुवाच स चण्डालो महर्षे शृणु मे वचः ।
श्रुत्वा तथा समातिष्ठ यथा धर्मान्न हीयसे ॥ ५२
मृगाणामधमं श्वानं प्रवदन्ति मनीषिणः ।
तस्याप्यधम उद्देशः शरीरस्योरुजाघनी ॥ ५३
नेदं सम्यग्व्यवसितं महर्षे कर्म वैकृतम् ।
चण्डालस्वस्य हरणमभक्ष्यस्य विशेषतः ॥ ५४
साध्वन्यमनुपश्य त्वमुपायं प्राणधारणे ।
न मांसलोभात्तपसो नाशस्ते स्यान्महामुने ॥ ५५
जानतोऽविहितो मार्गो न कार्यो धर्मसंकरः ।
मा स्म धर्मं परित्याक्षीस्त्वं हि धर्मविदुत्तमः ॥५६
विश्वामित्रस्ततो राजन्नित्युक्तो भरतर्षभ ।
क्षुधार्तः प्रत्युवाचेदं पुनरेव महामुनिः ॥ ५७
निराहारस्य सुमहान्मम कालोऽभिधावतः ।
न विद्यतेऽभ्युपायश्च कश्चिन्मे प्राणधारणे ॥ ५८
येन तेन विशेषेण कर्मणा येन केनचित् ।

अभ्युज्जीवेत्सीदमानः समर्थो धर्ममाचरेत् ॥ ५९
ऐन्द्रो धर्मः क्षत्रियाणां ब्राह्मणानामथाग्निकः ।
ब्रह्मवह्निर्मम बलं भक्ष्यामि समयं क्षुधा ॥ ६०
यथा यथा वै जीवेद्धि तत्कर्तव्यमपीडया ।
जीवितं मरणाच्छ्रेयो जीवन्धर्ममवाप्नुयात् ॥ ६१
सोऽहं जीवितमाकाङ्क्षन्नभक्षस्यापि भक्षणम् ।
व्यवस्ये बुद्धिपूर्वं वै तद्भवाननुमन्यताम् ॥ ६२
जीवन्धर्मं चरिष्यामि प्रणोत्स्याम्यशुभानि च ।
तपोभिर्विद्यया चैव ज्योतींषीव महत्तमः ॥ ६३

श्वपच उवाच ।

नैतत्खादन्प्राप्स्यसे प्राणमन्यं
नायुर्दीर्घं नामृतस्येव तृप्तिम् ।
भिक्षामन्यां भिक्ष मा ते मनोऽस्तु
श्वभक्षणे श्वा ह्यभक्षो द्विजानाम् ॥ ६४

विश्वामित्र उवाच ।

न दुर्भिक्षे सुलभं मांसमन्य-
च्छ्वपाक नान्नं न च मेऽस्ति वित्तम् ।
क्षुधार्तश्चाहमगतिर्निराशः
श्वमांसे चास्मिन्षड्रसान्साधु मन्ये ॥ ६५

श्वपच उवाच ।

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रस्य वै द्विज ।
यदि शास्त्रं प्रमाणं ते माभक्ष्ये मानसं कृथाः ॥ ६६

विश्वामित्र उवाच ।

अगस्त्येनासुरो जग्धो वातापिः क्षुधितेन वै ।
अहमापद्गतः क्षुब्धो भक्षयिष्ये श्वजाघनीम् ॥ ६७

श्वपच उवाच ।

भिक्षामन्यामाहरेति न चैतत्कर्तुमर्हसि ।
न नूनं कार्यमेतद्वै हर कामं श्वजाघनीम् ॥ ६८

विश्वामित्र उवाच ।

शिष्टा वै कारणं धर्मे तद्वृत्तमनुवर्तये ।
परां मेध्याशनादेतां भक्ष्यां मन्ये श्वजाघनीम् ॥ ६९

श्वपच उवाच ।

असता यत्समाचीर्णं न स धर्मः सनातनः ।
नावृत्तमनुकार्यं वै मा छलेनानृतं कृथाः ॥ ७०

विश्वामित्र उवाच ।

न पातकं नावमतमृषिः सन्कर्तुमर्हति ।
समौ च श्वमृगौ मन्ये तस्माद्भक्ष्या श्वजाघनी ॥

श्वपच उवाच ।

यद्ब्राह्मणार्थे कृतमर्थितेन
तेनर्षिणा तच्च भक्ष्याधिकारम् ।
स वै धर्मो यत्र न पापमस्ति
सर्वैरुपायैर्हि स रक्षितव्यः ॥ ७२

विश्वामित्र उवाच ।

मित्रं च मे ब्राह्मणश्चायमात्मा
प्रियश्च मे पूज्यतमश्च लोके ।
तं भर्तुकामोऽहमिमां हनिष्ये
नृशंसानामीदृशानां न बिभ्ये ॥ ७३

श्वपच उवाच ।

कामं नरा जीवितं संत्यजन्ति
न चाभक्ष्यैः प्रतिकुर्वन्ति तत्र ।
सर्वान्कामान्प्राप्नुवन्तीह विद्व-
न्प्रियस्व कामं सहितः क्षुधा वै ॥ ७४

विश्वामित्र उवाच ।

स्थाने तावत्संशयः प्रेत्यभावे
निःसंशयं कर्मणां वा विनाशः ।
अहं पुनर्वर्ते इत्याशयात्मा
मूलं रक्षन्भक्षयिष्याम्यभक्ष्यम् ॥ ७५
बुद्ध्यात्मके व्यस्तमस्तीति तुष्टो
मोहादेकत्वं यथा चर्म चक्षुः ।
यद्यप्येनःसंशयादाचरामि

नाहं भविष्यामि यथा त्वमेव ॥ ७६

श्वपच उवाच ।

पतनीयमिदं दुःखमिति मे वर्तते मतिः ।
दुष्कृती ब्राह्मणं सन्तं यस्त्वामहमुपालभे ॥ ७७

विश्वामित्र उवाच ।

पिबन्त्येवोदकं गावो मण्डूकेषु रुवत्स्वपि ।
न तेऽधिकारो धर्मेऽस्ति मा भूरात्मप्रशंसकः ॥७८

श्वपच उवाच ।

सुहृद्भूत्वानुशास्मि त्वा कृपा हि त्वयि मे द्विज ।
तदेवं श्रेय आधत्स्व मा लोभाच्छ्वानमादिथाः ॥७९

विश्वामित्र उवाच ।

सुहृन्मे त्वं सुखेप्सुश्चेदापदो मां समुद्धर ।
जानेऽहं धर्मतोऽऽत्मानं श्वानीमुत्सृज जाघनीम् ॥

श्वपच उवाच ।

नैवोत्सहे भवते दातुमेतां
नोपेक्षितं ह्रियमाणं स्वमन्नम् ।
उभौ स्यावः स्वमलेनावलिप्तौ
दाताहं च त्वं च विप्र प्रतीच्छन् ॥ ८१

विश्वामित्र उवाच ।

अद्याहमेतद्वृजिनं कर्म कृत्वा
जीवंश्चरिष्यामि महापवित्रम् ।
प्रपूतात्मा धर्ममेवाभिपत्स्ये
यदेतयोर्गुरु तद्वै ब्रवीहि ॥ ८२

श्वपच उवाच ।

आत्मैव साक्षी किल लोककृत्ये
त्वमेव जानासि यदत्र दुष्टम् ।
यो ह्याद्रियेद्भक्ष्यमिति श्वमांसं
मन्ये न तस्यास्ति विवर्जनीयम् ॥ ८३

विश्वामित्र उवाच ।

उपादाने खादने वास्य दोषः
कार्यो न्यायैर्नित्यमत्रापवादः ।
यस्मिन्न हिंसा नानृते वाक्यलेशो
भक्ष्यक्रिया तत्र न तद्गरीयः ॥ ८४

श्वपच उवाच ।

यद्येष हेतुस्तव खादनस्य
न ते वेदः कारणं नान्यधर्मः ।
तस्मादभक्ष्ये भक्षणाद्वा द्विजेन्द्र
दोषं न पश्यामि यथेदमात्थ ॥ ८५

विश्वामित्र उवाच ।

न पातकं भक्षणमस्य दृष्टं
सुरां पीत्वा पततीतीह शब्दः ।
अन्योन्यकर्माणि तथा तथैव
न लेशमात्रेण कृत्यं हिनस्ति ॥ ८६

श्वपच उवाच ।

अस्थानतो हीनतः कुत्सिताद्वा
तं विद्वांसं बाधते साधुवृत्तम् ।
स्थानं पुनर्यो लभते निषङ्गा-
त्तेनापि दण्डः सहितव्य एव ॥ ८७

भीष्म उवाच ।

एवमुक्त्वा निववृते मातङ्गः कौशिकं तदा ।
विश्वामित्रो जहारैव कृतबुद्धिः श्वजाघनीम् ॥ ८८
ततो जग्राह पञ्चाङ्गी जीवितार्थी महामुनिः ।
सदारस्तामुपाकृत्य वने यातो महामुनिः ॥ ८९
एतस्मिन्नेव काले तु प्रववर्षाथ वासवः ।
संजीवयन्प्रजाः सर्वा जनयामास चौषधीः ॥ ९०
विश्वामित्रोऽपि भगवांस्तपसा दग्धकिल्बिषः ।
कालेन महता सिद्धिमवाप परमाद्भुताम् ॥ ९१
एवं विद्वानदीनात्मा व्यसनस्थो जिजीविषुः ।
सर्वोपायैरुपायज्ञो दीनमात्मानमुद्धरेत् ॥ ९२
एतां बुद्धिं समास्थाय जीवितव्यं सदा भवेत् ।

जीवन्पुण्यमवाप्नोति नरो भद्राणि पश्यति ॥ ९३
तस्मात्कौन्तेय विदुषा धर्माधर्मविनिश्चये ।
बुद्धिमास्थाय लोकेऽस्मिन्वर्तितव्यं यतात्मना ॥९४

इति श्रीमहाभारते शान्तिपर्वणि
एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

युधिष्ठिर उवाच ।

यदिदं घोरमुद्दिष्टमश्रद्धेयमिवानृतम् ।
अस्ति स्विद्दस्युमर्यादा यामहं परिवर्जये ॥ १
संमुह्यामि विषीदामि धर्मो मे शिथिलीकृतः ।
उद्यमं नाधिगच्छामि कुतश्चित्परिचिन्तयन् ॥ २

भीष्म उवाच ।

नैतच्छुद्धागमादेव तव धर्मानुशासनम् ।
प्रज्ञासमवतारोऽयं कविभिः संभृतं मधु ॥ ३
बह्व्यः प्रतिविधातव्याः प्रज्ञा राज्ञा ततस्ततः ।
नैकशाखेन धर्मेण यात्रैषा संप्रवर्तते ॥ ४
बुद्धिसंजननं राज्ञां धर्ममाचरतां सदा ।
जयो भवति कौरव्य तदा तद्विद्धि मे वचः ॥ ५
बुद्धिश्रेष्ठा हि राजानो जयन्ति विजयैषिणः ।
धर्मः प्रतिविधातव्यो बुद्ध्या राज्ञा ततस्ततः ॥ ६
नैकशाखेन धर्मेण राज्ञां धर्मो विधीयते ।
दुर्बलस्य कुतः प्रज्ञा पुरस्तादनुदाहृता ॥ ७
अद्वैधज्ञः पथि द्वैधे संशयं प्राप्तुमर्हति ।
बुद्धिद्वैधं वेदितव्यं पुरस्तादेव भारत ॥ ८
पार्श्वतःकरणं प्रज्ञा विषूची त्वापगा इव ।
जनस्तूच्चारितं धर्मं विजानात्यन्यथान्यथा ॥ ९
सम्यग्विज्ञानिनः केचिन्मिथ्याविज्ञानिनोऽपरे ।
तद्वै यथातथं बुद्ध्वा ज्ञानमाददते सताम् ॥ १०
परिमुष्णन्ति शास्त्राणि धर्मस्य परिपन्थिनः ।
वैषम्यमर्थविद्यानां नैरर्थ्यात्ख्यापयन्ति ते ॥ ११
आजिजीविषवो विद्यां यशस्कामाः समन्ततः ।
ते सर्वे नरपापिष्ठा धर्मस्य परिपन्थिनः ॥ १२
अपक्वमतयो मन्दा न जानन्ति यथातथम् ।
सदा ह्यशास्त्रकुशलाः सर्वत्रापरिनिष्ठिताः ॥ १३
परिमुष्णन्ति शास्त्राणि शास्त्रदोषानुदर्शिनः ।
विज्ञानमथ विद्यानां न सम्यगिति वर्तते ॥ १४
निन्दया परविद्यानां स्वां विद्यां ख्यापयन्ति ये ।
वागस्त्रा वाक्छुरीमत्ता दुग्धविद्याफला इव ।
तान्विद्यावणिजो विद्धि राक्षसानिव भारत ॥ १५
व्याजेन कृत्स्नो विदितो धर्मस्ते परिहास्यते ।
न धर्मवचनं वाचा न बुद्ध्या चेति नः श्रुतम् ॥ १६
इति बार्हस्पतं ज्ञानं प्रोवाच मघवा स्वयम् ।
न त्वेव वचनं किंचिदनिमित्तादिहोच्यते ॥ १७
स्वविनीतेन शास्त्रेण व्यवस्यन्ति तथापरे ।
लोकयात्रामिहैके तु धर्ममाहुर्मनीषिणः ॥ १८
समुद्दिष्टं सतां धर्मं स्वयमूहेन्न पण्डितः ।
अमर्षाच्छास्त्रसंमोहादविज्ञानाच्च भारत ॥ १९
शास्त्रं प्राज्ञस्य वदतः समूहे यात्यदर्शनम् ।
आगतागमया बुद्ध्या वचनेन प्रशस्यते ॥ २०
अज्ञानाज्ज्ञानहेतुत्वाद्वचनं साधु मन्यते ।
अनपाहृतमेवेदं नेदं शास्त्रमपार्थकम् ॥ २१
दैतेयानुशनाः प्राह संशयच्छेदने पुरा ।
ज्ञानमव्यपदेश्यं हि यथा नास्ति तथैव तत् ॥ २२
तेन त्वं छिन्नमूलेन कं तोषयितुमर्हसि ।
अतथ्यविहितं यो वा नेदं वाक्यमुपाश्रयात् ॥२३
उग्रायैव हि सृष्टोऽसि कर्मणे न त्ववेक्षसे ।
अङ्गमामन्ववेक्षस्व राजनीतिं बुभूषितुम् ।
यया प्रमुच्यते त्वन्यो यदर्थं च प्रमोदते ॥ २४
अजोऽश्वः क्षत्रमित्येतत्सदृशं ब्रह्मणा कृतम् ।
तस्मादभीक्ष्णभूतानां यात्रा काचित्प्रसिध्यति ॥२५

यस्त्ववध्यवधे दोषः स वध्यस्यावधे स्मृतः ।
एषैव खलु मर्यादा यामयं परिवर्जयेत् ॥ २६
तस्मात्तीक्ष्णः प्रजा राजा स्वधर्मे स्थापयेदुत ।
अन्योन्यं भक्षयन्तो हि प्रचरेयुर्वृका इव ॥ २७
यस्य दस्युगणा राष्ट्रे ध्वाङ्क्षा मत्स्याञ्जलादिव ।
विहरन्ति परस्वानि स वै क्षत्रियपांसनः ॥ २८
कुलीनान्सचिवान्कृत्वा वेदविद्यासमन्वितान् ।
प्रशाधि पृथिवीं राजन्प्रजा धर्मेण पालयन् ॥ २९
विहीनजमकर्माणं यः प्रगृह्णाति भूमिपः ।
उभयस्याविशेषज्ञस्तद्वै क्षत्रं नपुंसकम् ॥ ३०
नैवोग्रं नैव चानुग्रं धर्मेणेह प्रशस्यते ।
उभयं न व्यतिक्रामेदुग्रो भूत्वा मृदुर्भव ॥ ३१
कष्टः क्षत्रियधर्मोऽयं सौहृदं त्वयि यत्स्थितम् ।
उग्रे कर्मणि सृष्टोऽसि तस्माद्राज्यं प्रशाधि वै ॥ ३२
अशिष्टनिग्रहो नित्यं शिष्टस्य परिपालनम् ।
इति शक्रोऽब्रवीद्धीमानापत्सु भरतर्षभ ॥ ३३

युधिष्ठिर उवाच ।

अस्ति स्विद्दस्युमर्यादा यामन्यो नातिलङ्घयेत् ।
पृच्छामि त्वां सतां श्रेष्ठ तन्मे ब्रूहि पितामह ॥ ३४

भीष्म उवाच ।

ब्राह्मणानेव सेवेत विद्यावृद्धांस्तपस्विनः ।
श्रुतचारित्रवृत्ताढ्यान्पवित्रं ह्येतदुत्तमम् ॥ ३५
या देवतासु वृत्तिस्ते सास्तु विप्रेषु सर्वदा ।
क्रुद्धैर्हि विप्रैः कर्माणि कृतानि बहुधा नृप ॥ ३६
तेषां प्रीत्या यशो मुख्यमप्रीत्या तु विपर्ययः ।
प्रीत्या ह्यमृतवद्विप्राः क्रुद्धाश्चैव यथा विषम् ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
शरणं पालयानस्य यो धर्मस्तं वदस्व मे ॥ १

भीष्म उवाच ।

महान्धर्मो महाराज शरणागतपालने ।
अर्हः प्रष्टुं भवांश्चैव प्रश्नं भरतसत्तम ॥ २
नृगप्रभृतयो राजन्राजानः शरणागतान् ।
परिपाल्य महाराज संसिद्धिं परमां गताः ॥ ३
श्रूयते हि कपोतेन शत्रुः शरणमागतः ।
पूजितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ ४

युधिष्ठिर उवाच ।

कथं कपोतेन पुरा शत्रुः शरणमागतः ।
स्वमांसैर्भोजितः कां च गतिं लेभे स भारत ॥ ५

भीष्म उवाच ।

शृणु राजन्कथां दिव्यां सर्वपापप्रणाशिनीम् ।
नृपतेर्मुचुकुन्दस्य कथितां भार्गवेण ह ॥ ६
इममर्थं पुरा पार्थ मुचुकुन्दो नराधिप ।
भार्गवं परिपप्रच्छ प्रणतो भरतर्षभ ॥ ७
तस्मै शुश्रूषमाणाय भार्गवोऽकथयत्कथाम् ।
इयं यथा कपोतेन सिद्धिः प्राप्ता नराधिप ॥ ८
धर्मनिश्चयसंयुक्तां कामार्थसहितां कथाम् ।
शृणुष्वावहितो राजन्गदतो मे महाभुज ॥ ९
कश्चित्क्षुद्रसमाचारः पृथिव्यां कालसंमतः ।
चचार पृथिवीं पापो घोरः शकुनिलुब्धकः ॥ १०
काकोल इव कृष्णाङ्गो रूक्षः पापसमाहितः ।
यवमध्यः कृशग्रीवो ह्रस्वपादो महाहनुः ॥ ११
नैव तस्य सुहृत्कश्चिन्न संबन्धी न बान्धवः ।
स हि तैः संपरित्यक्तस्तेन घोरेण कर्मणा ॥ १२
स वै क्षारकमादाय द्विजान्हत्वा वने सदा ।

चकार विक्रयं तेषां पतंगानां नराधिप ।। १३
एवं तु वर्तमानस्य तस्य वृत्तिं दुरात्मनः ।
अगमत्सुमहान्कालो न चाधर्ममबुध्यत ।। १४
तस्य भार्यासहायस्य रममाणस्य शाश्वतम् ।
दैवयोगविमूढस्य नान्या वृत्तिररोचत ।। १५
ततः कदाचित्तस्याथ वनस्थस्य समुद्गतः ।
पातयन्निव वृक्षांस्तान्सुमहान्वातसंभ्रमः ।। १६
मेघसंकुलमाकाशं विद्युन्मण्डलमण्डितम् ।
संछन्नं सुमुहूर्तेन नौस्थानेनेव सागरः ।। १७
वारिधारासमूहैश्च संप्रहृष्टः शतक्रतुः ।
क्षणेन पूरयामास सलिलेन वसुंधराम् ।। १८
ततो धाराकुले लोके संभ्रमन्नष्टचेतनः ।
शीतार्तस्तद्वनं सर्वमाकुलेनान्तरात्मना ।। १९
नैव निम्नं स्थलं वापि सोऽविन्दत विहंगहा ।
पूरितो हि जलौघेन मार्गस्तस्य वनस्य वै ।। २०
पक्षिणो वातवेगेन हता लीनास्तदाभवन् ।
मृगाः सिंहा वराहाश्च स्थलान्याश्रित्य तस्थिरे ।। २१
महता वातवर्षेण त्रासितास्ते वनौकसः ।
भयार्ताश्च क्षुधार्ताश्च बभ्रमुः सहिता वने ।। २२
स तु शीतहतैर्गात्रैर्जगामैव न तस्थिवान् ।
सोऽपश्यद्वनषण्डेषु मेघनीलं वनस्पतिम् ।। २३
ताराढ्यं कुमुदाकारमाकाशं निर्मलं च ह ।
मेघैर्मुक्तं नभो दृष्ट्वा लुब्धकः शीतविह्वलः ।। २४
दिशोऽवलोकयामास वेलां चैव दुरात्मवान् ।
दूरे ग्रामनिवेशश्च तस्माद्देशादिति प्रभो ।
कृतबुद्धिर्वने तस्मिन्वस्तुं तां रजनीं तदा ।। २५
सोऽञ्जलिं प्रयतः कृत्वा वाक्यमाह वनस्पतिम् ।
शरणं यामि यान्यस्मिन्दैवतानीह भारत ।। २६
स शिलायां शिरः कृत्वा पर्णान्यास्तीर्य भूतले ।
दुःखेन महताविष्टस्ततः सुष्वाप पक्षिहा ।। २७

इति श्रीमहाभारते शान्तिपर्वणि
एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

भीष्म उवाच ।

अथ वृक्षस्य शाखायां विहंगः ससुहृज्जनः ।
दीर्घकालोषितो राजंस्तत्र चित्रतनूरुहः ।। १
तस्य काल्यं गता भार्या चरितुं नाभ्यवर्तत ।
प्राप्तां च रजनीं दृष्ट्वा स पक्षी पर्यतप्यत ।। २
वातवर्षं महच्चासीन्न चागच्छति मे प्रिया ।
किं नु तत्कारणं येन साद्यापि न निवर्तते ।। ३
अपि स्वस्ति भवेत्तस्याः प्रियाया मम कानने ।
तया विरहितं हीदं शून्यमद्य गृहं मम ।। ४
यदि सा रक्तनेत्रान्ता चित्राङ्गी मधुरस्वरा ।
अद्य नाभ्येति मे कान्ता न कार्यं जीवितेन मे ।।५
पतिधर्मरता साध्वी प्राणेभ्योऽपि गरीयसी ।
सा हि श्रान्तं क्षुधार्तं च जानीते मां तपस्विनी ।।६
अनुरक्ता हिता चैव स्निग्धा चैव पतिव्रता ।
यस्य वै तादृशी भार्या धन्यः स मनुजो भुवि ।।७
भार्या हि परमो नाथः पुरुषस्येह पठ्यते ।
असहायस्य लोकेऽस्मिँल्लोकयात्रासहायिनी ।। ८
तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च ।
नास्ति भार्यासमं किंचिन्नरस्यार्तस्य भेषजम् ।। ९
नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः ।
नास्ति भार्यासमो लोके सहायो धर्मसाधनः ।।१०
एवं विलपतस्तस्य द्विजस्यार्तस्य तत्र वै ।
गृहीता शकुनघ्नेन भार्या शुश्राव भारतीम् ।। ११
न सा स्त्रीत्यभिभाषा स्याद्यस्या भर्ता न तुष्यति ।
अग्निसाक्षिकमप्येतद्भर्ता हि शरणं स्त्रियः ।। १२
इति संचिन्त्य दुःखार्ता भर्तारं दुःखितं तदा ।

कपोती लुब्धकेनाथ यत्ता वचनमब्रवीत् ॥ १३
हन्त वक्ष्यामि ते श्रेयः श्रुत्वा च कुरु तत्तथा ।
शरणागतसंत्राता भव कान्त विशेषतः ॥ १४
एष शाकुनिकः शेते तव वासं समाश्रितः ।
शीतार्तश्च क्षुधार्तश्च पूजामस्मै प्रयोजय ॥ १५
यो हि कश्चिद्द्विजं हन्याद्गां वा लोकस्य मातरम् ।
शरणागतं च यो हन्यात्तुल्यं तेषां च पातकम् ॥१६
यास्माकं विहिता वृत्तिः कापोती जातिधर्मतः ।
सा न्याय्यात्मवतां नित्यं त्वद्विधेनाभिवर्तितुम् ॥१७
यस्तु धर्मं यथाशक्ति गृहस्थो ह्यनुवर्तते ।
स प्रेत्य लभते लोकानक्षयानिति शुश्रुम ॥ १८
स त्वं संतानवानद्य पुत्रवानपि च द्विज ।
तत्स्वदेहे दयां त्यक्त्वा धर्मार्थौ परिगृह्य वै ।
पूजामस्मै प्रयुङ्क्ष्व त्वं प्रीयेतास्य मनो यथा ॥ १९
इति सा शकुनी वाक्यं क्षारकस्था तपस्विनी ।
अतिदुःखान्विता प्रोच्य भर्तारं समुदैक्षत ॥ २०
स पत्न्या वचनं श्रुत्वा धर्मयुक्तिसमन्वितम् ।
हर्षेण महता युक्तो बाष्पव्याकुललोचनः ॥ २१
तं वै शाकुनिकं दृष्ट्वा विधिदृष्टेन कर्मणा ।
पूजयामास यत्नेन स पक्षी पक्षिजीविनम् ॥२२
उवाच च स्वागतं ते ब्रूहि किं करवाण्यहम् ।
संतापश्च न कर्तव्यः स्वगृहे वर्तते भवान् ॥ २३
तद्ब्रवीतु भवान्क्षिप्रं किं करोमि किमिच्छसि ।
प्रणयेन ब्रवीमि त्वां त्वं हि नः शरणागतः ॥ २४
शरणागतस्य कर्तव्यमातिथ्यमिह यत्नतः ।
पञ्चयज्ञप्रवृत्तेन गृहस्थेन विशेषतः ॥ २५
पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी ।
तस्य नायं न च परो लोको भवति धर्मतः ॥२६
तद्ब्रूहि त्वं सुविस्रब्धो यत्त्वं वाचा वदिष्यसि ।
तत्करिष्याम्यहं सर्वं मा त्वं शोके मनः कृथाः॥२७

तस्य तद्वचनं श्रुत्वा शकुनेर्लुब्धकोऽब्रवीत् ।
बाधते खलु मा शीतं हिमत्राणं विधीयताम् ॥२८
एवमुक्तस्ततः पक्षी पर्णान्यास्तीर्य भूतले ।
यथाशुष्काणि यत्नेन ज्वलनार्थं द्रुतं ययौ ॥ २९
स गत्वाङ्गारकर्मान्तं गृहीत्वाग्निमथागमत् ।
ततः शुष्केषु पर्णेषु पावकं सोऽभ्यदीदिपत् ॥ ३०
सुसंदीप्तं महत्कृत्वा तमाह शरणागतम् ।
प्रतापय सुविस्रब्धं स्वगात्राण्यकुतोभयः ॥ ३१
स तथोक्तस्तथेत्युक्त्वा लुब्धो गात्राण्यतापयत् ।
अग्निप्रत्यागतप्राणस्ततः प्राह विहंगमम् ॥ ३२
दत्तमाहारमिच्छामि त्वया क्षुद्बाधते हि माम् ।
तद्वचः स प्रतिश्रुत्य वाक्यमाह विहंगमः ॥ ३३
न मेऽस्ति विभवो येन नाशयामि तव क्षुधाम् ।
उत्पन्नेन हि जीवामो वयं नित्यं वनौकसः ॥ ३४
संचयो नास्ति चास्माकं मुनीनामिव कानने ।
इत्युक्त्वा स तदा तत्र विवर्णवदनोऽभवत् ॥ ३५
कथं नु खलु कर्तव्यमिति चिन्तापरः सदा ।
बभूव भरतश्रेष्ठ गर्हयन्वृत्तिमात्मनः ॥ ३६
मुहूर्ताल्लब्धसंज्ञस्तु स पक्षी पक्षिघातकम् ।
उवाच तर्पयिष्ये त्वां मुहूर्तं प्रतिपालय ॥ ३७
इत्युक्त्वा शुष्कपर्णैः स संप्रज्वाल्य हुताशनम् ।
हर्षेण महता युक्तः कपोतः पुनरब्रवीत् ॥ ३८
देवानां च मुनीनां च पितॄणां च महात्मनाम् ।
श्रुतपूर्वो मया धर्मो महानतिथिपूजने ॥ ३९
कुरुष्वानुग्रहं मेऽद्य सत्यमेतद्ब्रवीमि ते ।
निश्चिता खलु मे बुद्धिरतिथिप्रतिपूजने ॥ ४०
ततः सत्यप्रतिज्ञो वै स पक्षी प्रहसन्निव ।
तमग्निं त्रिः परिक्रम्य प्रविवेश महीपते ॥ ४१
अग्निमध्यं प्रविष्टं तं लुब्धो दृष्ट्वाथ पक्षिणम् ।
चिन्तयामास मनसा किमिदं नु कृतं मया ॥ ४

अहो मम नृशंसस्य गर्हितस्य स्वकर्मणा ।
अधर्मः सुमहान्घोरो भविष्यति न संशयः ॥ ४३
एवं बहुविधं भूरि विललाप स लुब्धकः ।
गर्हयन्स्वानि कर्माणि द्विजं दृष्ट्वा तथागतम् ॥ ४४

इति श्रीमहाभारते शान्तिपर्वणि
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

१४३

भीष्म उवाच ।

ततस्तं लुब्धकः पश्यन्कृपयाभिपरिप्लुतः ।
कपोतमग्नौ पतितं वाक्यं पुनरुवाच ह ॥ १
किमीदृशं नृशंसेन मया कृतमबुद्धिना ।
भविष्यति हि मे नित्यं पातकं हृदि जीवतः ॥ २
स विनिन्दन्नथात्मानं पुनः पुनरुवाच ह ।
धिङ्मामस्तु सुदुर्बुद्धिं सदा निकृतिनिश्चयम् ।
शुभं कर्म परित्यज्य योऽहं शकुनिलुब्धकः ॥ ३
नृशंसस्य ममाद्यायं प्रत्यादेशो न संशयः ।
दत्तः स्वमांसं ददता कपोतेन महात्मना ॥ ४
सोऽहं त्यक्ष्ये प्रियान्प्राणान्पुत्रदारं विसृज्य च ।
उपदिष्टो हि मे धर्मः कपोतेनातिधर्मिणा ॥ ५
अद्य प्रभृति देहं स्वं सर्वभोगैर्विवर्जितम् ।
यथा स्वल्पं जलं ग्रीष्मे शोषयिष्याम्यहं तथा ॥ ६
क्षुत्पिपासातपसहः कृशो धमनिसंततः ।
उपवासैर्बहुविधैश्चरिष्ये पारलौकिकम् ॥ ७
अहो देहप्रदानेन दर्शितातिथिपूजना ।
तस्माद्धर्मं चरिष्यामि धर्मो हि परमा गतिः ।
दृष्टो हि धर्मो धर्मिष्ठैर्यादृशो विहगोत्तमे ॥ ८
एवमुक्त्वा विनिश्चित्य रौद्रकर्मा स लुब्धकः ।
महाप्रस्थानमाश्रित्य प्रययौ संशितव्रतः ॥ ९
ततो यष्टिं शलाकाश्च क्षारकं पञ्जरं तथा ।
तांश्च बद्धान्कपोतान्स संप्रमुच्योत्ससर्ज ह ॥ १०

इति श्रीमहाभारते शान्तिपर्वणि
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

भीष्म उवाच ।

ततो गते शाकुनिके कपोती प्राह दुःखिता ।
संस्मृत्य भर्तारमथो रुदती शोकमूर्छिता ॥ १
नाहं ते विप्रियं कान्त कदाचिदपि संस्मरे ।
सर्वा वै विधवा नारी बहुपुत्रापि खेचर ।
शोच्या भवति बन्धूनां पतिहीना मनस्विनी ॥ २
लालिताहं त्वया नित्यं बहुमानाच्च सान्त्विता ।
वचनैर्मधुरैः स्निग्धैरसकृत्सुमनोहरैः ॥ ३
कन्दरेषु च शैलानां नदीनां निर्झरेषु च ।
द्रुमाग्रेषु च रम्येषु रमिताहं त्वया प्रिय ॥ ४
आकाशगमने चैव सुखिताहं त्वया सुखम् ।
विहृतास्मि त्वया कान्त तन्मे नाद्यास्ति किंचन ॥ ५
मितं ददाति हि पिता मितं माता मितं सुतः ।
अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥ ६
नास्ति भर्तृसमो नाथो न च भर्तृसमं सुखम् ।
विसृज्य धनसर्वस्वं भर्ता वै शरणं स्त्रियाः ॥ ७
न कार्यमिह मे नाथ जीवितेन त्वया विना ।
पतिहीनापि का नारी सती जीवितुमुत्सहेत् ॥ ८
एवं विलप्य बहुधा करुणं सा सुदुःखिता ।
पतिव्रता संप्रदीप्तं प्रविवेश हुताशनम् ॥ ९
ततश्चित्राम्बरधरं भर्तारं सान्वपश्यत ।
विमानस्थं सुकृतिभिः पूज्यमानं महात्मभिः ॥ १०
चित्रमाल्याम्बरधरं सर्वाभरणभूषितम् ।
विमानशतकोटीभिरावृतं पुण्यकीर्तिभिः ॥ ११
ततः स्वर्गगतः पक्षी भार्यया सह संगतः ।

कर्मणा पूजितस्तेन रेमे तत्र स भार्यया ॥ १२

इति श्रीमहाभारते शान्तिपर्वणि
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

१४५

भीष्म उवाच ।

विमानस्थौ तु तौ राजँल्लुब्धको वै ददर्श ह ।
दृष्ट्वा तौ दंपती दुःखादचिन्तयत सद्गतिम् ॥ १
कीदृशेनेह तपसा गच्छेयं परमां गतिम् ।
इति बुद्ध्या विनिश्चित्य गमनायोपचक्रमे ॥ २
महाप्रस्थानमाश्रित्य लुब्धकः पक्षिजीवनः ।
निश्चेष्टो मारुताहारो निर्ममः स्वर्गकाङ्क्षया ॥ ३
ततोऽपश्यत्सुविस्तीर्णं हृद्यं पद्मविभूषितम् ।
नानाद्विजगणाकीर्णं सरः शीतजलं शुभम् ॥ ४
पिपासार्तोऽपि तद्दृष्ट्वा तृप्तः स्यान्नात्र संशयः ।
उपवासकृशोऽत्यर्थं स तु पार्थिव लुब्धकः ॥ ५
उपसर्पत संहृष्टः श्वापदाध्युषितं वनम् ।
महान्तं निश्चयं कृत्वा लुब्धकः प्रविवेश ह ।
प्रविशन्नेव च वनं निगृहीतः स कण्टकैः ॥ ६
स कण्टकविभुग्नाङ्गो लोहितार्द्रीकृतच्छविः ।
बभ्राम तस्मिन्विजने नानामृगसमाकुले ॥ ७
ततो द्रुमाणां महतां पवनेन वने तदा ।
उदतिष्ठत संघर्षात्सुमहान्हव्यवाहनः ॥ ८
तद्वनं वृक्षसंकीर्णं लताविटपसंकुलम् ।
ददाह पावकः क्रुद्धो युगान्ताग्निसमप्रभः ॥ ९
सज्वालैः पवनोद्धूतैर्विस्फुलिङ्गैः समन्वितः ।
ददाह तद्वनं घोरं मृगपक्षिसमाकुलम् ॥ १०
ततः स देहमोक्षार्थं संप्रहृष्टेन चेतसा ।
अभ्यधावत संवृद्धं पावकं लुब्धकस्तदा ॥ ११
ततस्तेनाग्निना दग्धो लुब्धको नष्टकिल्बिषः ।
जगाम परमां सिद्धिं तदा भरतसत्तम ॥ १२
ततः स्वर्गस्थमात्मानं सोऽपश्यद्विगतज्वरः ।
यक्षगन्धर्वसिद्धानां मध्ये भ्राजन्तमिन्द्रवत् ॥ १३
एवं खलु कपोतश्च कपोती च पतिव्रता ।
लुब्धकेन सह स्वर्गं गताः पुण्येन कर्मणा ॥ १४
यापि चैवंविधा नारी भर्तारमनुवर्तते ।
विराजते हि सा क्षिप्रं कपोतीव दिवि स्थिता ॥ १५
एवमेतत्पुरा वृत्तं लुब्धकस्य महात्मनः ।
कपोतस्य च धर्मिष्ठा गतिः पुण्येन कर्मणा ॥ १६
यश्चेदं शृणुयान्नित्यं यश्चेदं परिकीर्तयेत् ।
नाशुभं विद्यते तस्य मनसापि प्रमाद्यतः ॥ १७
युधिष्ठिर महानेष धर्मो धर्मभृतां वर ।
गोघ्नेष्वपि भवेदस्मिन्निष्कृतिः पापकर्मणः ।
निष्कृतिर्न भवेत्तस्मिन्यो हन्याच्छरणागतम् ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

१४६

युधिष्ठिर उवाच ।

अबुद्धिपूर्वं यः पापं कुर्याद्भरतसत्तम ।
मुच्यते स कथं तस्मादेनसस्तद्वदस्व मे ॥ १

भीष्म उवाच ।

अत्र ते वर्णयिष्येऽहमितिहासं पुरातनम् ।
इन्द्रोतः शौनको विप्रो यदाह जनमेजयम् ॥ २
आसीद्राजा महावीर्यः पारिक्षिज्जनमेजयः ।
अबुद्धिपूर्वं ब्रह्महत्या तमागच्छन्महीपतिम् ॥ ३
तं ब्राह्मणाः सर्व एव तत्यजुः सपुरोहिताः ।
जगाम स वनं राजा दह्यमानो दिवानिशम् ॥ ४
स प्रजाभिः परित्यक्तश्चकार कुशलं महत् ।
अतिवेलं तपस्तेपे दह्यमानः स मन्युना ॥ ५
तत्रेतिहासं वक्ष्यामि धर्मस्यास्योपबृंहणम् ।
दह्यमानः पापकृत्या जगाम जनमेजयः ॥ ६

वरिष्यमाण इन्द्रोतं शौनकं संशितव्रतम् ।
समासाद्योपजग्राह पादयोः परिपीडयन् ॥ ७
ततो भीतो महाप्राज्ञो जगर्हे सुभृशं तदा ।
कर्ता पापस्य महतो भ्रूणहा किमिहागतः ॥ ८
किं तवास्मासु कर्तव्यं मा मा स्प्राक्षीः कथंचन ।
गच्छ गच्छ न ते स्थानं प्रीणात्यस्मानिह ध्रुवम् ॥ ९
रुधिरस्येव ते गन्धः शवस्येव च दर्शनम् ।
अशिवः शिवसंकाशो मृतो जीवन्निवाटसि ॥ १०
अन्तर्मृत्युरशुद्धात्मा पापमेवानुचिन्तयन् ।
प्रबुध्यसे प्रस्वपिषि वर्तसे चरसे सुखी ॥ ११
मोघं ते जीवितं राजन्परिक्लिष्टं च जीवसि ।
पापायेव च सृष्टोऽसि कर्मणे ह यवीयसे ॥ १२
बहु कल्याणमिच्छन्त ईहन्ते पितरः सुतान् ।
तपसा देवतेज्याभिर्वन्दनेन तितिक्षया ॥ १३
पितृवंशमिमं पश्य त्वत्कृते नरकं गतम् ।
निरर्थाः सर्व एवैषामाशाबन्धास्त्वदाश्रयाः ॥ १४
यान्पूजयन्तो विन्दन्ति स्वर्गमायुर्यशः सुखम् ।
तेषु ते सततं द्वेषो ब्राह्मणेषु निरर्थकः ॥ १५
इमं लोकं विमुच्य त्वमवाङ्मूर्धा पतिष्यसि ।
अशाश्वतीः शाश्वतीश्च समाः पापेन कर्मणा ॥ १६
अद्यमानो जन्तुगृध्रैः शितिकण्ठैरयोमुखैः ।
ततोऽपि पुनरावृत्तः पापयोनिं गमिष्यसि ॥ १७
यदिदं मन्यसे राजन्नायमस्ति परः कुतः ।
प्रतिस्मारयितारस्त्वां यमदूता यमक्षये ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

१४७

भीष्म उवाच ।

एवमुक्तः प्रत्युवाच तं मुनिं जनमेजयः ।
गर्ह्यं भवान्गर्हयति निन्द्यं निन्दति मा भवान् ॥ १
धिकार्यं मा धिक्कुरुते तस्मात्त्वाहं प्रसादये ।
सर्वं हीदं स्वकृतं मे ज्वलाम्यग्नाविवाहितः ॥ २
स्वकर्माण्यभिसंधाय नाभिनन्दन्ति मे मनः ।
प्राप्तं नूनं मया घोरं भयं वैवस्वतादपि ॥ ३
तत्तु शल्यमनिर्हृत्य कथं शक्ष्यामि जीवितुम् ।
सर्वमन्यून्विनीय त्वमभि मा वद शौनक ॥ ४
महानसं ब्राह्मणानां भविष्याम्यर्थवान्पुनः ।
अस्तु शेषं कुलस्यास्य मा पराभूदिदं कुलम् ॥ ५
न हि नो ब्रह्मशप्तानां शेषो भवितुमर्हति ।
श्रुतीरलभमानानां संविदं वेदनिश्चयात् ॥ ६
निर्विद्यमानः सुभृशं भूयो वक्ष्यामि सांप्रतम् ।
भूयश्चैवाभिनङ्क्ष्यन्ति निर्धर्मा निर्जपा इव ॥ ७
अर्वाक्च प्रतितिष्ठन्ति पुलिन्दशबरा इव ।
न ह्ययज्ञा अमुं लोकं प्राप्नुवन्ति कथंचन ॥ ८
अविज्ञायैव मे प्रज्ञां बालस्येव सुपण्डितः ।
ब्रह्मन्पितेव पुत्रेभ्यः प्रति मां वाञ्छ शौनक ॥ ९

शौनक उवाच ।

किमाश्चर्यं यतः प्राज्ञो बहु कुर्याद्धि सांप्रतम् ।
इति वै पण्डितो भूत्वा भूतानां नोपतप्यति ॥ १०
प्रज्ञाप्रासादमारुह्य अशोच्यः शोचते जनान् ।
जगतीस्थानिवाद्रिस्थः प्रज्ञया प्रतिपश्यति ॥ ११
न चोपलभते तत्र न च कार्याणि पश्यति ।
निर्विण्णात्मा परोक्षो वा धिक्कृतः सर्वसाधुषु ॥ १२
विदित्वोभयतो वीर्यं माहात्म्यं वेद आगमे ।
कुरुष्वेह महाशान्तिं ब्रह्म शरणमस्तु ते ॥ १३
तद्वै पारत्रिकं चारु ब्राह्मणानामकुप्यताम् ।
अथ चेत्तप्यसे पापैर्धर्मं चेदनुपश्यसि ॥ १४

जनमेजय उवाच ।

अनुतप्ये च पापेन न चाधर्मं चराम्यहम् ।
बुभूषुं भजमानं च प्रतिवाञ्छामि शौनक ॥ १५

शौनक उवाच ।

छित्त्वा स्तम्भं च मानं च प्रीतिमिच्छामि ते नृप ।
सर्वभूतहिते तिष्ठ धर्मं चैव प्रतिस्मर ॥ १६
न भयान्न च कार्पण्यान्न लोभात्त्वामुपाह्वये ।
तां मे देवा गिरं सत्यां शृण्वन्तु ब्राह्मणैः सह ॥१७
सोऽहं न केनचिच्चार्थी त्वां च धर्ममुपाह्वये ।
क्रोशतां सर्वभूतानामहो धिगिति कुर्वताम् ॥ १८
वक्ष्यन्ति मामधर्मज्ञा वक्ष्यन्त्यसुहृदो जनाः ।
वाचस्ताः सुहृदः श्रुत्वा संज्वरिष्यन्ति मे भृशम् ॥१९
केचिदेव महाप्राज्ञाः परिज्ञास्यन्ति कार्यताम् ।
जानीहि मे कृतं तात ब्राह्मणान्प्रति भारत ॥ २०
यथा ते मत्कृते क्षेमं लभेरंस्तत्तथा कुरु ।
प्रतिजानीहि चाद्रोहं ब्राह्मणानां नराधिप ॥ २१

जनमेजय उवाच ।

नैव वाचा न मनसा न पुनर्जातु कर्मणा ।
द्रोग्धास्मि ब्राह्मणान्विप्र चरणावेव ते स्पृशे ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

१४८

शौनक उवाच ।

तस्मात्तेऽहं प्रवक्ष्यामि धर्ममावृत्तचेतसे ।
श्रीमान्महाबलस्तुष्टो यस्त्वं धर्ममवेक्षसे ।
पुरस्ताद्दारुणो भूत्वा सुचित्रतरमेव तत् ॥ १
अनुगृह्णन्ति भूतानि स्वेन वृत्तेन पार्थिव ।
कृत्स्नं नूनं सदसती इति लोको व्यवस्यति ।
यत्र त्वं तादृशो भूत्वा धर्ममद्यानुपश्यसि ॥ २
हित्वा सुरुचिरं भक्ष्यं भोगांश्च तप आस्थितः ।
इत्येतदपि भूतानामद्भुतं जनमेजय ॥ ३
यो दुर्बलो भवेद्दाता कृपणो वा तपोधनः ।
अनाश्चर्यं तदित्याहुर्नातिदूरे हि वर्तते ॥ ४
एतदेव हि कार्पण्यं समग्रमसमीक्षितम् ।
तस्मात्समीक्ष्यैव स्याद्भवेत्तस्मिंस्ततो गुणः ॥ ५
यज्ञो दानं दया वेदाः सत्यं च पृथिवीपते ।
पञ्चैतानि पवित्राणि षष्ठं सुचरितं तपः ॥ ६
तदेव राज्ञां परमं पवित्रं जनमेजय ।
तेन सम्यग्गृहीतेन श्रेयांसं धर्ममाप्स्यसि ॥ ७
पुण्यदेशाभिगमनं पवित्रं परमं स्मृतम् ।
अपि ह्युदाहरन्तीमा गाथा गीता ययातिना ॥ ८
यो मर्त्यः प्रतिपद्येत आयुर्जीवेत वा पुनः ।
यज्ञमेकान्ततः कृत्वा तत्संन्यस्य तपश्चरेत् ॥ ९
पुण्यमाहुः कुरुक्षेत्रं सरस्वत्यां पृथूदकम् ।
यत्रावगाह्य पीत्वा वा नैवं श्वोमरणं तपेत् ॥ १०
महासरः पुष्कराणि प्रभासोत्तरमानसे ।
कालोदं त्वेव गन्तासि लब्धायुर्जीविते पुनः ॥११
सरस्वतीदृषद्वत्यौ सेवमानोऽनुसंचरेः ।
स्वाध्यायशीलः स्थानेषु सर्वेषु समुपस्पृशेः ॥ १२
त्यागधर्मं पवित्राणां संन्यासं परमब्रवीत् ।
अत्राप्युदाहरन्तीमा गाथाः सत्यवता कृताः ॥ १३
यथा कुमारः सत्यो वै न पुण्यो न च पापकृत् ।
न ह्यस्ति सर्वभूतेषु दुःखमस्मिन्कुतः सुखम् ॥ १४
एवं प्रकृतिभूतानां सर्वसंसर्गयायिनाम् ।
त्यजतां जीवितं प्रायो विवृते पुण्यपातके ॥ १५
यत्त्वेव राज्ञो ज्यायो वै कार्याणां तद्वदामि ते ।
बलेन संविभागैश्च जय स्वर्गं पुनीष्व च ॥ १६
यस्यैवं बलमोजश्च स धर्मस्य प्रभुर्नरः ।
ब्राह्मणानां सुखार्थं त्वं पर्येहि पृथिवीमिमाम् ॥१७
यथैवैनान्पुराक्षैप्सीस्तथैवैनान्प्रसादय ।
अपि धिक्क्रियमाणोऽपि त्यज्यमानोऽप्यनेकधा॥
आत्मनो दर्शनं विद्वन्नाहन्तास्मीति मा क्रुधः ।
घटमानः स्वकार्येषु कुरु नैःश्रेयसं परम् ॥ १९

हिमाग्निघोरसदृशो राजा भवति कश्चन ।
लाङ्गलाशनिकल्पो वा भवत्यन्यः परंतप ॥ २०
न निःशेषेण मन्तव्यमचिकित्स्येन वा पुनः ।
न जातु नाहमस्मीति प्रसक्तव्यमसाधुषु ॥ २१
विकर्मणा तप्यमानः पादात्पापस्य मुच्यते ।
नैतत्कार्यं पुनरिति द्वितीयात्परिमुच्यते ।
चरिष्ये धर्ममेवेति तृतीयात्परिमुच्यते ॥ २२
कल्याणमनुमन्तव्यं पुरुषेण बुभूषता ।
ये सुगन्धीनि सेवन्ते तथागन्धा भवन्ति ते ।
ये दुर्गन्धीनि सेवन्ते तथागन्धा भवन्ति ते ॥ २३
तपश्चर्यापरः सद्यः पापाद्धि परिमुच्यते ।
संवत्सरमुपास्याग्निमभिशस्तः प्रमुच्यते ।
त्रीणि वर्षाण्युपास्याग्निं भ्रूणहा विप्रमुच्यते ॥ २४
यावतः प्राणिनो हन्यात्तज्जातीयान्स्वभावतः ।
प्रमीयमाणानुन्मोच्य भ्रूणहा विप्रमुच्यते ॥ २५
अपि वाप्सु निमज्जेत त्रिर्जपन्नघमर्षणम् ।
यथाश्वमेधावभृथस्तथा तन्मनुरब्रवीत् ॥ २६
क्षिप्रं प्रणुदते पापं सत्कारं लभते तथा ।
अपि चैनं प्रसीदन्ति भूतानि जडमूकवत् ॥ २७
बृहस्पतिं देवगुरुं सुरासुराः
समेत्य सर्वे नृपतेऽन्वयुञ्जन् ।
धर्मे फलं वेत्थ कृते महर्षे
तथेतरस्मिन्नरके पापलोके ॥ २८
उभे तु यस्य सुकृते भवेतां
किं स्वित्तयोस्तत्र जयोत्तरं स्यात् ।
आचक्ष्व नः कर्मफलं महर्षे
कथं पापं नुदते पुण्यशीलः ॥ २९

बृहस्पतिरुवाच ।

कृत्वा पापं पूर्वमबुद्धिपूर्वं
पुण्यानि यः कुरुते बुद्धिपूर्वम् ।
स तत्पापं नुदते पुण्यशीलो
वासो यथा मलिनं क्षारयुक्त्या ॥ ३०
पापं कृत्वा न मन्येत नाहमस्मीति पूरुषः ।
चिकीर्षेदेव कल्याणं श्रद्दधानोऽनसूयकः ॥ ३१
छिद्राणि वसनस्येव साधुना विवृणोति यः ।
यः पापं पुरुषः कृत्वा कल्याणमभिपद्यते ॥ ३२
यथादित्यः पुनरुद्यंस्तमः सर्वं व्यपोहति ।
कल्याणमाचरन्नेवं सर्वं पापं व्यपोहति ॥ ३३

भीष्म उवाच ।

एवमुक्त्वा स राजानमिन्द्रोतो जनमेजयम् ।
याजयामास विधिवद्वाजिमेधेन शौनकः ॥ ३४
ततः स राजा व्यपनीतकल्मषः
श्रिया युतः प्रज्वलिताग्निरूपया ।
विवेश राज्यं स्वममित्रकर्शनो
दिवं यथा पूर्णवपुर्निशाकरः ॥ ३५

इति श्रीमहाभारते शान्तिपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

१४९

भीष्म उवाच ।

शृणु पार्थ यथावृत्तमितिहासं पुरातनम् ।
गृध्रजम्बुकसंवादं यो वृत्तो वैदिशे पुरा ॥ १
दुःखिताः केचिदादाय बालमप्राप्तयौवनम् ।
कुलसर्वस्वभूतं वै रुदन्तः शोकविह्वलाः ॥ २
बालं मृतं गृहीत्वाथ श्मशानाभिमुखाः स्थिताः ।
अङ्केनाङ्कं च संक्रम्य रुरुदुर्भूतले तदा ॥ ३
तेषां रुदितशब्देन गृध्रोऽभ्येत्य वचोऽब्रवीत् ।
एकात्मकमिमं लोके त्यक्त्वा गच्छत माचिरम् ॥ ४
इह पुंसां सहस्राणि स्त्रीसहस्राणि चैव हि ।
समानीतानि कालेन किं ते वै जात्वबान्धवाः ॥ ५

संपश्यत जगत्सर्वं सुखदुःखैरधिष्ठितम् ।
संयोगो विप्रयोगश्च पर्यायेणोपलभ्यते ॥ ६
गृहीत्वा ये च गच्छन्ति येऽनुयान्ति च तान्मृतान् ।
तेऽप्यायुषः प्रमाणेन स्वेन गच्छन्ति जन्तवः ॥ ७
अलं स्थित्वा श्मशानेऽस्मिन्गृध्रगोमायुसंकुले ।
कङ्कालबहुले घोरे सर्वप्राणिभयंकरे ॥ ८
न पुनर्जीवितः कश्चित्कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ ९
सर्वेण खलु मर्तव्यं मर्त्यलोके प्रसूयता ।
कृतान्तविहिते मार्गे को मृतं जीवयिष्यति ॥ १०
कर्मान्तविहिते लोके चास्तं गच्छति भास्करे ।
गम्यतां स्वमधिष्ठानं सुतस्नेहं विसृज्य वै ॥ ११
ततो गृध्रवचः श्रुत्वा विक्रोशन्तस्तदा नृप ।
बान्धवास्तेऽभ्यगच्छन्त पुत्रमुत्सृज्य भूतले ॥ १२
विनिश्चित्याथ च ततः संत्यजन्तः स्वमात्मजम् ।
निराशा जीविते तस्य मार्गमारुह्य विष्ठिताः ॥ १३
ध्वाङ्क्षाभ्रसमवर्णस्तु बिलान्निःसृत्य जम्बुकः ।
गच्छमानान्स्म तानाह निर्घृणाः खलु मानवाः ॥१४
आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत मा भयम् ।
बहुरूपो मुहूर्तश्च जीवेतापि कदाचन ॥ १५
यूयं भूमौ विनिक्षिप्य पुत्रस्नेहविनाकृताः ।
श्मशाने पुत्रमुत्सृज्य कस्माद्गच्छथ निर्घृणाः ॥ १६
न वोऽस्त्यस्मिन्सुते स्नेहो बाले मधुरभाषिणि ।
यस्य भाषितमात्रेण प्रसादमुपगच्छथ ॥ १७
न पश्यथ सुतस्नेहं यादृशः पशुपक्षिणाम् ।
न येषां धारयित्वा तान्कश्चिदस्ति फलागमः ॥१८
चतुष्पात्पक्षिकीटानां प्राणिनां स्नेहसङ्गिनाम् ।
परलोकगतिस्थानां मुनियज्ञक्रिया इव ॥ १९
तेषां पुत्राभिरामाणामिह लोके परत्र च ।
न गुणो दृश्यते कश्चित्प्रजाः संधारयन्ति च ॥२०
अपश्यतां प्रियान्पुत्रान्नैषां शोकोऽनुतिष्ठति ।
न च पुष्णन्ति संवृद्धास्ते मातापितरौ क्वचित् ॥२१
मानुषाणां कुतः स्नेहो येषां शोको भविष्यति ।
इमं कुलकरं पुत्रं कथं त्यक्त्वा गमिष्यथ ॥ २२
चिरं मुञ्चत बाष्पं च चिरं स्नेहेन पश्यत ।
एवंविधानि हीष्टानि दुस्त्यजानि विशेषतः ॥ २३
क्षीणस्याथाभियुक्तस्य श्मशानाभिमुखस्य च ।
बान्धवा यत्र तिष्ठन्ति तत्रान्यो नावतिष्ठते ॥ २४
सर्वस्य दयिताः प्राणाः सर्वः स्नेहं च विन्दति ।
तिर्यग्योनिष्वपि सतां स्नेहं पश्यत यादृशम् ॥ २५
त्यक्त्वा कथं गच्छथेमं पद्मलोलायताक्षकम् ।
यथा नवोद्वाहकृतं स्नानमाल्यविभूषितम् ॥ २६

भीष्म उवाच ।

जम्बुकस्य वचः श्रुत्वा कृपणं परिदेवतः ।
न्यवर्तन्त तदा सर्वे शवार्थं ते स्म मानुषाः ॥ २७

गृध्र उवाच ।

अहो धिक्सुनृशंसेन जम्बुकेनाल्पमेधसा ।
क्षुद्रेणोक्ता हीनसत्त्वा मानुषाः किं निवर्तथ ॥ २८
पञ्चभूतपरित्यक्तं शून्यं काष्ठत्वमागतम् ।
कस्माच्छोचथ निश्चेष्टमात्मानं किं न शोचथ ॥२९
तपः कुरुत वै तीव्रं मुच्यध्वं येन किल्बिषात् ।
तपसा लभ्यते सर्वं विलापः किं करिष्यति ॥ ३०
अनिष्टानि च भाग्यानि जानीत सह मूर्तिभिः ।
येन गच्छति लोकोऽयं दत्त्वा शोकमनन्तकम् ॥३१
धनं गाश्च सुवर्णं च मणिरत्नमथापि च ।
अपत्यं च तपोमूलं तपोयोगाच्च लभ्यते ॥ ३२
यथाकृता च भूतेषु प्राप्यते सुखदुःखता ।
गृहीत्वा जायते जन्तुर्दुःखानि च सुखानि च ॥ ३३
न कर्मणा पितुः पुत्रः पिता वा पुत्रकर्मणा ।
मार्गेणान्येन गच्छन्ति त्यक्त्वा सुकृतदुष्कृते ॥ ३४

धर्मं चरत यत्नेन तथाधर्मान्निवर्तत ।
वर्तध्वं च यथाकालं दैवतेषु द्विजेषु च ॥ ३५
शोकं त्यजत दैन्यं च सुतस्नेहान्निवर्तत ।
त्यज्यतामयमाकाशे ततः शीघ्रं निवर्तत ॥ ३६
यत्करोति शुभं कर्म तथाधर्मं सुदारुणम् ।
तत्कर्तैव समश्नाति बान्धवानां किमत्र हि ॥ ३७
इह त्यक्त्वा न तिष्ठन्ति बान्धवा बान्धवं प्रियम् ।
स्नेहमुत्सृज्य गच्छन्ति बाष्पपूर्णाविलेक्षणाः ॥ ३८
प्राज्ञो वा यदि वा मूर्खः सधनो निर्धनोऽपि वा ।
सर्वः कालवशं याति शुभाशुभसमन्वितः ॥ ३९
किं करिष्यथ शोचित्वा मृतं किमनुशोचथ ।
सर्वस्य हि प्रभुः कालो धर्मतः समदर्शनः ॥ ४०
यौवनस्थांश्च बालांश्च वृद्धान्गर्भगतानपि ।
सर्वानाविशते मृत्युरेवंभूतमिदं जगत् ॥ ४१

जम्बुक उवाच ।

अहो मन्दीकृतः स्नेहो गृध्रेणेहाल्पमेधसा ।
पुत्रस्नेहाभिभूतानां युष्माकं शोचतां भृशम् ॥ ४२
समैः सम्यक्प्रयुक्तैश्च वचनैः प्रश्रयोत्तरैः ।
यद्गच्छथ जलस्थायं स्नेहमुत्सृज्य दुस्त्यजम् ॥ ४३
अहो पुत्रवियोगेन मृतशून्योपसेवनात् ।
क्रोशतां वै भृशं दुःखं विवत्सानां गवामिव ॥ ४४
अद्य शोकं विजानामि मानुषाणां महीतले ।
स्नेहं हि करुणं दृष्ट्वा ममाप्यश्रूण्यथागमन् ॥ ४५
यत्नो हि सततं कार्यः कृतो दैवेन सिध्यति ।
दैवं पुरुषकारश्च कृतान्तेनोपपद्यते ॥ ४६
अनिर्वेदः सदा कार्यो निर्वेदाद्धि कुतः सुखम् ।
प्रयत्नात्प्राप्यते ह्यर्थः कस्माद्गच्छथ निर्दयाः ॥ ४७
आत्ममांसोपवृत्तं च शरीरार्धमयीं तनुम् ।
पितॄणां वंशकर्तारं वने त्यक्त्वा क यास्यथ ॥ ४८
अथ वास्तं गते सूर्ये संध्याकाल उपस्थिते ।
ततो नेष्यथ वा पुत्रमिहस्था वा भविष्यथ ॥ ४९

गृध्र उवाच ।

अद्य वर्षसहस्रं मे साग्रं जातस्य मानुषाः ।
न च पश्यामि जीवन्तं मृतं स्त्रीपुंनपुंसकम् ॥ ५०
मृता गर्भेषु जायन्ते म्रियन्ते जातमात्रकाः ।
विक्रमन्तो म्रियन्ते च यौवनस्थास्तथापरे ॥ ५१
अनित्यानीह भाग्यानि चतुष्पात्पक्षिणामपि ।
जङ्गमाजङ्गमानां चाप्यायुरग्रेऽवतिष्ठते ॥ ५२
इष्टदारवियुक्ताश्च पुत्रशोकान्विताास्तथा ।
दह्यमानाः स्म शोकेन गृहं गच्छन्ति नित्यदा ॥५३
अनिष्टानां सहस्राणि तथेष्टानां शतानि च ।
उत्सृज्येह प्रयाता वै बान्धवा भृशदुःखिताः ॥ ५४
त्यज्यतामेष निस्तेजाः शून्यः काष्ठत्वमागतः ।
अन्यदेहविषक्तो हि शावं काष्ठमुपासते ॥ ५५
भ्रान्तजीवस्य वै बाष्पं कस्माद्धित्वा न गच्छथ ।
निरर्थको ह्ययं स्नेहो निरर्थश्च परिग्रहः ॥ ५६
न चक्षुर्भ्यां न कर्णाभ्यां संशृणोति समीक्षते ।
तस्मादेनं समुत्सृज्य स्वगृहान्गच्छताशु वै ॥ ५७
मोक्षधर्माश्रितैर्वाक्यैर्हेतुमद्भिरनिष्ठुरैः ।
मयोक्ता गच्छत क्षिप्रं स्वं स्वमेव निवेशनम् ॥५८
प्रज्ञाविज्ञानयुक्तेन बुद्धिसंज्ञाप्रदायिना ।
वचनं श्राविता रूक्षं मानुषाः संनिवर्तत ॥ ५९

जम्बुक उवाच ।

इमं कनकवर्णाभं भूषणैः समलंकृतम् ।
गृध्रवाक्यात्कथं पुत्रं त्यजध्वं पितृपिण्डदम् ॥ ६०
न स्नेहस्य विरोधोऽस्ति विलापरुदितस्य वै ।
मृतस्यास्य परित्यागात्तापो वो भविता ध्रुवम् ॥६१
श्रूयते शम्बुके शूद्रे हते ब्राह्मणदारकः ।
जीवितो धर्ममासाद्य रामात्सत्यपराक्रमात् ॥ ६२
तथा श्वेतस्य राजर्षेर्बालो दिष्टान्तमागतः ।

श्वोऽभूते धर्मनित्येन मृतः संजीवितः पुनः ॥ ६३
तथा कश्चिद्भवेत्सिद्धो मुनिर्वा देवतापि वा ।
कृपणानामनुक्रोशं कुर्याद्वो रुदतामिह ॥ ६४

भीष्म उवाच ।

इत्युक्ताः संन्यवर्तन्त शोकार्ताः पुत्रवत्सलाः ।
अङ्के शिरः समाधाय रुरुदुर्बहुविस्तरम् ॥ ६५

गृध्र उवाच ।

अश्रुपातपरिक्लिन्नः पाणिस्पर्शनपीडितः ।
धर्मराजप्रयोगाच्च दीर्घां निद्रां प्रवेशितः ॥ ६६
तपसापि हि संयुक्तो न काले नोपहन्यते ।
सर्वस्नेहावसानं तदिदं तत्प्रेतपत्तनम् ॥ ६७
बालवृद्धसहस्राणि सदा संत्यज्य बान्धवाः ।
दिनानि चैव रात्रीश्च दुःखं तिष्ठन्ति भूतले ॥ ६८
अलं निर्बन्धमागम्य शोकस्य परिवारणम् ।
अप्रत्ययं कुतो ह्यस्य पुनरद्येह जीवितम् ॥ ६९
नैष जम्बुकवाक्येन पुनः प्राप्स्यति जीवितम् ।
मृतस्योत्सृष्टदेहस्य पुनर्देहो न विद्यते ॥ ७०
न वै मूर्तिप्रदानेन न जम्बूकशतैरपि ।
शक्यो जीवयितुं ह्येष बालो वर्षशतैरपि ॥ ७१
अपि रुद्रः कुमारो वा ब्रह्मा वा विष्णुरेव वा ।
वरमस्मै प्रयच्छेयुस्ततो जीवेदयं शिशुः ॥ ७२
न च बाष्पविमोक्षेण न चाश्वासकृतेन वै ।
न दीर्घरुदितेनेह पुनर्जीवो भविष्यति ॥ ७३
अहं च क्रोष्टुकश्चैव यूयं चैवास्य बान्धवाः ।
धर्माधर्मौ गृहीत्वेह सर्वे वर्तामहेऽध्वनि ॥ ७४
अप्रियं परुषं चापि परद्रोहं परस्त्रियम् ।
अधर्ममनृतं चैव दूरात्प्राज्ञो निवर्तयेत् ॥ ७५
सत्यं धर्मं शुभं न्याय्यं प्राणिनां महतीं दयाम् ।
अजिह्मत्वमशाठ्यं च यत्नतः परिमार्गत ॥ ७६
मातरं पितरं चैव बान्धवान्सुहृदस्तथा ।
जीवतो ये न पश्यन्ति तेषां धर्मविपर्ययः ॥ ७७
यो न पश्यति चक्षुर्भ्यां नेङ्गते च कथंचन ।
तस्य निष्ठावसानान्ते रुदन्तः किं करिष्यथ ॥ ७८

भीष्म उवाच ।

इत्युक्तास्तं सुतं त्यक्त्वा भूमौ शोकपरिप्लुताः ।
दह्यमानाः सुतस्नेहात्प्रययुर्बान्धवा गृहान् ॥ ७९

जम्बुक उवाच ।

दारुणो मर्त्यलोकोऽयं सर्वप्राणिविनाशनः ।
इष्टबन्धुवियोगश्च तथैवाल्पं जीवितम् ॥ ८०
बह्वलीकमसत्यं च प्रतिवादाप्रियंवदम् ।
इमं प्रेक्ष्य पुनर्भावं दुःखशोकाभिवर्धनम् ॥ ८१
न मे मानुषलोकोऽयं मुहूर्तमपि रोचते ।
अहो धिग्गृध्रवाक्येन संनिवर्तथ मानुषाः ॥ ८२
प्रदीप्ताः पुत्रशोकेन यथैवाबुद्धयस्तथा ।
कथं गच्छथ सस्नेहाः सुतस्नेहं विसृज्य च ।
श्रुत्वा गृध्रस्य वचनं पापस्येहाकृतात्मनः ॥ ८३
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
सुखदुःखान्विते लोके नेहास्त्येकमनन्तकम् ॥ ८४
इमं क्षितितले न्यस्य बालं रूपसमन्वितम् ।
कुलशोकाकरं मूढाः पुत्रं त्यक्त्वा क्व यास्यथ ॥८५
रूपयौवनसंपन्नं द्योतमानमिव श्रिया ।
जीवन्तमेव पश्यामि मनसा नात्र संशयः ॥ ८६
विनाशश्चाप्यनर्होऽस्य सुखं प्राप्स्यथ मानुषाः ।
पुत्रशोकाग्निदग्धानां मृतमप्यद्य वः क्षमम् ॥ ८७
दुःखसंभावनां कृत्वा धारयित्वा स्वयं सुखम् ।
त्यक्त्वा गमिष्यथ क्वाद्य समुत्सृज्याल्पबुद्धिवत् ॥८८

भीष्म उवाच ।

तथा धर्मविरोधेन प्रियमिथ्याभिध्यायिना ।
श्मशानवासिना नित्यं रात्रिं मृगयता तदा ॥ ८९
ततो मध्यस्थतां नीता वचनैरमृतोपमैः ।

जम्बुकेन स्वकार्यार्थं बान्धवास्तस्य धिष्ठिताः ॥९०

गृध्र उवाच ।

अयं प्रेतसमाकीर्णो यक्षराक्षससेवितः ।
दारुणः काननोद्देशः कौशिकैरभिनादितः ॥ ९१
भीमः सुघोरश्च तथा नीलमेघसमप्रभः ।
अस्मिञ्शवं परित्यज्य प्रेतकार्याण्युपासत ॥ ९२
भानुर्यावन्न यात्यस्तं यावच्च विमला दिशः ।
तावदेनं परित्यज्य प्रेतकार्याण्युपासत ॥ ९३
नदन्ति परुषं श्येनाः शिवाः क्रोशन्ति दारुणाः ।
मृगेन्द्राः प्रतिनन्दन्ति रविरस्तं च गच्छति ॥ ९४
चिताधूमेन नीलेन संरज्यन्ते च पादपाः ।
श्मशाने च निराहाराः प्रतिनन्दन्ति देहिनः ॥ ९५
सर्वे विक्रान्तवीर्याश्च अस्मिन्देशे सुदारुणाः ।
युष्मान्प्रधर्षयिष्यन्ति विकृता मांसभोजनाः ॥ ९६
क्रूराश्चायं वनोद्देशो भयमत्र भविष्यति ।
त्यजतां काष्ठभूतोऽयं मृष्यतां जाम्बुकं वचः ॥९७
यदि जम्बुकवाक्यानि निष्फलान्यनृतानि च ।
श्रोष्यथ भ्रष्टविज्ञानास्ततः सर्वे विनङ्क्ष्यथ ॥ ९८

जम्बुक उवाच ।

स्थीयतां नेह भेतव्यं यावत्तपति भास्करः ।
यावदस्मिन्सुतस्नेहादनिर्वेदेन वर्तत ॥ ९९
स्वैरं रुदत विस्रब्धाः स्वैरं स्नेहेन पश्यत ।
स्थीयतां यावदादित्यः किं वः क्रव्यादभाषितैः॥१००
यदि गृध्रस्य वाक्यानि तीव्राणि रभसानि च ।
गृह्णीत मोहितात्मानः सुतो वो न भविष्यति ॥१०१

भीष्म उवाच ।

गृध्रोऽनस्तमिते त्वाह गतेऽस्तमिति जम्बुकः ।
मृतस्य तं परिजनमूचतुस्तौ क्षुधान्वितौ ॥ १०२
स्वकार्यदक्षिणौ राजन्गृध्रो जम्बुक एव च ।
क्षुत्पिपासापरिश्रान्तौ शास्त्रमालम्ब्य जल्पतः ॥१०३
तयोर्विज्ञानविदुषोर्द्वयोर्जम्बुकपत्रिणोः ।
वाक्यैरमृतकल्पैर्हि प्रातिष्ठन्त व्रजन्ति च ॥ १०४
शोकदैन्यसमाविष्टा रुदन्तस्तस्थिरे तदा ।
स्वकार्यकुशलाभ्यां ते संभ्राम्यन्ते ह नैपुणात् ॥१०५
तथा तयोर्विवदतोर्विज्ञानविदुषोर्द्वयोः ।
बान्धवानां स्थितानां च उपातिष्ठत शंकरः ॥१०६
ततस्तानाह मनुजान्वरदोऽस्मीति शूलभृत् ।
ते प्रत्यूचुरिदं वाक्यं दुःखिताः प्रणताः स्थिताः ॥
एकपुत्रविहीनानां सर्वेषां जीवितार्थिनाम् ।
पुत्रस्य नो जीवदानाज्जीवितं दातुमर्हसि ॥ १०८
एवमुक्तः स भगवान्वारिपूर्णेन पाणिना ।
जीवं तस्मै कुमाराय प्रादाद्वर्षशताय वै ॥ १०९
तथा गोमायुगृध्राभ्यामददत्क्षुद्विनाशनम् ।
वरं पिनाकी भगवान्सर्वभूतहिते रतः ॥ ११०
ततः प्रणम्य तं देवं श्रेयोहर्षसमन्विताः ।
कृतकृत्याः सुखं हृष्टाः प्रातिष्ठन्त तदा विभो ॥१११
अनिर्वेदेन दीर्घेण निश्चयेन ध्रुवेण च ।
देवदेवप्रसादाच्च क्षिप्रं फलमवाप्यते ॥ ११२
पश्य दैवस्य संयोगं बान्धवानां च निश्चयम् ।
कृपणानां हि रुदतां कृतमश्रुप्रमार्जनम् ॥ ११३
पश्य चाल्पेन कालेन निश्चयान्वेषणेन च ।
प्रसादं शंकरात्प्राप्य दुःखिताः सुखमाप्नुवन् ॥ ११४
ते विस्मिताः प्रहृष्टाश्च पुत्रसंजीवनात्पुनः ।
बभूवुर्भरतश्रेष्ठ प्रसादाच्छंकरस्य वै ॥ ११५
ततस्ते त्वरिता राजञ्श्रुत्वा शोकमथोद्भवम् ।
विविशुः पुत्रमादाय नगरं हृष्टमानसाः ।
एषा बुद्धिः समस्तानां चातुर्वर्ण्ये निदर्शिता ॥११६
धर्मार्थमोक्षसंयुक्तमितिहासमिमं शुभम् ।

श्रुत्वा मनुष्यः सततमिह प्रेत्य च मोदते ॥११७

इति श्रीमहाभारते शान्तिपर्वणि
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं भरतश्रेष्ठ शल्मलेः पवनस्य च ॥ १
हिमवन्तं समासाद्य महानासीद्वनस्पतिः ।
वर्षपूगाभिसंवृद्धः शाखास्कन्धपलाशवान् ॥ २
तत्र स्म मत्ता मातङ्गा धर्मार्ताः श्रमकर्शिताः ।
विश्रमन्ति महाबाहो तथान्या मृगजातयः ॥ ३
नल्वमात्रपरीणाहो घनच्छायो वनस्पतिः ।
शुकशारिकसंघुष्टः फलवान्पुष्पवानपि ॥ ४
सार्थिका वणिजश्चापि तापसाश्च वनौकसः ।
वसन्ति वासान्मार्गस्थाः सुरम्ये तरुसत्तमे ॥ ५
तस्य ता विपुलाः शाखा दृष्ट्वा स्कन्धांश्च सर्वतः ।
अभिगम्याब्रवीदेनं नारदो भरतर्षभ ॥ ६
अहो नु रमणीयस्त्वमहो चासि मनोरमः ।
प्रीयामहे त्वया नित्यं तरुप्रवर शल्मले ॥ ७
सदैव शकुनास्तात मृगाश्चाधस्तथा गजाः ।
वसन्ति तव संहृष्टा मनोहरतरास्तथा ॥ ८
तव शाखा महाशाख स्कन्धं च विपुलं तथा ।
न वै प्रभग्नान्पश्यामि मारुतेन कथंचन ॥ ९
किं नु ते मारुतस्तात प्रीतिमानथ वा सुहृत् ।
त्वां रक्षति सदा येन वनेऽस्मिन्पवनो ध्रुवम् ॥१०
विवान्हि पवनः स्थानाद्वृक्षानुच्चावचानपि ।
पर्वतानां च शिखराण्याचालयति वेगवान् ॥ ११
शोषयत्येव पातालं विवान्गन्धवहः शुचिः ।
ह्रदांश्च सरितश्चैव सागरांश्च तथैव ह ॥ १२
त्वां संरक्षेत पवनः सखित्वेन न संशयः ।
तस्माद्बहुलशाखोऽसि पर्णवान्पुष्पवानपि ॥ १३
इदं च रमणीयं ते प्रतिभाति वनस्पते ।
यदिमे विहगास्तात रमन्ते मुदितास्त्वयि ॥ १४
एषां पृथक्समस्तानां श्रूयते मधुरः स्वरः ।
पुष्पसंमोदने काले वाशतां सुमनोहरम् ॥ १५
तथेमे मुदिता नागाः स्वयूथकुलशोभिनः ।
धर्मार्तास्त्वां समासाद्य सुखं विन्दन्ति शल्मले ॥१६
तथैव मृगजातीभिरन्याभिरुपशोभसे ।
तथा सार्थाधिवासैश्च शोभसे मेरुवद्द्रुम ॥ १७
ब्राह्मणैश्च तपःसिद्धैस्तापसैः श्रमणैरपि ।
त्रिविष्टपसमं मन्ये तवायतनमेव ह ॥ १८
बन्धुत्वादथ वा सख्याच्छल्मले नात्र संशयः ।
पालयत्येव सततं भीमः सर्वत्रगोऽनिलः ॥ १९
न्यग्भावं परमं वायोः शल्मले त्वमुपागतः ।
तवाहमस्मीति सदा येन रक्षति मारुतः ॥ २०
न तं पश्याम्यहं वृक्षं पर्वतं वापि तं दृढम् ।
यो न वायुबलाद्भग्नः पृथिव्यामिति मे मतिः ॥२१
त्वं पुनः कारणैर्नूनं शल्मले रक्ष्यसे सदा ।
वायुना सपरीवारस्तेन तिष्ठस्यसंशयम् ॥ २२

शल्मलिरुवाच ।

न मे वायुः सखा ब्रह्मन्न बन्धुर्न च मे सुहृत् ।
परमेष्ठी तथा नैव येन रक्षति मानिलः ॥ २३
मम तेजोबलं वायोर्भीममपि हि नारद ।
कलामष्टादशीं प्राणैर्न मे प्राप्नोति मारुतः ॥ २४
आगच्छन्परमो वायुर्मया विष्टम्भितो बलात् ।
रुजन्द्रुमान्पर्वतांश्च यच्चान्यदपि किंचन ॥ २५
स मया बहुशो भग्नः प्रभञ्जन्वै प्रभञ्जनः ।
तस्मान्न बिभ्ये देवर्षे क्रुद्धादपि समीरणात् ॥ २६

नारद उवाच ।

शल्मले विपरीतं ते दर्शनं नात्र संशयः ।

न हि वायोर्बलेनास्ति भूतं तुल्यबलं क्वचित् ॥ २७
इन्द्रो यमो वैश्रवणो वरुणश्च जलेश्वरः ।
न तेऽपि तुल्या मरुतः किं पुनस्त्वं वनस्पते ॥ २८
यद्धि किंचिदिह प्राणि शल्मले चेष्टते भुवि ।
सर्वत्र भगवान्वायुश्चेष्टाप्राणकरः प्रभुः ॥ २९
एष चेष्टयते सम्यक्प्राणिनः सम्यगायतः ।
असम्यगायतो भूयश्चेष्टते विकृतो नृषु ॥ ३०
स त्वमेवंविधं वायुं सर्वसत्त्वभृतां वरम् ।
न पूजयसि पूज्यं तं किमन्यद्बुद्धिलाघवात् ॥ ३१
असारश्चासि दुर्बुद्धे केवलं बहु भाषसे ।
क्रोधादिभिरवच्छन्नो मिथ्या वदसि शल्मले ॥ ३२
मम रोषः समुत्पन्नस्त्वय्येवं संप्रभाषति ।
ब्रवीम्येष स्वयं वायोस्तव दुर्भाषितं बहु ॥ ३३
चन्दनैः स्पन्दनैः शालैः सरलैर्देवदारुभिः ।
वेतसैर्धन्वनैश्चापि ये चान्ये बलवत्तराः ॥ ३४
तैश्चापि नैवं दुर्बुद्धे क्षिप्तो वायुः कृतात्मभिः ।
ते हि जानन्ति वायोश्च बलमात्मन एव च ॥ ३५
तस्मात्ते वै नमस्यन्ति श्वसनं द्रुमसत्तमाः ।
त्वं तु मोहान्न जानीषे वायोर्बलमनन्तकम् ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

भीष्म उवाच ।

एवमुक्त्वा तु राजेन्द्र शल्मलिं ब्रह्मवित्तमः ।
नारदः पवने सर्वं शल्मलेर्वाक्यमब्रवीत् ॥ १
हिमवत्पृष्ठजः कश्चिच्छल्मलिः परिवारवान् ।
बृहन्मूलो बृहच्छाखः स त्वां वायोऽवमन्यते ॥ २
बह्न्याक्षेपयुक्तानि त्वामाह वचनानि सः ।
न युक्तानि मया वायो तानि वक्तुं त्वयि प्रभो ॥ ३
जानामि त्वामहं वायो सर्वप्राणभृतां वरम् ।
वरिष्ठं च गरिष्ठं च क्रोधे वैवस्वतं यथा ॥ ४
एवं तु वचनं श्रुत्वा नारदस्य समीरणः ।
शल्मलिं तमुपागम्य क्रुद्धो वचनमब्रवीत् ॥ ५
शल्मले नारदे यत्तत्त्वयोक्तं मद्विगर्हणम् ।
अहं वायुः प्रभावं ते दर्शयाम्यात्मनो बलम् ॥ ६
नाहं त्वा नाभिजानामि विदितश्चासि मे द्रुम ।
पितामहः प्रजासर्गे त्वयि विश्रान्तवान्प्रभुः ॥ ७
तस्य विश्रमणादेव प्रसादो यः कृतस्तव ।
रक्ष्यसे तेन दुर्बुद्धे नात्मवीर्याद्द्रुमाधम ॥ ८
यन्मा त्वमवजानीषे यथान्यं प्राकृतं तथा ।
दर्शयाम्येष आत्मानं यथा मामवभोत्स्यसे ॥ ९
एवमुक्तस्ततः प्राह शल्मलिः प्रहसन्निव ।
पवन त्वं वने क्रुद्धो दर्शयात्मानमात्मना ॥ १०
मयि वै त्यज्यतां क्रोधः किं मे क्रुद्धः करिष्यसि ।
न ते बिभेमि पवन यद्यपि त्वं स्वयंप्रभुः ॥ ११
इत्येवमुक्तः पवनः श्व इत्येवाब्रवीद्वचः ।
दर्शयिष्यामि ते तेजस्ततो रात्रिरुपागमत् ॥ १२
अथ निश्चित्य मनसा शल्मलिर्वातकारितम् ।
पश्यमानस्तदात्मानमसमं मातरिश्वनः ॥ १३
नारदे यन्मया प्रोक्तं पवनं प्रति तन्मृषा ।
असमर्थो ह्यहं वायोर्बलेन बलवान्हि सः ॥ १४
मारुतो बलवान्नित्यं यथैनं नारदोऽब्रवीत् ।
अहं हि दुर्बलोऽन्येभ्यो वृक्षेभ्यो नात्र संशयः ॥ १५
किं तु बुद्ध्या समो नास्ति मम कश्चिद्वनस्पतिः ।
तदहं बुद्धिमास्थाय भयं मोक्ष्ये समीरणात् ॥ १६
यदि तां बुद्धिमास्थाय चरेयुः पर्णिनो वने ।
अरिष्टाः स्युः सदा क्रुद्धात्पवनान्नात्र संशयः ॥ १७
तेऽत्र बाला न जानन्ति यथा नैनान्समीरणः ।
समीरयेत संक्रुद्धो यथा जानाम्यहं तथा ॥ १८
ततो निश्चित्य मनसा शल्मलिः क्षुभितस्तदा ।

शाखाः स्कन्धान्प्रशाखाश्च स्वयमेव व्यशातयत् ॥ १९
स परित्यज्य शाखाश्च पत्राणि कुसुमानि च ।
प्रभाते वायुमायान्तं प्रत्यैक्षत वनस्पतिः ॥ २०
ततः क्रुद्धः श्वसन्वायुः पातयन्वै महाद्रुमान् ।
आजगामाथ तं देशं स्थितो यत्र स शल्मलिः ॥ २१
तं हीनपर्णं पतिताग्रशाखं
विशीर्णपुष्पं प्रसमीक्ष्य वायुः ।
उवाच वाक्यं स्मयमान एनं
मुदा युतं शल्मलिं रुग्णशाखम् ॥ २२
अहमप्येवमेव त्वां कुर्वाणः शल्मले रुषा ।
आत्मना यत्कृतं कृत्स्नं शाखानामपकर्षणम् ॥ २३
हीनपुष्पाग्रशाखस्त्वं शीर्णाङ्कुरपलाशवान् ।
आत्मदुर्मन्त्रितेनेह मद्वीर्यवशगोऽभवः ॥ २४
एतच्छ्रुत्वा वचो वायोः शल्मलिर्व्रीडितस्तदा ।
अतप्यत वचः स्मृत्वा नारदो यत्तदाब्रवीत् ॥ २५
एवं यो राजशार्दूल दुर्बलः सन्बलीयसा ।
वैरमासज्जते बालस्तप्यते शल्मलिर्यथा ॥ २६
तस्माद्वैरं न कुर्वीत दुर्बलो बलवत्तरैः ।
शोचेद्धि वैरं कुर्वाणो यथा वै शल्मलिस्तथा ॥ २७
न हि वैरं महात्मानो विवृण्वन्त्यपकारिषु ।
शनैः शनैर्महाराज दर्शयन्ति स्म ते बलम् ॥ २८
वैरं न कुर्वीत नरो दुर्बुद्धिर्बुद्धिजीविना ।
बुद्धिर्बुद्धिमतो याति तूलेष्विव हुताशनः ॥ २९
न हि बुद्ध्या समं किंचिद्विद्यते पुरुषे नृप ।
तथा बलेन राजेन्द्र न समोऽस्तीति चिन्तयेत् ॥ ३०
तस्मात्क्षमेत बालाय जडाय बधिराय च ।
बलाधिकाय राजेन्द्र तद्दृष्टं त्वयि शत्रुहन् ॥ ३१
अक्षौहिण्यो दशैका च सप्त चैव महाद्युते ।
बलेन न समा राजन्नर्जुनस्य महात्मनः ॥ ३२
हतास्ताश्चैव भग्नाश्च पाण्डवेन यशस्विना ।
चरता बलमास्थाय पाकशासनिना मृधे ॥ ३३
उक्तास्ते राजधर्माश्च आपद्धर्माश्च भारत ।
विस्तरेण महाराज किं भूयः प्रब्रवीमि ते ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

युधिष्ठिर उवाच ।

पापस्य यदधिष्ठानं यतः पापं प्रवर्तते ।
एतदिच्छाम्यहं ज्ञातुं तत्त्वेन भरतर्षभ ॥ १

भीष्म उवाच ।

पापस्य यदधिष्ठानं तच्छृणुष्व नराधिप ।
एको लोभो महाग्राहो लोभात्पापं प्रवर्तते ॥ २
अतः पापमधर्मश्च तथा दुःखमनुत्तमम् ।
निकृत्या मूलमेतद्धि येन पापकृतो जनाः ॥ ३
लोभात्क्रोधः प्रभवति लोभात्कामः प्रवर्तते ।
लोभान्मोहश्च माया च मानस्तम्भः परासुता ॥ ४
अक्षमा ह्रीपरित्यागः श्रीनाशो धर्मसंक्षयः ।
अभिध्याप्रज्ञता चैव सर्वं लोभात्प्रवर्तते ॥ ५
अन्यायश्चावितर्कश्च विकर्मसु च याः क्रियाः ।
कूटविद्यादयश्चैव रूपैश्वर्यमदस्तथा ॥ ६
सर्वभूतेष्वविश्वासः सर्वभूतेष्वनार्जवम् ।
सर्वभूतेष्वभिद्रोहः सर्वभूतेष्वयुक्तता ।
हरणं परवित्तानां परदाराभिमर्शनम् ॥ ७
वाग्वेगो मानसो वेगो निन्दावेगस्तथैव च ।
उपस्थोदरयोर्वेगो मृत्युवेगश्च दारुणः ॥ ८
ईर्ष्यावेगश्च बलवान्मिथ्यावेगश्च दुस्त्यजः ।
रसवेगश्च दुर्वारः श्रोत्रवेगश्च दुःसहः ॥ ९
कुत्सा विकत्था मात्सर्यं पापं दुष्करकारिता ।
साहसानां च सर्वेषामकार्याणां क्रियास्तथा ॥ १०
जातौ बाल्येऽथ कौमारे यौवने चापि मानवः ।

न संत्यजत्यात्मकर्म यन्न जीर्यति जीर्यतः ॥ ११
यो न पूरयितुं शक्यो लोभः प्राप्त्या कुरूद्वह ।
नित्यं गम्भीरतोयाभिरापगाभिरिवोदधिः ।
न प्रहृष्यति लाभैर्यो यश्च कामैर्न तृप्यति ॥ १२
यो न देवैर्न गन्धर्वैर्नासुरैर्न महोरगैः ।
ज्ञायते नृप तत्त्वेन सर्वैर्भूतगणैस्तथा ।
स लोभः सह मोहेन विजेतव्यो जितात्मना ॥१३
दम्भो द्रोहश्च निन्दा च पैशुन्यं मत्सरस्तथा ।
भवन्त्येतानि कौरव्य लुब्धानामकृतात्मनाम् ॥ १४
सुमहान्त्यपि शास्त्राणि धारयन्ति बहुश्रुताः ।
छेत्तारः संशयानां च क्लिश्यन्तीहाल्पबुद्धयः ॥१५
द्वेषक्रोधप्रसक्ताश्च शिष्टाचारबहिष्कृताः ।
अन्तःक्षुरा वाङ्मधुराः कूपाश्छन्नास्तृणैरिव ।
धर्मवैतंसिकाः क्षुद्रा मुष्णन्ति ध्वजिनो जगत् ॥१६
कुर्वते च बहून्मार्गांस्तांस्तान्हेतुबलाश्रिताः ।
सर्वं मार्गं विलुम्पन्ति लोभाज्ञानेषु निष्ठिताः ॥१७
धर्मस्याह्रियमाणस्य लोभग्रस्तैर्दुरात्मभिः ।
या या विक्रियते संस्था ततः साभिप्रपद्यते ॥ १८
दर्पः क्रोधो मदः स्वप्नो हर्षः शोकोऽतिमानिता ।
तत एव हि कौरव्य दृश्यन्ते लुब्धबुद्धिषु ।
एतानशिष्टान्बुध्यस्व नित्यं लोभसमन्वितान् ॥ १९
शिष्टांस्तु परिपृच्छेथा यान्वक्ष्यामि शुचिव्रतान् ।
येषु वृत्तिभयं नास्ति परलोकभयं न च ॥ २०
नामिषेषु प्रसङ्गोऽस्ति न प्रियेष्वप्रियेषु च ।
शिष्टाचारः प्रियो येषु दमो येषु प्रतिष्ठितः ॥ २१
सुखं दुःखं परं येषां सत्यं येषां परायणम् ।
दातारो न गृहीतारो दयावन्तस्तथैव च ॥ २२
पितृदेवातिथेयाश्च नित्योद्युक्तास्तथैव च ।
सर्वोपकारिणो धीराः सर्वधर्मानुपालकाः ॥ २३
सर्वभूतहिताश्चैव सर्वदेयाश्च भारत ।
न ते चालयितुं शक्या धर्मव्यापारपारगाः ॥ २४
न तेषां भिद्यते वृत्तं यत्पुरा साधुभिः कृतम् ।
न त्रासिनो न चपला न रौद्राः सत्पथे स्थिताः ॥ २५
ते सेव्याः साधुभिर्नित्यं येष्वहिंसा प्रतिष्ठिता ।
कामक्रोधव्यपेता ये निर्ममा निरहंकृताः ।
सुव्रताः स्थिरमर्यादास्तानुपास्स्व च पृच्छ च ॥२६
न गवार्थं यशोर्थं वा धर्मस्तेषां युधिष्ठिर ।
अवश्यकार्य इत्येव शरीरस्य क्रियास्तथा ॥ २७
न भयं क्रोधचापल्यं न शोकस्तेषु विद्यते ।
न धर्मध्वजिनश्चैव न गुह्यं किंचिदास्थिताः ॥ २८
येष्वलोभस्तथामोहो ये च सत्यार्जवे रताः ।
तेषु कौन्तेय रज्येथा येष्वतन्द्रीकृतं मनः ॥ २९
ये न हृष्यन्ति लाभेषु नालाभेषु व्यथन्ति च ।
निर्ममा निरहंकाराः सत्त्वस्थाः समदर्शिनः ॥ ३०

लाभालाभौ सुखदुःखे च तात
प्रियाप्रिये मरणं जीवितं च ।
समानि येषां स्थिरविक्रमाणां
बुद्धात्मनां सत्त्वमवस्थितानाम् ॥ ३१
सुखप्रियैस्तान्सुमहाप्रतापा-
न्यत्तोऽप्रमत्तश्च समर्थयेथाः ।
दैवात्सर्वे गुणवन्तो भवन्ति
शुभाशुभा वाक्प्रलापा यथैव ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

१५३

युधिष्ठिर उवाच ।

अनर्थानामधिष्ठानमुक्तो लोभः पितामह ।
अज्ञानमपि वै तात श्रोतुमिच्छामि तत्त्वतः ॥ १

भीष्म उवाच ।

करोति पापं योऽज्ञानान्नात्मनो वेत्ति च क्षमम् ।

प्रद्वेष्टि साधुवृत्तांश्च स लोकस्यैति वाच्यताम् ॥ २
अज्ञानान्निरयं याति तथाज्ञानेन दुर्गतिम् ।
अज्ञानात्क्लेशमाप्नोति तथापत्सु निमज्जति ॥ ३

युधिष्ठिर उवाच ।

अज्ञानस्य प्रवृत्तिं च स्थानं वृद्धिं क्षयोदयौ ।
मूलं योगं गतिं कालं कारणं हेतुमेव च ॥ ४
श्रोतुमिच्छामि तत्त्वेन यथावदिह पार्थिव ।
अज्ञानप्रभवं हीदं यद्दुःखमुपलभ्यते ॥ ५

भीष्म उवाच ।

रागो द्वेषस्तथा मोहो हर्षः शोकोऽभिमानिता ।
कामः क्रोधश्च दर्पश्च तन्द्रीरालस्यमेव च ॥ ६
इच्छा द्वेषस्तथा तापः परवृद्ध्युपतापिता ।
अज्ञानमेतन्निर्दिष्टं पापानां चैव याः क्रियाः ॥ ७
एतया या प्रवृत्तिश्च वृद्ध्यादीन्यांश्च पृच्छसि ।
विस्तरेण महाबाहो शृणु तच्च विशां पते ॥ ८
उभावेतौ समफलौ समदोषौ च भारत ।
अज्ञानं चातिलोभश्चाप्येकं जानीहि पार्थिव ॥ ९
लोभप्रभवमज्ञानं वृद्धं भूयः प्रवर्धते ।
स्थाने स्थानं क्षये क्षैण्यमुपैति विविधां गतिम् ॥१०
मूलं लोभस्य महतः कालात्मगतिरेव च ।
छिन्नेऽच्छिन्ने तथा लोभे कारणं काल एव हि ॥११
तस्याज्ञानात्तु लोभो हि लोभादज्ञानमेव च ।
सर्वे दोषास्तथा लोभात्तस्माल्लोभं विवर्जयेत् ॥१२
जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित् ।
लोभक्षयाद्दिवं प्राप्तास्तथैवान्ये जनाधिपाः ॥ १३
प्रत्यक्षं तु कुरुश्रेष्ठ त्यज लोभमिहात्मना ।
त्यक्त्वा लोभं सुखं लोके प्रेत्य चानुचरिष्यसि ॥१४

इति श्रीमहाभारते शान्तिपर्वणि
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

युधिष्ठिर उवाच ।

स्वाध्यायकृतयत्नस्य ब्राह्मणस्य पितामह ।
धर्मकामस्य धर्मात्मन्किं नु श्रेय इहोच्यते ॥ १
बहुधादर्शने लोके श्रेयो यदिह मन्यसे ।
अस्मिँल्लोके परे चैव तन्मे ब्रूहि पितामह ॥ २
महानयं धर्मपथो बहुशाखश्च भारत ।
किं स्विदेवेह धर्माणामनुष्ठेयतमं मतम् ॥ ३
धर्मस्य महतो राजन्बहुशाखस्य तत्त्वतः ।
यन्मूलं परमं तात तत्सर्वं ब्रूह्यतन्द्रितः ॥ ४

भीष्म उवाच ।

हन्त ते कथयिष्यामि येन श्रेयः प्रपत्स्यसे ।
पीत्वामृतमिव प्राज्ञो ज्ञानतृप्तो भविष्यसि ॥ ५
धर्मस्य विधयो नैके ते ते प्रोक्ता महर्षिभिः ।
स्वं स्वं विज्ञानमाश्रित्य दमस्तेषां परायणम् ॥ ६
दमं निःश्रेयसं प्राहुर्वृद्धा निश्चयदर्शिनः ।
ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ॥ ७
नादान्तस्य क्रियासिद्धिर्यथावदुपलभ्यते ।
दमो दानं तथा यज्ञानधीतं चातिवर्तते ॥ ८
दमस्तेजो वर्धयति पवित्रं च दमः परम् ।
विपाप्मा तेजसा युक्तः पुरुषो विन्दते महत् ॥ ९
दमेन सदृशं धर्मं नान्यं लोकेषु शुश्रुम ।
दमो हि परमो लोके प्रशस्तः सर्मधर्मिणाम् ॥१०
प्रेत्य चापि मनुष्येन्द्र परमं विन्दते सुखम् ।
दमेन हि समायुक्तो महान्तं धर्ममश्नुते ॥ ११
सुखं दान्तः प्रस्वपिति सुखं च प्रतिबुध्यते ।
सुखं पर्येति लोकांश्च मनश्चास्य प्रसीदति ॥ १२
अदान्तः पुरुषः क्लेशमभीक्ष्णं प्रतिपद्यते ।
अनर्थांश्च बहूनन्यान्प्रसृजत्यात्मदोषजान् ॥ १३
आश्रमेषु चतुर्ष्वाहुर्दममेवोत्तमं व्रतम् ।

तस्य लिङ्गानि वक्ष्यामि येषां समुदयो दमः ॥१४
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
इन्द्रियावजयो दाक्ष्यं मार्दवं ह्रीरचापलम् ॥ १५
अकार्पण्यमसंरम्भः संतोषः प्रियवादिता ।
अविविित्सानसूया चाप्येषां समुदयो दमः ॥ १६
गुरुपूजा च कौरव्य दया भूतेष्वपैशुनम् ।
जनवादोऽमृषावादः स्तुतिनिन्दाविवर्जनम् ॥ १७
कामः क्रोधश्च लोभश्च दर्पः स्तम्भो विकत्थनम् ।
मोह ईर्ष्यावमानश्चेत्येतद्दान्तो न सेवते ॥ १८
अनिन्दितो ह्यकामात्माथाल्पेच्छोऽथानसूयकः ।
समुद्रकल्पः स नरो न कदाचन पूर्यते ॥ १९
अहं त्वयि मम त्वं च मयि ते तेषु चाप्यहम् ।
पूर्वसंबन्धिसंयोगान्नैतद्दान्तो निषेवते ॥ २०
सर्वा ग्राम्यास्तथारण्या याश्च लोके प्रवृत्तयः ।
निन्दां चैव प्रशंसां च यो नाश्रयति मुच्यते ॥२१
मैत्रोऽथ शीलसंपन्नः सुसहायपरश्च यः ।
मुक्तश्च विविधैः सङ्गैस्तस्य प्रेत्य महत्फलम् ॥ २२
सुवृत्तः शीलसंपन्नः प्रसन्नात्मात्मविद्बुधः ।
प्राप्येह लोके सत्कारं सुगतिं प्रतिपद्यते ॥ २३
कर्म यच्छुभमेवेह सद्भिराचरितं च यत् ।
तदेव ज्ञानयुक्तस्य मुनेर्धर्मो न हीयते ॥ २४
निष्क्रम्य वनमास्थाय ज्ञानयुक्तो जितेन्द्रियः ।
कालाकाङ्क्षी चरन्नेवं ब्रह्मभूयाय कल्पते ॥ २५
अभयं यस्य भूतेभ्यो भूतानामभयं यतः ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥ २६
अवाचिनोति कर्माणि न च संप्रचिनोति ह ।
समः सर्वेषु भूतेषु मैत्रायणगतिश्चरेत् ॥ २७
शकुनीनामिवाकाशे जले वारिचरस्य वा ।
यथा गतिर्न दृश्येत तथा तस्य न संशयः ॥ २८
गृहानुत्सृज्य यो राजन्मोक्षमेवाभिपद्यते ।
लोकास्तेजोमयास्तस्य कल्पन्ते शाश्वतीः समाः ॥२९
संन्यस्य सर्वकर्माणि संन्यस्य विधिवत्तपः ।
संन्यस्य विविधा विद्याः सर्वं संन्यस्य चैव ह ॥३०
कामेषु चाप्यनावृत्तः प्रसन्नात्मात्मविच्छुचिः ।
प्राप्येह लोके सत्कारं स्वर्गं समभिपद्यते ॥ ३१
यच्च पैतामहं स्थानं ब्रह्मराशिसमुद्भवम् ।
गुहायां पिहितं नित्यं तद्दमेनाभिपद्यते ॥ ३२
ज्ञानारामस्य बुद्धस्य सर्वभूताविरोधिनः ।
नावृत्तिभयमस्तीह परलोके भयं कुतः ॥ ३३
एक एव दमे दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ३४
एतस्य तु महाप्राज्ञ दोषस्य सुमहान्गुणः ।
क्षमायां विपुला लोकाः सुलभा हि सहिष्णुना ॥
दान्तस्य किमरण्येन तथादान्तस्य भारत ।
यत्रैव हि वसेद्दान्तस्तदरण्यं स आश्रमः ॥ ३६

वैशंपायन उवाच ।

एतद्भीष्मस्य वचनं श्रुत्वा राजा युधिष्ठिरः ।
अमृतेनेव संतृप्तः प्रहृष्टः समपद्यत ॥ ३७
पुनश्च परिपप्रच्छ भीष्मं धर्मभृतां वरम् ।
तपः प्रति स चोवाच तस्मै सर्वं कुरूद्वह ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

१५५

भीष्म उवाच ।

सर्वमेतत्तपोमूलं कवयः परिचक्षते ।
न ह्यतप्ततपा मूढः क्रियाफलमवाप्यते ॥१
प्रजापतिरिदं सर्वं तपसैवासृजत्प्रभुः ।
तथैव वेदानृषयस्तपसा प्रतिपेदिरे ॥ २
तपसो ह्यानुपूर्व्येण फलमूलानिलाशनाः ।
त्रीँल्लोकांस्तपसा सिद्धाः पश्यन्ति सुसमाहिताः ॥३

औषधान्यगदादीनि तिस्रो विद्याश्च संस्कृताः ।
तपसैव हि सिध्यन्ति तपो मूलं हि साधनम् ॥ ४
यद्दुरापं दुराम्नायं दुराधर्षं दुरुत्सहम् ।
सर्वं तत्तपसा शक्यं तपो हि दुरतिक्रमम् ॥ ५
सुरापोऽसंमतादायी भ्रूणहा गुरुतल्पगः ।
तपसैव सुतप्तेन नरः पापाद्विमुच्यते ॥ ६
तपसो बहुरूपस्य तैस्तैर्द्वारैः प्रवर्ततः ।
निवृत्त्या वर्तमानस्य तपो नानशनात्परम् ॥ ७
अहिंसा सत्यवचनं दानमिन्द्रियनिग्रहः ।
एतेभ्यो हि महाराज तपो नानशनात्परम् ॥ ८
न दुष्करतरं दानान्नातिमातरमाश्रमः ।
त्रैविद्येभ्यः परं नास्ति संन्यासः परमं तपः ॥ ९
इन्द्रियाणीह रक्षन्ति धनधान्याभिगुप्तये ।
तस्मादर्थे च धर्मे च तपो नानशनात्परम् ॥ १०
ऋषयः पितरो देवा मनुष्या मृगसत्तमाः ।
यानि चान्यानि भूतानि स्थावराणि चराणि च ॥ ११
तपःपरायणाः सर्वे सिध्यन्ति तपसा च ते ।
इत्येवं तपसा देवा महत्त्वं चाप्यवाप्नुवन् ॥ १२
इमानीष्टविभागानि फलानि तपसा सदा ।
तपसा शक्यते प्राप्तुं देवत्वमपि निश्चयात् ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

१५६

युधिष्ठिर उवाच ।

सत्यं धर्मं प्रशंसन्ति विप्रर्षिपितृदेवताः ।
सत्यमिच्छाम्यहं श्रोतुं तन्मे ब्रूहि पितामह ॥ १
सत्यं किंलक्षणं राजन्कथं वा तदवाप्यते ।
सत्यं प्राप्य भवेत्किं च कथं चैव तदुच्यते ॥ २

भीष्म उवाच ।

चातुर्वर्ण्यस्य धर्माणां संकरो न प्रशस्यते ।
अविकारितमं सत्यं सर्ववर्णेषु भारत ॥ ३
सत्यं सत्सु सदा धर्मः सत्यं धर्मः सनातनः ।
सत्यमेव नमस्येत सत्यं हि परमा गतिः ॥ ४
सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम् ।
सत्यं यज्ञः परः प्रोक्तः सत्ये सर्वं प्रतिष्ठितम् ॥ ५
आचारानिह सत्यस्य यथावदनुपूर्वशः ।
लक्षणं च प्रवक्ष्यामि सत्यस्येह यथाक्रमम् ॥ ६
प्राप्यते हि यथा सत्यं तच्च श्रोतुं त्वमर्हसि ।
सत्यं त्रयोदशविधं सर्वलोकेषु भारत ॥ ७
सत्यं च समता चैव दमश्चैव न संशयः ।
अमात्सर्यं क्षमा चैव ह्रीस्तितिक्षानसूयता ॥ ८
त्यागो ध्यानमथार्यत्वं धृतिश्च सततं स्थिरा ।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश ॥ ९
सत्यं नामाव्ययं नित्यमविकारि तथैव च ।
सर्वधर्माविरुद्धं च योगेनैतदवाप्यते ॥ १०
आत्मनीष्टे तथानिष्टे रिपौ च समता तथा ।
इच्छाद्वेषक्षयं प्राप्य कामक्रोधक्षयं तथा ॥ ११
दमो नान्यस्पृहा नित्यं धैर्यं गाम्भीर्यमेव च ।
अभयं क्रोधशमनं ज्ञानेनैतदवाप्यते ॥ १२
अमात्सर्यं बुधाः प्राहुर्दानं धर्मे च संयमम् ।
अवस्थितेन नित्यं च सत्येनामत्सरी भवेत् ॥ १३
अक्षमायाः क्षमायाश्च प्रियाणीहाप्रियाणि च ।
क्षमते सर्वतः साधुः साध्वाप्नोति च सत्यवान् ॥ १४
कल्याणं कुरुते गाढं ह्रीमान्न श्लाघते क्वचित् ।
प्रशान्तवाङ्मना नित्यं ह्रीस्तु धर्मादवाप्यते ॥ १५
धर्मार्थहेतोः क्षमते तितिक्षा क्षान्तिरुच्यते ।
लोकसंग्रहणार्थं तु सा तु धैर्येण लभ्यते ॥ १६
त्यागः स्नेहस्य यस्त्यागो विषयाणां तथैव च ।
रागद्वेषप्रहीणस्य त्यागो भवति नान्यथा ॥ १७
आर्यता नाम भूतानां यः करोति प्रयत्नतः ।

शुभं कर्म निराकारो वीतरागत्वमेव च ॥ १८
धृतिर्नाम सुखे दुःखे यथा नाप्नोति विक्रियाम् ।
तां भजेत सदा प्राज्ञो य इच्छेद्भूतिमात्मनः ॥१९
सर्वथा क्षमिणा भाव्यं तथा सत्यपरेण च ।
वीतहर्षभयक्रोधो धृतिमाप्नोति पण्डितः ॥ २०
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ २१
एते त्रयोदशाकाराः पृथक्सत्यैकलक्षणाः ।
भजन्ते सत्यमेवेह बृंहयन्ति च भारत ॥ २२
नान्तः शक्यो गुणानां हि वक्तुं सत्यस्य भारत ।
अतः सत्यं प्रशंसन्ति विप्राः सपितृदेवताः ॥ २३
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् ।
स्थितिर्हि सत्यं धर्मस्य तस्मात्सत्यं न लोपयेत् ॥२४
उपैति सत्याद्दानं हि तथा यज्ञाः सदक्षिणाः ।
त्रताग्निहोत्रं वेदाश्च ये चान्ये धर्मनिश्चयाः ॥ २५
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

१५७

युधिष्ठिर उवाच ।

यतः प्रभवति क्रोधः कामश्च भरतर्षभ ।
शोकमोहौ विवित्सा च परासुत्वं तथा मदः ॥ १
लोभो मात्सर्यमीर्ष्या च कुत्सासूया कृपा तथा ।
एतत्सर्वं महाप्राज्ञ याथातथ्येन मे वद ॥ २

भीष्म उवाच ।

त्रयोदशैतेऽतिबलाः शत्रवः प्राणिनां स्मृताः ।
उपासते महाराज समस्ताः पुरुषानिह ॥ ३
एते प्रमत्तं पुरुषमप्रमत्ता नुदन्ति हि ।
वृका इव विलुम्पन्ति दृष्ट्वैव पुरुषेतरान् ॥ ४
एभ्यः प्रवर्तते दुःखमेभ्यः पापं प्रवर्तते ।
इति मर्त्यो विजानीयात्सततं भरतर्षभ ॥ ५
एतेषामुदयं स्थानं क्षयं च पुरुषोत्तम ।
हन्त ते वर्तयिष्यामि तन्मे निगदतः शृणु ॥ ६
लोभात्क्रोधः प्रभवति परदोषैरुदीर्यते ।
क्षमया तिष्ठते राजञ्श्रीमांश्च विनिवर्तते ॥ ७
संकल्पाज्जायते कामः सेव्यमानो विवर्धते ।
अवद्यदर्शनाद्व्येति तत्त्वज्ञानाच्च धीमताम् ॥ ८
विरुद्धानि हि शास्त्राणि पश्यन्तीहाल्पबुद्धयः ।
विवित्सा जायते तत्र तत्त्वज्ञानान्निवर्तते ॥ ९
प्रीते शोकः प्रभवति वियोगात्तस्य देहिनः ।
यदा निरर्थकं वेत्ति तदा सद्यः प्रणश्यति ॥ १०
परासुता क्रोधलोभादभ्यासाच्च प्रवर्तते ।
दयया सर्वभूतानां निर्वेदात्सा निवर्तते ॥ ११
सत्त्वत्यागात्तु मात्सर्यमहितानि च सेवते ।
एतत्तु क्षीयते तात साधूनामुपसेवनात् ॥ १२
कुलाज्ज्ञानात्तथैश्वर्यान्मदो भवति देहिनाम् ।
एभिरेव तु विज्ञातैर्मदः सद्यः प्रणश्यति ॥ १३
ईर्ष्या कामात्प्रभवति संघर्षाच्चैव भारत ।
इतरेषां तु मर्त्यानां प्रज्ञया सा प्रणश्यति ॥ १४
विभ्रमाल्लोकबाह्यानां द्वेष्यैर्वाक्यैरसंगतैः ।
कुत्सा संजायते राजन्नुपेक्षाभिः प्रशाम्यति ॥ १५
प्रतिकर्तुमशक्याय बलस्थायापकारिणे ।
असूया जायते तीव्रा कारुण्याद्विनिवर्तते ॥ १६
कृपणान्सततं दृष्ट्वा ततः संजायते कृपा ।
धर्मनिष्ठां यदा वेत्ति तदा शाम्यति सा कृपा ॥१७
एतान्येव जितान्याहुः प्रशमाच्च त्रयोदश ।
एते हि धार्तराष्ट्राणां सर्वे दोषास्त्रयोदश ।

त्वया सर्वात्मना नित्यं विजिता जेष्यसे च तान्॥१८

इति श्रीमहाभारते शान्तिपर्वणि
सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

१५८

युधिष्ठिर उवाच ।

आनृशंस्यं विजानामि दर्शनेन सतां सदा ।
नृशंसान्न विजानामि तेषां कर्म च भारत ॥ १
कण्टकान्कूपमग्निं च वर्जयन्ति यथा नराः ।
तथा नृशंसकर्माणं वर्जयन्ति नरा नरम् ॥ २
नृशंसो ह्यधमो नित्यं प्रेत्य चेह च भारत ।
तस्माद्ब्रवीहि कौरव्य तस्य धर्मविनिश्चयम् ॥ ३

भीष्म उवाच ।

स्पृहास्यान्तर्हिता चैव विदितार्था च कर्मणा ।
आक्रोष्टा क्रुश्यते चैव बन्धिता बध्यते च यः ॥४
दत्तानुकीर्तिर्विषमः क्षुद्रो नैकृतिकः शठः ।
असंभोगी च मानी च तथा सङ्गी विकत्थनः ॥५
सर्वातिशङ्की परुषो बालिशः कृपणस्तथा ।
वर्गप्रशंसी सततमाश्रमद्वेषसंकरी ॥ ६
हिंसाविहारी सततमविशेषगुणागुणः ।
बह्वलीको मनस्वी च लुब्धोऽत्यर्थं नृशंसकृत् ॥ ७
धर्मशीलं गुणोपेतं पाप इत्यवगच्छति ।
आत्मशीलानुमानेन न विश्वसिति कस्यचित् ॥ ८
परेषां यत्र दोषः स्यात्तद्गुह्यं संप्रकाशयेत् ।
समानेष्वेव दोषेषु वृत्त्यर्थमुपघातयेत् ॥ ९
तथोपकारिणं चैव मन्यते वञ्चितं परम् ।
दत्त्वापि च धनं काले संतपत्युपकारिणे ॥ १०
भक्ष्यं भोज्यमथो लेह्यं यच्चान्यत्साधु भोजनम् ।
प्रेक्षमाणेषु योऽश्नीयान्नृशंस इति तं विदुः ॥ ११
ब्राह्मणेभ्यः प्रदायाग्रं यः सुहृद्भिः सहाश्नुते ।
स प्रेत्य लभते स्वर्गमिह चानन्त्यमश्नुते ॥ १२
एष ते भरतश्रेष्ठ नृशंसः परिकीर्तितः ।
सदा विवर्जनीयो वै पुरुषेण बुभूषता ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

भीष्म उवाच ।

कृतार्थो यक्ष्यमाणश्च सर्ववेदान्तगश्च यः ।
आचार्यपितृभार्यार्थं स्वाध्यायार्थमथापि वा ॥ १
एते वै साधवो दृष्टा ब्राह्मणा धर्मभिक्षवः ।
अस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः ॥ २
अन्यत्र दक्षिणा या तु देया भरतसत्तम ।
अन्येभ्यो हि बहिर्वेद्यां नाकृतान्नं विधीयते ॥ ३
सर्वरत्नानि राजा च यथार्हं प्रतिपादयेत् ।
ब्राह्मणाश्चैव यज्ञाश्च सहान्नाः सहदक्षिणाः ॥ ४
यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥ ५
यज्ञश्चेत्प्रतिविद्धः स्यादङ्गेनैकेन यज्वनः ।
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥ ६
यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः ।
कुटुम्बात्तस्य तद्द्रव्यं यज्ञार्थं पार्थिवो हरेत् ॥ ७
आहरेद्वेश्मतः किंचित्कामं शूद्रस्य द्रव्यतः ।
न हि वेश्मनि शूद्रस्य कश्चिदस्ति परिग्रहः ॥ ८
योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥ ९
अदातृभ्यो हरेन्नित्यं व्याख्याप्य नृपतिः प्रभो ।
तथा ह्याचरतो धर्मो नृपतेः स्यादथाखिलः ॥ १०
तथैव सप्तमे भक्ते भक्तानि षडनश्नता ।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ।
खलात्क्षेत्रात्तथागाराद्यतो वाप्युपपद्यते ॥ ११
आख्यातव्यं नृपस्यैतत्पृच्छतोऽपृच्छतोऽपि वा ।

न तस्मै धारयेद्दण्डं राजा धर्मेण धर्मवित् ॥ १२
क्षत्रियस्य हि बालिश्याद्ब्राह्मणः क्लिश्यते क्षुधा ।
श्रुतशीले समाज्ञाय वृत्तिमस्य प्रकल्पयेत् ।
अथैनं परिरक्षेत पिता पुत्रमिवौरसम् ॥ १३
इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये ।
अविकल्पः पुराधर्मो धर्मवादैस्तु केवलम् ॥ १४
विश्वैस्तु देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः ।
आपत्सु मरणाद्भीतैर्लिङ्गप्रतिनिधिः कृतः ॥ १५
प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ १६
न ब्राह्मणान्वेदयेत कश्चिद्राजनि मानवः ।
अवीर्यो वेदनाद्विद्यात्सुवीर्यो वीर्यवत्तरम् ॥ १७
तस्माद्राज्ञा सदा तेजो दुःसहं ब्रह्मवादिनाम् ।
मन्ता शास्ता विधाता च ब्राह्मणो देव उच्यते ।
तस्मिन्नाकुशलं ब्रूयान्न शुक्तामीरयेद्गिरम् ॥ १८
क्षत्रियो बाहुवीर्येण तरत्यापदमात्मनः ।
धनेन वैश्यः शूद्रश्च मन्त्रैर्होमैश्च वै द्विजः ॥ १९
न वै कन्या न युवतिर्नामन्त्रो न च बालिशः ।
परिवेष्टाग्निहोत्रस्य भवेन्नासंस्कृतस्तथा ।
नरके निपतन्त्येते जुह्वानाः स च यस्य तत् ॥२०
प्राजापत्यमदत्त्वाश्वमग्न्याधेयस्य दक्षिणाम् ।
अनाहिताग्निरिति स प्रोच्यते धर्मदर्शिभिः ॥ २१
पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः ।
अनाप्तदक्षिणैर्यज्ञैर्न यजेत कथंचन ॥ २२
प्रजाः पशूंश्च स्वर्गं च हन्ति यज्ञो ह्यदक्षिणः ।
इन्द्रियाणि यशः कीर्तिमायुश्चास्योपकृन्तति ॥ २३
उदक्या ह्यासते ये च ये च केचिदनग्नयः ।
कुलं चाश्रोत्रियं येषां सर्वे ते शूद्रधर्मिणः ॥ २४
उदपानोदके ग्रामे ब्राह्मणो वृषलीपतिः ।
उषित्वा द्वादश समाः शूद्रकर्मेह गच्छति ॥ २५
अनार्यां शयने बिभ्रदुज्झन्बिभ्रच्च यो द्विजाम् ।
अब्राह्मणो मन्यमानस्तृणेष्वासीत पृष्ठतः ।
तथा स शुध्यते राजञ्शृणु चात्र वचो मम ॥ २६
यदेकरात्रेण करोति पापं
कृष्णं वर्णं ब्राह्मणः सेवमानः ।
स्थानासनाभ्यां विचरन्व्रती सं-
त्रिभिर्वर्षैः शमयेदात्मपापम् ॥ २७
न नर्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
न गुर्वर्थे नात्मनो जीवितार्थे
पञ्चानृतान्याहुरपातकानि ॥ २८
श्रद्दधानः शुभां विद्यां हीनादपि समाचरेत् ।
सुवर्णमपि चामेध्यादाददीतेति धारणा ॥ २९
स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत् ।
अदुष्टा हि स्त्रियो रत्नमाप इत्येव धर्मतः ॥ ३०
गोब्राह्मणहितार्थं च वर्णानां संकरेषु च ।
गृह्णीयात्तु धनुर्वैश्यः परित्राणाय चात्मनः ॥ ३१
सुरापानं ब्रह्महत्या गुरुतल्पमथापि वा ।
अनिर्देश्यानि मन्यन्ते प्राणान्तानीति धारणा ॥ ३२
सुवर्णहरणं स्तैन्यं विप्रासङ्गश्च पातकम् ।
विहरन्मद्यपानं चाप्यगम्यागमनं तथा ॥ ३३
पतितैः संप्रयोगाच्च ब्राह्मणैर्योनितस्तथा ।
अचिरेण महाराज तादृशो वै भवत्युत ॥ ३४
संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥ ३५
एतानि च ततोऽन्यानि निर्देश्यानीति धारणा ।
निर्देश्यकेन विधिना कालेनाव्यसनी भवेत् ॥ ३६
अन्नं तिर्यङ्न होतव्यं प्रेतकर्मण्यपातिते ।
त्रिषु त्वेतेषु पूर्वेषु न कुर्वीत विचारणाम् ॥ ३७
अमात्यान्वा गुरून्वापि जह्याद्धर्मेण धार्मिकः ।

प्रायश्चित्तमकुर्वाणैर्नैतै रर्हति संविदम् ॥ ३८
अधर्मकारी धर्मेण तपसा हन्ति किल्बिषम् ।
ब्रुवन्स्तेन इति स्तेनं तावत्प्राप्नोति किल्बिषम् ।
अस्तेनं स्तेन इत्युक्त्वा द्विगुणं पापमाप्नुयात् ॥३९
त्रिभागं ब्रह्महत्यायाः कन्या प्राप्नोति दुष्यती ।
यस्तु दूषयिता तस्याः शेषं प्राप्नोति किल्बिषम् ॥४०
ब्राह्मणायावगूर्येह स्पृष्ट्वा गुरुतरं भवेत् ।
वर्षाणां हि शतं पापः प्रतिष्ठां नाधिगच्छति ॥४१
सहस्रं त्वेव वर्षाणां निपात्य नरके वसेत् ।
तस्मान्नैवावगूर्याद्धि नैव जातु निपातयेत् ॥ ४२
शोणितं यावतः पांसून्संगृह्णीयाद्द्विजक्षतात् ।
तावतीः स समा राजन्नरके परिवर्तते ॥ ४३
भ्रूणहाहवमध्ये तु शुध्यते शस्त्रपातितः ।
आत्मानं जुहुयाद्वह्नौ समिद्धे तेन शुध्यति ॥ ४४
सुरापो वारुणीमुष्णां पीत्वा पापाद्विमुच्यते ।
तया स काये निर्दग्धे मृत्युना प्रेत्य शुध्यति ।
लोकांश्च लभते विप्रो नान्यथा लभते हि सः ॥४५
गुरुतल्पमधिष्ठाय दुरात्मा पापचेतनः ।
सूर्मीं ज्वलन्तीमाश्लिष्य मृत्युना स विशुध्यति ॥४६
अथ वा शिश्नवृषणावादायाञ्जलिना स्वयम् ।
नैर्ऋतीं दिशमास्थाय निपतेत्स त्वजिह्मगः ॥ ४७
ब्राह्मणार्थेऽपि वा प्राणान्संत्यजेत्तेन शुध्यति ।
अश्वमेधेन वापीष्ट्वा गोमेधेनापि वा पुनः ।
अग्निष्टोमेन वा सम्यगिह प्रेत्य च पूयते ॥ ४८
तथैव द्वादश समाः कपाली ब्रह्महा भवेत् ।
ब्रह्मचारी भवेद्भैक्षं स्वकर्मोदाहरन्मुनिः ॥ ४९
एवं वा तपसा युक्तो ब्रह्महा सवनी भवेत् ।
एवं वा गर्भमज्ञाता चात्रेयीं योऽभिगच्छति ।
द्विगुणा ब्रह्महत्या वै आत्रेयीव्यसने भवेत् ॥ ५०
सुरापो नियताहारो ब्रह्मचारी क्षमाचरः ।
ऊर्ध्वं त्रिभ्योऽथ वर्षेभ्यो यजेताग्निष्टुता परम् ।
ऋषभैकसहस्रं गा दत्त्वा शुभमवाप्नुयात् ॥ ५१
वैश्यं हत्वा तु वर्षे द्वे ऋषभैकशताश्च गाः ।
शूद्रं हत्वाब्दमेवैकमृषभैकादशाश्च गाः ॥ ५२
श्वबर्बरखरान्हत्वा शौद्रमेव व्रतं चरेत् ।
मार्जारचाषमण्डूकान्काकं भासं च मूषकम् ॥५३
उक्तः पशुसमो धर्मो राजन्प्राणिनिपातनात् ।
प्रायश्चित्तान्यथान्यानि प्रवक्ष्याम्यनुपूर्वशः ॥ ५४
तल्पे चान्यस्य चौर्ये च पृथक्संवत्सरं चरेत् ।
त्रीणि श्रोत्रियभार्यायां परदारे तु द्वे स्मृते ॥ ५५
काले चतुर्थे भुञ्जानो ब्रह्मचारी व्रती भवेत् ।
स्थानासनाभ्यां विहरेत्त्रिरह्नोऽभ्युदियादपः ।
एवमेव निराचान्तो यश्चाग्नीनपविध्यति ॥ ५६
त्यजत्यकारणे यश्च पितरं मातरं तथा ।
पतितः स्यात्स कौरव्य तथा धर्मेषु निश्चयः ॥५७
ग्रासाच्छादनमत्यर्थं दद्यादिति निदर्शनम् ।
भार्यायां व्यभिचारिण्यां निरुद्धायां विशेषतः ।
यत्पुंसां परदारेषु तच्चैनां चारयेद्व्रतम् ॥ ५८
श्रेयांसं शयने हित्वा या पापीयांसमृच्छति ।
श्वभिस्तां खादयेद्राजा संस्थाने बहुसंवृते ॥ ५९
पुमांसं बन्धयेत्प्राज्ञः शयने तप्त आयसे ।
अप्यादधीत दारूणि तत्र दह्येत पापकृत् ॥ ६०
एष दण्डो महाराज स्त्रीणां भर्तृव्यतिक्रमे ।
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो भवेत् ॥ ६१
द्वे तस्य त्रीणि वर्षाणि चत्वारि सहसेविनः ।
कुचरः पञ्च वर्षाणि चरेद्भैक्षं मुनिव्रतः ॥ ६२
परिवित्तिः परिवेत्ता यया च परिविद्यते ।
पाणिग्राहश्च धर्मेण सर्वे ते पतिताः स्मृताः ॥ ६३
चरेयुः सर्व एवैते वीरहा यद्व्रतं चरेत् ।
चान्द्रायणं चरेन्मासं कृच्छ्रं वा पापशुद्धये ॥ ६४

परिवेत्ता प्रयच्छेत परिवित्ताय तां स्नुषाम् ।
ज्येष्ठेन त्वभ्यनुज्ञातो यवीयान्प्रत्यनन्तरम् ।
एनसो मोक्षमाप्नोति सा च तौ चैव धर्मतः ॥६५
अमानुषीषु गोवर्जमनावृष्टिर्न दुष्यति ।
अधिष्ठातारमत्तारं पशूनां पुरुषं विदुः ॥ ६६
परिधायोर्ध्ववालं तु पात्रमादाय मृन्मयम् ।
चरेत्सप्त गृहान्भैक्षं स्वकर्म परिकीर्तयन् ॥ ६७
तत्रैव लब्धभोजी स्याद्द्वादशाहात्स शुध्यति ।
चरेत्संवत्सरं चापि तद्व्रतं यन्निराकृति ॥ ६८
भवेत्तु मानुषेष्वेवं प्रायश्चित्तमनुत्तमम् ।
दानं वादानसक्तेषु सर्वमेव प्रकल्पयेत्
अनास्तिकेषु गोमात्रं प्राणमेकं प्रचक्षते ॥ ६९
श्ववराहमनुष्याणां कुक्कुटस्य खरस्य च ।
मांसं मूत्रपुरीषं च प्राश्य संस्कारमर्हति ॥ ७०
ब्राह्मणस्य सुरापस्य गन्धमाघ्राय सोमपः ।
अपस्त्र्यहं पिबेदुष्णास्त्र्यहमुष्णं पयः पिबेत् ।
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो भवेत्त्र्यहम् ॥ ७१
एवमेतत्समुद्दिष्टं प्रायश्चित्तं सनातनम् ।
ब्राह्मणस्य विशेषेण तत्त्वज्ञानेन जायते ॥ ७२

इति श्रीमहाभारते शान्तिपर्वणि
एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

वैशंपायन उवाच ।

कथान्तरमथासाद्य खड्गयुद्धविशारदः ।
नकुलः शरतल्पस्थमिदमाह पितामहम् ॥ १
धनुः प्रहरणं श्रेष्ठमिति वादः पितामह ।
मतस्तु मम धर्मज्ञ खड्ग एव सुसंशितः ॥ २
विशीर्णे कार्मुके राजन्प्रक्षीणेषु च वाजिषु ।
खड्गेन शक्यते युद्धे साध्वात्मा परिरक्षितुम् ॥ ३
शरासनधरांश्चैव गदाशक्तिधरांस्तथा ।
एकः खड्गधरो वीरः समर्थः प्रतिबाधितुम् ॥ ४
अत्र मे संशयश्चैव कौतूहलमतीव च ।
किं स्वित्प्रहरणं श्रेष्ठं सर्वयुद्धेषु पार्थिव ॥ ५
कथं चोत्पादितः खड्गः कस्यार्थाय च केन वा ।
पूर्वाचार्यं च खड्गस्य प्रब्रूहि प्रपितामह ॥ ६
तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य धीमतः ।
सर्वकौशलसंयुक्तं सूक्ष्मचित्रार्थवच्छुभम् ॥ ७
ततस्तस्योत्तरं वाक्यं स्वरवर्णोपपादितम् ।
शिक्षान्यायोपसंपन्नं द्रोणशिष्याय पृच्छते ॥ ८
उवाच सर्वधर्मज्ञो धनुर्वेदस्य पारगः ।
शरतल्पगतो भीष्मो नकुलाय महात्मने ॥ ९
तत्त्वं शृणुष्व माद्रेय यदेतत्परिपृच्छसि ।
प्रबोधितोऽस्मि भवता धातुमानिव पर्वतः ॥ १०
सलिलैकार्णवं तात पुरा सर्वमभूदिदम् ।
निष्प्रकम्पमनाकाशमनिर्देश्यमहीतलम् ॥ ११
तमःसंवृतमस्पर्शमतिगम्भीरदर्शनम् ।
निःशब्दं चाप्रमेयं च तत्र जज्ञे पितामहः ॥ १२
सोऽसृजद्वायुमग्निं च भास्करं चापि वीर्यवान् ।
आकाशमसृजच्चोर्ध्वमधो भूमिं च नैर्ऋतिम् ॥ १३
नभः सचन्द्रतारं च नक्षत्राणि ग्रहांस्तथा ।
संवत्सरानहोरात्रानृतूनथ लवान्क्षणान् ॥ १४
ततः शरीरं लोकस्थं स्थापयित्वा पितामहः ।
जनयामास भगवान्पुत्रानुत्तमतेजसः ॥ १५
मरीचिमृषिमत्रिं च पुलस्त्यं पुलहं क्रतुम् ।
वसिष्ठाङ्गिरसौ चोभौ रुद्रं च प्रभुमीश्वरम् ॥ १६
प्राचेतसस्तथा दक्षः कन्याः षष्टिमजीजनत् ।
ता वै ब्रह्मर्षयः सर्वाः प्रजार्थं प्रतिपेदिरे ॥ १७
ताभ्यो विश्वानि भूतानि देवाः पितृगणास्तथा ।
गन्धर्वाप्सरसश्चैव रक्षांसि विविधानि च ॥ १८
पतत्रिमृगमीनाश्च प्लवंगाश्च महोरगाः ।

नानाकृतिबलाश्चान्ये जलक्षितिविचारिणः ॥ १९
औद्भिदाः स्वेदजाश्चैव अण्डजाश्च जरायुजाः ।
जज्ञे तात तथा सर्वं जगत्स्थावरजङ्गमम् ॥ २०
भूतसर्गमिमं कृत्वा सर्वलोकपितामहः ।
शाश्वतं वेदपठितं धर्मं च युयुजे पुनः ॥ २१
तस्मिन्धर्मे स्थिता देवाः सहाचार्यपुरोहिताः ।
आदित्या वसवो रुद्राः ससाध्या मरुदश्विनः ॥२२
भृग्वत्र्यङ्गिरसः सिद्धाः काश्यपश्च तपोधनः ।
वसिष्ठगौतमागस्त्यास्तथा नारदपर्वतौ ॥ २३
ऋषयो वालखिल्याश्च प्रभासाः सिकतास्तथा ।
घृताचाः सोमवायव्या वैखानसमरीचिपाः ॥ २४
अकृष्टाश्चैव हंसाश्च ऋषयोऽथाग्नियोनिजाः ।
वानप्रस्थाः पृश्नयश्च स्थिता ब्रह्मानुशासने ॥ २५
दानवेन्द्रास्त्वतिक्रम्य तत्पितामहशासनम् ।
धर्मस्यापचयं चक्रुः क्रोधलोभसमन्विताः ॥ २६
हिरण्यकशिपुश्चैव हिरण्याक्षो विरोचनः ।
शम्बरो विप्रचित्तिश्च प्रह्लादो नमुचिर्बलिः ॥ २७
एते चान्ये च बहवः सगणा दैत्यदानवाः ।
धर्मसेतुमतिक्रम्य रेमिरेऽधर्मनिश्चयाः ॥ २८
सर्वे स्म तुल्यजातीया यथा देवास्तथा वयम् ।
इत्येवं हेतुमास्थाय स्पर्धमानाः सुरर्षिभिः ॥ २९
न प्रियं नाप्यनुक्रोशं चक्रुर्भूतेषु भारत ।
त्रीनुपायानतिक्रम्य दण्डेन रुरुधुः प्रजाः ।
न जग्मुः संविदं तैश्च दर्पादसुरसत्तमाः ॥ ३०
अथ वै भगवान्ब्रह्मा ब्रह्मर्षिभिरुपस्थितः ।
तदा हिमवतः पृष्ठे सुरम्ये पद्मतारके ॥ ३१
शतयोजनविस्तारे मणिमुक्ताचयाचिते ।
तस्मिन्गिरिवरे पुत्र पुष्पितद्रुमकानने ।
तस्थौ स विबुधश्रेष्ठो ब्रह्मा लोकार्थसिद्धये ॥ ३२
ततो वर्षसहस्रान्ते वितानमकरोत्प्रभुः ।
विधिना कल्पदृष्टेन यथोक्तेनोपपादितम् ॥ ३३
ऋषिभिर्यज्ञपटुभिर्यथावत्कर्मकर्तृभिः ।
मरुद्भिः परिसंस्तीर्णं दीप्यमानैश्च पावकैः ॥ ३४
काञ्चनैर्यज्ञभाण्डैश्च भ्राजिष्णुभिरलंकृतम् ।
वृतं देवगणैश्चैव प्रबभौ यज्ञमण्डलम् ॥ ३५
तथा ब्रह्मर्षिभिश्चैव सदस्यैरुपशोभितम् ।
तत्र घोरतमं वृत्तमृषीणां मे परिश्रुतम् ॥ ३६
चन्द्रमा विमलं व्योम यथाभ्युदिततारकम् ।
विदार्याग्निं तथा भूतमुत्थितं श्रूयते ततः ॥ ३७
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं कृशोदरम् ।
प्रांशु दुर्दर्शनं चैवाप्यतितेजस्तथैव च ॥ ३८
तस्मिन्नुत्पतमाने च प्रचचाल वसुंधरा ।
तत्रोर्मिकलिलावर्तश्चुक्षुभे च महार्णवः ॥ ३९
पेतुरुल्का महोत्पाताः शाखाश्च मुमुचुर्द्रुमाः ।
अप्रसन्ना दिशः सर्वाः पवनश्चाशिवो ववौ ।
मुहुर्मुहुश्च भूतानि प्राव्यथन्त भयात्तथा ॥ ४०
ततः सुतुमुलं दृष्ट्वा तदद्भुतमुपस्थितम् ।
महर्षिसुरगन्धर्वानुवाचेदं पितामहः ॥ ४१
मयैतच्चिन्तितं भूतमसिर्नामैष वीर्यवान् ।
रक्षणार्थाय लोकस्य वधाय च सुरद्विषाम् ॥ ४२
ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः ।
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यतः ॥ ४३
ततस्तं शितिकण्ठाय रुद्रायर्षभकेतवे ।
ब्रह्मा ददावसिं दीप्तमधर्मप्रतिवारणम् ॥ ४४
ततः स भगवान्रुद्रो ब्रह्मर्षिगणसंस्तुतः ।
प्रगृह्यासिममेयात्मा रूपमन्यच्चकार ह ॥ ४५
चतुर्बाहुः स्पृशन्मूर्ध्ना भूस्थितोऽपि नभस्तलम् ।
ऊर्ध्वदृष्टिर्महालिङ्गो मुखाज्ज्वालाः समुत्सृजन् ।
विकुर्वन्बहुधा वर्णान्नीलपाण्डुरलोहितान् ॥ ४६
बिभ्रत्कृष्णाजिनं वासो हेमप्रवरतारकम् ।

नेत्रं चैकं ललाटेन भास्करप्रतिमं महत् ।
शुशुभाते च विमले द्वे नेत्रे कृष्णपिङ्गले ॥ ४७
ततो देवो महादेवः शूलपाणिर्भगाक्षिहा ।
संप्रगृह्य तु निस्त्रिंशं कालार्कानलसंनिभम् ॥ ४८
त्रिकूटं चर्म चोद्यम्य सविद्युतमिवाम्बुदम् ।
चचार विविधान्मार्गान्महाबलपराक्रमः ।
विधुन्वन्नसिमाकाशे दानवान्तचिकीर्षया ॥ ४९
तस्य नादं विनदतो महाहासं च मुञ्चतः ।
बभौ प्रतिभयं रूपं तदा रुद्रस्य भारत ॥ ५०
तद्रूपधारिणं रुद्रं रौद्रकर्म चिकीर्षवः ।
निशम्य दानवाः सर्वे हृष्टाः समभिदुद्रुवुः ॥ ५१
अश्मभिश्चाप्यवर्षन्त प्रदीप्तैश्च तथोल्मुकैः ।
घोरैः प्रहरणैश्चान्यैः शितधारैरयोमुखैः ॥ ५२
ततस्तद्दानवानीकं संप्रणेतारमच्युतम् ।
रुद्रखड्गबलोद्भूतं प्रचचाल मुमोह च ॥ ५३
चित्रं शीघ्रतरत्वाच्च चरन्तमसिधारिणम् ।
तमेकमसुराः सर्वे सहस्रमिति मेनिरे ॥ ५४
छिन्दन्भिन्दन्रुजन्कृन्तन्दारयन्प्रमथन्नपि ।
अचरद्दैत्यसंघेषु रुद्रोऽग्निरिव कक्षगः ॥ ५५
असिवेगप्ररुग्णास्ते छिन्नबाहूरुवक्षसः ।
संप्रकृत्तोत्तमाङ्गाश्च पेतुरुर्व्यां महासुराः ॥ ५६
अपरे दानवा भग्ना रुद्रघातावपीडिताः ।
अन्योन्यमभिनर्दन्तो दिशः संप्रतिपेदिरे ॥ ५७
भूमिं केचित्प्रविविशुः पर्वतानपरे तथा ।
अपरे जग्मुराकाशमपरेऽम्भः समाविशन् ॥ ५८
तस्मिन्महति संवृत्ते समरे भृशदारुणे ।
बभौ भूमिः प्रतिभया तदा रुधिरकर्दमा ॥ ५९
दानवानां शरीरैश्च महद्भिः शोणितोक्षितैः ।
समाकीर्णा महाबाहो शैलैरिव सकिंशुकैः ॥ ६०
रुधिरेण परिक्लिन्ना प्रबभौ वसुधा तदा ।
रक्तार्द्रवसना श्यामा नारीव मदविह्वला ॥ ६१
स रुद्रो दानवान्हत्वा कृत्वा धर्मोत्तरं जगत् ।
रौद्रं रूपं विहायाशु चक्रे रूपं शिवं शिवः ॥ ६२
ततो महर्षयः सर्वे सर्वे देवगणास्तथा ।
जयेनाद्भुतकल्पेन देवदेवमथार्चयन् ॥ ६३
ततः स भगवान्रुद्रो दानवक्षतजोक्षितम् ।
असिं धर्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे ॥ ६४
विष्णुर्मरीचये प्रादान्मरीचिर्भगवांश्च तम् ।
महर्षिभ्यो ददौ खड्गमृषयो वासवाय तु ॥ ६५
महेन्द्रो लोकपालेभ्यो लोकपालास्तु पुत्रक ।
मनवे सूर्यपुत्राय ददुः खड्गं सुविस्तरम् ॥ ६६
ऊचुश्चैनं तथैवाद्यं मानुषाणां त्वमीश्वरः ।
असिना धर्मगर्भेण पालयस्व प्रजा इति ॥ ६७
धर्मसेतुमतिक्रान्ताः सूक्ष्मस्थूलार्थकारणात् ।
विभज्य दण्डं रक्ष्याः स्युर्धर्मतो न यदृच्छया ॥ ६८
दुर्वाचा निग्रहो दण्डो हिरण्यबहुलस्तथा ।
व्यङ्गनं च शरीरस्य वधो वानल्पकारणात् ॥ ६९
असेरेतानि रूपाणि दुर्वाचादीनि निर्दिशेत् ।
असेरेव प्रमाणानि परिमाणव्यतिक्रमात् ॥ ७०
अधिसृज्याथ पुत्रं स्वं प्रजानामधिपं ततः ।
मनुः प्रजानां रक्षार्थं क्षुपाय प्रददावसिम् ॥ ७१
क्षुपाज्जग्राह चेक्ष्वाकुरिक्ष्वाकोश्च पुरूरवाः ।
आयुश्च तस्माल्लेभे तं नहुषश्च ततो भुवि ॥ ७२
ययातिर्नहुषाच्चापि पूरुस्तस्माच्च लब्धवान् ।
आमूर्तरयसस्तस्मात्ततो भूमिशयो नृपः ॥ ७३
भरतश्चापि दौःषन्तिर्लेभे भूमिशयादसिम् ।
तस्माच्च लेभे धर्मज्ञो राजन्नैडबिडस्तथा ॥ ७४
ततश्चैडबिडाल्लेभे धुन्धुमारो जनेश्वरः ।
धुन्धुमाराच्च काम्बोजो मुचुकुन्दस्ततोऽलभत् ॥ ७५
मुचुकुन्दान्मरुत्तश्च मरुत्तादपि रैवतः ।

रैवताद्युवनाश्वश्च युवनाश्वात्ततो रघुः ॥ ७६
इक्ष्वाकुवंशजस्तस्माद्धरिणाश्वः प्रतापवान् ।
हरिणाश्वादसिं लेभे शुनकः शुनकादपि ॥ ७७
उशीनरो वै धर्मात्मा तस्माद्भोजाः सयादवाः ।
यदुभ्यश्च शिबिर्लेभे शिबेश्चापि प्रतर्दनः ॥ ७८
प्रतर्दनादष्टकश्च रुशदश्वोऽष्टकादपि ।
रुशदश्वाद्भरद्वाजो द्रोणस्तस्मात्कृपस्ततः ।
ततस्त्वं भ्रातृभिः सार्धं परमासिमवाप्तवान् ॥ ७९
कृत्तिकाश्चास्य नक्षत्रमसेरग्निश्च दैवतम् ।
रोहिण्यो गोत्रमस्याथ रुद्रश्च गुरुरुत्तमः ॥ ८०
असेरष्टौ च नामानि रहस्यानि निबोध मे ।
पाण्डवेय सदा यानि कीर्तयँल्लभते जयम् ॥ ८१
असिर्विशसनः खड्गस्तीक्ष्णवर्त्मा दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च ॥ ८२
अग्र्यः प्रहरणानां च खड्गो माद्रवतीसुत ।
महेश्वरप्रणीतश्च पुराणे निश्चयं गतः ॥ ८३
पृथुस्तूत्पादयामास धनुराद्यमरिंदम ।
तेनेयं पृथिवी पूर्वं वैन्येन परिरक्षिता ॥ ८४
तदेतदार्षं माद्रेय प्रमाणं कर्तुमर्हसि ।
असेश्च पूजा कर्तव्या सदा युद्धविशारदैः ॥ ८५
इत्येष प्रथमः कल्पो व्याख्यातस्ते सुविस्तरः ।
असेरुत्पत्तिसंसर्गो यथावद्भरतर्षभ ॥ ८६
सर्वथैतदिह श्रुत्वा खड्गसाधनमुत्तमम् ।
लभते पुरुषः कीर्तिं प्रेत्य चानन्त्यमश्नुते ॥ ८७

इति श्रीमहाभारते शान्तिपर्वणि
षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

१६१

वैशंपायन उवाच ।

इत्युक्तवति भीष्मे तु तूष्णींभूते युधिष्ठिरः ।
पप्रच्छावसरं गत्वा भ्रातॄन्विदुरपञ्चमान् ॥ १
धर्मे चार्थे च कामे च लोकवृत्तिः समाहिता ।
तेषां गरीयान्कतमो मध्यमः को लघुश्च कः ॥ २
कस्मिंश्चात्मा नियन्तव्यस्त्रिवर्गविजयाय वै ।
संतुष्टा नैष्ठिकं वाक्यं यथावद्वक्तुमर्हथ ॥ ३
ततोऽर्थगतितत्त्वज्ञः प्रथमं प्रतिभानवान् ।
जगाद विदुरो वाक्यं धर्मशास्त्रमनुस्मरन् ॥ ४
बाहुश्रुत्यं तपस्त्यागः श्रद्धा यज्ञक्रिया क्षमा ।
भावशुद्धिर्दया सत्यं संयमश्चात्मसंपदः ॥ ५
एतदेवाभिपद्यस्व मा ते भूच्चलितं मनः ।
एतन्मूलौ हि धर्मार्थावेतदेकपदं हितम् ॥ ६
धर्मेणैवर्षयस्तीर्णा धर्मे लोकाः प्रतिष्ठिताः ।
धर्मेण देवा दिविगा धर्मे चार्थः समाहितः ॥ ७
धर्मो राजन्गुणश्रेष्ठो मध्यमो ह्यर्थ उच्यते ।
कामो यवीयानिति च प्रवदन्ति मनीषिणः ।
तस्माद्धर्मप्रधानेन भवितव्यं यतात्मना ॥ ८
समाप्तवचने तस्मिन्नर्थशास्त्रविशारदः ।
पार्थो वाक्यार्थतत्त्वज्ञो जगौ वाक्यमतन्द्रितः ॥ ९
कर्मभूमिरियं राजन्निह वार्त्ता प्रशस्यते ।
कृषिवाणिज्यगोरक्ष्यं शिल्पानि विविधानि च ॥१०
अर्थ इत्येव सर्वेषां कर्मणामव्यतिक्रमः ।
न ऋतेऽर्थेन वर्तेते धर्मकामाविति श्रुतिः ॥ ११
विजयी ह्यर्थवान्धर्ममाराधयितुमुत्तमम् ।
कामं च चरितुं शक्तो दुष्प्रापमकृतात्मभिः ॥ १२
अर्थस्यावयवावेतौ धर्मकामाविति श्रुतिः ।
अर्थसिद्ध्या हि निर्वृत्तावुभावेतौ भविष्यतः ॥१३
उद्भूतार्थं हि पुरुषं विशिष्टतरयोनयः ।
ब्रह्माणमिव भूतानि सततं पर्युपासते ॥ १४
जटाजिनधरा दान्ताः पङ्कदिग्धा जितेन्द्रियाः ।
मुण्डा निस्तन्तवश्चापि वसन्त्यर्थार्थिनः पृथक् ॥१५
काषायवसनाश्चान्ये श्मश्रुला ह्रीसुसंवृताः ।

विद्वांसश्चैव शान्ताश्च मुक्ताः सर्वपरिग्रहैः ॥ १६
अर्थार्थिनः सन्ति केचिदपरे स्वर्गकाङ्क्षिणः ।
कुलप्रत्यागमाश्चैके स्वं स्वं मार्गमनुष्ठिताः ॥ १७
आस्तिका नास्तिकाश्चैव नियताः संयमे परे ।
अप्रज्ञानं तमोभूतं प्रज्ञानं तु प्रकाशता ॥ १८
भृत्यान्भोगैर्द्विषो दण्डैर्यो योजयति सोऽर्थवान् ।
एतन्मतिमतां श्रेष्ठ मतं मम यथातथम् ।
अनयोस्तु निबोध त्वं वचनं वाक्यकण्ठयोः ॥१९
ततो धर्मार्थकुशलौ माद्रीपुत्रावनन्तरम् ।
नकुलः सहदेवश्च वाक्यं जगदतुः परम् ॥ २०
आसीनश्च शयानश्च विचरन्नपि च स्थितः ।
अर्थयोगं दृढं कुर्याद्योगैरुच्चावचैरपि ॥ २१
अस्मिंस्तु वै सुसंवृत्ते दुर्लभे परमप्रिये ।
इह कामानवाप्नोति प्रत्यक्षं नात्र संशयः ॥ २२
योऽर्थो धर्मेण संयुक्तो धर्मो यश्चार्थसंयुतः ।
मध्विवामृतसंयुक्तं तस्मादेतौ मताविह ॥ २३
अनर्थस्य न कामोऽस्ति तथार्थोऽधर्मिणः कुतः ।
तस्मादुद्विजते लोको धर्मार्थाद्यो बहिष्कृतः ॥ २४
तस्माद्धर्मप्रधानेन साध्योऽर्थः संयतात्मना ।
विश्वस्तेषु च भूतेषु कल्पते सर्व एव हि ॥ २५
धर्मं समाचरेत्पूर्वं तथार्थं धर्मसंयुतम् ।
ततः कामं चरेत्पश्चात्सिद्धार्थस्य हि तत्फलम् ॥२६
विरेमतुस्तु तद्वाक्यमुक्त्वा तावश्विनोः सुतौ ।
भीमसेनस्तदा वाक्यमिदं वक्तुं प्रचक्रमे ॥ २७
नाकामः कामयत्यर्थं नाकामो धर्ममिच्छति ।
नाकामः कामयानोऽस्ति तस्मात्कामो विशिष्यते ॥
कामेन युक्ता ऋषयस्तपस्येव समाहिताः ।
पलाशफलमूलाशा वायुभक्षाः सुसंयताः ॥ २९
वेदोपवादेष्वपरे युक्ताः स्वाध्यायपारगाः ।
श्राद्धयज्ञक्रियायां च तथा दानप्रतिग्रहे ॥ ३०
वणिजः कर्षका गोपाः कारवः शिल्पिनस्तथा ।
दैवकर्मकृतश्चैव युक्ताः कामेन कर्मसु ॥ ३१
समुद्रं चाविशन्त्यन्ये नराः कामेन संयुताः ।
कामो हि विविधाकारः सर्वं कामेन संततम् ॥३२
नास्ति नासीन्नाभविष्यद्भूतं कामात्मकात्परम् ।
एतत्सारं महाराज धर्मार्थावत्र संश्रितौ ॥ ३३
नवनीतं यथा दध्नस्तथा कामोऽर्थधर्मतः ।
श्रेयस्तैलं च पिण्याकाद्धृतं श्रेय उदश्वितः ॥ ३४
श्रेयः पुष्पफलं काष्ठात्कामो धर्मार्थयोर्वरः ।
पुष्पतो मध्विव रसः कामात्संजायते सुखम् ॥३५

सुचारुवेषाभिरलंकृताभि-
र्मदोत्कटाभिः प्रियवादिनीभिः ।
रमस्व योषाभिरुपेत्य कामं
कामो हि राजंस्तरसाभिपाती ॥ ३६
बुद्धिर्ममैषा परिषत्स्थितस्य
मा भूद्विचारस्तव धर्मपुत्र ।
स्यात्संहितं सद्भिरफल्गुसारं
समेत्य वाक्यं परमानृशंस्यम् ॥ ३७
धर्मार्थकामाः सममेव सेव्या
यस्त्वेकसेवी स नरो जघन्यः ।
द्वयोस्तु दक्षं प्रवदन्ति मध्यं
स उत्तमो यो निरतस्त्रिवर्गे ॥ ३८
प्राज्ञः सुहृच्चन्दनसारलिप्तो
विचित्रमाल्याभरणैरुपेतः ।
ततो वचः संग्रहविग्रहेण
प्रोक्त्वा यवीयान्विरराम भीमः ॥ ३९
ततो मुहूर्तादथ धर्मराजो
वाक्यानि तेषामनुचिन्त्य सम्यक् ।
उवाच वाचावितथं स्मयन्वै
बहुश्रुतो धर्मभृतां वरिष्ठः ॥ ४०

निःसंशयं निश्चितधर्मशास्त्राः
सर्वे भवन्तो विदितप्रमाणाः ।
विज्ञातुकामस्य ममेह वाक्य-
मुक्तं यद्वै नैष्ठिकं तच्छ्रुतं मे ।
इह त्ववश्यं गदतो ममापि
वाक्यं निबोधध्वमनन्यभावाः ॥ ४१
यो वै न पापो निरतो न पुण्ये
नार्थे न धर्मे मनुजो न कामे ।
विमुक्तदोषः समलोष्टकाञ्चनः
स मुच्यते दुःखसुखार्थसिद्धेः ॥ ४२
भूतानि जातीमरणान्वितानि
जराविकारैश्च समन्वितानि ।
भूयश्च तैस्तैः प्रतिबोधितानि
मोक्षं प्रशंसन्ति न तं च विद्मः ॥ ४३
स्नेहे नबद्धस्य न सन्ति तानी-
त्येवं स्वयंभूर्भगवानुवाच ।
बुधाश्च निर्वाणपरा वदन्ति
तस्मान्न कुर्यात्प्रियमप्रियं च ॥ ४४
एतत्प्रधानं न तु कामकारो
यथा नियुक्तोऽस्मि तथा चरामि ।
भूतानि सर्वाणि विधिर्नियुङ्क्ते
विधिर्बलीयानिति वित्त सर्वे ॥ ४५
न कर्मणाप्नोत्यनवाप्यमर्थं
यद्भावि सर्वं भवतीति वित्त ।
त्रिवर्गहीनोऽपि हि विन्दतेऽर्थं
तस्मादिदं लोकहिताय गुह्यम् ॥ ४६
ततस्तदग्र्यं वचनं मनोनुगं
समस्तमाज्ञाय ततोऽतिहेतुमत् ।
तदा प्रणेदुश्च जहर्षिरे च ते
कुरुप्रवीराय च चक्रुरञ्जलीन् ॥ ४७
सुचारुवर्णाक्षरशब्दभूषितां
मनोनुगां निर्धुतवाक्यकण्टकाम् ।
निशम्य तां पार्थिव पार्थभाषितां
गिरं नरेन्द्राः प्रशशंसुरेव ते ।
पुनश्च पप्रच्छ सरिद्वरासुतं
ततः परं धर्ममहीनसत्त्वः ॥ ४८

इति श्रीमहाभारते शान्तिपर्वणि
एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

१६२

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ कुरूणां कीर्तिवर्धन ।
प्रश्नं कंचित्प्रवक्ष्यामि तन्मे व्याख्यातुमर्हसि ॥ १
कीदृशा मानवा सौम्याः कैः प्रीतिः परमा भवेत् ।
आयत्यां च तदात्वे च के क्षमास्तान्वदस्व मे ॥२
न हि तत्र धनं स्फीतं न च संबन्धिबान्धवाः ।
तिष्ठन्ति यत्र सुहृदस्तिष्ठन्तीति मतिर्मम ॥ ३
दुर्लभो हि सुहृच्छ्रोता दुर्लभश्च हितः सुहृत् ।
एतद्धर्मभृतां श्रेष्ठ सर्वं व्याख्यातुमर्हसि ॥ ४

भीष्म उवाच ।

संधेयान्पुरुषान्राजन्नसंधेयांश्च तत्त्वतः ।
वदतो मे निबोध त्वं निखिलेन युधिष्ठिर ॥ ५
लुब्धः क्रूरस्त्यक्तधर्मा निकृतः शठ एव च ।
क्षुद्रः पापसमाचारः सर्वशङ्की तथालसः ॥ ६
दीर्घसूत्रोऽनृजुः कष्टो गुरुदारप्रधर्षकः ।
व्यसने यः परित्यागी दुरात्मा निरपत्रपः ॥ ७
सर्वतः पापदर्शी च नास्तिको वेदनिन्दकः ।
संप्रकीर्णेन्द्रियो लोके यः कामनिरतश्चरेत् ॥ ८
असत्यो लोकविद्विष्टः समये चानवस्थितः ।
पिशुनोऽथाकृतप्रज्ञो मत्सरी पापनिश्चयः ॥ ९
दुःशीलोऽथाकृतात्मा च नृशंसः कितवस्तथा ।

मित्रैरर्थकृती नित्यमिच्छत्यर्थपरश्च यः ॥ १०
बहुतश्च यथाशक्ति यो न तुष्यति मन्दधीः ।
अमित्रमिव यो भुङ्क्ते सदा मित्रं नरर्षभ ॥ ११
अस्थानक्रोधनो यश्च अकस्माच्च विरज्यते ।
सुहृदश्चैव कल्याणानाशु त्यजति किल्बिषी ॥ १२
अल्पेऽप्यपकृते मूढस्तथाज्ञानात्कृतेऽपि च ।
कार्योपसेवी मित्रेषु मित्रद्वेषी नराधिप ॥ १३
शत्रुर्मित्रमुखो यश्च जिह्मप्रेक्षी विलोभनः ।
न रज्यति च कल्याणे यस्त्यजेत्तादृशं नरम् ॥ १४
पानपो द्वेषणः क्रूरो निर्घृणः परुषस्तथा ।
परोपतापी मित्रध्रुक्तथा प्राणिवधे रतः ॥ १५
कृतघ्नश्चाधमो लोके न संधेयः कथंचन ।
छिद्रान्वेषी न संधेयः संधेयानपि मे शृणु ॥ १६
कुलीना वाक्यसंपन्ना ज्ञानविज्ञानकोविदाः ।
मित्रज्ञाश्च कृतज्ञाश्च सर्वज्ञाः शोकवर्जिताः ॥ १७
माधुर्यगुणसंपन्नाः सत्यसंधा जितेन्द्रियाः ।
व्यायामशीलाः सततं भृतपुत्राः कुलोद्गताः ॥ १८
रूपवन्तो गुणोपेतास्तथालुब्धा जितश्रमाः ।
दोषैर्वियुक्ताः प्रथितैस्ते ग्राह्याः पार्थिवेन ह ॥ १९
यथाशक्तिसमाचाराः सन्तस्तुष्यन्ति हि प्रभो ।
नास्थाने क्रोधवन्तश्च न चाकस्माद्विरागिणः ॥ २०
विरक्ताश्च न रुष्यन्ति मनसाप्यर्थकोविदाः ।
आत्मानं पीडयित्वापि सुहृत्कार्यपरायणाः ।
न विरज्यन्ति मित्रेभ्यो वासो रक्तमिवाविकम् ॥२१
दोषांश्च लोभमोहादीनर्थेषु युवतिष्वथ ।
न दर्शयन्ति सुहृदां विश्वस्ता बन्धुवत्सलाः ॥ २२
लोष्टकाञ्चनतुल्यार्थाः सुहृत्स्वशठबुद्धयः ।
ये चरन्त्यनभीमाना निसृष्टार्थविभूषणाः ।
संगृह्णन्तः परिजनं स्वाम्यर्थपरमाः सदा ॥ २३
ईदृशैः पुरुषश्रेष्ठैः संधिं यः कुरुते नृपः ।
तस्य विस्तीर्यते राष्ट्रं ज्योत्स्ना ग्रहपतेरिव ॥ २४
शास्त्रनित्या जितक्रोधा बलवन्तो रणप्रियाः ।
क्षान्ताः शीलगुणोपेताः संधेयाः पुरुषोत्तमाः ॥२५
ये च दोषसमायुक्ता नराः प्रोक्ता मयानघ ।
तेषामप्यधमो राजन्कृतघ्नो मित्रघातकः ।
त्यक्तव्यः स दुराचारः सर्वेषामिति निश्चयः ॥२६

युधिष्ठिर उवाच ।

विस्तरेणार्थसंबन्धं श्रोतुमिच्छामि पार्थिव ।
मित्रद्रोही कृतघ्नश्च यः प्रोक्तस्तं च मे वद ॥ २७

भीष्म उवाच ।

हन्त ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
उदीच्यां दिशि यद्वृत्तं म्लेच्छेषु मनुजाधिप ॥२८
ब्राह्मणो मध्यदेशीयः कृष्णाङ्गो ब्रह्मवर्जितः ।
ग्रामं प्रेक्ष्य जनाकीर्णं प्राविशद्भैक्षकाङ्क्षया ॥ २९
तत्र दस्युर्धनयुतः सर्ववर्णविशेषवित् ।
ब्रह्मण्यः सत्यसंधश्च दाने च निरतोऽभवत् ॥ ३०
तस्य क्षयमुपागम्य ततो भिक्षामयाचत ।
प्रतिश्रयं च वासार्थं भिक्षां चैवाथ वार्षिकीम् ॥
प्रादात्तस्मै स विप्राय वस्त्रं च सदृशं नवम् ।
नारीं चापि वयोपेतां भर्त्रा विरहितां तदा ॥ ३२
एतत्संप्राप्य हृष्टात्मा दस्योः सर्वं द्विजस्तदा ।
तस्मिन्गृहवरे राजंस्तया रेमे स गौतमः ॥ ३३
कुटुम्बार्थेषु दस्योः स साहाय्यं चाप्यथाकरोत् ।
तत्रावसत्सोऽथ वर्षाः समृद्धे शबरालये ।
बाणवेध्ये परं यत्नमकरोच्चैव गौतमः ॥ ३४
चक्राङ्गांस्तु स नित्यं वै सर्वतो बाणगोचरे ।
जघान गौतमो राजन्यथा दस्युगणस्तथा ॥ ३५
हिंसापरो घृणाहीनः सदा प्राणिवधे रतः ।
गौतमः संनिकर्षेण दस्युभिः समतामियात् ॥ ३६
तथा तु वसतस्तस्य दस्युग्रामे सुखं तदा ।

अगच्छन्बहवो मासा निघ्नतः पक्षिणो बहून् ॥ ३७
ततः कदाचिदपरो द्विजस्तं देशमागमत् ।
जटी चीराजिनधरः स्वाध्यायपरमः शुचिः ॥ ३८
विनीतो नियताहारो ब्रह्मण्यो वेदपारगः ।
सब्रह्मचारी तद्देश्यः सखा तस्यैव सुप्रियम् ।
तं दस्युग्राममगमद्यत्रासौ गौतमोऽभवत् ॥ ३९
स तु विप्रगृहान्वेषी शूद्रान्नपरिवर्जकः ।
ग्रामे दस्युजनाकीर्णे व्यचरत्सर्वतोदिशम् ॥ ४०
ततः स गौतमगृहं प्रविवेश द्विजोत्तमः ।
गौतमश्चापि संप्राप्तस्तावन्योन्येन संगतौ ॥ ४१
चक्राङ्गभारहस्तं तं धनुष्पाणिं कृतागसम् ।
रुधिरेणावसिक्ताङ्गं गृहद्वारमुपागतम् ॥ ४२
तं दृष्ट्वा पुरुषादाभमपध्वस्तं क्षयागतम् ।
अभिज्ञाय द्विजो व्रीडामगमद्वाक्यमाह च ॥ ४३
किमिदं कुरुषे मौढ्याद्विप्रस्त्वं हि कुलोद्भवः ।
मध्यदेशपरिज्ञातो दस्युभावं गतः कथम् ॥ ४४
पूर्वान्स्मर द्विजाग्र्यांस्तान्प्रख्यातान्वेदपारगात् ।
येषां वंशेऽभिजातस्त्वमीदृशः कुलपांसनः ॥ ४५
अवबुध्यात्मनात्मानं सत्यं शीलं श्रुतं दमम् ।
अनुक्रोशं च संस्मृत्य त्यज वासमिमं द्विज ॥ ४६
एवमुक्तः स सुहृदा तदा तेन हितैषिणा ।
प्रत्युवाच ततो राजन्विनिश्चित्य तदार्तवत् ॥ ४७
अधनोऽस्मि द्विजश्रेष्ठ न च वेदविदप्यहम् ।
वृत्त्यर्थमिह संप्राप्तं विद्धि मां द्विजसत्तम ॥ ४८
त्वद्दर्शनात्तु विप्रर्षे कृतार्थं वेद्म्यहं द्विज ।
आत्मानं सह यास्यावः श्वो वसायेह शर्वरीम् ॥ ४९

इति श्रीमहाभारते शान्तिपर्वणि
द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

१६३

भीष्म उवाच ।

तस्यां निशायां व्युष्टायां गते तस्मिन्द्विजोत्तमे ।
निष्क्रम्य गौतमोऽगच्छत्समुद्रं प्रति भारत ॥ १
सामुद्रकान्स वणिजस्ततोऽपश्यत्स्थितान्पथि ।
स तेन सार्थेन सह प्रययौ सागरं प्रति ॥ २
स तु सार्थो महाराज कस्मिंश्चिद्गिरिगह्वरे ।
मत्तेन द्विरदेनाथ निहतः प्रायशोऽभवत् ॥ ३
स कथंचित्ततस्तस्मात्सार्थान्मुक्तो द्विजस्तदा ।
कांदिग्भूतो जीवितार्थी प्रदुद्रावोत्तरां दिशम् ॥ ४
स सर्वतः परिभ्रष्टः सार्थाद्देशात्तथार्थतः ।
एकाकी व्यद्रवत्तत्र वने किंपुरुषो यथा ॥ ५
स पन्थानमथासाद्य समुद्राभिसरं तदा ।
आससाद वनं रम्यं महत्पुष्पितपादपम् ॥ ६
सर्वर्तुकैराम्रवनैः पुष्पितैरुपशोभितम् ।
नन्दनोद्देशसदृशं यक्षकिंनरसेवितम् ॥ ७
शालतालधवाश्वत्थत्वचागुरुवनैस्तथा ।
चन्दनस्य च मुख्यस्य पादपैरुपशोभितम् ।
गिरिप्रस्थेषु रम्येषु शुभेषु सुसुगन्धिषु ॥ ८
समन्ततो द्विजश्रेष्ठा वल्गु कूजन्ति तत्र वै ।
मनुष्यवदनास्त्वन्ये भारुण्डा इति विश्रुताः ।
भूलिङ्गशकुनाश्चान्ये समुद्रं सर्वतोऽभवन् ॥ ९
स तान्यतिमनोज्ञानि विहंगाभिरुतानि वै ।
शृण्वन्सुरमणीयानि विप्रोऽगच्छत गौतमः ॥ १०
ततोऽपश्यत्सुरम्ये स सुवर्णसिकताचिते ।
देशभागे समे चित्रे स्वर्गोद्देशसमप्रभे ॥ ११
श्रिया जुष्टं महावृक्षं न्यग्रोधं परिमण्डलम् ।
शाखाभिरनुरूपाभिर्भूषितं छत्रसंनिभम् ॥ १२
तस्य मूलं सुसंसिक्तं वरचन्दनवारिणा ।
दिव्यपुष्पान्वितं श्रीमत्पितामहसदोपमम् ॥ १३

तं दृष्ट्वा गौतमः प्रीतो मुनिकान्तमनुत्तमम् ।
मेध्यं सुरगृहप्रख्यं पुष्पितैः पादपैर्वृतम् ।
तमागम्य मुदा युक्तस्तस्याधस्तादुपाविशत् ॥ १४
तत्रासीनस्य कौरव्य गौतमस्य सुखः शिवः ।
पुष्पाणि समुपस्पृश्य प्रववावनिलः शुचिः ।
ह्लादयन्सर्वगात्राणि गौतमस्य तदा नृप ॥ १५
स तु विप्रः परिश्रान्तः स्पृष्टः पुण्येन वायुना ।
सुखमासाद्य सुष्वाप भास्करश्चास्तमभ्यगात् ॥ १६
ततोऽस्तं भास्करे याते संध्याकाल उपस्थिते ।
आजगाम स्वभवनं ब्रह्मलोकात्खगोत्तमः ॥ १७
नाडीजङ्घ इति ख्यातो दयितो ब्रह्मणः सखा ।
बकराजो महाप्राज्ञः कश्यपस्यात्मसंभवः ॥ १८
राजधर्मेति विख्यातो बभूवाप्रतिमो भुवि ।
देवकन्यासुतः श्रीमान्विद्वान्देवपतिप्रभः ॥ १९
मृष्टहाटकसंछन्नो भूषणैरर्कसंनिभैः ।
भूषितः सर्वगात्रेषु देवगर्भः श्रिया ज्वलन् ॥ २०
तमागतं द्विजं दृष्ट्वा विस्मितो गौतमोऽभवत् ।
क्षुत्पिपासापरीतात्मा हिंसार्थी चाप्यवैक्षत ॥ २१

राजधर्मोवाच ।

स्वागतं भवते विप्र दिष्ट्या प्राप्तोऽसि मे गृहम् ।
अस्तं च सविता यातः संध्येयं समुपस्थिता ॥२२
मम त्वं निलयं प्राप्तः प्रियातिथिरनिन्दितः ।
पूजितो यास्यसि प्रातर्विधिदृष्टेन कर्मणा ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

१६४

भीष्म उवाच ।

गिरं तां मधुरां श्रुत्वा गौतमो विस्मितस्तदा ।
कौतूहलान्वितो राजन्राजधर्माणमैक्षत ॥ १

राजधर्मोवाच ।

भोः कश्यपस्य पुत्रोऽहं माता दाक्षायणी च मे ।
अतिथिस्त्वं गुणोपेतः स्वागतं ते द्विजर्षभ ॥ २

भीष्म उवाच ।

तस्मै दत्त्वा स सत्कारं विधिदृष्टेन कर्मणा ।
शालपुष्पमयीं दिव्यां बृसीं समुपकल्पयत् ॥ ३
भगीरथरथाक्रान्तान्देशान्गङ्गानिषेवितान् ।
ये चरन्ति महामीनास्तांश्च तस्यान्वकल्पयत् ॥ ४
वह्निं चापि सुसंदीप्तं मीनांश्चैव सुपीवरान् ।
स गौतमायातिथये न्यवेदयत काश्यपः ॥ ५
भुक्तवन्तं च तं विप्रं प्रीतात्मानं महामनाः ।
क्लमापनयनार्थं स पक्षाभ्यामभ्यवीजयत् ॥ ६
ततो विश्रान्तमासीनं गोत्रप्रश्नमपृच्छत ।
सोऽब्रवीद्गौतमोऽस्मीति ब्राह्मं नान्यदुदाहरत् ॥ ७
तस्मै पर्णमयं दिव्यं दिव्यपुष्पाधिवासितम् ।
गन्धाढ्यं शयनं प्रादात्स शिश्ये तत्र वै सुखम् ॥८
अथोपविष्टं शयने गौतमं बकराट् तदा ।
पप्रच्छ काश्यपो वाग्मी किमागमनकारणम् ॥ ९
ततोऽब्रवीद्गौतमस्तं दरिद्रोऽहं महामते ।
समुद्रगमनाकाङ्क्षी द्रव्यार्थमिति भारत ॥ १०
तं काश्यपोऽब्रवीत्प्रीतो नोत्कण्ठां कर्तुमर्हसि ।
कृतकार्यो द्विजश्रेष्ठ सद्रव्यो यास्यसे गृहान् ॥ ११
चतुर्विधा ह्यर्थगतिर्बृहस्पतिमतं यथा ।
पारंपर्यं तथा दैवं कर्म मित्रमिति प्रभो ॥ १२
प्रादुर्भूतोऽस्मि ते मित्रं सुहृत्त्वं च मम त्वयि ।
सोऽहं तथा यतिष्यामि भविष्यसि यथार्थवान् ॥ १३
ततः प्रभातसमये सुखं पृष्ट्वाब्रवीदिदम् ।
गच्छ सौम्य पथानेन कृतकृत्यो भविष्यसि ॥१४
इतस्त्रियोजनं गत्वा राक्षसाधिपतिर्महान् ।
विरूपाक्ष इति ख्यातः सखा मम महाबलः ॥ १५

तं गच्छ द्विजमुख्य त्वं मम वाक्यप्रचोदितः ।
कामानभीप्सितांस्तुभ्यं दाता नास्त्यत्र संशयः॥१६
इत्युक्तः प्रययौ राजन्गौतमो विगतक्लमः ।
फलान्यमृतकल्पानि भक्षयन्स्स यथेष्टतः ॥ १७
चन्दनागुरुमुख्यानि त्वक्पत्राणां वनानि च ।
तस्मिन्पथि महाराज सेवमानो द्रुतं ययौ ॥ १८
ततो मेरुव्रजं नाम नगरं शैलतोरणम् ।
शैलप्राकारवप्रं च शैलयन्त्रार्गलं तथा ॥ १९
विदितश्चाभवत्तस्य राक्षसेन्द्रस्य धीमतः ।
प्रहितः सुहृदा राजन्प्रीयता वै प्रियातिथिः ॥ २०
ततः स राक्षसेन्द्रः स्वान्प्रेष्यानाह युधिष्ठिर ।
गौतमो नगरद्वाराच्छीघ्रमानीयतामिति ॥ २१
ततः पुरवरात्तस्मात्पुरुषाः श्वेतवेष्टनाः ।
गौतमेत्यभिभाषन्तः पुरद्वारमुपागमन् ॥ २२
ते तमूचुर्महाराज प्रेष्या रक्षःपतेर्द्विजम् ।
त्वरस्व तूर्णमागच्छ राजा त्वां द्रष्टुमिच्छति ॥ २३
राक्षसाधिपतिर्वीरो विरूपाक्ष इति श्रुतः ।
स त्वां त्वरति वै द्रष्टुं तत्क्षिप्रं संविधीयताम् ॥ २४
ततः स प्राद्रवद्विप्रो विस्मयाद्विगतक्लमः ।
गौतमो नगरर्द्धिं तां पश्यन्परमविस्मितः ॥ २५
तैरेव सहितो राज्ञो वेश्म तूर्णमुपाद्रवत् ।
दर्शनं राक्षसेन्द्रस्य काङ्क्षमाणो द्विजस्तदा ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

१६५

भीष्म उवाच ।

ततः स विदितो राज्ञः प्रविश्य गृहमुत्तमम् ।
पूजितो राक्षसेन्द्रेण निषसादासनोत्तमे ॥ १
पृष्टश्च गोत्रचरणं स्वाध्यायं ब्रह्मचारिकम् ।
न तत्र व्याजहारान्यद्गोत्रमात्रादृते द्विजः ॥ २
ब्रह्मवर्चसहीनस्य स्वाध्यायविरतस्य च ।
गोत्रमात्रविदो राजा निवासं समपृच्छत ॥ ३
क्व ते निवासः कल्याण किंगोत्रा ब्राह्मणी च ते ।
तत्त्वं ब्रूहि न भीः कार्या विश्रमस्व यथासुखम् ॥४

गौतम उवाच ।

मध्यदेशप्रसूतोऽहं वासो मे शबरालये ।
शूद्रा पुनर्भूर्भार्या मे सत्यमेतद्ब्रवीमि ते ॥ ५

भीष्म उवाच ।

ततो राजा विममृशे कथं कार्यमिदं भवेत् ।
कथं वा सुकृतं मे स्यादिति बुद्ध्यान्वचिन्तयत् ॥ ६
अयं वै जननाद्विप्रः सुहृत्तस्य महात्मनः ।
संप्रेषितश्च तेनायं काश्यपेन ममान्तिकम् ॥ ७
तस्य प्रियं करिष्यामि स हि मामाश्रितः सदा ।
भ्राता मे बान्धवश्चासौ सखा च हृदयंगमः ॥ ८
कार्त्तिक्यामद्य भोक्तारः सहस्रं मे द्विजोत्तमाः ।
तत्रायमपि भोक्ता वै देयमस्मै च मे धनम् ॥ ९
ततः सहस्रं विप्राणां विदुषां समलंकृतम् ।
स्नातानामनुसंप्राप्तमहतक्षौमवाससाम् ॥ १०
तानागतान्द्विजश्रेष्ठान्विरूपाक्षो विशां पते ।
यथार्हं प्रतिजग्राह विधिदृष्टेन कर्मणा ॥ ११
बृस्यस्तेषां तु संन्यस्ता राक्षसेन्द्रस्य शासनात् ।
भूमौ वरकुथास्तीर्णाः प्रेष्यैर्भरतसत्तम ॥ १२
तासु ते पूजिता राज्ञा निषण्णा द्विजसत्तमाः ।
व्यराजन्त महाराज नक्षत्रपतयो यथा ॥ १३
ततो जाम्बूनदाः पात्रीर्वज्राङ्का विमलाः शुभाः ।
वरान्नपूर्णा विप्रेभ्यः प्रादान्मधुघृताप्लुताः ॥ १४
तस्य नित्यं तथाषाढ्यां माघ्यां च बहवो द्विजाः ।
ईप्सितं भोजनवरं लभन्ते सत्कृतं सदा ॥ १५
विशेषतस्तु कार्त्तिक्यां द्विजेभ्यः संप्रयच्छति ।
शरद्व्यपाये रत्नानि पौर्णमास्यामिति श्रुतिः ॥ १६

सुवर्णं रजतं चैव मणीनथ च मौक्तिकम् ।
वज्रान्महाधनांश्चैव वैडूर्याजिनराङ्कवान् ॥ १७
रत्नराशीन्विनिक्षिप्य दक्षिणार्थे स जारत ।
ततः प्राह द्विजश्रेष्ठान्विरूपाक्षो महायशाः ॥ १८
गृह्णीत रत्नान्येतानि यथोत्साहं यथेष्टतः ।
येषु येषु च भाण्डेषु भुक्तं वो द्विजसत्तमाः ।
तान्येवादाय गच्छध्वं स्ववेश्मानीति भारत ॥ १९
इत्युक्तवचने तस्मिन्राक्षसेन्द्रे महात्मनि ।
यथेष्टं तानि रत्नानि जगृहुर्ब्राह्मणर्षभाः ॥ २०
ततो महार्हैस्ते सर्वे रत्नैरभ्यर्चिताः शुभैः ।
ब्राह्मणा मृष्टवसनाः सुप्रीताः स्म तदाभवन् ॥ २१
ततस्तान्राक्षसेन्द्रश्च द्विजानाह पुनर्वचः ।
नानादिगागतान्राजन्राक्षसान्प्रतिषिध्य वै ॥ २२
अद्यैकदिवसं विप्रा न वोऽस्तीह भयं कचित् ।
राक्षसेभ्यः प्रमोदध्वमिष्टतो यात माचिरम् ॥ २३
ततः प्रदुद्रुवुः सर्वे विप्रसंघाः समन्ततः ।
गौतमोऽपि सुवर्णस्य भारमादाय सत्वरः ॥ २४
कृच्छ्रात्समुद्वहन्वीर न्यग्रोधं समुपागमत् ।
न्यषीदच्च परिश्रान्तः क्लान्तश्च क्षुधितश्च ह ॥ २५
ततस्तमभ्यगाद्राजन्राजधर्मा खगोत्तमः ।
स्वागतेनाभ्यनन्दच्च गौतमं मित्रवत्सलः ॥ २६
तस्य पक्षाग्रविक्षेपैः क्लमं व्यपनयत्खगः ।
पूजां चाप्यकरोद्धीमान्भोजनं चाप्यकल्पयत् ॥२७
स भुक्तवान्सुविश्रान्तो गौतमोऽचिन्तयत्तदा ।
हाटकस्याभिरूपस्य भारोऽयं सुमहान्मया ।
गृहीतो लोभमोहाद्वै दूरं च गमनं मम ॥ २८
न चास्ति पथि भोक्तव्यं प्राणसंधारणं मम ।
किं कृत्वा धारयेयं वै प्राणानित्यभ्यचिन्तयत् ॥२९
ततः स पथि भोक्तव्यं प्रेक्षमाणो न किंचन ।
कृतघ्नः पुरुषव्याघ्र मनसेदमचिन्तयत् ॥ ३०
अयं बकपतिः पार्श्वे मांसराशिः स्थितो मम ।
इमं हत्वा गृहीत्वा च यास्येऽहं समभिद्रुतम् ॥३१

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

१६६

भीष्म उवाच ।

अथ तत्र महार्चिष्माननलो वातसारथिः ।
तस्याविदूरे रक्षार्थं खगेन्द्रेण कृतोऽभवत् ॥ १
स चापि पार्श्वे सुष्वाप विश्वस्तो बकराट् तदा ।
कृतघ्नस्तु स दुष्टात्मा तं जिघांसुरजागरत् ॥ २
ततोऽलातेन दीप्तेन विश्वस्तं निजघान तम् ।
निहत्य च मुदा युक्तः सोऽनुबन्धं न दृष्टवान् ॥ ३
स तं विपक्षरोमाणं कृत्वाग्नावपचत्तदा ।
तं गृहीत्वा सुवर्णं च ययौ द्रुततरं द्विजः ॥ ४
ततोऽन्यस्मिन्गते चाह्नि विरूपाक्षोऽब्रवीत्सुतम् ।
न प्रेक्षे राजधर्माणमद्य पुत्र खगोत्तमम् ॥ ५
स पूर्वसंध्यां ब्रह्माणं वन्दितुं याति सर्वदा ।
मां चादृष्ट्वा कदाचित्स न गच्छति गृहान्खगः ॥६
उभे द्विरात्रं संध्ये वै नाभ्यगात्स ममालयम् ।
तस्मान्न शुध्यते भावो मम स ज्ञायतां सुहृत् ॥ ७
स्वाध्यायेन वियुक्तो हि ब्रह्मवर्चसवर्जितः ।
तं गतस्तत्र मे शङ्का हन्यात्तं स द्विजाधमः ॥ ८
दुराचारस्तु दुर्बुद्धिरिङ्गितैर्लक्षितो मया ।
निष्क्रियो दारुणाकारः कृष्णो दस्युरिवाधमः ॥ ९
गौतमः स गतस्तत्र तेनोद्विग्नं मनो मम ।
पुत्र शीघ्रमितो गत्वा राजधर्मनिवेशनम् ।
ज्ञायतां स विशुद्धात्मा यदि जीवति माचिरम् ॥१०
स एवमुक्तस्त्वरितो रक्षोभिः सहितो ययौ ।
न्यग्रोधं तत्र चापश्यत्कङ्कालं राजधर्मणः ॥ ११

स रुदन्नगमत्पुत्रो राक्षसेन्द्रस्य धीमतः ।
त्वरमाणः परं शक्त्या गौतमग्रहणाय वै ॥ १२
ततोऽविदूरे जगृहुर्गौतमं राक्षसास्तदा ।
राजधर्मशरीरं च पक्षास्थिचरणोज्झितम् ॥ १३
तमादायाथ रक्षांसि द्रुतं मेरुव्रजं ययुः ।
राज्ञश्च दर्शयामासुः शरीरं राजधर्मणः ।
कृतघ्नं पुरुषं तं च गौतमं पापचेतसम् ॥ १४
रुरोद राजा तं दृष्ट्वा सामात्यः सपुरोहितः ।
आर्तनादश्च सुमहानभूत्तस्य निवेशने ॥ १५
सस्त्रीकुमारं च पुरं बभूवास्वस्थमानसम् ।
अथाब्रवीन्नृपः पुत्रं पापोऽयं वध्यतामिति ॥ १६
अस्य मांसैरिमे सर्वे विहरन्तु यथेष्टतः ।
पापचारः पापकर्मा पापात्मा पापनिश्चयः ।
हन्तव्योऽयं मम मतिर्भवद्भिरिति राक्षसाः ॥ १७
इत्युक्ता राक्षसेन्द्रेण राक्षसा घोरविक्रमाः ।
नैच्छन्त तं भक्षयितुं पापकर्मायमित्युत ॥ १८
दस्यूनां दीयतामेष साध्वद्य पुरुषाधमः ।
इत्यूचुस्तं महाराज राक्षसेन्द्रं निशाचराः ॥ १९
शिरोभिश्च गता भूमिमूचू रक्षोगणाधिपम् ।
न दातुमर्हसि त्वं नो भक्षणायास्य किल्बिषम् ॥२०
एवमस्त्विति तानाह राक्षसेन्द्रो निशाचरान् ।
दस्यूनां दीयतामेष कृतघ्नोऽद्यैव राक्षसाः ॥ २१
इत्युक्ते तस्य ते दासाः शूलमुद्गरपाणयः ।
छित्त्वा तं खण्डशः पापं दस्युभ्यः प्रददुस्तदा ॥२२
दस्यवश्चापि नैच्छन्त तमत्तुं पापकारिणम् ।
क्रव्यादा अपि राजेन्द्र कृतघ्नं नोपभुञ्जते ॥ २३
ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते तथा ।
निष्कृतिर्विहिता राजन्कृतघ्ने नास्ति निष्कृतिः ॥२४
मित्रद्रोही नृशंसश्च कृतघ्नश्च नराधमः ।
क्रव्यादैः कृमिभिश्चान्यैर्न भुज्यन्ते हि तादृशाः ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

१६७

भीष्म उवाच ।

ततश्चितां बकपतेः कारयामास राक्षसः ।
रत्नैर्गन्धैश्च बहुभिर्वस्त्रैश्च समलंकृताम् ॥ १
तत्र प्रज्वाल्य नृपते बकराजं प्रतापवान् ।
प्रेतकार्याणि विधिवद्राक्षसेन्द्रश्चकार ह ॥ २
तस्मिन्कालेऽथ सुरभिर्देवी दाक्षायणी शुभा ।
उपरिष्टात्ततस्तस्य सा बभूव पयस्विनी ॥ ३
तस्या वक्त्राच्च्युतः फेनः क्षीरमिश्रस्तदानघ ।
सोऽपतद्वै ततस्तस्यां चितायां राजधर्मणः ॥ ४
ततः संजीवितस्तेन बकराजस्तदानघ ।
उत्पत्य च समेयाय विरूपाक्षं बकाधिपः ॥ ५
ततोऽभ्ययाद्देवराजो विरूपाक्षपुरं तदा ।
प्राह चेदं विरूपाक्षं दिष्ट्यायं जीवतीत्युत ॥ ६
श्रावयामास चेन्द्रस्तं विरूपाक्षं पुरातनम् ।
यथा शापः पुरा दत्तो ब्रह्मणा राजधर्मणः ॥ ७
यदा बकपती राजन्ब्रह्माणं नोपसर्पति ।
ततो रोषादिदं प्राह बकेन्द्राय पितामहः ॥ ८
यस्मान्मूढो मम सदो नागतोऽसौ बकाधमः ।
तस्माद्वधं स दुष्टात्मा नचिरात्समवाप्स्यति ॥ ९
तदायं तस्य वचनान्निहतो गौतमेन वै ।
तेनैवामृतसिक्तश्च पुनः संजीवितो बकः ॥ १०
राजधर्मा ततः प्राह प्रणिपत्य पुरंदरम् ।
यदि तेऽनुग्रहकृता मयि बुद्धिः पुरंदर ।
सखायं मे सुदयितं गौतमं जीवयेत्युत ॥ ११

तस्य वाक्यं समाज्ञाय वासवः पुरुषर्षभ ।
संजीवयित्वा सख्ये वै प्रादात्तं गौतमं तदा ॥ १२
सभाण्डोपस्करं राजंस्तमासाद्य बकाधिपः ।
संपरिष्वज्य सुहृदं प्रीत्या परमया युतः ॥ १३
अथ तं पापकर्माणं राजधर्मा बकाधिपः ।
विसर्जयित्वा सधनं प्रविवेश स्वमालयम् ॥ १४
यथोचितं च स बको ययौ ब्रह्मसदस्तदा ।
ब्रह्मा च तं महात्मानमातिथ्येनाभ्यपूजयत् ॥ १५
गौतमश्चापि संप्राप्य पुनस्तं शबरालयम् ।
शूद्रायां जनयामास पुत्रान्दुष्कृतकारिणः ॥ १६
शापश्च सुमहांस्तस्य दत्तः सुरगणैस्तदा ।
कुक्षौ पुनर्भ्वां भार्यायां जनयित्वा चिरात्सुतान् ।
निरयं प्राप्स्यति महत्कृतघ्नोऽयमिति प्रभो ॥ १७
एतत्प्राह पुरा सर्वं नारदो मम भारत ।
संस्मृत्य चापि सुमहदाख्यानं पुरुषर्षभ ।
मयापि भवते सर्वं यथावदुपवर्णितम् ॥ १८
कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम् ।
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः ॥१९
मित्रद्रोहो न कर्तव्यः पुरुषेण विशेषतः ।
मित्रध्रुङ्निरयं घोरमनन्तं प्रतिपद्यते ॥ २०
कृतज्ञेन सदा भाव्यं मित्रकामेन चानघ ।
मित्रात्प्रभवते सत्यं मित्रात्प्रभवते बलम् ।
सत्कारैरुत्तमैर्मित्रं पूजयेत विचक्षणः ॥ २१
परित्याज्यो बुधैः पापः कृतघ्नो निरपत्रपः ।
मित्रद्रोही कुलाङ्गारः पापकर्मा नराधमः ॥ २२
एष धर्मभृतां श्रेष्ठ प्रोक्तः पापो मया तव ।
मित्रद्रोही कृतघ्नो वै किं भूयः श्रोतुमिच्छसि ॥२३

वैशंपायन उवाच ।

एतच्छ्रुत्वा तदा वाक्यं भीष्मेणोक्तं महात्मना ।
युधिष्ठिरः प्रीतमना बभूव जनमेजय ॥ २४

इति श्रीमहाभारते शान्तिपर्वणि
सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

॥ समाप्तमापद्धर्मपर्व ॥

१६८

युधिष्ठिर उवाच ।

धर्माः पितामहेनोक्ता राजधर्माश्रिताः शुभाः ।
धर्ममाश्रमिणां श्रेष्ठं वक्तुमर्हसि पार्थिव ॥ १

भीष्म उवाच ।

सर्वत्र विहितो धर्मः स्वर्ग्यः सत्यफलं तपः ।
बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया ॥ २
यस्मिन्यस्मिंस्तु विनये यो यो याति विनिश्चयम् ।
स तमेवाभिजानाति नान्यं भरतसत्तम ॥ ३
यथा यथा च पर्येति लोकतन्त्रमसारवत् ।
तथा तथा विरागोऽत्र जायते नात्र संशयः ॥ ४
एवं व्यवसिते लोके बहुदोषे युधिष्ठिर ।
आत्ममोक्षनिमित्तं वै यतेत मतिमान्नरः ॥ ५

युधिष्ठिर उवाच ।

नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
यया बुद्ध्या नुदेच्छोकं तन्मे ब्रूहि पितामह ॥ ६

भीष्म उवाच ।

नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
अहो दुःखमिति ध्यायञ्शोकस्यापचितिं चरेत् ॥७
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा सेनजितं विप्रः कश्चिदित्यब्रवीद्वचः ॥ ८
पुत्रशोकाभिसंतप्तं राजानं शोकविह्वलम् ।
विषण्णवदनं दृष्ट्वा विप्रो वचनमब्रवीत् ॥ ९
किं नु खल्वसि मूढस्त्वं शोच्यः किमनुशोचसि ।
यदा त्वामपि शोचन्तः शोच्या यास्यन्ति तां गतिम् ॥

त्वं चैवाहं च ये चान्ये त्वां राजन्पर्युपासते ।
सर्वे तत्र गमिष्यामो यत एवागता वयम् ॥ ११

सेनजिदुवाच ।

का बुद्धिः किं तपो विप्र कः समाधिस्तपोधन ।
किं ज्ञानं किं श्रुतं वा ते यत्प्राप्य न विषीदसि॥ १२

ब्राह्मण उवाच ।

पश्य भूतानि दुःखेन व्यतिषक्तानि सर्वशः ।
आत्मापि चायं न मम सर्वा वा पृथिवी मम ॥१३
यथा मम तथान्येषामिति बुद्ध्या न मे व्यथा ।
एतां बुद्धिमहं प्राप्य न प्रहृष्ये न च व्यथे ॥१४
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥ १५
एवं पुत्राश्च पौत्राश्च ज्ञातयो बान्धवास्तथा ।
तेषु स्नेहो न कर्तव्यो विप्रयोगो हि तैर्ध्रुवम् ॥१६
अदर्शनादापतितः पुनश्चादर्शनं गतः ।
न त्वासौ वेद न त्वं तं कः सन्कमनुशोचसि ॥१७
तृष्णार्तिप्रभवं दुःखं दुःखार्तिप्रभवं सुखम् ।
सुखात्संजायते दुःखमेवमेतत्पुनः पुनः ।
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ॥ १८
सुखात्त्वं दुःखमापन्नः पुनरापत्स्यसे सुखम् ।
न नित्यं लभते दुःखं न नित्यं लभते सुखम् ॥१९
नालं सुखाय सुहृदो नालं दुःखाय शत्रवः ।
न च प्रज्ञालमर्थानां न सुखानामलं धनम् ॥ २०
न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ॥ २१
बुद्धिमन्तं च मूढं च शूरं भीरुं जडं कविम् ।
दुर्बलं बलवन्तं च भागिनं भजते सुखम् ॥ २२
धेनुर्वत्सस्य गोपस्य स्वामिनस्तस्करस्य च ।
पयः पिबति यस्तस्या धेनुस्तस्येति निश्चयः ॥ २३
ये च मूढतमा लोके ये च बुद्धेः परं गताः ।
ते नराः सुखमेधन्ते क्लिश्यत्यन्तरितो जनः ॥ २४
अन्त्येषु रेमिरे धीरा न ते मध्येषु रेमिरे ।
अन्त्यप्राप्तिं सुखामाहुर्दुःखमन्तरमन्तयोः ॥ २५
ये तु बुद्धिसुखं प्राप्ता द्वंद्वातीता विमत्सराः ।
तान्नैवार्था न चानर्था व्यथयन्ति कदाचन ॥२६
अथ ये बुद्धिमप्राप्ता व्यतिक्रान्ताश्च मूढताम् ।
तेऽतिवेलं प्रहृष्यन्ति संतापमुपयान्ति च ॥ २७
नित्यप्रमुदिता मूढा दिवि देवगणा इव ।
अवलेपेन महता परिदब्धा विचेतसः ॥ २८
सुखं दुःखान्तमालस्यं दुःखं दाक्ष्यं सुखोदयम् ।
भूतिश्चैव श्रिया सार्धं दक्षे वसति नालसे ॥ २९
सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम् ।
प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः ॥ ३०
शोकस्थानसहस्राणि हर्षस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ३१
बुद्धिमन्तं कृतप्रज्ञं शुश्रूषुमनसूयकम् ।
दान्तं जितेन्द्रियं चापि शोको न स्पृशते नरम् ॥३२
एतां बुद्धिं समास्थाय गुप्तचित्तश्चरेद्बुधः ।
उदयास्तमयज्ञं हि न शोकः स्प्रष्टुमर्हति ॥ ३३
यन्निमित्तं भवेच्छोकस्त्रासो वा दुःखमेव वा ।
आयासो वा यतोमूलस्तदेकाङ्गमपि त्यजेत् ॥ ३४
यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते ।
कामानुसारी पुरुषः कामाननु विनश्यति ॥ ३५
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ ३६
पूर्वदेहकृतं कर्म शुभं वा यदि वाशुभम् ।
प्राज्ञं मूढं तथा शूरं भजते यादृशं कृतम् ॥ ३७
एवमेव किलैतानि प्रियाण्येवाप्रियाणि च ।
जीवेषु परिवर्तन्ते दुःखानि च सुखानि च ॥ ३८
तदेवं बुद्धिमास्थाय सुखं जीवेद्गुणान्वितः ।

सर्वान्कामाञ्जुगुप्सेत सङ्गान्कुर्वीत पृष्ठतः ।
वृत्त एष हृदि प्रौढो मृत्युरेष मनोमयः ॥ ३९
यदा संहरते कामान्कूर्मोऽङ्गानीव सर्वशः ।
तदात्मज्योतिरात्मा च आत्मन्येव प्रसीदति ॥ ४०
किंचिदेव ममत्वेन यदा भवति कल्पितम् ।
तदेव परितापार्थं सर्वं संपद्यते तदा ॥ ४१
न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ ४२
उभे सत्यानृते त्यक्त्वा शोकानन्दौ भयाभये ।
प्रियाप्रिये परित्यज्य प्रशान्तात्मा भविष्यति ॥ ४३
यदा न कुरुते धीरः सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ४४
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥
अत्र पिङ्गलया गीता गाथाः श्रूयन्ति पार्थिव ।
यथा सा कृच्छ्रकालेऽपि लेभे धर्मं सनातनम् ॥४६
संकेते पिङ्गला वेश्या कान्तेनासीद्विनाकृता ।
अथ कृच्छ्रगता शान्तां बुद्धिमास्थापयत्तदा ॥ ४७

पिङ्गलोवाच ।

उन्मत्ताहमनुन्मत्तं कान्तमन्ववसं चिरम् ।
अन्तिके रमणं सन्तं नैनमध्यगमं पुरा ॥ ४८
एकस्थूणं नवद्वारमपिधास्याम्यगारकम् ।
का हि कान्तमिहायान्तमयं कान्तेति मंस्यते ॥ ४९
अकामाः कामरूपेण धूर्ता नरकरूपिणः ।
न पुनर्वञ्चयिष्यन्ति प्रतिबुद्धास्मि जागृमि ॥ ५०
अनर्थोऽपि भवत्यर्थो दैवात्पूर्वकृतेन वा ।
संबुद्धाहं निराकारा नाहमद्याजितेन्द्रिया ॥ ५१
सुखं निराशः स्वपिति नैराश्यं परमं सुखम् ।
आशामनाशां कृत्वा हि सुखं स्वपिति पिङ्गला ॥

भीष्म उवाच ।

एतैश्चान्यैश्च विप्रस्य हेतुमद्भिः प्रभाषितैः ।
पर्यवस्थापितो राजा सेनजिन्मुमुदे सुखम् ॥ ५३

इति श्रीमहाभारते शान्तिपर्वणि
अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

१६९

युधिष्ठिर उवाच ।

अतिक्रामति कालेऽस्मिन्सर्वभूतक्षयावहे ।
किं श्रेयः प्रतिपद्येत तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पितुः पुत्रेण संवादं तन्निबोध युधिष्ठिर ॥ २
द्विजातेः कस्यचित्पार्थ स्वाध्यायनिरतस्य वै ।
बभूव पुत्रो मेधावी मेधावी नाम नामतः ॥ ३
सोऽब्रवीत्पितरं पुत्रः स्वाध्यायकरणे रतम् ।
मोक्षधर्मार्थकुशलो लोकतत्त्वविचक्षणः ॥ ४
धीरः किं स्वित्तात कुर्यात्प्रजान-
न्क्षिप्रं ह्यायुर्भ्रश्यते मानवानाम् ।
पितस्तदाचक्ष्व यथार्थयोगं
ममानुपूर्व्या येन धर्मं चरेयम् ॥ ५

पितोवाच ।

वेदानधीत्य ब्रह्मचर्येण पुत्र
पुत्रानिच्छेत्पावनार्थं पितॄणाम् ।
अग्नीनाधाय विधिवच्चेष्टयज्ञो
वनं प्रविश्याथ मुनिर्बुभूषेत् ॥ ६

पुत्र उवाच ।

एवमभ्याहते लोके समन्तात्परिवारिते ।
अमोघासु पतन्तीषु किं धीर इव भाषसे ॥ ७

पितोवाच ।

कथमभ्याहतो लोकः केन वा परिवारितः ।
अमोघाः काः पतन्तीह किं नु भीषयसीव माम् ॥ ८

पुत्र उवाच ।

मृत्युनाभ्याहतो लोको जरया परिवारितः ।
अहोरात्राः पतन्त्येते ननु कस्मान्न बुध्यसे ॥ ९
यदाहमेतज्जानामि न मृत्युस्तिष्ठतीति ह ।
सोऽहं कथं प्रतीक्षिष्ये जालेनापिहितश्चरन् ॥ १०
रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा ।
गाधोदके मत्स्य इव सुखं विन्देत कस्तदा ।
तदेव वन्ध्यं दिवसमिति विद्याद्विचक्षणः ॥ ११
अनवाप्तेषु कामेषु मृत्युरभ्येति मानवम् ।
शष्पाणीव विचिन्वन्तमन्यत्रगतमानसम् ।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ॥ १२
अद्यैव कुरु यच्छ्रेयो मा त्वा कालोऽत्यगादयम् ।
अकृतेष्वेव कार्येषु मृत्युर्वै संप्रकर्षति ॥ १३
श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ।
को हि जानाति कस्याद्य मृत्युसेना निवेक्ष्यते॥ १४
युवैव धर्मशीलः स्यादनिमित्तं हि जीवितम् ।
कृते धर्मे भवेत्कीर्तिरिह प्रेत्य च वै सुखम् ॥ १५
मोहेन हि समाविष्टः पुत्रदारार्थमुद्यतः ।
कृत्वा कार्यमकार्यं वा पुष्टिमेषां प्रयच्छति ॥ १६
तं पुत्रपशुसंमत्तं व्यासक्तमनसं नरम् ।
सुप्तं व्याघ्रं महौघो वा मृत्युरादाय गच्छति ॥१७
संचिन्वानकमेवैकं कामानामवितृप्तकम् ।
व्याघ्रः पशुमिवादाय मृत्युरादाय गच्छति ॥ १८
इदं कृतमिदं कार्यमिदमन्यत्कृताकृतम् ।
एवमीहासुखासक्तं कृतान्तः कुरुते वशे ॥ १९
कृतानां फलमप्राप्तं कर्मणां फलसङ्गिनम् ।
क्षेत्रापणगृहासक्तं मृत्युरादाय गच्छति ॥ २०
मृत्युर्जरा च व्याधिश्च दुःखं चानेककारणम् ।
अनुषक्तं यदा देहे किं स्वस्थ इव तिष्ठसि ॥ २१
जातमेवान्तकोऽन्ताय जरा चान्वेति देहिनम् ।
अनुषक्ता द्वयेनैते भावाः स्थावरजङ्गमाः ॥ २२
मृत्योर्वा गृहमेवैतद्या ग्रामे वसतो रतिः ।
देवानामेष वै गोष्ठो यदरण्यमिति श्रुतिः ॥ २३
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
छित्त्वैनां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः ॥
न हिंसयति यः प्राणान्मनोवाक्कायहेतुभिः ।
जीवितार्थापनयनैः कर्मभिर्न स बध्यते ॥ २५
न मृत्युसेनामायान्तीं जातु कश्चित्प्रबाधते ।
ऋते सत्यमसंत्याज्यं सत्ये ह्यमृतमाश्रितम् ॥ २६
तस्मात्सत्यव्रताचारः सत्ययोगपरायणः ।
सत्यारामः समो दान्तः सत्येनैवान्तकं जयेत् ॥२७
अमृतं चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम् ।
मृत्युमापद्यते मोहात्सत्येनापद्यतेऽमृतम् ॥ २८
सोऽहं ह्यहिंस्रः सत्यार्थी कामक्रोधबहिष्कृतः ।
समदुःखसुखः क्षेमी मृत्युं हास्याम्यमर्त्यवत् ॥ २९
शान्तियज्ञरतो दान्तो ब्रह्मयज्ञे स्थितो मुनिः ।
वाङ्मनःकर्मयज्ञश्च भविष्याम्युदगायने ॥ ३०
पशुयज्ञैः कथं हिंस्रैर्मादृशो यष्टुमर्हति ।
अन्तवद्भिरुत प्राज्ञः क्षत्रयज्ञैः पिशाचवत् ॥ ३१
यस्य वाङ्मनसी स्यातां सम्यक्प्रणिहिते सदा ।
तपस्त्यागश्च योगश्च स वै सर्वमवाप्नुयात् ॥ ३२
नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं बलम् ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥३३
आत्मन्येवात्मना जात आत्मनिष्ठोऽप्रजोऽपि वा ।
आत्मन्येव भविष्यामि न मां तारयति प्रजा ॥३४
नैतादृशं ब्राह्मणस्यास्ति वित्तं-

यथैकता समता सत्यता च ।
शीले स्थितिर्दण्डनिधानमार्जवं
ततस्ततश्चोपरमः क्रियाभ्यः ॥ ३५
किं ते धनैर्बान्धवैर्वापि किं ते
किं ते दारैर्ब्राह्मण यो मरिष्यसि ।
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहस्ते क्व गतः पिता च ॥ ३६

भीष्म उवाच ।

पुत्रस्यैतद्वचः श्रुत्वा तथाकार्षीत्पिता नृप ।
तथा त्वमपि वर्तस्व सत्यधर्मपरायणः ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
एकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

१७०.

युधिष्ठिर उवाच ।

धनिनो वाधना ये च वर्तयन्ति स्वतन्त्रिणः ।
सुखदुःखागमस्तेषां कः कथं वा पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शम्याकेन विमुक्तेन गीतं शान्तिगतेन ह ॥ २
अब्रवीन्मां पुरा कश्चिद्ब्राह्मणस्त्यागमास्थितः ।
क्लिश्यमानः कुदारेण कुचैलेन बुभुक्षया ॥ ३
उत्पन्नमिह लोके वै जन्मप्रभृति मानवम् ।
विविधान्युपवर्तन्ते दुःखानि च सुखानि च ॥ ४
तयोरेकतरे मार्गे यद्येनमभिसंनयेत् ।
न सुखं प्राप्य संहृष्येन्न दुःखं प्राप्य संज्वरेत् ॥५
न वै चरसि यच्छ्रेय आत्मनो वा यदीहसे ।
अकामात्मापि हि सदा धुरमुद्यम्य चैव हि ॥ ६
अकिंचनः परिपतन्सुखमास्वादयिष्यसि ।
अकिंचनः सुखं शेते समुत्तिष्ठति चैव हि ॥ ७
आकिंचन्यं सुखं लोके पथ्यं शिवमनामयम् ।
अनमित्रमथो ह्येतद्दुर्लभं सुलभं सताम् ॥ ८
अकिंचनस्य शुद्धस्य उपपन्नस्य सर्वशः ।
अवेक्षमाणस्त्रीँल्लोकान्न तुल्यमुपलक्षये ॥ ९
आकिंचन्यं च राज्यं च तुलया समतोलयम् ।
अत्यरिच्यत दारिद्र्यं राज्यादपि गुणाधिकम् ॥१०
आकिंचन्ये च राज्ये च विशेषः सुमहानयम् ।
नित्योद्विग्नो हि धनवान्मृत्योरास्यगतो यथा ॥ ११
नैवास्याग्निर्न चादित्यो न मृत्युर्न च दस्यवः ।
प्रभवन्ति धनज्यानिनिर्मुक्तस्य निराशिषः ॥ १२
तं वै सदा कामचरमनुपस्तीर्णशायिनम् ।
बाहूपधानं शाम्यन्तं प्रशंसन्ति दिवौकसः ॥ १३
धनवान्क्रोधलोभाभ्यामाविष्टो नष्टचेतनः ।
तिर्यगीक्षः शुष्कमुखः पापको भ्रुकुटीमुखः ॥ १४
निर्दशंश्चाधरोष्ठं च क्रुद्धो दारुणभाषिता ।
कस्तमिच्छेत्परिद्रष्टुं दातुमिच्छति चेन्महीम् ॥ १५
श्रिया ह्यभीक्ष्णं संवासो मोहयत्यविचक्षणम् ।
सा तस्य चित्तं हरति शारदाभ्रमिवानिलः ॥ १६
अथैनं रूपमानश्च धनमानश्च विन्दति ।
अभिजातोऽस्मि सिद्धोऽस्मि नास्मि केवलमानुषः ।
इत्येभिः कारणैस्तस्य त्रिभिश्चित्तं प्रसिच्यते ॥ १७
स प्रसिक्तमना भोगान्विसृज्य पितृसंचितान् ।
परिक्षीणः परस्वानामादानं साधु मन्यते ॥ १८
तमतिक्रान्तमर्यादमाददानं ततस्ततः ।
प्रतिषेधन्ति राजानो लुब्धा मृगमिवेषुभिः ॥ १९
एवमेतानि दुःखानि तानि तानीह मानवम् ।
विविधान्युपवर्तन्ते गात्रसंस्पर्शजानि च ॥ २०
तेषां परमदुःखानां बुद्ध्या भैषज्यमाचरेत् ।
लोकधर्मं समाज्ञाय ध्रुवाणामध्रुवैः सह ॥ २१
नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परम् ।

नात्यक्त्वा चाभयः शेते त्यक्त्वा सर्वं सुखी भव ॥
इत्येतद्धास्तिनपुरे ब्राह्मणेनोपवर्णितम् ।
शम्याकेन पुरा मह्यं तस्मात्त्यागः परो मतः ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

१७१

युधिष्ठिर उवाच ।

ईहमानः समारम्भान्यदि नासादयेद्धनम् ।
धनतृष्णाभिभूतश्च किं कुर्वन्सुखमाप्नुयात् ॥ १

भीष्म उवाच ।

सर्वसाम्यमनायासः सत्यवाक्यं च भारत ।
निर्वेदश्चाविवित्सा च यस्य स्यात्स सुखी नरः ॥२
एतान्येव पदान्याहुः पञ्च वृद्धाः प्रशान्तये ।
एष स्वर्गश्च धर्मश्च सुखं चानुत्तमं सताम् ॥ ३
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निर्वेदान्मङ्किना गीतं तन्निबोध युधिष्ठिर ॥ ४
ईहमानो धनं मङ्किर्भग्नेहश्च पुनः पुनः ।
केनचिद्धनशेषेण क्रीतवान्दम्यगोयुगम् ॥ ५
सुसंबद्धौ तु तौ दम्यौ दमनायाभिनिःसृतौ ।
आसीनमुष्ट्रं मध्येन सहसैवाभ्यधावताम् ॥ ६
तयोः संप्राप्तयोरुष्ट्रः स्कन्धदेशममर्षणः ।
उत्थायोत्क्षिप्य तौ दम्यौ प्रससार महाजवः ॥ ७
ह्रियमाणौ तु तौ दम्यौ तेनोष्ट्रेण प्रमाथिना ।
म्रियमाणौ च संप्रेक्ष्य मङ्किस्तत्राब्रवीदिदम् ॥ ८
न चैवाविहितं शक्यं दक्षेणापीहितुं धनम् ।
युक्तेन श्रद्धया सम्यगीहां समनुतिष्ठता ॥ ९
कृतस्य पूर्वं चानर्थैर्युक्तस्याप्यनुतिष्ठतः ।
इमं पश्यत संगत्या मम दैवमुपप्लवम् ॥ १०
उद्यम्योद्यम्य मे दम्यौ विषमेणेव गच्छति ।
उत्क्षिप्य काकतालीयमुन्माथेनेव जम्बुकः ॥ ११
मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ।
शुद्धं हि दैवमेवेदमतो नैवास्ति पौरुषम् ॥ १२
यदि वाप्युपपद्येत पौरुषं नाम कर्हिचित् ।
अन्विष्यमाणं तदपि दैवमेवावतिष्ठते ॥ १३
तस्मान्निर्वेद एवेह गन्तव्यः सुखमीप्सता ।
सुखं स्वपिति निर्विण्णो निराशश्चार्थसाधने ॥ १४
अहो सम्यक्शुकेनोक्तं सर्वतः परिमुच्यता ।
प्रतिष्ठता महारण्यं जनकस्य निवेशनात् ॥ १५
यः कामान्प्राप्नुयात्सर्वान्यश्चैनान्केवलांस्त्यजेत् ।
प्रापणात्सर्वकामानां परित्यागो विशिष्यते ॥ १६
नान्तं सर्वविवित्सानां गतपूर्वोऽस्ति कश्चन ।
शरीरे जीविते चैव तृष्णा मन्दस्य वर्धते ॥ १७
निवर्तस्व विवित्साभ्यः शाम्य निर्विद्य मामक ।
असकृच्चासि निकृतो न च निर्विद्यसे तनो ॥ १८
यदि नाहं विनाश्यस्ते यद्येवं रमसे मया ।
मा मां योजय लोभेन वृथा त्वं वित्तकामुक ॥१९
संचितं संचितं द्रव्यं नष्टं तव पुनः पुनः ।
कदा विमोक्ष्यसे मूढ धनेहां धनकामुक ॥ २०
अहो नु मम बालिश्यं योऽहं क्रीडनकस्तव ।
किं नैव जातु पुरुषः परेषां प्रेष्यतामियात् ॥ २१
न पूर्वे नापरे जातु कामानामन्तमाप्नुवन् ।
त्यक्त्वा सर्वसमारम्भान्प्रतिबुद्धोऽस्मि जागृमि ॥२२
नूनं ते हृदयं काम वज्रसारमयं दृढम् ।
यदनर्थशताविष्टं शतधा न विदीर्यते ॥ २३
त्यजामि काम त्वां चैव यच्च किंचित्प्रियं तव ।
तवाहं सुखमन्विच्छन्नात्मन्युपलभे सुखम् ॥ २४
काम जानामि ते मूलं संकल्पात्किल जायसे ।
न त्वां संकल्पयिष्यामि समूलो न भविष्यसि ॥२५
ईहा धनस्य न सुखा लब्ध्वा चिन्ता च भूयसी ।
लब्धनाशो यथा मृत्युर्लब्धं भवति वा न वा ॥२६

परेत्य यो न लभते ततो दुःखतरं नु किम् ।
न च तुष्यति लब्धेन भूय एव च मार्गति ॥ २७
अनुतर्षुल एवार्थः स्वादु गाङ्गमिवोदकम् ।
मद्विलापनमेतत्तु प्रतिबुद्धोऽस्मि संत्यज ॥ २८
य इमं मामकं देहं भूतग्रामः समाश्रितः ।
स यात्वितो यथाकामं वसतां वा यथासुखम् ॥२९
न युष्मास्विह मे प्रीतिः कामलोभानुसारिषु ।
तस्मादुत्सृज्य सर्वान्वः सत्यमेवाश्रयाम्यहम् ॥ ३०
सर्वभूतान्यहं देहे पश्यन्मनसि चात्मनः ।
योगे बुद्धिं श्रुते सत्त्वं मनो ब्रह्मणि धारयन् ॥३१
विहरिष्याम्यनासक्तः सुखी लोकान्निरामयः ।
यथा मा त्वं पुनर्नैवं दुःखेषु प्रणिधास्यसि ॥ ३२
त्वया हि मे प्रणुन्नस्य गतिरन्या न विद्यते ।
तृष्णाशोकश्रमाणां हि त्वं काम प्रभवः सदा ॥३३
धननाशोऽधिकं दुःखं मन्ये सर्वमहत्तरम् ।
ज्ञातयो ह्यवमन्यन्ते मित्राणि च धनच्युतम् ॥ ३४
अवज्ञानसहस्रैस्तु दोषाः कष्टतराधने ।
धने सुखकला या च सापि दुःखैर्विधीयते ॥ ३५
धनमस्येति पुरुषं पुरा निघ्नन्ति दस्यवः ।
क्लिश्यन्ति विविधैर्दण्डैर्नित्यमुद्वेजयन्ति च ॥ ३६
मन्दलोलुपता दुःखमिति बुद्धं चिरान्मया ।
यद्यदालम्बसे काम तत्तदेवानुरुध्यसे ॥ ३७
अतत्त्वज्ञोऽसि बालश्च दुस्तोषोऽपूरणोऽनलः ।
नैव त्वं वेत्थ सुलभं नैव त्वं वेत्थ दुर्लभम् ॥३८
पातालमिव दुष्पूरो मां दुःखैर्योक्तुमिच्छसि ।
नाहमद्य समावेष्टुं शक्यः काम पुनस्त्वया ॥ ३९
निर्वेदमहमासाद्य द्रव्यनाशाद्यदृच्छया ।
निर्वृतिं परमां प्राप्य नाद्य कामान्विचिन्तये ॥ ४०
अतिक्लेशान्सहामीह नाहं बुध्याम्यबुद्धिमान् ।
निकृतो धननाशेन शये सर्वाङ्गविज्वरः ॥ ४१
परित्यजामि काम त्वां हित्वा सर्वमनोगतीः ।
न त्वं मया पुनः काम नस्योतेनेव रंस्यते ॥ ४२
क्षमिष्येऽक्षममाणानां न हिंसिष्ये च हिंसितः ।
द्वेष्यमुक्तः प्रियं वक्ष्याम्यनादृत्य तदप्रियम् ॥ ४३
तृप्तः स्वस्थेन्द्रियो नित्यं यथालब्धेन वर्तयन् ।
न सकामं करिष्यामि त्वामहं शत्रुमात्मनः ॥ ४४
निर्वेदं निर्वृतिं तृप्तिं शान्तिं सत्यं दमं क्षमाम् ।
सर्वभूतदयां चैव विद्धि मां शरणागतम् ॥ ४५
तस्मात्कामश्च लोभश्च तृष्णा कार्पण्यमेव च ।
त्यजन्तु मां प्रतिष्ठन्तं सत्त्वस्थो ह्यस्मि सांप्रतम् ॥४६
प्रहाय कामं लोभं च क्रोधं पारुष्यमेव च ।
नाद्य लोभवशं प्राप्तो दुःखं प्राप्स्याम्यनात्मवान् ॥
यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते ।
कामस्य वशगो नित्यं दुःखमेव प्रपद्यते ॥ ४८
कामान्व्युदस्य धुनुते यत्किंचित्पुरुषो रजः ।
कामक्रोधोद्भवं दुःखमह्रीररतिरेव च ॥ ४९
एष ब्रह्मप्रविष्टोऽहं ग्रीष्मे शीतमिव ह्रदम् ।
शाम्यामि परिनिर्वामि सुखमासे च केवलम् ॥५०
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ ५१
आत्मना सप्तमं कामं हत्वा शत्रुमिवोत्तमम् ।
प्राप्यावध्यं ब्रह्मपुरं राजेव स्यामहं सुखी ॥ ५२
एतां बुद्धिं समास्थाय मङ्किर्निर्वेदमागतः ।
सर्वान्कामान्परित्यज्य प्राप्य ब्रह्म महत्सुखम् ॥५३
दम्यनाशकृते मङ्किरमरत्वं किलागमत् ।
अच्छिनत्काममूलं स तेन प्राप महत्सुखम् ॥ ५४
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गीतं विदेहराजेन जनकेन प्रशाम्यता ॥ ५५
अनन्तं बत मे वित्तं यस्य मे नास्ति किंचन ।
मिथिलायां प्रदीप्तायां न मे दह्यति किंचन ॥ ५६

अत्रैवोदाहरन्तीमं बोध्यस्य पदसंचयम् ।
निर्वेदं प्रति विन्यस्तं प्रतिबोध युधिष्ठिर ॥ ५७
बोध्यं दान्तमृषिं राजा नहुषः पर्यपृच्छत ।
निर्वेदाच्छान्तिमापन्नं शान्तं प्रज्ञानतर्पितम् ॥ ५८
उपदेशं महाप्राज्ञ शमस्योपदिशस्व मे ।
कां बुद्धिं समनुध्याय शान्तश्चरसि निर्वृतः ॥ ५९

बोध्य उवाच ।

उपदेशेन वर्तामि नानुशास्मीह कंचन ।
लक्षणं तस्य वक्ष्येऽहं तत्स्वयं प्रविमृश्यताम् ॥६०
पिङ्गला कुररः सर्पः सारङ्गान्वेषणं वने ।
इषुकारः कुमारी च षडेते गुरवो मम ॥ ६१

इति श्रीमहाभारते शान्तिपर्वणि
एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

१७२

युधिष्ठिर उवाच ।

केन वृत्तेन वृत्तज्ञ वीतशोकश्चरेन्महीम् ।
किं च कुर्वन्नरो लोके प्राप्नोति परमां गतिम् ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ २
चरन्तं ब्राह्मणं कंचित्कल्यचित्तमनामयम् ।
पप्रच्छ राजन्प्रह्लादो बुद्धिमान्प्राज्ञसंमतः ॥ ३
स्वस्थः शक्तो मृदुर्दान्तो निर्विवित्सोऽनसूयकः ।
सुवाग्बहुमतो लोके प्राज्ञश्चरति बालवत् ॥ ४
नैव प्रार्थयसे लाभं नालाभेष्वनुशोचसि ।
नित्यतृप्त इव ब्रह्मन्न किंचिदवमन्यसे ॥ ५
स्रोतसा ह्रियमाणासु प्रजास्वविमना इव ।
धर्मकामार्थकार्येषु कूटस्थ इव लक्ष्यसे ॥ ६
नानुतिष्ठसि धर्मार्थौ न कामे चापि वर्तसे ।
इन्द्रियार्थाननादृत्य मुक्तश्चरसि साक्षिवत् ॥ ७
का नु प्रज्ञा श्रुतं वा किं वृत्तिर्वा का नु ते मुने ।
क्षिप्रमाचक्ष्व मे ब्रह्मञ्श्रेयो यदिह मन्यसे ॥ ८
अनुयुक्तः स मेधावी लोकधर्मविधानवित् ।
उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया ॥ ९
पश्यन्प्रह्लाद भूतानामुत्पत्तिमनिमित्ततः ।
ह्रासं वृद्धिं विनाशं च न प्रहृष्ये न च व्यथे ॥१०
स्वभावादेव संदृश्य वर्तमानाः प्रवृत्तयः ।
स्वभावनिरताः सर्वाः परितप्ये न केनचित् ॥११
पश्यन्प्रह्लाद संयोगान्विप्रयोगपरायणान् ।
संचयांश्च विनाशान्तान्न क्वचिद्विदधे मनः ॥ १२
अन्तवन्ति च भूतानि गुणयुक्तानि पश्यतः ।
उत्पत्तिनिधनज्ञस्य किं कार्यमवशिष्यते ॥ १३
जलजानामपि ह्यन्तं पर्यायेणोपलक्षये ।
महतामपि कायानां सूक्ष्माणां च महोदधौ ॥ १४
जङ्गमस्थावराणां च भूतानामसुराधिप ।
पार्थिवानामपि व्यक्तं मृत्युं पश्यामि सर्वशः ॥१५
अन्तरिक्षचराणां च दानवोत्तम पक्षिणाम् ।
उत्तिष्ठति यथाकालं मृत्युर्बलवतामपि ॥ १६
दिवि संचरमाणानि ह्रस्वानि च महान्ति च ।
ज्योतींषि च यथाकालं पतमानानि लक्षये ॥ १७
इति भूतानि संपश्यन्ननुषक्तानि मृत्युना ।
सर्वसामान्यतो विद्वान्कृतकृत्यः सुखं स्वपे ॥ १८
सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया ।
शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥ १९
आस्रवत्यपि मामन्नं पुनर्बहुगुणं बहु ।
पुनरल्पगुणं स्तोकं पुनर्नैवोपपद्यते ॥ २०
कणान्कदाचित्खादामि पिण्याकमपि च ग्रसे ।
भक्षये शालिमांसानि भक्षांश्चोच्चावचान्पुनः ॥ २१
शये कदाचित्पर्यङ्के भूमावपि पुनः शये ।

प्रासादेऽपि च मे शय्या कदाचिदुपपद्यते ॥ २२
धारयामि च चीराणि शाणीं क्षौमाजिनानि च ।
महार्हाणि च वासांसि धारयाम्यहमेकदा ॥ २३
न संनिपतितं धर्म्यमुपभोगं यदृच्छया ।
प्रत्याचक्षे न चाप्येनमनुरुध्ये सुदुर्लभम् ॥ २४
अचलमनिधनं शिवं विशोकं
शुचिमतुलं विदुषां मते निविष्टम् ।
अनभिमतमसेवितं च मूढै-
र्व्रतमिदमाजगरं शुचिश्चरामि ॥ २५
अचलितमतिरच्युतः स्वधर्मा-
त्परिमितसंसरणः परावरज्ञः ।
विगतभयकषायलोभमोहो
व्रतमिदमाजगरं शुचिश्चरामि ॥ २६
अनियतफलभक्ष्यभोज्यपेयं
विधिपरिणामविभक्तदेशकालम् ।
हृदयसुखमसेवितं कदर्यै-
र्व्रतमिदमाजगरं शुचिश्चरामि ॥ २७
इदमिदमिति तृष्णयाभिभूतं
जनमनवाप्तधनं विषीदमानम् ।
निपुणमनुनिशाम्य तत्त्वबुद्ध्या
व्रतमिदमाजगरं शुचिश्चरामि ॥ २८
बहुविधमनुदृश्य चार्थहेतोः
कृपणमिहार्यमनार्यमाश्रयन्तम् ।
उपशमरुचिरात्मवान्प्रशान्तो
व्रतमिदमाजगरं शुचिश्चरामि ॥ २९
सुखमसुखमनर्थमर्थलाभं
रतिमरतिं मरणं च जीवितं च ।
विधिनियतमवेक्ष्य तत्त्वतोऽहं
व्रतमिदमाजगरं शुचिश्चरामि ॥ ३०
अपगतभयरागमोहदर्पो
धृतिमतिबुद्धिसमन्वितः प्रशान्तः ।
उपगतफलभोगिनो निशाम्य
व्रतमिदमाजगरं शुचिश्चरामि ॥ ३१
अनियतशयनासनः प्रकृत्या
दमनियमव्रतसत्यशौचयुक्तः ।
अपगतफलसंचयः प्रहृष्टो
व्रतमिदमाजगरं शुचिश्चरामि ॥ ३२
अभिगतमसुखार्थमीहनार्थै-
रुपगतबुद्धिरवेक्ष्य चात्मसंस्थः ।
तृषितमनियतं मनो नियन्तुं
व्रतमिदमाजगरं शुचिश्चरामि ॥ ३३
न हृदयमनुरुध्यते मनो वा
प्रियसुखदुर्लभतामनित्यतां च ।
तदुभयमुपलक्षयन्निवाहं
व्रतमिदमाजगरं शुचिश्चरामि ॥ ३४
बहु कथितमिदं हि बुद्धिमद्भिः
कविभिरभिप्रथयद्भिरात्मकीर्तिम् ।
इदमिदमिति तत्र तत्र तत्त-
त्स्वपरमतैर्गहनं प्रतर्कयद्भिः ॥ ३५
तदहमनुनिशाम्य विप्रयातं
पृथगभिपन्नमिहाबुधैर्मनुष्यैः ।
अनवसितमनन्तदोषपारं
नृषु विहरामि विनीतरोषतृष्णः ॥ ३६

भीष्म उवाच ।

अजगरचरितं व्रतं महात्मा
य इह नरोऽनुचरेद्विनीतरागः ।
अपगतभयमन्युलोभमोहः
स खलु सुखी विहरेदिमं विहारम् ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

१७३

युधिष्ठिर उवाच ।

बान्धवाः कर्म वित्तं वा प्रज्ञा वेह पितामह ।
नरस्य का प्रतिष्ठा स्यादेतत्पृष्टो वदस्व मे ॥ १

भीष्म उवाच ।

प्रज्ञा प्रतिष्ठा भूतानां प्रज्ञा लाभः परो मतः ।
प्रज्ञा नैःश्रेयसी लोके प्रज्ञा स्वर्गो मतः सताम् ॥२
प्रज्ञया प्रापितार्थो हि बलिरैश्वर्यसंक्षये ।
प्रह्लादो नमुचिर्मङ्किस्तस्याः किं विद्यते परम् ॥ ३
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
इन्द्रकाश्यपसंवादं तन्निबोध युधिष्ठिर ॥ ४
वैश्यः कश्चिदृषिं तात काश्यपं संशितव्रतम् ।
रथेन पातयामास श्रीमान्दृप्तस्तपस्विनम् ॥ ५
आर्तः स पतितः क्रुद्धस्त्यक्त्वात्मानमथाब्रवीत् ।
मरिष्याम्यधनस्येह जीवितार्थो न विद्यते ॥ ६
तथा मुमूर्षुमासीनमकूजन्तमचेतसम् ।
इन्द्रः सृगालरूपेण बभाषे क्रुद्धमानसम् ॥ ७
मनुष्ययोनिमिच्छन्ति सर्वभूतानि सर्वशः ।
मनुष्यत्वे च विप्रत्वं सर्व एवाभिनन्दति ॥ ८
मनुष्यो ब्राह्मणश्चासि श्रोत्रियश्चासि काश्यप ।
सुदुर्लभमवाप्यैतददोषान्मर्तुमिच्छसि ॥ ९
सर्वे लाभाः साभिमाना इति सत्या बत श्रुतिः ।
संतोषणीयरूपोऽसि लोभाद्यदभिमन्यसे ॥ १०
अहो सिद्धार्थता तेषां येषां सन्तीह पाणयः ।
पाणिमद्भ्यः स्पृहास्माकं यथा तव धनस्य वै ॥११
न पाणिलाभादधिको लाभः कश्चन विद्यते ।
अपाणित्वाद्वयं ब्रह्मन्कण्टकान्नोद्धरामहे ॥ १२
अथ येषां पुनः पाणी देवदत्तौ दशाङ्गुली ।
उद्धरन्ति कृमीनङ्गाद्दशमानान्कषन्ति च ॥ १३
हिमवर्षातपानां च परित्राणानि कुर्वते ।
चेलमन्नं सुखं शय्यां निवातं चोपभुञ्जते ॥ १४
अधिष्ठाय च गां लोके भुञ्जते वाहयन्ति च ।
उपायैर्बहुभिश्चैव वश्यानात्मनि कुर्वते ॥ १५
ये खल्वजिह्वाः कृपणा अल्पप्राणा अपाणयः ।
सहन्ते तानि दुःखानि दिष्ट्या त्वं न तथा मुने ॥१६
दिष्ट्या त्वं न सृगालो वै न कृमिर्न च मूषकः ।
न सर्पो न च मण्डूको न चान्यः पापयोनिजः ॥१७
एतावतापि लाभेन तोष्टुमर्हसि काश्यप ।
किं पुनर्योऽसि सत्त्वानां सर्वेषां ब्राह्मणोत्तमः ॥१८
इमे मां कृमयोऽदन्ति तेषामुद्धरणाय मे ।
नास्ति शक्तिरपाणित्वात्पश्यावस्थामिमां मम ॥ १९
अकार्यमिति चैवेमं नात्मानं संत्यजाम्यहम् ।
नेतः पापीयसीं योनिं पतेयमपरामिति ॥ २०
मध्ये वै पापयोनीनां सार्गाली यामहं गतः ।
पापीयस्यो बहुतरा इतोऽन्याः पापयोनयः ॥ २१
जात्यैवैके सुखतराः सन्त्यन्ये भृशदुःखिताः ।
नैकान्तसुखमेवेह कचित्पश्यामि कस्यचित् ॥ २२
मनुष्या ह्याढ्यतां प्राप्य राज्यमिच्छन्त्यनन्तरम् ।
राज्याद्देवत्वमिच्छन्ति देवत्वादिन्द्रतामपि ॥ २३
भवेस्त्वं यद्यपि त्वाढ्यो न राजा न च दैवतम् ।
देवत्वं प्राप्य चेन्द्रत्वं नैव तुष्येस्तथा सति ॥ २४
न तृप्तिः प्रियलाभेऽस्ति तृष्णा नाद्भिः प्रशाम्यति ।
संप्रज्वलति सा भूयः समिद्भिरिव पावकः ॥ २५
अस्त्वेव त्वयि शोको वै हर्षश्चास्ति तथा त्वयि ।
सुखदुःखे तथा चोभे तत्र का परिदेवना ॥ २६
परिच्छिद्यैव कामानां सर्वेषां चैव कर्मणाम् ।
मूलं रुन्धीन्द्रियग्रामं शकुन्तानिव पञ्जरे ॥ २७
न खल्वप्यरसज्ञस्य कामः कचन जायते ।
संस्पर्शाद्दर्शनाद्वापि श्रवणाद्वापि जायते ॥ २८
न त्वं स्मरसि वारुण्या लट्वाकानां च पक्षिणाम् ।

ताभ्यां चाभ्यधिको भक्ष्यो न कश्चिद्विद्यते क्वचित् ॥
यानि चान्यानि दूरेषु भक्ष्यभोज्यानि काश्यप ।
येषामभुक्तपूर्वं ते तेषामस्मृतिरेव च ॥ ३०
अप्राशनमसंस्पर्शमसंदर्शनमेव च ।
पुरुषस्यैष नियमो मन्ये श्रेयो न संशयः ॥ ३१
पाणिमन्तो धनैर्युक्ता बलवन्तो न संशयः ।
मनुष्या मानुषैरेव दासत्वमुपपादिताः ॥ ३२
वधबन्धपरिक्लेशैः क्लिश्यन्ते च पुनः पुनः ।
ते खल्वपि रमन्ते च मोदन्ते च हसन्ति च ॥३३
अपरे बाहुबलिनः कृतविद्या मनस्विनः ।
जुगुप्सितां सुकृपणां पापां वृत्तिमुपासते ॥ ३४
उत्सहन्ते च ते वृत्तिमन्यामप्युपसेवितुम् ।
स्वकर्मणा तु नियतं भवितव्यं तु तत्तथा ॥ ३५
न पुल्कसो न चण्डाल आत्मानं त्यक्तुमिच्छति ।
असंतुष्टः स्वया योन्या मायां पश्यस्व यादृशीम् ॥
दृष्ट्वा कुणीन्पक्षहतान्मनुष्यानामयाविनः ।
सुसंपूर्णः स्वया योन्या लब्धलाभोऽसि काश्यप ॥
यदि ब्राह्मण देहस्ते निरातङ्को निरामयः ।
अङ्गानि च समग्राणि न च लोकेषु धिक्कृतः ॥३८
न केनचित्प्रवादेन सत्येनैवापहारिणा ।
धर्मायोत्तिष्ठ विप्रर्षे नात्मानं त्यक्तुमर्हसि ॥ ३९
यदि ब्रह्मञ्शृणोष्येतच्छ्रद्दधासि च मे वचः ।
वेदोक्तस्य च धर्मस्य फलं मुख्यमवाप्स्यसि ॥ ४०
स्वाध्यायमग्निसंस्कारमप्रमत्तोऽनुपालय ।
सत्यं दमं च दानं च स्पर्धिष्ठा मा च केनचित् ॥
ये केचन स्वध्ययनाः प्राप्ता यजनयाजनम् ।
कथं ते जातु शोचेयुर्ध्यायेयुर्वाप्यशोभनम् ॥ ४२
इच्छन्तस्ते विहाराय सुखं महदवाप्नुयुः ।
उत जाताः सुनक्षत्रे सुतीर्थाः सुमुहूर्तजाः ॥ ४३
नक्षत्रेष्वासुरेष्वन्ये दुस्तीर्था दुर्मुहूर्तजाः ।
संपतन्त्यासुरीं योनिं यज्ञप्रसववर्जिताम् ॥ ४४
अहमासं पण्डितको हैतुको वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥ ४५
हेतुवादान्प्रवदिता वक्ता संसत्सु हेतुमत् ।
आक्रोष्टा चाभिवक्ता च ब्रह्मयज्ञेषु वै द्विजान् ॥४६
नास्तिकः सर्वशङ्की च मूर्खः पण्डितमानिकः ।
तस्येयं फलनिर्वृत्तिः सृगालत्वं मम द्विज ॥ ४७
अपि जातु तथा तत्स्यादहोरात्रशतैरपि ।
यदहं मानुषीं योनिं सृगालः प्राप्नुयां पुनः ॥ ४८
संतुष्टश्चाप्रमत्तश्च यज्ञदानतपोरतिः ।
ज्ञेयज्ञाता भवेयं वै वर्ज्यवर्जयिता तथा ॥ ४९
ततः स मुनिरुत्थाय काश्यपस्तमुवाच ह ।
अहो बतासि कुशलो बुद्धिमानिति विस्मितः ॥५०
समवैक्षत तं विप्रो ज्ञानदीर्घेण चक्षुषा ।
ददर्श चैनं देवानामिन्द्रं देवं शचीपतिम् ॥ ५१
ततः संपूजयामास काश्यपो हरिवाहनम् ।
अनुज्ञातश्च तेनाथ प्रविवेश स्वमाश्रमम् ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

१७४

युधिष्ठिर उवाच ।

यद्यस्ति दत्तमिष्टं वा तपस्तप्तं तथैव च ।
गुरूणां चापि शुश्रूषा तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

आत्मनानर्थयुक्तेन पापे निविशते मनः ।
स कर्म कलुषं कृत्वा क्लेशे महति धीयते ॥ २
दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं भयाद्भयम् ।
मृतेभ्यः प्रमृतं यान्ति दरिद्राः पापकारिणः ॥ ३
उत्सवादुत्सवं यान्ति स्वर्गात्स्वर्गं सुखात्सुखम् ।

श्रद्दधानाश्च दान्ताश्च धनाढ्याः शुभकारिणः ॥ ४
व्यालकुञ्जरदुर्गेषु सर्पचोरभयेषु च ।
हस्तावापेन गच्छन्ति नास्तिकाः किमतः परम् ॥ ५
प्रियदेवातिथेयाश्च वदान्याः प्रियसाधवः ।
क्षेम्यमात्मवतां मार्गमास्थिता हस्तदक्षिणम् ॥ ६
पुलाका इव धान्येषु पुत्तिका इव पक्षिषु ।
तद्विधास्ते मनुष्येषु येषां धर्मो न कारणम् ॥ ७
सुशीघ्रमपि धावन्तं विधानमनुधावति ।
शेते सह शयानेन येन येन यथा कृतम् ॥ ८
उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति ।
करोति कुर्वतः कर्म छायेवानुविधीयते ॥ ९
येन येन यथा यद्यत्पुरा कर्म समाचितम् ।
तत्तदेव नरो भुङ्क्ते नित्यं विहितमात्मनः ॥ १०
स्वकर्मफलविक्षिप्तं विधानपरिरक्षितम् ।
भूतग्राममिमं कालः समन्तात्परिकर्षति ॥ ११
अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वकालं नातिवर्तन्ते तथा कर्म पुराकृतम् ॥ १२
संमानश्चावमानश्च लाभालाभौ क्षयोदयौ ।
प्रवृत्ता विनिवर्तन्ते विधानान्ते पुनः पुनः ॥ १३
आत्मना विहितं दुःखमात्मना विहितं सुखम् ।
गर्भशय्यामुपादाय भुज्यते पौर्वदेहिकम् ॥ १४
बालो युवा च वृद्धश्च यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ॥१५
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ १६
समुन्नमग्रतो वस्त्रं पश्चाच्छुध्यति कर्मणा ।
उपवासैः प्रतप्तानां दीर्घं सुखमनन्तकम् ॥ १७
दीर्घकालेन तपसा सेवितेन तपोवने ।
धर्मनिर्धूतपापानां संसिध्यन्ते मनोरथाः ॥ १८
शकुनीनामिवाकाशे मत्स्यानामिव चोदके ।
पदं यथा न दृश्येत तथा ज्ञानविदां गतिः ॥ १९
अलमन्यैरुपालम्भैः कीर्तितैश्च व्यतिक्रमैः ।
पेशलं चानुरूपं च कर्तव्यं हितमात्मनः ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

१७५

युधिष्ठिर उवाच ।

कुतः सृष्टमिदं विश्वं जगत्स्थावरजङ्गमम् ।
प्रलये च कमभ्येति तन्मे ब्रूहि पितामह ॥ १
ससागरः सगगनः सशैलः सबलाहकः ।
सभूमिः साग्निपवनो लोकोऽयं केन निर्मितः ॥ २
कथं सृष्टानि भूतानि कथं वर्णविभक्तयः ।
शौचाशौचं कथं तेषां धर्माधर्मविधी कथम् ॥ ३
कीदृशो जीवतां जीवः क्व वा गच्छन्ति ये मृताः ।
अस्माल्लोकादमुं लोकं सर्वं शंसतु नो भवान् ॥ ४

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
भृगुणाभिहितं श्रेष्ठं भरद्वाजाय पृच्छते ॥ ५
कैलासशिखरे दृष्ट्वा दीप्यमानमिवौजसा ।
भृगुं महर्षिमासीनं भरद्वाजोऽन्वपृच्छत ॥ ६
ससागरः सगगनः सशैलः सबलाहकः ।
सभूमिः साग्निपवनो लोकोऽयं केन निर्मितः ॥ ७
कथं सृष्टानि भूतानि कथं वर्णविभक्तयः ।
शौचाशौचं कथं तेषां धर्माधर्मविधी कथम् ॥ ८
कीदृशो जीवतां जीवः क्व वा गच्छन्ति ये मृताः ।
परलोकमिमं चापि सर्वं शंसतु नो भवान् ॥ ९
एवं स भगवान्पृष्टो भरद्वाजेन संशयम् ।
महर्षिर्ब्रह्मसंकाशः सर्वं तस्मै ततोऽब्रवीत् ॥ १०
मानसो नाम विख्यातः श्रुतपूर्वो महर्षिभिः ।

अनादिनिधनो देवस्तथाभेद्योऽजरामरः ॥ ११
अव्यक्त इति विख्यातः शाश्वतोऽथाक्षरोऽव्ययः ।
यतः सृष्टानि भूतानि जायन्ते च म्रियन्ति च ॥ १२
सोऽसृजत्प्रथमं देवो महान्तं नाम नामतः ।
आकाशमिति विख्यातं सर्वभूतधरः प्रभुः ॥ १३
आकाशादभवद्वारि सलिलादग्निमारुतौ ।
अग्निमारुतसंयोगात्ततः समभवन्मही ॥ १४
ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयंभुवा ।
तस्मात्पद्मात्समभवद्ब्रह्मा वेदमयो निधिः ॥ १५
अहंकार इति ख्यातः सर्वभूतात्मभूतकृत् ।
ब्रह्मा वै सुमहातेजा य एते पञ्च धातवः ॥ १६
शैलास्तस्यास्थिसंज्ञास्तु मेदो मांसं च मेदिनी ।
समुद्रास्तस्य रुधिरमाकाशमुदरं तथा ॥ १७
पवनश्चैव निःश्वासस्तेजोऽग्निर्निम्नगाः सिराः ।
अग्नीषोमौ तु चन्द्रार्कौ नयने तस्य विश्रुते ॥ १८
नभश्चोर्ध्वं शिरस्तस्य क्षितिः पादौ दिशो भुजौ ।
दुर्विज्ञेयो ह्यनन्तत्वात्सिद्धैरपि न संशयः ॥ १९
स एव भगवान्विष्णुरनन्त इति विश्रुतः ।
सर्वभूतात्मभूतस्थो दुर्विज्ञेयोऽकृतात्मभिः ॥ २०
अहंकारस्य यः स्रष्टा सर्वभूतभवाय वै ।
यतः समभवद्विश्वं पृष्टोऽहं यदिह त्वया ॥ २१

भरद्वाज उवाच ।

गगनस्य दिशां चैव भूतलस्यानिलस्य च ।
कान्यत्र परिमाणानि संशयं छिन्धि मेऽर्थतः ॥२२

भृगुरुवाच ।

अनन्तमेतदाकाशं सिद्धचारणसेवितम् ।
रम्यं नानाश्रयाकीर्णं यस्यान्तो नाधिगम्यते ॥ २३
ऊर्ध्वं गतेरधस्तात्तु चन्द्रादित्यौ न दृश्यतः ।
तत्र देवाः स्वयं दीप्ता भास्वराश्चाग्निवर्चसः ॥ २४
ते चाप्यन्तं न पश्यन्ति नभसः प्रथितौजसः ।
दुर्गमत्वादनन्तत्वादिति मे विद्धि मानद ॥ २५
उपरिष्टोपरिष्टात्तु प्रज्वलद्भिः स्वयंप्रभैः ।
निरुद्धमेतदाकाशमप्रमेयं सुरैरपि ॥ २६
पृथिव्यन्ते समुद्रास्तु समुद्रान्ते तमः स्मृतम् ।
तमसोऽन्ते जलं प्राहुर्जलस्यान्तेऽग्निरेव च ॥ २७
रसातलान्ते सलिलं जलान्ते पन्नगाधिपः ।
तदन्ते पुनराकाशमाकाशान्ते पुनर्जलम् ॥ २८
एवमन्तं भगवतः प्रमाणं सलिलस्य च ।
अग्निमारुततोयेभ्यो दुर्ज्ञेयं दैवतैरपि ॥ २९
अग्निमारुततोयानां वर्णाः क्षितितलस्य च ।
आकाशसदृशा ह्येते भिद्यन्ते तत्त्वदर्शनात् ॥ ३०
पठन्ति चैव मुनयः शास्त्रेषु विविधेषु च ।
त्रैलोक्ये सागरे चैव प्रमाणं विहितं यथा ।
अदृश्याय त्वगम्याय कः प्रमाणमुदाहरेत् ॥ ३१
सिद्धानां देवतानां च यदा परिमिता गतिः ।
तदा गौणमनन्तस्य नामानन्तेति विश्रुतम् ।
नामधेयानुरूपस्य मानसस्य महात्मनः ॥ ३२
यदा तु दिव्यं तद्रूपं ह्रसते वर्धते पुनः ।
कोऽन्यस्तद्वेदितुं शक्तो योऽपि स्यात्तद्विधोऽपरः ॥३३
ततः पुष्करतः सृष्टः सर्वज्ञो मूर्तिमान्प्रभुः ।
ब्रह्मा धर्ममयः पूर्वः प्रजापतिरनुत्तमः ॥ ३४

भरद्वाज उवाच ।

पुष्कराद्यदि संभूतो ज्येष्ठं भवति पुष्करम् ।
ब्रह्माणं पूर्वजं चाह भवान्संदेह एव मे ॥ ३५

भृगुरुवाच ।

मानसस्येह या मूर्तिर्ब्रह्मत्वं समुपागता ।
तस्यासनविधानार्थं पृथिवी पद्ममुच्यते ॥ ३६
कर्णिका तस्य पद्मस्य मेरुर्गगनमुच्छ्रितः ।

तस्य मध्ये स्थितो लोकान्सृजते जगतः प्रभुः ॥३७

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

१७६

भरद्वाज उवाच ।

प्रजाविसर्गं विविधं कथं स सृजते प्रभुः ।
मेरुमध्ये स्थितो ब्रह्मा तद्ब्रूहि द्विजसत्तम ॥ १

भृगुरुवाच ।

प्रजाविसर्गं विविधं मानसो मनसासृजत् ।
संधुक्षणार्थं भूतानां सृष्टं प्रथमतो जलम् ॥ २
यत्प्राणाः सर्वभूतानां वर्धन्ते येन च प्रजाः ।
परित्यक्ताश्च नश्यन्ति तेनेदं सर्वमावृतम् ॥ ३
पृथिवी पर्वता मेघा मूर्तिमन्तश्च ये परे ।
सर्वं तद्वारुणं ज्ञेयमापस्तस्तम्भिरे पुनः ॥ ४

भरद्वाज उवाच ।

कथं सलिलमुत्पन्नं कथं चैवाग्निमारुतौ ।
कथं च मेदिनी सृष्टेत्यत्र मे संशयो महान् ॥ ५

भृगुरुवाच ।

ब्रह्मकल्पे पुरा ब्रह्मन्ब्रह्मर्षीणां समागमे ।
लोकसंभवसंदेहः समुत्पन्नो महात्मनाम् ॥ ६
तेऽतिष्ठन्ध्यानमालम्ब्य मौनमास्थाय निश्चलाः ।
त्यक्ताहाराः पवनपा दिव्यं वर्षशतं द्विजाः ॥ ७
तेषां धर्ममयी वाणी सर्वेषां श्रोत्रमागमत् ।
दिव्या सरस्वती तत्र संबभूव नभस्तलात् ॥ ८
पुरा स्तिमितनिःशब्दमाकाशमचलोपमम् ।
नष्टचन्द्रार्कपवनं प्रसुप्तमिव संबभौ ॥ ९
ततः सलिलमुत्पन्नं तमसीवापरं तमः ।
तस्माच्च सलिलोत्पीडादुदतिष्ठत मारुतः ॥ १०
यथा भाजनमच्छिद्रं निःशब्दमिव लक्ष्यते ।
तच्चाम्भसा पूर्यमाणं सशब्दं कुरुतेऽनिलः ॥ ११
तथा सलिलसंरुद्धे नभसोऽन्ते निरन्तरे ।
भित्त्वार्णवतलं वायुः समुत्पतति घोषवान् ॥ १२
स एष चरते वायुरर्णवोत्पीडसंभवः ।
आकाशस्थानमासाद्य प्रशान्तिं नाधिगच्छति ॥१३
तस्मिन्वाय्वम्बुसंघर्षे दीप्ततेजा महाबलः ।
प्रादुर्भवत्यूर्ध्वशिखः कृत्वा वितिमिरं नभः ॥ १४
अग्निः पवनसंयुक्तः खात्समुत्पतते जलम् ।
सोऽग्निर्मारुतसंयोगाद्घनत्वमुपपद्यते ॥ १५
तस्याकाशे निपतितः स्नेहस्तिष्ठति योऽपरः ।
स संघातत्वमापन्नो भूमित्वमुपगच्छति ॥ १६
रसानां सर्वगन्धानां स्नेहानां प्राणिनां तथा ।
भूमिर्योनिरिह ज्ञेया यस्यां सर्वं प्रसूयते ॥ १७

इति श्रीमहाभारते शान्तिपर्वणि
षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

१७७

भरद्वाज उवाच ।

एते ते धातवः पञ्च ब्रह्मा यानसृजत्पुरा ।
आवृता यैरिमे लोका महाभूताभिसंज्ञितैः ॥ १
यदासृजत्सहस्राणि भूतानां स महामतिः ।
पञ्चानामेव भूतत्वं कथं समुपपद्यते ॥ २

भृगुरुवाच ।

अमितानां महाशब्दो यान्ति भूतानि संभवम् ।
ततस्तेषां महाभूतशब्दोऽयमुपपद्यते ॥ ३
चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः ।
पृथिवी चात्र संघातः शरीरं पाञ्चभौतिकम् ॥ ४
इत्येते पञ्चभिर्भूतैर्युक्तं स्थावरजङ्गमम् ।
श्रोत्रं घ्राणं रसः स्पर्शो दृष्टिश्चेन्द्रियसंज्ञिताः ॥ ५

भरद्वाज उवाच ।

पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः ।

स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः ॥ ६
अनूष्मणामचेष्टानां घनानां चैव तत्त्वतः ।
वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः ॥ ७
न शृण्वन्ति न पश्यन्ति न गन्धरसवेदिनः ।
न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः ॥८
अद्रवत्वादनग्नित्वादभौमत्वादवायुतः ।
आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौतिकम् ॥ ९

भृगुरुवाच ।

घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः ।
तेषां पुष्पफले व्यक्तिर्नित्यं समुपलभ्यते ॥ १०
ऊष्मतो म्लानपर्णानां त्वक्फलं पुष्पमेव च ।
म्लायते चैव शीतेन स्पर्शस्तेनात्र विद्यते ॥ ११
वाय्वग्न्यशनिनिष्पेषैः फलपुष्पं विशीर्यते ।
श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः ॥१२
वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति ।
न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात्पश्यन्ति पादपाः ॥१३
पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि ।
अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ॥
पादैः सलिलपानं च व्याधीनामपि दर्शनम् ।
व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे ॥ १५
वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत् ।
तथा पवनसंयुक्तः पादैः पिबति पादपः ॥ १६
ग्रहणात्सुखदुःखस्य छिन्नस्य च विरोहणात् ।
जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥ १७
तेन तज्जलमादत्तं जरयत्यग्निमारुतौ ।
आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते ॥ १८
जङ्गमानां च सर्वेषां शरीरे पञ्च धातवः ।
प्रत्येकशः प्रभिद्यन्ते यैः शरीरं विचेष्टते ॥ १९
त्वक्च मांसं तथास्थीनि मज्जा स्नायु च पञ्चमम् ।
इत्येतदिह संख्यातं शरीरे पृथिवीमयम् ॥ २०
तेजोऽग्निश्च तथा क्रोधश्चक्षुरूष्मा तथैव च ।
अग्निर्जरयते चापि पञ्चाग्नेयाः शरीरिणः ॥ २१
श्रोत्रं घ्राणमथास्यं च हृदयं कोष्ठमेव च ।
आकाशात्प्राणिनामेते शरीरे पञ्च धातवः ॥ २२
श्लेष्मा पित्तमथ स्वेदो वसा शोणितमेव च ।
इत्यापः पञ्चधा देहे भवन्ति प्राणिनां सदा ॥ २३
प्राणात्प्रणीयते प्राणी व्यानाद्व्यायच्छते तथा ।
गच्छत्यपानोऽवाक्चैव समानो हृद्यवस्थितः ॥ २४
उदानादुच्छ्वसिति च प्रतिभेदाच्च भाषते ।
इत्येते वायवः पञ्च चेष्टयन्तीह देहिनम् ॥ २५
भूमेर्गन्धगुणान्वेत्ति रसं चाद्भ्यः शरीरवान् ।
ज्योतिः पश्यति चक्षुर्भ्यां स्पर्शं वेत्ति च वायुना ॥
तस्य गन्धस्य वक्ष्यामि विस्तराभिहितान्गुणान् ।
इष्टश्चानिष्टगन्धश्च मधुरः कटुरेव च ॥ २७
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ।
एवं नवविधो ज्ञेयः पार्थिवो गन्धविस्तरः ॥ २८
शब्दः स्पर्शश्च रूपं च रसश्चापां गुणाः स्मृताः ।
रसज्ञानं तु वक्ष्यामि तन्मे निगदतः शृणु ॥ २९
रसो बहुविधः प्रोक्तः सूरिभिः प्रथितात्मभिः ।
मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा ।
एष षड्विधविस्तारो रसो वारिमयः स्मृतः ॥ ३०
शब्दः स्पर्शश्च रूपं च त्रिगुणं ज्योतिरुच्यते ।
ज्योतिः पश्यति रूपाणि रूपं च बहुधा स्मृतम् ॥
ह्रस्वो दीर्घस्तथा स्थूलश्चतुरस्रोऽणु वृत्तवान् ।
शुक्लः कृष्णस्तथा रक्तो नीलः पीतोऽरुणस्तथा ।
एवं द्वादशविस्तारो ज्योतीरूपगुणः स्मृतः ॥ ३२
शब्दस्पर्शौ तु विज्ञेयौ द्विगुणो वायुरुच्यते ।
वायव्यस्तु गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः ॥३३
कठिनश्चिक्कणः श्लक्ष्णः पिच्छलो मृदुदारुणः ।
उष्णः शीतः सुखो दुःखः स्निग्धो विशद एव च ।

एवं द्वादशविस्तारो वायव्यो गुण उच्यते ॥ ३४
तत्रैकगुणमाकाशं शब्द इत्येव तत्स्मृतम् ।
तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकम् ॥३५
षड्ज ऋषभगान्धारौ मध्यमः पञ्चमस्तथा ।
धैवतश्चापि विज्ञेयस्तथा चापि निषादकः ॥ ३६
एष सप्तविधः प्रोक्तो गुण आकाशलक्षणः ।
त्रैस्वर्येण तु सर्वत्र स्थितोऽपि पटहादिषु ॥ ३७
आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह ।
अव्याहतैश्चेतयते न वेत्ति विषमागतैः ॥ ३८
आप्यायन्ते च ते नित्यं धातवस्तैस्तु धातुभिः ।
आपोऽग्निर्मारुतश्चैव नित्यं जाग्रति देहिषु ॥ ३९

इति श्रीमहाभारते शान्तिपर्वणि
सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

१७८

भरद्वाज उवाच ।

पार्थिवं धातुमाश्रित्य शारीरोऽग्निः कथं भवेत् ।
अवकाशविशेषेण कथं वर्तयतेऽनिलः ॥ १

भृगुरुवाच ।

वायोर्गतिमहं ब्रह्मन्कीर्तयिष्यामि तेऽनघ ।
प्राणिनामनिलो देहान्यथा चेष्टयते बली ॥ २
श्रितो मूर्धानमग्निस्तु शरीरं परिपालयन् ।
प्राणो मूर्धनि चाग्नौ च वर्तमानो विचेष्टते ॥ ३
स जन्तुः सर्वभूतात्मा पुरुषः स सनातनः ।
मनो बुद्धिरहंकारो भूतानि विषयाश्च सः ॥ ४
एवं त्विह स सर्वत्र प्राणेन परिपाल्यते ।
पृष्ठतश्च समानेन स्वां स्वां गतिमुपाश्रितः ॥ ५
बस्तिमूलं गुदं चैव पावकं च समाश्रितः ।
वहन्मूत्रं पुरीषं चाप्यपानः परिवर्तते ॥ ६
प्रयत्ने कर्मणि बले य एकस्त्रिषु वर्तते ।
उदान इति तं प्राहुरध्यात्मविदुषो जनाः ॥ ७
संधिष्वपि च सर्वेषु संनिविष्टस्तथानिलः ।
शरीरेषु मनुष्याणां व्यान इत्युपदिश्यते ॥ ८
धातुष्वग्निस्तु विततः समानेन समीरितः ।
रसान्धातूंश्च दोषांश्च वर्तयन्नवतिष्ठति ॥ ९
अपानप्राणयोर्मध्ये प्राणापानसमाहितः ।
समन्वितः स्वधिष्ठानः सम्यक्पचति पावकः ॥ १०
आस्यं हि पायुसंयुक्तमन्ते स्याद्गुदसंज्ञितम् ।
स्रोतस्तस्मात्प्रजायन्ते सर्वस्रोतांसि देहिनाम् ॥ ११
प्राणानां संनिपाताच्च संनिपातः प्रजायते ।
ऊष्मा चाग्निरिति ज्ञेयो योऽन्नं पचति देहिनाम् ॥
अग्निवेगवहः प्राणो गुदान्ते प्रतिहन्यते ।
स ऊर्ध्वमागम्य पुनः समुत्क्षिपति पावकम् ॥१३
पक्वाशयस्त्वधो नाभेरूर्ध्वमामाशयः स्थितः ।
नाभिमध्ये शरीरस्य सर्वे प्राणाः समाहिताः ॥१४
प्रसृता हृदयात्सर्वे तिर्यगूर्ध्वमधस्तथा ।
वहन्त्यन्नरसान्नाड्यो दश प्राणप्रचोदिताः ॥ १५
एष मार्गोऽथ योगानां येन गच्छन्ति तत्पदम् ।
जितक्लमासना धीरा मूर्धन्यात्मानमादधुः ॥ १६
एवं सर्वेषु विहितः प्राणापानेषु देहिनाम् ।
तस्मिन्स्थितो नित्यमग्निः स्थाल्यामिव समाहितः ॥१७

इति श्रीमहाभारते शान्तिपर्वणि
अष्टसप्तत्यधिकशततमोऽध्यायः ॥१७८ ॥

१७९

भरद्वाज उवाच ।

यदि प्राणायते वायुर्वायुरेव विचेष्टते ।
श्वसित्याभाषते चैव तस्माज्जीवो निरर्थकः ॥ १
यद्यूष्मभाव आग्नेयो वह्निना पच्यते यदि ।
अग्निर्जरयते चैव तस्माज्जीवो निरर्थकः ॥ २
जन्तोः प्रमीयमाणस्य जीवो नैवोपलभ्यते ।
वायुरेव जहात्येनमूष्मभावश्च नश्यति ॥ ३

यदि वातोपमो जीवः संश्लेषो यदि वायुना ।
वायुमण्डलवद्दृश्यो गच्छेत्सह मरुद्गणैः ॥ ४
श्लेषो यदि च वातेन यदि तस्मात्प्रणश्यति ।
महार्णवविमुक्तत्वादन्यत्सलिलभाजनम् ॥ ५
कूपे वा सलिलं दद्यात्प्रदीपं वा हुताशने ।
प्रक्षिप्तं नश्यति क्षिप्रं यथा नश्यत्यसौ तथा ॥ ६
पञ्चसाधारणे ह्यस्मिञ्शरीरे जीवितं कुतः ।
येषामन्यतरत्यागाच्चतुर्णां नास्ति संग्रहः ॥ ७
नश्यन्त्यापो ह्यनाहाराद्वायुरुच्छ्वासनिग्रहात् ।
नश्यते कोष्ठभेदात्खमग्निर्नश्यत्यभोजनात् ॥ ८
व्याधिव्रणपरिक्लेशैर्मेदिनी चैव शीर्यते ।
पीडितेऽन्यतरे ह्येषां संघातो याति पञ्चधा ॥ ९
तस्मिन्पञ्चत्वमापन्ने जीवः किमनुधावति ।
किं वेदयति वा जीवः किं शृणोति ब्रवीति वा ॥१०
एषा गौः परलोकस्थं तारयिष्यति मामिति ।
यो दत्त्वा म्रियते जन्तुः सा गौः कं तारयिष्यति ॥
गौश्च प्रतिग्रहीता च दाता चैव समं यदा ।
इहैव विलयं यान्ति कुतस्तेषां समागमः ॥ १२
विहगैरुपयुक्तस्य शैलाग्रात्पतितस्य वा ।
अग्निना चोपयुक्तस्य कुतः संजीवनं पुनः ॥ १३
छिन्नस्य यदि वृक्षस्य न मूलं प्रतिरोहति ।
बीजान्यस्य प्रवर्तन्ते मृतः क्व पुनरेष्यति ॥ १४
बीजमात्रं पुरा सृष्टं यदेतत्परिवर्तते ।
मृता मृताः प्रणश्यन्ति बीजाद्बीजं प्रवर्तते ॥ १५

इति श्रीमहाभारते शान्तिपर्वणि
एकोनाशीतित्यधिकशततमोऽध्यायः ॥ १६९ ॥

१८०

भृगुरुवाच ।

न प्रणाशोऽस्ति जीवानां दत्तस्य च कृतस्य च ।
याति देहान्तरं प्राणी शरीरं तु विशीर्यते ॥ १
न शरीराश्रितो जीवस्तस्मिन्नष्टे प्रणश्यति ।
यथा समित्सु दग्धासु न प्रणश्यति पावकः ॥ २

भरद्वाज उवाच ।

अग्नेर्यथा तथा तस्य यदि नाशो न विद्यते ।
इन्धनस्योपयोगान्ते न चाग्निर्नोपलभ्यते ॥ ३
नश्यतीत्येव जानामि शान्तमग्निमनिन्धनम् ।
गतिर्यस्य प्रमाणं वा संस्थानं वा न दृश्यते ॥ ४

भृगुरुवाच ।

समिधामुपयोगान्ते सन्नेवाग्निर्न दृश्यते ।
आकाशानुगतत्वाद्धि दुर्ग्रहः स निराश्रयः ॥ ५
तथा शरीरसंत्यागे जीवो ह्याकाशवत्स्थितः ।
न गृह्यते सुसूक्ष्मत्वाद्यथा ज्योतिर्न संशयः ॥ ६
प्राणान्धारयते ह्यग्निः स जीव उपधार्यताम् ।
वायुसंधारणो ह्यग्निर्नश्यत्युच्छ्वासनिग्रहात् ॥ ७
तस्मिन्नष्टे शरीराग्नौ शरीरं तदचेतनम् ।
पतितं याति भूमित्वमयनं तस्य हि क्षितिः ॥ ८
जङ्गमानां हि सर्वेषां स्थावराणां तथैव च ।
आकाशं पवनोऽभ्येति ज्योतिस्तमनुगच्छति ।
तत्र त्रयाणामेकत्वं द्वयं भूमौ प्रतिष्ठितम् ॥ ९
यत्र खं तत्र पवनस्तत्राग्निर्यत्र मारुतः ।
अमूर्तयस्ते विज्ञेया आपो मूर्तास्तथा क्षितिः ॥१०

भरद्वाज उवाच ।

यद्यग्निमारुतौ भूमिः खमापश्च शरीरिषु ।
जीवः किंलक्षणस्तत्रेत्येतदाचक्ष्व मेऽनघ ॥ ११
पञ्चात्मके पञ्चरतौ पञ्चविज्ञानसंयुते ।
शरीरे प्राणिनां जीवं ज्ञातुमिच्छामि यादृशम् ॥१२
मांसशोणितसंघाते मेदःस्नाय्वस्थिसंचये ।
भिद्यमाने शरीरे तु जीवो नैवोपलभ्यते ॥ १३
यद्यजीवं शरीरं तु पञ्चभूतसमन्वितम् ।

शारीरे मानसे दुःखे कस्तां वेदयते रुजम् ॥ १४
शृणोति कथितं जीवः कर्णाभ्यां न शृणोति तत् ।
महर्षे मनसि व्यग्रे तस्माज्जीवो निरर्थकः ॥ १५
सर्वं पश्यति यद्दृश्यं मनोयुक्तेन चक्षुषा ।
मनसि व्याकुले तद्धि पश्यन्नपि न पश्यति ॥ १६
न पश्यति न च ब्रूते न शृणोति न जिघ्रति ।
न च स्पर्शरसौ वेत्ति निद्रावशगतः पुनः ॥ १७
हृष्यति क्रुध्यति च कः शोचत्युद्विजते च कः ।
इच्छति ध्यायति द्वेष्टि वाचमीरयते च कः ॥ १८

भृगुरुवाच ।

न पञ्चसाधारणमत्र किंचि-
च्छरीरमेको वहतेऽन्तरात्मा ।
स वेत्ति गन्धांश्च रसाञ्श्रुतिं च
स्पर्शं च रूपं च गुणाश्च येऽन्ये ॥ १९
पञ्चात्मके पञ्चगुणप्रदर्शी
स सर्वगात्रानुगतोऽन्तरात्मा ।
स वेत्ति दुःखानि सुखानि चात्र
तद्विप्रयोगात्तु न वेत्ति देहः ॥ २०
यदा न रूपं न स्पर्शो नोष्मभावश्च पावके ।
तदा शान्ते शरीराग्नौ देहं त्यक्त्वा स नश्यति ॥
अम्मयं सर्वमेवेदमापो मूर्तिः शरीरिणाम् ।
तत्रात्मा मानसो ब्रह्मा सर्वभूतेषु लोककृत् ॥ २२
आत्मानं तं विजानीहि सर्वलोकहितात्मकम् ।
तस्मिन्यः संश्रितो देहे ह्यब्बिन्दुरिव पुष्करे ॥२३
क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकम् ।
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान् ॥२४
सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम् ।
ततः परं क्षेत्रविदं वदन्ति
प्रावर्तयद्यो भुवनानि सप्त ॥ २५
न जीवनाशोऽस्ति हि देहभेदे
मिथ्यैतदाहुर्मृत इत्यबुद्धाः ।
जीवस्तु देहान्तरितः प्रयाति
दशार्धतैवास्य शरीरभेदः ॥ २६
एवं सर्वेषु भूतेषु गूढश्चरति संवृतः ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया तत्त्वदर्शिभिः ॥
तं पूर्वापररात्रेषु युञ्जानः सततं बुधः ।
लघ्वाहारो विशुद्धात्मा पश्यत्यात्मानमात्मनि ॥२८
चित्तस्य हि प्रसादेन हित्वा कर्म शुभाशुभम् ।
प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते ॥ २९
मानसोऽग्निः शरीरेषु जीव इत्यभिधीयते ।
सृष्टिः प्रजापतेरेषा भूताध्यात्मविनिश्चये ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

१८१

भृगुरुवाच ।

असृजद्ब्राह्मणानेव पूर्वं ब्रह्मा प्रजापतिः ।
आत्मतेजोभिनिर्वृत्तान्भास्कराग्निसमप्रभान् ॥ १
ततः सत्यं च धर्मं च तपो ब्रह्म च शाश्वतम् ।
आचारं चैव शौचं च स्वर्गाय विदधे प्रभुः ॥ २
देवदानवगन्धर्वदैत्यासुरमहोरगाः ।
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ॥ ३
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ।
ये चान्ये भूतसंघानां संघास्तांश्चापि निर्ममे ॥ ४
ब्राह्मणानां सितो वर्णः क्षत्रियाणां तु लोहितः ।
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ॥ ५

भरद्वाज उवाच ।

चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्वेषां खलु वर्णानां दृश्यते वर्णसंकरः ॥ ६
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।

सर्वेषां नः प्रभवति कस्माद्वर्णो विभज्यते ॥ ७
स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितम् ।
तनुः क्षरति सर्वेषां कस्माद्वर्णो विभज्यते ॥ ८
जङ्गमानामसंख्येयाः स्थावराणां च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥ ९

भृगुरुवाच ।

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥ १०
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः ।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥ ११
गोषु वृत्तिं समाधाय पीताः कृष्युपजीविनः ।
स्वधर्मं नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥ १२
हिंसानृतप्रिया लुब्धाः सर्वकर्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥ १३
इत्येतैः कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
धर्मो यज्ञक्रिया चैषां नित्यं न प्रतिषिध्यते ॥ १४
वर्णाश्चत्वार एते हि येषां ब्राह्मी सरस्वती ।
विहिता ब्रह्मणा पूर्वं लोभात्त्वज्ञानतां गताः ॥ १५
ब्राह्मणा धर्मतन्त्रस्थास्तपस्तेषां न नश्यति ।
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ॥ १६
ब्रह्म चैतत्पुरा सृष्टं ये न जानन्त्यतद्विदः ।
तेषां बहुविधास्त्वन्यास्तत्र तत्र हि जातयः ॥ १७
पिशाचा राक्षसाः प्रेता बहुधा म्लेच्छजातयः ।
प्रनष्टज्ञानविज्ञानाः स्वच्छन्दाचारचेष्टिताः ॥ १८
प्रजा ब्राह्मणसंस्काराः स्वधर्मकृतनिश्चयाः ।
ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परैः ॥ १९
आदिदेवसमुद्भूता ब्रह्ममूलाक्षयाव्यया ।
सा सृष्टिर्मानसी नाम धर्मतन्त्रपरायणा ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

१८२

भरद्वाज उवाच ।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ।
वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर ॥ १

भृगुरुवाच ।

जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसंपन्नः षट्सु कर्मस्ववस्थितः ॥ २
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥ ३
सत्यं दानं दमोऽद्रोह आनृशंस्यं क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥ ४
क्षत्रजं सेवते कर्म वेदाध्ययनसंमतः ।
दानादानरतिर्यश्च स वै क्षत्रिय उच्यते ॥ ५
कृषिगोरक्ष्यवाणिज्यं यो विशत्यनिशं शुचिः ।
वेदाध्ययनसंपन्नः स वैश्य इति संज्ञितः ॥ ६
सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥ ७
शूद्रे चैतद्भवेल्लक्ष्यं द्विजे चैतन्न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ ८
सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः ।
एतत्पवित्रं ज्ञातव्यं तथा चैवात्मसंयमः ॥ ९
नित्यं क्रोधात्तपो रक्षेच्छ्रियं रक्षेत मत्सरात् ।
विद्यां मानावमानाभ्यामात्मानं तु प्रमादतः ॥ १०
यस्य सर्वे समारम्भा निराशीर्बन्धनास्त्विह ।
त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् ॥ ११
अहिंस्रः सर्वभूतानां मैत्रायणगतश्चरेत् ।
अविस्रम्भे न गन्तव्यं विस्रम्भे धारयेन्मनः ॥ १२
परिग्रहान्परित्यज्य भवेद्बुद्ध्या जितेन्द्रियः ।
अशोकं स्थानमातिष्ठेदिह चामुत्र चाभयम् ॥ १३
तपोनित्येन दान्तेन मुनिना संयतात्मना ।

अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना ॥ १४
इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः ।
अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम् ॥ १५
मनः प्राणे निगृह्णीयात्प्राणं ब्रह्मणि धारयेत् ।
निर्वाणादेव निर्वाणो न च किंचिद्विचिन्तयेत् ।
सुखं वै ब्राह्मणो ब्रह्म स वै तेनाधिगच्छति ॥ १६
शौचेन सततं युक्तस्तथाचारसमन्वितः ।
सानुक्रोशश्च भूतेषु तद्द्विजातिषु लक्षणम् ॥ १७

इति श्रीमहाभारते शान्तिपर्वणि
द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

१८३

भृगुरुवाच ।

सत्यं ब्रह्म तपः सत्यं सत्यं सृजति च प्रजाः ।
सत्येन धार्यते लोकः स्वर्गं सत्येन गच्छति ॥ १
अनृतं तमसो रूपं तमसा नीयते ह्यधः ।
तमोग्रस्ता न पश्यन्ति प्रकाशं तमसावृतम् ॥ २
स्वर्गः प्रकाश इत्याहुर्नरकं तम एव च ।
सत्यानृतात्तदुभयं प्राप्यते जगतीचरैः ॥ ३
तत्र त्वेवंविधा वृत्तिर्लोके सत्यानृता भवेत् ।
धर्माधर्मौ प्रकाशश्च तमो दुःखं सुखं तथा ॥ ४

तत्र यत्सत्यं स धर्मो यो धर्मः स प्रकाशो यः
प्रकाशस्तत्सुखमिति । १ । तत्र यदनृतं सोऽधर्मो
योऽधर्मस्तत्तमो यत्तमस्तद्दुःखमिति । २ ॥ ५

अत्रोच्यते ।

शारीरैर्मानसैर्दुःखैः सुखैश्चाप्यसुखोदयैः ।
लोकसृष्टिं प्रपश्यन्तो न मुह्यन्ति विचक्षणाः ॥ ६
तत्र दुःखविमोक्षार्थं प्रयतेत विचक्षणः ।
सुखं ह्यनित्यं भूतानामिहलोके परत्र च ॥ ७
राहुग्रस्तस्य सोमस्य यथा ज्योत्स्ना न भासते ।
तथा तमोभिभूतानां भूतानां भ्रश्यते सुखम् ॥ ८

तत्खलु द्विविधं सुखमुच्यते शारीरं मानसं
च । १ । इह खल्वमुष्मिंश्च लोके सर्वारम्भप्रवृत्तयः
सुखार्था अभिधीयन्ते । २ । न ह्यतस्त्रिवर्गफलं वि-
शिष्टतरमस्ति । ३ । स एष काम्यो गुणविशेषो
धर्मार्थयोरारम्भस्तद्धेतुरस्योत्पत्तिः सुखप्रयोजना । ४
॥ ९

भरद्वाज उवाच ।

यदेतद्भवताभिहितं सुखानां परमाः स्त्रिय इति
तन्न गृह्णीमः । १ । न ह्येषामृषीणां महति स्थिता-
नामप्राप्य एष गुणविशेषो न चैनमभिलषन्ति । २ ।
श्रूयते च भगवांस्त्रिलोककृद्ब्रह्मा प्रभुरेकाकी ति-
ष्ठति । ३ । ब्रह्मचारी न कामसुखेष्वात्मानमवद-
धाति । ४ । अपि च भगवान्विश्वेश्वर उमापतिः
काममभिवर्तमानमनङ्गत्वेन शममनयत् । ५ ।
तस्माद्ब्रूमो न महात्मभिरयं प्रतिगृहीतो न त्वेष
तावद्विशिष्टो गुण इति नैतद्भगवतः प्रत्येति । ६ ।
भगवता तूक्तं सुखानां परमा स्त्रिय इति । ७ ।
लोकप्रवादोऽपि च भवति द्विविधः फलोदयः
सुकृतात्सुखमवाप्यते दुष्कृताद्दुःखमिति । ८ । अत्रो-
च्यताम् । ९ ॥ १०

भृगुरुवाच ।

अनृतात्खलु तमः प्रादुर्भूतं तमोग्रस्ता अधर्म-
मेवानुवर्तन्ते न धर्मम् । १ । क्रोधलोभमोहमाना-
नृतादिभिरवच्छन्ना न खल्वस्मिँल्लोके न चामुत्र
सुखमाप्नुवन्ति । २ । विविधव्याधिगणोपतापैरव-
कीर्यन्ते । ३ । वधबन्धरोगपरिक्लेशादिभिश्च क्षुत्पि-
पासाश्रमकृतैरुपतापैरुपतप्यन्ते । ४ । चण्डवाता-
त्युष्णातिशीतकृतैश्च प्रतिभयैः शारीरैर्दुःखैरुप-
तप्यन्ते । ५ । बन्धुधनविनाशविप्रयोगकृतैश्च मानसैः
शोकैरभिभूयन्ते जरामृत्युकृतैश्चान्यैरिति । ६ ॥ ११

यस्त्वेतैः शारीरैर्मानसैर्दुःखैर्न स्पृश्यते स सुखं
वेद । १ । न चैते दोषाः स्वर्गे प्रादुर्भवन्ति । २ ।
तत्र भवति खलु । ३ ॥ १२
सुसुखः पवनः स्वर्गे गन्धश्च सुरभिस्तथा ।
क्षुत्पिपासाश्रमो नास्ति न जरा न च पापकम् ॥१३
नित्यमेव सुखं स्वर्गे सुखं दुःखमिहोभयम् ।
नरके दुःखमेवाहुः समं तु परमं पदम् ॥ १४
पृथिवी सर्वभूतानां जनित्री तद्विधाः स्त्रियः ।
पुमान्प्रजापतिस्तत्र शुक्रं तेजोमयं विदुः ॥ १५
इत्येतल्लोकनिर्माणं ब्रह्मणा विहितं पुरा ।
प्रजा विपरिवर्तन्ते स्वैः स्वैः कर्मभिरावृताः ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

१८४

भरद्वाज उवाच ।

दानस्य किं फलं प्राहुर्धर्मस्य चरितस्य च ।
तपसश्च सुतप्तस्य स्वाध्यायस्य हुतस्य च ॥ १

भृगुरुवाच ।

हुतेन शाम्यते पापं स्वाध्याये शान्तिरुत्तमा ।
दानेन भोग इत्याहुस्तपसा सर्वमाप्नुयात् ॥ २
दानं तु द्विविधं प्राहुः परत्रार्थमिहैव च ।
सद्भ्यो यद्दीयते किंचित्तत्परत्रोपतिष्ठति ॥ ३
असत्सु दीयते यत्तु तद्दानमिह भुज्यते ।
यादृशं दीयते दानं तादृशं फलमाप्यते ॥ ४

भरद्वाज उवाच ।

किं कस्य धर्मचरणं किं वा धर्मस्य लक्षणम् ।
धर्मः कतिविधो वापि तद्भवान्वक्तुमर्हति ॥ ५

भृगुरुवाच ।

स्वधर्मचरणे युक्ता ये भवन्ति मनीषिणः ।
तेषां धर्मफलावाप्तिर्योऽन्यथा स विमुह्यति ॥ ६

भरद्वाज उवाच ।

यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहितं पुरा ।
तेषां स्वे स्वे य आचारास्तान्मे वक्तुमिहार्हसि ॥७

भृगुरुवाच ।

पूर्वमेव भगवता लोकहितमनुतिष्ठता धर्मसंरक्ष-
णार्थमाश्रमाश्चत्वारोऽभिनिर्दिष्टाः । १ । तत्र गुरु-
कुलवासमेव तावत्प्रथममाश्रममुदाहरन्ति । २ । स-
म्यगत्र शौचसंस्कारविनयनियमप्रणीतो विनीतात्मा
उभे संध्ये भास्कराग्निदैवतान्युपस्थाय विहाय तन्द्रा-
लस्ये गुरोरभिवादनवेदाभ्यासश्रवणपवित्रीकृतान्त-
रात्मा त्रिषवणमुपस्पृश्य ब्रह्मचर्याग्निपरिचरणगुरु-
शुश्रूषानित्यो भैक्षादिसर्वनिवेदितान्तरात्मा गुरु-
वचननिर्देशानुष्ठानाप्रतिकूलो गुरुप्रसादलब्धस्वा-
ध्यायतत्परः स्यात् । ३ ॥ ८

भवति चात्र श्लोकः ।

गुरुं यस्तु समाराध्य द्विजो वेदमवाप्नुयात् ।
तस्य स्वर्गफलावाप्तिः सिध्यते चास्य मानसम् ॥ ९

गार्हस्थ्यं खलु द्वितीयमाश्रमं वदन्ति । १ ।
तस्य समुदाचारलक्षणं सर्वमनुव्याख्यास्यामः । २ ।
समावृत्तानां सदाराणां सहधर्मचर्याफलार्थिनां
गृहाश्रमो विधीयते । ३ । धर्मार्थकामावाप्तिर्ह्यत्र
त्रिवर्गसाधनमवेक्ष्यागर्हितेन कर्मणा धनान्यादाय
स्वाध्यायप्रकर्षोपलब्धेन ब्रह्मर्षिनिर्मितेन वा अद्रि-
सारगतेन वा हव्यनियमाभ्यासदैवतप्रसादोपलब्धेन
वा धनेन गृहस्थो गार्हस्थ्यं प्रवर्तयेत् । ४ । तद्धि
सर्वाश्रमाणां मूलमुदाहरन्ति । ५ । गुरुकुलवासिनः
परिव्राजका ये चान्ये संकल्पितव्रतनियमधर्मा-
नुष्ठायिनस्तेषामप्यत एव भिक्षाबलिसंविभागाः
प्रवर्तन्ते । ६ ॥ १०

वानप्रस्थानां द्रव्योपस्कार इति प्रायशः खल्वेते
साधवः साधुपथ्यदर्शनाः स्वाध्यायप्रसङ्गिनस्तीर्था-
भिगमनदेशदर्शनार्थं पृथिवीं पर्यटन्ति । १ । तेषां
प्रत्युत्थानाभिवादनानसूयावाक्प्रदानसौमुख्यशक्त्या-
सनशयनाभ्यवहारसत्क्रियाश्चेति । २ ॥ ११

भवति चात्र श्लोकः ।

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥१२

अपि चात्र यज्ञक्रियाभिर्देवताः प्रीयन्ते निवापेन
पितरो वेदाभ्यासश्रवणधारणेन ऋषयः । १ । अप-
त्योत्पादनेन प्रजापतिरिति । २ ॥ १३

श्लोकौ चात्र भवतः ।

वत्सलाः सर्वभूतानां वाच्याः श्रोत्रसुखा गिरः ।
परिवादोपघातौ च पारुष्यं चात्र गर्हितम् ॥ १४
अवज्ञानमहंकारो दम्भश्चैव विगर्हितः ।
अहिंसा सत्यमक्रोधः सर्वाश्रमगतं तपः ॥ १५

अपि चात्र माल्याभरणवस्त्राभ्यङ्गगन्धोपभोग-
नृत्तगीतवादित्रश्रुतिसुखनयनाभिरामसंदर्शनानां प्रा-
प्तिर्भक्ष्यभोज्यपेयलेह्यचोष्याणामभ्यवहार्याणां वि-
विधानामुपभोगः स्वदारविहारसंतोषः कामसुखा-
वाप्तिरिति ॥ १६

त्रिवर्गगुणनिर्वृत्तिर्यस्य नित्यं गृहाश्रमे ।
स सुखान्यनुभूयेह शिष्टानां गतिमाप्नुयात् ॥ १७
उञ्छवृत्तिर्गृहस्थो यः स्वधर्मचरणे रतः ।
त्यक्तकामसुखारम्भस्तस्य स्वर्गो न दुर्लभः ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

१८५

भृगुरुवाच ।

वानप्रस्थाः खलु ऋषिधर्ममनुसरन्तः पुण्यानि
तीर्थानि नदीप्रस्रवणानि सुविविक्तेष्वरण्येषु मृग-
महिषवराहसृमरगजाकीर्णेषु तपस्यन्तोऽनुसंचरन्ति
। १ । त्यक्तग्राम्यवस्त्राहारोपभोगा वन्यौषधिमूलफल-
पर्णपरिमितविचित्रनियताहाराः स्थानासनिनो भूमि-
पाषाणसिकताशर्करावालुकाभस्मशायिनः काशकुश-
चर्मवल्कलसंवृताङ्गाः केशश्मश्रुनखरोमधारिणो नि-
यतकालोपस्पर्शना अस्कन्नहोमबलिकालानुष्ठायिनः
समित्कुशकुसुमोपहारहोमार्जनलब्धविश्रामाः शीतो-
ष्णपवननिष्टप्तविभिन्नसर्वत्वचो विविधनियमयोग-
चर्याविहितधर्मानुष्ठानहृतमांसशोणितास्त्वगस्थिभू-
ता धृतिपराः सत्त्वयोगाच्छरीराण्युद्वहन्ति । २॥ १
यस्त्वेतां नियतश्चर्यां ब्रह्मर्षिविहितां चरेत् ।
स दहेदग्निवद्दोषाञ्जयेल्लोकांश्च दुर्जयान् ॥ २

परिव्राजकानां पुनराचारस्तद्यथा । १ । विमु-
च्याग्निधनकलत्रपरिबर्हसङ्गानात्मनः स्नेहपाशानव-
धूय परिव्रजन्ति समलोष्टाश्मकाञ्चनास्त्रिवर्गप्रवृत्ते-
ष्वारम्भेष्वसक्तबुद्धयोऽरिमित्रोदासीनेषु तुल्यवृत्तयः
स्थावरजरायुजाण्डजस्वेदजोद्भिज्जानां भूतानां वाङ्म-
नःकर्मभिरनभिद्रोहिणोऽनिकेताः पर्वतपुलिनवृक्ष-
मूलदेवतायतनान्यनुचरन्तो वासार्थमुपेयुर्नगरं ग्रामं
वा नगरे पञ्चरात्रिका ग्रामैकरात्रिकाः । २ । प्रविश्य
च प्राणधारणमात्रार्थं द्विजातीनां भवनान्यसंकीर्ण-
कर्मणामुपतिष्ठेयुः पात्रपतितायाचितभैक्षाः काम-
क्रोधदर्पमोहलोभकार्पण्यदम्भपरिवादाभिमानहिंसा-
निवृत्ता इति । ३ ॥ ३

भवति चात्र श्लोकः ।

अभयं सर्वभूतेभ्यो दत्त्वा चरति यो मुनिः ।

न तस्य सर्वभूतेभ्यो भयमुत्पद्यते कचित् ॥ ४
कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निं स्वमुखे जुहोति ।
यो भैक्षचर्योपगतैर्हविर्भि-
श्चिताग्निनां स व्यतियाति लोकान् ॥ ५
मोक्षाश्रमं यः कुरुते यथोक्तं
शुचिः सुसंकल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयते द्विजातिः ॥ ६

भरद्वाज उवाच ।

अस्माल्लोकात्परो लोकः श्रूयते नोपलभ्यते ।
तमहं ज्ञातुमिच्छामि तद्भवान्वक्तुमर्हति ॥ ७

भृगुरुवाच ।

उत्तरे हिमवत्पार्श्वे पुण्ये सर्वगुणान्विते ।
पुण्यः क्षेम्यश्च काम्यश्च स वरो लोक उच्यते ॥८
तत्र ह्यपापकर्माणः शुचयोऽत्यन्तनिर्मलाः ।
लोभमोहपरित्यक्ता मानवा निरुपद्रवाः ॥ ९
स स्वर्गसदृशो देशस्तत्र ह्युक्ताः शुभा गुणाः ।
काले मृत्युः प्रभवति स्पृशन्ति व्याधयो न च ॥१०
न लोभः परदारेषु स्वदारनिरतो जनः ।
न चान्योन्यवधस्तत्र द्रव्येषु न च विस्मयः ।
परोक्षधर्मो नैवास्ति संदेहो नापि जायते ॥ ११
कृतस्य तु फलं तत्र प्रत्यक्षमुपलभ्यते ।
शय्यायानासनोपेताः प्रासादभवनाश्रयाः ।
सर्वकामैर्वृताः केचिद्धेमाभरणभूषिताः ॥ १२
प्राणधारणमात्रं तु केषांचिदुपपद्यते ।
श्रमेण महता केचित्कुर्वन्ति प्राणधारणम् ॥ १३
इह धर्मपराः केचित्केचिन्नैकृतिका नराः ।
सुखिता दुःखिताः केचिन्निर्धना धनिनोऽपरे ॥१४
इह श्रमो भयं मोहः क्षुधा तीव्रा च जायते ।
लोभश्चार्थकृतो नृणां येन मुह्यन्ति पण्डिताः ॥१५
इह चिन्ता बहुविधा धर्माधर्मस्य कर्मणः ।
यस्तद्वेदोभयं प्राज्ञः पाप्मना न स लिप्यते ॥ १६
सोपधं निकृतिः स्तेयं परिवादोऽभ्यसूयता ।
परोपघातो हिंसा च पैशुन्यमनृतं तथा ॥ १७
एतानासेवते यस्तु तपस्तस्य प्रहीयते ।
यस्त्वेतान्नाचरेद्विद्वांस्तपस्तस्याभिवर्धते ॥ १८
कर्मभूमिरियं लोक इह कृत्वा शुभाशुभम् ।
शुभैः शुभमवाप्नोति कृत्वाशुभमतोऽन्यथा ॥ १९
इह प्रजापतिः पूर्वं देवाः सर्षिगणास्तथा ।
इष्टेष्टतपसः पूता ब्रह्मलोकमुपाश्रिताः ॥ २०
उत्तरः पृथिवीभागः सर्वपुण्यतमः शुभः ।
इहत्यास्तत्र जायन्ते ये वै पुण्यकृतो जनाः ॥ २१
असत्कर्माणि कुर्वन्तस्तिर्यग्योनिषु चापरे ।
क्षीणायुषस्तथैवान्ये नश्यन्ति पृथिवीतले ॥ २२
अन्योन्यभक्षणे सक्ता लोभमोहसमन्विताः ।
इहैव परिवर्तन्ते न ते यान्त्युत्तरां दिशम् ॥ २३
ये गुरूनुपसेवन्ते नियता ब्रह्मचारिणः ।
पन्थानं सर्वलोकानां ते जानन्ति मनीषिणः ॥२४
इत्युक्तोऽयं मया धर्मः संक्षेपाद्ब्रह्मनिर्मितः ।
धर्माधर्मौ हि लोकस्य यो वै वेत्ति स बुद्धिमान् ॥

भीष्म उवाच ।

इत्युक्तो भृगुणा राजन्भरद्वाजः प्रतापवान् ।
भृगुं परमधर्मात्मा विस्मितः प्रत्यपूजयत् ॥ २६
एष ते प्रभवो राजञ्जगतः संप्रकीर्तितः ।
निखिलेन महाप्राज्ञ किं भूयः श्रोतुमिच्छसि ॥२७

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

१८६

युधिष्ठिर उवाच ।

आचारस्य विधिं तात प्रोच्यमानं त्वयानघ ।
श्रोतुमिच्छामि धर्मज्ञ सर्वज्ञो ह्यसि मे मतः ॥ १

भीष्म उवाच ।

दुराचारा दुर्विचेष्टा दुष्प्रज्ञाः प्रियसाहसाः ।
असन्तो ह्यभिविख्याताः सन्तश्चाचारलक्षणाः ॥ २
पुरीषं यदि वा मूत्रं ये न कुर्वन्ति मानवाः ।
राजमार्गे गवां मध्ये धान्यमध्ये च ते शुभाः ॥ ३
शौचमावश्यकं कृत्वा देवतानां च तर्पणम् ।
धर्ममाहुर्मनुष्याणामुपस्पृश्य नदीं तरेत् ॥ ४
सूर्यं सदोपतिष्ठेत न स्वप्याद्भास्करोदये ।
सायं प्रातर्जपन्संध्यां तिष्ठेत्पूर्वां तथापराम् ॥ ५
पञ्चार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः ।
न निन्देदन्नभक्ष्यांश्च स्वाद्वस्वादु च भक्षयेत् ॥ ६
नार्द्रपाणिः समुत्तिष्ठेन्नार्द्रपादः स्वपेन्निशि ।
देवर्षिनारदप्रोक्तमेतदाचारलक्षणम् ॥ ७
शुचिकाममनड्वाहं देवगोष्ठं चतुष्पथम् ।
ब्राह्मणं धार्मिकं चैव नित्यं कुर्यात्प्रदक्षिणम् ॥ ८
अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च ।
सामान्यं भोजनं भृत्यैः पुरुषस्य प्रशस्यते ॥ ९
सायं प्रातर्मनुष्याणामशनं देवनिर्मितम् ।
नान्तरा भोजनं दृष्टमुपवासी तथा भवेत् ॥ १०
होमकाले तथा जुह्वन्नृतुकाले तथा व्रजन् ।
अनन्यस्त्रीजनः प्राज्ञो ब्रह्मचारी तथा भवेत् ॥ ११
अमृतं ब्राह्मणोच्छिष्टं जनन्या हृदयं कृतम् ।
उपासीत जनः सत्यं सत्यं सन्त उपासते ॥ १२
यजुषा संस्कृतं मांसं निवृत्तो मांसभक्षणात् ।
न भक्षयेद्वृथामांसं पृष्ठमांसं च वर्जयेत् ॥ १३
स्वदेशे परदेशे वा अतिथिं नोपवासयेत् ।
काम्यं कर्मफलं लब्ध्वा गुरूणामुपपादयेत् ॥ १४
गुरुभ्य आसनं देयं कर्तव्यं चाभिवादनम् ।
गुरूनभ्यर्च्य युज्यन्ते आयुषा यशसा श्रिया ॥ १५
नेक्षेतादित्यमुद्यन्तं न च नग्नां परस्त्रियम् ।
मैथुनं समये धर्म्यं गुह्यं चैव समाचरेत् ॥ १६
तीर्थानां हृदयं तीर्थं शुचीनां हृदयं शुचिः ।
सर्वमार्यकृतं शौचं वालसंस्पर्शनानि च ॥ १७
दर्शने दर्शने नित्यं सुखप्रश्नमुदाहरेत् ।
सायं प्रातश्च विप्राणां प्रदिष्टमभिवादनम् ॥ १८
देवगोष्ठे गवां मध्ये ब्राह्मणानां क्रियापथे ।
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ॥ १९
पण्यानां शोभनं पण्यं कृषीणां बाद्यते कृषिः ।
बहुकारं च सस्यानां वाह्ये वाह्यं तथा गवाम् ॥ २०
संपन्नं भोजने नित्यं पानीये तर्पणं तथा ।
सुशृतं पायसे ब्रूयाद्यवाग्वां कृसरे तथा ॥ २१
श्मश्रुकर्मणि संप्राप्ते क्षुते स्नानेऽथ भोजने ।
व्याधितानां च सर्वेषामायुष्यमभिनन्दनम् ॥ २२
प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् ।
सुतस्त्रिया च शयनं सहभोज्यं च वर्जयेत् ॥ २३
त्वंकारं नामधेयं च ज्येष्ठानां परिवर्जयेत् ।
अवराणां समानानामुभयेषां न दुष्यति ॥ २४
हृदयं पापवृत्तानां पापमाख्याति वैकृतम् ।
ज्ञानपूर्वं विनश्यन्ति गूहमाना महाजने ॥ २५
ज्ञानपूर्वं कृतं पापं छादयन्त्यबहुश्रुताः ।
नैनं मनुष्याः पश्यन्ति पश्यन्ति त्रिदिवौकसः ॥ २६
पापेन हि कृतं पापं पापमेवानुवर्तते ।
धार्मिकेण कृतो धर्मः कर्तारमनुवर्तते ॥ २७

पापं कृतं न स्मरतीह मूढो
विवर्तमानस्य तदेति कर्तुः ।
राहुर्यथा चन्द्रमुपैति चापि

तथाबुधं पापमुपैति कर्म ॥ २८
आशया संचितं द्रव्यं यत्काले नेह भुज्यते ।
तद्बुधा न प्रशंसन्ति मरणं न प्रतीक्षते ॥ २९
मानसं सर्वभूतानां धर्ममाहुर्मनीषिणः ।
तस्मात्सर्वेषु भूतेषु मनसा शिवमाचरेत् ॥ ३०
एक एव चरेद्धर्मं नास्ति धर्मे सहायता ।
केवलं विधिमासाद्य सहायः किं करिष्यति ॥ ३१
देवा योनिर्मनुष्याणां देवानाममृतं दिवि ।
प्रेत्यभावे सुखं धर्माच्छश्वत्तैरुपभुज्यते ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥

१८७

युधिष्ठिर उवाच ।

अध्यात्मं नाम यदिदं पुरुषस्येह चिन्त्यते ।
यदध्यात्मं यतश्चैतत्तन्मे ब्रूह पितामह ॥ १

भीष्म उवाच ।

अध्यात्ममिति मां पार्थ यदेतदनुपृच्छसि ।
तद्व्याख्यास्यामि ते तात श्रेयस्करतरं सुखम् ॥ २
यज्ज्ञात्वा पुरुषो लोके प्रीतिं सौख्यं च विन्दति ।
फललाभश्च सद्यः स्यात्सर्वभूतहितं च तत् ॥ ३
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
महाभूतानि भूतानां सर्वेषां प्रभवाप्ययौ ॥ ४
ततः सृष्टानि तत्रैव तानि यान्ति पुनः पुनः ।
महाभूतानि भूतेषु सागरस्योर्मयो यथा ॥ ५
प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः ।
तद्वद्भूतानि भूतात्मा सृष्ट्वा संहरते पुनः ॥ ६
महाभूतानि पञ्चैव सर्वभूतेषु भूतकृत् ।
अकरोत्तेषु वैषम्यं तत्तु जीवोऽनु पश्यति ॥ ७
शब्दः श्रोत्रं तथा खानि त्रयमाकाशयोनिजम् ।
वायोस्त्वक्स्पर्शचेष्टाश्च वागित्येतच्चतुष्टयम् ॥ ८
रूपं चक्षुस्तथा पक्तिस्त्रिविधं तेज उच्यते ।
रसः क्लेदश्च जिह्वा च त्रयो जलगुणाः स्मृताः ॥९
घ्रेयं घ्राणं शरीरं च ते तु भूमिगुणास्त्रयः ।
महाभूतानि पञ्चैव षष्ठं तु मन उच्यते ॥ १०
इन्द्रियाणि मनश्चैव विज्ञानान्यस्य भारत ।
सप्तमी बुद्धिरित्याहुः क्षेत्रज्ञः पुनरष्टमः ॥ ११
चक्षुरालोकनायैव संशयं कुरुते मनः ।
बुद्धिरध्यवसायाय क्षेत्रज्ञः साक्षिवत्स्थितः ॥ १२
ऊर्ध्वं पादतलाभ्यां यदर्वागूर्ध्वं च पश्यति ।
एतेन सर्वमेवेदं विद्ध्यभिव्याप्तमन्तरम् ॥ १३
पुरुषे चेन्द्रियाणीह वेदितव्यानि कृत्स्नशः ।
तमो रजश्च सत्त्वं च विद्धि भावांस्तदाश्रयान् ॥१४
एतां बुद्ध्वा नरो बुद्ध्या भूतानामागतिं गतिम् ।
समवेक्ष्य शनैश्चैव लभते शममुत्तमम् ॥ १५
गुणान्नेनीयते बुद्धिर्बुद्धिरेवेन्द्रियाण्यपि ।
मनःषष्ठानि सर्वाणि बुद्ध्यभावे कुतो गुणाः ॥१६
इति तन्मयमेवैतत्सर्वं स्थावरजङ्गमम् ।
प्रलीयते चोद्भवति तस्मान्निर्दिश्यते तथा ॥ १७
येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ।
जिघ्रति घ्राणमित्याहु रसं जानाति जिह्वया ॥ १८
त्वचा स्पृशति च स्पर्शान्बुद्धिर्विक्रियतेऽसकृत् ।
येन संकल्पयत्यर्थं किंचिद्भवति तन्मनः ॥ १९
अधिष्ठानानि बुद्धेर्हि पृथगर्थानि पञ्चधा ।
पञ्चेन्द्रियाणि यान्याहुस्तान्यदृश्योऽधितिष्ठति ॥२०
पुरुषाधिष्ठिता बुद्धिस्त्रिषु भावेषु वर्तते ।
कदाचिल्लभते प्रीतिं कदाचिदनुशोचति ॥ २१
न सुखेन न दुःखेन कदाचिदपि वर्तते ।
एवं नराणां मनसि त्रिषु भावेष्ववस्थिता ॥ २२
सेयं भावात्मिका भावांस्त्रीनेतान्नातिवर्तते ।
सरितां सागरो भर्ता महावेलामिवोर्मिमान् ॥ २३

अतिभावगता बुद्धिर्भावे मनसि वर्तते ।
प्रवर्तमानं हि रजस्तद्भावमनुवर्तते ॥ २४
इन्द्रियाणि हि सर्वाणि प्रदर्शयति सा सदा ।
प्रीतिः सत्त्वं रजः शोकस्तमो मोहश्च ते त्रयः ॥ २५
ये ये च भावा लोकेऽस्मिन्सर्वेष्वेतेषु ते त्रिषु ।
इति बुद्धिगतिः सर्वा व्याख्याता तव भारत ॥२६
इन्द्रियाणि च सर्वाणि विजेतव्यानि धीमता ।
सत्त्वं रजस्तमश्चैव प्राणिनां संश्रिताः सदा ॥ २७
त्रिविधा वेदना चैव सर्वसत्त्वेषु दृश्यते ।
सात्त्विकी राजसी चैव तामसी चेति भारत ॥२८
सुखस्पर्शः सत्त्वगुणो दुःखस्पर्शो रजोगुणः ।
तमोगुणेन संयुक्तौ भवतोऽव्यावहारिकौ ॥ २९
तत्र यत्प्रीतिसंयुक्तं काये मनसि वा भवेत् ।
वर्तते सात्त्विको भाव इत्यवेक्षेत तत्तदा ॥ ३०
अथ यद्दुःखसंयुक्तमतुष्टिकरमात्मनः ।
प्रवृत्तं रज इत्येव तन्नसंरभ्य चिन्तयेत् ॥ ३१
अथ यन्मोहसंयुक्तमव्यक्तमिव यद्भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ ३२
प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता ।
कथंचिदभिवर्तन्त इत्येते सात्त्विका गुणाः ॥ ३३
अतुष्टिः परितापश्च शोको लोभस्तथाक्षमा ।
लिङ्गानि रजसस्तानि दृश्यन्ते हेत्वहेतुभिः ॥ ३४
अभिमानस्तथा मोहः प्रमादः स्वप्नतन्द्रिता ।
कथंचिदभिवर्तन्ते विविधास्तामसा गुणाः ॥ ३५
दूरगं बहुधागामि प्रार्थनासंशयात्मकम् ।
मनः सुनियतं यस्य स सुखी प्रेत्य चेह च ॥ ३६
सत्त्वक्षेत्रज्ञयोरेतदन्तरं पश्य सूक्ष्मयोः ।
सृजते तु गुणानेक एको न सृजते गुणान् ॥ ३७
मशकोदुम्बरौ चापि संप्रयुक्तौ यथा सदा ।
अन्योन्यमन्यौ च यथा संप्रयोगस्तथा तयोः ॥३८

पृथग्भूतौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा ।
यथा मत्स्यो जलं चैव संप्रयुक्तौ तथैव तौ ॥ ३९
न गुणा विदुरात्मानं स गुणान्वेत्ति सर्वशः ।
परिद्रष्टा गुणानां च संस्रष्टा मन्यते सदा ॥ ४०
इन्द्रियैस्तु प्रदीपार्थं कुरुते बुद्धिसप्तमैः ।
निर्विचेष्टैरजानद्भिः परमात्मा प्रदीपवत् ॥ ४१
सृजते हि गुणान्सत्त्वं क्षेत्रज्ञः परिपश्यति ।
संप्रयोगस्तयोरेष सत्त्वक्षेत्रज्ञयोर्ध्रुवः ॥ ४२
आश्रयो नास्ति सत्त्वस्य क्षेत्रज्ञस्य च कश्चन ।
सत्त्वं मनः संसृजति न गुणान्वै कदाचन ॥ ४३
रश्मींस्तेषां स मनसा यदा सम्यङ्नियच्छति ।
तदा प्रकाशतेऽस्यात्मा घटे दीपो ज्वलन्निव ॥ ४४
त्यक्त्वा यः प्राकृतं कर्म नित्यमात्मरतिर्मुनिः ।
सर्वभूतात्मभूतः स्यात्स गच्छेत्परमां गतिम् ॥४५
यथा वारिचरः पक्षी लिप्यमानो न लिप्यते ।
एवमेव कृतप्रज्ञो भूतेषु परिवर्तते ॥ ४६
एवंस्वभावमेवैतत्स्वबुद्ध्या विहरेन्नरः ।
अशोचन्नप्रहृष्यंश्च चरेद्विगतमत्सरः ॥ ४७
स्वभावसिद्ध्या संसिद्धान्स नित्यं सृजते गुणान् ।
ऊर्णनाभिर्यथा स्रष्टा विज्ञेयास्तन्तुवद्गुणाः ॥ ४८
प्रध्वस्ता न निवर्तन्ते निवृत्तिर्नोपलभ्यते ।
प्रत्यक्षेण परोक्षं तदनुमानेन सिध्यति ॥ ४९
एवमेके व्यवस्यन्ति निवृत्तिरिति चापरे ।
उभयं संप्रधार्यैतदध्यवस्येद्यथामति ॥ ५०
इतीमं हृदयग्रन्थिं बुद्धिभेदमयं दृढम् ।
विमुच्य सुखमासीत न शोचेच्छिन्नसंशयः ॥ ५१
मलिनाः प्राप्नुयुः शुद्धिं यथा पूर्णां नदीं नराः ।
अवगाह्य सुविद्वांसो विद्धि ज्ञानमिदं तथा ॥ ५२
महानदीं हि पारज्ञस्तप्यते न तरन्यथा ।
एवं ये विदुरध्यात्मं कैवल्यं ज्ञानमुत्तमम् ॥ ५३

एतां बुद्ध्वा नरः सर्वां भूतानामागतिं गतिम् ।
अवेक्ष्य च शनैर्बुद्ध्या लभते शं परं ततः ॥ ५४
त्रिवर्गो यस्य विदितः प्राग्ज्योतिः स विमुच्यते ।
अन्विष्य मनसा युक्तस्तत्त्वदर्शी निरुत्सुकः ॥ ५५
न चात्मा शक्यते द्रष्टुमिन्द्रियेषु विभागशः ।
तत्र तत्र विसृष्टेषु दुर्जयेष्वकृतात्मभिः ॥ ५६
एतद्बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणम् ।
विज्ञाय तद्धि मन्यन्ते कृतकृत्या मनीषिणः ॥ ५७
न भवति विदुषां ततो भयं
यदविदुषां सुमहद्भयं भवेत् ।
न हि गतिरधिकास्ति कस्यचि-
त्सति हि गुणे प्रवदन्त्यतुल्यताम् ॥ ५८
यत्करोत्यनभिसंधिपूर्वकं
तच्च निर्णुदति यत्पुरा कृतम् ।
नाप्रियं तदुभयं कुतः प्रियं
तस्य तज्जनयतीह कुर्वतः ॥ ५९
लोक आतुरजनान्विराविण-
स्तत्तदेव बहु पश्य शोचतः ।
तत्र पश्य कुशलानशोचतो
ये विदुस्तदुभयं पदं सदा ॥ ६०

इति श्रीमहाभारते शान्तिपर्वणि
सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

१८८

भीष्म उवाच ।

हन्त वक्ष्यामि ते पार्थ ध्यानयोगं चतुर्विधम् ।
यं ज्ञात्वा शाश्वतीं सिद्धिं गच्छन्ति परमर्षयः ॥ १
यथा स्वनुष्ठितं ध्यानं तथा कुर्वन्ति योगिनः ।
महर्षयो ज्ञानतृप्ता निर्वाणगतमानसाः ॥ २
नावर्तन्ते पुनः पार्थ मुक्ताः संसारदोषतः ।
जन्मदोषपरिक्षीणाः स्वभावे पर्यवस्थिताः ॥ ३
निर्द्वंद्वा नित्यसत्त्वस्था विमुक्ता नित्यमाश्रिताः ।
असङ्गीन्यविवादीनि मनःशान्तिकराणि च ॥ ४
तत्र स्वाध्यायसंश्लिष्टमेकाग्रं धारयेन्मनः ।
पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः ॥ ५
शब्दं न विन्देच्छ्रोत्रेण स्पर्शं त्वचा न वेदयेत् ।
रूपं न चक्षुषा विद्याज्जिह्वया न रसांस्तथा ॥ ६
घ्रेयाण्यपि च सर्वाणि जह्याद्ध्यानेन योगवित् ।
पञ्चवर्गप्रमाथीनि नेच्छेच्चैतानि वीर्यवान् ॥ ७
ततो मनसि संसज्य पञ्चवर्गं विचक्षणः ।
समादध्यान्मनो भ्रान्तमिन्द्रियैः सह पञ्चभिः ॥ ८
विसंचारि निरालम्बं पञ्चद्वारं चलाचलम् ।
पूर्वे ध्यानपथे धीरः समादध्यान्मनोऽन्तरम् ॥ ९
इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्ययम् ।
एष ध्यानपथः पूर्वो मया समनुवर्णितः ॥ १०
तस्य तत्पूर्वसंरुद्धं मनःषष्ठमनन्तरम् ।
स्फुरिष्यति समुद्भ्रान्तं विद्युदम्बुधरे यथा ॥ ११
जलबिन्दुर्यथा लोलः पर्णस्थः सर्वतश्चलः ।
एवमेवास्य तच्चित्तं भवति ध्यानवर्त्मनि ॥ १२
समाहितं क्षणं किंचिद्ध्यानवर्त्मनि तिष्ठति ।
पुनर्वायुपथं भ्रान्तं मनो भवति वायुवत् ॥ १३
अनिर्वेदो गतक्लेशो गततन्द्रीरमत्सरः ।
समादध्यात्पुनश्चेतो ध्यानेन ध्यानयोगवित् ॥ १४
विचारश्च वितर्कश्च विवेकश्चोपजायते ।
मुनेः समादधानस्य प्रथमं ध्यानमादितः ॥ १५
मनसा क्लिश्यमानस्तु समाधानं च कारयेत् ।
न निर्वेदं मुनिर्गच्छेत्कुर्यादेवात्मनो हितम् ॥ १६
पांसुभस्मकरीषाणां यथा वै राशयश्चिताः ।
सहसा वारिणा सिक्ता न यान्ति परिभावनाम् ॥ १७
किंचित्स्निग्धं यथा च स्याच्छुष्कचूर्णमभावितम् ।
क्रमशस्तु शनैर्गच्छेत्सर्वं तत्परिभावनम् ॥ १८

एवमेवेन्द्रियग्रामं शनैः संपरिभावयेत् ।
संहरेत्क्रमशश्चैव स सम्यक्प्रशमिष्यति ॥ १९
स्वयमेव मनश्चैव पञ्चवर्गश्च भारत ।
पूर्वं ध्यानपथं प्राप्य नित्ययोगेन शाम्यति ॥ २०
न तत्पुरुषकारेण न च दैवेन केनचित् ।
सुखमेष्यति तत्तस्य यदेवं संयतात्मनः ॥ २१
सुखेन तेन संयुक्तो रंस्यन्ते ध्यानकर्मणि ।
गच्छन्ति योगिनो ह्येवं निर्वाणं तन्निरामयम् ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

१८९

युधिष्ठिर उवाच ।

चातुराश्रम्यमुक्तं ते राजधर्मास्तथैव च ।
नानाश्रयाश्च बहवः इतिहासाः पृथग्विधाः ॥ १
श्रुतास्त्वत्तः कथाश्चैव धर्मयुक्ता महामते ।
संदेहोऽस्ति तु कश्चिन्मे तद्भवान्वक्तुमर्हति ॥ २
जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ।
किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ॥ ३
जपस्य च विधिं कृत्स्नं वक्तुमर्हसि तेऽनघ ।
जापका इति किं चैतत्सांख्ययोगक्रियाविधिः ॥ ४
किं यज्ञविधिरेवैष किमेतज्जप्यमुच्यते ।
एतन्मे सर्वमाचक्ष्व सर्वज्ञो ह्यसि मे वद ॥ ५

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यमस्य यत्पुरा वृत्तं कालस्य ब्राह्मणस्य च ॥ ६
संन्यास एव वेदान्ते वर्तते जपनं प्रति ।
वेदवादाभिनिर्वृत्ता शान्तिर्ब्रह्मण्यवस्थितौ ।
मार्गौ तावप्युभावेतौ संश्रितौ न च संश्रितौ ॥ ७
यथा संश्रूयते राजन्कारणं चात्र वक्ष्यते ।
मनःसमाधिरत्रापि तथेन्द्रियजयः स्मृतः ॥ ८
सत्यमग्निपरीचारो विविक्तानां च सेवनम् ।
ध्यानं तपो दमः क्षान्तिरनसूया मिताशनम् ॥ ९
विषयप्रतिसंहारो मितजल्पस्तथा शमः ।
एष प्रवृत्तको धर्मो निवृत्तकमथो शृणु ॥ १०
यथा निवर्तते कर्म जपतो ब्रह्मचारिणः ।
एतत्सर्वमशेषेण यथोक्तं परिवर्जयेत् ।
त्रिविधं मार्गमासाद्य व्यक्ताव्यक्तमनाश्रयम् ॥ ११
कुशोच्चयनिषण्णः सन्कुशहस्तः कुशैः शिखी ।
चीरैः परिवृतस्तस्मिन्मध्ये छन्नः कुशैस्तथा ॥ १२
विषयेभ्यो नमस्कुर्याद्विषयान्न च भावयेत् ।
साम्यमुत्पाद्य मनसो मनस्येव मनो दधत् ॥ १३
तद्धिया ध्यायति ब्रह्म जपन्वै संहितां हिताम् ।
संन्यस्यत्यथ वा तां वै समाधौ पर्यवस्थितः ॥ १४
ध्यानमुत्पादयत्यत्र संहिताबलसंश्रयात् ।
शुद्धात्मा तपसा दान्तो निवृत्तद्वेषकामवान् ॥ १५
अरागमोहो निर्द्वंद्वो न शोचति न सज्जते ।
न कर्ताकरणीयानां न कार्याणामिति स्थितिः ॥१६
न चाहंकारयोगेन मनः प्रस्थापयेत्क्वचित् ।
न चात्मग्रहणे युक्तो नावमानी न चाक्रियः ॥१७
ध्यानक्रियापरो युक्तो ध्यानवान्ध्याननिश्चयः ।
ध्याने समाधिमुत्पाद्य तदपि त्यजति क्रमात् ॥१८
स वै तस्यामवस्थायां सर्वत्यागकृतः सुखी ।
निरीहस्त्यजति प्राणान्ब्राह्मीं संश्रयते तनुम् ॥ १९
अथ वा नेच्छते तत्र ब्रह्मकायनिषेवणम् ।
उत्क्रामति च मार्गस्थो नैव क्वचन जायते ॥ २०
आत्मबुद्धिं समास्थाय शान्तीभूतो निरामयः ।
अमृतं विरजःशुद्धमात्मानं प्रतिपद्यते ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

१९०

युधिष्ठिर उवाच ।

गतीनामुत्तमा प्राप्तिः कथिता जापकेष्विह ।
एकैवैषा गतिस्तेषामुत यान्त्यपरामपि ॥ १

भीष्म उवाच ।

शृणुष्वावहितो राजञ्जापकानां गतिं विभो ।
यथा गच्छन्ति निरयमनेकं पुरुषर्षभ ॥ २
यथोक्तमेतत्पूर्वं यो नानुतिष्ठति जापकः ।
एकदेशक्रियश्चात्र निरयं स निगच्छति ॥ ३
अवज्ञानेन कुरुते न तुष्यति न शोचति ।
ईदृशो जापको याति निरयं नात्र संशयः ॥ ४
अहंकारकृतश्चैव सर्वे निरयगामिनः ।
परावमानी पुरुषो भविता निरयोपगः ॥ ५
अभिध्यापूर्वकं जप्यं कुरुते यश्च मोहितः ।
यत्राभिध्यां स कुरुते तं वै निरयमृच्छति ॥ ६
अथैश्वर्यप्रवृत्तः सञ्जापकस्तत्र रज्यते ।
स एव निरयस्तस्य नासौ तस्मात्प्रमुच्यते ॥ ७
रागेण जापको जप्यं कुरुते तत्र मोहितः ।
यत्रास्य रागः पतति तत्र तत्रोपजायते ॥ ८
दुर्बुद्धिरकृतप्रज्ञश्चले मनसि तिष्ठति ।
चलामेव गतिं याति निरयं वाधिगच्छति ॥ ९
अकृतप्रज्ञको बालो मोहं गच्छति जापकः ।
स मोहान्निरयं याति तत्र गत्वानुशोचति ॥ १०
दृढग्राही करोमीति जप्यं जपति जापकः ।
न संपूर्णो न वा युक्तो निरयं सोऽधिगच्छति ॥ ११

युधिष्ठिर उवाच ।

अनिमित्तं परं यत्तदव्यक्तं ब्रह्मणि स्थितम् ।
सद्भूतो जापकः कस्मात्स शरीरमथाविशेत् ॥ १२

भीष्म उवाच ।

दुष्प्रज्ञानेन निरया बहवः समुदाहृताः ।
प्रशस्तं जापकत्वं च दोषाश्चैते तदात्मकाः ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

१९१

युधिष्ठिर उवाच ।

कीदृशो जापको याति निरयं वर्णयस्व मे ।
कौतूहलं हि मे जातं तद्भवान्वक्तुमर्हति ॥ १

भीष्म उवाच ।

धर्मस्यांशः प्रसूतोऽसि धर्मिष्ठोऽसि स्वभावतः ।
धर्ममूलाश्रयं वाक्यं शृणुष्वावहितोऽनघ ॥ २
अमूनि यानि स्थानानि देवानां परमात्मनाम् ।
नानासंस्थानवर्णानि नानारूपफलानि च ॥ ३
दिव्यानि कामचारीणि विमानानि सभास्तथा ।
आक्रीडा विविधा राजन्पद्मिन्यश्चामलोदकाः ॥ ४
चतुर्णां लोकपालानां शुक्रस्याथ बृहस्पतेः ।
मरुतां विश्वदेवानां साध्यानामश्विनोरपि ॥ ५
रुद्रादित्यवसूनां च तथान्येषां दिवौकसाम् ।
एते वै निरयास्तात स्थानस्य परमात्मनः ॥ ६
अभयं चानिमित्तं च न च क्लेशभयावृतम् ।
द्वाभ्यां मुक्तं त्रिभिर्मुक्तमष्टाभिस्त्रिभिरेव च ॥ ७
चतुर्लक्षणवर्जं तु चतुष्कारणवर्जितम् ।
अप्रहर्षमनानन्दमशोकं विगतक्लमम् ॥ ८
कालः संपच्यते तत्र न कालस्तत्र वै प्रभुः ।
स कालस्य प्रभू राजन्स्वर्गस्यापि तथेश्वरः ॥ ९
आत्मकेवलतां प्राप्तस्तत्र गत्वा न शोचति ।
ईदृशं परमं स्थानं निरयास्ते च तादृशाः ॥ १०
एते ते निरयाः प्रोक्ताः सर्वे एव यथातथम् ।
तस्य स्थानवरस्येह सर्वे निरयसंज्ञिताः ॥ ११

इति श्रीमहाभारते शान्तिपर्वणि
एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

१९२

युधिष्ठिर उवाच ।

कालमृत्युयमानां च ब्राह्मणस्य च सत्तम ।
विवादो व्याहृतः पूर्वं तद्भवान्वक्तुमर्हति ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
इक्ष्वाकोः सूर्यपुत्रस्य यद्वृत्तं ब्राह्मणस्य च ॥ २
कालस्य मृत्योश्च तथा यद्वृत्तं तन्निबोध मे ।
यथा स तेषां संवादो यस्मिन्स्थानेऽपि चाभवत् ॥
ब्राह्मणो जापकः कश्चिद्धर्मवृत्तो महायशाः ।
षडङ्गविन्महाप्राज्ञः पैप्पलादिः स कौशिकः ॥ ४
तस्यापरोक्षं विज्ञानं षडङ्गेषु तथैव च ।
वेदेषु चैव निष्णातो हिमवत्पादसंश्रयः ॥ ५
सोऽन्त्यं ब्राह्मं तपस्तेपे संहितां संयतो जपन् ।
तस्य वर्षसहस्रं तु नियमेन तथा गतम् ॥ ६
स देव्या दर्शितः साक्षात्प्रीतास्मीति तदा किल ।
जप्यमावर्तयंस्तूष्णीं न च तां किंचिदब्रवीत् ॥ ७
तस्यानुकम्पया देवी प्रीता समभवत्तदा ।
वेदमाता ततस्तस्य तज्जप्यं समपूजयत् ॥ ८
समाप्तजप्यस्तूत्थाय शिरसा पादयोस्तथा ।
पपात देव्या धर्मात्मा वचनं चेदमब्रवीत् ॥ ९
दिष्ट्या देवि प्रसन्ना त्वं दर्शनं चागता मम ।
यदि वापि प्रसन्नासि जप्ये मे रमतां मनः ॥ १०

सावित्र्युवाच ।

किं प्रार्थयसि विप्रर्षे किं चेष्टं करवाणि ते ।
प्रब्रूहि जपतां श्रेष्ठ सर्वं तत्ते भविष्यति ॥ ११

भीष्म उवाच ।

इत्युक्तः स तदा देव्या विप्रः प्रोवाच धर्मवित् ।
जप्यं प्रति ममेच्छेयं वर्धत्विति पुनः पुनः ॥ १२
मनसश्च समाधिर्मे वर्धताहरहः शुभे ।
तत्तथेति ततो देवी मधुरं प्रत्यभाषत ॥ १३
इदं चैवापरं प्राह देवी तत्प्रियकाम्यया ।
निरयं नैव यातासि यत्र याता द्विजर्षभाः ॥ १४
यास्यसि ब्रह्मणः स्थानमनिमित्तमनिन्दितम् ।
साधये भविता चैतद्यत्त्वयाहमिहार्थिता ॥ १५
नियतो जप चैकाग्रो धर्मस्त्वां समुपैष्यति ।
कालो मृत्युर्यमश्चैव समायास्यन्ति तेऽन्तिकम् ।
भविता च विवादोऽत्र तव तेषां च धर्मतः ॥ १६
एवमुक्त्वा भगवती जगाम भवनं स्वकम् ।
ब्राह्मणोऽपि जपन्नास्ते दिव्यं वर्षशतं तदा ॥ १७
समाप्ते नियमे तस्मिन्नथ विप्रस्य धीमतः ।
साक्षात्प्रीतस्तदा धर्मो दर्शयामास तं द्विजम् ॥१८

धर्म उवाच ।

द्विजाते पश्य मां धर्ममहं त्वां द्रष्टुमागतः ।
जप्यस्य च फलं यत्ते संप्राप्तं तच्च मे शृणु ॥ १९
जिता लोकास्त्वया सर्वे ये दिव्या ये च मानुषाः ।
देवानां निरयान्साधो सर्वानुत्क्रम्य यास्यसि ॥ २०
प्राणत्यागं कुरु मुने गच्छ लोकान्यथेप्सितान् ।
त्यक्त्वात्मनः शरीरं च ततो लोकानवाप्स्यसि ॥२१

ब्राह्मण उवाच ।

कृतं लोकैर्हि मे धर्म गच्छ च त्वं यथासुखम् ।
बहुदुःखसुखं देहं नोत्सृजेयमहं विभो ॥ २२

धर्म उवाच ।

अवश्यं भोः शरीरं ते त्यक्तव्यं मुनिपुंगव ।
स्वर्ग आरोह्यतां विप्र किं वा ते रोचतेऽनघ ॥२३

ब्राह्मण उवाच ।

न रोचये स्वर्गवासं विना देहादहं विभो ।
गच्छ धर्म न मे श्रद्धा स्वर्गं गन्तुं विनात्मना ॥२४

धर्म उवाच ।

अलं देहे मनः कृत्वा त्यक्त्वा देहं सुखी भव ।

गच्छ लोकानरजसो यत्र गत्वा न शोचसि ॥ २५

ब्राह्मण उवाच ।

रमे जपन्महाभाग कृतं लोकैः सनातनैः ।
सशरीरेण गन्तव्यो मया स्वर्गो न वा विभो ॥२६

धर्म उवाच ।

यदि त्वं नेच्छसि त्यक्तुं शरीरं पश्य वै द्विज ।
एष कालस्तथा मृत्युर्यमश्च त्वामुपागताः ॥ २७

भीष्म उवाच ।

अथ वैवस्वतः कालो मृत्युश्च त्रितयं विभो ।
ब्राह्मणं तं महाभागमुपागम्येदमब्रुवन् ॥ २८
तपसोऽस्य सुतप्तस्य तथा सुचरितस्य च ।
फलप्राप्तिस्तव श्रेष्ठा यमोऽहं त्वामुपब्रुवे ॥ २९
यथावदस्य जप्यस्य फलं प्राप्तस्त्वमुत्तमम् ।
कालस्ते स्वर्गमारोढुं कालोऽहं त्वामुपागतः ॥ ३०
मृत्युं मा विद्धि धर्मज्ञ रूपिणं स्वयमागतम् ।
कालेन चोदितं विप्र त्वामितो नेतुमद्य वै ॥ ३१

ब्राह्मण उवाच ।

स्वागतं सूर्यपुत्राय कालाय च महात्मने ।
मृत्यवे चाथ धर्माय किं कार्यं करवाणि वः ॥३२

भीष्म उवाच ।

अर्घ्यं पाद्यं च दत्त्वा स तेभ्यस्तत्र समागमे ।
अब्रवीत्परमप्रीतः स्वशक्त्या किं करोमि वः ॥३३
तस्मिन्नेवाथ काले तु तीर्थयात्रामुपागतः ।
इक्ष्वाकुरगमत्तत्र समेता यत्र ते विभो ॥ ३४
सर्वानेव तु राजर्षिः संपूज्याभिप्रणम्य च ।
कुशलप्रश्नमकरोत्सर्वेषां राजसत्तमः ॥ ३५
तस्मै सोऽथासनं दत्त्वा पाद्यमर्घ्यं तथैव च ।
अब्रवीद्ब्राह्मणो वाक्यं कृत्वा कुशलसंविदम् ॥ ३६
स्वागतं ते महाराज ब्रूहि यद्यदिहेच्छसि ।
स्वशक्त्या किं करोमीह तद्भवान्प्रब्रवीतु मे ॥ ३७

राजोवाच ।

राजाहं ब्राह्मणश्च त्वं यदि षट्कर्मसंस्थितः ।
ददामि वसु किंचित्ते प्रार्थितं तद्वदस्व मे ॥ ३८

ब्राह्मण उवाच ।

द्विविधा ब्राह्मणा राजन्धर्मश्च द्विविधः स्मृतः ।
प्रवृत्तश्च निवृत्तश्च निवृत्तोऽस्मि प्रतिग्रहात् ॥ ३९
तेभ्यः प्रयच्छ दानानि ये प्रवृत्ता नराधिप ।
अहं न प्रतिगृह्णामि किमिष्टं किं ददानि ते ।
ब्रूहि त्वं नृपतिश्रेष्ठ तपसा साधयामि किम् ॥ ४०

राजोवाच ।

क्षत्रियोऽहं न जानामि देहीति वचनं क्वचित् ।
प्रयच्छ युद्धमित्येवं वादिनः स्मो द्विजोत्तम ॥४१

ब्राह्मण उवाच ।

तुष्यसि त्वं स्वधर्मेण तथा तुष्टा वयं नृप ।
अन्योन्यस्योत्तरं नास्ति यदिष्टं तत्समाचर ॥ ४२

राजोवाच ।

स्वशक्त्याहं ददानीति त्वया पूर्वं प्रभाषितम् ।
याचे त्वां दीयतां मह्यं जप्यस्यास्य फलं द्विज ॥४३

ब्राह्मण उवाच ।

युद्धं मम सदा वाणी याचतीति विकत्थसे ।
न च युद्धं मया सार्धं किमर्थं याचसे पुनः ॥४४

राजोवाच ।

वाग्वज्रा ब्राह्मणाः प्रोक्ताः क्षत्रिया बाहुजीविनः ।
वाग्युद्धं तदिदं तीव्रं मम विप्र त्वया सह ॥ ४५

ब्राह्मण उवाच ।

सैवाद्यापि प्रतिज्ञा मे स्वशक्त्या किं प्रदीयताम् ।
ब्रूहि दास्यामि राजेन्द्र विभवे सति माचिरम् ॥४६

राजोवाच ।

यत्तद्वर्षशतं पूर्णं जप्यं वै जपता त्वया ।
फलं प्राप्तं तत्प्रयच्छ मम दित्सुर्भवान्यदि ॥ ४७

ब्राह्मण उवाच ।

परमं गृह्यतां तस्य फलं यज्जपितं मया ।
अर्धं त्वमविचारेण फलं तस्य समाप्नुहि ॥ ४८
अथ वा सर्वमेवेह जप्यकं मामकं फलम् ।
राजन्प्राप्नुहि कामं त्वं यदि सर्वमिहेच्छसि ॥ ४९

राजोवाच ।

कृतं सर्वेण भद्रं ते जप्यं यद्याचितं मया ।
स्वस्ति तेऽस्तु गमिष्यामि किं च तस्य फलं वद ॥ ५०

ब्राह्मण उवाच ।

फलप्राप्तिं न जानामि दत्तं यज्जपितं मया ।
अयं धर्मश्च कालश्च यमो मृत्युश्च साक्षिणः ॥५१

राजोवाच ।

अज्ञातमस्य धर्मस्य फलं मे किं करिष्यति ।
प्राप्नोतु तत्फलं विप्रो नाहमिच्छे ससंशयम् ॥५२

ब्राह्मण उवाच ।

नारदेऽपरवक्तव्यं दत्तं वाचा फलं मया ।
वाक्यं प्रमाणं राजर्षे ममापि तव चैव हि ॥ ५३
नाभिसंधिर्मया जप्ये कृतपूर्वः कथंचन ।
जप्यस्य राजशार्दूल कथं ज्ञास्याम्यहं फलम् ॥ ५४
ददस्वेति त्वया चोक्तं ददामीति तथा मया ।
न वाचं दूषयिष्यामि सत्यं रक्ष स्थिरो भव ॥५५
अथैवं वदतो मेऽद्य वचनं न करिष्यसि ।
महानधर्मो भविता तव राजन्मृषाकृतः ॥ ५६
न युक्तं तु मृषा वाणी त्वया वक्तुमरिंदम ।
तथा मयाप्यभ्यधिकं मृषा वक्तुं न शक्यते ॥ ५७
संश्रुतं च मया पूर्वं ददानीत्यविचारितम् ।
तद्गृह्णीष्वाविचारेण यदि सत्ये स्थितो भवान् ॥५८
इहागम्य हि मां राजञ्जाप्यं फलमयाचिथाः ।
तन्मन्निसृष्टं गृह्णीष्व भव सत्ये स्थिरोऽपि च ॥५९
नायं लोकोऽस्ति न परो न च पूर्वान्स तारयेत् ।
कुत एवावरान्राजन्मृषावादपरायणः ॥ ६०
न यज्ञाध्ययने दानं नियमास्तारयन्ति हि ।
तथा सत्यं परे लोके यथा वै पुरुषर्षभ ॥ ६१
तपांसि यानि चीर्णानि चरिष्यसि च यत्तपः ।
समाः शतैः सहस्रैश्च तत्सत्यान्न विशिष्यते ॥ ६२
सत्यमेकाक्षरं ब्रह्म सत्यमेकाक्षरं तपः ।
सत्यमेकाक्षरो यज्ञः सत्यमेकाक्षरं श्रुतम् ॥ ६३
सत्यं वेदेषु जागर्ति फलं सत्ये परं स्मृतम् ।
सत्याद्धर्मो दमश्चैव सर्वं सत्ये प्रतिष्ठितम् ॥ ६४
सत्यं वेदास्तथाङ्गानि सत्यं यज्ञास्तथा विधिः ।
व्रतचर्यास्तथा सत्यमोंकारः सत्यमेव च ॥ ६५
प्राणिनां जननं सत्यं सत्यं संततिरेव च ।
सत्येन वायुरभ्येति सत्येन तपते रविः ॥ ६६
सत्येन चाग्निर्दहति स्वर्गः सत्ये प्रतिष्ठितः ।
सत्यं यज्ञस्तपो वेदाः स्तोभा मन्त्राः सरस्वती ॥६७
तुलामारोपितो धर्मः सत्यं चैवेति नः श्रुतम् ।
समां कक्षां धारयतो यतः सत्यं ततोऽधिकम् ॥६८
यतो धर्मस्ततः सत्यं सर्वं सत्येन वर्धते ।
किमर्थमनृतं कर्म कर्तुं राजंस्त्वमिच्छसि ॥ ६९
सत्ये कुरु स्थिरं भावं मा राजन्ननृतं कृथाः ।
कस्मात्त्वमनृतं वाक्यं देहीति कुरुषेऽशुभम् ॥ ७०
यदि जप्यफलं दत्तं मया नेषिष्यसे नृप ।
स्वधर्मेभ्यः परिभ्रष्टो लोकाननुचरिष्यसि ॥ ७१
संश्रुत्य यो न दित्सेत याचित्वा यश्च नेच्छति ।
उभावानृतिकावेतौ न मृषा कर्तुमर्हसि ॥ ७२

राजोवाच ।

योद्धव्यं रक्षितव्यं च क्षत्रधर्मः किल द्विज ।
दातारः क्षत्रियाः प्रोक्ता गृह्णीयां भवतः कथम् ॥७३

ब्राह्मण उवाच ।

न छन्दयामि ते राजन्नापि ते गृहमाव्रजम् ।

इहागम्य तु याचित्वा न गृह्णीषे पुनः कथम् ॥७४

धर्म उवाच ।

अविवादोऽस्तु युवयोर्वित्तं मां धर्ममागतम् ।
द्विजो दानफलैर्युक्तो राजा सत्यफलेन च ॥ ७५

स्वर्ग उवाच ।

स्वर्गं मा विद्धि राजेन्द्र रूपिणं स्वयमागतम् ।
अविवादोऽस्तु युवयोरुभौ तुल्यफलौ युवाम् ॥ ७६

राजोवाच ।

कृतं स्वर्गेण मे कार्यं गच्छ स्वर्गं यथासुखम् ।
विप्रो यदीच्छते दातुं प्रतीच्छतु स मे धनम् ॥ ७७

ब्राह्मण उवाच ।

बाल्ये यदि स्यादज्ञानान्मया हस्तः प्रसारितः ।
निवृत्तिलक्षणं धर्ममुपासे संहितां जपन् ॥ ७८
निवृत्तं मां चिरं राजन्विप्रं लोभयसे कथम् ।
स्वेन कार्यं करिष्यामि त्वत्तो नेच्छे फलं नृप ।
तपःस्वाध्यायशीलोऽहं निवृत्तश्च प्रतिग्रहात् ॥ ७९

राजोवाच ।

यदि विप्र निसृष्टं ते जप्यस्य फलमुत्तमम् ।
आवयोर्यत्फलं किंचित्सहितं नौ तदस्त्विह ॥ ८०
द्विजाः प्रतिग्रहे युक्ता दातारो राजवंशजाः ।
यदि धर्मः श्रुतो विप्र सहैव फलमस्तु नौ ॥ ८१
मा वा भूत्सहभोज्यं नौ मदीयं फलमाप्नुहि ।
प्रतीच्छ मत्कृतं धर्मं यदि ते मय्यनुग्रहः ॥ ८२

भीष्म उवाच ।

ततो विकृतचेष्टौ द्वौ पुरुषौ समुपस्थितौ ।
गृहीत्वान्योन्यमावेष्ट्य कुचेलावूचतुर्वचः ॥ ८३
न मे धारयसीत्येको धारयामीति चापरः ।
इहास्ति नौ विवादोऽयमयं राजानुशासकः ॥ ८४
सत्यं ब्रवीम्यहमिदं न मे धारयते भवान् ।
अनृतं वदसीह त्वमृणं ते धारयाम्यहम् ॥ ८५
तावुभौ भृशसंतप्तौ राजानमिदमूचतुः ।
परीक्ष्यतां यथा स्याव नावामिह विगर्हितौ ॥ ८६

विरूप उवाच ।

धारयामि नरव्याघ्र विकृतस्येह गोः फलम् ।
ददतश्च न गृह्णाति विकृतो मे महीपते ॥ ८७

विकृत उवाच ।

न मे धारयते किंचिद्विरूपोऽयं नराधिप ।
मिथ्या ब्रवीत्ययं हि त्वा मिथ्याभासं नराधिप ॥

राजोवाच ।

विरूप किं धारयते भवानस्य वदस्व मे ।
श्रुत्वा तथा करिष्यामीत्येवं मे धीयते मतिः ॥८९

विरूप उवाच ।

शृणुष्वावहितो राजन्यथैतद्धारयाम्यहम् ।
विकृतस्यास्य राजर्षे निखिलेन नरर्षभ ॥ ९०
अनेन धनप्राप्त्यर्थं शुभा दत्ता पुरानघ ।
धेनुर्विप्राय राजर्षे तपःस्वाध्यायशीलिने ॥ ९१
तस्याश्चायं मया राजन्फलमभ्येत्य याचितः ।
विकृतेन च मे दत्तं विशुद्धेनान्तरात्मना ॥ ९२
ततो मे सुकृतं कर्म कृतमात्मविशुद्धये ।
गावौ हि कपिले क्रीत्वा वत्सले बहुदोहने ॥ ९३
ते चोञ्छवृत्तये राजन्मया समपवर्जिते ।
यथाविधि यथाश्रद्धं तदस्याहं पुनः प्रभो ॥ ९४
इहाद्य वै गृहीत्वा तत्प्रयच्छे द्विगुणं फलम् ।
एकस्याः पुरुषव्याघ्र कः शुद्धः कोऽत्र दोषवान् ॥
एवं विवदमानौ स्वस्त्वामिहाभ्यागतौ नृप ।
कुरु धर्ममधर्मं वा विनये नौ समाधय ॥ ९६
यदि नेच्छति मे दानं यथा दत्तमनेन वै ।
भवानत्र स्थिरो भूत्वा मार्गे स्थापयतु प्रभुः ॥ ९७

राजोवाच ।

दीयमानं न गृह्णासि ऋणं कस्मात्त्वमद्य वै ।

यथैव तेऽभ्यनुज्ञातं तथा गृह्णीष्व माचिरम् ॥ ९८

विकृत उवाच ।

दीयतामित्यनेनोक्तं ददानीति तथा मया ।
नायं मे धारयत्यत्र गम्यतां यत्र वाञ्छति ॥ ९९

राजोवाच ।

ददतोऽस्य न गृह्णासि विषमं प्रतिभाति मे ।
दण्ड्यो हि त्वं मम मतो नास्त्यत्र खलु संशयः ॥

विकृत उवाच ।

मयास्य दत्तं राजर्षे गृह्णीयां तत्कथं पुनः ।
काममत्रापराधो मे दण्डमाज्ञापय प्रभो ॥ १०१

विरूप उवाच ।

दीयमानं यदि मया नेषिष्यसि कथंचन ।
नियंस्यति त्वा नृपतिरयं धर्मानुशासकः ॥ १०२

विकृत उवाच ।

स्वं मया याचितेनेह दत्तं कथमिहाद्य तत् ।
गृह्णीयां गच्छतु भवानभ्यनुज्ञां ददानि ते ॥ १०३

ब्राह्मण उवाच ।

श्रुतमेतत्त्वया राजन्ननयोः कथितं द्वयोः ।
प्रतिज्ञातं मया यत्ते तद्गृहाणाविचारितम् ॥ १०४

राजोवाच ।

प्रस्तुतं सुमहत्कार्यमावयोर्गह्वरं यथा ।
जापकस्य दृढीकारः कथमेतद्भविष्यति ॥ १०५
यदि तावन्न गृह्णामि ब्राह्मणेनापवर्जितम् ।
कथं न लिप्येयमहं दोषेण महताद्य वै ॥ १०६

भीष्म उवाच ।

तौ चोवाच स राजर्षिः कृतकार्यौ गमिष्यथः ।
नेदानीं मामिहासाद्य राजधर्मो भवेन्मृषा ॥ १०७
स्वधर्मः परिपाल्यश्च राज्ञामेष विनिश्चयः ।
विप्रधर्मश्च सुगुरुर्मामनात्मानमाविशत् ॥ १०८

ब्राह्मण उवाच ।

गृहाण धारयेऽहं ते याचितं ते श्रुतं मया ।
न चेद्ग्रहीष्यसे राजञ्शपिष्ये त्वां न संशयः॥१०९

राजोवाच ।

धिग्राजधर्मं यस्यायं कार्यस्येह विनिश्चयः ।
इत्यर्थं मे ग्रहीतव्यं कथं तुल्यं भवेदिति ॥ ११०
एष पाणिरपूर्वं भो निक्षेपार्थं प्रसारितः ।
यन्मे धारयसे विप्र तदिदानीं प्रदीयताम् ॥ १११

ब्राह्मण उवाच ।

संहितां जपता यावान्मया कश्चिद्गुणः कृतः ।
तत्सर्वं प्रतिगृह्णीष्व यदि किंचिदिहास्ति मे ॥११२

राजोवाच ।

जलमेतन्निपतितं मम पाणौ द्विजोत्तम ।
सममस्तु सहैवास्तु प्रतिगृह्णातु वै भवान् ॥ ११३

विरूप उवाच ।

कामक्रोधौ विद्धि नौ त्वमावाभ्यां कारितो भवान् ।
समेति च यदुक्तं ते समा लोकास्तवास्य च ॥११४
नायं धारयते किंचिज्जिज्ञासा त्वत्कृते कृता ।
कालो धर्मस्तथा मृत्युः कामक्रोधौ तथा युवाम् ॥
सर्वमन्योन्यनिकषे निघृष्टं पश्यतस्तव ।
गच्छ लोकाञ्जितान्स्वेन कर्मणा यत्र वाञ्छसि॥

भीष्म उवाच ।

जापकानां फलावाप्तिर्मया ते संप्रकीर्तिता ।
गतिः स्थानं च लोकाश्च जापकेन यथा जिताः॥११७
प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनम् ।
अथ वाग्निं समायाति सूर्यमाविशतेऽपि वा॥११८
स तैजसेन भावेन यदि तत्राश्नुते रतिम् ।
गुणांस्तेषां समादत्ते रागेण प्रतिमोहितः ॥ ११९
एवं सोमे तथा वायौ भूम्याकाशशरीरगः ।
सरागस्तत्र वसति गुणांस्तेषां समाचरन् ॥ १२०

अथ तत्र विरागी स गच्छति त्वथ संशयम् ।
परमव्ययमिच्छन्स तमेवाविशते पुनः ॥ १२१
अमृताच्चामृतं प्राप्तः शीतीभूतो निरात्मवान् ।
ब्रह्मभूतः स निर्द्वंद्वः सुखी शान्तो निरामयः ॥१२२
ब्रह्मस्थानमनावर्तमेकमक्षरसंज्ञकम् ।
अदुःखमजरं शान्तं स्थानं तत्प्रतिपद्यते ॥ १२३
चतुर्भिर्लक्षणैर्हीनं तथा षड्भिः सषोडशैः ।
पुरुषं समतिक्रम्य आकाशं प्रतिपद्यते ॥ १२४
अथ वेच्छति रागात्मा सर्वं तदधितिष्ठति ।
यच्च प्रार्थयते तच्च मनसा प्रतिपद्यते ॥ १२५
अथ वा वीक्षते लोकान्सर्वान्निरयसंस्थितान् ।
निःस्पृहः सर्वतो मुक्तस्तत्रैव रमते सुखी ॥ १२६
एवमेषा महाराज जापकस्य गतिर्यथा ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि॥१२७

इति श्रीमहाभारते शान्तिपर्वणि
द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

१९३

युधिष्ठिर उवाच ।

किमुत्तरं तदा तौ स्म चक्रतुस्तेन भाषिते ।
ब्राह्मणो वाथ वा राजा तन्मे ब्रूहि पितामह ॥ १
अथ वा तौ गतौ तत्र यदेतत्कीर्तितं त्वया ।
संवादो वा तयोः कोऽभूत्किं वा तौ तत्र चक्रतुः ॥२

भीष्म उवाच ।

तथेत्येवं प्रतिश्रुत्य धर्मं संपूज्य चाभिभो ।
यमं कालं च मृत्युं च स्वर्गं संपूज्य चार्हतः ॥ ३
पूर्वं ये चापरे तत्र समेता ब्राह्मणर्षभाः ।
सर्वान्संपूज्य शिरसा राजानं सोऽब्रवीद्वचः ॥ ४
फलेनानेन संयुक्तो राजर्षे गच्छ पुण्यताम् ।
भवता चाभ्यनुज्ञातो जपेयं भूय एव हि ॥ ५
वरश्च मम पूर्वं हि देव्या दत्तो महाबल ।
श्रद्धा ते जपतो नित्यं भवितेति विशां पते ॥ ६

राजोवाच ।

यद्येवमफला सिद्धिः श्रद्धा च जपितुं तव ।
गच्छ विप्र मया सार्धं जापकं फलमाप्नुहि ॥ ७

ब्राह्मण उवाच ।

कृतः प्रयत्नः सुमहान्सर्वेषां संनिधाविह ।
सह तुल्यफलौ चावां गच्छावो यत्र नौ गतिः ॥८

भीष्म उवाच ।

व्यवसायं तयोस्तत्र विदित्वा त्रिदशेश्वरः ।
सह देवैरुपययौ लोकपालैस्तथैव च ॥ ९
साध्या विश्वेऽथ मरुतो ज्योतींषि सुमहान्ति च ।
नद्यः शैलाः समुद्राश्च तीर्थानि विविधानि च ॥१०
तपांसि संयोगविधिर्वेदाः स्तोभाः सरस्वती ।
नारदः पर्वतश्चैव विश्वावसुर्हहा हुहुः ॥ ११
गन्धर्वश्चित्रसेनश्च परिवारगणैर्युतः ।
नागाः सिद्धाश्च मुनयो देवदेवः प्रजापतिः ।
विष्णुः सहस्रशीर्षश्च देवोऽचिन्त्यः समागमत्॥१२
अवाद्यन्तान्तरिक्षे च भेर्यस्तूर्याणि चाभिभो ।
पुष्पवर्षाणि दिव्यानि तत्र तेषां महात्मनाम् ।
ननृतुश्चाप्सरःसंघास्तत्र तत्र समन्ततः ॥ १३
अथ स्वर्गस्तथा रूपी ब्राह्मणं वाक्यमब्रवीत् ।
संसिद्धस्त्वं महाभाग त्वं च सिद्धस्तथा नृप ॥१४
अथ तौ सहितौ राजन्नन्योन्येन विधानतः ।
विषयप्रतिसंहारमुभावेव प्रचक्रतुः ॥ १५
प्राणापानौ तथोदानं समानं व्यानमेव च ।
एवं तान्मनसि स्थाप्य दधतुः प्राणयोर्मनः ॥ १६
उपस्थितकृतौ तत्र नासिकाग्रमधो भ्रुवौ ।
कुङ्कुण्यां चैव मनसा शनैर्धारयतः स्म तौ ॥ १७
निश्चेष्टाभ्यां शरीराभ्यां स्थिरदृष्टी समाहितौ ।
जितासनौ तथाधाय मूर्धन्यात्मानमेव च ॥ १८

तालुदेशमथोद्दाल्य ब्राह्मणस्य महात्मनः ।
ज्योतिर्ज्वाला सुमहती जगाम त्रिदिवं तदा ॥ १९
हाहाकारस्ततो दिक्षु सर्वासु सुमहानभूत् ।
तज्ज्योतिः स्तूयमानं स्म ब्रह्माणं प्राविशत्तदा ॥ २०
ततः स्वागतमित्याह तत्तेजः स पितामहः ।
प्रादेशमात्रं पुरुषं प्रत्युद्गम्य विशां पते ॥ २१
भूयश्चैवापरं प्राह वचनं मधुरं स्म सः ।
जापकैस्तुल्यफलता योगानां नात्र संशयः ॥ २२
योगस्य तावदेतेभ्यः फलं प्रत्यक्षदर्शनम् ।
जापकानां विशिष्टं तु प्रत्युत्थानं समाधिकम् ॥२३
उष्यतां मयि चेत्युक्त्वाचेतयत्स ततः पुनः ।
अथास्य प्रविवेशास्यं ब्राह्मणो विगतज्वरः ॥ २४
राजाप्येतेन विधिना भगवन्तं पितामहम् ।
यथैव द्विजशार्दूलस्तथैव प्राविशत्तदा ॥ २५
स्वयंभुवमथो देवा अभिवाद्य ततोऽब्रुवन् ।
जापकार्थमयं यत्नस्तदर्थं वयमागताः ॥ २६
कृतपूजाविमौ तुल्यं त्वया तुल्यफलाविमौ ।
योगजापकयोर्दृष्टं फलं सुमहदद्य वै ।
सर्वाँल्लोकानतीत्यैतौ गच्छेतां यत्र वाञ्छितम् ॥

ब्रह्मोवाच ।

महास्मृतिं पठेद्यस्तु तथैवानुस्मृतिं शुभाम् ।
तावप्येतेन विधिना गच्छेतां मत्सलोकताम् ॥ २८
यश्च योगे भवेद्भक्तः सोऽपि नास्त्यत्र संशयः ।
विधिनानेन देहान्ते मम लोकानवाप्नुयात् ।
गम्यतां साधयिष्यामि यथास्थानानि सिद्धये ॥२९

भीष्म उवाच ।

इत्युक्त्वा स तदा देवस्तत्रैवान्तरधीयत ।
आमन्त्र्य तं ततो देवा ययुः स्वं स्वं निवेशनम् ॥३०
ते च सर्वे महात्मानो धर्मं सत्कृत्य तत्र वै ।
पृष्ठतोऽनुययू राजन्सर्वे सुप्रीतमानसाः ॥ ३१
एतत्फलं जापकानां गतिश्चैव प्रकीर्तिता ।
यथाश्रुतं महाराज किं भूयः श्रोतुमिच्छसि ॥३२

इति श्रीमहाभारते शान्तिपर्वणि
त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

१९४

युधिष्ठिर उवाच ।

किं फलं ज्ञानयोगस्य वेदानां नियमस्य च ।
भूतात्मा वा कथं ज्ञेयस्तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मनोः प्रजापतेर्वादं महर्षेश्च बृहस्पतेः ॥ २
प्रजापतिं श्रेष्ठतमं पृथिव्यां
देवर्षिसंघप्रवरो महर्षिः ।
बृहस्पतिः प्रश्नमिमं पुराणं
पप्रच्छ शिष्योऽथ गुरुं प्रणम्य ॥ ३
यत्कारणं मन्त्रविधिः प्रवृत्तो
ज्ञाने फलं यत्प्रवदन्ति विप्राः ।
यन्मन्त्रशब्दैरकृतप्रकाशं
तदुच्यतां मे भगवन्यथावत् ॥ ४
यदर्थशास्त्रागममन्त्रविद्भि-
र्यज्ञैरनेकैर्वरगोप्रदानैः ।
फलं महद्भिर्यदुपास्यते च
तत्किं कथं वा भविता क वा तत् ॥ ५
मही महीजाः पवनोऽन्तरिक्षं
जलौकसश्चैव जलं दिवं च ।
दिवौकसश्चैव यतः प्रसूता-
स्तदुच्यतां मे भगवन्पुराणम् ॥ ६
ज्ञानं यतः प्रार्थयते नरो वै
ततस्तदर्था भवति प्रवृत्तिः ।
न चाप्यहं वेद परं पुराणं

मिथ्याप्रवृत्तिं च कथं नु कुर्याम् ॥ ७
ऋक्सामसंघांश्च यजूंषि चाहं
छन्दांसि नक्षत्रगतिं निरुक्तम् ।
अधीत्य च व्याकरणं सकल्पं
शिक्षां च भूतप्रकृतिं न वेद्मि ॥ ८
स मे भवाञ्शंसतु सर्वमेत-
ज्ज्ञाने फलं कर्मणि वा यदस्ति ।
यथा च देहाच्च्यवते शरीरी
पुनः शरीरं च यथाभ्युपैति ॥ ९

मनुरुवाच ।

यद्यत्प्रियं यस्य सुखं तदाहु-
स्तदेव दुःखं प्रवदन्त्यनिष्टम् ।
इष्टं च मे स्यादितरच्च न स्या-
देतत्कृते कर्मविधिः प्रवृत्तः ।
इष्टं त्वनिष्टं च न मां भजेते-
त्येतत्कृते ज्ञानविधिः प्रवृत्तः ॥ १०
कामात्मकाश्छन्दसि कर्मयोगा
एभिर्विमुक्तः परमश्नुवीत ।
नानाविधे कर्मपथे सुखार्थी
नरः प्रवृत्तो न परं प्रयाति ।
परं हि तत्कर्मपथादपेतं
निराशिषं ब्रह्मपरं ह्यवश्यम् ॥ ११
प्रजाः सृष्टा मनसा कर्मणा च
द्वावप्येतौ सत्पथौ लोकजुष्टौ ।
दृष्ट्वा कर्म शाश्वतं चान्तवच्च
मनस्त्यागः कारणं नान्यदस्ति ॥ १२
स्वेनात्मना चक्षुरिव प्रणेता
निशात्यये तमसा संवृतात्मा
ज्ञानं तु विज्ञानगुणेन युक्तं
कर्माशुभं पश्यति वर्जनीयम् ॥ १३
सर्पान्कुशाग्राणि तथोदपानं
ज्ञात्वा मनुष्याः परिवर्जयन्ति ।
अज्ञानतस्तत्र पतन्ति मूढा
ज्ञाने फलं पश्य यथा विशिष्टम् ॥ १४
कृत्स्नस्तु मन्त्रो विधिवत्प्रयुक्तो
यज्ञा यथोक्तास्त्वथ दक्षिणाश्च ।
अन्नप्रदानं मनसः समाधिः
पञ्चात्मकं कर्मफलं वदन्ति ॥ १५
गुणात्मकं कर्म वदन्ति वेदा-
स्तस्मान्मन्त्रा मन्त्रमूलं हि कर्म ।
विधिर्विधेयं मनसोपपत्तिः
फलस्य भोक्ता तु यथा शरीरी ॥ १६
शब्दाश्च रूपाणि रसाश्च पुण्याः
स्पर्शाश्च गन्धाश्च शुभास्तथैव ।
नरो नसंस्थानगतः प्रभुः स्या-
देतत्फलं सिध्यति कर्मलोके ॥ १७
यद्यच्छरीरेण करोति कर्म
शरीरयुक्तः समुपाश्नुते तत् ।
शरीरमेवायतनं सुखस्य
दुःखस्य चाप्यायतनं शरीरम् ॥ १८
वाचा तु यत्कर्म करोति किंचि-
द्वाचैव सर्वं समुपाश्नुते तत् ।
मनस्तु यत्कर्म करोति किंचि-
न्मनःस्थ एवायमुपाश्नुते तत् ॥ १९
यथागुणं कर्मगणं फलार्थी
करोत्ययं कर्मफले निविष्टः ।
तथा तथायं गुणसंप्रयुक्तः
शुभाशुभं कर्मफलं भुनक्ति ॥ २०
मत्स्यो यथा स्रोत इवाभिपाती
तथा कृतं पूर्वमुपैति कर्म ।

शुभे स्वसौ तुष्यति दुष्कृते तु
न तुष्यते वै परमः शरीरी ॥ २१
यतो जगत्सर्वमिदं प्रसूतं
ज्ञात्वात्मवन्तो व्यतियान्ति यत्तत् ।
यन्मन्त्रशब्दैरकृतप्रकाशं
तदुच्यमानं शृणु मे परं यत् ॥ २२
रसैर्वियुक्तं विविधैश्च गन्धै-
रशब्दमस्पर्शमरूपवच्च ।
अग्राह्यमव्यक्तमवर्णमेकं
पञ्चप्रकारं ससृजे प्रजानाम् ॥ २३
न स्त्री पुमान्वापि नपुंसकं च
न सन्न चासत्सदसच्च तन्न ।
पश्यन्ति यद्ब्रह्मविदो मनुष्या-
स्तदक्षरं न क्षरतीति विद्धि ॥ २४
इति श्रीमहाभारते शान्तिपर्वणि
चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

१९५

मनुरुवाच ।

अक्षरात्खं ततो वायुर्वायोर्ज्योतिस्ततो जलम् ।
जलात्प्रसूता जगती जगत्यां जायते जगत् ॥ १
इमे शरीरैर्जलमेव गत्वा
जलाच्च तेजः पवनोऽन्तरिक्षम् ।
खाद्वै निवर्तन्ति नभाविनस्ते
ये भाविनस्ते परमाप्नुवन्ति ॥ २
नोष्णं न शीतं मृदु नापि तीक्ष्णं
नाम्लं कषायं मधुरं न तिक्तम् ।
न शब्दवन्नापि च गन्धवत्त-
न्न रूपवत्तत्परमस्वभावम् ॥ ३
स्पर्शं तनुर्वेद रसं तु जिह्वा
घ्राणं च गन्धाञ्श्रवणे च शब्दान् ।
रूपाणि चक्षुर्न च तत्परं य-
द्गृह्णन्त्यनध्यात्मविदो मनुष्याः ॥ ४
निवर्तयित्वा रसनं रसेभ्यो
घ्राणं च गन्धाच्छ्रवणे च शब्दात् ।
स्पर्शात्तनुं रूपगुणात्तु चक्षु-
स्ततः परं पश्यति स्वं स्वभावम् ॥ ५
यतो गृहीत्वा हि करोति यच्च
यस्मिंश्च तामारभते प्रवृत्तिम् ।
यस्मिंश्च यद्येन च यश्च कर्ता
तत्कारणं तं समुपायमाहुः ॥ ६
यच्चाभिभूः साधकं व्यापकं च
यन्मन्त्रवच्छंस्यते चैव लोके ।
यः सर्वहेतुः परमार्थकारी
तत्कारणं कार्यमतो यदन्यत् ॥ ७
यथा च कश्चित्सुकृतैर्मनुष्यः
शुभाशुभं प्राप्नुतेऽथाविरोधात् ।
एवं शरीरेषु शुभाशुभेषु
स्वकर्मजैर्ज्ञानमिदं निबद्धम् ॥ ८
यथा प्रदीपः पुरतः प्रदीप्तः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथेह पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परवन्त एव ॥ ९
यथा हि राज्ञो बहवो ह्यमात्याः
पृथक्प्रमाणं प्रवदन्ति युक्ताः ।
तद्वच्छरीरेषु भवन्ति पञ्च
ज्ञानैकदेशः परमः स तेभ्यः ॥ १०
यथार्चिषोऽग्नेः पवनस्य वेगा
मरीचयोऽर्कस्य नदीषु चापः ।
गच्छन्ति चायान्ति च तन्यमाना-
स्तद्वच्छरीराणि शरीरिणां तु ॥ ११

यथा च कश्चित्परशुं गृहीत्वा
धूमं न पश्येज्ज्वलनं च काष्ठे ।
तद्वच्छरीरोदरपाणिपादं
छित्त्वा न पश्यन्ति ततो यदन्यत् ॥ १२
तान्येव काष्ठानि यथा विमथ्य
धूमं च पश्येज्ज्वलनं च योगात् ।
तद्वत्सुबुद्धिः सममिन्द्रियत्वा-
द्बुधः परं पश्यति स्वं स्वभावम् ॥ १३
यथात्मनोऽङ्गं पतितं पृथिव्यां
स्वप्नान्तरे पश्यति चात्मनोऽन्यत् ।
श्रोत्रादियुक्तः सुमनाः सुबुद्धि-
र्लिङ्गात्तथा गच्छति लिङ्गमन्यत् ॥ १४
उत्पत्तिवृद्धिक्षयसंनिपातै-
र्न युज्यतेऽसौ परमः शरीरी ।
अनेन लिङ्गेन तु लिङ्गमन्य-
द्गच्छत्यदृष्टः प्रतिसंधियोगात् ॥ १५
न चक्षुषा पश्यति रूपमात्मनो
न चापि संस्पर्शमुपैति किंचित् ।
न चापि तैः साधयतेऽथ कार्यं
ते तं न पश्यन्ति स पश्यते तान् ॥ १६
यथा प्रदीपे ज्वलतोऽनलस्य
संतापजं रूपमुपैति किंचित् ।
न चान्तरं रूपगुणं बिभर्ति
तथैव तद्दृश्यते रूपमस्य ॥ १७
यथा मनुष्यः परिमुच्य काय-
मदृश्यमन्यद्विशते शरीरम् ।
विसृज्य भूतेषु महत्सु देहं
तदाश्रयं चैव बिभर्ति रूपम् ॥ १८
खं वायुमग्निं सलिलं तथोर्वीं
समन्ततोऽभ्याविशते शरीरी ।
नानाश्रयाः कर्मसु वर्तमानाः
श्रोत्रादयः पञ्च गुणाञ्श्रयन्ते ॥ १९
श्रोत्रं खतो घ्राणमथो पृथिव्या-
स्तेजोमयं रूपमथो विपाकः ।
जलाश्रयः स्वेद उक्तो रसश्च
वाय्वात्मकः स्पर्शकृतो गुणश्च ॥ २०
महत्सु भूतेषु वसन्ति पञ्च
पञ्चेन्द्रियार्थाश्च तथेन्द्रियेषु ।
सर्वाणि चैतानि मनोनुगानि
बुद्धिं मनोऽन्वेति मनः स्वभावम् ॥ २१
शुभाशुभं कर्म कृतं यदस्य
तदेव प्रत्याददते स्वदेहे ।
मनोऽनुवर्तन्ति परावराणि
जलौकसः स्रोत इवानुकूलम् ॥ २२
चलं यथा दृष्टिपथं परैति
सूक्ष्मं महद्रूपमिवाभिपाति ।
स्वरूपमालोचयते च रूपं
परं तथा बुद्धिपथं परैति ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥

१९६

मनुरुवाच ।

यदिन्द्रियैस्तूपकृतान्पुरस्ता-
त्प्राप्तान्गुणान्संस्मरते चिराय ।
तेष्विन्द्रियेषूपहतेषु पश्चा-
त्स बुद्धिरूपः परमः स्वभावः ॥ १
यथेन्द्रियार्थान्युगपत्समस्ता-
न्नावेक्षते कृत्स्नमतुल्यकालम् ।
यथाबलं संचरते स विद्वां-
स्तस्मात्स एकः परमः शरीरी ॥ २

रजस्तमः सत्त्वमथो तृतीयं
गच्छत्यसौ ज्ञानगुणान्विरूपात् ।
तथेन्द्रियाण्याविशते शरीरी
हुताशनं वायुरिवेन्धनस्थम् ॥ ३
न चक्षुषा पश्यति रूपमात्मनो
न पश्यति स्पर्शनमिन्द्रियेन्द्रियम् ।
न श्रोत्रलिङ्गं श्रवणे निदर्शनं
तथागतं पश्यति तद्विनश्यति ॥ ४
श्रोत्रादीनि न पश्यन्ति स्वं स्वमात्मानमात्मना ।
सर्वज्ञः सर्वदर्शी च क्षेत्रज्ञस्तानि पश्यति ॥ ५
यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा ।
न दृष्टपूर्वं मनुजैर्न च तन्नास्ति तावता ॥ ६
तद्वद्भूतेषु भूतात्मा सूक्ष्मो ज्ञानात्मवानसौ ।
अदृष्टपूर्वश्चक्षुर्भ्यां न चासौ नास्ति तावता ॥ ७
पश्यन्नपि यथा लक्ष्म जगत्सोमे न विन्दति ।
एवमस्ति न वेत्त्येतन्न च तन्न परायणम् ॥ ८
रूपवन्तमरूपत्वादुदयास्तमये बुधाः ।
धिया समनुपश्यन्ति तद्गताः सवितुर्गतिम् ॥ ९
तथा बुद्धिप्रदीपेन दूरस्थं सुविपश्चितः ।
प्रत्यासन्नं निनीषन्ति ज्ञेयं ज्ञानाभिसंहितम् ॥ १०
न हि खल्वनुपायेन कश्चिदर्थोऽभिसिध्यति ।
सूत्रजालैर्यथा मत्स्यान्बध्नन्ति जलजीविनः ॥ ११
मृगैर्मृगाणां ग्रहणं पक्षिणां पक्षिभिर्यथा ।
गजानां च गजैरेवं ज्ञेयं ज्ञानेन गृह्यते ॥ १२
अहिरेव ह्यहेः पादान्पश्यतीति निदर्शनम् ।
तद्वन्मूर्तिषु मूर्तिस्थं ज्ञेयं ज्ञानेन पश्यति ॥ १३
नोत्सहन्ते यथा वेत्तुमिन्द्रियैरिन्द्रियाण्यपि ।
तथैवेह परा बुद्धिः परं बुद्ध्या न पश्यति ॥ १४
यथा चन्द्रो ह्यमावास्यामलिङ्गत्वान्न दृश्यते ।
न च नाशोऽस्य भवति तथा विद्धि शरीरिणम् ॥
क्षीणकोशो ह्यमावास्यां चन्द्रमा न प्रकाशते ।
तद्वन्मूर्तिवियुक्तः सञ्शरीरी नोपलभ्यते ॥ १६
यथा कोशान्तरं प्राप्य चन्द्रमा भ्राजते पुनः ।
तद्वल्लिङ्गान्तरं प्राप्य शरीरी भ्राजते पुनः ॥ १७
जन्मवृद्धिक्षयश्चास्य प्रत्यक्षेणोपलभ्यते ।
सा तु चन्द्रमसो व्यक्तिर्न तु तस्य शरीरिणः ॥१८
उत्पत्तिवृद्धिव्ययतो यथा स इति गृह्यते ।
चन्द्र एव त्वमावास्यां तथा भवति मूर्तिमान् ॥१९
नाभिसर्पद्विमुञ्चद्वा शशिनं दृश्यते तमः ।
विसृजंश्चोपसर्पंश्च तद्वत्पश्य शरीरिणम् ॥ २०
यथा चन्द्रार्कसंयुक्तं तमस्तदुपलभ्यते ।
तद्वच्छरीरसंयुक्तः शरीरीत्युपलभ्यते ॥ २१
यथा चन्द्रार्कनिर्मुक्तः स राहुर्नोपलभ्यते ।
तद्वच्छरीरनिर्मुक्तः शरीरी नोपलभ्यते ॥ २२
यथा चन्द्रो ह्यमावास्यां नक्षत्रैर्युज्यते गतः ।
तद्वच्छरीरनिर्मुक्तः फलैर्युज्यति कर्मणः ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥

१९७

मनुरुवाच ।

यथा व्यक्तमिदं शेते स्वप्ने चरति चेतनम् ।
ज्ञानमिन्द्रियसंयुक्तं तद्वत्प्रेत्य भवाभवौ ॥ १
यथाम्भसि प्रसन्ने तु रूपं पश्यति चक्षुषा ।
तद्वत्प्रसन्नेन्द्रियवाञ्ज्ञेयं ज्ञानेन पश्यति ॥ २
स एव लुलिते तस्मिन्यथा रूपं न पश्यति ।
तथेन्द्रियाकुलीभावे ज्ञेयं ज्ञाने न पश्यति ॥ ३
अबुद्धिरज्ञानकृता अबुद्ध्या दुष्यते मनः ।
दुष्टस्य मनसः पञ्च संप्रदुष्यन्ति मानसाः ॥ ४
अज्ञानतृप्तो विषयेष्ववगाढो न दृश्यते ।
अदृष्ट्वैव तु पूतात्मा विषयेभ्यो निवर्तते ॥ ५

तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् ।
निवर्तते तथा तर्षः पापमन्तं गतं यथा ॥ ६
विषयेषु च संसर्गाच्छाश्वतस्य नसंश्रयात् ।
मनसा चान्यदाकाङ्क्षन्परं न प्रतिपद्यते ॥ ७
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
अथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥ ८
प्रसृतैरिन्द्रियैर्दुःखी तैरेव नियतैः सुखी ।
तस्मादिन्द्रियरूपेभ्यो यच्छेदात्मानमात्मना ॥ ९
इन्द्रियेभ्यो मनः पूर्वं बुद्धिः परतरा ततः ।
बुद्धेः परतरं ज्ञानं ज्ञानात्परतरं परम् ॥ १०
अव्यक्तात्प्रसृतं ज्ञानं ततो बुद्धिस्ततो मनः ।
मनः श्रोत्रादिभिर्युक्तं शब्दादीन्साधु पश्यति ॥ ११
यस्तांस्त्यजति शब्दादीन्सर्वाश्च व्यक्तयस्तथा ।
विमुञ्चत्याकृतिग्रामांस्तान्मुक्त्वामृतमश्नुते ॥ १२
उद्यन्हि सविता यद्वत्सृजते रश्मिमण्डलम् ।
स एवास्तमुपागच्छंस्तदेवात्मनि यच्छति ॥ १३
अन्तरात्मा तथा देहमाविश्येन्द्रियरश्मिभिः ।
प्राप्येन्द्रियगुणान्पञ्च सोऽस्तमावृत्य गच्छति ॥ १४
प्रणीतं कर्मणा मार्गं नीयमानः पुनः पुनः ।
प्राप्नोत्ययं कर्मफलं प्रवृद्धं धर्ममात्मवान् ॥ १५
विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा विवर्तते ॥ १६
बुद्धिः कर्मगुणैर्हीना यदा मनसि वर्तते ।
तदा संपद्यते ब्रह्म तत्रैव प्रलयं गतम् ॥ १७
अस्पर्शनमशृण्वानमनास्वादमदर्शनम् ।
अघ्राणमवितर्कं च सत्त्वं प्रविशते परम् ॥ १८
मनस्याकृतयो मग्ना मनस्त्वतिगतं मतिम् ।
मतिस्त्वतिगता ज्ञानं ज्ञानं त्वभिगतं परम् ॥ १९
इन्द्रियैर्मनसः सिद्धिर्न बुद्धिं बुध्यते मनः ।
न बुद्धिर्बुध्यतेऽव्यक्तं सूक्ष्मस्त्वेतानि पश्यति ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

१९८

मनुरुवाच ।

ज्ञानं ज्ञेयाभिनिर्वृत्तं विद्धि ज्ञानगुणं मनः ।
प्रज्ञाकरणसंयुक्तं ततो बुद्धिः प्रवर्तते ॥ १
यदा कर्मगुणोपेता बुद्धिर्मनसि वर्तते ।
तदा प्रज्ञायते ब्रह्म ध्यानयोगसमाधिना ॥ २
सेयं गुणवती बुद्धिर्गुणेष्वेवाभिवर्तते ।
अवताराभिनिःस्रोतं गिरेः शृङ्गादिवोदकम् ॥ ३
यदा निर्गुणमाप्नोति ध्यानं मनसि पूर्वजम् ।
तदा प्रज्ञायते ब्रह्म निकष्यं निकषे यथा ॥ ४
मनस्त्वपहृतं बुद्धिमिन्द्रियार्थनिदर्शनम् ।
न समक्षं गुणावेक्षि निर्गुणस्य निदर्शनम् ॥ ५
सर्वाण्येतानि संवार्य द्वाराणि मनसि स्थितः ।
मनस्येकाग्रतां कृत्वा तत्परं प्रतिपद्यते ॥ ६
यथा महान्ति भूतानि निवर्तन्ते गुणक्षये ।
तथेन्द्रियाण्युपादाय बुद्धिर्मनसि वर्तते ॥ ७
यदा मनसि सा बुद्धिर्वर्ततेऽन्तरचारिणी ।
व्यवसायगुणोपेता तदा संपद्यते मनः ॥ ८
गुणवद्भिर्गुणोपेतं यदा ध्यानगुणं मनः ।
तदा सर्वगुणान्हित्वा निर्गुणं प्रतिपद्यते ॥ ९
अव्यक्तस्येह विज्ञाने नास्ति तुल्यं निदर्शनम् ।
यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात् ॥ १०
तपसा चानुमानेन गुणैर्जात्या श्रुतेन च ।
निनीषेत्तत्परं ब्रह्म विशुद्धेनान्तरात्मना ॥ ११
गुणहीनो हि तं मार्गं बहिः समनुवर्तते ।
गुणाभावात्प्रकृत्या च निस्तर्क्यं ज्ञेयसंमितम् ॥ १२
नैर्गुण्याद्ब्रह्म चाप्नोति सगुणत्वान्निवर्तते ।

गुणप्रसारिणी बुद्धिर्हुताशन इवेन्धने ॥ १३
यथा पञ्च विमुक्तानि इन्द्रियाणि स्वकर्मभिः ।
तथा तत्परमं ब्रह्म विमुक्तं प्रकृतेः परम् ॥ १४
एवं प्रकृतितः सर्वे प्रभवन्ति शरीरिणः ।
निवर्तन्ते निवृत्तौ च सर्गं नैवोपयान्ति च ॥ १५
पुरुषः प्रकृतिर्बुद्धिर्विशेषाश्चेन्द्रियाणि च ।
अहंकारोऽभिमानश्च संभूतो भूतसंज्ञकः ॥ १६
एकस्याद्या प्रवृत्तिस्तु प्रधानात्संप्रवर्तते ।
द्वितीया मिथुनव्यक्तिमविशेषान्नियच्छति ॥ १७
धर्मादुत्कृष्यते श्रेयस्तथाश्रेयोऽप्यधर्मतः ।
रागवान्प्रकृतिं ह्येति विरक्तो ज्ञानवान्भवेत् ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

१९९

मनुरुवाच ।

यदा ते पञ्चभिः पञ्च विमुक्ता मनसा सह ।
अथ तद्द्रक्ष्यसे ब्रह्म मणौ सूत्रमिवार्पितम् ॥ १
तदेव च यथा सूत्रं सुवर्णे वर्तते पुनः ।
मुक्तास्वथ प्रवालेषु मृन्मये राजते तथा ॥ २
तद्वद्गोषु मनुष्येषु तद्वद्धस्तिमृगादिषु ।
तद्वत्कीटपतंगेषु प्रसक्तात्मा स्वकर्मभिः ॥ ३
येन येन शरीरेण यद्यत्कर्म करोत्ययम् ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ४
यथा ह्येकरसा भूमिरोषध्यात्मानुसारिणी ।
तथा कर्मानुगा बुद्धिरन्तरात्मानुदर्शिनी ॥ ५
ज्ञानपूर्वोद्भवा लिप्सा लिप्सापूर्वाभिसंधिता ।
अभिसंधिपूर्वकं कर्म कर्ममूलं ततः फलम् ॥ ६
फलं कर्मात्मकं विद्यात्कर्म ज्ञेयात्मकं तथा ।
ज्ञेयं ज्ञानात्मकं विद्याज्ज्ञानं सदसदात्मकम् ॥ ७
ज्ञानानां च फलानां च ज्ञेयानां कर्मणां तथा ।
क्षयान्ते तत्फलं दिव्यं ज्ञानं ज्ञेयप्रतिष्ठितम् ॥ ८
महद्धि परमं भूतं युक्ताः पश्यन्ति योगिनः ।
अबुधास्तं न पश्यन्ति ह्यात्मस्था गुणबुद्धयः ॥ ९
पृथिवीरूपतो रूपमपामिह महत्तरम् ।
अद्भ्यो महत्तरं तेजस्तेजसः पवनो महान् ॥ १०
पवनाच्च महद्व्योम तस्मात्परतरं मनः ।
मनसो महती बुद्धिर्बुद्धेः कालो महान्स्मृतः ॥ ११
कालात्स भगवान्विष्णुर्यस्य सर्वमिदं जगत् ।
नादिर्न मध्यं नैवान्तस्तस्य देवस्य विद्यते ॥ १२
अनादित्वादमध्यत्वादनन्तत्वाच्च सोऽव्ययः ।
अत्येति सर्वदुःखानि दुःखं ह्यन्तवदुच्यते ॥ १३
तद्ब्रह्म परमं प्रोक्तं तद्धाम परमं स्मृतम् ।
तद्गत्वा कालविषयाद्विमुक्ता मोक्षमाश्रिताः ॥ १४
गुणैस्त्वेतैः प्रकाशन्ते निर्गुणत्वात्ततः परम् ।
निवृत्तिलक्षणो धर्मस्तथानन्त्याय कल्पते ॥ १५
ऋचो यजूंषि सामानि शरीराणि व्यपाश्रिताः ।
जिह्वाग्रेषु प्रवर्तन्ते यत्नसाध्या विनाशिनः ॥ १६
न चैवमिष्यते ब्रह्म शरीराश्रयसंभवम् ।
न यत्नसाध्यं तद्ब्रह्म नादिमध्यं न चान्तवत् ॥१७
ऋचामादिस्तथा साम्नां यजुषामादिरुच्यते ।
अन्तश्चादिमतां दृष्टो न चादिर्ब्रह्मणः स्मृतः ॥१८
अनादित्वादनन्तत्वात्तदनन्तमथाव्ययम् ।
अव्ययत्वाच्च निर्द्वंद्वं द्वंद्वाभावात्ततः परम् ॥ १९
अदृष्टतोऽनुपायाच्चाप्यभिसंधेश्च कर्मणः ।
न तेन मर्त्याः पश्यन्ति येन गच्छन्ति तत्परम् ॥२०
विषयेषु च संसर्गाच्छाश्वतस्य च दर्शनात् ।
मनसा चान्यदाकाङ्क्षन्परं न प्रतिपद्यते ॥ २१
गुणान्यदिह पश्यन्ति तदिच्छन्त्यपरे जनाः ।
परं नैवाभिकाङ्क्षन्ति निर्गुणत्वाद्गुणार्थिनः ॥ २२
गुणैर्यस्त्ववरैर्युक्तः कथं विद्याद्गुणानिमान् ।

अनुमानाद्धि गन्तव्यं गुणैरवयवैः सह ॥ २३
सूक्ष्मेण मनसा विद्मो वाचा वक्तुं न शक्नुमः ।
मनो हि मनसा ग्राह्यं दर्शनेन च दर्शनम् ॥ २४
ज्ञानेन निर्मलीकृत्य बुद्धिं बुद्ध्या तथा मनः ।
मनसा चेन्द्रियग्राममनन्तं प्रतिपद्यते ॥ २५
बुद्धिप्रहीणो मनसासमृद्ध-
स्तथा निराशीर्गुणतामुपैति ।
परं त्यजन्तीह विलोभ्यमाना
हुताशनं वायुरिवेन्धनस्थम् ॥ २६
गुणादाने विप्रयोगे च तेषां
मनः सदा बुद्धिपरावराभ्याम् ।
अनेनैव विधिना संप्रवृत्तो
गुणादाने ब्रह्मशरीरमेति ॥ २७
अव्यक्तात्मा पुरुषोऽव्यक्तकर्मा
सोऽव्यक्तत्वं गच्छति ह्यन्तकाले ।
तैरेवायं चेन्द्रियैर्वर्धमानै-
र्ग्लायद्भिर्वा वर्तते कर्मरूपः ॥ २८
सर्वैरयं चेन्द्रियैः संप्रयुक्तो
देहः प्राप्तः पञ्चभूताश्रयः स्यात् ।
नासामर्थ्याद्गच्छति कर्मणेह
हीनस्तेन परमेणाव्ययेन ॥ २९
पृथ्व्या नरः पश्यति नान्तमस्या
ह्यन्तश्चास्या भविता चेति विद्धि ।
परं नयन्तीह विलोभ्यमानं
यथा प्लवं वायुरिवार्णवस्थम् ॥ ३०
दिवाकरो गुणमुपलभ्य निर्गुणो
यथा भवेद्व्यपगतरश्मिमण्डलः ।
तथा ह्यसौ मुनिरिह निर्विशेषवा-
न्स निर्गुणं प्रविशति ब्रह्म चाव्ययम् ॥३१
अनागतिं सुकृतिमतां परां गतिं
स्वयंभुवं प्रभवनिधानमव्ययम् ।
सनातनं यदमृतमव्ययं पदं
विचार्य तं शमममृतत्वमश्नुते ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि
एकोनद्विशततमोऽध्यायः ॥ १९९ ॥

२००

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ पुण्डरीकाक्षमच्युतम् ।
कर्तारमकृतं विष्णुं भूतानां प्रभवाप्ययम् ॥ १
नारायणं हृषीकेशं गोविन्दमपराजितम् ।
तत्त्वेन भरतश्रेष्ठ श्रोतुमिच्छामि केशवम् ॥ २

भीष्म उवाच ।

श्रुतोऽयमर्थो रामस्य जामदग्न्यस्य जल्पतः ।
नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ॥ ३
असितो देवलस्तात वाल्मीकिश्च महातपाः ।
मार्कण्डेयश्च गोविन्दे कथयत्यद्भुतं महत् ॥ ४
केशवो भरतश्रेष्ठ भगवानीश्वरः प्रभुः ।
पुरुषः सर्वमित्येव श्रूयते बहुधा विभुः ॥ ५
किं तु यानि विदुर्लोके ब्राह्मणाः शार्ङ्गधन्वनः ।
माहात्म्यानि महाबाहो शृणु तानि युधिष्ठिर ॥ ६
यानि चाहुर्मनुष्येन्द्र ये पुराणविदो जनाः ।
अशेषेण हि गोविन्दे कीर्तयिष्यामि तान्यहम् ॥ ७
महाभूतानि भूतात्मा महात्मा पुरुषोत्तमः ।
वायुर्ज्योतिस्तथा चापः खं गां चैवान्वकल्पयत् ॥८
स दृष्ट्वा पृथिवीं चैव सर्वभूतेश्वरः प्रभुः ।
अप्स्वेव शयनं चक्रे महात्मा पुरुषोत्तमः ॥ ९
सर्वतेजोमयस्तस्मिञ्शयानः शयने शुभे ।
सोऽग्रजं सर्वभूतानां संकर्षणमचिन्तयत् ॥ १०
आश्रयं सर्वभूतानां मनसेति विशुश्रुम ।
स धारयति भूतात्मा उभे भूतभविष्यती ॥ ११

ततस्तस्मिन्महाबाहो प्रादुर्भूते महात्मनि ।
भास्करप्रतिमं दिव्यं नाभ्यां पद्ममजायत ॥ १२
स तत्र भगवान्देवः पुष्करे भासयन्दिशः ।
ब्रह्मा समभवत्तात सर्वभूतपितामहः ॥ १३
तस्मिन्नपि महाबाहो प्रादुर्भूते महात्मनि ।
तमसः पूर्वजो जज्ञे मधुर्नाम महासुरः ॥ १४
तमुग्रमुग्रकर्माणमुग्रां बुद्धिं समास्थितम् ।
ब्रह्मणोपचितिं कुर्वञ्जघान पुरुषोत्तमः ॥ १५
तस्य तात वधात्सर्वे देवदानवमानवाः ।
मधुसूदनमित्याहुर्वृषभं सर्वसात्वताम् ॥ १६
ब्रह्मा तु ससृजे पुत्रान्मानसान्दक्षसप्तमान् ।
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥ १७
मरीचिः कश्यपं तात पुत्रं चासृजदग्रजम् ।
मानसं जनयामास तैजसं ब्रह्मसत्तमम् ॥ १८
अङ्गुष्ठादसृजद्ब्रह्मा मरीचेरपि पूर्वजम् ।
सोऽभवद्भरतश्रेष्ठ दक्षो नाम प्रजापतिः ॥ १९
तस्य पूर्वमजायन्त दश तिस्रश्च भारत ।
प्रजापतेर्दुहितरस्तासां ज्येष्ठाभवद्दितिः ॥ २०
सर्वधर्मविशेषज्ञः पुण्यकीर्तिर्महायशाः ।
मारीचः कश्यपस्तात सर्वासामभवत्पतिः ॥ २१
उत्पाद्य तु महाभागस्तासामवरजा दश ।
ददौ धर्माय धर्मज्ञो दक्ष एव प्रजापतिः ॥ २२
धर्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः ।
विश्वेदेवाश्च साध्याश्च मरुत्वन्तश्च भारत ॥ २३
अपरास्तु यवीयस्यस्ताभ्योऽन्याः सप्तविंशतिः ।
सोमस्तासां महाभागः सर्वासामभवत्पतिः ॥ २४
इतरास्तु व्यजायन्त गन्धर्वांस्तुरगान्द्विजान् ।
गाश्च किंपुरुषान्मत्स्यानौद्भिदांश्च वनस्पतीन् ॥ २५
आदित्यानदितिर्जज्ञे देवश्रेष्ठान्महाबलान् ।
तेषां विष्णुर्वामनोऽभूद्गोविन्दश्चाभवत्प्रभुः ॥ २६
तस्य विक्रमणादेव देवानां श्रीर्व्यवर्धत ।
दानवाश्च पराभूता दैतेयी चासुरी प्रजा ॥ २७
विप्रचित्तिप्रधानांश्च दानवानसृजद्दनुः ।
दितिस्तु सर्वानसुरान्महासत्त्वान्व्यजायत ॥ २८
अहोरात्रं च कालं च यथर्तु मधुसूदनः ।
पूर्वाह्णं चापराह्णं च सर्वमेवान्वकल्पयत् ॥ २९
बुद्ध्वापः सोऽसृजन्मेघांस्तथा स्थावरजङ्गमान् ।
पृथिवीं सोऽसृजद्विश्वां सहितां भूरितेजसा ॥ ३०
ततः कृष्णो महाबाहुः पुनरेव युधिष्ठिर ।
ब्राह्मणानां शतं श्रेष्ठं मुखादसृजतः प्रभु ॥ ३१
बाहुभ्यां क्षत्रियशतं वैश्यानामूरुतः शतम् ।
पद्भ्यां शूद्रशतं चैव केशवो भरतर्षभ ॥ ३२
स एवं चतुरो वर्णान्समुत्पाद्य महायशाः ।
अध्यक्षं सर्वभूतानां धातारमकरोत्प्रभुः ॥ ३३
यावद्यावदभूच्छ्रद्धा देहं धारयितुं नृणाम् ।
तावत्तावदजीवंस्ते नासीद्यमकृतं भयम् ॥ ३४
न चैषां मैथुनो धर्मो बभूव भरतर्षभ ।
संकल्पादेव चैतेषामपत्यमुदपद्यत ॥ ३५
तत्र त्रेतायुगे काले संकल्पाज्जायते प्रजा ।
न ह्यभून्मैथुनो धर्मस्तेषामपि जनाधिप ॥ ३६
द्वापरे मैथुनो धर्मः प्रजानामभवन्नृप ।
तथा कलियुगे राजन्द्वंद्वमापेदिरे जनाः ॥ ३७
एष भूतपतिस्तात स्वध्यक्षश्च प्रकीर्तितः ।
निरध्यक्षांस्तु कौन्तेय कीर्तयिष्यामि तानपि ॥३८
दक्षिणापथजन्मानः सर्वे तलवरान्ध्रकाः ।
उत्साः पुलिन्दाः शबराश्चूचुपा मण्डपैः सह ॥३९
उत्तरापथजन्मानः कीर्तयिष्यामि तानपि ।
यौनकाम्बोजगान्धाराः किराता बर्बरैः सह ॥ ४०
एते पापकृतस्तात चरन्ति पृथिवीमिमाम् ।
श्वकाकबलगृध्राणां सधर्माणो नराधिप ॥ ४१

नैते कृतयुगे तात चरन्ति पृथिवीमिमाम् ।
त्रेताप्रभृति वर्तन्ते ते जना भरतर्षभ ॥ ४२
ततस्तस्मिन्महाघोरे संध्याकाले युगान्तिके ।
राजानः समसज्जन्त समासाद्येतरेतरम् ॥ ४३
एवमेष कुरुश्रेष्ठ प्रादुर्भावो महात्मनः ।
देवदेवर्षिराचष्ट नारदः सर्वलोकदृक् ॥ ४४
नारदोऽप्यथ कृष्णस्य परं मेने नराधिप ।
शाश्वतत्वं महाबाहो यथावद्भरतर्षभ ॥ ४५
एवमेष महाबाहुः केशवः सत्यविक्रमः ।
अचिन्त्यः पुण्डरीकाक्षो नैष केवलमानुषः ॥ ४६

इति श्रीमहाभारते शान्तिपर्वणि
द्विशततमोऽध्यायः ॥ २०० ॥

२०१

युधिष्ठिर उवाच ।

के पूर्वमासन्पतयः प्रजानां भरतर्षभ ।
के चर्षयो महाभागा दिक्षु प्रत्येकशः स्मृताः ॥ १

भीष्म उवाच ।

श्रूयतां भरतश्रेष्ठ यन्मा त्वं परिपृच्छसि ।
प्रजानां पतयो ये स्म दिक्षु प्रत्येकशः स्मृताः ॥ २
एकः स्वयंभूर्भगवानाद्यो ब्रह्मा सनातनः ।
ब्रह्मणः सप्त पुत्रा वै महात्मानः स्वयंभुवः ॥ ३
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्च महाभागः सदृशा वै स्वयंभुवा ॥ ४
सप्त ब्रह्माण इत्येष पुराणे निश्चयो गतः ।
अत ऊर्ध्वं प्रवक्ष्यामि सर्वानेव प्रजापतीन् ॥ ५
अत्रिवंशसमुत्पन्नो ब्रह्मयोनिः सनातनः ।
प्राचीनबर्हिर्भगवांस्तस्मात्प्राचेतसो दश ॥ ६
दशानां तनयस्त्वेको दक्षो नाम प्रजापतिः ।
तस्य द्वे नामनी लोके दक्षः क इति चोच्यते ॥७
मरीचेः कश्यपः पुत्रस्तस्य द्वे नामनी श्रुते ।
अरिष्टनेमिरित्येकं कश्यपेत्यपरं विदुः ॥ ८
अङ्गश्चैवौरसः श्रीमान्राजा भौमश्च वीर्यवान् ।
सहस्रं यश्च दिव्यानां युगानां पर्युपासिता ॥ ९
अर्यमा चैव भगवान्ये चान्ये तनया विभो ।
एते प्रदेशाः कथिता भुवनानां प्रभावनाः ॥ १०
शशबिन्दोश्च भार्याणां सहस्राणि दशाच्युत ।
एकैकस्यां सहस्रं तु तनयानामभूत्तदा ॥ ११
एवं शतसहस्राणां शतं तस्य महात्मनः ।
पुत्राणां न च ते कंचिदिच्छन्त्यन्यं प्रजापतिम् ॥१२
प्रजामाचक्षते विप्राः पौराणीं शाशबिन्दवीम् ।
स वृष्णिवंशप्रभवो महावंशः प्रजापतेः ॥ १३
एते प्रजानां पतयः समुद्दिष्टा यशस्विनः ।
अतः परं प्रवक्ष्यामि देवांस्त्रिभुवनेश्वरान् ॥ १४
भगोंऽशश्चार्यमा चैव मित्रोऽथ वरुणस्तथा ।
सविता चैव धाता च विवस्वांश्च महाबलः ॥ १५
पूषा त्वष्टा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ।
त एते द्वादशादित्याः कश्यपस्यात्मसंभवाः ॥ १६
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनावपि ।
मार्तण्डस्यात्मजावेतावष्टमस्य प्रजापतेः ॥ १७
त्वष्टुश्चैवात्मजः श्रीमान्विश्वरूपो महायशाः ।
अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथ रैवतः ॥ १८
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ।
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
पूर्वमेव महाभागा वसवोऽष्टौ प्रकीर्तिताः ॥ १९
एत एवंविधा देवा मनोरेव प्रजापतेः ।
ते च पूर्वे सुराश्चेति द्विविधाः पितरः स्मृताः ॥२०
शीलरूपरतास्त्वन्ये तथान्ये सिद्धसाध्ययोः ।
ऋभवो मरुतश्चैव देवानां चोदिता गणाः ॥ २१
एवमेते समाम्नाता विश्वेदेवास्तथाश्विनौ ।
आदित्याः क्षत्रियास्तेषां विशस्तु मरुतस्तथा ॥ २२

अश्विनौ तु मतौ शूद्रौ तपस्युग्रे समाहितौ ।
स्मृतास्त्वङ्गिरसो देवा ब्राह्मणा इति निश्चयः ।
इत्येतत्सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितम् ॥ २३
एतान्वै प्रातरुत्थाय देवान्यस्तु प्रकीर्तयेत् ।
स्वजादन्यकृताच्चैव सर्वपापात्प्रमुच्यते ॥ २४
यवक्रीतोऽथ रैभ्यश्च अर्वावसुपरावसू ।
औशिजश्चैव कक्षीवान्नलश्चाङ्गिरसः सुताः ॥ २५
ऋषेर्मेधातिथेः पुत्रः कण्वो बर्हिषदस्तथा ।
त्रैलोक्यभावनास्तात प्राच्यां सप्तर्षयस्तथा ॥ २६
उन्मुचो विमुचश्चैव स्वस्त्यात्रेयश्च वीर्यवान् ।
प्रमुचश्चेध्मवाहश्च भगवांश्च दृढव्रतः ॥ २७
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् ।
एते ब्रह्मर्षयो नित्यमाश्रिता दक्षिणां दिशम् ॥ २८
रुषद्गुः कवषो धौम्यः परिव्याधश्च वीर्यवान् ।
एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ॥ २९
अत्रेः पुत्रश्च भगवांस्तथा सारस्वतः प्रभुः ।
एते नव महात्मानः पश्चिमामाश्रिता दिशम् ॥३०
आत्रेयश्च वसिष्ठश्च कश्यपश्च महानृषिः ।
गौतमः सभरद्वाजो विश्वामित्रोऽथ कौशिकः ॥३१
तथैव पुत्रो भगवानृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते उदीचीं दिशमाश्रिताः ॥ ३२
एते प्रतिदिशं सर्वे कीर्तितास्तिग्मतेजसः ।
साक्षिभूता महात्मानो भुवनानां प्रभावनाः ॥ ३३
एवमेते महात्मानः स्थिताः प्रत्येकशो दिशः ।
एतेषां कीर्तनं कृत्वा सर्वपापैः प्रमुच्यते ॥ ३४
यस्यां यस्यां दिशि ह्येते तां दिशं शरणं गतः ।
मुच्यते सर्वपापेभ्यः स्वस्तिमांश्च गृहान्व्रजेत् ॥३५

इति श्रीमहाभारते शान्तिपर्वणि
एकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥

२०२

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ युधि सत्यपराक्रम ।
श्रोतुमिच्छामि कार्त्स्न्येन कृष्णमव्ययमीश्वरम् ॥ १
यच्चास्य तेजः सुमहद्यच्च कर्म पुरातनम् ।
तन्मे सर्वं यथातत्त्वं प्रब्रूहि भरतर्षभ ॥ २
तिर्यग्योनिगतं रूपं कथं धारितवान्हरिः ।
केन कार्यविसर्गेण तन्मे ब्रूहि पितामह ॥ ३

भीष्म उवाच ।

पुराहं मृगयां यातो मार्कण्डेयाश्रमे स्थितः ।
तत्रापश्यं मुनिगणान्समासीनान्सहस्रशः ॥ ४
ततस्ते मधुपर्केण पूजां चक्रुरथो मयि ।
प्रतिगृह्य च तां पूजां प्रत्यनन्दमृषीनहम् ॥ ५
कथैषा कथिता तत्र कश्यपेन महर्षिणा ।
मनःप्रह्लादिनीं दिव्यां तामिहैकमनाः शृणु ॥ ६
पुरा दानवमुख्या हि क्रोधलोभसमन्विताः ।
बलेन मत्ताः शतशो नरकाद्या महासुराः ॥ ७
तथैव चान्ये बहवो दानवा युद्धदुर्मदाः ।
न सहन्ते स्म देवानां समृद्धिं तामनुत्तमाम् ॥ ८
दानवैर्र्द्यमानास्तु देवा देवर्षयस्तथा ।
न शर्म लेभिरे राजन्विशमानास्ततस्ततः ॥ ९
पृथिवीं चार्तरूपां ते समपश्यन्दिवौकसः ।
दानवैरभिसंकीर्णां घोररूपैर्महाबलैः ।
भारार्तामपकृष्टां च दुःखितां संनिमज्जतीम् ॥ १०
अथादितेयाः संत्रस्ता ब्रह्माणमिदमब्रुवन् ।
कथं शक्यामहे ब्रह्मन्दानवैरुपमर्दनम् ॥ ११
स्वयंभूस्तानुवाचेदं निसृष्टोऽत्र विधिर्मया ।
ते वरेणाभिसंमत्ता बलेन च मदेन च ॥ १२
नावभोत्स्यन्ति संमूढा विष्णुमव्यक्तदर्शनम् ।
वराहरूपिणं देवमधृष्यममरैरपि ॥ १३

एष वेगेन गत्वा हि यत्र ते दानवाधमाः ।
अन्तर्भूमिगता घोरा निवसन्ति सहस्रशः ।
शमयिष्यति श्रुत्वा ते जहृषुः सुरसत्तमाः ॥ १४
ततो विष्णुर्महातेजा वाराहं रूपमाश्रितः ।
अन्तर्भूमिं संप्रविश्य जगाम दितिजान्प्रति ॥ १५
दृष्ट्वा च सहिताः सर्वे दैत्याः सत्त्वममानुषम् ।
प्रसह्य सहसा सर्वे संतस्थुः कालमोहिताः ॥ १६
सर्वे च समभिद्रुत्य वराहं जगृहुः समम् ।
संक्रुद्धाश्च वराहं तं व्यकर्षन्त समन्ततः ॥ १७
दानवेन्द्रा महाकाया महावीर्या बलोच्छ्रिताः ।
नाशक्नुवंश्च किंचित्ते तस्य कर्तुं तदा विभो ॥ १८
ततोऽगमन्विस्मयं ते दानवेन्द्रा भयात्तदा ।
संशयं गतमात्मानं मेनिरे च सहस्रशः ॥ १९
ततो देवादिदेवः स योगात्मा योगसारथिः ।
योगमास्थाय भगवांस्तदा भरतसत्तम ॥ २०
विननाद महानादं क्षोभयन्दैत्यदानवान् ।
संनादिता येन लोकाः सर्वाश्चैव दिशो दश ॥२१
तेन संनादशब्देन लोकाः संक्षोभमागमन् ।
संभ्रान्ताश्च दिशः सर्वा देवाः शक्रपुरोगमाः ॥२२
निर्विचेष्टं जगच्चापि बभूवातिभृशं तदा ।
स्थावरं जङ्गमं चैव तेन नादेन मोहितम् ॥ २३
ततस्ते दानवाः सर्वे तेन शब्देन भीषिताः ।
पेतुर्गतासवश्चैव विष्णुतेजोविमोहिताः ॥ २४
रसातलगतांश्चैव वराहस्त्रिदशद्विषः ।
खुरैः संदारयामास मांसमेदोस्थिसंचयम् ॥ २५
नादेन तेन महता सनातन इति स्मृतः ।
पद्मनाभो महायोगी भूताचार्यः स भूतराट् ॥२६
ततो देवगणाः सर्वे पितामहमुपाब्रुवन् ।
नादोऽयं कीदृशो देव नैनं विद्म वयं विभो ।
कोऽसौ हि कस्य वा नादो येन विह्वलितं जगत् ॥
एतस्मिन्नन्तरे विष्णुर्वाराहं रूपमास्थितः ।
उदतिष्ठन्महादेवः स्तूयमानो महर्षिभिः ॥ २८

पितामह उवाच ।

निहत्य दानवपतीन्महावर्ष्मा महाबलः ।
एष देवो महायोगी भूतात्मा भूतभावनः ॥ २९
सर्वभूतेश्वरो योगी योनिरात्मा तथात्मनः ।
स्थिरीभवत कृष्णोऽयं सर्वपापप्रणाशनः ॥ ३०
कृत्वा कर्मातिसाध्वेतदशक्यममितप्रभः ।
समायातः स्वमात्मानं महाभागो महाद्युतिः ।
पद्मनाभो महायोगी भूतात्मा भूतभावनः ॥ ३१
न संतापो न भीः कार्या शोको वा सुरसत्तमाः ।
विधिरेष प्रभावश्च कालः संक्षयकारकः ।
लोकान्धारयतानेन नादो मुक्तो महात्मना ॥ ३२
स एव हि महाभागः सर्वलोकनमस्कृतः ।
अच्युतः पुण्डरीकाक्षः सर्वभूतसमुद्भवः ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

२०३

युधिष्ठिर उवाच ।

योगं मे परमं तात मोक्षस्य वद भारत ।
तमहं तत्त्वतो ज्ञातुमिच्छामि वदतां वर ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह ॥ २
कश्चिद्ब्राह्मणमासीनमाचार्यमृषिसत्तमम् ।
शिष्यः परममेधावी श्रेयोर्थी सुसमाहितः ।
चरणावुपसंगृह्य स्थितः प्राञ्जलिरब्रवीत् ॥ ३
उपासनात्प्रसन्नोऽसि यदि वै भगवन्मम ।
संशयो मे महान्कश्चित्तन्मे व्याख्यातुमर्हसि ॥ ४
कुतश्चाहं कुतश्च त्वं तत्सम्यग्ब्रूहि यत्परम् ।

कथं च सर्वभूतेषु समेषु द्विजसत्तम ।
सम्यग्वृत्ता निवर्तन्ते विपरीताः क्षयोदयाः ॥ ५
वेदेषु चापि यद्वाक्यं लौकिकं व्यापकं च यत् ।
एतद्विद्वन्यथातत्त्वं सर्वं व्याख्यातुमर्हसि ॥ ६

गुरुरुवाच ।

शृणु शिष्य महाप्राज्ञ ब्रह्मगुह्यमिदं परम् ।
अध्यात्मं सर्वभूतानामागमानां च यद्वसु ॥ ७
वासुदेवः सर्वमिदं विश्वस्य ब्रह्मणो मुखम् ।
सत्यं ज्ञानमथो यज्ञस्तितिक्षा दम आर्जवम् ॥ ८
पुरुषं सनातनं विष्णुं यत्तद्वेदविदो विदुः ।
सर्गप्रलयकर्तारमव्यक्तं ब्रह्म शाश्वतम् ।
तदिदं ब्रह्म वार्ष्णेयमितिहासं शृणुष्व मे ॥ ९
ब्राह्मणो ब्राह्मणैः श्राव्यो राजन्यः क्षत्रियैस्तथा ।
माहात्म्यं देवदेवस्य विष्णोरमिततेजसः ।
अर्हस्त्वमसि कल्याण वार्ष्णेयं शृणु यत्परम् ॥ १०
कालचक्रमनाद्यन्तं भावाभावस्वलक्षणम् ।
त्रैलोक्यं सर्वभूतेषु चक्रवत्परिवर्तते ॥ ११
यत्तदक्षरमव्यक्तममृतं ब्रह्म शाश्वतम् ।
वदन्ति पुरुषव्याघ्रं केशवं पुरुषर्षभम् ॥ १२
पितॄन्देवानृषींश्चैव तथा वै यक्षदानवान् ।
नागासुरमनुष्यांश्च सृजते परमोऽव्ययः ॥ १३
तथैव वेदशास्त्राणि लोकधर्मांश्च शाश्वतान् ।
प्रलये प्रकृतिं प्राप्य युगादौ सृजते प्रभुः ॥ १४
यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा ब्रह्माहरात्रिषु ॥ १५
अथ यद्यद्यदा भावि कालयोगाद्युगादिषु ।
तत्तदुत्पद्यते ज्ञानं लोकयात्राविधानजम् ॥ १६
युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ॥ १७
वेदविद्वेद भगवान्वेदाङ्गानि बृहस्पतिः ।
भार्गवो नीतिशास्त्रं च जगाद जगतो हितम् ॥१८
गान्धर्वं नारदो वेदं भरद्वाजो धनुर्ग्रहम् ।
देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितम् ॥ १९
न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः ।
हेत्वागमसदाचारैर्यदुक्तं तदुपास्यते ॥ २०
अनाद्यं यत्परं ब्रह्म न देवा नर्षयो विदुः ।
एकस्तद्वेद भगवान्धाता नारायणः प्रभुः ॥ २१
नारायणादृषिगणास्तथा मुख्याः सुरासुराः ।
राजर्षयः पुराणाश्च परमं दुःखभेषजम् ॥ २२
पुरुषाधिष्ठितं भावं प्रकृतिः सूयते तदा ।
हेतुयुक्तमतः सर्वं जगत्संपरिवर्तते ॥ २३
दीपादन्ये यथा दीपाः प्रवर्तन्ते सहस्रशः ।
प्रकृतिः सृजते तद्वदानन्त्यान्नापचीयते ॥ २४
अव्यक्तकर्मजा बुद्धिरहंकारं प्रसूयते ।
आकाशं चाप्यहंकाराद्वायुराकाशसंभवः ॥ २५
वायोस्तेजस्ततश्चापस्त्वद्भ्यो हि वसुधोद्गता ।
मूलप्रकृतयोऽष्टौ ता जगदेतास्ववस्थितम् ॥ २६
ज्ञानेन्द्रियाण्यतः पञ्च पञ्च कर्मेन्द्रियाण्यपि ।
विषयाः पञ्च चैकं च विकारे षोडशं मनः ॥ २७
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं पञ्चेन्द्रियाण्यपि ।
पादौ पायुरुपस्थश्च हस्तौ वाक्कर्मणामपि ॥ २८
शब्दः स्पर्शोऽथ रूपं च रसो गन्धस्तथैव च ।
विज्ञेयं व्यापकं चित्तं तेषु सर्वगतं मनः ॥ २९
रसज्ञाने तु जिह्वेयं व्याहृते वाक्तथैव च ।
इन्द्रियैर्विविधैर्युक्तं सर्वं व्यस्तं मनस्तथा ॥ ३०
विद्यात्तु षोडशैतानि दैवतानि विभागशः ।
देहेषु ज्ञानकर्तारमुपासीनमुपासते ॥ ३१
तद्वत्सोमगुणा जिह्वा गन्धस्तु पृथिवीगुणः ।
श्रोत्रं शब्दगुणं चैव चक्षुरग्नेर्गुणस्तथा ।
स्पर्शं वायुगुणं विद्यात्सर्वभूतेषु सर्वदा ॥ ३२

मनः सत्त्वगुणं प्राहुः सत्त्वमव्यक्तजं तथा ।
सर्वभूतात्मभूतस्थं तस्माद्बुध्येत बुद्धिमान् ॥ ३३
एते भावा जगत्सर्वं वहन्ति सचराचरम् ।
श्रिता विरजसं देवं यमाहुः परमं पदम् ॥ ३४
नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम् ।
व्याप्य शेते महानात्मा तस्मात्पुरुष उच्यते ॥ ३५
अजरः सोऽमरश्चैव व्यक्ताव्यक्तोपदेशवान् ।
व्यापकः सगुणः सूक्ष्मः सर्वभूतगुणाश्रयः ॥ ३६
यथा दीपः प्रकाशात्मा ह्रस्वो वा यदि वा महान् ।
ज्ञानात्मानं तथा विद्यात्पुरुषं सर्वजन्तुषु ॥ ३७
सोऽत्र वेदयते वेद्यं स शृणोति स पश्यति ।
कारणं तस्य देहोऽयं स कर्ता सर्वकर्मणाम् ॥ ३८
अग्निर्दारुगतो यद्वद्भिन्ने दारौ न दृश्यते ।
तथैवात्मा शरीरस्थो योगेनैवात्र दृश्यते ॥ ३९
नदीष्वापो यथा युक्ता यथा सूर्ये मरीचयः ।
संतन्वाना यथा यान्ति तथा देहाः शरीरिणाम् ॥
स्वप्नयोगे यथैवात्मा पञ्चेन्द्रियसमागतः ।
देहमुत्सृज्य वै याति तथैवात्रोपलभ्यते ॥ ४१
कर्मणा व्याप्यते पूर्वं कर्मणा चोपपद्यते ।
कर्मणा नीयतेऽन्यत्र स्वकृतेन बलीयसा ॥ ४२
स तु देहाद्यथा देहं त्यक्त्वान्यं प्रतिपद्यते ।
तथा तं संप्रवक्ष्यामि भूतग्रामं स्वकर्मजम् ॥ ४३

इति श्रीमहाभारते शान्तिपर्वणि
त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥

२०४

गुरुरुवाच ।

चतुर्विधानि भूतानि स्थावराणि चराणि च ।
अव्यक्तप्रभवान्याहुरव्यक्तनिधनानि च ।
अव्यक्तनिधनं विद्यादव्यक्तात्मात्मकं मनः ॥ १
यथाश्वत्थकणीकायामन्तर्भूतो महाद्रुमः ।
निष्पन्नो दृश्यते व्यक्तमव्यक्तात्संभवस्तथा ॥ २
अभिद्रवत्ययस्कान्तमयो निश्चेतनावुभौ ।
स्वभावहेतुजा भावा यद्वदन्यदपीदृशम् ॥ ३
तद्वदव्यक्तजा भावाः कर्तुः कारणलक्षणाः ।
अचेतनाश्चेतयितुः कारणादभिसंहिताः ॥ ४
न भूः खं द्यौर्न भूतानि नर्षयो न सुरासुराः ।
नान्यदासीदृते जीवमासेदुर्न तु संहितम् ॥ ५
सर्वनीत्या सर्वगतं मनोहेतु सलक्षणम् ।
अज्ञानकर्म निर्दिष्टमेतत्कारणलक्षणम् ॥ ६
तत्कारणैर्हि संयुक्तं कार्यसंग्रहकारकम् ।
येनैतद्वर्तते चक्रमनादिनिधनं महत् ॥ ७
अव्यक्तनाभं व्यक्तारं विकारपरिमण्डलम् ।
क्षेत्रज्ञाधिष्ठितं चक्रं स्निग्धाक्षं वर्तते ध्रुवम् ॥ ८
स्निग्धत्वात्तिलवत्सर्वं चक्रेऽस्मिन्पीड्यते जगत् ।
तिलपीडैरिवाक्रम्य भोगैरज्ञानसंभवैः ॥ ९
कर्म तत्कुरुते तर्षादहंकारपरिग्रहम् ।
कार्यकारणसंयोगे स हेतुरुपपादितः ॥ १०
नात्येति कारणं कार्यं न कार्यं कारणं तथा ।
कार्याणां तूपकरणे कालो भवति हेतुमान् ॥ ११
हेतुयुक्ताः प्रकृतयो विकाराश्च परस्परम् ।
अन्योन्यमभिवर्तन्ते पुरुषाधिष्ठिताः सदा ॥ १२
सरजस्तामसैर्भावैश्च्युतो हेतुबलान्वितः ।
क्षेत्रज्ञमेवानुयाति पांसुर्वातेरितो यथा ।
न च तैः स्पृश्यते भावो न ते तेन महात्मना ॥ १३
सरजस्कोऽरजस्कश्च स वै वायुर्यथा भवेत् ।
तथैतदन्तरं विद्यात्क्षेत्रक्षेत्रज्ञयोर्बुधः ।
अभ्यासात्स तथा युक्तो न गच्छेत्प्रकृतिं पुनः ॥ १४
संदेहमेतमुत्पन्नमच्छिनद्भगवानृषिः ।
तथा वार्तां समीक्षेत कृतलक्षणसंमिताम् ॥ १५

बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः ।
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनः ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

२०५

गुरुरुवाच ।

प्रवृत्तिलक्षणो धर्मो यथायमुपपद्यते ।
तेषां विज्ञाननिष्ठानामन्यत्तत्त्वं न रोचते ॥ १
दुर्लभा वेदविद्वांसो वेदोक्तेषु व्यवस्थिताः ।
प्रयोजनमतस्त्वत्र मार्गमिच्छन्ति संस्तुतम् ॥ २
सद्भिराचरितत्वात्तु वृत्तमेतदगर्हितम् ।
इयं सा बुद्धिरन्येयं यया याति परां गतिम् ॥ ३
शरीरवानुपादत्ते मोहात्सर्वपरिग्रहान् ।
कामक्रोधादिभिर्भावैर्युक्तो राजसतामसैः ॥ ४
नाशुद्धमाचरेत्तस्मादभीप्सन्देहयापनम् ।
कर्मणो विवरं कुर्वन्न लोकानाप्नुयाच्छुभान् ॥ ५
लोहयुक्तं यथा हेम विपक्वं न विराजते ।
तथापक्वकषायाख्यं विज्ञानं न प्रकाशते ॥ ६
यश्चाधर्मं चरेन्मोहात्कामलोभावनु प्लवन् ।
धर्म्यं पन्थानमाक्रम्य सानुबन्धो विनश्यति ॥ ७
शब्दादीन्विषयांस्तस्मादसंरागादनुप्लवेत् ।
क्रोधहर्षौ विषादश्च जायन्ते हि परस्परम् ॥ ८
पञ्चभूतात्मके देहे सत्त्वराजसतामसे ।
कमभिष्टुवते चायं कं वा क्रोशति किं वदेत् ॥ ९
स्पर्शरूपरसाद्येषु सङ्गं गच्छन्ति बालिशाः ।
नावगच्छन्त्यविज्ञानादात्मजं पार्थिवं गुणम् ॥ १०
मृन्मयं शरणं यद्वन्मृदैव परिलिप्यते ।
पार्थिवोऽयं तथा देहो मृद्विकारैर्विलिप्यते ॥ ११
मधु तैलं पयः सर्पिर्मांसानि लवणं गुडः ।
धान्यानि फलमूलानि मृद्विकाराः सहाम्भसा ॥१२
यद्वत्कान्तारमातिष्ठन्नौत्सुक्यं समनुव्रजेत् ।
श्रमादाहारमादद्यादस्वाद्वपि हि यापनम् ॥ १३
तद्वत्संसारकान्तारमातिष्ठञ्श्रमतत्परः ।
यात्रार्थमद्यादाहारं व्याधितो भेषजं यथा ॥ १४
सत्यशौचार्जवत्यागैर्यशसा विक्रमेण च ।
क्षान्त्या धृत्या च बुद्ध्या च मनसा तपसैव च ॥१५
भावान्सर्वान्यथावृत्तान्संवसेत यथाक्रमम् ।
शान्तिमिच्छन्नदीनात्मा संयच्छेदिन्द्रियाणि च ॥
सत्त्वेन रजसा चैव तमसा चैव मोहिताः ।
चक्रवत्परिवर्तन्ते ह्यज्ञानाज्जन्तवो भृशम् ॥ १७
तस्मात्सम्यक्परीक्षेत दोषानज्ञानसंभवान् ।
अज्ञानप्रभवं नित्यमहंकारं परित्यजेत् ॥ १८
महाभूतानीन्द्रियाणि गुणाः सत्त्वं रजस्तमः ।
त्रैलोक्यं सेश्वरं सर्वमहंकारे प्रतिष्ठितम् ॥ १९
यथेह नियतं कालो दर्शयत्यार्तवान्गुणान् ।
तद्वद्भूतेष्वहंकारं विद्याद्भूतप्रवर्तकम् ॥ २०
संमोहकं तमो विद्यात्कृष्णमज्ञानसंभवम् ।
प्रीतिदुःखनिबद्धांश्च समस्तांस्त्रीनथो गुणान् ।
सत्त्वस्य रजसश्चैव तमसश्च निबोध तान् ॥ २१
प्रमोहो हर्षजः प्रीतिरसंदेहो धृतिः स्मृतिः ।
एतान्सत्त्वगुणान्विद्यादिमान्राजसतामसान् ॥ २२
कामक्रोधौ प्रमादश्च लोभमोहौ भयं क्लमः ।
विषादशोकावरतिर्मानदर्पावनार्यता ॥ २३
दोषाणामेवमादीनां परीक्ष्य गुरुलाघवम् ।
विमृशेदात्मसंस्थानामेकैकमनुसंततम् ॥ २४

शिष्य उवाच ।

के दोषा मनसा त्यक्ताः के बुद्ध्या शिथिलीकृताः ।
के पुनः पुनरायान्ति के मोहादफला इव ॥ २५
केषां बलाबलं बुद्ध्या हेतुभिर्विमृशेद्बुधः ।
एतत्सर्वं समाचक्ष्व यथा विद्यामहं प्रभो ॥ २६

गुरुरुवाच ।

दोषैर्मूलादवच्छिन्नैर्विशुद्धात्मा विमुच्यते ।
विनाशयति संभूतमयस्मयमयो यथा ।
तथाकृतात्मा सहजैर्दोषैर्नश्यति राजसैः ॥ २७
राजसं तामसं चैव शुद्धात्माकर्मसंभवम् ।
तत्सर्वं देहिनां बीजं सर्वमात्मवतः समम् ॥ २८
तस्मादात्मवता वर्ज्यं रजश्च तम एव च ।
रजस्तमोभ्यां निर्मुक्तं सत्त्वं निर्मलतामियात् ॥२९
अथ वा मन्त्रवद्ब्रूयुर्मांसादानां यजुष्कृतम् ।
हेतुः स एवानादाने शुद्धधर्मानुपालने ॥ ३०
रजसा धर्मयुक्तानि *कार्याण्यपि समाप्नुयात्* ।
अर्थयुक्तानि चात्यर्थं कामान्सर्वांश्च सेवते ॥ ३१
तमसा लोभयुक्तानि क्रोधजानि च सेवते ।
हिंसाविहाराभिरतस्तन्द्रीनिद्रासमन्वितः ॥ ३२
सत्त्वस्थः सात्त्विकान्भावाञ्शुद्धान्पश्यति संश्रितः ।
स देही विमलः श्रीमाञ्शुद्धो विद्यासमन्वितः ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥

२०६

गुरुरुवाच ।

रजसा साध्यते मोहस्तमसा च नरर्षभ ।
क्रोधलोभौ भयं दर्प एतेषां साधनाच्छुचिः ॥ १
परमं परमात्मानं देवमक्षयमव्ययम् ।
विष्णुमव्यक्तसंस्थानं विशन्ते देवसत्तमम् ॥ २
तस्य मायाविदग्धाङ्गा ज्ञानभ्रष्टा निराशिषः ।
मानवा ज्ञानसंमोहात्ततः कामं प्रयान्ति वै ॥ ३
कामात्क्रोधमवाप्याथ लोभमोहौ च मानवाः ।
मानदर्पादहंकारमहंकारात्ततः क्रियाः ॥ ४
क्रियाभिः स्नेहसंबन्धः स्नेहाच्छोकमनन्तरम् ।
सुखदुःखसमारम्भाजन्माजन्मकृतक्षणाः ॥ ५
जन्मतो गर्भवासं तु शुक्रशोणितसंभवम् ।
पुरीषमूत्रविक्लेदशोणितप्रभवाविलम् ॥ ६
तृष्णाभिभूतस्तैर्बद्धस्तानेवाभिपरिप्लवन् ।
संसारतन्त्रवाहिन्यस्तत्र बुध्येत योषितः ॥ ७
प्रकृत्या क्षेत्रभूतास्ता नराः क्षेत्रज्ञलक्षणाः ।
तस्मादेता विशेषेण नरोऽतीयुर्विपश्चितः ॥ ८
कृत्या ह्येता घोररूपा मोहयन्त्यविचक्षणान् ।
रजस्यन्तर्हिता मूर्तिरिन्द्रियाणां सनातनी ॥ ९
तस्मात्तर्षात्मकाद्रागाद्बीजाज्जायन्ति जन्तवः ।
स्वदेहजानस्वसंज्ञान्यद्वदङ्गात्कृमींस्त्यजेत् ।
स्वसंज्ञानस्वजांस्तद्वत्सुतसंज्ञान्कृमींस्त्यजेत् ॥ १०
शुक्रतो रसतश्चैव स्नेहाज्जायन्ति जन्तवः ।
स्वभावात्कर्मयोगाद्वा तानुपेक्षेत बुद्धिमान् ॥ ११
रजस्तमसि पर्यस्तं सत्त्वं तमसि संस्थितम् ।
ज्ञानाधिष्ठानमज्ञानं बुद्ध्यहंकारलक्षणम् ॥ १२
तद्बीजं देहिनामाहुस्तद्बीजं जीवसंज्ञितम् ।
कर्मणा कालयुक्तेन संसारपरिवर्तकम् ॥ १३
रमत्ययं यथा स्वप्ने मनसा देहवानिव ।
कर्मगर्भैर्गुणैर्देही गर्भे तदुपपद्यते ॥ १४
कर्मणा बीजभूतेन चोद्यते यद्यदिन्द्रियम् ।
जायते तदहंकाराद्रागयुक्तेन चेतसा ॥ १५
शब्दरागाच्छ्रोत्रमस्य जायते भावितात्मनः ।
रूपरागात्तथा चक्षुर्घ्राणं गन्धचिकीर्षया ॥ १६
स्पर्शनेभ्यस्तथा वायुः प्राणापानव्यपाश्रयः ।
व्यानोदानौ समानश्च पञ्चधा देहयापना ॥ १७
संजातैर्जायते गात्रैः कर्मजैर्ब्रह्मणा वृतः ।
दुःखाद्यन्तैर्दुःखमध्यैर्नरः शारीरमानसैः ॥ १८
दुःखं विद्यादुपादानादभिमानाच्च वर्धते ।
त्यागात्तेभ्यो निरोधः स्यान्निरोधज्ञो विमुच्यते ॥ १९
इन्द्रियाणां रजस्येव प्रभवप्रलयावुभौ ।

परीक्ष्य संचरेद्विद्वान्यथावच्छास्त्रचक्षुषा ॥ २०
ज्ञानेन्द्रियाणीन्द्रियार्थान्नोपसर्पन्त्यतर्षुलम् ।
ज्ञातैश्च कारणैर्देही न देहं पुनरर्हति ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

२०७

गुरुरुवाच ।

अत्रोपायं प्रवक्ष्यामि यथावच्छास्त्रचक्षुषा ।
तद्विज्ञानाच्चरन्प्राज्ञः प्राप्नुयात्परमां गतिम् ॥ १
सर्वेषामेव भूतानां पुरुषः श्रेष्ठ उच्यते ।
पुरुषेभ्यो द्विजानाहुर्द्विजेभ्यो मन्त्रवादिनः ॥ २
सर्वभूतविशिष्टास्ते सर्वज्ञाः सर्वदर्शिनः ।
ब्राह्मणा वेदतत्त्वज्ञास्तत्त्वार्थगतिनिश्चयाः ॥ ३
नेत्रहीनो यथा ह्येकः कृच्छ्राणि लभतेऽध्वनि ।
ज्ञानहीनस्तथा लोके तस्माज्ज्ञानविदोऽधिकाः ॥ ४
तांस्तानुपासते धर्मान्धर्मकामा यथागमम् ।
न त्वेषामर्थसामान्यमन्तरेण गुणानिमान् ॥ ५
वाग्देहमनसां शौचं क्षमा सत्यं धृतिः स्मृतिः ।
सर्वधर्मेषु धर्मज्ञा ज्ञापयन्ति गुणानिमान् ॥ ६
यदिदं ब्रह्मणो रूपं ब्रह्मचर्यमिति स्मृतम् ।
परं तत्सर्वभूतेभ्यस्तेन यान्ति परां गतिम् ॥ ७
लिङ्गसंयोगहीनं यच्छरीरस्पर्शवर्जितम् ।
श्रोत्रेण श्रवणं चैव चक्षुषा चैव दर्शनम् ॥ ८
जिह्वया रसनं यच्च तदेव परिवर्जितम् ।
बुद्ध्या च व्यवसायेन ब्रह्मचर्यमकल्मषम् ॥ ९
सम्यग्वृत्तिर्ब्रह्मलोकं प्राप्नुयान्मध्यमः सुरान् ।
द्विजाग्र्यो जायते विद्वान्कन्यसीं वृत्तिमास्थितः ॥ १०
सुदुष्करं ब्रह्मचर्यमुपायं तत्र मे शृणु ।
संप्रवृत्तमुदीर्णं च निगृह्णीयाद्द्विजो मनः ॥ ११
योषितां न कथाः श्राव्या न निरीक्ष्या निरम्बराः ।
कदाचिद्दर्शनादासां दुर्बलानाविशेद्रजः ॥ १२
रागोत्पत्तौ चरेत्कृच्छ्रमह्नस्त्रिः प्रविशेदपः ।
मग्नः स्वप्ने च मनसा त्रिर्जपेदघमर्षणम् ॥ १३
पाप्मानं निर्दहेदेवमन्तर्भूतं रजोमयम् ।
ज्ञानयुक्तेन मनसा संततेन विचक्षणः ॥ १४
कुणपामेध्यसंयुक्तं यद्वदच्छिद्रबन्धनम् ।
तद्वद्देहगतं विद्यादात्मानं देहबन्धनम् ॥ १५
वातपित्तकफान्रक्तं त्वङ्मांसं स्नायुमस्थि च ।
मज्जां चैव सिराजालैस्तर्पयन्ति रसा नृणाम् ॥ १६
दश विद्याद्धमन्योऽत्र पञ्चेन्द्रियगुणावहाः ।
याभिः सूक्ष्माः प्रतायन्ते धमन्योऽन्याः सहस्रशः ॥
एवमेताः सिरानद्यो रसोदा देहसागरम् ।
तर्पयन्ति यथाकालमापगा इव सागरम् ॥ १८
मध्ये च हृदयस्यैका सिरा त्वत्र मनोवहा ।
शुक्रं संकल्पजं नृणां सर्वगात्रैर्विमुञ्चति ॥ १९
सर्वगात्रप्रतायिन्यस्तस्या ह्यनुगताः सिराः ।
नेत्रयोः प्रतिपद्यन्ते वहन्त्यस्तैजसं गुणम् ॥ २०
पयस्यन्तर्हितं सर्पिर्यद्वन्निर्मथ्यते खजैः ।
शुक्रं निर्मथ्यते तद्वद्देहसंकल्पजैः खजैः ॥ २१
स्वप्नेऽप्येवं यथाभ्येति मनःसंकल्पजं रजः ।
शुक्रमस्पर्शजं देहात्सृजन्त्यस्य मनोवहा ॥ २२
महर्षिर्भगवानत्रिर्वेद तच्छुक्रसंभवम् ।
त्रिबीजमिन्द्रदैवत्यं तस्मादिन्द्रियमुच्यते ॥ २३
ये वै शुक्रगतिं विद्युर्भूतसंकरकारिकाम् ।
विरागा दग्धदोषास्ते नाप्नुयुर्देहसंभवम् ॥ २४
गुणानां साम्यमागम्य मनसैव मनोवहम् ।
देहकर्म नुदन्प्राणानन्तकाले विमुच्यते ॥ २५
भविता मनसो ज्ञानं मन एव प्रतायते ।
ज्योतिष्मद्विरजो दिव्यमत्र सिद्धं महात्मनाम् ॥ २६
तस्मात्तद्विघाताय कर्म कुर्यादकल्मषम् ।

रजस्तमश्च हित्वेह न तिर्यग्गतिमाप्नुयात् ॥ २७
कृच्छ्राधिगतं ज्ञानं जरादुर्बलतां गतम् ।
परिपक्वबुद्धिः कालेन आदत्ते मानसं बलम् ॥ २८
सुदुर्गमिव पन्थानमतीत्य गुणबन्धनम् ।
यदा पश्येत्तदा दोषानतीत्यामृतमश्नुते ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

२०८

गुरुरुवाच ।

दुरन्तेष्विन्द्रियार्थेषु सक्ताः सीदन्ति जन्तवः ।
ये त्वसक्ता महात्मानस्ते यान्ति परमां गतिम् ॥ १
जन्ममृत्युजरादुःखैर्व्याधिभिर्मनसः क्लमैः ।
दृष्ट्वेमं संततं लोकं घटेन्मोक्षाय बुद्धिमान् ॥ २
वाङ्मनोभ्यां शरीरेण शुचिः स्यादनहंकृतः ।
प्रशान्तो ज्ञानवान्भिक्षुर्निरपेक्षश्चरेत्सुखम् ॥ ३
अथ वा मनसः सङ्गं पश्येद्भूतानुकम्पया ।
अत्राप्युपेक्षां कुर्वीत ज्ञात्वा कर्मफलं जगत् ॥ ४
यत्कृतं प्राक्शुभं कर्म पापं वा तदुपाश्नुते ।
तस्माच्छुभानि कर्माणि कुर्याद्वाग्बुद्धिकर्मभिः ॥ ५
अहिंसा सत्यवचनं सर्वभूतेषु चार्जवम् ।
क्षमा चैवाप्रमादश्च यस्यैते स सुखी भवेत् ॥ ६
यश्चैनं परमं धर्मं सर्वभूतसुखावहम् ।
दुःखान्निःसरणं वेद स तत्त्वज्ञः सुखी भवेत् ॥ ७
तस्मात्समाहितं बुद्ध्या मनो भूतेषु धारयेत् ।
नापध्यायेन्न स्पृहयेन्नाबद्धं चिन्तयेदसत् ॥ ८
अवाग्योगप्रयोगेण मनोज्ञं संप्रवर्तते ।
विवक्षता वा सद्वाक्यं धर्मं सूक्ष्ममवेक्षता ।
सत्यां वाचमहिंस्रां च वदेदनपवादिनीम् ॥ ९
कल्कापेतामपरुषामनृशंसामपैशुनाम् ।
ईदृगल्पं च वक्तव्यमविक्षिप्तेन चेतसा ॥ १०
वाक्प्रबुद्धो हि संरागाद्विरागाद्व्याहरेद्यदि ।
बुद्ध्या ह्यनिगृहीतेन मनसा कर्म तामसम् ।
रजोभूतैर्हि करणैः कर्मणा प्रतिपद्यते ॥ ११
स दुःखं प्राप्य लोकेऽस्मिन्नरकायोपपद्यते ।
तस्मान्मनोवाक्शरीरैराचरेद्धैर्यमात्मनः ॥ १२
प्रकीर्णमेषभारो हि यद्वद्धार्येत दस्युभिः ।
प्रतिलोमां दिशं बुद्ध्वा संसारमबुधास्तथा ॥ १३
तानेव च यथा दस्यून्क्षिप्त्वा गच्छेच्छिवां दिशम् ।
तथा रजस्तमःकर्माण्युत्सृज्य प्राप्नुयात्सुखम् ॥ १४
निःसंदिग्धमनीहो वै मुक्तः सर्वपरिग्रहैः ।
विविक्तचारी लघ्वाशी तपस्वी नियतेन्द्रियः ॥ १५
ज्ञानदग्धपरिक्लेशः प्रयोगरतिरात्मवान् ।
निष्प्रचारेण मनसा परं तदधिगच्छति ॥ १६
धृतिमानात्मवान्बुद्धिं निगृह्णीयादसंशयम् ।
मनो बुद्ध्या निगृह्णीयाद्विषयान्मनसात्मनः ॥ १७
निगृहीतेन्द्रियस्यास्य कुर्वाणस्य मनो वशे ।
देवतास्ताः प्रकाशन्ते हृष्टा यान्ति तमीश्वरम् ॥ १८
ताभिः संसक्तमनसो ब्रह्मवत्संप्रकाशते ।
एतैश्चापगतैः सर्वैर्ब्रह्मभूयाय कल्पते ॥ १९
अथ वा न प्रवर्तेत योगतन्त्रैरुपक्रमेत् ।
येन तन्त्रमयं तन्त्रं वृत्तिः स्यात्तत्तदाचरेत् ॥ २०
कणपिण्याककुल्माषशाकयावकसक्तवः ।
तथा मूलफलं भैक्षं पर्यायेणोपयोजयेत् ॥ २१
आहारं नियतं चैव देशे काले च सात्त्विकम् ।
तत्परीक्ष्यानुवर्तेत यत्प्रवृत्त्यनुवर्तकम् ॥ २२
प्रवृत्तं नोपरुन्धेत शनैरग्निमिवेन्धयेत् ।
ज्ञानेन्धितं ततो ज्ञानमर्कवत्संप्रकाशते ॥ २३
ज्ञानाधिष्ठानमज्ञानं त्रीँल्लोकानधितिष्ठति ।
विज्ञानानुगतं ज्ञानमज्ञानादपकृष्यते ॥ २४
पृथक्त्वात्संप्रयोगाच्च नासूयुर्वेद शाश्वतम् ।

स तयोरपवर्गज्ञो वीतरागो विमुच्यते ॥ २५
वयोतीतो जरामृत्यू जित्वा ब्रह्म सनातनम् ।
अमृतं तदवाप्नोति यत्तदक्षरमव्ययम् ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥

२०९

गुरुरुवाच ।

निष्कल्मषं ब्रह्मचर्यमिच्छता चरितुं सदा ।
निद्रा सर्वात्मना त्याज्या स्वप्नदोषानवेक्षता ॥ १
स्वप्ने हि रजसा देही तमसा चाभिभूयते ।
देहान्तरमिवापन्नश्चरत्यपगतस्मृतिः ॥ २
ज्ञानाभ्यासाज्जागरतो जिज्ञासार्थमनन्तरम् ।
विज्ञानाभिनिवेशात्तु जागरत्यनिशं सदा ॥ ३
अत्राह को न्वयं भावः स्वप्ने विषयवानिव ।
प्रलीनैरिन्द्रियैर्देही वर्तते देहवानिव ॥ ४
अत्रोच्यते यथा ह्येतद्वेद योगेश्वरो हरिः ।
तथैतदुपपन्नार्थं वर्णयन्ति महर्षयः ॥ ५
इन्द्रियाणां श्रमात्स्वप्नमाहुः सर्वगतं बुधाः ।
मनसस्तु प्रलीनत्वात्तत्तदाहुर्निदर्शनम् ॥ ६
कार्यव्यासक्तमनसः संकल्पो जाग्रतो ह्यपि ।
यद्वन्मनोरथैश्वर्यं स्वप्ने तद्वन्मनोगतम् ॥ ७
संसाराणामसंख्यानां कामात्मा तदवाप्नुयात् ।
मनस्यन्तर्हितं सर्वं वेद सोत्तमपूरुषः ॥ ८
गुणानामपि यद्यत्तत्कर्म जानात्युपस्थितम् ।
तत्तच्छंसन्ति भूतानि मनो यद्भावितं यथा ॥ ९
ततस्तमुपवर्तन्ते गुणा राजसतामसाः ।
सात्त्विको वा यथायोगमानन्तर्यफलोदयः ॥ १०
ततः पश्यत्यसंबद्धान्वातपित्तकफोत्तरान् ।
रजस्तमोभवैर्भावैस्तदप्याहुर्दुरन्वयम् ॥ ११
प्रसन्नैरिन्द्रियैर्यद्यत्संकल्पयति मानसम् ।
तत्तत्स्वप्नेऽप्युपरते मनोदृष्टिर्निरीक्षते ॥ १२
व्यापकं सर्वभूतेषु वर्ततेऽप्रतिघं मनः ।
मनस्यन्तर्हितं द्वारं देहमास्थाय मानसम् ॥ १३
यत्तत्सदसदव्यक्तं स्वपित्यस्मिन्निदर्शनम् ।
सर्वभूतात्मभूतस्थं तदध्यात्मगुणं विदुः ॥ १४
लिप्सेत मनसा यश्च संकल्पादैश्वरं गुणम् ।
आत्मप्रभावात्तं विद्यात्सर्वा ह्यात्मनि देवताः ॥१५
एवं हि तपसा युक्तमर्कवत्तमसः परम् ।
त्रैलोक्यप्रकृतिर्देही तपसा तं महेश्वरम् ॥ १६
तपो ह्यधिष्ठितं देवैस्तपोघ्नमसुरैस्तमः ।
एतद्देवासुरैर्गुप्तं तदाहुर्ज्ञानलक्षणम् ॥ १७
सत्त्वं रजस्तमश्चेति देवासुरगुणान्विदुः ।
सत्त्वं देवगुणं विद्यादितरावासुरौ गुणौ ॥ १८
ब्रह्म तत्परमं वेद्यममृतं ज्योतिरक्षरम् ।
ये विदुर्भावितात्मानस्ते यान्ति परमां गतिम् ॥१९
हेतुमच्छक्यमाख्यातुमेतावज्ज्ञानचक्षुषा ।
प्रत्याहारेण वा शक्यमव्यक्तं ब्रह्म वेदितुम् ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

२१०

गुरुरुवाच ।

न स वेद परं धर्मं यो न वेद चतुष्टयम् ।
व्यक्ताव्यक्ते च यत्तत्त्वं संप्राप्तं परमर्षिणा ॥ १
व्यक्तं मृत्युमुखं विद्यादव्यक्तममृतं पदम् ।
प्रवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत् ॥ २
अत्रैवावस्थितं सर्वं त्रैलोक्यं सचराचरम् ।
निवृत्तिलक्षणं धर्ममव्यक्तं ब्रह्म शाश्वतम् ॥ ३
प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत् ।
प्रवृत्तिः पुनरावृत्तिर्निवृत्तिः परमा गतिः ॥ ४
तां गतिं परमामेति निवृत्तिपरमो मुनिः ।

ज्ञानतत्त्वपरो नित्यं शुभाशुभनिदर्शकः ॥ ५
तदेवमेतौ विज्ञेयावव्यक्तपुरुषावुभौ ।
अव्यक्तपुरुषाभ्यां तु यत्स्यादन्यन्महत्तरम् ॥ ६
तं विशेषमवेक्षेत विशेषेण विचक्षणः ।
अनाद्यन्तावुभावेतावलिङ्गौ चाप्युभावपि ॥ ७
उभौ नित्यौ सूक्ष्मतरौ महद्भ्यश्च महत्तरौ ।
सामान्यमेतदुभयोरेवं ह्यन्यद्विशेषणम् ॥ ८
प्रकृत्या सर्गधर्मिण्या तथा त्रिविधसत्त्वया ।
विपरीतमतो विद्यात्क्षेत्रज्ञस्य च लक्षणम् ॥ ९
प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितम् ।
अग्राह्यौ पुरुषावेतावलिङ्गत्वादसंहितौ ॥ १०
संयोगलक्षणोत्पत्तिः कर्मजा गृह्यते यया ।
करणैः कर्मनिर्वृत्तैः कर्ता यद्यद्विचेष्टते ।
कीर्त्यते शब्दसंज्ञाभिः कोऽहमेषोऽप्यसाविति ॥ ११
उष्णीषवान्यथा वस्त्रैस्त्रिभिर्भवति संवृतः ।
संवृतोऽयं तथा देही सत्त्वराजसतामसैः ॥ १२
तस्माच्चतुष्टयं वेद्यमेतैर्हेतुभिराचितम् ।
यथासंज्ञो ह्ययं सम्यगन्तकाले न मुह्यति ॥ १३
श्रियं दिव्यामभिप्रेप्सुर्ब्रह्म वाङ्मनसा शुचिः ।
शारीरैर्नियमैरुग्रैश्चरेन्निष्कल्मषं तपः ॥ १४
त्रैलोक्यं तपसा व्याप्तमन्तर्भूतेन भास्वता ।
सूर्यश्च चन्द्रमाश्चैव भासतस्तपसा दिवि ॥ १५
प्रतापस्तपसो ज्ञानं लोके संशब्दितं तपः ।
रजस्तमोघ्नं यत्कर्म तपसस्तत्स्वलक्षणम् ॥ १६
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ।
वाङ्मनोनियमः साम्यं मानसं तप उच्यते ॥ १७
विधिज्ञेभ्यो द्विजातिभ्यो ग्राह्यमन्नं विशिष्यते ।
आहारनियमेनास्य पाप्मा नश्यति राजसः ॥ १८
वैमनस्यं च विषये यान्त्यस्य करणानि च ।
तस्मात्तन्मात्रमादद्याद्यावदत्र प्रयोजनम् ॥ १९
अन्तकाले वयोत्कर्षाच्छनैः कुर्यादनातुरः ।
एवं युक्तेन मनसा ज्ञानं तदुपपद्यते ॥ २०
रजसा चाप्ययं देही देहवाञ्शब्दवच्चरेत् ।
कार्यैरव्याहतमतिर्वैराग्यात्प्रकृतौ स्थितः ।
आ देहादप्रमादाच्च देहान्ताद्विप्रमुच्यते ॥ २१
हेतुयुक्तः सदोत्सर्गो भूतानां प्रलयस्तथा ।
परप्रत्ययसर्गे तु नियतं नातिवर्तते ॥ २२
भवान्तप्रभवप्रज्ञा आसते ये विपर्ययम् ।
धृत्या देहान्धारयन्तो बुद्धिसंक्षिप्तमानसाः ।
स्थानेभ्यो ध्वंसमानाश्च सूक्ष्मत्वात्तानुपासते ॥ २३
यथागमं च तत्सर्वं बुद्ध्या तन्नैव बुध्यते ।
देहान्तं कश्चिदन्वास्ते भावितात्मा निराश्रयः ।
युक्तो धारणया कश्चित्सत्तां केचिदुपासते ॥ २४
अभ्यस्यन्ति परं देवं विद्युत्संशब्दिताक्षरम् ।
अन्तकाले ह्युपासन्नास्तपसा दग्धकिल्बिषाः ॥ २५
सर्व एते महात्मानो गच्छन्ति परमां गतिम् ।
सूक्ष्मं विशेषणं तेषामवेक्षेच्छास्त्रचक्षुषा ॥ २६
देहं तु परमं विद्याद्विमुक्तमपरिग्रहम् ।
अन्तरिक्षादन्यतरं धारणासक्तमानसम् ॥ २७
मर्त्यलोकाद्विमुच्यन्ते विद्यासंयुक्तमानसाः ।
ब्रह्मभूता विरजसस्ततो यान्ति परां गतिम् ॥ २८
कषायवर्जितं ज्ञानं येषामुत्पद्यतेऽचलम् ।
ते यान्ति परमाँल्लोकान्विशुध्यन्तो यथाबलम् ॥ २९
भगवन्तमजं दिव्यं विष्णुमव्यक्तसंज्ञितम् ।
भावेन यान्ति शुद्धा ये ज्ञानतृप्ता निराशिषः ॥ ३०
ज्ञात्वात्मस्थं हरिं चैव निवर्तन्ते न तेऽव्ययाः ।
प्राप्य तत्परमं स्थानं मोदन्तेऽक्षरमव्ययम् ॥ ३१
एतावदेतद्विज्ञानमेतदस्ति च नास्ति च ।
तृष्णाबद्धं जगत्सर्वं चक्रवत्परिवर्तते ॥ ३२
बिसतन्तुर्यथैवायमन्तस्थः सर्वतो बिसे ।

तृष्णातन्तुरनाद्यन्तस्तथा देहगतः सदा ॥ ३३
सूच्या सूत्रं यथा वस्त्रे संसारयति वायकः ।
तद्वत्संसारसूत्रं हि तृष्णासूच्या निबध्यते ॥ ३४
विकारं प्रकृतिं चैव पुरुषं च सनातनम् ।
यो यथावद्विजानाति स वितृष्णो विमुच्यते ॥३५
प्रकाशं भगवानेतदृषिर्नारायणोऽमृतम् ।
भूतानामनुकम्पार्थं जगाद जगतो हितम् ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥

२११

युधिष्ठिर उवाच ।

केन वृत्तेन वृत्तज्ञो जनको मिथिलाधिपः ।
जगाम मोक्षं धर्मज्ञो भोगानुत्सृज्य मानुषान् ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
येन वृत्तेन वृत्तज्ञः स जगाम महत्सुखम् ॥ २
जनको जनदेवस्तु मिथिलायां जनाधिपः ।
और्ध्वदेहिकधर्माणामासीद्युक्तो विचिन्तने ॥ ३
तस्य स्म शतमाचार्या वसन्ति सततं गृहे ।
दर्शयन्तः पृथग्धर्मान्नानापाषण्डवादिनः ॥ ४
स तेषां प्रेत्यभावे च प्रेत्यजातौ विनिश्चये ।
आगमस्थः स भूयिष्ठमात्मतत्त्वे न तुष्यति ॥ ५
तत्र पञ्चशिखो नाम कापिलेयो महामुनिः ।
परिधावन्महीं कृत्स्नां जगाम मिथिलामपि ॥ ६
सर्वसंन्यासधर्माणां तत्त्वज्ञानविनिश्चये ।
सुपर्यवसितार्थश्च निर्द्वंद्वो नष्टसंशयः ॥ ७
ऋषीणामाहुरेकं यं कामादवसितं नृषु ।
शाश्वतं सुखमत्यन्तमन्विच्छन्स सुदुर्लभम् ॥ ८
यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् ।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम् ॥ ९
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् ।
पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम् ॥ १०
तं समासीनमागम्य मण्डलं कापिलं महत् ।
पुरुषावस्थमव्यक्तं परमार्थं निबोधयत् ॥ ११
इष्टिसत्रेण संसिद्धो भूयश्च तपसा मुनिः ।
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः ॥ १२
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ।
आसुरिर्मण्डले तस्मिन्प्रतिपेदे तदव्ययम् ॥ १३
तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः ।
ब्राह्मणी कपिला नाम काचिदासीत्कुटुम्बिनी ॥१४
तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ ।
ततः स कापिलेयत्वं लेभे बुद्धिं च नैष्ठिकीम् ॥१५
एतन्मे भगवानाह कापिलेयाय संभवम् ।
तस्य तत्कापिलेयत्वं सर्ववित्त्वमनुत्तमम् ॥ १६
सामान्यं कपिलो ज्ञात्वा धर्मज्ञानामनुत्तमम् ।
उपेत्य शतमाचार्यान्मोहयामास हेतुभिः ॥ १७
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् ।
उत्सृज्य शतमाचार्यान्पृष्ठतोऽनुजगाम तम् ॥ १८
तस्मै परमकल्याय प्रणताय च धर्मतः ।
अब्रवीत्परमं मोक्षं यत्तत्सांख्यं विधीयते ॥ १९
जातिनिर्वेदमुक्त्वा हि कर्मनिर्वेदमब्रवीत् ।
कर्मनिर्वेदमुक्त्वा च सर्वनिर्वेदमब्रवीत् ॥ २०
यदर्थं कर्मसंसर्गः कर्मणां च फलोदयः ।
तदनाश्वासिकं मोघं विनाशि चलमध्रुवम् ॥ २१
दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके ।
आगमात्परमस्तीति ब्रुवन्नपि पराजितः ॥ २२
अनात्मा ह्यात्मनो मृत्युः क्लेशो मृत्युर्जरामयः ।
आत्मानं मन्यते मोहात्तदसम्यक्परं मतम् ॥ २३
अथ चेदेवमप्यस्ति यल्लोके नोपपद्यते ।
अजरोऽयममृत्युश्च राजासौ मन्यते तथा ॥ २४

अस्ति नास्तीति चाप्येतत्तस्मिन्नसति लक्षणे ।
किमधिष्ठाय तद्ब्रूयाल्लोकयात्राविनिश्चयम् ॥ २५
प्रत्यक्षं ह्येतयोर्मूलं कृतान्तैतिह्ययोरपि ।
प्रत्यक्षो ह्यागमोऽभिन्नः कृतान्तो वा न किंचन ॥
यत्र तत्रानुमानेऽस्ति कृतं भावयतेऽपि वा ।
अन्यो जीवः शरीरस्य नास्तिकानां मते स्मृतः ॥२७
रेतो वटकणीकायां घृतपाकाधिवासनम् ।
जातिस्मृतिरयस्कान्तः सूर्यकान्तोऽम्बुभक्षणम् ॥२८
प्रेत्य भूतात्ययश्चैव देवताभ्युपयाचनम् ।
मृते कर्मनिवृत्तिश्च प्रमाणमिति निश्चयः ॥ २९
न त्वेते हेतवः सन्ति ये केचिन्मूर्तिसंस्थिताः ।
अमर्त्यस्य हि मर्त्येन सामान्यं नोपपद्यते ॥ ३०
अविद्याकर्मचेष्टानां केचिदाहुः पुनर्भवम् ।
कारणं लोभमोहौ तु दोषाणां च निषेवणम् ॥ ३१
अविद्यां क्षेत्रमाहुर्हि कर्म बीजं तथा कृतम् ।
तृष्णासंजननं स्नेह एष तेषां पुनर्भवः ॥ ३२
तस्मिन्व्यूढे च दग्धे च चित्ते मरणधर्मिणि ।
अन्योऽन्याज्जायते देहस्तमाहुः सत्त्वसंक्षयम् ॥३३
यदा स रूपतश्चान्यो जातितः श्रुतितोऽर्थतः ।
कथमस्मिन्स इत्येव संबन्धः स्यादसंहितः ॥ ३४
एवं सति च का प्रीतिर्दानविद्यातपोबलैः ।
यदन्याचरितं कर्म सर्वमन्यः प्रपद्यते ॥ ३५
यदा ह्ययमिहैवान्यैः प्राकृतैर्दुःखितो भवेत् ।
सुखितैर्दुःखितैर्वापि दृश्योऽप्यस्य विनिर्णयः ॥३६
तथा हि मुसलैर्हन्युः शरीरं तत्पुनर्भवेत् ।
पृथग्ज्ञानं यदन्यच्च येनैतन्नोपलभ्यते ॥ ३७
ऋतुः संवत्सरस्तिथ्यः शीतोष्णे च प्रियाप्रिये ।
यथातीतानि पश्यन्ति तादृशः सत्त्वसंक्षयः ॥ ३८
जरया हि परीतस्य मृत्युना वा विनाशिना ।
दुर्बलं दुर्बलं पूर्वं गृहस्येव विनश्यति ॥ ३९

इन्द्रियाणि मनो वायुः शोणितं मांसमस्थि च ।
आनुपूर्व्या विनश्यन्ति स्वं धातुमुपयान्ति च ॥४०
लोकयात्राविधानं च दानधर्मफलागमः ।
यदर्थं वेदशब्दाश्च व्यवहाराश्च लौकिकाः ॥ ४१
इति सम्यङ्मनस्येते बहवः सन्ति हेतवः ।
एतदस्तीदमस्तीति न किंचित्प्रतिपद्यते ॥ ४२
तेषां विमृशतामेवं तत्तत्समभिधावताम् ।
क्वचिन्निविशते बुद्धिस्तत्र जीर्यति वृक्षवत् ॥ ४३
एवमर्थैरनर्थैश्च दुःखिताः सर्वजन्तवः ।
आगमैरपकृष्यन्ते हस्तिपैर्हस्तिनो यथा ॥ ४४
अर्थांस्तथात्यन्तसुखावहांश्च
लिप्सन्त एते बहवो विशुल्काः ।
महत्तरं दुःखमभिप्रपन्ना
हित्वामिषं मृत्युवशं प्रयान्ति ॥ ४५
विनाशिनो ह्यध्रुवजीवितस्य
किं बन्धुभिर्मित्रपरिग्रहैश्च ।
विहाय यो गच्छति सर्वमेव
क्षणेन गत्वा न निवर्तते च ॥ ४६
भूव्योमतोयानलवायवो हि
सदा शरीरं परिपालयन्ति ।
इतीदमालक्ष्य कुतो रतिर्भवे-
द्विनाशिनो ह्यस्य न शर्म विद्यते ॥ ४७
इदमनुपधि वाक्यमच्छलं
परमनिरामयमात्मसाक्षिकम् ।
नरपतिरभिवीक्ष्य विस्मितः
पुनरनुयोक्तुमिदं प्रचक्रमे ॥ ४८

इति श्रीमहाभारते शान्तिपर्वणि
एकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

२१२

भीष्म उवाच ।

जनको जनदेवस्तु ज्ञापितः परमर्षिणा ।
पुनरेवानुपप्रच्छ सांपराये भवाभवौ ॥ १
भगवन्यदिदं प्रेत्य संज्ञा भवति कस्यचित् ।
एवं सति किमज्ञानं ज्ञानं वा किं करिष्यति ॥ २
सर्वमुच्छेदनिष्ठं स्यात्पश्य चैतद्द्विजोत्तम ।
अप्रमत्तः प्रमत्तो वा किं विशेषं करिष्यति ॥ ३
असंसर्गो हि भूतेषु संसर्गो वा विनाशिषु ।
कस्मै क्रियेत कल्पेन निश्चयः कोऽत्र तत्त्वतः ॥ ४
तमसा हि प्रतिच्छन्नं विभ्रान्तमिव चातुरम् ।
पुनः प्रशमयन्वाक्यैः कविः पञ्चशिखोऽब्रवीत् ॥ ५
उच्छेदनिष्ठा नेहास्ति भावनिष्ठा न विद्यते ।
अयं ह्यपि समाहारः शरीरेन्द्रियचेतसाम् ।
वर्तते पृथगन्योन्यमप्यपाश्रित्य कर्मसु ॥ ६
धातवः पञ्चशाखोऽयं खं वायुर्ज्योतिरम्बु भूः ।
ते स्वभावेन तिष्ठन्ति वियुज्यन्ते स्वभावतः ॥ ७
आकाशं वायुरूष्मा च स्नेहो यच्चापि पार्थिवम् ।
एष पञ्चसमाहारः शरीरमिति नैकधा ।
ज्ञानमूष्मा च वायुश्च त्रिविधः कर्मसंग्रहः ॥ ८
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः ।
प्राणापानौ विकारश्च धातवश्चात्र निःसृताः ॥ ९
श्रवणं स्पर्शनं जिह्वा दृष्टिर्नासा तथैव च ।
इन्द्रियाणीति पञ्चैते चित्तपूर्वंगमा गुणाः ॥ १०
तत्र विज्ञानसंयुक्ता त्रिविधा वेदना ध्रुवा ।
सुखदुःखेति यामाहुरदुःखेत्यसुखेति च ॥ ११
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च मूर्त्यथ ।
एते ह्यामरणात्पञ्च षड्गुणा ज्ञानसिद्धये ॥ १२
तेषु कर्मनिसर्गश्च सर्वतत्त्वार्थनिश्चयः ।
तमाहुः परमं शुक्रं बुद्धिरित्यव्ययं महत् ॥ १३
इमं गुणसमाहारमात्मभावेन पश्यतः ।
असम्यग्दर्शनैर्दुःखमनन्तं नोपशाम्यति ॥ १४
अनात्मेति च यद्दृष्टं तेनाहं न ममेत्यपि ।
वर्तते किमधिष्ठाना प्रसक्ता दुःखसंततिः ॥ १५
तत्र सम्यङ्मनो नाम त्यागशास्त्रमनुत्तमम् ।
शृणु यत्तव मोक्षाय भाष्यमाणं भविष्यति ॥ १६
त्याग एव हि सर्वेषामुक्तानामपि कर्मणाम् ।
नित्यं मिथ्याविनीतानां क्लेशो दुःखावहो मतः ॥ १७
द्रव्यत्यागे तु कर्माणि भोगत्यागे व्रतान्यपि ।
सुखत्यागे तपोयोगः सर्वत्यागे समापना ॥ १८
तस्य मार्गोऽयमद्वैधः सर्वत्यागस्य दर्शितः ।
विप्रहाणाय दुःखस्य दुर्गतिर्ह्यन्यथा भवेत् ॥ १९
पञ्च ज्ञानेन्द्रियाण्युक्त्वा मनःषष्ठानि चेतसि ।
मनःषष्ठानि वक्ष्यामि पञ्च कर्मेन्द्रियाणि तु ॥ २०
हस्तौ कर्मेन्द्रियं ज्ञेयमथ पादौ गतीन्द्रियम् ।
प्रजननानन्दयोः शेफो विसर्गे पायुरिन्द्रियम् ॥ २१
वाक्तु शब्दविशेषार्थं गतिं पञ्चान्वितां विदुः ।
एवमेकादशैतानि बुद्ध्या त्ववसृजेन्मनः ॥ २२
कर्णौ शब्दश्च चित्तं च त्रयः श्रवणसंग्रहे ।
तथा स्पर्शे तथा रूपे तथैव रसगन्धयोः ॥ २३
एवं पञ्चत्रिका ह्येते गुणास्तदुपलब्धये ।
येन यस्त्रिविधो भावः पर्यायात्समुपस्थितः ॥ २४
सात्त्विको राजसश्चैव तामसश्चैव ते त्रयः ।
त्रिविधा वेदना येषु प्रसूता सर्वसाधना ॥ २५
प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता ।
अकुतश्चित्कुतश्चिद्वा चित्ततः सात्त्विको गुणः ॥ २६
अतुष्टिः परितापश्च शोको लोभस्तथाक्षमा ।
लिङ्गानि रजसस्तानि दृश्यन्ते हेत्वहेतुतः ॥ २७
अविवेकस्तथा मोहः प्रमादः स्वप्नतन्द्रिता ।
कथंचिदपि वर्तन्ते विविधास्तामसा गुणाः ॥ २८

तत्र यत्प्रीतिसंयुक्तं काये मनसि वा भवेत् ।
वर्तते सात्त्विको भाव इत्यपेक्षेत तत्तथा ॥ २९
यत्तु संतापसंयुक्तमप्रीतिकरमात्मनः ।
प्रवृत्तं रज इत्येव ततस्तदभिचिन्तयेत् ॥ ३०
अथ यन्मोहसंयुक्तं काये मनसि वा भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ ३१
तद्धि श्रोत्राश्रयं भूतं शब्दः श्रोत्रं समाश्रितः ।
नोभयं शब्दविज्ञाने विज्ञानस्येतरस्य वा ॥ ३२
एवं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
स्पर्शे रूपे रसे गन्धे तानि चेतो मनश्च तत् ॥३३
स्वकर्मयुगपद्भावो दशस्वेतेषु तिष्ठति ।
चित्तमेकादशं विद्धि बुद्धिर्द्वादशमी भवेत् ॥ ३४
तेषामयुगपद्भावे उच्छेदो नास्ति तामसः ।
आस्थितो युगपद्भावे व्यवहारः स लौकिकः ॥३५
इन्द्रियाण्यवसृज्यापि दृष्ट्वा पूर्वं श्रुतागमम् ।
चिन्तयन्नानुपर्येति त्रिभिरेवान्वितो गुणैः ॥ ३६
यत्तमोपहतं चित्तमाशु संचारमध्रुवम् ।
करोत्युपरमं काले तदाहुस्तामसं सुखम् ॥ ३७
यद्यदागमसंयुक्तं न कृत्स्नमुपशाम्यति ।
अथ तत्राप्युपादत्ते तमो व्यक्तमिवानृतम् ॥ ३८
एवमेष प्रसंख्यातः स्वकर्मप्रत्ययी गुणः ।
कथंचिद्वर्तते सम्यक्केषांचिद्वा न वर्तते ॥ ३९
एवमाहुः समाहारं क्षेत्रमध्यात्मचिन्तकाः ।
स्थितो मनसि यो भावः स वै क्षेत्रज्ञ उच्यते ॥४०
एवं सति क उच्छेदः शाश्वतो वा कथं भवेत् ।
स्वभावाद्वर्तमानेषु सर्वभूतेषु हेतुतः ॥ ४१
यथार्णवगता नद्यो व्यक्तीर्जहति नाम च ।
न च स्वतां नियच्छन्ति तादृशः सत्त्वसंक्षयः ॥४२
एवं सति कुतः संज्ञा प्रेत्यभावे पुनर्भवेत् ।
प्रतिसंमिश्रिते जीवे गृह्यमाणे च मध्यतः ॥ ४३

इमां तु यो वेद विमोक्षबुद्धि-
मात्मानमन्विच्छति चाप्रमत्तः ।
न लिप्यते कर्मफलैरनिष्टैः
पत्रं बिसस्येव जलेन सिक्तम् ॥ ४४
दृढैश्च पाशैर्बहुभिर्विमुक्तः
प्रजानिमित्तैरपि दैवतैश्च ।
यदा ह्यसौ सुखदुःखे जहाति
मुक्तस्तदाग्र्यां गतिमेत्यलिङ्गः ।
श्रुतिप्रमाणागममङ्गलैश्च
शेते जरामृत्युभयादतीतः ॥ ४५
क्षीणे च पुण्ये विगते च पापे
ततोनिमित्ते च फले विनष्टे ।
अलेपमाकाशमलिङ्गमेव-
मास्थाय पश्यन्ति महद्ध्यसक्ताः ॥ ४६
यथोर्णनाभिः परिवर्तमान-
स्तन्तुक्षये तिष्ठति पात्यमानः ।
तथा विमुक्तः प्रजहाति दुःखं
विध्वंसते लोष्ट इवाद्रिमर्च्छन् ॥ ४७
यथा रुरुः शृङ्गमथो पुराणं
हित्वा त्वचं वाप्युरगो यथावत् ।
विहाय गच्छत्यनवेक्षमाण-
स्तथा विमुक्तो विजहाति दुःखम् ॥ ४८
द्रुमं यथा वाप्युदके पतन्त-
मुत्सृज्य पक्षी प्रपतत्यसक्तः ।
तथा ह्यसौ सुखदुःखे विहाय
मुक्तः परार्ध्यां गतिमेत्यलिङ्गः ॥ ४९
अपि च भवति मैथिलेन गीतं
नगरमुपाहितमग्निनाभिवीक्ष्य ।
न खलु मम तुषोऽपि दह्यतेऽत्र
स्वयमिदमाह किल स्म भूमिपालः ॥ ५०

इदममृतपदं विदेहराजः
स्वयमिह पञ्चशिखेन भाष्यमाणः ।
निखिलमभिसमीक्ष्य निश्चितार्थं
परमसुखी विजहार वीतशोकः ॥ ॥ ५१
इमं हि यः पठति विमोक्षनिश्चयं
न हीयते सततमवेक्षते तथा ।
उपद्रवान्नानुभवत्यदुःखितः
प्रमुच्यते कपिलमिवैत्य मैथिलः ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

२१३

युधिष्ठिर उवाच ।

किं कुर्वन्सुखमाप्नोति किं कुर्वन्दुःखमाप्नुते ।
किं कुर्वन्निर्भयो लोके सिद्धश्चरति भारत ॥ १

भीष्म उवाच ।

दममेव प्रशंसन्ति वृद्धाः श्रुतिसमाधयः ।
सर्वेषामेव वर्णानां ब्राह्मणस्य विशेषतः ॥ २
नादान्तस्य क्रियासिद्धिर्यथावदुपलभ्यते ।
क्रिया तपश्च वेदाश्च दमे सर्वं प्रतिष्ठितम् ॥ ३
दमस्तेजो वर्धयति पवित्रं दम उच्यते ।
विपाप्मा निर्भयो दान्तः पुरुषो विन्दते महत् ॥४
सुखं दान्तः प्रस्वपिति सुखं च प्रतिबुध्यते ।
सुखं लोके विपर्येति मनश्चास्य प्रसीदति ॥ ५
तेजो दमेन ध्रियते न तत्तीक्ष्णोऽधिगच्छति ।
अमित्रांश्च बहून्नित्यं पृथगात्मनि पश्यति ॥ ६
क्रव्याद्भ्य इव भूतानामदान्तेभ्यः सदा भयम् ।
तेषां विप्रतिषेधार्थं राजा सृष्टः स्वयंभुवा ॥ ७
आश्रमेषु च सर्वेषु दम एव विशिष्यते ।
यच्च तेषु फलं धर्मे भूयो दान्ते तदुच्यते ॥ ८
तेषां लिङ्गानि वक्ष्यामि येषां समुदयो दमः ।
अकार्पण्यमसंरम्भः संतोषः श्रद्दधानता ॥ ९
अक्रोध आर्जवं नित्यं नातिवादो न मानिता ।
गुरुपूजानसूया च दया भूतेष्वपैशुनम् ॥ १०
जनवादमृषावादस्तुतिनिन्दाविवर्जनम् ।
साधुकामश्चास्पृहयन्नायाति प्रत्ययं नृषु ॥ ११
अवैरकृत्सूपचारः समो निन्दाप्रशंसयोः ।
सुवृत्तः शीलसंपन्नः प्रसन्नात्मात्मवान्बुधः ।
प्राप्य लोके च सत्कारं स्वर्गं वै प्रेत्य गच्छति ॥१२
सर्वभूतहिते युक्तो न स्मयाद्द्वेष्टि वै जनम् ।
महाह्रद इवाक्षोभ्य प्रज्ञातृप्तः प्रसीदति ॥ १३
अभयं सर्वभूतेभ्यः सर्वेषामभयं यतः ।
नमस्यः सर्वभूतानां दान्तो भवति ज्ञानवान् ॥१४
न हृष्यति महत्यर्थे व्यसने च न शोचति ।
स वै परिमितप्रज्ञः स दान्तो द्विज उच्यते ॥ १५
कर्मभिः श्रुतसंपन्नः सद्भिराचरितैः शुभैः ।
सदैव दमसंयुक्तस्तस्य भुङ्क्ते महत्फलम् ॥ १६
अनसूया क्षमा शान्तिः संतोषः प्रियवादिता ।
सत्यं दानमनायासो नैष मार्गो दुरात्मनाम् ॥१७
कामक्रोधौ वशे कृत्वा ब्रह्मचारी जितेन्द्रियः ।
विक्रम्य घोरे तपसि ब्राह्मणः संशितव्रतः ।
कालाकाङ्क्षी चरेल्लोकान्निरपाय इवात्मवान् ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥

२१४

युधिष्ठिर उवाच ।

द्विजातयो व्रतोपेता यदिदं भुञ्जते हविः ।
अन्नं ब्राह्मणकामाय कथमेतत्पितामह ॥ १

भीष्म उवाच ।

अवेदोक्तव्रतोपेता भुञ्जानाः कार्यकारिणः ।
वेदोक्तेषु च भुञ्जाना व्रतलुप्ता युधिष्ठिर ॥ २

युधिष्ठिर उवाच ।
यदिदं तप इत्याहुरुपवासं पृथग्जनाः ।
एतत्तपो महाराज उताहो किं तपो भवेत् ॥ ३
भीष्म उवाच ।
मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः ।
आत्मतन्त्रोपघातः स न तपस्तत्सतां मतम् ।
त्यागश्च सन्नतिश्चैव शिष्यते तप उत्तमम् ॥ ४
सदोपवासी च भवेद्ब्रह्मचारी सदैव च ।
मुनिश्च स्यात्सदा विप्रो दैवतं च सदा भजेत् ॥५
कुटुम्बिको धर्मकामः सदास्वप्नश्च भारत ।
अमांसाशी सदा च स्यात्पवित्रं च सदा जपेत् ॥६
अमृताशी सदा च स्यान्न च स्याद्विषभोजनः ।
विघसाशी सदा च स्यात्सदा चैवातिथिप्रियः ॥७
युधिष्ठिर उवाच ।
कथं सदोपवासी स्याद्ब्रह्मचारी कथं भवेत् ।
विघसाशी कथं च स्यात्सदा चैवातिथिप्रियः ॥ ८
भीष्म उवाच ।
अन्तरा प्रातराशं च सायमाशं तथैव च ।
सदोपवासी च भवेद्यो न भुङ्क्ते कथंचन ॥ ९
भार्यां गच्छन्ब्रह्मचारी ऋतौ भवति ब्राह्मणः ।
ऋतवादी सदा च स्याज्ज्ञाननित्यश्च यो नरः ॥१०
अभक्षयन्वृथामांसममांसाशी भवत्युत ।
दाननित्यः पवित्रश्च अस्वप्नश्च दिवास्वपन् ॥ ११
भृत्यातिथिषु यो भुङ्क्ते भुक्तवत्सु सदा स ह ।
अमृतं सकलं भुङ्क्ते इति विद्धि युधिष्ठिर ॥ १२
अभुक्तवत्सु नाश्नानः सततं यस्तु वै द्विजः ।
अभोजनेन तेनास्य जितः स्वर्गो भवत्युत ॥ १३
देवताभ्यः पितृभ्यश्च भृत्येभ्योऽतिथिभिः सह ।
अवशिष्टं तु योऽश्नाति तमाहुर्विघसाशिनम् ॥ १४
तेषां लोका ह्यपर्यन्ताः सदने ब्रह्मणा सह ।
उपस्थिताश्चाप्सरोभिः परियान्ति दिवौकसः ॥ १५
देवताभिश्च ये सार्धं पितृभिश्चोपभुञ्जते ।
रमन्ते पुत्रपौत्रैश्च तेषां गतिरनुत्तमा ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥

२१५

युधिष्ठिर उवाच ।
यदिदं कर्म लोकेऽस्मिञ्शुभं वा यदि वाशुभम् ।
पुरुषं योजयत्येव फलयोगेन भारत ॥ १
कर्ता स्वित्तस्य पुरुष उताहो नेति संशयः ।
एतदिच्छामि तत्त्वेन त्वत्तः श्रोतुं पितामह ॥ २
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादमिन्द्रस्य च युधिष्ठिर ॥ ३
असक्तं धूतपाप्मानं कुले जातं बहुश्रुतम् ।
अस्तम्भमनहंकारं सत्त्वस्थं समये रतम् ॥ ४
तुल्यनिन्दास्तुतिं दान्तं शून्यागारनिवेशनम् ।
चराचराणां भूतानां विदितप्रभवाप्ययम् ॥ ५
अक्रुध्यन्तमहृष्यन्तमप्रियेषु प्रियेषु च ।
काञ्चने वाथ लोष्टे वा उभयोः समदर्शनम् ॥ ६
आत्मनिःश्रेयसज्ञाने धीरं निश्चितनिश्चयम् ।
परावरज्ञं भूतानां सर्वज्ञं समदर्शनम् ॥ ७
शक्रः प्रह्लादमासीनमेकान्ते संयतेन्द्रियम् ।
बुभुत्समानस्तत्प्रज्ञामभिगम्येदमब्रवीत् ॥ ८
यैः कैश्चित्संमतो लोके गुणैः स्यात्पुरुषो नृषु ।
भवत्यनपगान्सर्वांस्तान्गुणाँल्लक्षयामहे ॥ ९
अथ ते लक्ष्यते बुद्धिः समा बालजनैरिह ।
आत्मानं मन्यमानः सञ्श्रेयः किमिह मन्यसे ॥१०
बद्धः पाशैश्च्युतः स्थानाद्द्विषतां वशमागतः ।
श्रिया विहीनः प्रह्लाद शोचितव्ये न शोचसि ॥११

प्रज्ञालाभात्तु दैतेय उताहो धृतिमत्तया ।
प्रह्लाद स्वस्थरूपोऽसि पश्यन्व्यसनमात्मनः ॥ १२
इति संचोदितस्तेन धीरो निश्चितनिश्चयः ।
उवाच श्लक्ष्णया वाचा स्वां प्रज्ञामनुवर्णयन् ॥ १३
प्रवृत्तिं च निवृत्तिं च भूतानां यो न बुध्यते ।
तस्य स्तम्भो भवेद्बाल्यान्नास्ति स्तम्भोऽनुपश्यतः ॥
स्वभावात्संप्रवर्तन्ते निवर्तन्ते तथैव च ।
सर्वे भावास्तथाभावाः पुरुषार्थो न विद्यते ॥ १५
पुरुषार्थस्य चाभावे नास्ति कश्चित्स्वकारकः ।
स्वयं तु कुर्वतस्तस्य जातु मानो भवेदिह ॥ १६
यस्तु कर्तारमात्मानं मन्यते साध्वसाधुनोः ।
तस्य दोषवती प्रज्ञा स्वमूर्त्यज्ञेति मे मतिः ॥ १७
यदि स्यात्पुरुषः कर्ता शक्रात्मश्रेयसे ध्रुवम् ।
आरम्भास्तस्य सिध्येरन्न च जातु पराभवेत् ॥१८
अनिष्टस्य हि निर्वृत्तिरनिवृत्तिः प्रियस्य च ।
लक्ष्यते यतमानानां पुरुषार्थस्ततः कुतः ॥ १९
अनिष्टस्याभिनिर्वृत्तिमिष्टसंवृत्तिमेव च ।
अप्रयत्नेन पश्यामः केषांचित्तत्स्वभावतः ॥ २०
प्रतिरूपधराः केचिद्दृश्यन्ते बुद्धिसत्तमाः ।
विरूपेभ्योऽल्पबुद्धिभ्यो लिप्समाना धनागमम् ॥
स्वभावप्रेरिताः सर्वे निविशन्ते गुणा यदा ।
शुभाशुभास्तदा तत्र तस्य किं मानकारणम् ॥ २२
स्वभावादेव तत्सर्वमिति मे निश्चिता मतिः ।
आत्मप्रतिष्ठिता प्रज्ञा मम नास्ति ततोऽन्यथा ॥२३
कर्मजं त्विह मन्येऽहं फलयोगं शुभाशुभम् ।
कर्मणां विषयं कृत्स्नमहं वक्ष्यामि तच्छृणु ॥ २४
यथा वेदयते कश्चिदोदनं वायसो वदन् ।
एवं सर्वाणि कर्माणि स्वभावस्यैव लक्षणम् ॥ २५
विकारानेव यो वेद न वेद प्रकृतिं पराम् ।
तस्य स्तम्भो भवेद्बाल्यान्नास्ति स्तम्भोऽनुपश्यतः ॥
स्वभावभाविनो भावान्सर्वानेवेह निश्चये ।
बुध्यमानस्य दर्पो वा मानो वा किं करिष्यति ॥२७
वेद धर्मविधिं कृत्स्नं भूतानां चाप्यनित्यताम् ।
तस्माच्छक्र न शोचामि सर्वं ह्येवेदमन्तवत् ॥ २८
निर्ममो निरहंकारो निरीहो मुक्तबन्धनः ।
स्वस्थोऽव्यपेतः पश्यामि भूतानां प्रभवाप्ययौ ॥२९
कृतप्रज्ञस्य दान्तस्य वितृष्णस्य निराशिषः ।
नायासो विद्यते शक्र पश्यतो लोकविद्यया ॥ ३०
प्रकृतौ च विकारे च न मे प्रीतिर्न च द्विषे ।
द्वेष्टारं न च पश्यामि यो ममाद्य ममायते ॥ ३१
नोर्ध्वं नावाङ्न तिर्यक्च न क्वचिच्छक्र कामये ।
न विज्ञाने न विज्ञेये नाज्ञाने शर्म विद्यते ॥ ३२

शक्र उवाच ।

येनैषा लभ्यते प्रज्ञा येन शान्तिरवाप्यते ।
प्रब्रूहि तमुपायं मे सम्यक्प्रह्लाद पृच्छते ॥ ३३

प्रह्लाद उवाच ।

आर्जवेनाप्रमादेन प्रसादेनात्मवत्तया ।
वृद्धशुश्रूषया शक्र पुरुषो लभते महत् ॥ ३४
स्वभावाल्लभते प्रज्ञां शान्तिमेति स्वभावतः ।
स्वभावादेव तत्सर्वं यत्किंचिदनुपश्यसि ॥ ३५

भीष्म उवाच ।

इत्युक्तो दैत्यपतिना शक्रो विस्मयमागमत् ।
प्रीतिमांश्च तदा राजंस्तद्वाक्यं प्रत्यपूजयत् ॥ ३६
स तदाभ्यर्च्य दैत्येन्द्रं त्रैलोक्यपतिरीश्वरः ।
असुरेन्द्रमुपामन्त्र्य जगाम स्वं निवेशनम् ॥ ३७

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥

२१६

युधिष्ठिर उवाच ।

यया बुद्ध्या महीपालो भ्रष्टश्रीर्विचरेन्महीम् ।
कालदण्डविनिष्पिष्टस्तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वासवस्य च संवादं बलेर्वैरोचनस्य च ॥ २
पितामहमुपागत्य प्रणिपत्य कृताञ्जलिः ।
सर्वानेवासुराञ्जित्वा बलिं पप्रच्छ वासवः ॥ ३
यस्य स्म ददतो वित्तं न कदाचन हीयते ।
तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिम् ॥४
स एव ह्यस्तमयते स स्म विद्योतते दिशः ।
स वर्षति स्म वर्षाणि यथाकालमतन्द्रितः ।
तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिम् ॥५
स वायुर्वरुणश्चैव स रविः स च चन्द्रमाः ।
सोऽग्निस्तपति भूतानि पृथिवी च भवत्युत ।
तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिम् ॥६

ब्रह्मोवाच ।

नैतत्ते साधु मघवन्यदेतदनुपृच्छसि ।
पृष्टस्तु नानृतं ब्रूयात्तस्माद्वक्ष्यामि ते बलिम् ॥ ७
उष्ट्रेषु यदि वा गोषु खरेष्वश्वेषु वा पुनः ।
वरिष्ठो भविता जन्तुः शून्यागारे शचीपते ॥ ८

शक्र उवाच ।

यदि स्म बलिना ब्रह्मञ्शून्यागारे समेयिवान् ।
हन्यामेनं न वा हन्यां तद्ब्रह्मन्ननुशाधि माम् ॥ ९

ब्रह्मोवाच ।

मा स्म शक्र बलिं हिंसीर्न बलिर्वधमर्हति ।
न्यायांस्तु शक्र प्रष्टव्यस्त्वया वासव काम्यया ॥ १०

भीष्म उवाच ।

एवमुक्तो भगवता महेन्द्रः पृथिवीं तदा ।
चचारैरावतस्कन्धमधिरुह्य श्रिया वृतः ॥ ११
ततो ददर्श स बलिं खरवेषेण संवृतम् ।
यथाख्यातं भगवता शून्यागारकृतालयम् ॥ १२

शक्र उवाच ।

खरयोनिमनुप्राप्तस्तुषभक्षोऽसि दानव ।
इयं ते योनिरधमा शोचस्याहो न शोचसि ॥ १३
अदृष्टं बत पश्यामि द्विषतां वशमागतम् ।
श्रिया विहीनं मित्रैश्च भ्रष्टवीर्यपराक्रमम् ॥ १४
यत्तद्यानसहस्रेण ज्ञातिभिः परिवारितः ।
लोकान्प्रतापयन्सर्वान्यास्यस्मानवितर्कयन् ॥ १५
त्वन्मुखाश्चैव दैतेया व्यतिष्ठंस्तव शासने ।
अकृष्टपच्या पृथिवी तवैश्वर्ये बभूव ह ।
इदं च तेऽद्य व्यसनं शोचस्याहो न शोचसि ॥१६
यदातिष्ठः समुद्रस्य पूर्वकूले विलेलिहन् ।
ज्ञातिभ्यो विभजन्वित्तं तदासीत्ते मनः कथम् ॥
यत्ते सहस्रसमिता ननृतुर्देवयोषितः ।
बहूनि वर्षपूगानि विहारे दीप्यतः श्रिया ॥ १८
सर्वाः पुष्करमालिन्यः सर्वाः काञ्चनसप्रभाः ।
कथमद्य तदा चैव मनस्ते दानवेश्वर ॥ १९
छत्रं तवासीत्सुमहत्सौवर्णं मणिभूषितम् ।
ननृतुर्यत्र गन्धर्वाः षट्सहस्राणि सप्तधा ॥ २०
यूपस्तवासीत्सुमहान्यजतः सर्वकाञ्चनः ।
यत्राददः सहस्राणामयुतानि गवां दश ॥ २१
यदा तु पृथिवीं सर्वां यजमानोऽनुपर्ययाः ।
शम्याक्षेपेण विधिना तदासीत्किं नु ते हृदि ॥२२
न ते पश्यामि भृङ्गारं न छत्रं व्यजनं न च ।
ब्रह्मदत्तां च ते मालां न पश्याम्यसुराधिप ॥ २३

बलिरुवाच ।

न त्वं पश्यसि भृङ्गारं न छत्रं व्यजनं न च ।
ब्रह्मदत्तां च मे मालां न त्वं द्रक्ष्यसि वासव ॥२४

गुहायां निहितानि त्वं मम रत्नानि पृच्छसि ।
यदा मे भविता कालस्तदा त्वं तानि द्रक्ष्यसि ॥२५
न त्वेतदनुरूपं ते यशसो वा कुलस्य वा ।
समृद्धार्थोऽसमृद्धार्थं यन्मां कत्थितुमिच्छसि ॥२६
न हि दुःखेषु शोचन्ति न प्रहृष्यन्ति चर्द्धिषु ।
कृतप्रज्ञा ज्ञानतृप्ताः क्षान्ताः सन्तो मनीषिणः ॥२७
त्वं तु प्राकृतया बुद्ध्या पुरंदर विकत्थसे ।
यदाहमिव भावी त्वं तदा नैवं वदिष्यसि ॥ २८

इति श्रीमहाभारते शान्तिपर्वणि
षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥

२१७

भीष्म उवाच ।

पुनरेव तु तं शक्रः प्रहसन्निदमब्रवीत् ।
निःश्वसन्तं यथा नागं प्रव्याहाराय भारत ॥ १
यत्तद्यानसहस्रेण ज्ञातिभिः परिवारितः ।
लोकान्प्रतापयन्सर्वान्यास्यस्मानवितर्कयन् ॥ २
दृष्ट्वा सुकृपणां चेमामवस्थामात्मनो बले ।
ज्ञातिमित्रपरित्यक्तः शोचस्याहो न शोचसि ॥ ३
प्रीतिं प्राप्यातुलां पूर्वं लोकांश्चात्मवशे स्थितान् ।
विनिपातमिमं चाद्य शोचस्याहो न शोचसि ॥ ४

बलिरुवाच ।

अनित्यमुपलक्ष्येदं कालपर्यायमात्मनः ।
तस्माच्छक्र न शोचामि सर्वं ह्येवेदमन्तवत् ॥ ५
अन्तवन्त इमे देहा भूतानाममराधिप ।
तेन शक्र न शोचामि नापराधादिदं मम ॥ ६
जीवितं च शरीरं च प्रेत्य वै सह जायते ।
उभे सह विवर्धेते उभे सह विनश्यतः ॥ ७
तदीदृशमिदं भावमवशः प्राप्य केवलम् ।
यद्येवमभिजानामि का व्यथा मे विजानतः ॥ ८
भूतानां निधनं निष्ठा स्रोतसामिव सागरः ।
नैतत्सम्यग्विजानन्तो नरा मुह्यन्ति वज्रभृत् ॥ ९
ये त्वेवं नाभिजानन्ति रजोमोहपरायणाः ।
ते कृच्छ्रं प्राप्य सीदन्ति बुद्धिर्येषां प्रणश्यति ॥१०
बुद्धिलाभे हि पुरुषः सर्वं नुदति किल्बिषम् ।
विपाप्मा लभते सत्त्वं सत्त्वस्थः संप्रसीदति ॥११
ततस्तु ये निवर्तन्ते जायन्ते वा पुनः पुनः ।
कृपणाः परितप्यन्ते तेऽनर्थैः परिचोदिताः ॥ १२
अर्थसिद्धिमनर्थं च जीवितं मरणं तथा ।
सुखदुःखफलं चैव न द्वेष्मि न च कामये ॥ १३
हतं हन्ति हतो ह्येव यो नरो हन्ति कंचन ।
उभौ तौ न विजानीतो यश्च हन्ति हतश्च यः ॥१४
हत्वा जित्वा च मघवन्यः कश्चित्पुरुषायते ।
अकर्ता ह्येव भवति कर्ता त्वेव करोति तत् ॥१५
को हि लोकस्य कुरुते विनाशप्रभवावुभौ ।
कृतं हि तत्कृतेनैव कर्ता तस्यापि चापरः ॥१६
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
एतद्योनीनि भूतानि तत्र का परिदेवना ॥ १७
महाविद्योऽल्पविद्यश्च बलवान्दुर्बलश्च यः ।
दर्शनीयो विरूपश्च सुभगो दुर्भगश्च यः ॥ १८
सर्वं कालः समादत्ते गम्भीरः स्वेन तेजसा ।
तस्मिन्कालवशं प्राप्ते का व्यथा मे विजानतः ॥१९
दग्धमेवानुदहति हतमेवानुहन्ति च ।
नश्यते नष्टमेवाग्रे लब्धव्यं लभते नरः ॥ २०
नास्य द्वीपः कुतः पारं नावारः संप्रदृश्यते ।
नान्तमस्य प्रपश्यामि विधेर्दिव्यस्य चिन्तयन् ॥२१
यदि मे पश्यतः कालो भूतानि न विनाशयेत् ।
स्यान्मे हर्षश्च दर्पश्च क्रोधश्चैव शचीपते ॥ २२
तुषभक्षं तु मां ज्ञात्वा प्रविविक्तजने गृहे ।
बिभ्रतं गार्दभं रूपमादिश्य परिगर्हसे ॥ २३
इच्छन्नहं विकुर्यां हि रूपाणि बहुधात्मनः ।

विभीषणानि यानीक्ष्य पलायेथास्त्वमेव मे ॥ २४
कालः सर्वं समादत्ते कालः सर्वं प्रयच्छति ।
कालेन विधृतं सर्वं मा कृथाः शक्र पौरुषम् ॥२५
पुरा सर्वं प्रव्यथते मयि क्रुद्धे पुरंदर ।
अवैमि त्वस्य लोकस्य धर्मं शक्र सनातनम् ॥ २६
त्वमप्येवमपेक्षस्व मात्मना विस्मयं गमः ।
प्रभवश्च प्रभावश्च नात्मसंस्थः कदाचन ॥ २७
कौमारमेव ते चित्तं तथैवाद्य यथा पुरा ।
समवेक्षस्व मघवन्बुद्धिं विन्दस्व नैष्ठिकीम् ॥ २८
देवा मनुष्याः पितरो गन्धर्वोरगराक्षसाः ।
आसन्सर्वे मम वशे तत्सर्वं वेत्थ वासव ॥ २९
नमस्तस्यै दिशेऽप्यस्तु यस्यां वैरोचनो बलिः ।
इति मामभ्यपद्यन्त बुद्धिमात्सर्यमोहिताः ॥ ३०
नाहं तदनुशोचामि नात्मभ्रंशं शचीपते ।
एवं मे निश्चिता बुद्धिः शास्तुस्तिष्ठाम्यहं वशे ॥३१
दृश्यते हि कुले जातो दर्शनीयः प्रतापवान् ।
दुःखं जीवन्सहामात्यो भवितव्यं हि तत्तथा ॥३२
दौष्कुलेयस्तथा मूढो दुर्जातः शक्र दृश्यते ।
सुखं जीवन्सहामात्यो भवितव्यं हि तत्तथा ॥३३
कल्याणी रूपसंपन्ना दुर्भगा शक्र दृश्यते ।
अलक्षणा विरूपा च सुभगा शक्र दृश्यते ॥ ३४
नैतदस्मत्कृतं शक्र नैतच्छक्र त्वया कृतम् ।
यत्त्वमेवंगतो वज्रिन्यद्वाप्येवंगता वयम् ॥ ३५
न कर्म तव नान्येषां कुतो मम शतक्रतो ।
ऋद्धिर्वाप्यथ वा नर्द्धिः पर्यायकृतमेव तत् ॥ ३६
पश्यामि त्वा विराजन्तं देवराजमवस्थितम् ।
श्रीमन्तं द्युतिमन्तं च गर्जन्तं च ममोपरि ॥ ३७
एतच्चैवं न चेत्कालो मामाक्रम्य स्थितो भवेत् ।
पातयेयमहं त्वाद्य सवज्रमपि मुष्टिना ॥ ३८
न तु विक्रमकालोऽयं क्षमाकालोऽयमागतः ।
कालः स्थापयते सर्वं कालः पचति वै तथा ॥ ३९
मां चेदभ्यागतः कालो दानवेश्वरमूर्जितम् ।
गर्जन्तं प्रतपन्तं च कमन्यं नागमिष्यति ॥ ४०
द्वादशानां हि भवतामादित्यानां महात्मनाम् ।
तेजांस्येकेन सर्वेषां देवराज हृतानि मे ॥ ४१
अहमेवोद्वहाम्यापो विसृजामि च वासव ।
तपामि चैव त्रैलोक्यं विद्योताम्यहमेव च ॥ ४२
संरक्षामि विलुम्पामि ददाम्यहमथाददे ।
संयच्छामि नियच्छामि लोकेषु प्रभुरीश्वरः ॥ ४३
तदद्य विनिवृत्तं मे प्रभुत्वममराधिप ।
कालसैन्यावगाढस्य सर्वं न प्रतिभाति मे ॥ ४४
नाहं कर्ता न चैव त्वं नान्यः कर्ता शचीपते ।
पर्यायेण हि भुज्यन्ते लोकाः शक्र यदृच्छया ॥४५
मासार्धमासवेश्मानमहोरात्राभिसंवृतम् ।
ऋतुद्वारं वर्षमुखमाहुर्वेदविदो जनाः ॥ ४६
आहुः सर्वमिदं चिन्त्यं जनाः केचिन्मनीषया ।
अस्याः पञ्चैव चिन्तायाः पर्येष्यामि च पञ्चधा ॥
गम्भीरं गहनं ब्रह्म महत्तोयार्णवं यथा ।
अनादिनिधनं चाहुरक्षरं परमेव च ॥ ४८
सत्त्वेषु लिङ्गमावेश्य नलिङ्गमपि तत्स्वयम् ।
मन्यन्ते ध्रुवमेवैनं ये नरास्तत्त्वदर्शिनः ॥ ४९
भूतानां तु विपर्यासं मन्यते गतवानिति ।
न ह्येतावद्भवेद्गम्यं न यस्मात्प्रकृतेः परः ॥ ५०
गतिं हि सर्वभूतानामगत्वा क्व गमिष्यसि ।
यो धावता न हातव्यस्तिष्ठन्नपि न हीयते ।
तमिन्द्रियाणि सर्वाणि नानुपश्यन्ति पञ्चधा ॥५१
आहुश्चैनं केचिदग्निं केचिदाहुः प्रजापतिम् ।
ऋतुमासार्धमासांश्च दिवसांस्तु क्षणांस्तथा ॥ ५२
पूर्वाह्णमपराह्णं च मध्याह्नमपि चापरे ।
मुहूर्तमपि चैवाहुरेकं सन्तमनेकधा ।

तं कालमवजानीहि यस्य सर्वमिदं वशे ॥ ५३
बहूनीन्द्रसहस्राणि समतीतानि वासव ।
बलवीर्योपपन्नानि यथैव त्वं शचीपते ॥ ५४
त्वामप्यतिबलं शक्र देवराजं बलोत्कटम् ।
प्राप्ते काले महावीर्यः कालः संशमयिष्यति ॥ ५५
य इदं सर्वमादत्ते तस्माच्छक्र स्थिरो भव ।
मया त्वया च पूर्वैश्च न स शक्योऽतिवर्तितुम् ॥
यामेतां प्राप्य जानीषे राजश्रियमनुत्तमाम् ।
स्थिता मयीति तन्मिथ्या नैषा ह्येकत्र तिष्ठति ॥५७
स्थिता हीन्द्रसहस्रेषु त्वद्विशिष्टतमेष्वियम् ।
मां च लोला परित्यज्य त्वामगाद्विबुधाधिप ॥ ५८
मैवं शक्र पुनः कार्षीः शान्तो भवितुमर्हसि ।
त्वामप्येवंगतं त्यक्त्वा क्षिप्रमन्यं गमिष्यति ॥ ५९

इति श्रीमहाभारते शान्तिपर्वणि
सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥

२१८

भीष्म उवाच ।

शतक्रतुरथापश्यद्बलेर्दीप्तां महात्मनः ।
स्वरूपिणीं शरीराद्धि तदा निष्क्रामतीं श्रियम् ॥ १
तां दीप्तां प्रभया दृष्ट्वा भगवान्पाकशासनः ।
विस्मयोत्फुल्लनयनो बलिं पप्रच्छ वासवः ॥ २
बले केयमपक्रान्ता रोचमाना शिखण्डिनी ।
त्वत्तः स्थिता सकेयूरा दीप्यमाना स्वतेजसा ॥ ३

बलिरुवाच ।

न हीमामासुरीं वेद्मि न दैवीं न च मानुषीम् ।
त्वमेवैनां पृच्छ मा वा यथेष्टं कुरु वासव ॥ ४

शक्र उवाच ।

का त्वं बलेरपक्रान्ता रोचमाना शिखण्डिनी ।
अजानतो ममाचक्ष्व नामधेयं शुचिस्मिते ॥ ५
का त्वं तिष्ठसि मायेव दीप्यमाना स्वतेजसा ।
हित्वा दैत्येश्वरं सुभ्रु तन्ममाचक्ष्व तत्त्वतः ॥६

श्रीरुवाच ।

न मा विरोचनो वेद न मा वैरोचनो बलिः ।
आहुर्मां दुःसहेत्येवं विधित्सेति च मां विदुः ॥७
भूतिर्लक्ष्मीति मामाहुः श्रीरित्येवं च वासव ।
त्वं मां शक्र न जानीषे सर्वे देवा न मां विदुः ॥८

शक्र उवाच ।

किमिदं त्वं मम कृते उताहो बलिनः कृते ।
दुःसहे विजहास्येनं चिरसंवासिनी सती ॥ ९

श्रीरुवाच ।

न धाता न विधाता मां विदधाति कथंचन ।
कालस्तु शक्र पर्यायान्मैनं शक्रावमन्यथाः ॥ १०

शक्र उवाच ।

कथं त्वया बलिस्त्यक्तः किमर्थं वा शिखण्डिनि ।
कथं च मां न जह्यास्त्वं तन्मे ब्रूहि शुचिस्मिते ॥११

श्रीरुवाच ।

सत्ये स्थितास्मि दाने च व्रते तपसि चैव हि ।
पराक्रमे च धर्मे च पराचीनस्ततो बलिः ॥ १२
ब्रह्मण्योऽयं सदा भूत्वा सत्यवादी जितेन्द्रियः ।
अभ्यसूयद्ब्राह्मणान्वै उच्छिष्टश्चास्पृशद्घृतम् ॥ १३
यज्ञशीलः पुरा भूत्वा मामेव यजतेत्ययम् ।
प्रोवाच लोकान्मूढात्मा कालेनोपनिपीडितः ॥ १४
अपाकृता ततः शक्र त्वयि वत्स्यामि वासव ।
अप्रमत्तेन धार्यास्मि तपसा विक्रमेण च ॥ १५

शक्र उवाच ।

अस्ति देवमनुष्येषु सर्वभूतेषु वा पुमान् ।
यस्त्वामेको विषहितुं शक्नुयात्कमलालये ॥ १६

श्रीरुवाच ।

नैव देवो न गन्धर्वो नासुरो न च राक्षसः ।
यो मामेको विषहितुं शक्तः कश्चित्पुरंदर ॥ १७

शक्र उवाच ।

विधेया मयि नित्यं त्वं यथा तद्ब्रूहि मे शुभे ।
तत्करिष्यामि ते वाक्यमृतं त्वं वक्तुमर्हसि ॥ १८

श्रीरुवाच ।

स्थास्यामि नित्यं देवेन्द्र यथा त्वयि निबोध तत् ।
विधिना वेददृष्टेन चतुर्धा विभजस्व माम् ॥ १९

शक्र उवाच ।

अहं वै त्वा निधास्यामि यथाशक्ति यथाबलम् ।
न तु मेऽतिक्रमः स्याद्वै सदा लक्ष्मि तवान्तिके ॥
भूमिरेव मनुष्येषु धारणी भूतभाविनी ।
सा ते पादं तितिक्षेत समर्था हीति मे मतिः ॥२१

श्रीरुवाच ।

एष मे निहितः पादो योऽयं भूमौ प्रतिष्ठितः ।
द्वितीयं शक्र पादं मे तस्मात्सुनिहितं कुरु ॥ २२

शक्र उवाच ।

आप एव मनुष्येषु द्रवन्त्यः परिचारिकाः ।
तास्ते पादं तितिक्षन्तामलमापस्तितिक्षितुम् ॥ २३

श्रीरुवाच ।

एष मे निहितः पादो योऽयमप्सु प्रतिष्ठितः ।
तृतीयं शक्र पादं मे तस्मात्सुनिहितं कुरु ॥ २४

शक्र उवाच ।

यस्मिन्देवाश्च यज्ञाश्च यस्मिन्वेदाः प्रतिष्ठिताः ।
तृतीयं पादमग्निस्ते सुधृतं धारयिष्यति ॥ २५

श्रीरुवाच ।

एष मे निहितः पादो योऽयमग्नौ प्रतिष्ठितः ।
चतुर्थं शक्र पादं मे तस्मात्सुनिहितं कुरु ॥ २६

शक्र उवाच ।

ये वै सन्तो मनुष्येषु ब्रह्मण्याः सत्यवादिनः ।
ते ते पादं तितिक्षन्तामलं सन्तस्तितिक्षितुम् ॥ २७

श्रीरुवाच ।

एष मे निहितः पादो योऽयं सत्सु प्रतिष्ठितः ।
एवं विनिहितां शक्र भूतेषु परिधत्स्व माम् ॥ २८

शक्र उवाच ।

भूतानामिह वै यस्त्वा मया विनिहितां सतीम् ।
उपहन्यात्स मे द्विष्यात्तथा शृण्वन्तु मे वचः ॥२९

भीष्म उवाच ।

ततस्त्यक्तः श्रिया राजा दैत्यानां बलिरब्रवीत् ।
यावत्पुरस्तात्प्रतपेत्तावद्वै दक्षिणां दिशम् ॥ ३०
पश्चिमां तावदेवापि तथोदीचीं दिवाकरः ।
तथा मध्यंदिने सूर्यो अस्तमेति यदा तदा ।
पुनर्देवासुरं युद्धं भावि जेतास्मि वस्तदा ॥ ३१
सर्वाँल्लोकान्यदादित्य एकस्थस्तापयिष्यति ।
तदा देवासुरे युद्धे जेताहं त्वां शतक्रतो ॥ ३२

शक्र उवाच ।

ब्रह्मणास्मि समादिष्टो न हन्तव्यो भवानिति ।
तेन तेऽहं बले वज्रं न विमुञ्चामि मूर्धनि ॥ ३३
यथेष्टं गच्छ दैत्येन्द्र स्वस्ति तेऽस्तु महासुर ।
आदित्यो नावतपिता कदाचिन्मध्यतः स्थितः ॥३४
स्थापितो ह्यस्य समयः पूर्वमेव स्वयंभुवा ।
अजस्रं परियात्येष सत्येनावतपन्प्रजाः ॥ ३५
अयनं तस्य षण्मासा उत्तरं दक्षिणं तथा ।
येन संयाति लोकेषु शीतोष्णे विसृजन्रविः ॥३६

भीष्म उवाच ।

एवमुक्तस्तु दैत्येन्द्रो बलिरिन्द्रेण भारत ।
जगाम दक्षिणामाशामुदीचीं तु पुरंदरः ॥ ३७
इत्येतद्बलिना गीतमनहंकारसंज्ञितम् ।
वाक्यं श्रुत्वा सहस्राक्षः खमेवारुरुहे तदा ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥

२१९

भीष्म उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शतक्रतोश्च संवादं नमुचेश्च युधिष्ठिर ॥ १
श्रिया विहीनमासीनमक्षोभ्यमिव सागरम् ।
भवाभवज्ञं भूतानामित्युवाच पुरंदरः ॥ २
बद्धः पाशैश्च्युतः स्थानाद्द्विषतां वशमागतः ।
श्रिया विहीनो नमुचे शोचस्याहो न शोचसि ॥ ३

नमुचिरुवाच ।

अनवाप्यं च शोकेन शरीरं चोपतप्यते ।
अमित्राश्च प्रहृष्यन्ति नास्ति शोके सहायता ॥ ४
तस्माच्छक्र न शोचामि सर्वं ह्येवेदमन्तवत् ।
संतापाद्भ्रश्यते रूपं धर्मश्चैव सुरेश्वर ॥ ५
विनीय खलु तद्दुःखमागतं वैमनस्यजम् ।
ध्यातव्यं मनसा हृद्यं कल्याणं संविजानता ॥ ६
यथा यथा हि पुरुषः कल्याणे कुरुते मनः ।
तदैवास्य प्रसीदन्ति सर्वार्था नात्र संशयः ॥ ७
एकः शास्ता न द्वितीयोऽस्ति शास्ता
गर्भे शयानं पुरुषं शास्ति शास्ता ।
तेनानुशिष्टः प्रवणादिवोदकं
यथा नियुक्तोऽस्मि तथा वहामि ॥ ८
भावाभावावभिजानन्गरीयो
जानामि श्रेयो न तु तत्करोमि ।
आशासु धर्म्याः सुहृदां सुकुर्व-
न्यथा नियुक्तोऽस्मि तथा वहामि ॥ ९
यथा यथास्य प्राप्तव्यं प्राप्नोत्येव तथा तथा ।
भवितव्यं यथा यच्च भवत्येव तथा तथा ॥ १०
यत्र यत्रैव संयुङ्क्ते धाता गर्भं पुनः पुनः ।
तत्र तत्रैव वसति न यत्र स्वयमिच्छति ॥ ११
भावो योऽयमनुप्राप्तो भवितव्यमिदं मम ।
इति यस्य सदा भावो न स मुह्येत्कदाचन ॥ १२
पर्यायैर्हन्यमानानामभियोक्ता न विद्यते ।
दुःखमेतत्तु यद्द्वेष्टा कर्ताहमिति मन्यते ॥ १३
ऋषींश्च देवांश्च महासुरांश्च
त्रैविद्यवृद्धांश्च वने मुनींश्च ।
कान्नापदो नोपनमन्ति लोके
परावरज्ञास्तु न संभ्रमन्ति ॥ १४
न पण्डितः क्रुध्यति नापि सज्जते
न चापि संसीदति न प्रहृष्यति ।
न चार्थकृच्छ्रव्यसनेषु शोचति
स्थितः प्रकृत्या हिमवानिवाचलः ॥ १५
यमर्थसिद्धिः परमा न हर्षये-
त्तथैव काले व्यसनं न मोहयेत् ।
सुखं च दुःखं च तथैव मध्यमं
निषेवते यः स धुरंधरो नरः ॥ १६
यां यामवस्थां पुरुषोऽधिगच्छे-
त्तस्यां रमेतापरितप्यमानः ।
एवं प्रवृद्धं प्रणुदेन्मनोजं
संतापमायासकरं शरीरात् ॥ १७
तत्सदः स परिषत्सभासदः
प्राप्य यो न कुरुते सभाभयम् ।
धर्मतत्त्वमवगाह्य बुद्धिमा-
न्योऽभ्युपैति स पुमान्धुरंधरः ॥ १८
प्राज्ञस्य कर्माणि दुरन्वयानि
न वै प्राज्ञो मुह्यति मोहकाले ।
स्थानाच्च्युतश्चेन्न मुमोह गौतम-
स्तावत्कृच्छ्रामापदं प्राप्य वृद्धः ॥ १९
न मन्त्रबलवीर्येण प्रज्ञया पौरुषेण वा ।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना ॥ २०
यदेवमनुजातस्य धातारो विदधुः पुरा ।

तदेवानुभविष्यामि किं मे मृत्युः करिष्यति ॥ २१
लब्धव्यान्येव लभते गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥
एतद्विदित्वा कार्त्स्न्येन यो न मुह्यति मानवः ।
कुशलः सुखदुःखेषु स वै सर्वधनेश्वरः ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
एकोनविंशत्यधिकद्विशततमोऽध्यायः ॥ २१९ ॥

२२०

युधिष्ठिर उवाच ।

मग्नस्य व्यसने कृच्छ्रे किं श्रेयः पुरुषस्य हि ।
बन्धुनाशे महीपाल राज्यनाशेऽपि वा पुनः ॥ १
त्वं हि नः परमो वक्ता लोकेऽस्मिन्भरतर्षभ ।
एतद्भवन्तं पृच्छामि तन्मे वक्तुमिहार्हसि ॥ २

भीष्म उवाच ।

पुत्रदारैः सुखैश्चैव वियुक्तस्य धनेन च ।
मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप ॥ ३
धैर्येण युक्तस्य सतः शरीरं न विशीर्यते ।
आरोग्याच्च शरीरस्य स पुनर्विन्दते श्रियम् ॥ ४
यस्य राज्ञो नरास्तात सात्त्विकीं वृत्तिमास्थिताः ।
तस्य स्थैर्यं च धैर्यं च व्यवसायश्च कर्मसु ॥ ५
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
बलिवासवसंवादं पुनरेव युधिष्ठिर ॥ ६
वृत्ते देवासुरे युद्धे दैत्यदानवसंक्षये ।
विष्णुक्रान्तेषु लोकेषु देवराजे शतक्रतौ ॥ ७
इज्यमानेषु देवेषु चातुर्वर्ण्ये व्यवस्थिते ।
समृध्यमाने त्रैलोक्ये प्रीतियुक्ते स्वयंभुवि ॥ ८
रुद्रैर्वसुभिरादित्यैरश्विभ्यामपि चर्षिभिः ।
गन्धर्वैर्भुजगेन्द्रैश्च सिद्धैश्चान्यैर्वृतः प्रभुः ॥ ९
चतुर्दन्तं सुदान्तं च वारणेन्द्रं श्रिया वृतम् ।
आरुह्यैरावतं शक्रस्त्रैलोक्यमनुसंययौ ॥ १०
स कदाचित्समुद्रान्ते कस्मिंश्चिद्गिरिगह्वरे ।
बलिं वैरोचनिं वज्री ददर्शोपससर्प च ॥ ११
तमैरावतमूर्धस्थं प्रेक्ष्य देवगणैर्वृतम् ।
सुरेन्द्रमिन्द्रं दैत्येन्द्रो न शुशोच न विव्यथे ॥ १२
दृष्ट्वा तमविकारस्थं तिष्ठन्तं निर्भयं बलिम् ।
अधिरूढो द्विपश्रेष्ठमित्युवाच शतक्रतुः ॥ १३
दैत्य न व्यथसे शौर्यादथ वा वृद्धसेवया ।
तपसा भावितत्वाद्वा सर्वथैतत्सुदुष्करम् ॥ १४
शत्रुभिर्वशमानीतो हीनः स्थानादनुत्तमात् ।
वैरोचने किमाश्रित्य शोचितव्ये न शोचसि ॥ १५
श्रैष्ठ्यं प्राप्य स्वजातीनां भुक्त्वा भोगाननुत्तमान् ।
हृतस्वबलराज्यस्त्वं ब्रूहि कस्मान्न शोचसि ॥ १६
ईश्वरो हि पुरा भूत्वा पितृपैतामहे पदे ।
तत्त्वमद्य हृतं दृष्ट्वा सपत्नैः किं न शोचसि ॥ १७
बद्धश्च वारुणैः पाशैर्वज्रेण च समाहतः ।
हृतदारो हृतधनो ब्रूहि कस्मान्न शोचसि ॥ १८
भ्रष्टश्रीर्विभवभ्रष्टो यन्न शोचसि दुष्करम् ।
त्रैलोक्यराज्यनाशे हि कोऽन्यो जीवितुमुत्सहेत् ॥
एतच्चान्यच्च परुषं ब्रुवन्तं परिभूय तम् ।
श्रुत्वा सुखमसंभ्रान्तो बलिर्वैरोचनोऽब्रवीत् ॥ २०
निगृहीते मयि भृशं शक्र किं कत्थितेन ते ।
वज्रमुद्यम्य तिष्ठन्तं पश्यामि त्वां पुरंदर ॥ २१
अशक्तः पूर्वमासीस्त्वं कथंचिच्छक्ततां गतः ।
कस्त्वदन्य इमा वाचः सुक्रूरा वक्तुमर्हति ॥ २२
यस्तु शत्रोर्वशस्थस्य शक्तोऽपि कुरुते दयाम् ।
हस्तप्राप्तस्य वीरस्य तं चैव पुरुषं विदुः ॥ २३
अनिश्चयो हि युद्धेषु द्वयोर्विवदमानयोः ।
एकः प्राप्नोति विजयमेकश्चैव पराभवम् ॥ २४
मा च ते भूत्स्वभावोऽयं मया दैवतपुंगव ।
ईश्वरः सर्वभूतानां विक्रमेण जितो बलात् ॥ २५

नैतदस्मत्कृतं शक्र नैतच्छक्र त्वया कृतम् ।
यत्त्वमेवंगतो वज्रिन्यद्वाप्येवंगता वयम् ॥ २६
अहमासं यथाद्य त्वं भविता त्वं यथा वयम् ।
मावमंस्था मया कर्म दुष्कृतं कृतमित्युत ॥ २७
सुखदुःखे हि पुरुषः पर्यायेणाधिगच्छति ।
पर्यायेणासि शक्रत्वं प्राप्तः शक्र न कर्मणा ॥ २८
कालः काले नयति मां त्वां च कालो नयत्ययम् ।
तेनाहं त्वं यथा नाद्य त्वं चापि न यथा वयम् ॥
न मातृपितृशुश्रूषा न च दैवतपूजनम् ।
नान्यो गुणसमाचारः पुरुषस्य सुखावहः ॥ ३०
न विद्या न तपो दानं न मित्राणि न बान्धवाः ।
शक्नुवन्ति परित्रातुं नरं कालेन पीडितम् ॥ ३१
नागामिनमनर्थं हि प्रतिघातशतैरपि ।
शक्नुवन्ति प्रतिव्योढुमृते बुद्धिबलान्नराः ॥ ३२
पर्यायैर्हन्यमानानां परित्राता न विद्यते ।
इदं तु दुःखं यच्छक्र कर्ताहमिति मन्यते ॥ ३३
यदि कर्ता भवेत्कर्ता न क्रियेत कदाचन ।
यस्मात्तु क्रियते कर्ता तस्मात्कर्ताप्यनीश्वरः ॥ ३४
कालेन त्वाहमजयं कालेनाहं जितस्त्वया ।
गन्ता गतिमतां कालः कालः कलयति प्रजाः ॥३५
इन्द्र प्राकृतया बुद्ध्या प्रलपन्नावबुध्यसे ।
केचित्त्वां बहु मन्यन्ते श्रैष्ठ्यं प्राप्तं स्वकर्मणा ॥३६
कथमस्मद्विधो नाम जानँल्लोकप्रवृत्तयः ।
कालेनाभ्याहतः शोचेन्मुह्येद्वाप्यर्थसंभ्रमे ॥ ३७
नित्यं कालपरीतस्य मम वा मद्विधस्य वा ।
बुद्धिर्व्यसनमासाद्य भिन्ना नौरिव सीदति ॥ ३८
अहं च त्वं च ये चान्ये भविष्यन्ति सुराधिपाः ।
ते सर्वे शक्र यास्यन्ति मार्गमिन्द्रशतैर्गतम् ॥ ३९
त्वामप्येवं सुदुर्धर्षं ज्वलन्तं परया श्रिया ।
काले परिणते कालः कालयिष्यति मामिव ॥ ४०
बहूनीन्द्रसहस्राणि दैतेयानां युगे युगे ।
अभ्यतीतानि कालेन कालो हि दुरतिक्रमः ॥ ४१
इदं तु लब्ध्वा त्वं स्थानमात्मानं बहु मन्यसे ।
सर्वभूतभवं देवं ब्रह्माणमिव शाश्वतम् ॥ ४२
न चेदमचलं स्थानमनन्तं वापि कस्यचित् ।
त्वं तु बालिशया बुद्ध्या ममेदमिति मन्यसे ॥४३
अविश्वास्ये विश्वसिषि मन्यसे चाध्रुवं ध्रुवम् ।
ममेयमिति मोहात्त्वं राजश्रियमभीप्ससि ॥ ४४
नेयं तव न चास्माकं न चान्येषां स्थिरा मता ।
अतिक्रम्य बहूनन्यांस्त्वयि तावदियं स्थिता ॥ ४
कंचित्कालमियं स्थित्वा त्वयि वासव चञ्चला ।
गौर्निपानमिवोत्सृज्य पुनरन्यं गमिष्यति ॥ ४६
राजलोका ह्यतिक्रान्ता यान्न संख्यातुमुत्सहे ।
त्वत्तो बहुतराश्चान्ये भविष्यन्ति पुरंदर ॥ ४७
सवृक्षौषधिरत्नेयं ससरित्पर्वताकरा ।
तानिदानीं न पश्यामि यैर्भुक्तेयं पुरा मही ॥ ४८
पृथुरैलो मयो भौमो नरकः शम्बरस्तथा ।
अश्वग्रीवः पुलोमा च स्वर्भानुरमितध्वजः ॥ ४९
प्रह्रादो नमुचिर्दक्षो विप्रचित्तिर्विरोचनः ।
ह्रीनिषेधः सुहोत्रश्च भूरिहा पुष्पवान्वृषः ॥ ५०
सत्येषुर्ऋषभो राहुः कपिलाश्वो विरूपकः ।
बाणः कार्तस्वरो वह्निर्विश्वदंष्ट्रोऽथ नैर्ऋतः ॥ ५१
रित्थाहुत्यौ वीरताम्रौ वराहाश्वो रुचिः प्रभुः ।
विश्वजित्प्रतिशौरिश्च वृषाण्डो विष्करो मधुः ॥५२
हिरण्यकशिपुश्चैव कैटभश्चैव दानवः ।
दैत्याश्च कालखञ्जाश्च सर्वे ते नैर्ऋतैः सह ॥ ५३
एते चान्ये च बहवः पूर्वे पूर्वतराश्च ये ।
दैत्येन्द्रा दानवेन्द्राश्च यांश्चान्याननुशुश्रुम ॥ ५४
बहवः पूर्वदैत्येन्द्राः संत्यज्य पृथिवीं गताः ।
कालेनाभ्याहताः सर्वे कालो हि बलवत्तरः ॥ ५५

सर्वैः क्रतुशतैरिष्टं न त्वमेकः शतक्रतुः ।
सर्वे धर्मपराश्चासन्सर्वे सततसत्रिणः ॥ ५६
अन्तरिक्षचराः सर्वे सर्वेऽभिमुखयोधिनः ।
सर्वे संहननोपेताः सर्वे परिघबाहवः ॥ ५७
सर्वे मायाशतधराः सर्वे ते कामचारिणः ।
सर्वे समरमासाद्य न श्रूयन्ते पराजिताः ॥ ५८
सर्वे सत्यव्रतपराः सर्वे कामविहारिणः ।
सर्वे वेदव्रतपराः सर्वे चासन्बहुश्रुताः ॥ ५९
सर्वे संहतमैश्वर्यमीश्वराः प्रतिपेदिरे ।
न चैश्वर्यमदस्तेषां भूतपूर्वो महात्मनाम् ॥ ६०
सर्वे यथार्थदातारः सर्वे विगतमत्सराः ।
सर्वे सर्वेषु भूतेषु यथावत्प्रतिपेदिरे ॥ ६१
सर्वे दाक्षायणीपुत्राः प्राजापत्या महाबलाः ।
ज्वलन्तः प्रतपन्तश्च कालेन प्रतिसंहृताः ॥ ६२
त्वं चैवेमां यदा भुक्त्वा पृथिवीं त्यक्ष्यसे पुनः ।
न शक्ष्यसि तदा शक्र नियन्तुं शोकमात्मनः ॥ ६३
मुञ्चेच्छां कामभोगेषु मुञ्चेमं श्रीभवं मदम् ।
एवं स्वराज्यनाशे त्वं शोकं संप्रसहिष्यसि ॥ ६४
शोककाले शुचो मा त्वं हर्षकाले च मा हृषः ।
अतीतानागते हित्वा प्रत्युत्पन्नेन वर्तय ॥ ६५
मां चेदभ्यागतः कालः सदायुक्तमतन्द्रितम् ।
क्षमस्व नचिरादिन्द्र त्वामप्युपगमिष्यति ॥ ६६
त्रासयन्निव देवेन्द्र वाग्भिस्तक्षसि मामिह ।
संयते मयि नूनं त्वमात्मानं बहु मन्यसे ॥ ६७
कालः प्रथममायान्मां पश्चात्त्वामनुधावति ।
तेन गर्जसि देवेन्द्र पूर्वं कालहते मयि ॥ ६८
को हि स्थातुमलं लोके क्रुद्धस्य मम संयुगे ।
कालस्तु बलवान्प्राप्तस्तेन तिष्ठसि वासव ॥ ६९
यत्तद्वर्षसहस्रान्तं पूर्णं भवितुमर्हति ।
यथा मे सर्वगात्राणि नस्वस्थानि हतौजसः ॥ ७०
अहमैन्द्राच्च्युतः स्थानात्त्वमिन्द्रः प्रकृतो दिवि ।
सुचित्रे जीवलोकेऽस्मिन्नुपास्यः कालपर्ययात् ॥ ७१
किं हि कृत्वा त्वमिन्द्रोऽद्य किं हि कृत्वा च्युता वयम् ।
कालः कर्ता विकर्ता च सर्वमन्यदकारणम् ॥ ७२
नाशं विनाशमैश्वर्यं सुखदुःखे भवाभवौ ।
विद्वान्प्राप्यैवमत्यर्थं न प्रहृष्येन्न च व्यथेत् ॥ ७३
त्वमेव हीन्द्र वेत्थास्मान्वेदाहं त्वां च वासव ।
विकत्थसे मां किं बद्धं कालेन निरपत्रप ॥ ७४
त्वमेव हि पुरा वेत्थ यत्तदा पौरुषं मम ।
समरेषु च विक्रान्तं पर्याप्तं तन्निदर्शनम् ॥ ७५
आदित्याश्चैव रुद्राश्च साध्याश्च वसुभिः सह ।
मया विनिर्जिताः सर्वे मरुतश्च शचीपते ॥ ७६
त्वमेव शक्र जानासि देवासुरसमागमे ।
समेता विबुधा भग्नास्तरसा समरे मया ॥ ७७
पर्वताश्चासकृत्क्षिप्ताः सवनाः सवनौकसः ।
सटङ्कशिखरा घोराः समरे मूर्ध्नि ते मया ॥ ७८
किं नु शक्यं मया कर्तुं यत्कालो दुरतिक्रमः ।
न हि त्वां नोत्सहे हन्तुं सवज्रमपि मुष्टिना ॥ ७९
न तु विक्रमकालोऽयं क्षमाकालोऽयमागतः ।
तेन त्वा मर्षये शक्र दुर्मर्षणतरस्त्वया ॥ ८०
त्वं मा परिणते काले परीतं कालवह्निना ।
नियतं कालपाशेन बद्धं शक्र विकत्थसे ॥ ८१
अयं स पुरुषः श्यामो लोकस्य दुरतिक्रमः ।
बद्ध्वा तिष्ठति मां रौद्रः पशुं रशनया यथा ॥ ८२
लाभालाभौ सुखं दुःखं कामक्रोधौ भवाभवौ ।
वधो बन्धः प्रमोक्षश्च सर्वं कालेन लभ्यते ॥ ८३
नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुः ।
सोऽयं पचति कालो मां वृक्षे फलमिवागतम् ॥ ८४
यान्येव पुरुषः कुर्वन्सुखैः कालेन युज्यते ।
पुनस्तान्येव कुर्वाणो दुःखैः कालेन युज्यते ॥ ८५

न च कालेन कालज्ञः स्पृष्टः शोचितुमर्हति ।
तेन शक्र न शोचामि नास्ति शोके सहायता ॥८६
यदा हि शोचतां शोको व्यसनं नापकर्षति ।
सामर्थ्यं शोचतो नास्ति नाद्य शोचाम्यहं ततः॥८७
एवमुक्तः सहस्राक्षो भगवान्पाकशासनः ।
प्रतिसंहृत्य संरम्भमित्युवाच शतक्रतुः ॥ ८८
सवज्रमुद्यतं बाहुं दृष्ट्वा पाशांश्च वारुणान् ।
कस्येह न व्यथेद्बुद्धिर्मृत्योरपि जिघांसतः ॥ ८९
सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी ।
ब्रुवन्न व्यथसे स त्वं वाक्यं सत्यपराक्रम ॥ ९०
को हि विश्वासमर्थेषु शरीरे वा शरीरभृत् ।
कर्तुमुत्सहते लोके दृष्ट्वा संप्रस्थितं जगत् ॥ ९१
अहमप्येवमेवैनं लोकं जानाम्यशाश्वतम् ।
कालाग्नावाहितं घोरे गुह्ये सततगेऽक्षरे ॥ ९२
न चात्र परिहारोऽस्ति कालस्पृष्टस्य कस्यचित् ।
सूक्ष्माणां महतां चैव भूतानां परिपच्यताम् ॥ ९३
अनीशस्याप्रमत्तस्य भूतानि पचतः सदा ।
अनिवृत्तस्य कालस्य क्षयं प्राप्तो न मुच्यते ॥ ९४
अप्रमत्तः प्रमत्तेषु कालो जागर्ति देहिषु ।
प्रयत्नेनाप्यतिक्रान्तो दृष्टपूर्वो न केनचित् ॥ ९५
पुराणः शाश्वतो धर्मः सर्वप्राणभृतां समः ।
कालो न परिहार्यश्च न चास्यास्ति व्यतिक्रमः ॥९६
अहोरात्रांश्च मासांश्च क्षणान्काष्ठाः कला लवान् ।
संपिण्डयति नः कालो वृद्धिं वार्धुषिको यथा ॥९७
इदमद्य करिष्यामि श्वः कर्तास्मीति वादिनम् ।
कालो हरति संप्राप्तो नदीवेग इवोडुपम् ॥ ९८
इदानीं तावदेवासौ मया दृष्टः कथं मृतः ।
इति कालेन ह्रियतां प्रलापः श्रूयते नृणाम् ॥ ९९
नश्यन्त्यर्थास्तथा भोगाः स्थानमैश्वर्यमेव च ।
अनित्यमध्रुवं सर्वं व्यवसायो हि दुष्करः ।
उच्छ्राया विनिपातान्ता भावोऽभावस्थ एव च ॥
सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी ।
अहमासं पुरा चेति मनसापि न बुध्यसे ॥ १०१
कालेनाक्रम्य लोकेऽस्मिन्पच्यमाने बलीयसा ।
अज्येष्ठमकनिष्ठं च क्षिप्यमाणो न बुध्यसे ॥१०२
ईर्ष्याभिमानलोभेषु कामक्रोधभयेषु च ।
स्पृहामोहाभिमानेषु लोकः सक्तो विमुह्यति ॥१०३
भवांस्तु भावतत्त्वज्ञो विद्वाञ्ज्ञानतपोन्वितः ।
कालं पश्यति सुव्यक्तं पाणावामलकं यथा ॥१०४
कालचारित्रतत्त्वज्ञः सर्वशास्त्रविशारदः ।
वैरोचने कृतात्मासि स्पृहणीयो विजानताम् ॥१०५
सर्वलोको ह्ययं मन्ये बुद्ध्या परिगतस्त्वया ।
विहरन्सर्वतोमुक्तो न क्वचित्परिषज्जसे ॥ १०६
रजश्च हि तमश्च त्वा स्पृशतो न जितेन्द्रियम् ।
निष्प्रीतिं नष्टसंतापं त्वमात्मानमुपाससे ॥ १०७
सुहृदं सर्वभूतानां निर्वैरं शान्तमानसम् ।
दृष्ट्वा त्वां मम संजाता त्वय्यनुक्रोशिनी मतिः ॥
नाहमेतादृशं बुद्धं हन्तुमिच्छामि बन्धने ।
आनृशंस्यं परो धर्मो अनुक्रोशस्तथा त्वया ॥१०९
मोक्ष्यन्ते वारुणाः पाशास्तवेमे कालपर्ययात् ।
प्रजानामपचारेण स्वस्ति तेऽस्तु महासुर ॥ ११०
यदा श्वश्रूं स्नुषा वृद्धां परिचारेण योक्ष्यते ।
पुत्रश्च पितरं मोहात्प्रेषयिष्यति कर्मसु ॥ १११
ब्राह्मणैः कारयिष्यन्ति वृषलाः पादधावनम् ।
शूद्राश्च ब्राह्मणीं भार्यामुपयास्यन्ति निर्भयाः ॥११२
वियोनिषु च बीजानि मोक्ष्यन्ते पुरुषा यदा ।
संकरं कांस्यभाण्डैश्च बलिं चापि कुपात्रकैः ॥११३
चातुर्वर्ण्यं यदा कृत्स्नमुन्मर्यादं भविष्यति ।
एकैकस्ते तदा पाशः क्रमशः प्रतिमोक्ष्यते ॥ ११४
अस्मत्तस्ते भयं नास्ति समयं प्रतिपालय ।

सुखी भव निराबाधः स्वस्थचेता निरामयः ॥ ११५
तमेवमुक्त्वा भगवाञ्शतक्रतुः
प्रतिप्रयातो गजराजवाहनः ।
विजित्य सर्वानसुरान्सुराधिपो
ननन्द हर्षेण बभूव चैकराट् ॥ ११६
महर्षयस्तुष्टुवुरञ्जसा च तं
वृषाकपिं सर्वचराचरेश्वरम् ।
हिमापहो हव्यमुदावहंस्त्वरं-
स्तथामृतं चार्पितमीश्वराय ह ॥ ११७
द्विजोत्तमैः सर्वगतैरभिष्टुतो
विदीप्ततेजा गतमन्युरीश्वरः ।
प्रशान्तचेता मुदितः स्वमालयं
त्रिविष्टपं प्राप्य मुमोद वासवः ॥ ११८

इति श्रीमहाभारते शान्तिपर्वणि
विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥

२२१

युधिष्ठिर उवाच ।

पूर्वरूपाणि मे राजन्पुरुषस्य भविष्यतः ।
पराभविष्यतश्चैव त्वं मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

मन एव मनुष्यस्य पूर्वरूपाणि शंसति ।
भविष्यतश्च भद्रं ते तथैव नभविष्यतः ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
श्रिया शक्रस्य संवादं तन्निबोध युधिष्ठिर ॥ ३
महतस्तपसो व्युष्ट्या पश्यँल्लोकौ परावरौ ।
सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः ॥ ४
ब्रह्मैवामितदीप्तौजाः शान्तपाप्मा महातपाः ।
विचचार यथाकामं त्रिषु लोकेषु नारदः ॥ ५
कदाचित्प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचिः ।
ध्रुवद्वारभवां गङ्गां जगामावततार च ॥ ६
सहस्रनयनश्चापि वज्री शम्बरपाकहा ।
तस्या देवर्षिजुष्टायास्तीरमभ्याजगाम ह ॥ ७
तावाप्लुत्य यतात्मानौ कृतजप्यौ समासतुः ।
नद्याः पुलिनमासाद्य सूक्ष्मकाञ्चनवालुकम् ॥ ८
पुण्यकर्मभिराख्याता देवर्षिकथिताः कथाः ।
चक्रतुस्तौ कथाशीलौ शुचिसंहृष्टमानसौ ।
पूर्ववृत्तव्यपेतानि कथयन्तौ समाहितौ ॥ ९
अथ भास्करमुद्यन्तं रश्मिजालपुरस्कृतम् ।
पूर्णमण्डलमालोक्य तावुत्थायोपतस्थतुः ॥ १०
अभितस्तूदयन्तं तमर्कमर्कमिवापरम् ।
आकाशे ददृशे ज्योतिरुद्यतार्चिःसमप्रभम् ॥ ११
तयोः समीपं संप्राप्तं प्रत्यदृश्यत भारत ।
तत्सुपर्णार्कचरितमास्थितं वैष्णवं पदम् ।
भाभिरप्रतिमं भाति त्रैलोक्यमवभासयत् ॥ १२
दिव्याभिरूपशोभाभिरप्सरोभिः पुरस्कृताम् ।
बृहतीमंशुमत्प्रख्यां बृहद्भानोरिवार्चिषम् ॥ १३
नक्षत्रकल्पाभरणां ताराभक्तिसमस्रजम् ।
श्रियं ददृशतुः पद्मां साक्षात्पद्मतलस्थिताम् ॥ १४
सावरुह्य विमानाग्रादङ्गनानामनुत्तमा ।
अभ्यगच्छत्त्रिलोकेशं शक्रं चर्षिं च नारदम् ॥ १५
नारदानुगतः साक्षान्मघवांस्तामुपागमत् ।
कृताञ्जलिपुटो देवीं निवेद्यात्मानमात्मना ॥ १६
चक्रे चानुपमां पूजां तस्याश्चापि स सर्ववित् ।
देवराजः श्रियं राजन्वाक्यं चेदमुवाच ह ॥ १७
का त्वं केन च कार्येण संप्राप्ता चारुहासिनि ।
कुतश्चागम्यते सुभ्रु गन्तव्यं क्व च ते शुभे ॥ १८

श्रीरुवाच ।

पुण्येषु त्रिषु लोकेषु सर्वे स्थावरजङ्गमाः ।
ममात्मभावमिच्छन्तो यतन्ते परमात्मना ॥ १९
साहं वै पङ्कजे जाता सूर्यरश्मिविबोधिते ।

भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी ॥ २०
अहं लक्ष्मीरहं भूतिः श्रीश्चाहं बलसूदन ।
अहं श्रद्धा च मेधा च सन्नतिर्विजितिः स्थितिः ॥
अहं धृतिरहं सिद्धिरहं त्विड्भूतिरेव च ।
अहं स्वाहा स्वधा चैव संस्तुतिर्नियतिः कृतिः ॥२२
राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च ।
निवासे धर्मशीलानां विषयेषु पुरेषु च ॥ २३
जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि ।
निवसामि मनुष्येन्द्रे सदैव बलसूदन ॥ २४
धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि ।
प्रश्रिते दानशीले च सदैव निवसाम्यहम् ॥ २५
असुरेष्ववसं पूर्वं सत्यधर्मनिबन्धना ।
विपरीतांस्तु तान्बुद्ध्वा त्वयि वासमरोचयम् ॥ २६

शक्र उवाच ।

कथंवृत्तेषु दैत्येषु त्वमवात्सीर्वरानने ।
दृष्ट्वा च किमिहागास्त्वं हित्वा दैतेयदानवान् ॥२७

श्रीरुवाच ।

स्वधर्ममनुतिष्ठत्सु धैर्यादचलितेषु च ।
स्वर्गमार्गाभिरामेषु सत्त्वेषु निरता ह्यहम् ॥ २८
दानाध्ययनयज्ञेज्या गुरुदैवतपूजनम् ।
विप्राणामतिथीनां च तेषां नित्यमवर्तत ॥ २९
सुसंमृष्टगृहाश्चासञ्जितस्त्रीका हुताग्नयः ।
गुरुशुश्रूषवो दान्ता ब्रह्मण्याः सत्यवादिनः ॥ ३०
श्रद्दधाना जितक्रोधा दानशीलानसूयकाः ।
भृतपुत्रा भृतामात्या भृतदारा ह्यनीर्षवः ॥ ३१
अमर्षणा न चान्योन्यं स्पृहयन्ति कदाचन ।
न च जातूपतप्यन्ते धीराः परसमृद्धिभिः ॥ ३२
दातारः संगृहीतार आर्याः करुणवेदिनः ।
महाप्रसादा ऋजवो दृढभक्ता जितेन्द्रियाः ॥ ३३
संतुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः ।
यथार्थमानार्थकरा ह्रीनिषेधा यतव्रताः ॥ ३४
नित्यं पर्वसु सुस्नाताः स्वनुलिप्ताः स्वलंकृताः ।
उपवासतपःशीलाः प्रतीता ब्रह्मवादिनः ॥ ३५
नैनानभ्युदियात्सूर्यो न चाप्यासन्प्रगेनिशाः ।
रात्रौ दधि च सक्तूंश्च नित्यमेव व्यवर्जयन् ॥३६
काल्यं घृतं चान्ववेक्षन्प्रयता ब्रह्मचारिणः ।
मङ्गलानपि चापश्यन्ब्राह्मणांश्चाप्यपूजयन् ॥ ३७
सदा हि ददतां धर्मः सदा चाप्रतिगृह्णताम् ।
अर्धं च रात्र्याः स्वपतां दिवा चास्वपतां तथा ॥३८
कृपणानाथवृद्धानां दुर्बलातुरयोषिताम् ।
दायं च संविभागं च नित्यमेवानुमोदताम् ॥ ३९
विषण्णं त्रस्तमुद्विग्नं भयार्तं व्याधिपीडितम् ।
हृतस्वं व्यसनार्तं च नित्यमाश्वासयन्ति ते ॥ ४०
धर्ममेवान्ववर्तन्त न हिंसन्ति परस्परम् ।
अनुकूलाश्च कार्येषु गुरुवृद्धोपसेविनः ॥ ४१
पितृदेवातिथींश्चैव यथावत्तेऽभ्यपूजयन् ।
अवशेषाणि चाश्नन्ति नित्यं सत्यतपोरताः ॥ ४२
नैकेऽश्नन्ति सुसंपन्नं न गच्छन्ति परस्त्रियम् ।
सर्वभूतेष्ववर्तन्त यथात्मनि दयां प्रति ॥ ४३
नैवाकाशे न पशुषु नायोनौ न च पर्वसु ।
इन्द्रियस्य विसर्गं तेऽरोचयन्त कदाचन ॥ ४४
नित्यं दानं तथा दाक्ष्यमार्जवं चैव नित्यदा ।
उत्साहश्चानहंकारः परमं सौहृदं क्षमा ॥ ४५
सत्यं दानं तपः शौचं कारुण्यं वागनिष्ठुरा ।
मित्रेषु चानभिद्रोहः सर्वं तेष्वभवत्प्रभो ॥ ४६
निद्रा तन्द्रीरसंप्रीतिरसूया चानवेक्षिता ।
अरतिश्च विषादश्च न स्पृहा चाविशन्त तान् ॥४७
साहमेवंगुणेष्वेव दानवेष्ववसं पुरा ।
प्रजासर्गमुपादाय नैकं युगविपर्ययम् ॥ ४८
ततः कालविपर्यासे तेषां गुणविपर्ययात् ।

अपश्यं विगतं धर्मं कामक्रोधवशात्मनाम् ॥ ४९
सभासदां ते वृद्धानां सत्याः कथयतां कथाः ।
प्राहसन्नभ्यसूयंश्च सर्ववृद्धान्गुणावराः ॥ ५०
यूनः सहसमासीनान्वृद्धानभिगतान्सतः ।
नाभ्युत्थानाभिवादाभ्यां यथापूर्वमपूजयन् ॥ ५१
वर्तयन्त्येव पितरि पुत्राः प्रभवताऽऽत्मनः ।
अमित्रभृत्यतां प्राप्य ख्यापयन्तोऽनपत्रपाः ॥ ५२
तथा धर्मादपेतेन कर्मणा गर्हितेन ये ।
महतः प्राप्नुवन्त्यर्थांस्तेष्वेषामभवत्स्पृहा ॥ ५३
उच्चैश्चाप्यवदन्रात्रौ नीचैस्तत्राग्निरज्वलत् ।
पुत्राः पितॄनभ्यवदन्भार्याश्चाभ्यवदन्पतीन् ॥ ५४
मातरं पितरं वृद्धमाचार्यमतिथिं गुरुम् ।
गुरुवन्नाभ्यनन्दन्त कुमारान्नान्वपालयन् ॥ ५५
भिक्षां बलिमदत्त्वा च स्वयमन्नानि भुञ्जते ।
अनिष्ट्वा संविभज्याथ पितृदेवातिथीन्गुरून् ॥ ५६
न शौचमनुरुध्यन्त तेषां सूदजनास्तथा ।
मनसा कर्मणा वाचा भक्तमासीदनावृतम् ॥ ५७
विप्रकीर्णानि धान्यानि काकमूषकभोजनम् ।
अपावृतं पयोऽतिष्ठदुच्छिष्टाश्चास्पृशन्घृतम् ॥ ५८
कुद्दालपाटीपटकं प्रकीर्णं कांस्यभाजनम् ।
द्रव्योपकरणं सर्वं नान्ववैक्षत्कुटुम्बिनी ॥ ५९
प्राकारागारविध्वंसान्न स्म ते प्रतिकुर्वते ।
नाद्रियन्ते पशून्बद्ध्वा यवसेनोदकेन च ॥ ६०
बालानां प्रेक्षमाणानां स्वयं भक्षानभक्षयन् ।
तथा भृत्यजनं सर्वं पर्यश्नन्ति च दानवाः ॥ ६१
पायसं कृसरं मांसमपूपानथ शष्कुलीः ।
अपाचयन्नात्मनोऽर्थे वृथामांसान्यभक्षयन् ॥ ६२
उत्सूर्यशायिनश्चासन्सर्वे चासन्प्रगेनिशाः ।
अवर्तन्कलहाश्चात्र दिवारात्रं गृहेगृहे ॥ ६३
अनार्याश्चार्यमासीनं पर्युपासन्न तत्र ह ।
आश्रमस्थान्विकर्मस्थाः प्रद्विषन्ति परस्परम् ।
संकराश्चाप्यवर्तन्त न च शौचमवर्तत ॥ ६४
ये च वेदविदो विप्रा विस्पष्टमनृचश्च ये ।
निरन्तरविशेषास्ते बहुमानावमानयोः ॥ ६५
हावमाभरणं वेषं गतिं स्थितिमवेक्षितुम् ।
असेवन्त भुजिष्या वै दुर्जनाचरितं विधिम् ॥ ६६
स्त्रियः पुरुषवेषेण पुंसः स्त्रीवेषधारिणः ।
क्रीडारतिविहारेषु परां मुदमवाप्नुवन् ॥ ६७
प्रभवद्भिः पुरा दायानर्हेभ्यः प्रतिपादितान् ।
नाभ्यवर्तन्त नास्तिक्याद्वर्तन्तः संभवेष्वपि ॥ ६८
मित्रेणाभ्यर्थितं मित्रमर्थे संशयिते क्वचित् ।
वालकोट्यग्रमात्रेण स्वार्थेनाघ्नत तद्वसु ॥ ६९
परस्वादानरुचयो विपण्यव्यवहारिणः ।
अदृश्यन्तार्यवर्णेषु शूद्राश्चापि तपोधनाः ॥ ७०
अधीयन्तेऽव्रताः केचिद्वृथाव्रतमथापरे ।
अशुश्रूषुर्गुरोः शिष्यः कश्चिच्छिष्यसखो गुरुः ॥
पिता चैव जनित्री च श्रान्तौ वृत्तोत्सवाविव ।
अप्रभुत्वे स्थितौ वृद्धावन्नं प्रार्थयतः सुतान् ॥ ७२
तत्र वेदविदः प्राज्ञा गाम्भीर्ये सागरोपमाः ।
कृष्यादिष्वभवन्सक्ता मूर्खाः श्राद्धान्यभुञ्जत ॥ ७३
प्रातः प्रातश्च सुप्रश्नं कल्पनं प्रेषणक्रियाः ।
शिष्यानुप्रहितास्तस्मिन्नकुर्वन्गुरवश्च ह ॥ ७४
श्वश्रूश्वशुरयोरग्रे वधूः प्रेष्यानशासत ।
अन्वशासच्च भर्तारं समाहूयाभिजल्पती ॥ ७५
प्रयत्नेनापि चारक्षच्चित्तं पुत्रस्य वै पिता ।
व्यभजंश्चापि संरम्भाद्दुःखवासं तथावसन् ॥ ७६
अग्निदाहेन चोरैर्वा राजभिर्वा हृतं धनम् ।
दृष्ट्वा द्वेषात्प्राहसन्त सुहृत्संभाविता ह्यपि ॥ ७७
कृतघ्ना नास्तिकाः पापा गुरुदाराभिमर्शिनः ।
अभक्ष्यभक्षणरता निर्मर्यादा हतत्विषः ॥ ७८

तेष्वेवमादीनाचारानाचरत्सु विपर्यये ।
नाहं देवेन्द्र वत्स्यामि दानवेष्विति मे मतिः ॥७९
तां मां स्वयमनुप्राप्तामभिनन्द शचीपते ।
त्वयार्चितां मां देवेश पुरोधास्यन्ति देवताः ॥८०
यत्राहं तत्र मत्कान्ता मद्विशिष्टा मदर्पणाः ।
सप्त देव्यो मयाष्टम्यो वासं चेष्यन्ति मेऽष्टधा ॥८१
आशा श्रद्धा धृतिः कान्तिर्विजितिः सन्नतिः क्षमा ।
अष्टमी वृत्तिरेतासां पुरोगा पाकशासन ॥ ८२
ताश्चाहं चासुरांस्त्यक्त्वा युष्मद्विषयमागता ।
त्रिदशेषु निवत्स्यामो धर्मनिष्ठान्तरात्मसु ॥ ८३

भीष्म उवाच ।

इत्युक्तवचनां देवीमत्यर्थं तौ ननन्दतुः ।
नारदश्च त्रिलोकर्षिर्वृत्रहन्ता च वासवः ॥ ८४
ततोऽनलसखो वायुः प्रववौ देववेश्मसु ।
इष्टगन्धः सुखस्पर्शः सर्वेन्द्रियसुखावहः ॥ ८५
शुचौ चाभ्यर्चिते देशे त्रिदशाः प्रायशः स्थिताः ।
लक्ष्म्या सहितमासीनं मघवन्तं दिदृक्षवः ॥ ८६
ततो दिवं प्राप्य सहस्रलोचनः
श्रियोपपन्नः सुहृदा सुरर्षिणा ।
रथेन हर्यश्वयुजा सुरर्षभः
सदः सुराणामभिसत्कृतो ययौ ॥ ८७
अथेङ्गितं वज्रधरस्य नारदः
श्रियाश्च देव्या मनसा विचारयन् ।
श्रियै शशंसामरदृष्टपौरुषः
शिवेन तत्रागमनं महर्द्धिमत् ॥ ८८
ततोऽमृतं द्यौः प्रववर्ष भास्वती
पितामहस्यायतने स्वयंभुवः ।
अनाहता दुन्दुभयश्च नेदिरे
तथा प्रसन्नाश्च दिशश्चकाशिरे ॥ ८९
यथर्तु सस्येषु ववर्ष वासवो
न धर्ममार्गाद्विचचाल कश्चन ।
अनेकरत्नाकरभूषणा च भूः
सुघोषघोषा भुवनौकसां जये ॥ ९०
क्रियाभिरामा मनुजा यशस्विनो
बभुः शुभे पुण्यकृतां पथि स्थिताः ।
नरामराः किंनरयक्षराक्षसाः
समृद्धिमन्तः सुखिनो यशस्विनः ॥ ९१
न जात्वकाले कुसुमं कुतः फलं
पपात वृक्षात्पवनेरितादपि ।
रसप्रदाः कामदुघाश्च धेनवो
न दारुणा वाग्विचचार कस्यचित् ॥ ९
इमां सपर्यां सह सर्वकामदैः
श्रियाश्च शक्रप्रमुखैश्च दैवतैः ।
पठन्ति ये विप्रसदः समागमे
समृद्धकामाः श्रियमाप्नुवन्ति ते ॥ ९३
त्वया कुरूणां वर यत्प्रचोदितं
भवाभवस्येह परं निदर्शनम् ।
तदद्य सर्वं परिकीर्तितं मया
परीक्ष्य तत्त्वं परिगन्तुमर्हसि ॥ ९४

इति श्रीमहाभारते शान्तिपर्वणि
एकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥

२२२

युधिष्ठिर उवाच ।

किंशीलः किंसमाचारः किंविद्यः किंपरायणः ।
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ १

भीष्म उवाच ।

मोक्षधर्मेषु नियतो लघ्वाहारो जितेन्द्रियः ।
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
जैगीषव्यस्य संवादमसितस्य च भारत ॥ ३

जैगीषव्यं महाप्राज्ञं धर्माणामागतागमम् ।
अक्रुध्यन्तमहृष्यन्तमसितो देवलोऽब्रवीत् ॥ ४
न प्रीयसे वन्द्यमानो निन्द्यमानो न कुप्यसि ।
का ते प्रज्ञा कुतश्चैषा किं चैतस्याः परायणम् ॥ ५
इति तेनानुयुक्तः स तमुवाच महातपाः ।
महद्वाक्यमसंदिग्धं पुष्कलार्थपदं शुचिः ॥ ६
या गतिर्या परा निष्ठा या शान्तिः पुण्यकर्मणाम् ।
तां तेऽहं संप्रवक्ष्यामि यन्मां पृच्छसि वै द्विज ॥७
निन्दत्सु च समो नित्यं प्रशंसत्सु च देवल ।
निह्नुवन्ति च ये तेषां समयं सुकृतं च ये ॥ ८
उक्ताश्च न विवक्षन्ति वक्तारमहिते रतम् ।
प्रतिहन्तुं न चेच्छन्ति हन्तारं वै मनीषिणः ॥ ९
नाप्राप्तमनुशोचन्ति प्राप्तकालानि कुर्वते ।
न चातीतानि शोचन्ति न चैनान्प्रतिजानते ॥१०
संप्राप्तानां च पूज्यानां कामादर्थेषु देवल ।
यथोपपत्तिं कुर्वन्ति शक्तिमन्तः कृतव्रताः ॥ ११
पक्वविद्या महाप्राज्ञा जितक्रोधा जितेन्द्रियाः ।
मनसा कर्मणा वाचा नापराध्यन्ति कस्यचित् ॥१२
अनीर्षवो न चान्योन्यं विहिंसन्ति कदाचन ।
न च जातूपतप्यन्ते धीराः परसमृद्धिभिः ॥ १३
निन्दाप्रशंसे चात्यर्थं न वदन्ति परस्य ये ।
न च निन्दाप्रशंसाभ्यां विक्रियन्ते कदाचन ॥१४
सर्वतश्च प्रशान्ता ये सर्वभूतहिते रताः ।
न क्रुध्यन्ति न हृष्यन्ति नापराध्यन्ति कस्यचित् ।
विमुच्य हृदयग्रन्थींश्चङ्क्रम्यन्ते यथासुखम् ॥ १५
न येषां बान्धवाः सन्ति ये चान्येषां न बान्धवाः ।
अमित्राश्च न सन्त्येषां ये चामित्रा न कस्यचित् ॥
य एवं कुर्वते मर्त्याः सुखं जीवन्ति सर्वदा ।
धर्ममेवानुवर्तन्ते धर्मज्ञा द्विजसत्तम ।
ये ह्यतो विच्युता मार्गात्ते हृष्यन्त्युद्विजन्ति च ॥
आस्थितस्तमहं मार्गमसूयिष्यामि कं कथम् ।
निन्द्यमानः प्रशस्तो वा हृष्येयं केन हेतुना ॥ १८
यद्यदिच्छन्ति तन्मार्गमभिगच्छन्ति मानवाः ।
न मे निन्दाप्रशंसाभ्यां ह्रासवृद्धी भविष्यतः ॥१९
अमृतस्येव संतृप्येदवमानस्य तत्त्ववित् ।
विषस्येवोद्विजेन्नित्यं संमानस्य विचक्षणः ॥ २०
अवज्ञातः सुखं शेते इह चामुत्र चोभयोः ।
विमुक्तः सर्वपापेभ्यो योऽवमन्ता स बध्यते ॥२१
परां गतिं च ये केचित्प्रार्थयन्ति मनीषिणः ।
एतद्व्रतं समाश्रित्य सुखमेधन्ति ते जनाः ॥ २२
सर्वतश्च समाहृत्य क्रतून्सर्वाञ्जितेन्द्रियः ।
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ २३
नास्य देवा न गन्धर्वा न पिशाचा न राक्षसाः ।
पदमन्ववरोहन्ति प्राप्तस्य परमां गतिम् ॥ २४

इति श्रीमहाभारते शान्तिपर्वणि
द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥

२२३

युधिष्ठिर उवाच ।

प्रियः सर्वस्य लोकस्य सर्वसत्त्वाभिनन्दिता ।
गुणैः सर्वैरुपेतश्च को न्वस्ति भुवि मानवः ॥ १

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि पृच्छतो भरतर्षभ ।
उग्रसेनस्य संवादं नारदे केशवस्य च ॥ २

उग्रसेन उवाच ।

पश्य संकल्पते लोको नारदस्य प्रकीर्तने ।
मन्ये स गुणसंपन्नो ब्रूहि तन्मम पृच्छतः ॥ ३

वासुदेव उवाच ।

कुकुराधिप यान्मन्ये शृणु तान्मे विवक्षतः ।
नारदस्य गुणान्साधून्संक्षेपेण नराधिप ॥ ४

न चारित्रनिमित्तोऽस्याहंकारो देहपातनः ।
अभिन्नश्रुतचारित्रस्तस्मात्सर्वत्र पूजितः ॥ ५
तपस्वी नारदो बाढं वाचि नास्य व्यतिक्रमः ।
कामाद्वा यदि वा लोभात्तस्मात्सर्वत्र पूजितः ॥ ६
अध्यात्मविधितत्त्वज्ञः क्षान्तः शक्तो जितेन्द्रियः ।
ऋजुश्च सत्यवादी च तस्मात्सर्वत्र पूजितः ॥ ७
तेजसा यशसा बुद्ध्या नयेन विनयेन च ।
जन्मना तपसा वृद्धस्तस्मात्सर्वत्र पूजितः ॥ ८
सुखशीलः सुसंभोगः सुभोज्यः स्वादरः शुचिः ।
सुवाक्यश्चाप्यनीर्ष्यश्च तस्मात्सर्वत्र पूजितः ॥ ९
कल्याणं कुरुते बाढं पापमस्मिन्न विद्यते ।
न प्रीयते परानर्थैस्तस्मात्सर्वत्र पूजितः ॥ १०
वेदश्रुतिभिराख्यानैरर्थानभिजिगीषते ।
तितिक्षुरनवज्ञश्च तस्मात्सर्वत्र पूजितः ॥ ११
समत्वाद्धि प्रियो नास्ति नाप्रियश्च कथंचन ।
मनोनुकूलवादी च तस्मात्सर्वत्र पूजितः ॥ १२
बहुश्रुतश्चित्रकथः पण्डितोऽनलसोऽशठः ।
अदीनोऽक्रोधनोऽलुब्धस्तस्मात्सर्वत्र पूजितः ॥ १३
नार्थे न धर्मे कामे वा भूतपूर्वोऽस्य विग्रहः ।
दोषाश्चास्य समुच्छिन्नास्तस्मात्सर्वत्र पूजितः ॥ १४
दृढभक्तिरनिन्द्यात्मा श्रुतवाननृशंसवान् ।
वीतसंमोहदोषश्च तस्मात्सर्वत्र पूजितः ॥ १५
असक्तः सर्वसङ्गेषु सक्तात्मेव च लक्ष्यते ।
अदीर्घसंशयो वाग्मी तस्मात्सर्वत्र पूजितः ॥ १६
समाधिर्नास्य मानार्थे नात्मानं स्तौति कर्हिचित् ।
अनीर्ष्युर्दृढसंभाषस्तस्मात्सर्वत्र पूजितः ॥ १७
लोकस्य विविधं वृत्तं प्रकृतेश्चाप्यकुत्सयन् ।
संसर्गविद्याकुशलस्तस्मात्सर्वत्र पूजितः ॥ १८
नासूयत्यागमं कंचित्स्वं तपो नोपजीवति ।
अवन्ध्यकालो वश्यात्मा तस्मात्सर्वत्र पूजितः ॥१९
कृतश्रमः कृतप्रज्ञो न च तृप्तः समाधितः ।
नियमस्थोऽप्रमत्तश्च तस्मात्सर्वत्र पूजितः ॥ २०
सापत्रपश्च युक्तश्च सुनेयः श्रेयसे परैः ।
अभेत्ता परगुह्यानां तस्मात्सर्वत्र पूजितः ॥ २१
न हृष्यत्यर्थलाभेषु नालाभेषु व्यथत्यपि ।
स्थिरबुद्धिरसक्तात्मा तस्मात्सर्वत्र पूजितः ॥ २२
तं सर्वगुणसंपन्नं दक्षं शुचिमकातरम् ।
कालज्ञं च नयज्ञं च कः प्रियं न करिष्यति ॥२३

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥

२२४

युधिष्ठिर उवाच ।

आद्यन्तं सर्वभूतानां श्रोतुमिच्छामि कौरव ।
ध्यानं कर्म च कालं च तथैवायुर्युगे युगे ॥ १
लोकतत्त्वं च कार्त्स्न्येन भूतानामागतिं गतिम् ।
सर्गश्च निधनं चैव कुत एतत्प्रवर्तते ॥ २
यदि तेऽनुग्रहे बुद्धिरस्मास्विह सतां वर ।
एतद्भवन्तं पृच्छामि तद्भवान्प्रब्रवीतु मे ॥ ३
पूर्वं हि कथितं श्रुत्वा भृगुभाषितमुत्तमम् ।
भरद्वाजस्य विप्रर्षेस्ततो मे बुद्धिरुत्तमा ॥ ४
जाता परमधर्मिष्ठा दिव्यसंस्थानसंस्थिता ।
ततो भूयस्तु पृच्छामि तद्भवान्वक्तुमर्हति ॥ ५

भीष्म उवाच ।

अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
जगौ यद्भगवान्व्यासः पुत्राय परिपृच्छते ॥ ६
अधीत्य वेदानखिलान्साङ्गोपनिषदस्तथा ।
अन्विच्छन्नैष्ठिकं कर्म धर्मनैपुणदर्शनात् ॥ ७
कृष्णद्वैपायनं व्यासं पुत्रो वैयासकिः शुकः ।
पप्रच्छ संदेहमिमं छिन्नधर्मार्थसंशयम् ॥ ८
भूतग्रामस्य कर्तारं कालज्ञाने च निश्चयम् ।

ब्राह्मणस्य च यत्कृत्यं तद्भवान्वक्तुमर्हति ॥ ९
तस्मै प्रोवाच तत्सर्वं पिता पुत्राय पृच्छते ।
अतीतानागते विद्वान्सर्वज्ञः सर्वधर्मवित् ॥ १०
अनाद्यन्तमजं दिव्यमजरं ध्रुवमव्ययम् ।
अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे समवर्तत ॥ ११
काष्ठा निमेषा दश पञ्च चैव
त्रिंशत्तु काष्ठा गणयेत्कलां ताम् ।
त्रिंशत्कलाश्चापि भवेन्मुहूर्तो
भागः कलाया दशमश्च यः स्यात् ॥ १२
त्रिंशन्मुहूर्तश्च भवेदहश्च
रात्रिश्च संख्या मुनिभिः प्रणीता ।
मासः स्मृतो रात्र्यहनी च त्रिंश-
त्संवत्सरो द्वादशमास उक्तः ।
संवत्सरं द्वे अयने वदन्ति
संख्याविदो दक्षिणमुत्तरं च ॥ १३
अहोरात्रे विभजते सूर्यो मानुषलौकिके ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥ १४
पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः ।
कृष्णोऽहः कर्मचेष्टायां शुक्लः स्वप्नाय शर्वरी ॥ १५
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥ १६
ये ते रात्र्यहनी पूर्वे कीर्तिते दैवलौकिके ।
तयोः संख्याय वर्षाग्रं ब्राह्मे वक्ष्याम्यहःक्षपे ॥ १७
तेषां संवत्सराग्राणि प्रवक्ष्याम्यनुपूर्वशः ।
कृते त्रेतायुगे चैव द्वापरे च कलौ तथा ॥ १८
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् ।
तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥१९
इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ।
एकापायेन संयान्ति सहस्राणि शतानि च ॥ २०
एतानि शाश्वताँल्लोकान्धारयन्ति सनातनान् ।
एतद्ब्रह्मविदां तात विदितं ब्रह्म शाश्वतम् ॥ २१
चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणागमः कश्चित्परस्तस्य प्रवर्तते ॥ २२
इतरेष्वागमाद्धर्मः पादशस्त्ववरोप्यते ।
चौरिकानृतमायाभिरधर्मश्चोपचीयते ॥ २३
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिष्वेतेषां पादशो ह्रसते वयः ॥ २४
वेदवादाश्चानुयुगं ह्रसन्तीति च नः श्रुतम् ।
आयूंषि चाशिषश्चैव वेदस्यैव च यत्फलम् ॥ २५
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे धर्मा यथाशक्तिकृता इव ॥ २६
तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमम् ।
द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥ २७
एतां द्वादशसाहस्रीं युगाख्यां कवयो विदुः ।
सहस्रं परिवृत्तं तद्ब्राह्मं दिवसमुच्यते ॥ २८
रात्रिस्तावत्तिथी ब्राह्मी तदादौ विश्वमीश्वरः ।
प्रलयेऽध्यात्ममाविश्य सुप्त्वा सोऽन्ते विबुध्यते ॥
सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ ३०
प्रतिबुद्धो विकुरुते ब्रह्माक्षय्यं क्षपाक्षये ।
सृजते च महद्भूतं तस्माद्व्यक्तात्मकं मनः ॥ ३१
ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं जगत् ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥ ३२
अहर्मुखे विबुद्धः सन्सृजते विद्यया जगत् ।
अग्र एव महाभूतमाशु व्यक्तात्मकं मनः ॥ ३३
अभिभूयेह चार्चिष्मद्व्यसृजत्सप्त मानसान् ।
दूरगं बहुधागामि प्रार्थनासंशयात्मकम् ॥ ३४
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया ।
आकाशं जायते तस्मात्तस्य शब्दो गुणो मतः ॥३५
आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः ।

बलवाञ्जायते वायुस्तस्य स्पर्शो गुणो मतः ॥ ३६
वायोरपि विकुर्वाणाज्ज्योतिर्भूतं तमोनुदम् ।
रोचिष्णु जायते तत्र तद्रूपगुणमुच्यते ॥ ३७
ज्योतिषोऽपि विकुर्वाणाद्भवन्त्यापो रसात्मिकाः ।
अद्भ्यो गन्धगुणा भूमिः पूर्वैषा सृष्टिरुच्यते ॥३८
गुणाः पूर्वस्य पूर्वस्य प्राप्नुवन्त्युत्तरोत्तरम् ।
तेषां यावत्तिथं यद्यत्तत्तत्तावद्गुणं स्मृतम् ॥ ३९
उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणात् ।
पृथिव्यामेव तं विद्यादापो वायुं च संश्रितम् ॥४०
एते तु सप्त पुरुषा नानावीर्याः पृथक्पृथक् ।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य सर्वतः ॥ ४१
ते समेत्य महात्मानमन्योन्यमभिसंश्रिताः ।
शरीराश्रयणं प्राप्तास्ततः पुरुष उच्यते ॥ ४२
श्रयणाच्छरीरं भवति मूर्तिमत्षोडशात्मकम् ।
तदाविशन्ति भूतानि महान्ति सह कर्मणा ॥ ४३
सर्वभूतानि चादाय तपसश्चरणाय च ।
आदिकर्ता महाभूतं तमेवाहुः प्रजापतिम् ॥ ४४
स वै सृजति भूतानि स एव पुरुषः परः ।
अजो जनयते ब्रह्मा देवर्षिपितृमानवान् ॥ ४५
लोकान्नदीः समुद्रांश्च दिशः शैलान्वनस्पतीन् ।
नरकिंनररक्षांसि वयःपशुमृगोरगान् ।
अव्ययं च व्ययं चैव द्वयं स्थावरजङ्गमम् ॥ ४६
तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे ।
तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥ ४७
हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मे ऋतानृते ।
अतो यन्मन्यते धाता तस्मात्तत्तस्य रोचते ॥ ४८
महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्तिषु ।
विनियोगं च भूतानां धातैव विदधात्युत ॥ ४९
केचित्पुरुषकारं तु प्राहुः कर्मविदो जनाः ।
दैवमित्यपरे विप्राः स्वभावं भूतचिन्तकाः ॥ ५०
पौरुषं कर्म दैवं च फलवृत्तिस्वभावतः ।
त्रय एतेऽपृथग्भूता नविवेकं तु केचन ॥ ५१
एवमेतच्च नैवं च यद्भूतं सृजते जगत् ।
कर्मस्था विषमं ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥५२
तपो निःश्रेयसं जन्तोस्तस्य मूलं दमः शमः ।
तेन सर्वानवाप्नोति यान्कामान्मनसेच्छति ॥ ५३
तपसा तदवाप्नोति यद्भूतं सृजते जगत् ।
स तद्भूतश्च सर्वेषां भूतानां भवति प्रभुः ॥ ५४
ऋषयस्तपसा वेदानध्यैषन्त दिवानिशम् ।
अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ॥ ५५
ऋषीणां नामधेयानि याश्च वेदेषु सृष्टयः ।
शर्वर्यन्तेषु जातानां तान्येवैभ्यो ददाति सः ॥५६
नामभेदस्तपःकर्मयज्ञाख्या लोकसिद्धयः ।
आत्मसिद्धिस्तु वेदेषु प्रोच्यते दशभिः क्रमैः ॥५७
यदुक्तं वेदवादेषु गहनं वेददृष्टिभिः ।
तदन्तेषु यथायुक्तं क्रमयोगेन लक्ष्यते ॥ ५८
कर्मजोऽयं पृथग्भावो द्वंद्वयुक्तो वियोगिनः ।
आत्मसिद्धिस्तु विज्ञाता जहाति प्रायशो बलम् ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ ६०
आरम्भयज्ञाः क्षत्रस्य हविर्यज्ञा विशस्तथा ।
परिचारयज्ञाः शूद्रास्तु तपोयज्ञा द्विजातयः ॥ ६
त्रेतायुगे विधिस्त्वेषां यज्ञानां न कृते युगे ।
द्वापरे विप्लवं यान्ति यज्ञाः कलियुगे तथा ॥ ६
अपृथग्धर्मिणो मर्त्या ऋक्सामानि यजूंषि च ।
काम्यां पुष्टिं पृथग्दृष्ट्वा तपोभिस्तप एव च ॥ ६
त्रेतायां तु समस्तास्ते प्रादुरासन्महाबलाः ।
संयन्तारः स्थावराणां जङ्गमानां च सर्वशः ॥ ६
त्रेतायां संहता ह्येते यज्ञा वर्णास्तथैव च ।
संरोधादायुषस्त्वेते व्यस्यन्ते द्वापरे युगे ॥ ६५

दृश्यन्ते नापि दृश्यन्ते वेदाः कलियुगेऽखिलाः ।
उत्सीदन्ते सयज्ञाश्च केवला धर्मसेतवः ॥ ६६
कृते युगे यस्तु धर्मो ब्राह्मणेषु प्रदृश्यते ।
आत्मवत्सु तपोवत्सु श्रुतवत्सु प्रतिष्ठितः ॥ ६७
अधर्मव्रतसंयोगं यथाधर्मं युगे युगे ।
विक्रियन्ते स्वधर्मस्था वेदवादा यथायुगम् ॥ ६८
यथा विश्वानि भूतानि वृष्ट्या भूयांसि प्रावृषि ।
सृज्यन्ते जङ्गमस्थानि तथा धर्मा युगे युगे ॥ ६९
यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा ब्रह्माहरात्रिषु ॥ ७०
विहितं कालनानात्वमनादिनिधनं तथा ।
कीर्तितं यत्पुरस्तात्ते तत्सूते चात्ति च प्रजाः ॥७१
दधाति प्रभवे स्थानं भूतानां संयमो यमः ।
स्वभावेनैव वर्तन्ते द्वंद्वयुक्तानि भूरिशः ॥ ७२
सर्गः कालः क्रिया वेदाः कर्ता कार्यं क्रिया फलम् ।
प्रोक्तं ते पुत्र सर्वं वै यन्मां त्वं परिपृच्छसि ॥७३
प्रत्याहारं तु वक्ष्यामि शर्वर्यादौ गतेऽहनि ।
यथेदं कुरुतेऽध्यात्मं सुसूक्ष्मं विश्वमीश्वरः ॥ ७४
दिवि सूर्यास्तथा सप्त दहन्ति शिखिनोऽर्चिषा ।
सर्वमेतत्तदार्चिर्भिः पूर्णं जाज्वल्यते जगत् ॥ ७५

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥

२२५

व्यास उवाच ।

पृथिव्यां यानि भूतानि जङ्गमानि ध्रुवाणि च ।
तान्येवाग्रे प्रलीयन्ते भूमित्वमुपयान्ति च ॥ १
ततः प्रलीने सर्वस्मिन्स्थावरे जङ्गमे तथा ।
अकाष्ठा निस्तृणा भूमिर्दृश्यते कूर्मपृष्ठवत् ॥ २
भूमेरपि गुणं गन्धमाप आददते यदा ।
आत्तगन्धा तदा भूमिः प्रलयत्वाय कल्पते ॥ ३
आपस्ततः प्रतिष्ठन्ति ऊर्मिमत्यो महास्वनाः ।
सर्वमेवेदमापूर्य तिष्ठन्ति च चरन्ति च ॥ ४
अपामपि गुणांस्तात ज्योतिराददते यदा ।
आपस्तदा आत्तगुणा ज्योतिष्युपरमन्ति च ॥ ५
यदादित्यं स्थितं मध्ये गूहन्ति शिखिनोऽर्चिषः ।
सर्वमेवेदमर्चिर्भिः पूर्णं जाज्वल्यते नभः ॥ ६
ज्योतिषोऽपि गुणं रूपं वायुराददते यदा ।
प्रशाम्यति तदा ज्योतिर्वायुर्दोधूयते महान् ॥ ७
ततस्तु मूलमासाद्य वायुः संभवमात्मनः ।
अधश्चोर्ध्वं च तिर्यक्च दोधवीति दिशो दश ॥ ८
वायोरपि गुणं स्पर्शमाकाशं ग्रसते यदा ।
प्रशाम्यति तदा वायुः खं तु तिष्ठति नानदत् ॥ ९
आकाशस्य गुणं शब्दमभिव्यक्तात्मकं मनः ।
मनसो व्यक्तमव्यक्तं ब्राह्मः स प्रतिसंचरः ॥ १०
तदात्मगुणमाविश्य मनो ग्रसति चन्द्रमाः ।
मनस्युपरतेऽध्यात्मा चन्द्रमस्यवतिष्ठते ॥ ११
तं तु कालेन महता संकल्पः कुरुते वशे ।
चित्तं ग्रसति संकल्पस्तच्च ज्ञानमनुत्तमम् ॥ १२
कालो गिरति विज्ञानं कालो बलमिति श्रुतिः ।
बलं कालो ग्रसति तु तं विद्वान्कुरुते वशे ॥ १३
आकाशस्य तदा घोषं तं विद्वान्कुरुतेऽऽत्मनि ।
तदव्यक्तं परं ब्रह्म तच्छाश्वतमनुत्तमम् ।
एवं सर्वाणि भूतानि ब्रह्मैव प्रतिसंचरः ॥ १४
यथावत्कीर्तितं सम्यगेवमेतदसंशयम् ।
बोध्यं विद्यामयं दृष्ट्वा योगिभिः परमात्मभिः ॥१५
एवं विस्तारसंक्षेपौ ब्रह्माव्यक्ते पुनः पुनः ।
युगसाहस्रयोरादावह्नो रात्र्यास्तथैव च ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥

२२६

व्यास उवाच ।

भूतग्रामे नियुक्तं यत्तदेतत्कीर्तितं मया ।
ब्राह्मणस्य तु यत्कृत्यं तत्ते वक्ष्यामि पृच्छते ॥ १
जातकर्मप्रभृत्यस्य कर्मणां दक्षिणावताम् ।
क्रिया स्यादा समावृत्तेराचार्ये वेदपारगे ॥ २
अधीत्य वेदानखिलान्गुरुशुश्रूषणे रतः ।
गुरूणामनृणो भूत्वा समावर्तेत यज्ञवित् ॥ ३
आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् ।
आ विमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि ॥ ४
प्रजासर्गेण दारैश्च ब्रह्मचर्येण वा पुनः ।
वने गुरुसकाशे वा यतिधर्मेण वा पुनः ॥ ५
गृहस्थस्त्वेव सर्वेषां चतुर्णां मूलमुच्यते ।
तत्र पक्वकषायो हि दान्तः सर्वत्र सिध्यति ॥ ६
प्रजावाञ्श्रोत्रियो यज्वा मुक्तो दिव्यैस्त्रिभिर्ऋणैः ।
अथान्यानाश्रमान्पश्चात्पूतो गच्छति कर्मभिः ॥ ७
यत्पृथिव्यां पुण्यतमं विद्यास्थानं तदावसेत् ।
यतेत तस्मिन्प्रामाण्यं गन्तुं यशसि चोत्तमे ॥ ८
तपसा वा सुमहता विद्यानां पारणेन वा ।
इज्यया वा प्रदानैर्वा विप्राणां वर्धते यशः ॥ ९
यावदस्य भवत्यस्मिँल्लोके कीर्तिर्यशस्करी ।
तावत्पुण्यकृताँल्लोकाननन्तान्पुरुषोऽश्नुते ॥ १०
अध्यापयेदधीयीत याजयेत यजेत च ।
न वृथा प्रतिगृह्णीयान्न च दद्यात्कथंचन ॥ ११
याज्यतः शिष्यतो वापि कन्यया वा धनं महत् ।
यद्यागच्छेद्यजेद्दद्यान्नैकोऽश्नीयात्कथंचन ॥ १२
गृहमावसतो ह्यस्य नान्यत्तीर्थं प्रतिग्रहात् ।
देवर्षिपितृगुर्वर्थं वृद्धातुरबुभुक्षताम् ॥ १३
अन्तर्हिताभितप्तानां यथाशक्ति बुभूषताम् ।
द्रव्याणामतिशक्त्यापि देयमेषां कृतादपि ॥ १४
अर्हतामनुरूपाणां नादेयं ह्यस्ति किंचन ।
उच्चैःश्रवसमप्यश्वं प्रापणीयं सतां विदुः ॥ १५
अनुनीय तथा काव्यः सत्यसंधो महाव्रतः ।
स्वैः प्राणैर्ब्राह्मणप्राणान्परित्राय दिवं गतः ॥ १६
रन्तिदेवश्च सांकृत्यो वसिष्ठाय महात्मने ।
अपः प्रदाय शीतोष्णा नाकपृष्ठे महीयते ॥ १७
आत्रेयश्चन्द्रदमयोरर्हतोर्विविधं धनम् ।
दत्त्वा लोकान्ययौ धीमाननन्तान्स महीपतिः ॥१८
शिबिरौशीनरोऽङ्गानि सुतं च प्रियमौरसम् ।
ब्राह्मणार्थमुपाकृत्य नाकपृष्ठमितो गतः ॥ १९
प्रतर्दनः काशिपतिः प्रदाय नयने स्वके ।
ब्राह्मणायातुलां कीर्तिमिह चामुत्र चाश्नुते ॥ २०
दिव्यं मृष्टशलाकं तु सौवर्णं परमर्द्धिमत् ।
छत्रं देवावृधो दत्त्वा सराष्ट्रोऽभ्यपतद्दिवम् ॥ २१
सांकृतिश्च तथात्रेयः शिष्येभ्यो ब्रह्म निर्गुणम् ।
उपदिश्य महातेजा गतो लोकाननुत्तमाम् ॥ २२
अम्बरीषो गवां दत्त्वा ब्राह्मणेभ्यः प्रतापवान् ।
अर्बुदानि दशैकं च सराष्ट्रोऽभ्यपतद्दिवम् ॥ २३
सावित्री कुण्डले दिव्ये शरीरं जनमेजयः ।
ब्राह्मणार्थे परित्यज्य जग्मतुर्लोकमुत्तमम् ॥ २४
सर्वरत्नं वृषादर्भो युवनाश्वः प्रियाः स्त्रियः ।
रम्यमावसथं चैव दत्त्वामुं लोकमास्थितः ॥ २५
निमी राष्ट्रं च वैदेहो जामदग्न्यो वसुंधराम् ।
ब्राह्मणेभ्यो ददौ चापि गयश्चोर्वीं सपत्तनाम् ॥२६
अवर्षति च पर्जन्ये सर्वभूतानि चासकृत् ।
वसिष्ठो जीवयामास प्रजापतिरिव प्रजाः ॥ २७
करंधमस्य पुत्रस्तु मरुत्तो नृपतिस्तथा ।
कन्यामङ्गिरसे दत्त्वा दिवमाशु जगाम ह ॥ २८
ब्रह्मदत्तश्च पाञ्चाल्यो राजा बुद्धिमतां वरः ।
निधिं शङ्खं द्विजाग्र्येभ्यो दत्त्वा लोकानवाप्तवान् ॥

राजा मित्रसहश्चापि वसिष्ठाय महात्मने ।
मदयन्तीं प्रियां दत्त्वा तया सह दिवं गतः ॥३०
सहस्रजिच्च राजर्षिः प्राणानिष्टान्महायशाः ।
ब्राह्मणार्थे परित्यज्य गतो लोकाननुत्तमान् ॥ ३१
सर्वकामैश्च संपूर्णं दत्त्वा वेश्म हिरण्मयम् ।
मुद्गलाय गतः स्वर्गं शतद्युम्नो महीपतिः ॥ ३२
नाम्ना च द्युतिमान्नाम शाल्वराजः प्रतापवान् ।
दत्त्वा राज्यमृचीकाय गतो लोकाननुत्तमान् ॥ ३३
मदिराश्वश्च राजर्षिर्दत्त्वा कन्यां सुमध्यमाम् ।
हिरण्यहस्ताय गतो लोकान्देवैरभिष्टुतान् ॥ ३४
लोमपादश्च राजर्षिः शान्तां दत्त्वा सुतां प्रभुः ।
ऋश्यशृङ्गाय विपुलैः सर्वकामैरयुज्यत ॥ ३५
दत्त्वा शतसहस्रं तु गवां राजा प्रसेनजित् ।
सवत्सानां महातेजा गतो लोकाननुत्तमान् ॥ ३६
एते चान्ये च बहवो दानेन तपसा च ह ।
महात्मानो गताः स्वर्गं शिष्टात्मानो जितेन्द्रियाः ॥
तेषां प्रतिष्ठिता कीर्तिर्यावत्स्थास्यति मेदिनी ।
दानयज्ञप्रजासर्गैरेते हि दिवमाप्नुवन् ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ॥ २२६ ॥

२२७

व्यास उवाच ।

त्रयीविद्यामवेक्षेत वेदेषूक्तामथाङ्गतः ।
ऋक्सामवर्णाक्षरतो यजुषोऽथर्वणस्तथा ॥ १
वेदवादेषु कुशला ह्यध्यात्मकुशलाश्च ये ।
सत्त्ववन्तो महाभागाः पश्यन्ति प्रभवाप्ययौ ॥ २
एवं धर्मेण वर्तेत क्रियाः शिष्टवदाचरेत् ।
असंरोधेन भूतानां वृत्तिं लिप्सेत वै द्विजः ॥ ३
सद्भ्य आगतविज्ञानः शिष्टः शास्त्रविचक्षणः ।
स्वधर्मेण क्रिया लोके कुर्वाणः सत्यसंगरः ॥ ४
तिष्ठत्येतेषु गृहवान्षट्सु कर्मसु स द्विजः ।
पञ्चभिः सततं यज्ञैः श्रद्दधानो यजेत च ॥ ५
धृतिमानप्रमत्तश्च दान्तो धर्मविदात्मवान् ।
वीतहर्षभयक्रोधो ब्राह्मणो नावसीदति ॥ ६
दानमध्ययनं यज्ञस्तपो ह्रीरार्जवं दमः ।
एतैर्वर्धयते तेजः पाप्मानं चापकर्षति ॥ ७
धूतपाप्मा तु मेधावी लघ्वाहारो जितेन्द्रियः ।
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदम् ॥ ८
अग्नींश्च ब्राह्मणांश्चार्चेद्देवताः प्रणमेत च ।
वर्जयेद्रुषतीं वाचं हिंसां चाधर्मसंहिताम् ॥ ९
एषा पूर्वतरा वृत्तिर्ब्राह्मणस्य विधीयते ।
ज्ञानागमेन कर्माणि कुर्वन्कर्मसु सिध्यति ॥ १०
पञ्चेन्द्रियजलां घोरां लोभकूलां सुदुस्तराम् ।
मन्युपङ्कामनाधृष्यां नदीं तरति बुद्धिमान् ॥ ११
काममन्यूद्धतं यत्स्यान्नित्यमत्यन्तमोहितम् ।
महता विधिदृष्टेन बलेनाप्रतिघातिना ।
स्वभावस्रोतसा वृत्तमुह्यते सततं जगत् ॥ १२
कालोदकेन महता वर्षावर्तेन संततम् ।
मासोर्मिणर्तुवेगेन पक्षोलपतृणेन च ॥ १३
निमेषोन्मेषफेनेन अहोरात्रजवेन च ।
कामग्राहेण घोरेण वेदयज्ञप्लवेन च ॥ १४
धर्मद्वीपेन भूतानां चार्थकामरवेण च ।
ऋतसोपानतीरेण विहिंसातरुवाहिना ॥ १५
युगह्रदौघमध्येन ब्रह्मप्रायभवेन च ।
धात्रा सृष्टानि भूतानि कृष्यन्ते यमसादनम् ॥१६
एतत्प्रज्ञामयैर्धीरा निस्तरन्ति मनीषिणः ।
प्लवैरप्लववन्तो हि किं करिष्यन्त्यचेतसः ॥ १७
उपपन्नं हि यत्प्राज्ञो निस्तरेन्नेतरो जनः ।
दूरतो गुणदोषौ हि प्राज्ञः सर्वत्र पश्यति ॥ १८
संशयात्मा स कामात्मा चलचित्तोऽल्पचेतनः ।

अप्राज्ञो न तरत्येव यो ह्यास्ते न स गच्छति ॥ १९
अप्लवो हि महादोषमुह्यमानोऽधिगच्छति ।
कामग्राहगृहीतस्य ज्ञानमप्यस्य न प्लवः ॥ २०
तस्मादुन्मज्जनस्यार्थे प्रयतेत विचक्षणः ।
एतदुन्मज्जनं तस्य यदयं ब्राह्मणो भवेत् ॥ २१
अवदाते कुले जातस्त्रिसंदेहस्त्रिकर्मकृत् ।
तस्मादुन्मज्जनस्तिष्ठेन्निस्तरेत्प्रज्ञया यथा ॥ २२
संस्कृतस्य च दान्तस्य नियतस्य कृतात्मनः ।
प्राज्ञस्यानन्तरा सिद्धिरिह लोके परत्र च ॥ २३
वर्तते तेषु गृहवानक्रुध्यन्ननसूयकः ।
पञ्चभिः सततं यज्ञैर्विघसाशी यजेत च ॥ २४
सतां वृत्तेन वर्तेत क्रियाः शिष्टवदाचरेत् ।
असंरोधेन धर्मस्य वृत्तिं लिप्सेदगर्हिताम् ॥ २५
श्रुतिविज्ञानतत्त्वज्ञः शिष्टाचारो विचक्षणः ।
स्वधर्मेण क्रियावांश्च कर्मणा सोऽप्यसंकरः ॥ २६
क्रियावाञ्श्रद्दधानश्च दाता प्राज्ञोऽनसूयकः ।
धर्माधर्मविशेषज्ञः सर्वं तरति दुस्तरम् ॥ २७
धृतिमानप्रमत्तश्च दान्तो धर्मविदात्मवान् ।
वीतहर्षभयक्रोधो ब्राह्मणो नावसीदति ॥ २८
एषा पूर्वतरा वृत्तिर्ब्राह्मणस्य विधीयते ।
ज्ञानवित्त्वेन कर्माणि कुर्वन्सर्वत्र सिध्यति ॥ २९
अधर्मं धर्मकामो हि करोतीहाविचक्षणः ।
धर्मं चाधर्मसंकाशं शोचन्निव करोति सः ॥ ३०

धर्मं करोमीति करोत्यधर्म-
मधर्मकामश्च करोति धर्मम् ।
उभे बालः कर्मणी न प्रजान-
न्स जायते म्रियते चापि देही ॥ ३१

इति श्रीमहाभारते शान्तिपर्वणि
सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥

२२८

व्यास उवाच ।

अथ चेद्रोचयेदेतद्द्रुह्येत मनसा तथा ।
उन्मज्जंश्च निमज्जंश्च ज्ञानवान्प्लववान्भवेत् ॥ १
प्रज्ञया निर्मितैर्धीरास्तारयन्त्यबुधान्प्लवैः ।
नाबुधास्तारयन्त्यन्यानात्मानं वा कथंचन ॥ २
छिन्नदोषो मुनिर्योगान्युक्तो युञ्जीत द्वादश ।
दश कर्मसुखानर्थानुपायापायनिर्भयः ॥ ३
चक्षुराचारवित्प्राज्ञो मनसा दर्शनेन च ।
यच्छेद्वाङ्मनसी बुद्ध्या य इच्छेज्ज्ञानमुत्तमम् ।
ज्ञानेन यच्छेदात्मानं य इच्छेच्छान्तिमात्मनः ॥ ४
एतेषां चेदनुद्रष्टा पुरुषोऽपि सुदारुणः ।
यदि वा सर्ववेदज्ञो यदि वाप्यनृचोऽजपः ॥ ५
यदि वा धार्मिको यज्वा यदि वा पापकृत्तमः ।
यदि वा पुरुषव्याघ्रो यदि वा क्लैब्यधारिता ॥ ६
तरत्येव महादुर्गं जरामरणसागरम् ।
एवं ह्येतेन योगेन युञ्जानोऽप्येकमन्ततः ।
अपि जिज्ञासमानो हि शब्दब्रह्मातिवर्तते ॥ ७
धर्मोपस्थो ह्रीवरूथ उपायापायकूबरः ।
अपानाक्षः प्राणयुगः प्रज्ञायुर्जीवबन्धनः ॥ ८
चेतनाबन्धुरश्चारुराचारग्रहनेमिवान् ।
दर्शनस्पर्शनवहो घ्राणश्रवणवाहनः ॥ ९
प्रज्ञानाभिः सर्वतन्त्रप्रतोदो ज्ञानसारथिः ।
क्षेत्रज्ञाधिष्ठितो धीरः श्रद्धादमपुरःसरः ॥ १०
त्यागवर्त्मानुगः क्षेम्यः शौचगो ध्यानगोचरः ।
जीवयुक्तो रथो दिव्यो ब्रह्मलोके विराजते ॥ ११
अथ संत्वरमाणस्य रथमेतं युयुक्षतः ।
अक्षरं गन्तुमनसो विधिं वक्ष्यामि शीघ्रगम् ॥ १२
सप्त यो धारणाः कृत्स्ना वाग्यतः प्रतिपद्यते ।
पृष्ठतः पार्श्वतश्चान्या यावत्यस्ताः प्रधारणाः ॥ १३

क्रमशः पार्थिवं यच्च वायव्यं खं तथा पयः ।
ज्योतिषो यत्तदैश्वर्यमहंकारस्य बुद्धितः ॥ १४
अव्यक्तस्य तथैश्वर्यं क्रमशः प्रतिपद्यते ।
विक्रमाश्चापि यस्यैते तथा युङ्क्ते स योगतः ॥ १५
अथास्य योगयुक्तस्य सिद्धिमात्मनि पश्यतः ।
निर्मथ्यमानः सूक्ष्मत्वाद्रूपाणीमानि दर्शयेत् ॥ १६
शैशिरस्तु यथा धूमः सूक्ष्मः संश्रयते नभः ।
तथा देहाद्विमुक्तस्य पूर्वरूपं भवत्युत ॥ १७
अथ धूमस्य विरमे द्वितीयं रूपदर्शनम् ।
जलरूपमिवाकाशे तत्रैवात्मनि पश्यति ॥ १८
अपां व्यतिक्रमे चापि वह्निरूपं प्रकाशते ।
तस्मिन्नुपरते चास्य पीतवस्त्रवदिष्यते ।
ऊर्णारूपसवर्णं च तस्य रूपं प्रकाशते ॥ १९
अथ श्वेतां गतिं गत्वा वायव्यं सूक्ष्ममप्यजः ।
अंशुकं चेतसः सौक्ष्म्यमव्यक्तं ब्रह्मणोऽस्य वै ॥२०
एतेष्वपि हि जातेषु फलजातानि मे शृणु ।
जातस्य पार्थिवैश्वर्ये सृष्टिरिष्टा विधीयते ॥ २१
प्रजापतिरिवाक्षोभ्यः शरीरात्सृजति प्रजाः ।
अङ्गुल्यङ्गुष्ठमात्रेण हस्तपादेन वा तथा ॥ २२
पृथिवीं कम्पयत्येको गुणो वायोरिति स्मृतः ।
आकाशभूतश्चाकाशे सवर्णत्वात्प्रणश्यति ॥ २३
वर्णतो गृह्यते चापि कामात्पिबति चाशयान् ।
न चास्य तेजसा रूपं दृश्यते शाम्यते तथा ॥ २४
अहंकारस्य विजितैः पञ्चैते स्युर्वशानुगाः ।
षण्णामात्मनि बुद्धौ च जितायां प्रभवत्यथ ॥ २५
निर्दोषा प्रतिभा ह्येनं कृत्स्ना समभिवर्तते ।
तथैव व्यक्तमात्मानमव्यक्तं प्रतिपद्यते ॥ २६
यतो निःसरते लोको भवति व्यक्तसंज्ञकः ।
तत्राव्यक्तमयीं व्याख्यां शृणु त्वं विस्तरेण मे ।
तथा व्यक्तमयीं चैव संख्यां पूर्वं निबोध मे ॥२७
पञ्चविंशतितत्त्वानि तुल्यान्युभयतः समम् ।
योगे सांख्येऽपि च तथा विशेषांस्तत्र मे शृणु ॥
प्रोक्तं तद्व्यक्तमित्येव जायते वर्धते च यत् ।
जीर्यते म्रियते चैव चतुर्भिर्लक्षणैर्युतम् ॥ २९
विपरीतमतो यत्तु तदव्यक्तमुदाहृतम् ।
द्वावात्मानौ च वेदेषु सिद्धान्तेष्वप्युदाहृतौ ॥ ३०
चतुर्लक्षणजं त्वन्यं चतुर्वर्गं प्रचक्षते ।
व्यक्तमव्यक्तजं चैव तथा बुद्धमथेतरत् ।
सत्त्वं क्षेत्रज्ञ इत्येतद्द्वयमप्यनुदर्शितम् ॥ ३१
द्वावात्मानौ च वेदेषु विषयेषु च रज्यतः ।
विषयात्प्रतिसंहारः सांख्यानां सिद्धिलक्षणम् ॥ ३२
निर्ममश्चानहंकारो निर्द्वंद्वश्छिन्नसंशयः ।
नैव क्रुध्यति न द्वेष्टि नानृता भाषते गिरः ॥ ३३
आक्रुष्टस्ताडितश्चैव मैत्रेण ध्याति नाशुभम् ।
वाग्दण्डकर्ममनसां त्रयाणां च निवर्तकः ॥ ३४
समः सर्वेषु भूतेषु ब्रह्माणमभिवर्तते ।
नैवेच्छति न चानिच्छो यात्रामात्रव्यवस्थितः ॥३५
अलोलुपोऽव्यथो दान्तो न कृती न निराकृतिः ।
नास्येन्द्रियमनेकाग्रं नातिक्षिप्तमनोरथः ।
अहिंस्रः सर्वभूतानामीदृक्सांख्यो विमुच्यते ॥३६
अथ योगाद्विमुच्यन्ते कारणैर्यैर्निबोध मे ।
योगैश्वर्यमतिक्रान्तो योऽतिक्रामति मुच्यते ॥ ३७
इत्येषा भावजा बुद्धिः कथिता ते न संशयः ।
एवं भवति निर्द्वंद्वो ब्रह्माणं चाधिगच्छति ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥

२२९

व्यास उवाच ।

अथ ज्ञानप्लवं धीरो गृहीत्वा शान्तिमास्थितः ।
उन्मज्जंश्च निमज्जंश्च ज्ञानमेवाभिसंश्रयेत् ॥ १

शुक उवाच ।

किं तज्ज्ञानमथो विद्या यया निस्तरति द्वयम् ।
प्रवृत्तिलक्षणो धर्मो निवृत्तिरिति चैव हि ॥ २

व्यास उवाच ।

यस्तु पश्येत्स्वभावेन विना भावमचेतनः ।
पुष्यते च पुनः सर्वान्प्रज्ञया मुक्तहेतुकः ॥ ३
येषां चैकान्तभावेन स्वभावः कारणं मतम् ।
पूत्वा तृणबुसीकां वै ते लभन्ते न किंचन ॥ ४
ये चैनं पक्षमाश्रित्य वर्तयन्त्यल्पचेतसः ।
स्वभावं कारणं ज्ञात्वा न श्रेयः प्राप्नुवन्ति ते ॥ ५
स्वभावो हि विनाशाय मोहकर्ममनोभवः ।
निरुक्तमेतयोरेतत्स्वभावपरभावयोः ॥ ६
कृष्यादीनि हि कर्माणि सस्यसंहरणानि च ।
प्रज्ञावद्भिः प्रक्लृप्तानि यानासनगृहाणि च ॥ ७
आक्रीडानां गृहाणां च गदानामगदस्य च ।
प्रज्ञावन्तः प्रवक्तारो ज्ञानवद्भिरनुष्ठिताः ॥ ८
प्रज्ञा संयोजयत्यर्थैः प्रज्ञा श्रेयोऽधिगच्छति ।
राजानो भुञ्जते राज्यं प्रज्ञया तुल्यलक्षणाः ॥ ९
पारावर्यं तु भूतानां ज्ञानेनैवोपलभ्यते ।
विद्यया तात सृष्टानां विद्यैव परमा गतिः ॥ १०
भूतानां जन्म सर्वेषां विविधानां चतुर्विधम् ।
जराय्वण्डमथोद्भिदं स्वेदं चाप्युपलक्षयेत् ॥ ११
स्थावरेभ्यो विशिष्टानि जङ्गमान्युपलक्षयेत् ।
उपपन्नं हि यच्चेष्टा विशिष्येत विशिष्ययोः ॥ १२
आहुर्द्विबहुपादानि जङ्गमानि द्वयानि च ।
बहुपाद्भ्यो विशिष्टानि द्विपादानि बहून्यपि ॥ १३
द्विपदानि द्वयान्याहुः पार्थिवानीतराणि च ।
पार्थिवानि विशिष्टानि तानि ह्यन्नानि भुञ्जते ॥१४
पार्थिवानि द्वयान्याहुर्मध्यमान्युत्तमानि च ।
मध्यमानि विशिष्टानि जातिधर्मोपधारणात् ॥ १५
मध्यमानि द्वयान्याहुर्धर्मज्ञानीतराणि च ।
धर्मज्ञानि विशिष्टानि कार्याकार्योपधारणात् ॥ १६
धर्मज्ञानि द्वयान्याहुर्वेदज्ञानीतराणि च ।
वेदज्ञानि विशिष्टानि वेदो ह्येषु प्रतिष्ठितः ॥ १७
वेदज्ञानि द्वयान्याहुः प्रवक्तृणीतराणि च ।
प्रवक्तृणि विशिष्टानि सर्वधर्मोपधारणात् ॥ १८
विज्ञायन्ते हि यैर्वेदाः सर्वधर्मक्रियाफलाः ।
सयज्ञाः सखिला वेदाः प्रवक्तृभ्यो विनिःसृताः ॥
प्रवक्तृणि द्वयान्याहुरात्मज्ञानीतराणि च ।
आत्मज्ञानि विशिष्टानि जन्माजन्मोपधारणात् ॥२०
धर्मद्वयं हि यो वेद स सर्वः सर्वधर्मवित् ।
स त्यागी सत्यसंकल्पः स तु क्षान्तः स ईश्वरः ॥
धर्मज्ञानप्रतिष्ठं हि तं देवा ब्राह्मणं विदुः ।
शब्दब्रह्मणि निष्णातं परे च कृतनिश्चयम् ॥ २२
अन्तःस्थं च बहिष्ठं च येऽधियज्ञाधिदैवतम् ।
जानन्ति तान्नमस्यामस्ते देवास्तात ते द्विजाः ॥२३
तेषु विश्वमिदं भूतं साग्रं च जगदाहितम् ।
तेषां माहात्म्यभावस्य सदृशं नास्ति किंचन ॥२४
आदिं ते निधनं चैव कर्म चातीत्य सर्वशः ।
चतुर्विधस्य भूतस्य सर्वस्येशाः स्वयंभुवः ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
एकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥

२३०

व्यास उवाच ।

एषा पूर्वतरा वृत्तिर्ब्राह्मणस्य विधीयते ।
ज्ञानवानेव कर्माणि कुर्वन्सर्वत्र सिध्यति ॥ १
तत्र चेन्न भवेदेवं संशयः कर्मनिश्चये ।
किं नु कर्म स्वभावोऽयं ज्ञानं कर्मेति वा पुनः ॥२
तत्र चेह विवित्सा स्याज्ज्ञानं चेत्पुरुषं प्रति ।
उपपत्त्युपलब्धिभ्यां वर्णयिष्यामि तच्छृणु ॥ ३

पौरुषं कारणं केचिदाहुः कर्मसु मानवाः ।
दैवमेके प्रशंसन्ति स्वभावं चापरे जनाः ॥ ४
पौरुषं कर्म दैवं च फलवृत्तिस्वभावतः ।
त्रयमेतत्पृथग्भूतमविवेकं तु केचन ॥ ५
एवमेतन्न चाप्येवमुभे चापि न चाप्युभे ।
कर्मस्था विषमं ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥ ६
त्रेतायां चापरे चैव कलिजाश्च ससंशयाः ।
तपस्विनः प्रशान्ताश्च सत्त्वस्थाश्च कृते युगे ॥ ७
अपृथग्दर्शिनः सर्वे ऋक्सामसु यजुःषु च ।
कामद्वेषौ पृथग्दृष्ट्वा तपः कृत उपासते ॥ ८
तपोधर्मेण संयुक्तस्तपोनित्यः सुसंशितः ।
तेन सर्वानवाप्नोति कामान्यान्मनसेच्छति ॥ ९
तपसा तदवाप्नोति यद्भूत्वा सृजते जगत् ।
तद्भूतश्च ततः सर्वो भूतानां भवति प्रभुः ॥ १०
तदुक्तं वेदवादेषु गहनं वेददर्शिभिः ।
वेदान्तेषु पुनर्व्यक्तं क्रमयोगेन लक्ष्यते ॥ ११
आरम्भयज्ञाः क्षत्रस्य हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्राश्च जपयज्ञा द्विजातयः ॥ १२
परिनिष्ठितकार्यो हि स्वाध्यायेन द्विजो भवेत् ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ १३
त्रेतादौ सकला वेदा यज्ञा वर्णाश्रमास्तथा ।
संरोधादायुषस्त्वेते व्यस्यन्ते द्वापरे युगे ॥ १४
द्वापरे विप्लवं यान्ति वेदाः कलियुगे तथा ।
दृश्यन्ते नापि दृश्यन्ते कलेरन्ते पुनः पुनः ॥ १५
उत्सीदन्ति स्वधर्माश्च तत्राधर्मेण पीडिताः ।
गवां भूमेश्च ये चापामोषधीनां च ये रसाः ॥१६
अधर्मान्तर्हिता वेदा वेदधर्मास्तथाश्रमाः ।
विक्रियन्ते स्वधर्मस्थाः स्थावराणि चराणि च ॥१७
यथा सर्वाणि भूतानि वृष्टिर्भौमानि वर्षति ।
सृजते सर्वतोऽङ्गानि तथा वेदा युगे युगे ॥ १८
विसृतं कालनानात्वमनादिनिधनं च यत् ।
कीर्तितं तत्पुरस्तान्मे यतः संयान्ति यान्ति च ॥१९
धातेदं प्रभवस्थानं भूतानां संयमो यमः ।
स्वभावेन प्रवर्तन्ते द्वंद्वसृष्टानि भूरिशः ॥ २०
सर्गः कालो धृतिर्वेदाः कर्ता कार्यं क्रिया फलम् ।
एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

२३१

भीष्म उवाच ।

इत्युक्तोऽभिप्रशस्यैतत्परमर्षेस्तु शासनम् ।
मोक्षधर्मार्थसंयुक्तमिदं प्रष्टुं प्रचक्रमे ॥ १

शुक उवाच ।

प्रज्ञावाञ्श्रोत्रियो यज्वा वृद्धः प्राज्ञोऽनसूयकः ।
अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति ॥ २
तपसा ब्रह्मचर्येण सर्वत्यागेन मेधया ।
सांख्ये वा यदि वा योगे एतत्पृष्टोऽभिधत्स्व मे ॥३
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं समवाप्यते ।
येनोपायेन पुरुषैस्तच्च व्याख्यातुमर्हसि ॥ ४

व्यास उवाच ।

नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र सर्वसंत्यागात्सिद्धिं विन्दति कश्चन ॥ ५
महाभूतानि सर्वाणि पूर्वसृष्टिः स्वयंभुवः ।
भूयिष्ठं प्राणभृद्ग्रामे निविष्टानि शरीरिषु ॥ ६
भूमेर्देहो जलात्सारो ज्योतिषश्चक्षुषी स्मृते ।
प्राणापानाश्रयो वायुः खेष्वाकाशं शरीरिणाम् ॥ ७
क्रान्ते विष्णुर्बले शक्रः कोष्ठेऽग्निर्भुक्तमर्छति ।
कर्णयोः प्रदिशः श्रोत्रे जिह्वायां वाक्सरस्वती ॥ ८
कर्णौ त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।

दर्शनानीन्द्रियोक्तानि द्वाराण्याहारसिद्धये ॥ ९
शब्दं स्पर्शं तथा रूपं रसं गन्धं च पञ्चमम् ।
इन्द्रियाणि पृथक्त्वर्थान्मनसो दर्शयन्त्युत ॥ १०
इन्द्रियाणि मनो युङ्क्ते वश्यान्यन्तेव वाजिनः ।
मनश्चापि सदा युङ्क्ते भूतात्मा हृदयाश्रितः ॥ ११
इन्द्रियाणां तथैवैषां सर्वेषामीश्वरं मनः ।
नियमे च विसर्गे च भूतात्मा मनसस्तथा ॥ १२
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः ।
प्राणापानौ च जीवश्च नित्यं देहेषु देहिनाम् ॥ १३
आश्रयो नास्ति सत्त्वस्य गुणशब्दो न चेतना ।
सत्त्वं हि तेजः सृजति न गुणान्वै कदाचन ॥ १४
एवं सप्तदशं देहे वृतं षोडशभिर्गुणैः ।
मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि ॥ १५
न ह्ययं चक्षुषा दृश्यो न च सर्वैरपीन्द्रियैः ।
मनसा संप्रदीप्तेन महानात्मा प्रकाशते ॥ १६
अशब्दस्पर्शरूपं तदरसागन्धमव्ययम् ।
अशरीरं शरीरे स्वे निरीक्षेत निरिन्द्रियम् ॥ १७
अव्यक्तं व्यक्तदेहेषु मर्त्येष्वमरमाश्रितम् ।
योऽनुपश्यति स प्रेत्य कल्पते ब्रह्मभूयसे ॥ १८
विद्याभिजनसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १९
न हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च ।
वसत्येको महानात्मा येन सर्वमिदं ततम् ॥ २०
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
यदा पश्यति भूतात्मा ब्रह्म संपद्यते तदा ॥ २१
यावानात्मनि वेदात्मा तावानात्मा परात्मनि ।
य एवं सततं वेद सोऽमृतत्वाय कल्पते ॥ २२
सर्वभूतात्मभूतस्य सर्वभूतहितस्य च ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ २३
शकुन्तीनामिवाकाशे जले वारिचरस्य वा ।
यथा गतिर्न दृश्येत तथैव सुमहात्मनः ॥ २४
कालः पचति भूतानि सर्वाण्येवात्मनात्मनि ।
यस्मिंस्तु पच्यते कालस्तं न वेदेह कश्चन ॥ २५
न तदूर्ध्वं न तिर्यक्च नाधो न च तिरः पुनः ।
न मध्ये प्रतिगृह्णीते नैव किंचित्कुतश्चन ॥ २६
सर्वेऽन्तःस्था इमे लोका बाह्यमेषां न किंचन ।
यः सहस्रं समागच्छेद्यथा बाणो गुणच्युतः ॥ २७
नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः ।
तस्मात्सूक्ष्मात्सूक्ष्मतरं नास्ति स्थूलतरं ततः ॥ २८
सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ २९
तदेवाणोरणुतरं तन्महद्भ्यो महत्तरम् ।
तदन्तः सर्वभूतानां ध्रुवं तिष्ठन्न दृश्यते ॥ ३०
अक्षरं च क्षरं चैव द्वैधीभावोऽयमात्मनः ।
क्षरः सर्वेषु भूतेषु दिव्यं ह्यमृतमक्षरम् ॥ ३१
नवद्वारं पुरं गत्वा हंसो हि नियतो वशी ।
ईशः सर्वस्य भूतस्य स्थावरस्य चरस्य च ॥ ३२
हानिभङ्गविकल्पानां नवानां संश्रयेण च ।
शरीराणामजस्याहुर्हंसत्वं पारदर्शिनः ॥ ३३
हंसोक्तं चाक्षरं चैव कूटस्थं यत्तदक्षरम् ।
तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
एकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥

२३२

व्यास उवाच ।

पृच्छतस्तव सत्पुत्र यथावदिह तत्त्वतः ।
सांख्यन्यायेन संयुक्तं यदेतत्कीर्तितं मया ॥ १
योगकृत्यं तु ते कृत्स्नं वर्तयिष्यामि तच्छृणु ।
एकत्वं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ॥ २

तदेतदुपशान्तेन दान्तेनाध्यात्मशीलिना ।
आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्मणा ॥ ३
योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ।
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ॥४
क्रोधं शमेन जयति कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥ ५
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुः श्रोत्रे च मनसा मनो वाचं च कर्मणा ॥ ६
अप्रमादाद्भयं जह्याल्लोभं प्राज्ञोपसेवनात् ।
एवमेतान्योगदोषाञ्जयेन्नित्यमतन्द्रितः ॥ ७
अग्नींश्च ब्राह्मणांश्चार्चेद्देवताः प्रणमेत च ।
वर्जयेद्रुषितां वाचं हिंसायुक्तां मनोनुगाम् ॥ ८
ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं रसः ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥ ९
ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ।
शौचमाहारसंशुद्धिरिन्द्रियाणां च निग्रहः ॥ १०
एतैर्विवर्धते तेजः पाप्मानं चापकर्षति ।
सिध्यन्ति चास्य सर्वार्था विज्ञानं च प्रवर्तते ॥११
समः सर्वेषु भूतेषु लब्धालब्धेन वर्तयन् ।
धुतपाप्मा तु तेजस्वी लध्वाहारो जितेन्द्रियः ।
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदम् ॥ १२
मनसश्चेन्द्रियाणां च कृत्वैकाग्र्यं समाहितः ।
प्राग्रात्रापररात्रेषु धारयेन्मन आत्मना ॥ १३
जन्तोः पञ्चेन्द्रियस्यास्य यदेकं छिद्रमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पादादिवोदकम् ॥ १४
मनस्तु पूर्वमादद्यात्कुमीनानिव मत्स्यहा ।
ततः श्रोत्रं ततश्चक्षुर्जिह्वां घ्राणं च योगवित् ॥१५
तत एतानि संयम्य मनसि स्थापयेद्यतिः ।
तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् ॥ १६
पञ्च ज्ञानेन संधाय मनसि स्थापयेद्यतिः ।
यदैतान्यवतिष्ठन्ते मनःषष्ठानि चात्मनि ।
प्रसीदन्ति च संस्थाय तदा ब्रह्म प्रकाशते ॥ १७
विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान् ।
वैद्युतोऽग्निरिवाकाशे पश्यत्यात्मानमात्मना ।
सर्वं च तत्र सर्वत्र व्यापकत्वाच्च दृश्यते ॥ १८
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ।
धृतिमन्तो महाप्राज्ञाः सर्वभूतहिते रताः ॥ १९
एवं परिमितं कालमाचरन्संशितव्रतः ।
आसीनो हि रहस्येको गच्छेदक्षरसात्म्यताम् ॥२०
प्रमोहो भ्रम आवर्तो घ्राणश्रवणदर्शने ॥
अद्भुतानि रसस्पर्शे शीतोष्णे मारुताकृतिः ॥ २१
प्रतिभामुपसर्गांश्चाप्युपसंगृह्य योगतः ।
तांस्तत्त्वविदनादृत्य स्वात्मनैव निवर्तयेत् ॥ २२
कुर्यात्परिचयं योगे त्रैकाल्यं नियतो मुनिः ।
गिरिशृङ्गे तथा चैत्ये वृक्षाग्रेषु च योजयेत् ॥ २३
संनियम्येन्द्रियग्रामं गोष्ठे भाण्डमना इव ।
एकाग्रश्चिन्तयेन्नित्यं योगान्नोद्विजयेन्मनः ॥ २४
येनोपायेन शक्येत संनियन्तुं चलं मनः ।
तं तं युक्तो निषेवेत न चैव विचलेत्ततः ॥ २५
शून्या गिरिगुहाश्चैव देवतायतनानि च ।
शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत् ॥ २६
नाभिष्वजेत्परं वाचा कर्मणा मनसापि वा ।
उपेक्षको यताहारो लब्धालब्धे समो भवेत् ॥२७
यश्चैनमभिनन्देत यश्चैनमपवादयेत् ।
समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभम् ॥ २८
न प्रहृष्येत लाभेषु नालाभेषु च चिन्तयेत् ।
समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः ॥ २९
एवं स्वस्थात्मनः साधोः सर्वत्र समदर्शिनः ।
षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्तते ॥ ३०
वेदनार्ताः प्रजा दृष्ट्वा समलोष्टाश्मकाञ्चनः ।

एतस्मिन्निरतो मार्गे विरमेन्न विमोहितः ॥ ३१
अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥ ३२

अजं पुराणमजरं सनातनं
यदिन्द्रियैरुपलभते नरोऽचलः ।
अणोरणीयो महतो महत्तरं
तदात्मना पश्यति युक्त आत्मवान् ॥ ३३
इदं महर्षेर्वचनं महात्मनो
यथावदुक्तं मनसानुदृश्य च ।
अवेक्ष्य चेयात्परमेष्ठिसात्म्यतां
प्रयान्ति यां भूतगतिं मनीषिणः ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥

२३३

शुक उवाच ।

यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥
एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे ।
एतत्त्वन्योन्यवैरूप्ये वर्तेते प्रतिकूलतः ॥ २

भीष्म उवाच ।

इत्युक्तः प्रत्युवाचेदं पराशरसुतः सुतम् ।
कर्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ ॥ ३
यां दिशं विद्यया यान्ति यां च गच्छन्ति कर्मणा ।
शृणुष्वैकमनाः पुत्र गह्वरं ह्येतदन्तरम् ॥ ४
अस्ति धर्म इति प्रोक्तं नास्तीत्यत्रैव यो वदेत् ।
तस्य पक्षस्य सदृशमिदं मम भवेदथ ॥ ५
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तौ च सुभाषितः ॥ ६
कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ ७
कर्मणा जायते प्रेत्य मूर्तिमान्षोडशात्मकः ।
विद्यया जायते नित्यमव्ययो ह्यव्ययात्मकः ॥ ८
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धिरता नराः ।
तेन ते देहजालानि रमयन्त उपासते ॥ ९
ये तु बुद्धिं परां प्राप्ता धर्मनैपुण्यदर्शिनः ।
न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्निव ॥ १०
कर्मणः फलमाप्नोति सुखदुःखे भवाभवौ ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥ ११
यत्र गत्वा न म्रियते यत्र गत्वा न जायते ।
न जीर्यते यत्र गत्वा यत्र गत्वा न वर्धते ॥ १२
यत्र तद्ब्रह्म परममव्यक्तमजरं ध्रुवम् ।
अव्याहतमनायासममृतं चावियोगि च ॥ १३
द्वंद्वैर्यत्र न बाध्यन्ते मानसेन च कर्मणा ।
समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः ॥ १४
विद्यामयोऽन्यः पुरुषस्तात कर्ममयोऽपरः ।
विद्धि चन्द्रमसं दर्शे सूक्ष्मया कलया स्थितम् ॥
तदेतदृषिणा प्रोक्तं विस्तरेणानुमीयते ।
नवजं शशिनं दृष्ट्वा वक्रं तन्तुमिवाम्बरे ॥ १६
एकादशविकारात्मा कलासंभारसंभृतः ।
मूर्तिमानिति तं विद्धि तात कर्मगुणात्मकम् ॥ १७
देवो यः संश्रितस्तस्मिन्नब्बिन्दुरिव पुष्करे ।
क्षेत्रज्ञं तं विजानीयान्नित्यं त्यागजितात्मकम् ॥ १८
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान् ।
जीवमात्मगुणं विद्यादात्मानं परमात्मनः ॥ १९

सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम् ।
ततः परं क्षेत्रविदो वदन्ति
प्रावर्तयद्यो भुवनानि सप्त ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥

२३४

शुक उवाच ।

क्षरात्प्रभृति यः सर्गः सगुणानीन्द्रियाणि च ।
बुद्ध्यैश्वर्याभिसर्गार्थं यद्ध्यानं चात्मनः शुभम् ॥१
भूय एव तु लोकेऽस्मिन्सद्वृत्तिं वृत्तिहैतुकीम् ।
यथा सन्तः प्रवर्तन्ते तदिच्छाम्यनुवर्णितम् ॥ २
वेदे वचनमुक्तं तु कुरु कर्म त्यजेति च ।
कथमेतद्विजानीयां तच्च व्याख्यातुमर्हसि ॥ ३
लोकवृत्तान्ततत्त्वज्ञः पूतोऽहं गुरुशासनात् ।
कृत्वा बुद्धिं वियुक्तात्मा त्यक्ष्याम्यात्मानमव्यथः ॥४

व्यास उवाच ।

यैषा वै विहिता वृत्तिः पुरस्ताद्ब्रह्मणा स्वयम् ।
एषा पूर्वतरैः सद्भिराचीर्णा परमर्षिभिः ॥ ५
ब्रह्मचर्येण वै लोकाञ्जयन्ति परमर्षयः ।
आत्मनश्च हृदि श्रेयस्त्वन्विच्छ मनसात्मनि ॥ ६
वने मूलफलाशी च तप्यन्सुविपुलं तपः ।
पुण्यायतनचारी च भूतानामविहिंसकः ॥ ७
विधूमे सन्नमुसले वानप्रस्थप्रतिश्रये ।
काले प्राप्ते चरन्भैक्षं कल्पते ब्रह्मभूयसे ॥ ८
निःस्तुतिर्निर्नमस्कारः परित्यज्य शुभाशुभे ।
अरण्ये विचरैकाकी येन केनचिदाशितः ॥ ९

शुक उवाच ।

यदिदं वेदवचनं लोकवादे विरुध्यते ।
प्रमाणे चाप्रमाणे च विरुद्धे शास्त्रता कुतः ॥ १०
इत्येतच्छ्रोतुमिच्छामि भगवान्प्रब्रवीतु मे ।
कर्मणामविरोधेन कथमेतत्प्रवर्तते ॥ ११

भीष्म उवाच ।

इत्युक्तः प्रत्युवाचेदं गन्धवत्याः सुतः सुतम् ।
ऋषिस्तत्पूजयन्वाक्यं पुत्रस्यामिततेजसः ॥ १२
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
यथोक्तकारिणः सर्वे गच्छन्ति परमां गतिम् ॥ १३
एको य आश्रमानेताननुतिष्ठेद्यथाविधि ।
अकामद्वेषसंयुक्तः स परत्र महीयते ॥ १४
चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता ।
एतामाश्रित्य निःश्रेणीं ब्रह्मलोके महीयते ॥ १५
आयुषस्तु चतुर्भागं ब्रह्मचार्यनसूयकः ।
गुरौ वा गुरुपुत्रे वा वसेद्धर्मार्थकोविदः ॥ १६
कर्मातिरेकेण गुरोरध्येतव्यं बुभूषता ।
दक्षिणो नापवादी स्यादाहूतो गुरुमाश्रयेत् ॥ १७
जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनि ।
यच्च शिष्येण कर्तव्यं कार्यं दासेन वा पुनः ॥१८
कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत पार्श्वतः ।
किंकरः सर्वकारी च सर्वकर्मसु कोविदः ॥१९
शुचिर्दक्षो गुणोपेतो ब्रूयादिषुरिवात्वरः ।
चक्षुषा गुरुमव्यग्रो निरीक्षेत जितेन्द्रियः ॥ २०
नाभुक्तवति चाश्नीयादपीतवति नो पिबेत् ।
न तिष्ठति तथासीत नासुप्ते प्रस्वपेत च ॥ २१
उत्तानाभ्यां च पाणिभ्यां पादावस्य मृदु स्पृशेत् ।
दक्षिणं दक्षिणेनैव सव्यं सव्येन पीडयेत् ॥ २२
अभिवाद्य गुरुं ब्रूयादधीष्व भगवन्निति ।
इदं करिष्ये भगवन्निदं चापि कृतं मया ॥ २३
इति सर्वमनुज्ञाप्य निवेद्य गुरवे धनम् ।
कुर्यात्कृत्वा च तत्सर्वमाख्येयं गुरवे पुनः ॥ २४
यांस्तु गन्धान्रसान्वापि ब्रह्मचारी न सेवते ।
सेवेत तान्समावृत्त इति धर्मेषु निश्चयः ॥ २५
ये केचिद्विस्तरेणोक्ता नियमा ब्रह्मचारिणः ।
तान्सर्वाननुगृह्णीयाद्भवेच्चानपगो गुरोः ॥ २६
स एवं गुरवे प्रीतिमुपहृत्य यथाबलम् ।
आश्रमेष्वाश्रमेष्वेवं शिष्यो वर्तेत कर्मणा ॥ २७
वेदव्रतोपवासेन चतुर्थे चायुषो गते ।

गुरवे दक्षिणां दत्त्वा समावर्तेद्यथाविधि ॥ २८
धर्मलब्धैर्युतो दारैरग्नीनुत्पाद्य धर्मतः ।
द्वितीयमायुषो भागं गृहमेधिव्रती भवेत् ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥

२३५

व्यास उवाच ।

द्वितीयमायुषो भागं गृहमेधी गृहे वसेत् ।
धर्मलब्धैर्युतो दारैरग्नीनुत्पाद्य सुव्रतः ॥ १
गृहस्थवृत्तयश्चैव चतस्रः कविभिः स्मृताः ।
कुसूलधान्यः प्रथमः कुम्भीधान्यस्त्वनन्तरम् ॥ २
अश्वस्तनोऽथ कापोतीमाश्रितो वृत्तिमाहरेत् ।
तेषां परः परो ज्यायान्धर्मतो लोकजित्तमः ॥ ३
षट्कर्मा वर्तयत्येकस्त्रिभिरन्यः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे व्यवस्थितः ।
गृहमेधिव्रतान्यत्र महान्तीह प्रचक्षते ॥ ४
नात्मार्थं पाचयेदन्नं न वृथा घातयेत्पशून् ।
प्राणी वा यदि वाप्राणी संस्कारं यजुषार्हति ॥ ५
न दिवा प्रस्वपेज्जातु न पूर्वापररात्रयोः ।
न भुञ्जीतान्तराकाले नानृतावाह्वयेत्स्त्रियम् ॥ ६
नास्यानश्नन्वसेद्विप्रो गृहे कश्चिदपूजितः ।
तथास्यातिथयः पूज्या हव्यकव्यवहाः सदा ॥ ७
वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः ।
स्वधर्मजीविनो दान्ताः क्रियावन्तस्तपस्विनः ।
तेषां हव्यं च कव्यं चाप्यर्हणार्थं विधीयते ॥ ८
न खरैः संप्रयातस्य स्वधर्माज्ञानकस्य च ।
अपविद्धाग्निहोत्रस्य गुरोर्वालीककारिणः ॥ ९
संविभागोऽत्र भूतानां सर्वेषामेव शिष्यते ।
तथैवापचमानेभ्यः प्रदेयं गृहमेधिना ॥ १०
विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः ।
अमृतं यज्ञशेषं स्याद्भोजनं हविषा समम् ।
भृत्यशेषं तु योऽश्नाति तमाहुर्विघसाशिनम् ॥ ११
स्वदारनिरतो दान्तो ह्यनसूयुर्जितेन्द्रियः ।
ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ॥ १२
वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः ।
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ॥ १३
दुहित्रा दासवर्गेण विवादं न समाचरेत् ।
एतान्विमुच्य संवादान्सर्वपापैः प्रमुच्यते ॥ १४
एतैर्जितैस्तु जयति सर्वाँल्लोकान्न संशयः ।
आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ॥१५
अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ।
जामयोऽप्सरसां लोके वैश्वदेवे तु ज्ञातयः ॥ १६
संबन्धिबान्धवा दिक्षु पृथिव्यां मातृमातुलौ ।
वृद्धबालातुरकृशास्त्वाकाशे प्रभविष्णवः ॥ १७
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः
छाया स्वा दासवर्गस्तु दुहिता कृपणं परम् ॥ १८
तस्मादेतैरधिक्षिप्तः सहेन्नित्यमसंज्वरः ।
गृहधर्मरतो विद्वान्धर्मनित्यो जितक्लमः ॥ १९
न चार्थबद्धः कर्माणि धर्मं वा कंचिदाचरेत् ।
गृहस्थवृत्तयस्तिस्रस्तासां निःश्रेयसं परम् ॥ २०
परस्परं तथैवाहुश्चातुराश्रम्यमेव तत् ।
ये चोक्ता नियमास्तेषां सर्वं कार्यं बुभूषता ॥ २१
कुम्भीधान्यैरुञ्छशिलैः कापोतीं चास्थितैस्तथा ।
यस्मिंश्चैते वसन्त्यर्हास्तद्राष्ट्रमभिवर्धते ॥ २२
दश पूर्वान्दश परान्पुनाति च पितामहान् ।
गृहस्थवृत्तयस्त्वेता वर्तयेद्यो गतव्यथः ॥ २३
स चक्रचरलोकानां सदृशीं प्राप्नुयाद्गतिम् ।
यतेन्द्रियाणामथ वा गतिरेषा विधीयते ॥ २४
स्वर्गलोको गृहस्थानामुदारमनसां हितः ।
स्वर्गो विमानसंयुक्तो वेददृष्टः सुपुष्पितः ॥ २५

स्वर्गलोके गृहस्थानां प्रतिष्ठा नियतात्मनाम् ।
ब्रह्मणा विहिता श्रेणिरेषा यस्मात्प्रमुच्यते ।
द्वितीयं क्रमशः प्राप्य स्वर्गलोके महीयते ॥ २६
अतः परं परममुदारमाश्रमं
तृतीयमाहुस्त्यजतां कलेवरम् ।
वनौकसां गृहपतिनामनुत्तमं
शृणुष्वैतत्क्लिष्टशरीरकारिणाम् ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

२३६

भीष्म उवाच ।

प्रोक्ता गृहस्थवृत्तिस्ते विहिता या मनीषिणाम् ।
तदनन्तरमुक्तं यत्तन्निबोध युधिष्ठिर ॥ १
क्रमशस्त्ववधूयैनां तृतीयां वृत्तिमुत्तमाम् ।
संयोगव्रतखिन्नानां वानप्रस्थाश्रमौकसाम् ॥ २
श्रूयतां पार्थ भद्रं ते सर्वलोकाश्रयात्मनाम् ।
प्रेक्षापूर्वं प्रवृत्तानां पुण्यदेशनिवासिनाम् ॥ ३

व्यास उवाच ।

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं वनमेव तदाश्रयेत् ॥ ४
तृतीयमायुषो भागं वानप्रस्थाश्रमे वसेत् ।
तानेवाग्नीन्परिचरेद्यजमानो दिवौकसः ॥ ५
नियतो नियताहारः षष्ठभक्तोऽप्रमादवान् ।
तदग्निहोत्रं ता गावो यज्ञाङ्गानि च सर्वशः ॥ ६
अकृष्टं वै व्रीहियवं नीवारं विघसानि च ।
हवींषि संप्रयच्छेत मखेष्वत्रापि पञ्चसु ॥ ७
वानप्रस्थाश्रमेऽप्येताश्चतस्रो वृत्तयः स्मृताः ।
सद्यःप्रक्षालकाः केचित्केचिन्मासिकसंचयाः ॥ ८
वार्षिकं संचयं केचित्केचिद्द्वादशवार्षिकम् ।
कुर्वन्त्यतिथिपूजार्थं यज्ञतन्त्रार्थसिद्धये ॥ ९
अभ्रावकाशा वर्षासु हेमन्ते जलसंश्रयाः ।
ग्रीष्मे च पञ्चतपसः शश्वच्च मितभोजनाः ॥ १०
भूमौ विपरिवर्तन्ते तिष्ठेद्वा प्रपदैरपि ।
स्थानासनैर्वर्तयन्ति सवनेष्वभिषिञ्चते ॥ ११
दन्तोलूखलिनः केचिदश्मकुट्टास्तथापरे ।
शुक्लपक्षे पिबन्त्येके यवागूं क्वथितां सकृत् ॥ १२
कृष्णपक्षे पिबन्त्येके भुञ्जते च यथाक्रमम् ।
मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः ॥ १३
वर्तयन्ति यथान्यायं वैखानसमतं श्रिताः ।
एताश्चान्याश्च विविधा दीक्षास्तेषां मनीषिणाम् ॥
चतुर्थश्चौपनिषदो धर्मः साधारणः स्मृतः ।
वानप्रस्थो गृहस्थश्च ततोऽन्यः संप्रवर्तते ॥ १५
अस्मिन्नेव युगे तात विप्रैः सर्वार्थदर्शिभिः ।
अगस्त्यः सप्त ऋषयो मधुच्छन्दोऽघमर्षणः ॥ १६
सांकृतिः सुदिवा तण्डिर्यवान्नोऽथ कृतश्रमः ।
अहोवीर्यस्तथा काव्यस्ताण्ड्यो मेधातिथिर्बुधः ॥ १७
शलो वाकश्च निर्वाकिः शून्यपालः कृतश्रमः ।
एवंधर्मसु विद्वांसस्ततः स्वर्गमुपागमन् ॥ १८
तात प्रत्यक्षधर्माणस्तथा यायावरा गणाः ।
ऋषीणामुग्रतपसां धर्मनैपुणदर्शिनाम् ॥ १९
अवाच्यापरिमेयाश्च ब्राह्मणा वनमाश्रिताः ।
वैखानसा वालखिल्याः सिकताश्च तथापरे ॥ २०
कर्मभिस्ते निरानन्दा धर्मनित्या जितेन्द्रियाः ।
गताः प्रत्यक्षधर्माणस्ते सर्वे वनमाश्रिताः ।
अनक्षत्रा अनाधृष्या दृश्यन्ते ज्योतिषां गणाः ॥ २१
जरया च परिद्यूनो व्याधिना च प्रपीडितः ।
चतुर्थे चायुषः शेषे वानप्रस्थाश्रमं त्यजेत् ।
सद्यस्कारां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ॥ २२
आत्मयाजी सोऽऽत्मरतिरात्मक्रीडात्मसंश्रयः ।
आत्मन्यग्नीन्समारोप्य त्यक्त्वा सर्वपरिग्रहान् ॥ २३

सद्यस्कांश्च यजेयज्ञानिष्टीश्चैवेह सर्वदा ।
सदैव याजिनां यज्ञादात्मनीज्या निवर्तते ॥ २४
त्रींश्चैवाग्नीन्यजेत्सम्यगात्मन्येवात्ममोक्षणात् ।
प्राणेभ्यो यजुषा पञ्च षट् प्राश्नीयादकुत्सयन् ॥२५
केशलोमनखान्वाप्य वानप्रस्थो मुनिस्ततः ।
आश्रमादाश्रमं सद्यः पूतो गच्छति कर्मभिः ॥ २६
अभयं सर्वभूतेभ्यो यो दत्त्वा प्रव्रजेद्द्विजः ।
लोकास्तेजोमयास्तस्य प्रेत्य चानन्त्यमश्नुते ॥ २७

सुशीलवृत्तो व्यपनीतकल्मषो
न चेह नामुत्र च कर्तुमीहते ।
अरोषमोहो गतसंधिविग्रहो
भवेदुदासीनवदात्मविन्नरः ॥ २८
यमेषु चैवात्मगतेषु न व्यथे-
त्स्वशास्त्रसूत्राहुतिमन्त्रविक्रमः ।
भवेद्यथेष्टा गतिरात्मयाजिनो
न संशयो धर्मपरे जितेन्द्रिये ॥ २९
ततः परं श्रेष्ठमतीव सद्गुणै-
रधिष्ठितं त्रीनधिवृत्तमुत्तमम् ।
चतुर्थमुक्तं परमाश्रमं शृणु
प्रकीर्त्यमानं परमं परायणम् ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
षट्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३६ ॥

२३७

शुक उवाच ।

वर्तमानस्तथैवात्र वानप्रस्थाश्रमे यथा ।
योक्तव्योऽऽत्मा यथा शक्त्या परं वै काङ्क्षता पदम् ॥१

व्यास उवाच ।

प्राप्य संस्कारमेताभ्यामाश्रमाभ्यां ततः परम् ।
यत्कार्यं परमार्थार्थं तदिहैकमनाः शृणु ॥ २
कषायं पाचयित्वा तु श्रेणिस्थानेषु च त्रिषु ।
प्रव्रजेच्च परं स्थानं पारिव्रज्यमनुत्तमाम् ॥ ३
तद्भवानेवमभ्यस्य वर्ततां श्रूयतां तथा ।
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ॥ ४
एकश्चरति यः पश्यन्न जहाति न हीयते ।
अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ॥ ५
अश्वस्तनविधानः स्यान्मुनिर्भावसमन्वितः ।
लघ्वाशी नियताहारः सकृदन्ननिषेविता ॥ ६
कपालं वृक्षमूलानि कुचेलमसहायता ।
उपेक्षा सर्वभूतानामेतावद्भिक्षुलक्षणम् ॥ ७
यस्मिन्वाचः प्रविशन्ति कूपे प्राप्ताः शिला इव ।
न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥ ८
नैव पश्येन्न शृणुयादवाच्यं जातु कस्यचित् ।
ब्राह्मणानां विशेषेण नैव ब्रूयात्कथंचन ॥ ९
यद्ब्राह्मणस्य कुशलं तदेव सततं वदेत् ।
तूष्णीमासीत निन्दायां कुर्वन्भेषजमात्मनः ॥ १०
येन पूर्णमिवाकाशं भवत्येकेन सर्वदा ।
शून्यं येन जनाकीर्णं तं देवा ब्राह्मणं विदुः ॥ ११
येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्रक्वचनशायी च तं देवा ब्राह्मणं विदुः ॥ १२
अहेरिव गणाद्भीतः सौहित्यान्नरकादिव ।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥१३
न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः ।
सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ॥ १४
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निदेशं भृतको यथा ॥ १५
अनभ्याहतचित्तः स्यादनभ्याहतवाक्तथा ।
निर्मुक्तः सर्वपापेभ्यो निरमित्रस्य किं भयम् ॥१६
अभयं सर्वभूतेभ्यो भूतानामभयं यतः ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥ १७
यथा नागपदेऽन्यानि पदानि पदगामिनाम् ।

सर्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ॥ १८
एवं सर्वमहिंसायां धर्मार्थमपिधीयते ।
अमृतः स नित्यं वसति योऽहिंसां प्रतिपद्यते ॥१९
अहिंसकः समः सत्यो धृतिमान्नियतेन्द्रियः ।
शरण्यः सर्वभूतानां गतिमाप्नोत्यनुत्तमाम् ॥ २०
एवं प्रज्ञानतृप्तस्य निर्भयस्य मनीषिणः ।
न मृत्युरतिगो भावः स मृत्युमधिगच्छति ॥ २१
विमुक्तं सर्वसङ्गेभ्यो मुनिमाकाशवत्स्थितम् ।
अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः ॥ २२
जीवितं यस्य धर्मार्थं धर्मोऽरत्यर्थमेव च ।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ॥ २३
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः ॥ २४
सर्वाणि भूतानि सुखे रमन्ते
सर्वाणि दुःखस्य भृशं त्रसन्ति ।
तेषां भयोत्पादनजातखेदः
कुर्यान्न कर्माणि हि श्रद्दधानः ॥ २५
दानं हि भूताभयदक्षिणायाः
सर्वाणि दानान्यधितिष्ठतीह ।
तीक्ष्णां तनुं यः प्रथमं जहाति
सोऽनन्तमाप्नोत्यभयं प्रजाभ्यः ॥ २६
उत्तान आस्येन हविर्जुहोति
लोकस्य नाभिर्जगतः प्रतिष्ठा ।
तस्याङ्गमङ्गानि कृताकृतं च
वैश्वानरः सर्वमेव प्रपेदे ॥ २७
प्रादेशमात्रे हृदि निश्रितं य-
त्तस्मिन्प्राणानात्मयाजी जुहोति ।
तस्याग्निहोत्रं हुतमात्मसंस्थं
सर्वेषु लोकेषु सदैवतेषु ॥ २८
दैवं त्रिधातुं त्रिवृतं सुपर्णं
ये विद्युरग्र्यं परमार्थतां च ।
ते सर्वलोकेषु महीयमाना
देवाः समर्थाः सुकृतं व्रजन्ति ॥ २९
वेदांश्च वेद्यं च विधिं च कृत्स्न-
मथो निरुक्तं परमार्थतां च ।
सर्वं शरीरात्मनि यः प्रवेद
तस्मै स्म देवाः स्पृहयन्ति नित्यम् ॥ ३०
भूमावसक्तं दिवि चाप्रमेयं
हिरण्मयं योऽण्डजमण्डमध्ये ।
पतत्रिणं पक्षिणमन्तरिक्षे
यो वेद भोग्यात्मनि दीप्तरश्मिः ॥ ३१
आवर्तमानमजरं विवर्तनं
षण्णेमिकं द्वादशारं सुपर्व ।
यस्येदमास्ये परियाति विश्वं
तत्कालचक्रं निहितं गुहायाम् ॥ ३२
यः संप्रसादं जगतः शरीरं
सर्वान्स लोकानधिगच्छतीह ।
तस्मिन्हुतं तर्पयतीह देवां-
स्ते वै तृप्तास्तर्पयन्त्यास्यमस्य ॥ ३३
तेजोमयो नित्यतनुः पुराणो
लोकाननन्तानभयानुपैति ।
भूतानि यस्मान्न त्रसन्ते कदाचि-
त्स भूतेभ्यो न त्रसते कदाचित् ॥ ३४
अगर्हणीयो न च गर्हतेऽन्या-
न्स वै विप्रः परमात्मानमीक्षेत् ।
विनीतमोहो व्यपनीतकल्मषो
न चेह नामुत्र च योऽर्थमृच्छति ॥ ३५
अरोषमोहः समलोष्टकाञ्चनः
प्रहीणशोको गतसंधिविग्रहः ।
अपेतनिन्दास्तुतिरप्रियाप्रिय-

श्चरन्नुदासीनवदेष भिक्षुकः ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि
सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥

२३८

व्यास उवाच ।

प्रकृतेस्तु विकारा ये क्षेत्रज्ञस्तैः परिश्रितः ।
ते चैनं न प्रजानन्ति स तु जानाति तानपि ॥ १
तैश्चैष कुरुते कार्यं मनःषष्ठैरिहेन्द्रियैः ।
सुदान्तैरिव संयन्ता दृढैः परमवाजिभिः ॥ २
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परमं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ ३
महतः परमव्यक्तमव्यक्तात्परतोऽमृतम् ।
अमृतान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ ४
एवं सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया तत्त्वदर्शिभिः ॥
अन्तरात्मनि संलीय मनःषष्ठानि मेधया ।
इन्द्रियाणीन्द्रियार्थांश्च बहु चिन्त्यमचिन्तयन् ॥ ६
ध्यानोपरमणं कृत्वा विद्यासंपादितं मनः ।
अनीश्वरः प्रशान्तात्मा ततोऽर्छत्यमृतं पदम् ॥ ७
इन्द्रियाणां तु सर्वेषां वश्यात्मा चलितस्मृतिः ।
आत्मनः संप्रदानेन मर्त्यो मृत्युमुपाश्नुते ॥ ८
हित्वा तु सर्वसंकल्पान्सत्त्वे चित्तं निवेशयेत् ।
सत्त्वे चित्तं समावेश्य ततः कालंजरो भवेत् ॥९
चित्तप्रसादेन यतिर्जहाति हि शुभाशुभम् ।
प्रसन्नात्मात्मनि स्थित्वा सुखमानन्त्यमश्नुते ॥ १०
लक्षणं तु प्रसादस्य यथा तृप्तः सुखं स्वपेत् ।
निवाते वा यथा दीपो दीप्यमानो न कम्पते ॥११
एवं पूर्वापरे रात्रे युञ्जन्नात्मानमात्मना ।
सत्त्वाहारविशुद्धात्मा पश्यत्यात्मानमात्मनि ॥ १२
रहस्यं सर्ववेदानामनैतिह्यमनागमम् ।
आत्मप्रत्ययिकं शास्त्रमिदं पुत्रानुशासनम् ॥ १३
धर्माख्यानेषु सर्वेषु सत्याख्यानेषु यद्वसु ।
दशेदमृक्सहस्राणि निर्मथ्यामृतमुद्धृतम् ॥ १४
नवनीतं यथा दध्नः काष्ठादग्निर्यथैव च ।
तथैव विदुषां ज्ञानं पुत्रहेतोः समुद्धृतम् ।
स्नातकानामिदं शास्त्रं वाच्यं पुत्रानुशासनम् ॥ १५
तदिदं नाप्रशान्ताय नादान्तायातपस्विने ।
नावेदविदुषे वाच्यं तथा नानुगताय च ॥ १६
नासूयकायानृजवे न चानिर्दिष्टकारिणे ।
न तर्कशास्त्रदग्धाय तथैव पिशुनाय च ॥ १७
श्लाघते श्लाघनीयाय प्रशान्ताय तपस्विने ।
इदं प्रियाय पुत्राय शिष्यायानुगताय च ।
रहस्यधर्मं वक्तव्यं नान्यस्मै तु कथंचन ॥ १८
यद्यप्यस्य महीं दद्याद्रत्नपूर्णामिमां नरः ।
इदमेव ततः श्रेय इति मन्येत तत्त्ववित् ॥ १९
अतो गुह्यतरार्थं तदध्यात्ममतिमानुषम् ।
यत्तन्महर्षिभिर्दृष्टं वेदान्तेषु च गीयते ।
तत्तेऽहं संप्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
अष्टात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥

२३९

शुक उवाच ।

अध्यात्मं विस्तरेणेह पुनरेव वदस्व मे ।
यदध्यात्मं यथा चेदं भगवन्नृषिसत्तम ॥ १

व्यास उवाच ।

अध्यात्मं यदिदं तात पुरुषस्येह विद्यते ।
तत्तेऽहं संप्रवक्ष्यामि तस्य व्याख्यामिमां शृणु ॥२
भूमिरापस्तथा ज्योतिर्वायुराकाशमेव च ।
महाभूतानि भूतानां सागरस्योर्मयो यथा ॥ ३
प्रसार्येह यथाङ्गानि कूर्मः संहरते पुनः ।

तद्वन्महान्ति भूतानि यवीयःसु विकुर्वते ॥ ४
इति तन्मयमेवेदं सर्वं स्थावरजङ्गमम् ।
सर्गे च प्रलये चैव तस्मान्निर्दिश्यते तथा ॥ ५
महाभूतानि पञ्चैव सर्वभूतेषु भूतकृत् ।
अकरोत्तात वैषम्यं यस्मिन्यदनुपश्यति ॥ ६

शुक उवाच ।

अकरोद्यच्छरीरेषु कथं तदुपलक्षयेत् ।
इन्द्रियाणि गुणाः केचित्कथं तानुपलक्षयेत् ॥ ७

व्यास उवाच ।

एतत्ते वर्तयिष्यामि यथावदिह दर्शनम् ।
शृणु तत्त्वमिहैकाग्रो यथातत्त्वं यथा च तत् ॥ ८
शब्दः श्रोत्रं तथा खानि त्रयमाकाशसंभवम् ।
प्राणश्चेष्टा तथा स्पर्श एते वायुगुणास्त्रयः ॥ ९
रूपं चक्षुर्विपाकश्च त्रिधा ज्योतिर्विधीयते ।
रसोऽथ रसनं स्नेहो गुणास्त्वेते त्रयोऽम्भसाम् ॥ १०
घ्रेयं घ्राणं शरीरं च भूमेरेते गुणास्त्रयः ।
एतावानिन्द्रियग्रामो व्याख्यातः पाञ्चभौतिकः ॥ ११
वायोः स्पर्शो रसोऽद्भ्यश्च ज्योतिषो रूपमुच्यते ।
आकाशप्रभवः शब्दो गन्धो भूमिगुणः स्मृतः ॥ १२
मनो बुद्धिश्च भावश्च त्रय एतेऽऽत्मयोनिजाः ।
न गुणानतिवर्तन्ते गुणेभ्यः परमा मताः ॥ १३
इन्द्रियाणि नरे पञ्च षष्ठं तु मन उच्यते ।
सप्तमीं बुद्धिमेवाहुः क्षेत्रज्ञं पुनरष्टमम् ॥ १४
चक्षुरालोचनायैव संशयं कुरुते मनः ।
बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते ॥ १५
रजस्तमश्च सत्त्वं च त्रय एते स्वयोनिजाः ।
समाः सर्वेषु भूतेषु तद्गुणेषूपलक्षयेत् ॥ १६
यथा कूर्म इहाङ्गानि प्रसार्य विनियच्छति ।
एवमेवेन्द्रियग्रामं बुद्धिः सृष्ट्वा नियच्छति ॥ १७
यदूर्ध्वं पादतलयोरवाङ्मूर्ध्नश्च पश्यति ।
एतस्मिन्नेव कृत्ये वै वर्तते बुद्धिरुत्तमा ॥ १८
गुणान्नेनीयते बुद्धिर्बुद्धिरेवेन्द्रियाण्यपि ।
मनःषष्ठानि सर्वाणि बुद्ध्यभावे कुतो गुणाः ॥ १९
तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ।
प्रशान्तमिव संशुद्धं सत्त्वं तदुपधारयेत् ॥ २०
यत्तु संतापसंयुक्तं काये मनसि वा भवेत् ।
रजः प्रवर्तकं तत्स्यात्सततं हारि देहिनाम् ॥ २१
यत्तु संमोहसंयुक्तमव्यक्तविषयं भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधार्यताम् ॥ २२
प्रहर्षः प्रीतिरानन्दः साम्यं स्वस्थात्मचित्तता ।
अकस्माद्यदि वा कस्माद्वर्तते सात्त्विको गुणः ॥ २३
अभिमानो मृषावादो लोभो मोहस्तथाक्षमा ।
लिङ्गानि रजसस्तानि वर्तन्ते हेत्वहेतुतः ॥ २४
तथा मोहः प्रमादश्च तन्द्री निद्राप्रबोधिता ।
कथंचिदभिवर्तन्ते विज्ञेयास्तामसा गुणाः ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
एकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥

२४०

व्यास उवाच ।

मनः प्रसृजते भावं बुद्धिरध्यवसायिनी ।
हृदयं प्रियाप्रिये वेद त्रिविधा कर्मचोदना ॥ १
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परमं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा परो मतः ॥ २
बुद्धिरात्मा मनुष्यस्य बुद्धिरेवात्मनोऽऽत्मिका ।
यदा विकुरुते भावं तदा भवति सा मनः ॥ ३
इन्द्रियाणां पृथग्भावाद्बुद्धिर्विक्रियते ह्यणु ।
शृण्वती भवति श्रोत्रं स्पृशती स्पर्श उच्यते ॥ ४
पश्यन्ती भवते दृष्टी रसती रसनं भवेत् ।
जिघ्रती भवति घ्राणं बुद्धिर्विक्रियते पृथक् ॥ ५
इन्द्रियाणीति तान्याहुस्तेष्वदृश्याधितिष्ठति ।

तिष्ठती पुरुषे बुद्धिस्त्रिषु भावेषु वर्तते ॥ ६
कदाचिल्लभते प्रीतिं कदाचिदपि शोचते ।
न सुखेन न दुःखेन कदाचिदिह युज्यते ॥ ७
सेयं भावात्मिका भावांस्त्रीनेतानतिवर्तते ।
सरितां सागरो भर्ता महावेलामिवोर्मिमान् ॥ ८
यदा प्रार्थयते किंचित्तदा भवति सा मनः ।
अधिष्ठानानि वै बुद्ध्या पृथगेतानि संस्मरेत् ।
इन्द्रियाण्येव मेध्यानि विजेतव्यानि कृत्स्नशः ॥ ९
सर्वाण्येवानुपूर्व्येण यद्यन्नानुविधीयते ।
अविभागगता बुद्धिर्भावे मनसि वर्तते ।
प्रवर्तमानं तु रजः सत्त्वमप्यनुवर्तते ॥ १०
ये चैव भावा वर्तन्ते सर्व एष्वेव ते त्रिषु ।
अन्वर्थाः संप्रवर्तन्ते रथनेमिमरा इव ॥ ११
प्रदीपार्थं नरः कुर्यादिन्द्रियैर्बुद्धिसत्तमैः ।
निश्चरद्भिर्यथायोगमुदासीनैर्यदृच्छया ॥ १२
एवंस्वभावमेवेदमिति विद्वान्न मुह्यति ।
अशोचन्नप्रहृष्यंश्च नित्यं विगतमत्सरः ॥ १३
न ह्यात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः ।
प्रवर्तमानैरनये दुर्धरैरकृतात्मभिः ॥ १४
तेषां तु मनसा रश्मीन्यदा सम्यङ्नियच्छति ।
तदा प्रकाशते ह्यात्मा घटे दीप इव ज्वलन् ।
सर्वेषामेव भूतानां तमस्यपगते यथा ॥ १५
यथा वारिचरः पक्षी न लिप्यति जले चरन् ।
एवमेव कृतप्रज्ञो न दोषैर्विषयांश्चरन् ।
असज्जमानः सर्वेषु न कथंचन लिप्यते ॥ १६
त्यक्त्वा पूर्वकृतं कर्म रतिर्यस्य सदात्मनि ।
सर्वभूतात्मभूतस्य गुणमार्गेष्वसज्जतः ॥ १७
सत्त्वमात्मा प्रसवति गुणान्वापि कदा च न ।
न गुणा विदुरात्मानं गुणान्वेद स सर्वदा ॥ १८
परिद्रष्टा गुणानां स स्रष्टा चैव यथातथम् ।
सत्त्वक्षेत्रज्ञयोरेतदन्तरं विद्धि सूक्ष्मयोः ॥ १९
सृजते तु गुणानेक एको न सृजते गुणान् ।
पृथग्भूतौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा ॥ २०
यथा मत्स्योऽद्भिरन्यः सन्संप्रयुक्तौ तथैव तौ ।
मशकोदुम्बरौ चापि संप्रयुक्तौ यथा सह ॥ २१
इषीका वा यथा मुञ्जे पृथक्च सह चैव च ।
तथैव सहितावेतावन्योन्यस्मिन्प्रतिष्ठितौ ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥

२४१

व्यास उवाच ।

सृजते तु गुणान्सत्त्वं क्षेत्रज्ञस्त्वनुतिष्ठति ।
गुणान्विक्रियतः सर्वानुदासीनवदीश्वरः ॥ १
स्वभावयुक्तं तत्सर्वं यदिमान्सृजते गुणान् ।
ऊर्णनाभिर्यथा सूत्रं सृजते तन्तुवद्गुणान् ॥ २
प्रध्वस्ता न निवर्तन्ते प्रवृत्तिर्नोपलभ्यते ।
एवमेके व्यवस्यन्ति निवृत्तिरिति चापरे ॥ ३
उभयं संप्रधार्यैतदध्यवस्येद्यथामति ।
अनेनैव विधानेन भवेद्गर्भशयो महान् ॥ ४
अनादिनिधनं नित्यमासाद्य विचरेन्नरः ।
अक्रुध्यन्नप्रहृष्यंश्च नित्यं विगतमत्सरः ॥ ५
इत्येवं हृदयग्रन्थिं बुद्धिचिन्तामयं दृढम् ।
अतीत्य सुखमासीत अशोचंश्छिन्नसंशयः ॥ ६
तप्येयुः प्रच्युताः पृथ्व्या यथा पूर्णां नदीं नराः ।
अवगाढा ह्यविद्वांसो विद्धि लोकमिमं तथा ॥ ७
न तु ताम्यति वै विद्वान्स्थले चरति तत्त्ववित् ।
एवं यो विन्दतेऽऽत्मानं केवलं ज्ञानमात्मनः ॥ ८
एवं बुद्ध्वा नरः सर्वां भूतानामागतिं गतिम् ।
समवेक्ष्य शनैः सम्यग्लभते शममुत्तमम् ॥ ९
एतद्वै जन्मसामर्थ्यं ब्राह्मणस्य विशेषतः ।

आत्मज्ञानं शमश्चैव पर्याप्तं तत्परायणम् ॥ १०
एतद्बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणम् ।
विज्ञायैतद्विमुच्यन्ते कृतकृत्या मनीषिणः ॥ ११
न भवति विदुषां महद्भयं
यदविदुषां सुमहद्भयं भवेत् ।
न हि गतिरधिकास्ति कस्यचि-
द्भवति हि या विदुषः सनातनी ॥ १२
लोकमातुरमसूयते जन-
स्तत्तदेव च निरीक्ष्य शोचते ।
तत्र पश्य कुशलानशोचतो
ये विदुस्तदुभयं कृताकृतम् ॥ १३
यत्करोत्यनभिसंधिपूर्वकं
तच्च निर्णुदति यत्पुरा कृतम् ।
न प्रियं तदुभयं न चाप्रियं
तस्य तज्जनयतीह कुर्वतः ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
एकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥

२४२

शुक उवाच ।

यस्माद्धर्मात्परो धर्मो विद्यते नेह कश्चन ।
यो विशिष्टश्च धर्मेभ्यस्तं भवान्प्रब्रवीतु मे ॥ १

व्यास उवाच ।

धर्मं ते संप्रवक्ष्यामि पुराणमृषिसंस्तुतम् ।
विशिष्टं सर्वधर्मेभ्यस्तमिहैकमनाः शृणु ॥ २
इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नतः ।
सर्वतो निष्पतिष्णूनि पिता बालानिवात्मजान् ॥ ३
मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ ४
तानि सर्वाणि संधाय मनःषष्ठानि मेधया ।
आत्मतृप्त इवासीत बहु चिन्त्यमचिन्तयन् ॥ ५
गोचरेभ्यो निवृत्तानि यदा स्थास्यन्ति वेश्मनि ।
तदा त्वमात्मनात्मानं परं द्रक्ष्यसि शाश्वतम् ॥ ६
सर्वात्मानं महात्मानं विधूममिव पावकम् ।
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ॥ ७
यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः ।
आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलम् ॥ ८
एवमात्मा न जानीते क्व गमिष्ये कुतो न्वहम् ।
अन्यो ह्यत्रान्तरात्मास्ति यः सर्वमनुपश्यति ॥ ९
ज्ञानदीपेन दीप्तेन पश्यत्यात्मानमात्मना ।
दृष्ट्वा त्वमात्मनात्मानं निरात्मा भव सर्ववित् ॥ १०
विमुक्तः सर्वपापेभ्यो मुक्तत्वच इवोरगः ।
परां बुद्धिमवाप्येह विपाप्मा विगतज्वरः ॥ ११
सर्वतःस्रोतसं घोरां नदीं लोकप्रवाहिनीम् ।
पञ्चेन्द्रियग्राहवतीं मनःसंकल्परोधसम् ॥ १२
लोभमोहतृणच्छन्नां कामक्रोधसरीसृपाम् ।
सत्यतीर्थानृतक्षोभां क्रोधपङ्कां सरिद्वराम् ॥ १३
अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः ।
प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलाम् ॥ १४
संसारसागरगमां योनिपातालदुस्तराम् ।
आत्मजन्मोद्भवां तात जिह्वावर्तां दुरासदाम् ॥ १५
यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः ।
तां तीर्णः सर्वतोमुक्तो विपूतात्मात्मविच्छुचिः ॥ १६
उत्तमां बुद्धिमास्थाय ब्रह्मभूयं गमिष्यसि ।
संतीर्णः सर्वसंक्लेशान्प्रसन्नात्मा विकल्मषः ॥ १७
भूमिष्ठानीव भूतानि पर्वतस्थो निशामय ।
अक्रुध्यन्नप्रहृष्यंश्च ननृशंसमतिस्तथा ।
ततो द्रक्ष्यसि भूतानां सर्वेषां प्रभवाप्ययौ ॥ १८
एवं वै सर्वधर्मेभ्यो विशिष्टं मेनिरे बुधाः ।
धर्मं धर्मभृतां श्रेष्ठ मुनयस्तत्त्वदर्शिनः ॥ १९
आत्मनोऽव्ययिनो ज्ञात्वा इदं पुत्रानुशासनम् ।

प्रयताय प्रवक्तव्यं हितायानुगताय च ॥ २०
आत्मज्ञानमिदं गुह्यं सर्वगुह्यतमं महत् ।
अब्रुवं यदहं तात आत्मसाक्षिकमञ्जसा ॥ २१
नैव स्त्री न पुमानेतन्नैव चेदं नपुंसकम् ।
अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकम् ॥ २२
नैतज्ज्ञात्वा पुमान्स्त्री वा पुनर्भवमवाप्नुयात् ।
अभवप्रतिपत्त्यर्थमेतद्वर्त्म विधीयते ॥ २३
यथा मतानि सर्वाणि न चैतानि यथा तथा ।
कथितानि मया पुत्र भवन्ति न भवन्ति च ॥ २४
तत्प्रीतियुक्तेन गुणान्वितेन
पुत्रेण सत्पुत्रगुणान्वितेन ।
पृष्टो हीदं प्रीतिमता हितार्थं
ब्रूयात्सुतस्येह यदुक्तमेतत् ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥

२४३

व्यास उवाच ।

गन्धान्रसान्नानुरुन्ध्यात्सुखं वा
नालंकारांश्चाप्नुयात्तस्य तस्य ।
मानं च कीर्तिं च यशश्च नेच्छे-
त्स वै प्रचारः पश्यतो ब्राह्मणस्य ॥ १
सर्वान्वेदानधीयीत शुश्रूषुर्ब्रह्मचर्यवान् ।
ऋचो यजूंषि सामानि न तेन न स ब्राह्मणः ॥ २
ज्ञातिवत्सर्वभूतानां सर्ववित्सर्ववेदवित् ।
नाकामो म्रियते जातु न तेन न च ब्राह्मणः ॥ ३
इष्टीश्च विविधाः प्राप्य क्रतूंश्चैवाप्तदक्षिणान् ।
नैव प्राप्नोति ब्राह्मण्यमभिध्यानात्कथंचन ॥ ४
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ ५
यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ६
कामबन्धनमेवैकं नान्यदस्तीह बन्धनम् ।
कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते ॥ ७
कामतो मुच्यमानस्तु धूम्राभ्रादिव चन्द्रमाः ।
विरजाः कालमाकाङ्क्षन्धीरो धैर्येण वर्तते ॥ ८
आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
स कामकान्तो न तु कामकामः
स वै लोकात्स्वर्गमुपैति देही ॥ ९
वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दमः ।
दमस्योपनिषद्दानं दानस्योपनिषत्तपः ॥ १०
तपसोपनिषत्त्यागस्त्यागस्योपनिषत्सुखम् ।
सुखस्योपनिषत्स्वर्गः स्वर्गस्योपनिषच्छमः ॥ ११
क्लेदनं शोकमनसोः संतापं तृष्णया सह ।
सत्त्वमिच्छसि संतोषाच्छान्तिलक्षणमुत्तमम् ॥१२
विशोको निर्ममः शान्तः प्रसन्नात्मात्मवित्तमः ।
षड्भिर्लक्षणवानेतैः समग्रः पुनरेष्यति ॥ १३
षड्भिः सत्त्वगुणोपेतैः प्राज्ञैरधिकमत्रिभिः ।
ये विदुः प्रेत्य चात्मानमिहस्थांस्तांस्तथा विदुः ॥१४
अकृत्रिममसंहार्यं प्राकृतं निरुपस्कृतम् ।
अध्यात्मं सुकृतप्रज्ञः सुखमव्ययमश्नुते ॥ १५
निष्प्रचारं मनः कृत्वा प्रतिष्ठाप्य च सर्वतः ।
यामयं लभते तुष्टिं सा न शक्यमतोऽन्यथा ॥१६
येन तृप्यत्यभुञ्जानो येन तुष्यत्यवित्तवान् ।
येनास्नेहो बलं धत्ते यस्तं वेद स वेदवित् ॥ १७
संगोप्य ह्यात्मनो द्वाराण्यपिधाय विचिन्तयन् ।
यो ह्यास्ते ब्राह्मणः शिष्टः स आत्मरतिरुच्यते ॥१८
समाहितं परे तत्त्वे क्षीणकाममवस्थितम् ।
सर्वतः सुखमन्वेति वपुश्चान्द्रमसं यथा ॥ १९
सविशेषाणि भूतानि गुणांश्चाभजतो मुनेः ।

सुखेनापोह्यते दुःखं भास्करेण तमो यथा ॥ २०
अतिक्रान्तकर्माणमतिक्रान्तगुणक्षयम् ।
ब्राह्मणं विषयाश्लिष्टं जरामृत्यू न विन्दतः ॥ २१
स यदा सर्वतो मुक्तः समः पर्यवतिष्ठते ।
इन्द्रियाणीन्द्रियार्थांश्च शरीरस्थोऽतिवर्तते ॥ २२
कारणं परमं प्राप्य अतिक्रान्तस्य कार्यताम् ।
पुनरावर्तनं नास्ति संप्राप्तस्य परात्परम् ॥ २३
इति श्रीमहाभारते शान्तिपर्वणि
त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४३ ॥

२४४

व्यास उवाच ।

द्वंद्वानि मोक्षजिज्ञासुरर्थधर्मावनुष्ठितः ।
वक्त्रा गुणवता शिष्यः श्राव्यः पूर्वमिदं महत् ॥१
आकाशं मारुतो ज्योतिरापः पृथ्वी च पञ्चमी ।
भावाभावौ च कालश्च सर्वभूतेषु पञ्चसु ॥ २
अन्तरात्मकमाकाशं तन्मयं श्रोत्रमिन्द्रियम् ।
तस्य शब्दं गुणं विद्यान्मूर्तिशास्त्रविधानवित् ॥ ३
चरणं मारुतात्मेति प्राणापानौ च तन्मयौ ।
स्पर्शनं चेन्द्रियं विद्यात्तथा स्पर्शं च तन्मयम् ॥ ४
ततः पाकः प्रकाशश्च ज्योतिश्चक्षुश्च तन्मयम् ।
तस्य रूपं गुणं विद्यात्तमोऽन्ववसितात्मकम् ॥ ५
प्रक्लेदः क्षुद्रता स्नेह इत्यापो ह्युपदिश्यते ।
रसनं चेन्द्रियं जिह्वा रसश्चापां गुणो मतः ॥ ६
संघातः पार्थिवो धातुरस्थिदन्तनखानि च ।
श्मश्रु लोम च केशाश्च सिराः स्नायु च चर्म च ॥
इन्द्रियं घ्राणसंज्ञानं नासिकेत्यभिधीयते ।
गन्धश्चैवेन्द्रियार्थोऽयं विज्ञेयः पृथिवीमयः ॥ ८
उत्तरेषु गुणाः सन्ति सर्वे सर्वेषु चोत्तराः ।
पञ्चानां भूतसंघानां संततिं मुनयो विदुः ॥ ९
मनो नवममेषां तु बुद्धिस्तु दशमी स्मृता ।
एकादशोऽन्तरात्मा च सर्वतः पर उच्यते ॥ १०
व्यवसायात्मिका बुद्धिर्मनोव्याकरणात्मकम् ।
कर्मानुमानाद्विज्ञेयः स जीवः क्षेत्रसंज्ञकः ॥ ११
एभिः कालाष्टमैर्भावैर्यः सर्वैः सर्वमन्वितम् ।
पश्यत्यकलुषं प्राज्ञः स मोहं नानुवर्तते ॥ १२
इति श्रीमहाभारते शान्तिपर्वणि
चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥

२४५

व्यास उवाच ।

शरीराद्विप्रमुक्तं हि सूक्ष्मभूतं शरीरिणम् ।
कर्मभिः परिपश्यन्ति शास्त्रोक्तैः शास्त्रचेतसः ॥ १
यथा मरीच्यः सहिताश्चरन्ति
गच्छन्ति तिष्ठन्ति च दृश्यमानाः ।
देहैर्विमुक्ता विचरन्ति लोकां-
स्तथैव सत्त्वान्यतिमानुषाणि ॥ २
प्रतिरूपं यथैवाप्सु तापः सूर्यस्य लक्ष्यते ।
सत्त्ववांस्तु तथा सत्त्वं प्रतिरूपं प्रपश्यति ॥ ३
तानि सूक्ष्माणि सत्त्वस्था विमुक्तानि शरीरतः ।
स्वेन तत्त्वेन तत्त्वज्ञाः पश्यन्ति नियतेन्द्रियाः ॥४
स्वपतां जाग्रतां चैव सर्वेषामात्मचिन्तितम् ।
प्रधानद्वैधयुक्तानां जहतां कर्मजं रजः ॥ ५
यथाहनि तथा रात्रौ यथा रात्रौ तथाहनि ।
वशे तिष्ठति सत्त्वात्मा सततं योगयोगिनाम् ॥ ६
तेषां नित्यं सदानित्यो भूतात्मा सततं गुणैः ।
सप्तभिस्त्वन्वितः सूक्ष्मैश्चरिष्णुरजरामरः ॥ ७
मनोबुद्धिपराभूतः स्वदेहपरदेहवित् ।
स्वप्नेष्वपि भवत्येष विज्ञाता सुखदुःखयोः ॥ ८
तत्रापि लभते दुःखं तत्रापि लभते सुखम् ।
क्रोधलोभौ तु तत्रापि कृत्वा व्यसनमर्छति ॥ ९
प्रीणितश्चापि भवति महतोऽर्थानवाप्य च ।

करोति पुण्यं तत्रापि जाग्रन्निव च पश्यति ॥ १०
तमेवमतितेजोंशं भूतात्मानं हृदि स्थितम् ।
तमोरजोभ्यामाविष्टा नानुपश्यन्ति मूर्तिषु ॥ ११
शास्त्रयोगपरा भूत्वा स्वमात्मानं परीप्सवः ।
अनुच्छ्वासान्यमूर्तानि यानि वज्रोपमान्यपि ॥ १२
पृथग्भूतेषु सृष्टेषु चतुर्ष्वाश्रमकर्मसु ।
समाधौ योगमेवैतच्छाण्डिल्यः शममब्रवीत् ॥ १३
विदित्वा सप्त सूक्ष्माणि षडङ्गं च महेश्वरम् ।
प्रधानविनियोगस्थः परं ब्रह्माधिगच्छति ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥

२४६

व्यास उवाच ।

हृदि कामद्रुमश्चित्रो मोहसंचयसंभवः ।
क्रोधमानमहास्कन्धो विवित्सापरिमोचनः ॥ १
तस्य चाज्ञानमाधारः प्रमादः परिषेचनम् ।
सोऽभ्यसूयापलाशो हि पुरादुष्कृतसारवान् ॥ २
संमोहचिन्ताविटपः शोकशाखो भयंकरः ।
मोहनीभिः पिपासाभिर्लताभिः परिवेष्टितः ॥ ३
उपासते महावृक्षं सुलुब्धास्तं फलेप्सवः ।
आयासैः संयतः पाशैः फलानि परिवेष्टयन् ॥ ४
यस्तान्पाशान्वशे कृत्वा तं वृक्षमपकर्षति ।
गतः स दुःखयोरन्तं यतमानस्तयोर्द्वयोः ॥ ५
संरोहत्यकृतप्रज्ञः संतापेन हि पादपम् ।
स तमेव ततो हन्ति विषं ग्रस्तमिवातुरम् ॥ ६
तस्यानुशयमूलस्य मूलमुद्ध्रियते बलात् ।
त्यागाप्रमादाकृतिना साम्येन परमासिना ॥ ७
एवं यो वेद कामस्य केवलं परिकर्षणम् ।
वधं वै कामशास्त्रस्य स दुःखान्यतिवर्तते ॥ ८
शरीरं पुरमित्याहुः स्वामिनी बुद्धिरिष्यते ।
तत्र बुद्धेः शरीरस्थं मनो नामार्थचिन्तकम् ॥ ९
इन्द्रियाणि जनाः पौरास्तदर्थं तु परा कृतिः ।
तत्र द्वौ दारुणौ दोषौ तमो नाम रजस्तथा ॥ १
यदर्थमुपजीवन्ति पौराः सहपुरेश्वराः ।
अद्वारेण तमेवार्थं द्वौ दोषावुपजीवतः ॥ ११
तत्र बुद्धिर्हि दुर्धर्षा मनः साधर्म्यमुच्यते ।
पौराश्चापि मनस्त्रस्तास्तेषामपि चला स्थितिः ॥ १
यदर्थं बुद्धिरध्यास्ते न सोऽर्थः परिषीदति ।
यदर्थं पृथगध्यास्ते मनस्तत्परिषीदति ॥ १३
पृथग्भूतं यदा बुद्ध्या मनो भवति केवलम् ।
तत्रैनं विवृतं शून्यं रजः पर्यवतिष्ठते ॥ १४
तन्मनः कुरुते सख्यं रजसा सह संगतम् ।
तं चादाय जनं पौरं रजसे संप्रयच्छति ॥ १

इति श्रीमहाभारते शान्तिपर्वणि
षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥

२४७

भीष्म उवाच ।

भूतानां गुणसंख्यानं भूयः पुत्र निशामय ।
द्वैपायनमुखाद्भ्रष्टं श्लाघया परयानघ ॥ १
दीप्तानलनिभः प्राह भगवान्धूम्रवर्चसे ।
ततोऽहमपि वक्ष्यामि भूयः पुत्र निदर्शनम् ॥ २
भूमेः स्थैर्यं पृथुत्वं च काठिन्यं प्रसवात्मता ।
गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः ॥ ३
अपां शैत्यं रसः क्लेदो द्रवत्वं स्नेहसौम्यता ।
जिह्वा विष्यन्दिनी चैव भौमाप्यास्रवणं तथा ॥ ४
अग्नेर्दुर्धर्षता तेजस्तापः पाकः प्रकाशनम् ।
शौचं रागो लघुस्तैक्ष्ण्यं दशमं चोर्ध्वभागिता ॥ ५
वायोरनियमः स्पर्शो वादस्थानं स्वतन्त्रता ।
बलं शैघ्र्यं च मोहश्च चेष्टा कर्मकृता भवः ॥ ६
आकाशस्य गुणः शब्दो व्यापित्वं छिद्रतापि च ।

अनाश्रयमनालम्बमव्यक्तमविकारिता ॥ ७
अप्रतीघातता चैव भूतत्वं विकृतानि च ।
गुणाः पञ्चाशतं प्रोक्ताः पञ्चभूतात्मभाविताः ॥ ८
चलोपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा ।
सदसच्चाशुता चैव मनसो नव वै गुणाः ॥ ९
इष्टानिष्टविकल्पश्च व्यवसायः समाधिता ।
संशयः प्रतिपत्तिश्च बुद्धौ पञ्चेह ये गुणाः ॥ १०

युधिष्ठिर उवाच ।

कथं पञ्चगुणा बुद्धिः कथं पञ्चेन्द्रिया गुणाः ।
एतन्मे सर्वमाचक्ष्व सूक्ष्मज्ञानं पितामह ॥ ११

भीष्म उवाच ।

आहुः षष्टिं भूतगुणान्वै
भूतविशिष्टा नित्यविषक्ताः ।
भूतविषक्ताश्चाक्षरसृष्टाः
पुत्र न नित्यं तदिह वदन्ति ॥ १२
तत्पुत्र चिन्ताकलितं यदुक्त-
मनागतं वै तव संप्रतीह ।
भूतार्थतत्त्वं तदवाप्य सर्वं
भूतप्रभावाद्भव शान्तबुद्धिः ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥

२४८

युधिष्ठिर उवाच ।

य इमे पृथिवीपालाः शेरते पृथिवीतले ।
पृतनामध्य एते हि गतसत्त्वा महाबलाः ॥ १
एकैकशो भीमबला नागायुतबलास्तथा ।
एते हि निहताः संख्ये तुल्यतेजोबलैर्नरैः ॥ २
नैषां पश्यामि हन्तारं प्राणिनां संयुगे पुरा ।
विक्रमेणोपसंपन्नास्तेजोबलसमन्विताः ॥ ३
अथ चेमे महाप्राज्ञ शेरते हि गतासवः ।
मृता इति च शब्दोऽयं वर्तत्येषु गतासुषु ॥ ४
इमे मृता नृपतयः प्रायशो भीमविक्रमाः ।
तत्र मे संशयो जातः कुतः संज्ञा मृता इति ॥ ५
कस्य मृत्युः कुतो मृत्युः केन मृत्युरिह प्रजाः ।
हरत्यमरसंकाश तन्मे ब्रूहि पितामह ॥ ६

भीष्म उवाच ।

पुरा कृतयुगे तात राजासीदविकम्पकः ।
स शत्रुवशमापन्नः संग्रामे क्षीणवाहनः ॥ ७
तस्य पुत्रो हरिर्नाम नारायणसमो बले ।
स शत्रुभिर्हतः संख्ये सबलः सपदानुगः ॥ ८
स राजा शत्रुवशगः पुत्रशोकसमन्वितः ।
यदृच्छयाशान्तिपरो ददर्श भुवि नारदम् ॥ ९
स तस्मै सर्वमाचष्ट यथा वृत्तं जनेश्वरः ।
शत्रुभिर्ग्रहणं संख्ये पुत्रस्य मरणं तथा ॥ १०
तस्य तद्वचनं श्रुत्वा नारदोऽथ तपोधनः ।
आख्यानमिदमाचष्ट पुत्रशोकापहं तदा ॥ ११
राजञ्शृणु समाख्यानमद्येदं बहुविस्तरम् ।
यथा वृत्तं श्रुतं चैव मयापि वसुधाधिप ॥ १२
प्रजाः सृष्ट्वा महातेजाः प्रजासर्गे पितामहः ।
अतीव वृद्धा बहुला नामृष्यत पुनः प्रजाः ॥ १३
न ह्यन्तरमभूत्किंचित्क्वचिज्जन्तुभिरच्युत ।
निरुच्छ्वासमिवोन्नद्धं त्रैलोक्यमभवन्नृप ॥ १४
तस्य चिन्ता समुत्पन्ना संहारं प्रति भूपते ।
चिन्तयन्नाध्यगच्छच्च संहारे हेतुकारणम् ॥ १५
तस्य रोषान्महाराज खेभ्योऽग्निरुदतिष्ठत ।
तेन सर्वा दिशो राजन्ददाह स पितामहः ॥ १६
ततो दिवं भुवं खं च जगच्च सचराचरम् ।
ददाह पावको राजन्भगवत्कोपसंभवः ॥ १७
तत्रादह्यन्त भूतानि जङ्गमानि ध्रुवाणि च ।
महता कोपवेगेन कुपिते प्रपितामहे ॥ १८

ततो हरिजटः स्थाणुर्वेदाध्वरपतिः शिवः ।
जगाद शरणं देवो ब्रह्माणं परवीरहा ॥ १९
तस्मिन्नभिगते स्थाणौ प्रजानां हितकाम्यया ।
अब्रवीद्वरदो देवो ज्वलन्निव तदा शिवम् ॥ २०
करवाण्यद्य कं कामं वरार्होऽसि मतो मम ।
कर्ता ह्यस्मि प्रियं शंभो तव यद्धृदि वर्तते ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥

२४९

स्थाणुरुवाच ।

प्रजासर्गनिमित्तं मे कार्यवत्तामिमां प्रभो ।
विद्धि सृष्टास्त्वया हीमा मा कुप्यासां पितामह ॥ १
तव तेजोग्निना देव प्रजा दह्यन्ति सर्वशः ।
ता दृष्ट्वा मम कारुण्यं मा कुप्यासां जगत्प्रभो ॥२

प्रजापतिरुवाच ।

न कुप्ये न च मे कामो न भवेरन्प्रजा इति ।
लाघवार्थं धरण्यास्तु ततः संहार इष्यते ॥ ३
इयं हि मां सदा देवी भारार्ता समचोदयत् ।
संहारार्थं महादेव भारेणाप्सु निमज्जति ॥ ४
यदाहं नाधिगच्छामि बुद्ध्या बहु विचारयन् ।
संहारमासां वृद्धानां ततो मां क्रोध आविशत् ॥ ५

स्थाणुरुवाच ।

संहारान्तं प्रसीदस्व मा क्रुधस्त्रिदशेश्वर ।
मा प्रजाः स्थावरं चैव जङ्गमं च विनीनशः ॥ ६
पल्वलानि च सर्वाणि सर्वं चैव तृणोलपम् ।
स्थावरं जङ्गमं चैव भूतग्रामं चतुर्विधम् ॥ ७
तदेतद्भस्मसाद्भूतं जगत्सर्वमुपप्लुतम् ।
प्रसीद भगवन्साधो वर एष वृतो मया ॥ ८
नष्टा न पुनरेष्यन्ति प्रजा ह्येताः कथंचन ।
तस्मान्निवर्त्यतामेतत्तेजः स्वेनैव तेजसा ॥ ९
उपायमन्यं संपश्य प्रजानां हितकाम्यया ।
यथेमे जन्तवः सर्वे निवर्तेरन्परंतप ॥ १०
अभावमभिगच्छेयुरुत्सन्नप्रजनाः प्रजाः ।
अधिदैवनियुक्तोऽस्मि त्वया लोकेष्विहेश्वर ॥ ११
त्वद्भवं हि जगन्नाथ जगत्स्थावरजङ्गमम् ।
प्रसाद्य त्वां महादेव याचाम्यावृत्तिजाः प्रजाः ॥

नारद उवाच ।

श्रुत्वा तु वचनं देवः स्थाणोर्नियतवाङ्मनाः ।
तेजस्तत्स्वं निजग्राह पुनरेवान्तरात्मना ॥ १३
ततोऽग्निमुपसंगृह्य भगवाँल्लोकपूजितः ।
प्रवृत्तिं च निवृत्तिं च कल्पयामास वै प्रभुः ॥१४
उपसंहरतस्तस्य तमग्निं रोषजं तदा ।
प्रादुर्बभूव विश्वेभ्यः खेभ्यो नारी महात्मनः ॥१५
कृष्णा रक्ताम्बरधरा रक्तनेत्रतलान्तरा ।
दिव्यकुण्डलसंपन्ना दिव्याभरणभूषिता ॥ १६
सा विनिःसृत्य वै खेभ्यो दक्षिणामाश्रिता दिशम् ।
ददृशातेऽथ तौ कन्यां देवौ विश्वेश्वरावुभौ ॥ १७
तामाहूय तदा देवो लोकानामादिरीश्वरः ।
मृत्यो इति महीपाल जहि चेमाः प्रजा इति ॥१८
त्वं हि संहारबुद्ध्या मे चिन्तिता रुषितेन च ।
तस्मात्संहर सर्वास्त्वं प्रजाः सजडपण्डिताः ॥ १९
अविशेषेण चैव त्वं प्रजाः संहर भामिनि ।
मम त्वं हि नियोगेन श्रेयः परमवाप्स्यसि ॥ २०
एवमुक्ता तु सा देवी मृत्युः कमलमालिनी ।
प्रदध्यौ दुःखिता बाला साश्रुपातमतीव हि ॥ २१
पाणिभ्यां चैव जग्राह तान्यश्रूणि जनेश्वरः ।
मानवानां हितार्थाय ययाचे पुनरेव च ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि
एकोनपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥

२५०

नारद उवाच ।

विनीय दुःखमबला सा त्वतीवायतेक्षणा ।
उवाच प्राञ्जलिर्भूत्वा लतेवावर्जिता तदा ॥ १
त्वया सृष्टा कथं नारी मादृशी वदतां वर ।
रौद्रकर्माभिजायेत सर्वप्राणिभयंकरी ॥ २
बिभेम्यहमधर्मस्य धर्म्यमादिश कर्म मे ।
त्वं मां भीतामवेक्षस्व शिवेनेश्वर चक्षुषा ॥ ३
बालान्वृद्धान्वयःस्थांश्च न हरेयमनागसः ।
प्राणिनः प्राणिनामीश नमस्तेऽभिप्रसीद मे ॥ ४
प्रियान्पुत्रान्वयस्यांश्च भ्रातॄन्मातॄः पितॄनपि ।
अपध्यास्यन्ति यद्देव मृतांस्तेषां बिभेम्यहम् ॥ ५
कृपणाश्रुपरिक्लेदो दहेन्मां शाश्वतीः समाः ।
तेभ्योऽहं बलवद्भीता शरणं त्वामुपागता ॥ ६
यमस्य भवने देव यात्यन्ते पापकर्मिणः ।
प्रसादये त्वा वरद प्रसादं कुरु मे प्रभो ॥ ७
एतमिच्छाम्यहं कामं त्वत्तो लोकपितामह ।
इच्छेयं त्वत्प्रसादाच्च तपस्तप्तुं सुरेश्वर ॥ ८

पितामह उवाच ।

मृत्यो संकल्पिता मे त्वं प्रजासंहारहेतुना ।
गच्छ संहर सर्वास्त्वं प्रजा मा च विचारय॥ ९
एतदेवमवश्यं हि भविता नैतदन्यथा ।
क्रियतामनवद्याङ्गि यथोक्तं मद्वचोऽनघे ॥ १०

नारद उवाच ।

एवमुक्ता महाबाहो मृत्युः परपुरंजय ।
न व्याजहार तस्थौ च प्रह्वा भगवदुन्मुखी ॥ ११
पुनः पुनरथोक्ता सा गतसत्त्वेव भामिनी ।
तूष्णीमासीत्ततो देवो देवानामीश्वरेश्वरः ॥ १२
प्रससाद किल ब्रह्मा स्वयमेवात्मनात्मवान् ।
स्मयमानश्च लोकेशो लोकान्सर्वानवैक्षत ॥ १३
निवृत्तरोषे तस्मिंस्तु भगवत्यपराजिते ।
सा कन्यापजगामास्य समीपादिति नः श्रुतम् ॥१४
अपसृत्याप्रतिश्रुत्य प्रजासंहरणं तदा ।
त्वरमाणेव राजेन्द्र मृत्युर्धेनुकमभ्ययात् ॥ १५
सा तत्र परमं देवी तपोऽचरत दुश्चरम् ।
समा ह्येकपदे तस्थौ दश पद्मानि पञ्च च ॥ १६
तां तथा कुर्वतीं तत्र तपः परमदुश्चरम् ।
पुनरेव महातेजा ब्रह्मा वचनमब्रवीत् ॥ १७
कुरुष्व मे वचो मृत्यो तदनादृत्य सत्वरा ।
तथैवैकपदे तात पुनरन्यानि सप्त सा ॥ १८
तस्थौ पद्मानि षट् चैव पञ्च द्वे चैव मानद ।
भूयः पद्मायुतं तात मृगैः सह चचार सा ॥ १९
पुनर्गत्वा ततो राजन्मौनमातिष्ठदुत्तमम् ।
अप्सु वर्षसहस्राणि सप्त चैकं च पार्थिव ॥ २०
ततो जगाम सा कन्या कौशिकीं भरतर्षभ ।
तत्र वायुजलाहारा चचार नियमं पुनः ॥ २१
ततो ययौ महाभागा गङ्गां मेरुं च केवलम् ।
तस्थौ दार्विव निश्चेष्टा भूतानां हितकाम्यया ॥२२
ततो हिमवतो मूर्ध्नि यत्र देवाः समीजिरे ।
तत्राङ्गुष्ठेन राजेन्द्र निखर्वमपरं ततः ।
तस्थौ पितामहं चैव तोषयामास यत्नतः ॥ २३
ततस्तामब्रवीत्तत्र लोकानां प्रभवाप्ययः ।
किमिदं वर्तते पुत्रि क्रियतां तद्वचो मम ॥ २४
ततोऽब्रवीत्पुनर्मृत्युर्भगवन्तं पितामहम् ।
न हरेयं प्रजा देव पुनस्त्वाहं प्रसादये॥ २५
तामधर्मभयत्रस्तां पुनरेव च याचतीम् ।
तदाब्रवीद्देवदेवो निगृह्येदं वचस्ततः ॥ २६
अधर्मो नास्ति ते मृत्यो संयच्छेमाः प्रजाः शुभे ।
मया ह्युक्तं मृषा भद्रे भविता नेह किंचन ॥ २७

धर्मः सनातनश्च त्वामिहैवानुप्रवेक्ष्यते ।
अहं च विबुधाश्चैव त्वद्धिते निरताः सदा ॥ २८
इममन्यं च ते कामं ददामि मनसेप्सितम् ।
न त्वा दोषेण यास्यन्ति व्याधिसंपीडिताः प्रजाः ॥
पुरुषेषु च रूपेण पुरुषस्त्वं भविष्यसि ।
स्त्रीषु स्त्रीरूपिणी चैव तृतीयेषु नपुंसकम् ॥ ३०
सैवमुक्ता महाराज कृताञ्जलिरुवाच ह ।
पुनरेव महात्मानं नेति देवेशमव्ययम् ॥ ३१
तामब्रवीत्तदा देवो मृत्यो संहर मानवान् ।
अधर्मस्ते न भविता तथा ध्यास्याम्यहं शुभे ॥ ३२
यानश्रुबिन्दून्पतितानपश्यं
ये पाणिभ्यां धारितास्ते पुरस्तात् ।
ते व्याधयो मानवान्घोररूपाः
प्राप्ते काले पीडयिष्यन्ति मृत्यो ॥ ३३
सर्वेषां त्वं प्राणिनामन्तकाले
कामक्रोधौ सहितौ योजयेथाः ।
एवं धर्मस्त्वामुपैष्यत्यमेयो
न चाधर्मं लप्स्यसे तुल्यवृत्तिः ॥ ३४
एवं धर्मं पालयिष्यस्यथोक्तं
न चात्मानं मज्जयिष्यस्यधर्मे ।
तस्मात्कामं रोचयाभ्यागतं त्वं
संयोज्याथो संहरस्वेह जन्तून् ॥ ३५
सा वै तदा मृत्युसंज्ञापदेशा-
च्छापाद्भीता बाढमित्यब्रवीत्तम् ।
अथो प्राणान्प्राणिनामन्तकाले
कामक्रोधौ प्राप्य निर्मोह्य हन्ति ॥ ३६
मृत्योर्ये ते व्याधयश्चाश्रुपाता
मनुष्याणां रुज्यते यैः शरीरम् ।
सर्वेषां वै प्राणिनां प्राणनान्ते
तस्माच्छोकं मा कृथा बुध्य बुद्ध्या ॥ ३७
सर्वे देवाः प्राणिनां प्राणनान्ते
गत्वा वृत्ताः संनिवृत्तास्तथैव ।
एवं सर्वे मानवाः प्राणनान्ते
गत्वावृत्ता देववद्राजसिंह ॥ ३८
वायुर्भीमो भीमनादो महौजाः
सर्वेषां च प्राणिनां प्राणभूतः ।
नानावृत्तिर्देहिनां देहभेदे
तस्माद्वायुर्देवदेवो विशिष्टः ॥ ३९
सर्वे देवा मर्त्यसंज्ञाविशिष्टाः
सर्वे मर्त्या देवसंज्ञाविशिष्टाः ।
तस्मात्पुत्रं मा शुचो राजसिंह
पुत्रः स्वर्गं प्राप्य ते मोदते ह ॥ ४०
एवं मृत्युर्देवसृष्टा प्रजानां
प्राप्ते काले संहरन्ती यथावत् ।
तस्याश्चैव व्याधयस्तेऽश्रुपाताः
प्राप्ते काले संहरन्तीह जन्तून् ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥

२५१

युधिष्ठिर उवाच ।

इमे वै मानवाः सर्वे धर्मं प्रति विशङ्किताः ।
कोऽयं धर्मः कुतो धर्मस्तन्मे ब्रूहि पितामह ॥
धर्मो न्वयमिहार्थः किममुत्रार्थोऽपि वा भवेत् ।
उभयार्थोऽपि वा धर्मस्तन्मे ब्रूहि पितामह ॥ २

भीष्म उवाच ।

सदाचारः स्मृतिर्वेदास्त्रिविधं धर्मलक्षणम् ।
चतुर्थमर्थमित्याहुः कवयो धर्मलक्षणम् ॥ ३
अपि ह्युक्तानि कर्माणि व्यवस्यन्त्युत्तरावरे ।
लोकयात्रार्थमेवेह धर्मस्य नियमः कृतः ।
उभयत्र सुखोदर्क इह चैव परत्र च ॥ ४

अलब्ध्वा निपुणं धर्मं पापः पापे प्रसज्जति ।
न च पापकृतः पापान्मुच्यन्ते केचिदापदि ॥ ५
अपापवादी भवति यदा भवति धर्मवित् ।
धर्मस्य निष्ठा स्वाचारस्तमेवाश्रित्य भोत्स्यसे ॥ ६
यदाधर्मसमाविष्टो धनं गृह्णाति तस्करः ।
रमते निर्हरस्तेनः परवित्तमराजके ॥ ७
यदास्य तद्धरन्त्यन्ये तदा राजानमिच्छति ।
तदा तेषां स्पृहयते ये वै तुष्टाः स्वकैर्धनैः ॥ ८
अभीतः शुचिरभ्येति राजद्वारमशङ्कितः ।
न हि दुश्चरितं किंचिदन्तरात्मनि पश्यति ॥ ९
सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सत्येन विधृतं सर्वं सर्वं सत्ये प्रतिष्ठितम् ॥ १०
अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक्पृथक् ।
अद्रोहमविसंवादं प्रवर्तन्ते तदाश्रयाः ।
ते चेन्मिथोऽधृतिं कुर्युर्विनश्येयुरसंशयम् ॥ ११
न हर्तव्यं परधनमिति धर्मः सनातनः ।
मन्यन्ते बलवन्तस्तं दुर्बलैः संप्रवर्तितम् ।
यदा नियतिदौर्बल्यमथैषामेव रोचते ॥ १२
न ह्यत्यन्तं बलयुता भवन्ति सुखिनोऽपि वा ।
तस्मादनार्जवे बुद्धिर्न कार्या ते कथंचन ॥ १३
असाधुभ्योऽस्य न भयं न चोरेभ्यो न राजतः ।
न किंचित्कस्यचित्कुर्वन्निर्भयः शुचिरावसेत् ॥ १४
सर्वतः शङ्कते स्तेनो मृगो ग्राममिवेयिवान् ।
बहुधाचरितं पापमन्यत्रैवानुपश्यति ॥ १५
मुदितः शुचिरभ्येति सर्वतो निर्भयः सदा ।
न हि दुश्चरितं किंचिदात्मनोऽन्येषु पश्यति ॥१६
दातव्यमित्ययं धर्म उक्तो भूतहिते रतैः ।
तं मन्यन्ते धनयुताः कृपणैः संप्रवर्तितम् ॥ १७
यदा नियतिकार्पण्यमथैषामेव रोचते ।
न ह्यत्यन्तं धनवन्तो भवन्ति सुखिनोऽपि वा॥१८
यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः ।
न तत्परेषु कुर्वीत जानन्नप्रियमात्मनः ॥ १९
योऽन्यस्य स्यादुपपतिः स कं किं वक्तुमर्हति ।
यदन्यस्तस्य तत्कुर्यान्न मृष्येदिति मे मतिः ॥ २०
जीवितुं यः स्वयं चेच्छेत्कथं सोऽन्यं प्रघातयेत् ।
यद्यदात्मन इच्छेत तत्परस्यापि चिन्तयेत् ॥ २१
अतिरिक्तैः संविभजेद्भोगैरन्यानकिंचनान् ।
एतस्मात्कारणाद्धात्रा कुसीदं संप्रवर्तितम् ॥ २२
यस्मिंस्तु देवाः समये संतिष्ठेरंस्तथा भवेत् ।
अथ चेल्लाभसमये स्थितिर्धर्मेऽपि शोभना ॥ २३
सर्वं प्रियाभ्युपगतं धर्ममाहुर्मनीषिणः ।
पश्यैतं लक्षणोद्देशं धर्माधर्मे युधिष्ठिर ॥ २४
लोकसंग्रहसंयुक्तं विधात्रा विहितं पुरा ।
सूक्ष्मधर्मार्थनियतं सतां चरितमुत्तमम् ॥ २५
धर्मलक्षणमाख्यातमेतत्ते कुरुसत्तम ।
तस्मादनार्जवे बुद्धिर्न कार्या ते कथंचन ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
एकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥

२५२

युधिष्ठिर उवाच ।

सूक्ष्मं साधु समादिष्टं भवता धर्मलक्षणम् ।
प्रतिभा त्वस्ति मे काचित्तां ब्रूयामनुमानतः ॥ १
भूयांसो हृदये ये मे प्रश्नास्ते व्याहृतास्त्वया ।
इममन्यं प्रवक्ष्यामि न राजन्विग्रहादिव ॥ २
इमानि हि प्रापयन्ति सृजन्त्युत्तारयन्ति च ।
न धर्मः परिपाठेन शक्यो भारत वेदितुम् ॥ ३
अन्यो धर्मः समस्थस्य विषमस्थस्य चापरः ।
आपदस्तु कथं शक्याः परिपाठेन वेदितुम् ॥ ४
सदाचारो मतो धर्मः सन्तस्त्वाचारलक्षणाः ।

साध्यासाध्यं कथं शक्यं सदाचारो ह्यलक्षणम् ॥ ५
दृश्यते धर्मरूपेण अधर्मं प्राकृतश्चरन् ।
धर्मं चाधर्मरूपेण कश्चिदप्राकृतश्चरन् ॥ ६
पुनरस्य प्रमाणं हि निर्दिष्टं शास्त्रकोविदैः ।
वेदवादाश्चानुयुगं ह्रसन्तीति ह नः श्रुतम् ॥ ७
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे धर्मा यथाशक्तिकृता इव ॥ ८
आम्नायवचनं सत्यमित्ययं लोकसंग्रहः ।
आम्नायेभ्यः परं वेदाः प्रसृता विश्वतोमुखाः ॥ ९
ते चेत्सर्वे प्रमाणं वै प्रमाणं तन्न विद्यते ।
प्रमाणे चाप्रमाणे च विरुद्धे शास्त्रता कुतः ॥ १०
धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
या या विक्रियते संस्था ततः सापि प्रणश्यति ॥ ११
विद्म चैवं न वा विद्म शक्यं वा वेदितुं न वा ।
अणीयान्क्षुरधाराया गरीयान्पर्वतादपि ॥ १२
गन्धर्वनगराकारः प्रथमं संप्रदृश्यते ।
अन्वीक्ष्यमाणः कविभिः पुनर्गच्छत्यदर्शनम् ॥ १३
निपानानीव गोभ्याशे क्षेत्रे कुल्येव भारत ।
स्मृतोऽपि शाश्वतो धर्मो विप्रहीणो न दृश्यते ॥ १४
कामादन्ये क्षयादन्ये कारणैरपरैस्तथा ।
असन्तो हि वृथाचारं भजन्ते बहवोऽपरे ॥ १५
धर्मो भवति स क्षिप्रं विलीनस्त्वेव साधुषु ।
अन्ये तानाहुरुन्मत्तानपि चावहसन्त्युत ॥ १६
महाजना ह्युपावृत्ता राजधर्मं समाश्रिताः ।
न हि सर्वहितः कश्चिदाचारः संप्रदृश्यते ॥ १७
तेनैवान्यः प्रभवति सोऽपरं बाधते पुनः ।
दृश्यते चैव स पुनस्तुल्यरूपो यदृच्छया ॥ १८
येनैवान्यः प्रभवति सोऽपरानपि बाधते ।
आचाराणामनैकाग्र्यं सर्वेषामेव लक्षयेत् ॥ १९
चिराभिपन्नः कविभिः पूर्वं धर्म उदाहृतः ।
तेनाचारेण पूर्वेण संस्था भवति शाश्वती ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥

२५३

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
तुलाधारस्य वाक्यानि धर्मे जाजलिना सह ॥ १
वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः ।
सागरोद्देशमागम्य तपस्तेपे महातपाः ॥ २
नियतो नियताहारश्चीराजिनजटाधरः ।
मलपङ्कधरो धीमान्बहून्वर्षगणान्मुनिः ॥ ३
स कदाचिन्महातेजा जलवासो महीपते ।
चचार लोकान्विप्रर्षिः प्रेक्षमाणो मनोजवः ॥ ४
स चिन्तयामास मुनिर्जलमध्ये कदाचन ।
विप्रेक्ष्य सागरान्तां वै महीं सवनकाननाम् ॥ ५
न मया सदृशोऽस्तीह लोके स्थावरजङ्गमे ।
अप्सु वैहायसं गच्छेन्मया योऽन्यः सहेति वै ॥ ६
स दृश्यमानो रक्षोभिर्जलमध्येऽवदत्ततः ।
अब्रुवंश्च पिशाचास्तं नैवं त्वं वक्तुमर्हसि ॥ ७
तुलाधारो वणिग्धर्मा वाराणस्यां महायशाः ।
सोऽप्येवं नार्हते वक्तुं यथा त्वं द्विजसत्तम ॥ ८
इत्युक्तो जाजलिर्भूतैः प्रत्युवाच महातपाः ।
पश्येयं तमहं प्राज्ञं तुलाधारं यशस्विनम् ॥ ९
इति ब्रुवाणं तमृषिं रक्षांस्युद्धृत्य सागरात् ।
अब्रुवन्गच्छ पन्थानमास्थायेमं द्विजोत्तम ॥ १०
इत्युक्तो जाजलिर्भूतैर्जगाम विमनास्तदा ।
वाराणस्यां तुलाधारं समासाद्याब्रवीद्वचः ॥ ११

युधिष्ठिर उवाच ।

किं कृतं सुकृतं कर्म तात जाजलिना पुरा ।
येन सिद्धिं परां प्राप्तस्तन्नो व्याख्यातुमर्हसि ॥ १२

भीष्म उवाच ।

अतीव तपसा युक्तो घोरेण स बभूव ह ।
नद्युपस्पर्शनरतः सायं प्रातर्महातपाः ॥ १३
अग्नीन्परिचरन्सम्यक्स्वाध्यायपरमो द्विजः ।
वानप्रस्थविधानज्ञो जाजलिर्ज्वलितः श्रिया ॥ १४
सत्ये तपसि तिष्ठन्स न च धर्ममवैक्षत ।
वर्षास्वाकाशशायी स हेमन्ते जलसंश्रयः ॥ १५
वातातपसहो ग्रीष्मे न च धर्ममविन्दत ।
दुःखशय्याश्च विविधा भूमौ च परिवर्तनम् ॥१६
ततः कदाचित्स मुनिर्वर्षास्वाकाशमास्थितः ।
अन्तरिक्षाज्जलं मूर्ध्ना प्रत्यगृह्णान्मुहुर्मुहुः ॥ १७
अथ तस्य जटाः क्लिन्ना बभूवुर्ग्रथिताः प्रभो ।
अरण्यगमनान्नित्यं मलिनो मलसंयुताः ॥ १८
स कदाचिन्निराहारो वायुभक्षो महातपाः ।
तस्थौ काष्ठवदव्यग्रो न चचाल च कर्हिचित् ॥१९
तस्य स्म स्थाणुभूतस्य निर्विचेष्टस्य भारत ।
कुलिङ्गशकुनौ राजन्नीडं शिरसि चक्रतुः ॥ २०
स तौ दयावान्ब्रह्मर्षिरुपप्रैक्षत दंपती ।
कुर्वाणं नीडकं तत्र जटासु तृणतन्तुभिः ॥ २१
यदा स न चलत्येव स्थाणुभूतो महातपाः ।
ततस्तौ परिविश्वस्तौ सुखं तत्रोषतुस्तदा ॥ २२
अतीतास्वथ वर्षासु शरत्काल उपस्थिते ।
प्राजापत्येन विधिना विश्वासात्काममोहितौ ॥ २३
तत्रापातयतां राजञ्शिरस्यण्डानि खेचरौ ।
तान्यबुध्यत तेजस्वी स विप्रः संशितव्रतः ॥ २४
बुद्ध्वा च स महातेजा न चचालैव जाजलिः ।
धर्मे धृतमना नित्यं नाधर्मं स त्वरोचयत् ॥ २५
अहन्यहनि चागम्य ततस्तौ तस्य मूर्धनि ।
आश्वासितौ वै वसतः संप्रहृष्टौ तदा विभो ॥२६
अण्डेभ्यस्त्वथ पुष्टेभ्यः प्रजायन्त शकुन्तकाः ।
व्यवर्धन्त च तत्रैव न चाकम्पत जाजलिः ॥ २७
स रक्षमाणस्त्वण्डानि कुलिङ्गानां यतव्रतः ।
तथैव तस्थौ धर्मात्मा निर्विचेष्टः समाहितः ॥ २८
ततस्तु कालसमये बभूवुस्तेऽथ पक्षिणः ।
बुबुधे तांश्च स मुनिर्जातपक्षाञ्शकुन्तकान् ॥ २९
ततः कदाचित्तांस्तत्र पश्यन्पक्षीन्यतव्रतः ।
बभूव परमप्रीतस्तदा मतिमतां वरः ॥ ३०
तथा तानभिसंवृद्धान्दृष्ट्वा चाप्नुवतां मुदम् ।
शकुनौ निर्भयौ तत्र ऊषतुश्चात्मजैः सह ॥ ३१
जातपक्षांश्च सोऽपश्यदुड्डीनान्पुनरागतान् ।
सायं सायं द्विजान्विप्रो न चाकम्पत जाजलिः ॥
कदाचित्पुनरभ्येत्य पुनर्गच्छन्ति संततम् ।
त्यक्ता मातृपितृभ्यां ते न चाकम्पत जाजलिः ॥३३
अथ ते दिवसं चारिं गत्वा सायं पुनर्नृप ।
उपावर्तन्त तत्रैव निवासार्थं शकुन्तकाः ॥ ३४
कदाचिद्दिवसान्पञ्च समुत्पत्य विहंगमाः ।
षष्ठेऽहनि समाजग्मुर्न चाकम्पत जाजलिः ॥ ३५
क्रमेण च पुनः सर्वे दिवसानि बहून्यपि ।
नोपावर्तन्त शकुना जातप्राणाः स्म ते यदा ॥ ३६
कदाचिन्मासमात्रेण समुत्पत्य विहंगमाः ।
नैवागच्छंस्ततो राजन्प्रातिष्ठत स जाजलिः ॥ ३७
ततस्तेषु प्रलीनेषु जाजलिर्जातविस्मयः ।
सिद्धोऽस्मीति मतिं चक्रे ततस्तं मान आविशत् ॥
स तथा निर्गतान्दृष्ट्वा शकुन्तान्नियतव्रतः ।
संभावितात्मा संभाव्य भृशं प्रीतस्तदाभवत् ॥ ३९
स नद्यां समुपस्पृश्य तर्पयित्वा हुताशनम् ।
उदयन्तमथादित्यमभ्यगच्छन्महातपाः ॥ ४०
संभाव्य चटकान्मूर्ध्नि जाजलिर्जपतां वरः ।
आस्फोटयत्तदाकाशे धर्मः प्राप्तो मयेति वै ॥ ४१
अथान्तरिक्षे वागासीत्तां स शुश्राव जाजलिः ।

धर्मेण न समस्त्वं वै तुलाधारस्य जाजले ॥ ४२
वाराणस्यां महाप्राज्ञस्तुलाधारः प्रतिष्ठितः ।
सोऽप्येवं नार्हते वक्तुं यथा त्वं भाषसे द्विज ॥ ४३
सोऽमर्षवशमापन्नस्तुलाधारदिदृक्षया ।
पृथिवीमचरद्राजन्यत्रसायंगृहो मुनिः ॥ ४४
कालेन महतागच्छत्स तु वाराणसीं पुरीम् ।
विक्रीणन्तं च पण्यानि तुलाधारं ददर्श सः ॥ ४५
सोऽपि दृष्ट्वैव तं विप्रमायान्तं भाण्डजीवनः ।
समुत्थाय सुसंहृष्टः स्वागतेनाभ्यपूजयत् ॥ ४६

तुलाधार उवाच ।

आयानेवासि विदितो मम ब्रह्मन्न संशयः ।
ब्रवीमि यत्तु वचनं तच्छृणुष्व द्विजोत्तम ॥ ४७
सागरानूपमाश्रित्य तपस्तप्तं त्वया महत् ।
न च धर्मस्य संज्ञां त्वं पुरा वेत्थ कथंचन ॥ ४८
ततः सिद्धस्य तपसा तव विप्र शकुन्तकाः ।
क्षिप्रं शिरस्यजायन्त ते च संभाविताास्त्वया ॥ ४९
जातपक्षा यदा ते च गताश्चारीमितस्ततः ।
मन्यमानस्ततो धर्मं चटकप्रभवं द्विज ।
खे वाचं त्वमथाश्रौषीर्मां प्रति द्विजसत्तम ॥ ५०
अमर्षवशमापन्नस्ततः प्राप्तो भवानिह ।
करवाणि प्रियं किं ते तद्ब्रूहि द्विजसत्तम ॥ ५१

इति श्रीमहाभारते शान्तिपर्वणि
त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥

२५४

भीष्म उवाच ।

इत्युक्तः स तदा तेन तुलाधारेण धीमता ।
प्रोवाच वचनं धीमाञ्जाजलिर्जपतां वरः ॥ १
विक्रीणानः सर्वरसान्सर्वगन्धांश्च वाणिज ।
वनस्पतीनोषधीश्च तेषां मूलफलानि च ॥ २
अध्यगा नैष्ठिकीं बुद्धिं कुतस्त्वामिदमागतम् ।
एतदाचक्ष्व मे सर्वं निखिलेन महामते ॥ ३
एवमुक्तस्तुलाधारो ब्राह्मणेन यशस्विना ।
उवाच धर्मसूक्ष्माणि वैश्यो धर्मार्थतत्त्ववित् ।
जाजलिं कष्टतपसं ज्ञानतृप्तस्तदा नृप ॥ ४
वेदाहं जाजले धर्मं सरहस्यं सनातनम् ।
सर्वभूतहितं मैत्रं पुराणं यं जना विदुः ॥ ५
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिः स परो धर्मस्तेन जीवामि जाजले ॥
परिच्छिन्नैः काष्ठतृणैर्मयेदं शरणं कृतम् ।
अलक्तं पद्मकं तुङ्गं गन्धांश्चोच्चावचांस्तथा ॥ ७
रसांश्च तांस्तान्विप्रर्षे मद्यवर्जानहं बहून् ।
क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ॥ ८
सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः ।
कर्मणा मनसा वाचा स धर्मं वेद जाजले ॥ ९
नाहं परेषां कर्माणि प्रशंसामि शपामि वा ।
आकाशस्येव विप्रर्षे पश्यँल्लोकस्य चित्रताम् ॥१
नानुरुध्ये विरुध्ये वा न द्वेष्मि न च कामये ।
समोऽस्मि सर्वभूतेषु पश्य मे जाजले व्रतम् ॥१
इष्टानिष्टविमुक्तस्य प्रीतिरागबहिष्कृतः ।
तुला मे सर्वभूतेषु समा तिष्ठति जाजले ॥ ११
इति मां त्वं विजानीहि सर्वलोकस्य जाजले ।
समं मतिमतां श्रेष्ठ समलोष्टाश्मकाञ्चनम् ॥ १‌
यथान्धबधिरोन्मत्ता उच्छ्वासपरमाः सदा ।
देवैरपिहितद्वाराः सोपमा पश्यतो मम ॥ १४
यथा वृद्धातुरकृशा निःस्पृहा विषयान्प्रति ।
तथार्थकामभोगेषु ममापि विगता स्पृहा ॥ १५
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि तदा सिध्यति वै द्विजः ।
यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ १७

न भूतो न भविष्यश्च न च धर्मोऽस्ति कश्चन ।
योऽभयः सर्वभूतानां स प्राप्नोत्यभयं पदम् ॥ १८
यस्मादुद्विजते लोकः सर्वो मृत्युमुखादिव ।
वाक्क्रूराद्दण्डपारुष्यात्स प्राप्नोति महद्भयम् ॥ १९
यथावद्वर्तमानानां वृद्धानां पुत्रपौत्रिणाम् ।
अनुवर्तामहे वृत्तमहिंस्राणां महात्मनाम् ॥ २०
प्रनष्टः शाश्वतो धर्मः सदाचारेण मोहितः ।
तेन वैद्यस्तपस्वी वा बलवान्वा विमोह्यते ॥ २१
आचाराज्जाजले प्राज्ञः क्षिप्रं धर्ममवाप्नुयात् ।
एवं यः साधुभिर्दान्तिश्चरेदद्रोहचेतसा ॥ २२
नद्यां यथा चेह काष्ठमुह्यमानं यदृच्छया ।
यदृच्छयैव काष्ठेन संधिं गच्छेत केनचित् ॥ २३
तत्रापराणि दारूणि संसृज्यन्ते ततस्ततः ।
तृणकाष्ठकरीषाणि कदाचिन्नसमीक्षया ।
एवमेवायमाचारः प्रादुर्भूतो यतस्ततः ॥ २४
यस्मान्नोद्विजते भूतं जातु किंचित्कथंचन ।
अभयं सर्वभूतेभ्यः स प्राप्नोति सदा मुने ॥ २५
यस्मादुद्विजते विद्वन्सर्वलोको वृकादिव ।
क्रोशतस्तीरमासाद्य यथा सर्वे जलेचराः ॥ २६
सहायवान्द्रव्यवान्यः सुभगोऽन्योऽपरस्तथा ।
ततस्तानेव कवयः शास्त्रेषु प्रवदन्त्युत ।
कीर्त्यर्थमल्पहृल्लेखाः पटवः कृत्स्ननिर्णयाः ॥ २७
तपोभिर्यज्ञदानैश्च वाक्यैः प्रज्ञाश्रितैस्तथा ।
प्राप्नोत्यभयदानस्य यद्यत्फलमिहाश्नुते ॥ ॥ २८
लोके यः सर्वभूतेभ्यो ददात्यभयदक्षिणाम् ।
स सर्वयज्ञैरीजानः प्राप्नोत्यभयदक्षिणाम् ।
न भूतानामहिंसाया ज्यायान्धर्मोऽस्ति कश्चन ॥ २९
यस्मान्नोद्विजते भूतं जातु किंचित्कथंचन ।
सोऽभयं सर्वभूतेभ्यः संप्राप्नोति महामुने ॥ ३०
यस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव ।
न स धर्ममवाप्नोति इह लोके परत्र च ॥ ३१
सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ ३२
दानं भूताभयस्याहुः सर्वदानेभ्य उत्तमम् ।
ब्रवीमि ते सत्यमिदं श्रद्दधस्व च जाजले ॥ ३३
स एव सुभगो भूत्वा पुनर्भवति दुर्भगः ।
व्यापत्तिं कर्मणां दृष्ट्वा जुगुप्सन्ति जनाः सदा ॥ ३४
अकारणो हि नेहास्ति धर्मः सूक्ष्मोऽपि जाजले ।
भूतभव्यार्थमेवेह धर्मप्रवचनं कृतम् ॥ ३५
सूक्ष्मत्वान्न स विज्ञातुं शक्यते बहुनिह्नवः ।
उपलभ्यान्तरा चान्यानाचारानवबुध्यते ॥ ३६
ये च छिन्दन्ति वृषणान्ये च भिन्दन्ति नस्तकान् ।
वहन्ति महतो भारान्बध्नन्ति दमयन्ति च ॥ ३७
हत्वा सत्त्वानि खादन्ति तान्कथं न विगर्हसे ।
मानुषा मानुषानेव दासभोगेन भुञ्जते ॥ ३८
वधबन्धविरोधेन कारयन्ति दिवानिशम् ।
आत्मना चापि जानासि यद्दुःखं वधताडने ॥ ३९
पञ्चेन्द्रियेषु भूतेषु सर्वं वसति दैवतम् ।
आदित्यश्चन्द्रमा वायुर्ब्रह्मा प्राणः क्रतुर्यमः ॥ ४०
तानि जीवानि विक्रीय का मृतेषु विचारणा ।
का तैले का घृते ब्रह्मन्मधुन्यप्स्वौषधेषु वा ॥ ४१
अदंशमशके देशे सुखं संवर्धितान्पशून् ।
तांश्च मातुः प्रियाञ्जानन्नाक्रम्य बहुधा नराः ।
बहुदंशकुशान्देशान्नयन्ति बहुकर्दमान् ॥ ४२
वाहसंपीडिता धुर्याः सीदन्त्यविधिनापरे ।
न मन्ये भ्रूणहत्यापि विशिष्टा तेन कर्मणा ॥ ४३
कृषिं साध्विति मन्यन्ते सा च वृत्तिः सुदारुणा ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ।
तथैवानडुहो युक्तान्समवेक्षस्व जाजले ॥ ४४
अघ्न्या इति गवां नाम क एनान्हन्तुमर्हति ।

महत्पकाराकुशलं पृषघ्रो गालभन्निव ॥ ४५
ऋषयो यतयो ह्येतन्नहुषे प्रत्यवेदयन् ।
गां मातरं चाप्यवधीर्वृषभं च प्रजापतिम् ।
अकार्यं नहुषाकार्षीर्लप्स्यामस्त्वत्कृते भयम् ॥ ४६
शतं चैकं च रोगाणां सर्वभूतेष्वपातयत् ।
ऋषयस्ते महाभागाः प्रजास्वेव हि जाजले ।
भ्रूणहं नहुषं त्वाहुर्न ते होष्यामहे हविः ॥ ४७
इत्युक्त्वा ते महात्मानः सर्वे तत्त्वार्थदर्शिनः ।
ऋषयो यतयः शान्तास्तरसा प्रत्यवेदयन् ॥ ४८
ईदृशानशिवान्घोरानाचारानिह जाजले ।
केवलाचरितत्वात्तु निपुणान्नावबुध्यसे ॥ ४९
कारणाद्धर्ममन्विच्छेन्न लोकचरितं चरेत् ।
यो हन्याद्यश्च मां स्तौति तत्रापि शृणु जाजले ॥
समौ तावपि मे स्यातां न हि मे स्तः प्रियाप्रिये ।
एतदीदृशकं धर्मं प्रशंसन्ति मनीषिणः ॥ ५१
उपपत्त्या हि संपन्नो यतिभिश्चैव सेव्यते ।
सततं धर्मशीलैश्च नैपुण्येनोपलक्षितः ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥

२५५

जाजलिरुवाच ।

यथा प्रवर्तितो धर्मस्तुलां धारयता त्वया ।
स्वर्गद्वारं च वृत्तिं च भूतानामवरोत्स्यते ॥ १
कृष्या ह्यन्नं प्रभवति ततस्त्वमपि जीवसि ।
पशुभिश्चौषधीभिश्च मर्त्या जीवन्ति वाणिज ॥ २
यतो यज्ञः प्रभवति नास्तिक्यमपि जल्पसि ।
न हि वर्तेदयं लोको वार्तामुत्सृज्य केवलम् ॥ ३

तुलाधार उवाच ।

वक्ष्यामि जाजले वृत्तिं नास्मि ब्राह्मण नास्तिकः ।
न च यज्ञं विनिन्दामि यज्ञवित्तु सुदुर्लभः ॥ ४
नमो ब्राह्मणयज्ञाय ये च यज्ञविदो जनाः ।
स्वयज्ञं ब्राह्मणा हित्वा क्षात्रं यज्ञमिहास्थिताः ॥
लुब्धैर्वित्तपरैर्ब्रह्मन्नास्तिकैः संप्रवर्तितम् ।
वेदवादानविज्ञाय सत्याभासमिवानृतम् ॥ ६
इदं देयमिदं देयमिति नान्नं चिकीर्षति ।
अतः स्तैन्यं प्रभवति विकर्माणि च जाजले ।
तदेव सुकृतं हव्यं येन तुष्यन्ति देवताः ॥ ७
नमस्कारेण हविषा स्वाध्यायैरौषधैस्तथा ।
पूजा स्याद्देवतानां हि यथा शास्त्रनिदर्शनम् ॥ ८
इष्टापूर्तादसाधूनां विषमा जायते प्रजा ।
लुब्धेभ्यो जायते लुब्धः समेभ्यो जायते समः ॥
यजमानो यथात्मानमृत्विजश्च तथा प्रजाः ।
यज्ञात्प्रजा प्रभवति नभसोऽम्भ इवामलम् ॥ १
अग्नौ प्रास्ताहुतिर्ब्रह्मन्नादित्यमुपतिष्ठति ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ११
तस्मात्स्वनुष्ठितात्पूर्वं सर्वान्कामांश्च लेभिरे ।
अकृष्टपच्या पृथिवी आशीर्भिर्वीरुधोऽभवन् ।
न ते यज्ञेष्वात्मसु वा फलं पश्यन्ति किंचन ॥१२
शङ्कमानाः फलं यज्ञे ये यजेरन्कथंचन ।
जायन्तेऽसाधवो धूर्ता लुब्धा वित्तप्रयोजनाः ॥१
स स्म पापकृतां लोकान्गच्छेदशुभकर्मणा ।
प्रमाणमप्रमाणेन यः कुर्यादशुभं नरः ।
पापात्मा सोऽकृतप्रज्ञः सदैवेह द्विजोत्तम ॥ १४
कर्तव्यमितिकर्तव्यं वेत्ति यो ब्राह्मणोभयम् ।
ब्रह्मैव वर्तते लोके नैति कर्तव्यतां पुनः ॥ १५
विगुणं च पुनः कर्म ज्याय इत्यनुशुश्रुम ।
सर्वभूतोपघातश्च फलभावे च संयमः ॥ १६
सत्ययज्ञा दमयज्ञा अलुब्धाश्चात्मतृप्तयः ।
उत्पन्नत्यागिनः सर्वे जना आसन्नमत्सराः ॥ १७
क्षेत्रक्षेत्रज्ञतत्त्वज्ञाः स्वयज्ञपरिनिष्ठिताः ।

ब्राह्मं वेदमधीयन्तस्तोषयन्त्यमरानपि ॥ १८
अखिलं दैवतं सर्वं ब्रह्म ब्राह्मणसंश्रितम् ।
तृप्यन्ति तृप्यतो देवास्तृप्तास्तृप्तस्य जाजले ॥ १९
यथा सर्वरसैस्तृप्तो नाभिनन्दति किंचन ।
तथा प्रज्ञानतृप्तस्य नित्यं तृप्तिः सुखोदया ॥ २०
धर्मारामा धर्मसुखाः कृत्स्नव्यवसितास्तथा ।
अस्ति नस्तत्त्वतो भूय इति प्रज्ञागवेषिणः ॥ २१
ज्ञानविज्ञानिनः केचित्परं पारं तितीर्षवः ।
अतीव तत्सदा पुण्यं पुण्याभिजनसंहितम् ॥ २२
यत्र गत्वा न शोचन्ति न च्यवन्ति व्यथन्ति च ।
ते तु तद्ब्रह्मणः स्थानं प्राप्नुवन्तीह सात्त्विकाः ॥२३
नैव ते स्वर्गमिच्छन्ति न यजन्ति यशोधनैः ।
सतां वर्त्मानुवर्तन्ते यथाबलमहिंसया ॥ २४
वनस्पतीनोषधीश्च फलमूलं च ते विदुः ।
न चैतानृत्विजो लुब्धा याजयन्ति धनार्थिनः ॥२५
स्वमेव चार्थं कुर्वाणा यज्ञं चक्रुः पुनर्द्विजाः ।
परिनिष्ठितकर्माणः प्रजानुग्रहकाम्यया ॥ २६
प्रापयेयुः प्रजाः स्वर्गं स्वधर्मचरणेन वै ।
इति मे वर्तते बुद्धिः समा सर्वत्र जाजले ॥ २७
प्रयुञ्जन्ते यानि यज्ञे सदा प्राज्ञा द्विजर्षभ ।
तेन ते देवयानेन पथा यान्ति महामुने ॥ २८
आवृत्तिस्तत्र चैकस्य नास्त्यावृत्तिर्मनीषिणाम् ।
उभौ तौ देवयानेन गच्छतो जाजले पथा ॥ २९
स्वयं चैषामनडुहो युज्यन्ति च वहन्ति च ।
स्वयमुस्राश्च दुह्यन्ते मनःसंकल्पसिद्धिभिः ॥ ३०
स्वयं यूपानुपादाय यजन्ते स्वाप्तदक्षिणैः ।
यस्तथाभावितात्मा स्यात्स गामालब्धुमर्हति ॥ ३१
ओषधीभिस्तथा ब्रह्मन्यजेरंस्ते नतादृशा ।
बुद्धित्यागं पुरस्कृत्य तादृशं प्रब्रवीमि ते ॥ ३२
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः ॥ ३३
नाश्रावयन्न च यजन्न ददद्ब्राह्मणेषु च ।
ग्राम्यां वृत्तिं लिप्समानः कां गतिं याति जाजले ।
इदं तु दैवतं कृत्वा यथा यज्ञमवाप्नुयात् ॥ ३४

जाजलिरुवाच ।

न वै मुनीनां शृणुमः स्म तत्त्वं
पृच्छामि त्वा वाणिज कष्टमेतत् ।
पूर्वे पूर्वे चास्य नावेक्षमाणा
नातः परं तमृषयः स्थापयन्ति ॥ ३५
अस्मिन्नेवात्मतीर्थे न पशवः प्राप्नुयुः सुखम् ।
अथ स्वकर्मणा केन वाणिज प्राप्नुयात्सुखम् ।
शंस मे तन्महाप्राज्ञ भृशं वै श्रद्दधामि ते ॥ ३६

तुलाधार उवाच ।

उत यज्ञा उतायज्ञा मखं नार्हन्ति ते क्वचित् ।
आज्येन पयसा दध्ना पूर्णाहुत्या विशेषतः ।
वालैः शृङ्गेण पादेन संभवत्येव गौर्मुखम् ॥ ३७
पत्नीं चानेन विधिना प्रकरोति नियोजयन् ।
पुरोडाशो हि सर्वेषां पशूनां मेध्य उच्यते ॥ ३८
सर्वा नद्यः सरस्वत्यः सर्वे पुण्याः शिलोच्चयाः ।
जाजले तीर्थमात्मैव मा स्म देशातिथिर्भव ॥ ३९
एतानीदृशकान्धर्मानाचरन्निह जाजले ।
कारणैर्धर्ममन्विच्छन्न लोकानाप्नुते शुभान् ॥ ४०

भीष्म उवाच ।

एतानीदृशकान्धर्मांस्तुलाधारः प्रशंसति ।
उपपत्त्या हि संपन्नान्नित्यं सद्भिर्निषेवितान् ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥

२५६

तुलाधार उवाच ।

सद्भिर्वा यदि वासद्भिरयं पन्थाः समाश्रितः ।

प्रत्यक्षं क्रियतां साधु ततो ज्ञास्यसि तद्यथा ।। १
एते शकुन्ता बहवः समन्ताद्विचरन्ति हि ।
तवोत्तमाङ्गे संभूताः श्येनाश्चान्याश्च जातयः ।। २
आह्वयैनान्महाब्रह्मन्विशमानांस्ततस्ततः ।
पश्येमान्हस्तपादेषु श्लिष्टान्देहे च सर्वशः ।। ३
संभावयन्ति पितरं त्वया संभाविताः खगाः ।
असंशयं पिता च त्वं पुत्रानाह्वय जाजले ।। ४

भीष्म उवाच ।

ततो जाजलिना तेन समाहूताः पतत्रिणः ।
वाचमुच्चारयन्दिव्यां धर्मस्य वचनात्किल ।। ५
अहिंसादिकृतं कर्म इह चैव परत्र च ।
स्पर्धा निहन्ति वै ब्रह्मन्साहता हन्ति तं नरम् ।। ६
श्रद्धावृद्धं वाङ्मनसी न यज्ञस्त्रातुमर्हति ।
अत्र गाथा ब्रह्मगीताः कीर्तयन्ति पुराविदः ।। ७
शुचेरश्रद्दधानस्य श्रद्दधानस्य चाशुचेः ।
देवाश्चित्तममन्यन्त सदृशं यज्ञकर्मणि ।। ८
श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः ।
मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ।। ९
प्रजापतिस्तानुवाच विषमं कृतमित्युत ।
श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ।
भोज्यमन्नं वदान्यस्य कदर्यस्य न वार्धुषेः ।। १०
अश्रद्दधान एवैको देवानां नार्हते हविः ।
तस्यैवान्नं न भोक्तव्यमिति धर्मविदो विदुः ।। ११
अश्रद्धा परमं पापं श्रद्धा पापप्रमोचनी ।
जहाति पापं श्रद्धावान्सर्पो जीर्णामिव त्वचम् ।।१२
ज्यायसी या पवित्राणां निवृत्तिः श्रद्धया सह ।
निवृत्तशीलदोषो यः श्रद्धावान्पूत एव सः ।। १३
किं तस्य तपसा कार्यं किं वृत्तेन किमात्मना ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।।१४
इति धर्मः समाख्यातः सद्भिर्धर्मार्थदर्शिभिः ।
वयं जिज्ञासमानास्त्वा संप्राप्ता धर्मदर्शनात् ।। १५
स्पर्धां जहि महाप्राज्ञ ततः प्राप्स्यसि यत्परम् ।
श्रद्धावाञ्श्रद्दधानश्च धर्मांश्चैवेह वाणिजः ।
स्ववर्त्मनि स्थितश्चैव गरीयानेष जाजले ।। १६
एवं बहुमतार्थं च तुलाधारेण भाषितम् ।
सम्यक्चैवमुपालब्धो धर्मश्चोक्तः सनातनः ।। १७
तस्य विख्यातवीर्यस्य श्रुत्वा वाक्यानि स द्विजः ।
तुलाधारस्य कौन्तेय शान्तिमेवान्वपद्यत ।। १८
ततोऽचिरेण कालेन तुलाधारः स एव च ।
दिवं गत्वा महाप्राज्ञौ विहरेतां यथासुखम् ।
स्वं स्वं स्थानमुपागम्य स्वकर्मफलनिर्जितम् ।। १९
समानां श्रद्दधानानां संयतानां सुचेतसाम् ।
कुर्वतां यज्ञ इत्येव न यज्ञो जातु नेष्यते ।। २०
श्रद्धा वै सात्त्विकी देवी सूर्यस्य दुहिता नृप ।
सावित्री प्रसवित्री च जीवविश्वासिनी तथा ।।२१
वाग्वृद्धं त्रायते श्रद्धा मनोवृद्धं च भारत ।
यथौपम्योपदेशेन किं भूयः श्रोतुमिच्छसि ।। २२

इति श्रीमहाभारते शान्तिपर्वणि
षट्पञ्चाशदधिकद्विशततमोऽध्यायः ।। २५६ ।।

२५७

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रजानामनुकम्पार्थं गीतं राज्ञा विचख्नुना ।। १
छिन्नस्थूणं वृषं दृष्ट्वा विरावं च गवां भृशम् ।
गोग्रहे यज्ञवाटस्य प्रेक्षमाणः स पार्थिवः ।। २
स्वस्ति गोभ्योऽस्तु लोकेषु ततो निर्वचनं कृतम् ।
हिंसायां हि प्रवृत्तायामाशीरेषानुकल्पिता ।। ३
अव्यवस्थितमर्यादैर्विमूढैर्नास्तिकैर्नरैः ।
संशयात्मभिरव्यक्तैर्हिंसा समनुकीर्तिता ।। ४
सर्वकर्मस्वहिंसा हि धर्मात्मा मनुरब्रवीत् ।

कामरागाद्विहिंसन्ति बहिर्वेद्यां पशून्नराः ॥ ५
तस्मात्प्रमाणतः कार्यो धर्मः सूक्ष्मो विजानता ।
अहिंसैव हि सर्वेभ्यो धर्मेभ्यो ज्यायसी मता ॥६
उपोष्य संशितो भूत्वा हित्वा वेदकृताः श्रुतीः ।
आचारः इत्यनाचाराः कृपणाः फलहेतवः ॥ ७
यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः ।
वृथा मांसानि खादन्ति नैष धर्मः प्रशस्यते ॥ ८
मांसं मधु सुरा मत्स्या आसवं कृसरौदनम् ।
धूर्तैः प्रवर्तितं ह्येतन्नैतद्वेदेषु कल्पितम् ॥ ९
कामान्मोहाच्च लोभाच्च लौल्यमेतत्प्रवर्तितम् ।
विष्णुमेवाभिजानन्ति सर्वयज्ञेषु ब्राह्मणाः ।
पायसैः सुमनोभिश्च तस्यापि यजनं स्मृतम् ॥ १०
यज्ञियाश्चैव ये वृक्षा वेदेषु परिकल्पिताः ।
यच्चापि किंचित्कर्तव्यमन्यच्चोक्षैः सुसंस्कृतम् ।
महासत्त्वैः शुद्धभावैः सर्वं देवार्हमेव तत् ॥ ११

युधिष्ठिर उवाच ।

शरीरमापदश्चापि विवदन्त्यविहिंसतः ।
कथं यात्रा शरीरस्य निरारम्भस्य सेत्स्यति ॥ १२

भीष्म उवाच ।

यथा शरीरं न ग्लायेन्नेयान्मृत्युवशं यथा ।
तथा कर्मसु वर्तेत समर्थो धर्ममाचरेत् ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५७ ॥

२५८

युधिष्ठिर उवाच ।

कथं कार्यं परीक्षेत शीघ्रं वाथ चिरेण वा ।
सर्वथा कार्यदुर्गेऽस्मिन्भवान्नः परमो गुरुः ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
चिरकारेस्तु यत्पूर्वं वृत्तमाङ्गिरसे कुले ॥ २
चिरकारिक भद्रं ते भद्रं ते चिरकारिक ।
चिरकारी हि मेधावी नापराध्यति कर्मसु ॥ ३
चिरकारी महाप्राज्ञो गौतमस्याभवत्सुतः ।
चिरं हि सर्वकार्याणि समेक्षावान्प्रपद्यते ॥ ४
चिरं संचिन्तयन्नर्थांश्चिरं जाग्रच्चिरं स्वपन् ।
चिरकार्याभिसंपत्तेश्चिरकारी तथोच्यते ॥ ५
अलसग्रहणं प्राप्तो दुर्मेधावी तथोच्यते ।
बुद्धिलाघवयुक्तेन जनेनादीर्घदर्शिना ॥ ६
व्यभिचारे तु कस्मिंश्चिद्व्यतिक्रम्यापरान्सुतान् ।
पित्रोक्तः कुपितेनाथ जहीमां जननीमिति ॥ ७
स तथेति चिरेणोक्त्वा स्वभावाच्चिरकारिकः ।
विमृश्य चिरकारित्वाच्चिन्तयामास वै चिरम् ॥ ८
पितुराज्ञां कथं कुर्यां न हन्यां मातरं कथम् ।
कथं धर्मच्छले नास्मिन्निमज्जेयमसाधुवत् ॥ ९
पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणम् ।
अस्वतन्त्रं च पुत्रत्वं किं नु मां नात्र पीडयेत् ॥१०
स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् ।
पितरं चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ॥ ११
अनवज्ञा पितुर्युक्ता धारणं मातृरक्षणम् ।
युक्तक्षमावुभावेतौ नातिवर्तेतमां कथम् ॥ १२
पिता ह्यात्मानमाधत्ते जायायां जज्ञियामिति ।
शीलचारित्रगोत्रस्य धारणार्थं कुलस्य च ॥ १३
सोऽहमात्मा स्वयं पित्रा पुत्रत्वे प्रकृतः पुनः ।
विज्ञानं मे कथं न स्याद्बुबुधे चात्मसंभवम् ॥ १४
जातकर्मणि यत्प्राह पिता यच्चोपकर्मणि ।
पर्याप्तः स दृढीकारः पितुर्गौरवनिश्चये ॥ १५
गुरुरग्र्यः परो धर्मः पोषणाध्ययनाद्धितः ।
पिता यदाह धर्मः स वेदेष्वपि सुनिश्चितः ॥ १६
प्रीतिमात्रं पितुः पुत्रः सर्वं पुत्रस्य वै पिता ।

शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ॥ १७
तस्मात्पितुर्वचः कार्यं न विचार्यं कथंचन ।
पातकान्यपि पूयन्ते पितुर्वचनकारिणः ॥ १८
भोगे भाग्ये प्रसवने सर्वलोकनिदर्शने ।
भर्त्रा चैव समायोगे सीमन्तोन्नयने तथा ॥ १९
पिता स्वर्गः पिता धर्मः पिता परमकं तपः ।
पितरि प्रीतिमापन्ने सर्वाः प्रीयन्ति देवताः ॥ २०
आशिषस्ता भजन्त्येनं पुरुषं प्राह याः पिता ।
निष्कृतिः सर्वपापानां पिता यदभिनन्दति ॥ २१
मुच्यते बन्धनात्पुष्पं फलं वृन्तात्प्रमुच्यते ।
क्लिश्यन्नपि सुतस्नेहैः पिता स्नेहं न मुञ्चति ॥२२
एतद्विचिन्तितं तावत्पुत्रस्य पितृगौरवम् ।
पिता ह्यल्पतरं स्थानं चिन्तयिष्यामि मातरम् ॥२३
यो ह्ययं मयि संघातो मर्त्यत्वे पाञ्चभौतिकः ।
अस्य मे जननी हेतुः पावकस्य यथारणिः ।
माता देहारणिः पुंसां सर्वस्यार्तस्य निर्वृतिः ॥ २४
न च शोचति नाप्येनं स्थाविर्यमपकर्षति ।
श्रिया हीनोऽपि यो गेहे अम्बेति प्रतिपद्यते ॥२५
पुत्रपौत्रसमाकीर्णो जननीं यः समाश्रितः ।
अपि वर्षशतस्यान्ते स द्विहायनवच्चरेत् ॥ २६
समर्थं वासमर्थं वा कृशं वाप्यकृशं तथा ।
रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः ॥ २७
तदा स वृद्धो भवति यदा भवति दुःखितः ।
तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते ॥ २८
नास्ति मातृसमा छाया नास्ति मातृसमा गतिः ।
नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रपा ॥२९
कुक्षिसंधारणाद्धात्री जननाज्जननी स्मृता ।
अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः ॥ ३०
शिशोः शुश्रूषणाच्छुश्रूर्माता देहमनन्तरम् ।
चेतनावान्नरो हन्याद्यस्य नासुषिरं शिरः ॥ ३१

दंपत्योः प्राणसंश्लेषे योऽभिसंधिः कृतः किल ।
तं माता वा पिता वेद भूतार्थो मातरि स्थितः ॥३२
माता जानाति यद्गोत्रं माता जानाति यस्य सः ।
मातुर्भरणमात्रेण प्रीतिः स्नेहः पितुः प्रजाः ॥ ३३
पाणिबन्धं स्वयं कृत्वा सहधर्ममुपेत्य च ।
यदि यास्यन्ति पुरुषाः स्त्रियो नार्हन्ति याप्यताम् ॥
भरणाद्धि स्त्रियो भर्ता पात्याच्चैव स्त्रियाः पतिः ।
गुणस्यास्य निवृत्तौ तु न भर्ता न पतिः पतिः ॥३५
एवं स्त्री नापराध्नोति नर एवापराध्यति ।
व्युच्चरंश्च महादोषं नर एवापराध्यति ॥ ३६
स्त्रिया हि परमो भर्ता दैवतं परमं स्मृतम् ।
तस्यात्मना तु सदृशमात्मानं परमं ददौ ।
सर्वकार्यापराध्यत्वान्नापराध्यन्ति चाङ्गनाः ॥ ३७
यश्च नोक्तो हि निर्देशः स्त्रिया मैथुनतृप्तये ।
तस्य स्मारयतो व्यक्तमधर्मो नात्र संशयः ॥ ३८
यात्रकारी मातरं च गौरवे चाधिके स्थिताम् ।
अवध्यां तु विजानीयुः पशवोऽप्यविचक्षणाः ॥३९
देवतानां समावायमेकस्थं पितरं विदुः ।
मर्त्यानां देवतानां च स्नेहादभ्येति मातरम् ॥ ४०
एवं विमृशतस्तस्य चिरकारितया बहु ।
दीर्घः कालो व्यतिक्रान्तस्ततस्तस्यागमत्पिता ॥ ४१
मेधातिथिर्महाप्राज्ञो गौतमस्तपसि स्थितः ।
विमृश्य तेन कालेन पत्न्याः संस्थाव्यतिक्रमम् ॥
सोऽब्रवीद्दुःखसंतप्तो भृशमश्रूणि वर्तयन् ।
श्रुतधैर्यप्रसादेन पश्चात्तापमुपागतः ॥ ४३
आश्रमं मम संप्राप्तस्त्रिलोकेशः पुरंदरः ।
अतिथिव्रतमास्थाय ब्राह्मणं रूपमास्थितः ॥ ४४
समया सान्त्वितो वाग्भिः स्वागतेनाभिपूजितः ।
अर्घ्यं पाद्यं च न्यायेन मयाभिप्रतिपादितः ॥ ४५
परवत्यस्मि चाप्युक्तः प्रणयिष्ये नयेन च ।

अत्र चाकुशले जाते स्त्रियो नास्ति व्यतिक्रमः॥४६
एवं न स्त्री न चैवाहं नाध्वगश्चिदशेश्वरः ।
अपराध्यति धर्मस्य प्रमादस्त्वपराध्यति ॥ ४७
ईर्ष्याजं व्यसनं प्राहुस्तेन चैवोर्ध्वरेतसः ।
ईर्ष्यया त्वहमाक्षिप्तो मग्नो दुष्कृतसागरे ॥ ४८
हत्वा साध्वीं च नारीं च व्यसनित्वाच्च शासिताम् ।
भर्तव्यत्वेन भार्या च को नु मां तारयिष्यति॥४९
अन्तरेण मयाज्ञप्तश्चिरकारी ह्युदारधीः ।
यद्यद्य चिरकारी स्यात्स मां त्रायेत पातकात्॥५०
चिरकारिक भद्रं ते भद्रं ते चिरकारिक ।
यद्यद्य चिरकारी त्वं ततोऽसि चिरकारिकः ॥ ५१
त्राहि मां मातरं चैव तपो यच्चार्जितं मया ।
आत्मानं पातकेभ्यश्च भवाद्य चिरकारिकः ॥ ५२
सहजं चिरकारित्वं चिरप्राज्ञतया तव ।
सफलं तत्तवाद्यास्तु भवाद्य चिरकारिकः ॥ ५३
चिरमाशंसितो मात्रा चिरं गर्भेण धारितः ।
सफलं चिरकारित्वं कुरु त्वं चिरकारिक ॥ ५४
चिरायते च संतापाच्चिरं स्वपिति वारितः ।
आवयोश्चिरसंतापादवेक्ष्य चिरकारिक ॥ ५५
एवं स दुःखितो राजन्महर्षिर्गौतमस्तदा ।
चिरकारिं ददर्शाथ पुत्रं स्थितमथान्तिके ॥ ५६
चिरकारी तु पितरं दृष्ट्वा परमदुःखितः ।
शस्त्रं त्यक्त्वा ततो मूर्ध्ना प्रसादायोपचक्रमे ॥ ५७
गौतमस्तु सुतं दृष्ट्वा शिरसा पतितं भुवि ।
पत्नीं चैव निराकारां परामभ्यगमन्मुदम् ॥ ५८
न हि सा तेन संभेदं पत्नी नीता महात्मना ।
विजने चाश्रमस्थेन पुत्रश्चापि समाहितः ॥ ५९
हन्यात्त्वनपवादेन शस्त्रपाणौ सुते स्थिते ।
विनीतं प्रश्रयित्वा च व्यवस्येदात्मकर्मसु ॥ ६०
बुद्धिश्चासीत्सुतं दृष्ट्वा पितुश्चरणयोर्नतम् ।
शस्त्रग्रहणचापल्यं संवृणोति भयादिति ॥ ६१
ततः पित्रा चिरं स्तुत्वा चिरं चाघ्राय मूर्धनि ।
चिरं दोर्भ्यां परिष्वज्य चिरं जीवेत्युदाहृतः ॥ ६२
एवं स गौतमः पुत्रं प्रीतिहर्षसमन्वितः ।
अभिनन्द्य महाप्राज्ञ इदं वचनमब्रवीत् ॥ ६३
चिरकारिक भद्रं ते चिरकारी चिरं भव ।
चिरायमाणे त्वयि च चिरमस्मि सुदुःखितः ॥ ६४
गाथाश्चाप्यब्रवीद्विद्वान्गौतमो मुनिसत्तमः ।
चिरकारिषु धीरेषु गुणोद्देशसमाश्रयात् ॥ ६५
चिरेण मित्रं बध्नीयाच्चिरेण च कृतं त्यजेत् ।
चिरेण हि कृतं मित्रं चिरं धारणमर्हति ॥ ६६
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ।
अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते ॥ ६७
बन्धूनां सुहृदां चैव भृत्यानां स्त्रीजनस्य च ।
अव्यक्तेष्वपराधेषु चिरकारी प्रशस्यते ॥ ६८
एवं स गौतमस्तस्य प्रीतः पुत्रस्य भारत ।
कर्मणा तेन कौरव्य चिरकारितया तया ॥ ६९
एवं सर्वेषु कार्येषु विमृश्य पुरुषस्ततः ।
चिरेण निश्चयं कृत्वा चिरं न परितप्यते॥ ७०
चिरं धारयते रोषं चिरं कर्म नियच्छति ।
पश्चात्तापकरं कर्म न किंचिदुपपद्यते ॥ ७१
चिरं वृद्धानुपासीत चिरमन्वास्य पूजयेत् ।
चिरं धर्मान्निषेवेत कुर्याच्चान्वेषणं चिरम् ॥ ७२
चिरमन्वास्य विदुषश्चिरं शिष्टान्निषेव्य च ।
चिरं विनीय चात्मानं चिरं यात्यनवज्ञताम् ॥ ७३
ब्रुवतश्च परस्यापि वाक्यं धर्मोपसंहितम् ।
चिरं पृच्छेच्चिरं ब्रूयाच्चिरं न परिभूयते ॥ ७४
उपास्य बहुलास्तस्मिन्नाश्रमे सुमहातपाः ।

समाः स्वर्गं गतो विप्रः पुत्रेण सहितस्तदा ॥ ७५

इति श्रीमहाभारते शान्तिपर्वणि
अष्टपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥

२५९

युधिष्ठिर उवाच ।

कथं राजा प्रजा रक्षेन्न च किंचित्प्रतापयेत् ।
पृच्छामि त्वां सतां श्रेष्ठ तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
द्युमत्सेनस्य संवादं राज्ञा सत्यवता सह ॥ २
अव्याहृतं व्याजहार सत्यवानिति नः श्रुतम् ।
वधाय नीयमानेषु पितुरेवानुशासनात् ॥ ३
अधर्मतां याति धर्मो यात्यधर्मश्च धर्मताम् ।
वधो नाम भवेद्धर्मो नैतद्भवितुमर्हति ॥ ४

द्युमत्सेन उवाच ।

अथ चेदवधो धर्मो धर्मः को जातुचिद्भवेत् ।
दस्यवश्चेन्न हन्येरन्सत्यवन्संकरो भवेत् ॥ ५
ममेदमिति नास्यैतत्प्रवर्तेत कलौ युगे ।
लोकयात्रा न चैव स्यादथ चेद्वेत्थ शंस नः ॥ ६

सत्यवानुवाच ।

सर्व एव त्रयो वर्णाः कार्या ब्राह्मणबन्धनाः ।
धर्मपाशनिबद्धानामल्पो व्यपचरिष्यति ॥ ७
यो यस्तेषामपचरेत्तमाचक्षीत वै द्विजः ।
अयं मे न शृणोतीति तस्मिन्राजा प्रधारयेत् ॥ ८
तत्त्वाभेदेन यच्छास्त्रं तत्कार्यं नान्यथा वधः ।
असमीक्ष्यैव कर्माणि नीतिशास्त्रं यथाविधि ॥ ९
दस्यून्हिनस्ति वै राजा भूयसो वाप्यनागसः ।
भार्या माता पिता पुत्रो हन्यते पुरुषे हते ।
परेणापकृते राजा तस्मात्सम्यक्प्रधारयेत् ॥ १०
असाधुश्चैव पुरुषो लभते शीलमेकदा ।
साधोश्चापि ह्यसाधुभ्यो जायतेऽशोभना प्रजा ॥
न मूलघातः कर्तव्यो नैष धर्मः सनातनः ।
अपि खल्ववधेनैव प्रायश्चित्तं विधीयते ॥ १२
उद्वेजनेन बन्धेन विरूपकरणेन च ।
वधदण्डेन ते क्लेश्या न पुरोऽहितसंपदा ॥ १३
यदा पुरोहितं वा ते पर्येयुः शरणैषिणः ।
करिष्यामः पुनर्ब्रह्मन्न पापमिति वादिनः ॥ १४
तदा विसर्गमर्हाः स्युरितीदं नृपशासनम् ।
बिभ्रद्दण्डाजिनं मुण्डो ब्राह्मणोऽर्हति वासनम् ॥ १५
गरीयांसो गरीयांसमपराधे पुनः पुनः ।
तथा विसर्गमर्हन्ति न यथा प्रथमे तथा ॥ १६

द्युमत्सेन उवाच ।

यत्र यत्रैव शक्येरन्संयन्तुं समये प्रजाः ।
स तावत्प्रोच्यते धर्मो यावन्न प्रतिलङ्घ्यते ॥ १७
अहन्यमानेषु पुनः सर्वमेव पराभवेत् ।
पूर्वे पूर्वतरे चैव सुशास्या अभवञ्जनाः ॥ १८
मृदवः सत्यभूयिष्ठा अल्पद्रोहाल्पमन्यवः ।
पुरा धिग्दण्ड एवासीद्वाग्दण्डस्तदनन्तरम् ॥ १९
आसीदादानदण्डोऽपि वधदण्डोऽद्य वर्तते ।
वधेनापि न शक्यन्ते नियन्तुमपरे जनाः ॥ २०
नैव दस्युर्मनुष्याणां न देवानामिति श्रुतिः ।
न गन्धर्वपितॄणां च कः कस्येह न कश्चन ॥ २१
पद्मं श्मशानादादत्ते पिशाचाच्चापि दैवतम् ।
तेषु यः समयं कुर्यादज्ञेषु हतबुद्धिषु ॥ २२

सत्यवानुवाच ।

तान्न शक्नोषि चेत्साधून्परित्रातुमहिंसया ।
कस्यचिद्भूतभव्यस्य लाभेनान्तं तथा कुरु ॥ २३

द्युमत्सेन उवाच ।

राजानो लोकयात्रार्थं तप्यन्ते परमं तपः ।

अपत्रपन्ति तादृग्भ्यस्तथावृत्ता भवन्ति च ॥ २४
विश्वास्यमाना सुकृतो न कामादृघ्नन्ति दुष्कृतीन् ।
सुकृतेनैव राजानो भूयिष्ठं शासते प्रजाः ॥ २५
श्रेयसः श्रेयसीमेवं वृत्तिं लोकोऽनुवर्तते ।
सदैव हि गुरोर्वृत्तमनुवर्तन्ति मानवाः ॥ २६
आत्मानमसमाधाय समाधित्सति यः परान् ।
विषयेष्विन्द्रियवशं मानवाः प्रहसन्ति तम् ॥ २७
यो राज्ञो दम्भमोहेन किंचित्कुर्यादसांप्रतम् ।
सर्वोपायैर्नियम्यः स तथा पापान्निवर्तते ॥ २८
आत्मैवादौ नियन्तव्यो दुष्कृतं संनियच्छता ।
दण्डयेच्च महादण्डैरपि बन्धूननन्तरान् ॥ २९
यत्र वै पापकृत्क्लेश्यो न महद्दुःखमर्छति ।
वर्धन्ते तत्र पापानि धर्मो ह्रसति च ध्रुवम् ।
इति कारुण्यशीलस्तु विद्वान्वै ब्राह्मणोऽन्वशात् ॥ ३०
इति चैवानुशिष्टोऽस्मि पूर्वैस्तात पितामहैः ।
आश्वासयद्भिः सुभृशमनुक्रोशात्तथैव च ॥ ३१
एतत्प्रथमकल्पेन राजा कृतयुगेऽभजत् ।
पादोनेनापि धर्मेण गच्छेत्त्रेतायुगे तथा ।
द्वापरे तु द्विपादेन पादेन त्वपरे युगे ॥ ३२
तथा कलियुगे प्राप्ते राज्ञां दुश्चरितेन ह ।
भवेत्कालविशेषेण कला धर्मस्य षोडशी ॥ ३३
अथ प्रथमकल्पेन सत्यवन्संकरो भवेत् ।
आयुः शक्तिं च कालं च निर्दिश्य तप आदिशेत् ॥
सत्याय हि यथा नेह जह्याद्धर्मफलं महत् ।
भूतानामनुकम्पार्थं मनुः स्वायंभुवोऽब्रवीत् ॥ ३५

इति श्रीमहाभारते शान्तिपर्वणि
एकोनषष्ट्यधिकद्विशततमोऽध्यायः ॥ २५९ ॥

२६०

युधिष्ठिर उवाच ।

अविरोधेन भूतानां त्यागः षाड्गुण्यकारकः ।
यः स्यादुभयभाग्धर्मस्तन्मे ब्रूहि पितामह ॥ १
गार्हस्थ्यस्य च धर्मस्य त्यागधर्मस्य चोभयोः ।
अदूरसंप्रस्थितयोः किं स्विच्छ्रेयः पितामह ॥ २

भीष्म उवाच ।

उभौ धर्मौ महाभागावुभौ परमदुश्चरौ ।
उभौ महाफलौ तात सद्भिराचरितावुभौ ॥ ३
अत्र ते वर्तयिष्यामि प्रामाण्यमुभयोस्तयोः ।
शृणुष्वैकमनाः पार्थ छिन्नधर्मार्थसंशयम् ॥ ४
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
कपिलस्य गोश्च संवादं तन्निबोध युधिष्ठिर ॥ ५
आम्नायमनुपश्यन्हि पुराणं शाश्वतं ध्रुवम् ।
नहुषः पूर्वमालेभे त्वष्टुर्गामिति नः श्रुतम् ॥ ६
तां नियुक्तामदीनात्मा सत्त्वस्थः समये रतः ।
ज्ञानवान्नियताहारो ददर्श कपिलस्तदा ॥ ७
स बुद्धिमुत्तमां प्राप्तो नैष्ठिकीमकुतोभयाम् ।
स्यमामि शिथिलं सत्यं वेदा इत्यब्रवीत्सकृत् ॥ ८
तां गामृषिः स्यूमरश्मिः प्रविश्य यतिमब्रवीत् ।
हंहो वेदा यदि मता धर्माः केनापरे मताः ॥ ९
तपस्विनो धृतिमतः श्रुतिविज्ञानचक्षुषः ।
सर्वमार्षं हि मन्यन्ते व्याहृतं विदितात्मनः ॥ १०
तस्यैवं गततृष्णस्य विज्वरस्य निराशिषः ।
का विवक्षास्ति वेदेषु निरारम्भस्य सर्वशः ॥ ११

कपिल उवाच ।

नाहं वेदान्विनिन्दामि न विवक्षामि कर्हिचित् ।
पृथगाश्रमिणां कर्माण्येकार्थानीति नः श्रुतम् ॥ १२
गच्छत्येव परित्यागी वानप्रस्थश्च गच्छति ।
गृहस्थो ब्रह्मचारी च उभौ तावपि गच्छतः ॥ १३
देवयाना हि पन्थानश्चत्वारः शाश्वता मताः ।
तेषां ज्यायःकनीयस्त्वं फलेषूक्तं बलाबलम् ॥ १४
एवं विदित्वा सर्वार्थानारभेदिति वैदिकम् ।

नारभेदिति चान्यत्र नैष्ठिकी श्रूयते श्रुतिः ॥ १५
अनारम्भे ह्यदोषः स्यादारम्भेऽदोष उत्तमः ।
एवं स्थितस्य शास्त्रस्य दुर्विज्ञेयं बलाबलम् ॥ १६
यद्यत्र किंचित्प्रत्यक्षमहिंसायाः परं मतम् ।
ऋते त्वागमशास्त्रेभ्यो ब्रूहि तद्यदि पश्यसि ॥ १७

स्यूमरश्मिरुवाच ।

स्वर्गकामो यजेतेति सततं श्रूयते श्रुतिः ।
फलं प्रकल्प्य पूर्वं हि ततो यज्ञः प्रतायते ॥ १८
अजश्चाश्वश्च मेषश्च गौश्च पक्षिगणाश्च ये ।
ग्राम्यारण्या ओषधयः प्राणस्यान्नमिति श्रुतिः ॥१९
तथैवान्नं ह्यहरहः सायं प्रातर्निरुप्यते ।
पशवश्चाथ धान्यं च यज्ञस्याङ्गमिति श्रुतिः ॥ २०
एतानि सह यज्ञेन प्रजापतिरकल्पयत् ।
तेन प्रजापतिर्देवान्यज्ञेनायजत प्रभुः ॥ २१
ते स्मान्योन्यंचराः सर्वे प्राणिनः सप्त सप्त च ।
यज्ञेषूपाकृतं विश्वं प्राहुरुत्तमसंज्ञितम् ॥ २२
एतच्चैवाभ्यनुज्ञातं पूर्वैः पूर्वतरैस्तथा ।
को जातु न विचिन्वीत विद्वान्स्वां शक्तिमात्मनः ॥
पशवश्च मनुष्याश्च द्रुमाश्चौषधिभिः सह ।
स्वर्गमेवाभिकाङ्क्षन्ते न च स्वर्गस्त्वृते मखम् ॥ २४
ओषध्यः पशवो वृक्षा वीरुदाज्यं पयो दधि ।
हविर्भूमिर्दिशः श्रद्धा कालश्चैतानि द्वादश ॥ २५
ऋचो यजूंषि सामानि यजमानश्च षोडशः ।
अग्निर्ज्ञेयो गृहपतिः स सप्तदश उच्यते ।
अङ्गान्येतानि यज्ञस्य यज्ञो मूलमितिः श्रुतिः ॥२६
आज्येन पयसा दध्ना शकृतामिक्षया त्वचा ।
वालैः शृङ्गेण पादेन संभवत्येव गौर्मखम् ॥ २७
एवं प्रत्येकशः सर्वं यद्यदस्य विधीयते ।
यज्ञं वहन्ति संभूय सहर्त्विग्भिः सदक्षिणैः ।
संहत्यैतानि सर्वाणि यज्ञं निर्वर्तयन्त्युत ॥ २८
यज्ञार्थानि हि सृष्टानि यथा वै श्रूयते श्रुतिः ।
एवं पूर्वे पूर्वतराः प्रवृत्ताश्चैव मानवाः ॥ २९
न हिनस्ति ह्यारभते नाभिद्रुह्यति किंचन ।
यज्ञो यष्टव्य इत्येव यो यजत्यफलेप्सया ॥ ३०
यज्ञाङ्गान्यपि चैतानि यथोक्तानि नसंशयः ।
विधिना विधियुक्तानि तारयन्ति परस्परम् ॥ ३१
आम्नायमार्षं पश्यामि यस्मिन्वेदाः प्रतिष्ठिताः ।
तं विद्वांसोऽनुपश्यन्ति ब्राह्मणस्यानुदर्शनात् ॥ ३२
ब्राह्मणप्रभवो यज्ञो ब्राह्मणार्पण एव च ।
अनु यज्ञं जगत्सर्वं यज्ञश्चानु जगत्सदा ॥ ३३
ओमिति ब्रह्मणो योनिर्नमः स्वाहा स्वधा वषट् ।
यस्यैतानि प्रयुज्यन्ते यथाशक्ति कृतान्यपि ॥ ३४
न तस्य त्रिषु लोकेषु परलोकभयं विदुः ।
इति वेदा वदन्तीह सिद्धाश्च परमर्षयः ॥ ३५
ऋचो यजूंषि सामानि स्तोभाश्च विधिचोदिताः ।
यस्मिन्नेतानि सर्वाणि बहिरेव स वै द्विजः ॥ ३६
अग्न्याधेये यद्भवति यच्च सोमे सुते द्विज ।
यच्चेतरैर्महायज्ञैर्वेद तद्भगवान्स्वतः ॥ ३७
तस्माद्ब्रह्मन्यजेतैव याजयेच्चाविचारयन् ।
यजतः स्वर्गविधिना प्रेत्य स्वर्गफलं महत् ॥ ३८
नायं लोकोऽस्त्ययज्ञानां परश्चेति विनिश्चयः ।
वेदवादविदश्चैव प्रमाणमुभयं तदा ॥ ३९

इति श्रीमहाभारते शान्तिपर्वणि
षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६० ॥

२६१

कपिल उवाच ।

एतावदनुपश्यन्तो यतयो यान्ति मार्गगाः ।
नैषां सर्वेषु लोकेषु कश्चिदस्ति व्यतिक्रमः ॥ १
निर्द्वंद्वा निर्नमस्कारा निराशीर्बन्धना बुधाः ।
विमुक्ताः सर्वपापेभ्यश्चरन्ति शुचयोऽमलाः ॥ २

अपवर्गेऽथ संत्यागे बुद्धौ च कृतनिश्चयाः ।
ब्रह्मिष्ठा ब्रह्मभूताश्च ब्रह्मण्येव कृतालयाः ॥ ३
विशोका नष्टरजसस्तेषां लोकाः सनातनाः ।
तेषां गतिं परां प्राप्य गार्हस्थ्ये किं प्रयोजनम् ॥४

स्यूमरश्मिरुवाच ।

यद्येषा परमा निष्ठा यद्येषा परमा गतिः ।
गृहस्थानव्यपाश्रित्य नाश्रमोऽन्यः प्रवर्तते ॥ ५
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य वर्तन्त इतरेऽऽश्रमाः ॥ ६
गृहस्थ एव यजते गृहस्थस्तप्यते तपः ।
गार्हस्थ्यमस्य धर्मस्य मूलं यत्किंचिदेजते ॥ ७
प्रजनाद्ध्यभिनिर्वृत्ताः सर्वे प्राणभृतो मुने ।
प्रजनं चाप्युतान्यत्र न कथंचन विद्यते ॥ ८
यास्ताः स्युर्बहिरोषध्यो बह्वरण्यास्तथा द्विज ।
ओषधिभ्यो बहिर्यस्मात्प्राणी कश्चिन्न विद्यते ।
कस्यैषा वाग्भवेत्सत्या मोक्षो नास्ति गृहादिति ॥९
अश्रद्दधानैरप्राज्ञैः सूक्ष्मदर्शनवर्जितैः ।
निराशैरलसैः श्रान्तैस्तप्यमानैः स्वकर्मभिः ।
श्रमस्योपरमो दृष्टः प्रव्रज्या नाम पण्डितैः ॥ १०
त्रैलोक्यस्यैव हेतुर्हि मर्यादा शाश्वती ध्रुवा ।
ब्राह्मणो नाम भगवाञ्जन्मप्रभृति पूज्यते ॥ ११
प्राग्गर्भाधानान्मन्त्रा हि प्रवर्तन्ते द्विजातिषु ।
अविश्रम्भेषु वर्तन्ते विश्रम्भेष्वप्यसंशयम् ॥ १२
दाहः पुनः संश्रयणे संस्थिते पात्रभोजनम् ।
दानं गवां पशूनां वा पिण्डानां चाप्सु मज्जनम् ॥
अर्चिष्मन्तो बर्हिषदः क्रव्यादाः पितरः स्मृताः ।
मृतस्याप्यनुमन्यन्ते मन्त्रा मन्त्राश्च कारणम् ॥ १४
एवं क्रोशत्सु वेदेषु कुतो मोक्षोऽस्ति कस्यचित् ।
ऋणवन्तो यदा मर्त्याः पितृदेवद्विजातिषु ॥ १५
श्रिया विहीनैरलसैः पण्डितैरपलापितम् ।
वेदवादापरिज्ञानं सत्याभासमिवानृतम् ॥ १६

न वै पापैर्हीयते कृष्यते वा
यो ब्राह्मणो यजते वेदशास्त्रैः ।
ऊर्ध्वं यज्ञः पशुभिः सार्धमेति
संतर्पितस्तर्पयते च कामैः ॥ १७

न वेदानां परिभवान्न शाठ्येन न मायया ।
महत्प्राप्नोति पुरुषो ब्रह्म ब्रह्मणि विन्दति ॥ १८

कपिल उवाच ।

दर्शं च पौर्णमासं च अग्निहोत्रं च धीमताम् ।
चातुर्मास्यानि चैवासंस्तेषु यज्ञः सनातनः ॥ १९
अनारम्भाः सुधृतयः शुचयो ब्रह्मसंश्रिताः ।
ब्रह्मणैव स्म ते देवांस्तर्पयन्त्यमृतैषिणः ॥ २०
सर्वभूतात्मभूतस्य सर्वभूतानि पश्यतः ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ २१

चतुर्द्वारं पुरुषं चतुर्मुखं
चतुर्धा चैनमुपयाति निन्दा ।
बाहुभ्यां वाच उदरादुपस्था-
त्तेषां द्वारं द्वारपालो बुभूषेत् ॥ २२
नाक्षैर्दीव्येन्नाददीतान्यवित्तं
न चायोनीयस्य शृतं प्रगृह्णेत् ।
क्रुद्धो न चैव प्रहरेत धीमां-
स्तथास्य तत्पाणिपादं सुगुप्तम् ॥ २३
नाक्रोशमर्छेन्न मृषा वदेच्च
न पैशुनं जनवादं च कुर्यात् ।
सत्यव्रतो मितभाषोऽप्रमत्त-
स्तथास्य वाग्द्वारमथो सुगुप्तम् ॥ २४
नानाशनः स्यान्न महाशनः स्या-
दलोलुपः साधुभिरागतः स्यात् ।
यात्रार्थमाहारमिहाददीत
तथास्य स्याज्जाठरी द्वारगुप्तिः ॥ २५

न वीरपत्नीं विहरेत नारीं
न चापि नारीमनृतावाह्वयीत ।
भार्याव्रतं ह्यात्मनि धारयीत
तथास्योपस्थद्वारगुप्तिर्भवेत ॥ २६
द्वाराणि यस्य सर्वाणि सुगुप्तानि मनीषिणः ।
उपस्थमुदरं बाहू वाक्चतुर्थी स वै द्विजः ॥ २७
मोघान्यगुप्तद्वारस्य सर्वाण्येव भवन्त्युत ।
किं तस्य तपसा कार्यं किं यज्ञेन किमात्मना ॥२८
अनुत्तरीयवसनमनुपस्तीर्णशायिनम् ।
बाहूपधानं शाम्यन्तं तं देवा ब्राह्मणं विदुः ॥ २९
द्वंद्वारामेषु सर्वेषु य एको रमते मुनिः ।
परेषामननुध्यायंस्तं देवा ब्राह्मणं विदुः ॥ ३०
येन सर्वमिदं बुद्धं प्रकृतिर्विकृतिश्च या ।
गतिज्ञः सर्वभूतानां तं देवा ब्राह्मणं विदुः ॥ ३१
अभयं सर्वभूतेभ्यः सर्वेषामभयं यतः ।
सर्वभूतात्मभूतो यस्तं देवा ब्राह्मणं विदुः ॥ ३२
नान्तरेणानुजानन्ति वेदानां यत्क्रियाफलम् ।
अनुज्ञाय च तत्सर्वमन्यद्रोचयतेऽफलम् ॥ ३३
फलवन्ति च कर्माणि व्युष्टिमन्ति ध्रुवाणि च ।
विगुणानि च पश्यन्ति तथानैकान्तिकानि च ॥३४
गुणाश्चात्र सुदुर्ज्ञेया ज्ञाताश्चापि सुदुष्कराः ।
अनुष्ठिताश्चान्तवन्त इति त्वमनुपश्यसि ॥ ३५

स्यूमरश्मिरुवाच ।

यथा च वेदप्रामाण्यं त्यागश्च सफलो यथा ।
तौ पन्थानावुभौ व्यक्तौ भगवंस्तद्ब्रवीहि मे ॥ ३६

कपिल उवाच ।

प्रत्यक्षमिह पश्यन्ति भवन्तः सत्पथे स्थिताः ।
प्रत्यक्षं तु किमत्रास्ति यद्भवन्त उपासते ॥ ३७

स्यूमरश्मिरुवाच ।

स्यूमरश्मिरहं ब्रह्मञ्जिज्ञासार्थमिहागतः ।
श्रेयस्कामः प्रत्यग्रोचमार्जवान्न विवक्षया ।
इमं च संशयं घोरं भगवान्प्रब्रवीतु मे ॥ ३८
प्रत्यक्षमिह पश्यन्तो भवन्तः सत्पथे स्थिताः ।
किमत्र प्रत्यक्षतमं भवन्तो यदुपासते ।
अन्यत्र तर्कशास्त्रेभ्य आगमाच्च यथागमम् ॥ ३९
आगमो वेदवादस्तु तर्कशास्त्राणि चागमः ।
यथागममुपासीत आगमस्तत्र सिध्यति ।
सिद्धिः प्रत्यक्षरूपा च दृश्यत्यागमनिश्चयात् ॥४०
नौर्नावीव निबद्धा हि स्रोतसा सनिबन्धना ।
ह्रियमाणा कथं विप्र कुबुद्धींस्तारयिष्यति ।
एतद्ब्रवीतु भगवानुपपन्नोऽस्म्यधीहि भोः ॥ ४१
नैव त्यागी न संतुष्टो नाशोको न निरामयः ।
न निर्विवित्सो नावृत्तो नापवृत्तोऽस्ति कश्चन ॥४२
भवन्तोऽपि च हृष्यन्ति शोचन्ति च यथा वयम् ।
इन्द्रियार्थाश्च भवतां समानाः सर्वजन्तुषु ॥ ४३
एवं चतुर्णां वर्णानामाश्रमाणां प्रवृत्तिषु ।
एकमालम्बमानानां निर्णये किं निरामयम् ॥ ४४

कपिल उवाच ।

यद्यदाचरते शास्त्रमथ सर्वप्रवृत्तिषु ।
यस्य यत्र ह्यनुष्ठानं तत्र तत्र निरामयम् ॥ ४५
सर्वं पावयते ज्ञानं यो ज्ञानं ह्यनुवर्तते ।
ज्ञानादपेत्य या वृत्तिः सा विनाशयति प्रजाः ॥४६
भवन्तो ज्ञानिनो नित्यं सर्वतश्च निरागमाः ।
ऐकात्म्यं नाम कश्चिद्धि कदाचिदभिपद्यते ॥ ४७
शास्त्रं ह्यबुद्ध्वा तत्त्वेन केचिद्वादबला जनाः ।
कामद्वेषाभिभूतत्वादहंकारवशं गताः ॥ ४८
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः ।
ब्रह्मस्तेना निरारम्भा अपक्वमतयोऽशिवाः ॥ ४९
वैगुण्यमेव पश्यन्ति न गुणाननुयुञ्जते ।
तेषां तमःशरीराणां तम एव परायणम् ॥ ५०

यो यथाप्रकृतिर्जन्तुः प्रकृतेः स्याद्वशानुगः ।
तस्य द्वेषश्च कामश्च क्रोधो दम्भोऽनृतं मदः ।
नित्यमेवाभिवर्तन्ते गुणाः प्रकृतिसंभवाः ॥ ५१
एतद्बुद्ध्वानुपश्यन्तः संत्यजेयुः शुभाशुभम् ।
परां गतिमभीप्सन्तो यतयः संयमे रताः ॥ ५२

स्यूमरश्मिरुवाच ।

सर्वमेतन्मया ब्रह्मञ्शास्त्रतः परिकीर्तितम् ।
न ह्यविज्ञाय शास्त्रार्थं प्रवर्तन्ते प्रवृत्तयः ॥ ५३
यः कश्चिन्न्याय्य आचारः सर्वं शास्त्रमिति श्रुतिः ।
यदन्याय्यमशास्त्रं तदित्येषा श्रूयते श्रुतिः ॥ ५४
न प्रवृत्तिर्ऋते शास्त्रात्काचिदस्तीति निश्चयः ।
यदन्यद्वेदवादेभ्यस्तदशास्त्रमिति श्रुतिः ॥ ५५
शास्त्रादपेतं पश्यन्ति बहवो व्यक्तमानिनः ।
शास्त्रदोषान्न पश्यन्ति इह चामुत्र चापरे ।
अविज्ञानहतप्रज्ञा हीनप्रज्ञास्तमोवृताः ॥ ५६
शक्यं त्वेकेन मुक्तेन कृतकृत्येन सर्वशः ।
पिण्डमात्रं व्यपाश्रित्य चरितुं सर्वतोदिशम् ।
वेदवादं व्यपाश्रित्य मोक्षोऽस्तीति प्रभाषितुम् ॥५७
इदं तु दुष्करं कर्म कुटुम्बमभिसंश्रितम् ।
दानमध्ययनं यज्ञः प्रजासंतानमार्जवम् ॥ ५८
यद्येतदेवं कृत्वापि न विमोक्षोऽस्ति कस्यचित् ।
धिक्कर्तारं च कार्यं च श्रमश्चायं निरर्थकः ॥ ५९
नास्तिक्यमन्यथा च स्याद्वेदानां पृष्ठतःक्रिया ।
एतस्यानन्त्यमिच्छामि भगवञ्श्रोतुमञ्जसा ॥ ६०
तथ्यं वदस्व मे ब्रह्मन्नुपसन्नोऽस्म्यधीहि भोः ।
यथा ते विदितो मोक्षस्तथेच्छाम्युपशिक्षितुम् ॥६१

इति श्रीमहाभारते शान्तिपर्वणि
एकषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६१ ॥

२६२

कपिल उवाच ।

वेदाः प्रमाणं लोकानां न वेदाः पृष्ठतःकृताः ।
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ १
शरीरमेतत्कुरुते यद्वेदे कुरुते तनुम् ।
कृतशुद्धशरीरो हि पात्रं भवति ब्राह्मणः ॥ २
आनन्त्यमनुयुङ्क्ते यः कर्मणा तद्ब्रवीमि ते ।
निरागममनैतिह्यं प्रत्यक्षं लोकसाक्षिकम् ॥ ३
धर्म इत्येव ये यज्ञान्वितन्वन्ति निराशिषः ।
उत्पन्नत्यागिनोऽलुब्धाः कृपासूयाविवर्जिताः ।
धनानामेष वै पन्थास्तीर्थेषु प्रतिपादनम् ॥ ४
अनाश्रिताः पापकृत्याः कदाचित्कर्मयोनितः ।
मनःसंकल्पसंसिद्धा विशुद्धज्ञाननिश्चयाः ॥ ५
अक्रुध्यन्तोऽनसूयन्तो निरहंकारमत्सराः ।
ज्ञाननिष्ठास्त्रिशुक्लाश्च सर्वभूतहिते रताः ॥ ६
आसन्गृहस्था भूयिष्ठमव्युत्क्रान्ताः स्वकर्मसु ।
राजानश्च तथा युक्ता ब्राह्मणाश्च यथाविधि ॥ ७
समा ह्यार्जवसंपन्नाः संतुष्टा ज्ञाननिश्चयाः ।
प्रत्यक्षधर्माः शुचयः श्रद्दधानाः परावरे ॥ ८
पुरस्ताद्भावितात्मानो यथावच्चरितव्रताः ।
चरन्ति धर्मं कृच्छ्रेऽपि दुर्गे चैवाधिसंहताः ॥ ९
संहत्य धर्मं चरतां पुरासीत्सुखमेव तत् ।
तेषां नासीद्विधातव्यं प्रायश्चित्तं कदाचन ॥ १०
सत्यं हि धर्ममास्थाय दुराधर्षतमा मताः ।
न मात्रामनुरुध्यन्ते न धर्मच्छलमन्ततः ॥ ११
य एव प्रथमः कल्पस्तमेवाभ्याचरन्सह ।
अस्यां स्थितौ स्थितानां हि प्रायश्चित्तं न विद्यते ।
दुर्बलात्मन उत्पन्नं प्रायश्चित्तमिति श्रुतिः ॥ १२
यत एवंविधा विप्राः पुराणा यज्ञवाहनाः ।

त्रैविद्यवृद्धाः शुचयो वृत्तवन्तो यशस्विनः ।
यजन्तोऽहरहर्यज्ञैर्निराशीर्बन्धना बुधाः ॥ १३
तेषां यज्ञाश्च वेदाश्च कर्माणि च यथागमम् ।
आगमाश्च यथाकालं संकल्पाश्च यथाव्रतम् ॥ १४
अपेतकामक्रोधानां प्रकृत्या संशितात्मनाम् ।
ऋजूनां शमनित्यानां स्थितानां स्वेषु कर्मसु ।
सर्वमानन्त्यमेवासीदितिः न शाश्वती श्रुतिः ॥ १५
तेषामदीनसत्त्वानां दुश्चराचारकर्मणाम् ।
स्वकर्मभिः संवृतानां तपो घोरत्वमागतम् ॥ १६
तं सदाचारमाश्चर्यं पुराणं शाश्वतं ध्रुवम् ।
अशक्नुवद्भिश्चरितुं किंचिद्धर्मेषु सूचितम् ॥ १७
निरापद्धर्म आचारस्त्वप्रमादोऽपराभवः ।
सर्ववर्णेषु यत्तेषु नासीत्कश्चिद्व्यतिक्रमः ॥ १८
धर्ममेकं चतुष्पादमाश्रितास्ते नरर्षभाः ।
तं सन्तो विधिवत्प्राप्य गच्छन्ति परमां गतिम् ॥
गृहेभ्य एव निष्क्रम्य वनमन्ये समाश्रिताः ।
गृहमेवाभिसंश्रित्य ततोऽन्ये ब्रह्मचारिणः ॥ २०
धर्ममेतं चतुष्पादमाश्रमं ब्राह्मणा विदुः ।
आनन्त्यं ब्रह्मणः स्थानं ब्राह्मणा नाम निश्चयः ॥
अत एवंविधा विप्राः पुराणा धर्मचारिणः ।
त एते दिवि दृश्यन्ते ज्योतिर्भूता द्विजातयः ॥२२
नक्षत्राणीव धिष्ण्येषु बहवस्तारकागणाः ।
आनन्त्यमुपसंप्राप्ताः संतोषादिति वैदिकम् ॥ २३
यद्यागच्छन्ति संसारं पुनर्योनिषु तादृशाः ।
न लिप्यन्ते पापकृत्यैः कदाचित्कर्मयोनितः ॥ २४
एवं युक्तो ब्राह्मणः स्यादन्यो ब्राह्मणको भवेत् ।
कर्मैव पुरुषस्याह शुभं वा यदि वाशुभम् ॥ २५
एवं पक्वकषायाणामानन्त्येन श्रुतेन च ।
सर्वमानन्त्यमेवासीदेवं नः शाश्वती श्रुतिः ॥ २६
तेषामपेततृष्णानां निर्णिक्तानां शुभात्मनाम् ।
चतुर्थ औपनिषदो धर्मः साधारणः स्मृतः ॥ २७
स सिद्धैः साध्यते नित्यं ब्राह्मणैर्नियतात्मभिः ।
संतोषमूलस्त्यागात्मा ज्ञानाधिष्ठानमुच्यते ॥ २८
अपवर्गगतिर्नित्यो यतिधर्मः सनातनः ।
साधारणः केवलो वा यथाबलमुपास्यते ॥ २९
गच्छतो गच्छतः क्षेमं दुर्बलोऽत्रावसीदति ।
ब्रह्मणः पदमन्विच्छन्संसारान्मुच्यते शुचिः ॥ ३०

स्यूमरश्मिरुवाच ।

ये भुञ्जते ये ददते यजन्तेऽधीयते च ये ।
मात्राभिर्धर्मलब्धाभिर्ये वा त्यागं समाश्रिताः॥३१
एतेषां प्रेत्यभावे तु कतमः स्वर्गजित्तमः ।
एतदाचक्ष्व मे ब्रह्मन्यथातथ्येन पृच्छतः ॥ ३२

कपिल उवाच ।

परिग्रहाः शुभाः सर्वे गुणतोऽभ्युदयाश्च ये ।
न तु त्यागसुखं प्राप्ता एतत्त्वमपि पश्यसि ॥ ३३

स्यूमरश्मिरुवाच ।

भवन्तो ज्ञाननिष्ठा वै गृहस्थाः कर्मनिश्चयाः ।
आश्रमाणां च सर्वेषां निष्ठायामैक्यमुच्यते ॥ ३४
एकत्वे च पृथक्त्वे च विशेषो नान्य उच्यते ।
तद्यथावद्यथान्यायं भगवान्प्रब्रवीतु मे ॥ ३५

कपिल उवाच ।

शरीरपक्तिः कर्माणि ज्ञानं तु परमा गतिः ।
पक्वे कषाये वमने रसज्ञाने न तिष्ठति ॥ ३६
आनृशंस्यं क्षमा शान्तिरहिंसा सत्यमार्जवम् ।
अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा शमस्तथा ॥ ३७
पन्थानो ब्रह्मणस्त्वेते एतैः प्राप्नोति यत्परम् ।
तद्विद्वाननुबुध्येत मनसा कर्मनिश्चयम् ॥ ३८
यां विप्राः सर्वतः शान्ता विशुद्धा ज्ञाननिश्चयाः ।
गतिं गच्छन्ति संतुष्टास्तामाहुः परमां गतिम् ॥३९
वेदांश्च वेदितव्यं च विदित्वा च यथास्थिति ।

एवं वेदविदित्याहुरतोऽन्यो वातरेटकः ॥ ४०
सर्वे विदुर्वेदविदो वेदे सर्वं प्रतिष्ठितम् ।
वेदे हि निष्ठा सर्वस्य यद्यदस्ति च नास्ति च ॥४१
एषैव निष्ठा सर्वस्य यद्यदस्ति च नास्ति च ।
एतदन्तं च मध्यं च सच्चासच्च विजानतः ॥ ४२
समस्तत्याग इत्येव शम इत्येव निश्चितः ।
संतोष इत्यत्र शुभमपवर्गे प्रतिष्ठितम् ॥ ४३
ऋतं सत्यं विदितं वेदितव्यं
सर्वस्यात्मा जङ्गमं स्थावरं च ।
सर्वं सुखं यच्छिवमुत्तमं च
ब्रह्माव्यक्तं प्रभवश्चाव्ययश्च ॥ ४४
तेजः क्षमा शान्तिरनामयं शुभं
तथाविधं व्योम सनातनं ध्रुवम् ।
एतैः शब्दैर्गम्यते बुद्धिनेत्रै-
स्तस्मै नमो ब्रह्मणे ब्राह्मणाय ॥ ४५

इति श्रीमहाभारते शान्तिपर्वणि
द्विषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६२ ॥

२६३

युधिष्ठिर उवाच ।

धर्ममर्थं च कामं च वेदाः शंसन्ति भारत ।
कस्य लाभो विशिष्टोऽत्र तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
कुण्डधारेण यत्प्रीत्या भक्तायोपकृतं पुरा ॥ २
अधनो ब्राह्मणः कश्चित्कामाद्धर्ममवैक्षत ।
यज्ञार्थं स ततोऽर्थार्थी तपोऽतप्यत दारुणम् ॥ ३
स निश्चयमथो कृत्वा पूजयामास देवताः ।
भक्त्या न चैवाध्यगच्छद्धनं संपूज्य देवताः ॥ ४
ततश्चिन्तां पुनः प्राप्तः कतमद्दैवतं नु तत् ।
यन्मे द्रुतं प्रसीदेत मानुषैरजडीकृतम् ॥ ५
अथ सौम्येन वपुषा देवानुचरमन्तिके ।
प्रत्यपश्यज्जलधरं कुण्डधारमवस्थितम् ॥ ६
दृष्ट्वैव तं महात्मानं तस्य भक्तिरजायत ।
अयं मे धास्यति श्रेयो वपुरेतद्धि तादृशम् ॥ ७
संनिकृष्टश्च देवस्य न चान्यैर्मानुषैर्वृतः ।
एष मे दास्यति धनं प्रभूतं शीघ्रमेव च ॥ ८
ततो धूपैश्च गन्धैश्च माल्यैरुच्चावचैरपि ।
बलिभिर्विविधैश्चापि पूजयामास तं द्विजः ॥ ९
ततः स्वल्पेन कालेन तुष्टो जलधरस्तदा ।
तस्योपकारे नियतामिमां वाचमुवाच ह ॥ १०
ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ११
आशायास्तनयोऽधर्मः क्रोधोऽसूयासुतः स्मृतः ।
पुत्रो लोभो निकृत्यास्तु कृतघ्नो नार्हति प्रजाम् ॥
ततः स ब्राह्मणः स्वप्ने कुण्डधारस्य तेजसा ।
अपश्यत्सर्वभूतानि कुशेषु शयितस्तदा ॥ १३
शमेन तपसा चैव भक्त्या च निरुपस्कृतः ।
शुद्धात्मा ब्राह्मणो रात्रौ निदर्शनमपश्यत ॥ १४
मणिभद्रं स तत्रस्थं देवतानां महाद्युतिम् ।
अपश्यत महात्मानं व्यादिशन्तं युधिष्ठिर ॥ १५
तत्र देवाः प्रयच्छन्ति राज्यानि च धनानि च ।
शुभैः कर्मभिरारब्धाः प्रच्छिदन्त्यशुभेषु च ॥ १६
पश्यतामथ यक्षाणां कुण्डधारो महाद्युतिः ।
निष्पत्य पतितो भूमौ देवानां भरतर्षभ ॥ १७
ततस्तु देववचनान्मणिभद्रो महायशाः ।
उवाच पतितं भूमौ कुण्डधार किमिष्यते ॥ १८

कुण्डधार उवाच ।

यदि प्रसन्ना देवा मे भक्तोऽयं ब्राह्मणो मम ।
अस्यानुग्रहमिच्छामि कृतं किंचित्सुखोदयम् ॥ १९

भीष्म उवाच ।

ततस्तं मणिभद्रस्तु पुनर्वचनमब्रवीत् ।
देवानामेव वचनात्कुण्डधारं महाद्युतिम् ॥ २०
उत्तिष्ठोत्तिष्ठ भद्रं ते कृतकार्यः सुखी भव ।
यावद्धनं प्रार्थयते ब्राह्मणोऽयं सखा तव ।
देवानां शासनात्तावदसंख्येयं ददाम्यहम् ॥ २१
विचार्य कुण्डधारस्तु मानुष्यं चलमध्रुवम् ।
तपसे मतिमाधत्त ब्राह्मणस्य यशस्विनः ॥ २२

कुण्डधार उवाच ।

नाहं धनानि याचामि ब्राह्मणाय धनप्रद ।
अन्यमेवाहमिच्छामि भक्तायानुग्रहं कृतम् ॥ २३
पृथिवीं रत्नपूर्णां वा महद्वा धनसंचयम् ।
भक्ताय नाहमिच्छामि भवेदेष तु धार्मिकः ॥ २४
धर्मेऽस्य रमतां बुद्धिर्धर्मं चैवोपजीवतु ।
धर्मप्रधानो भवतु ममैषोऽनुग्रहो मतः ॥ २५

मणिभद्र उवाच ।

यदा धर्मफलं राज्यं सुखानि विविधानि च ।
फलान्येवायमश्नातु कायक्लेशविवर्जितः ॥ २६

भीष्म उवाच ।

ततस्तदेव बहुशः कुण्डधारो महायशाः ।
अभ्यासमकरोद्धर्मे ततस्तुष्टास्य देवताः ॥ २७

मणिभद्र उवाच ।

प्रीतास्ते देवताः सर्वा द्विजस्यास्य तथैव च ।
भविष्यत्येष धर्मात्मा धर्मे चाधास्यते मतिः ॥२८

भीष्म उवाच ।

ततः प्रीतो जलधरः कृतकार्यो युधिष्ठिर ।
ईप्सितं मनसो लब्ध्वा वरमन्यैः सुदुर्लभम् ॥ २९
ततोऽपश्यत चीराणि सूक्ष्माणि द्विजसत्तमः ।
पार्श्वतोऽभ्यागतो न्यस्तान्यथ निर्वेदमागतः ॥ ३०

ब्राह्मण उवाच ।

अयं न सुकृतं वेत्ति को न्वन्यो वेत्स्यते कृतम् ।
गच्छामि वनमेवाहं वरं धर्मेण जीवितुम् ॥ ३१

भीष्म उवाच ।

निर्वेदाद्देवतानां च प्रसादात्स द्विजोत्तमः ।
वनं प्रविश्य सुमहत्तप आरब्धवांस्तदा ॥ ३२
देवतातिथिशेषेण फलमूलाशनो द्विजः ।
धर्मे चापि महाराज रतिरस्याभ्यजायत ॥ ३३
त्यक्त्वा मूलफलं सर्वं पर्णाहारोऽभवद्द्विजः ।
पर्णं त्यक्त्वा जलाहारस्तदासीद्द्विजसत्तमः ॥ ३४
वायुभक्षस्ततः पश्चाद्बहून्वर्षगणानभूत् ।
न चास्य क्षीयते प्राणस्तदद्भुतमिवाभवत् ॥ ३५
धर्मे च श्रद्दधानस्य तपस्युग्रे च वर्ततः ।
कालेन महता तस्य दिव्या दृष्टिरजायत ॥ ३६
तस्य बुद्धिः प्रादुरासीद्यदि दद्यां महद्धनम् ।
तुष्टः कस्मैचिदेवाहं न मिथ्या वाग्भवेन्मम ॥ ३७
ततः प्रहृष्टवदनो भूय आरब्धवांस्तपः ।
भूयश्चाचिन्तयत्सिद्धो यत्परं सोऽभ्यपद्यत ॥ ३८
यदि दद्यामहं राज्यं तुष्टो वै यस्य कस्यचित् ।
स भवेदचिराद्राजा न मिथ्या वाग्भवेन्मम ॥ ३९
तस्य साक्षात्कुण्डधारो दर्शयामास भारत ।
ब्राह्मणस्य तपोयोगात्सौहृदेनाभिचोदितः ॥ ४०
समागम्य स तेनाथ पूजां चक्रे यथाविधि ।
ब्राह्मणः कुण्डधारस्य विस्मितश्चाभवन्नृप ॥ ४१
ततोऽब्रवीत्कुण्डधारो दिव्यं ते चक्षुरुत्तमम् ।
पश्य राज्ञां गतिं विप्र लोकांश्चावेक्ष चक्षुषा ॥४२
ततो राज्ञां सहस्राणि मग्नानि निरये तदा ।
दूरादपश्यद्विप्रः स दिव्ययुक्तेन चक्षुषा ॥ ४३

कुण्डधार उवाच ।

मां पूजयित्वा भावेन यदि त्वं दुःखमाप्नुयाः ।

कृतं मया भवेत्किं ते कश्च तेऽनुग्रहो भवेत् ॥४४
पश्य पश्य च भूयस्त्वं कामानिच्छेत्कथं नरः ।
स्वर्गद्वारं हि संरुद्धं मानुषेषु विशेषतः ॥ ४५

भीष्म उवाच ।

ततोऽपश्यत्स कामं च क्रोधं लोभं भयं मदम् ।
निद्रां तन्द्रीं तथालस्यमावृत्य पुरुषान्स्थितान् ॥४६

कुण्डधार उवाच ।

एतैर्लोकाः सुसंरुद्धा देवानां मानुषाद्भयम् ।
तथैव देववचनाद्विघ्नं कुर्वन्ति सर्वशः ॥ ४७
न देवैरननुज्ञातः कश्चिद्भवति धार्मिकः ।
एष शक्तोऽसि तपसा राज्यं दातुं धनानि च ॥४८

भीष्म उवाच ।

ततः पपात शिरसा ब्राह्मणस्तोयधारिणे ।
उवाच चैनं धर्मात्मा महान्मेऽनुग्रहः कृतः ॥ ४९
कामलोभानुबन्धेन पुरा ते यदसूयितम् ।
मया स्नेहमविज्ञाय तत्र मे क्षन्तुमर्हसि ॥ ५०
क्षान्तमेव मयेत्युक्त्वा कुण्डधारो द्विजर्षभम् ।
संपरिष्वज्य बाहुभ्यां तत्रैवान्तरधीयत ॥ ५१
ततः सर्वानिमाँल्लोकान्ब्राह्मणोऽनुचचार ह ।
कुण्डधारप्रसादेन तपसा योजितः पुरा ॥ ५२
विहायसा च गमनं तथा संकल्पितार्थता ।
धर्माच्छक्त्या तथा योगाद्या चैव परमा गतिः ॥५३
देवता ब्राह्मणाः सन्तो यक्षा मानुषचारणाः ।
धार्मिकान्पूजयन्तीह न धनाढ्यान्न कामिनः ॥५४
सुप्रसन्ना हि ते देवा यत्ते धर्मे रता मतिः ।
धने सुखकला काचिद्धर्मे तु परमं सुखम् ॥ ५५

इति श्रीमहाभारते शान्तिपर्वणि
त्रिषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६३ ॥

२६४

युधिष्ठिर उवाच ।

बहूनां यज्ञतपसामेकार्थानां पितामह ।
धर्मार्थं न सुखार्थार्थं कथं यज्ञः समाहितः ॥ १

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि नारदेनानुकीर्तितम् ।
उञ्छवृत्तेः पुरावृत्तं यज्ञार्थे ब्राह्मणस्य ह ॥ २
राष्ट्रे धर्मोत्तरे श्रेष्ठे विदर्भेष्वभवद्द्विजः ।
उञ्छवृत्तिरृषिः कश्चिद्यज्ञे यज्ञं समादधे ॥ ३
श्यामाकमशनं तत्र सूर्यपत्नी सुवर्चला ।
तिक्तं च विरसं शाकं तपसा स्वादुतां गतम् ॥ ४
उपगम्य वने पृथ्वीं सर्वभूताविहिंसया ।
अपि मूलफलैरिज्यो यज्ञः स्वर्ग्यः परंतप ॥ ५
तस्य भार्या व्रतकृशा शुचिः पुष्करचारिणी ।
यज्ञपत्नीत्वमानीता सत्येनानुविधीयते ।
सा तु शापपरित्रस्ता न स्वभावानुवर्तिनी ॥ ६
मयूरजीर्णपर्णानां वस्त्रं तस्याश्च पर्णिनाम् ।
अकामायाः कृतं तत्र यज्ञे होत्रानुमार्गतः ॥ ७
शुक्रस्य पुनराजातिरपध्यानादधर्मवित् ।
तस्मिन्वने समीपस्थो मृगोऽभूत्सहचारिकः ।
वचोभिरब्रवीत्सत्यं त्वया दुष्कृतकं कृतम् ॥ ८
यदि मन्त्राङ्गहीनोऽयं यज्ञो भवति वैकृतः ।
मां भोः प्रक्षिप होत्रे त्वं गच्छ स्वर्गमतन्द्रितः ॥९
ततस्तु यज्ञे सावित्री साक्षात्तं संन्यमन्त्रयत् ।
निमन्त्रयन्ती प्रत्युक्ता न हन्यां सहवासिनम् ॥ १०
एवमुक्ता निवृत्ता सा प्रविष्टा यज्ञपावकम् ।
किं नु दुश्चरितं यज्ञे दिदृक्षुः सा रसातलम् ॥११
सा तु बद्धाञ्जलिं सत्यमयाचद्धरिणं पुनः ।
सत्येन संपरिष्वज्य संदिष्टो गम्यतामिति ॥ १२
ततः स हरिणो गत्वा पदान्यष्टौ न्यवर्तत ।

साधु हिंसय मां सत्य हतो यास्यामि सद्गतिम् ॥
पश्य ह्यप्सरसो दिव्या मया दत्तेन चक्षुषा ।
विमानानि विचित्राणि गन्धर्वाणां महात्मनाम् ॥ १४
ततः सुरुचिरं दृष्ट्वा स्पृहालग्नेन चक्षुषा ।
मृगमालोक्य हिंसायां स्वर्गवासं समर्थयत् ॥ १५
स तु धर्मो मृगो भूत्वा बहुवर्षोषितो वने ।
तस्य निष्कृतिमाधत्त न ह्यसौ यज्ञसंविधिः ॥ १६
तस्य तेन तु भावेन मृगहिंसात्मनस्तदा ।
तपो महत्समुच्छिन्नं तस्माद्धिंसा न यज्ञिया ॥ १७
ततस्तं भगवान्धर्मो यज्ञं याजयत स्वयम् ।
समाधानं च भार्याया लेभे स तपसा परम् ॥ १८
अहिंसा सकलो धर्मो हिंसा यज्ञेऽसमाहिता ।
सत्यं तेऽहं प्रवक्ष्यामि यो धर्मः सत्यवादिनाम् ॥

इति श्रीमहाभारते शान्तिपर्वणि
चतुःषष्ट्यधिकद्विशततमोऽध्याय ॥ २६४ ॥

२६५

युधिष्ठिर उवाच ।

कथं भवति पापात्मा कथं धर्मं करोति वा ।
केन निर्वेदमादत्ते मोक्षं वा केन गच्छति ॥ १

भीष्म उवाच ।

विदिताः सर्वधर्मास्ते स्थित्यर्थमनुपृच्छसि ।
शृणु मोक्षं सनिर्वेदं पापं धर्मं च मूलतः ॥ २
विज्ञानार्थं हि पञ्चानामिच्छा पूर्वं प्रवर्तते ।
प्राप्य ताञ्जायते कामो द्वेषो वा भरतर्षभ ॥ ३
ततस्तदर्थं यतते कर्म चारभते पुनः ।
इष्टानां रूपगन्धानामभ्यासं च चिकीर्षति ॥ ४
ततो रागः प्रभवति द्वेषश्च तदनन्तरम् ।
ततो लोभः प्रभवति मोहश्च तदनन्तरम् ॥ ५
लोभमोहाभिभूतस्य रागद्वेषान्वितस्य च ।
न धर्मे जायते बुद्धिर्व्याजाद्धर्मं करोति च ॥ ६
व्याजेन चरतो धर्ममर्थव्याजोऽपि रोचते ।
व्याजेन सिध्यमानेषु धनेषु कुरुनन्दन ॥ ७
तत्रैव कुरुते बुद्धिं ततः पापं चिकीर्षति ।
सुहृद्भिर्वार्यमाणोऽपि पण्डितैश्चापि भारत ॥ ८
उत्तरं न्यायसंबद्धं ब्रवीति विधियोजितम् ।
अधर्मस्त्रिविधस्तस्य वर्धते रागमोहजः ॥ ९
पापं चिन्तयते चैव प्रब्रवीति करोति च ।
तस्याधर्मप्रवृत्तस्य दोषान्पश्यन्ति साधवः ॥ १०
एकशीलाश्च मित्रत्वं भजन्ते पापकर्मिणः ।
स नेह सुखमाप्नोति कुत एव परत्र वै ॥ ११
एवं भवति पापात्मा धर्मात्मानं तु मे शृणु ।
यथा कुशलधर्मा स कुशलं प्रतिपद्यते ॥ १२
य एतान्प्रज्ञया दोषान्पूर्वमेवानुपश्यति ।
कुशलः सुखदुःखानां साधूंश्चाप्युपसेवते ॥ १३
तस्य साधुसमाचारादभ्यासाच्चैव वर्धते ।
प्रज्ञा धर्मे च रमते धर्मं चैवोपजीवति ॥ १४
सोऽथ धर्मादवाप्तेषु धनेषु कुरुते मनः ।
तस्यैव सिञ्चते मूलं गुणान्पश्यति यत्र वै ॥ १५
धर्मात्मा भवति ह्येवं मित्रं च लभते शुभम् ।
स मित्रधनलाभात्तु प्रेत्य चेह च नन्दति ॥ १६
शब्दे स्पर्शे तथा रूपे रसे गन्धे च भारत ।
प्रभुत्वं लभते जन्तुर्धर्मस्यैतत्फलं विदुः ॥ १७
स धर्मस्य फलं लब्ध्वा न तृप्यति युधिष्ठिर ।
अतृप्यमाणो निर्वेदमादत्ते ज्ञानचक्षुषा ॥ १८
प्रज्ञाचक्षुर्यदा कामे दोषमेवानुपश्यति ।
विरज्यते तदा कामान्न च धर्मं विमुञ्चति ॥ १९
सर्वत्यागे च यतते दृष्ट्वा लोकं क्षयात्मकम् ।
ततो मोक्षाय यतते नानुपायादुपायतः ॥ २०
शनैर्निर्वेदमादत्ते पापं कर्म जहाति च ।
धर्मात्मा चैव भवति मोक्षं च लभते परम् ॥ २१

एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ।
पापं धर्मं तथा मोक्षं निर्वेदं चैव भारत ॥ २२
तस्माद्धर्मे प्रवर्तेथाः सर्वावस्थं युधिष्ठिर ।
धर्मे स्थितानां कौन्तेय सिद्धिर्भवति शाश्वती ॥२३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६५ ॥

२६६

युधिष्ठिर उवाच ।

मोक्षः पितामहेनोक्त उपायान्नानुपायतः ।
तमुपायं यथान्यायं श्रोतुमिच्छामि भारत ॥ १

भीष्म उवाच ।

त्वय्येवैतन्महाप्राज्ञ युक्तं निपुणदर्शनम् ।
यदुपायेन सर्वार्थान्नित्यं मृगयसेऽनघ ॥ २
करणे घटस्य या बुद्धिर्घटोत्पत्तौ न सानघ ।
एवं धर्माभ्युपायेषु नान्यद्धर्मेषु कारणम् ॥ ३
पूर्वे समुद्रे यः पन्था न च गच्छति पश्चिमम् ।
एकः पन्था हि मोक्षस्य तन्मे विस्तरतः शृणु ॥ ४
क्षमया क्रोधमुच्छिन्द्यात्कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥ ५
अप्रमादाद्भयं रक्षेच्छ्वासं क्षेत्रज्ञशीलनात् ।
इच्छां द्वेषं च कामं च धैर्येण विनिवर्तयेत् ॥ ६
भ्रमं प्रमोहमावर्तमभ्यासाद्विनिवर्तयेत् ।
निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्त्ववित् ॥७
उपद्रवांस्तथा रोगान्हितजीर्णमिताशनात् ।
लोभं मोहं च संतोषाद्विषयांस्तत्त्वदर्शनात् ॥ ८
अनुक्रोशादधर्मं च जयेद्धर्ममुपेक्षया ।
आयत्या च जयेदाशामर्थं सङ्गविवर्जनात् ॥ ९
अनित्यत्वेन च स्नेहं क्षुधं योगेन पण्डितः ।
कारुण्येनात्मनो मानं तृष्णां च परितोषतः ॥ १०
उत्थानेन जयेत्तन्द्रीं वितर्कं निश्चयाज्जयेत् ।
मौनेन बहुभाष्यं च शौर्येण च भयं जयेत् ॥११
यच्छेद्वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा ।
ज्ञानमात्मा महान्यच्छेत्तं यच्छेच्छान्तिरात्मनः ॥
तदेतदुपशान्तेन बोद्धव्यं शुचिकर्मणा ।
योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ॥ १३
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ।
परित्यज्य निषेवेत तथेमान्योगसाधनान् ॥ १४
ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ।
शौचमाहारतः शुद्धिरिन्द्रियाणां च संयमः ॥ १५
एतैर्विवर्धते तेजः पाप्मानमपहन्ति च ।
सिध्यन्ति चास्य संकल्पा विज्ञानं च प्रवर्तते ॥१६
धूतपापः स तेजस्वी लघ्वाहारो जितेन्द्रियः ।
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदम् ॥ १७
अमूढत्वमसङ्गित्वं कामक्रोधविवर्जनम् ।
अदैन्यमनुदीर्णत्वमनुद्वेगो व्यवस्थितिः ॥ १८
एष मार्गो हि मोक्षस्य प्रसन्नो विमलः शुचिः ।
तथा वाक्कायमनसां नियमः कामतोऽन्यथा ॥ १९

इति श्रीमहाभारते शान्तिपर्वणि
षट्षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६६ ॥

२६७

भीष्म उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं देवलस्यासितस्य च ॥ १
आसीनं देवलं वृद्धं बुद्ध्वा बुद्धिमतां वरः ।
नारदः परिपप्रच्छ भूतानां प्रभवाप्ययम् ॥ २
कुतः सृष्टमिदं विश्वं ब्रह्मन्स्थावरजङ्गमम् ।
प्रलये च कमभ्येति तद्भवान्प्रब्रवीतु मे ॥ ३

असित उवाच ।

येभ्यः सृजति भूतानि कालो भावप्रचोदितः ।
महाभूतानि पञ्चेति तान्याहुर्भूतचिन्तकाः ॥ ४

तेभ्यः सृजति भूतानि काल आत्मप्रचोदितः ।
एतेभ्यो यः परं ब्रूयादसद्ब्रूयादसंशयम् ॥ ५
विद्धि नारद पञ्चैतान्शाश्वतानचलान्ध्रुवान् ।
महतस्तेजसो राशीन्कालषष्ठान्स्वभावतः ॥ ६
आपश्चैवान्तरिक्षं च पृथिवी वायुपावकौ ।
असिद्धिः परमेतेभ्यो भूतेभ्यो मुक्तसंशयम् ॥ ७
नोपपत्त्या न वा युक्त्या त्वसद्ब्रूयादसंशयम् ।
वेत्थ तानभिनिर्वृत्तान्षडेते यस्य राशयः ॥ ८
पञ्चैव तानि कालश्च भावाभावौ च केवलौ ।
अष्टौ भूतानि भूतानां शाश्वतानि भवाप्ययौ ॥ ९
अभावाद्भावितेष्वेव तेभ्यश्च प्रभवन्त्यपि ।
विनष्टोऽपि च तान्येव जन्तुर्भवति पञ्चधा ॥ १०
तस्य भूमिमयो देहः श्रोत्रमाकाशसंभवम् ।
सूर्यश्चक्षुरसुर्वायुरद्भ्यस्तु खलु शोणितम् ॥ ११
चक्षुषी नासिकाकर्णौ त्वग्जिह्वेति च पञ्चमी ।
इन्द्रियाणीन्द्रियार्थानां ज्ञानानि कवयो विदुः ॥१२
दर्शनं श्रवणं घ्राणं स्पर्शनं रसनं तथा ।
उपपत्त्या गुणान्विद्धि पञ्च पञ्चसु पञ्चधा ॥ १३
रूपं गन्धो रसः स्पर्शः शब्दश्चैवाथ तद्गुणाः ।
इन्द्रियैरुपलभ्यन्ते पञ्चधा पञ्च पञ्चभिः ॥ १४
रूपं गन्धं रसं स्पर्शं शब्दं चैतांस्तु तद्गुणान् ।
इन्द्रियाणि न बुध्यन्ते क्षेत्रज्ञस्तैस्तु बुध्यते ॥ १५
चित्तमिन्द्रियसंघातात्परं तस्मात्परं मनः ।
मनसस्तु परा बुद्धिः क्षेत्रज्ञो बुद्धितः परः ॥ १६
पूर्वं चेतयते जन्तुरिन्द्रियैर्विषयान्पृथक् ।
विचार्य मनसा पश्चादथ बुद्ध्या व्यवस्यति ।
इन्द्रियैरुपलब्धार्थान्सर्वान्यस्त्वध्यवस्यति ॥ १७
चित्तमिन्द्रियसंघातं मनो बुद्धिं तथाष्टमीम् ।
अष्टौ ज्ञानेन्द्रियाण्याहुरेतान्यध्यात्मचिन्तकाः ॥१८
पाणिपादं च पायुश्च मेहनं पञ्चमं मुखम् ।

इति संशब्द्यमानानि शृणु कर्मेन्द्रियाण्यपि ॥ १९
जल्पनाभ्यवहारार्थं मुखमिन्द्रियमुच्यते ।
गमनेन्द्रियं तथा पादौ कर्मणः करणे करौ ॥ २०
पायूपस्थौ विसर्गार्थमिन्द्रिये तुल्यकर्मणी ।
विसर्गे च पुरीषस्य विसर्गे चाभिकामिके ॥ २१
बलं षष्ठं षडेतानि वाचा सम्यग्यथागमम् ।
ज्ञानचेष्टेन्द्रियगुणाः सर्वे संशब्दिता मया ॥ २२
इन्द्रियाणां स्वकर्मभ्यः श्रमादुपरमो यदा ।
भवतीन्द्रियसंन्यासादथ स्वपिति वै नरः ॥ २३
इन्द्रियाणां व्युपरमे मनोऽनुपरतं यदि ।
सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनम् ॥ २४
सात्त्विकाश्चैव ये भावास्तथा राजसतामसाः ।
कर्मयुक्तान्प्रशंसन्ति सात्त्विकानितरांस्तथा ॥ २५
आनन्दः कर्मणां सिद्धिः प्रतिपत्तिः परा गतिः ।
सात्त्विकस्य निमित्तानि भावान्संश्रयते स्मृतिः ॥
जन्तुष्वेकतमेष्वेवं भावा ये विधिमास्थिताः ।
भावयोरीप्सितं नित्यं प्रत्यक्षगमनं द्वयोः ॥ २७
इन्द्रियाणि च भावाश्च गुणाः सप्तदश स्मृताः ।
तेषामष्टादशो देही यः शरीरे स शाश्वतः ॥ २८
अथ वा सशरीरास्ते गुणाः सर्वे शरीरिणाम् ।
संश्रितास्तद्वियोगे हि सशरीरा न सन्ति ते ॥ २९
अथ वा संनिपातोऽयं शरीरं पाञ्चभौतिकम् ।
एकश्च दश चाष्टौ च गुणाः सह शरीरिणाम् ।
ऊष्मणा सह विंशो वा संघातः पाञ्चभौतिकः ॥३०
महान्संधारयत्येतच्छरीरं वायुना सह ।
तस्यास्य भावयुक्तस्य निमित्तं देहभेदने ॥ ३१
यथैवोत्पद्यते किंचित्पञ्चत्वं गच्छते तथा ।
पुण्यपापविनाशान्ते पुण्यपापसमीरितम् ।
देहं विशति कालेन ततोऽयं कर्मसंभवम् ॥ ३२
हित्वा हित्वा ह्ययं प्रैति देहाद्देहं कृताश्रयः ।

कालसंचोदितः क्षेत्री विशीर्णाद्वा गृहाद्गृहम् ॥३३
तत्र नैवानुतप्यन्ते प्राज्ञा निश्चितनिश्चयाः ।
कृपणास्त्वनुतप्यन्ते जनाः संबन्धिमानिनः ॥ ३४
न ह्ययं कस्यचित्कश्चिन्नास्य कश्चन विद्यते ।
भवत्येको ह्ययं नित्यं शरीरे सुखदुःखभाक् ॥ ३५
नैव संजायते जन्तुर्न च जातु विपद्यते ।
याति देहमयं भुक्त्वा कदाचित्परमां गतिम् ॥ ३६
पुण्यपापमयं देहं क्षपयन्कर्मसंचयात् ।
क्षीणदेहः पुनर्देही ब्रह्मत्वमुपगच्छति ॥ ३७
पुण्यपापक्षयार्थं च सांख्यं ज्ञानं विधीयते ।
तत्क्षये ह्यस्य पश्यन्ति ब्रह्मभावे परां गतिम् ॥३८

इति श्रीमहाभारते शान्तिपर्वणि
सप्तषष्ट्यधिकशततमोऽध्यायः ॥ २६७ ॥

२६८

युधिष्ठिर उवाच ।

भ्रातरः पितरः पुत्रा ज्ञातयः सुहृदस्तथा ।
अर्थहेतोर्हताः क्रूरैरस्माभिः पापबुद्धिभिः ॥ १
येयमर्थोद्भवा तृष्णा कथमेतां पितामह ।
निवर्तयेम पापं हि तृष्णया कारिता वयम् ॥ २

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गीतं विदेहराजेन माण्डव्यायानुपृच्छते ॥ ३
सुसुखं बत जीवामि यस्य मे नास्ति किंचन ।
मिथिलायां प्रदीप्तायां न मे दह्यति किंचन ॥ ४
अर्थाः खलु समृद्धा हि बाढं दुःखं विजानताम् ।
असमृद्धास्त्वपि सदा मोहयन्त्यविचक्षणान् ॥ ५
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ ६
यथैव शृङ्गं गोः काले वर्धमानस्य वर्धते ।
तथैव तृष्णा वित्तेन वर्धमानेन वर्धते ॥ ७
किंचिदेव ममत्वेन यदा भवति कल्पितम् ।
तदेव परितापाय नाशे संपद्यते पुनः ॥ ८
न कामाननुरुध्येत दुःखं कामेषु वै रतिः ।
प्राप्यार्थमुपयुञ्जीत धर्मं कामं विवर्जयेत् ॥ ९
विद्वान्सर्वेषु भूतेषु व्याघ्रमांसोपमो भवेत् ।
कृतकृत्यो विशुद्धात्मा सर्वं त्यजति वै सह ॥ १०
उभे सत्यानृते त्यक्त्वा शोकानन्दौ प्रियाप्रिये ।
भयाभये च संत्यज्य संप्रशान्तो निरामयः ॥ ११
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥
चारित्रमात्मनः पश्यंश्चन्द्रशुद्धमनामयम् ।
धर्मात्मा लभते कीर्तिं प्रेत्य चेह यथासुखम् ॥१३
राज्ञस्तद्वचनं श्रुत्वा प्रीतिमानभवद्द्विजः ।
पूजयित्वा च तद्वाक्यं माण्डव्यो मोक्षमाश्रितः ॥१४

इति श्रीमहाभारते शान्तिपर्वणि
अष्टषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६८ ॥

२६९

युधिष्ठिर उवाच ।

किंशीलः किंसमाचारः किंविद्यः किंपरायणः ।
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ १

भीष्म उवाच ।

मोक्षधर्मेषु निरतो लघ्वाहारो जितेन्द्रियः ।
प्राप्नोति परमं स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ २
स्वगृहादभिनिःसृत्य लाभालाभे समो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ३
न चक्षुषा न मनसा न वाचा दूषयेदपि ।
न प्रत्यक्षं परोक्षं वा दूषणं व्याहरेत्क्वचित् ॥ ४
न हिंस्यात्सर्वभूतानि मैत्रायणगतिश्चरेत् ।
नेदं जीवितमासाद्य वैरं कुर्वीत केनचित् ॥ ५
अतिवादांस्तितिक्षेत नाभिमन्येत्कथंचन ।

क्रोध्यमानः प्रियं ब्रूयादाक्रुष्टः कुशलं वदेत् ॥ ६
प्रदक्षिणं प्रसव्यं च ग्राममध्ये न चाचरेत् ।
भैक्षचर्यामनापन्नो न गच्छेत्पूर्वकेतितः ॥ ७
अवकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं वदेत् ।
मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्यादरोषणः ॥ ८
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीते पात्रसंचारे भिक्षां लिप्सेत वै मुनिः ॥ ९
अनुयात्रिकमर्थस्य मात्रालाभेष्वनादृतः ।
अलाभे न विहन्येत लाभश्चैनं न हर्षयेत् ॥ १०
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः ।
अभिपूजितलाभं हि जुगुप्सेतैव तादृशः ॥ ११
न चान्नदोषान्निन्देत न गुणानभिपूजयेत् ।
शय्यासने विविक्ते च नित्यमेवाभिपूजयेत् ॥ १२
शून्यागारं वृक्षमूलमरण्यमथ वा गुहाम् ।
अज्ञातचर्यां गत्वान्यां ततोऽन्यत्रैव संविशेत् ॥ १३
अनुरोधविरोधाभ्यां समः स्यादचलो ध्रुवः ।
सुकृतं दुष्कृतं चोभे नानुरुध्येत कर्मणि ॥ १४
वाचो वेगं मनसः क्रोधवेगं
विवित्सावेगमुदरोपस्थवेगम् ।
एतान्वेगान्विनयेद्वै तपस्वी
निन्दा चास्य हृदयं नोपहन्यात् ॥ १५
मध्यस्थ एव तिष्ठेत प्रशंसानिन्दयोः समः ।
एतत्पवित्रं परमं परिव्राजक आश्रमे ॥ १६
महात्मा सुव्रतो दान्तः सर्वत्रैवानपाश्रितः ।
अपूर्वचारकः सौम्यो अनिकेतः समाहितः ॥ १७
वानप्रस्थगृहस्थानां न संसृज्येत कर्हिचित् ।
अज्ञातलिप्सां लिप्सेत न चैनं हर्ष आविशेत् ॥
विजानतां मोक्ष एष श्रमः स्यादविजानताम् ।
मोक्षयानमिदं कृत्स्नं विदुषां हारितोऽब्रवीत् ॥१९
अभयं सर्वभूतेभ्यो दत्त्वा यः प्रव्रजेद्गृहात् ।
लोकास्तेजोमयास्तस्य तथानन्त्याय कल्पते ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि
एकोनसप्तत्यधिकद्विशततमोऽध्यायः ॥ २६९ ॥

२७०

युधिष्ठिर उवाच ।

धन्या धन्या इति जनाः सर्वेऽस्मान्प्रवदन्त्युत ।
न दुःखिततरः कश्चित्पुमानस्माभिरस्ति ह ॥ १
लोकसंभावितैर्दुःखं यत्प्राप्तं कुरुसत्तम ।
प्राप्य जातिं मनुष्येषु देवैरपि पितामह ॥ २
कदा वयं करिष्यामः संन्यासं दुःखसंज्ञकम् ।
दुःखमेतच्छरीराणां धारणं कुरुसत्तम ॥ ३
विमुक्ताः सप्तदशभिर्हेतुभूतैश्च पञ्चभिः ।
इन्द्रियार्थैर्गुणैश्चैव अष्टाभिः प्रपितामह ॥ ४
न गच्छन्ति पुनर्भावं मुनयः संशितव्रताः ।
कदा वयं भविष्यामो राज्यं हित्वा परंतप ॥ ५

भीष्म उवाच ।

नास्त्यनन्तं महाराज सर्वं संख्यानगोचरम् ।
पुनर्भावोऽपि संख्यातो नास्ति किंचिदिहाचलम् ॥
न चापि गम्यते राजन्नैष दोषः प्रसङ्गतः ।
उद्योगादेव धर्मज्ञ कालेनैव गमिष्यथ ॥ ७
ईशोऽयं सततं देही नृपते पुण्यपापयोः ।
तत एव समुत्थेन तमसा रुध्यतेऽपि च ॥ ८
यथाञ्जनमयो वायुः पुनर्मानःशिलं रजः ।
अनुप्रविश्य तद्वर्णो दृश्यते रञ्जयन्दिशः ॥ ९
तथा कर्मफलैर्देही रञ्जितस्तमसावृतः ।
विवर्णो वर्णमाश्रित्य देहेषु परिवर्तते ॥ १०
ज्ञानेन हि यदा जन्तुरज्ञानप्रभवं तमः ।
व्यपोहति तदा ब्रह्म प्रकाशेत सनातनम् ॥ ११
अयत्नसाध्यं मुनयो वदन्ति
ये चापि मुक्तास्त उपासितव्याः ।

त्वया च लोकेन च सामरेण
तस्मान्न शाम्यन्ति महर्षिसंघाः ॥ १२
अस्मिन्नर्थे पुरा गीतं शृणुष्वैकमना नृप ।
यथा दैत्येन वृत्रेण भ्रष्टैश्वर्येण चेष्टितम् ॥ १३
निर्जितेनासहायेन हृतराज्येन भारत ।
अशोचता शत्रुमध्ये बुद्धिमास्थाय केवलाम् ॥ १४
भ्रष्टैश्वर्यं पुरा वृत्रमुशना वाक्यमब्रवीत् ।
कच्चित्पराजितस्याद्य न व्यथा तेऽस्ति दानव ॥१५

वृत्र उवाच ।

सत्येन तपसा चैव विदित्वा संक्षयं ह्यहम् ।
न शोचामि न हृष्यामि भूतानामागतिं गतिम् ॥
कालसंचोदिता जीवा मज्जन्ति नरकेऽवशाः ।
परिदृष्टानि सर्वाणि दिव्यान्याहुर्मनीषिणः ॥ १७
क्षपयित्वा तु तं कालं गणितं कालचोदिताः ।
सावशेषेण कालेन संभवन्ति पुनः पुनः ॥ १८
तिर्यग्योनिसहस्राणि गत्वा नरकमेव च ।
निर्गच्छन्त्यवशा जीवाः कालबन्धनबन्धनाः ॥ १९
एवं संसरमाणानि जीवान्यहमदृष्टवान् ।
यथा कर्म तथा लाभ इति शास्त्रनिदर्शनम् ॥ २०
तिर्यग्गच्छन्ति नरकं मानुष्यं दैवमेव च ।
सुखदुःखे प्रियद्वेष्ये चरित्वा पूर्वमेव च ॥ २१
कृतान्तविधिसंयुक्तं सर्वलोकः प्रपद्यते ।
गतं गच्छन्ति चाध्वानं सर्वभूतानि सर्वदा ॥ २२

भीष्म उवाच ।

कालसंख्यानसंख्यातं सृष्टिस्थितिपरायणम् ।
तं भाषमाणं भगवानुशना प्रत्यभाषत ।
भीमान्दुष्टप्रलापांस्त्वं तात कस्मात्प्रभाषसे ॥ २३

वृत्र उवाच ।

प्रत्यक्षमेतद्भवतस्तथान्येषां मनीषिणाम् ।
मया यज्जयलुब्धेन पुरा तप्तं महत्तपः ॥ २४
गन्धानादाय भूतानां रसांश्च विविधानपि ।
अवर्धं त्रीन्समाक्रम्य लोकान्वै स्वेन तेजसा ॥ २५
ज्वालामालापरिक्षिप्तो वैहायसचरस्तथा ।
अजेयः सर्वभूतानामासं नित्यमपेतभीः ॥ २६
ऐश्वर्यं तपसा प्राप्तं भ्रष्टं तच्च स्वकर्मभिः ।
धृतिमास्थाय भगवन्न शोचामि ततस्त्वहम् ॥ २७
युयुत्सता महेन्द्रेण पुरा सार्धं महात्मना ।
ततो मे भगवान्दृष्टो हरिर्नारायणः प्रभुः ॥ २८
वैकुण्ठः पुरुषो विष्णुः शुक्लोऽनन्तः सनातनः ।
मुञ्जकेशो हरिश्मश्रुः सर्वभूतपितामहः ॥ २९
नूनं तु तस्य तपसः सावशेषं ममास्ति वै ।
यदहं प्रष्टुमिच्छामि भवन्तं कर्मणः फलम् ॥ ३०
ऐश्वर्यं वै महद्ब्रह्मन्कस्मिन्वर्णे प्रतिष्ठितम् ।
निवर्तते चापि पुनः कथमैश्वर्यमुत्तमम् ॥ ३१
कस्माद्भूतानि जीवन्ति प्रवर्तन्तेऽथ वा पुनः ।
किं वा फलं परं प्राप्य जीवस्तिष्ठति शाश्वतः ॥३२
केन वा कर्मणा शक्यमथ ज्ञानेन केन वा ।
ब्रह्मर्षे तत्फलं प्राप्तुं तन्मे व्याख्यातुमर्हसि ॥ ३३
इतीदमुक्तः स मुनिस्तदानीं
प्रत्याह यत्तच्छृणु राजसिंह ।
मयोच्यमानं पुरुषर्षभ त्व-
मनन्यचित्तः सह सोदरीयैः ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि
सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७० ॥

२७१

उशनोवाच ।

नमस्तस्मै भगवते देवाय प्रभविष्णवे ।
यस्य पृथ्वीतलं तात साकाशं बाहुगोचरम् ॥ १
मूर्धा यस्य त्वनन्तं च स्थानं दानवसत्तम ।
तस्याहं ते प्रवक्ष्यामि विष्णोर्माहात्म्यमुत्तमम् ॥ २

भीष्म उवाच ।

तयोः संवदतोरेवमाजगाम महामुनिः ।
सनत्कुमारो धर्मात्मा संशयच्छेदनाय वै ॥ ३
स पूजितोऽसुरेन्द्रेण मुनिनोशनसा तथा ।
निषसादासने राजन्महार्हे मुनिपुंगवः ॥ ४
तमासीनं महाप्राज्ञमुशना वाक्यमब्रवीत् ।
ब्रूह्यस्मै दानवेन्द्राय विष्णोर्माहात्म्यमुत्तमम् ॥ ५
सनत्कुमारस्तु ततः श्रुत्वा प्राह वचोऽर्थवत् ।
विष्णोर्माहात्म्यसंयुक्तं दानवेन्द्राय धीमते ॥ ६
शृणु सर्वमिदं दैत्य विष्णोर्माहात्म्यमुत्तमम् ।
विष्णौ जगत्स्थितं सर्वमिति विद्धि परंतप ॥ ७
सृजत्येष महाबाहो भूतग्रामं चराचरम् ।
एष चाक्षिपते काले काले विसृजते पुनः ।
अस्मिन्गच्छन्ति विलयमस्माच्च प्रभवन्त्युत ॥ ८
नैष दानवता शक्यस्तपसा नैव चेज्यया ।
संप्राप्तुमिन्द्रियाणां तु संयमेनैव शक्यते ॥ ९
बाह्ये चाभ्यन्तरे चैव कर्मणा मनसि स्थितः ।
निर्मलीकुरुते बुद्ध्या सोऽमुत्रानन्त्यमश्नुते ॥ १०
यथा हिरण्यकर्ता वै रूपमग्नौ विशोधयेत् ।
बहुशोऽतिप्रयत्नेन महतात्मकृतेन ह ॥ ११
तद्वज्जातिशतैर्जीवः शुध्यतेऽल्पेन कर्मणा ।
यत्नेन महता चैवाप्येकजातौ विशुध्यते ॥ १२
लीलयाल्पं यथा गात्रात्प्रमृज्यादात्मनो रजः ।
बहु यत्नेन महता दोषनिर्हरणं तथा ॥ १३
यथा चाल्पेन माल्येन वासितं तिलसर्षपम् ।
न मुञ्चति स्वकं गन्धं तद्वत्सूक्ष्मस्य दर्शनम् ॥ १४
तदेव बहुभिर्माल्यैर्वास्यमानं पुनः पुनः ।
विमुञ्चति स्वकं गन्धं माल्यगन्धेऽवतिष्ठति ॥ १५
एवं जातिशतैर्युक्तो गुणैरेव प्रसङ्गिषु ।
बुद्ध्या निवर्तते दोषो यत्नेनाभ्यासजेन वै ॥ १६
कर्मणा स्वेन रक्तानि विरक्तानि च दानव ।
यथा कर्मविशेषांश्च प्राप्नुवन्ति तथा शृणु ॥ १७
यथा च संप्रवर्तन्ते यस्मिंस्तिष्ठन्ति वा विभो ।
तत्तेऽनुपूर्व्या व्याख्यास्ये तदिहैकमनाः शृणु ॥१८
अनादिनिधनः श्रीमान्हरिर्नारायणः प्रभुः ।
स वै सृजति भूतानि स्थावराणि चराणि च ॥१९
एष सर्वेषु भूतेषु क्षरश्चाक्षर एव च ।
एकादशविकारात्मा जगत्पिबति रश्मिभिः ॥ २०
पादौ तस्य महीं विद्धि मूर्धानं दिवमेव च ।
बाहवस्तु दिशो दैत्य श्रोत्रमाकाशमेव च ॥ २१
तस्य तेजोमयः सूर्यो मनश्चन्द्रमसि स्थितम् ।
बुद्धिर्ज्ञानगता नित्यं रसस्त्वप्सु प्रवर्तते ॥ २२
भ्रुवोरनन्तरास्तस्य ग्रहा दानवसत्तम ।
नक्षत्रचक्रं नेत्राभ्यां पादयोर्भूश्च दानव ॥ २३
रजस्तमश्च सत्त्वं च विद्धि नारायणात्मकम् ।
सोऽऽश्रमाणां मुखं तात कर्मणस्तत्फलं विदुः ॥२४
अकर्मणः फलं चैव स एव परमव्ययः ।
छन्दांसि तस्य रोमाणि अक्षरं च सरस्वती ॥ २५
बह्वाश्रयो बहुमुखो धर्मो हृदि समाश्रितः ।
स ब्रह्मपरमो धर्मस्तपश्च सदसच्च सः ॥ २६
श्रुतिशास्त्रग्रहोपेतः षोडशर्त्विक्क्रतुश्च सः ।
पितामहश्च विष्णुश्च सोऽश्विनौ स पुरंदरः ॥ २७
मित्रश्च वरुणश्चैव यमोऽथ धनदस्तथा ।
ते पृथग्दर्शनास्तस्य संविदन्ति तथैकताम् ।
एकस्य विद्धि देवस्य सर्वं जगदिदं वशे ॥ २८
नानाभूतस्य दैत्येन्द्र तस्यैकत्वं वदत्ययम् ।
जन्तुः पश्यति ज्ञानेन ततः सत्त्वं प्रकाशते ॥ २९
संहारविक्षेपसहस्रकोटी-
स्तिष्ठन्ति जीवाः प्रचरन्ति चान्ये ।
प्रजाविसर्गस्य च पारिमाण्यं

वापीसहस्राणि बहूनि दैत्य ॥ ३०
वाप्यः पुनर्योजनविस्तृतास्ताः
क्रोशं च गम्भीरतयावगाढाः ।
आयामतः पञ्चशताश्च सर्वाः
प्रत्येकशो योजनतः प्रवृद्धाः ॥ ३१
वाप्या जलं क्षिप्यति वालकोट्या
त्वह्ना सकृच्चाप्यथ न द्वितीयम् ।
तासां क्षये विद्धि कृतं विसर्गं
संहारमेकं च तथा प्रजानाम् ॥ ३२
षड्जीववर्णाः परमं प्रमाणं
कृष्णो धूम्रो नीलमथास्य मध्यम् ।
रक्तं पुनः सह्यतरं सुखं तु
हारिद्रवर्णं सुसुखं च शुक्लम् ॥ ३३
परं तु शुक्लं विमलं विशोकं
गतक्लमं सिध्यति दानवेन्द्र ।
गत्वा तु योनिप्रभवानि दैत्य
सहस्रशः सिद्धिमुपैति जीवः ॥ ३४
गतिं च यां दर्शनमाह देवो
गत्वा शुभं दर्शनमेव चाह ।
गतिः पुनर्वर्णकृता प्रजानां
वर्णस्तथा कालकृतोऽसुरेन्द्र ॥ ३५
शतं सहस्राणि चतुर्दशेह
परा गतिर्जीवगुणस्य दैत्य ।
आरोहणं तत्कृतमेव विद्धि
स्थानं तथा निःसरणं च तेषाम् ॥ ३६
कृष्णस्य वर्णस्य गतिर्निकृष्टा
स मज्जते नरके पच्यमानः ।
स्थानं तथा दुर्गतिभिस्तु तस्य
प्रजाविसर्गान्सुबहून्वदन्ति ॥ ३७
शतं सहस्राणि ततश्चरित्वा
प्राप्नोति वर्णं हरितं तु पश्चात् ।
स चैव तस्मिन्निवसत्यनीशो
युगक्षये तमसा संवृतात्मा ॥ ३८
स वै यदा सत्त्वगुणेन युक्त-
स्तमो व्यपोहन्घटते स्वबुद्ध्या
स लोहितं वर्णमुपैति नीलो
मनुष्यलोके परिवर्तते च ॥ ३९
स तत्र संहारविसर्गमेव
स्वकर्मजैर्बन्धनैः क्लिश्यमानः ।
ततः स हारिद्रमुपैति वर्णं
संहारविक्षेपशते व्यतीते ॥ ४०
हारिद्रवर्णस्तु प्रजाविसर्गा-
न्सहस्रशस्तिष्ठति संचरन्वै ।
अविप्रमुक्तो निरये च दैत्य
ततः सहस्राणि दशापराणि ॥ ४१
गतीः सहस्राणि च पञ्च तस्य
चत्वारि संवर्तकृतानि चैव ।
विमुक्तमेनं निरयाच्च विद्धि
सर्वेषु चान्येषु च संभवेषु ॥ ४२
स देवलोके विहरत्यभीक्ष्णं
ततश्च्युतो मानुषतामुपैति ।
संहारविक्षेपशतानि चाष्टौ
मर्त्येषु तिष्ठन्नमृतत्वमेति ॥ ४३
सोऽस्मादथ भ्रश्यति कालयोगा-
त्कृष्णे तले तिष्ठति सर्वकष्टे ।
यथा त्वयं सिध्यति जीवलोक-
स्तत्तेऽभिधास्याम्यसुरप्रवीर ॥ ४४
दैवानि स व्यूहशतानि सप्त
रक्तो हरिद्रोऽथ तथैव शुक्लः ।
संश्रित्य संधावति शुक्लमेत-

मय्यापरानर्च्यतमान्स लोकान् ॥ ४५
अष्टौ च षष्टिं च शतानि यानि
मनोविरुद्धानि महाद्युतीनाम् ।
शुक्लस्य वर्णस्य परा गतिर्या
त्रीण्येव रुद्धानि महानुभाव ॥ ४६
संहारविक्षेपमनिष्टमेकं
चत्वारि चान्यानि वसत्यनीशः ।
षष्ठस्य वर्णस्य परा गतिर्या
सिद्धा विशिष्टस्य गतक्लमस्य ॥ ४७
सप्तोत्तरं तेषु वसत्यनीशः
संहारविक्षेपशतं सशेषम् ।
तस्मादुपावृत्य मनुष्यलोके
ततो महान्मानुषतामुपैति ॥ ४८
तस्मादुपावृत्य ततः क्रमेण
सोऽग्रे स्म संतिष्ठति भूतसर्गम् ।
स सप्तकृत्वश्च परैति लोका-
न्संहारविक्षेपकृतप्रवासः ॥ ४९
सप्तैव संहारमुपप्लवानि
संभाव्य संतिष्ठति सिद्धलोके ।
ततोऽव्ययं स्थानमनन्तमेति
देवस्य विष्णोरथ ब्रह्मणश्च ।
शेषस्य चैवाथ नरस्य चैव
देवस्य विष्णोः परमस्य चैव ॥ ५०
संहारकाले परिदग्धकाया
ब्रह्माणमायान्ति सदा प्रजा हि ।
चेष्टात्मनो देवगणाश्च सर्वे
ये ब्रह्मलोकादमराः स्म तेऽपि ॥ ५१
प्रजाविसर्गं तु सशेषकालं
स्थानानि स्वान्येव सरन्ति जीवाः ।
निःशेषाणां तत्पदं यान्ति चान्ते
सर्वापदा ये सदृशा मनुष्याः ॥ ५२
ये तु च्युताः सिद्धलोकात्क्रमेण
तेषां गतिं यान्ति तथानुपूर्व्या ।
जीवाः परे तद्बलवेषरूपा
विधिं स्वकं यान्ति विपर्ययेण ॥ ५३
स यावदेवास्ति सशेषभुक्ते
प्रजाश्च देव्यौ च तथैव शुक्ले ।
तावत्तदा तेषु विशुद्धभावः
संयम्य पञ्चेन्द्रियरूपमेतत् ॥ ५४
शुद्धां गतिं तां परमां परैति
शुद्धेन नित्यं मनसा विचिन्वन् ।
ततोऽव्ययं स्थानमुपैति ब्रह्म
दुष्प्रापमभ्येति स शाश्वतं वै ।
इत्येतदाख्यातमहीनसत्त्व
नारायणस्येह बलं मया ते ॥ ५५

वृत्र उवाच ।

एवं गते मे न विषादोऽस्ति कश्चि-
त्सम्यक्च पश्यामि वचस्तवैतत् ।
श्रुत्वा च ते वाचमदीनसत्त्व
विकल्मषोऽस्म्यद्य तथा विपाप्मा ॥ ५६
प्रवृत्तमेतद्भगवन्महर्षे
महाद्युतेश्चक्रमनन्तवीर्यम् ।
विष्णोरनन्तस्य सनातनं त-
त्स्थानं सर्गा यत्र सर्वे प्रवृत्ताः ।
स वै महात्मा पुरुषोत्तमो वै
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितम् ॥ ५७

भीष्म उवाच ।

एवमुक्त्वा स कौन्तेय वृत्रः प्राणानवासृजत् ।
योजयित्वा तथात्मानं परं स्थानमवाप्तवान् ॥ ५८

युधिष्ठिर उवाच ।
अयं स भगवान्देवः पितामह जनार्दनः ।
सनत्कुमारो वृत्राय यत्तदाख्यातवान्पुरा ॥ ५९
भीष्म उवाच ।
मूलस्थायी स भगवान्स्वेनानन्तेन तेजसा ।
तत्स्थः सृजति तान्भावान्नानारूपान्महातपाः ॥ ६०
तुरीयार्धेन तस्येमं विद्धि केशवमच्युतम् ।
तुरीयार्धेन लोकांस्त्रीन्भावयत्येष बुद्धिमान् ॥ ६१
अर्वाक्स्थितस्तु यः स्थायी कल्पान्ते परिवर्तते ।
स शेते भगवानप्सु योऽसावतिबलः प्रभुः ।
तान्विधाता प्रसन्नात्मा लोकांश्चरति शाश्वतान् ॥६२
सर्वाण्यशून्यानि करोत्यनन्तः
सनत्कुमारः संचरते च लोकान् ।
न चानिरुद्धः सृजते महात्मा
तत्स्थं जगत्सर्वमिदं विचित्रम् ॥ ६३
युधिष्ठिर उवाच ।
वृत्रेण परमार्थज्ञ दृष्टा मन्येऽऽत्मनो गतिः ।
शुभा तस्मात्स सुखितो न शोचति पितामह ॥६४
शुक्लः शुक्लाभिजातीयः साध्यो नावर्ततेऽनघ ।
तिर्यग्गतेश्च निर्मुक्तो निरयाच्च पितामह ॥ ६५
हारिद्रवर्णे रक्ते वा वर्तमानस्तु पार्थिव ।
तिर्यगेवानुपश्येत कर्मभिस्तामसैर्वृतः ॥ ६६
वयं तु भृशमापन्ना रक्ताः कष्टमुखेऽसुखे ।
कां गतिं प्रतिपत्स्यामो नीलां कृष्णाधमामथ ॥६७
भीष्म उवाच ।
शुद्धाभिजनसंपन्नाः पाण्डवाः संशितव्रताः ।
विहृत्य देवलोकेषु पुनर्मानुष्यमेष्यथ ॥ ६८
प्रजाविसर्गं च सुखेन काले
प्रत्येत्य देवेषु सुखानि भुक्त्वा ।
सुखेन संयास्यथ सिद्धसंख्यां
मा वो भयं भूद्विमलाः स्थ सर्वे ॥ ६९

इति श्रीमहाभारते शान्तिपर्वणि
एकसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७१ ॥

२७२

युधिष्ठिर उवाच ।
अहो धर्मिष्ठता तात वृत्रस्यामिततेजसः ।
यस्य विज्ञानमतुलं विष्णोर्भक्तिश्च तादृशी ॥ १
दुर्विज्ञेयमिदं तात विष्णोरमिततेजसः ।
कथं वा राजशार्दूल पदं तज्ज्ञातवानसौ ॥ २
भवता कथितं ह्येतच्छ्रद्दधे चाहमच्युत ।
भूयस्तु मे समुत्पन्ना बुद्धिरव्यक्तदर्शनात् ॥ ३
कथं विनिहतो वृत्रः शक्रेण भरतर्षभ ।
धर्मिष्ठो विष्णुभक्तश्च तत्त्वज्ञश्च पदान्वये ॥ ४
एतन्मे संशयं ब्रूहि पृच्छतो भरतर्षभ ।
वृत्रस्तु राजशार्दूल यथा शक्रेण निर्जितः ॥ ५
यथा चैवाभवद्युद्धं तच्चाचक्ष्व पितामह ।
विस्तरेण महाबाहो परं कौतूहलं हि मे ॥ ६
भीष्म उवाच ।
रथेनेन्द्रः प्रयातो वै सार्धं सुरगणैः पुरा ।
ददर्शाथाग्रतो वृत्रं विष्ठितं पर्वतोपमम् ॥ ७
योजनानां शतान्यूर्ध्वं पञ्चोच्छ्रितमरिंदम ।
शतानि विस्तरेणाथ त्रीण्येवाभ्यधिकानि तु ॥ ८
तत्प्रेक्ष्य तादृशं रूपं त्रैलोक्येनापि दुर्जयम् ।
वृत्रस्य देवाः संत्रस्ता न शान्तिमुपलेभिरे ॥ ९
शक्रस्य तु तदा राजन्नूरुस्तम्भो व्यजायत ।
भयाद्वृत्रस्य सहसा दृष्ट्वा तद्रूपमुत्तमम् ॥ १०
ततो नादः समभवद्वादित्राणां च निस्वनः ।
देवासुराणां सर्वेषां तस्मिन्युद्ध उपस्थिते ॥ ११
अथ वृत्रस्य कौरव्य दृष्ट्वा शक्रमुपस्थितम् ।
न संभ्रमो न भीः काचिदास्था वा समजायत ॥१२

ततः समभवद्युद्धं त्रैलोक्यस्य भयंकरम् ।
शक्रस्य च सुरेन्द्रस्य वृत्रस्य च महात्मनः ॥ १३
असिभिः पट्टिशैः शूलैः शक्तितोमरमुद्गरैः ।
शिलाभिर्विविधाभिश्च कार्मुकैश्च महास्वनैः ॥ १४
अस्त्रैश्च विविधैर्दिव्यैः पावकोल्काभिरेव च ।
देवासुरैस्ततः सैन्यैः सर्वमासीत्समाकुलम् ॥ १५
पितामहपुरोगाश्च सर्वे देवगणास्तथा ।
ऋषयश्च महाभागास्तद्युद्धं द्रष्टुमागमन् ॥ १६
विमानाग्र्यैर्महाराज सिद्धाश्च भरतर्षभ ।
गन्धर्वाश्च विमानाग्र्यैरप्सरोभिः समागमन् ॥ १७
ततोऽन्तरिक्षमावृत्य वृत्रो धर्मभृतां वरः ।
अश्मवर्षेण देवेन्द्रं पर्वतात्समवाकिरत् ॥ १८
ततो देवगणाः क्रुद्धाः सर्वतः शस्त्रवृष्टिभिः ।
अश्मवर्षमपोहन्त वृत्रप्रेरितमाहवे ॥ १९
वृत्रश्च कुरुशार्दूल महामायो महाबलः ।
मोहयामास देवेन्द्रं मायायुद्धेन सर्वतः ॥ २०
तस्य वृत्रार्दितस्याथ मोह आसीच्छतक्रतोः ।
रथंतरेण तं तत्र वसिष्ठः समबोधयत् ॥ २१

वसिष्ठ उवाच ।

देवश्रेष्ठोऽसि देवेन्द्र सुरारिविनिबर्हण ।
त्रैलोक्यबलसंयुक्तः कस्माच्छक्र विषीदसि ॥ २२
एष ब्रह्मा च विष्णुश्च शिवश्चैव जगत्प्रभुः ।
सोमश्च भगवान्देवः सर्वे च परमर्षयः ॥ २३
मा कार्षीः कश्मलं शक्र कश्चिदेवेतरो यथा ।
आर्यां युद्धे मतिं कृत्वा जहि शत्रुं सुरेश्वर ॥ २४
एष लोकगुरुस्त्र्यक्षः सर्वलोकनमस्कृतः ।
निरीक्षते त्वां भगवांस्त्यज मोहं सुरेश्वर ॥ २५
एते ब्रह्मर्षयश्चैव बृहस्पतिपुरोगमाः ।
स्तवेन शक्र दिव्येन स्तुवन्ति त्वां जयाय वै ॥२६

भीष्म उवाच ।

एवं संबोध्यमानस्य वसिष्ठेन महात्मना ।
अतीव वासवस्यासीद्बलमुत्तमतेजसः ॥ २७
ततो बुद्धिमुपागम्य भगवान्पाकशासनः ।
योगेन महता युक्तस्तां मायां व्यपकर्षत ॥ २८
ततोऽङ्गिरःसुतः श्रीमांस्ते चैव परमर्षयः ।
दृष्ट्वा वृत्रस्य विक्रान्तमुपगम्य महेश्वरम् ।
ऊचुर्वृत्रविनाशार्थं लोकानां हितकाम्यया ॥ २९
ततो भगवतस्तेजो ज्वरो भूत्वा जगत्पतेः ।
समाविशन्महारौद्रं वृत्रं दैत्यवरं तदा ॥ ३०
विष्णुश्च भगवान्देवः सर्वलोकाभिपूजितः ।
ऐन्द्रं समाविशद्वज्रं लोकसंरक्षणे रतः ॥ ३१
ततो बृहस्पतिर्धीमानुपागम्य शतक्रतुम् ।
वसिष्ठश्च महातेजाः सर्वे च परमर्षयः ॥ ३२
ते समासाद्य वरदं वासवं लोकपूजितम् ।
ऊचुरेकाग्रमनसो जहि वृत्रमिति प्रभो ॥ ३३

महेश्वर उवाच ।

एष वृत्रो महाञ्शक्र बलेन महता वृतः ।
विश्वात्मा सर्वगश्चैव बहुमायश्च विश्रुतः ॥ ३४
तदेनमसुरश्रेष्ठं त्रैलोक्येनापि दुर्जयम् ।
जहि त्वं योगमास्थाय मावमंस्थाः सुरेश्वर ॥ ३५
अनेन हि तपस्तप्तं बलार्थममराधिप ।
षष्टिं वर्षसहस्राणि ब्रह्मा चास्मै वरं ददौ ॥ ३६
महत्त्वं योगिनां चैव महामायत्वमेव च ।
महाबलत्वं च तथा तेजश्चाग्र्यं सुरेश्वर ॥ ३७
एतद्वै मामकं तेजः समाविशति वासव ।
वृत्रमेनं त्वमप्येवं जहि वज्रेण दानवम् ॥ ३८

शक्र उवाच ।

भगवंस्त्वत्प्रसादेन दितिजं सुदुरासदम् ।
वज्रेण निहनिष्यामि पश्यतस्ते सुरर्षभ ॥ ३९

भीष्म उवाच ।

आविश्यमाने दैत्ये तु ज्वरेणाथ महासुरे ।
देवतानामृषीणां च हर्षान्नादो महानभूत् ॥ ४०
ततो दुन्दुभयश्चैव शङ्खाश्च सुमहास्वनाः ।
मुरजा डिण्डिमाश्चैव प्रावाद्यन्त सहस्रशः ॥ ४१
असुराणां तु सर्वेषां स्मृतिलोपोऽभवन्महान् ।
प्रज्ञानाशश्च बलवान्क्षणेन समपद्यत ॥ ४२
तमाविष्टमथो ज्ञात्वा ऋषयो देवतास्तथा ।
स्तुवन्तः शक्रमीशानं तथा प्राचोदयन्नपि ॥ ४३
रथस्थस्य हि शक्रस्य युद्धकाले महात्मनः ।
ऋषिभिः स्तूयमानस्य रूपमासीत्सुदुर्दृशम् ॥ ४४

इति श्रीमहाभारते शान्तिपर्वणि
द्विसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७२ ॥

२७३

भीष्म उवाच ।

वृत्रस्य तु महाराज ज्वराविष्टस्य सर्वशः ।
अभवन्यानि लिङ्गानि शरीरे तानि मे शृणु ॥ १
ज्वलितास्योऽभवद्घोरो वैवर्ण्यं चागमत्परम् ।
गात्रकम्पश्च सुमहाञ्श्वासश्चाप्यभवन्महान् ।
रोमहर्षश्च तीव्रोऽभून्निःश्वासश्च महान्नृप ॥ २
शिवा चाशिवसंकाशा तस्य वक्त्रात्सुदारुणा ।
निष्पपात महाघोरा स्मृतिः सा तस्य भारत ।
उल्काश्च ज्वलितास्तस्य दीप्ताः पार्श्वे प्रपेदिरे ॥ ३
गृध्रकङ्कवडाश्चैव वाचोऽमुञ्चन्सुदारुणाः ।
वृत्रस्योपरि संहृष्टाश्चक्रवत्परिबभ्रमुः ॥ ४
ततस्तं रथमास्थाय देवाप्यायितमाहवे ।
वज्रोद्यतकरः शक्रस्तं दैत्यं प्रत्यवैक्षत ॥ ५
अमानुषमथो नादं स मुमोच महासुरः ।
व्यजृम्भत च राजेन्द्र तीव्रज्वरसमन्वितः ।
अथास्य जृम्भतः शक्रस्ततो वज्रमवासृजत् ॥ ६
स वज्रः सुमहातेजाः कालाग्निसदृशोपमः ।
क्षिप्रमेव महाकायं वृत्रं दैत्यमपातयत् ॥ ७
ततो नादः समभवत्पुनरेव समन्ततः ।
वृत्रं विनिहतं दृष्ट्वा देवानां भरतर्षभ ॥ ८
वृत्रं तु हत्वा भगवान्दानवारिर्महायशाः ।
वज्रेण विष्णुयुक्तेन दिवमेव समाविशत् ॥ ९
अथ वृत्रस्य कौरव्य शरीरादभिनिःसृता ।
ब्रह्महत्या महाघोरा रौद्रा लोकभयावहा ॥ १०
करालवदना भीमा विकृता कृष्णपिङ्गला ।
प्रकीर्णमूर्धजा चैव घोरनेत्रा च भारत ॥ ११
कपालमालिनी चैव कृशा च भरतर्षभ ।
रुधिरार्द्रा च धर्मज्ञ चीरवस्त्रनिवासिनी ॥ १२
साभिनिष्क्रम्य राजेन्द्र तादृग्रूपा भयावहा ।
वज्रिणं मृगयामास तदा भरतसत्तम ॥ १३
कस्यचित्त्वथ कालस्य वृत्रहा कुरुनन्दन ।
स्वर्गायाभिमुखः प्रायाल्लोकानां हितकाम्यया ॥ १४
बिसान्निःसरमाणं तु दृष्ट्वा शक्रं महौजसम् ।
कण्ठे जग्राह देवेन्द्रं सुलग्ना चाभवत्तदा ॥ १५
स हि तस्मिन्समुत्पन्ने ब्रह्महत्याकृते भये ।
नलिन्यां बिसमध्यस्थो बभूवाब्दगणान्बहून् ॥ १६
अनुसृत्य तु यत्नात्स तया वै ब्रह्महत्यया ।
तदा गृहीतः कौरव्य निश्चेष्टः समपद्यत ॥ १७
तस्या व्यपोहने शक्रः परं यत्नं चकार ह ।
न चाशकत्तां देवेन्द्रो ब्रह्महत्यां व्यपोहितुम् ॥ १८
गृहीत एव तु तया देवेन्द्रो भरतर्षभ ।
पितामहमुपागम्य शिरसा प्रत्यपूजयत् ॥ १९
ज्ञात्वा गृहीतं शक्रं तु द्विजप्रवरहत्यया ।
ब्रह्मा संचिन्तयामास तदा भरतसत्तम ॥ २०
तामुवाच महाबाहो ब्रह्महत्यां पितामहः ।
स्वरेण मधुरेणाथ सान्त्वयन्निव भारत ॥ २१

मुच्यतां त्रिदशेन्द्रोऽयं मत्प्रियं कुरु भामिनि ।
ब्रूहि किं ते करोम्यद्य कामं कं त्वमिहेच्छसि ॥२२

ब्रह्महत्योवाच ।

त्रिलोकपूजिते देवे प्रीते त्रैलोक्यकर्तरि ।
कृतमेवेह मन्येऽहं निवासं तु विधत्स्व मे ॥ २३
त्वया कृतेयं मर्यादा लोकसंरक्षणार्थिना ।
स्थापना वै सुमहती त्वया देव प्रवर्तिता ॥ २४
प्रीते तु त्वयि धर्मज्ञ सर्वलोकेश्वरे प्रभो ।
शक्रादपगमिष्यामि निवासं तु विधत्स्व मे ॥ २५

भीष्म उवाच ।

तथेति तां प्राह तदा ब्रह्महत्यां पितामहः ।
उपायतः स शक्रस्य ब्रह्महत्यां व्यपोहत ॥ २६
ततः स्वयंभुवा ध्यातस्तत्र वह्निर्महात्मना ।
ब्रह्माणमुपसंगम्य ततो वचनमब्रवीत् ॥ २७
प्राप्तोऽस्मि भगवन्देव त्वत्सकाशमरिंदम ।
यत्कर्तव्यं मया देव तद्भवान्वक्तुमर्हति ॥ २८

ब्रह्मोवाच ।

बहुधा विभजिष्यामि ब्रह्महत्यामिमामहम् ।
शक्रस्याद्य विमोक्षार्थं चतुर्भागं प्रतीच्छ मे ॥ २९

अग्निरुवाच ।

मम मोक्षस्य कोऽन्तो वै ब्रह्मन्ध्यायस्व वै प्रभो ।
एतदिच्छामि विज्ञातुं तत्त्वतो लोकपूजित ॥ ३०

ब्रह्मोवाच ।

यस्त्वां ज्वलन्तमासाद्य स्वयं वै मानवः क्वचित् ।
बीजौषधिरसैर्वह्ने न यक्ष्यति तमोवृतः ॥ ३१
तमेषा यास्यति क्षिप्रं तत्रैव च निवत्स्यति ।
ब्रह्महत्या हव्यवाह व्येतु ते मानसो ज्वरः ॥ ३२

भीष्म उवाच ।

इत्युक्तः प्रतिजग्राह तद्वचो हव्यकव्यभुक् ।
पितामहस्य भगवांस्तथा च तदभूत्प्रभो ॥ ३३
ततो वृक्षौषधितृणं समाहूय पितामहः ।
इममर्थं महाराज वक्तुं समुपचक्रमे ॥ ३४
ततो वृक्षौषधितृणं तथैवोक्तं यथातथम् ।
व्यथितं वह्निवद्राजन्ब्रह्माणमिदमब्रवीत् ॥ ३५
अस्माकं ब्रह्महत्यातो कोऽन्तो लोकपितामह ।
स्वभावनिहतानस्मान्न पुनर्हन्तुमर्हसि ॥ ३६
वयमग्निं तथा शीतं वर्षं च पवनेरितम् ।
सहामः सततं देव तथा छेदनभेदनम् ॥ ३७
ब्रह्महत्यामिमामद्य भवतः शासनाद्वयम् ।
ग्रहीष्यामस्त्रिलोकेश मोक्षं चिन्तयतां भवान् ॥३८

ब्रह्मोवाच ।

पर्वकाले तु संप्राप्ते यो वै छेदनभेदनम् ।
करिष्यति नरो मोहात्तमेषानुगमिष्यति ॥ ३९

भीष्म उवाच ।

ततो वृक्षौषधितृणमेवमुक्तं महात्मना ।
ब्रह्माणमभिसंपूज्य जगामाशु यथागतम् ॥ ४०
आहूयाप्सरसो देवस्ततो लोकपितामहः ।
वाचा मधुरया प्राह सान्त्वयन्निव भारत ॥ ४१
इयमिन्द्रादनुप्राप्ता ब्रह्महत्या वराङ्गनाः ।
चतुर्थमस्या भागं हि मयोक्ताः संप्रतीच्छत ॥४२

अप्सरस ऊचुः ।

ग्रहणे कृतबुद्धीनां देवेश तव शासनात् ।
मोक्षं समयतोऽस्माकं चिन्तयस्व पितामह ॥ ४३

ब्रह्मोवाच ।

रजस्वलासु नारीषु यो वै मैथुनमाचरेत् ।
तमेषा यास्यति क्षिप्रं व्येतु वो मानसो ज्वरः ॥४४

भीष्म उवाच ।

तथेति हृष्टमनस उक्त्वाथाप्सरसां गणाः ।
स्वानि स्थानानि संप्राप्य रेमिरे भरतर्षभ ॥ ४५
ततस्त्रिलोककृद्देवः पुनरेव महातपाः ।

अपः संचिन्तयामास ध्यातास्ताश्चाप्यथागमन् ॥ ४६
तास्तु सर्वाः समागम्य ब्रह्माणममितौजसम् ।
इदमूचुर्वचो राजन्प्रणिपत्य पितामहम् ॥ ४७
इमाः स्म देव संप्राप्तास्त्वत्सकाशमरिंदम ।
शासनात्तव देवेश समाज्ञापय नो विभो ॥ ४८

ब्रह्मोवाच ।

इयं वृत्रादनुप्राप्ता पुरुहूतं महाभया ।
ब्रह्महत्या चतुर्थांशमस्या यूयं प्रतीच्छत ॥ ४९

आप ऊचुः ।

एवं भवतु लोकेश यथा वदसि नः प्रभो ।
मोक्षं समयतोऽस्माकं संचिन्तयितुमर्हसि ॥ ५०
त्वं हि देवेश सर्वस्य जगतः परमो गुरुः ।
कोऽन्यः प्रसादो हि भवेद्यः कृच्छ्रान्नः समुद्धरेत् ॥

ब्रह्मोवाच ।

अल्पा इति मतिं कृत्वा यो नरो बुद्धिमोहितः ।
श्लेष्ममूत्रपुरीषाणि युष्मासु प्रतिमोक्ष्यति ॥ ५२
तमेषा यास्यति क्षिप्रं तत्रैव च निवत्स्यति ।
तथा वो भविता मोक्ष इति सत्यं ब्रवीमि वः ॥

भीष्म उवाच ।

ततो विमुच्य देवेन्द्रं ब्रह्महत्या युधिष्ठिर ।
यथानिसृष्टं तं देशमगच्छद्देवशासनात् ॥ ५४
एवं शक्रेण संप्राप्ता ब्रह्महत्या जनाधिप ।
पितामहमनुज्ञाप्य सोऽश्वमेधमकल्पयत् ॥ ५५
श्रूयते हि महाराज संप्राप्ता वासवेन वै ।
ब्रह्महत्या ततः शुद्धिं हयमेधेन लब्धवान् ॥ ५६
समवाप्य श्रियं देवो हत्वारींश्च सहस्रशः ।
प्रहर्षमतुलं लेभे वासवः पृथिवीपते ॥ ५७
वृत्रस्य रुधिराच्चैव खुखुण्डाः पार्थ जज्ञिरे ।
द्विजातिभिरभक्ष्यास्ते दीक्षितैश्च तपोधनैः ॥ ५८
सर्वावस्थं त्वमप्येषां द्विजातीनां प्रियं कुरु ।
इमे हि भूतले देवाः प्रथिताः कुरुनन्दन ॥ ५९
एवं शक्रेण कौरव्य बुद्धिसौक्ष्म्यान्महासुरः ।
उपायपूर्वं निहतो वृत्रोऽथामिततेजसा ॥ ६०
एवं त्वमपि कौरव्य पृथिव्यामपराजितः ।
भविष्यसि यथा देवः शतक्रतुरमित्रहा ॥ ६१
ये तु शक्रकथां दिव्यामिमां पर्वसु पर्वसु ।
विप्रमध्ये पठिष्यन्ति न ते प्राप्स्यन्ति किल्बिषम् ॥
इत्येतद्वृत्रमाश्रित्य शक्रस्यात्यद्भुतं महत् ।
कथितं कर्म ते तात किं भूयः श्रोतुमिच्छसि ॥६३

इति श्रीमहाभारते शान्तिपर्वणि
त्रिसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७३ ॥

२७४

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
अस्ति वृत्रवधादेव विवक्षा मम जायते ॥ १
ज्वरेण मोहितो वृत्रः कथितस्ते जनाधिप ।
निहतो वासवेनेह वज्रेणेति ममानघ ॥ २
कथमेष महाप्राज्ञ ज्वरः प्रादुरभूत्कुतः ।
ज्वरोत्पत्तिं निपुणतः श्रोतुमिच्छाम्यहं प्रभो ॥ ३

भीष्म उवाच ।

शृणु राजञ्ज्वरस्येह संभवं लोकविश्रुतम् ।
विस्तरं चास्य वक्ष्यामि यादृशं चैव भारत ॥ ४
पुरा मेरोर्महाराज शृङ्गं त्रैलोक्यविश्रुतम् ।
ज्योतिष्कं नाम सावित्रं सर्वरत्नविभूषितम् ।
अप्रमेयमनाधृष्यं सर्वलोकेषु भारत ॥ ५
तत्र देवो गिरितटे हेमधातुविभूषिते ।
पर्यङ्क इव विभ्राजन्नुपविष्टो बभूव ह ॥ ६
शैलराजसुता चास्य नित्यं पार्श्वे स्थिता बभौ ।
तथा देवा महात्मानो वसवश्च महौजसः ॥ ७

तथैव च महात्मानावश्विनौ भिषजां वरौ ।
तथा वैश्रवणो राजा गुह्यकैरभिसंवृतः ॥ ८
यक्षाणामधिपः श्रीमान्कैलासनिलयः प्रभुः ।
अङ्गिरःप्रमुखाश्चैव तथा देवर्षयोऽपरे ॥ ९
विश्वावसुश्च गन्धर्वस्तथा नारदपर्वतौ ।
अप्सरोगणसंघाश्च समाजग्मुरनेकशः ॥ १०
ववौ शिवः सुखो वायुर्नानागन्धवहः शुचिः ।
सर्वर्तुकुसुमोपेताः पुष्पवन्तो महाद्रुमाः ॥ ११
तथा विद्याधराश्चैव सिद्धाश्चैव तपोधनाः ।
महादेवं पशुपतिं पर्युपासन्त भारत ॥ १२
भूतानि च महाराज नानारूपधराण्यथ ।
राक्षसाश्च महारौद्राः पिशाचाश्च महाबलाः ॥ १३
बहुरूपधरा हृष्टा नानाप्रहरणोद्यताः ।
देवस्यानुचरास्तत्र तस्थिरे चानलोपमाः ॥ १४
नन्दी च भगवांस्तत्र देवस्यानुमते स्थितः ।
प्रगृह्य ज्वलितं शूलं दीप्यमानं स्वतेजसा ॥ १५
गङ्गा च सरितां श्रेष्ठा सर्वतीर्थजलोद्भवा ।
पर्युपासत तं देवं रूपिणी कुरुनन्दन ॥ १६
एवं स भगवांस्तत्र पूज्यमानः सुरर्षिभिः ।
देवैश्च सुमहाभागैर्महादेवो व्यतिष्ठत ॥ १७
कस्यचित्त्वथ कालस्य दक्षो नाम प्रजापतिः ।
पूर्वोक्तेन विधानेन यक्ष्यमाणोऽन्वपद्यत ॥ १८
ततस्तस्य मखं देवाः सर्वे शक्रपुरोगमाः ।
गमनाय समागम्य बुद्धिमापेदिरे तदा ॥ १९
ते विमानैर्महात्मानो ज्वलितैर्ज्वलनप्रभाः ।
देवस्यानुमतेऽगच्छन्गङ्गाद्वारमिति श्रुतिः ॥ २०
प्रस्थिता देवता दृष्ट्वा शैलराजसुता तदा ।
उवाच वचनं साध्वी देवं पशुपतिं पतिम् ॥ २१
भगवन्क्व नु यान्त्येते देवाः शक्रपुरोगमाः ।
ब्रूहि तत्त्वेन तत्त्वज्ञ संशयो मे महानयम् ॥ २२

महेश्वर उवाच ।

दक्षो नाम महाभागे प्रजानां पतिरुत्तमः ।
हयमेधेन यजते तत्र यान्ति दिवौकसः ॥ २३

उमा उवाच ।

यज्ञमेतं महाभाग किमर्थं नाभिगच्छसि ।
केन वा प्रतिषेधेन गमनं ते न विद्यते ॥ २४

महेश्वर उवाच ।

सुरैरेव महाभागे सर्वमेतदनुष्ठितम् ।
यज्ञेषु सर्वेषु मम न भाग उपकल्पितः ॥ २५
पूर्वोपायोपपन्नेन मार्गेण वरवर्णिनि ।
न मे सुराः प्रयच्छन्ति भागं यज्ञस्य धर्मतः ॥२६

उमा उवाच ।

भगवन्सर्वभूतेषु प्रभावाभ्यधिको गुणैः ।
अजेयश्चाप्रधृष्यश्च तेजसा यशसा श्रिया ॥ २७
अनेन ते महाभाग प्रतिषेधेन भागतः ।
अतीव दुःखमुत्पन्नं वेपथुश्च ममानघ ॥ २८

भीष्म उवाच ।

एवमुक्त्वा तु सा देवी देवं पशुपतिं पतिम् ।
तूष्णींभूताभवद्राजन्दह्यमानेन चेतसा ॥ २९
अथ देव्या मतं ज्ञात्वा हृद्गतं यच्चिकीर्षितम् ।
स समाज्ञापयामास तिष्ठ त्वमिति नन्दिनम् ॥३०
ततो योगबलं कृत्वा सर्वयोगेश्वरेश्वरः ।
तं यज्ञं सुमहातेजा भीमैरनुचरैस्तदा ।
सहसा घातयामास देवदेवः पिनाकधृक् ॥ ३१
केचिन्नादानमुञ्चन्त केचिद्धासांश्च चक्रिरे ।
रुधिरेणापरे राजंस्तत्राग्निं समवाकिरन् ॥ ३२
केचिद्यूपान्समुत्पाट्य बभ्रमुर्विकृताननाः ।
आस्यैरन्ये चाग्रसन्त तथैव परिचारकान् ॥ ३३
ततः स यज्ञो नृपते वध्यमानः समन्ततः ।
आस्थाय मृगरूपं वै खमेवाभ्यपतत्तदा ॥ ३४

तं तु यज्ञं तथारूपं गच्छन्तमुपलभ्य सः ।
धनुरादाय बाणं च तदान्वसरत प्रभुः ॥ ३५
ततस्तस्य सुरेशस्य क्रोधादमिततेजसः ।
ललाटात्प्रसृतो घोरः स्वेदबिन्दुर्बभूव ह ॥ ३६
तस्मिन्पतितमात्रे तु स्वेदबिन्दौ तथा भुवि ।
प्रादुर्बभूव सुमहानग्निः कालानलोपमः ॥ ३७
तत्र चाजायत तदा पुरुषः पुरुषर्षभ ।
ह्रस्वोऽतिमात्ररक्ताक्षो हरिश्मश्रुर्विभीषणः ॥ ३८
ऊर्ध्वकेशोऽतिलोमाङ्गः श्येनोलूकस्तथैव च ।
करालः कृष्णवर्णश्च रक्तवासास्तथैव च ॥ ३९
तं यज्ञं स महासत्त्वोऽदहत्कक्षमिवानलः ।
देवाश्चाप्यद्रवन्सर्वे ततो भीता दिशो दश ॥ ४०
तेन तस्मिन्विचरता पुरुषेण विशां पते ।
पृथिवी व्यचलद्राजन्नतीव भरतर्षभ ॥ ४१
हाहाभूते प्रवृत्ते तु नादे लोकभयंकरे ।
पितामहो महादेवं दर्शयन्प्रत्यभाषत ॥ ४२
भवतोऽपि सुराः सर्वे भागं दास्यन्ति वै प्रभो ।
क्रियतां प्रतिसंहारः सर्वदेवेश्वर त्वया ॥ ४३
इमा हि देवताः सर्वा ऋषयश्च परंतप ।
तव क्रोधान्महादेव न शान्तिमुपलेभिरे ॥ ४४
यश्चैष पुरुषो जातः स्वेदात्ते विबुधोत्तम ।
ज्वरो नामैष धर्मज्ञ लोकेषु प्रचरिष्यति ॥ ४५
एकीभूतस्य न ह्यस्य धारणे तेजसः प्रभो ।
समर्था सकला पृथ्वी बहुधा सृज्यतामयम् ॥ ४६
इत्युक्तो ब्रह्मणा देवो भागे चापि प्रकल्पिते ।
भगवन्तं तथेत्याह ब्रह्माणममितौजसम् ॥ ४७
परां च प्रीतिमगमदुत्स्मयंश्च पिनाकधृक् ।
अवाप च तदा भागं यथोक्तं ब्रह्मणा भवः ॥ ४८
ज्वरं च सर्वधर्मज्ञो बहुधा व्यसृजत्तदा ।
शान्त्यर्थं सर्वभूतानां शृणु तच्चापि पुत्रक ॥ ४९
शीर्षाभितापो नागानां पर्वतानां शिलाजतुः ।
अपां तु नीलिकां विद्यान्निर्मोकं भुजगेषु च ॥ ५०
खोरकः सौरभेयाणामूषरं पृथिवीतले ।
पशूनामपि धर्मज्ञ दृष्टिप्रत्यवरोधनम् ॥ ५१
रन्ध्रागतमथाश्वानां शिखोद्भेदश्च बर्हिणाम् ।
नेत्ररोगः कोकिलानां ज्वरः प्रोक्तो महात्मना ॥ ५२
अब्जानां पित्तभेदश्च सर्वेषामिति नः श्रुतम् ।
शुकानामपि सर्वेषां हिक्किका प्रोच्यते ज्वरः ॥ ५३
शार्दूलेष्वथ धर्मज्ञ श्रमो ज्वर इहोच्यते ।
मानुषेषु तु धर्मज्ञ ज्वरो नामैष विश्रुतः ।
मरणे जन्मनि तथा मध्ये चाविशते नरम् ॥ ५४
एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ।
नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः ॥ ५५
अनेन हि समाविष्टो वृत्रो धर्मभृतां वरः ।
व्यजृम्भत ततः शक्रस्तस्मै वज्रमवासृजत् ॥ ५६
प्रविश्य वज्रो वृत्रं तु दारयामास भारत ।
दारितश्च स वज्रेण महायोगी महासुरः ।
जगाम परमं स्थानं विष्णोरमिततेजसः ॥ ५७
विष्णुभक्त्या हि तेनेदं जगद्व्याप्तमभूत्पुरा ।
तस्माच्च निहतो युद्धे विष्णोः स्थानमवाप्तवान् ॥ ५८
इत्येष वृत्रमाश्रित्य ज्वरस्य महतो मया ।
विस्तरः कथितः पुत्र किमन्यत्प्रब्रवीमि ते ॥ ५९

इमां ज्वरोत्पत्तिमदीनमानसः
पठेत्सदा यः सुसमाहितो नरः ।
विमुक्तरोगः स सुखी मुदा युतो
लभेत कामान्स यथामनीषितान् ॥ ६०

इति श्रीमहाभारते शान्तिपर्वणि
चतुःसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७४ ॥

२७५

युधिष्ठिर उवाच ।

शोकादुःखाच्च मृत्योश्च त्रस्यन्ति प्राणिनः सदा ।
उभयं मे यथा न स्यात्तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं समङ्गस्य च भारत ॥ २

नारद उवाच ।

उरसेव प्रणमसे बाहुभ्यां तरसीव च ।
संप्रहृष्टमना नित्यं विशोक इव लक्ष्यसे ॥ ३
उद्वेगं नेह ते किंचित्सुसूक्ष्ममपि लक्षये ।
नित्यतृप्त इव स्वस्थो बालवच्च विचेष्टसे ॥ ४

समङ्ग उवाच ।

भूतं भव्यं भविष्यच्च सर्वं सत्त्वेषु मानद ।
तेषां तत्त्वानि जानामि ततो न विमना ह्यहम् ॥५
उपक्रमानहं वेद पुनरेव फलोदयान् ।
लोके फलानि चित्राणि ततो न विमना ह्यहम् ॥६
अगाधाश्चाप्रतिष्ठाश्च गतिमन्तश्च नारद ।
अन्धा जडाश्च जीवन्ति पश्यास्मानपि जीवतः ॥७
विहितेनैव जीवन्ति अरोगाङ्गा दिवौकसः ।
बलवन्तोऽबलाश्चैव तद्वदस्मान्सभाजय ॥ ८
सहस्रिणश्च जीवन्ति जीवन्ति शतिनस्तथा ।
शाकेन चान्ये जीवन्ति पश्यास्मानपि जीवतः ॥९
यदा न शोचेमहि किं नु न स्या-
द्धर्मेण वा नारद कर्मणा वा ।
कृतान्तवश्यानि यदा सुखानि
दुःखानि वा यन्न विवर्धयन्ति ॥ १०
यस्मै प्रज्ञां कथयन्ते मनुष्याः
प्रज्ञामूलो हीन्द्रियाणां प्रसादः ।
मुह्यन्ति शोचन्ति यदेन्द्रियाणि
प्रज्ञालाभो नास्ति मूढेन्द्रियस्य ॥ ११
मूढस्य दर्पः स पुनर्मोह एव
मूढस्य नायं न परोऽस्ति लोकः ।
न ह्येव दुःखानि सदा भवन्ति
सुखस्य वा नित्यशो लाभ एव ॥ १२
भावात्मकं संपरिवर्तमानं
न मादृशः संज्वरं जातु कुर्यात् ।
इष्टान्भोगान्नानुरुध्येत्सुखं वा
न चिन्तयेद्दुःखमभ्यागतं वा ॥ १३
समाहितो न स्पृहयेत्परेषां
नानागतं नाभिनन्देत लाभम् ।
न चापि हृष्येद्विपुलेऽर्थलाभे
तथार्थनाशे च न वै विषीदेत् ॥ १४
न बान्धवा न च वित्तं न कौली
न च श्रुतं न च मन्त्रा न वीर्यम् ।
दुःखात्त्रातुं सर्व एवोत्सहन्ते
परत्र शीले न तु यान्ति शान्तिम् ॥ १५
नास्ति बुद्धिरयुक्तस्य नायोगाद्विद्यते सुखम् ।
धृतिश्च दुःखत्यागश्चाप्युभयं न सुखोदयम् ॥ १६
प्रियं हि हर्षजननं हर्ष उत्सेकवर्धनः ।
उत्सेको नरकायैव तस्मात्तं संत्यजाम्यहम् ॥ १७
एताञ्शोकभयोत्सेकान्मोहनान्सुखदुःखयोः ।
पश्यामि साक्षिवल्लोके देहस्यास्य विचेष्टनात् ॥१८
अर्थकामौ परित्यज्य विशोको विगतज्वरः ।
तृष्णामोहौ तु संत्यज्य चरामि पृथिवीमिमाम् ॥१९
न मृत्युतो न चाधर्मान्न लोभान्न कुतश्चन ।
पीतामृतस्येवात्यन्तमिह चामुत्र वा भयम् ॥ २०
एतद्ब्रह्मन्विजानामि महत्कृत्वा तपोऽव्ययम् ।

तेन नारद संप्राप्तो न मां शोकः प्रबाधते ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७५॥

२७६

युधिष्ठिर उवाच ।

अतत्त्वज्ञस्य शास्त्राणां सततं संशयात्मनः ।
अकृतव्यवसायस्य श्रेयो ब्रूहि पितामह ॥ १

भीष्म उवाच ।

गुरुपूजा च सततं वृद्धानां पर्युपासनम् ।
श्रवणं चैव विद्यानां कूटस्थं श्रेय उच्यते ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गालवस्य च संवादं देवर्षेर्नारदस्य च ॥ ३
वीतमोहक्लमं विप्रं ज्ञानतृप्तं जितेन्द्रियम् ।
श्रेयस्कामं जितात्मानं नारदं गालवोऽब्रवीत् ॥ ४
यैः कैश्चित्संमतो लोके गुणैस्तु पुरुषो नृप ।
भवत्यनपगान्सर्वांस्तान्गुणाँल्लक्षयाम्यहम् ॥ ५
भवानेवंविधोऽस्माकं संशयं छेत्तुमर्हति ।
अमूढश्चिरमूढानां लोकतत्त्वमजानताम् ॥ ६
ज्ञाने ह्येवं प्रवृत्तिः स्यात्कार्याकार्ये विजानतः ।
यत्कार्यं न व्यवस्यामस्तद्भवान्वक्तुमर्हति ॥ ७
भगवन्नाश्रमाः सर्वे पृथगाचारदर्शिनः ।
इदं श्रेय इदं श्रेय इति नानाप्रधाविताः ॥ ८
तांस्तु विप्रस्थितान्दृष्ट्वा शास्त्रैः शास्त्राभिनन्दिनः ।
स्वशास्त्रैः परितुष्टांश्च श्रेयो नोपलभामहे ॥ ९
शास्त्रं यदि भवेदेकं व्यक्तं श्रेयो भवेत्तदा ।
शास्त्रैश्च बहुभिर्भूयः श्रेयो गुह्यं प्रवेशितम् ॥ १०
एतस्मात्कारणाच्छ्रेयः कलिलं प्रतिभाति माम् ।
ब्रवीतु भगवांस्तन्मे उपसन्नोऽस्म्यधीहि भोः ॥ ११

नारद उवाच ।

आश्रमास्तात चत्वारो यथासंकल्पिताः पृथक् ।
तान्सर्वाननुपश्य त्वं समाश्रित्यैव गालव ॥ १२
तेषां तेषां तथा हि त्वमाश्रमाणां ततस्ततः ।
नानारूपगुणोद्देशं पश्य विप्रस्थितं पृथक् ।
नयन्ति चैव ते सम्यगभिप्रेतमसंशयम् ॥ १३
ऋजु पश्यंस्तथा सम्यगाश्रमाणां परां गतिम् ।
यत्तु निःश्रेयसं सम्यक्तच्चैवासंशयात्मकम् ॥ १४
अनुग्रहं च मित्राणाममित्राणां च निग्रहम् ।
संग्रहं च त्रिवर्गस्य श्रेय आहुर्मनीषिणः ॥ १५
निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता ।
सद्भिश्च समुदाचारः श्रेय एतदसंशयम् ॥ १६
मार्दवं सर्वभूतेषु व्यवहारेषु चार्जवम् ।
वाक्चैव मधुरा प्रोक्ता श्रेय एतदसंशयम् ॥ १७
देवताभ्यः पितृभ्यश्च संविभागोऽतिथिष्वपि ।
असंत्यागश्च भृत्यानां श्रेय एतदसंशयम् ॥ १८
सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करम् ।
यद्भूतहितमत्यन्तमेतत्सत्यं ब्रवीम्यहम् ॥ १९
अहंकारस्य च त्यागः प्रणयस्य च निग्रहः ।
संतोषश्चैकचर्या च कूटस्थं श्रेय उच्यते ॥ २०
धर्मेण वेदाध्ययनं वेदाङ्गानां तथैव च ।
विद्यार्थानां च जिज्ञासा श्रेय एतदसंशयम् ॥ २१
शब्दरूपरसस्पर्शान्सह गन्धेन केवलान् ।
नात्यर्थमुपसेवेत श्रेयसोऽर्थी परंतप ॥ २२
नक्तंचर्यां दिवास्वप्नमालस्यं पैशुनं मदम् ।
अतियोगमयोगं च श्रेयसोऽर्थी परित्यजेत् ॥ २३
कर्मोत्कर्षं न मार्गेत परेषां परिनिन्दया ।
स्वगुणैरेव मार्गेत विप्रकर्षं पृथग्जनात् ॥ २४
निर्गुणास्त्वेव भूयिष्ठमात्मसंभाविनो नराः ।
दोषैरन्यान्गुणवतः क्षिपन्त्यात्मगुणक्षयात् ॥ २५
अनुच्यमानाश्च पुनस्ते मन्यन्ते महाजनात् ।
गुणवत्तरमात्मानं स्वेन मानेन दर्पिताः ॥ २६

अब्रुवन्कस्यचिन्निन्दामात्मपूजामवर्णयन् ।
विपश्चिद्गुणसंपन्नः प्राप्नोत्येव महद्यशः ॥ २७
अब्रुवन्वाति सुरभिर्गन्धः सुमनसां शुचिः ।
तथैवान्याहरन्भाति विमलो भानुरम्बरे ॥ २८
एवमादीनि चान्यानि परित्यक्तानि मेधया ।
ज्वलन्ति यशसा लोके यानि न व्याहरन्ति च ॥
न लोके दीप्यते मूर्खः केवलात्मप्रशंसया ।
अपि चापिहितः श्वभ्रे कृतविद्यः प्रकाशते ॥ ३०
असन्नुच्चैरपि प्रोक्तः शब्दः समुपशाम्यति ।
दीप्यते त्वेव लोकेषु शनैरपि सुभाषितम् ॥ ३१
मूढानामवलिप्तानामसारं भाषितं बहु ।
दर्शयत्यन्तरात्मानं दिवा रूपमिवांशुमान् ॥ ३२
एतस्मात्कारणात्प्रज्ञां मृगयन्ते पृथग्विधाम् ।
प्रज्ञालाभो हि भूतानामुत्तमः प्रतिभाति माम् ॥३३
नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः ।
ज्ञानवानपि मेधावी जडवल्लोकमाचरेत् ॥ ३४
ततो वासं परीक्षेत धर्मनित्येषु साधुषु ।
मनुष्येषु वदान्येषु स्वधर्मनिरतेषु च ॥ ३५
चतुर्णां यत्र वर्णानां धर्मव्यतिकरो भवेत् ।
न तत्र वासं कुर्वीत श्रेयोर्थी वै कथंचन ॥ ३६
निरारम्भोऽप्ययमिह यथालब्धोपजीवनः ।
पुण्यं पुण्येषु विमलं पापं पापेषु चाप्नुयात् ॥ ३७
अपामग्नेस्तथेन्दोश्च स्पर्शं वेदयते यथा ।
तथा पश्यामहे स्पर्शमुभयोः पापपुण्ययोः ॥ ३८
अपश्यन्तोऽन्नविषयं भुञ्जते विघसाशिनः ।
भुञ्जानं चान्नविषयान्विषयं विद्धि कर्मणाम् ॥ ३९
यत्रागमयमानानामसत्कारेण पृच्छताम् ।
प्रब्रूयाद्ब्राह्मणो धर्मं त्यजेत्तं देशमात्मवान् ॥ ४०
शिष्योपाध्यायिका वृत्तिर्यत्र स्यात्सुसमाहिता ।
यथावच्छास्त्रसंपन्ना कस्तं देशं परित्यजेत् ॥ ४१
आकाशस्था ध्रुवं यत्र दोषं ब्रूयुर्विपश्चिताम् ।
आत्मपूजाभिकामा वै को वसेत्तत्र पण्डितः ॥४२
यत्र संलोडिता लुब्धैः प्रायशो धर्मसेतवः ।
प्रदीप्तमिव शैलान्तं कस्तं देशं न संत्यजेत् ॥ ४३
यत्र धर्ममनाशङ्काश्चरेयुर्वीतमत्सराः ।
चरेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु ॥ ४४
धर्ममर्थनिमित्तं तु चरेयुर्यत्र मानवाः ।
नताननुवसेज्जातु ते हि पापकृतो जनाः ॥ ४५
कर्मणा यत्र पापेन वर्तन्ते जीवितेप्सवः ।
व्यवधावेत्ततस्तूर्णं ससर्पाच्छरणादिव ॥ ४६
येन खट्वां समारूढः कर्मणानुशयी भवेत् ।
आदितस्तन्न कर्तव्यमिच्छता भवमात्मनः ॥ ४७
यत्र राजा च राज्ञश्च पुरुषाः प्रत्यनन्तराः ।
कुटुम्बिनामग्रभुजस्त्यजेत्तद्राष्ट्रमात्मवान् ॥ ४८
श्रोत्रियास्त्वग्रभोक्तारो धर्मनित्याः सनातनाः ।
याजनाध्यापने युक्ता यत्र तद्राष्ट्रमावसेत् ॥ ४९
स्वाहास्वधावषट्कारा यत्र सम्यगनुष्ठिताः ।
अजस्रं चैव वर्तन्ते वसेत्तत्राविचारयन् ॥ ५०
अशुचीन्यत्र पश्येत ब्राह्मणान्वृत्तिकर्शितान् ।
त्यजेत्तद्राष्ट्रमासन्नमुपसृष्टमिवामिषम् ॥ ५१
प्रीयमाणा नरा यत्र प्रयच्छेयुरयाचिताः ।
स्वस्थचित्तो वसेत्तत्र कृतकृत्य इवात्मवान् ॥ ५२
दण्डो यत्राविनीतेषु सत्कारश्च कृतात्मसु ।
चरेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु ॥ ५३
उपसृष्टेष्वदान्तेषु दुराचारेष्वसाधुषु ।
अविनीतेषु लुब्धेषु सुमहद्दण्डधारणम् ॥ ५४
यत्र राजा धर्मनित्यो राज्यं वै पर्युपासिता ।
अपास्य कामान्कामेशो वसेत्तत्राविचारयन् ॥ ५५
तथाशीला हि राजानः सर्वान्विषयवासिनः ।
श्रेयसा योजयन्त्याशु श्रेयसि प्रत्युपस्थिते ॥ ५६

पृच्छतस्ते मया तात श्रेय एतदुदाहृतम् ।
न हि शक्यं प्रधानेन श्रेयः संख्यातुमात्मनः ॥५७
एवं प्रवर्तमानस्य वृत्तिं प्रणिहितात्मनः ।
तपसैवेह बहुलं श्रेयो व्यक्तं भविष्यति ॥ ५८

इति श्रीमहाभारते शान्तिपर्वणि
षट्सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७६ ॥

२७७

युधिष्ठिर उवाच ।

कथं नु मुक्तः पृथिवीं चरेदस्मद्विधो नृपः ।
नित्यं कैश्च गुणैर्युक्तः सङ्गपाशाद्विमुच्यते ॥ १

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
अरिष्टनेमिना प्रोक्तं सगरायानुपृच्छते ॥ २

सगर उवाच ।

किं श्रेयः परमं ब्रह्मन्कृत्वेह सुखमश्नुते ।
कथं न शोचेन्न क्षुभ्येदेतदिच्छामि वेदितुम् ॥ ३

भीष्म उवाच ।

एवमुक्तस्तदा तार्क्ष्यः सर्वशास्त्रविशारदः ।
विबुध्य संपदं चाग्र्यां सद्वाक्यमिदमब्रवीत् ॥ ४
सुखं मोक्षसुखं लोके न च लोकोऽवगच्छति ।
प्रसक्तः पुत्रपशुषु धनधान्यसमाकुलः ॥ ५
सक्तबुद्धिरशान्तात्मा न स शक्यश्चिकित्सितुम् ।
स्नेहपाशसितो मूढो न स मोक्षाय कल्पते ॥ ६
स्नेहजानिह ते पाशान्वक्ष्यामि शृणु तान्मम ।
सकर्णकेन शिरसा शक्याश्छेत्तुं विजानता ॥ ७
संभाव्य पुत्रान्कालेन यौवनस्थान्निवेश्य च ।
समर्थाञ्जीवने ज्ञात्वा मुक्तश्चर यथासुखम् ॥ ८
भार्यां पुत्रवतीं वृद्धां लालितां पुत्रवत्सलाम् ।
ज्ञात्वा प्रजहि काले त्वं परार्थमनुदृश्य च ॥ ९
सापत्यो निरपत्यो वा मुक्तश्चर यथासुखम् ।
इन्द्रियैरिन्द्रियार्थांस्त्वमनुभूय यथाविधि ॥ १०
कृतकौतूहलस्तेषु मुक्तश्चर यथासुखम् ।
उपपत्त्योपलब्धेषु लाभेषु च समो भव ॥ ११
एष तावत्समासेन तव संकीर्तितो मया ।
मोक्षार्थो विस्तरेणापि भूयो वक्ष्यामि तच्छृणु ॥
मुक्ता वीतभया लोके चरन्ति सुखिनो नराः ।
सक्तभावा विनश्यन्ति नरास्तत्र न संशयः ॥ १३
आहारसंचयाश्चैव तथा कीटपिपीलिकाः ।
असक्ताः सुखिनो लोके सक्ताश्चैव विनाशिनः ॥
स्वजने न च ते चिन्ता कर्तव्या मोक्षबुद्धिना ।
इमे मया विनाभूता भविष्यन्ति कथं त्विति ॥१५
स्वयमुत्पद्यते जन्तुः स्वयमेव विवर्धते ।
सुखदुःखे तथा मृत्युं स्वयमेवाधिगच्छति ॥ १६
भोजनाच्छादने चैव मात्रा पित्रा च संग्रहम् ।
स्वकृतेनाधिगच्छन्ति लोके नास्त्यकृतं पुरा ॥ १७
धात्रा विहितभक्ष्याणि सर्वभूतानि मेदिनीम् ।
लोके विपरिधावन्ति रक्षितानि स्वकर्मभिः ॥ १८
स्वयं मृत्पिण्डभूतस्य परतन्त्रस्य सर्वदा ।
को हेतुः स्वजनं पोष्टुं रक्षितुं वाहृढात्मनः ॥ १९
स्वजनं हि यदा मृत्युर्हन्त्येव तव पश्यतः ।
कृतेऽपि यत्ने महति तत्र बोद्धव्यमात्मना ॥ २०
जीवन्तमपि चैवैनं भरणे रक्षणे तथा ।
असमाप्ते परित्यज्य पश्चादपि मरिष्यसि ॥ २१
यदा मृतश्च स्वजनं न ज्ञास्यसि कथंचन ।
सुखितं दुःखितं वापि ननु बोद्धव्यमात्मना ॥ २२
मृते वा त्वयि जीवे वा यदि भोक्ष्यति वै जनः ।
स्वकृतं ननु बुद्ध्वैवं कर्तव्यं हितमात्मनः ॥ २३
एवं विजानँल्लोकेऽस्मिन्कः कस्येत्यभिनिश्चितः ।
मोक्षे निवेशय मनो भूयश्चाप्युपधारय ॥ २४

क्षुत्पिपासादयो भावा जिता यस्येह देहिनः ।
क्रोधो लोभस्तथा मोहः सत्त्ववान्मुक्त एव सः ॥
द्यूते पाने तथा स्त्रीषु मृगयायां च यो नरः ।
न प्रमाद्यति संमोहात्सततं मुक्त एव सः ॥ २६
दिवसे दिवसे नाम रात्रौ रात्रौ सदा सदा ।
भोक्तव्यमिति यः खिन्नो दोषबुद्धिः स उच्यते ॥२७
आत्मभावं तथा स्त्रीषु मुक्तमेव पुनः पुनः ।
यः पश्यति सदा युक्तो यथावन्मुक्त एव सः ॥२८
संभवं च विनाशं च भूतानां चेष्टितं तथा ।
यस्तत्त्वतो विजानाति लोकेऽस्मिन्मुक्त एव सः॥२९
प्रस्थं वाहसहस्रेषु यात्रार्थं चैव कोटिषु ।
प्रासादे मञ्चकस्थानं यः पश्यति स मुच्यते ॥३०
मृत्युनाभ्याहतं लोकं व्याधिभिश्चोपपीडितम् ।
अवृत्तिकर्शितं चैव यः पश्यति स मुच्यते ॥ ३१
यः पश्यति सुखी तुष्टो नपश्यंश्च विहन्यते ।
यश्चाप्यल्पेन संतुष्टो लोकेऽस्मिन्मुक्त एव सः ॥३२
अग्नीषोमाविदं सर्वमिति यश्चानुपश्यति ।
न च संस्पृश्यते भावैरद्भुतैर्मुक्त एव सः ॥ ३३
पर्यङ्कशय्या भूमिश्च समाने यस्य देहिनः ।
शालयश्च कदन्नं च यस्य स्यान्मुक्त एव सः ॥ ३४
क्षौमं च कुशचीरं च कौशेयं वल्कलानि च ।
आविकं चर्म च समं यस्य स्यान्मुक्त एव सः॥ ३५
पञ्चभूतसमद्भूतं लोकं यश्चानुपश्यति ।
तथा च वर्तते दृष्ट्वा लोकेऽस्मिन्मुक्त एव सः ॥३६
सुखदुःखे समे यस्य लाभालाभौ जयाजयौ ।
इच्छाद्वेषौ भयोद्वेगौ सर्वथा मुक्त एव सः ॥ ३७
रक्तमूत्रपुरीषाणां दोषाणां संचयं तथा ।
शरीरं दोषबहुलं दृष्ट्वा चेदं विमुच्यते ॥ ३८
वलीपलितसंयोगं कार्श्यं वैवर्ण्यमेव च ।
कुब्जभावं च जरया यः पश्यति स मुच्यते ॥३९
पुंस्त्वोपघातं कालेन दर्शनोपरमं तथा ।
बाधिर्यं प्राणमन्दत्वं यः पश्यति स मुच्यते ॥४०
गतानृषींस्तथा देवानसुरांश्च तथा गतान् ।
लोकादस्मात्परं लोकं यः पश्यति स मुच्यते ॥४१
प्रभावैरन्वितास्तैस्तैः पार्थिवेन्द्राः सहस्रशः ।
ये गताः पृथिवीं त्यक्त्वा इति ज्ञात्वा विमुच्यते॥
अर्थांश्च दुर्लभाँल्लोके क्लेशांश्च सुलभांस्तथा ।
दुःखं चैव कुटुम्बार्थे यः पश्यति स मुच्यते ॥४३
अपत्यानां च वैगुण्यं जनं विगुणमेव च ।
पश्यन्भूयिष्ठशो लोके को मोक्षं नाभिपूजयेत् ॥४४
शास्त्राल्लोकाच्च यो बुद्धः सर्वं पश्यति मानवः ।
असारमिव मानुष्यं सर्वथा मुक्त एव सः ॥ ४५
एतच्छ्रुत्वा मम वचो भवांश्चरतु मुक्तवत् ।
गार्हस्थ्ये यदि ते मोक्षे कृता बुद्धिरविक्लवा ॥४६
तत्तस्य वचनं श्रुत्वा सम्यक्स पृथिवीपतिः ।
मोक्षजैश्च गुणैर्युक्तः पालयामास च प्रजाः ॥ ४७

इति श्रीमहाभारते शान्तिपर्वणि
सप्तसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७७ ॥

२७८

युधिष्ठिर उवाच ।

तिष्ठते मे सदा तात कौतूहलमिदं हृदि ।
तदहं श्रोतुमिच्छामि त्वत्तः कुरुपितामह ॥ १
कथं देवर्षिरुशना सदा काव्यो महामतिः ।
असुराणां प्रियकरः सुराणामप्रिये रतः ॥ २
वर्धयामास तेजश्च किमर्थममितौजसाम् ।
नित्यं वैरनिबद्धाश्च दानवाः सुरसत्तमैः ॥ ३
कथं चाप्युशना प्राप शुक्रत्वममरद्युतिः ।
ऋद्धिं च स कथं प्राप्तः सर्वमेतद्ब्रवीहि मे ॥ ४
न याति च स तेजस्वी मध्येन नभसः कथम् ।
एतदिच्छामि विज्ञातुं निखिलेन पितामह ॥ ५

भीष्म उवाच ।

शृणु राजन्नवहितः सर्वमेतद्यथातथम् ।
यथामति यथा चैतच्छ्रुतपूर्वं मयानघ ॥ ६
एष भार्गवदायादो मुनिः सत्यो दृढव्रतः ।
असुराणां प्रियकरो निमित्ते करुणात्मके ॥ ७
इन्द्रोऽथ धनदो राजा यक्षरक्षोधिपः स च ।
प्रभविष्णुश्च कोशस्य जगतश्च तथा प्रभुः ॥ ८
तस्यात्मानमथाविश्य योगसिद्धो महामुनिः ।
रुद्ध्वा धनपतिं देवं योगेन हृतवान्वसु ॥ ९
हृते धने ततः शर्म न लेभे धनदस्तथा ।
आपन्नमन्युः संविग्नः सोऽभ्यगात्सुरसत्तमम् ॥१०
निवेदयामास तदा शिवायामिततेजसे ।
देवश्रेष्ठाय रुद्राय सौम्याय बहुरूपिणे ॥ ११

कुबेर उवाच ।

योगात्मकेनोशनसा रुद्ध्वा मम हृतं वसु ।
योगेनात्मगतिं कृत्वा निःसृतश्च महातपाः ॥ १२

भीष्म उवाच ।

एतच्छ्रुत्वा ततः क्रुद्धो महायोगी महेश्वरः ।
संरक्तनयनो राजञ्शूलमादाय तस्थिवान् ॥ १३
क्वासौ क्वासाविति प्राह गृहीत्वा परमायुधम् ।
उशना दूरतस्तस्य बभौ ज्ञात्वा चिकीर्षितम् ॥ १४
स महायोगिनो बुद्ध्वा तं रोषं वै महात्मनः ।
गतिमागमनं वेत्ति स्थानं वेत्ति ततः प्रभुः ॥ १५
चिन्त्योग्रेण तपसा महात्मानं महेश्वरम् ।
शना योगसिद्धात्मा शूलाग्रे प्रत्यदृश्यत ॥ १६
ज्ञातरूपः स तदा तपःसिद्धेन धन्विना ।
त्वा शूलं च देवेशः पाणिना समनामयत् ॥१७
नतेनाथ शूलेन पाणिनामिततेजसा ।
नाकमिति चोवाच शूलमुग्रायुधः प्रभुः ॥ १८
णिमध्यगतं दृष्ट्वा भार्गवं तमुमापतिः ।
आस्यं विवृत्य ककुदी पाणिं संप्राक्षिपच्छनैः ॥१९
स तु प्रविष्ट उशना कोष्ठं माहेश्वरं प्रभुः ।
व्यचरच्चापि तत्रासौ महात्मा भृगुनन्दनः ॥ २०

युधिष्ठिर उवाच ।

किमर्थं व्यचरद्राजन्नुशना तस्य धीमतः ।
जठरे देवदेवस्य किं चाकार्षीन्महाद्युतिः ॥ २१

भीष्म उवाच ।

पुरा सोऽन्तर्जलगतः स्थाणुभूतो महाव्रतः ।
वर्षाणामभवद्राजन्प्रयुतान्यर्बुदानि च ॥ २२
उदतिष्ठत्तपस्तप्त्वा दुश्चरं स महाह्रदात् ।
ततो देवातिदेवस्तं ब्रह्मा समुपसर्पत ॥ २३
तपोवृद्धिमपृच्छच्च कुशलं चैनमव्ययम् ।
तपः सुचीर्णमिति च प्रोवाच वृषभध्वजः ॥ २४
तत्संयोगेन वृद्धिं चाप्यपश्यत्स तु शंकरः ।
महामतिरचिन्त्यात्मा सत्यधर्मरतः सदा ॥ २५
स तेनाढ्यो महायोगी तपसा च धनेन च ।
व्यराजत महाराज त्रिषु लोकेषु वीर्यवान् ॥ २६
ततः पिनाकी योगात्मा ध्यानयोगं समाविशत् ।
उशना तु समुद्विग्नो निलिल्ये जठरे ततः ॥ २७
तुष्टाव च महायोगी देवं तत्रस्थ एव च ।
निःसारं काङ्क्षमाणस्तु तेजसा प्रत्यहन्यत ॥ २८
उशना तु तदोवाच जठरस्थो महामुनिः ।
प्रसादं मे कुरुष्वेति पुनः पुनररिंदम ॥ २९
तमुवाच महादेवो गच्छ शिश्नेन मोक्षणम् ।
इति स्रोतांसि सर्वाणि रुद्ध्वा त्रिदशपुंगवः ॥ ३०
अपश्यमानः स द्वारं सर्वतःपिहितो मुनिः ।
पर्यक्रामद्दह्यमान इतश्चेतश्च तेजसा ॥ ३१
स विनिष्क्रम्य शिश्नेन शुक्रत्वमभिपेदिवान् ।
कार्येण तेन नभसो नागच्छत च मध्यतः ॥ ३२
निष्क्रान्तमथ तं दृष्ट्वा ज्वलन्तमिव तेजसा ।

भवो रोषसमाविष्टः शूलोद्यतकरः स्थितः ।। ३३
न्यवारयत तं देवी क्रुद्धं पशुपतिं पतिम् ।
पुत्रत्वमगमद्देव्या वारिते शंकरे च सः ।। ३४

देव्युवाच ।

हिंसनीयस्त्वया नैष मम पुत्रत्वमागतः ।
न हि देवोदरात्कश्चिन्निःसृतो नाशमर्छति ।। ३५

भीष्म उवाच ।

ततः प्रीतोऽभवद्देव्याः प्रहसंश्चेदमब्रवीत् ।
गच्छत्वेष यथाकाममिति राजन्पुनः पुनः ।। ३६
ततः प्रणम्य वरदं देवं देवीमुमां तथा ।
उशना प्राप तद्धीमान्गतिमिष्टां महामुनिः ।। ३७
एतत्ते कथितं तात भार्गवस्य महात्मनः ।
चरितं भरतश्रेष्ठ यन्मां त्वं परिपृच्छसि ।। ३८

इति श्रीमहाभारते शान्तिपर्वणि
अष्टसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७८ ॥

२७९

युधिष्ठिर उवाच ।

अतः परं महाबाहो यच्छ्रेयस्तद्वदस्व मे ।
न तृप्याम्यमृतस्येव वचसस्ते पितामह ।। १
किं कर्म पुरुषः कृत्वा शुभं पुरुषसत्तम ।
श्रेयः परमवाप्नोति प्रेत्य चेह च तद्वद ।। २

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि यथा पूर्वं महायशाः ।
पराशरं महात्मानं पप्रच्छ जनको नृपः ।। ३
किं श्रेयः सर्वभूतानामस्मिँल्लोके परत्र च ।
यद्भवेत्प्रतिपत्तव्यं तद्भवान्प्रब्रवीतु मे ।। ४
ततः स तपसा युक्तः सर्वधर्मविधानवित् ।
नृपायानुग्रहमना मुनिर्वाक्यमथाब्रवीत् ।। ५
धर्म एव कृतः श्रेयानिह लोके परत्र च ।
तस्माद्धि परमं नास्ति यथा प्राहुर्मनीषिणः ।। ६
प्रतिपद्य नरो धर्मं स्वर्गलोके महीयते ।
धर्मात्मकः कर्मविधिर्देहिनां नृपसत्तम ।
तस्मिन्नाश्रमिणः सन्तः स्वकर्माणीह कुर्वते ।। ७
चतुर्विधा हि लोकस्य यात्रा तात विधीयते ।
मर्त्या यत्रावतिष्ठन्ते सा च कामात्प्रवर्तते ।। ८
सुकृतासुकृतं कर्म निषेव्य विविधैः क्रमैः ।
दशार्धप्रविभक्तानां भूतानां बहुधा गतिः ।। ९
सौवर्णं राजतं वापि यथा भाण्डं निषिच्यते ।
तथा निषिच्यते जन्तुः पूर्वकर्मवशानुगः ।। १०
नाबीजाज्जायते किंचिन्नाकृत्वा सुखमेधते ।
सुकृती विन्दति सुखं प्राप्य देहक्षयं नरः ।। ११
दैवं तात न पश्यामि नास्ति दैवस्य साधनम् ।
स्वभावतो हि संसिद्धा देवगन्धर्वदानवाः ।। १२
प्रेत्य जातिकृतं कर्म न स्मरन्ति सदा जनाः ।
ते वै तस्य फलप्राप्तौ कर्म चापि चतुर्विधम् ।। १३
लोकयात्राश्रयश्चैव शब्दो वेदाश्रयः कृतः ।
शान्त्यर्थं मनसस्तात नैतद्वृद्धानुशासनम् ।। १४
चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
कुरुते यादृशं कर्म तादृशं प्रतिपद्यते ।। १५
निरन्तरं च मिश्रं च फलते कर्म पार्थिव ।
कल्याणं यदि वा पापं न तु नाशोऽस्य विद्यते ।। १६
कदाचित्सुकृतं तात कूटस्थमिव तिष्ठति ।
मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते ।। १७
ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते ।
सुकृतक्षयाद्दुष्कृतं च तद्विद्धि मनुजाधिप ।। १८
दमः क्षमा धृतिस्तेजः संतोषः सत्यवादिता ।
ह्रीरहिंसाव्यसनिता दाक्ष्यं चेति सुखावहाः ।। १९
दुष्कृते सुकृते वापि न जन्तुरयतो भवेत् ।
नित्यं मनःसमाधाने प्रयतेत विचक्षणः ।। २०

नायं परस्य सुकृतं दुष्कृतं वापि सेवते ।
करोति यादृशं कर्म तादृशं प्रतिपद्यते ॥ २१
सुखदुःखे समाधाय पुमानन्येन गच्छति ।
अन्येनैव जनः सर्वः संगतो यश्च पार्थिव ॥ २२
परेषां यदसूयेत न तत्कुर्यात्स्वयं नरः ।
यो ह्यसूयुस्तथायुक्तः सोऽवहासं नियच्छति ॥ २३
भीरू राजन्यो ब्राह्मणः सर्वभक्षो
वैश्योऽनीहावान्हीनवर्णोऽलसश्च ।
विद्वांश्चाशीलो वृत्तहीनः कुलीनः
सत्याद्भ्रष्टो ब्राह्मणः स्त्री च दुष्टा ॥ २४
रागी मुक्तः पचमानोऽऽत्महेतो-
र्मूर्खो वक्ता नृपहीनं च राष्ट्रम् ।
एते सर्वे शोच्यतां यान्ति राज-
न्यश्चायुक्तः स्नेहहीनः प्रजासु ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
एकोनाशीत्यधिकद्विशततमोऽध्यायः ॥ २७९ ॥

२८०

पराशर उवाच ।

मनोरथरथं प्राप्य इन्द्रियार्थहयं नरः ।
रश्मिभिर्ज्ञानसंभूतैर्यो गच्छति स बुद्धिमान् ॥ १
सेवाश्रितेन मनसा वृत्तिहीनस्य शस्यते ।
द्विजातिहस्तान्निर्वृत्ता न तु तुल्यात्परस्परम् ॥ २
आयुर्नसुलभं लब्ध्वा नावकर्षेद्विशां पते ।
उत्कर्षार्थं प्रयतते नरः पुण्येन कर्मणा ॥ ३
वर्णेभ्योऽपि परिभ्रष्टः स वै संमानमर्हति ।
न तु यः सत्क्रियां प्राप्य राजसं कर्म सेवते ॥ ४
वर्णोत्कर्षमवाप्नोति नरः पुण्येन कर्मणा ।
दुर्लभं तमलब्धा हि हन्यात्पापेन कर्मणा ॥ ५
अज्ञानाद्धि कृतं पापं तपसैवाभिनिर्णुदेत् ।
पापं हि कर्म फलति पापमेव स्वयं कृतम् ।
तस्मात्पापं न सेवेत कर्म दुःखफलोदयम् ॥ ६
पापानुबन्धं यत्कर्म यद्यपि स्यान्महाफलम् ।
न तत्सेवेत मेधावी शुचिः कुसलिलं यथा ॥ ७
किंकष्टमनुपश्यामि फलं पापस्य कर्मणः ।
प्रत्यापन्नस्य हि सतो नात्मा तावद्विरोचते ॥ ८
प्रत्यापत्तिश्च यस्येह बालिशस्य न जायते ।
तस्यापि सुमहांस्तापः प्रस्थितस्योपजायते ॥ ९
विरक्तं शोध्यते वस्त्रं न तु कृष्णोपसंहितम् ।
प्रयत्नेन मनुष्येन्द्र पापमेवं निबोध मे ॥ १०
स्वयं कृत्वा तु यः पापं शुभमेवानुतिष्ठति ।
प्रायश्चित्तं नरः कर्तुमुभयं सोऽश्नुते पृथक् ॥ ११
अज्ञानात्तु कृतां हिंसामहिंसा व्यपकर्षति ।
ब्राह्मणाः शास्त्रनिर्देशादित्याहुर्ब्रह्मवादिनः ॥ १२
तथा कामकृतं चास्य विहिंसैवापकर्षति ।
इत्याहुर्धर्मशास्त्रज्ञा ब्राह्मणा वेदपारगाः ॥ १३
अहं तु तावत्पश्यामि कर्म यद्वर्तते कृतम् ।
गुणयुक्तं प्रकाशं च पापेनानुपसंहितम् ॥ १४
यथा सूक्ष्माणि कर्माणि फलन्तीह यथातथम् ।
बुद्धियुक्तानि तानीह कृतानि मनसा सह ॥ १५
भवत्यल्पफलं कर्म सेवितं नित्यमुल्बणम् ।
अबुद्धिपूर्वं धर्मज्ञ कृतमुग्रेण कर्मणा ॥ १६
कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा ।
नाचरेत्तानि धर्मात्मा श्रुत्वा चापि न कुत्सयेत् ॥
संचिन्त्य मनसा राजन्विदित्वा शक्तिमात्मनः ।
करोति यः शुभं कर्म स वै भद्राणि पश्यति ॥१८
नवे कपाले सलिलं संन्यस्तं हीयते यथा ।
नवेतरे तथाभावं प्राप्नोति सुखभावितम् ॥ १९
सतोयेऽन्यत्तु यत्तोयं तस्मिन्नेव प्रसिच्यते ।
वृद्धे वृद्धिमवाप्नोति सलिले सलिलं यथा ॥ २०
एवं कर्माणि यानीह बुद्धियुक्तानि भूपते ।

नसमानीह हीनानि तानि पुण्यतमान्यपि ॥ २१
राज्ञा जेतव्याः सायुधाश्चोन्नताश्च
सम्यक्कर्तव्यं पालनं च प्रजानाम् ।
अग्निश्चेयो बहुभिश्चापि यज्ञै-
रन्ते मध्ये वा वनमाश्रित्य स्थेयम् ॥ २२
दमान्वितः पुरुषो धर्मशीलो
भूतानि चात्मानमिवानुपश्येत् ।
गरीयसः पूजयेदात्मशक्त्या
सत्येन शीलेन सुखं नरेन्द्र ॥ २३
इति श्रीमहाभारते शान्तिपर्वणि
अशीत्यधिकद्विशततमोऽध्यायः ॥ २८० ॥

२८१

पराशर उवाच ।

कः कस्य चोपकुरुते कश्च कस्मै प्रयच्छति ।
प्राणी करोत्ययं कर्म सर्वमात्मार्थमात्मना ॥ १
गौरवेण परित्यक्तं निःस्नेहं परिवर्जयेत् ।
सोदर्यं भ्रातरमपि किमुतान्यं पृथग्जनम् ॥ २
विशिष्टस्य विशिष्टाच्च तुल्यौ दानप्रतिग्रहौ ।
तयोः पुण्यतरं दानं तद्द्विजस्य प्रयच्छतः ॥ ३
न्यायागतं धनं वर्णैर्न्यायेनैव विवर्धितम् ।
संरक्ष्यं यत्नमास्थाय धर्मार्थमिति निश्चयः ॥ ४
न धर्मार्थी नृशंसेन कर्मणा धनमर्जयेत् ।
शक्तितः सर्वकार्याणि कुर्यान्नर्द्धिमनुस्मरेत् ॥ ५
अपो हि प्रयतः शीतास्तापिता ज्वलनेन वा ।
शक्तितोऽतिथये दत्त्वा क्षुधार्तायाश्नुते फलम् ॥ ६
रन्तिदेवेन लोकेष्टा सिद्धिः प्राप्ता महात्मना ।
फलपत्रैरथो मूलैर्मुनीनर्चितवानसौ ॥ ७
तैरेव फलपत्रैश्च स माठरमतोषयत् ।
तस्माल्लेभे परं स्थानं शैब्योऽपि पृथिवीपतिः ॥ ८
देवतातिथिभृत्येभ्यः पितृभ्योऽथात्मनस्तथा ।
ऋणवाञ्जायते मर्त्यस्तस्मादनृणतां व्रजेत् ॥ ९
स्वाध्यायेन महर्षिभ्यो देवेभ्यो यज्ञकर्मणा ।
पितृभ्यः श्राद्धदानेन नृणामभ्यर्चनेन च ॥ १०
वाचः शेषावहार्येण पालनेनात्मनोऽपि च ।
यथावद्भृत्यवर्गस्य चिकीर्षेद्धर्ममादितः ॥ ११
प्रयत्नेन च संसिद्धा धनैरपि विवर्जिताः ।
सम्यग्घुत्वा हुतवहं मुनयः सिद्धिमागताः ॥ १२
विश्वामित्रस्य पुत्रत्वमृचीकतनयोऽगमत् ।
ऋग्भिः स्तुत्वा महाभागो देवान्वै यज्ञभागिनः ॥
गतः शुक्रत्वमुशना देवदेवप्रसादनात् ।
देवीं स्तुत्वा तु गगने मोदते तेजसा वृतः ॥ १४
असितो देवलश्चैव तथा नारदपर्वतौ ।
कक्षीवाञ्जामदग्न्यश्च रामस्ताण्ड्यस्तथांशुमान् ॥ १५
वसिष्ठो जमदग्निश्च विश्वामित्रोऽत्रिरेव च ।
भरद्वाजो हरिश्मश्रुः कुण्डधारः श्रुतश्रवाः ॥ १६
एते महर्षयः स्तुत्वा विष्णुमृग्भिः समाहिताः ।
लेभिरे तपसा सिद्धिं प्रसादात्तस्य धीमतः ॥ १७
अनर्हाश्चार्हतां प्राप्ताः सन्तः स्तुत्वा तमेव ह ।
न तु वृद्धिमिहान्विच्छेत्कर्म कृत्वा जुगुप्सितम् ॥
येऽर्था धर्मेण ते सत्या येऽधर्मेण धिगस्तु तान् ।
धर्मं वै शाश्वतं लोके न जह्याद्धनकाङ्क्षया ॥ १९
आहिताग्निर्हि धर्मात्मा यः स पुण्यकृदुत्तमः ।
वेदा हि सर्वे राजेन्द्र स्थितास्त्रिष्वग्निषु प्रभो ॥२०
स चाप्यग्न्याहितो विप्रः क्रिया यस्य न हीयते ।
श्रेयो ह्यनाहिताग्नित्वमग्निहोत्रं न निष्क्रियम् ॥ २१
अग्निरात्मा च माता च पिता जनयिता तथा ।
गुरुश्च नरशार्दूल परिचर्या यथातथम् ॥ २२
मानं त्यक्त्वा यो नरो वृद्धसेवी
विद्वान्क्लीबः पश्यति प्रीतियोगात् ।
दाक्ष्येणाहीनो धर्मयुक्तो नदान्तो

लोकेऽस्मिन्वै पूज्यते सद्भिरार्यैः ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि
एकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥

२८२

पराशर उवाच ।

वृत्तिः सकाशाद्वर्णेभ्यस्त्रिभ्यो हीनस्य शोभना ।
प्रीत्योपनीता निर्दिष्टा धर्मिष्ठान्कुरुते सदा ॥ १
वृत्तिश्चेन्नास्ति शूद्रस्य पितृपैतामही ध्रुवा ।
न वृत्तिं परतो मार्गेच्छुश्रूषां तु प्रयोजयेत् ॥ २
सद्भिस्तु सह संसर्गः शोभते धर्मदर्शिभिः ।
नित्यं सर्वास्ववस्थासु नासद्भिरिति मे मतिः ॥ ३
यथोदयगिरौ द्रव्यं संनिकर्षेण दीप्यते ।
तथा सत्संनिकर्षेण हीनवर्णोऽपि दीप्यते ॥ ४
यादृशेन हि वर्णेन भाव्यते शुक्लमम्बरम् ।
तादृशं कुरुते रूपमेतदेवमवेहि मे ॥ ५
तस्माद्गुणेषु रज्येथा मा दोषेषु कदाचन ।
अनित्यमिह मर्त्यानां जीवितं हि चलाचलम् ॥ ६
सुखे वा यदि वा दुःखे वर्तमानो विचक्षणः ।
यश्चिनोति शुभान्येव स भद्राणीह पश्यति ॥ ७
धर्मादपेतं यत्कर्म यद्यपि स्यान्महाफलम् ।
न तत्सेवेत मेधावी न तद्धितमिहोच्यते ॥ ८
यो हृत्वा गोसहस्राणि नृपो दद्यादरक्षिता ।
स शब्दमात्रफलभाग्राजा भवति तस्करः ॥ ९
स्वयंभूरसृजच्चाग्रे धातारं लोकपूजितम् ।
धातासृजत्पुत्रमेकं प्रजानां धारणे रतम् ॥ १०
तमर्चयित्वा वैश्यस्तु कुर्यादत्यर्थमृद्धिमत् ।
रक्षितव्यं तु राजन्यैरुपयोज्यं द्विजातिभिः ॥ ११
अजिह्मैरशठक्रोधैर्हव्यकव्यप्रयोक्तृभिः ।
शूद्रैर्निर्माजनं कार्यमेवं धर्मो न नश्यति ॥ १२
अप्रनष्टे ततो धर्मे भवन्ति सुखिताः प्रजाः ।
सुखेन तासां राजेन्द्र मोदन्ते दिवि देवताः ॥ १३
तस्माद्यो रक्षति नृपः स धर्मेणाभिपूज्यते ।
अधीते चापि यो विप्रो वैश्यो यश्चार्जने रतः ॥ १४
यश्च शुश्रूषते शूद्रः सततं नियतेन्द्रियः ।
अतोऽन्यथा मनुष्येन्द्र स्वधर्मात्परिहीयते ॥ १५
प्राणसंतापनिर्दिष्टाः काकिण्योऽपि महाफलाः ।
न्यायेनोपार्जिता दत्ताः किमुतान्याः सहस्रशः ॥ १६
सत्कृत्य तु द्विजातिभ्यो यो ददाति नराधिप ।
यादृशं तादृशं नित्यमश्नाति फलमूर्जितम् ॥ १७
अभिगम्य दत्तं तुष्ट्या तद्धन्यमाहुरभिष्टुतम् ।
याचितेन तु यद्दत्तं तदाहुर्मध्यमं बुधाः ॥ १८
अवज्ञया दीयते यत्तथैवाश्रद्धयापि च ।
तदाहुरधमं दानं मुनयः सत्यवादिनः ॥ १९
अतिक्रमे मज्जमानो विविधेन नरः सदा ।
तथा प्रयत्नं कुर्वीत यथा मुच्येत संशयात् ॥ २०
दमेन शोभते विप्रः क्षत्रियो विजयेन तु ।
धनेन वैश्यः शूद्रस्तु नित्यं दाक्ष्येण शोभते ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८२ ॥

२८३

पराशर उवाच ।

प्रतिग्रहागता विप्रे क्षत्रिये शस्त्रनिर्जिताः ।
वैश्ये न्यायार्जिताश्चैव शूद्रे शुश्रूषयार्जिताः ।
स्वल्पाप्यर्थाः प्रशस्यन्ते धर्मस्यार्थे महाफलाः ॥ १
नित्यं त्रयाणां वर्णानां शूद्रः शुश्रूषुरुच्यते ।
क्षत्रधर्मा वैश्यधर्मा नावृत्तिः पतति द्विजः ।
शूद्रकर्मा यदा तु स्यात्तदा पतति वै द्विजः ॥ २
वाणिज्यं पाशुपाल्यं च तथा शिल्पोपजीवनम् ।
शूद्रस्यापि विधीयन्ते यदा वृत्तिर्न जायते ॥ ३
रङ्गावतरणं चैव तथा रूपोपजीवनम् ।

मद्यमांसोपजीव्यं च विक्रयो लोहचर्मणोः ॥ ४
अपूर्विणा न कर्तव्यं कर्म लोके विगर्हितम् ।
कृतपूर्विणस्तु त्यजतो महान्धर्म इति श्रुतिः ॥ ५
संसिद्धः पुरुषो लोके यदाचरति पापकम् ।
मदेनाभिप्लुतमनास्तच्च नग्राह्यमुच्यते ॥ ६
श्रूयन्ते हि पुराणे वै प्रजा धिग्दण्डशासनाः ।
दान्ता धर्मप्रधानाश्च न्यायधर्मानुवर्तकाः ॥ ७
धर्म एव सदा नृणामिह राजन्प्रशस्यते ।
धर्मवृद्धा गुणानेव सेवन्ते हि नरा भुवि ॥ ८
तं धर्ममसुरास्तात नामृष्यन्त जनाधिप ।
विवर्धमानाः क्रमशस्तत्र तेऽन्वाविशन्प्रजाः ॥ ९
तेषां दर्पः समभवत्प्रजानां धर्मनाशनः ।
दर्पात्मनां ततः क्रोधः पुनस्तेषामजायत ॥ १०
ततः क्रोधाभिभूतानां वृत्तं लज्जासमन्वितम् ।
ह्रीश्चैवाप्यनशद्राजंस्ततो मोहो व्यजायत ॥ ११
ततो मोहपरीतास्ते नापश्यन्त यथा पुरा ।
परस्परावमर्देन वर्तयन्ति यथासुखम् ॥ १२
तान्प्राप्य तु स धिग्दण्डो नकारणमतोऽभवत् ।
ततोऽभ्यगच्छन्देवांश्च ब्राह्मणांश्चावमन्य ह ॥ १३
एतस्मिन्नेव काले तु देवा देववरं शिवम् ।
अगच्छञ्शरणं वीरं बहुरूपं गणाधिपम् ॥ १४
तेन स्म ते गगनगाः सपुराः पातिताः क्षितौ ।
तिस्रोऽप्येकेन बाणेन देवाप्यायिततेजसा ॥ १५
तेषामधिपतिस्त्वासीद्भीमो भीमपराक्रमः ।
देवतानां भयकरः स हतः शूलपाणिना ॥ १६
तस्मिन्हतेऽथ स्वं भावं प्रत्यपद्यन्त मानवाः ।
प्रावर्तन्त च वेदा वै शास्त्राणि च यथा पुरा ॥१७
ततोऽभ्यषिञ्चन्राज्येन देवानां दिवि वासवम् ।
सप्तर्षयश्चान्वयुञ्जन्नराणां दण्डधारणे ॥ १८
सप्तर्षीणामथोर्ध्वं च विपृथुर्नाम पार्थिवः ।
राजानः क्षत्रियाश्चैव मण्डलेषु पृथक्पृथक् ॥ १९
महाकुलेषु ये जाता वृत्ताः पूर्वतराश्च ये ।
तेषामथासुरो भावो हृदयान्नापसर्पति ॥ २०
तस्मात्तेनैव भावेन सानुषङ्गेन पार्थिवाः ।
आसुराण्येव कर्माणि न्यषेवन्भीमविक्रमाः ॥ २१
प्रत्यतिष्ठंश्च तेष्वेव तान्येव स्थापयन्ति च ।
भजन्ते तानि चाद्यापि ये बालिशतमा नराः ॥२२
तस्मादहं ब्रवीमि त्वां राजन्संचिन्त्य शास्त्रतः ।
संसिद्धाधिगमं कुर्यात्कर्म हिंसात्मकं त्यजेत् ॥ २३
न संकरेण द्रविणं विचिन्वीत विचक्षणः ।
धर्मार्थं न्यायमुत्सृज्य न तत्कल्याणमुच्यते ॥ २४
स त्वमेवंविधो दान्तः क्षत्रियः प्रियबान्धवः ।
प्रजा भृत्यांश्च पुत्रांश्च स्वधर्मेणानुपालय ॥ २५
इष्टानिष्टसमायोगो वैरं सौहार्दमेव च ।
अथ जातिसहस्राणि बहूनि परिवर्तते ॥ २६
तस्माद्गुणेषु रज्येथा मा दोषेषु कदाचन ।
निर्गुणो यो हि दुर्बुद्धिरात्मनः सोऽरिरुच्यते ॥२७
मानुषेषु महाराज धर्माधर्मौ प्रवर्ततः ।
न तथान्येषु भूतेषु मनुष्यरहितेष्विह ॥ २८
धर्मशीलो नरो विद्वानीहकोऽनीहकोऽपि वा ।
आत्मभूतः सदा लोके चरेद्भूतान्यहिंसयन् ॥ २९
यदा व्यपेतहृल्लेखं मनो भवति तस्य वै ।
नानृतं चैव भवति तदा कल्याणमृच्छति ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
त्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥

२८४

पराशर उवाच ।

एष धर्मविधिस्तात गृहस्थस्य प्रकीर्तितः ।
तपोविधिं तु वक्ष्यामि तन्मे निगदतः शृणु ॥ १
प्रायेण हि गृहस्थस्य ममत्वं नाम जायते ।

सङ्गागतं नरश्रेष्ठ भावैस्तामसराजसैः ॥ २
गृहाण्याश्रित्य गावश्च क्षेत्राणि च धनानि च ।
दाराः पुत्राश्च भृत्याश्च भवन्तीह नरस्य वै ॥ ३
एवं तस्य प्रवृत्तस्य नित्यमेवानुपश्यतः ।
रागद्वेषौ विवर्धेते ह्यनित्यत्वमपश्यतः ॥ ४
रागद्वेषाभिभूतं च नरं द्रव्यवशानुगम् ।
मोहजाता रतिर्नाम समुपैति नराधिप ॥ ५
कृतार्थो भोगतो भूत्वा स वै रतिपरायणः ।
लाभं ग्राम्यसुखादन्यं रतितो नानुपश्यति ॥ ६
ततो लोभाभिभूतात्मा सङ्गाद्वर्धयते जनम् ।
पुष्ट्यर्थं चैव तस्येह जनस्यार्थं चिकीर्षति ॥ ७
स जानन्नपि चाकार्यमर्थार्थं सेवते नरः ।
बालस्नेहपरीतात्मा तत्क्षयाच्चानुतप्यते ॥ ८
ततो मानेन संपन्नो रक्षन्नात्मपराजयम् ।
करोति येन भोगी स्यामिति तस्माद्विनश्यति ॥ ९
तपो हि बुद्धियुक्तानां शाश्वतं ब्रह्मदर्शनम् ।
अन्विच्छतां शुभं कर्म नराणां त्यजतां सुखम् ॥ १०
स्नेहायतननाशाच्च धननाशाच्च पार्थिव ।
आधिव्याधिप्रतापाच्च निर्वेदमुपगच्छति ॥ ११
निर्वेदादात्मसंबोधः संबोधाच्छास्त्रदर्शनम् ।
शास्त्रार्थदर्शनाद्राजंस्तप एवानुपश्यति ॥ १२
दुर्लभो हि मनुष्येन्द्र नरः प्रत्यवमर्शवान् ।
यो वै प्रियसुखे क्षीणे तपः कर्तुं व्यवस्यति ॥ १३
तपः सर्वगतं तात हीनस्यापि विधीयते ।
जितेन्द्रियस्य दान्तस्य स्वर्गमार्गप्रदेशकम् ॥ १४
प्रजापतिः प्रजाः पूर्वमसृजत्तपसा विभुः ।
क्वचित्क्वचिद्व्रतपरो व्रतान्यास्थाय पार्थिव ॥ १५
आदित्या वसवो रुद्रास्तथैवाग्न्यश्विमारुताः ।
विश्वेदेवास्तथा साध्याः पितरोऽथ मरुद्गणाः ॥१६
यक्षराक्षसगन्धर्वाः सिद्धाश्चान्ये दिवौकसः ।
संसिद्धास्तपसा तात ये चान्ये स्वर्गवासिनः ॥१७
ये चादौ ब्रह्मणा सृष्टा ब्राह्मणास्तपसा पुरा ।
ते भावयन्तः पृथिवीं विचरन्ति दिवं तथा ॥ १८
मर्त्यलोके च राजानो ये चान्ये गृहमेधिनः ।
महाकुलेषु दृश्यन्ते तत्सर्वं तपसः फलम् ॥ १९
कौशिकानि च वस्त्राणि शुभान्याभरणानि च ।
वाहनासनयानानि सर्वं तत्तपसः फलम् ॥ २०
मनोनुकूलाः प्रमदा रूपवत्यः सहस्रशः ।
वासः प्रासादपृष्ठे च तत्सर्वं तपसः फलम् ॥ २१
शयनानि च मुख्यानि भोज्यानि विविधानि च ।
अभिप्रेतानि सर्वाणि भवन्ति कृतकर्मणाम् ॥ २२
नाप्राप्यं तपसा किंचित्त्रैलोक्येऽस्मिन्परंतप ।
उपभोगपरित्यागः फलान्यकृतकर्मणाम् ॥ २३
सुखितो दुःखितो वापि नरो लोभं परित्यजेत् ।
अवेक्ष्य मनसा शास्त्रं बुद्ध्या च नृपसत्तम ॥ २४
असंतोषोऽसुखायैव लोभादिन्द्रियविभ्रमः ।
ततोऽस्य नश्यति प्रज्ञा विद्येवाभ्यासवर्जिता ॥२५
नष्टप्रज्ञो यदा भवति तदा न्यायं न पश्यति ।
तस्मात्सुखक्षये प्राप्ते पुमानुग्रं तपश्चरेत् ॥ २६
यदिष्टं तत्सुखं प्राहुर्द्वेष्यं दुःखमिहोच्यते ।
कृताकृतस्य तपसः फलं पश्यस्व यादृशम् ॥ २७
नित्यं भद्राणि पश्यन्ति विषयांश्चोपभुञ्जते ।
प्राकाश्यं चैव गच्छन्ति कृत्वा निष्कल्मषं तपः ॥
अप्रियाण्यवमानांश्च दुःखं बहुविधात्मकम् ।
फलार्थी सत्पथत्यक्तः प्राप्नोति विषयात्मकम् ॥२९
धर्मे तपसि दाने च विचिकित्सास्य जायते ।
स कृत्वा पापकान्येव निरयं प्रतिपद्यते ॥ ३०
सुखे तु वर्तमानो वै दुःखे वापि नरोत्तम ।
स्ववृत्ताद्यो न चलति शास्त्रचक्षुः स मानवः ॥३१
इषुप्रपातमात्रं हि स्पर्शयोगे रतिः स्मृता ।

रसने दर्शने घ्राणे श्रवणे च विशां पते ॥ ३२
ततोऽस्य जायते तीव्रा वेदना तत्क्षयात्पुनः ।
बुधा येन प्रशंसन्ति मोक्षं सुखमनुत्तमम् ॥ ३३
ततः फलार्थं चरति भवन्ति ज्यायसो गुणाः ।
धर्मवृत्त्या च सततं कामार्थाभ्यां न हीयते ॥३४
अप्रयत्नागताः सेव्या गृहस्थैर्विषयाः सदा ।
प्रयत्नेनोपगम्यश्च स्वधर्म इति मे मतिः ॥ ३५
मानिनां कुलजातानां नित्यं शास्त्रार्थचक्षुषाम् ।
धर्मक्रियावियुक्तानामशक्त्या संवृतात्मनाम् ॥ ३६
क्रियमाणं यदा कर्म नाशं गच्छति मानुषम् ।
तेषां नान्यदृते लोके तपसः कर्म विद्यते ॥ ३७
सर्वात्मना तु कुर्वीत गृहस्थः कर्मनिश्चयम् ।
दाक्ष्येण हव्यकव्यार्थं स्वधर्मं विचरेन्नृप ॥ ३८
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥३९

इति श्रीमहाभारते शान्तिपर्वणि
चतुरशीत्यधिकद्विशततमोऽध्यायः ॥ २८४ ॥

२८५

जनक उवाच ।

वर्णो विशेषवर्णानां महर्षे केन जायते ।
एतदिच्छाम्यहं श्रोतुं तद्ब्रूहि वदतां वर ॥ १
यदेतज्जायतेऽपत्यं स एवायमिति श्रुतिः ।
कथं ब्राह्मणतो जातो विशेषग्रहणं गतः ॥ २

पराशर उवाच ।

एवमेतन्महाराज येन जातः स एव सः ।
तपसस्त्वपकर्षेण जातिग्रहणतां गतः ॥ ३
सुक्षेत्राच्च सुबीजाच्च पुण्यो भवति संभवः ।
अतोऽन्यतरतो हीनादवरो नाम जायते ॥ ४
वक्त्राद्भुजाभ्यामूरुभ्यां पद्भ्यां चैवाथ जज्ञिरे ।
सृजतः प्रजापतेर्लोकानिति धर्मविदो विदुः ॥ ५
मुखजा ब्राह्मणास्तात बाहुजाः क्षत्रबन्धवः ।
ऊरुजा धनिनो राजन्पादजाः परिचारकाः ॥ ६
चतुर्णामेव वर्णानामागमः पुरुषर्षभ ।
अतोऽन्ये त्वतिरिक्ता ये ते वै संकरजाः स्मृताः ॥ ७
क्षत्रजातिरथाम्बष्ठा उग्रा वैदेहकास्तथा ।
श्वपाकाः पुल्कसाः स्तेना निषादाः सूतमागधाः ॥ ८
आयोगाः करणा व्रात्याश्चण्डालाश्च नराधिप ।
एते चतुर्भ्यो वर्णेभ्यो जायन्ते वै परस्परम् ॥ ९

जनक उवाच ।

ब्रह्मणैकेन जातानां नानात्वं गोत्रतः कथम् ।
बहूनीह हि लोके वै गोत्राणि मुनिसत्तम ॥ १०
यत्र तत्र कथं जाताः स्वयोनिं मुनयो गताः ।
शूद्रयोनौ समुत्पन्ना वियोनौ च तथापरे ॥ ११

पराशर उवाच ।

राजन्नैतद्भवेद्ग्राह्यमपकृष्टेन जन्मना ।
महात्मनां समुत्पत्तिस्तपसा भावितात्मनाम् ॥ १२
उत्पाद्य पुत्रान्मुनयो नृपते यत्र तत्र ह ।
स्वेनैव तपसा तेषामृषित्वं विदधुः पुनः ॥ १३
पितामहश्च मे पूर्वमृश्यशृङ्गश्च काश्यपः ।
वटस्ताण्ड्यः कृपश्चैव कक्षीवान्कमठादयः ॥ १४
यवक्रीतश्च नृपते द्रोणश्च वदतां वरः ।
आयुर्मतङ्गो दत्तश्च द्रुपदो मत्स्य एव च ॥ १५
एते स्वां प्रकृतिं प्राप्ता वैदेह तपसोऽऽश्रयात् ।
प्रतिष्ठिता वेदविदो दमे तपसि चैव हि ॥ १६
मूलगोत्राणि चत्वारि समुत्पन्नानि पार्थिव ।
अङ्गिराः कश्यपश्चैव वसिष्ठो भृगुरेव च ॥ १७
कर्मतोऽन्यानि गोत्राणि समुत्पन्नानि पार्थिव ।
नामधेयानि तपसा तानि च ग्रहणं सताम् ॥ १८

जनक उवाच ।

विशेषधर्मान्वर्णानां प्रब्रूहि भगवन्मम ।

तथा सामान्यधर्मांश्च सर्वत्र कुशलो ह्यसि ॥ १९

पराशर उवाच ।

प्रतिग्रहो याजनं च तथैवाध्यापनं नृप ।
विशेषधर्मो विप्राणां रक्षा क्षत्रस्य शोभना ॥ २०
कृषिश्च पाशुपाल्यं च वाणिज्यं च विशामपि ।
द्विजानां परिचर्या च शूद्रकर्म नराधिप ॥ २१
विशेषधर्मा नृपते वर्णानां परिकीर्तिताः ।
धर्मान्साधारणांस्तात विस्तरेण शृणुष्व मे ॥ २२
आनृशंस्यमहिंसा चाप्रमादः संविभागिता ।
श्राद्धकर्मातिथेयं च सत्यमक्रोध एव च ॥ २३
स्वेषु दारेषु संतोषः शौचं नित्यानसूयता ।
आत्मज्ञानं तितिक्षा च धर्माः साधारणा नृप ॥२४
ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः ।
अत्र तेषामधीकारो धर्मेषु द्विपदां वर ॥ २५
विकर्मावस्थिता वर्णाः पतन्ति नृपते त्रयः ।
उन्नमन्ति यथासन्तमाश्रित्येह स्वकर्मसु ॥ २६

न चापि शूद्रः पततीति निश्चयो
न चापि संस्कारमिहार्हतीति वा ।
श्रुतिप्रवृत्तं न च धर्ममाप्नुते
न चास्य धर्मे प्रतिषेधनं कृतम् ॥ २७
वैदेहकं शूद्रमुदाहरन्ति
द्विजा महाराज श्रुतोपपन्नाः ।
अहं हि पश्यामि नरेन्द्र देवं
विश्वस्य विष्णुं जगतः प्रधानम् ॥ २८

सतां वृत्तमनुष्ठाय निहीना उज्जिहीर्षवः ।
मन्त्रवर्जं न दुष्यन्ति कुर्वाणाः पौष्टिकीः क्रियाः ॥
यथा यथा हि सद्वृत्तमालम्बन्तीतरे जनाः ।
तथा तथा सुखं प्राप्य प्रेत्य चेह च शेरते ॥ ३०

जनक उवाच ।

किं कर्म दूषयत्येनमथ जातिर्महामुने ।
संदेहो मे समुत्पन्नस्तन्मे व्याख्यातुमर्हसि ॥ ३१

पराशर उवाच ।

असंशयं महाराज उभयं दोषकारकम् ।
कर्म चैव हि जातिश्च विशेषं तु निशामय ॥ ३२
जात्या च कर्मणा चैव दुष्टं कर्म निषेवते ।
जात्या दुष्टश्च यः पापं न करोति स पूरुषः ॥३३
जात्या प्रधानं पुरुषं कुर्वाणं कर्म धिक्कृतम् ।
कर्म तद्दूषयत्येनं तस्मात्कर्म नशोभनम् ॥ ३४

जनक उवाच ।

कानि कर्माणि धर्म्याणि लोकेऽस्मिन्द्विजसत्तम ।
न हिंसन्तीह भूतानि क्रियमाणानि सर्वदा ॥ ३५

पराशर उवाच ।

शृणु मेऽत्र महाराज यन्मां त्वं परिपृच्छसि ।
यानि कर्माण्यहिंस्राणि नरं त्रायन्ति सर्वदा ॥३६
संन्यस्याग्नीनुपासीनाः पश्यन्ति विगतज्वराः ।
नैःश्रेयसं धर्मपथं समारुह्य यथाक्रमम् ॥ ३७
प्रश्रिता विनयोपेता दमनित्याः सुसंशिताः ।
प्रयान्ति स्थानमजरं सर्वकर्मविवर्जिताः ॥ ३८

सर्वे वर्णा धर्मकार्याणि सम्य-
क्कृत्वा राजन्सत्यवाक्यानि चोक्त्वा ।
त्यक्त्वाधर्मं दारुणं जीवलोके
यान्ति स्वर्गं नात्र कार्यो विचारः ॥ ३९

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशीत्यधिकद्विशततमोऽध्यायः ॥ २८५ ॥

२८६

पराशर उवाच ।

पिता सखायो गुरवः स्त्रियश्च
न निर्गुणा नाम भवन्ति लोके ।
अनन्यभक्ताः प्रियवादिनश्च
हिताश्च वश्याश्च तथैव राजन् ॥ १

पिता परं दैवतं मानवानां
मातुर्विशिष्टं पितरं वदन्ति
ज्ञानस्य लाभं परमं वदन्ति
जितेन्द्रियार्थाः परमाप्नुवन्ति ॥ २
रणाजिरे यत्र शराग्निसंस्तरे
नृपात्मजो घातमवाप्य दह्यते ।
प्रयाति लोकानमरैः सुदुर्लभा-
न्निषेवते स्वर्गफलं यथासुखम् ॥ ३
श्रान्तं भीतं भ्रष्टशस्त्रं रुदन्तं
पराङ्मुखं परिबर्हैश्च हीनम् ।
अनुद्यतं रोगिणं याचमानं
न वै हिंस्याद्बालवृद्धौ च राजन् ॥ ४
परिबर्हैः सुसंपन्नमुद्यतं तुल्यतां गतम् ।
अतिक्रमेत नृपतिः संग्रामे क्षत्रियात्मजम् ॥ ५
तुल्यादिह वधः श्रेयान्विशिष्टाच्चेति निश्चयः ।
निहीनात्कातराच्चैव नृपाणां गर्हितो वधः ॥ ६
पापात्पापसमाचारान्निहीनाच्च नराधिप ।
पाप एव वधः प्रोक्तो नरकायेति निश्चयः ॥ ७
न कश्चित्त्राति वै राजन्दिष्टान्तवशमागतम् ।
सावशेषायुषं चापि कश्चिदेवापकर्षति ॥ ८
स्निग्धैश्च क्रियमाणानि कर्माणीह निवर्तयेत् ।
हिंसात्मकानि कर्माणि नायुरिच्छेत्परायुषा ॥ ९
गृहस्थानां तु सर्वेषां विनाशमभिकाङ्क्षताम् ।
निधनं शोभनं तात पुलिनेषु क्रियावताम् ॥ १०
आयुषि क्षयमापन्ने पञ्चत्वमुपगच्छति ।
नाकारणात्तद्भवति कारणैरुपपादितम् ॥ ११
तथा शरीरं भवति देहाद्येनोपपादितम् ।
अध्वानं गतकश्चायं प्राप्तश्चायं गृहाद्गृहम् ॥ १२
द्वितीयं कारणं तत्र नान्यत्किंचन विद्यते ।
तद्देहं देहिनां युक्तं मोक्षभूतेषु वर्तते ॥ १३
सिरास्नाय्वस्थिसंघातं बीभत्सामेध्यसंकुलम् ।
भूतानामिन्द्रियाणां च गुणानां च समागमम् ॥१४
त्वगन्तं देहमित्याहुर्विद्वांसोऽध्यात्मचिन्तकाः ।
गुणैरपि परिक्षीणं शरीरं मर्त्यतां गतम् ॥ १५
शरीरिणा परित्यक्तं निश्चेष्टं गतचेतनम् ।
भूतैः प्रकृतिमापन्नैस्ततो भूमौ निमज्जति ॥ १६
भावितं कर्मयोगेन जायते तत्र तत्र ह ।
इदं शरीरं वैदेह म्रियते यत्र तत्र ह ।
तत्स्वभावोऽपरो दृष्टो विसर्गः कर्मणस्तथा ॥ १७
न जायते तु नृपते कंचित्कालमयं पुनः ।
परिभ्रमति भूतात्मा द्यामिवाम्बुधरो महान् ॥ १८
स पुनर्जायते राजन्प्राप्येहायतनं नृप ।
मनसः परमो ह्यात्मा इन्द्रियेभ्यः परं मनः ॥ १९
द्विविधानां च भूतानां जङ्गमाः परमा नृप ।
जङ्गमानामपि तथा द्विपदाः परमा मताः ।
द्विपदानामपि तथा द्विजा वै परमा स्मृताः ॥ २०
द्विजानामपि राजेन्द्र प्रज्ञावन्तः परा मताः ।
प्राज्ञानामात्मसंबुद्धाः संबुद्धानाममानिनः ॥ २१
जातमन्वेति मरणं नृणामिति विनिश्चयः ।
अन्तवन्ति हि कर्माणि सेवन्ते गुणतः प्रजाः ॥२
आपन्ने तूत्तरां काष्ठां सूर्ये यो निधनं व्रजेत् ।
नक्षत्रे च मुहूर्ते च पुण्ये राजन्स पुण्यकृत् ॥२
अयोजयित्वा क्लेशेन जनं प्लाव्य च दुष्कृतम् ।
मृत्युनाप्राकृतेनेह कर्म कृत्वात्मशक्तितः ॥ २४
विषमुद्बन्धनं दाहो दस्युहस्तात्तथा वधः ।
दंष्ट्रिभ्यश्च पशुभ्यश्च प्राकृतो वध उच्यते ॥ २५
न चैभिः पुण्यकर्माणो युज्यन्ते नाभिसंधिजैः ।
एवंविधैश्च बहुभिरपरैः प्राकृतैरपि ॥ २६
ऊर्ध्वं हित्वा प्रतिष्ठन्ते प्राणाः पुण्यकृतां नृप ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्मणाम् ॥ २

एकः शत्रुर्न द्वितीयोऽस्ति शत्रु-
रज्ञानतुल्यः पुरुषस्य राजन् ।
येनावृतः कुरुते संप्रयुक्तो
घोराणि कर्माणि सुदारुणानि ॥ २८
प्रबोधनार्थं श्रुतिधर्मयुक्तं
वृद्धानुपास्यं च भवेत यस्य
प्रयत्नसाध्यो हि स राजपुत्र
प्रज्ञाशरेणोन्मथितः परैति ॥ २९
अधीत्य वेदांस्तपसा ब्रह्मचारी
यज्ञाञ्शक्त्या संनिसृज्येह पञ्च ।
वनं गच्छेत्पुरुषो धर्मकामः
श्रेयश्चित्वा स्थापयित्वा स्ववंशम् ॥ ३०
उपभोगैरपि त्यक्तं नात्मानमवसादयेत् ।
चण्डालत्वेऽपि मानुष्यं सर्वथा तात दुर्लभम् ॥३१
इयं हि योनिः प्रथमा यां प्राप्य जगतीपते ।
आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः ॥३२
कथं न विप्रणश्येम योनितोऽस्या इति प्रभो ।
कुर्वन्ति धर्मं मनुजाः श्रुतिप्रामाण्यदर्शनात् ॥ ३३
यो दुर्लभतरं प्राप्य मानुष्यमिह वै नरः ।
धर्मावमन्ता कामात्मा भवेत्स खलु वञ्च्यते ॥३४
यस्तु प्रीतिपुरोगेण चक्षुषा तात पश्यति ।
दीपोपमानि भूतानि यावदर्चिर्न नश्यति ॥ ३५
सान्त्वेनानुप्रदानेन प्रियवादेन चाप्युत ।
समदुःखसुखो भूत्वा स परत्र महीयते ॥ ३६
दानं त्यागः शोभना मूर्तिरद्भ्यो
भूयः प्लाव्यं तपसा वै शरीरम् ।
सरस्वतीनैमिषपुष्करेषु
ये चाप्यन्ये पुण्यदेशाः पृथिव्याम् ॥ ३७
गृहेषु येषामसवः पतन्ति
तेषामथो निर्हरणं प्रशस्तम् ।
यानेन वै प्रापणं च श्मशाने
शौचेन नूनं विधिना चैव दाहः ॥ ३८
इष्टिः पुष्टिर्यजनं याजनं च
दानं पुण्यानां कर्मणां च प्रयोगः ।
शक्त्या पित्र्यं यच्च किंचित्प्रशस्तं
सर्वाण्यात्मार्थे मानवो यः करोति ॥ ३९
धर्मशास्त्राणि वेदाश्च षडङ्गानि नराधिप ।
श्रेयसोऽर्थे विधीयन्ते नरस्याक्लिष्टकर्मणः ॥ ४०

भीष्म उवाच ।

एतद्वै सर्वमाख्यातं मुनिना सुमहात्मना ।
विदेहराजाय पुरा श्रेयसोऽर्थे नराधिप ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
षडशीत्यधिकद्विशततमोऽध्यायः ॥ २८६ ॥

२८७

भीष्म उवाच ।

पुनरेव तु पप्रच्छ जनको मिथिलाधिपः ।
पराशरं महात्मानं धर्मे परमनिश्चयम् ॥ १
किं श्रेयः का गतिर्ब्रह्मन्किं कृतं न विनश्यति ।
क्व गतो न निवर्तेत तन्मे ब्रूहि महामुने ॥ २

पराशर उवाच ।

असङ्गः श्रेयसो मूलं ज्ञानं ज्ञानगतिः पुरा ।
चीर्णं तपो न प्रणश्येद्वापः क्षेत्रे न नश्यति ॥ ३
छित्त्वाधर्ममयं पाशं यदा धर्मेऽभिरज्यते ।
दत्त्वाभयकृतं दानं तदा सिद्धिमवाप्नुयात् ॥ ४
यो ददाति सहस्राणि गवामश्वशतानि च ।
अभयं सर्वभूतेभ्यस्तद्दानमतिवर्तते ॥ ५
वसन्विषयमध्येऽपि न वसत्येव बुद्धिमान् ।
संवसत्येव दुर्बुद्धिरसत्सु विषयेष्वपि ॥ ६
नाधर्मः श्लिष्यते प्राज्ञमापः पुष्करपर्णवत् ।

अप्राज्ञमधिकं पापं श्लिष्यते जतु काष्ठवत् ॥ ७
नाधर्मः कारणापेक्षी कर्तारमभिमुञ्चति ।
कर्ता खलु यथाकालं ततःसर्वमभिपद्यते ।
न भिद्यन्ते कृतात्मान आत्मप्रत्ययदर्शिनः ॥ ८
बुद्धिकर्मेन्द्रियाणां हि प्रमत्तो यो न बुध्यते ।
शुभाशुभेषु सक्तात्मा प्राप्नोति सुमहद्भयम् ॥ ९
वीतरागो जितक्रोधः सम्यग्भवति यः सदा ।
विषये वर्तमानोऽपि न स पापेन युज्यते ॥ १०
मर्यादायां धर्मसेतुर्निबद्धो नैव सीदति ।
पुष्टस्रोत इवायत्तः स्फीतो भवति संचयः ॥ ११
यथा भानुगतं तेजो मणिः शुद्धः समाधिना ।
आदत्ते राजशार्दूल तथा योगः प्रवर्तते ॥ १२

यथा तिलानामिह पुष्पसंश्रया-
त्पृथक्पृथग्याति गुणोऽतिसौम्यताम् ।
तथा नराणां भुवि भावितात्मनां
यथाश्रयं सत्त्वगुणः प्रवर्तते ॥ १३
जहाति दारानिहते न संपदः
सदश्वयानं विविधाश्च याः क्रियाः ।
त्रिविष्टपे जातमतिर्यदा नर-
स्तदास्य बुद्धिर्विषयेषु भिद्यते ॥ १४
प्रसक्तबुद्धिर्विषयेषु यो नरो
यो बुध्यते ह्यात्महितं कदाचन ।
स सर्वभावानुगतेन चेतसा
नृपामिषेणेव झषो विकृष्यते ॥ १५

संघातवान्मर्त्यलोकः परस्परमपाश्रितः ।
कदलीगर्भनिःसारो नौरिवाप्सु निमज्जति ॥ १६

न धर्मकालः पुरुषस्य निश्चितो
न चापि मृत्युः पुरुषं प्रतीक्षते ।
क्रिया हि धर्मस्य सदैव शोभना
यदा नरो मृत्युमुखेऽभिवर्तते ॥ १७

यथान्धः स्वगृहे युक्तो ह्यभ्यासादेव गच्छति ।
तथा युक्तेन मनसा प्राज्ञो गच्छति तां गतिम् ॥
मरणं जन्मनि प्रोक्तं जन्म वै मरणाश्रितम् ।
अविद्वान्मोक्षधर्मेषु बद्धो भ्रमति चक्रवत् ॥ १९
यथा मृणालोऽनुगतमाशु मुञ्चति कर्दमम् ।
तथात्मा पुरुषस्येह मनसा परिमुच्यते ।
मनः प्रणयतेऽऽत्मानं स एनमभियुञ्जति ॥ २०
परार्थे वर्तमानस्तु स्वकार्यं योऽभिमन्यते ।
इन्द्रियार्थेषु सक्तः सन्स्वकार्यात्परिहीयते ॥ २१
अधस्तिर्यग्गतिं चैव स्वर्गे चैव परां गतिम् ।
प्राप्नोति स्वकृतैरात्मा प्राज्ञस्येहेतरस्य च ॥ २२
मृन्मये भाजने पक्के यथा वै न्यस्यते द्रवः ।
तथा शरीरं तपसा तप्तं विषयमश्नुते ॥ २३
विषयानश्नुते यस्तु न स भोक्ष्यत्यसंशयम् ।
यस्तु भोगांस्त्यजेदात्मा स वै भोक्तुं व्यवस्यति ॥
नीहारेण हि संवीतः शिश्नोदरपरायणः ।
जात्यन्ध इव पन्थानमावृतात्मा न बुध्यते ॥ २५
वणिग्यथा समुद्राद्वै यथार्थं लभते धनम् ।
तथा मर्त्यार्णवे जन्तोः कर्मविज्ञानतो गतिम् ॥२
अहोरात्रमये लोके जरारूपेण संचरन् ।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा ॥ २७
स्वयं कृतानि कर्माणि जातो जन्तुः प्रपद्यते ।
नाकृतं लभते कश्चित्किंचिदत्र प्रियाप्रियम् ॥ २
शयानं यान्तमासीनं प्रवृत्तं विषयेषु च ।
शुभाशुभानि कर्माणि प्रपद्यन्ते नरं सदा ॥ २९
न ह्यन्यत्तीरमासाद्य पुनस्तर्तुं व्यवस्यति ।
दुर्लभो दृश्यते ह्यस्य विनिपातो महार्णवे ॥ ३
यथा भारावसक्ता हि नौर्महाम्भसि तन्तुना ।
तथा मनोऽभियोगाद्वै शरीरं प्रतिकर्षति ॥ ३१
यथा समुद्रमभितः संस्यूताः सरितोऽपराः ।

तथाद्या प्रकृतिर्योगादभिसंस्यूयते सदा ॥ ३२
स्नेहपाशैर्बहुविधैरासक्तमनसो नराः ।
प्रकृतिस्था विषीदन्ति जले सैकतवेश्मवत् ॥ ३३
शरीरगृहसंस्थस्य शौचतीर्थस्य देहिनः ।
बुद्धिमार्गप्रयातस्य सुखं त्विह परत्र च ॥ ३४
विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः ।
परार्थं विस्तराः सर्वे त्यागमात्महितं विदुः ॥ ३५
संकल्पजो मित्रवर्गो ज्ञातयः कारणात्मकाः ।
भार्या दासाश्च पुत्राश्च स्वमर्थमनुयुञ्जते ॥ ३६
न माता न पिता किंचित्कस्यचित्प्रतिपद्यते ।
दानपथ्योदनो जन्तुः स्वकर्मफलमश्नुते ॥ ३७
माता पुत्रः पिता भ्राता भार्या मित्रजनस्तथा ।
अष्टापदपदस्थाने त्वक्षमुद्रेव न्यस्यते ॥ ३८

सर्वाणि कर्माणि पुरा कृतानि
शुभाशुभान्यात्मनो यान्ति जन्तोः ।
उपस्थितं कर्मफलं विदित्वा
बुद्धिं तथा चोदयतेऽन्तरात्मा ॥ ३९

व्यवसायं समाश्रित्य सहायान्योऽधिगच्छति ।
न तस्य कश्चिदारम्भः कदाचिदवसीदति ॥ ४०
अद्वैधमनसं युक्तं शूरं धीरं विपश्चितम् ।
न श्रीः संत्यजते नित्यमादित्यमिव रश्मयः ॥ ४१
आस्तिक्यव्यवसायाभ्यामुपायाद्विस्मयाद्धिया ।
यमारभत्यनिन्द्यात्मा न सोऽर्थः परिसीदति ॥ ४२
सर्वः स्वानि शुभाशुभानि नियतं कर्माणि जन्तुः स्वयं
गर्भात्संप्रतिपद्यते तदुभयं यत्तेन पूर्वं कृतम् ।
मृत्युश्चापरिहारवान्समगतिः कालेन विच्छेदिता
दारोश्चूर्णमिवाश्मसारविहितं कर्मान्तिकं प्रापयेत् ॥

स्वरूपतामात्मकृतं च विस्तरं
कुलान्वयं द्रव्यसमृद्धिसंचयम् ।
नरो हि सर्वो लभते यथाकृतं
शुभाशुभेनात्मकृतेन कर्मणा ॥ ४४

भीष्म उवाच ।

इत्युक्तो जनको राजन्यथातथ्यं मनीषिणा ।
श्रुत्वा धर्मविदां श्रेष्ठः परां मुदमवाप ह ॥ ४५

इति श्रीमहाभारते शान्तिपर्वणि
सप्ताशीत्यधिकद्विशततमोऽध्यायः ॥ २८७ ॥

२८८

युधिष्ठिर उवाच ।

सत्यं क्षमां दमं प्रज्ञां प्रशंसन्ति पितामह ।
विद्वांसो मनुजा लोके कथमेतन्मतं तव ॥ १

भीष्म उवाच ।

अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
साध्यानामिह संवादं हंसस्य च युधिष्ठिर ॥ २
हंसो भूत्वाथ सौवर्णस्त्वजो नित्यः प्रजापतिः ।
स वै पर्येति लोकांस्त्रीनथ साध्यानुपागमत् ॥ ३

साध्या ऊचुः ।

शकुने वयं स्म देवा वै साध्यास्त्वामनुयुज्महे ।
पृच्छामस्त्वां मोक्षधर्मं भवांश्च किल मोक्षवित् ॥४

श्रुतोऽसि नः पण्डितो धीरवादी
साधुशब्दः पतते ते पतत्रिन् ।
किं मन्यसे श्रेष्ठतमं द्विज त्वं
कस्मिन्मनस्ते रमते महात्मन् ॥ ५
तन्नः कार्यं पक्षिवर प्रशाधि
यत्कार्याणां मन्यसे श्रेष्ठमेकम् ।
यत्कृत्वा वै पुरुषः सर्वबन्धै-
र्विमुच्यते विहगेन्द्रेह शीघ्रम् ॥ ६

हंस उवाच ।

इदं कार्यममृताशाः शृणोमि
तपो दमः सत्यमात्माभिगुप्तिः ।

ग्रन्थीन्विमुच्य हृदयस्य सर्वा-
न्प्रियाप्रिये स्वं वशमानयीत ॥ ७
नारुंतुदः स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ।
ययास्य वाचा पर उद्विजेत
न तां वदेद्रुशतीं पापलोक्याम् ॥ ८
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ ९
परश्चेदेनमतिवादबाणै-
र्भृशं विध्येच्छम एवेह कार्यः ।
संरोष्यमाणः प्रतिमृष्यते यः
स आदत्ते सुकृतं वै परस्य ॥ १०
क्षेपाभिमानादभिषङ्गव्यलीकं
निगृह्णाति ज्वलितं यश्च मन्युम् ।
अदुष्टचेता मुदितोऽनसूयुः
स आदत्ते सुकृतं वै परेषाम् ॥ ११
आक्रुश्यमानो न वदामि किंचि-
त्क्षमाम्यहं ताड्यमानश्च नित्यम् ।
श्रेष्ठं ह्येतत्क्षममप्याहुरार्याः
सत्यं तथैवार्जवमानृशंस्यम् ॥ १२
वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दमः ।
दमस्योपनिषन्मोक्ष एतत्सर्वानुशासनम् ॥ १३
वाचो वेगं मनसः क्रोधवेगं
विवित्सावेगमुदरोपस्थवेगम् ।
एतान्वेगान्यो विषहत्युदीर्णां-
स्तं मन्येऽहं ब्राह्मणं वै मुनिं च ॥ १४
अक्रोधनः क्रुध्यतां वै विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषान्मानुषो वै विशिष्ट-
स्तथाज्ञानाज्ज्ञानवान्वै प्रधानः ॥ १५
आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ १६
यो नात्युक्तः प्राह रूक्षं प्रियं वा
यो वा हतो न प्रतिहन्ति धैर्यात् ।
पापं च यो नेच्छति तस्य हन्तु-
स्तस्मै देवाः स्पृहयन्ते सदैव ॥ १७
पापीयसः क्षमेतैव श्रेयसः सदृशस्य च ।
विमानितो हतोऽऽक्रुष्ट एवं सिद्धिं गमिष्यति ॥१८
सदाहमार्यान्निभृतोऽप्युपासे
न मे विवित्सा न च मेऽस्ति रोषः ।
न चाप्यहं लिप्समानः परैमि
न चैव किंचिद्विषमेण यामि ॥ १९
नाहं शप्तः प्रतिशपामि किंचि-
द्दमं द्वारं ह्यमृतस्येह वेद्मि ।
गुह्यं ब्रह्म तदिदं वो ब्रवीमि
न मानुषाच्छ्रेष्ठतरं हि किंचित् ॥ २०
विमुच्यमानः पापेभ्यो घनेभ्य इव चन्द्रमाः ।
विरजाः कालमाकाङ्क्षन्धीरो धैर्येण सिध्यति ॥ २१
यः सर्वेषां भवति ह्यर्चनीय
उत्सेचने स्तम्भ इवाभिजातः ।
यस्मै वाचं सुप्रशस्तां वदन्ति
स वै देवान्गच्छति संयतात्मा ॥ २२
न तथा वक्तुमिच्छन्ति कल्याणान्पुरुषे गुणान् ।
यथैषां वक्तुमिच्छन्ति नैर्गुण्यमनुयुञ्जकाः ॥ २३
यस्य वाङ्मनसी गुप्ते सम्यक्प्रणिहिते सदा ।
वेदास्तपश्च त्यागश्च स इदं सर्वमाप्नुयात् ॥ २४
आक्रोशनावमानाभ्यामबुधाद्वर्धते बुधः ।
तस्मान्न वर्धयेदन्यं न चात्मानं विहिंसयेत् ॥ २५

अमृतस्येव संतृप्येदवमानस्य वै द्विजः ।
सुखं ह्यवमतः शेते योऽवमन्ता स नश्यति ॥ २६
यत्क्रोधनो यजते यद्ददाति
तद्वा तपस्तप्यति यज्जुहोति ।
वैवस्वतस्तद्धरतेऽस्य सर्वं
मोघः श्रमो भवति क्रोधनस्य ॥ २७
चत्वारि यस्य द्वाराणि सुगुप्तान्यमरोत्तमाः ।
उपस्थमुदरं हस्तौ वाक्चतुर्थी स धर्मवित् ॥ २८
सत्यं दमं ह्यार्जवमानृशंस्यं
धृतिं तितिक्षामभिसेवमानः ।
स्वाध्यायनित्योऽस्पृहयन्परेषा-
मेकान्तशील्यूर्ध्वगतिर्भवेत्सः ॥ २९
सर्वानेताननुचरन्वत्सवच्चतुरः स्तनान् ।
न पावनतमं किंचित्सत्यादध्यगमं क्वचित् ॥ ३०
आचक्षेऽहं मनुष्येभ्यो देवेभ्यः प्रतिसंचरन् ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥ ३१
यादृशैः संनिवसति यादृशांश्चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥ ३२
यदि सन्तं सेवते यद्यसन्तं
तपस्विनं यदि वा स्तेनमेव ।
वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपैति ॥ ३३
सदा देवाः साधुभिः संवदन्ते
न मानुषं विषयं यान्ति द्रष्टुम् ।
नेन्दुः समः स्यादसमो हि वायु-
रुच्चावचं विषयं यः स वेद ॥ ३४
अदुष्टं वर्तमाने तु हृदयान्तरपूरुषे ।
तेनैव देवाः प्रीयन्ते सतां मार्गस्थितेन वै ॥ ३५
शिश्नोदरे येऽभिरताः सदैव
स्तेना नरा वाक्परुषाश्च नित्यम् ।
अपेतदोषानिति तान्विदित्वा
दूराद्देवाः संपरिवर्जयन्ति ॥ ३६
न वै देवा हीनसत्त्वेन तोष्याः
सर्वाशिना दुष्कृतकर्मणा वा ।
सत्यव्रता ये तु नराः कृतज्ञा
धर्मे रतास्तैः सह संभजन्ते ॥ ३७
अव्याहृतं व्याहृताच्छ्रेय आहुः
सत्यं वदेद्व्याहृतं तद्द्वितीयम् ।
धर्मं वदेद्व्याहृतं तत्तृतीयं
प्रियं वदेद्व्याहृतं तच्चतुर्थम् ॥ ३८

साध्या ऊचुः ।

केनायमावृतो लोकः केन वा न प्रकाशते ।
केन त्यजति मित्राणि केन स्वर्गं न गच्छति ॥३९

हंस उवाच ।

अज्ञानेनावृतो लोको मात्सर्यान्न प्रकाशते ।
लोभात्त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति ॥

साध्या ऊचुः ।

कः स्विदेको रमते ब्राह्मणानां
कः स्विदेको बहुभिर्जोषमास्ते ।
कः स्विदेको बलवान्दुर्बलोऽपि
कः स्विदेषां कलहं नान्ववैति ॥ ४१

हंस उवाच ।

प्राज्ञ एको रमते ब्राह्मणानां
प्राज्ञ एको बहुभिर्जोषमास्ते ।
प्राज्ञ एको बलवान्दुर्बलोऽपि
प्राज्ञ एषां कलहं नान्ववैति ॥ ४२

साध्या ऊचुः ।

किं ब्राह्मणानां देवत्वं किं च साधुत्वमुच्यते ।
असाधुत्वं च किं तेषां किमेषां मानुषं मतम् ॥ ४३

हंस उवाच ।
स्वाध्याय एषां देवत्वं व्रतं साधुत्वमुच्यते ।
असाधुत्वं परीवादो मृत्युर्मानुषमुच्यते ॥ ४४
भीष्म उवाच ।
संवाद इत्ययं श्रेष्ठः साध्यानां परिकीर्तितः ।
क्षेत्रं वै कर्मणां योनिः सद्भावः सत्यमुच्यते ॥४५
इति श्रीमहाभारते शान्तिपर्वणि
अष्टाशीत्यधिकद्विशततमोऽध्यायः ॥ २८८ ॥

२८९

युधिष्ठिर उवाच ।
सांख्ये योगे च मे तात विशेषं वक्तुमर्हसि ।
तव सर्वज्ञ सर्वं हि विदितं कुरुसत्तम ॥ १
भीष्म उवाच ।
सांख्याः सांख्यं प्रशंसन्ति योगा योगं द्विजातयः ।
वदन्ति कारणैः श्रैष्ठ्यं स्वपक्षोद्भावनाय वै ॥ २
अनीश्वरः कथं मुच्येदित्येवं शत्रुकर्शन ।
वदन्ति कारणैः श्रैष्ठ्यं योगाः सम्यङ्मनीषिणः॥ ३
वदन्ति कारणं चेदं सांख्याः सम्यग्द्विजातयः ।
विज्ञायेह गतीः सर्वा विरक्तो विषयेषु यः ॥ ४
ऊर्ध्वं स देहात्सुव्यक्तं विमुच्येदिति नान्यथा ।
एतदाहुर्महाप्राज्ञाः सांख्यं वै मोक्षदर्शनम् ॥ ५
स्वपक्षे कारणं ग्राह्यं समर्थं वचनं हितम् ।
शिष्टानां हि मतं ग्राह्यं त्वद्विधैः शिष्टसंमतैः ॥ ६
प्रत्यक्षहेतवो योगाः सांख्याः शास्त्रविनिश्चयाः ।
उभे चैते मते तत्त्वे मम तात युधिष्ठिर ॥ ७
उभे चैते मते ज्ञाने नृपते शिष्टसंमते ।
अनुष्ठिते यथाशास्त्रं नयेतां परमां गतिम् ॥ ८
तुल्यं शौचं तयोर्युक्तं दया भूतेषु चानघ ।
व्रतानां धारणं तुल्यं दर्शनं न समं तयोः ॥ ९
युधिष्ठिर उवाच ।
यदि तुल्यं व्रतं शौचं दया चात्र पितामह ।
तुल्यं न दर्शनं कस्मात्तन्मे ब्रूहि पितामह ॥ १०
भीष्म उवाच ।
रागं मोहं तथा स्नेहं कामं क्रोधं च केवलम् ।
योगाच्छित्त्वादितो दोषान्पञ्चैतान्प्राप्नुवन्ति तत् ॥
यथा चानिमिषाः स्थूला जालं छित्त्वा पुनर्जलम् ।
प्राप्नुवन्ति तथा योगास्तत्पदं वीतकल्मषाः ॥ १२
तथैव वागुरां छित्त्वा बलवन्तो यथा मृगाः ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥ १३
लोभजानि तथा राजन्बन्धनानि बलान्विताः ।
छित्त्वा योगाः परं मार्गं गच्छन्ति विमलाः शिवम्॥
अबलाश्च मृगा राजन्वागुरासु तथापरे ।
विनश्यन्ति न संदेहस्तद्वद्योगबलादृते ॥ १५
बलहीनाश्च कौन्तेय यथा जालगता झषाः ।
अन्तं गच्छन्ति राजेन्द्र तथा योगाः सुदुर्बलाः ॥
यथा च शकुनाः सूक्ष्माः प्राप्य जालमरिंदम ।
तत्र सक्ता विपद्यन्ते मुच्यन्ते च बलान्विताः ॥१७
कर्मजैर्बन्धनैर्बद्धास्तद्वद्योगाः परंतप ।
अबला वै विनश्यन्ति मुच्यन्ते च बलान्विताः ॥
अल्पकश्च यथा राजन्वह्निः शाम्यति दुर्बलः ।
आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगोऽबलः प्रभो ॥१९
स एव च यदा राजन्वह्निर्जातबलः पुनः ।
समीरणयुतः कृत्स्नां दहेत्क्षिप्रं महीमपि ॥ २०
तद्वज्जातबलो योगी दीप्ततेजा महाबलः ।
अन्तकाल इवादित्यः कृत्स्नं संशोषयेज्जगत् ॥ २१
दुर्बलश्च यथा राजन्स्रोतसा ह्रियते नरः ।
बलहीनस्तथा योगो विषयैर्ह्रियतेऽवशः ॥ २२
तदेव च यथा स्रोतो विष्टम्भयति वारणः ।
तद्वद्योगबलं लब्ध्वा व्यूहते विषयान्बहून् ॥ २३

विशन्ति चावशाः पार्थ योगा योगबलान्विताः ।
प्रजापतीनृषीन्देवान्महाभूतानि चेश्वराः ॥ २४
न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः ।
ईशते नृपते सर्वे योगस्यामिततेजसः ॥ २५
आत्मनां च सहस्राणि बहूनि भरतर्षभ ।
योगः कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् ॥ २६
प्राप्नुयाद्विषयांश्चैव पुनश्चोग्रं तपश्चरेत् ।
संक्षिपेच्च पुनः पार्थ सूर्यस्तेजोगुणानिव ॥ २७
बलस्थस्य हि योगस्य बन्धनेशस्य पार्थिव ।
विमोक्षप्रभविष्णुत्वमुपपन्नमसंशयम् ॥ २८
बलानि योगे प्रोक्तानि मयैतानि विशां पते ।
निदर्शनार्थं सूक्ष्माणि वक्ष्यामि च पुनस्तव ॥ २९
आत्मनश्च समाधाने धारणां प्रति चाभिभो ।
निदर्शनानि सूक्ष्माणि शृणु मे भरतर्षभ ॥ ३०
अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः ।
युक्तः सम्यक्तथा योगी मोक्षं प्राप्नोत्यसंशयम् ॥३१
स्नेहपूर्णे यथा पात्रे मन आधाय निश्चलम् ।
पुरुषो यत्त आरोहेत्सोपानं युक्तमानसः ॥ ३२
युक्त्वा तथायमात्मानं योगः पार्थिव निश्चलम् ।
करोत्यमलमात्मानं भास्करोपमदर्शनम् ॥ ३३
यथा च नावं कौन्तेय कर्णधारः समाहितः ।
महार्णवगतां शीघ्रं नयेत्पार्थिव पत्तनम् ॥ ३४
तद्वदात्मसमाधानं युक्त्वा योगेन तत्त्ववित् ।
दुर्गमं स्थानमाप्नोति हित्वा देहमिमं नृप ॥ ३५
सारथिश्च यथा युक्त्या सदश्वान्सुसमाहितः ।
देशमिष्टं नयत्याशु धन्विनं पुरुषर्षभ ॥ ३६
तथैव नृपते योगी धारणासु समाहितः ।
प्राप्नोत्याशु परं स्थानं लक्षं मुक्त इवाशुगः ॥ ३७
आवेश्यात्मनि चात्मानं योगी तिष्ठति योऽचलः ।
पापं हन्तेव मीनानां पदमाप्नोति सोऽजरम् ॥ ३८
नाभ्यां कण्ठे च शीर्षे च हृदि वक्षसि पार्श्वयोः ।
दर्शने स्पर्शने चापि घ्राणे चामितविक्रम ॥ ३९
स्थानेष्वेतेषु यो योगी महाव्रतसमाहितः ।
आत्मना सूक्ष्ममात्मानं युङ्क्ते सम्यग्विशां पते ॥४०
स शीघ्रममलप्रज्ञः कर्म दग्ध्वा शुभाशुभम् ।
उत्तमं योगमास्थाय यदीच्छति विमुच्यते ॥ ४१

युधिष्ठिर उवाच ।

आहारान्कीदृशान्कृत्वा कानि जित्वा च भारत ।
योगी बलमवाप्नोति तद्भवान्वक्तुमर्हति ॥ ४२

भीष्म उवाच ।

कणानां भक्षणे युक्तः पिण्याकस्य च भक्षणे ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥ ४३
भुञ्जानो यावकं रूक्षं दीर्घकालमरिंदम ।
एकारामो विशुद्धात्मा योगी बलमवाप्नुयात् ॥ ४४
पक्षान्मासानृतूंश्चित्रान्संचरंश्च गुहास्तथा ।
अपः पीत्वा पयोमिश्रा योगी बलमवाप्नुयात् ॥४५
अखण्डमपि वा मासं सततं मनुजेश्वर ।
उपोष्य सम्यक्शुद्धात्मा योगी बलमवाप्नुयात् ॥४६
कामं जित्वा तथा क्रोधं शीतोष्णे वर्षमेव च ।
भयं निद्रां तथा श्वासं पौरुषं विषयांस्तथा ॥ ४७
अरतिं दुर्जयां चैव घोरां तृष्णां च पार्थिव ।
स्पर्शान्सर्वांस्तथा तन्द्रीं दुर्जयां नृपसत्तम ॥ ४८
दीपयन्ति महात्मानः सूक्ष्ममात्मानमात्मना ।
वीतरागा महाप्राज्ञा ध्यानाध्ययनसंपदा ॥ ४९
दुर्गस्त्वेष मतः पन्था ब्राह्मणानां विपश्चिताम् ।
न कश्चिद्व्रजति ह्यस्मिन्क्षेमेण भरतर्षभ ॥ ५०
यथा कश्चिद्वनं घोरं बहुसर्पसरीसृपम् ।
श्वभ्रवत्तोयहीनं च दुर्गमं बहुकण्टकम् ॥ ५१
अभक्तमटवीप्रायं दावदग्धमहीरुहम् ।
पन्थानं तस्कराकीर्णं क्षेमेणाभिपतेद्युवा ॥ ५२

योगमार्गं तथासाद्य यः कश्चिद्व्रजते द्विजः ।
क्षेमेणोपरमेन्मार्गाद्बहुदोषो हि स स्मृतः ॥ ५३
सुस्थेयं क्षुरधारासु निशितासु महीपते ।
धारणासु तु योगस्य दुःस्थेयमकृतात्मभिः ॥ ५४
विपन्ना धारणास्तात नयन्ति नशुभां गतिम् ।
नेतृहीना यथा नावः पुरुषानर्णवे नृप ॥ ५५
यस्तु तिष्ठति कौन्तेय धारणासु यथाविधि ।
मरणं जन्म दुःखं च सुखं च स विमुञ्चति ॥ ५६
नानाशास्त्रेषु निष्पन्नं योगेष्विदमुदाहृतम् ।
परं योगं तु यत्कृत्स्नं निश्चितं तद्द्विजातिषु ॥ ५७
परं हि तद्ब्रह्म महन्महात्म-
न्ब्रह्माणमीशं वरदं च विष्णुम् ।
भवं च धर्मं च षडाननं च
षड्ब्रह्मपुत्रांश्च महानुभावान् ॥ ५८
तमश्च कष्टं सुमहद्रजश्च
सत्त्वं च शुद्धं प्रकृतिं परां च ।
सिद्धिं च देवीं वरुणस्य पत्नीं
तेजश्च कृत्स्नं सुमहच्च धैर्यम् ॥ ५९
ताराधिपं वै विमलं सतारं
विश्वांश्च देवानुरगान्पितॄंश्च ।
शैलांश्च कृत्स्नानुदधींश्च घोरा-
न्नदीश्च सर्वाः सवनान्घनांश्च ॥ ६०
नागान्नगान्यक्षगणान्दिशश्च
गन्धर्वसंघान्पुरुषान्स्त्रियश्च ।
परस्परं प्राप्य महान्महात्मा
विशेत योगी नचिराद्विमुक्तः ॥ ६१
कथा च येयं नृपते प्रसक्ता
देवे महावीर्यमतौ शुभेयम् ।
योगान्स सर्वानभिभूय मर्त्या-
न्नारायणात्मा कुरुते महात्मा ॥ ६२

इति श्रीमहाभारते शान्तिपर्वणि
एकोननवत्यधिकद्विशततमोऽध्यायः ॥ २८९ ॥

२९०

युधिष्ठिर उवाच ।

सम्यक्त्वयायं नृपते वर्णितः शिष्टसंमतः ।
योगमार्गो यथान्यायं शिष्यायेह हितैषिणा ॥ १
सांख्ये त्विदानीं कार्त्स्न्येन विधिं प्रब्रूहि पृच्छते
त्रिषु लोकेषु यज्ज्ञानं सर्वं तद्विदितं हि ते ॥ २

भीष्म उवाच ।

शृणु मे त्वमिदं शुद्धं सांख्यानां विदितात्मनाम्
विहितं यतिभिर्बुद्धैः कपिलादिभिरीश्वरैः ॥ ३
यस्मिन्न विभ्रमाः केचिद्दृश्यन्ते मनुजर्षभ ।
गुणाश्च यस्मिन्बहवो दोषहानिश्च केवला ॥ ४
ज्ञानेन परिसंख्याय सदोषान्विषयान्नृप ।
मानुषान्दुर्जयान्कृत्स्नान्पैशाचान्विषयांस्तथा ॥ ५
राक्षसान्विषयाञ्ज्ञात्वा यक्षाणां विषयांस्तथा ।
विषयानौरगाञ्ज्ञात्वा गान्धर्वविषयांस्तथा ॥ ६
पितॄणां विषयाञ्ज्ञात्वा तिर्यक्षु चरतां नृप ।
सुपर्णविषयाञ्ज्ञात्वा मरुतां विषयांस्तथा ॥ ७
राजर्षिविषयाञ्ज्ञात्वा ब्रह्मर्षिविषयांस्तथा ।
आसुरान्विषयाञ्ज्ञात्वा वैश्वदेवांस्तथैव च ॥ ८
देवर्षिविषयाञ्ज्ञात्वा योगानामपि चेश्वरान् ।
विषयांश्च प्रजेशानां ब्रह्मणो विषयांस्तथा ॥ ९
आयुषश्च परं कालं लोके विज्ञाय तत्त्वतः ।
सुखस्य च परं तत्त्वं विज्ञाय वदतां वर ॥ १०
प्राप्ते काले च यद्दुःखं पततां विषयैषिणाम् ।
तिर्यक्च पततां दुःखं पततां नरके च यत् ॥ ११
स्वर्गस्य च गुणान्कृत्स्नान्दोषान्सर्वांश्च भारत ।
वेदवादे च ये दोषा गुणा ये चापि वैदिकाः ॥ १२

ज्ञानयोगे च ये दोषा गुणा योगे च ये नृप ।
सांख्यज्ञाने च ये दोषास्तथैव च गुणा नृप ॥ १३
सत्त्वं दशगुणं ज्ञात्वा रजो नवगुणं तथा ।
तमश्चाष्टगुणं ज्ञात्वा बुद्धिं सप्तगुणां तथा ॥ १४
षड्गुणं च नभो ज्ञात्वा मनः पञ्चगुणं तथा ।
बुद्धिं चतुर्गुणां ज्ञात्वा तमश्च त्रिगुणं महत् ॥ १५
द्विगुणं च रजो ज्ञात्वा सत्त्वमेकगुणं पुनः ।
मार्गं विज्ञाय तत्त्वेन प्रलये प्रेक्षणं तथा ॥ १६
ज्ञानविज्ञानसंपन्नाः कारणैर्भाविताः शुभैः ।
प्राप्नुवन्ति शुभं मोक्षं सूक्ष्मा इव नभः परम् ॥ १७
रूपेण दृष्टिं संयुक्तां घ्राणं गन्धगुणेन च ।
शब्दे सक्तं तथा श्रोत्रं जिह्वां रसगुणेषु च ॥ १८
तनुं स्पर्शे तथा सक्तां वायुं नभसि चाश्रितम् ।
मोहं तमसि संसक्तं लोभमर्थेषु संश्रितम् ॥ १९
विष्णुं क्रान्ते बले शक्रं कोष्ठे सक्तं तथानलम् ।
अप्सु देवीं तथा सक्तामपस्तेजसि चाश्रिताः ॥ २०
तेजो वायौ तु संसक्तं वायुं नभसि चाश्रितम् ।
नभो महति संयुक्तं महद्बुद्धौ च संश्रितम् ॥ २१
बुद्धिं तमसि संसक्तां तमो रजसि चाश्रितम् ।
रजः सत्त्वे तथा सक्तं सत्त्वं सक्तं तथात्मनि ॥ २२
सक्तमात्मानमीशे च देवे नारायणे तथा ।
देवं मोक्षे च संसक्तं मोक्षं सक्तं तु न क्वचित् ॥
ज्ञात्वा सत्त्वयुतं देहं वृतं षोडशभिर्गुणैः ।
स्वभावं चेतनां चैव ज्ञात्वा वै देहमाश्रिते ॥ २४
मध्यस्थमेकमात्मानं पापं यस्मिन्न विद्यते ।
द्वितीयं कर्म विज्ञाय नृपते विषयैषिणाम् ॥ २५
इन्द्रियाणीन्द्रियार्थांश्च सर्वानात्मनि संश्रितान् ।
प्राणापानौ समानं च व्यानोदानौ च तत्त्वतः ॥
अवाक्चैवानिलं ज्ञात्वा प्रवहं चानिलं पुनः ।
सप्त वातांस्तथा शेषान्सप्तधा विधिवत्पुनः ॥ २७

प्रजापतीनृषींश्चैव मार्गांश्च सुबहून्वरान् ।
सप्तर्षींश्च बहून्ज्ञात्वा राजर्षींश्च परंतप ॥ २८
सुरर्षीन्महतश्चान्यान्महर्षीन्सूर्यसंनिभान् ।
ऐश्वर्याच्च्यावितान्ज्ञात्वा कालेन महता नृप ॥ २९
महतां भूतसंघानां श्रुत्वा नाशं च पार्थिव ।
गतिं चाप्यशुभां ज्ञात्वा नृपते पापकर्मणाम् ॥ ३०
वैतरण्यां च यद्दुःखं पतितानां यमक्षये ।
योनीषु च विचित्रासु संसारानशुभांस्तथा ॥ ३१
जठरे चाशुभे वासं शोणितोदकभाजने ।
श्लेष्ममूत्रपुरीषे च तीव्रगन्धसमन्विते ॥ ३२
शुक्रशोणितसंघाते मज्जास्नायुपरिग्रहे ।
सिराशतसमाकीर्णे नवद्वारे पुरेऽशुचौ ॥ ३३
विज्ञायाहितमात्मानं योगांश्च विविधान्नृप ।
तामसानां च जन्तूनां रमणीयावृतात्मनाम् ॥ ३४
सात्त्विकानां च जन्तूनां कुत्सितं भरतर्षभ ।
गर्हितं महतामर्थे सांख्यानां विदितात्मनाम् ॥ ३५
उपप्लवांस्तथा घोराञ्शशिनस्तेजसस्तथा ।
ताराणां पतनं दृष्ट्वा नक्षत्राणां च पर्ययम् ॥ ३६
द्वंद्वानां विप्रयोगं च विज्ञाय कृपणं नृप ।
अन्योन्यभक्षणं दृष्ट्वा भूतानामपि चाशुभम् ॥ ३७
बाल्ये मोहं च विज्ञाय क्षयं देहस्य चाशुभम् ।
रागे मोहे च संप्राप्ते क्वचित्सत्त्वं समाश्रितम् ॥ ३८
सहस्रेषु नरः कश्चिन्मोक्षबुद्धिं समाश्रितः ।
दुर्लभत्वं च मोक्षस्य विज्ञाय श्रुतिपूर्वकम् ॥ ३९
बहुमानमलब्धेषु लब्धे मध्यस्थतां पुनः ।
विषयाणां च दौरात्म्यं विज्ञाय नृपते पुनः ॥ ४०
गतासूनां च कौन्तेय देहान्दृष्ट्वा तथाशुभान् ।
वासं कुलेषु जन्तूनां दुःखं विज्ञाय भारत ॥ ४१
ब्रह्मघ्नानां गतिं ज्ञात्वा पतितानां सुदारुणाम् ।
सुरापाने च सक्तानां ब्राह्मणानां दुरात्मनाम् ।

गुरुदारप्रसक्तानां गतिं विज्ञाय चाशुभाम् ॥ ४२
जननीषु च वर्तन्ते ये न सम्यग्युधिष्ठिर ।
सदेवकेषु लोकेषु ये न वर्तन्ति मानवाः ॥ ४३
तेन ज्ञानेन विज्ञाय गतिं चाशुभकर्मणाम् ।
तिर्यग्योनिगतानां च विज्ञाय गतयः पृथक् ॥ ४४
वेदवादांस्तथा चित्रानृतूनां पर्ययांस्तथा ।
क्षयं संवत्सराणां च मासानां प्रक्षयं तथा ॥ ४५
पक्षक्षयं तथा दृष्ट्वा दिवसानां च संक्षयम् ।
क्षयं वृद्धिं च चन्द्रस्य दृष्ट्वा प्रत्यक्षतस्तथा ॥ ४६
वृद्धिं दृष्ट्वा समुद्राणां क्षयं तेषां तथा पुनः ।
क्षयं धनानां च तथा पुनर्वृद्धिं तथैव च ॥ ४७
संयोगानां क्षयं दृष्ट्वा युगानां च विशेषतः ।
क्षयं च दृष्ट्वा शैलानां क्षयं च सरितां तथा ॥ ४८
वर्णानां च क्षयं दृष्ट्वा क्षयान्तं च पुनः पुनः ।
जरामृत्युं तथा जन्म दृष्ट्वा दुःखानि चैव ह ॥४९
देहदोषांस्तथा ज्ञात्वा तेषां दुःखं च तत्त्वतः ।
देहविक्लवतां चैव सम्यग्विज्ञाय भारत ॥ ॥ ५०
आत्मदोषांश्च विज्ञाय सर्वानात्मनि संश्रितान् ।
स्वदेहादुत्थितान्गन्धांस्तथा विज्ञाय चाशुभान् ॥

युधिष्ठिर उवाच ।

कान्स्वगात्रोद्भवान्दोषान्पश्यस्यमितविक्रम ।
एतन्मे संशयं कृत्स्नं वक्तुमर्हसि तत्त्वतः ॥ ५२

भीष्म उवाच ।

पञ्च दोषान्प्रभो देहे प्रवदन्ति मनीषिणः ।
मार्गज्ञाः कापिलाः सांख्याः शृणु तानरिसूदन ॥५३
कामक्रोधौ भयं निद्रा पञ्चमः श्वास उच्यते ।
एते दोषाः शरीरेषु दृश्यन्ते सर्वदेहिनाम् ॥ ५४
छिन्दन्ति क्षमया क्रोधं कामं संकल्पवर्जनात् ।
सत्त्वसंशीलनान्निद्रामप्रमादाद्भयं तथा ।
छिन्दन्ति पञ्चमं श्वासं लघ्वाहारतया नृप ॥ ५५
गुणान्गुणशतैर्ज्ञात्वा दोषान्दोषशतैरपि ।
हेतून्हेतुशतैश्चित्रैश्चित्रान्विज्ञाय तत्त्वतः ॥ ५६
अपां फेनोपमं लोकं विष्णोर्मायाशतैर्वृतम् ।
चित्तभित्तिप्रतीकाशं नलसारमनर्थकम् ॥ ५७
तमः श्वभ्रनिभं दृष्ट्वा वर्षबुद्बुदसंनिभम् ।
नाशप्रायं सुखाद्धीनं नाशोत्तरमभावगम् ।
रजस्तमसि संमग्नं पङ्के द्विपमिवावशम् ॥ ५८
सांख्या राजन्महाप्राज्ञास्त्यक्त्वा देहं प्रजाकृतम् ।
ज्ञानज्ञेयेन सांख्येन व्यापिना महता नृप ॥ ५९
राजसानशुभान्गन्धांस्तामसांश्च तथाविधान् ।
पुण्यांश्च सात्त्विकान्गन्धान्स्पर्शजान्देहसंश्रितान् ।
छित्त्वाशु ज्ञानशस्त्रेण तपोदण्डेन भारत ॥ ६०
ततो दुःखोदकं घोरं चिन्ताशोकमहाह्रदम् ।
व्याधिमृत्युमहाग्राहं महाभयमहोरगम् ॥ ६१
तमःकूर्मं रजोमीनं प्रज्ञया संतरन्त्युत ।
स्नेहपङ्कं जरादुर्गं स्पर्शद्वीपमरिंदम ॥ ६२
कर्मागाधं सत्यतीरं स्थितव्रतमिदं नृप ।
हिंसाशीघ्रमहावेगं नानारसमहाकरम् ॥ ६३
नानाप्रीतिमहारत्नं दुःखज्वरसमीरणम् ।
शोकतृष्णामहावर्तं तीक्ष्णव्याधिमहागजम् ॥ ६४
अस्थिसंघातसंघाटं श्लेष्मफेनमरिंदम ।
दानमुक्ताकरं भीमं शोणितह्रदविद्रुमम् ॥ ६५
हसितोत्क्रुष्टनिर्घोषं नानाज्ञानसुदुस्तरम् ।
रोदनाश्रुमलक्षारं सङ्गत्यागपरायणम् ॥ ६६
पुनराजन्मलोकौघं पुत्रबान्धवपत्तनम् ।
अहिंसासत्यमर्यादं प्राणत्यागमहोर्मिणम् ॥ ६७
वेदान्तगमनद्वीपं सर्वभूतदयोदधिम् ।
मोक्षदुष्प्रापविषयं वडवामुखसागरम् ॥ ६८
तरन्ति मुनयः सिद्धा ज्ञानयोगेन भारत ।
तीर्त्वा च दुस्तरं जन्म विशन्ति विमलं नभः ॥६९

ततस्तान्सुकृतीन्सांख्यान्सूर्यो वहति रश्मिभिः ।
पद्मतन्तुवदाविश्य प्रवहन्विषयान्नृप ॥ ७०
तत्र तान्प्रवहो वायुः प्रतिगृह्णाति भारत ।
वीतरागान्यतीन्सिद्धान्वीर्ययुक्तांस्तपोधनान् ॥ ७१
सूक्ष्मः शीतः सुगन्धी च सुखस्पर्शश्च भारत ।
सप्तानां मरुतां श्रेष्ठो लोकान्गच्छति यः शुभान् ।
स तान्वहति कौन्तेय नभसः परमां गतिम् ॥ ७२
नभो वहति लोकेश रजसः परमां गतिम् ।
रजो वहति राजेन्द्र सत्त्वस्य परमां गतिम् ॥ ७३
सत्त्वं वहति शुद्धात्मन्परं नारायणं प्रभुम् ।
प्रभुर्वहति शुद्धात्मा परमात्मानमात्मना ॥ ७४
परमात्मानमासाद्य तद्भूतायतनामलाः ।
अमृतत्वाय कल्पन्ते न निवर्तन्ति चाभिभो ।
परमा सा गतिः पार्थ निर्द्वंद्वानां महात्मनाम् ॥ ७५

युधिष्ठिर उवाच ।

स्थानमुत्तममासाद्य भगवन्तं स्थिरव्रताः ।
आजन्ममरणं वा ते स्मरन्त्युत न वानघ ॥ ७६
यदत्र तथ्यं तन्मे त्वं यथावद्वक्तुमर्हसि ।
त्वदृते मानवं नान्यं प्रष्टुमर्हामि कौरव ॥ ७७
मोक्षदोषो महानेष प्राप्य सिद्धिं गतानृषीन् ।
यदि तत्रैव विज्ञाने वर्तन्ते यतयः परे ॥ ७८
प्रवृत्तिलक्षणं धर्मं पश्यामि परमं नृप ।
मग्नस्य हि परे ज्ञाने किं नु दुःखतरं भवेत् ॥ ७९

भीष्म उवाच ।

यथान्यायं त्वया तात प्रश्नः पृष्टः सुसंकटः ।
बुद्धानामपि संमोहः प्रश्नेऽस्मिन्भरतर्षभ ।
अत्रापि तत्त्वं परमं शृणु सम्यङ्मयेरितम् ॥ ८०
बुद्धिश्च परमा यत्र कापिलानां महात्मनाम् ।
इन्द्रियाण्यपि बुध्यन्ते स्वदेहं देहिनो नृप ।
कारणान्यात्मनस्तानि सूक्ष्मः पश्यति तैस्तु सः ॥
आत्मना विप्रहीणानि काष्ठकुड्यसमानि तु ।
विनश्यन्ति न संदेहः फेना इव महार्णवे ॥ ८२
इन्द्रियैः सह सुप्तस्य देहिनः शत्रुतापन ।
सूक्ष्मश्चरति सर्वत्र नभसीव समीरणः ॥ ८३
स पश्यति यथान्यायं स्पर्शान्स्पृशति चाभिभो ।
बुध्यमानो यथापूर्वमखिलेनेह भारत ॥ ८४
इन्द्रियाणीह सर्वाणि स्वे स्वे स्थाने यथाविधि ।
अनीशत्वात्प्रलीयन्ते सर्पा हतविषा इव ॥ ८५
इन्द्रियाणां तु सर्वेषां स्वस्थानेष्वेव सर्वशः ।
आक्रम्य गतयः सूक्ष्माश्चरत्यात्मा न संशयः ॥ ८६
सत्त्वस्य च गुणान्कृत्स्नान्रजसश्च गुणान्पुनः ।
गुणांश्च तमसः सर्वान्गुणान्बुद्धेश्च भारत ॥ ८७
गुणांश्च मनसस्तद्वन्नभसश्च गुणांस्तथा ।
गुणान्वायोश्च धर्मात्मंस्तेजसश्च गुणान्पुनः ॥ ८८
अपां गुणांस्तथा पार्थ पार्थिवांश्च गुणानपि ।
सर्वात्मना गुणैर्व्याप्य क्षेत्रज्ञः स युधिष्ठिर ॥ ८९
आत्मा च याति क्षेत्रज्ञं कर्मणी च शुभाशुभे ।
शिष्या इव महात्मानमिन्द्रियाणि च तं विभो ॥ ९०
प्रकृतिं चाप्यतिक्रम्य गच्छत्यात्मानमव्ययम् ।
परं नारायणात्मानं निर्द्वंद्वं प्रकृतेः परम् ॥ ९१
विमुक्तः पुण्यपापेभ्यः प्रविष्टस्तमनामयम् ।
परमात्मानमगुणं न निवर्तति भारत ॥ ९२
शिष्टं त्वत्र मनस्तात इन्द्रियाणि च भारत ।
आगच्छन्ति यथाकालं गुरोः संदेशकारिणः ॥ ९३
शक्यं चाल्पेन कालेन शान्तिं प्राप्तुं गुणार्थिना ।
एवं युक्तेन कौन्तेय युक्तज्ञानेन मोक्षिणा ॥ ९४
सांख्या राजन्महाप्राज्ञा गच्छन्ति परमां गतिम् ।
ज्ञानेनानेन कौन्तेय तुल्यं ज्ञानं न विद्यते ॥ ९५
अत्र ते संशयो मा भूज्ज्ञानं सांख्यं परं मतम् ।
अक्षरं ध्रुवमव्यक्तं पूर्वं ब्रह्म सनातनम् ॥ ९६

अनादिमध्यनिधनं निर्द्वंद्वं कर्तृ शाश्वतम् ।
कूटस्थं चैव नित्यं च यद्वदन्ति शमात्मकाः ॥ ९७
यतः सर्वाः प्रवर्तन्ते सर्गप्रलयविक्रियाः ।
यच्च शंसन्ति शास्त्रेषु वदन्ति परमर्षयः ॥ ९८
सर्वे विप्राश्च देवाश्च तथागमविदो जनाः ।
ब्रह्मण्यं परमं देवमनन्तं परतोऽच्युतम् ॥ ९९
प्रार्थयन्तश्च तं विप्रा वदन्ति गुणबुद्धयः ।
सम्यग्युक्तास्तथा योगाः सांख्याश्चामितदर्शनाः ॥
अमूर्तेस्तस्य कौन्तेय सांख्यं मूर्तिरिति श्रुतिः ।
अभिज्ञानानि तस्याहुर्मतं हि भरतर्षभ ॥ १०१
द्विविधानीह भूतानि पृथिव्यां पृथिवीपते ।
जङ्गमागमसंज्ञानि जङ्गमं तु विशिष्यते ॥ १०२
ज्ञानं महद्यद्धि महत्सु राज-
न्वेदेषु सांख्येषु तथैव योगे ।
यच्चापि दृष्टं विविधं पुराणं
सांख्यागतं तन्निखिलं नरेन्द्र ॥ १०३
यच्चेतिहासेषु महत्सु दृष्टं
यच्चार्थशास्त्रे नृप शिष्टजुष्टे ।
ज्ञानं च लोके यदिहास्ति किंचि-
त्सांख्यागतं तच्च महन्महात्मन् ॥ १०४
शमश्च दृष्टः परमं बलं च
ज्ञानं च सूक्ष्मं च यथावदुक्तम् ।
तपांसि सूक्ष्माणि सुखानि चैव
सांख्ये यथावद्विहितानि राजन् ॥ १०५
विपर्यये तस्य हि पार्थ देवा-
न्गच्छन्ति सांख्याः सततं सुखेन ।
तांश्चानुसंचार्य ततः कृतार्थाः
पतन्ति विप्रेषु यतेषु भूयः ॥ १०६
हित्वा च देहं प्रविशन्ति मोक्षं
दिवौकसो द्यामिव पार्थ सांख्याः ।
ततोऽधिकं तेऽभिरता महार्हे
सांख्ये द्विजाः पार्थिव शिष्टजुष्टे ॥ १०७
तेषां न तिर्यग्गमनं हि दृष्टं
नावाग्गतिः पापकृतां निवासः ।
न चाबुधानामपि ते द्विजातयो
ये ज्ञानमेतन्नृपतेऽनुरक्ताः ॥ १०८
सांख्यं विशालं परमं पुराणं
महार्णवं विमलमुदारकान्तम् ।
कृत्स्नं च सांख्यं नृपते महात्मा
नारायणो धारयतेऽप्रमेयम् ॥ १०९
एतन्मयोक्तं नरदेव तत्त्वं
नारायणो विश्वमिदं पुराणम् ।
स सर्गकाले च करोति सर्गं
संहारकाले च तदत्ति भूयः ॥ ११०

इति श्रीमहाभारते शान्तिपर्वणि
नवत्यधिकद्विशततमोऽध्यायः ॥ २९० ॥

२९१

युधिष्ठिर उवाच ।

किं तदक्षरमित्युक्तं यस्मान्नावर्तते पुनः ।
किं च तत्क्षरमित्युक्तं यस्मादावर्तते पुनः ॥ १
अक्षरक्षरयोर्व्यक्तिमिच्छाम्यरिनिषूदन ।
उपलब्धुं महाबाहो तत्त्वेन कुरुनन्दन ॥ २
त्वं हि ज्ञाननिधिर्विप्रैरुच्यसे वेदपारगैः ।
ऋषिभिश्च महाभागैर्यतिभिश्च महात्मभिः ॥ ३
शेषमल्पं दिनानां ते दक्षिणायनभास्करे ।
आवृत्ते भगवत्यर्के गन्तासि परमां गतिम् ॥ ४
त्वयि प्रतिगते श्रेयः कुतः श्रोष्यामहे वयम् ।
कुरुवंशप्रदीपस्त्वं ज्ञानद्रव्येण दीप्यसे ॥ ५
तदेतच्छ्रोतुमिच्छामि त्वत्तः कुरुकुलोद्वह ।
न तृप्यामीह राजेन्द्र शृण्वन्नमृतमीदृशम् ॥ ६

भीष्म उवाच ।

अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
वसिष्ठस्य च संवादं करालजनकस्य च ॥ ७
वसिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिम् ।
पप्रच्छ जनको राजा ज्ञानं नैःश्रेयसं परम् ॥ ८
परमध्यात्मकुशलमध्यात्मगतिनिश्चयम् ।
मैत्रावरुणिमासीनमभिवाद्य कृताञ्जलिः ॥ ९
स्वक्षरं प्रश्रितं वाक्यं मधुरं चाप्यनुल्बणम् ।
पप्रच्छर्षिवरं राजा करालजनकः पुरा ॥ १०
भगवञ्श्रोतुमिच्छामि परं ब्रह्म सनातनम् ।
यस्मान्न पुनरावृत्तिमाप्नुवन्ति मनीषिणः ॥ ११
यच्च तत्क्षरमित्युक्तं यत्रेदं क्षरते जगत् ।
यच्चाक्षरमिति प्रोक्तं शिवं क्षेम्यमनामयम् ॥ १२

वसिष्ठ उवाच ।

श्रूयतां पृथिवीपाल क्षरतीदं यथा जगत् ।
यन्न क्षरति पूर्वेण यावत्कालेन चाप्यथ ॥ १३
युगं द्वादशसाहस्रं कल्पं विद्धि चतुर्गुणम् ।
दशकल्पशतावृत्तं तदहर्ब्राह्ममुच्यते ।
रात्रिश्चैतावती राजन्यस्यान्ते प्रतिबुध्यते ॥ १४
सृजत्यनन्तकर्माणं महान्तं भूतमग्रजम् ।
मूर्तिमन्तममूर्तात्मा विश्वं शंभुः स्वयंभुवः ।
अणिमा लघिमा प्राप्तिरीशानं ज्योतिरव्ययम् ॥१५
सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १६
हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः ।
महानिति च योगेषु विरिञ्च इति चाप्युत ॥ १७
सांख्ये च पठ्यते शास्त्रे नामभिर्बहुधात्मकः ।
विचित्ररूपो विश्वात्मा एकाक्षर इति स्मृतः ॥ १८
वृतं नैकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना ।
तथैव बहुरूपत्वाद्विश्वरूप इति स्मृतः ॥ १९
एष वै विक्रियापन्नः सृजत्यात्मानमात्मना ।
अहंकारं महातेजाः प्रजापतिमहंकृतम् ॥ २०
अव्यक्ताद्व्यक्तमुत्पन्नं विद्यासर्गं वदन्ति तम् ।
महान्तं चाप्यहंकारमविद्यासर्गमेव च ॥ २१
अविधिश्च विधिश्चैव समुत्पन्नौ तथैकतः ।
विद्याविद्येति विख्याते श्रुतिशास्त्रार्थचिन्तकैः ॥ २२
भूतसर्गमहंकारात्तृतीयं विद्धि पार्थिव ।
अहंकारेषु भूतेषु चतुर्थं विद्धि वैकृतम् ॥ २३
वायुर्ज्योतिरथाकाशमापोऽथ पृथिवी तथा ।
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ॥ २४
एवं युगपदुत्पन्नं दशवर्गमसंशयम् ।
पञ्चमं विद्धि राजेन्द्र भौतिकं सर्गमर्थवत् ॥ २५
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणमेव च पञ्चमम् ।
वाक्च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ॥२६
बुद्धीन्द्रियाणि चैतानि तथा कर्मेन्द्रियाणि च ।
संभूतानीह युगपन्मनसा सह पार्थिव ॥ २७
एषा तत्त्वचतुर्विंशा सर्वाकृतिषु वर्तते ।
यां ज्ञात्वा नाभिशोचन्ति ब्राह्मणास्तत्त्वदर्शिनः ॥२८
एतदेहं समाख्यातं त्रैलोक्ये सर्वदेहिषु ।
वेदितव्यं नरश्रेष्ठ सदेवनरदानवे ॥ २९
सयक्षभूतगन्धर्वे सकिंनरमहोरगे ।
सचारणपिशाचे वै सदेवर्षिनिशाचरे ॥ ३०
सदंशकीटमशके सपूतिकृमिमूषके ।
शुनि श्वपाके वैणेये सचण्डाले सपुल्कसे ॥ ३१
हस्त्यश्वखरशार्दूले सवृक्षे गवि चैव ह ।
यच्च मूर्तिमयं किंचित्सर्वत्रैतन्निदर्शनम् ॥ ३२
जले भुवि तथाकाशे नान्यत्रेति विनिश्चयः ।
स्थानं देहवतामस्ति इत्येवमनुशुश्रुम ॥ ३३
कृत्स्नमेतावतस्तात क्षरते व्यक्तसंज्ञकम् ।
अहन्यहनि भूतात्मा ततः क्षर इति स्मृतः ॥ ३४

एतदक्षरमित्युक्तं क्षरतीदं यथा जगत् ।
जगन्मोहात्मकं प्राहुरव्यक्तं व्यक्तसंज्ञकम् ॥ ३५
महांश्चैवाग्रजो नित्यमेतत्क्षरनिदर्शनम् ।
कथितं ते महाराज यस्मान्नावर्तते पुनः ॥ ३६
पञ्चविंशतिमो विष्णुर्निस्तत्त्वस्तत्त्वसंज्ञकः ।
तत्त्वसंश्रयणादेतत्तत्त्वमाहुर्मनीषिणः ॥ ३७
यदमूर्त्यसृजद्व्यक्तं तत्तन्मूर्त्यधितिष्ठति ।
चतुर्विंशतिमो व्यक्तो ह्यमूर्तः पञ्चविंशकः ॥ ३८
स एव हृदि सर्वासु मूर्तिष्वातिष्ठतेऽऽत्मवान् ।
चेतयंश्चेतनो नित्यः सर्वमूर्तिरमूर्तिमान् ॥ ३९
सर्गप्रलयधर्मिण्या असर्गप्रलयात्मकः ।
गोचरे वर्तते नित्यं निर्गुणो गुणसंज्ञकः ॥ ४०
एवमेष महानात्मा सर्गप्रलयकोविदः ।
विकुर्वाणः प्रकृतिमानभिमन्यत्यबुद्धिमान् ॥ ४१
तमःसत्त्वरजोयुक्तस्तासु तास्विह योनिषु ।
लीयतेऽप्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ ४२
सहवासो निवासात्मा नान्योऽहमिति मन्यते ।
योऽहं सोऽहमिति ह्युक्त्वा गुणाननु निवर्तते ॥४३
तमसा तामसान्भावान्विविधान्प्रतिपद्यते ।
रजसा राजसांश्चैव सात्त्विकान्सत्त्वसंश्रयात् ॥४४
शुक्ललोहितकृष्णानि रूपाण्येतानि त्रीणि तु ।
सर्वाण्येतानि रूपाणि जानीहि प्राकृतानि वै ॥४५
तामसा निरयं यान्ति राजसा मानुषांस्तथा ।
सात्त्विका देवलोकाय गच्छन्ति सुखभागिनः ॥४६
निष्कैवल्येन पापेन तिर्यग्योनिमवाप्नुयात् ।
पुण्यपापेन मानुष्यं पुण्येनैकेन देवताः ॥ ४७
एवमव्यक्तविषयं क्षरमाहुर्मनीषिणः ।
पञ्चविंशतिमो योऽयं ज्ञानादेव प्रवर्तते ॥ ४८

इति श्रीमहाभारते शान्तिपर्वणि
एकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥

२९२

वसिष्ठ उवाच ।

एवमप्रतिबुद्धत्वादबुद्धमनुवर्तते ।
देहाद्देहसहस्राणि तथा समभिपद्यते ॥ १
तिर्यग्योनिसहस्रेषु कदाचिद्देवतास्वपि ।
उपपद्यति संयोगाद्गुणैः सह गुणक्षयात् ॥ २
मानुषत्वाद्दिवं याति दिवो मानुष्यमेव च ।
मानुष्यान्निरयस्थानमानन्त्यं प्रतिपद्यते ॥ ३
कोशकारो यथात्मानं कीटः समनुरुन्धति ।
सूत्रतन्तुगुणैर्नित्यं तथायमगुणो गुणैः ॥ ४
द्वंद्वमेति च निर्द्वंद्वस्तासु तास्विह योनिषु ।
शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे ॥ ५
जलोदरेऽर्शसां रोगे ज्वरगण्डविषूचिके ।
श्वित्रे कुष्ठेऽग्निदाहे च सिध्मापस्मारयोरपि ॥ ६
यानि चान्यानि द्वंद्वानि प्राकृतानि शरीरिषु ।
उत्पद्यन्ते विचित्राणि तान्येषोऽप्यभिमन्यते ।
अभिमन्यत्यभीमानात्तथैव सुकृतान्यपि ॥ ७
एकवासाश्च दुर्वासाः शायी नित्यमधस्तथा ।
मण्डूकशायी च तथा वीरासनगतस्तथा ॥ ८
चीरधारणमाकाशे शयनं स्थानमेव च ।
इष्टकाप्रस्तरे चैव कण्टकप्रस्तरे तथा ॥ ९
भस्मप्रस्तरशायी च भूमिशय्यानुलेपनः ।
वीरस्थानाम्बुपङ्के च शयनं फलकेषु च ॥ १०
विविधासु च शय्यासु फलगृद्ध्यान्वितोऽफलः ।
मुञ्जमेखलनग्नत्वं क्षौमकृष्णाजिनानि च ॥ ११
शाणीवालपरीधानो व्याघ्रचर्मपरिच्छदः ।
सिंहचर्मपरीधानः पट्टवासास्तथैव च ॥ १२
कीटकात्रसनश्चैव चीरवासास्तथैव च ।
वस्त्राणि चान्यानि बहून्यभिमन्यत्यबुद्धिमान् ॥ १३
भोजनानि विचित्राणि रत्नानि विविधानि च ।

एकवस्त्रान्तराशित्वमेककालिकभोजनम् ॥ १४
चतुर्थाष्टमकालश्च षष्ठकालिक एव च ।
षड्रात्रभोजनश्चैव तथैवाष्टाहभोजनः ॥ १५
सप्तरात्रदशाहारो द्वादशाहार एव च ।
मासोपवासी मूलाशी फलाहारस्तथैव च ॥ १६
वायुभक्षोऽम्बुपिण्याकगोमयादन एव च ।
गोमूत्रभोजनश्चैव शाकपुष्पाद एव च ॥ १७
शैवालभोजनश्चैव तथाचामेन वर्तयन् ।
वर्तयञ्शीर्णपर्णैश्च प्रकीर्णफलभोजनः ॥ १८
विविधानि च कृच्छ्राणि सेवते सुखकाङ्क्षया ।
चान्द्रायणानि विधिवल्लिङ्गानि विविधानि च ॥१९
चातुराश्रम्यपन्थानमाश्रयत्याश्रमानपि ।
उपासीनश्च पाषण्डान्गुहाः शैलांस्तथैव च ॥ २०
विविक्ताश्च शिलाछायास्तथा प्रस्रवणानि च ।
विविधानि च जप्यानि विविधानि व्रतानि च ॥
नियमान्सुविचित्रांश्च विविधानि तपांसि च ।
यज्ञांश्च विविधाकारान्विधींश्च विविधांस्तथा ॥ २२
वणिक्पथं द्विजक्षत्रं वैश्यशूद्रं तथैव च ।
दानं च विविधाकारं दीनान्धकृपणेष्वपि ॥ २३
अभिमन्यत्यसंबोधात्तथैव त्रिविधान्गुणान् ।
सत्त्वं रजस्तमश्चैव धर्मार्थौ काम एव च ।
प्रकृत्यात्मानमेवात्मा एवं प्रविभजत्युत ॥ २४
स्वधाकारवषट्कारौ स्वाहाकारनमस्क्रियाः ।
याजनाध्यापनं दानं तथैवाहुः प्रतिग्रहम् ।
यजनाध्ययने चैव यच्चान्यदपि किंचन ॥ २५
जन्ममृत्युविवादे च तथा विशसनेऽपि च ।
शुभाशुभमयं सर्वमेतदाहुः क्रियापथम् ॥ २६
प्रकृतिः कुरुते देवी महाप्रलयमेव च ।
दिवसान्ते गुणानेतानभ्येत्यैकोवतिष्ठति ॥ २७
रश्मिजालमिवादित्यस्तत्कालेन नियच्छति ।
एवमेषोऽसकृत्सर्वं क्रीडार्थमभिमन्यते ॥ २८
आत्मरूपगुणानेतान्विविधान्हृदयप्रियान् ।
एवमेव विकुर्वाणः सर्गप्रलयकर्मणी ॥ २९
क्रियाक्रियापथे रक्तस्त्रिगुणस्त्रिगुणातिगः ।
क्रियाक्रियापथोपेतस्तथा तदिति मन्यते ॥ ३०
एवं द्वंद्वान्यथैतानि वर्तन्ते मम नित्यशः ।
ममैवैतानि जायन्ते बाधन्ते तानि मामिति ॥ ३१
निस्तर्तव्यान्यथैतानि सर्वाणीति नराधिप ।
मन्यतेऽयं ह्यबुद्धित्वात्तथैव सुकृतान्यपि ॥ ३२
भोक्तव्यानि मयैतानि देवलोकगतेन वै ।
इहैव चैनं भोक्ष्यामि शुभाशुभफलोदयम् ॥ ३३
सुखमेव च कर्तव्यं सकृत्कृत्वा सुखं मम ।
यावदन्तं च मे सौख्यं जात्यां जात्यां भविष्यति ॥३४
भविष्यति च मे दुःखं कृतेनेहाप्यनन्तकम् ।
महद्दुःखं हि मानुष्यं निरये चापि मज्जनम् ॥३५
निरयाच्चापि मानुष्यं कालेनैष्याम्यहं पुनः ।
मनुष्यत्वाच्च देवत्वं देवत्वात्पौरुषं पुनः ।
मनुष्यत्वाच्च निरयं पर्यायेणोपगच्छति ॥ ३६
य एवं वेत्ति वै नित्यं निरात्मात्मगुणैर्वृतः ।
तेन देवमनुष्येषु निरये चोपपद्यते ॥ ३७
ममत्वेनावृतो नित्यं तत्रैव परिवर्तते ।
सर्गकोटिसहस्राणि मरणान्तासु मूर्तिषु ॥ ३८
य एवं कुरुते कर्म शुभाशुभफलात्मकम् ।
स एव फलमश्नाति त्रिषु लोकेषु मूर्तिमान् ॥ ३९
प्रकृतिः कुरुते कर्म शुभाशुभफलात्मकम् ।
प्रकृतिश्च तदश्नाति त्रिषु लोकेषु कामगा ॥ ४०
तिर्यग्योनौ मनुष्यत्वे देवलोके तथैव च ।
त्रीणि स्थानानि चैतानि जानीयात्प्राकृतानि ह ॥४१
अलिङ्गां प्रकृतिं त्वाहुर्लिङ्गैरनुमिमीमहे ।
तथैव पौरुषं लिङ्गमनुमानाद्धि पश्यति ॥ ४२

स लिङ्गान्तरमासाद्य प्राकृतं लिङ्गमव्रणम् ।
व्रणद्वाराण्यधिष्ठाय कर्माण्यात्मनि मन्यते ॥ ४३
श्रोत्रादीनि तु सर्वाणि पञ्च कर्मेन्द्रियाणि च ।
वागादीनि प्रवर्तन्ते गुणेष्वेव गुणैः सह ॥
अहमेतानि वै कुर्वन्ममैतानीन्द्रियाणि च ॥ ४४
निरिन्द्रियोऽभिमन्येत व्रणवानस्मि निर्व्रणः ।
अलिङ्गो लिङ्गमात्मानमकालः कालमात्मनः ॥ ४५
असत्त्वं सत्त्वमात्मानमतत्त्वं तत्त्वमात्मनः ।
अमृत्युर्मृत्युमात्मानमचरश्चरमात्मनः ॥ ४६
अक्षेत्रः क्षेत्रमात्मानमसर्गः सर्गमात्मनः ।
अतपास्तप आत्मानमगतिर्गतिमात्मनः ॥ ४७
अभवो भवमात्मानमभयो भयमात्मनः ।
अक्षरः क्षरमात्मानमबुद्धिस्त्वभिमन्यते ॥ ४८

इति श्रीमहाभारते शान्तिपर्वणि
द्विनवत्यधिकद्विशततमोऽध्यायः ॥ २९२ ॥

२९३

वसिष्ठ उवाच ।

एवमप्रतिबुद्धत्वादबुद्धजनसेवनात् ।
सर्गकोटिसहस्राणि पतनान्तानि गच्छति ॥ १
धाम्ना धामसहस्राणि मरणान्तानि गच्छति ।
तिर्यग्योनौ मनुष्यत्वे देवलोके तथैव च ॥ २
चन्द्रमा इव कोशानां पुनस्तत्र सहस्रशः ।
लीयतेऽप्रतिबुद्धत्वादेवमेष ह्यबुद्धिमान् ॥ ३
कलाः पञ्चदशा योनिस्तद्धाम इति पठ्यते ।
नित्यमेतद्विजानीहि सोमः षोडशमी कला ॥ ४
कलायां जायतेऽजस्रं पुनः पुनरबुद्धिमान् ।
धाम तस्योपयुञ्जन्ति भूय एव तु जायते ॥ ५
षोडशी तु कला सूक्ष्मा स सोम उपधार्यताम् ।
न तूपयुज्यते देवैर्देवानुपयुनक्ति सा ॥ ६
एवं तां क्षपयित्वा हि जायते नृपसत्तम ।
सा ह्यस्य प्रकृतिर्दृष्टा तत्क्षयान्मोक्ष उच्यते ॥ ७
तदेवं षोडशकलं देहमव्यक्तसंज्ञकम् ।
ममायमिति मन्वानस्तत्रैव परिवर्तते ॥ ८
पञ्चविंशस्तथैवात्मा तस्यैवा प्रतिबोधनात् ।
विमलस्य विशुद्धस्य शुद्धानिलनिषेवणात् ॥ ९
अशुद्ध एव शुद्धात्मा तादृग्भवति पार्थिव ।
अबुद्धसेवनाच्चापि बुद्धोऽप्यबुधतां व्रजेत् ॥ १०
तथैवाप्रतिबुद्धोऽपि ज्ञेयो नृपतिसत्तम ।
प्रकृतेस्त्रिगुणायास्तु सेवनात्प्राकृतो भवेत् ॥ ११

करालजनक उवाच ।

अक्षरक्षरयोरेष द्वयोः संबन्ध इष्यते ।
स्त्रीपुंसोर्वापि भगवन्संबन्धस्तद्वदुच्यते ॥ १२
ऋते न पुरुषेणेह स्त्री गर्भं धारयत्युत ।
ऋते स्त्रियं न पुरुषो रूपं निर्वर्तयेत्तथा ॥ १३
अन्योन्यस्याभिसंबन्धादन्योन्यगुणसंश्रयात् ।
रूपं निर्वर्तयत्येतदेवं सर्वासु योनिषु ॥ १४
रत्यर्थमभिसंरोधादन्योन्यगुणसंश्रयात् ।
ऋतौ निर्वर्तते रूपं तद्वक्ष्यामि निदर्शनम् ॥ १५
ये गुणाः पुरुषस्येह ये च मातृगुणास्तथा ।
अस्थि स्नायु च मज्जा च जानीमः पितृतो द्विज ॥
त्वङ्मांसं शोणितं चैव मातृजान्यपि शुश्रुम ।
एवमेतद्द्विजश्रेष्ठ वेदशास्त्रेषु पठ्यते ॥ १७
प्रमाणं यच्च वेदोक्तं शास्त्रोक्तं यच्च पठ्यते ।
वेदशास्त्रप्रमाणं च प्रमाणं तत्सनातनम् ॥ १८
एवमेवाभिसंबद्धौ नित्यं प्रकृतिपूरुषौ ।
पश्यामि भगवंस्तस्मान्मोक्षधर्मो न विद्यते ॥ १९
अथ वानन्तरकृतं किंचिदेव निदर्शनम् ।
तन्ममाचक्ष्व तत्त्वेन प्रत्यक्षो ह्यसि सर्वथा ॥ २०
मोक्षकामा वयं चापि काङ्क्षामो यदनामयम् ।
अदेहमजरं दिव्यमतीन्द्रियमनीश्वरम् ॥ २१

वसिष्ठ उवाच ।
यदेतदुक्तं भवता वेदशास्त्रनिदर्शनम् ।
एवमेतद्यथा चैतन्न गृह्णाति तथा भवान् ॥ २२
धार्यते हि त्वया ग्रन्थ उभयोर्वेदशास्त्रयोः ।
न तु ग्रन्थस्य तत्त्वज्ञो यथावत्त्वं नरेश्वर ॥ २३
यो हि वेदे च शास्त्रे च ग्रन्थधारणतत्परः ।
न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा ॥ २४
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः ।
यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥२५
ग्रन्थस्यार्थं च पृष्टः संस्तादृशो वक्तुमर्हति ।
यथा तत्त्वाभिगमनादर्थं तस्य स विन्दति ॥ २६
यस्तु संसत्सु कथयेद्ग्रन्थार्थं स्थूलबुद्धिमान् ।
स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात् ॥२७
निर्णयं चापि छिद्रात्मा न तं वक्ष्यति तत्त्वतः ।
सोपहासात्मतामेति यस्माच्चैवात्मवानपि ॥ २८
तस्मात्त्वं शृणु राजेन्द्र यथैतदनुदृश्यते ।
याथातथ्येन सांख्येषु योगेषु च महात्मसु ॥ २९
यदेव योगाः पश्यन्ति सांख्यैस्तदनुगम्यते ।
एकं सांख्यं च योगं च यः पश्यति स बुद्धिमान् ॥
त्वङ्मांसं रुधिरं मेदः पित्तं मज्जास्थि स्नायु च ।
एतदैन्द्रियकं तात यद्भवानिदमाह वै ॥ ३१
द्रव्याद्द्रव्यस्य निष्पत्तिरिन्द्रियादिन्द्रियं तथा ।
देहाद्देहमवाप्नोति बीजाद्बीजं तथैव च ॥ ३२
निरिन्द्रियस्याबीजस्य निर्द्रव्यस्यास्य देहिनः ।
कथं गुणा भविष्यन्ति निर्गुणत्वान्महात्मनः ॥ ३३
गुणा गुणेषु जायन्ते तत्रैव निविशन्ति च ।
एवं गुणाः प्रकृतितो जायन्ते च न सन्ति च ॥३४
त्वङ्मांसं रुधिरं मेदः पित्तं मज्जास्थि स्नायु च ।
अष्टौ तान्यथ शुक्रेण जानीहि प्राकृतानि वै ॥३५
पुमांश्चैवापुमांश्चैव त्रैलिङ्ग्यं प्राकृतं स्मृतम् ।
नैव पुमान्पुमांश्चैव स लिङ्गीत्यभिधीयते ॥ ३६
अलिङ्गा प्रकृतिर्लिङ्गैरुपलभ्यति सात्मजैः ।
यथा पुष्पफलैर्नित्यमृतवो मूर्तयस्तथा ॥ ३७
एवमप्यनुमानेन ह्यलिङ्गमुपलभ्यते ।
पञ्चविंशतिमस्तात लिङ्गेष्वनियतात्मकः ॥ ३८
अनादिनिधनोऽनन्तः सर्वदर्शी निरामयः ।
केवलं त्वभिमानित्वाद्गुणेष्वगुण उच्यते ॥ ३९
गुणा गुणवतः सन्ति निर्गुणस्य कुतो गुणाः ।
तस्मादेवं विजानन्ति ये जना गुणदर्शिनः ॥ ४०
यदा त्वेष गुणान्सर्वान्प्राकृतानभिमन्यते ।
तदा स गुणवानेव परमेणानुपश्यति ॥ ४१
यत्तद्बुद्धेः परं प्राहुः सांख्या योगाश्च सर्वशः ।
बुध्यमानं महाप्राज्ञमबुद्धपरिवर्जनात् ॥ ४२
अप्रबुद्धमथाव्यक्तं सगुणं प्राहुरीश्वरम् ।
निर्गुणं चेश्वरं नित्यमधिष्ठातारमेव च ॥ ४३
प्रकृतेश्च गुणानां च पञ्चविंशतिकं बुधाः ।
सांख्ययोगे च कुशला बुध्यन्ते परमैषिणः ॥ ४४
यदा प्रबुद्धास्त्वव्यक्तमवस्थाजन्मभीरवः ।
बुध्यमानं प्रबुध्यन्ति गमयन्ति समं तदा ॥ ४५
एतन्निदर्शनं सम्यगसम्यगनुदर्शनम् ।
बुध्यमानाप्रबुद्धाभ्यां पृथक्पृथगरिंदम ॥ ४६
परस्परेणैतदुक्तं क्षराक्षरनिदर्शनम् ।
एकत्वमक्षरं प्राहुर्नानात्वं क्षरमुच्यते ॥ ४७
पञ्चविंशतिनिष्ठोऽयं यदासम्यक्प्रवर्तते ।
एकत्वं दर्शनं चास्य नानात्वं चाप्यदर्शनम् ॥ ४८
तत्त्वनिस्तत्त्वयोरेतत्पृथगेव निदर्शनम् ।
पञ्चविंशतिसर्गं तु तत्त्वमाहुर्मनीषिणः ॥ ४९
निस्तत्त्वं पञ्चविंशस्य परमाहुर्निदर्शनम् ।

वर्गस्य वर्गमाचारं तत्त्वं तत्त्वात्सनातनात् ॥ ५०

इति श्रीमहाभारते शान्तिपर्वणि
त्रिनवत्यधिकद्विशततमोऽध्यायः ॥ २९३ ॥

२९४

करालजनक उवाच ।

नानात्वैकत्वमित्युक्तं त्वयैतदृषिसत्तम ।
पश्यामि चाभिसंदिग्धमेतयोर्वै निदर्शनम् ॥ १
तथाप्रबुद्धबुद्धाभ्यां बुध्यमानस्य चानघ ।
स्थूलबुद्ध्या न पश्यामि तत्त्वमेतन्न संशयः ॥ २
अक्षरक्षरयोरुक्तं त्वया यदपि कारणम् ।
तदप्यस्थिरबुद्धित्वात्प्रनष्टमिव मेऽनघ ॥ ३
तदेतच्छ्रोतुमिच्छामि नानात्वैकत्वदर्शनम् ।
बुद्धमप्रतिबुद्धं च बुध्यमानं च तत्त्वतः ॥ ४
विद्याविद्ये च भगवन्नक्षरं क्षरमेव च ।
सांख्यं योगं च कार्त्स्न्येन पृथक्चैवापृथक्च ह ॥५

वसिष्ठ उवाच ।

हन्त ते संप्रवक्ष्यामि यदेतदनुपृच्छसि ।
योगकृत्यं महाराज पृथगेव शृणुष्व मे ॥ ६
योगकृत्यं तु योगानां ध्यानमेव परं बलम् ।
तच्चापि द्विविधं ध्यानमाहुर्वेदविदो जनाः ॥ ७
एकाग्रता च मनसः प्राणायामस्तथैव च ।
प्राणायामस्तु सगुणो निर्गुणो मनसस्तथा ॥ ८
मूत्रोत्सर्गे पुरीषे च भोजने च नराधिप ।
त्रिकालं नाभियुञ्जीत शेषं युञ्जीत तत्परः ॥ ९
इन्द्रियाणीन्द्रियार्थेभ्यो निवर्त्य मनसा मुनिः
दशद्वादशभिर्वापि चतुर्विंशात्परं ततः ॥ १०
तं चोदनाभिर्मतिमानात्मानं चोदयेदथ ।
तिष्ठन्तमजरं तं तु यत्तदुक्तं मनीषिभिः ॥ ११
तैश्चात्मा सततं ज्ञेय इत्येवमनुशुश्रुम ।
द्रव्यं ह्यहीनमनसो नान्यथेति विनिश्चयः ॥ १२
विमुक्तः सर्वसङ्गेभ्यो लघ्वाहारो जितेन्द्रियः ।
पूर्वरात्रे परे चैव धारयेत मनोऽऽत्मनि ॥ १३
स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर ।
मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ॥१४
स्थाणुवच्चाप्यकम्पः स्याद्गिरिवच्चापि निश्चलः ।
बुधा विधिविधानज्ञास्तदा युक्तं प्रचक्षते ॥ १५
न शृणोति न चाघ्राति न रस्यति न पश्यति ।
न च स्पर्शं विजानाति न संकल्पयते मनः ॥१६
न चाभिमन्यते किंचिन्न च बुध्यति काष्ठवत् ।
तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ॥ १७
निवाते च यथा दीप्यन्दीपस्तद्वत्स दृश्यते ।
निरिङ्गश्चाचलश्चोर्ध्वं न तिर्यग्गतिमाप्नुयात् ॥ १८
तदा तमनुपश्येत यस्मिन्दृष्टे तु कथ्यते ।
हृदयस्थोऽन्तरात्मेति ज्ञेयो ज्ञस्तात मद्विधैः ॥ १९
विधूम इव सप्तार्चिरादित्य इव रश्मिमान् ।
वैद्युतोऽग्निरिवाकाशे दृश्यतेऽऽत्मा तथात्मनि ॥२०
यं पश्यन्ति महात्मानो धृतिमन्तो मनीषिणः ।
ब्राह्मणा ब्रह्मयोनिस्था ह्ययोनिममृतात्मकम् ॥ २१
तदेवाहुरणुभ्योऽणु तन्महद्भ्यो महत्तरम् ।
तदन्तः सर्वभूतेषु ध्रुवं तिष्ठन्न दृश्यते ॥ २२
बुद्धिद्रव्येण दृश्येत मनोदीपेन लोककृत् ।
महतस्तमसस्तात पारे तिष्ठन्नतामसः ॥ २३
स तमोनुद इत्युक्तस्तत्त्वज्ञैर्वेदपारगैः ।
विमलो वितमस्कश्च निर्लिङ्गोऽलिङ्गसंज्ञितः ॥ २४
योगमेतद्धि योगानां मन्ये योगस्य लक्षणम् ।
एवं पश्यं प्रपश्यन्ति आत्मानमजरं परम् ॥ २५
योगदर्शनमेतावदुक्तं ते तत्त्वतो मया ।
सांख्यज्ञानं प्रवक्ष्यामि परिसंख्यानिदर्शनम् ॥ २६
अव्यक्तमाहुः प्रकृतिं परां प्रकृतिवादिनः ।
तस्मान्महत्समुत्पन्नं द्वितीयं राजसत्तम ॥ २७

अहंकारस्तु महतस्तृतीयमिति: नः श्रुतम् ।
पञ्च भूतान्यहंकारादाहुः सांख्यानुदर्शिनः ॥ २८
एताः प्रकृतयस्त्वष्टौ विकाराश्चापि षोडश ।
पञ्च चैव विशेषा वै तथा पञ्चेन्द्रियाणि च ॥ २९
एतावदेव तत्त्वानां सांख्यमाहुर्मनीषिणः ।
सांख्ये विधिविधानज्ञा नित्यं सांख्यपथे रताः ॥
यस्माद्यदभिजायेत तत्तत्रैव प्रलीयते ।
लीयन्ते प्रतिलोमानि सृज्यन्ते चान्तरात्मना ॥ ३१
अनुलोमेन जायन्ते लीयन्ते प्रतिलोमतः ।
गुणा गुणेषु सततं सागरस्योर्मयो यथा ॥ ३२
सर्गप्रलय एतावान्प्रकृतेर्नृपसत्तम ।
एकत्वं प्रलये चास्य बहुत्वं च यदासृजत् ।
एवमेव च राजेन्द्र विज्ञेयं ज्ञेयचिन्तकैः ॥ ३३
अधिष्ठातारमव्यक्तमस्याप्येतन्निदर्शनम् ।
एकत्वं च बहुत्वं च प्रकृतेरनु तत्त्ववान् ।
एकत्वं प्रलये चास्य बहुत्वं च प्रवर्तनात् ॥ ३४
बहुधात्मा प्रकुर्वीत प्रकृतिं प्रसवात्मिकाम् ।
तच्च क्षेत्रं महानात्मा पञ्चविंशोऽधितिष्ठति ॥ ३५
अधिष्ठातेति राजेन्द्र प्रोच्यते यतिसत्तमैः ।
अधिष्ठानादधिष्ठाता क्षेत्राणामिति नः श्रुतम् ॥ ३६
क्षेत्रं जानाति चाव्यक्तं क्षेत्रज्ञ इति चोच्यते ।
अव्यक्तिके पुरे शेते पुरुषश्चेति कथ्यते ॥ ३७
अन्यदेव च क्षेत्रं स्यादन्यः क्षेत्रज्ञ उच्यते ।
क्षेत्रमव्यक्तमित्युक्तं ज्ञाता वै पञ्चविंशकः ॥ ३८
अन्यदेव च ज्ञानं स्यादन्यज्ज्ञेयं तदुच्यते ।
ज्ञानमव्यक्तमित्युक्तं ज्ञेयो वै पञ्चविंशकः ॥ ३९
अव्यक्तं क्षेत्रमित्युक्तं तथा सत्त्वं तथेश्वरम् ।
अनीश्वरमतत्त्वं च तत्त्वं तत्पञ्चविंशकम् ॥ ४०
सांख्यदर्शनमेतावत्परिसंख्यानदर्शनम् ।
सांख्यं प्रकुरुते चैव प्रकृतिं च प्रचक्षते ॥ ४१
तत्त्वानि च चतुर्विंशत्परिसंख्याय तत्त्वतः ।
सांख्याः सह प्रकृत्या तु निस्तत्त्वः पञ्चविंशकः ॥
पञ्चविंशोऽप्रबुद्धात्मा बुध्यमान इति स्मृतः ।
यदा तु बुध्यतेऽऽत्मानं तदा भवति केवलः ॥४३
सम्यग्दर्शनमेतावद्भाषितं तव तत्त्वतः ।
एवमेतद्विजानन्तः साम्यतां प्रतियान्त्युत ॥ ४४
सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा ।
गुणतत्त्वान्यथैतानि निर्गुणोऽन्यस्तथा भवेत् ॥४५
न त्वेवं वर्तमानानामावृत्तिर्विद्यते पुनः ।
विद्यतेऽक्षरभावत्वादपरस्परमव्ययम् ॥ ४६
पश्येरन्नेकमतयो न सम्यक्तेषु दर्शनम् ।
तेऽव्यक्तं प्रतिपद्यन्ते पुनः पुनररिंदम ॥ ४७
सर्वमेतद्विजानन्तो न सर्वस्य प्रबोधनात् ।
व्यक्तीभूता भविष्यन्ति व्यक्तस्य वशवर्तिनः ॥४८
सर्वमव्यक्तमित्युक्तमसर्वः पञ्चविंशकः ।
य एनमभिजानन्ति न भयं तेषु विद्यते ॥ ४९

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्नवत्यधिकद्विशततमोऽध्यायः ॥ २९४ ॥

२९५

वसिष्ठ उवाच ।

सांख्यदर्शनमेतावदुक्तं ते नृपसत्तम ।
विद्याविद्ये त्विदानीं मे त्वं निबोधानुपूर्वशः ॥ १
अविद्यामाहुरव्यक्तं सर्गप्रलयधर्मि वै ।
सर्गप्रलयनिर्मुक्तं विद्यां वै पञ्चविंशकम् ॥ २
परस्परमविद्यां वै तन्निबोधानुपूर्वशः ।
यथोक्तमृषिभिस्तात सांख्यस्यास्य निदर्शनम् ॥ ३
कर्मेन्द्रियाणां सर्वेषां विद्या बुद्धीन्द्रियं स्मृतम् ।
बुद्धीन्द्रियाणां च तथा विशेषा इति नः श्रुतम् ॥४
विशेषाणां मनस्तेषां विद्यामाहुर्मनीषिणः ।
मनसः पञ्च भूतानि विद्या इत्यभिचक्षते ॥ ५

अहंकारस्तु भूतानां पञ्चानां नात्र संशयः ।
अहंकारस्य च तथा बुद्धिर्विद्या नरेश्वर ॥ ६
बुद्धेः प्रकृतिरव्यक्तं तत्त्वानां परमेश्वरम् ।
विद्या ज्ञेया नरश्रेष्ठ विधिश्च परमः स्मृतः ॥ ७
अव्यक्तस्य परं प्राहुर्विद्यां वै पञ्चविंशकम् ।
सर्वस्य सर्वमित्युक्तं ज्ञेयं ज्ञानस्य पार्थिव ॥ ८
ज्ञानमव्यक्तमित्युक्तं ज्ञेयं वै पञ्चविंशकम् ।
तथैव ज्ञानमव्यक्तं विज्ञाता पञ्चविंशकः ॥ ९
विद्याविद्यार्थतत्त्वेन मयोक्तं ते विशेषतः ।
अक्षरं च क्षरं चैव यदुक्तं तन्निबोध मे ॥ १०
उभावेतौ क्षरावुक्तावुभावेतौ च नश्वरौ ।
कारणं तु प्रवक्ष्यामि यथा ख्यातौ तु तत्त्वतः ॥ ११
अनादिनिधनावेतावुभावेवेश्वरौ मतौ ।
तत्त्वसंज्ञावुभावेतौ प्रोच्येते ज्ञानचिन्तकैः ॥ १२
सर्गप्रलयधर्मित्वादव्यक्तं प्राहुरक्षरम् ।
तदेतद्गुणसर्गाय विकुर्वाणं पुनः पुनः ॥ १३
गुणानां महदादीनामुत्पद्यति परस्परम् ।
अधिष्ठानात्क्षेत्रमाहुरेतत्तत्पञ्चविंशकम् ॥ १४
यदा तु गुणजालं तदव्यक्तात्मनि संक्षिपेत् ।
तदा सह गुणैस्तैस्तु पञ्चविंशो विलीयते ॥ १५
गुणा गुणेषु लीयन्ते तदैका प्रकृतिर्भवेत् ।
क्षेत्रज्ञोऽपि यदा तात तत्क्षेत्रे संप्रलीयते ॥ १६
तदाक्षरत्वं प्रकृतिर्गच्छते गुणसंज्ञिता ।
निर्गुणत्वं च वैदेह गुणेषु प्रतिवर्तनात् ॥ १७
एवमेव च क्षेत्रज्ञः क्षेत्रज्ञानपरिक्षये ।
प्रकृत्या निर्गुणस्त्वेष इत्येवमनुशुश्रुम ॥ १८
क्षरो भवत्येष यदा तदा गुणवतीमथ ।
प्रकृतिं त्वभिजानाति निर्गुणत्वं तथात्मनः ॥ १९
तदा विशुद्धो भवति प्रकृतेः परिवर्जनात् ।
अन्योऽहमन्येयमिति यदा बुध्यति बुद्धिमान् ॥ २०
तदैषोऽन्यत्वतामेति न च मिश्रत्वमाव्रजेत् ।
प्रकृत्या चैव राजेन्द्र नमिश्रोऽन्यश्च दृश्यते ॥ २१
यदा तु गुणजालं तत्प्राकृतं विजुगुप्सते ।
पश्यते चापरं पश्यं तदा पश्यन्न संज्वरेत् ॥ २२
किं मया कृतमेतावद्योऽहं कालमिमं जनम् ।
मत्स्यो जालं ह्यविज्ञानादनुवर्तितवांस्तथा ॥ २३
अहमेव हि संमोहादन्यमन्यं जनाज्जनम् ।
मत्स्यो यथोदकज्ञानादनुवर्तितवानिह ॥ २४
मत्स्योऽन्यत्वं यथाज्ञानादुदकान्नाभिमन्यते ।
आत्मानं तद्वदज्ञानादन्यत्वं चैव वेदयहम् ॥ २५
ममास्तु धिगबुद्धस्य योऽहं मग्नमिमं पुनः ।
अनुवर्तितवान्मोहादन्यमन्यं जनाज्जनम् ॥ २६
अयमत्र भवेद्बन्धुरनेन सह मोक्षणम् ।
साम्यमेकत्वमायातो यादृशस्तादृशस्त्वहम् ॥ २७
तुल्यतामिह पश्यामि सदृशोऽहमनेन वै ।
अयं हि विमलो व्यक्तमहमीदृशकस्तथा ॥ २८
योऽहमज्ञानसंमोहादज्ञया संप्रवृत्तवान् ।
ससङ्गयाहं निःसङ्गः स्थितः कालमिमं त्वहम् ॥२९
अनयाहं वशीभूतः कालमेतं न बुद्धवान् ।
उच्चमध्यमनीचानां तामहं कथमावसे ॥ ३०
समानयानया चेह सहवासमहं कथम् ।
गच्छाम्यबुद्धभावत्वादेषेदानीं स्थिरो भवे ॥ ३१
सहवासं न यास्यामि कालमेतद्धि वञ्चनात् ।
वञ्चितोऽस्म्यनया यद्धि निर्विकारो विकारया ॥३२
न चायमपराधोऽस्या अपराधो ह्ययं मम ।
योऽहमत्राभवं सक्तः पराङ्मुखमुपस्थितः ॥ ३३
ततोऽस्मि बहुरूपासु स्थितो मूर्तिष्वमूर्तिमान् ।
अमूर्तश्चापि मूर्तात्मा ममत्वेन प्रधर्षितः ॥ ३४
प्रकृतेरनयत्वेन तासु तास्विह योनिषु ।
निर्ममस्य ममत्वेन किं कृतं तासु तासु च ।

योनीषु वर्तमानेन नष्टसंज्ञेन चेतसा ॥ ३५
न ममात्रानया कार्यमहंकारकृतात्मया ।
आत्मानं बहुधा कृत्वा येयं भूयो युनक्ति माम् ।
इदानीमेष बुद्धोऽस्मि निर्ममो निरहंकृतः ॥ ३६
ममत्वमनया नित्यमहंकारकृतात्मकम् ।
अपेत्याहमिमां हित्वा संश्रयिष्ये निरामयम् ॥ ३७
अनेन साम्यं यास्यामि नानयाहमचेतसा ।
क्षमं मम सहानेन नैकत्वमनया सह ।
एवं परमसंबोधात्पञ्चविंशोऽनुबुद्धवान् ॥ ३८
अक्षरत्वं नियच्छेत त्यक्त्वा क्षरमनामयम् ।
अव्यक्तं व्यक्तधर्माणं सगुणं निर्गुणं तथा ।
निर्गुणं प्रथमं दृष्ट्वा तादृग्भवति मैथिल ॥ ३९
अक्षराक्षरयोरेतदुक्तं तव निदर्शनम् ।
मयेह ज्ञानसंपन्नं यथाश्रुतिनिदर्शनात् ॥ ४०
निःसंदिग्धं च सूक्ष्मं च विबुद्धं विमलं तथा ।
प्रवक्ष्यामि तु ते भूयस्तन्निबोध यथाश्रुतम् ॥ ४१
सांख्ययोगौ मया प्रोक्तौ शास्त्रद्वयनिदर्शनात् ।
यदेव शास्त्रं सांख्योक्तं योगदर्शनमेव तत् ॥ ४२
प्रबोधनकरं ज्ञानं सांख्यानामवनीपते ।
विस्पष्टं प्रोच्यते तत्र शिष्याणां हितकाम्यया ॥ ४३
बृहच्चैव हि तच्छास्त्रमित्याहुः कुशला जनाः ।
अस्मिंश्च शास्त्रे योगानां पुनर्दधि पुनः शरः ॥ ४४
पञ्चविंशात्परं तत्त्वं न पश्यति नराधिप ।
सांख्यानां तु परं तत्र यथावदनुवर्णितम् ॥ ४५
बुद्धमप्रतिबुद्धं च बुध्यमानं च तत्त्वतः ।
बुध्यमानं च बुद्धं च प्राहुर्योगनिदर्शनम् ॥ ४६

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चनवत्यधिकद्विशततमोऽध्यायः ॥ २९५ ॥

२९६

वसिष्ठ उवाच ।

अप्रबुद्धमथाव्यक्तमिमं गुणविधिं शृणु ।
गुणान्धारयते ह्येषा सृजत्याक्षिपते तथा ॥ १
अजस्रं त्विह क्रीडार्थं विकुर्वन्ती नराधिप ।
आत्मानं बहुधा कृत्वा तान्येव च विचक्षते ॥ २
एतदेवं विकुर्वाणां बुध्यमानो न बुध्यते ।
अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्यपि ॥ ३
न त्वेव बुध्यतेऽव्यक्तं सगुणं वाथ निर्गुणम् ।
कदाचित्त्वेव खल्वेतदाहुरप्रतिबुद्धकम् ॥ ४
बुध्यते यदि वाव्यक्तमेतद्वै पञ्चविंशकम् ।
बुध्यमानो भवत्येष सङ्गात्मक इति श्रुतिः ॥ ५
अनेनाप्रतिबुद्धेति वदन्त्यव्यक्तमच्युतम् ।
अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्युत ॥ ६
पञ्चविंशं महात्मानं न चासावपि बुध्यते ।
षड्विंशं विमलं बुद्धमप्रमेयं सनातनम् ॥ ७
सततं पञ्चविंशं च चतुर्विंशं च बुध्यते ।
दृश्यादृश्ये ह्यनुगतमुभावेव महाद्युती ॥ ८
अव्यक्तं न तु तद्ब्रह्म बुध्यते तात केवलम् ।
केवलं पञ्चविंशं च चतुर्विंशं न पश्यति ॥ ९
बुध्यमानो यदात्मानमन्योऽहमिति मन्यते ।
तदा प्रकृतिमानेष भवत्यव्यक्तलोचनः ॥ १०
बुध्यते च परां बुद्धिं विशुद्धाममलां यदा ।
षड्विंशो राजशार्दूल तदा बुद्धत्वमाव्रजेत् ॥ ११
ततस्त्यजति सोऽव्यक्तं सर्गप्रलयधर्मिणम् ।
निर्गुणः प्रकृतिं वेद गुणयुक्तामचेतनाम् ॥ १२
ततः केवलधर्मासौ भवत्यव्यक्तदर्शनात् ।
केवलेन समागम्य विमुक्तोऽऽत्मानमाप्नुयात् ॥ १३
एतत्तत्त्वमित्याहुर्निस्तत्त्वमजरामरम् ।
तत्त्वसंश्रयणादेतत्तत्त्ववन्न च मानद ।

पञ्चविंशतितत्त्वानि प्रवदन्ति मनीषिणः ॥ १४
न चैष तत्त्ववांस्तात निस्तत्त्वस्त्वेष बुद्धिमान् ।
एष मुञ्चति तत्त्वं हि क्षिप्रं बुद्धस्य लक्षणम् ॥ १५
षड्विंशोऽहमिति प्राज्ञो गृह्यमाणोऽजरामरः ।
केवलेन बलेनैव समतां यात्यसंशयम् ॥ १६
षड्विंशेन प्रबुद्धेन बुध्यमानोऽप्यबुद्धिमान् ।
एतन्नानात्वमित्युक्तं सांख्यश्रुतिनिदर्शनात् ॥ १७
चेतनेन समेतस्य पञ्चविंशतिकस्य च ।
एकत्वं वै भवत्यस्य यदा बुद्ध्या न बुध्यते ॥ १८
बुध्यमानोऽप्रबुद्धेन समतां याति मैथिल ।
सङ्गधर्मा भवत्येष निःसङ्गात्मा नराधिप ॥ १९
निःसङ्गात्मानमासाद्य षड्विंशकमजं विदुः ।
विभुस्त्यजति चाव्यक्तं यदा त्वेतद्विबुध्यते ।
चतुर्विंशमगाधं च षड्विंशस्य प्रबोधनात् ॥ २०
एष ह्यप्रतिबुद्धश्च बुध्यमानश्च तेऽनघ ।
प्रोक्तो बुद्धश्च तत्त्वेन यथाश्रुतिनिदर्शनात् ।
नानात्वैकत्वमेतावद्द्रष्टव्यं शास्त्रदृष्टिभिः ॥ २१
मशकोदुम्बरे यद्वदन्यत्वं तद्वदेतयोः ।
मत्स्योऽम्भसि यथा तद्वदन्यत्वमुपलभ्यते ॥ २२
एवमेवावगन्तव्यं नानात्वैकत्वमेतयोः ।
एतद्विमोक्ष इत्युक्तमव्यक्तज्ञानसंहितम् ॥ २३
पञ्चविंशतिकस्यास्य योऽयं देहेषु वर्तते ।
एष मोक्षयितव्येति प्राहुरव्यक्तगोचरात् ॥ २४
सोऽयमेवं विमुच्येत नान्यथेति विनिश्चयः ।
परेण परधर्मा च भवत्येष समेत्य वै ॥ २५
विशुद्धधर्मा शुद्धेन बुद्धेन च स बुद्धिमान् ।
विमुक्तधर्मा मुक्तेन समेत्य पुरुषर्षभ ॥ २६
नियोगधर्मिणा चैव नियोगात्मा भवत्यपि ।
विमोक्षिणा विमोक्षश्च समेत्येह तथा भवेत् ॥२७
शुचिकर्मा शुचिश्चैव भवत्यमितदीप्तिमान् ।
विमलात्मा च भवति समेत्य विमलात्मना ॥ २८
केवलात्मा तथा चैव केवलेन समेत्य वै ।
स्वतन्त्रश्च स्वतन्त्रेण स्वतन्त्रत्वमवाप्नुते ॥ २९

एतावदेतत्कथितं मया ते
तथ्यं महाराज यथार्थतत्त्वम् ।
अमत्सरत्वं प्रतिगृह्य चार्थं
सनातनं ब्रह्म विशुद्धमाद्यम् ॥ ३०
न वेदनिष्ठस्य जनस्य राज-
न्प्रदेयमेतत्परमं त्वया भवेत् ।
विवित्समानाय विबोधकारकं
प्रबोधहेतोः प्रणतस्य शासनम् ॥ ३१
न देयमेतच्च तथानृतात्मने
शठाय क्लीबाय न जिह्मबुद्धये ।
न पण्डितज्ञानपरोपतापिने
देयं त्वयेदं विनिबोध यादृशे ॥ ३२
श्रद्धान्वितायाथ गुणान्विताय
परापवादाद्विरताय नित्यम् ।
विशुद्धयोगाय बुधाय चैव
क्रियावतेऽथ क्षमिणे हिताय ॥ ३३
विविक्तशीलाय विधिप्रियाय
विवादहीनाय बहुश्रुताय ।
विजानते चैव न चाहितक्षमे
दमे च शक्ताय शमे च देहिनाम् ॥ ३४
एतैर्गुणैर्हीनतमे न देय-
मेतत्परं ब्रह्म विशुद्धमाहुः ।
न श्रेयसा योक्ष्यति तादृशे कृतं
धर्मप्रवक्तारमपात्रदानात् ॥ ३५
पृथ्वीमिमां यद्यपि रत्नपूर्णां
दद्यान्नदेयं त्विदमव्रताय ।
जितेन्द्रियायैतदसंशयं ते

भवेत्प्रदेयं परमं नरेन्द्र ॥ ३६
करालं मा ते भयमस्तु किंचि-
देतच्छ्रुतं ब्रह्म परं त्वयाद्य ।
यथावदुक्तं परमं पवित्रं
निःशोकमत्यन्तमनादिमध्यम् ॥ ३७
अगाधजन्मामरणं च राज-
न्निरामयं वीतभयं शिवं च ।
समीक्ष्य मोहं त्यज चाद्य सर्वं
ज्ञानस्य तत्त्वार्थमिदं विदित्वा ॥ ३८
अवाप्तमेतद्धि पुरा सनातना-
द्धिरण्यगर्भाद्गदतो नराधिप ।
प्रसाद्य यत्नेन तमुग्रतेजसं
सनातनं ब्रह्म यथाद्य वै त्वया ॥ ३९
पृष्टस्त्वया चास्मि यथा नरेन्द्र
तथा मयेदं त्वयि चोक्तमद्य ।
तथावाप्तं ब्रह्मणो मे नरेन्द्र
महज्ज्ञानं मोक्षविदां पुराणम् ॥ ४०

भीष्म उवाच ।

एतदुक्तं परं ब्रह्म यस्मान्नावर्तते पुनः ।
पञ्चविंशो महाराज परमर्षिनिदर्शनात् ॥ ४१
पुनरावृत्तिमाप्नोति परं ज्ञानमवाप्य च ।
नावबुध्यति तत्त्वेन बुध्यमानोऽजरामरः ॥ ४२
एतन्निःश्रेयसकरं ज्ञानानां ते परं मया ।
कथितं तत्त्वतस्तात श्रुत्वा देवर्षितो नृप ॥ ४३
हिरण्यगर्भादृषिणा वसिष्ठेन महात्मना ।
वसिष्ठादृषिशार्दूलान्नारदोऽवाप्तवानिदम् ॥ ४४
नारदाद्विदितं मह्यमेतद्ब्रह्म सनातनम् ।
मा शुचः कौरवेन्द्र त्वं श्रुत्वैतत्परमं पदम् ॥ ४५
येन क्षराक्षरे वित्ते न भयं तस्य विद्यते ।
विद्यते तु भयं तस्य यो नैतद्वेत्ति पार्थिव ॥ ४६
अविज्ञानाच्च मूढात्मा पुनः पुनरुपद्रवन् ।
प्रेत्य जातिसहस्राणि मरणान्तान्युपाश्नुते ॥ ४७
देवलोकं तथा तिर्यङ्मानुष्यमपि चाश्नुते ।
यदि शुध्यति कालेन तस्मादज्ञानसागरात् ॥ ४८
अज्ञानसागरो घोरो ह्यव्यक्तोऽगाध उच्यते ।
अहन्यहनि मज्जन्ति यत्र भूतानि भारत ॥ ४९
यस्मादगाधादव्यक्तादुत्तीर्णस्त्वं सनातनात् ।
तस्मात्त्वं विरजाश्चैव वितमस्कश्च पार्थिव ॥ ५०

इति श्रीमहाभारते शान्तिपर्वणि
षण्णवत्यधिकद्विशततमोऽध्यायः ॥ २९६ ॥

२९७

भीष्म उवाच ।

मृगयां विचरन्कश्चिद्विजने जनकात्मजः ।
वने ददर्श विप्रेन्द्रमृषिं वंशधरं भृगोः ॥ १
तमासीनमुपासीनः प्रणम्य शिरसा मुनिम् ।
पश्चादनुमतस्तेन पप्रच्छ वसुमानिदम् ॥ २
भगवन्किमिदं श्रेयः प्रेत्य वापीह वा भवेत् ।
पुरुषस्याध्रुवे देहे कामस्य वशवर्तिनः ॥ ३
सत्कृत्य परिपृष्टः सन्सुमहात्मा महातपाः ।
निजगाद ततस्तस्मै श्रेयस्करमिदं वचः ॥ ४
मनसोऽप्रतिकूलानि प्रेत्य चेह च वाञ्छसि ।
भूतानां प्रतिकूलेभ्यो निवर्तस्व यतेन्द्रियः ॥ ५
धर्मः सतां हितः पुंसां धर्मश्चैवाश्रयः सताम् ।
धर्माल्लोकास्त्रयस्तात प्रवृत्ताः सचराचराः ॥ ६
स्वादुकामुक कामानां वैतृष्ण्यं किं न गच्छसि ।
मधु पश्यसि दुर्बुद्धे प्रपातं नानुपश्यसि ॥ ७
यथा ज्ञाने परिचयः कर्तव्यस्तत्फलार्थिना ।
तथा धर्मे परिचयः कर्तव्यस्तत्फलार्थिना ॥ ८
असता धर्मकामेन विशुद्धं कर्म दुष्करम् ।
सता तु धर्मकामेन सुकरं कर्म दुष्करम् ॥ ९

वने ग्राम्यसुखाचारो यथा ग्राम्यस्तथैव सः ।
ग्रामे वनसुखाचारो यथा वनचरस्तथा ॥ १०
मनोवाक्कर्मके धर्मे कुरु श्रद्धां समाहितः ।
निवृत्तौ वा प्रवृत्तौ वा संप्रधार्य गुणागुणान् ॥ ११
नित्यं च बहु दातव्यं साधुभ्यश्चानसूयता ।
प्रार्थितं व्रतशौचाभ्यां सत्कृतं देशकालयोः ॥ १२
शुभेन विधिना लब्धमर्हाय प्रतिपादयेत् ।
क्रोधमुत्सृज्य दत्त्वा च नानुतप्येन्न कीर्तयेत् ॥ १३
अनृशंसः शुचिर्दान्तः सत्यवागार्जवे स्थितः ।
योनिकर्मविशुद्धश्च पात्रं स्याद्वेदविद्द्विजः ॥ १४
सत्कृता चैकपत्नी च जात्या योनिरिहेष्यते ।
ऋग्यजुःसामगो विद्वान्षट्कर्मा पात्रमुच्यते ॥ १५
स एव धर्मः सोऽधर्मस्तं तं प्रतिनरं भवेत् ।
पात्रकर्मविशेषेण देशकालाववेक्ष्य च ॥ १६
लीलयाल्पं यथा गात्रात्प्रमृज्याद्रजसः पुमान् ।
बहुयत्नेन महता पापनिर्हरणं तथा ॥ १७
विरिक्तस्य यथा सम्यग्घृतं भवति भेषजम् ।
तथा निर्हृतदोषस्य प्रेत्यधर्मः सुखावहः ॥ १८
मानसं सर्वभूतेषु वर्तते वै शुभाशुभे ।
अशुभेभ्यः समाक्षिप्य शुभेष्वेवावतारयेत् ॥ १९
सर्वं सर्वेण सर्वत्र क्रियमाणं च पूजय ।
स्वधर्मे यत्र रागस्ते कामं धर्मो विधीयताम् ॥ २०
अधृतात्मन्धृतौ तिष्ठ दुर्बुद्धे बुद्धिमान्भव ।
अप्रशान्त प्रशाम्य त्वमप्राज्ञ प्राज्ञवच्चर ॥ २१
तेजसा शक्यते प्राप्तुमुपायसहचारिणा ।
इह च प्रेत्य च श्रेयस्तस्य मूलं धृतिः परा ॥ २२
राजर्षिरधृतिः स्वर्गात्पतितो हि महाभिषः ।
ययातिः क्षीणपुण्यश्च धृत्या लोकानवाप्तवान् ॥ २३
तपस्विनां धर्मवतां विदुषां चोपसेवनात् ।
प्राप्स्यसे विपुलां बुद्धिं तथा श्रेयोऽभिपत्स्यसे ॥ २४
स तु स्वभावसंपन्नस्तच्छ्रुत्वा मुनिभाषितम् ।
विनिवर्त्य मनः कामाद्धर्मे बुद्धिं चकार ह ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
सप्तनवत्यधिकद्विशततमोऽध्यायः ॥ २९७ ॥

२९८

युधिष्ठिर उवाच ।

धर्माधर्मविमुक्तं यद्विमुक्तं सर्वसंश्रयात् ।
जन्ममृत्युविमुक्तं च विमुक्तं पुण्यपापयोः ॥ १
यच्छिवं नित्यमभयं नित्यं चाक्षरमव्ययम् ।
शुचि नित्यमनायासं तद्भवान्वक्तुमर्हति ॥ २

भीष्म उवाच ।

अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
याज्ञवल्क्यस्य संवादं जनकस्य च भारत ॥ ३
याज्ञवल्क्यमृषिश्रेष्ठं दैवरातिर्महायशाः ।
पप्रच्छ जनको राजा प्रश्नं प्रश्नविदां वरः ॥ ४
कतीन्द्रियाणि विप्रर्षे कति प्रकृतयः स्मृताः ।
किमव्यक्तं परं ब्रह्म तस्माच्च परतस्तु किम् ॥ ५
प्रभवं चाप्ययं चैव कालसंख्यां तथैव च ।
वक्तुमर्हसि विप्रेन्द्र त्वदनुग्रहकाङ्क्षिणः ॥ ६
अज्ञानात्परिपृच्छामि त्वं हि ज्ञानमयो निधिः ।
तदहं श्रोतुमिच्छामि सर्वमेतदसंशयम् ॥ ७

याज्ञवल्क्य उवाच ।

श्रूयतामवनीपाल यदेतदनुपृच्छसि ।
योगानां परमं ज्ञानं सांख्यानां च विशेषतः ॥ ८
न तवाविदितं किंचिन्मां तु जिज्ञासते भवान् ।
पृष्टेन चापि वक्तव्यमेष धर्मः सनातनः ॥ ९
अष्टौ प्रकृतयः प्रोक्ता विकाराश्चापि षोडश ।
अथ सप्त तु व्यक्तानि प्राहुरध्यात्मचिन्तकाः ॥ १०
अव्यक्तं च महांश्चैव तथाहंकार एव च ।

पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ ११
एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु ।
श्रोत्रं त्वक्चैव चक्षुश्च जिह्वा घ्राणं च पञ्चमम् ॥
शब्दस्पर्शौ च रूपं च रसो गन्धस्तथैव च ।
वाक्च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ॥ १३
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु ।
बुद्धीन्द्रियाण्यथैतानि सविशेषाणि मैथिल ॥ १४
मनः षोडशकं प्राहुरध्यात्मगतिचिन्तकाः ।
त्वं चैवान्ये च विद्वांसस्तत्त्वबुद्धिविशारदाः ॥ १५
अव्यक्ताच्च महानात्मा समुत्पद्यति पार्थिव ।
प्रथमं सर्गमित्येतदाहुः प्राधानिकं बुधाः ॥ १६
महतश्चाप्यहंकार उत्पद्यति नराधिप ।
द्वितीयं सर्गमित्याहुरेतद्बुद्ध्यात्मकं स्मृतम् ॥ १७
अहंकाराच्च संभूतं मनो भूतगुणात्मकम् ।
तृतीयः सर्ग इत्येष आहंकारिक उच्यते ॥ १८
मनसस्तु समुद्भूता महाभूता नराधिप ।
चतुर्थं सर्गमित्येतन्मानसं परिचक्षते ॥ १९
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ।
पञ्चमं सर्गमित्याहुर्भौतिकं भूतचिन्तकाः ॥ २०
श्रोत्रं त्वक्चैव चक्षुश्च जिह्वा घ्राणं च पञ्चमम् ।
सर्गं तु षष्ठमित्याहुर्बहुचिन्तात्मकं स्मृतम् ॥ २१
अधः श्रोत्रेन्द्रियग्राम उत्पद्यति नराधिप ।
सप्तमं सर्गमित्याहुरेतदैन्द्रियकं स्मृतम् ॥ २२
ऊर्ध्वस्रोतस्तथा तिर्यगुत्पद्यति नराधिप ।
अष्टमं सर्गमित्याहुरेतदार्जवकं बुधाः ॥ २३
तिर्यक्स्रोतस्त्वधःस्रोत उत्पद्यति नराधिप ।
नवमं सर्गमित्याहुरेतदार्जवकं बुधाः ॥ २४
एतानि नव सर्गाणि तत्त्वानि च नराधिप ।
चतुर्विंशतिरुक्तानि यथाश्रुतिनिदर्शनात् ॥ २५
अत ऊर्ध्वं महाराज गुणस्यैतस्य तत्त्वतः ।
महात्मभिरनुप्रोक्तां कालसंख्यां निबोध मे ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
अष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥

२९९

याज्ञवल्क्य उवाच ।

अव्यक्तस्य नरश्रेष्ठ कालसंख्यां निबोध मे ।
पञ्च कल्पसहस्राणि द्विगुणान्यहरुच्यते ॥ १
रात्रिरेतावती चास्य प्रतिबुद्धो नराधिप ।
सृजत्योषधिमेवाग्रे जीवनं सर्वदेहिनाम् ॥ २
ततो ब्रह्माणमसृजद्धैरण्याण्डसमुद्भवम् ।
सा मूर्तिः सर्वभूतानामित्येवमनुशुश्रुम ॥ ३
संवत्सरमुषित्वाण्डे निष्क्रम्य च महामुनिः ।
संदधेऽर्धं महीं कृत्स्नां दिवमर्धं प्रजापतिः ॥ ४
द्यावापृथिव्योरित्येष राजन्वेदेषु पठ्यते ।
तयोः शकलयोर्मध्यमाकाशमकरोत्प्रभुः ॥ ५
एतस्यापि च संख्यानं वेदवेदाङ्गपारगैः ।
दश कल्पसहस्राणि पादोनान्यहरुच्यते ।
रात्रिमेतावतीं चास्य प्राहुरध्यात्मचिन्तकाः ॥ ६
सृजत्यहंकारमृषिर्भूतं दिव्यात्मकं तथा ।
चतुरश्चापरान्पुत्रान्देहात्पूर्वं महानृषिः ।
ते वै पितृभ्यः पितरः श्रूयन्ते राजसत्तम ॥ ७
देवाः पितॄणां च सुता देवैर्लोकाः समावृताः ।
चराचरा नरश्रेष्ठ इत्येवमनुशुश्रुम ॥ ८
परमेष्ठी त्वहंकारोऽसृजद्भूतानि पञ्चधा ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ ९
एतस्यापि निशामाहुस्तृतीयमिह कुर्वतः ।
पञ्च कल्पसहस्राणि तावदेवाहरुच्यते ॥ १०
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु ।
यैराविष्टानि भूतानि अहन्यहनि पार्थिव ॥ ११

अन्योन्यं स्पृहयन्त्येते अन्योन्यस्य हिते रताः ।
अन्योन्यमभिमन्यन्ते अन्योन्यस्पर्धिनस्तथा ॥ १२
ते वध्यमाना अन्योन्यं गुणैर्हारिभिरव्ययाः ।
इहैव परिवर्तन्ते तिर्यग्योनिप्रवेशिनः ॥ १३
त्रीणि कल्पसहस्राणि एतेषामहरुच्यते ।
रात्रिरेतावती चैव मनसश्च नराधिप ॥ १४
मनश्चरति राजेन्द्र चरितं सर्वमिन्द्रियैः ।
न चेन्द्रियाणि पश्यन्ति मन एवात्र पश्यति ॥ १५
चक्षुः पश्यति रूपाणि मनसा तु न चक्षुषा ।
मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति ।
तथेन्द्रियाणि सर्वाणि पश्यन्तीत्यभिचक्षते ॥ १६
मनस्युपरते राजन्निन्द्रियोपरमो भवेत् ।
न चेन्द्रियव्युपरमे मनस्युपरमो भवेत् ।
एवं मनःप्रधानानि इन्द्रियाणि विभावयेत् ॥ १७
इन्द्रियाणां हि सर्वेषामीश्वरं मन उच्यते ।
एतद्विशन्ति भूतानि सर्वाणीह महायशाः ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
नवनवत्यधिकद्विशततमोऽध्यायः ॥ २९९ ॥

३००

याज्ञवल्क्य उवाच ।

तत्त्वानां सर्गसंख्या च कालसंख्या तथैव च ।
मया प्रोक्तानुपूर्व्येण संहारमपि मे शृणु ॥ १
यथा संहरते जन्तून्ससर्ज च पुनः पुनः ।
अनादिनिधनो ब्रह्मा नित्यश्चाक्षर एव च ॥ २
अहःक्षयमथो बुद्ध्वा निशि स्वप्नमनास्तथा ।
चोदयामास भगवानव्यक्तोऽहंकृतं नरम् ॥ ३
ततः शतसहस्रांशुरव्यक्तेनाभिचोदितः ।
कृत्वा द्वादशधात्मानमादित्यो ज्वलदग्निवत् ॥ ४
चतुर्विधं प्रजाजालं निर्दहत्याशु तेजसा ।
जराय्वण्डस्वेदजातमुद्भिज्जं च नराधिप ॥ ५
एतदुन्मेषमात्रेण विनष्टं स्थाणुजङ्गमम् ।
कूर्मपृष्ठसमा भूमिर्भवत्यथ समन्ततः ॥ ६
जगद्दग्ध्वामितबलः केवलं जगतीं ततः ।
अम्भसा बलिना क्षिप्रमापूर्यत समन्ततः ॥ ७
ततः कालाग्निमासाद्य तदम्भो याति संक्षयम् ।
विनष्टेऽम्भसि राजेन्द्र जाज्वलीत्यनलो महान् ॥ ८
तमप्रमेयोऽतिबलं ज्वलमानं विभावसुम् ।
ऊष्माणं सर्वभूतानां सप्तार्चिषमथाञ्जसा ॥ ९
भक्षयामास बलवान्वायुरष्टात्मको बली ।
विचरन्नमितप्राणस्तिर्यगूर्ध्वमधस्तथा ॥ १०
तमप्रतिबलं भीममाकाशं ग्रसतेऽऽत्मना ।
आकाशमप्यतिनदन्मनो ग्रसति चारिकम् ॥ ११
मनो ग्रसति सर्वात्मा सोऽहंकारः प्रजापतिः ।
अहंकारं महानात्मा भूतभव्यभविष्यवित् ॥ १२
तमप्यनुपमात्मानं विश्वं शंभुः प्रजापतिः ।
अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ॥ १३
सर्वतःपाणिपादान्तः सर्वतोक्षिशिरोमुखः ।
सर्वतःश्रुतिमाँल्लोके सर्वमावृत्य तिष्ठति ॥ १४
हृदयं सर्वभूतानां पर्वणोऽङ्गुष्ठमात्रकः ।
अनुग्रसत्यनन्तं हि महात्मा विश्वमीश्वरः ॥ १५
ततः समभवत्सर्वमक्षयाव्ययमव्रणम् ।
भूतभव्यमनुष्याणां स्रष्टारमनघं तथा ॥ १६
एषोऽध्ययस्ते राजेन्द्र यथावत्परिभाषितः ।
अध्यात्ममधिभूतं च अधिदैवं च श्रूयताम् ॥ १७

इति श्रीमहाभारते शान्तिपर्वणि
त्रिशततमोऽध्यायः ॥ ३०० ॥

३०१

याज्ञवल्क्य उवाच ।

पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ।
गन्तव्यमधिभूतं च विष्णुस्तत्राधिदैवतम् ॥ १

पायुरध्यात्ममित्याहुर्यथातत्त्वार्थदर्शिनः ।
विसर्गमधिभूतं च मित्रस्तत्राधिदैवतम् ॥ २
उपस्थोऽध्यात्ममित्याहुर्यथायोगनिदर्शनम् ।
अधिभूतं तथानन्दो दैवतं च प्रजापतिः ॥ ३
हस्तावध्यात्ममित्याहुर्यथासांख्यनिदर्शनम् ।
कर्तव्यमधिभूतं तु इन्द्रस्तत्राधिदैवतम् ॥ ४
वागध्यात्ममिति प्राहुर्यथाश्रुतिनिदर्शनम् ।
वक्तव्यमधिभूतं तु वह्निस्तत्राधिदैवतम् ॥ ५
चक्षुरध्यात्ममित्याहुर्यथाश्रुतिनिदर्शनम् ।
रूपमत्राधिभूतं तु सूर्यस्तत्राधिदैवतम् ॥ ६
श्रोत्रमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शनम् ।
शब्दस्तत्राधिभूतं तु दिशस्तत्राधिदैवतम् ॥ ७
जिह्वामध्यात्ममित्याहुर्यथातत्त्वनिदर्शनम् ।
रस एवाधिभूतं तु आपस्तत्राधिदैवतम् ॥ ८
घ्राणमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शनम् ।
गन्ध एवाधिभूतं तु पृथिवी चाधिदैवतम् ॥ ९
त्वगध्यात्ममिति प्राहुस्तत्त्वबुद्धिविशारदाः ।
स्पर्श एवाधिभूतं तु पवनश्चाधिदैवतम् ॥ १०
मनोऽध्यात्ममिति प्राहुर्यथाश्रुतिनिदर्शनम् ।
मन्तव्यमधिभूतं तु चन्द्रमाश्चाधिदैवतम् ॥ ११
अहंकारिकमध्यात्ममाहुस्तत्त्वनिदर्शनम् ।
अभिमानोऽधिभूतं तु भवस्तत्राधिदैवतम् ॥ १२
बुद्धिरध्यात्ममित्याहुर्यथावेदनिदर्शनम् ।
बोद्धव्यमधिभूतं तु क्षेत्रज्ञोऽत्राधिदैवतम् ॥ १३
एषा ते व्यक्ततो राजन्विभूतिरनुवर्णिता ।
आदौ मध्ये तथा चान्ते यथातत्त्वेन तत्त्ववित् ॥
प्रकृतिर्गुणान्विकुरुते स्वच्छन्देनात्मकाम्यया ।
क्रीडार्थं तु महाराज शतशोऽथ सहस्रशः ॥ १५
यथा दीपसहस्राणि दीपान्मर्त्याः प्रकुर्वते ।
प्रकृतिस्तथा विकुरुते पुरुषस्य गुणान्बहून् ॥ १६
सत्त्वमानन्द उद्रेकः प्रीतिः प्राकाश्यमेव च ।
सुखं शुद्धित्वमारोग्यं संतोषः श्रद्दधानता ॥ १७
अकार्पण्यमसंरम्भः क्षमा धृतिरहिंसता ।
समता सत्यमानृण्यं मार्दवं ह्रीरचापलम् ॥ १८
शौचमार्जवमाचारमलौल्यं हृद्यसंभ्रमः ।
इष्टानिष्टवियोगानां कृतानामविकत्थनम् ॥ १९
दानेन चानुग्रहणमस्पृहार्थे परार्थता ।
सर्वभूतदया चैव सत्त्वस्यैते गुणाः स्मृताः ॥ २०
रजोगुणानां संघातो रूपमैश्वर्यविग्रहे ।
अत्याशित्वमकारुण्यं सुखदुःखोपसेवनम् ॥ २१
परापवादेषु रतिर्विवादानां च सेवनम् ।
अहंकारस्त्वसत्कारश्चिन्ता वैरोपसेवनम् ॥ २२
परितापोऽपहरणं ह्रीनाशोऽनार्जवं तथा ।
भेदः परुषता चैव कामक्रोधौ मदस्तथा ।
दर्पो द्वेषोऽतिवादश्च एते प्रोक्ता रजोगुणाः ॥ २३
तामसानां तु संघातं प्रवक्ष्याम्युपधार्यताम् ।
मोहोऽप्रकाशस्तामिस्रमन्धतामिस्रसंज्ञितम् ॥ २४
मरणं चान्धतामिस्रं तामिस्रं क्रोध उच्यते ।
तमसो लक्षणानीह भक्षाणामभिरोचनम् ॥ २५
भोजनानामपर्याप्तिस्तथा पेयेष्वतृप्तता ।
गन्धवासो विहारेषु शयनेष्वासनेषु च ॥ २६
दिवास्वप्ने विवादे च प्रमादेषु च वै रतिः ।
नृत्यवादित्रगीतानामज्ञानाच्छ्रद्दधानता ।
द्वेषो धर्मविशेषाणामेते वै तामसा गुणाः ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि
एकाधिकत्रिशततमोऽध्यायः ॥ ३०१ ॥

३०२

याज्ञवल्क्य उवाच ।

एते प्रधानस्य गुणास्त्रयः पुरुषसत्तम ।
कृत्स्नस्य चैव जगतस्तिष्ठन्त्यनपगाः सदा ॥ १

शतधा सहस्रधा चैव तथा शतसहस्रधा ।
कोटिशश्च करोत्येष प्रत्यगात्मानमात्मना ॥ २
सात्त्विकस्योत्तमं स्थानं राजसस्येह मध्यमम् ।
तामसस्याधमं स्थानं प्राहुरध्यात्मचिन्तकाः ॥ ३
केवलेनेह पुण्येन गतिमूर्ध्वामवाप्नुयात् ।
पुण्यपापेन मानुष्यमधर्मेणाप्यधोगतिम् ॥ ४
द्वंद्वमेषां त्रयाणां तु संनिपातं च तत्त्वतः ।
सत्त्वस्य रजसश्चैव तमसश्च शृणुष्व मे ॥ ५
सत्त्वस्य तु रजो दृष्टं रजसश्च तमस्तथा ।
तमसश्च तथा सत्त्वं सत्त्वस्याव्यक्तमेव च ॥ ६
अव्यक्तसत्त्वसंयुक्तो देवलोकमवाप्नुयात् ।
रजःसत्त्वसमायुक्तो मनुष्येषूपपद्यते ॥ ७
रजस्तमोभ्यां संयुक्तस्तिर्यग्योनिषु जायते ।
रजस्तामससत्त्वैश्च युक्तो मानुष्यमाप्नुयात् ॥ ८
पुण्यपापवियुक्तानां स्थानमाहुर्मनीषिणाम् ।
शाश्वतं चाव्ययं चैव अक्षरं चाभयं च यत् ॥ ९
ज्ञानिनां संभवं श्रेष्ठं स्थानमव्रणमच्युतम् ।
अतीन्द्रियमबीजं च जन्ममृत्युतमोनुदम् ॥ १०
अव्यक्तस्थं परं यत्तत्पृष्टस्तेऽहं नराधिप ।
स एष प्रकृतिस्थो हि तस्थुरित्यभिधीयते ॥ ११
अचेतनश्चैष मतः प्रकृतिस्थश्च पार्थिव ।
एतेनाधिष्ठितश्चैव सृजते संहरत्यपि ॥ १२

जनक उवाच ।

अनादिनिधनावेतावुभावेव महामुने ।
अमूर्तिमन्तावचलावप्रकम्प्यौ च निर्व्रणौ ॥ १३
अग्राह्यावृषिशार्दूल कथमेको ह्यचेतनः ।
चेतनावांस्तथा चैकः क्षेत्रज्ञ इति भाषितः ॥ १४
त्वं हि विप्रेन्द्र कार्त्स्न्येन मोक्षधर्ममुपाससे ।
साकल्यं मोक्षधर्मस्य श्रोतुमिच्छामि तत्त्वतः ॥ १५
अस्तित्वं केवलत्वं च विनाभावं तथैव च ।
तथैवोत्क्रमणस्थानं देहिनोऽपि वियुज्यतः ॥ १६
कालेन यद्धि प्राप्नोति स्थानं तद्ब्रूहि मे द्विज ।
सांख्यज्ञानं च तत्त्वेन पृथग्योगं तथैव च ॥ १७
अरिष्टानि च तत्त्वेन वक्तुमर्हसि सत्तम ।
विदितं सर्वमेतत्ते पाणावामलकं यथा ॥ १८

इति श्रीमहाभारते शान्तिपर्वणि
द्व्यधिकत्रिशततमोऽध्यायः ॥ ३०२ ॥

३०३

याज्ञवल्क्य उवाच ।

न शक्यो निर्गुणस्तात गुणीकर्तुं विशां पते ।
गुणवांश्चाप्यगुणवान्यथातत्त्वं निबोध मे ॥ १
गुणैर्हि गुणवानेव निर्गुणश्चागुणस्तथा ।
प्राहुरेवं महात्मानो मुनयस्तत्त्वदर्शिनः ॥ २
गुणस्वभावस्त्वव्यक्तो गुणानेवाभिवर्तते ।
उपयुङ्क्ते च तानेव स चैवाज्ञः स्वभावतः ॥ ३
अव्यक्तस्तु न जानीते पुरुषो ज्ञः स्वभावतः ।
न मत्तः परमस्तीति नित्यमेवाभिमन्यते ॥ ४
अनेन कारणेनैतदव्यक्तं स्यादचेतनम् ।
नित्यत्वादक्षरत्वाच्च क्षराणां तत्त्वतोऽन्यथा ॥ ५
यदाज्ञानेन कुर्वीत गुणसर्गं पुनः पुनः ।
यदात्मानं न जानीते तदाव्यक्तमिहोच्यते ॥ ६
कर्तृत्वाच्चापि तत्त्वानां तत्त्वधर्मी तथोच्यते ।
कर्तृत्वाच्चैव योनीनां योनिधर्मा तथोच्यते ॥ ७
कर्तृत्वात्प्रकृतीनां तु तथा प्रकृतिधर्मिता ।
कर्तृत्वाच्चापि बीजानां बीजधर्मी तथोच्यते ॥ ८
गुणानां प्रसवत्वाच्च तथा प्रसवधर्मवान् ।
कर्तृत्वात्प्रलयानां च तथा प्रलयधर्मिता ॥ ९
बीजत्वात्प्रकृतित्वाच्च प्रलयत्वात्तथैव च ।
उपेक्षकत्वादन्यत्वादभिमानाच्च केवलम् ॥ १०
मन्यन्ते यतयः शुद्धा अध्यात्मविगतज्वराः ।

अनित्यं नित्यमव्यक्तमेवमेतद्धि शुश्रुम ॥ ११
अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषस्तथा ।
सर्वभूतदयावन्तः केवलं ज्ञानमास्थिताः ॥ १२
अन्यः स पुरुषोऽव्यक्तस्त्वध्रुवो ध्रुवसंज्ञकः ।
यथा मुञ्ज इषीकायास्तथैवैतद्धि जायते ॥ १३
अन्यं च मशकं विद्यादन्यच्चोदुम्बरं तथा ।
न चोदुम्बरसंयोगैर्मशकस्तत्र लिप्यते ॥ १४
अन्य एव तथा मत्स्यस्तथान्यदुदकं स्मृतम् ।
न चोदकस्य स्पर्शेन मत्स्यो लिप्यति सर्वशः ॥१५
अन्यो ह्यग्निरुखाप्यन्या नित्यमेवमवैहि भोः ।
न चोपलिप्यते सोऽग्निरुखासंस्पर्शनेन वै ॥ १६
पुष्करं त्वन्यदेवात्र तथान्यदुदकं स्मृतम् ।
न चोदकस्य स्पर्शेन लिप्यते तत्र पुष्करम् ॥ १७
एतेषां सह संवासं विवासं चैव नित्यशः ।
यथा तथैनं पश्यन्ति न नित्यं प्राकृता जनाः ॥१८
ये त्वन्यथैव पश्यन्ति न सम्यक्तेषु दर्शनम् ।
ते व्यक्तं निरयं घोरं प्रविशन्ति पुनः पुनः ॥ १९
सांख्यदर्शनमेतत्ते परिसंख्यातमुत्तमम् ।
एवं हि परिसंख्याय सांख्याः केवलतां गताः ॥२०
ये त्वन्ये तत्त्वकुशलास्तेषामेतन्निदर्शनम् ।
अतः परं प्रवक्ष्यामि योगानामपि दर्शनम् ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
त्र्यधिकत्रिशततमोऽध्यायः ॥ ३०३ ॥

३०४

याज्ञवल्क्य उवाच ।

सांख्यज्ञानं मया प्रोक्तं योगज्ञानं निबोध मे ।
यथाश्रुतं यथादृष्टं तत्त्वेन नृपसत्तम ॥ १
नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम् ।
तावुभावेकचर्यौ तु उभावनिधनौ स्मृतौ ॥ २
पृथक्पृथक्तु पश्यन्ति येऽल्पबुद्धिरता नराः ।
वयं तु राजन्पश्याम एकमेव तु निश्चयात् ॥ ३
यदेव योगाः पश्यन्ति तत्सांख्यैरपि दृश्यते ।
एकं सांख्यं च योगं यः पश्यति स तत्त्ववित् ॥ ४
रुद्रप्रधानानपरान्विद्धि योगान्परंतप ।
तेनैव चाथ देहेन विचरन्ति दिशो दश ॥ ५
यावद्धि प्रलयस्तात सूक्ष्मेणाष्टगुणेन वै ।
योगेन लोकान्विचरन्सुखं संन्यस्य चानघ ॥ ६
वेदेषु चाष्टगुणितं योगमाहुर्मनीषिणः ।
सूक्ष्ममष्टगुणं प्राहुर्नेतरं नृपसत्तम ॥ ७
द्विगुणं योगकृत्यं तु योगानां प्राहुरुत्तमम् ।
सगुणं निर्गुणं चैव यथाशास्त्रनिदर्शनम् ॥ ८
धारणा चैव मनसः प्राणायामश्च पार्थिव ।
प्राणायामो हि सगुणो निर्गुणं धारयं मनः ॥ ९
यत्र दृश्येत मुञ्चन्वै प्राणान्मैथिलसत्तम ।
वाताधिक्यं भवत्येव तस्माद्धि न समाचरेत् ॥१०
निशायाः प्रथमे यामे चोदना द्वादश स्मृताः ।
मध्ये सुप्त्वा परे यामे द्वादशैव तु चोदनाः ॥ ११
तदेवमुपशान्तेन दान्तेनैकान्तशीलिना ।
आत्मारामेण बुद्धेन योक्तव्योऽऽत्मा न संशयः ॥
पञ्चानामिन्द्रियाणां तु दोषानाक्षिप्य पञ्चधा ।
शब्दं स्पर्शं तथा रूपं रसं गन्धं तथैव च ॥ १३
प्रतिभामपवर्गं च प्रतिसंहृत्य मैथिल ।
इन्द्रियग्राममखिलं मनस्यभिनिवेश्य ह ॥ १४
मनस्तथैवाहंकारे प्रतिष्ठाप्य नराधिप ।
अहंकारं तथा बुद्धौ बुद्धिं च प्रकृतावपि ॥ १५
एवं हि परिसंख्याय ततो ध्यायेत केवलम् ।
विरजस्कमलं नित्यमनन्तं शुद्धमव्रणम् ॥ १६
तस्थुषं पुरुषं सत्त्वमभेद्यमजरामरम् ।
शाश्वतं चाव्ययं चैव ईशानं ब्रह्म चाव्ययम् ॥१७
युक्तस्य तु महाराज लक्षणान्युपधारयेत् ।

लक्षणं तु प्रसादस्य यथा तृप्तः सुखं स्वपेत् ॥ १८
निवाते तु यथा दीपो ज्वलेत्स्नेहसमन्वितः ।
निश्चलोर्ध्वशिखस्तद्वद्युक्तमाहुर्मनीषिणः ॥ १९
पाषाण इव मेघोत्थैर्यथा बिन्दुभिराहतः ।
नालं चालयितुं शक्यस्तथा युक्तस्य लक्षणम् ॥२०
शङ्खदुन्दुभिनिर्घोषैर्विविधैर्गीतवादितैः ।
क्रियमाणैर्न कम्पेत युक्तस्यैतन्निदर्शनम् ॥ २१
तैलपात्रं यथा पूर्णं कराभ्यां गृह्य पूरुषः ।
सोपानमारुहेद्भीतस्तर्ज्यमानोऽसिपाणिभिः ॥ २२
संयतात्मा भयात्तेषां न पात्राद्बिन्दुमुत्सृजेत् ।
तथैवोत्तरमाणस्य एकाग्रमनसस्तथा ॥ २३
स्थिरत्वादिन्द्रियाणां तु निश्चलत्वात्तथैव च ।
एवं युक्तस्य तु मुनेर्लक्षणान्युपधारयेत् ॥ २४
स युक्तः पश्यति ब्रह्म यत्तत्परममव्ययम् ।
महतस्तमसो मध्ये स्थितं ज्वलनसंनिभम् ॥ २५
एतेन केवलं याति त्यक्त्वा देहमसाक्षिकम् ।
कालेन महता राजञ्श्रुतिरेषा सनातनी ॥ २६
एतद्धि योगं योगानां किमन्यद्योगलक्षणम् ।
विज्ञाय तद्धि मन्यन्ते कृतकृत्या मनीषिणः ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि
चतुरधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥

३०५

याज्ञवल्क्य उवाच ।

तथैवोत्क्रममाणं तु शृणुष्वावहितो नृप ।
पद्भ्यामुत्क्रममाणस्य वैष्णवं स्थानमुच्यते ॥ १
जङ्घाभ्यां तु वसून्देवानाप्नुयादिति न श्रुतम् ।
जानुभ्यां च महाभागान्देवान्साध्यानवाप्नुयात् ॥ २
पायुनोत्क्रममाणस्तु मैत्रं स्थानमवाप्नुयात् ।
पृथिवीं जघनेनाथ ऊरुभ्यां तु प्रजापतिम् ॥ ३
पार्श्वाभ्यां मरुतो देवान्नासाभ्यामिन्दुमेव च ।
बाहुभ्यामिन्द्रमित्याहुरुरसा रुद्रमेव च ॥ ४
ग्रीवायास्तमृषिश्रेष्ठं नरमाप्नोत्यनुत्तमम् ।
विश्वेदेवान्मुखेनाथ दिशः श्रोत्रेण चाप्नुयात् ॥ ५
घ्राणेन गन्धवहनं नेत्राभ्यां सूर्यमेव च ।
भ्रूभ्यां चैवाश्विनौ देवौ ललाटेन पितॄनथ ॥ ६
ब्रह्माणमाप्नोति विभुं मूर्ध्ना देवाग्रजं तथा ।
एतान्युत्क्रमणस्थानान्युक्तानि मिथिलेश्वर ॥ ७
अरिष्टानि तु वक्ष्यामि विहितानि मनीषिभिः ।
संवत्सरवियोगस्य संभवेयुः शरीरिणः ॥ ८
योऽरुन्धतीं न पश्येत दृष्टपूर्वां कदाचन ।
तथैव ध्रुवमित्याहुः पूर्णेन्दुं दीपमेव च ।
खण्डाभासं दक्षिणतस्तेऽपि संवत्सरायुषः ॥ ९
परचक्षुषि चात्मानं ये न पश्यन्ति पार्थिव ।
आत्मच्छायाकृतीभूतं तेऽपि संवत्सरायुषः ॥ १०
अतिद्युतिरतिप्रज्ञा अप्रज्ञा चाद्युतिस्तथा ।
प्रकृतेर्विक्रियापत्तिः षण्मासान्मृत्युलक्षणम् ॥ ११
दैवतान्यवजानाति ब्राह्मणैश्च विरुध्यते ।
कृष्णश्यावच्छविच्छायः षण्मासान्मृत्युलक्षणम् ॥
शीर्णनाभि यथा चक्रं छिद्रं सोमं प्रपश्यति ।
तथैव च सहस्रांशुं सप्तरात्रेण मृत्युभाक् ॥ १३
शवगन्धमुपाघ्राति सुरभिं प्राप्य यो नरः ।
देवतायतनस्थस्तु षड्रात्रेण स मृत्युभाक् ॥ १४
कर्णनासावनमनं दन्तदृष्टिविरागिता ।
संज्ञालोपो निरूष्मत्वं सद्योमृत्युनिदर्शनम् ॥ १५
अकस्माच्च स्रवेद्यस्य वाममक्षि नराधिप ।
मूर्धतश्चोत्पतेद्धूमः सद्योमृत्युनिदर्शनम् ॥ १६
एतावन्ति त्वरिष्टानि विदित्वा मानवोऽऽत्मवान् ।
निशि चाहनि चात्मानं योजयेत्परमात्मनि ॥ १७
प्रतीक्षमाणस्तत्कालं यत्कालं प्रति तद्भवेत् ।
अथास्य नेष्टं मरणं स्थातुमिच्छेदिमां क्रियाम् ॥१८

सर्वगन्धान्रसांश्चैव धारयेत समाहितः ।
तथा हि मृत्युं जयति तत्परेणान्तरात्मना ॥ १९
ससांख्यधारणं चैव विदित्वा मनुजर्षभ ।
जयेच्च मृत्युं योगेन तत्परेणान्तरात्मना ॥ २०
गच्छेत्प्राप्याक्षयं कृत्स्नमजन्म शिवमव्ययम् ।
शाश्वतं स्थानमचलं दुष्प्रापमकृतात्मभिः ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाधिकत्रिशततमोऽध्यायः ॥ ३०५ ॥

३०६

याज्ञवल्क्य उवाच ।

अव्यक्तस्थं परं यत्तत्पृष्टस्तेऽहं नराधिप ।
परं गुह्यमिमं प्रश्नं शृणुष्वावहितो नृप ॥ १
यथार्षेणेह विधिना चरतावमतेन ह ।
मयादित्यादवाप्तानि यजूंषि मिथिलाधिप ॥ २
महता तपसा देवस्तपिष्ठः सेवितो मया ।
प्रीतेन चाहं विभुना सूर्येणोक्तस्तदानघ ॥ ३
वरं वृणीष्व विप्रर्षे यदिष्टं ते सुदुर्लभम् ।
तत्ते दास्यामि प्रीतात्मा मत्प्रसादो हि दुर्लभः ॥४
ततः प्रणम्य शिरसा मयोक्तस्तपतां वरः ।
यजूंषि नोपयुक्तानि क्षिप्रमिच्छामि वेदितुम् ॥ ५
ततो मां भगवानाह वितरिष्यामि ते द्विज ।
सरस्वतीह वाग्भूता शरीरं ते प्रवेक्ष्यति ॥ ६
ततो मामाह भगवानास्यं स्वं विवृतं कुरु ।
विवृतं च ततो मेऽऽस्यं प्रविष्टा च सरस्वती ॥ ७
ततो विदह्यमानोऽहं प्रविष्टोऽम्भस्तदानघ ।
अविज्ञानादमर्षाच्च भास्करस्य महात्मनः ॥ ८
ततो विदह्यमानं मामुवाच भगवान्रविः ।
मुहूर्तं सह्यतां दाहस्ततः शीतीभविष्यसि ॥ ९
शीतीभूतं च मां दृष्ट्वा भगवानाह भास्करः ।
प्रतिष्ठास्यति ते वेदः सोत्तरः सखिलो द्विज ॥१०
कृत्स्नं शतपथं चैव प्रणेष्यसि द्विजर्षभ ।
तस्यान्ते चापुनर्भावे बुद्धिस्तव भविष्यति ॥ ११
प्राप्स्यसे च यदिष्टं तत्सांख्ययोगेप्सितं पदम् ।
एतावदुक्त्वा भगवानस्तमेवाभ्यवर्तत ॥ १२
ततोऽनुव्याहृतं श्रुत्वा गते देवे विभावसौ ।
गृहमागत्य संहृष्टोऽचिन्तयं वै सरस्वतीम् ॥ १३
ततः प्रवृत्तातिशुभा स्वरव्यञ्जनभूषिता ।
ॐकारमादितः कृत्वा मम देवी सरस्वती ॥ १४
ततोऽहमर्घ्यं विधिवत्सरस्वत्यै न्यवेदयम् ।
तपतां च वरिष्ठाय निषण्णस्तत्परायणः ॥ १५
ततः शतपथं कृत्स्नं सरहस्यं ससंग्रहम् ।
चक्रे सपरिशेषं च हर्षेण परमेण ह ॥ १६
कृत्वा चाध्ययनं तेषां शिष्याणां शतमुत्तमम् ।
विप्रियार्थं सशिष्यस्य मातुलस्य महात्मनः ॥ १७
ततः सशिष्येण मया सूर्येणेव गभस्तिभिः ।
व्याप्तो यज्ञो महाराज पितुस्तव महात्मनः ॥ १८
मिषतो देवलस्यापि ततोऽर्धं हृतवानहम् ।
स्ववेददक्षिणायाथ विमर्दे मातुलेन ह ॥ १९
सुमन्तुनाथ पैलेन तथा जैमिनिना च वै ।
पित्रा ते मुनिभिश्चैव ततोऽहमनुमानितः ॥ २०
दश पञ्च च प्राप्तानि यजूंष्यर्कान्मयानघ ।
तथैव लोमहर्षाच्च पुराणमवधारितम् ॥ २१
बीजमेतत्पुरस्कृत्य देवीं चैव सरस्वतीम् ।
सूर्यस्य चानुभावेन प्रवृत्तोऽहं नराधिप ॥ २२
कर्तुं शतपथं वेदमपूर्वं कारितं च मे ।
यथाभिलषितं मार्गं तथा तच्चोपपादितम् ॥ २३
शिष्याणामखिलं कृत्स्नमनुज्ञातं ससंग्रहम् ।
सर्वे च शिष्याः शुचयो गताः परमहर्षिताः ॥२४
शाखाः पञ्चदशेमास्तु विद्या भास्करदर्शिताः ।
प्रतिष्ठाप्य यथाकामं वेद्यं तदनुचिन्तयम् ॥ २५

किमत्र ब्रह्मण्यमृतं किं च वेद्यमनुत्तमम् ।
चिन्तये तत्र चागत्य गन्धर्वो मामपृच्छत ॥ २६
विश्वावसुस्ततो राजन्वेदान्तज्ञानकोविदः ।
चतुर्विंशतिकान्प्रश्नान्पृष्ट्वा वेदस्य पार्थिव ।
पञ्चविंशतिमं प्रश्नं पप्रच्छान्वीक्षिकीं तथा ॥ २७
विश्वाविश्वं तथाश्वाश्वं मित्रं वरुणमेव च ।
ज्ञानं ज्ञेयं तथाज्ञो ज्ञः कस्तपा अतपास्तथा ।
सूर्यादः सूर्य इति च विद्याविद्ये तथैव च ॥ २८
वेद्यावेद्यं तथा राजन्नचलं चलमेव च ।
अपूर्वमक्षयं क्षय्यमेतत्प्रश्नमनुत्तमम् ॥ २९
अथोक्तश्च मया राजन्राजा गन्धर्वसत्तमः ।
पृष्टवाननुपूर्वेण प्रश्नमुत्तममर्थवत् ॥ ३०
मुहूर्तं मृष्यतां तावद्यावदेनं विचिन्तये ।
बाढमित्येव कृत्वा स तूष्णीं गन्धर्व आस्थितः ॥
ततोऽन्वचिन्तयमहं भूयो देवीं सरस्वतीम् ।
मनसा स च मे प्रश्नो दध्नो घृतमिवोद्धृतम् ॥३२
तत्रोपनिषदं चैव परिशेषं च पार्थिव ।
मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम् ॥३३
चतुर्थी राजशार्दूल विद्यैषा सांपरायिकी ।
उदीरिता मया तुभ्यं पञ्चविंशेऽधि धिष्ठिता ॥३४
अथोक्तस्तु मया राजन्राजा विश्वावसुस्तदा ।
श्रूयतां यद्भवानस्मान्प्रश्नं संपृष्टवानिह ॥ ३५
विश्वाविश्वेति यदिदं गन्धर्वेन्द्रानुपृच्छसि ।
विश्वाव्यक्तं परं विद्याद्भूतभव्यभयंकरम् ॥ ३६
त्रिगुणं गुणकर्तृत्वादविश्वो निष्कलस्तथा ।
अश्वस्तथैव मिथुनमेवमेवानुदृश्यते ॥ ३७
अव्यक्तं प्रकृतिं प्राहुः पुरुषेति च निर्गुणम् ।
तथैव मित्रं पुरुषं वरुणं प्रकृतिं तथा ॥ ३८
ज्ञानं तु प्रकृतिं प्राहुर्ज्ञेयं निष्कलमेव च ।
अज्ञश्च ज्ञश्च पुरुषस्तस्मान्निष्कल उच्यते ॥ ३९
कस्तपा अतपाः प्रोक्तः कोऽसौ पुरुष उच्यते ।
तपाः प्रकृतिरित्याहुरतपा निष्कलः स्मृतः ॥ ४०
तथैवावेद्यमव्यक्तं वेद्यः पुरुष उच्यते ।
चलाचलमिति प्रोक्तं त्वया तदपि मे शृणु ॥ ४१
चलां तु प्रकृतिं प्राहुः कारणं क्षेपसर्गयोः ।
अक्षेपसर्गयोःकर्ता निश्चलः पुरुषः स्मृतः ॥ ४२
अजावुभावप्रजौ च अक्षयौ चाप्युभावपि ।
अजौ नित्यावुभौ प्राहुरध्यात्मगतिनिश्चयाः ॥ ४३
अक्षयत्वात्प्रजनने अजमत्राहुरव्ययम् ।
अक्षयं पुरुषं प्राहुः क्षयो ह्यस्य न विद्यते ॥ ४४
गुणक्षयत्वात्प्रकृतिः कर्तृत्वादक्षयं बुधाः ।
एषा तेऽऽन्वीक्षिकी विद्या चतुर्थी सांपरायिकी ॥
विद्योपेतं धनं कृत्वा कर्मणा नित्यकर्मणि ।
एकान्तदर्शना वेदाः सर्वे विश्वावसो स्मृताः ॥४६
जायन्ते च म्रियन्ते च यस्मिन्नेते यतश्च्युताः ।
वेदार्थं ये न जानन्ति वेद्यं गन्धर्वसत्तम ॥ ४७
साङ्गोपाङ्गानपि यदि पञ्च वेदानधीयते ।
वेदवेद्यं न जानीते वेदभारवहो हि सः ॥ ४८
यो घृतार्थी खरीक्षीरं मथेद्गन्धर्वसत्तम ।
विष्ठां तत्रानुपश्येत न मण्डं नापि वा घृतम् ॥ ४९
तथा वेद्यमवेद्यं च वेदविद्यो न विन्दति ।
स केवलं मूढमतिर्ज्ञानभारवहः स्मृतः ॥ ५०
द्रष्टव्यौ नित्यमेवैतौ तत्परेणान्तरात्मना ।
यथास्य जन्मनिधने न भवेतां पुनः पुनः ॥ ५१
अजस्रं जन्मनिधनं चिन्तयित्वा त्रयीमिमाम् ।
परित्यज्य क्षयमिह अक्षयं धर्ममास्थितः ॥ ५२
यदा तु पश्यतेऽत्यन्तमहन्यहनि काश्यप ।
तदा स केवलीभूतः षड्विंशमनुपश्यति ॥ ५३
अन्यश्च शश्वदव्यक्तस्तथान्यः पञ्चविंशकः ।
तस्य द्वावनुपश्येत तमेकमिति साधवः ॥ ५४

तेनैतन्नाभिजानन्ति पञ्चविंशकमच्युतम् ।
जन्ममृत्युभयाद्योगाः सांख्याश्च परमैषिणः ॥ ५५

विश्वावसुरुवाच ।

पञ्चविंशं यदेतत्ते प्रोक्तं ब्राह्मणसत्तम ।
तथा तन्न तथा वेति तद्भवान्वक्तुमर्हति ॥ ५६
जैगीषव्यस्यासितस्य देवलस्य च मे श्रुतम् ।
पराशरस्य विप्रर्षेर्वार्षगण्यस्य धीमतः ॥ ५७
भिक्षोः पञ्चशिखस्याथ कपिलस्य शुकस्य च ।
गौतमस्यार्ष्टिषेणस्य गर्गस्य च महात्मनः ॥ ५८
नारदस्यासुरेश्चैव पुलस्त्यस्य च धीमतः ।
सनत्कुमारस्य ततः शुक्रस्य च महात्मनः ॥ ५९
कश्यपस्य पितुश्चैव पूर्वमेव मया श्रुतम् ।
तदनन्तरं च रुद्रस्य विश्वरूपस्य धीमतः ॥ ६०
दैवतेभ्यः पितृभ्यश्च दैत्येभ्यश्च ततस्ततः ।
प्राप्तमेतन्मया कृत्स्नं वेद्यं नित्यं वदन्त्युत ॥ ६१
तस्मात्तद्वै भवद्बुद्ध्या श्रोतुमिच्छामि ब्राह्मण ।
भवान्प्रबर्हः शास्त्राणां प्रगल्भश्चातिबुद्धिमान् ॥६२
न तवाविदितं किंचिद्भवाञ्श्रुतिनिधिः स्मृतः ।
कथ्यते देवलोके च पितृलोके च ब्राह्मण ॥ ६३
ब्रह्मलोकगताश्चैव कथयन्ति महर्षयः ।
पतिश्च तपतां शश्वदादित्यस्तव भाषते ॥ ६४
सांख्यज्ञानं त्वया ब्रह्मन्नवाप्तं कृत्स्नमेव च ।
तथैव योगज्ञानं च याज्ञवल्क्य विशेषतः ॥ ६५
निःसंदिग्धं प्रबुद्धस्त्वं बुध्यमानश्चराचरम् ।
श्रोतुमिच्छामि तज्ज्ञानं घृतं मण्डमयं यथा ॥ ६६

याज्ञवल्क्य उवाच ।

कृत्स्नधारिणमेव त्वां मन्ये गन्धर्वसत्तम ।
जिज्ञाससि च मां राजंस्तन्निबोध यथाश्रुतम् ॥६७
अबुध्यमानां प्रकृतिं बुध्यते पञ्चविंशकः ।
न तु बुध्यति गन्धर्व प्रकृतिः पञ्चविंशकम् ॥ ६८
अनेनाप्रतिबोधेन प्रधानं प्रवदन्ति तम् ।
सांख्ययोगाश्च तत्त्वज्ञा यथाश्रुतिनिदर्शनात् ॥ ६९
पश्यंस्तथैवापश्यंश्च पश्यत्यन्यस्तथानघ ।
षड्विंशः पञ्चविंशं च चतुर्विंशं च पश्यति ।
न तु पश्यति पश्यंस्तु यश्चैनमनुपश्यति ॥ ७०
पञ्चविंशोऽभिमन्येत नान्योऽस्ति परमो मम ।
न चतुर्विंशकोऽग्राह्यो मनुजैर्ज्ञानदर्शिभिः ॥ ७१
मत्स्येवोदकमन्वेति प्रवर्तति प्रवर्तनात् ।
यथैव बुध्यते मत्स्यस्तथैषोऽप्यनुबुध्यते ।
सस्नेहः सहवासाच्च साभिमानश्च नित्यशः ॥ ७२
स निमज्जति कालस्य यदैकत्वं न बुध्यते ।
उन्मज्जति हि कालस्य ममत्वेनाभिसंवृतः ॥ ७३
यदा तु मन्यतेऽन्योऽहमन्य एष इति द्विजः ।
तदा स केवलीभूतः षड्विंशमनुपश्यति ॥ ७४
अन्यश्च राजन्नवरस्तथान्यः पञ्चविंशकः ।
तत्स्थत्वादनुपश्यन्ति एक एवेति साधवः ॥ ७५
तेनैतन्नाभिनन्दन्ति पञ्चविंशकमच्युतम् ।
जन्ममृत्युभयाद्भीता योगाः सांख्याश्च काश्यप ।
षड्विंशमनुपश्यन्ति शुचयस्तत्परायणाः ॥ ७६
यदा स केवलीभूतः षड्विंशमनुपश्यति ।
तदा स सर्वविद्विद्वान्न पुनर्जन्म विन्दति ॥ ७७
एवमप्रतिबुद्धश्च बुध्यमानश्च तेऽनघ ।
बुद्धश्चोक्तो यथातत्त्वं मया श्रुतिनिदर्शनात् ॥ ७८
पश्यापश्यं योऽनुपश्येत्क्षेमं तत्त्वं च काश्यप ।
केवलाकेवलं चाद्यं पञ्चविंशात्परं च यत् ॥ ७९

विश्वावसुरुवाच ।

तथ्यं शुभं चैतदुक्तं त्वया भोः
सम्यक्क्षेमं देवताद्यं यथावत् ।
स्वस्त्यक्षयं भवतश्चास्तु नित्यं
बुद्ध्या सदा बुद्धियुक्तं नमस्ते ॥ ८०

याज्ञवल्क्य उवाच ।

एवमुक्त्वा संप्रयातो दिवं स
विभ्राजन्वै श्रीमता दर्शनेन ।
तुष्टश्च तुष्ट्या परयाभिनन्द्य
प्रदक्षिणं मम कृत्वा महात्मा ॥ ८१
ब्रह्मादीनां खेचराणां क्षितौ च
ये चाधस्तात्संवसन्ते नरेन्द्र ।
तत्रैव तद्दर्शनं दर्शयन्वै
सम्यक्क्षेम्यं ये पथं संश्रिता वै ॥ ८२
सांख्याः सर्वे सांख्यधर्मे रताश्च
तद्वद्योगा योगधर्मे रताश्च ।
ये चाप्यन्ये मोक्षकामा मनुष्या-
स्तेषामेतद्दर्शनं ज्ञानदृष्टम् ॥ ८३
ज्ञानान्मोक्षो जायते पूरुषाणां
नास्त्यज्ञानादेवमाहुर्नरेन्द्र ।
तस्माज्ज्ञानं तत्त्वतोऽन्वेषितव्यं
येनात्मानं मोक्षयेज्जन्ममृत्योः ॥ ८४
प्राप्य ज्ञानं ब्राह्मणात्क्षत्रियाद्वा
वैश्याच्छूद्रादपि नीचादभीक्ष्णम् ।
श्रद्धातव्यं श्रद्दधानेन नित्यं
न श्रद्धिनं जन्ममृत्यू विशेताम् ॥ ८५
सर्वे वर्णा ब्राह्मणा ब्रह्मजाश्च
सर्वे नित्यं व्याहरन्ते च ब्रह्म ।
तत्त्वं शास्त्रं ब्रह्मबुद्ध्या ब्रवीमि
सर्वं विश्वं ब्रह्म चैतत्समस्तम् ॥ ८६
ब्रह्मास्यतो ब्राह्मणाः संप्रसूता
बाहुभ्यां वै क्षत्रियाः संप्रसूताः ।
नाभ्यां वैश्याः पादतश्चापि शूद्राः
सर्वे वर्णा नान्यथा वेदितव्याः ॥ ८७
अज्ञानतः कर्मयोनिं भजन्ते
तां तां राजंस्ते यथा यान्त्यभावम् ।
तथा वर्णा ज्ञानहीनाः पतन्ते
घोरादज्ञानात्प्राकृतं योनिजालम् ॥ ८८
तस्माज्ज्ञानं सर्वतो मार्गितव्यं
सर्वत्रस्थं चैतदुक्तं मया ते ।
तस्थौ ब्रह्मा तस्थिवांश्चापरो य-
स्तस्मै नित्यं मोक्षमाहुर्द्विजेन्द्राः ॥ ८९
यत्ते पृष्टं तन्मया चोपदिष्टं
याथातथ्यं तद्विशोको भवस्व ।
राजन्गच्छस्वैतदर्थस्य पारं
सम्यक्प्रोक्तं स्वस्ति तेऽस्त्वत्र नित्यम् ॥ ९०

भीष्म उवाच ।

स एवमनुशास्तस्तु याज्ञवल्क्येन धीमता ।
प्रीतिमानभवद्राजा मिथिलाधिपतिस्तदा ॥ ९१
गते मुनिवरे तस्मिन्कृते चापि प्रदक्षिणे ।
दैवरातिर्नरपतिरासीनस्तत्र मोक्षवित् ॥ ९२
गोकोटिं स्पर्शयामास हिरण्यस्य तथैव च ।
रत्नाञ्जलिमथैकं च ब्राह्मणेभ्यो ददौ तदा ॥ ९३
विदेहराज्यं च तथा प्रतिष्ठाप्य सुतस्य वै ।
यतिधर्ममुपासंश्चाप्यवसन्मिथिलाधिपः ॥ ९४
सांख्यज्ञानमधीयानो योगशास्त्रं च कृत्स्नशः ।
धर्माधर्मौ च राजेन्द्र प्राकृतं परिगर्हयन् ॥ ९५
अनन्तमिति कृत्वा स नित्यं केवलमेव च ।
धर्माधर्मौ पुण्यपापे सत्यासत्ये तथैव च ॥ ९६
जन्ममृत्यू च राजेन्द्र प्राकृतं तदचिन्तयत् ।
ब्रह्माव्यक्तस्य कर्मेदमिति नित्यं नराधिप ॥ ९७
पश्यन्ति योगाः सांख्याश्च स्वशास्त्रकृतलक्षणाः ।
इष्टानिष्टवियुक्तं हि तस्थौ ब्रह्म परात्परम् ।
नित्यं तमाहुर्विद्वांसः शुचिस्तस्माच्छुचिर्भव ॥ ९८
दीयते यच्च लभते दत्तं यच्चानुमन्यते ।

ददाति च नरश्रेष्ठ प्रतिगृह्णाति यच्च ह ।
ददात्यव्यक्तमेवैतत्प्रतिगृह्णाति तच्च वै ॥ ९९
आत्मा ह्येवात्मनो ह्येकः कोऽन्यस्त्वत्तोऽधिको भवेत् ।
एवं मन्यस्व सततमन्यथा मा विचिन्तय ॥ १००
यस्याव्यक्तं न विदितं सगुणं निर्गुणं पुनः ।
तेन तीर्थानि यज्ञाश्च सेवितव्याविपश्चिता ॥ १०१
न स्वाध्यायैस्तपोभिर्वा यज्ञैर्वा कुरुनन्दन ।
लभतेऽव्यक्तसंस्थानं ज्ञात्वाव्यक्तं महीपते ॥ १०२
तथैव महतः स्थानमाहंकारिकमेव च ।
अहंकारात्परं चापि स्थानानि समवाप्नुयात् ॥ १०३
ये त्वव्यक्तात्परं नित्यं जानते शास्त्रतत्पराः ।
जन्ममृत्युवियुक्तं च वियुक्तं सदसच्च यत् ॥ १०४
एतन्मयाप्तं जनकात्पुरस्ता-
तेनापि चाप्तं नृप याज्ञवल्क्यात् ।
ज्ञानं विशिष्टं न तथा हि यज्ञा
ज्ञानेन दुर्गं तरते न यज्ञैः ॥ १०५
दुर्गं जन्म निधनं चापि राज-
न्न भूतिकं ज्ञानविदो वदन्ति ।
यज्ञैस्तपोभिर्नियमैर्व्रतैश्च
दिवं समासाद्य पतन्ति भूमौ ॥ १०६
तस्मादुपासस्व परं महच्छुचि
शिवं विमोक्षं विमलं पवित्रम् ।
क्षेत्रज्ञवित्पार्थिव ज्ञानयज्ञ-
मुपास्य वै तत्त्वमृषिर्भविष्यसि ॥ १०७
उपनिषदमुपाकरोत्तदा वै
जनकनृपस्य पुरा हि याज्ञवल्क्यः ।
यदुपगणितशाश्वताव्ययं त-
च्छुभममृतत्वमशोकमृच्छतीति ॥ १०८

इति श्रीमहाभारते शान्तिपर्वणि
षडधिकत्रिशततमोऽध्यायः ॥ ३०६ ॥

३०७

युधिष्ठिर उवाच ।

ऐश्वर्यं वा महत्प्राप्य धनं वा भरतर्षभ ।
दीर्घमायुरवाप्याथ कथं मृत्युमतिक्रमेत् ॥ १
तपसा वा सुमहता कर्मणा वा श्रुतेन वा ।
रसायनप्रयोगैर्वा कैर्नोपैति जरान्तकौ ॥ २

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
भिक्षोः पञ्चशिखस्येह संवादं जनकस्य च ॥ ३
वैदेहो जनको राजा महर्षिं वेदवित्तमम् ।
पर्यपृच्छत्पञ्चशिखं छिन्नधर्मार्थसंशयम् ॥ ४
केन वृत्तेन भगवन्नतिक्रामेज्जरान्तकौ ।
तपसा वाथ बुद्ध्या वा कर्मणा वा श्रुतेन वा ॥ ५
एवमुक्तः स वैदेहं प्रत्युवाच परोक्षवित् ।
निवृत्तिर्नैतयोरस्ति नानिवृत्तिः कथंचन ॥ ६
न ह्यहानि निवर्तन्ते न मासा न पुनः क्षपाः ।
सोऽयं प्रपद्यतेऽध्वानं चिराय ध्रुवमध्रुवः ॥ ७
सर्वभूतसमुच्छेदः स्रोतसेवोह्यते सदा ।
उह्यमानं निमज्जन्तमप्लवे कालसागरे ।
जरामृत्युमहाग्राहे न कश्चिदभिपद्यते ॥ ८
नैवास्य भविता कश्चिन्नासौ भवति कस्यचित् ।
पथि संगतमेवेदं दारैरन्यैश्च बन्धुभिः ।
नायमत्यन्तसंवासो लब्धपूर्वो हि केनचित् ॥ ९
क्षिप्यन्ते तेन तेनैव निघ्नन्तः पुनः पुनः ।
कालेन जाता जाता हि वायुनेवाभ्रसंचयाः ॥ १०
जरामृत्यू हि भूतानां खादितारौ वृकाविव ।
बलिनां दुर्बलानां च ह्रस्वानां महतामपि ॥ ११
एवंभूतेषु भूतेषु नित्यभूताध्रुवेषु च ।
कथं हृष्येत जातेषु मृतेषु च कथं ज्वरेत् ॥ १२
कुतोऽहमागतः कोऽस्मि क्व गमिष्यामि कस्य वा ।

कस्मिन्स्थितः क्व भविता कस्मात्किमनुशोचसि ॥
द्रष्टा स्वर्गस्य न ह्यस्ति तथैव नरकस्य च ।
आगमांस्त्वनतिक्रम्य दद्याच्चैव यजेत च ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि
सप्ताधिकत्रिशततमोऽध्यायः ॥ ३०७ ॥

३०८

युधिष्ठिर उवाच ।

अपरित्यज्य गार्हस्थ्यं कुरुराजर्षिसत्तम ।
कः प्राप्तो विनयं बुद्ध्या मोक्षतत्त्वं वदस्व मे ॥ १
संन्यस्यते यथात्मायं संन्यस्तात्मा यथा च यः ।
परं मोक्षस्य यच्चापि तन्मे ब्रूहि पितामह ॥ २

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
जनकस्य च संवादं सुलभायाश्च भारत ॥ ३
संन्यासफलिकः कश्चिद्बभूव नृपतिः पुरा ।
मैथिलो जनको नाम धर्मध्वज इति श्रुतः ॥ ४
स वेदे मोक्षशास्त्रे च स्वे च शास्त्रे कृतागमः ।
इन्द्रियाणि समाधाय शशास वसुधामिमाम् ॥ ५
तस्य वेदविदः प्राज्ञाः श्रुत्वा तां साधुवृत्तताम् ।
लोकेषु स्पृहयन्त्यन्ये पुरुषाः पुरुषेश्वर ॥ ६
अथ धर्मयुगे तस्मिन्योगधर्ममनुष्ठिता ।
महीमनुचचारैका सुलभा नाम भिक्षुकी ॥ ७
तया जगदिदं सर्वमटन्त्या मिथिलेश्वरः ।
तत्र तत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः ॥ ८
सा सुसूक्ष्मां कथां श्रुत्वा तथ्यं नेति ससंशया ।
दर्शने जातसंकल्पा जनकस्य बभूव ह ॥ ९
ततः सा विप्रहायाथ पूर्वरूपं हि योगतः ।
अबिभ्रदनवद्याङ्गी रूपमन्यदनुत्तमम् ॥ १०
चक्षुर्निमेषमात्रेण लघ्वस्त्रगतिगामिनी ।
विदेहानां पुरीं सुभ्रूर्जगाम कमलेक्षणा ॥ ११
सा प्राप्य मिथिलां रम्यां समृद्धजनसंकुलाम् ।
भैक्षचर्यापदेशेन ददर्श मिथिलेश्वरम् ॥ १२
राजा तस्याः परं दृष्ट्वा सौकुमार्यं वपुस्तथा ।
केयं कस्य कुतो वेति बभूवागतविस्मयः ॥ १३
ततोऽस्याः स्वागतं कृत्वा व्यादिश्य च वरासनम् ।
पूजितां पादशौचेन वरान्नेनाप्यतर्पयत् ॥ १४
अथ भुक्तवती प्रीता राजानं मन्त्रिभिर्वृतम् ।
सर्वभाष्यविदां मध्ये चोदयामास भिक्षुकी ॥ १५
सुलभा त्वस्य धर्मेषु मुक्तो नेति ससंशया ।
सत्त्वं सत्त्वेन योगज्ञा प्रविवेश महीपते ॥ १६
नेत्राभ्यां नेत्रयोरस्य रश्मीन्संयोज्य रश्मिभिः ।
सा स्म संचोदयिष्यन्तं योगबन्धैर्बबन्ध ह ॥ १७
जनकोऽप्युत्स्मयन्राजा भावमस्या विशेषयन् ।
प्रतिजग्राह भावेन भावमस्या नृपोत्तमः ॥ १८
तदेकस्मिन्नधिष्ठाने संवादः श्रूयतामयम् ।
छत्रादिषु विमुक्तस्य मुक्तायाश्च त्रिदण्डके ॥ १९
भगवत्याः क्व चर्येयं कृता क्व च गमिष्यसि ।
कस्य च त्वं कुतो वेति पप्रच्छैनां महीपतिः ॥२०
श्रुते वयसि जातौ च सद्भावो नाधिगम्यते ।
एष्वर्थेषूत्तरं तस्मात्प्रवेद्यं सत्समागमे ॥ २१
छत्रादिषु विशेषेषु मुक्तं मां विद्धि सर्वशः ।
स त्वां संमन्तुमिच्छामि मानार्हासि मता हि मे॥
यस्माच्चैतन्मया प्राप्तं ज्ञानं वैशेषिकं पुरा ।
यस्य नान्यः प्रवक्तास्ति मोक्षे तमपि मे शृणु ॥२३
पाराशर्यसगोत्रस्य वृद्धस्य सुमहात्मनः ।
भिक्षोः पञ्चशिखस्याहं शिष्यः परमसंमतः ॥ २४
सांख्यज्ञाने तथा योगे महीपालविधौ तथा ।
त्रिविधे मोक्षधर्मेऽस्मिन्गताध्वा छिन्नसंशयः ॥२५
स यथाशास्त्रदृष्टेन मार्गेणेह परिव्रजन् ।
वार्षिकांश्चतुरो मासान्पुरा मयि सुखोषितः ॥ २६

तेनाहं सांख्यमुख्येन सुदृष्टार्थेन तत्त्वतः ।
श्रावितस्त्रिविधं मोक्षं न च राज्याद्विचालितः ॥२७
सोऽहं तामखिलां वृत्तिं त्रिविधां मोक्षसंहिताम् ।
मुक्तरागश्चराम्येकः पदे परमके स्थितः ॥ १८
वैराग्यं पुनरेतस्य मोक्षस्य परमो विधिः ।
ज्ञानादेव च वैराग्यं जायते येन मुच्यते ॥ २९
ज्ञानेन कुरुते यत्नं यत्नेन प्राप्यते महत् ।
महद्द्वंद्वप्रमोक्षाय सा सिद्धिर्या वयोतिगा ॥ ३०
सेयं परमिका बुद्धिः प्राप्ता निर्द्वंद्वता मया ।
इहैव गतमोहेन चरता मुक्तसङ्गिना ॥ ३१
यथा क्षेत्रं मृदूभूतमद्भिराप्लावितं तथा ।
जनयत्यङ्कुरं कर्म नृणां तद्वत्पुनर्भवम् ॥ ३२
यथा चोत्तापितं बीजं कपाले यत्र तत्र वा ।
प्राप्याप्यङ्कुरहेतुत्वमबीजत्वान्न जायते ॥ ३३
तद्वद्भगवता तेन शिखाप्रोक्तेन भिक्षुणा ।
ज्ञानं कृतमबीजं मे विषयेषु न जायते ॥ ३४
नाभिषज्जति कस्मिंश्चिन्नानर्थे न परिग्रहे ।
नाभिरज्यति चैतेषु व्यर्थत्वाद्रागदोषयोः ॥ ३५
यश्च मे दक्षिणं बाहुं चन्दनेन समुक्षयेत् ।
सव्यं वास्या च यस्तक्षेत्समावेतावुभौ मम ॥ ३६
सुखी सोऽहमवाप्तार्थः समलोष्टाश्मकाञ्चनः ।
मुक्तसङ्गः स्थितो राज्ये विशिष्टोऽन्यैस्त्रिदण्डिभिः ॥
मोक्षे च त्रिविधा निष्ठा दृष्टा पूर्वैर्महर्षिभिः ।
ज्ञानं लोकोत्तरं यच्च सर्वत्यागश्च कर्मणाम् ॥ ३८
ज्ञाननिष्ठां वदन्त्येके मोक्षशास्त्रविदो जनाः ।
कर्मनिष्ठां तथैवान्ये यतयः सूक्ष्मदर्शिनः ॥ ३९
प्रहायोभयमप्येतज्ज्ञानं कर्म च केवलम् ।
तृतीयेयं समाख्याता निष्ठा तेन महात्मना ॥ ४०
यमे च नियमे चैव द्वेषे कामे परिग्रहे ।
माने दम्भे तथा स्नेहे सदृशास्ते कुटुम्बिभिः ॥
त्रिदण्डादिषु यद्यस्ति मोक्षो ज्ञानेन केनचित् ।
छत्रादिषु कथं न स्यात्तुल्यहेतौ परिग्रहे ॥ ४२
येन येन हि यस्यार्थः कारणेनेह कस्यचित् ।
तत्तदालम्बते द्रव्यं सर्वः स्वे स्वे परिग्रहे ॥ ४३
दोषदर्शी तु गार्हस्थ्ये यो व्रजत्याश्रमान्तरम् ।
उत्सृजन्परिगृह्णंश्च सोऽपि सङ्गान्न मुच्यते ॥ ४४
आधिपत्ये तथा तुल्ये निग्रहानुग्रहात्मनि ।
राजर्षिभिक्षुकाचार्या मुच्यन्ते केन हेतुना ॥ ४५
अथ सत्याधिपत्येऽपि ज्ञानेनैवेह केवलम् ।
मुच्यन्ते किं न मुच्यन्ते पदे परमके स्थिताः ॥४६
काषायधारणं मौण्ड्यं त्रिविष्टब्धः कमण्डलुः ।
लिङ्गान्यत्यर्थमेतानि न मोक्षायेति मे मतिः ॥ ४७
यदि सत्यपि लिङ्गेऽस्मिञ्ज्ञानमेवात्र कारणम् ।
निर्मोक्षायेह दुःखस्य लिङ्गमात्रं निरर्थकम् ॥ ४८
अथ वा दुःखशैथिल्यं वीक्ष्य लिङ्गे कृता मतिः ।
किं तदेवार्थसामान्यं छत्रादिषु न लक्ष्यते ॥ ४९
आकिंचन्ये न मोक्षोऽस्ति कैंचन्ये नास्ति बन्धनम् ।
कैंचन्ये चेतरे चैव जन्तुर्ज्ञानेन मुच्यते ॥ ५०
तस्माद्धर्मार्थकामेषु तथा राज्यपरिग्रहे ।
बन्धनायतनेष्वेषु विद्ध्यबन्धे पदे स्थितम् ॥ ५१
राज्यैश्वर्यमयः पाशः स्नेहायतनबन्धनः ।
मोक्षाश्मनिशितेनेह छिन्नस्त्यागासिना मया ॥ ५२
सोऽहमेवंगतो मुक्तो जातास्थस्त्वयि भिक्षुकि ।
अयथार्थो हि ते वर्णो वक्ष्यामि शृणु तन्मम ॥५३
सौकुमार्यं तथा रूपं वपुरग्र्यं तथा वयः ।
तवैतानि समस्तानि नियमश्चेति संशयः ॥ ५४
यच्चाप्यननुरूपं ते लिङ्गस्यास्य विचेष्टितम् ।
मुक्तोऽयं स्यान्न वेत्यस्माद्धर्षितो मत्परिग्रहः ॥ ५५
न च कामसमायुक्ते मुक्तेऽप्यस्ति त्रिदण्डकम् ।
न रक्ष्यते त्वया चेदं न मुक्तस्यास्ति गोपना ॥५६

मत्पक्षसंश्रयाच्चायं शृणु यस्ते व्यतिक्रमः ।
आश्रयन्त्याः स्वभावेन मम पूर्वपरिग्रहम् ॥ ५७
प्रवेशस्ते कृतः केन मम राष्ट्रे पुरे तथा ।
कस्य वा संनिसर्गात्त्वं प्रविष्टा हृदयं मम ॥ ५८
वर्णप्रवरमुख्यासि ब्राह्मणी क्षत्रियो ह्यहम् ।
नावयोरेकयोगोऽस्ति मा कृथा वर्णसंकरम् ॥ ५९
वर्तसे मोक्षधर्मेषु गार्हस्थ्ये त्वहमाश्रमे ।
अयं चापि सुकष्टस्ते द्वितीयोऽऽश्रमसंकरः ॥ ६०
सगोत्रां वासगोत्रां वा न वेद त्वां न वेत्थ माम् ।
सगोत्रमाविशन्त्यास्ते तृतीयो गोत्रसंकरः ॥ ६१
अथ जीवति ते भर्ता प्रोषितोऽप्यथ वा क्वचित् ।
अगम्या परभार्येति चतुर्थो धर्मसंकरः ॥ ६२
सा त्वमेतान्यकार्याणि कार्यापेक्षा व्यवस्यसि ।
अविज्ञानेन वा युक्ता मिथ्याज्ञानेन वा पुनः ॥६३
अथ वापि स्वतन्त्रासि स्वदोषेणेह केनचित् ।
यदि किंचिच्छ्रुतं तेऽस्ति सर्वं कृतमनर्थकम् ॥ ६४
इदमन्यत्तृतीयं ते भावस्पर्शविघातकम् ।
दुष्टाया लक्ष्यते लिङ्गं प्रवक्तव्यं प्रकाशितम् ॥ ६५
न मय्येवाभिसंधिस्ते जयैषिण्या जये कृतः ।
येयं मत्परिषत्कृत्स्ना जेतुमिच्छसि तामपि ॥ ६६
तथा ह्येवं पुनश्च त्वं दृष्टिं स्वां प्रतिमुञ्चसि ।
मत्पक्षप्रतिघाताय स्वपक्षोद्भावनाय च ॥ ६७
सा स्वेनामर्षजेन त्वमृद्धिमोहेन मोहिता ।
भूयः सृजसि योगास्त्रं विषामृतमिवैकधा ॥ ६८
इच्छतोर्हि द्वयोर्लाभः स्त्रीपुंसोरमृतोपमः ।
अलाभश्चाप्यरक्तस्य सोऽत्र दोषो विषोपमः ॥६९
मा स्प्राक्षीः साधु जानीष्व स्वशास्त्रमनुपालय ।
कृतेयं हि विजिज्ञासा मुक्तो नेति त्वया मम ।
एतत्सर्वं प्रतिच्छन्नं मयि नार्हसि गूहितुम् ॥ ७०
सा यदि त्वं स्वकार्येण यद्यन्यस्य महीपतेः ।
तत्त्वं सत्रप्रतिच्छन्ना मयि नार्हसि गूहितुम् ॥७१
न राजानं मृषा गच्छेन्न द्विजातिं कथंचन ।
न स्त्रियं स्त्रीगुणोपेतां हन्युर्ह्येते मृषागताः ॥ ७२
राज्ञां हि बलमैश्वर्यं ब्रह्म ब्रह्मविदां बलम् ।
रूपयौवनसौभाग्यं स्त्रीणां बलमनुत्तमम् ॥ ७३
अत एतैर्बलैरेते बलिनः स्वार्थमिच्छता ।
आर्जवेनाभिगन्तव्या विनाशाय ह्यनार्जवम् ॥ ७४
सा त्वं जातिं श्रुतं वृत्तं भावं प्रकृतिमात्मनः ।
कृत्यमागमने चैव वक्तुमर्हसि तत्त्वतः ॥ ७५
इत्येतैरसुखैर्वाक्यैरयुक्तैरसमञ्जसैः ।
प्रत्यादिष्टा नरेन्द्रेण सुलभा न व्यकम्पत ॥ ७६
उक्तवाक्ये तु नृपतौ सुलभा चारुदर्शना ।
ततश्चारुतरं वाक्यं प्रचक्रामाथ भाषितुम् ॥ ७७
नवभिर्नवभिश्चैव दोषैर्वाग्बुद्धिदूषणैः ।
अपेतमुपपन्नार्थमष्टादशगुणान्वितम् ॥ ७८
सौक्ष्म्यं संख्याक्रमौ चोभौ निर्णयः सप्रयोजनः ।
पञ्चैतान्यर्थजातानि वाक्यमित्युच्यते नृप ॥ ७९
एषामेकैकशोऽर्थानां सौक्ष्म्यादीनां सुलक्षणम् ।
शृणु संसार्यमाणानां पदार्थैः पदवाक्यतः ॥ ८०
ज्ञानं ज्ञेयेषु भिन्नेषु यथाभेदेन वर्तते ।
तत्रातिशयिनी बुद्धिस्तत्सौक्ष्म्यमिति वर्तते ॥ ८१
दोषाणां च गुणानां च प्रमाणं प्रविभागशः ।
कंचिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम् ॥ ८२
इदं पूर्वमिदं पश्चाद्वक्तव्यं यद्विवक्षितम् ।
क्रमयोगं तमप्याहुर्वाक्यं वाक्यविदो जनाः ॥ ८३
धर्मार्थकाममोक्षेषु प्रतिज्ञाय विशेषतः ।
इदं तदिति वाक्यान्ते प्रोच्यते स विनिर्णयः ॥८४
इच्छाद्वेषभवैर्दुःखैः प्रकर्षो यत्र जायते ।
तत्र या नृपते वृत्तिस्तत्प्रयोजनमिष्यते ॥ ८५
तान्येतानि यथोक्तानि सौक्ष्म्यादीनि जनाधिप ।

एकार्थसमवेतानि वाक्यं मम निशामय ॥ ८६
उपेतार्थमभिन्नार्थं नापवृत्तं न चाधिकम् ।
नाश्लक्ष्णं न च संदिग्धं वक्ष्यामि परमं तव ॥८७
न गुर्वक्षरसंबद्धं पराङ्मुखमुखं न च ।
नानृतं न त्रिवर्गेण विरुद्धं नाप्यसंस्कृतम् ॥ ८८
न न्यूनं कष्टशब्दं वा व्युत्क्रमाभिहितं न च ।
न शेषं नानुकल्पेन निष्कारणमहेतुकम् ॥ ८९
कामात्क्रोधाद्भयाल्लोभाद्दैन्यादानार्यकात्तथा ।
ह्रीतोऽनुक्रोशतो मानान्न वक्ष्यामि कथंचन ॥ ९०
वक्ता श्रोता च वाक्यं च यदा त्वविकलं नृप ।
सममेति विवक्षायां तदा सोऽर्थः प्रकाशते ॥ ९१
वक्तव्ये तु यदा वक्ता श्रोतारमवमन्यते ।
स्वार्थमाह परार्थं वा तदा वाक्यं न रोहति ॥ ९२
अथ यः स्वार्थमुत्सृज्य परार्थं प्राह मानवः ।
विशङ्का जायते तस्मिन्वाक्यं तदपि दोषवत् ॥९३
यस्तु वक्ता द्वयोरर्थमविरुद्धं प्रभाषते ।
श्रोतुश्चैवात्मनश्चैव स वक्ता नेतरो नृप ॥ ९४
तदर्थवदिदं वाक्यमुपेतं वाक्यसंपदा ।
अविक्षिप्तमना राजन्नेकाग्रः श्रोतुमर्हसि ॥ ९५
कासि कस्य कुतो वेति त्वयाहमभिचोदिता ।
तत्रोत्तरमिदं वाक्यं राजन्नेकमनाः शृणु ॥ ९६
यथा जतु च काष्ठं च पांसवश्चोदबिन्दुभिः ।
सुश्लिष्टानि तथा राजन्प्राणिनामिह संभवः ॥ ९७
शब्दः स्पर्शो रसो रूपं गन्धः पञ्चेन्द्रियाणि च ।
पृथगात्मा दशात्मानः संश्लिष्टा जतुकाष्ठवत् ॥ ९८
न चैषां चोदना काचिदस्तीत्येष विनिश्चयः ।
एकैकस्येह विज्ञानं नास्त्यात्मनि तथा परे ॥ ९९
न वेद चक्षुश्चक्षुष्ट्वं श्रोत्रं नात्मनि वर्तते ।
तथैव व्यभिचारेण न वर्तन्ते परस्परम् ।
संश्लिष्टा नाभिजायन्ते यथाप इह पांसवः ॥१००
बाह्यानन्यानपेक्षन्ते गुणांस्तानपि मे शृणु ।
रूपं चक्षुः प्रकाशश्च दर्शने हेतवस्त्रयः ।
यथैवात्र तथान्येषु ज्ञानज्ञेयेषु हेतवः ॥ १०१
ज्ञानज्ञेयान्तरे तस्मिन्मनो नामापरो गुणः ।
विचारयति येनायं निश्चये साध्वसाधुनी ॥ १०२
द्वादशस्त्वपरस्तत्र बुद्धिर्नाम गुणः स्मृतः ।
येन संशयपूर्वेषु बोद्धव्येषु व्यवस्यति ॥ १०३
अथ द्वादशके तस्मिन्सत्त्वं नामापरो गुणः ।
महासत्त्वोऽल्पसत्त्वो वा जन्तुर्येनानुमीयते ॥१०४
क्षेत्रज्ञ इति चाप्यन्यो गुणस्तत्र चतुर्दशः ।
ममायमिति येनायं मन्यते न च मन्यते ॥ १०५
अथ पञ्चदशो राजन्गुणस्तत्रापरः स्मृतः ।
पृथक्कलासमूहस्य सामग्र्यं तदिहोच्यते ॥ १०६
गुणस्त्वेवापरस्तत्र संघात इति षोडशः ।
आकृतिर्व्यक्तिरित्येतौ गुणौ यस्मिन्समाश्रितौ ॥
सुखदुःखे जरामृत्यू लाभालाभौ प्रियाप्रिये ।
इति चैकोनविंशोऽयं द्वंद्वयोग इति स्मृतः ॥ १०८
ऊर्ध्वमेकोनविंशत्याः कालो नामापरो गुणः ।
इतीमं विद्धि विंशत्या भूतानां प्रभवाप्ययम् ॥१०९
विंशकश्चैष संघातो महाभूतानि पञ्च च ।
सदसद्भावयोगौ च गुणावन्यौ प्रकाशकौ ॥ ११०
इत्येवं विंशतिश्चैव गुणाः सप्त च ये स्मृताः ।
विधिः शुक्रं बलं चेति त्रय एते गुणाः परे ॥१११
एकविंशश्च दश च कलाः संख्यानतः स्मृताः ।
समग्रा यत्र वर्तन्ते तच्छरीरमिति स्मृतम्॥ ११२
अव्यक्तं प्रकृतिं त्वासां कलानां कश्चिदिच्छति ।
व्यक्तं चासां तथैवान्यः स्थूलदर्शी प्रपश्यति॥११३
अव्यक्तं यदि वा व्यक्तं द्वयीमथ चतुष्टयीम् ।
प्रकृतिं सर्वभूतानां पश्यन्त्यध्यात्मचिन्तकाः॥११४
सेयं प्रकृतिरव्यक्ता कलाभिर्व्यक्ततां गता ।

अहं च त्वं च राजेन्द्र ये चाप्यन्ये शरीरिणः ॥
बिन्दुन्यासादयोऽवस्थाः शुक्रशोणितसंभवाः ।
यासामेव निपातेन कललं नाम जायते ॥ ११६
कललादर्बुदोत्पत्तिः पेशी चाप्यर्बुदोद्भवा ।
पेश्यास्त्वङ्गाभिनिर्वृत्तिर्नखरोमाणि चाङ्गतः ॥११७
संपूर्णे नवमे मासे जन्तोर्जातस्य मैथिल ।
जायते नामरूपत्वं स्त्री पुमान्वेति लिङ्गतः ॥११८
जातमात्रं तु तद्रूपं दृष्ट्वा ताम्रनखाङ्गुलि ।
कौमाररूपमापन्नं रूपतो नोपलभ्यते ॥ ११९
कौमाराद्यौवनं चापि स्थाविर्यं चापि यौवनात् ।
अनेन क्रमयोगेन पूर्वं पूर्वं न लभ्यते ॥ १२०
कलानां पृथगर्थानां प्रतिभेदः क्षणे क्षणे ।
वर्तते सर्वभूतेषु सौक्ष्म्यात्तु न विभाव्यते ॥१२१
न चैषामप्ययो राजँल्लक्ष्यते प्रभवो न च ।
अवस्थायामवस्थायां दीपस्येवार्चिषो गतिः ॥ १२२
तस्याप्येवंप्रभावस्य सदश्वस्येव धावतः ।
अजस्रं सर्वलोकस्य कः कुतो वा न वा कुतः ॥
कस्येदं कस्य वा नेदं कुतो वेदं न वा कुतः ।
संबन्धः कोऽस्ति भूतानां स्वैरप्यवयवैरिह ॥१२४
यथादित्यान्मणेश्चैव वीरुद्भ्यश्चैव पावकः ।
भवत्येवं समुदयात्कलानामपि जन्तवः ॥ १२५
आत्मन्येवात्मनात्मानं यथा त्वमनुपश्यसि ।
एवमेवात्मनात्मानमन्यस्मिन्किं न पश्यसि ।
यद्यात्मनि परस्मिंश्च समतामध्यवस्यसि ॥ १२६
अथ मां कासि कस्येति किमर्थमनुपृच्छसि ।
इदं मे स्यादिदं नेति द्वंद्वैर्मुक्तस्य मैथिल ।
कासि कस्य कुतो वेति वचने किं प्रयोजनम् ॥
रिपौ मित्रेऽथ मध्यस्थे विजये संधिविग्रहे ।
कृतवान्यो महीपाल किं तस्मिन्मुक्तलक्षणम् ॥१२८
त्रिवर्गे सप्तधा व्यक्तं यो न वेदेह कर्मसु ।
सङ्गवान्यस्त्रिवर्गे च किं तस्मिन्मुक्तलक्षणम् ॥१२९
प्रिये चैवाप्रिये चैव दुर्बले बलवत्यपि ।
यस्य नास्ति समं चक्षुः किं तस्मिन्मुक्तलक्षणम् ॥
तदमुक्तस्य ते मोक्षे योऽभिमानो भवेन्नृप ।
सुहृद्भिः स निवार्यस्ते विचित्तस्येव भेषजैः ॥१३१
तानि तान्यनुसंदृश्य सङ्गस्थानान्यरिंदम ।
आत्मनात्मनि संपश्येत्किं तस्मिन्मुक्तलक्षणम् ॥
इमान्यन्यानि सूक्ष्माणि मोक्षमाश्रित्य कानिचित् ।
चतुरङ्गप्रवृत्तानि सङ्गस्थानानि मे शृणु ॥ १३३
य इमां पृथिवीं कृत्स्नामेकच्छत्रां प्रशास्ति ह ।
एकमेव स वै राजा पुरमध्यावसत्युत ॥ १३४
तत्पुरे चैकमेवास्य गृहं यदधितिष्ठति ।
गृहे शयनमप्येकं निशायां यत्र लीयते ॥ १३५
शय्यार्धं तस्य चाप्यत्र स्त्रीपूर्वमधितिष्ठति ।
तदनेन प्रसङ्गेन फलेनैवेह युज्यते ॥ १३६
एवमेवोपभोगेषु भोजनाच्छादनेषु च ।
गुणेषु परिमेयेषु निग्रहानुग्रहौ प्रति ॥ १३७
परतन्त्रः सदा राजा स्वल्पे सोऽपि प्रसज्जते ।
संधिविग्रहयोगे च कुतो राज्ञः स्वतन्त्रता ॥ १३८
स्त्रीषु क्रीडाविहारेषु नित्यमस्यास्वतन्त्रता ।
मन्त्रे चामात्यसमितौ कुत एव स्वतन्त्रता ॥ १३९
यदा त्वाज्ञापयत्यन्यांस्तदास्योक्ता स्वतन्त्रता ।
अवशः कार्यते तत्र तस्मिंस्तस्मिन्गुणे स्थितः ॥१४०
स्वप्तुकामो न लभते स्वप्तुं कार्यार्थिभिर्जनैः ।
शयने चाप्यनुज्ञातः सुप्त उत्थाप्यतेऽवशः ॥१४१
स्नाह्यालभ पिब प्राश जुहुध्यग्नीन्यजेति च ।
वदस्व शृणु चापीति विवशः कार्यते परैः ॥ १४२
अभिगम्याभिगम्यैनं याचन्ते सततं नराः ।
न चाप्युत्सहते दातुं वित्तरक्षी महाजनात् ॥१४३
दाने कोशक्षयो ह्यस्य वैरं चाप्यप्रयच्छतः ।

क्षणेनास्योपवर्तन्ते दोषा वैराग्यकारकाः ॥ १४४
प्राज्ञाञ्शूरांस्तथैवाढ्यानेकस्थानेऽपि शङ्कते ।
भयमप्यभये राज्ञो यैश्च नित्यमुपास्यते ॥ १४५
यदा चैते प्रदुष्यन्ति राजन्ये कीर्तिता मया ।
तदैवास्य भयं तेभ्यो जायते पश्य यादृशम् ॥१४६
सर्वः स्वे स्वे गृहे राजा सर्वः स्वे स्वे गृहे गृही ।
निग्रहानुग्रहौ कुर्वंस्तुल्यो जनक राजभिः ॥ १४७
पुत्रा दारास्तथैवात्मा कोशो मित्राणि संचयः ।
परैः साधारणा ह्येते तैस्तैरेवास्य हेतुभिः ॥ १४८
हतो देशः पुरं दग्धं प्रधानः कुञ्जरो मृतः ।
लोकसाधारणेष्वेषु मिथ्याज्ञानेन तप्यते ॥ १४९
अमुक्तो मानसैर्दुःखैरिच्छाद्वेषप्रियोद्भवैः ।
शिरोरोगादिभी रोगैस्तथैव विनिपातिभिः ॥ १५०
द्वंद्वैस्तैस्तैरुपहतः सर्वतः परिशङ्कितः ।
बहुप्रत्यर्थिकं राज्यमुपास्ते गणयन्निशाः ॥ १५१
तदल्पसुखमत्यर्थं बहुदुःखमसारवत् ।
को राज्यमभिपद्येत प्राप्य चोपशमं लभेत् ॥ १५२
ममेदमिति यच्चेदं पुरं राष्ट्रं च मन्यसे ।
बलं कोशममात्यांश्च कस्यैतानि न वा नृप ॥१५३
मित्रामात्यं पुरं राष्ट्रं दण्डः कोशो महीपतिः ।
सप्ताङ्गचक्रसंघातो राज्यमित्युच्यते नृप ॥ १५४
सप्ताङ्गस्यास्य राज्यस्य त्रिदण्डस्येव तिष्ठतः ।
अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः ॥१५५
तेषु तेषु हि कालेषु तत्तदङ्गं विशिष्यते ।
येन यत्सिध्यते कार्यं तत्प्राधान्याय कल्पते ॥१५६
सप्ताङ्गश्चापि संघातस्त्रयश्चान्ये नृपोत्तम ।
संभूय दशवर्गोऽयं भुङ्क्ते राज्यं हि राजवत् ॥१५७
यश्च राजा महोत्साहः क्षत्रधर्मरतो भवेत् ।
स तुष्येद्दशभागेन ततस्त्वन्यो दशावरैः ॥ १५८
नास्त्यसाधारणो राजा नास्ति राज्यमराजकम् ।
राज्येऽसति कुतो धर्मो धर्मेऽसति कुतः परम् ॥
योऽप्यत्र परमो धर्मः पवित्रं राजराज्ययोः ।
पृथिवी दक्षिणा यस्य सोऽश्वमेधो न विद्यते ॥ १६०
साहमेतानि कर्माणि राज्यदुःखानि मैथिल ।
समर्था शतशो वक्तुमथ वापि सहस्रशः ॥ १६१
स्वदेहे नाभिषङ्गो मे कुतः परपरिग्रहे ।
न मामेवंविधां मुक्तामीदृशं वक्तुमर्हसि ॥ १६२
ननु नाम त्वया मोक्षः कृत्स्नः पञ्चशिखाच्छ्रुतः ।
सोपायः सोपनिषदः सोपासङ्गः सनिश्चयः ॥१६३
तस्य ते मुक्तसङ्गस्य पाशानाक्रम्य तिष्ठतः ।
छत्रादिषु विशेषेषु कथं सङ्गः पुनर्नृप ॥ १६४
श्रुतं ते न श्रुतं मन्ये मिथ्या वापि श्रुतं श्रुतम् ।
अथ वा श्रुतसकाशं श्रुतमन्यच्छ्रुतं त्वया ॥ १६५
अथापीमासु संज्ञासु लौकिकीषु प्रतिष्ठसि ।
अभिषङ्गावरोधाभ्यां बद्धस्त्वं प्राकृतो यथा ॥१६६
सत्त्वेनानुप्रवेशो हि योऽयं त्वयि कृतो मया ।
किं तवापकृतं तत्र यदि मुक्तोऽसि सर्वतः ॥१६७
नियमो ह्येष धर्मेषु यतीनां शून्यवासिता ।
शून्यमावासयन्त्या च मया किं कस्य दूषितम् ॥
न पाणिभ्यां न बाहुभ्यां पादोरुभ्यां न चानघ ।
न गात्रावयवैरन्यैः स्पृशामि त्वा नराधिप ॥ १६९
कुले महति जातेन ह्रीमता दीर्घदर्शिना ।
नैतत्सदसि वक्तव्यं सद्वासद्वा मिथः कृतम् ॥१७०
ब्राह्मणा गुरवश्चेमे तथामात्या गुरूत्तमाः ।
त्वं चाथ गुरुरप्येषामेवमन्योन्यगौरवम् ॥ १७१
तदेवमनुसंदृश्य वाच्यावाच्यं परीक्षता ।
स्त्रीपुंसोः समवायोऽयं त्वया वाच्यो न संसदि ॥
यथा पुष्करपर्णस्थं जलं तत्पर्णसंस्थितम् ।
तिष्ठत्यस्पृशती तद्वत्त्वयि वत्स्यामि मैथिल ॥१७३
यदि वाप्यस्पृशन्त्या मे स्पर्शं जानामि कंचन ।

ज्ञानं कृतमबीजं ते कथं तेनेह भिक्षुणा ॥ १७४
न गार्हस्थ्याच्च्युतश्च त्वं मोक्षं नावाप्य दुर्विदम् ।
उभयोरन्तराले च वर्तसे मोक्षवातिकः ॥ १७५
न हि मुक्तस्य मुक्तेन ज्ञस्यैकत्वपृथक्त्वयोः ।
भावाभावसमायोगे जायते वर्णसंकरः ॥ १७६
वर्णाश्रमपृथक्त्वे च दृष्टार्थस्यापृथक्त्विनः ।
नान्यदन्यदिति ज्ञात्वा नान्यदन्यत्प्रवर्तते ॥ १७७
पाणौ कुण्डं तथा कुण्डे पयः पयसि मक्षिकाः ।
आश्रिताश्रययोगेन पृथक्त्वेनाश्रया वयम् ॥ १७८
न तु कुण्डे पयोभावः पयश्चापि न मक्षिकाः ।
स्वयमेवाश्रयन्त्येते भावा न तु पराश्रयम् ॥ १७९
पृथक्त्वादाश्रमाणां च वर्णान्यत्वे तथैव च ।
परस्परपृथक्त्वाच्च कथं ते वर्णसंकरः ॥१८०
नास्मि वर्णोत्तमा जात्या न वैश्या नावरा तथा ।
तव राजन्सवर्णास्मि शुद्धयोनिरविप्लुता ॥ १८१
प्रधानो नाम राजर्षिर्व्यक्तं ते श्रोत्रमागतः ।
कुले तस्य समुत्पन्नां सुलभां नाम विद्धि माम् ॥
द्रोणश्च शतशृङ्गश्च वक्रद्वारश्च पर्वतः ।
मम सत्रेषु पूर्वेषां चिता मघवता सह ॥ १८३
साहं तस्मिन्कुले जाता भर्तर्यसति मद्विधे ।
विनीता मोक्षधर्मेषु चराम्येका मुनिव्रतम् ॥ १८४
नास्मि सत्रप्रतिच्छन्ना न परस्वाभिमानिनी ।
न धर्मसंकरकरी स्वधर्मेऽस्मि धृतव्रता ॥ १८५
नास्थिरा स्वप्रतिज्ञायां नासमीक्ष्यप्रवादिनी ।
नासमीक्ष्यागता चाहं त्वत्सकाशं जनाधिप ॥१८६
मोक्षे ते भावितां बुद्धिं श्रुत्वाहं कुशलैषिणी ।
तव मोक्षस्य चाप्यस्य जिज्ञासार्थमिहागता ॥१८७
न वर्गस्था ब्रवीम्येतत्स्वपक्षपरपक्षयोः ।
मुक्तो न मुच्यते यश्च शान्तो यश्च न शाम्यति ॥
यथा शून्ये पुरागारे भिक्षुरेकां निशां वसेत् ।
तथा हि त्वच्छरीरेऽस्मिन्निमां वत्स्यामि शर्वरीम् ।
साहमासनदानेन वागातिथ्येन चार्चिता ।
सुप्ता सुशरणा प्रीता श्वो गमिष्यामि मैथिल॥१९०
इत्येतानि स वाक्यानि हेतुमन्त्यर्थवन्ति च ।
श्रुत्वा नाधिजगौ राजा किंचिदन्यदतः परम् ॥१९१

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥

३०९

युधिष्ठिर उवाच ।

कथं निर्वेदमापन्नः शुको वैयासकिः पुरा ।
एतदिच्छामि कौरव्य श्रोतुं कौतूहलं हि मे ॥ १

भीष्म उवाच ।

प्राकृतेन सुवृत्तेन चरन्तमकुतोभयम् ।
अध्याप्य कृत्स्नं स्वाध्यायमन्वशाद्वै पिता सुतम् ॥
धर्मं पुत्र निषेवस्व सुतीक्ष्णौ हि हिमातपौ ।
क्षुत्पिपासे च वायुं च जय नित्यं जितेन्द्रियः ॥३
सत्यमार्जवमक्रोधमनसूयां दमं तपः ।
अहिंसां चानृशंस्यं च विधिवत्परिपालय ॥ ४
सत्ये तिष्ठ रतो धर्मे हित्वा सर्वमनार्जवम् ।
देवतातिथिशेषेण यात्रां प्राणस्य संश्रय ॥ ५
फेनपात्रोपमे देहे जीवे शकुनिवत्स्थिते ।
अनित्ये प्रियसंवासे कथं स्वपिषि पुत्रक ॥ ६
अप्रमत्तेषु जाग्रत्सु नित्ययुक्तेषु शत्रुषु ।
अन्तरं लिप्समानेषु बालस्त्वं नावबुध्यसे ॥ ७
गण्यमानेषु वर्षेषु क्षीयमाणे तथायुषि ।
जीविते शिष्यमाणे च किमुत्थाय न धावसि ॥८
ऐहलौकिकमीहन्ते मांसशोणितवर्धनम् ।
पारलौकिककार्येषु प्रसुप्ता भृशनास्तिकाः ॥ ९
धर्माय येऽभ्यसूयन्ति बुद्धिमोहान्विता नराः ।
अपथा गच्छतां तेषामनुयातापि पीड्यते ॥ १०

ये तु तुष्टाः सुनियताः सत्यागमपरायणाः ।
धर्म्यं पन्थानमारूढास्तानुपास्स्व च पृच्छ च ॥ ११
उपधार्य मतं तेषां वृद्धानां धर्मदर्शिनाम् ।
नियच्छ परया बुद्ध्या चित्तमुत्पथगामि वै ॥ १२
अद्यकालिकया बुद्ध्या दूरे श्व इति निर्भयाः ।
सर्वभक्षा न पश्यन्ति कर्मभूमिं विचेतसः ॥ १३
धर्मनिःश्रेणिमास्थाय किंचित्किंचित्समारुह ।
कोशकारवदात्मानं वेष्टयन्नावबुध्यसे ॥ १४
नास्तिकं भिन्नमर्यादं कूलपातमिवास्थिरम् ।
वामतः कुरु विस्रब्धो नरं वेणुमिवोद्धतम् ॥ १५
कामं क्रोधं च मृत्युं च पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि संतर ॥ १६
मृत्युनाभ्याहते लोके जरया परिपीडिते ।
अमोघासु पतन्तीषु धर्मयानेन संतर ॥ १७
तिष्ठन्तं च शयानं च मृत्युरन्वेषते यदा ।
निर्वृतिं लभसे कस्मादकस्मान्मृत्युनाशितः ॥ १८
संचिन्वानकमेवैनं कामानामवितृप्तकम् ।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ॥ १९
क्रमशः संचितशिखो धर्मबुद्धिमयो महान् ।
अन्धकारे प्रवेष्टव्ये दीपो यत्नेन धार्यताम् ॥ २०
संपतन्देहजालानि कदाचिदिह मानुषे ।
ब्राह्मण्यं लभते जन्तुस्तत्पुत्र परिपालय ॥ २१
ब्राह्मणस्य हि देहोऽयं न कामार्थाय जायते ।
इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखम् ॥ २२
ब्राह्मण्यं बहुभिरवाप्यते तपोभि-
स्तल्लब्ध्वा न परिपणेन हेडितव्यम् ।
स्वाध्याये तपसि दमे च नित्ययुक्तः
क्षेमार्थी कुशलपरः सदा यतस्व ॥ २३
अव्यक्तप्रकृतिरयं कलाशरीरः
सूक्ष्मात्मा क्षणत्रुटिशो निमेषरोमा ।
ऋत्वास्यः समबलशुक्लकृष्णनेत्रो
मासाङ्गो द्रवति वयोहयो नराणाम् ॥ २४
तं दृष्ट्वा प्रसृतमजस्रमुग्रवेगं
गच्छन्तं सततमिहाव्यपेक्षमाणम् ।
चक्षुस्ते यदि न परप्रणेतृनेयं
धर्मे ते भवतु मनः परं निशम्य ॥ २५
येऽमी तु प्रचलितधर्मकामवृत्ताः
क्रोशन्तः सततमनिष्टसंप्रयोगाः ।
क्लिश्यन्ते परिगतवेदनाशरीरा
बह्वीभिः सुभृशमधर्मवासनाभिः ॥ २६
राजा धर्मपरः सदा शुभगोप्ता
समीक्ष्य सुकृतिनां दधाति लोकान् ।
बहुविधमपि चरतः प्रदिशति
सुखमनुपगतं निरवद्यम् ॥ २७
श्वानो भीषणायोमुखानि वयांसि
वडगृध्रकुलपक्षिणां च संघाः ।
नरां कदने रुधिरपा गुरुवचन-
नुदमुपरतं विशसन्ति ॥ २८
मर्यादा नियताः स्वयंभुवा य इहेमाः
प्रभिनत्ति दशगुणा मनोनुगत्वात् ।
निवसति भृशमसुखं पितृविषय-
विपिनमवगाह्य स पापः ॥ २९
यो लुब्धः सुभृशं प्रियानृतश्च मनुष्यः
सततनिकृतिवञ्चनारतिः स्यात् ।
उपनिधिभिरसुखकृत्स परमनिरयगो
भृशमसुखमनुभवति दुष्कृतकर्मा ॥ ३०
उष्णां वैतरणीं महानदी-
मवगाढोऽसिपत्रवनभिन्नगात्रः ।
परशुवनशयो निपतितो
वसति च महानिरये भृशार्तः ॥ ३१

महापदानि कत्थसे न चाप्यवेक्षसे परम् ।
चिरस्य मृत्युकारिकामनागतां न बुध्यसे ॥ ३२
प्रयास्यतां किमास्यते समुत्थितं महद्भयम् ।
अतिप्रमाथि दारुणं सुखस्य संविधीयताम् ॥ ३३
पुरा मृतः प्रणीयसे यमस्य मृत्युशासनात् ।
तदन्तिकाय दारुणैः प्रयत्नमार्जवे कुरु ॥ ३४
पुरा समूलबान्धवं प्रभुर्हरत्यदुःखवित् ।
तवेह जीवितं यमो न चास्ति तस्य वारकः ॥ ३५
पुरा विवाति मारुतो यमस्य यः पुरःसरः ।
पुरैक एव नीयसे कुरुष्व सांपरायिकम् ॥ ३६
पुरा सहिक्क एव ते प्रवाति मारुतोऽन्तकः ।
पुरा च विभ्रमन्ति ते दिशो महाभयागमे ॥ ३७
स्मृतिश्च संनिरुध्यते पुरा तवेह पुत्रक ।
समाकुलस्य गच्छतः समाधिमुत्तमं कुरु ॥ ३८
कृताकृते शुभाशुभे प्रमादकर्मविप्लुते ।
स्मरन्पुरा न तप्यसे निधत्स्व केवलं निधिम् ॥३९
पुरा जरा कलेवरं विजर्जरीकरोति ते ।
बलाङ्गरूपहारिणी निधत्स्व केवलं निधिम् ॥ ४०
पुरा शरीरमन्तको भिनत्ति रोगसायकैः ।
प्रसह्य जीवितक्षये तपो महत्समाचर ॥ ४१
पुरा वृका भयंकरा मनुष्यदेहगोचराः ।
अभिद्रवन्ति सर्वतो यतस्व पुण्यशीलने ॥ ४२
पुरान्धकारमेककोऽनुपश्यसि त्वरस्व वै ।
पुरा हिरण्मयान्नगान्निरीक्षसेऽद्रिमूर्धनि ॥ ४३
पुरा कुसंगतानि ते सुहृन्मुखाश्च शत्रवः ।
विचालयन्ति दर्शनाद्घटस्व पुत्र यत्परम् ॥ ४४
धनस्य यस्य राजतो भयं न चास्ति चौरतः ।
मृतं च यन्न मुञ्चति समर्जयस्व तद्धनम् ॥ ४५
न तत्र संविभज्यते स्वकर्मभिः परस्परम् ।
यदेव यस्य यौतकं तदेव तत्र सोऽश्नुते ॥ ४६
परत्र येन जीव्यते तदेव पुत्र दीयताम् ।
धनं यदक्षयं ध्रुवं समर्जयस्व तत्स्वयम् ॥ ४७
न यावदेव पच्यते महाजनस्य यावकम् ।
अपक्व एव यावके पुरा प्रणीयसे त्वर ॥ ४८
न मातृपितृबान्धवा न संस्तुतः प्रियो जनः ।
अनुव्रजन्ति संकटे व्रजन्तमेकपातिनम् ॥ ४९
यदेव कर्म केवलं स्वयं कृतं शुभाशुभम् ।
तदेव तस्य यौतकं भवत्यमुत्र गच्छतः ॥ ५०
हिरण्यरत्नसंचयाः शुभाशुभेन संचिताः ।
न तस्य देहसंक्षये भवन्ति कार्यसाधकाः ॥ ५१
परत्रगामिकस्य ते कृताकृतस्य कर्मणः ।
न साक्षिरात्मना समो नृणामिहास्ति कश्चन ॥ ५२
मनुष्यदेहशून्यकं भवत्यमुत्र गच्छतः ।
प्रपश्य बुद्धिचक्षुषा प्रदृश्यते हि सर्वतः ॥ ५३
इहाग्निसूर्यवायवः शरीरमाश्रितास्त्रयः ।
त एव तस्य साक्षिणो भवन्ति धर्मदर्शिनः ॥ ५४
यथानिशेषु सर्वतःस्पृशत्सु सर्वदारिषु ।
प्रकाशगूढवृत्तिषु स्वधर्ममेव पालय ॥ ५५
अनेकपारिपन्थिके विरूपरौद्ररक्षिते ।
स्वमेव कर्म रक्ष्यतां स्वकर्म तत्र गच्छति ॥ ५६
न तत्र संविभज्यते स्वकर्मणा परस्परम् ।
यथाकृतं स्वकर्मजं तदेव भुज्यते फलम् ॥ ५७
यथाप्सरोगणाः फलं सुखं महर्षिभिः सह ।
तथाप्नुवन्ति कर्मतो विमानकामगामिनः ॥ ५८
यथेह यत्कृतं शुभं विपाप्मभिः कृतात्मभिः ।
तदाप्नुवन्ति मानवास्तथा विशुद्धयोनयः ॥ ५९
प्रजापतेः सलोकतां बृहस्पतेः शतक्रतोः ।
व्रजन्ति ते परां गतिं गृहस्थधर्मसेतुभिः ॥ ६०
सहस्रशोऽप्यनेकशः प्रवक्तुमुत्सहामहे ।
अबुद्धिमोहनं पुनः प्रभुर्विना न यावकम् ॥ ६१

गता द्विरष्टवर्षता ध्रुवोऽसि पञ्चविंशकः ।
कुरुष्व धर्मसंचयं वयो हि तेऽतिवर्तते ॥ ६२
पुरा करोति सोऽन्तकः प्रमादगोमुखं दमम् ।
यथागृहीतमुत्थितं त्वरस्व धर्मपालने ॥ ६३
यदा त्वमेव पृष्ठतस्त्वमग्रतो गमिष्यसि ।
तथा गतिं गमिष्यतः किमात्मना परेण वा ॥ ६४
यदेकपातिनां सतां भवत्यमुत्र गच्छताम् ।
भयेषु सांपरायिकं निधत्स्व तं महानिधिम् ॥ ६५
सकूलमूलबान्धवं प्रभुर्हरत्यसङ्गवान् ।
न सन्ति यस्य वारकाः कुरुष्व धर्मसंनिधिम् ॥६६
इदं निदर्शनं मया तवेह पुत्र संमतम् ।
स्वदर्शनानुमानतः प्रवर्णितं कुरुष्व तत् ॥ ६७
दधाति यः स्वकर्मणा धनानि यस्य कस्यचित् ।
अबुद्धिमोहजैर्गुणैः शतैक एव युज्यते ॥ ६८
श्रुतं समर्थमस्तु ते प्रकुर्वतः शुभाः क्रियाः ।
तदेव तत्र दर्शनं कृतज्ञमर्थसंहितम् ॥ ६९
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
छित्त्वैनां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः ॥
किं ते धनेन किं बन्धुभिस्ते
किं ते पुत्रैः पुत्रक यो मरिष्यसि ।
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहास्ते क्व गताश्च सर्वे ॥ ७१
श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
को हि तद्वेद कस्याद्य मृत्युसेना निवेक्ष्यते ॥ ७२
अनुगम्य श्मशानान्तं निवर्तन्तीह बान्धवाः ।
अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा ॥ ७३
नास्तिकान्निरनुक्रोशान्नरान्पापमतौ स्थितान् ।
वामतः कुरु विश्रब्धं परं प्रेप्सुरतन्द्रितः ॥ ७४
एवमभ्याहते लोके कालेनोपनिपीडिते ।
सुमहद्धैर्यमालम्ब्य धर्मं सर्वात्मना कुरु ॥ ७५
अथेमं दर्शनोपायं सम्यग्यो वेत्ति मानवः ।
सम्यक्स धर्मं कृत्वेह परत्र सुखमेधते ॥ ७६
न देहभेदे मरणं विजानतां
न च प्रणाशः स्वनुपालिते पथि ।
धर्मं हि यो वर्धयते स पण्डितो
य एव धर्माच्च्यवते स मुह्यति ॥ ७७
प्रयुक्तयोः कर्मपथि स्वकर्मणोः
फलं प्रयोक्ता लभते यथाविधि ।
निहीनकर्मा निरयं प्रपद्यते
त्रिविष्टपं गच्छति धर्मपारगः ॥ ७८
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ।
तथात्मानं समादध्याद्भ्रश्येत न पुनर्यथा ॥ ७९
यस्य नोत्क्रामति मतिः स्वर्गमार्गानुसारिणी ।
तमाहुः पुण्यकर्माणमशोच्यं मित्रबान्धवैः ॥ ८०
यस्य नोपहता बुद्धिर्निश्चयेष्ववलम्बते ।
स्वर्गे कृतावकाशस्य तस्य नास्ति महद्भयम् ॥ ८१
तपोवनेषु ये जातास्तत्रैव निधनं गताः ।
तेषामल्पतरो धर्मः कामभोगमजानताम् ॥ ८२
यस्तु भोगान्परित्यज्य शरीरेण तपश्चरेत् ।
न तेन किंचिन्नप्राप्तं तन्मे बहुमतं फलम् ॥ ८३
मातापितृसहस्राणि पुत्रदारशतानि च ।
अनागतान्यतीतानि कस्य ते कस्य वा वयम् ॥८४
न तेषां भवता कार्यं न कार्यं तव तैरपि ।
स्वकृतैस्तानि यातानि भवांश्चैव गमिष्यति ॥ ८५
इह लोके हि धनिनः परोऽपि स्वजनायते ।
स्वजनस्तु दरिद्राणां जीवतामेव नश्यति ॥ ८६
संचिनोत्यशुभं कर्म कलत्रापेक्षया नरः ।
ततः क्लेशमवाप्नोति परत्रेह तथैव च ॥ ८७
पश्य त्वं छिद्रभूतं हि जीवलोकं स्वकर्मणा ।
तत्कुरुष्व तथा पुत्र कृत्स्नं यत्समुदाहृतम् ॥ ८८

तदेतत्संप्रदृश्यैव कर्मभूमिं प्रविश्य ताम् ।
शुभान्याचरितव्यानि परलोकमभीप्सता ॥ ८९
मासर्तुसंज्ञापरिवर्तकेन
सूर्याग्निना रात्रिदिवेन्धनेन ।
स्वकर्मनिष्ठाफलसाक्षिकेण
भूतानि कालः पचति प्रसह्य ॥ ९०
धनेन किं यन्न ददाति नाश्नुते
बलेन किं येन रिपून्न बाधते ।
श्रुतेन किं येन न धर्ममाचरे-
त्किमात्मना यो न जितेन्द्रियो वशी ॥९१
इदं द्वैपायनवचो हितमुक्तं निशम्य तु ।
शुको गतः परित्यज्य पितरं मोक्षदेशिकम् ॥ ९२
इति श्रीमहाभारते शान्तिपर्वणि
नवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥

३१०

युधिष्ठिर उवाच ।

कथं व्यासस्य धर्मात्मा शुको जज्ञे महातपाः ।
सिद्धिं च परमां प्राप्तस्तन्मे ब्रूहि पितामह ॥ १
कस्यां चोत्पादयामास शुकं व्यासस्तपोधनः ।
न ह्यस्य जननीं विद्म जन्म चाग्र्यं महात्मनः ॥२
कथं च बालस्य सतः सूक्ष्मज्ञाने गता मतिः ।
यथा नान्यस्य लोकेऽस्मिन्द्वितीयस्येह कस्यचित् ॥
एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते ।
न हि मे तृप्तिरस्तीह शृण्वतोऽमृतमुत्तमम् ॥ ४
माहात्म्यमात्मयोगं च विज्ञानं च शुकस्य ह ।
यथावदानुपूर्व्येण तन्मे ब्रूहि पितामह ॥ ५

भीष्म उवाच ।

न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥६
तपोमूलमिदं सर्वं यन्मां पृच्छसि पाण्डव ।
तदिन्द्रियाणि संयम्य तपो भवति नान्यथा ॥ ७
इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
संनियम्य तु तान्येव सिद्धिं प्राप्नोति मानवः ॥ ८
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
योगस्य कलया तात न तुल्यं विद्यते फलम् ॥ ९
अत्र ते वर्तयिष्यामि जन्मयोगफलं यथा ।
शुकस्याग्र्यां गतिं चैव दुर्विदामकृतात्मभिः ॥ १०
मेरुशृङ्गे किल पुरा कर्णिकारवनायुते ।
विजहार महादेवो भीमैर्भूतगणैर्वृतः ॥ ११
शैलराजसुता चैव देवी तत्राभवत्पुरा ।
तत्र दिव्यं तपस्तेपे कृष्णद्वैपायनः प्रभुः ॥ १२
योगेनात्मानमाविश्य योगधर्मपरायणः ।
धारयन्स तपस्तेपे पुत्रार्थं कुरुसत्तम ॥ १३
अग्नेर्भूमेरपां वायोरन्तरिक्षस्य चाभिभो ।
वीर्येण संमितः पुत्रो मम भूयादिति स्म ह ॥१४
संकल्पेनाथ सोऽनेन दुष्प्रापेणाकृतात्मभिः ।
वरयामास देवेशमास्थितस्तप उत्तमम् ॥ १५
अतिष्ठन्मारुताहारः शतं किल समाः प्रभुः ।
आराधयन्महादेवं बहुरूपमुमापतिम् ॥ १६
तत्र ब्रह्मर्षयश्चैव सर्वे देवर्षयस्तथा ।
लोकपालाश्च लोकेशं साध्याश्च वसुभिः सह ॥१७
आदित्याश्चैव रुद्राश्च दिवाकरनिशाकरौ ।
मरुतो मारुतश्चैव सागराः सरितस्तथा ॥ १८
अश्विनौ देवगन्धर्वास्तथा नारदपर्वतौ ।
विश्वावसुश्च गन्धर्वः सिद्धाश्चाप्सरसां गणाः ॥१९
तत्र रुद्रो महादेवः कर्णिकारमयीं शुभाम् ।
धारयाणः स्रजं भाति ज्योत्स्नामिव निशाकरः ॥२०
तस्मिन्दिव्ये वने रम्ये देवदेवर्षिसंकुले ।
आस्थितः परमं योगमृषिः पुत्रार्थमुद्यतः ॥ २१
न चास्य हीयते वर्णो न ग्लानिरुपजायते ।

त्रयाणामपि लोकानां तदद्भुतमिवाभवत् ॥ २२
जटाश्च तेजसा तस्य वैश्वानरशिखोपमाः ।
प्रज्वलन्त्यः स्म दृश्यन्ते युक्तस्यामिततेजसः ॥ २३
मार्कण्डेयो हि भगवानेतदाख्यातवान्मम ।
स देवचरितानीह कथयामास मे सदा ॥ २४
ता एताद्यापि कृष्णस्य तपसा तेन दीपिताः ।
अग्निवर्णा जटास्तात प्रकाशन्ते महात्मनः ॥ २५
एवंविधेन तपसा तस्य भक्त्या च भारत ।
महेश्वरः प्रसन्नात्मा चकार मनसा मतिम् ॥ २६
उवाच चैनं भगवांस्त्र्यम्बकः प्रहसन्निव ।
एवंविधस्ते तनयो द्वैपायन भविष्यति ॥ २७
यथा ह्यग्निर्यथा वायुर्यथा भूमिर्यथा जलम् ।
यथा च खं तथा शुद्धो भविष्यति सुतो महान् ॥
तद्भावभावी तद्बुद्धिस्तदात्मा तदपाश्रयः ।
तेजसावृत्य लोकांस्त्रीन्यशः प्राप्स्यति केवलम् ॥२९

इति श्रीमहाभारते शान्तिपर्वणि
दशाधिकत्रिशततमोऽध्यायः ॥ ३१० ॥

३११

भीष्म उवाच ।

स लब्ध्वा परमं देवाद्वरं सत्यवतीसुतः ।
अरणीं त्वथ संगृह्य ममन्थाग्निचिकीर्षया ॥ १
अथ रूपं परं राजन्बिभ्रतीं स्वेन तेजसा ।
घृताचीं नामाप्सरसमपश्यद्भगवानृषिः ॥ २
ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः ।
अभवद्भगवान्व्यासो वने तस्मिन्युधिष्ठिर ॥ ३
सा च कृत्वा तदा व्यासं कामसंविग्नमानसम् ।
शुकी भूत्वा महाराज घृताची समुपागमत् ॥ ४
स तामप्सरसं दृष्ट्वा रूपेणान्येन संवृताम् ।
शरीरजेनानुगतः सर्वगात्रातिगेन ह ॥ ५
स तु धैर्येण महता निगृह्णन्हृच्छयं मुनिः ।
न शशाक नियन्तुं तद्व्यासः प्रविसृतं मनः ।
भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः ॥ ६
यत्नान्नियच्छतस्तस्य मुनेरग्निचिकीर्षया ।
अरण्यामेव सहसा तस्य शुक्रमवापतत् ॥ ७
सोऽविशङ्केन मनसा तथैव द्विजसत्तमः ।
अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृप ॥८
शुक्रे निर्मथ्यमाने तु शुको जज्ञे महातपाः ।
परमर्षिर्महायोगी अरणीगर्भसंभवः ॥ ९
यथाध्वरे समिद्धोऽग्निर्भाति हव्यमुपात्तवान् ।
तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा ॥ १०
बिभ्रत्पितुश्च कौरव्य रूपवर्णमनुत्तमम् ।
बभौ तदा भावितात्मा विधूमोऽग्निरिव ज्वलन् ॥
तं गङ्गा सरितां श्रेष्ठा मेरुपृष्ठे जनेश्वर ।
स्वरूपिणी तदाभ्येत्य स्नापयामास वारिणा ॥ १२
अन्तरिक्षाच्च कौरव्य दण्डः कृष्णाजिनं च ह ।
पपात भुवि राजेन्द्र शुकस्यार्थे महात्मनः ॥ १३
जेगीयन्ते स्म गन्धर्वा ननृतुश्चाप्सरोगणाः ।
देवदुन्दुभयश्चैव प्रावाद्यन्त महास्वनाः ॥ १४
विश्वावसुश्च गन्धर्वस्तथा तुम्बुरुनारदौ ।
हाहाहूहू च गन्धर्वौ तुष्टुवुः शुकसंभवम् ॥ १५
तत्र शक्रपुरोगाश्च लोकपालाः समागताः ।
देवा देवर्षयश्चैव तथा ब्रह्मर्षयोऽपि च ॥ १६
दिव्यानि सर्वपुष्पाणि प्रववर्षात्र मारुतः ।
जङ्गमं स्थावरं चैव प्रहृष्टमभवज्जगत् ॥ १७
तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः ।
जातमात्रं मुनेः पुत्रं विधिनोपानयत्तदा ॥ १८
तस्य देवेश्वरः शक्रो दिव्यमद्भुतदर्शनम् ।
ददौ कमण्डलुं प्रीत्या देववासांसि चाभिभो ॥१९
हंसाश्च शतपत्राश्च सारसाश्च सहस्रशः ।
प्रदक्षिणमवर्तन्त शुकाश्चाषाश्च भारत ॥ २०

आरणेयस्तथा दिव्यं प्राप्य जन्म महाद्युतिः ।
तत्रैवोवास मेधावी व्रतचारी समाहितः ॥ २१
उत्पन्नमात्रं तं वेदाः सरहस्याः ससंग्रहाः ।
उपतस्थुर्महाराज यथास्य पितरं तथा ॥ २२
बृहस्पतिं तु वव्रे स वेदवेदाङ्गभाष्यवित् ।
उपाध्यायं महाराज धर्ममेवानुचिन्तयन् ॥ २३
सोऽधीत्य वेदानखिलान्सरहस्यान्ससंग्रहान् ।
इतिहासं च कार्त्स्न्येन राजशास्त्राणि चाभिभो ॥२४
गुरवे दक्षिणां दत्त्वा समावृत्तो महामुनिः ।
उग्रं तपः समारेभे ब्रह्मचारी समाहितः ॥ २५
देवतानामृषीणां च बाल्येऽपि स महातपाः ।
संमन्त्रणीयो मान्यश्च ज्ञानेन तपसा तथा ॥ २६
न त्वस्य रमते बुद्धिराश्रमेषु नराधिप ।
त्रिषु गार्हस्थ्यमूलेषु मोक्षधर्मानुदर्शिनः ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि
एकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥

३१२

भीष्म उवाच ।

स मोक्षमनुचिन्त्यैव शुकः पितरमभ्यगात् ।
प्राहाभिवाद्य च गुरुं श्रेयोर्थी विनयान्वितः ॥ १
मोक्षधर्मेषु कुशलो भगवान्प्रब्रवीतु मे ।
यथा मे मनसः शान्तिः परमा संभवेत्प्रभो ॥ २
श्रुत्वा पुत्रस्य वचनं परमर्षिरुवाच तम् ।
अधीष्व पुत्र मोक्षं वै धर्मांश्च विविधानपि ॥ ३
पितुर्नियोगाज्जग्राह शुको ब्रह्मविदां वरः ।
योगशास्त्रं च निखिलं कापिलं चैव भारत ॥ ४
स तं ब्राह्म्या श्रिया युक्तं ब्रह्मतुल्यपराक्रमम् ।
मेने पुत्रं यदा व्यासो मोक्षविद्याविशारदम् ॥ ५
उवाच गच्छेति तदा जनकं मिथिलेश्वरम् ।
स ते वक्ष्यति मोक्षार्थं निखिलेन विशेषतः ॥ ६
पितुर्नियोगादगमन्मैथिलं जनकं नृपम् ।
प्रष्टुं धर्मस्य निष्ठां वै मोक्षस्य च परायणम् ॥ ७
उक्तश्च मानुषेण त्वं पथा गच्छेत्यविस्मितः ।
न प्रभावेण गन्तव्यमन्तरिक्षचरेण वै ॥ ८
आर्जवेनैव गन्तव्यं न सुखान्वेषिणा पथा ।
नान्वेष्टव्या विशेषास्तु विशेषा हि प्रसङ्गिनः ॥ ९
अहंकारो न कर्तव्यो याज्ये तस्मिन्नराधिपे ।
स्थातव्यं च वशे तस्य स ते छेत्स्यति संशयम् ॥
स धर्मकुशलो राजा मोक्षशास्त्रविशारदः ।
याज्यो मम स यद्ब्रूयात्तत्कार्यमविशङ्कया ॥ ११
एवमुक्तः स धर्मात्मा जगाम मिथिलां मुनिः ।
पद्भ्यां शक्तोऽन्तरिक्षेण क्रान्तुं भूमिं ससागराम् ।
स गिरींश्चाप्यतिक्रम्य नदीस्तीर्त्वा सरांसि च ।
बहुव्यालमृगाकीर्णा विविधाश्चाटवीस्तथा ॥ १३
मेरोर्हरेश्च द्वे वर्षे वर्षं हैमवतं तथा ।
क्रमेणैव व्यतिक्रम्य भारतं वर्षमासदत् ॥ १४
स देशान्विविधान्पश्यंश्चीनहूणनिषेवितान् ।
आर्यावर्तमिमं देशमाजगाम महामुनिः ॥ १५
पितुर्वचनमाज्ञाय तमेवार्थं विचिन्तयन् ।
अध्वानं सोऽतिचक्राम खेऽचरः खे चरन्निव ॥ १६
पत्तनानि च रम्याणि स्फीतानि नगराणि च ।
रत्नानि च विचित्राणि शुकः पश्यन्न पश्यति ॥१७
उद्यानानि च रम्याणि तथैवायतनानि च ।
पुण्यानि चैव तीर्थानि सोऽतिक्रम्य तथाध्वनः ॥
सोऽचिरेणैव कालेन विदेहानाससाद ह ।
रक्षितान्धर्मराजेन जनकेन महात्मना ॥ १९
तत्र ग्रामान्बहून्पश्यन्बह्वन्नरसभोजनान् ।
पल्लीघोषान्समृद्धांश्च बहुगोकुलसंकुलान् ॥ २०
स्फीतांश्च शालियवसैर्हंससारससेवितान् ।
पद्मिनीभिश्च शतशः श्रीमतीभिरलंकृतान् ॥ २१

स विदेहानतिक्रम्य समृद्धजनसेवितान् ।
मिथिलोपवनं रम्यमाससाद महर्द्धिमत् ॥ २२
हस्त्यश्वरथसंकीर्णं नरनारीसमाकुलम् ।
पश्यन्नपश्यन्निव तत्समतिक्रामदच्युतः ॥ २३
मनसा तं वहन्भारं तमेवार्थं विचिन्तयन् ।
आत्मारामः प्रसन्नात्मा मिथिलामाससाद ह ॥२४
तस्या द्वारं समासाद्य द्वारपालैर्निवारितः ।
स्थितो ध्यानपरो मुक्तो विदितः प्रविवेश ह ॥ २५
स राजमार्गमासाद्य समृद्धजनसंकुलम् ।
पार्थिवक्षयमासाद्य निःशङ्कः प्रविवेश ह ॥ २६
तत्रापि द्वारपालास्तमुग्रवाचो न्यषेधयन् ।
तथैव च शुकस्तत्र निर्मन्युः समतिष्ठत ॥ २७
न चातपाध्वसंतप्तः क्षुत्पिपासाश्रमान्वितः ।
प्रताम्यति ग्लायति वा नापैति च तथातपात् ॥२८
तेषां तु द्वारपालानामेकः शोकसमन्वितः ।
मध्यंगतमिवादित्यं दृष्ट्वा शुकमवस्थितम् ॥ २९
पूजयित्वा यथान्यायमभिवाद्य कृताञ्जलिः ।
प्रावेशयत्ततः कक्ष्यां द्वितीयां राजवेश्मनः ॥ ३०
तत्रासीनः शुकस्तात मोक्षमेवानुचिन्तयन् ।
छायायामातपे चैव समदर्शी महाद्युतिः ॥ ३१
तं मुहूर्तादिवागम्य राज्ञो मन्त्री कृताञ्जलिः ।
प्रावेशयत्ततः कक्ष्यां तृतीयां राजवेश्मनः ॥ ३२
तत्रान्तःपुरसंबद्धं महच्चैत्ररथोपमम् ।
सुविभक्तजलाक्रीडं रम्यं पुष्पितपादपम् ॥ ३३
तद्दर्शयित्वा स शुकं मन्त्री काननमुत्तमम् ।
अर्हमासनमादिश्य निश्चक्राम ततः पुनः ॥ ३४
तं चारुवेषाः सुश्रोण्यस्तरुण्यः प्रियदर्शनाः ।
सूक्ष्मरक्ताम्बरधरास्तप्तकाञ्चनभूषणाः ॥ ३५
संलापोल्लापकुशला नृत्तगीतविशारदाः ।
स्मितपूर्वाभिभाषिण्यो रूपेणाप्सरसां समाः ॥ ३६
कामोपचारकुशला भावज्ञाः सर्वकोविदाः ।
परं पञ्चाशतो नार्यो वारमुख्याः समाद्रवन् ॥ ३७
पाद्यादीनि प्रतिग्राह्य पूजया परयार्च्य च ।
देशकालोपपन्नेन साध्वन्नेनाप्यतर्पयन् ॥ ३८
तस्य भुक्तवतस्तात तदन्तःपुरकाननम् ।
सुरम्यं दर्शयामासुरेकैकश्येन भारत ॥ ३९
क्रीडन्त्यश्च हसन्त्यश्च गायन्त्यश्चैव ताः शुकम् ।
उदारसत्त्वं सत्त्वज्ञाः सर्वाः पर्यचरंस्तदा ॥ ४०
आरणेयस्तु शुद्धात्मा त्रिसंदेहस्त्रिकर्मकृत् ।
वश्येन्द्रियो जितक्रोधो न हृष्यति न कुप्यति ॥
तस्मै शय्यासनं दिव्यं वरार्हं रत्नभूषितम् ।
स्पर्ध्यास्तरणसंस्तीर्णं ददुस्ताः परमस्त्रियः ॥ ४२
पादशौचं तु कृत्वैव शुकः संध्यामुपास्य च ।
निषसादासने पुण्ये तमेवार्थं विचिन्तयन् ॥ ४३
पूर्वरात्रे तु तत्रासौ भूत्वा ध्यानपरायणः ।
मध्यरात्रे यथान्यायं निद्रामाहारयत्प्रभुः ॥ ४४
ततो मुहूर्तादुत्थाय कृत्वा शौचमनन्तरम् ।
स्त्रीभिः परिवृतो धीमान्ध्यानमेवान्वपद्यत ॥ ४५
अनेन विधिना कार्ष्णिस्तदहःशेषमच्युतः ।
तां च रात्रिं नृपकुले वर्तयामास भारत ॥ ४६

इति श्रीमहाभारते शान्तिपर्वणि
द्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥

३१३

भीष्म उवाच ।

ततः स राजा जनको मन्त्रिभिः सह भारत ।
पुरः पुरोहितं कृत्वा सर्वाण्यन्तःपुराणि च ॥ १
आसनं च पुरस्कृत्य रत्नानि विविधानि च ।
शिरसा चार्घ्यमादाय गुरुपुत्रं समभ्यगात् ॥ २
स तदासनमादाय बहुरत्नविभूषितम् ।
स्पर्ध्यास्तरणसंकीर्णं सर्वतोभद्रमृद्धिमत् ॥ ३

पुरोधसा संगृहीतं हस्तेनालभ्य पार्थिवः ।
प्रददौ गुरुपुत्राय शुकाय परमार्चितम् ॥ ४
तत्रोपविष्टं तं कार्ष्णिं शास्त्रतः प्रत्यपूजयत् ।
पाद्यं निवेद्य प्रथममर्घ्यं गां च न्यवेदयत् ।
स च तां मन्त्रवत्पूजां प्रत्यगृह्णाद्यथाविधि ॥ ५
प्रतिगृह्य च तां पूजां जनकाद्द्विजसत्तमः ।
गां चैव समनुज्ञाय राजानमनुमान्य च ॥ ६
पर्यपृच्छन्महातेजा राज्ञः कुशलमव्ययम् ।
अनामयं च राजेन्द्र शुकः सानुचरस्य ह ॥ ७
अनुज्ञातः स तेनाथ निषसाद सहानुगः ।
उदारसत्त्वाभिजनो भूमौ राजा कृताञ्जलिः ॥ ८
कुशलं चाव्ययं चैव पृष्ट्वा वैयासकिं नृपः ।
किमागमनमित्येव पर्यपृच्छत पार्थिवः ॥ ९

शुक उवाच ।

पित्राहमुक्तो भद्रं ते मोक्षधर्मार्थकोविदः ।
विदेहराजो याज्यो मे जनको नाम विश्रुतः ॥१०
तत्र गच्छस्व वै तूर्णं यदि ते हृदि संशयः ।
प्रवृत्तौ वा निवृत्तौ वा स ते छेत्स्यति संशयम् ॥
सोऽहं पितुर्नियोगात्त्वामुपप्रष्टुमिहागतः ।
तन्मे धर्मभृतां श्रेष्ठ यथावद्वक्तुमर्हसि ॥ १२
किं कार्यं ब्राह्मणेनेह मोक्षार्थश्च किमात्मकः ।
कथं च मोक्षः कर्तव्यो ज्ञानेन तपसापि वा ॥१३

जनक उवाच ।

यत्कार्यं ब्राह्मणेनेह जन्मप्रभृति तच्छृणु ।
कृतोपनयनस्तात भवेद्वेदपरायणः ॥ १४
तपसा गुरुवृत्त्या च ब्रह्मचर्येण चाभिभो ।
देवतानां पितृणां चाप्यनृणश्चानसूयकः ॥ १५
वेदानधीत्य नियतो दक्षिणामपवर्ज्य च ।
अभ्यनुज्ञामथ प्राप्य समावर्तेत वै द्विजः ॥ १६
समावृत्तस्तु गार्हस्थ्ये सदारो नियतो वसेत् ।
अनसूयुर्यथान्यायमाहिताग्निस्तथैव च ॥ १७
उत्पाद्य पुत्रपौत्रं तु वन्याश्रमपदे वसेत् ।
तानेवाग्नीन्यथाशास्त्रमर्चयन्नतिथिप्रियः ॥ १८
स वनेऽग्नीन्यथान्यायमात्मन्यारोप्य धर्मवित् ।
निर्द्वंद्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् ॥ १९

शुक उवाच ।

उत्पन्ने ज्ञानविज्ञाने प्रत्यक्षे हृदि शाश्वते ।
किमवश्यं निवस्तव्यमाश्रमेषु वनेषु च ॥ २०
एतद्भवन्तं पृच्छामि तद्भवान्वक्तुमर्हति ।
यथावेदार्थतत्त्वेन ब्रूहि मे त्वं जनाधिप ॥ २१

जनक उवाच ।

न विना ज्ञानविज्ञानं मोक्षस्याधिगमो भवेत् ।
न विना गुरुसंबन्धं ज्ञानस्याधिगमः स्मृतः ॥२२
आचार्यः प्लाविता तस्य ज्ञानं प्लव इहोच्यते ।
विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् ॥ २३
अनुच्छेदाय लोकानामनुच्छेदाय कर्मणाम् ।
पूर्वैराचरितो धर्मश्चातुराश्रम्यसंकथः ॥ २४
अनेन क्रमयोगेन बहुजातिषु कर्मणा ।
कृत्वा शुभाशुभं कर्म मोक्षो नामेह लभ्यते ॥२५
भावितैः कारणैश्चायं बहुसंसारयोनिषु ।
आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे ॥ २६
तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः ।
त्रिष्वाश्रमेषु को न्वर्थो भवेत्परमभीप्सतः ॥ २७
राजसांस्तामसांश्चैव नित्यं दोषान्विवर्जयेत् ।
सात्त्विकं मार्गमास्थाय पश्येदात्मानमात्मना ॥२८
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
संपश्यन्नोपलिप्येत जले वारिचरो यथा ॥ २९
पक्षीव प्लवनादूर्ध्वममुत्रानन्त्यमश्नुते ।
विहाय देहं निर्मुक्तो निर्द्वंद्वः प्रशमं गतः ॥ ३०
अत्र गाथाः पुरा गीताः शृणु राज्ञा ययातिना ।

धार्यन्ते या द्विजैस्तात मोक्षशास्त्रविशारदैः ॥ ३१
ज्योतिरात्मनि नान्यत्र रतं तत्रैव चैव तत् ।
स्वयं च शक्यं तद्द्रष्टुं सुसमाहितचेतसा ॥ ३२
न बिभेति परो यस्मान्न बिभेति पराच्च यः ।
यश्च नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ ३३
यदा भावं न कुरुते सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ३४
संयोज्य तपसात्मानमीर्ष्यामुत्सृज्य मोहिनीम् ।
त्यक्त्वा कामं च लोभं च ततो ब्रह्मत्वमश्नुते ॥३५
यदा श्रव्ये च दृश्ये च सर्वभूतेषु चाप्ययम् ।
समो भवति निर्द्वंद्वो ब्रह्म संपद्यते तदा ॥ ३६
यदा स्तुतिं च निन्दां च समत्वेनैव पश्यति ।
काञ्चनं चायसं चैव सुखदुःखे तथैव च ॥ ३७
शीतमुष्णं तथैवार्थमनर्थं प्रियमप्रियम् ।
जीवितं मरणं चैव ब्रह्म संपद्यते तदा ॥ ३८
प्रसार्येह यथाङ्गानि कूर्म संहरते पुनः ।
तथेन्द्रियाणि मनसा संयन्तव्यानि भिक्षुणा ॥ ३९
तमःपरिगतं वेश्म यथा दीपेन दृश्यते ।
तथा बुद्धिप्रदीपेन शक्य आत्मा निरीक्षितुम् ॥४०
एतत्सर्वं प्रपश्यामि त्वयि बुद्धिमतां वर ।
यच्चान्यदपि वेत्तव्यं तत्त्वतो वेद तद्भवान् ॥ ४१
ब्रह्मर्षे विदितश्चासि विषयान्तमुपागतः ।
गुरोस्तव प्रसादेन तव चैवोपशिक्षया ॥ ४२
तस्यैव च प्रसादेन प्रादुर्भूतं महामुने ।
ज्ञानं दिव्यं ममापीदं तेनासि विदितो मम ॥ ४३
अधिकं तव विज्ञानमधिका च गतिस्तव ।
अधिकं च तवैश्वर्यं तच्च त्वं नावबुध्यसे ॥ ४४
बाल्याद्वा संशयाद्वापि भयाद्वाप्यविमोक्षजात् ।
उत्पन्ने चापि विज्ञाने नाधिगच्छति तां गतिम् ॥
व्यवसायेन शुद्धेन मद्विधैश्छिन्नसंशयः ।
विमुच्य हृदयग्रन्थीनासादयति तां गतिम् ॥ ४६
भवांश्चोत्पन्नविज्ञानः स्थिरबुद्धिरलोलुपः ।
व्यवसायादृते ब्रह्मन्नासादयति तत्परम् ॥ ४७
नास्ति ते सुखदुःखेषु विशेषो नास्ति लोलुपा ।
नौत्सुक्यं नृत्तगीतेषु न राग उपजायते ॥ ४८
न बन्धुषु निबन्धस्ते न भयेष्वस्ति ते भयम् ।
पश्यामि त्वां महाभाग तुल्यलोष्टाश्मकाञ्चनम् ॥
अहं च त्वानुपश्यामि ये चाप्यन्ये मनीषिणः ।
आस्थितं परमं मार्गमक्षयं तमनामयम् ॥ ५०
यत्फलं ब्राह्मणस्येह मोक्षार्थश्च यदात्मकः ।
तस्मिन्वै वर्तसे विप्र किमन्यत्परिपृच्छसि ॥ ५१

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोदशाधिकत्रिशततमोऽध्यायः ॥ ३१३ ॥

३१४

भीष्म उवाच ।

एतच्छ्रुत्वा तु वचनं कृतात्मा कृतनिश्चयः ।
आत्मनात्मानमास्थाय दृष्ट्वा चात्मानमात्मना ॥ १
कृतकार्यः सुखी शान्तस्तूष्णीं प्रायादुदङ्मुखः ।
शैशिरं गिरिमुद्दिश्य सधर्मा मातरिश्वनः ॥ २
एतस्मिन्नेव काले तु देवर्षिर्नारदस्तदा ।
हिमवन्तमियाद्द्रष्टुं सिद्धचारणसेवितम् ॥ ३
तमप्सरोगणाकीर्णं गीतस्वननिनादितम् ।
किंनराणां समूहैश्च भृङ्गराजैस्तथैव च ॥ ४
मद्गुभिः खञ्जरीटैश्च विचित्रैर्जीवजीवकैः ।
चित्रवर्णैर्मयूरैश्च केकाशतविराजितैः ।
राजहंससमूहैश्च हृष्टैः परभृतैस्तथा ॥ ५
पक्षिराजो गरुत्मांश्च यं नित्यमधिगच्छति ।
चत्वारो लोकपालाश्च देवाः सर्षिगणास्तथा ।
यत्र नित्यं समायान्ति लोकस्य हितकाम्यया ॥ ६
विष्णुना यत्र पुत्रार्थे तपस्तप्तं महात्मना ।

यत्रैव च कुमारेण बाल्ये क्षिप्ता दिवौकसः ॥ ७
शक्तिर्न्यस्ता क्षितितले त्रैलोक्यमवमन्य वै ।
यत्रोवाच जगत्स्कन्दः क्षिपन्वाक्यमिदं तदा ॥ ८
योऽन्योऽस्ति मत्तोऽभ्यधिको विप्रा यस्याधिकं प्रियाः
यो ब्रह्मण्यो द्वितीयोऽस्ति त्रिषु लोकेषु वीर्यवान् ॥
सोऽभ्युद्धरत्विमां शक्तिमथ वा कम्पयत्विति ।
तच्छ्रुत्वा व्यथिता लोकाः क इमामुद्धरेदिति ॥१०
अथ देवगणं सर्वं संभ्रान्तेन्द्रियमानसम् ।
अपश्यद्भगवान्विष्णुः क्षिप्तं सासुरराक्षसम् ।
किं न्वत्र सुकृतं कार्यं भवेदिति विचिन्तयन् ॥११
स नामृष्यत तं क्षेपमवैक्षत च पावकिम् ।
स प्रहस्य विशुद्धात्मा शक्तिं प्रज्वलितां तदा ।
कम्पयामास सव्येन पाणिना पुरुषोत्तमः ॥ १२
शक्त्यां तु कम्पमानायां विष्णुना बलिना तदा ।
मेदिनी कम्पिता सर्वा सशैलवनकानना ॥ १३
शक्तेनापि समुद्धर्तुं कम्पिता सा न तूद्धृता ।
रक्षता स्कन्दराजस्य धर्षणां प्रभविष्णुना ॥ १४
तां कम्पयित्वा भगवान्प्रह्लादमिदमब्रवीत् ।
पश्य वीर्यं कुमारस्य नैतदन्यः करिष्यति ॥ १५
सोऽमृष्यमाणस्तद्वाक्यं समुद्धरणनिश्चितः ।
जग्राह तां तस्य शक्तिं न चैनामप्यकम्पयत् ॥१६
नादं महान्तं मुक्त्वा स मूर्च्छितो गिरिमूर्धनि ।
विह्वलः प्रापतद्भूमौ हिरण्यकशिपोः सुतः ॥ १७
यत्रोत्तरां दिशं गत्वा शैलराजस्य पार्श्वतः ।
तपोऽतप्यत दुर्धर्षस्तात नित्यं वृषध्वजः ॥ १८
पावकेन परिक्षिप्तो दीप्यता तस्य चाश्रमः ।
आदित्यबन्धनं नाम दुर्धर्षमकृतात्मभिः ॥ १९
न तत्र शक्यते गन्तुं यक्षराक्षसदानवैः ।
दशयोजनविस्तारमग्निज्वालासमावृतम् ॥ २०
भगवान्पावकस्तत्र स्वयं तिष्ठति वीर्यवान् ।
सर्वविघ्नान्प्रशमयन्महादेवस्य धीमतः ॥ २१
दिव्यं वर्षसहस्रं हि पादेनैकेन तिष्ठतः ।
देवान्संतापयंस्तत्र महादेवो धृतव्रतः ॥ २२
ऐन्द्रीं तु दिशमास्थाय शैलराजस्य धीमतः ।
विविक्ते पर्वततटे पाराशर्यो महातपाः ।
वेदानध्यापयामास व्यासः शिष्यान्महातपाः ॥२३
सुमन्तुं च महाभागं वैशंपायनमेव च ।
जैमिनिं च महाप्राज्ञं पैलं चापि तपस्विनम् ॥२४
एभिः शिष्यैः परिवृतो व्यास आस्ते महातपाः ।
तत्राश्रमपदं पुण्यं ददर्श पितुरुत्तमम् ।
आरणेयो विशुद्धात्मा नभसीव दिवाकरः ॥ २५
अथ व्यासः परिक्षिप्तं ज्वलन्तमिव पावकम् ।
ददर्श सुतमायान्तं दिवाकरसमप्रभम् ॥ २६
असज्जमानं वृक्षेषु शैलेषु विषमेषु च ।
योगयुक्तं महात्मानं यथा बाणं गुणच्युतम् ॥ २७
सोऽभिगम्य पितुः पादावगृह्णादरणीसुतः ।
यथोपजोषं तैश्चापि समागच्छन्महामुनिः ॥ २८
ततो निवेदयामास पित्रे सर्वमशेषतः ।
शुको जनकराजेन संवादं प्रीतमानसः ॥ २९
एवमध्यापयञ्शिष्यान्व्यासः पुत्रं च वीर्यवान् ।
उवास हिमवत्पृष्ठे पाराशर्यो महामुनिः ॥ ३०
ततः कदाचिच्छिष्यास्तं परिवार्यावतस्थिरे ।
वेदाध्ययनसंपन्नाः शान्तात्मानो जितेन्द्रियाः ॥३१
वेदेषु निष्ठां संप्राप्य साङ्गेष्वतितपस्विनः ।
अथोचुस्ते तदा व्यासं शिष्याः प्राञ्जलयो गुरुम् ॥
महता श्रेयसा युक्ता यशसा च स्म वर्धिताः ।
एकं त्विदानीमिच्छामो गुरुणानुग्रहं कृतम् ॥ ३३
इति तेषां वचः श्रुत्वा ब्रह्मर्षिस्तानुवाच ह ।
उच्यतामिति तद्वत्सा यद्वः कार्यं प्रियं मया ॥३४
एतद्वाक्यं गुरोः श्रुत्वा शिष्यास्ते हृष्टमानसाः ।

पुनः प्राञ्जलयो भूत्वा प्रणम्य शिरसा गुरुम् ॥३५
ऊचुस्ते सहिता राजन्निदं वचनमुत्तमम् ।
यदि प्रीत उपाध्यायो धन्याः स्मो मुनिसत्तम ॥ ३६
काङ्क्षामस्तु वयं सर्वे वरं दत्तं महर्षिणा ।
षष्ठः शिष्यो न ते ख्यातिं गच्छेदत्र प्रसीद नः ॥
चत्वारस्ते वयं शिष्या गुरुपुत्रश्च पञ्चमः ।
इह वेदाः प्रतिष्ठेरन्नेष नः काङ्क्षितो वरः ॥ ३८
शिष्याणां वचनं श्रुत्वा व्यासो वेदार्थतत्त्ववित् ।
पराशरात्मजो धीमान्परलोकार्थचिन्तकः ।
उवाच शिष्यान्धर्मात्मा धर्म्यं नैःश्रेयसं वचः ॥३९
ब्राह्मणाय सदा देयं ब्रह्म शुश्रूषवे भवेत् ।
ब्रह्मलोके निवासं यो ध्रुवं समभिकाङ्क्षति ॥ ४०
भवन्तो बहुलाः सन्तु वेदो विस्तार्यतामयम् ।
नाशिष्ये संप्रदातव्यो नाव्रते नाकृतात्मनि ॥ ४१
एते शिष्यगुणाः सर्वे विज्ञातव्या यथार्थतः ।
नापरीक्षितचारित्रे विद्या देया कथंचन ॥ ४२
यथा हि कनकं शुद्धं तापच्छेदनिघर्षणैः ।
परीक्षेत तथा शिष्यानीक्षेत्कुलगुणादिभिः ॥ ४३
न नियोज्याश्च वः शिष्या अनियोगे महाभये ।
यथामति यथापाठं तथा विद्या फलिष्यति ॥ ४४
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः ॥ ४५
वेदस्याध्ययनं हीदं तच्च कार्यं महत्स्मृतम् ।
स्तुत्यर्थमिह देवानां वेदाः सृष्टाः स्वयंभुवा ॥ ४६
यो निर्वदेत संमोहाद्ब्राह्मणं वेदपारगम् ।
सोऽपध्यानाद्ब्राह्मणस्य पराभूयादसंशयम् ॥ ४७
यश्चाधर्मेण विब्रूयाद्यश्चाधर्मेण पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥ ४८
एतद्वः सर्वमाख्यातं स्वाध्यायस्य विधिं प्रति ।
उपकुर्याच्च शिष्याणामेतच्च हृदि वो भवेत् ॥ ४९

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्दशाधिकत्रिशततमोऽध्यायः ॥ ३१४ ॥

३१५

भीष्म उवाच ।

एतच्छ्रुत्वा गुरोर्वाक्यं व्यासशिष्या महौजसः ।
अन्योन्यं हृष्टमनसः परिषस्वजिरे तदा ॥ १
उक्ताः स्मो यद्भगवता तदात्वायतिसंहितम् ।
तन्नो मनसि संरूढं करिष्यामस्तथा च तत् ॥ २
अन्योन्यं च सभाज्यैवं सुप्रीतमनसः पुनः ।
विज्ञापयन्ति स्म गुरुं पुनर्वाक्यविशारदाः ॥ ३
शैलादस्मान्महीं गन्तुं काङ्क्षितं नो महामुने ।
वेदाननेकधा कर्तुं यदि ते रुचितं विभो ॥ ४
शिष्याणां वचनं श्रुत्वा पराशरसुतः प्रभुः ।
प्रत्युवाच ततो वाक्यं धर्मार्थसहितं हितम् ॥ ५
क्षितिं वा देवलोकं वा गम्यतां यदि रोचते ।
अप्रमादश्च वः कार्यो ब्रह्म हि प्रचुरच्छलम् ॥ ६
तेऽनुज्ञातास्ततः सर्वे गुरुणा सत्यवादिना ।
जग्मुः प्रदक्षिणं कृत्वा व्यासं मूर्ध्नाभिवाद्य च ॥७
अवतीर्य महीं तेऽथ चातुर्होत्रमकल्पयन् ।
संयाजयन्तो विप्रांश्च राजन्यांश्च विशस्तथा ॥ ८
पूज्यमाना द्विजैर्नित्यं मोदमाना गृहे रताः ।
याजनाध्यापनरताः श्रीमन्तो लोकविश्रुताः ॥ ९
अवतीर्णेषु शिष्येषु व्यासः पुत्रसहायवान् ।
तूष्णीं ध्यानपरो धीमानेकान्ते समुपाविशत् ॥ १०
तं ददर्शाश्रमपदे नारदः सुमहातपाः ।
अथैनमब्रवीत्काले मधुराक्षरया गिरा ॥ ११
भो भो महर्षे वासिष्ठ ब्रह्मघोषो न वर्तते ।
एको ध्यानपरस्तूष्णीं किमास्से चिन्तयन्निव ॥ १२
ब्रह्मघोषैर्विरहितः पर्वतोऽयं न शोभते ।

रजसा तमसा चैव सोमः सोपप्लवो यथा ॥ १३
न भ्राजते यथापूर्वं निषादानामिवालयः ।
देवर्षिगणजुष्टोऽपि वेदध्वनिनिराकृतः ॥ १४
ऋषयश्च हि देवाश्च गन्धर्वाश्च महौजसः ।
विमुक्ता ब्रह्मघोषेण न भ्राजन्ते यथा पुरा ॥ १५
नारदस्य वचः श्रुत्वा कृष्णद्वैपायनोऽब्रवीत् ।
महर्षे यत्त्वया प्रोक्तं वेदवादविचक्षण ॥ १६
एतन्मनोनुकूलं मे भवानर्हति भाषितुम् ।
सर्वज्ञः सर्वदर्शी च सर्वत्र च कुतूहली ॥ १७
त्रिषु लोकेषु यद्वृत्तं सर्वं तव मते स्थितम् ।
तदाज्ञापय विप्रर्षे ब्रूहि किं करवाणि ते ॥ १८
यन्मया समनुष्ठेयं ब्रह्मर्षे तदुदाहर ।
वियुक्तस्येह शिष्यैर्मे नातिहृष्टमिदं मनः ॥ १९

नारद उवाच ।

अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलम् ।
मलं पृथिव्या वाहीकाः स्त्रीणां कौतूहलं मलम् ॥
अधीयतां भवान्वेदान्सार्धं पुत्रेण धीमता ।
विधुन्वन्ब्रह्मघोषेण रक्षोभयकृतं तमः ॥ २१

भीष्म उवाच ।

नारदस्य वचः श्रुत्वा व्यासः परमधर्मवित् ।
तथेत्युवाच संहृष्टो वेदाभ्यासे दृढव्रतः ॥ २२
शुकेन सह पुत्रेण वेदाभ्यासमथाकरोत् ।
स्वरेणोच्चैः स शैक्षेण लोकानापूरयन्निव ॥ २३
तयोरभ्यसतोरेवं नानाधर्मप्रवादिनोः ।
वातोऽतिमात्रं प्रववौ समुद्रानिलवेजितः ॥ २४
ततोऽनध्याय इति तं व्यासः पुत्रमवारयत् ।
शुको वारितमात्रस्तु कौतूहलसमन्वितः ॥ २५
अपृच्छत्पितरं ब्रह्मन्कुतो वायुरभूदयम् ।
आख्यातुमर्हति भवान्वायोः सर्वं विचेष्टितम् ॥ २६
शुकस्यैतद्वचः श्रुत्वा व्यासः परमविस्मितः ।
अनध्यायनिमित्तेऽस्मिन्निदं वचनमब्रवीत् ॥ २७
दिव्यं ते चक्षुरुत्पन्नं स्वस्थं ते निर्मलं मनः ।
तमसा रजसा चापि त्यक्तः सत्त्वे व्यवस्थितः ॥२८
आदर्शे स्वामिव छायां पश्यस्यात्मानमात्मना ।
न्यस्यात्मनि स्वयं वेदान्बुद्ध्या समनुचिन्तय ॥ २९
देवयानचरो विष्णोः पितृयानश्च तामसः ।
द्वावेतौ प्रेत्य पन्थानौ दिवं चाधश्च गच्छतः ॥३०
पृथिव्यामन्तरिक्षे च यत्र संवान्ति वायवः ।
सप्तैते वायुमार्गा वै तान्निबोधानुपूर्वशः ॥ ३१
तत्र देवगणाः साध्याः समभूवन्महाबलाः ।
तेषामप्यभवत्पुत्रः समानो नाम दुर्जयः ॥ ३२
उदानस्तस्य पुत्रोऽभूद्व्यानस्तस्याभवत्सुतः ।
अपानश्च ततो ज्ञेयः प्राणश्चापि ततः परम् ॥ ३३
अनपत्योऽभवत्प्राणो दुर्धर्षः शत्रुतापनः ।
पृथक्कर्माणि तेषां तु प्रवक्ष्यामि यथातथम् ॥ ३४
प्राणिनां सर्वतो वायुश्चेष्टा वर्तयते पृथक् ।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते ॥ ३५
प्रेरयत्यभ्रसंघातान्धूमजांश्चोष्मजांश्च यः ।
प्रथमः प्रथमे मार्गे प्रवहो नाम सोऽनिलः ॥ ३६
अम्बरे स्नेहमभ्रेभ्यस्तडिद्भ्यश्चोत्तमद्युतिः ।
आवहो नाम संवाति द्वितीयः श्वसनो नदन् ॥३७
उदयं ज्योतिषां शश्वत्सोमादीनां करोति यः ।
अन्तर्देहेषु चोदानं यं वदन्ति महर्षयः ॥ ३८
यश्चतुर्भ्यः समुद्रेभ्यो वायुर्धारयते जलम् ।
उद्धृत्याददते चापो जीमूतेभ्योऽम्बरेऽनिलः ॥ ३९
योऽद्भिः संयोज्य जीमूतान्पर्जन्याय प्रयच्छति ।
उद्वहो नाम वर्षिष्ठस्तृतीयः स सदागतिः ॥ ४०
समुह्यमाना बहुधा येन नीलाः पृथग्घनाः ।
वर्षमोक्षकृतारम्भास्ते भवन्ति घनाघनाः ॥ ४१
संहता येन चाविद्धा भवन्ति नदतां नदाः ।

रक्षणार्थाय संभूता मेघत्वमुपयान्ति च ॥ ४२
योऽसौ वहति देवानां विमानानि विहायसा ।
चतुर्थः संवहो नाम वायुः स गिरिमर्दनः ॥ ४३
येन वेगवता रुग्णा रूक्षेणारुजता रसान् ।
वायुना विहता मेघा न भवन्ति बलाहकाः ॥ ४४
दारुणोत्पातसंचारो नभसः स्तनयित्नुमान् ।
पञ्चमः स महावेगो विवहो नाम मारुतः ॥ ४५
यस्मिन्पारिप्लवे दिव्या वहन्त्यापो विहायसा ।
पुण्यं चाकाशगङ्गायास्तोयं विष्टभ्य तिष्ठति ॥ ४६
दूरात्प्रतिहतो यस्मिन्नेकरश्मिर्दिवाकरः ।
योनिरंशुसहस्रस्य येन भाति वसुंधरा ॥ ४७
यस्मादाप्यायते सोमो निधिर्दिव्योऽमृतस्य च ।
षष्ठः परिवहो नाम स वायुर्जवतां वरः ॥ ४८
सर्वप्राणभृतां प्राणान्योऽन्तकाले निरस्यति ।
यस्य वर्त्मानुवर्तेते मृत्युवैवस्वतावुभौ ॥ ४९
सम्यगन्वीक्षतां बुद्ध्या शान्तयाध्यात्मनित्यया ।
ध्यानाभ्यासाभिरामाणां योऽमृतत्वाय कल्पते ॥५०
यं समासाद्य वेगेन दिशामन्तं प्रपेदिरे ।
दक्षस्य दश पुत्राणां सहस्राणि प्रजापतेः ॥ ५१
येन सृष्टः पराभूतो यात्येव न निवर्तते ।
परावहो नाम परो वायुः स दुरतिक्रमः ॥ ५२
एवमेतेऽदितेः पुत्रा मारुताः परमाद्भुताः ।
अनारमन्तः संवान्ति सर्वगाः सर्वधारिणः ॥ ५३
एतत्तु महदाश्चर्यं यदयं पर्वतोत्तमः ।
कम्पितः सहसा तेन वायुनाभिप्रवायता ॥ ५४
विष्णोर्निःश्वासवातोऽयं यदा वेगसमीरितः ।
सहसोदीर्यते तात जगत्प्रव्यथते तदा ॥ ५५
तस्माद्ब्रह्मविदो ब्रह्म नाधीयन्तेऽतिवायति ।
वायोर्वायुभयं ह्युक्तं ब्रह्म तत्पीडितं भवेत् ॥ ५६
एतावदुक्त्वा वचनं पराशरसुतः प्रभुः ।
उक्त्वा पुत्रमधीष्वेति व्योमगङ्गामथागमत् ॥ ५७

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चदशाधिकत्रिशततमोऽध्यायः ॥ ३१५ ॥

३१६

भीष्म उवाच ।

एतस्मिन्नन्तरे शून्ये नारदः समुपागमत् ।
शुकं स्वाध्यायनिरतं वेदार्थान्वक्तुमीप्सितान् ॥ १
देवर्षिं तु शुको दृष्ट्वा नारदं समुपस्थितम् ।
अर्घ्यपूर्वेण विधिना वेदोक्तेनाभ्यपूजयत् ॥ २
नारदोऽथाब्रवीत्प्रीतो ब्रूहि ब्रह्मविदां वर ।
केन त्वां श्रेयसा तात योजयामीति हृष्टवत् ॥ ३
नारदस्य वचः श्रुत्वा शुकः प्रोवाच भारत ।
अस्मिँल्लोके हितं यत्स्यात्तेन मां योक्तुमर्हसि ॥ ४

नारद उवाच ।

तत्त्वं जिज्ञासतां पूर्वमृषीणां भावितात्मनाम् ।
सनत्कुमारो भगवानिदं वचनमब्रवीत् ॥ ५
नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥६
निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता ।
सद्वृत्तिः समुदाचारः श्रेय एतदनुत्तमम् ॥ ७
मानुष्यमसुखं प्राप्य यः सज्जति स मुह्यति ।
नालं स दुःखमोक्षाय सङ्गो वै दुःखलक्षणम् ॥ ८
सक्तस्य बुद्धिश्चलति मोहजालविवर्धिनी ।
मोहजालवृतो दुःखमिह चामुत्र चाश्नुते ॥ ९
सर्वोपायेन कामस्य क्रोधस्य च विनिग्रहः ।
कार्यः श्रेयोर्थिना तौ हि श्रेयोघातार्थमुद्यतौ ॥१०
नित्यं क्रोधात्तपो रक्षेच्छ्रियं रक्षेत मत्सरात् ।
विद्यां मानावमानाभ्यामात्मानं तु प्रमादतः ॥ ११
आनृशंस्यं परो धर्मः क्षमा च परमं बलम् ।
आत्मज्ञानं परं ज्ञानं न सत्याद्विद्यते परम् ॥ १२

सत्यस्य वचनं श्रेयः सत्यादपि हितं भवेत् ।
यद्भूतहितमत्यन्तमेतत्सत्यं मतं मम ॥ १३
सर्वारम्भफलत्यागी निराशीर्निष्परिग्रहः ।
येन सर्वं परित्यक्तं स विद्वान्स च पण्डितः ॥ १४
इन्द्रियैरिन्द्रियार्थेभ्यश्चरत्यात्मवशैरिह ।
असज्जमानः शान्तात्मा निर्विकारः समाहितः ॥१५
आत्मभूतैरतद्भूतः सह चैव विनैव च ।
स विमुक्तः परं श्रेयो नचिरेणाधिगच्छति ॥ १६
अदर्शनमसंस्पर्शस्तथासंभाषणं सदा ।
यस्य भूतैः सह मुने स श्रेयो विन्दते परम् ॥१७
न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत् ।
नेदं जन्म समासाद्य वैरं कुर्वीत केनचित् ॥ १८
आकिंचन्यं सुसंतोषो निराशीष्ट्वमचापलम् ।
एतदाहुः परं श्रेय आत्मज्ञस्य जितात्मनः ॥ १९
परिग्रहं परित्यज्य भव तात जितेन्द्रियः ।
अशोकं स्थानमातिष्ठ इह चामुत्र चाभयम् ॥ २०
निरामिषा न शोचन्ति त्यजेहामिषमात्मनः ।
परित्यज्यामिषं सौम्य दुःखतापाद्विमोक्ष्यसे ॥ २१
तपोनित्येन दान्तेन मुनिना संयतात्मना ।
अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना ॥ २२
गुणसङ्गेष्वनासक्त एकचर्यारतः सदा ।
ब्राह्मणे नचिरादेव सुखमायात्यनुत्तमम् ॥ २३
द्वंद्वारामेषु भूतेषु य एको रमते मुनिः ।
विद्धि प्रज्ञानतृप्तं तं ज्ञानतृप्तो न शोचति ॥ २४
शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषम् ।
अशुभैश्चाप्यधोजन्म कर्मभिर्लभतेऽवशः ॥ २५
तत्र मृत्युजरादुःखैः सततं समभिद्रुतः ।
संसारे पच्यते जन्तुस्तत्कथं नावबुध्यसे ॥ २६
अहिते हितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः ।
अनर्थे चार्थसंज्ञस्त्वं किमर्थं नावबुध्यसे ॥ २७
संवेष्ट्यमानं बहुभिर्मोहतन्तुभिरात्मजैः ।
कोशकारवदात्मानं वेष्टयन्नावबुध्यसे ॥ २८
अलं परिग्रहेणेह दोषवान्हि परिग्रहः ।
कृमिर्हि कोशकारस्तु बध्यते स्वपरिग्रहात् ॥ २९
पुत्रदारकुटुम्बेषु सक्ताः सीदन्ति जन्तवः ।
सरःपङ्कार्णवे मग्ना जीर्णा वनगजा इव ॥ ३०
महाजालसमाकृष्टान्स्थले मत्स्यानिवोद्धृतान् ।
स्नेहजालसमाकृष्टान्पश्य जन्तून्सुदुःखितान् ॥ ३१
कुटुम्बं पुत्रदारं च शरीरं द्रव्यसंचयाः ।
पारक्यमध्रुवं सर्वं किं स्वं सुकृतदुष्कृतम् ॥ ३२
यदा सर्वं परित्यज्य गन्तव्यमवशेन ते ।
अनर्थे किं प्रसक्तस्त्वं स्वमर्थं नानुतिष्ठसि ॥ ३३
अविश्रान्तमनालम्बमपाथेयमदैशिकम् ।
तमःकान्तारमध्वानं कथमेको गमिष्यसि ॥ ३४
न हि त्वा प्रस्थितं कश्चित्पृष्ठतोऽनुगमिष्यति ।
सुकृतं दुष्कृतं च त्वा यास्यन्तमनुयास्यति ॥ ३५
विद्या कर्म च शौर्यं च ज्ञानं च बहुविस्तरम् ।
अर्थार्थमनुसार्यन्ते सिद्धार्थस्तु विमुच्यते ॥ ३६
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
छित्त्वैनां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः ॥
रूपकूलां मनःस्रोतां स्पर्शद्वीपां रसावहाम् ।
गन्धपङ्कां शब्दजलां स्वर्गमार्गदुरावहाम् ॥ ३८
क्षमारित्रां सत्यमयीं धर्मस्थैर्यवटाकराम् ।
त्यागवाताध्वगां शीघ्रां बुद्धिनावा नदीं तरेत् ॥३९
त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥४०
त्यज धर्ममसंकल्पादधर्मं चाप्यहिंसया ।
उभे सत्यानृते बुद्ध्या बुद्धिं परमनिश्चयात् ॥ ४१
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥ ४२

जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यं च भूतावासं समुत्सृज ॥ ४३
इदं विश्वं जगत्सर्वमजगच्चापि यद्भवेत् ।
महाभूतात्मकं सर्वं महद्यत्परमाणु यत् ॥ ४४
इन्द्रियाणि च पञ्चैव तमः सत्त्वं रजस्तथा ।
इत्येष सप्तदशको राशिरव्यक्तसंज्ञकः ॥ ४५
सर्वैरिहेन्द्रियार्थैश्च व्यक्ताव्यक्तैर्हि संहितः ।
पञ्चविंशक इत्येष व्यक्ताव्यक्तमयो गुणः ॥ ४६
एतैः सर्वैः समायुक्तः पुमानित्यभिधीयते ।
त्रिवर्गोऽत्र सुखं दुःखं जीवितं मरणं तथा ॥ ४७
य इदं वेद तत्त्वेन स वेद प्रभवाप्ययौ ।
पाराशर्येह बोद्धव्यं ज्ञानानां यच्च किंचन ॥ ४८
इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः ।
अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम् ॥ ४९
इन्द्रियैर्नियतैर्देही धाराभिरिव तर्प्यते ।
लोके विततमात्मानं लोकं चात्मनि पश्यति ॥५०
परावरदृशः शक्तिर्ज्ञानवेलां न पश्यति ।
पश्यतः सर्वभूतानि सर्वावस्थासु सर्वदा ॥ ५१
ब्रह्मभूतस्य संयोगो नाशुभेनोपपद्यते ।
ज्ञानेन विविधान्क्लेशानतिवृत्तस्य मोहजान् ।
लोके बुद्धिप्रकाशेन लोकमार्गो न रिष्यते ॥ ५२
अनादिनिधनं जन्तुमात्मनि स्थितमव्ययम् ।
अकर्तारममूर्तं च भगवानाह तीर्थवित् ॥ ५३
यो जन्तुः स्वकृतैस्तैस्तैः कर्मभिर्नित्यदुःखितः ।
स दुःखप्रतिघातार्थं हन्ति जन्तूननेकधा ॥ ५४
ततः कर्म समादत्ते पुनरन्यन्नवं बहु ।
तप्यतेऽथ पुनस्तेन भुक्त्वापथ्यमिवातुरः ॥ ५५
अजस्रमेव मोहार्तो दुःखेषु सुखसंज्ञितः ।
बध्यते मथ्यते चैव कर्मभिर्मन्थवत्सदा ॥ ५६
ततो निवृत्तो बन्धात्स्वात्कर्मणामुदयादिह ।
परिभ्रमति संसारं चक्रवद्बहुवेदनः ॥ ५७
स त्वं निवृत्तबन्धस्तु निवृत्तश्चापि कर्मतः ।
सर्ववित्सर्वजित्सिद्धो भव भावविवर्जितः ॥ ५८
संयमेन नवं बन्धं निवर्त्य तपसो बलात् ।
संप्राप्ता बहवः सिद्धिमप्यबाधां सुखोदयाम् ॥ ५९

इति श्रीमहाभारते शान्तिपर्वणि
षोडशाधिकत्रिशततमोऽध्यायः ॥ ३१६ ॥

३१७

नारद उवाच ।

अशोकं शोकनाशार्थं शास्त्रं शान्तिकरं शिवम् ।
निशम्य लभते बुद्धिं तां लब्ध्वा सुखमेधते ॥ १
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ २
तस्मादनिष्टनाशार्थमितिहासं निबोध मे ।
तिष्ठते चेद्वशे बुद्धिर्लभते शोकनाशनम् ॥ ३
अनिष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च ।
मनुष्या मानसैर्दुःखैर्युज्यन्ते अल्पबुद्धयः ॥ ४
द्रव्येषु समतीतेषु ये गुणास्तान्न चिन्तयेत् ।
ताननाद्रियमाणस्य स्नेहबन्धः प्रमुच्यते ॥ ५
दोषदर्शी भवेत्तत्र यत्र रागः प्रवर्तते ।
अनिष्टवर्धितं पश्येत्तथा क्षिप्रं विरज्यते ॥ ६
नार्थो न धर्मो न यशो योऽतीतमनुशोचति ।
अप्यभावेन युज्येत तच्चास्य न निवर्तते ॥ ७
गुणैर्भूतानि युज्यन्ते वियुज्यन्ते तथैव च ।
सर्वाणि नैतदेकस्य शोकस्थानं हि विद्यते ॥ ८
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति ।
दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते ॥ ९
नाश्रु कुर्वन्ति ये बुद्ध्या दृष्ट्वा लोकेषु संततिम् ।
सम्यक्प्रपश्यतः सर्वं नाश्रुकर्मोपपद्यते ॥ १०
दुःखोपघाते शारीरे मानसे वाप्युपस्थिते ।

यस्मिन्न शक्यते कर्तुं यत्नस्तन्नानुचिन्तयेत् ॥ ११
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ।
चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्धते ॥ १२
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ॥ १३
अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ।
आरोग्यं प्रियसंवासो गृध्येत्तत्र न पण्डितः ॥ १४
न जानपदिकं दुःखमेकः शोचितुमर्हति ।
अशोचन्प्रतिकुर्वीत यदि पश्येदुपक्रमम् ॥ १५
सुखाद्बहुतरं दुःखं जीविते नात्र संशयः ।
स्निग्धत्वं चेन्द्रियार्थेषु मोहान्मरणमप्रियम् ॥ १६
परित्यजति यो दुःखं सुखं वाप्युभयं नरः ।
अभ्येति ब्रह्म सोऽत्यन्तं न तं शोचन्ति पण्डिताः ॥
दुःखमर्था हि त्यज्यन्ते पालने न च ते सुखाः ।
दुःखेन चाधिगम्यन्ते नाशमेषां न चिन्तयेत् ॥१८
अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः ।
अतृप्ता यान्ति विध्वंसं संतोषं यान्ति पण्डिताः ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥ २०
अन्तो नास्ति पिपासायास्तुष्टिस्तु परमं सुखम् ।
तस्मात्संतोषमेवेह धनं पश्यन्ति पण्डिताः ॥ २१
निमेषमात्रमपि हि वयो गच्छन्न तिष्ठति ।
स्वशरीरेष्वनित्येषु नित्यं किमनुचिन्तयेत् ॥ २२
भूतेष्वभावं संचिन्त्य ये बुद्ध्वा तमसः परम् ।
न शोचन्ति गताध्वानः पश्यन्तः परमां गतिम् ॥
संचिन्वानकमेवैनं कामानामवितृप्तकम् ।
व्याघ्रः पशुमिवासाद्य मृत्युरादाय गच्छति ॥ २४
अथाप्युपायं संपश्येद्दुःखस्य परिमोक्षणे ।
अशोचन्नारभेतैव युक्तश्चाव्यसनी भवेत् ॥ २५
शब्दे स्पर्शे च रूपे च गन्धेषु च रसेषु च ।
नोपभोगात्परं किंचिद्धनिनो वाधनस्य वा ॥ २६
प्राक्संप्रयोगाद्भूतानां नास्ति दुःखमनामयम् ।
विप्रयोगात्तु सर्वस्य न शोचेत्प्रकृतिस्थितः ॥ २७
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुःश्रोत्रे च मनसा मनो वाचं च विद्यया ॥२८
प्रणयं प्रतिसंहृत्य संस्तुतेष्वितरेषु च ।
विचरेदसमुन्नद्धः स सुखी स च पण्डितः ॥ २९
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन यश्चरेत्स सुखी भवेत् ॥ ३०

इति श्रीमहाभारते शान्तिपर्वणि
सप्तदशाधिकत्रिशततमोऽध्यायः ॥ ३१७ ॥

३१८

नारद उवाच ।

सुखदुःखविपर्यासो यदा समुपपद्यते ।
नैनं प्रज्ञा सुनीतं वा त्रायते नापि पौरुषम् ॥ १
स्वभावाद्यत्नमातिष्ठेद्यत्नवान्नावसीदति ।
जरामरणरोगेभ्यः प्रियमात्मानमुद्धरेत् ॥ २
रुजन्ति हि शरीराणि रोगाः शारीरमानसाः ।
सायका इव तीक्ष्णाग्राः प्रयुक्ता दृढधन्विभिः ॥ ३
व्यथितस्य विवित्साभिस्ताम्यतो जीवितैषिणः ।
अवशस्य विनाशाय शरीरमपकृष्यते ॥ ४
स्रवन्ति न निवर्तन्ते स्रोतांसि सरितामिव ।
आयुरादाय मर्त्यानां रात्र्यहानि पुनः पुनः ॥ ५
व्यत्ययो ह्ययमत्यन्तं पक्षयोः शुक्लकृष्णयोः ।
जातं मर्त्यं जरयति निमेषं नावतिष्ठते ॥ ६
सुखदुःखानि भूतानामजरो जरयन्नसौ ।
आदित्यो ह्यस्तमभ्येति पुनः पुनरुदेति च ॥ ७
अदृष्टपूर्वानादाय भावानपरिशङ्कितान् ।
इष्टानिष्टान्मनुष्याणामस्तं गच्छन्ति रात्रयः ॥ ८
यो यमिच्छेद्यथाकामं कामानां तत्तदाप्नुयात् ।

यदि स्यान्नपराधीनं पुरुषस्य क्रियाफलम् ॥ ९
संयताश्च हि दक्षाश्च मतिमन्तश्च मानवाः ।
दृश्यन्ते निष्फलाः सन्तः प्रहीणाश्च स्वकर्मभिः ॥
अपरे बालिशाः सन्तो निर्गुणाः पुरुषाधमाः ।
आशीर्भिरप्यसंयुक्ता दृश्यन्ते सर्वकामिनः ॥ ११
भूतानामपरः कश्चिद्धिंसायां सततोत्थितः ।
वञ्चनायां च लोकस्य स सुखेष्वेव जीर्यते ॥ १२
अचेष्टमानमासीनं श्रीः कंचिदुपतिष्ठति ।
कश्चित्कर्मानुसृत्यान्यो न प्राप्यमधिगच्छति ॥ १३
अपराधं समाचक्ष्व पुरुषस्य स्वभावतः ।
शुक्रमन्यत्र संभूतं पुनरन्यत्र गच्छति ॥ १४
तस्य योनौ प्रसक्तस्य गर्भो भवति वा न वा ।
आम्रपुष्पोपमा यस्य निवृत्तिरुपलभ्यते ॥ १५
केषांचित्पुत्रकामानामनुसंतानमिच्छताम् ।
सिद्धौ प्रयतमानानां नैवाण्डमुपजायते ॥ १६
गर्भाच्चोद्विजमानानां क्रुद्धादाशीविषादिव ।
आयुष्माञ्जायते पुत्रः कथं प्रेतः पितैव सः ॥ १७
देवानिष्ट्वा तपस्तप्त्वा कृपणैः पुत्रगृद्धिभिः ।
दश मासान्परिधृता जायन्ते कुलपांसनाः ॥ १८
अपरे धनधान्यानि भोगांश्च पितृसंचितान् ।
विपुलानभिजायन्ते लब्धास्तैरेव मङ्गलैः ॥ १९
अन्योन्यं समभिप्रेत्य मैथुनस्य समागमे ।
उपद्रव इवाविष्टो योनिं गर्भः प्रपद्यते ॥ २०
शीर्णं परशरीरेण निच्छवीकं शरीरिणम् ।
प्राणिनां प्राणसंरोधे मांसश्लेष्मविचेष्टितम् ॥ २१
निर्दग्धं परदेहेन परदेहं चलाचलम् ।
विनश्यन्तं विनाशान्ते नावि नावमिवाहितम् ॥ २२
संगत्या जठरे न्यस्तं रेतोबिन्दुमचेतनम् ।
केन यत्नेन जीवन्तं गर्भं त्वमिह पश्यसि ॥ २३
अन्नपानानि जीर्यन्ते यत्र भक्षाश्च भक्षिताः ।
तस्मिन्नेवोदरे गर्भः किं नान्नमिव जीर्यते ॥ २४
गर्भमूत्रपुरीषाणां स्वभावनियता गतिः ।
धारणे वा विसर्गे वा न कर्तुर्विद्यते वशः ॥ २५
स्रवन्ति ह्युदराद्गर्भा जायमानास्तथापरे ।
आगमेन सहान्येषां विनाश उपपद्यते ॥ २६
एतस्माद्योनिसंबन्धाद्यो जीवन्परिमुच्यते ।
प्रजां च लभते कांचित्पुनर्द्वंद्वेषु मज्जति ॥ २७
शतस्य सहजातस्य सप्तमीं दशमीं दशाम् ।
प्राप्नुवन्ति ततः पञ्च न भवन्ति शतायुषः ॥ २८
नाभ्युत्थाने मनुष्याणां योगाः स्युर्नात्र संशयः ।
व्याधिभिश्च विमथ्यन्ते व्यालैः क्षुद्रमृगा इव ॥ २९
व्याधिभिर्भक्ष्यमाणानां त्यजतां विपुलं धनम् ।
वेदनां नापकर्षन्ति यतमानाश्चिकित्सकाः ॥ ३०
ते चापि निपुणा वैद्याः कुशलाः संभृतौषधाः ।
व्याधिभिः परिकृष्यन्ते मृगा व्याधैरिवार्दिताः ॥ ३१
ते पिबन्तः कषायांश्च सर्पींषि विविधानि च ।
दृश्यन्ते जरया भग्ना नागा नागैरिवोत्तमैः ॥ ३२
के वा भुवि चिकित्सन्ते रोगार्तान्मृगपक्षिणः ।
श्वापदानि दरिद्रांश्च प्रायो नार्ता भवन्ति ते ॥ ३३
घोरानपि दुराधर्षान्नृपतीनुग्रतेजसः ।
आक्रम्य रोग आदत्ते पशून्पशुपचो यथा ॥ ३४
इति लोकमनाक्रन्दं मोहशोकपरिप्लुतम् ।
स्रोतसा सहसा क्षिप्तं ह्रियमाणं बलीयसा ॥ ३५
न धनेन न राज्येन नोग्रेण तपसा तथा ।
स्वभावा व्यतिवर्तन्ते ये नियुक्ताः शरीरिषु ॥ ३६
न म्रियेरन्न जीर्येरन्सर्वे स्युः सर्वकामिकाः ।
नाप्रियं प्रतिपश्येयुरुत्थानस्य फलं प्रति ॥ ३७
उपर्युपरि लोकस्य सर्वो भवितुमिच्छति ।
यतते च यथाशक्ति न च तद्वर्तते तथा ॥ ३८
ऐश्वर्यमदमत्तांश्च मत्तान्मद्यमदेन च ।

अप्रमत्ताः शठाः क्रूरा विक्रान्ताः पर्युपासते ॥ ३९
क्लेशाः प्रतिनिवर्तन्ते केषांचिदसमीक्षिताः ।
स्वं स्वं च पुनरन्येषां न किंचिदभिगम्यते ॥ ४०
महच्च फलवैषम्यं दृश्यते कर्मसंधिषु ।
वहन्ति शिबिकामन्ये यान्त्यन्ये शिबिकागताः ॥
सर्वेषामृद्धिकामानामन्ये रथपुरःसराः ।
मनुजाश्च शतस्त्रीकाः शतशो विधवाः स्त्रियः ॥४२
द्वंद्वारामेषु भूतेषु गच्छन्त्येकैकशो नराः ।
इदमन्यत्परं पश्य मात्र मोहं करिष्यसि ॥ ४३
त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥४४
एतत्ते परमं गुह्यमाख्यातमृषिसत्तम ।
येन देवाः परित्यज्य मर्त्यलोकं दिवं गताः ॥ ४५

भीष्म उवाच ।

नारदस्य वचः श्रुत्वा शुकः परमबुद्धिमान् ।
संचिन्त्य मनसा धीरो निश्चयं नाध्यगच्छत ॥ ४६
पुत्रदारैर्महान्क्लेशो विद्याम्नाये महाञ्श्रमः ।
किं नु स्याच्छाश्वतं स्थानमल्पक्लेशं महोदयम् ॥४७
ततो मुहूर्तं संचिन्त्य निश्चितां गतिमात्मनः ।
परावरज्ञो धर्मस्य परां नैःश्रेयसीं गतिम् ॥ ४८
कथं त्वहमसंक्लिष्टो गच्छेयं परमां गतिम् ।
नावर्तेयं यथा भूयो योनिसंसारसागरे ॥ ४९
परं भावं हि काङ्क्षामि यत्र नावर्तते पुनः ।
सर्वसङ्गान्परित्यज्य निश्चितां मनसो गतिम् ॥ ५०
तत्र यास्यामि यत्रात्मा शमं मेऽधिगमिष्यति ।
अक्षयश्चाव्ययश्चैव यत्र स्थास्यामि शाश्वतः ॥ ५१
न तु योगमृते शक्या प्राप्तुं सा परमा गतिः ।
अवबन्धो हि मुक्तस्य कर्मभिर्नोपपद्यते ॥ ५२
तस्माद्योगं समास्थाय त्यक्त्वा गृहकलेवरम् ।
वायुभूतः प्रवेक्ष्यामि तेजोराशिं दिवाकरम् ॥ ५३
न ह्येष क्षयमाप्नोति सोमः सुरगणैर्यथा ।
कम्पितः पतते भूमिं पुनश्चैवाधिरोहति ।
क्षीयते हि सदा सोमः पुनश्चैवाभिपूर्यते ॥ ५४
रविस्तु संतापयति लोकान्रश्मिभिरुल्बणैः ।
सर्वतस्तेज आदत्ते नित्यमक्षयमण्डलः ॥ ५५
अतो मे रोचते गन्तुमादित्यं दीप्ततेजसम् ।
अत्र वत्स्यामि दुर्धर्षो निःसङ्गेनान्तरात्मना ॥ ५६
सूर्यस्य सदने चाहं निक्षिप्येदं कलेवरम् ।
ऋषिभिः सह यास्यामि सौरं तेजोऽतिदुःसहम् ॥
आपृच्छामि नगान्नागान्गिरीनुर्वीं दिशो दिवम् ।
देवदानवगन्धर्वान्पिशाचोरगराक्षसान् ॥ ५८
लोकेषु सर्वभूतानि प्रवेक्ष्यामि नसंशयः ।
पश्यन्तु योगवीर्यं मे सर्वे देवाः सहर्षिभिः ॥ ५९
अथानुज्ञाप्य तमृषिं नारदं लोकविश्रुतम् ।
तस्मादनुज्ञां संप्राप्य जगाम पितरं प्रति ॥ ६०
सोऽभिवाद्य महात्मानमृषिं द्वैपायनं मुनिम् ।
शुकः प्रदक्षिणीकृत्य कृष्णमापृष्टवान्मुनिः ॥ ६१
श्रुत्वा ऋषिस्तद्वचनं शुकस्य
प्रीतो महात्मा पुनराह चैनम् ।
भो भोः पुत्र स्थीयतां तावदद्य
यावच्चक्षुः प्रीणयामि त्वदर्थम् ॥ ६२
निरपेक्षः शुको भूत्वा निःस्नेहो मुक्तबन्धनः ।
मोक्षमेवानुसंचिन्त्य गमनाय मनो दधे ।
पितरं संपरित्यज्य जगाम द्विजसत्तमः ॥ ६३

इति श्रीमहाभारते शान्तिपर्वणि
अष्टादशाधिकत्रिशततमोऽध्यायः ॥ ३१८ ॥

३१९

भीष्म उवाच ।

गिरिपृष्ठं समारुह्य सुतो व्यासस्य भारत ।
समे देशे विविक्ते च निःशलाक उपाविशत् ॥ १

धारयामास चात्मानं यथाशास्त्रं महामुनिः ।
पादात्प्रभृतिगात्रेषु क्रमेण क्रमयोगवित् ॥ २
ततः स प्राङ्मुखो विद्वानादित्ये नचिरोदिते ।
पाणिपादं समाधाय विनीतवदुपाविशत् ॥ ३
न तत्र पक्षिसंघातो न शब्दो नापि दर्शनम् ।
यत्र वैयासकिर्धीमान्योक्तुं समुपचक्रमे ॥ ४
स ददर्श तदात्मानं सर्वसङ्गविनिःसृतम् ।
प्रजहास ततो हासं शुकः संप्रेक्ष्य भास्करम् ॥ ५
स पुनर्योगमास्थाय मोक्षमार्गोपलब्धये ।
महायोगीश्वरो भूत्वा सोऽत्यक्रामद्विहायसम् ॥ ६
ततः प्रदक्षिणं कृत्वा देवर्षिं नारदं तदा ।
निवेदयामास तदा स्वं योगं परमर्षये ॥ ७
दृष्टो मार्गः प्रवृत्तोऽस्मि स्वस्ति तेऽस्तु तपोधन ।
त्वत्प्रसादाद्गमिष्यामि गतिमिष्टां महाद्युते ॥ ८
नारदेनाभ्यनुज्ञातस्ततो द्वैपायनात्मजः ।
अभिवाद्य पुनर्योगमास्थायाकाशमाविशत् ॥ ९
कैलासपृष्ठादुत्पत्य स पपात दिवं तदा ।
अन्तरिक्षचरः श्रीमान्व्यासपुत्रः सुनिश्चितः ॥ १०
तमुद्यन्तं द्विजश्रेष्ठं वैनतेयसमद्युतिम् ।
ददृशुः सर्वभूतानि मनोमारुतरंहसम् ॥ ११
व्यवसायेन लोकांस्त्रीन्सर्वान्सोऽथ विचिन्तयन् ।
आस्थितो दिव्यमध्वानं पावकार्कसमप्रभः ॥ १२
तमेकमनसं यान्तमव्यग्रमकुतोभयम् ।
ददृशुः सर्वभूतानि जङ्गमानीतराणि च ॥ १३
यथाशक्ति यथान्यायं पूजयांचक्रिरे तदा ।
पुष्पवर्षैश्च दिव्यैस्तमवचक्रुर्दिवौकसः ॥ १४
तं दृष्ट्वा विस्मिताः सर्वे गन्धर्वाप्सरसां गणाः ।
ऋषयश्चैव संसिद्धाः परं विस्मयमागताः ॥ १५
अन्तरिक्षचरः कोऽयं तपसा सिद्धिमागतः ।
अधःकायोर्ध्ववक्त्रश्च नेत्रैः समभिवाह्यते ॥ १६
ततः परमधीरात्मा त्रिषु लोकेषु विश्रुतः ।
भास्करं समुदीक्षन्स प्राङ्मुखो वाग्यतोऽगमत् ।
शब्देनाकाशमखिलं पूरयन्निव सर्वतः ॥ १७
तमापतन्तं सहसा दृष्ट्वा सर्वाप्सरोगणाः ।
संभ्रान्तमनसो राजन्नासन्परमविस्मिताः ।
पञ्चचूडाप्रभृतयो भृशमुत्फुल्ललोचनाः ॥ १८
दैवतं कतमं ह्येतदुत्तमां गतिमास्थितम् ।
सुनिश्चितमिहायाति विमुक्तमिव निःस्पृहम् ॥१९
ततः समतिचक्राम मलयं नाम पर्वतम् ।
उर्वशी पूर्वचित्तिश्च यं नित्यमुपसेवते ।
ते स्म ब्रह्मर्षिपुत्रस्य विस्मयं ययतुः परम् ॥ २०
अहो बुद्धिसमाधानं वेदाभ्यासरते द्विजे ।
अचिरेणैव कालेन नभश्चरति चन्द्रवत् ।
पितृशुश्रूषया सिद्धिं संप्राप्तोऽयमनुत्तमाम् ॥ २१
पितृभक्तो दृढतपाः पितुः सुदयितः सुतः ।
अनन्यमनसा तेन कथं पित्रा विवर्जितः ॥ २२
उर्वश्या वचनं श्रुत्वा शुकः परमधर्मवित् ।
उदैक्षत दिशः सर्वा वचने गतमानसः ॥ २३
सोऽन्तरिक्षं महीं चैव सशैलवनकाननाम् ।
आलोकयामास तदा सरांसि सरितस्तथा ॥ २४
ततो द्वैपायनसुतं बहुमानपुरःसरम् ।
कृताञ्जलिपुटाः सर्वा निरीक्षन्ते स्म देवताः ॥२५
अब्रवीत्तास्तदा वाक्यं शुकः परमधर्मवित् ।
पिता यद्यनुगच्छेन्मां क्रोशमानः शुकेति वै ॥ २६
ततः प्रतिवचो देयं सर्वैरेव समाहितैः ।
एतन्मे स्नेहतः सर्वे वचनं कर्तुमर्हथ ॥ २७
शुकस्य वचनं श्रुत्वा दिशः सवनकाननाः ।
समुद्राः सरितः शैलाः प्रत्यूचुस्तं समन्ततः ॥ २८
यथाज्ञापयसे विप्र बाढमेवं भविष्यति ।

ऋषेर्व्याहरतो वाक्यं प्रतिवक्ष्यामहे वयम् ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि
एकोनविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३१९ ॥

३२०

भीष्म उवाच ।

इत्येवमुक्त्वा वचनं ब्रह्मर्षिः सुमहातपाः ।
प्रातिष्ठत शुकः सिद्धिं हित्वा लोकांश्चतुर्विधान् ॥ १
तमो ह्यष्टविधं हित्वा जहौ पञ्चविधं रजः ।
ततः सत्त्वं जहौ धीमांस्तदद्भुतमिवाभवत् ॥ २
ततस्तस्मिन्पदे नित्ये निर्गुणे लिङ्गवर्जिते ।
ब्रह्मणि प्रत्यतिष्ठत्स विधूमोऽग्निरिव ज्वलन् ॥ ३
उल्कापाता दिशां दाहा भूमिकम्पास्तथैव च ।
प्रादुर्भूताः क्षणे तस्मिंस्तदद्भुतमिवाभवत् ॥ ४
द्रुमाः शाखाश्च मुमुचुः शिखराणि च पर्वताः ।
निर्घातशब्दैश्च गिरिर्हिमवान्दीर्यतीव ह ॥ ५
न बभासे सहस्रांशुर्न जज्वाल च पावकः ।
ह्रदाश्च सरितश्चैव चुक्षुभुः सागरास्तथा ॥ ६
ववर्ष वासवस्तोयं रसवच्च सुगन्धि च ।
ववौ समीरणश्चापि दिव्यगन्धवहः शुचिः ॥ ७
स शृङ्गेऽप्रतिमे दिव्ये हिमवन्मेरुसंभवे ।
संश्लिष्टे श्वेतपीते द्वे रुक्मरूप्यमये शुभे ॥ ८
शतयोजनविस्तारे तिर्यगूर्ध्वं च भारत ।
उदीचीं दिशमाश्रित्य रुचिरे संददर्श ह ॥ ९
सोऽविशङ्केन मनसा तथैवाभ्यपतच्छुकः ।
ततः पर्वतशृङ्गे द्वे सहसैव द्विधाकृते ।
अदृश्येतां महाराज तदद्भुतमिवाभवत् ॥ १०
ततः पर्वतशृङ्गाभ्यां सहसैव विनिःसृतः ।
न च प्रतिजघानास्य स गतिं पर्वतोत्तमः ॥ ११
ततो महानभूच्छब्दो दिवि सर्वदिवौकसाम् ।
गन्धर्वाणामृषीणां च ये च शैलनिवासिनः ॥ १२
दृष्ट्वा शुकमतिक्रान्तं पर्वतं च द्विधाकृतम् ।
साधु साध्विति तत्रासीन्नादः सर्वत्र भारत ॥ १३
स पूज्यमानो देवैश्च गन्धर्वैर्ऋषिभिस्तथा ।
यक्षराक्षससंघैश्च विद्याधरगणैस्तथा ॥ १४
दिव्यैः पुष्पैः समाकीर्णमन्तरिक्षं समन्ततः ।
आसीत्किल महाराज शुकाभिपतने तदा ॥ १५
ततो मन्दाकिनीं रम्यामुपरिष्टादभिव्रजन् ।
शुको ददर्श धर्मात्मा पुष्पितद्रुमकाननाम् ॥ १६
तस्यां क्रीडन्त्यभिरताः स्नान्ति चैवाप्सरोगणाः ।
शून्याकारं निराकाराः शुकं दृष्ट्वा विवाससः ॥ १७
तं प्रक्रमन्तमाज्ञाय पिता स्नेहसमन्वितः ।
उत्तमां गतिमास्थाय पृष्ठतोऽनुससार ह ॥ १८
शुकस्तु मारुतादूर्ध्वं गतिं कृत्वान्तरिक्षगाम् ।
दर्शयित्वा प्रभावं स्वं सर्वभूतोऽभवत्तदा ॥ १९
महायोगगतिं त्वग्र्यां व्यासोत्थाय महातपाः ।
निमेषान्तरमात्रेण शुकाभिपतनं ययौ ॥ २०
स ददर्श द्विधा कृत्वा पर्वताग्रं शुकं गतम् ।
शशंसुर्ऋषयस्तस्मै कर्म पुत्रस्य तत्तदा ॥ २१
ततः शुकेति दीर्घेण शैक्षेणाक्रन्दितस्तदा ।
स्वयं पित्रा स्वरेणोच्चैस्त्रींल्लोकाननुनाद्य वै ॥ २२
शुकः सर्वगतो भूत्वा सर्वात्मा सर्वतोमुखः ।
प्रत्यभाषत धर्मात्मा भोःशब्देनानुनादयन् ॥ २३
तत एकाक्षरं नादं भो इत्येव समीरयन् ।
प्रत्याहरज्जगत्सर्वमुच्चैः स्थावरजङ्गमम् ॥ २४
ततः प्रभृति चाद्यापि शब्दानुच्चारितान्पृथक् ।
गिरिगह्वरपृष्ठेषु व्याजहार शुकं प्रति ॥ २५
अन्तर्हितः प्रभावं तु दर्शयित्वा शुकस्तदा ।
गुणान्संत्यज्य शब्दादीन्पदमध्यगमत्परम् ॥ २६
महिमानं तु तं दृष्ट्वा पुत्रस्यामिततेजसः ।
निषसाद गिरिप्रस्थे पुत्रमेवानुचिन्तयन् ॥ २७

ततो मन्दाकिनीतीरे क्रीडन्तोऽप्सरसां गणाः ।
आसाद्य तमृषिं सर्वाः संभ्रान्ता गतचेतसः ॥२८
जले निलिल्यिरे काश्चित्काश्चिद्गुल्मान्प्रपेदिरे ।
वसनान्याददुः काश्चिद्दृष्ट्वा तं मुनिसत्तमम् ॥ २९
तां मुक्ततां तु विज्ञाय मुनिः पुत्रस्य वै तदा ।
सक्तताम् आत्मनश्चैव प्रीतोऽभूद्व्रीडितश्च ह ॥ ३०
तं देवगन्धर्ववृतो महर्षिगणपूजितः ।
पिनाकहस्तो भगवानभ्यागच्छत शंकरः ॥ ३१
तमुवाच महादेवः सान्त्वपूर्वमिदं वचः ।
पुत्रशोकाभिसंतप्तं कृष्णद्वैपायनं तदा ॥ ३२
अग्नेर्भूमेरपां वायोरन्तरिक्षस्य चैव ह ।
वीर्येण सदृशः पुत्रस्त्वया मत्तः पुरा वृतः ॥ ३३
स तथालक्षणो जातस्तपसा तव संभृतः ।
मम चैव प्रभावेन ब्रह्मतेजोमयः शुचिः ॥ ३४
स गतिं परमां प्राप्तो दुष्प्रापामजितेन्द्रियैः ।
दैवतैरपि विप्रर्षे तं त्वं किमनुशोचसि ॥ ३५
यावत्स्थास्यन्ति गिरयो यावत्स्थास्यन्ति सागराः ।
तावत्तवाक्षया कीर्तिः सपुत्रस्य भविष्यति ॥ ३६
छायां स्वपुत्रसदृशीं सर्वतोऽनपगां सदा ।
द्रक्ष्यसे त्वं च लोकेऽस्मिन्मत्प्रसादान्महामुने ॥३७
सोऽनुनीतो भगवता स्वयं रुद्रेण भारत ।
छायां पश्यन्समावृत्तः स मुनिः परया मुदा ॥३८
इति जन्म गतिश्चैव शुकस्य भरतर्षभ ।
विस्तरेण मयाख्यातं यन्मां त्वं परिपृच्छसि ॥३९
एतदाचष्ट मे राजन्देवर्षिर्नारदः पुरा ।
व्यासश्चैव महायोगी संजल्पेषु पदे पदे ॥ ४०
इतिहासमिमं पुण्यं मोक्षधर्मार्थसंहितम् ।
धारयेद्यः शमपरः स गच्छेत्परमां गतिम् ॥ ४१

इति श्रीमहाभारते शान्तिपर्वणि
विंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२० ॥

३२१

युधिष्ठिर उवाच ।

गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः ।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः ॥ १
कुतो ह्यस्य ध्रुवः स्वर्गः कुतो निःश्रेयसं परम् ।
विधिना केन जुहुयाद्दैवं पित्र्यं तथैव च ॥ २
मुक्तश्च कां गतिं गच्छेन्मोक्षश्चैव किमात्मकः ।
स्वर्गतश्चैव किं कुर्याद्येन न च्यवते दिवः ॥ ३
देवतानां च को देवः पितृणां च तथा पिता ।
तस्मात्परतरं यच्च तन्मे ब्रूहि पितामह ॥ ४

भीष्म उवाच ।

गूढं मां प्रश्नवित्प्रश्नं पृच्छसे त्वमिहानघ ।
न ह्येष तर्कया शक्यो वक्तुं वर्षशतैरपि ॥ ५
ऋते देवप्रसादाद्वा राजञ्ज्ञानागमेन वा ।
गहनं ह्येतदाख्यानं व्याख्यातव्यं तवारिहन् ॥ ६
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादमृषेर्नारायणस्य च ॥ ७
नारायणो हि विश्वात्मा चतुर्मूर्तिः सनातनः ।
धर्मात्मजः संबभूव पितैवं मेऽभ्यभाषत ॥ ८
कृते युगे महाराज पुरा स्वायंभुवेऽन्तरे ।
नरो नारायणश्चैव हरिः कृष्णस्तथैव च ॥ ९
तेभ्यो नारायणनरौ तपस्तेपतुरव्ययौ ।
बदर्याश्रममासाद्य शकटे कनकामये ॥ १०
अष्टचक्रं हि तद्यानं भूतयुक्तं मनोरमम् ।
तत्राद्यौ लोकनाथौ तौ कृशौ धमनिसंततौ ॥ ११
तपसा तेजसा चैव दुर्निरीक्ष्यौ सुरैरपि ।
यस्य प्रसादं कुर्वाते स देवो द्रष्टुमर्हति ॥ १२
नूनं तयोरनुमते हृदि हृच्छयचोदितः ।
महामेरोर्गिरेः शृङ्गात्प्रच्युतो गन्धमादनम् ॥ १३
नारदः सुमहद्भूतं लोकान्सर्वानचीचरत् ।

तं देशमगमद्राजन्बदर्याश्रममाशुगः ॥ १४
तयोराह्निकवेलायां तस्य कौतूहलं त्वभूत् ।
इदं तदास्पदं कृत्स्नं यस्मिँल्लोकाः प्रतिष्ठिताः ॥१५
सदेवासुरगन्धर्वाः सर्षिकिंनरलेलिहाः ।
एका मूर्तिरियं पूर्वं जाता भूयश्चतुर्विधा ॥ १६
धर्मस्य कुलसंतानो महानेभिर्विवर्धितः ।
अहो ह्यनुगृहीतोऽद्य धर्म एभिः सुरैरिह ।
नरनारायणाभ्यां च कृष्णेन हरिणा तथा ॥ १७
तत्र कृष्णो हरिश्चैव कस्मिंश्चित्कारणान्तरे ।
स्थितौ धर्मोत्तरौ ह्येतौ तथा तपसि धिष्ठितौ ॥१८
एतौ हि परमं धाम कानयोराह्निकक्रिया ।
पितरौ सर्वभूतानां दैवतं च यशस्विनौ ।
कां देवतां नु यजतः पितॄन्वा कान्महामती ॥ १९
इति संचिन्त्य मनसा भक्त्या नारायणस्य ह ।
सहसा प्रादुरभवत्समीपे देवयोस्तदा ॥ २०
कृते दैवे च पित्र्ये च ततस्ताभ्यां निरीक्षितः ।
पूजितश्चैव विधिना यथाप्रोक्तेन शास्त्रतः ॥ २१
तं दृष्ट्वा महदाश्चर्यमपूर्वं विधिविस्तरम् ।
उपोपविष्टः सुप्रीतो नारदो भगवानृषिः ॥ २२
नारायणं संनिरीक्ष्य प्रसन्नेनान्तरात्मना ।
नमस्कृत्वा महादेवमिदं वचनमब्रवीत् ॥ २३
वेदेषु सपुराणेषु साङ्गोपाङ्गेषु गीयसे ।
त्वमजः शाश्वतो धाता मतोऽमृतमनुत्तमम् ।
प्रतिष्ठितं भूतभव्यं त्वयि सर्वमिदं जगत् ॥ २४
चत्वारो ह्याश्रमा देव सर्वे गार्हस्थ्यमूलकाः ।
यजन्ते त्वामहरहर्नानामूर्तिसमास्थितम् ॥ २५
पिता माता च सर्वस्य जगतः शाश्वतो गुरुः ।
कं त्वद्य यजसे देवं पितरं कं न विद्महे ॥ २६

श्रीभगवानुवाच ।

अवाच्यमेतद्वक्तव्यमात्मगुह्यं सनातनम् ।
तव भक्तिमतो ब्रह्मन्वक्ष्यामि तु यथातथम् ॥ २७
यत्तत्सूक्ष्ममविज्ञेयमव्यक्तमचलं ध्रुवम् ।
इन्द्रियैरिन्द्रियार्थैश्च सर्वभूतैश्च वर्जितम् ॥ २८
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते ।
त्रिगुणव्यतिरिक्तोऽसौ पुरुषश्चेति कल्पितः ॥
तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम ॥ २९
अव्यक्ता व्यक्तभावस्था या सा प्रकृतिरव्यया ।
तां योनिमावयोर्विद्धि योऽसौ सदसदात्मकः ।
आवाभ्यां पूज्यतेऽसौ हि दैवे पित्र्ये च कल्पिते ॥
नास्ति तस्मात्परोऽन्यो हि पिता देवोऽथ वा द्विज ।
आत्मा हि नौ स विज्ञेयस्ततस्तं पूजयावहे ॥ ३१
तेनैषा प्रथिता ब्रह्मन्मर्यादा लोकभाविनी ।
दैवं पित्र्यं च कर्तव्यमिति तस्यानुशासनम् ॥ ३२
ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तपो दमः ।
मरीचिरङ्गिरात्रिश्च पुलस्त्यः पुलहः क्रतुः ॥ ३३
वसिष्ठः परमेष्ठी च विवस्वान्सोम एव च ।
कर्दमश्चापि यः प्रोक्तः क्रोधो विक्रीत एव च ॥३४
एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः ।
तस्य देवस्य मर्यादां पूजयन्ति सनातनीम् ॥ ३५
दैवं पित्र्यं च सततं तस्य विज्ञाय तत्त्वतः ।
आत्मप्राप्तानि च ततो जानन्ति द्विजसत्तमाः ॥३६
स्वर्गस्था अपि ये केचित्तं नमस्यन्ति देहिनः ।
ते तत्प्रसादाद्गच्छन्ति तेनादिष्टफलां गतिम् ॥ ३७
ये हीनाः सप्तदशभिर्गुणैः कर्मभिरेव च ।
कलाः पञ्चदश त्यक्त्वा ते मुक्ता इति निश्चयः ॥
मुक्तानां तु गतिर्ब्रह्मन्क्षेत्रज्ञ इति कल्पितः ।
स हि सर्वगतश्चैव निर्गुणश्चैव कथ्यते ॥ ३९
दृश्यते ज्ञानयोगेन आवां च प्रसुतौ ततः ।
एवं ज्ञात्वा तमात्मानं पूजयावः सनातनम् ॥ ४०
तं वेदाश्चाश्रमाश्चैव नानातनुसमास्थिताः ।

भक्त्या संपूजयन्त्याद्यं गतिं चैषां ददाति सः ॥ ४१
ये तु तद्भाविता लोके एकान्तित्वं समास्थिताः ।
एतदभ्यधिकं तेषां यत्ते तं प्रविशन्त्युत ॥ ४२
इति गुह्यसमुद्देशस्तव नारद कीर्तितः ।
भक्त्या प्रेम्णा च विप्रर्षे अस्मद्भक्त्या च ते श्रुतः ॥

इति श्रीमहाभारते शान्तिपर्वणि
एकविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२१ ॥

३२२

भीष्म उवाच ।

स एवमुक्तो द्विपदां वरिष्ठो
नारायणेनोत्तमपूरुषेण ।
जगाद वाक्यं द्विपदां वरिष्ठं
नारायणं लोकहिताधिवासम् ॥ १
यदर्थमात्मप्रभवेह जन्म
तवोत्तमं धर्मगृहे चतुर्धा ।
तत्साध्यतां लोकहितार्थमद्य
गच्छामि द्रष्टुं प्रकृतिं तवाद्याम् ॥ २
वेदाः स्वधीता मम लोकनाथ
तप्तं तपो नानृतमुक्तपूर्वम् ।
पूजां गुरूणां सततं करोमि
परस्य गुह्यं न च भिन्नपूर्वम् ॥ ३
गुप्तानि चत्वारि यथागमं मे
शत्रौ च मित्रे च समोऽस्मि नित्यम् ।
तं चादिदेवं सततं प्रपन्न
एकान्तभावेन वृणोम्यजस्रम् ।
एभिर्विशेषैः परिशुद्धसत्त्वः
कस्मान्न पश्येयमनन्तमीशम् ॥ ४
तत्पारमेष्ठ्यस्य वचो निशम्य
नारायणः सात्वतधर्मगोप्ता ।
गच्छेति तं नारदमुक्तवान्स
संपूजयित्वात्मविधिक्रियाभिः ॥ ५
ततो विसृष्टः परमेष्ठिपुत्रः
सोऽभ्यर्चयित्वा तमृषिं पुराणम् ।
खमुत्पपातोत्तमवेगयुक्त-
स्ततोऽधिमेरौ सहसा निलिल्ये ॥ ६
तत्रावतस्थे च मुनिर्मुहूर्त-
मेकान्तमासाद्य गिरेः स शृङ्गे ।
आलोकयन्नुत्तरपश्चिमेन
ददर्श चात्यद्भुतरूपयुक्तम् ॥ ७
क्षीरोदधेरुत्तरतो हि द्वीपः
श्वेतः स नाम्ना प्रथितो विशालः ।
मेरोः सहस्रैः स हि योजनानां
द्वात्रिंशतोर्ध्वं कविभिर्निरुक्तः ॥ ८
अतीन्द्रियाश्चानशनाश्च तत्र
निष्पन्दहीनाः सुसुगन्धिनश्च ।
श्वेताः पुमांसो गतसर्वपापा-
श्चक्षुर्मुषः पापकृतां नराणाम् ॥ ९
वज्रास्थिकायाः सममानोन्माना
दिव्यान्वयरूपाः शुभसारोपेताः ।
छत्राकृतिशीर्षा मेघौघनिनादाः
सत्पुष्करचतुष्का राजीवशतपादाः ॥ १०
षष्ट्या दन्तैर्युक्ताः शुक्लैरष्टाभिर्दंष्ट्राभिर्ये ।
जिह्वाभिर्ये विष्वग्वक्त्रं लेलिह्यन्ते सूर्यप्रख्यम् ॥ ११
भक्त्या देवं विश्वोत्पन्नं यस्मात्सर्वे लोकाः सूताः ।
वेदा धर्मा मुनयः शान्ता देवाः सर्वे तस्य विसर्गाः ॥

युधिष्ठिर उवाच ।

अतीन्द्रिया निराहारा अनिष्पन्दाः सुगन्धिनः ।
कथं ते पुरुषा जाताः का तेषां गतिरुत्तमा ॥ १३
ये विमुक्ता भवन्तीह नरा भरतसत्तम ।
तेषां लक्षणमेतद्धि यच्छ्वेतद्वीपवासिनाम् ॥ १४

तस्मान्मे संशयं छिन्धि परं कौतूहलं हि मे ।
त्वं हि सर्वकथारामस्त्वां चैवोपाश्रिता वयम् ॥ १५

भीष्म उवाच ।

विस्तीर्णैषा कथा राजञ्श्रुता मे पितृसंनिधौ ।
सैषा तव हि वक्तव्या कथासारो हि स स्मृतः ॥
राजोपरिचरो नाम बभूवाधिपतिर्भुवः ।
आखण्डलसखः ख्यातो भक्तो नारायणं हरिम् ॥
धार्मिको नित्यभक्तश्च पितृन्नित्यमतन्द्रितः ।
साम्राज्यं तेन संप्राप्तं नारायणवरात्पुरा ॥ १८
सात्वतं विधिमास्थाय प्राक्सूर्यमुखनिःसृतम् ।
पूजयामास देवेशं तच्छेषेण पितामहान् ॥ १९
पितृशेषेण विप्रांश्च संविभज्याश्रितांश्च सः ।
शेषान्नभुक्सत्यपरः सर्वभूतेष्वहिंसकः ।
सर्वभावेन भक्तः स देवदेवं जनार्दनम् ॥ २०
तस्य नारायणे भक्तिं वहतोऽमित्रकर्शन ।
एकशय्यासनं शक्रो दत्तवान्देवराट्स्वयम् ॥ २१
आत्मा राज्यं धनं चैव कलत्रं वाहनानि च ।
एतद्भगवते सर्वमिति तत्प्रेक्षितं सदा ॥ २२
काम्यनैमित्तिकाजस्रं यज्ञियाः परमक्रियाः ।
सर्वाः सात्वतमास्थाय विधिं चक्रे समाहितः ॥२३
पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः ।
प्रायणं भगवत्प्रोक्तं भुञ्जते चाग्रभोजनम् ॥ २४
तस्य प्रशासतो राज्यं धर्मेणामित्रघातिनः ।
नानृता वाक्समभवन्मनो दुष्टं न चाभवत् ।
न च कायेन कृतवान्स पापं परमण्वपि ॥ २५
ये हि ते मुनयः ख्याताः सप्त चित्रशिखण्डिनः ।
तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम् ॥ २६
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्च महातेजा एते चित्रशिखण्डिनः ॥ २७
सप्त प्रकृतयो ह्येतास्तथा स्वायंभुवोऽष्टमः ।
एताभिर्धार्यते लोकस्ताभ्यः शास्त्रं विनिःसृतम् ॥
एकाग्रमनसो दान्ता मुनयः संयमे रताः ।
इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम् ।
लोकान्संचिन्त्य मनसा ततः शास्त्रं प्रचक्रिरे ॥२९
तत्र धर्मार्थकामा हि मोक्षः पश्चाच्च कीर्तितः ।
मर्यादा विविधाश्चैव दिवि भूमौ च संस्थिताः ॥
आराध्य तपसा देवं हरिं नारायणं प्रभुम् ।
दिव्यं वर्षसहस्रं वै सर्वे ते ऋषिभिः सह ॥ ३१
नारायणानुशास्ता हि तदा देवी सरस्वती ।
विवेश तानृषीन्सर्वाँल्लोकानां हितकाम्यया ॥ ३२
ततः प्रवर्तिता सम्यक्तपोविद्भिर्द्विजातिभिः ।
शब्दे चार्थे च हेतौ च एषा प्रथमसर्गजा ॥ ३३
आदावेव हि तच्छास्त्रमोंकारस्वरभूषितम् ।
ऋषिभिर्भावितं तत्र यत्र कारुणिको ह्यसौ ॥ ३४
ततः प्रसन्नो भगवाननिर्दिष्टशरीरगः ।
ऋषीनुवाच तान्सर्वानदृश्यः पुरुषोत्तमः ॥ ३५
कृतं शतसहस्रं हि श्लोकानामिदमुत्तमम् ।
लोकतन्त्रस्य कृत्स्नस्य यस्माद्धर्मः प्रवर्तते ॥ ३६
प्रवृत्तौ च निवृत्तौ च योनिरेतद्भविष्यति ।
ऋग्यजुःसामभिर्जुष्टमथर्वाङ्गिरसैस्तथा ॥ ३७
तथा प्रमाणं हि मया कृतो ब्रह्मा प्रसादजः ।
रुद्रश्च क्रोधजो विप्रा यूयं प्रकृतयस्तथा ॥ ३८
सूर्याचन्द्रमसौ वायुर्भूमिरापोऽग्निरेव च ।
सर्वे च नक्षत्रगणा यच्च भूताभिशब्दितम् ॥ ३९
अधिकारेषु वर्तन्ते यथास्वं ब्रह्मवादिनः ।
सर्वे प्रमाणं हि यथा तथैतच्छास्त्रमुत्तमम् ॥ ४०
भविष्यति प्रमाणं वै एतन्मदनुशासनम् ।
अस्मात्प्रवक्ष्यते धर्मान्मनुः स्वायंभुवः स्वयम् ॥४१
उशना बृहस्पतिश्चैव यदोत्पन्नौ भविष्यतः ।
तदा प्रवक्ष्यतः शास्त्रं युष्मन्मतिभिरुद्धृतम् ॥ ४२

स्वायंभुवेषु धर्मेषु शास्त्रे चोशनसा कृते ।
बृहस्पतिमते चैव लोकेषु प्रविचारिते ॥ ४३
युष्मत्कृतमिदं शास्त्रं प्रजापालो वसुस्ततः ।
बृहस्पतिसकाशाद्वै प्राप्स्यते द्विजसत्तमाः ॥ ४४
स हि मद्भावितो राजा मद्भक्तश्च भविष्यति ।
तेन शास्त्रेण लोकेषु क्रियाः सर्वाः करिष्यति ॥४५
एतद्धि सर्वशास्त्राणां शास्त्रमुत्तमसंज्ञितम् ।
एतदर्थ्यं च धर्म्यं च यशस्यं चैतदुत्तमम् ॥ ४६
अस्य प्रवर्तनाच्चैव प्रजावन्तो भविष्यथ ।
स च राजा श्रिया युक्तो भविष्यति महान्वसुः ॥
संस्थिते तु नृपे तस्मिञ्शास्त्रमेतत्सनातनम् ।
अन्तर्धास्यति तत्सत्यमेतद्वः कथितं मया ॥ ४८
एतावदुक्त्वा वचनमदृश्यः पुरुषोत्तमः ।
विसृज्य तानृषीन्सर्वान्कामपि प्रस्थितो दिशम् ॥४९
ततस्ते लोकपितरः सर्वलोकार्थचिन्तकाः ।
प्रावर्तयन्त तच्छास्त्रं धर्मयोनिं सनातनम् ॥ ५०
उत्पन्नेऽऽङ्गिरसे चैव युगे प्रथमकल्पिते ।
साङ्गोपनिषदं शास्त्रं स्थापयित्वा बृहस्पतौ ॥ ५१
जग्मुर्यथेप्सितं देशं तपसे कृतनिश्चयाः ।
धारणात्सर्वलोकानां सर्वधर्मप्रवर्तकाः ॥ ५२

इति श्रीमहाभारते शान्तिपर्वणि
द्वाविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२२ ॥

३२३

भीष्म उवाच ।

ततोऽतीते महाकल्पे उत्पन्नेऽङ्गिरसः सुते ।
बभूवुर्निर्वृता देवा जाते देवपुरोहिते ॥ १
बृहद्ब्रह्म महच्चेति शब्दाः पर्यायवाचकाः ।
एभिः समन्वितो राजन्गुणैर्विद्वान्बृहस्पतिः ॥ २
तस्य शिष्यो बभूवाग्र्यो राजोपरिचरो वसुः ।
अधीतवांस्तदा शास्त्रं सम्यक्चित्रशिखण्डिजम् ॥३
स राजा भावितः पूर्वं दैवेन विधिना वसुः ।
पालयामास पृथिवीं दिवमाखण्डलो यथा ॥ ४
तस्य यज्ञो महानासीदश्वमेधो महात्मनः ।
बृहस्पतिरुपाध्यायस्तत्र होता बभूव ह ॥ ५
प्रजापतिसुताश्चात्र सदस्यास्त्वभवंस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ॥ ६
धनुषाक्षोऽथ रैभ्यश्च अर्वावसुपरावसू ।
ऋषिर्मेधातिथिश्चैव ताण्ड्यश्चैव महानृषिः ॥ ७
ऋषिः शक्तिर्महाभागस्तथा वेदशिराश्च यः ।
कपिलश्च ऋषिश्रेष्ठः शालिहोत्रपितामहः ॥ ८
आद्यः कठस्तैत्तिरिश्च वैशंपायनपूर्वजः ।
कण्वोऽथ देवहोत्रश्च एते षोडश कीर्तिताः ।
संभृताः सर्वसंभारास्तस्मिन्राजन्महाक्रतौ ॥ ९
न तत्र पशुघातोऽभूत्स राजैवं स्थितोऽभवत् ।
अहिंस्रः शुचिरक्षुद्रो निराशीः कर्मसंस्तुतः ।
आरण्यकपदोद्गीता भागास्तत्रोपकल्पिताः ॥ १०
प्रीतस्ततोऽस्य भगवान्देवदेवः पुरातनः ।
साक्षात्तं दर्शयामास सोऽदृश्योऽन्येन केनचित् ॥
स्वयं भागमुपाघ्राय पुरोडाशं गृहीतवान् ।
अदृश्येन हृतो भागो देवेन हरिमेधसा ॥ १२
बृहस्पतिस्ततः क्रुद्धः स्रुवमुद्यम्य वेगितः ।
आकाशं घ्नन्स्रुवः पातै रोषादश्रूण्यवर्तयत् ॥ १३
उवाच चोपरिचरं मया भागोऽयमुद्यतः ।
ग्राह्यः स्वयं हि देवेन मत्प्रत्यक्षं न संशयः ॥ १४
उद्यता यज्ञभागा हि साक्षात्प्राप्ताः सुरैरिह ।
किमर्थमिह न प्राप्तो दर्शनं स हरिर्विभुः ॥ १५
ततः स तं समुद्धूतं भूमिपालो महान्वसुः ।
प्रसादयामास मुनिं सदस्यास्ते च सर्वशः ॥ १६
ऊचुश्चैनमसंभ्रान्ता न रोषं कर्तुमर्हसि ।
नैष धर्मः कृतयुगे यस्त्वं रोषमचीकृथाः ॥ १७

अरोषणो ह्यसौ देवो यस्य भागोऽयमुद्यतः ।
न स शक्यस्त्वया द्रष्टुमस्माभिर्वा बृहस्पते ।
यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ॥ १८

एकतद्वितत्रिता ऊचुः ।

वयं हि ब्रह्मणः पुत्रा मानसाः परिकीर्तिताः ।
गता निःश्रेयसार्थं हि कदाचिद्दिशमुत्तराम् ॥ १९
तप्त्वा वर्षसहस्राणि चत्वारि तप उत्तमम् ।
एकपादस्थिताः सम्यक्काष्ठभूताः समाहिताः ॥ २०
मेरोरुत्तरभागे तु क्षीरोदस्यानुकूलतः ।
स देशो यत्र नस्तप्तं तपः परमदारुणम् ।
कथं पश्येमहि वयं देवं नारायणं त्विति ॥ २१
ततो व्रतस्यावभृथे वागुवाचाशरीरिणी ।
सुतप्तं वस्तपो विप्राः प्रसन्नेनान्तरात्मना ॥ २२
यूयं जिज्ञासवो भक्ताः कथं द्रक्ष्यथ तं प्रभुम् ।
क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः ॥ २३
तत्र नारायणपरा मानवाश्चन्द्रवर्चसः ।
एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमम् ॥ २४
ते सहस्रार्चिषं देवं प्रविशन्ति सनातनम् ।
अतीन्द्रिया निराहारा अनिष्पन्दाः सुगन्धिनः ॥
एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः ।
गच्छध्वं तत्र मुनयस्तत्रात्मा मे प्रकाशितः ॥ २६
अथ श्रुत्वा वयं सर्वे वाचं तामशरीरिणीम् ।
यथाख्यातेन मार्गेण तं देशं प्रतिपेदिरे ॥ २७
प्राप्य श्वेतं महाद्वीपं तच्चित्तास्तद्दिदृक्षवः ।
ततो नो दृष्टिविषयस्तदा प्रतिहतोऽभवत् ॥ २८
न च पश्याम पुरुषं तत्तेजोहृतदर्शनाः ।
ततो नः प्रादुरभवद्विज्ञानं देवयोगजम् ॥ २९
न किलातप्ततपसा शक्यते द्रष्टुमञ्जसा ।
ततः पुनर्वर्षशतं तप्त्वा तात्कालिकं महत् ॥ ३०
व्रतावसाने सुशुभान्नरान्ददृशिरे वयम् ।
श्वेतांश्चन्द्रप्रतीकाशान्सर्वलक्षणलक्षितान् ॥ ३१
नित्याञ्जलिकृतान्ब्रह्म जपतः प्रागुदङ्मुखान् ।
मानसो नाम स जपो जप्यते तैर्महात्मभिः ।
तेनैकाग्रमनस्त्वेन प्रीतो भवति वै हरिः ॥ ३२
या भवेन्मुनिशार्दूल भाः सूर्यस्य युगक्षये ।
एकैकस्य प्रभा तादृक्साभवन्मानवस्य ह ॥ ३३
तेजोनिवासः स द्वीप इति वै मेनिरे वयम् ।
न तत्राभ्यधिकः कश्चित्सर्वे ते समतेजसः ॥ ३४
अथ सूर्यसहस्रस्य प्रभां युगपदुत्थिताम् ।
सहसा दृष्टवन्तः स्म पुनरेव बृहस्पते ॥ ३५
सहिताश्चाभ्यधावन्त ततस्ते मानवा द्रुतम् ।
कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः ॥ ३६
ततोऽभिवदतां तेषामश्रौष्म विपुलं ध्वनिम् ।
बलिः किलोपह्रियते तस्य देवस्य तैर्नरैः ॥ ३७
वयं तु तेजसा तस्य सहसा हृतचेतसः ।
न किंचिदपि पश्यामो हतदृष्टिबलेन्द्रियाः ॥ ३८
एकस्तु शब्दोऽविरतः श्रुतोऽस्माभिरुदीरितः ।
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ ३९
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ।
इति शब्दः श्रुतोऽस्माभिः शिक्षाक्षरसमीरितः ॥४०
एतस्मिन्नन्तरे वायुः सर्वगन्धवहः शुचिः ।
दिव्यान्युवाह पुष्पाणि कर्मण्याश्चौषधीस्तथा ॥ ४१
तैरिष्टः पञ्चकालज्ञैर्हरिरेकान्तिभिर्नरैः ।
नूनं तत्रागतो देवो यथा तैर्वागुदीरिता ।
वयं त्वेनं न पश्यामो मोहितास्तस्य मायया ॥४२
मारुते संनिवृत्ते च बलौ च प्रतिपादिते ।
चिन्ताव्याकुलितात्मानो जाताः स्मोऽङ्गिरसां वर ॥
मानवानां सहस्रेषु तेषु वै शुद्धयोनिषु ।
अस्मान्न कश्चिन्मनसा चक्षुषा वाप्यपूजयत् ॥ ४४
तेऽपि स्वस्था मुनिगणा एकभावमनुव्रताः ।

नास्मासु दधिरे भावं ब्रह्मभावमनुष्ठिताः ॥ ४५
ततोऽस्मान्सुपरिश्रान्तांस्तपसा चापि कर्शितान् ।
उवाच स्वस्थं किमपि भूतं तत्राशरीरकम् ॥ ४६
दृष्टा वः पुरुषाः श्वेताः सर्वेन्द्रियविवर्जिताः ।
दृष्टो भवति देवेश एभिर्दृष्टैर्द्विजोत्तमाः ॥ ४७
गच्छध्वं मुनयः सर्वे यथागतमितोऽचिरात् ।
न स शक्यो अभक्तेन द्रष्टुं देवः कथंचन ॥ ४८
कामं कालेन महता एकान्तित्वं समागतैः ।
शक्यो द्रष्टुं स भगवान्प्रभामण्डलदुर्दृशः ॥ ४९
महत्कार्यं तु कर्तव्यं युष्माभिर्द्विजसत्तमाः ।
इतः कृतयुगेऽतीते विपर्यासं गतेऽपि च ॥ ५०
वैवस्वतेऽन्तरे विप्राः प्राप्ते त्रेतायुगे ततः ।
सुराणां कार्यसिद्ध्यर्थं सहाया वै भविष्यथ ॥ ५१
ततस्तदद्भुतं वाक्यं निशम्यैवं स्म सोमप ।
तस्य प्रसादात्प्राप्ताः स्मो देशमीप्सितमञ्जसा ॥५२
एवं सुतपसा चैव हव्यकव्यैस्तथैव च ।
देवोऽस्माभिर्न दृष्टः स कथं त्वं द्रष्टुमर्हसि ।
नारायणो महद्भूतं विश्वसृग्घव्यकव्यभुक् ॥ ५३

भीष्म उवाच ।

एवमेकतवाक्येन द्वितत्रितमतेन च ।
अनुनीतः सदस्यैश्च बृहस्पतिरुदारधीः ।
समानीय ततो यज्ञं दैवतं समपूजयत् ॥ ५४
समाप्तयज्ञो राजापि प्रजाः पालितवान्वसुः ।
ब्रह्मशापाद्दिवो भ्रष्टः प्रविवेश महीं ततः ॥ ५५
अन्तर्भूमिगतश्चैव सततं धर्मवत्सलः ।
नारायणपरो भूत्वा नारायणपदं जगौ ॥ ५६
तस्यैव च प्रसादेन पुनरेवोत्थितस्तु सः ।
महीतलाद्गतः स्थानं ब्रह्मणः समनन्तरम् ।
परां गतिमनुप्राप्य इति नैष्ठिकमञ्जसा ॥ ५७

इति श्रीमहाभारते शान्तिपर्वणि
त्रयोविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२३ ॥

३२४

युधिष्ठिर उवाच ।

यदा भक्तो भगवत आसीद्राजा महावसुः ।
किमर्थं स परिभ्रष्टो विवेश विवरं भुवः ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषीणां चैव संवादं त्रिदशानां च भारत ॥ २
अजेन यष्टव्यमिति देवाः प्राहुर्द्विजोत्तमान् ।
स च च्छागो ह्यजो ज्ञेयो नान्यः पशुरिति स्थितिः ॥

ऋषय ऊचुः ।

बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः ।
अजसंज्ञानि बीजानि छागं न घ्नन्तुमर्हथ ॥ ४
नैष धर्मः सतां देवा यत्र वध्येत वै पशुः ।
इदं कृतयुगं श्रेष्ठं कथं वध्येत वै पशुः ॥ ५

भीष्म उवाच ।

तेषां संवदतामेवमृषीणां विबुधैः सह ।
मार्गागतो नृपश्रेष्ठस्तं देशं प्राप्तवान्वसुः ।
अन्तरिक्षचरः श्रीमान्समग्रबलवाहनः ॥ ६
तं दृष्ट्वा सहसायान्तं वसुं ते त्वन्तरिक्षगम् ।
ऊचुर्द्विजातयो देवानेष च्छेत्स्यति संशयम् ॥ ७
यज्वा दानपतिः श्रेष्ठः सर्वभूतहितप्रियः ।
कथं स्विदन्यथा ब्रूयाद्वाक्यमेष महान्वसुः ॥ ८
एवं ते संविदं कृत्वा विबुधा ऋषयस्तथा ।
अपृच्छन्सहसाभ्येत्य वसुं राजानमन्तिकात् ॥ ९
भो राजन्केन यष्टव्यमजेनाहो स्विदौषधैः ।
एतन्नः संशयं छिन्धि प्रमाणं नो भवान्मतः ॥१०

स तान्कृताञ्जलिर्भूत्वा परिपप्रच्छ वै वसुः ।
कस्य वः को मतः पक्षो ब्रूत सत्यं समागताः ॥ ११

ऋषय ऊचुः ।

धान्यैर्यष्टव्यमित्येष पक्षोऽस्माकं नराधिप ।
देवानां तु पशुः पक्षो मतो राजन्वदस्व नः ॥ १२

भीष्म उवाच ।

देवानां तु मतं ज्ञात्वा वसुना पक्षसंश्रयात् ।
छागेनाजेन यष्टव्यमेवमुक्तं वचस्तदा ॥ १३
कुपितास्ते ततः सर्वे मुनयः सूर्यवर्चसः ।
ऊचुर्वसुं विमानस्थं देवपक्षार्थवादिनम् ॥ १४
सुरपक्षो गृहीतस्ते यस्मात्तस्माद्दिवः पत ।
अद्यप्रभृति ते राजन्नाकाशे विहता गतिः ।
अस्मच्छापाभिघातेन महीं भित्त्वा प्रवेक्ष्यसि ॥
ततस्तस्मिन्मुहूर्तेऽथ राजोपरिचरस्तदा ।
अधो वै संबभूवाशु भूमेर्विवरगो नृपः ।
स्मृतिस्त्वेनं न प्रजहौ तदा नारायणाज्ञया ॥ १६
देवास्तु सहिताः सर्वे वसोः शापविमोक्षणम् ।
चिन्तयामासुरव्यग्राः सुकृतं हि नृपस्य तत् ॥ १७
अनेनास्मत्कृते राज्ञा शापः प्राप्तो महात्मना ।
अस्य प्रतिप्रियं कार्यं सहितैर्नो दिवौकसः ॥ १८
इति बुद्ध्या व्यवस्याशु गत्वा निश्चयमीश्वराः ।
ऊचुस्तं हृष्टमनसो राजोपरिचरं तदा ॥ १९
ब्रह्मण्यदेवं त्वं भक्तः सुरासुरगुरुं हरिम् ।
कामं स तव तुष्टात्मा कुर्याच्छापविमोक्षणम् ॥२०
मानना तु द्विजातीनां कर्तव्या वै महात्मनाम् ।
अवश्यं तपसा तेषां फलितव्यं नृपोत्तम ॥ २१
यतस्त्वं सहसा भ्रष्ट आकाशान्मेदिनीतलम् ।
एकं त्वनुग्रहं तुभ्यं दद्मो वै नृपसत्तम ॥ २२
यावत्त्वं शापदोषेण कालमासिष्यसेऽनघ ।
भूमेर्विवरगो भूत्वा तावन्तं कालमाप्स्यसि ।
यज्ञेषु सुहुतां विप्रैर्वसोर्धारां महात्मभिः ॥ २३
प्राप्स्यसेऽस्मदनुध्यानान्मा च त्वां ग्लानिरास्पृशेत् ।
न क्षुत्पिपासे राजेन्द्र भूमेश्छिद्रे भविष्यतः ॥२४
वसोर्धारानुपीतत्वात्तेजसाप्यायितेन च ।
स देवोऽस्मद्वरात्प्रीतो ब्रह्मलोकं हि नेष्यति ॥ २५
एवं दत्त्वा वरं राज्ञे सर्वे तत्र दिवौकसः ।
गताः स्वभवनं देवा ऋषयश्च तपोधनाः ॥ २६
चक्रे च सततं पूजां विष्वक्सेनाय भारत ।
जप्यं जगौ च सततं नारायणमुखोद्गतम् ॥ २७
तत्रापि पञ्चभिर्यज्ञैः पञ्चकालानरिंदम ।
अयजद्धरिं सुरपतिं भूमेर्विवरगोऽपि सन् ॥ २८
ततोऽस्य तुष्टो भगवान्भक्त्या नारायणो हरिः ।
अनन्यभक्तस्य सततस्तत्परस्य जितात्मनः ॥ २९
वरदो भगवान्विष्णुः समीपस्थं द्विजोत्तमम् ।
गरुत्मन्तं महावेगमाबभाषे स्मयन्निव ॥ ३०
द्विजोत्तम महाभाग गम्यतां वचनान्मम ।
सम्राड्राजा वसुर्नाम धर्मात्मा मां समाश्रितः ॥३१
ब्राह्मणानां प्रकोपेन प्रविष्टो वसुधातलम् ।
मानितास्ते तु विप्रेन्द्रास्त्वं तु गच्छ द्विजोत्तम ॥३२
भूमेर्विवरसंगुप्तं गरुडेह ममाज्ञया ।
अधश्चरं नृपश्रेष्ठं खेचरं कुरु माचिरम् ॥ ३३
गरुत्मानथ विक्षिप्य पक्षौ मारुतवेगवान् ।
विवेश विवरं भूमेर्यत्रास्ते वाग्यतो वसुः ॥ ३४
तत एनं समुत्क्षिप्य सहसा विनतासुतः ।
उत्पपात नभस्तूर्णं तत्र चैनममुञ्चत ॥ ३५
तस्मिन्मुहूर्ते संजज्ञे राजोपरिचरः पुनः ।
सशरीरो गतश्चैव ब्रह्मलोकं नृपोत्तमः ॥ ३६
एवं तेनापि कौन्तेय वाग्दोषाद्देवताज्ञया ।
प्राप्ता गतिरयज्वार्हा द्विजशापान्महात्मना ॥ ३७
केवलं पुरुषस्तेन सेवितो हरिरीश्वरः ।

ततः शीघ्रं जहौ शापं ब्रह्मलोकमवाप च ॥ ३८
एतत्ते सर्वमाख्यातं ते भूता मानवा यथा ।
नारदोऽपि यथा श्वेतं द्वीपं स गतवानृषिः ।
तत्ते सर्वं प्रवक्ष्यामि शृणुष्वैकमना नृप ॥ ३९

इति श्रीमहाभारते शान्तिपर्वणि
चतुर्विंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२४ ॥

३२५

भीष्म उवाच ।

प्राप्य श्वेतं महाद्वीपं नारदो भगवानृषिः ।
ददर्श तानेव नराञ्श्वेतांश्चन्द्रप्रभाञ्शुभान् ॥ १
पूजयामास शिरसा मनसा तैश्च पूजितः ।
दिदृक्षुर्जप्यपरमः सर्वकृच्छ्रधरः स्थितः ॥ २
भूत्वैकाग्रमना विप्र ऊर्ध्वबाहुर्महामुनिः ।
स्तोत्रं जगौ स विश्वाय निर्गुणाय महात्मने ॥ ३

नारद उवाच ।

नमस्ते देवदेव । १ । निष्क्रिय । २ । निर्गुण । ३ । लोकसाक्षिन् । ४ । क्षेत्रज्ञ । ५ । अनन्त । ६ [=११६] । पुरुष । ७ । महापुरुष । ८ । त्रिगुण । ९ । प्रधान । १० ॥

अमृत । ११ । व्योम । १२ । सनातन । १३ । सदसद्व्यक्ताव्यक्त । १४ । ऋतधामन् । १५ । पूर्वादिदेव । १६ । वसुप्रद । १७ । प्रजापते । १८ । सुप्रजापते । १९ । वनस्पते । २० ॥

महाप्रजापते । २१ । ऊर्जस्पते । २२ । वाचस्पते । २३ । मनस्पते । २४ । जगत्पते । २५ । दिवस्पते । २६ । मरुत्पते । २७ । सलिलपते । २८ । पृथिवीपते । २९ । दिक्पते । ३० ॥

पूर्वनिवास । ३१ । ब्रह्मपुरोहित । ३२ । ब्रह्मकायिक । ३३ । महाकायिक । ३४ । महाराजिक । ३५ । चतुर्महाराजिक । ३६ । आभासुर । ३७ । महाभासुर । ३८ । सप्तमहाभासुर । ३९ । याम्य । ४० ॥

महायाम्य । ४१ । संज्ञासंज्ञ । ४२ । तुषित । ४३ । महातुषित । ४४ । प्रतर्दन । ४५ । परिनिर्मित । ४६ । वशवर्तिन् । ४७ । अपरिनिर्मित । ४८ । यज्ञ । ४९ । महायज्ञ । ५० ॥

यज्ञसंभव । ५१ । यज्ञयोने । ५२ । यज्ञगर्भ । ५३ । यज्ञहृदय । ५४ । यज्ञस्तुत । ५५ । यज्ञभागहर । ५६ । पञ्चयज्ञधर । ५७ । पञ्चकालकर्तृगते । ५८ । पञ्चरात्रिक । ५९ । वैकुण्ठ । ६० ॥

अपराजित । ६१ । मानसिक । ६२ । परमस्वामिन् । ६३ । सुस्नात । ६४ । हंस । ६५ । परमहंस । ६६ । परमयाज्ञिक । ६७ । सांख्ययोग । ६८ । अमृतेशय । ६९ । हिरण्येशय । ७० ॥

वेदेशय । ७१ । कुशेशय । ७२ । ब्रह्मेशय । ७३ । पद्मेशय । ७४ । विश्वेश्वर । ७५ । त्वं जगदन्वयः । ७६ । त्वं जगत्प्रकृतिः । ७७ । तवाग्निरास्यम् । ७८ । वडवामुखोऽग्निः । ७९ । त्वमाहुतिः । ८० ॥

त्वं सारथिः । ८१ । त्वं वषट्कारः । ८२ । त्वमोंकारः । ८३ । त्वं मनः । ८४ । त्वं चन्द्रमाः । ८५ । त्वं चक्षुराद्यम् । ८६ । त्वं सूर्यः । ८७ । त्वं दिशां गजः । ८८ । दिग्भानो । ८९ । हयशिरः । ९० ॥

प्रथमत्रिसौपर्ण । ९१ । पञ्चाग्ने । ९२ । त्रिणाचिकेत । ९३ । षडङ्गविधान । ९४ । प्राग्ज्योतिष । ९५ । ज्येष्ठसामग । ९६ । सामिकव्रतधर । ९७ । अथर्वशिरः । ९८ । पञ्चमहाकल्प । ९९ । फेन-

प्राचार्य । १०० ॥

वालखिल्य । १०१ । वैखानस । १०२ । अभग्नयोग । १०३ । अभग्नपरिसंख्यान । १०४ । युगादे । १०५ । युगमध्य । १०६ । युगनिधन । १०७ । आखण्डल । १०८ । प्राचीनगर्भ । १०९ । कौशिक । ११० ॥

पुरुष्टुत । १११ । पुरुहूत । ११२ । विश्वरूप । ११३ । अनन्तगते । ११४ । अनन्तभोग । ११५ । अनन्त । ११६ [= ६] । अनादे । ११७ । अमध्य । ११८ । अव्यक्तमध्य । ११९ । अव्यक्तनिधन । १२० ॥

व्रतावास । १२१ । समुद्राधिवास । १२२ । यशोवास । १२३ । तपोवास । १२४ । लक्ष्म्यावास । १२५ । विद्यावास । १२६ । कीर्त्यावास । १२७ । श्रीवास । १२८ । सर्वावास । १२९ । वासुदेव । १३० ॥

सर्वच्छन्दक । १३१ । हरिहय । १३२ । हरिमेध । १३३ । महायज्ञभागहर । १३४ । वरप्रद । १३५ [= १५७] । यमनियममहानियमकृच्छ्रातिकृच्छ्रमहाकृच्छ्रसर्वकृच्छ्रनियमधर । १३६ । निवृत्तिधर्मप्रवचनगते । १३७ । प्रवृत्तवेदक्रिय । १३८ । अज । १३९ । सर्वगते । १४० ॥

सर्वदर्शिन् । १४१ । अग्राह्य । १४२ । अचल । १४३ । महाविभूते । १४४ । माहात्म्यशरीर । १४५ । पवित्र । १४६ । महापवित्र । १४७ । हिरण्मय । १४८ । बृहत् । १४९ । अप्रतर्क्य । १५० ॥

अविज्ञेय । १५१ । ब्रह्माग्र्य । १५२ । प्रजासर्गकर । १५३ । प्रजानिधनकर । १५४ । महामायाधर । १५५ । चित्रशिखण्डिन् । १५६ । वरप्रद । १५७ [= १३५] । पुरोडाशभागहर । १५८ । गताध्वन् । १५९ । छिन्नतृष्ण । १६० ॥

छिन्नसंशय । १६१ । सर्वतोनिवृत्त । १६२ । ब्राह्मणरूप । १६३ । ब्राह्मणप्रिय । १६४ । विश्वमूर्ते । १६५ । महामूर्ते । १६६ । बान्धव । १६७ । भक्तवत्सल । १६८ । ब्रह्मण्यदेव । १६९ । भक्तोऽहं त्वां दिदृक्षुः । १७० । एकान्तदर्शनाय नमो नमः । १७१ ॥ ४

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२५ ॥

३२६

भीष्म उवाच ।

एवं स्तुतः स भगवान्गुह्यैस्तथ्यैश्च नामभिः ।
तं मुनिं दर्शयामास नारदं विश्वरूपधृक् ॥ १
किंचिच्चन्द्रविशुद्धात्मा किंचिच्चन्द्राद्विशेषवान् ।
कृशानुवर्णः किंचिच्च किंचिद्धिष्ण्याकृतिः प्रभुः ॥२
शुकपत्रवर्णः किंचिच्च किंचित्स्फटिकसप्रभः ।
नीलाञ्जनचयप्रख्यो जातरूपप्रभः क्वचित् ॥ ३
प्रवालाङ्कुरवर्णश्च श्वेतवर्णः क्वचिद्बभौ ।
क्वचित्सुवर्णवर्णाभो वैडूर्यसदृशः क्वचित् ॥ ४
नीलवैडूर्यसदृश इन्द्रनीलनिभः क्वचित् ।
मयूरग्रीववर्णाभो मुक्ताहारनिभः क्वचित् ॥ ५
एतान्वर्णान्बहुविधान्रूपे बिभ्रत्सनातनः ।
सहस्रनयनः श्रीमाञ्शतशीर्षः सहस्रपात् ॥ ६
सहस्रोदरबाहुश्च अव्यक्त इति च क्वचित् ।
ओंकारमुद्गिरन्वक्त्रात्सावित्रीं च तदन्वयाम् ॥ ७
शेषेभ्यश्चैव वक्त्रेभ्यश्चतुर्वेदोद्गतं वसु ।
आरण्यकं जगौ देवो हरिर्नारायणो वशी ॥ ८
वेदीं कमण्डलुं दर्भान्मणिरूपानथोपलान् ।

अजिनं दण्डकाष्ठं च ज्वलितं च हुताशनम् ।
धारयामास देवेशो हस्तैर्यज्ञपतिस्तदा ॥ ९
तं प्रसन्नं प्रसन्नात्मा नारदो द्विजसत्तमः ।
वाग्यतः प्रयतो भूत्वा ववन्दे परमेश्वरम् ।
तमुवाच नतं मूर्ध्ना देवानामादिरव्ययः ॥ १०
एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ।
इमं देशमनुप्राप्ता मम दर्शनलालसाः ॥ ११
न च मां ते ददृशिरे न च द्रक्ष्यति कश्चन ।
ऋते ह्येकान्तिकश्रेष्ठात्त्वं चैवैकान्तिको मतः ॥ १२
ममैतास्तनवः श्रेष्ठा जाता धर्मगृहे द्विज ।
तास्त्वं भजस्व सततं साधयस्व यथागतम् ॥ १३
वृणीष्व च वरं विप्र मत्तस्त्वं यमिहेच्छसि ।
प्रसन्नोऽहं तवाद्येह विश्वमूर्तिरिहाव्ययः ॥ १४

नारद उवाच ।

अद्य मे तपसो देव यमस्य नियमस्य च ।
सद्यः फलमवाप्तं वै दृष्टो यद्भगवन्मया ॥ १५
वर एष ममात्यन्तं दृष्टस्त्वं यत्सनातनः ।
भगवान्विश्वदृक्सिंहः सर्वमूर्तिर्महाप्रभुः ॥ १६

भीष्म उवाच ।

एवं संदर्शयित्वा तु नारदं परमेष्ठिजम् ।
उवाच वचनं भूयो गच्छ नारद माचिरम् ॥ १७
इमे ह्यनिन्द्रियाहारा मद्भक्ताश्चन्द्रवर्चसः ।
एकाग्राश्चिन्तयेयुर्मां नैषां विघ्नो भवेदिति ॥ १८
सिद्धाश्चैते महाभागाः पुरा ह्येकान्तिनोऽभवन् ।
तमोरजोविनिर्मुक्ता मां प्रवेक्ष्यन्त्यसंशयम् ॥ १९
न दृश्यश्चक्षुषा योऽसौ न स्पृश्यः स्पर्शनेन च ।
न घ्रेयश्चैव गन्धेन रसेन च विवर्जितः ॥ २०
सत्त्वं रजस्तमश्चैव न गुणास्तं भजन्ति वै ।
यश्च सर्वगतः साक्षी लोकस्यात्मेति कथ्यते ॥२१
भूतग्रामशरीरेषु नश्यत्सु न विनश्यति ।
अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा ॥२२
द्विर्द्वादशेभ्यस्तत्त्वेभ्यः ख्यातो यः पञ्चविंशकः ।
पुरुषो निष्क्रियश्चैव ज्ञानदृश्यश्च कथ्यते ॥ २३
यं प्रविश्य भवन्तीह मुक्ता वै द्विजसत्तम ।
स वासुदेवो विज्ञेयः परमात्मा सनातनः ॥ २४
पश्य देवस्य माहात्म्यं महिमानं च नारद ।
शुभाशुभैः कर्मभिर्यो न लिप्यति कदाचन ॥ २५
सत्त्वं रजस्तमश्चैव गुणानेतान्प्रचक्षते ।
एते सर्वशरीरेषु तिष्ठन्ति विचरन्ति च ॥ २६
एतान्गुणांस्तु क्षेत्रज्ञो भुङ्क्ते नैभिः स भुज्यते ।
निर्गुणो गुणभुक्चैव गुणस्रष्टा गुणाधिकः ॥ २७
जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥२८
खे वायुः प्रलयं याति मनस्याकाशमेव च ।
मनो हि परमं भूतं तदव्यक्ते प्रलीयते ॥ २९
अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयते ।
नास्ति तस्मात्परतरं पुरुषाद्वै सनातनात् ॥ ३०
नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् ।
ऋते तमेकं पुरुषं वासुदेवं सनातनम् ।
सर्वभूतात्मभूतो हि वासुदेवो महाबलः ॥ ३१
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
ते समेता महात्मानः शरीरमिति संज्ञितम् ॥ ३२
तदाविशति यो ब्रह्मन्नदृश्यो लघुविक्रमः ।
उत्पन्न एव भवति शरीरं चेष्टयन्प्रभुः ॥ ३३
न विना धातुसंघातं शरीरं भवति क्वचित् ।
न च जीवं विना ब्रह्मन्धातवश्चेष्टयन्त्युत ॥ ३४
स जीवः परिसंख्यातः शेषः संकर्षणः प्रभुः ।
तस्मात्सनत्कुमारत्वं यो लभेत स्वकर्मणा ॥ ३५
यस्मिंश्च सर्वभूतानि प्रलयं यान्ति संक्षये ।
स मनः सर्वभूतानां प्रद्युम्नः परिपठ्यते ॥ ३६

तस्मात्प्रसूतो यः कर्ता कार्यं कारणमेव च ।
यस्मात्सर्वं प्रभवति जगत्स्थावरजङ्गमम् ।
सोऽनिरुद्धः स ईशानो व्यक्तिः सा सर्वकर्मसु ॥
यो वासुदेवो भगवान्क्षेत्रज्ञो निर्गुणात्मकः ।
ज्ञेयः स एव भगवाञ्जीवः संकर्षणः प्रभुः ॥ ३८
संकर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते ।
प्रद्युम्नाद्योऽनिरुद्धस्तु सोऽहंकारो महेश्वरः ॥ ३९
मत्तः सर्वं संभवति जगत्स्थावरजङ्गमम् ।
अक्षरं च क्षरं चैव सच्चासच्चैव नारद ॥ ४०
मां प्रविश्य भवन्तीह मुक्ता भक्तास्तु ये मम ।
अहं हि पुरुषो ज्ञेयो निष्क्रियः पञ्चविंशकः ॥४१
निर्गुणो निष्कलश्चैव निर्द्वंद्वो निष्परिग्रहः ।
एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते ।
इच्छन्मुहूर्तान्नश्येयमीशोऽहं जगतो गुरुः ॥ ४२
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि ।
मयैतत्कथितं सम्यक्तव मूर्तिचतुष्टयम् ॥ ४३
सिद्धा ह्येते महाभागा नरा ह्येकान्तिनोऽभवन् ।
तमोरजोभ्यां निर्मुक्ताः प्रवेक्ष्यन्ति च मां मुने ॥
अहं कर्ता च कार्यं च कारणं चापि नारद ।
अहं हि जीवसंज्ञो वै मयि जीवः समाहितः ।
मैवं ते बुद्धिरत्राभूद्दृष्टो जीवो मयेति च ॥ ४५
अहं सर्वत्रगो ब्रह्मन्भूतग्रामान्तरात्मकः ।
भूतग्रामशरीरेषु नश्यत्सु न नशाम्यहम् ॥ ४६
हिरण्यगर्भो लोकादिश्चतुर्वक्त्रो निरुक्तगः ।
ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः ॥ ४७
पश्यैकादश मे रुद्रान्दक्षिणं पार्श्वमास्थितान् ।
द्वादशैव तथादित्यान्वामं पार्श्वं समास्थितान् ॥४८
अग्रतश्चैव मे पश्य वसूनष्टौ सुरोत्तमान् ।
नासत्यं चैव दस्रं च भिषजौ पश्य पृष्ठतः ॥ ४९
सर्वान्प्रजापतीन्पश्य पश्य सप्त ऋषीनपि ।
वेदान्यज्ञांश्च शतशः पश्यामृतमथौषधीः ॥ ५०
तपांसि नियमांश्चैव यमानपि पृथग्विधान् ।
तथाष्टगुणमैश्वर्यमेकस्थं पश्य मूर्तिमत् ॥ ५१
श्रियं लक्ष्मीं च कीर्तिं च पृथिवीं च ककुद्मिनीम् ।
वेदानां मातरं पश्य मत्स्थां देवीं सरस्वतीम् ॥५२
ध्रुवं च ज्योतिषां श्रेष्ठं पश्य नारद खेचरम् ।
अम्भोधरान्समुद्रांश्च सरांसि सरितस्तथा ॥ ५३
मूर्तिमन्तः पितृगणांश्चतुरः पश्य सत्तम ।
त्रींश्चैवेमान्गुणान्पश्य मत्स्थान्मूर्तिविवर्जितान् ॥५४
देवकार्यादपि मुने पितृकार्यं विशिष्यते ।
देवानां च पितॄणां च पिता ह्येकोऽहमादितः ॥५५
अहं हयशिरो भूत्वा समुद्रे पश्चिमोत्तरे ।
पिबामि सुहुतं हव्यं कव्यं च श्रद्धयान्वितम् ॥५६
मया सृष्टः पुरा ब्रह्मा मद्यज्ञमयजत्स्वयम् ।
ततस्तस्मै वरान्प्रीतो ददावहमनुत्तमान् ॥ ५७
मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव च ।
अहंकारकृतं चैव नाम पर्यायवाचकम् ॥ ५८
त्वया कृतां च मर्यादां नातिक्राम्यति कश्चन ।
त्वं चैव वरदो ब्रह्मन्वरेप्सूनां भविष्यसि ॥ ५९
सुरासुरगणानां च ऋषीणां च तपोधन ।
पितॄणां च महाभाग सततं संशितव्रत ।
विविधानां च भूतानां त्वमुपास्यो भविष्यसि ॥६०
प्रादुर्भावगतश्चाहं सुरकार्येषु नित्यदा ।
अनुशास्यस्त्वया ब्रह्मन्नियोज्यश्च सुतो यथा ॥ ६१
एतांश्चान्यांश्च रुचिरान्ब्रह्मणेऽमिततेजसे ।
अहं दत्त्वा वरान्प्रीतो निवृत्तिपरमोऽभवम् ॥ ६२
निर्वाणं सर्वधर्माणां निवृत्तिः परमा स्मृता ।
तस्मान्निवृत्तिमापन्नश्चरेत्सर्वाङ्गनिर्वृतः ॥ ६३
विद्यासहायवन्तं मामादित्यस्थं सनातनम् ।

कपिलं प्राहुराचार्याः सांख्यनिश्चितनिश्चयाः ॥ ६४
हिरण्यगर्भो भगवानेष छन्दसि सुष्टुतः ।
सोऽहं योगगतिर्ब्रह्मन्योगशास्त्रेषु शब्दितः ॥ ६५
एषोऽहं व्यक्तिमागम्य तिष्ठामि दिवि शाश्वतः ।
ततो युगसहस्रान्ते संहरिष्ये जगत्पुनः ।
कृत्वात्मस्थानि भूतानि स्थावराणि चराणि च ॥६६
एकाकी विद्यया सार्धं विहरिष्ये द्विजोत्तम ।
ततो भूयो जगत्सर्वं करिष्यामीह विद्यया ॥ ६७
अस्मन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययम् ।
स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोऽप्यजीजनत् ॥
प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुनः पुनः ।
अनिरुद्धात्तथा ब्रह्मा तत्रादिकमलोद्भवः ॥ ६९
ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ।
एतां सृष्टिं विजानीहि कल्पादिषु पुनः पुनः ॥७०
यथा सूर्यस्य गगनादुदयास्तमयाविह ।
नष्टौ पुनर्बलात्काल आनयत्यमितद्युतिः ।
तथा बलादहं पृथ्वीं सर्वभूतहिताय वै ॥ ७१
सत्त्वैराक्रान्तसर्वाङ्गां नष्टां सागरमेखलाम् ।
आनयिष्यामि स्वं स्थानं वाराहं रूपमास्थितः ॥७२
हिरण्याक्षं हनिष्यामि दैतेयं बलगर्वितम् ।
नारसिंहं वपुः कृत्वा हिरण्यकशिपुं पुनः ।
सुरकार्ये हनिष्यामि यज्ञघ्नं दितिनन्दनम् ॥ ७३
विरोचनस्य बलवान्बलिः पुत्रो महासुरः ।
भविष्यति स शक्रं च स्वराज्याच्च्यावयिष्यति ॥
त्रैलोक्येऽपहृते तेन विमुखे च शचीपतौ ।
अदित्यां द्वादशः पुत्रः संभविष्यामि कश्यपात् ॥
ततो राज्यं प्रदास्यामि शक्रायामिततेजसे ।
देवताः स्थापयिष्यामि स्वेषु स्थानेषु नारद ।
बलिं चैव करिष्यामि पातालतलवासिनम् ॥ ७६
त्रेतायुगे भविष्यामि रामो भृगुकुलोद्वहः ।
क्षत्रं चोत्सादयिष्यामि समृद्धबलवाहनम् ॥ ७७
संधौ तु समनुप्राप्ते त्रेतायां द्वापरस्य च ।
रामो दाशरथिर्भूत्वा भविष्यामि जगत्पतिः ॥ ७८
त्रितोपघाताद्वैरूप्यमेकतोऽथ द्वितस्तथा ।
प्राप्स्यतो वानरत्वं हि प्रजापतिसुतावृषी ॥ ७९
तयोर्ये त्वन्वये जाता भविष्यन्ति वनौकसः ।
ते सहाया भविष्यन्ति सुरकार्ये मम द्विज ॥ ८०
ततो रक्षःपतिं घोरं पुलस्त्यकुलपांसनम् ।
हनिष्ये रावणं संख्ये सगणं लोककण्टकम् ॥ ८१
द्वापरस्य कलेश्चैव संधौ पर्यवसानिके ।
प्रादुर्भावः कंसहेतोर्मथुरायां भविष्यति ॥ ८२
तत्राहं दानवान्हत्वा सुबहून्देवकण्टकान् ।
कुशस्थलीं करिष्यामि निवासं द्वारकां पुरीम् ॥ ८३
वसानस्तत्र वै पुर्यामदितेर्विप्रियंकरम् ।
हनिष्ये नरकं भौमं मुरं पीठं च दानवम् ॥ ८४
प्राग्ज्योतिषपुरं रम्यं नानाधनसमन्वितम् ।
कुशस्थलीं नयिष्यामि हत्वा वै दानवोत्तमान् ॥८५
शंकरं च महासेनं बाणप्रियहितैषिणम् ।
पराजेष्याम्यथोद्युक्तौ देवलोकनमस्कृतौ ॥ ८६
ततः सुतं बलेर्जित्वा बाणं बाहुसहस्रिणम् ।
विनाशयिष्यामि ततः सर्वान्सौभनिवासिनः ॥८७
यः कालयवनः ख्यातो गर्गतेजोभिसंवृतः ।
भविष्यति वधस्तस्य मत्त एव द्विजोत्तम ॥ ८८
जरासंधश्च बलवान्सर्वराजविरोधकः ।
भविष्यत्यसुरः स्फीतो भूमिपालो गिरिव्रजे ।
मम बुद्धिपरिस्पन्दाद्वधस्तस्य भविष्यति ॥ ८९
समागतेषु बलिषु पृथिव्यां सर्वराजसु ।
वासविः सुसहायो वै मम ह्येको भविष्यति ॥९०
एवं लोका वदिष्यन्ति नरनारायणावृषी ।
उद्युक्तौ दहतः क्षत्रं लोककार्यार्थमीश्वरौ ॥ ९१

कृत्वा भारावतरणं वसुधाया यथेप्सितम् ।
सर्वसात्वतमुख्यानां द्वारकायाश्च सत्तम ।
करिष्ये प्रलयं घोरमात्मज्ञातिविनाशनम् ॥ ९२
कर्माण्यपरिमेयानि चतुर्मूर्तिधरो ह्यहम् ।
कृत्वा लोकान्गमिष्यामि स्वानहं ब्रह्मसत्कृतान् ॥
हंसो हयशिराश्चैव प्रादुर्भावा द्विजोत्तम ।
यदा वेदश्रुतिर्नष्टा मया प्रत्याहृता तदा ।
सवेदाः सश्रुतीकाश्च कृताः पूर्वं कृते युगे ॥ ९४
अतिक्रान्ताः पुराणेषु श्रुतास्ते यदि वा क्वचित् ।
अतिक्रान्ताश्च बहवः प्रादुर्भावा ममोत्तमाः ।
लोककार्याणि कृत्वा च पुनः स्वां प्रकृतिं गताः ॥
न ह्येतद्ब्रह्मणा प्राप्तमीदृशं मम दर्शनम् ।
यत्त्वया प्राप्तमद्येह एकान्तगतबुद्धिना ॥ ९६
एतत्ते सर्वमाख्यातं ब्रह्मन्भक्तिमतो मया ।
पुराणं च भविष्यं च सरहस्यं च सत्तम ॥ ९७
एवं स भगवान्देवो विश्वमूर्तिधरोऽव्ययः ।
एतावदुक्त्वा वचनं तत्रैवान्तरधीयत ॥ ९८
नारदोऽपि महातेजाः प्राप्यानुग्रहमीप्सितम् ।
नरनारायणौ द्रष्टुं प्राद्रवद्बदराश्रमम् ॥ ९९
इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
सांख्ययोगकृतं तेन पञ्चरात्रानुशब्दितम् ॥ १००
नारायणमुखोद्गीतं नारदोऽश्रावयत्पुनः ।
ब्रह्मणः सदने तात यथा दृष्टं यथा श्रुतम् ॥ १०१

युधिष्ठिर उवाच ।

एतदाश्चर्यभूतं हि माहात्म्यं तस्य धीमतः ।
किं ब्रह्मा न विजानीते यतः शुश्राव नारदात् ॥
पितामहो हि भगवांस्तस्माद्देवादनन्तरः ।
कथं स न विजानीयात्प्रभावममितौजसः ॥ १०३

भीष्म उवाच ।

महाकल्पसहस्राणि महाकल्पशतानि च ।
समतीतानि राजेन्द्र सर्गाश्च प्रलयाश्च ह ॥ १०४
सर्गस्यादौ स्मृतो ब्रह्मा प्रजासर्गकरः प्रभुः ।
जानाति देवप्रवरं भूयश्चातोऽधिकं नृप ।
परमात्मानमीशानमात्मनः प्रभवं तथा ॥ १०५
ये त्वन्ये ब्रह्मसदने सिद्धसंघाः समागताः ।
तेभ्यस्तच्छ्रावयामास पुराणं वेदसंमितम् ॥ १०६
तेषां सकाशात्सूर्यश्च श्रुत्वा वै भावितात्मनाम् ।
आत्मानुगामिनां ब्रह्म श्रावयामास भारत ॥ १०७
षट्षष्टिर्हि सहस्राणि ऋषीणां भावितात्मनाम् ।
सूर्यस्य तपतो लोकान्निर्मिता ये पुरःसराः ।
तेषामकथयत्सूर्यः सर्वेषां भावितात्मनाम् ॥ १०८
सूर्यानुगामिभिस्तात ऋषिभिस्तैर्महात्मभिः ।
मेरौ समागता देवाः श्राविताश्चेदमुत्तमम् ॥ १०९
देवानां तु सकाशाद्वै ततः श्रुत्वासितो द्विजः ।
श्रावयामास राजेन्द्र पितॄणां मुनिसत्तमः ॥ ११०
मम चापि पिता तात कथयामास शंतनुः ।
ततो मयैतच्छ्रुत्वा च कीर्तितं तव भारत ॥ १११
सुरैर्वा मुनिभिर्वापि पुराणं यैरिदं श्रुतम् ।
सर्वे ते परमात्मानं पूजयन्ति पुनः पुनः ॥ ११२
इदमाख्यानमार्षेयं पारंपर्यागतं नृप ।
नावासुदेवभक्ताय त्वया देयं कथंचन ॥ ११३
मत्तोऽन्यानि च ते राजन्नुपाख्यानशतानि वै ।
यानि श्रुतानि धर्म्याणि तेषां सारोऽयमुद्धृतः ॥
सुरासुरैर्यथा राजन्निर्मथ्यामृतमुद्धृतम् ।
एवमेतत्पुरा विप्रैः कथामृतमिहोद्धृतम् ॥ ११५
यश्चेदं पठते नित्यं यश्चेदं शृणुयान्नरः ।
एकान्तभावोपगत एकान्ते सुसमाहितः ॥ ११६
प्राप्य श्वेतं महाद्वीपं भूत्वा चन्द्रप्रभो नरः ।
स सहस्रार्चिषं देवं प्रविशेन्नात्र संशयः ॥ ११७
मुच्येदार्तस्तथा रोगाच्छ्रुत्वेमामादितः कथाम् ।

जिज्ञासुर्लभते कामान्भक्तो भक्तगतिं व्रजेत् ॥११८
त्वयापि सततं राजन्नभ्यर्च्यः पुरुषोत्तमः ।
स हि माता पिता चैव कृत्स्नस्य जगतो गुरुः ॥
ब्रह्मण्यदेवो भगवान्प्रीयतां ते सनातनः ।
युधिष्ठिर महाबाहो महाबाहुर्जनार्दनः ॥ १२०

वैशंपायन उवाच ।

श्रुत्वैतदाख्यानवरं धर्मराड्जनमेजय ।
भ्रातरश्चास्य ते सर्वे नारायणपराभवन् ॥ १२१
जितं भगवता तेन पुरुषेणेति भारत ।
नित्यं जप्यपरा भूत्वा सरस्वतीमुदीरयन् ॥ १२२
यो ह्यस्माकं गुरुः श्रेष्ठः कृष्णद्वैपायनो मुनिः ।
स जगौ परमं जप्यं नारायणमुदीरयन् ॥ १२३
गत्वान्तरिक्षात्सततं क्षीरोदममृताशयम् ।
पूजयित्वा च देवेशं पुनरायात्स्वमाश्रमम् ॥ १२४

इति श्रीमहाभारते शान्तिपर्वणि
षड्विंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२६ ॥

३२७

जनमेजय उवाच ।

कथं स भगवान्देवो यज्ञेष्वग्रहरः प्रभुः ।
यज्ञधारी च सततं वेदवेदाङ्गवित्तथा ॥ १
निवृत्तं चास्थितो धर्मं क्षेमी भागवतप्रियः ।
प्रवृत्तिधर्मान्विदधे स एव भगवान्प्रभुः ॥ २
कथं प्रवृत्तिधर्मेषु भागार्हा देवताः कृताः ।
कथं निवृत्तिधर्माश्च कृता व्यावृत्तबुद्धयः ॥ ३
एतं नः संशयं विप्र छिन्धि गुह्यं सनातनम् ।
त्वया नारायणकथा श्रुता वै धर्मसंहिता ॥ ४
इमे सब्रह्मका लोकाः ससुरासुरमानवाः ।
क्रियास्वभ्युदयोक्तासु सक्ता दृश्यन्ति सर्वशः ।
मोक्षश्चोक्तस्त्वया ब्रह्मन्निर्वाणं परमं सुखम् ॥ ५
ये च मुक्ता भवन्तीह पुण्यपापविवर्जिताः ।
ते सहस्रार्चिषं देवं प्रविशन्तीति शुश्रुमः ॥ ६
अहो हि दुरनुष्ठेयो मोक्षधर्मः सनातनः ।
यं हित्वा देवताः सर्वा हव्यकव्यभुजोऽभवन् ॥ ७
किं नु ब्रह्मा च रुद्रश्च शक्रश्च बलभित्प्रभुः ।
सूर्यस्ताराधिपो वायुरग्निर्वरुण एव च ।
आकाशं जगती चैव ये च शेषा दिवौकसः ॥ ८
प्रलयं न विजानन्ति आत्मनः परिनिर्मितम् ।
ततस्ते नास्थिता मार्गं ध्रुवमक्षयमव्ययम् ॥ ९
स्मृत्वा कालपरीमाणं प्रवृत्तिं ये समास्थिताः ।
दोषः कालपरीमाणे महानेष क्रियावताम् ॥ १०
एतन्मे संशयं विप्र हृदि शल्यमिवार्पितम् ।
छिन्धीतिहासकथनात्परं कौतूहलं हि मे ॥ ११
कथं भागहराः प्रोक्ता देवताः क्रतुषु द्विज ।
किमर्थं चाध्वरे ब्रह्मन्निज्यन्ते त्रिदिवौकसः ॥ १२
ये च भागं प्रगृह्णन्ति यज्ञेषु द्विजसत्तम ।
ते यजन्तो महायज्ञैः कस्य भागं ददन्ति वै ॥१३

वैशंपायन उवाच ।

अहो गूढतमः प्रश्नस्त्वया पृष्टो जनेश्वर ।
नातप्ततपसा ह्येष नावेदविदुषा तथा ।
नापुराणविदा चापि शक्यो व्याहर्तुमञ्जसा ॥ १४
हन्त ते कथयिष्यामि यन्मे पृष्टः पुरा गुरुः ।
कृष्णद्वैपायनो व्यासो वेदव्यासो महानृषिः ॥१५
सुमन्तुर्जैमिनिश्चैव पैलश्च सुदृढव्रतः ।
अहं चतुर्थः शिष्यो वै पञ्चमश्च शुकः स्मृतः ॥१६
एतान्समागतान्सर्वान्पञ्च शिष्यान्दमान्वितान् ।
शौचाचारसमायुक्ताञ्जितक्रोधाञ्जितेन्द्रियान् ॥ १७
वेदानध्यापयामास महाभारतपञ्चमान् ।
मेरौ गिरिवरे रम्ये सिद्धचारणसेविते ॥ १८
तेषामभ्यस्यतां वेदान्कदाचित्संशयोऽभवत् ।
एष वै यस्त्वया पृष्टस्तेन तेषां प्रकीर्तितः ।

ततः श्रुतो मया चापि तत्राख्येयोऽद्य भारत ॥१९
शिष्याणां वचनं श्रुत्वा सर्वाज्ञानतमोनुदः ।
पराशरसुतः श्रीमान्व्यासो वाक्यमुवाच ह ॥ २०
मया हि सुमहत्तप्तं तपः परमदारुणम् ।
भूतं भव्यं भविष्यच्च जानीयामिति सत्तमाः ॥
तस्य मे तप्ततपसो निगृहीतेन्द्रियस्य च ।
नारायणप्रसादेन क्षीरोदस्यानुकूलतः ॥ २२
त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं यथेप्सितम् ।
तच्छृणुध्वं यथाज्ञानं वक्ष्ये संशयमुत्तमम् ।
यथा वृत्तं हि कल्पादौ दृष्टं मे ज्ञानचक्षुषा ॥ २३
परमात्मेति यं प्राहुः सांख्ययोगविदो जनाः ।
महापुरुषसंज्ञां स लभते स्वेन कर्मणा ॥ २४
तस्मात्प्रसूतमव्यक्तं प्रधानं तद्विदुर्बुधाः ।
अव्यक्ताद्व्यक्तमुत्पन्नं लोकसृष्ट्यर्थमीश्वरात् ॥ २५
अनिरुद्धो हि लोकेषु महानात्मेति कथ्यते ।
योऽसौ व्यक्तत्वमापन्नो निर्ममे च पितामहम् ।
सोऽहंकार इति प्रोक्तः सर्वतेजोमयो हि सः ॥२६
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
अहंकारप्रसूतानि महाभूतानि भारत ॥ २७
महाभूतानि सृष्ट्वाथ तद्गुणान्निर्ममे पुनः ।
भूतेभ्यश्चैव निष्पन्ना मूर्तिमन्तोऽष्ट ताञ्शृणु ॥२८
मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्च महात्मा वै मनुः स्वायंभुवस्तथा ।
ज्ञेयाः प्रकृतयोऽष्टौ ता यासु लोकाः प्रतिष्ठिताः ॥
वेदान्वेदाङ्गसंयुक्तान्यज्ञान्यज्ञाङ्गसंयुतान् ।
निर्ममे लोकसिद्ध्यर्थं ब्रह्मा लोकपितामहः ।
अष्टाभ्यः प्रकृतिभ्यश्च जातं विश्वमिदं जगत् ॥३०
रुद्रो रोषात्मको जातो दशान्यान्सोऽसृजत्स्वयम् ।
एकादशैते रुद्रास्तु विकाराः पुरुषाः स्मृताः ॥ ३१
ते रुद्राः प्रकृतिश्चैव सर्वे चैव सुरर्षयः ।
उत्पन्ना लोकसिद्ध्यर्थं ब्रह्माणं समुपस्थिताः ॥ ३२
वयं हि सृष्टा भगवंस्त्वया वै प्रभविष्णुना ।
येन यस्मिन्नधीकारे वर्तितव्यं पितामह ॥ ३३
योऽसौ त्वया विनिर्दिष्टो अधिकारोऽर्थचिन्तकः ।
परिपाल्यः कथं तेन सोऽधिकारोऽधिकारिणा ॥३४
प्रदिशस्व बलं तस्य योऽधिकारार्थचिन्तकः ।
एवमुक्तो महादेवो देवांस्तानिदमब्रवीत् ॥ ३५
साध्वहं ज्ञापितो देवा युष्माभिर्भद्रमस्तु वः ।
ममाप्येषा समुत्पन्ना चिन्ता या भवतां मता ॥३६
लोकतन्त्रस्य कृत्स्नस्य कथं कार्यः परिग्रहः ।
कथं बलक्षयो न स्याद्युष्माकं ह्यात्मनश्च मे ॥ ३७
इतः सर्वेऽपि गच्छामः शरणं लोकसाक्षिणम् ।
महापुरुषमव्यक्तं स नो वक्ष्यति यद्धितम् ॥ ३८
ततस्ते ब्रह्मणा सार्धमृषयो विबुधास्तथा ।
क्षीरोदस्योत्तरं कूलं जग्मुर्लोकहितार्थिनः ॥ ३९
ते तपः समुपातिष्ठन्ब्रह्मोक्तं वेदकल्पितम् ।
स महानियमो नाम तपश्चर्या सुदारुणा ॥ ४०
ऊर्ध्वं दृष्टिर्बाहवश्च एकाग्रं च मनोऽभवत् ।
एकपादस्थिताः सम्यक्काष्ठभूताः समाहिताः ॥ ४१
दिव्यं वर्षसहस्रं ते तपस्तप्त्वा तदुत्तमम् ।
शुश्रुवुर्मधुरां वाणीं वेदवेदाङ्गभूषिताम् ॥ ४२
भो भोः सब्रह्मका देवा ऋषयश्च तपोधनाः ।
स्वागतेनार्च्य वः सर्वाञ्श्रावये वाक्यमुत्तमम् ॥
विज्ञातं वो मया कार्यं तच्च लोकहितं महत् ।
प्रवृत्तियुक्तं कर्तव्यं युष्मत्प्राणोपबृंहणम् ॥ ४४
सुतप्तं वस्तपो देवा ममाराधनकाम्यया ।
भोक्ष्यथास्य महासत्त्वास्तपसः फलमुत्तमम् ॥ ४५
एष ब्रह्मा लोकगुरुः सर्वलोकपितामहः ।
यूयं च विबुधश्रेष्ठा मां यजध्वं समाहिताः ॥ ४६
सर्वे भागान्कल्पयध्वं यज्ञेषु मम नित्यशः ।

तथा श्रेयो विधास्यामि यथाधीकारमीश्वराः ॥ ४७
श्रुत्वैतद्देवदेवस्य वाक्यं हृष्टतनूरुहाः ।
ततस्ते विबुधाः सर्वे ब्रह्मा ते च महर्षयः ॥ ४८
वेददृष्टेन विधिना वैष्णवं क्रतुमाहरन् ।
तस्मिन्सत्रे तदा ब्रह्मा स्वयं भागमकल्पयत् ।
देवा देवर्षयश्चैव सर्वे भागानकल्पयन् ॥ ४९
ते कार्तयुगधर्माणो भागाः परमसत्कृताः ।
प्रापुरादित्यवर्णं तं पुरुषं तमसः परम् ।
बृहन्तं सर्वगं देवमीशानं वरदं प्रभुम् ॥ ५०
ततोऽथ वरदो देवस्तान्सर्वानमरान्स्थितान् ।
अशरीरो बभाषेदं वाक्यं खस्थो महेश्वरः ॥ ५१
येन यः कल्पितो भागः स तथा समुपागतः ।
प्रीतोऽहं प्रदिशाम्यद्य फलमावृत्तिलक्षणम् ॥ ५२
एतद्वो लक्षणं देवा मत्प्रसादसमुद्भवम् ।
यूयं यज्ञैरिज्यमानाः समाप्तवरदक्षिणैः ।
युगे युगे भविष्यध्वं प्रवृत्तिफलभोगिनः ॥ ५३
यज्ञैर्ये चापि यक्ष्यन्ति सर्वलोकेषु वै सुराः ।
कल्पयिष्यन्ति वो भागांस्ते नरा वेदकल्पितान् ॥
यो मे यथा कल्पितवान्भागमस्मिन्महाक्रतौ ।
स तथा यज्ञभागार्हो वेदसूत्रे मया कृतः ॥ ५५
यूयं लोकान्धारयध्वं यज्ञभागफलोदिताः ।
सर्वार्थचिन्तका लोके यथाधीकारनिर्मिताः ॥ ५६
याः क्रियाः प्रचरिष्यन्ति प्रवृत्तिफलसत्कृताः ।
ताभिराप्यायितबला लोकान्वै धारयिष्यथ ॥ ५७
यूयं हि भाविता लोके सर्वयज्ञेषु मानवैः ।
मां ततो भावयिष्यध्वमेषा वो भावना मम ॥ ५८
इत्यर्थं निर्मिता वेदा यज्ञाश्चौषधिभिः सह ।
एभिः सम्यक्प्रयुक्तैर्हि प्रीयन्ते देवताः क्षितौ ॥ ५९
निर्माणमेतद्युष्माकं प्रवृत्तिगुणकल्पितम् ।
मया कृतं सुरश्रेष्ठा यावत्कल्पक्षयादिति ।
चिन्तयध्वं लोकहितं यथाधीकारमीश्वराः ॥ ६०
मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठ इति सप्तैते मानसा निर्मिता हि वै ॥ ६१
एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः ।
प्रवृत्तिधर्मिणश्चैव प्राजापत्येन कल्पिताः ॥ ६२
अयं क्रियावतां पन्था व्यक्तीभूतः सनातनः ।
अनिरुद्ध इति प्रोक्तो लोकसर्गकरः प्रभुः ॥ ६३
सनः सनत्सुजातश्च सनकः ससनन्दनः ।
सनत्कुमारः कपिलः सप्तमश्च सनातनः ॥ ६४
सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः सुताः ।
स्वयमागतविज्ञाना निवृत्तं धर्ममास्थिताः ॥ ६५
एते योगविदो मुख्याः सांख्यधर्मविदस्तथा ।
आचार्या मोक्षशास्त्रे च मोक्षधर्मप्रवर्तकाः ॥ ६६
यतोऽहं प्रसृतः पूर्वमव्यक्तात्त्रिगुणो महान् ।
तस्मात्परतरो योऽसौ क्षेत्रज्ञ इति कल्पितः ।
सोऽहं क्रियावतां पन्थाः पुनरावृत्तिदुर्लभः ॥ ६७
यो यथा निर्मितो जन्तुर्यस्मिन्यस्मिंश्च कर्मणि ।
प्रवृत्तौ वा निवृत्तौ वा तत्फलं सोऽश्नुतेऽवशः ॥ ६८
एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः ।
एष माता पिता चैव युष्माकं च पितामहः ।
मयानुशिष्टो भविता सर्वभूतवरप्रदः ॥ ६९
अस्य चैवानुजो रुद्रो ललाटाद्यः समुत्थितः ।
ब्रह्मानुशिष्टो भविता सर्वत्रसवरप्रदः ॥ ७०
गच्छध्वं स्वानधीकारांश्चिन्तयध्वं यथाविधि ।
प्रवर्तन्तां क्रियाः सर्वाः सर्वलोकेषु माचिरम् ॥ ७१
प्रदृश्यन्तां च कर्माणि प्राणिनां गतयस्तथा ।
परिनिर्मितकालानि आयूंषि च सुरोत्तमाः ॥ ७२
इदं कृतयुगं नाम कालः श्रेष्ठः प्रवर्तते ।
अहिंस्या यज्ञपशवो युगेऽस्मिन्नैतदन्यथा ।
चतुष्पात्सकलो धर्मो भविष्यत्यत्र वै सुराः ॥ ७३

ततस्त्रेतायुगं नाम त्रयी यत्र भविष्यति ।
प्रोक्षिता यत्र पशवो वधं प्राप्स्यन्ति वै मखे ।
तत्र पादचतुर्थो वै धर्मस्य न भविष्यति ॥ ७४
ततो वै द्वापरं नाम मिश्रः कालो भविष्यति ।
द्विपादहीनो धर्मश्च युगे तस्मिन्भविष्यति ॥ ७५
ततस्तिष्येऽथ संप्राप्ते युगे कलिपुरस्कृते ।
एकपादस्थितो धर्मो यत्र तत्र भविष्यति ॥ ७६

देवा ऊचुः ।

एकपादस्थिते धर्मे यत्रक्वचनगामिनि ।
कथं कर्तव्यमस्माभिर्भगवंस्तद्वदस्व नः ॥ ७७

श्रीभगवानुवाच ।

यत्र वेदाश्च यज्ञाश्च तपः सत्यं दमस्तथा ।
अहिंसाधर्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः ।
स वै देशः सेवितव्यो मा वोऽधर्मः पदा स्पृशेत् ॥

व्यास उवाच ।

तेऽनुशिष्टा भगवता देवाः सर्षिगणास्तथा ।
नमस्कृत्वा भगवते जग्मुर्देशान्यथेप्सितान् ॥ ७९
गतेषु त्रिदिवौकःसु ब्रह्मैकः पर्यवस्थितः ।
दिदृक्षुर्भगवन्तं तमनिरुद्धतनौ स्थितम् ॥ ८०
तं देवो दर्शयामास कृत्वा हयशिरो महत् ।
साङ्गानावर्तयन्वेदान्कमण्डलुगणित्रभृत् ॥ ८१
ततोऽश्वशिरसं दृष्ट्वा तं देवममितौजसम् ।
लोककर्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया ॥ ८२
मूर्ध्ना प्रणम्य वरदं तस्थौ प्राञ्जलिरग्रतः ।
स परिष्वज्य देवेन वचनं श्रावितस्तदा ॥ ८३
लोककार्यगतीः सर्वास्त्वं चिन्तय यथाविधि ।
धाता त्वं सर्वभूतानां त्वं प्रभुर्जगतो गुरुः ।
त्वय्यावेशितभारोऽहं धृतिं प्राप्स्याम्यथाञ्जसा ॥
यदा च सुरकार्यं ते अविषह्यं भविष्यति ।
प्रादुर्भावं गमिष्यामि तदात्मज्ञानदेशिकः ॥ ८५

एवमुक्त्वा हयशिरास्तत्रैवान्तरधीयत ।
तेनानुशिष्टो ब्रह्मापि स्वं लोकमचिराद्गतः ॥ ८६
एवमेष महाभागः पद्मनाभः सनातनः ।
यज्ञेष्वग्रहरः प्रोक्तो यज्ञधारी च नित्यदा ॥ ८७
निवृत्तिं चास्थितो धर्मं गतिमक्षयधर्मिणाम् ।
प्रवृत्तिधर्मान्विदधे कृत्वा लोकस्य चित्रताम् ॥ ८८

स आदिः स मध्यः स चान्तः प्रजानां
स धाता स धेयः स कर्ता स कार्यम् ।
युगान्ते स सुप्तः सुसंक्षिप्य लोका-
न्युगादौ प्रबुद्धो जगद्ध्युत्ससर्ज ॥ ८९

तस्मै नमध्वं देवाय निर्गुणाय गुणात्मने ।
अजाय विश्वरूपाय धाम्ने सर्वदिवौकसाम् ॥९०
महाभूताधिपतये रुद्राणां पतये तथा ।
आदित्यपतये चैव वसूनां पतये तथा ॥ ९१
अश्विभ्यां पतये चैव मरुतां पतये तथा ।
वेदयज्ञाधिपतये वेदाङ्गपतयेऽपि च ॥ ९२
समुद्रवासिने नित्यं हरये मुञ्जकेशिने ।
शान्तये सर्वभूतानां मोक्षधर्मानुभाषिणे ॥ ९३
तपसां तेजसां चैव पतये यशसोऽपि च ।
वाचश्च पतये नित्यं सरितां पतये तथा ॥ ९४
कपर्दिने वराहाय एकशृङ्गाय धीमते ।
विवस्वतेऽश्वशिरसे चतुर्मूर्तिधृते सदा ॥ ९५
गुह्याय ज्ञानदृश्याय अक्षराय क्षराय च ।
एष देवः संचरति सर्वत्रगतिरव्ययः ॥ ९६
एवमेतत्पुरा दृष्टं मया वै ज्ञानचक्षुषा ।
कथितं तच्च वः सर्वं मया पृष्टेन तत्त्वतः ॥ ९७
क्रियतां मद्वचः शिष्याः सेव्यतां हरिरीश्वरः ।
गीयतां वेदशब्दैश्च पूज्यतां च यथाविधि ॥ ९८

वैशंपायन उवाच ।

इत्युक्तास्तु वयं तेन वेदव्यासेन धीमता ।

सर्वे शिष्याः सुतश्चास्य शुकः परमधर्मवित् ॥ ९९
स चास्माकमुपाध्यायः सहास्माभिर्विशां पते ।
चतुर्वेदोद्गताभिश्च ऋग्भिस्तमभितुष्टुवे ॥ १००
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
एवं मेऽकथयद्राजन्पुरा द्वैपायनो गुरुः ॥ १०१
यश्चेदं शृणुयान्नित्यं यश्चेदं परिकीर्तयेत् ।
नमो भगवते कृत्वा समाहितमना नरः ॥ १०२
भवत्यरोगो द्युतिमान्बलरूपसमन्वितः ।
आतुरो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥
कामकामी लभेत्कामं दीर्घमायुरवाप्नुयात् ।
ब्राह्मणः सर्ववेदी स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो विपुललाभः स्याच्छूद्रः सुखमवाप्नुयात् ॥
अपुत्रो लभते पुत्रं कन्या चैवेप्सितं पतिम् ।
लग्नगर्भा विमुच्येत गर्भिणी जनयेत्सुतम् ।
वन्ध्या प्रसवमाप्नोति पुत्रपौत्रसमृद्धिमत् ॥ १०५
क्षेमेण गच्छेदध्वानमिदं यः पठते पथि ।
यो यं कामं कामयते स तमाप्नोति च ध्रुवम् ॥

इदं महर्षेर्वचनं विनिश्चितं
महात्मनः पुरुषवरस्य कीर्तनम् ।
समागमं चर्षिदिवौकसामिमं
निशम्य भक्ताः सुसुखं लभन्ते ॥ १०७

इति श्रीमहाभारते शान्तिपर्वणि
सप्तविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२७ ॥

३२८

जनमेजय उवाच ।

अस्तौषीद्यैरिमं व्यासः सशिष्यो मधुसूदनम् ।
नामभिर्विविधैरेषां निरुक्तं भगवन्मम ॥ १
वक्तुमर्हसि शुश्रूषोः प्रजापतिपतेर्हरेः ।
श्रुत्वा भवेयं यत्पूतः शरच्चन्द्र इवामलः ॥ २

वैशंपायन उवाच ।

शृणु राजन्यथाचष्ट फल्गुनस्य हरिर्विभुः ।
प्रसन्नात्मात्मनो नाम्नां निरुक्तं गुणकर्मजम् ॥ ३
नामभिः कीर्तितैस्तस्य केशवस्य महात्मनः ।
पृष्टवान्केशवं राजन्फल्गुनः परवीरहा ॥ ४

अर्जुन उवाच ।

भगवन्भूतभव्येश सर्वभूतसृगव्यय ।
लोकधाम जगन्नाथ लोकानामभयप्रद ॥ ५
यानि नामानि ते देव कीर्तितानि महर्षिभिः ।
वेदेषु सपुराणेषु यानि गुह्यानि कर्मभिः ॥ ६
तेषां निरुक्तं त्वत्तोऽहं श्रोतुमिच्छामि केशव ।
न ह्यन्यो वर्तयेन्नाम्नां निरुक्तं त्वामृते प्रभो ॥ ७

श्रीभगवानुवाच ।

ऋग्वेदे सयजुर्वेदे तथैवाथर्वसामसु ।
पुराणे सोपनिषदे तथैव ज्योतिषेऽर्जुन ॥ ८
सांख्ये च योगशास्त्रे च आयुर्वेदे तथैव च ।
बहूनि मम नामानि कीर्तितानि महर्षिभिः ॥ ९
गौणानि तत्र नामानि कर्मजानि च कानिचित् ।
निरुक्तं कर्मजानां च शृणुष्व प्रयतोऽनघ ।
कथ्यमानं मया तात त्वं हि मेऽर्धं स्मृतः पुरा ॥
नमोऽतियशसे तस्मै देहिनां परमात्मने ।
नारायणाय विश्वाय निर्गुणाय गुणात्मने ॥ ११
यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः ।
योऽसौ योनिर्हि सर्वस्य स्थावरस्य चरस्य च ॥१२
अष्टादशगुणं यत्तत्सत्त्वं सत्त्ववतां वर ।
प्रकृतिः सा परा मह्यं रोदसी योगधारिणी ।
ऋता सत्यामराजय्या लोकानामात्मसंज्ञिता ॥ १३
तस्मात्सर्वाः प्रवर्तन्ते सर्गप्रलयविक्रियाः ।
ततो यज्ञश्च यष्टा च पुराणः पुरुषो विराट् ।

अनिरुद्ध इति प्रोक्तो लोकानां प्रभवाप्ययः ।। १४
ब्राह्मे रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः ।
प्रसादात्प्रादुरभवत्पद्मं पद्मनिभेक्षण ।
तत्र ब्रह्मा समभवत्स तस्यैव प्रसादजः ॥ १५
अह्नः क्षये ललाटाच्च सुतो देवस्य वै तथा ।
क्रोधाविष्टस्य संजज्ञे रुद्रः संहारकारकः ॥ १६
एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ।
तदादेशितपन्थानौ सृष्टिसंहारकारकौ ।
निमित्तमात्रं तावत्र सर्वप्राणिवरप्रदौ ।। १७
कपर्दी जटिलो मुण्डः श्मशानगृहसेवकः ।
उग्रव्रतधरो रुद्रो योगी त्रिपुरदारुणः ।। १८
दक्षक्रतुहरश्चैव भगनेत्रहरस्तथा ।
नारायणात्मको ज्ञेयः पाण्डवेय युगे युगे ॥ १९
तस्मिन्हि पूज्यमाने वै देवदेव महेश्वरे ।
संपूजितो भवेत्पार्थ देवो नारायणः प्रभुः ।। २०
अहमात्मा हि लोकानां विश्वानां पाण्डुनन्दन ।
तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम् ।। २१
यद्यहं नार्चयेयं वै ईशानं वरदं शिवम् ।
आत्मानं नार्चयेत्कश्चिदिति मे भावितं मनः ।
मया प्रमाणं हि कृतं लोकः समनुवर्तते ।। २२
प्रमाणानि हि पूज्यानि ततस्तं पूजयाम्यहम् ।
यस्तं वेत्ति स मां वेत्ति योऽनु तं स हि मामनु ।।
रुद्रो नारायणश्चैव सत्त्वमेकं द्विधाकृतम् ।
लोके चरति कौन्तेय व्यक्तिस्थं सर्वकर्मसु ।। २४
न हि मे केनचिद्देयो वरः पाण्डवनन्दन ।
इति संचिन्त्य मनसा पुराणं विश्वमीश्वरम् ।
पुत्रार्थमाराधितवानात्मानमहमात्मना ।। २५
न हि विष्णुः प्रणमति कस्मैचिद्विबुधाय तु ।
ऋत आत्मानमेवेति ततो रुद्रं भजाम्यहम् ।। २६
सब्रह्मकाः सरुद्राश्च सेन्द्रा देवाः सहर्षिभिः ।
अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम् ।। २७
भविष्यतां वर्ततां च भूतानां चैव भारत ।
सर्वेषामग्रणीर्विष्णुः सेव्यः पूज्यश्च नित्यशः ।।२८
नमस्व हव्यदं विष्णुं तथा शरणदं नम ।
वरदं नमस्व कौन्तेय हव्यकव्यभुजं नम ।। २९
चतुर्विधा मम जना भक्ता एवं हि ते श्रुतम् ।
तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः ।
अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् ।। ३०
ये च शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु श्रेष्ठभाक् ।। ३१
ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः ।
प्रबुद्धवर्याः सेवन्ते मामेवैष्यन्ति यत्परम् ।
भक्तं प्रति विशेषस्ते एष पार्थानुकीर्तितः ।। ३२
त्वं चैवाहं च कौन्तेय नरनारायणौ स्मृतौ ।
भारावतरणार्थं हि प्रविष्टौ मानुषीं तनुम् ।। ३३
जानाम्यध्यात्मयोगांश्च योऽहं यस्माच्च भारत ।
निवृत्तिलक्षणो धर्मस्तथाभ्युदयिकोऽपि च ।। ३४
नराणामयनं ख्यातमहमेकः सनातनः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं मम तत्पूर्वमतो नारायणो ह्यहम् ।। ३५
छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः ।
सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहम् ।। ३६
गतिश्च सर्वभूतानां प्रजानां चापि भारत ।
व्याप्ता मे रोदसी पार्थ कान्तिश्चाभ्यधिका मम ।।
अधिभूतानि चान्तेऽहं तदिच्छंश्चास्मि भारत ।
क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ।। ३८
दमात्सिद्धिं परीप्सन्तो मां जनाः कामयन्ति हि ।
दिवं चोर्वीं च मध्यं च तस्माद्दामोदरो ह्यहम् ।। ३९
पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ।
ममैतानि सदा गर्भे पृश्निगर्भस्ततो ह्यहम् ।। ४०

ऋषयः प्राहुरेवं मां त्रितकूपाभिपातितम् ।
पृश्निगर्भ त्रितं पाहीत्येकतद्वितपातितम् ॥ ४१
ततः स ब्रह्मणः पुत्र आद्यो ऋषिवरस्त्रितः ।
उत्ततारोदपानाद्वै पृश्निगर्भानुकीर्तनात् ॥ ४२
सूर्यस्य तपतो लोकानग्नेः सोमस्य चाप्युत ।
अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः ।
सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः ॥ ४३
स्वपत्न्यामाहितो गर्भ उतथ्येन महात्मना ।
उतथ्येऽन्तर्हिते चैव कदाचिद्देवमायया ।
बृहस्पतिरथाविन्दत्तां पत्नीं तस्य भारत ॥ ४४
ततो वै तमृषिश्रेष्ठं मैथुनोपगतं तथा ।
उवाच गर्भः कौन्तेय पञ्चभूतसमन्वितः ॥ ४५
पूर्वागतोऽहं वरद नार्हस्यम्बां प्रबाधितुम् ।
एतद्बृहस्पतिः श्रुत्वा चुक्रोध च शशाप च ॥ ४६
मैथुनोपगतो यस्मात्त्वयाहं विनिवारितः ।
तस्मादन्धो जास्यसि त्वं मच्छापान्नात्र संशयः ॥
स शापादृषिमुख्यस्य दीर्घं तम उपेयिवान् ।
स हि दीर्घतमा नाम नाम्ना ह्यासीदृषिः पुरा ॥
वेदानवाप्य चतुरः साङ्गोपाङ्गान्सनातनान् ।
प्रयोजयामास तदा नाम गुह्यमिदं मम ॥ ४९
आनुपूर्व्येण विधिना केशवेति पुनः पुनः ।
स चक्षुष्मान्समभवद्गौतमश्चाभवत्पुनः ॥ ५०
एवं हि वरदं नाम केशवेति ममार्जुन ।
देवानामथ सर्वेषामृषीणां च महात्मनाम् ॥ ५१
अग्निः सोमेन संयुक्त एकयोनि मुखं कृतम् ।
अग्नीषोमात्मकं तस्माज्जगत्कृत्स्नं चराचरम् ॥ ५२

अपि हि पुराणे भवति । १ । एकयोन्यात्मकावग्नीषोमौ । २ । देवाश्चाग्निमुखा इति । ३ । एकयोनित्वाच्च परस्परं महयन्तो लोकान्धारयत इति । ४ ॥ ५३

इति श्रीमहाभारते शान्तिपर्वणि
अष्टाविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२८ ॥

३२९

अर्जुन उवाच ।

अग्नीषोमौ कथं पूर्वमेकयोनी प्रवर्तितौ ।
एष मे संशयो जातस्तं छिन्धि मधुसूदन ॥ १

श्रीभगवानुवाच ।

हन्त ते वर्तयिष्यामि पुराणं पाण्डुनन्दन ।
आत्मतेजोद्भवं पार्थ शृणुष्वैकमना मम ॥ २

संप्रक्षालनकालेऽतिक्रान्ते चतुर्थे युगसहस्रान्ते । १ । अव्यक्ते सर्वभूतप्रलये स्थावरजङ्गमे । २ । ज्योतिर्धरणिवायुरहितेऽन्धे तमसि जलैकार्णवे लोके । ३ । तम इत्येवाभिभूतेऽसंज्ञकेऽद्वितीये प्रतिष्ठिते । ४ । नैव रात्र्यां न दिवसे न सति नासति न व्यक्ते नाव्यक्ते व्यवस्थिते । ५ । एतस्यामवस्थायां नारायणगुणाश्रयादक्षयादजरादनिन्द्रियादग्राह्यादसंभवात्सत्यादहिंस्राल्ललामाद्विविधप्रवृत्तिविशेषात् । ६ । अक्षयादजरामरादमूर्तितः सर्वव्यापिनः सर्वकर्तुः शाश्वतात्तमसः पुरुषः प्रादुर्भूतो हरिरव्ययः । ७ ॥ ३

निदर्शनमपि ह्यत्र भवति । १ । नासीदहो न रात्रिरासीत् । २ । न सदासीन्नासदासीत् । ३ । तम एव पुरस्तादभवद्विश्वरूपम् । ४ । सा विश्वस्य जननीत्येवमस्यार्थोऽनुभाष्यते । ५ ॥ ४

तस्येदानीं तमःसंभवस्य पुरुषस्य पद्मयोनेर्ब्रह्मणः प्रादुर्भावे स पुरुषः प्रजाः सिसृक्षमाणो नेत्राभ्यामग्नीषोमौ ससर्ज । १ । ततो भूतसर्गे प्रवृत्ते प्रजाक्रमवशाद्ब्रह्मक्षत्रमुपातिष्ठत् । २ । यः

सोमस्तद्ब्रह्म यद्ब्रह्म ते ब्राह्मणाः । ३ । योऽग्निस्तत्क्षत्रं क्षत्राद्ब्रह्म बलवत्तरम् । ४ । कस्मादिति लोकप्रत्यक्षगुणमेतत्तद्यथा । ५ । ब्राह्मणेभ्यः परं भूतं नोत्पन्नपूर्वम् । ६ । दीप्यमानेऽग्नौ जुहोतीति कृत्वा ब्रवीमि । ७ । भूतसर्गः कृतो ब्रह्मणा भूतानि च प्रतिष्ठाप्य त्रैलोक्यं धार्यत इति । ८ ॥ ५

मन्त्रवादोऽपि हि भवति । १ । त्वमग्ने यज्ञानां होता विश्वेषाम् । २ । हितो देवेभिर्मानुषे जने इति । ३ । निदर्शनं चात्र भवति । ४ । विश्वेषामग्ने यज्ञानां होतेति । ५ । हितो देवैर्मानुषैर्जगत इति । ६ । अग्निर्हि यज्ञानां होता कर्ता । ७ । स चाग्निर्ब्रह्म । ८ ॥ ६

न ह्यृते मन्त्राद्धवनमस्ति । १ । न विना पुरुषं तपः संभवति । २ । हविर्मन्त्राणां संपूजा विद्यते देवमनुष्याणामनेन त्वं होतेति नियुक्तः । ३ । ये च मानुषा होत्राधिकारास्ते च । ४ । ब्राह्मणस्य हि याजनं विधीयते क्षत्रवैश्ययोर्द्विजात्योः । ५ । तस्माद्ब्राह्मणा ह्यग्निभूता यज्ञानुद्वहन्ति । ६ । यज्ञा देवांस्तर्पयन्ति देवाः पृथिवीं भावयन्ति । ७ ॥ ७

शतपथे हि ब्राह्मणं भवति । १ । अग्नौ समिद्धे स जुहोति यो विद्वान्ब्राह्मणमुखे दानाहुतिं जुहोति । २ । एवमप्यग्निभूता ब्राह्मणा विद्वांसोऽग्निं भावयन्ति । ३ । अग्निर्विष्णुः सर्वभूतान्यनुप्रविश्य प्राणान्धारयति । ४ । अपि चात्र सनत्कुमारगीताः श्लोका भवन्ति । ५ ॥ ८

विश्वं ब्रह्मासृजत्पूर्वं सर्वादिर्निरवस्करम् ।
ब्रह्मघोषैर्दिवं तिष्ठन्त्यमरा ब्रह्मयोनयः ॥ ९

ब्राह्मणानां मतिर्वाक्यं कर्म श्रद्धा तपांसि च ।
धारयन्ति महीं द्यां च शैत्याद्वार्यमृतं यथा ॥ १०

नास्ति सत्यात्परो धर्मो नास्ति मातृसमो गुरुः ।
ब्राह्मणेभ्यः परं नास्ति प्रेत्य चेह च भूतये ॥ ११

नैषामुक्षा वर्धते नोत वाहा
न गर्गरो मथ्यते संप्रदाने ।
अपध्वस्ता दस्युभूता भवन्ति
येषां राष्ट्रे ब्राह्मणा वृत्तिहीनाः ॥ १२

वेदपुराणेतिहासप्रामाण्यान्नारायणमुखोद्गताः सर्वात्मानः सर्वकर्तारः सर्वभावनाश्च ब्राह्मणाः । १ । वाक्समकालं हि तस्य देवस्य वरप्रदस्य ब्राह्मणाः प्रथमं प्रादुर्भूता ब्राह्मणेभ्यश्च शेषा वर्णाः प्रादुर्भूताः । २ । इत्थं च सुरासुरविशिष्टा ब्राह्मणा यदा मया ब्रह्मभूतेन पुरा स्वयमेवोत्पादिताः सुरासुरमहर्षयो भूतविशेषाः स्थापिता निगृहीताश्च । ३ ॥ १३

अहल्याधर्षणनिमित्तं हि गौतमाद्धरिश्मश्रुतामिन्द्रः प्राप्तः । १ । कौशिकनिमित्तं चेन्द्रो मुष्कवियोगं मेषवृषणत्वं चावाप । २ । अश्विनोर्ग्रहप्रतिषेधोद्यतवज्रस्य पुरंदरस्य च्यवनेन स्तम्भितो बाहुः । ३ । क्रतुवधप्राप्तमन्युना च दक्षेण भूयस्तपसा चात्मानं संयोज्य नेत्राकृतिरन्या ललाटे रुद्रस्योत्पादिता । ४ ॥ १४

त्रिपुरवधार्थं दीक्षामभ्युपगतस्य रुद्रस्योशनसा शिरसो जटा उत्कृत्य प्रयुक्ताः । १ । ततः प्रादुर्भूता भुजगाः । २ । तैरस्य भुजगैः पीड्यमानः कण्ठो नीलतामुपनीतः । ३ । पूर्वे च मन्वन्तरे स्वायंभुवे नारायणहस्तबन्धग्रहणान्नीलकण्ठमेव वा । ४ ॥ १५

अमृतोत्पादने पुरश्चरणतामुपगतस्याङ्गिरसो बृहस्पतेरुपस्पृशतो न प्रसादं गतवत्यः किलापः । १ ।

अथ बृहस्पतिरपां चुक्रोध । २ । यस्मान्ममोपस्पृशतः कलुषीभूता न प्रसादमुपगतास्तस्मादद्यप्रभृति झषमकरमत्स्यकच्छपजन्तुसंकीर्णाः कलुषीभवतेति । ३ । तदाप्रभृत्यापो यादोभिः संकीर्णाः संवृत्ताः । ४ ॥ १६

विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्स्वस्रीयोऽसुराणाम् । १ । स प्रत्यक्षं देवेभ्यो भागमददत्परोक्षमसुरेभ्यः । २ ॥ १७

अथ हिरण्यकशिपुं पुरस्कृत्य विश्वरूपमातरं स्वसारमसुरा वरमयाचन्त । १ । हे स्वसरयं ते पुत्रस्त्वाष्ट्रो विश्वरूपस्त्रिशिरा देवानां पुरोहितः प्रत्यक्षं देवेभ्यो भागमददत्परोक्षमस्माकम् । २ । ततो देवा वर्धन्ते वयं क्षीयामः । ३ । तदेनं त्वं वारयितुमर्हसि तथा यथास्मान्भजेदिति । ४ ॥ १८

अथ विश्वरूपं नन्दनवनमुपगतं मातोवाच । १ । पुत्र किं परपक्षवर्धनस्त्वं मातुलपक्षं नाशयसि । २ । नार्हस्येवं कर्तुमिति । ३ । स विश्वरूपो मातुर्वाक्यमनतिक्रमणीयमिति मत्वा संपूज्य हिरण्यकशिपुमगात् । ४ ॥ १९

हैरण्यगर्भाच्च वसिष्ठाद्धिरण्यकशिपुः शापं प्राप्तवान् । १ । यस्मात्त्वयान्यो वृतो होता तस्मादसमाप्तयज्ञस्त्वमपूर्वात्सत्त्वजाताद्वधं प्राप्स्यसीति । २ । तच्छापदानाद्धिरण्यकशिपुः प्राप्तवान्वधम् । ३ ॥ २०

विश्वरूपो मातृपक्षवर्धनोऽत्यर्थं तपस्यभवत् । १ । तस्य व्रतभङ्गार्थमिन्द्रो बह्वीः श्रीमत्योऽप्सरसो नियुयोज । २ । ताश्च दृष्ट्वा मनः क्षुभितं तस्याभवत्तासु चाप्सरःसु नचिरादेव सक्तोऽभवत् । ३ । सक्तं चैनं ज्ञात्वाप्सरस ऊचुर्गच्छामहे वयं यथागतमिति । ४ ॥ २१

तास्त्वाष्ट्र उवाच । १ । क गमिष्यथ आस्यतां तावन्मया सह श्रेयो भविष्यतीति । २ । तास्तमब्रुवन् । ३ । वयं देवस्त्रियोऽप्सरस इन्द्रं वरदं पुरा प्रभविष्णुं वृणीमह इति । ४ ॥ २२

अथ ता विश्वरूपोऽब्रवीदद्यैव सेन्द्रा देवा न भविष्यन्तीति । १ । ततो मन्त्राञ्जजाप । २ । तैर्मन्त्रैः प्रावर्धत त्रिशिराः । ३ । एकेनास्येन सर्वलोकेषु द्विजैः क्रियावद्भिर्यज्ञेषु सुहुतं सोमं पपावेकेनाप एकेन सेन्द्रान्देवान् । ४ । अथेन्द्रस्तं विवर्धमानं सोमपानाप्यायितसर्वगात्रं दृष्ट्वा चिन्तामापेदे । ५ ॥ २३

देवाश्च ते सहेन्द्रेण ब्रह्माणमभिजग्मुरूचुश्च । १ । विश्वरूपेण सर्वयज्ञेषु सुहुतः सोमः पीयते । २ । वयमभागाः संवृत्ताः । ३ । असुरपक्षो वर्धते वयं क्षीयामः । ४ । तदर्हसि नो विधातुं श्रेयो यदनन्तरमिति । ५ ॥ २४

तान्ब्रह्मोवाच ऋषिर्भार्गवस्तपस्तप्यते दधीचः । १ । स याच्यतां वरं यथा कलेवरं जह्यात् । २ । तस्यास्थिभिर्वज्रं क्रियतामिति । ३ ॥ २५

देवास्तत्रागच्छन्यत्र दधीचो भगवानृषिस्तपस्तेपे । १ । सेन्द्रा देवास्तमभिगम्योचुर्भगवंस्तपसः कुशलमविघ्नं चेति । २ । तान्दधीच उवाच स्वागतं भवद्भ्यः किं क्रियताम् । ३ । यद्वक्ष्यथ तत्करिष्यामीति । ४ । ते तमब्रुवञ्शरीरपरित्यागं लोकहितार्थं भगवान्कर्तुमर्हतीति । ५ । अथ दधीचस्तथैवाविमनाः सुखदुःखसमो महायोगी आत्मानं समाधाय शरीरपरित्यागं चकार । ६ ॥ २६

तस्य परमात्मन्यवसृते तान्यस्थीनि धाता संगृह्य

वज्रमकरोत् । १ । तेन वज्रेणाभेद्येनाप्रधृष्येण ब्रह्मास्थिसंभूतेन विष्णुप्रविष्टेनेन्द्रो विश्वरूपं जघान । २ । शिरसां चास्य छेदनमकरोत् । ३ । तस्मादनन्तरं विश्वरूपगात्रमथनसंभवं त्वष्ट्रोत्पादितमेवारिं वृत्रमिन्द्रो जघान । ४ ॥ २७

तस्यां द्वैधीभूतायां ब्रह्मवध्यायां भयादिन्द्रो देवराज्यं परित्यज्य अप्सु संभवां शीतलां मानससरोगतां नलिनीं प्रपेदे । १ । तत्र चैश्वर्ययोगादणुमात्रो भूत्वा बिसग्रन्थिं प्रविवेश । २ ॥ २८

अथ ब्रह्मवध्याभयप्रनष्टे त्रैलोक्यनाथे शचीपतौ जगदनीश्वरं बभूव । १ । देवान्रजस्तमश्चाविवेश । २ । मन्त्रा न प्रावर्तन्त । ३ । महर्षीणां रक्षांसि प्रादुरभवन् । ४ । ब्रह्म चोत्सादनं जगाम । ५ । अनिन्द्राश्चाबला लोकाः सुप्रधृष्या बभूवुः । ६ ॥२९

अथ देवा ऋषयश्चायुषः पुत्रं नहुषं नाम देवराजत्वेऽभिषिषिचुः । १ । नहुषः पञ्चभिः शतैर्ज्योतिषां ललाटे ज्वलद्भिः सर्वतेजोहरैस्त्रिविष्टपं पालयांबभूव । २ । अथ लोकाः प्रकृतिमापेदिरे स्वस्थाश्च बभूवुः । ३ ॥ ३०

अथोवाच नहुषः । १ । सर्वं मां शक्रोपभुक्तमुपस्थितमृते शचीमिति । २ । स एवमुक्त्वा शचीसमीपमगमदुवाच चैनाम् । ३ । सुभगेऽहमिन्द्रो देवानां भजस्व मामिति । ४ । तं शची प्रत्युवाच । ५ । प्रकृत्या त्वं धर्मवत्सलः सोमवंशोद्भवश्च । ६ । नार्हसि परपत्नीधर्षणं कर्तुमिति । ७ ॥ ३१

तामथोवाच नहुषः । १ । ऐन्द्रं पदमध्यास्यते मया । २ । अहमिन्द्रस्य राज्यरत्नहरो नात्राधर्मः कश्चित्त्वमिन्द्रभुक्तेति । ३ । सा तमुवाच । ४ । अस्ति मम किंचिद्व्रतमपर्यवसितम् । ५ । तस्यावभृथे त्वामुपगमिष्यामि कैश्चिदेवाहोभिरिति । ६ । स शच्यैवमभिहितो नहुषो जगाम । ७ ॥ ३२

अथ शची दुःखशोकार्ता भर्तृदर्शनलालसा नहुषभयगृहीता बृहस्पतिमुपागच्छत् । १ । स च तामभिगतां दृष्ट्वैव ध्यानं प्रविश्य भर्तृकार्यतत्परां ज्ञात्वा बृहस्पतिरुवाच । २ । अनेनैव व्रतेन तपसा चान्विता देवीं वरदामुपश्रुतिमाह्वय । ३ । सा तवेन्द्रं दर्शयिष्यतीति । ४ ॥ ३३

साथ महानियममास्थिता देवीं वरदामुपश्रुतिं मन्त्रैराह्वयत् । १ । सोपश्रुतिः शचीसमीपमगात् । २ । उवाच चैनामियमस्मि त्वयोपहूतोपस्थिता । ३ । किं ते प्रियं करवाणीति । ४ । तां मूर्ध्ना प्रणम्योवाच शची भगवत्यर्हसि मे भर्तारं दर्शयितुं त्वं सत्या मता चेति । ५ । सैनां मानसं सरोऽनयत् । ६ । तत्रेन्द्रं बिसग्रन्थिगतमदर्शयत् । ७ ॥ ३४

तामिन्द्रः पत्नीं कृशां ग्लानां च दृष्ट्वा चिन्तयांबभूव । १ । अहो मम महद्दुःखमिदमद्योपगतम् । २ । नष्टं हि मामियमन्विष्योपागमद्दुःखार्तेति । ३ । तामिन्द्र उवाच कथं वर्तयसीति । ४ । सा तमुवाच । ५ । नहुषो मामाह्वयति । ६ । कालश्चास्य मया कृत इति । ७ ॥ ३५

तामिन्द्र उवाच । १ । गच्छ । २ । नहुषस्त्वया वाच्योऽपूर्वेण मामृषियुक्तेन यानेन त्वमधिरूढ उद्वहस्व । ३ । इन्द्रस्य हि महान्ति वाहनानि मनसः प्रियाण्यधिरूढानि मया । ४ । त्वमन्येनोपयातुमर्हसीति । ५ । सैवमुक्ता हृष्टा जगाम । ६ । इन्द्रोऽपि बिसग्रन्थिमेवाविवेश भूयः । ७ ॥ ३६

अथेन्द्राणीमभ्यागतां दृष्ट्वोवाच नहुषः पूर्णः स काल इति । १ । तं शच्यब्रवीच्छक्रेण यथोक्तम् । २ । स महर्षियुक्तं वाहनमधिरूढः शचीसमीपमुपागच्छत् । ३ ॥ ३७

अथ मैत्रावरुणिः कुम्भयोनिरगस्त्यो महर्षीन्विक्रियमाणांस्तान्नहुषेणापश्यत् । १ । पद्भ्यां च तेनास्पृश्यत । २ । ततः स नहुषमब्रवीदकार्यप्रवृत्त पाप पतस्व महीम् । ३ । सर्पो भव यावद्भूमिर्गिरयश्च तिष्ठेयुस्तावदिति । ४ । स महर्षिवाक्यसमकालमेव तस्माद्यानादवापतत् । ५ ॥ ३८

अथानिन्द्रं पुनस्त्रैलोक्यमभवत् । १ । ततो देवा ऋषयश्च भगवन्तं विष्णुं शरणमिन्द्रार्थेऽभिजग्मुः । २ । ऊचुश्चैनं भगवन्निन्द्रं ब्रह्मवध्याभिभूतं त्रातुमर्हसीति । ३ । ततः स वरदस्तानब्रवीदश्वमेधं यज्ञं वैष्णवं शक्रोऽभियजतु । ४ । ततः स्वं स्थानं प्राप्स्यतीति । ५ ॥ ३९

ततो देवा ऋषयश्चेन्द्रं नापश्यन्यदा तदा शचीमूचुर्गच्छ सुभगे इन्द्रमानयस्वेति । १ । सा पुनस्तत्सरः समभ्यगच्छत् । २ । इन्द्रश्च तस्मात्सरसः समुत्थाय बृहस्पतिमभिजगाम । ३ । बृहस्पतिश्चाश्वमेधं महाक्रतुं शक्रायाहरत् । ४ । ततः कृष्णसारङ्गं मेध्यमश्वमुत्सृज्य वाहनं तमेव कृत्वा इन्द्रं मरुत्पतिं बृहस्पतिः स्वस्थानं प्रापयामास । ५ ॥ ४०

ततः स देवराड्देवैर्ऋषिभिः स्तूयमानस्त्रिविष्टपस्थो निष्कल्मषो बभूव । १ । ब्रह्मवध्यां चतुर्षु स्थानेषु वनिताग्निवनस्पतिगोषु व्यभजत् । २ । एवमिन्द्रो ब्रह्मतेजःप्रभावोपबृंहितः शत्रुवधं कृत्वा स्वस्थानं प्रापितः । ३ ॥ ४१

आकाशगङ्गागतश्च पुरा भरद्वाजो महर्षिरुपास्पृशंस्त्रीन्क्रमान्क्रमता विष्णुनाभ्यासादितः । १ । स भरद्वाजेन ससलिलेन पाणिनोरसि ताडितः सलक्षणोरस्कः संवृत्तः । २ ॥ ४२

भृगुणा महर्षिणा शप्तोऽग्निः सर्वभक्षत्वमुपनीतः । १ ॥ ४३

अदितिर्वै देवानामन्नमपचदेतद्भुक्त्वासुरान्हनिष्यन्तीति । १ । तत्र बुधो व्रतचर्यासमाप्तावागच्छत् । २ । अदितिं चावोचद्भिक्षां देहीति । ३ । तत्र देवैः पूर्वमेतत्प्राश्यं नान्येनेत्यदितिर्भिक्षां नादात् । ४ । अथ भिक्षाप्रत्याख्यानरुषितेन बुधेन ब्रह्मभूतेन विवस्वतो द्वितीये जन्मन्यण्डसंज्ञितस्याण्डं मारितमदित्याः । ५ । स मार्तण्डो विवस्वानभवच्छ्राद्धदेवः । ६ ॥ ४४

दक्षस्य वै दुहितरः षष्टिरासन् । १ । ताभ्यः कश्यपाय त्रयोदश प्रादाद्दश धर्माय दश मनवे सप्तविंशतिमिन्दवे । २ । तासु तुल्यासु नक्षत्राख्यां गतासु सोमो रोहिण्यामभ्यधिकां प्रीतिमकरोत् । ३ । ततस्ताः शेषाः पत्न्य ईर्ष्यावत्यः पितुः समीपं गत्वेममर्थं शशंसुः । ४ । भगवन्नस्मासु तुल्यप्रभावासु सोमो रोहिणीमधिकं भजतीति । ५ । सोऽब्रवीद्यक्ष्मैनमावेक्ष्यतीति । ६ ॥ ४५

दक्षशापात्सोमं राजानं यक्ष्माविवेश । १ । स यक्ष्मणाविष्टो दक्षमगमत् । २ । दक्षश्चैनमब्रवीन्न समं वर्तस इति । ३ । तत्रर्षयः सोममब्रुवन्क्षीयसे यक्ष्मणा । ४ । पश्चिमस्यां दिशि समुद्रे हिरण्यसरस्तीर्थम् । ५ । तत्र गत्वात्मानमभिषेचयस्वेति । ६ । अथागच्छत्सोमस्तत्र हिरण्यसरस्तीर्थम् । ७ । गत्वा चात्मनः स्नपनमकरोत् । ८ । स्नात्वा चात्मानं पाप्मनो मोक्षयामास । ९ । तत्र चावभा-

सितस्तीर्थे यदा सोमस्तदाप्रभृति तीर्थं तत्प्रभास-
मिति नाम्ना ख्यातं बभूव । १० । तच्छापादद्यापि
क्षीयते सोमोऽमावास्यान्तरस्थः । ११ । पौर्णमासी-
मात्रेऽधिष्ठितो मेघलेखाप्रतिच्छन्नं वपुर्दर्शयति
। १२ । मेघसदृशं वर्णमगमत्तदस्य शशलक्ष्म
विमलमभवत् । १३ ॥ ४६

स्थूलशिरा महर्षिर्मेरोः प्रागुत्तरे दिग्भागे तप-
स्तेपे । १ । तस्य तपस्तप्यमानस्य सर्वगन्धवहः
शुचिर्वायुर्विवायमानः शरीरमस्पृशत् । २ । स तपसा
तापितशरीरः कृशो वायुनोपवीज्यमानो हृदयपरि-
तोषमगमत् । ३ । तत्र तस्यानिलव्यजनकृतपरि-
तोषस्य सद्यो वनस्पतयः पुष्पशोभां न दर्शितवन्त
इति स एताञ्शशाप न सर्वकालं पुष्पवन्तो भवि-
ष्यथेति । ४ ॥ ४७

नारायणो लोकहितार्थं वडवामुखो नाम महर्षिः
पुराभवत् । १ । तस्य मेरौ तपस्तप्यतः समुद्र
आहूतो नागतः । २ । तेनामर्षितेनात्मगात्रोष्मणा
समुद्रः स्तिमितजलः कृतः । ३ । स्वेदप्रस्यन्दन-
सदृशश्चास्य लवणभावो जनितः । ४ । उक्तश्चापेयो
भविष्यसि । ५ । एतच्च ते तोयं वडवामुखसंज्ञितेन
पीयमानं मधुरं भविष्यति । ६ । तदेतदद्यापि
वडवामुखसंज्ञितेनानुवर्तिना तोयं सामुद्रं पीयते
। ७ ॥ ४८

हिमवतो गिरेर्दुहितरमुमां रुद्रश्चकमे । १ ।
भृगुरपि च महर्षिर्हिमवन्तमागम्याब्रवीत्कन्यामुमां
मे देहीति । २ । तमब्रवीद्धिमवानभिलषितो वरो
रुद्र इति । ३ । तमब्रवीद्भृगुर्यस्मात्त्वयाहं कन्या-
वरणकृतभावः प्रत्याख्यातस्तस्मान्न रत्नानां भवा-
न्भाजनं भविष्यतीति । ४ । अद्यप्रभृत्येतदवस्थित-
मृषिवचनम् । ५ ॥ ४९

तदेवंविधं माहात्म्यं ब्राह्मणानाम् । १ । क्षत्रमपि
शाश्वतीमव्ययां पृथिवीं पत्नीमभिगम्य बुभुजे । २ ।
तदेतद्ब्रह्माग्नीषोमीयम् । ३ । तेन जगद्धार्यते । ४
॥ ५०

इति श्रीमहाभारते शान्तिपर्वणि
एकोनत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३२९ ॥

३३०

श्रीभगवानुवाच ।

सूर्याचन्द्रमसौ शश्वत्केशैर्मे अंशुसंज्ञितैः ।
बोधयंस्तापयंश्चैव जगदुत्तिष्ठतः पृथक् ॥ १
बोधनात्तापनाच्चैव जगतो हर्षणं भवेत् ।
अग्नीषोमकृतैरेभिः कर्मभिः पाण्डुनन्दन ।
हृषीकेशोऽहमीशानो वरदो लोकभावनः ॥ २
इडोपहूतयोगेन हरे भागं क्रतुष्वहम् ।
वर्णश्च मे हरिश्रेष्ठस्तस्माद्धरिरहं स्मृतः ॥ ३
धाम सारो हि लोकानामृतं चैव विचारितम् ।
ऋतधामा ततो विप्रैः सत्यश्चाहं प्रकीर्तितः ॥ ४
नष्टां च धरणीं पूर्वमविन्दं वै गुहागताम् ।
गोविन्द इति मां देवा वाग्भिः समभितुष्टुवुः ॥ ५
शिपिविष्टेति चाख्यायां हीनरोमा च यो भवेत् ।
तेनाविष्टं हि यत्किंचिच्छिपिविष्टं हि तत्स्मृतम् ॥ ६
यास्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान् ।
शिपिविष्ट इति ह्यस्माद्गुह्यनामधरो ह्यहम् ॥ ७
स्तुत्वा मां शिपिविष्टेति यास्को ऋषिरुदारधीः ।
मत्प्रसादादधो नष्टं निरुक्तमभिजग्मिवान् ॥ ८
न हि जातो न जायेऽहं न जनिष्ये कदाचन ।
क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ॥ ९
नोक्तपूर्वं मया क्षुद्रमश्लीलं वा कदाचन ।

स्मृता ब्रह्मसुता सा मे सत्या देवी सरस्वती ॥ १०
सच्चासच्चैव कौन्तेय मय्यावेशितमात्मनि ।
पौष्करे ब्रह्मसदने सत्यं मामृषयो विदुः ॥ ११
सत्त्वान्न च्युतपूर्वोऽहं सत्त्वं वै विद्धि मत्कृतम् ।
जन्मनीहाभवत्सत्त्वं पौर्विकं मे धनंजय ॥ १२
निराशीःकर्मसंयुक्तं सात्वतं मां प्रकल्पय ।
सात्वतज्ञानदृष्टोऽहं सात्वतः सात्वतां पतिः ॥ १३
कृषामि मेदिनीं पार्थ भूत्वा कार्ष्णायसो महान् ।
कृष्णो वर्णश्च मे यस्मात्तस्मात्कृष्णोऽहमर्जुन ॥ १४
मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना ।
वायुश्च तेजसा सार्धं वैकुण्ठत्वं ततो मम ॥ १५
निर्वाणं परमं सौख्यं धर्मोऽसौ पर उच्यते ।
तस्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा ॥ १६
पृथिवीनभसी चोभे विश्रुते विश्वलौकिके ।
तयोः संधारणार्थं हि मामधोक्षजमञ्जसा ॥ १७
निरुक्तं वेदविदुषो ये च शब्दार्थचिन्तकाः ।
ते मां गायन्ति प्राग्वंशे अधोक्षज इति स्थितिः ॥
शब्द एकमतैरेष व्याहृतः परमर्षिभिः ।
नान्यो ह्यधोक्षजो लोके ऋते नारायणं प्रभुम् ॥१९
घृतं ममार्चिषो लोके जन्तूनां प्राणधारणम् ।
घृतार्चिरहमव्यग्रैर्वेदज्ञैः परिकीर्तितः ॥ २०
त्रयो हि धातवः ख्याताः कर्मजा इति च स्मृताः ।
पित्तं श्लेष्मा च वायुश्च एष संघात उच्यते ॥२१
एतैश्च धार्यते जन्तुरेतैः क्षीणैश्च क्षीयते ।
आयुर्वेदविदस्तस्मात्त्रिधातुं मां प्रचक्षते ॥ २२
वृषो हि भगवान्धर्मः ख्यातो लोकेषु भारत ।
नैघण्टुकपदाख्यातं विद्धि मां वृषमुत्तमम् ॥ २३
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद्वृषाकपिं प्राह कश्यपो मां प्रजापतिः ॥ २४
न चादिं न मध्यं तथा नैव चान्तं
कदाचिद्विदन्ते सुराश्चासुराश्च ।
अनाद्यो ह्यमध्यस्तथा चाप्यनन्तः
प्रगीतोऽहमीशो विभुर्लोकसाक्षी ॥ २५
शुचीनि श्रवणीयानि शृणोमीह धनंजय ।
न च पापानि गृह्णामि ततोऽहं वै शुचिश्रवाः ॥२६
एकशृङ्गः पुरा भूत्वा वराहो दिव्यदर्शनः ।
इमामुद्धृतवान्भूमिमेकशृङ्गस्ततो ह्यहम् ॥ २७
तथैवासं त्रिककुदो वाराहं रूपमास्थितः ।
त्रिककुत्तेन विख्यातः शरीरस्य तु मापनात् ॥ २८
विरिञ्च इति यः प्रोक्तः कपिलज्ञानचिन्तकैः ।
स प्रजापतिरेवाहं चेतनात्सर्वलोककृत् ॥ २९
विद्यासहायवन्तं मामादित्यस्थं सनातनम् ।
कपिलं प्राहुराचार्याः सांख्या निश्चितनिश्चयाः ॥
हिरण्यगर्भो द्युतिमानेष यश्छन्दसि स्तुतः ।
योगैः संपूज्यते नित्यं स एवाहं विभुः स्मृतः ॥३१
एकविंशतिशाखं च ऋग्वेदं मां प्रचक्षते ।
सहस्रशाखं यत्साम ये वै वेदविदो जनाः ।
गायन्त्यारण्यके विप्रा मद्भक्तास्तेऽपि दुर्लभाः ॥३२
षट्पञ्चाशतमष्टौ च सप्तत्रिंशतमित्युत ।
यस्मिञ्शाखा यजुर्वेदे सोऽहमाध्वर्यवे स्मृतः ॥३३
पञ्चकल्पमथर्वाणं कृत्याभिः परिबृंहितम् ।
कल्पयन्ति हि मां विप्रा अथर्वाणविदस्तथा ॥ ३४
शाखाभेदाश्च ये केचिद्याश्च शाखासु गीतयः ।
स्वरवर्णसमुच्चाराः सर्वांस्तान्विद्धि मत्कृतान् ॥ ३५
यत्तद्धयशिरः पार्थ समुदेति वरप्रदम् ।
सोऽहमेवोत्तरे भागे क्रमाक्षरविभागवित् ॥ ३६
रामादेशितमार्गेण मत्प्रसादान्महात्मना ।
पाञ्चालेन क्रमः प्राप्तस्तस्माद्भूतात्सनातनात् ।
बाभ्रव्यगोत्रः स बभौ प्रथमः क्रमपारगः ॥ ३७
नारायणाद्वरं लब्ध्वा प्राप्य योगमनुत्तमम् ।

क्रमं प्रणीय शिक्षां च प्रणयित्वा स गालवः ॥३८
कण्डरीकोऽथ राजा च ब्रह्मदत्तः प्रतापवान् ।
जातीमरणजं दुःखं स्मृत्वा स्मृत्वा पुनः पुनः ।
सप्तजातिषु मुख्यत्वाद्योगानां संपदं गतः ॥ ३९
पुराहमात्मजः पार्थ प्रथितः कारणान्तरे ।
धर्मस्य कुरुशार्दूल ततोऽहं धर्मजः स्मृतः ॥ ४०
नरनारायणौ पूर्वं तपस्तेपतुरव्ययम् ।
धर्मयानं समारूढौ पर्वते गन्धमादने ॥ ४१
तत्कालसमयं चैव दक्षयज्ञो बभूव ह ।
न चैवाकल्पयद्भागं दक्षो रुद्रस्य भारत ॥ ४२
ततो दधीचिवचनाद्दक्षयज्ञमपाहरत् ।
ससर्ज शूलं क्रोधेन प्रज्वलन्तं मुहुर्मुहुः ॥ ४३
तच्छूलं भस्मसात्कृत्वा दक्षयज्ञं सविस्तरम् ।
आवयोः सहसागच्छद्बदर्याश्रममन्तिकात् ।
वेगेन महता पार्थ पतन्नारायणोरसि ॥ ४४
ततः स्वतेजसाविष्टाः केशा नारायणस्य ह ।
बभूवुर्मुञ्जवर्णास्तु ततोऽहं मुञ्जकेशवान् ॥ ४५
तच्च शूलं विनिर्धूतं हुंकारेण महात्मना ।
जगाम शंकरकरं नारायणसमाहतम् ॥ ४६
अथ रुद्र उपाधावत्तावृषी तपसान्वितौ ।
तत एनं समुद्धूतं कण्ठे जग्राह पाणिना ।
नारायणः स विश्वात्मा तेनास्य शितिकण्ठता ॥४७
अथ रुद्रविघातार्थमिषीकां जगृहे नरः ।
मन्त्रैश्च संयुयोजाशु सोऽभवत्परशुर्महान् ॥ ४८
क्षिप्तश्च सहसा रुद्रे खण्डनं प्राप्तवांस्तदा ।
ततोऽहं खण्डपरशुः स्मृतः परशुखण्डनात् ॥ ४९

अर्जुन उवाच ।

अस्मिन्युद्धे तु वार्ष्णेय त्रैलोक्यमथने तदा ।
जयं कः प्राप्तवांस्तत्र शंसैतन्मे जनार्दन ॥ ५०

श्रीभगवानुवाच ।

तयोः संलग्नयोर्युद्धे रुद्रनारायणात्मनोः ।
उद्विग्नाः सहसा कृत्स्ना लोकाः सर्वेऽभवंस्तदा ॥५१
नागृह्णात्पावकः शुभ्रं मखेषु सुहुतं हविः ।
वेदा न प्रतिभान्ति स्म ऋषीणां भावितात्मनाम् ॥
देवान्रजस्तमश्चैव समाविविशतुस्तदा ।
वसुधा संचकम्पेऽथ नभश्च विपफाल ह ॥ ५३
निष्प्रभाणि च तेजांसि ब्रह्मा चैवासनाच्च्युतः ।
अगाच्छोषं समुद्रश्च हिमवांश्च व्यशीर्यत ॥ ५४
तस्मिन्नेवं समुत्पन्ने निमित्ते पाण्डुनन्दन ।
ब्रह्मा वृतो देवगणैर्ऋषिभिश्च महात्मभिः ।
आजगामाशु तं देशं यत्र युद्धमवर्तत ॥ ५५
साञ्जलिप्रग्रहो भूत्वा चतुर्वक्त्रो निरुक्तगः ।
उवाच वचनं रुद्रं लोकानामस्तु वै शिवम् ।
न्यस्यायुधानि विश्वेश जगतो हितकाम्यया ॥ ५६
यदक्षरमथाव्यक्तमीशं लोकस्य भावनम् ।
कूटस्थं कर्तृनिर्द्वंद्वमकर्तेति च यं विदुः ॥ ५७
व्यक्तिभावगतस्यास्य एका मूर्तिरियं शिवा ।
नरो नारायणश्चैव जातौ धर्मकुलोद्वहौ ॥ ५८
तपसा महता युक्तौ देवश्रेष्ठौ महाव्रतौ ।
अहं प्रसादजस्तस्य कस्मिंश्चित्कारणान्तरे ।
त्वं चैव क्रोधजस्तात पूर्वसर्गे सनातनः ॥ ५९
मया च सार्धं वरदं विबुधैश्च महर्षिभिः ।
प्रसादयाशु लोकानां शान्तिर्भवतु माचिरम् ॥ ६०
ब्रह्मणा त्वेवमुक्तस्तु रुद्रः क्रोधाग्निमुत्सृजन् ।
प्रसादयामास ततो देवं नारायणं प्रभुम् ।
शरणं च जगामाद्यं वरेण्यं वरदं हरिम् ॥ ६१
ततोऽथ वरदो देवो जितक्रोधो जितेन्द्रियः ।
प्रीतिमानभवत्तत्र रुद्रेण सह संगतः ॥ ६२
ऋषिभिर्ब्रह्मणा चैव विबुधैश्च सुपूजितः

उवाच देवमीशानमीशः स जगतो हरिः ॥ ६३
यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु ।
नावयोरन्तरं किंचिन्मा ते भूद्बुद्धिरन्यथा ॥ ६४
अद्य प्रभृति श्रीवत्सः शूलाङ्कोऽयं भवत्वयम् ।
मम पाण्यङ्कितश्चापि श्रीकण्ठस्त्वं भविष्यसि ॥६५
एवं लक्षणमुत्पाद्य परस्परकृतं तदा ।
सख्यं चैवातुलं कृत्वा रुद्रेण सहितावृषी ।
तपस्तेपतुरव्यग्रौ विसृज्य त्रिदिवौकसः ॥ ६६
एष ते कथितः पार्थ नारायणजयो मृधे ।
नामानि चैव गुह्यानि निरुक्तानि च भारत ।
ऋषिभिः कथितानीह यानि संकीर्तितानि ते ॥६७
एवं बहुविधै रूपैश्चरामीह वसुंधराम् ।
ब्रह्मलोकं च कौन्तेय गोलोकं च सनातनम् ।
मया त्वं रक्षितो युद्धे महान्तं प्राप्तवाञ्जयम् ॥६८
यस्तु ते सोऽग्रतो याति युद्धे संप्रत्युपस्थिते ।
तं विद्धि रुद्रं कौन्तेय देवदेवं कपर्दिनम् ॥ ६९
कालः स एव कथितः क्रोधजेति मया तव ।
निहतांस्तेन वै पूर्वं हतवानसि वै रिपून् ॥ ७०
अप्रमेयप्रभावं तं देवदेवमुमापतिम् ।
नमस्व देवं प्रयतो विश्वेशं हरमव्ययम् ॥ ७१

इति श्रीमहाभारते शान्तिपर्वणि
त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३० ॥

३३१

जनमेजय उवाच ।

ब्रह्मन्सुमहदाख्यानं भवता परिकीर्तितम् ।
यच्छ्रुत्वा मुनयः सर्वे विस्मयं परमं गताः ॥ १
इदं शतसहस्राद्धि भारताख्यानविस्तरात् ।
आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमम् ॥ २
नवनीतं यथा दध्नो मलयाच्चन्दनं यथा ।
आरण्यकं च वेदेभ्य ओषधिभ्योऽमृतं यथा ॥ ३
समुद्धृतमिदं ब्रह्मन्कथामृतमनुत्तमम् ।
तपोनिधे त्वयोक्तं हि नारायणकथाश्रयम् ॥ ४
स हीशो भगवान्देवः सर्वभूतात्मभावनः ।
अहो नारायणं तेजो दुर्दर्शं द्विजसत्तम ॥ ५
यत्राविशन्ति कल्पान्ते सर्वे ब्रह्मादयः सुराः ।
ऋषयश्च सगन्धर्वा यच्च किंचिच्चराचरम् ।
न ततोऽस्ति परं मन्ये पावनं दिवि चेह च ॥ ६
सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम् ।
न तथा फलदं चापि नारायणकथा यथा ॥ ७
सर्वथा पाविताः स्मेह श्रुत्वेमामादितः कथाम् ।
हरेर्विश्वेश्वरस्येह सर्वपापप्रणाशनीम् ॥ ८
न चित्रं कृतवांस्तत्र यदार्यो मे धनंजयः ।
वासुदेवसहायो यः प्राप्तवाञ्जयमुत्तमम् ॥ ९
न चास्य किंचिदप्राप्यं मन्ये लोकेष्वपि त्रिषु ।
त्रैलोक्यनाथो विष्णुः स यस्यासीत्साह्यकृत्सखा ॥
धन्याश्च सर्व एवासन्ब्रह्मंस्ते मम पूर्वकाः ।
हिताय श्रेयसे चैव येषामासीज्जनार्दनः ॥ ११
तपसापि न दृश्यो हि भगवाँल्लोकपूजितः ।
यं दृष्टवन्तस्ते साक्षाच्छ्रीवत्साङ्कविभूषणम् ॥ १२
तेभ्यो धन्यतरश्चैव नारदः परमेष्ठिजः ।
न चाल्पतेजसमृषिं वेद्मि नारदमव्ययम् ।
श्वेतद्वीपं समासाद्य येन दृष्टः स्वयं हरिः ॥ १३
देवप्रसादानुगतं व्यक्तं तत्तस्य दर्शनम् ।
यद्दृष्टवांस्तदा देवमनिरुद्धतनौ स्थितम् ॥ १४
बदरीमाश्रमं यत्तु नारदः प्राद्रवत्पुनः ।
नरनारायणौ द्रष्टुं किं नु तत्कारणं मुने ॥ १५
श्वेतद्वीपान्निवृत्तश्च नारदः परमेष्ठिजः ।
बदरीमाश्रमं प्राप्य समागम्य च तावृषी ॥ १६
कियन्तं कालमवसत्काः कथाः पृष्टवांश्च सः ।
श्वेतद्वीपादुपावृत्ते तस्मिन्वा सुमहात्मनि ॥ १७

किमर्थं तौ महात्मानौ नरनारायणावृषी ।
तदेतन्मे यथातत्त्वं सर्वमाख्यातुमर्हसि ॥ १८

वैशंपायन उवाच ।

नमो भगवते तस्मै व्यासायामिततेजसे ।
यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥ १९
प्राप्य श्वेतं महाद्वीपं दृष्ट्वा च हरिमव्ययम् ।
निवृत्तो नारदो राजंस्तरसा मेरुमागमत् ।
हृदयेनोद्वहन्भारं यदुक्तं परमात्मना ॥ २०
पश्चादस्याभवद्राजन्नात्मनः साध्वसं महत् ।
यद्गत्वा दूरमध्वानं क्षेमी पुनरिहागतः ॥ २१
ततो मेरोः प्रचक्राम पर्वतं गन्धमादनम् ।
निपपात च खात्तूर्णं विशालां बदरीमनु ॥ २२
ततः स ददृशे देवौ पुराणावृषिसत्तमौ ।
तपश्चरन्तौ सुमहदात्मनिष्ठौ महाव्रतौ ॥ २३
तेजसाभ्यधिकौ सूर्यात्सर्वलोकविरोचनात् ।
श्रीवत्सलक्षणौ पूज्यौ जटामण्डलधारिणौ ॥ २४
जालपादभुजौ तौ तु पादयोश्चक्रलक्षणौ ।
व्यूढोरस्कौ दीर्घभुजौ तथा मुष्कचतुष्किणौ ॥२५
षष्टिदन्तावष्टदंष्ट्रौ मेघौघसदृशस्वनौ ।
स्वास्यौ पृथुललाटौ च सुहनू सुभ्रुनासिकौ ॥ २६
आतपत्रेण सदृशे शिरसी देवयोस्तयोः ।
एवं लक्षणसंपन्नौ महापुरुषसंज्ञितौ ॥ २७
तौ दृष्ट्वा नारदो हृष्टस्ताभ्यां च प्रतिपूजितः ।
स्वागतेनाभिभाष्याथ पृष्टश्चानामयं तदा ॥ २८
बभूवान्तर्गतमतिर्निरीक्ष्य पुरुषोत्तमौ ।
सदोगतास्तत्र ये वै सर्वभूतनमस्कृताः ॥ २९
श्वेतद्वीपे मया दृष्टास्तादृशावृषिसत्तमौ ।
इति संचिन्त्य मनसा कृत्वा चाभिप्रदक्षिणम् ।
उपोपविविशे तत्र पीठे कुशमये शुभे ॥ ३०
ततस्तौ तपसां वासौ यशसां तेजसामपि ।
ऋषी शमदमोपेतौ कृत्वा पूर्वाह्णिकं विधिम् ॥ ३१
पश्चान्नारदमव्यग्रौ पाद्यार्घ्याभ्यां प्रपूज्य च ।
पीठयोश्चोपविष्टौ तौ कृतातिथ्याह्णिकौ नृप ॥ ३२
तेषु तत्रोपविष्टेषु स देशोऽभिव्यराजत ।
आज्याहुतिमहाज्वालैर्यज्ञवाटोऽग्निभिर्यथा ॥ ३३
अथ नारायणस्तत्र नारदं वाक्यमब्रवीत् ।
सुखोपविष्टं विश्रान्तं कृतातिथ्यं सुखस्थितम् ॥३४
अपीदानीं स भगवान्परमात्मा सनातनः ।
श्वेतद्वीपे त्वया दृष्ट आवयोः प्रकृतिः परा ॥ ३५

नारद उवाच ।

दृष्टो मे पुरुषः श्रीमान्विश्वरूपधरोऽव्ययः ।
सर्वे हि लोकास्तत्रस्थास्तथा देवाः सहर्षिभिः ।
अद्यापि चैनं पश्यामि युवां पश्यन्सनातनौ ॥ ३६
यैर्लक्षणैरुपेतः स हरिरव्यक्तरूपधृक् ।
तैर्लक्षणैरुपेतौ हि व्यक्तरूपधरौ युवाम् ॥ ३७
दृष्टौ मया युवां तत्र तस्य देवस्य पार्श्वतः ।
इह चैवागतोऽस्म्यद्य विसृष्टः परमात्मना ॥ ३८
को हि नाम भवेत्तस्य तेजसा यशसा श्रिया ।
सदृशस्त्रिषु लोकेषु ऋते धर्मात्मजौ युवाम् ॥ ३९
तेन मे कथितं पूर्वं नाम क्षेत्रज्ञसंज्ञितम् ।
प्रादुर्भावाश्च कथिता भविष्यन्ति हि ये यथा ॥
तत्र ये पुरुषाः श्वेताः पञ्चेन्द्रियविवर्जिताः ।
प्रतिबुद्धाश्च ते सर्वे भक्ताश्च पुरुषोत्तमम् ॥ ४१
तेऽर्चयन्ति सदा देवं तैः सार्धं रमते च सः ।
प्रियभक्तो हि भगवान्परमात्मा द्विजप्रियः ॥ ४२
रमते सोऽर्च्यमानो हि सदा भागवतप्रियः ।
विश्वभुक्सर्वगो देवो बान्धवो भक्तवत्सलः ।
स कर्ता कारणं चैव कार्यं चातिबलद्युतिः ॥ ४३
तपसा योज्य सोऽऽत्मानं श्वेतद्वीपात्परं हि यत् ।
तेज इत्यभिविख्यातं स्वयंभासावभासितम् ॥ ४४

शान्तिः या त्रिषु लोकेषु सिद्धानां भावितात्मनाम् ।
एतया शुभया बुद्ध्या नैष्ठिकं व्रतमास्थितः ॥ ४५
न तत्र सूर्यस्तपति न सोमोऽभिविराजते ।
न वायुर्वाति देवेशे तपश्चरति दुश्चरम् ॥ ४६
वेदीमष्टतलोत्सेधां भूमावास्थाय विश्वभुक् ।
एकपादस्थितो देव ऊर्ध्वबाहुरुदङ्मुखः ।
साङ्गानावर्तयन्वेदांस्तपस्तेपे सुदुश्चरम् ॥ ४७
यद्ब्रह्मा ऋषयश्चैव स्वयं पशुपतिश्च यत् ।
शेषाश्च विबुधश्रेष्ठा दैत्यदानवराक्षसाः ॥ ४८
नागाः सुपर्णा गन्धर्वाः सिद्धा राजर्षयश्च ये ।
हव्यं कव्यं च सततं विधिपूर्वं प्रयुञ्जते ।
कृत्स्नं तत्तस्य देवस्य चरणावुपतिष्ठति ॥ ४९
याः क्रियाः संप्रयुक्तास्तु एकान्तगतबुद्धिभिः ।
ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥
न तस्यान्यः प्रियतरः प्रतिबुद्धैर्महात्मभिः ।
विद्यते त्रिषु लोकेषु ततोऽस्म्यैकान्तिकं गतः ।
इह चैवागतस्तेन विसृष्टः परमात्मना ॥ ५१
एवं मे भगवान्देवः स्वयमाख्यातवान्हरिः ।
आसिष्ये तत्परो भूत्वा युवाभ्यां सह नित्यशः ॥

इति श्रीमहाभारते शान्तिपर्वणि
एकत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३१ ॥

३३२

नरनारायणावूचतुः ।

धन्योऽस्यनुगृहीतोऽसि यत्ते दृष्टः स्वयं प्रभुः ।
न हि तं दृष्टवान्कश्चित्पद्मयोनिरपि स्वयम् ॥ १
अव्यक्तयोनिर्भगवान्दुर्दर्शः पुरुषोत्तमः ।
नारदैतद्धि ते सत्यं वचनं समुदाहृतम् ॥ २
नास्य भक्तैः प्रियतरो लोके कश्चन विद्यते ।
ततः स्वयं दर्शितवान्स्वमात्मानं द्विजोत्तम ॥ ३
तपो हि तप्यतस्तस्य यत्स्थानं परमात्मनः ।
न तत्संप्राप्नुते कश्चिदृते ह्यावां द्विजोत्तम ॥ ४
या हि सूर्यसहस्रस्य समस्तस्य भवेद्द्युतिः ।
स्थानस्य सा भवेत्तस्य स्वयं तेन विराजता ॥ ५
तस्मादुत्तिष्ठते विप्र देवाद्विश्वभुवः पतेः ।
क्षमा क्षमावतां श्रेष्ठ यया भूमिस्तु युज्यते ॥ ६
तस्माच्चोत्तिष्ठते देवात्सर्वभूतहितो रसः ।
आपो येन हि युज्यन्ते द्रवत्वं प्राप्नुवन्ति च ॥ ७
तस्मादेव समुद्भूतं तेजो रूपगुणात्मकम् ।
येन स्म युज्यते सूर्यस्ततो लोकान्विराजते ॥ ८
तस्माद्देवात्समुद्भूतः स्पर्शस्तु पुरुषोत्तमात् ।
येन स्म युज्यते वायुस्ततो लोकान्विवात्यसौ ॥ ९
तस्माच्चोत्तिष्ठते शब्दः सर्वलोकेश्वरात्प्रभोः ।
आकाशं युज्यते येन ततस्तिष्ठत्यसंवृतम् ॥ १०
तस्माच्चोत्तिष्ठते देवात्सर्वभूतगतं मनः ।
चन्द्रमा येन संयुक्तः प्रकाशगुणधारणः ॥ ११
षड्भूतोत्पादकं नाम तत्स्थानं वेदसंज्ञितम् ।
विद्यासहायो यत्रास्ते भगवान्हव्यकव्यभुक् ॥ १२
ये हि निष्कल्मषा लोके पुण्यपापविवर्जिताः ।
तेषां वै क्षेममध्वानं गच्छतां द्विजसत्तम ।
सर्वलोकतमोहन्ता आदित्यो द्वारमुच्यते ॥ १३
आदित्यदग्धसर्वाङ्गा अदृश्याः केनचित्क्वचित् ।
परमाणुभूता भूत्वा तु तं देवं प्रविशन्त्युत ॥ १४
तस्मादपि विनिर्मुक्ता अनिरुद्धतनौ स्थिताः ।
मनोभूतास्ततो भूयः प्रद्युम्नं प्रविशन्त्युत ॥ १५
प्रद्युम्नाच्चापि निर्मुक्ता जीवं संकर्षणं तथा ।
विशन्ति विप्रप्रवराः सांख्या भागवतैः सह ॥ १६
ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा ।
प्रविशन्ति द्विजश्रेष्ठ क्षेत्रज्ञं निर्गुणात्मकम् ।
सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्त्वतः ॥ १७
समाहितमनस्काश्च नियताः संयतेन्द्रियाः ।

एकान्तभावोपगता वासुदेवं विशन्ति ते ॥ १८
आवामपि च धर्मस्य गृहे जातौ द्विजोत्तम ।
रम्यां विशालामाश्रित्य तप उग्रं समास्थितौ ॥१९
ये तु तस्यैव देवस्य प्रादुर्भावाः सुरप्रियाः ।
भविष्यन्ति त्रिलोकस्थास्तेषां स्वस्तीत्यतो द्विज ॥२०
विधिना स्वेन युक्ताभ्यां यथापूर्वं द्विजोत्तम ।
आस्थिताभ्यां सर्वकृच्छ्रं व्रतं सम्यक्तदुत्तमम् ॥२१
आवाभ्यामपि दृष्टस्त्वं श्वेतद्वीपे तपोधन ।
समागतो भगवता संजल्पं कृतवान्यथा ॥ २२
सर्वं हि नौ संविदितं त्रैलोक्ये सचराचरे ।
यद्भविष्यति वृत्तं वा वर्तते वा शुभाशुभम् ॥ २३

वैशंपायन उवाच

एतच्छ्रुत्वा तयोर्वाक्यं तपस्युग्रेऽभ्यवर्तत ।
नारदः प्राञ्जलिर्भूत्वा नारायणपरायणः ॥ २४
जजाप विधिवन्मन्त्रान्नारायणगतान्बहून् ।
दिव्यं वर्षसहस्रं हि नरनारायणाश्रमे ॥ २५
अवसत्स महातेजा नारदो भगवानृषिः ।
तमेवाभ्यर्चयन्देवं नरनारायणौ च तौ ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि
द्वात्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३२ ॥

३३३

वैशंपायन उवाच ।

कस्यचित्त्वथ कालस्य नारदः परमेष्ठिजः ।
दैवं कृत्वा यथान्यायं पित्र्यं चक्रे ततः परम् ॥ १
ततस्तं वचनं प्राह ज्येष्ठो धर्मात्मजः प्रभुः ।
क इज्यते द्विजश्रेष्ठ दैवे पित्र्ये च कल्पिते ॥ २
त्वया मतिमतां श्रेष्ठ तन्मे शंस यथागमम् ।
किमेतत्क्रियते कर्म फलं चास्य किमिष्यते ॥ ३

नारद उवाच ।

त्वयैतत्कथितं पूर्वं दैवं कर्तव्यमित्यपि ।
दैवतं च परो यज्ञः परमात्मा सनातनः ॥ ४
ततस्तद्भावितो नित्यं यजे वैकुण्ठमव्ययम् ।
तस्माच्च प्रसृतः पूर्वं ब्रह्मा लोकपितामहः ॥ ५
मम वै पितरं प्रीतः परमेष्ठ्यप्यजीजनत् ।
अहं संकल्पजस्तस्य पुत्रः प्रथमकल्पितः ॥ ६
यजाम्यहं पितॄन्साधो नारायणविधौ कृते ।
एवं स एव भगवान्पिता माता पितामहः ।
इज्यते पितृयज्ञेषु मया नित्यं जगत्पतिः ॥ ७
श्रुतिश्चाप्यपरा देव पुत्रान्हि पितरोऽयजन् ।
वेदश्रुतिः प्रनष्टा च पुनरध्यापिता सुतैः ।
ततस्ते मन्त्रदाः पुत्राः पितृत्वमुपपेदिरे ॥ ८
नूनं पुरैतद्विदितं युवयोर्भावितात्मनोः ।
पुत्राश्च पितरश्चैव परस्परमपूजयन् ॥ ९
त्रीन्पिण्डान्न्यस्य वै पृथ्व्यां पूर्वं दत्त्वा कुशानिति ।
कथं तु पिण्डसंज्ञां ते पितरो लेभिरे पुरा ॥ १०

नरनारायणावूचतुः ।

इमां हि धरणीं पूर्वं नष्टां सागरमेखलाम् ।
गोविन्द उज्जहाराशु वाराहं रूपमाश्रितः ॥ ११
स्थापयित्वा तु धरणीं स्वे स्थाने पुरुषोत्तमः ।
जलकर्दमलिप्ताङ्गो लोककार्यार्थमुद्यतः ॥ १२
प्राप्ते चाह्निककाले स मध्यंदिनगते रवौ ।
दंष्ट्राविलग्नान्मृत्पिण्डान्विधूय सहसा प्रभुः ।
स्थापयामास वै पृथ्व्यां कुशानास्तीर्य नारद ॥ १३
स तेष्वात्मानमुद्दिश्य पित्र्यं चक्रे यथाविधि ।
संकल्पयित्वा त्रीन्पिण्डान्स्वेनैव विधिना प्रभुः ॥
आत्मगात्रोष्मसंभूतैः स्नेहगर्भैस्तिलैरपि ।
प्रोक्ष्यापवर्गं देवेशः प्राङ्मुखः कृतवान्स्वयम् ॥१५
मर्यादास्थापनार्थं च ततो वचनमुक्तवान् ।
अहं हि पितरः स्रष्टुमुद्यतो लोककृत्स्वयम् ॥ १६
तस्य चिन्तयतः सद्यः पितृकार्यविधिं परम् ।

दंष्ट्राभ्यां प्रविनिर्धूता ममैते दक्षिणां दिशम् ।
आश्रिता धरणीं पिण्डास्तस्मात्पितर एव ते ॥ १७
त्रयो मूर्तिविहीना वै पिण्डमूर्तिधरास्त्विमे ।
भवन्तु पितरो लोके मया सृष्टाः सनातनाः ॥ १८
पिता पितामहश्चैव तथैव प्रपितामहः ।
अहमेवात्र विज्ञेयस्त्रिषु पिण्डेषु संस्थितः ॥ १९
नास्ति मत्तोऽधिकः कश्चित्को वाभ्यर्च्यो मया स्वयम्
को वा मम पिता लोके अहमेव पितामहः ॥ २०
पितामहपिता चैव अहमेवात्र कारणम् ।
इत्येवमुक्त्वा वचनं देवदेवो वृषाकपिः ॥ २१
वराहपर्वते विप्र दत्त्वा पिण्डान्सविस्तरान् ।
आत्मानं पूजयित्वैव तत्रैवादर्शनं गतः ॥ २२
एतदर्थं शुभमते पितरः पिण्डसंज्ञिताः ।
लभन्ते सततं पूजां वृषाकपिवचो यथा ॥ २३
ये यजन्ति पितॄन्देवान्गुरूंश्चैवातिथींस्तथा ।
गाश्चैव द्विजमुख्यांश्च पृथिवीं मातरं तथा ।
कर्मणा मनसा वाचा विष्णुमेव यजन्ति ते ॥ २४
अन्तर्गतः स भगवान्सर्वसत्त्वशरीरगः ।
समः सर्वेषु भूतेषु ईश्वरः सुखदुःखयोः ।
महान्महात्मा सर्वात्मा नारायण इति श्रुतः ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि
त्रयस्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३३ ॥

३३४

वैशंपायन उवाच ।

श्रुत्वैतन्नारदो वाक्यं नरनारायणेरितम् ।
अत्यन्तभक्तिमान्देवे एकान्तित्वमुपेयिवान् ॥ १
प्रोष्य वर्षसहस्रं तु नरनारायणाश्रमे ।
श्रुत्वा भगवदाख्यानं दृष्ट्वा च हरिमव्ययम् ।
हिमवन्तं जगामाशु यत्रास्य स्वक आश्रमः ॥ २
तावपि ख्याततपसौ नरनारायणावृषी ।
तस्मिन्नेवाश्रमे रम्ये तेपतुस्तप उत्तमम् ॥ ३
त्वमप्यमितविक्रान्तः पाण्डवानां कुलोद्वहः ।
पावितात्माद्य संवृत्तः श्रुत्वेमामादितः कथाम् ॥ ४
नैव तस्य परो लोको नायं पार्थिवसत्तम ।
कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् ॥५
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः ।
यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं हरिम् ॥ ६
कथं नाम भवेद्द्वेष्य आत्मा लोकस्य कस्यचित् ।
आत्मा हि पुरुषव्याघ्र ज्ञेयो विष्णुरिति स्थितिः ॥
य एष गुरुरस्माकमृषिर्गन्धवतीसुतः ।
तेनैतत्कथितं तात माहात्म्यं परमात्मनः ।
तस्माच्छ्रुतं मया चेदं कथितं च तवानघ ॥ ८
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
को ह्यन्यः पुरुषव्याघ्र महाभारतकृद्भवेत् ।
धर्मान्नानाविधांश्चैव को ब्रूयात्तमृते प्रभुम् ॥ ९
वर्ततां ते महायज्ञो यथा संकल्पितस्त्वया ।
संकल्पिताश्वमेधस्त्वं श्रुतधर्मश्च तत्त्वतः ॥ १०
एतत्तु महदाख्यानं श्रुत्वा पारिक्षितो नृपः ।
ततो यज्ञसमाप्त्यर्थं क्रियाः सर्वाः समारभत् ॥११
नारायणीयमाख्यानमेतत्ते कथितं मया ।
नारदेन पुरा राजन्गुरवे मे निवेदितम् ।
ऋषीणां पाण्डवानां च शृण्वतोः कृष्णभीष्मयोः ॥

स हि परमगुरुर्भुवनपति-
धरणिधरः शमनियमनिधिः ।
श्रुतिविनयनिधिर्द्विजपरमहित-
स्तव भवतु गतिर्हरिरमरहितः ॥ १३
तपसां निधिः सुमहतां महतो
यशसश्च भाजनमरिष्टकहा ।
एकान्तिनं शरणदोऽभयदो गतिदोऽस्तु वः
स मखभागहरस्त्रिगुणातिगः ॥ १४

चतुष्पक्षधरः पूर्ते-
इष्टयोश्च फलभागहरः ।
विदधाति नित्यमजितोऽतिबलो
गतिमात्मगां सुकृतिनामृषिणाम् ॥ १५
तं लोकसाक्षिणमजं पुरुषं
रविवर्णमीश्वरगतिं बहुशः ।
प्रणमध्वमेकमतयो यतयः
सलिलोद्भवोऽपि तमृषिं प्रणतः ॥ १६
स हि लोकयोनिरमृतस्य पदं
सूक्ष्मं पुराणमचलं परमम् ।
तत्सांख्ययोगिभिरुदारधृतं
बुद्ध्या यतात्मभिर्विदितं सततम् ॥ १७

इति श्रीमहाभारते शान्तिपर्वणि
चतुस्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३४ ॥

३३५

जनमेजय उवाच ।

श्रुतं भगवतस्तस्य माहात्म्यं परमात्मनः ।
जन्म धर्मगृहे चैव नरनारायणात्मकम् ।
महावराहसृष्टा च पिण्डोत्पत्तिः पुरातनी ॥ १
प्रवृत्तौ च निवृत्तौ च यो यथा परिकल्पितः ।
स तथा न श्रुतो ब्रह्मन्कथ्यमानस्त्वयानघ ॥ २
यच्च तत्कथितं पूर्वं त्वया हयशिरो महत् ।
हव्यकव्यभुजो विष्णोरुदक्पूर्वे महोदधौ ।
तच्च दृष्टं भगवता ब्रह्मणा परमेष्ठिना ॥ ३
किं तदुत्पादितं पूर्वं हरिणा लोकधारिणा ।
रूपं प्रभावमहतामपूर्वं धीमतां वर ॥ ४
दृष्ट्वा हि विबुधश्रेष्ठमपूर्वममितौजसम् ।
तदश्वशिरसं पुण्यं ब्रह्मा किमकरोन्मुने ॥ ५
एतन्नः संशयं ब्रह्मन्पुराणज्ञानसंभवम् ।
कथयस्वोत्तममते महापुरुषनिर्मितम् ।
पाविताः स्म त्वया ब्रह्मन्पुण्यां कथयता कथाम् ॥६

वैशंपायन उवाच ।

कथयिष्यामि ते सर्वं पुराणं वेदसंमितम् ।
जगौ यद्भगवान्व्यासो राज्ञो धर्मसुतस्य वै ॥ ७
श्रुत्वाश्वशिरसो मूर्तिं देवस्य हरिमेधसः ।
उत्पन्नसंशयो राजा तमेव समचोदयत् ॥ ८

युधिष्ठिर उवाच ।

यत्तद्दर्शितवान्ब्रह्मा देवं हयशिरोधरम् ।
किमर्थं तत्समभवद्वपुर्देवोपकल्पितम् ॥ ९

व्यास उवाच ।

यत्किंचिदिह लोके वै देहबद्धं विशां पते ।
सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः ॥ १०
ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् ।
भूतान्तरात्मा वरदः सगुणो निर्गुणोऽपि च ।
भूतप्रलयमव्यक्तं शृणुष्व नृपसत्तम ॥ ११
धरण्यामथ लीनायामप्सु चैकार्णवे पुरा ।
ज्योतिर्भूते जले चापि लीने ज्योतिषि चानिले ॥
वायौ चाकाशसंलीने आकाशे च मनोनुगे ।
व्यक्ते मनसि संलीने व्यक्ते चाव्यक्ततां गते ॥१३
अव्यक्ते पुरुषं याते पुंसि सर्वगतेऽपि च ।
तम एवाभवत्सर्वं न प्राज्ञायत किंचन ॥ १४
तमसो ब्रह्म संभूतं तमोमूलमृतात्मकम् ।
तद्विश्वभावसंज्ञान्तं पौरुषीं तनुमास्थितम् ॥ १५
सोऽनिरुद्ध इति प्रोक्तस्तत्प्रधानं प्रचक्षते ।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम ॥ १६
विद्यासहायवान्देवो विष्वक्सेनो हरिः प्रभुः ।
अप्स्वेव शयनं चक्रे निद्रायोगमुपागतः ।
जगतश्चिन्तयन्सृष्टिं चित्रां बहुगुणोद्भवाम् ॥ १७
तस्य चिन्तयतः सृष्टिं महानात्मगुणः स्मृतः ।

अहंकारस्ततो जातो ब्रह्मा शुभचतुर्मुखः ।
हिरण्यगर्भो भगवान्सर्वलोकपितामहः ॥ १८
पद्मेऽनिरुद्धात्संभूतस्तदा पद्मनिभेक्षणः ।
सहस्रपत्रे द्युतिमानुपविष्टः सनातनः ॥ १९
ददृशेऽद्भुतसंकाशे लोकानापोमयान्प्रभुः ।
सत्त्वस्थः परमेष्ठी स ततो भूतगणान्सृजत् ॥ २०
पूर्वमेव च पद्मस्य पत्रे सूर्यांशुसप्रभे ।
नारायणकृतौ बिन्दू अपामास्तां गुणोत्तरौ ॥ २१
तावपश्यत्स भगवाननादिनिधनोऽच्युतः ।
एकस्तत्राभवद्बिन्दुर्मध्वाभो रुचिरप्रभः ॥ २२
स तामसो मधुर्जातस्तदा नारायणाज्ञया ।
कठिनस्त्वपरो बिन्दुः कैटभो राजसस्तु सः ॥ २३
तावभ्यधावतां श्रेष्ठौ तमोरजगुणान्वितौ ।
बलवन्तौ गदाहस्तौ पद्मनालानुसारिणौ ॥ २४
ददृशातेऽरविन्दस्थं ब्रह्माणममितप्रभम् ।
सृजन्तं प्रथमं वेदांश्चतुरश्चारुविग्रहान् ॥ २५
ततो विग्रहवन्तौ तौ वेदान्दृष्ट्वासुरोत्तमौ ।
सहसा जगृहतुर्वेदान्ब्रह्मणः पश्यतस्तदा ॥ २६
अथ तौ दानवश्रेष्ठौ वेदान्गृह्य सनातनान् ।
रसां विविशतुस्तूर्णमुदक्पूर्वे महोदधौ ॥ २७
ततो हृतेषु वेदेषु ब्रह्मा कश्मलमाविशत् ।
ततो वचनमीशानं प्राह वेदैर्विनाकृतः ॥ २८
वेदा मे परमं चक्षुर्वेदा मे परमं बलम् ।
वेदा मे परमं धाम वेदा मे ब्रह्म चोत्तमम् ॥ २९
मम वेदा हृताः सर्वे दानवाभ्यां बलादितः ।
अन्धकारा हि मे लोका जाता वेदैर्विनाकृताः ।
वेदानृते हि किं कुर्यां लोकान्वै स्रष्टुमुद्यतः ॥ ३०
अहो बत महद्दुःखं वेदनाशनजं मम ।
प्राप्तं दुनोति हृदयं तीव्रशोकाय रन्धयन् ॥ ३१
को हि शोकार्णवे मग्नं मामितोऽद्य समुद्धरेत् ।
वेदांस्तानानयेन्नष्टान्कस्य चाहं प्रियो भवे ॥ ३२
इत्येवं भाषमाणस्य ब्रह्मणो नृपसत्तम ।
हरेः स्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतां वर ।
ततो जगौ परं जप्यं साञ्जलिप्रग्रहः प्रभुः ॥ ३३
नमस्ते ब्रह्महृदय नमस्ते मम पूर्वज ।
लोकाद्य भुवनश्रेष्ठ सांख्ययोगनिधे विभो ॥ ३४
व्यक्ताव्यक्तकराचिन्त्य क्षेमं पन्थानमास्थित ।
विश्वभुक्सर्वभूतानामन्तरात्मन्नयोनिज ॥ ३५
अहं प्रसादजस्तुभ्यं लोकधाम्ने स्वयंभुवे ।
त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम् ॥ ३६
चाक्षुषं वै द्वितीयं मे जन्म चासीत्पुरातनम् ।
त्वत्प्रसादाच्च मे जन्म तृतीयं वाचिकं महत् ॥ ३७
त्वत्तः श्रवणजं चापि चतुर्थं जन्म मे विभो ।
नासिक्यं चापि मे जन्म त्वत्तः पञ्चममुच्यते ॥
अण्डजं चापि मे जन्म त्वत्तः षष्ठं विनिर्मितम् ।
इदं च सप्तमं जन्म पद्मजं मेऽमितप्रभ ॥ ३९
सर्गे सर्गे ह्यहं पुत्रस्तव त्रिगुणवर्जितः ।
प्रथितः पुण्डरीकाक्ष प्रधानगुणकल्पितः ॥ ४०
त्वमीश्वरस्वभावश्च स्वयंभूः पुरुषोत्तमः ।
त्वया विनिर्मितोऽहं वै वेदचक्षुर्वयोतिगः ॥ ४१
ते मे वेदा हृताश्चक्षुरन्धो जातोऽस्मि जागृहि ।
ददस्व चक्षुषी मह्यं प्रियोऽहं ते प्रियोऽसि मे ॥४२
एवं स्तुतः स भगवान्पुरुषः सर्वतोमुखः ।
जहौ निद्रामथ तदा वेदकार्यार्थमुद्यतः ।
ऐश्वरेण प्रयोगेण द्वितीयां तनुमास्थितः ॥ ४३
सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा ।
कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः ॥ ४४
तस्य मूर्धा समभवद्द्यौः सनक्षत्रतारका ।
केशाश्चास्याभवन्दीर्घा रवेरंशुसमप्रभाः ॥ ४५
कर्णावाकाशपाताले ललाटं भूतधारिणी ।

गङ्गा सरस्वती पुण्या भ्रुवावास्तां महानदी ॥ ४६
चक्षुषी सोमसूर्यौ ते नासा संध्या पुनः स्मृता ।
ॐकारस्त्वथ संस्कारो विद्युज्जिह्वा च निर्मिता ॥ ४७
दन्ताश्च पितरो राजन्सोमपा इति विश्रुताः ।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः ।
ग्रीवा चास्याभवद्राजन्कालरात्रिर्गुणोत्तरा ॥ ४८
एतद्धयशिरः कृत्वा नानामूर्तिभिरावृतम् ।
अन्तर्दधे स विश्वेशो विवेश च रसां प्रभुः ॥ ४९
रसां पुनः प्रविष्टश्च योगं परममास्थितः ।
शैक्ष्यं स्वरं समास्थाय ओमिति प्रासृजत्स्वरम् ॥५०
स स्वरः सानुनादी च सर्वगः स्निग्ध एव च ।
बभूवान्तर्महीभूतः सर्वभूतगुणोदितः ॥ ५१
ततस्तावसुरौ कृत्वा वेदान्समयबन्धनान् ।
रसातले विनिक्षिप्य यतः शब्दस्ततो द्रुतौ ॥ ५२
एतस्मिन्नन्तरे राजन्देवो हयशिरोधरः ।
जग्राह वेदानखिलान्रसातलगतान्हरिः ।
प्रादाच्च ब्रह्मणे भूयस्ततः स्वां प्रकृतिं गतः ॥ ५३
स्थापयित्वा हयशिर उदक्पूर्वे महोदधौ ।
वेदानामालयश्चापि बभूवाश्वशिरास्ततः ॥ ५४
अथ किंचिदपश्यन्तौ दानवौ मधुकैटभौ ।
पुनराजग्मतुस्तत्र वेगितौ पश्यतां च तौ ।
यत्र वेदा विनिक्षिप्तास्तत्स्थानं शून्यमेव च ॥ ५५
तत उत्तममास्थाय वेगं बलवतां वरौ ।
पुनरुत्तस्थतुः शीघ्रं रसानामालयात्तदा ।
ददृशाते च पुरुषं तमेवादिकरं प्रभुम् ॥ ५६
श्वेतं चन्द्रविशुद्धाभमनिरुद्धतनौ स्थितम् ।
भूयोऽप्यमितविक्रान्तं निद्रायोगमुपागतम् ॥ ५७
आत्मप्रमाणरचिते अपामुपरि कल्पिते ।
शयने नागभोगाढ्ये ज्वालामालासमावृते ॥ ५८
निष्कल्मषेण सत्त्वेन संपन्नं रुचिरप्रभम् ।
तं दृष्ट्वा दानवेन्द्रौ तौ महाहासममुञ्चताम् ॥ ५९
ऊचतुश्च समाविष्टौ रजसा तमसा च तौ ।
अयं स पुरुषः श्वेतः शेते निद्रामुपागतः ॥ ६०
अनेन नूनं वेदानां कृतमाहरणं रसात् ।
कस्यैष को नु खल्वेष किं च स्वपिति भोगवान् ॥
इत्युच्चारितवाक्यौ तौ बोधयामासतुर्हरिम् ।
युद्धार्थिनौ तु विज्ञाय विबुद्धः पुरुषोत्तमः ॥ ६२
निरीक्ष्य चासुरेन्द्रौ तौ ततो युद्धे मनो दधे ।
अथ युद्धं समभवत्तयोर्नारायणस्य च ॥ ६३
रजस्तमोविष्टतनू तावुभौ मधुकैटभौ ।
ब्रह्मणोपचितिं कुर्वञ्जघान मधुसूदनः ॥ ६४
ततस्तयोर्वधेनाशु वेदापहरणेन च ।
शोकापनयनं चक्रे ब्रह्मणः पुरुषोत्तमः ॥ ६५
ततः परिवृतो ब्रह्मा हतारिर्वेदसत्कृतः ।
निर्ममे स तदा लोकान्कृत्स्नान्स्थावरजङ्गमान् ॥६६
दत्त्वा पितामहायाग्र्यां बुद्धिं लोकविसर्गिकीम् ।
तत्रैवान्तर्दधे देवो यत एवागतो हरिः ॥ ६७
तौ दानवौ हरिर्हत्वा कृत्वा हयशिरस्तनुम् ।
पुनः प्रवृत्तिधर्मार्थं तामेव विदधे तनुम् ॥ ६८
एवमेष महाभागो बभूवाश्वशिरा हरिः ।
पौराणमेतदाख्यातं रूपं वरदमैश्वरम् ॥ ६९
यो ह्येतद्ब्राह्मणो नित्यं शृणुयाद्धारयेत वा ।
न तस्याध्ययनं नाशमुपगच्छेत्कदाचन ॥ ७०
आराध्य तपसोग्रेण देवं हयशिरोधरम् ।
पाञ्चालेन क्रमः प्राप्तो रामेण पथि देशिते ॥ ७१
एतद्धयशिरो राजन्नाख्यानं तव कीर्तितम् ।
पुराणं वेदसमितं यन्मां त्वं परिपृच्छसि ॥ ७२
यां यामिच्छेत्तनुं देवः कर्तुं कार्यविधौ क्वचित् ।
तां तां कुर्याद्विकुर्वाणः स्वयमात्मानमात्मना ॥ ७३
एष वेदनिधिः श्रीमानेष वै तपसो निधिः ।

एष योगश्च सांख्यं च ब्रह्म चाग्र्यं हरिर्विभुः ॥ ७४
नारायणपरा वेदा यज्ञा नारायणात्मकाः ।
तपो नारायणपरं नारायणपरा गतिः ॥ ७५
नारायणपरं सत्यमृतं नारायणात्मकम् ।
नारायणपरो धर्मः पुनरावृत्तिदुर्लभः ॥ ७६
प्रवृत्तिलक्षणश्चैव धर्मो नारायणात्मकः ।
नारायणात्मको गन्धो भूमौ श्रेष्ठतमः स्मृतः ॥ ७७
अपां चैव गुणो राजन्रसो नारायणात्मकः ।
ज्योतिषां च गुणो रूपं स्मृतं नारायणात्मकम् ॥७८
नारायणात्मकश्चापि स्पर्शो वायुगुणः स्मृतः ।
नारायणात्मकश्चापि शब्द आकाशसंभवः ॥ ७९
मनश्चापि ततो भूतमव्यक्तगुणलक्षणम् ।
नारायणपरः कालो ज्योतिषामयनं च यत् ॥ ८०
नारायणपरा कीर्तिः श्रीश्च लक्ष्मीश्च देवताः ।
नारायणपरं सांख्यं योगो नारायणात्मकः ॥ ८१
कारणं पुरुषो येषां प्रधानं चापि कारणम् ।
स्वभावश्चैव कर्माणि दैवं येषां च कारणम् ॥ ८२
पञ्चकारणसंख्यातो निष्ठा सर्वत्र वै हरिः ।
तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः ॥ ८३
तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः ।
सब्रह्मकानां लोकानामृषीणां च महात्मनाम् ॥ ८४
सांख्यानां योगिनां चापि यतीनामात्मवेदिनाम् ।
मनीषितं विजानाति केशवो न तु तस्य ते ॥ ८५
ये केचित्सर्वलोकेषु दैवं पित्र्यं च कुर्वते ।
दानानि च प्रयच्छन्ति तप्यन्ति च तपो महत् ॥ ८६
सर्वेषामाश्रयो विष्णुरैश्वरं विधिमास्थितः ।
सर्वभूतकृतावासो वासुदेवेति चोच्यते ॥ ८७
अयं हि नित्यः परमो महर्षि-
र्महाविभूतिर्गुणवान्निर्गुणाख्यः ।
गुणैश्च संयोगमुपैति शीघ्रं
कालो यथर्तावृतुसंप्रयुक्तः ॥ ८८
नैवास्य विन्दन्ति गतिं महात्मनो
न चागतिं कश्चिदिहानुपश्यति ।
ज्ञानात्मकाः संयमिनो महर्षयः
पश्यन्ति नित्यं पुरुषं गुणाधिकम् ॥ ८९

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३५ ॥

३३६

जनमेजय उवाच ।

अहो ह्येकान्तिनः सर्वान्प्रीणाति भगवान्हरिः ।
विधिप्रयुक्तां पूजां च गृह्णाति भगवान्स्वयम् ॥ १
ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः ।
तेषां त्वयाभिनिर्दिष्टा पारंपर्यागता गतिः ॥ २
चतुर्थ्यां चैव ते गत्यां गच्छन्ति पुरुषोत्तमम् ।
एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदम् ॥ ३
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः ।
अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम् ॥ ४
सहोपनिषदान्वेदान्ये विप्राः सम्यगास्थिताः ।
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ॥ ५
तेभ्यो विशिष्टां जानामि गतिमेकान्तिनां नृणाम् ।
केनैष धर्मः कथितो देवेन ऋषिणापि वा ॥ ६
एकान्तिनां च का चर्या कदा चोत्पादिता विभो ।
एतन्मे संशयं छिन्धि परं कौतूहलं हि मे ॥ ७

वैशंपायन उवाच ।

समुपोढेष्वनीकेषु कुरुपाण्डवयोर्मृधे ।
अर्जुने विमनस्के च गीता भगवता स्वयम् ॥ ८
आगतिश्च गतिश्चैव पूर्वं ते कथिता मया ।
गहनो ह्येष धर्मो वै दुर्विज्ञेयोऽकृतात्मभिः ॥ ९
संमितः सामवेदेन पुरैवादियुगे कृतः ।
धार्यते स्वयमीशेन राजन्नारायणेन ह ॥ १०

एतमर्थं महाराज पृष्टः पार्थेन नारदः ।
ऋषिमध्ये महाभागः शृण्वतोः कृष्णभीष्मयोः ॥
गुरुणा च ममाप्येष कथितो नृपसत्तम ।
यथा तु कथितस्तत्र नारदेन तथा शृणु ॥ १२
यदासीन्मानसं जन्म नारायणमुखोद्गतम् ।
ब्रह्मणः पृथिवीपाल तदा नारायणः स्वयम् ।
तेन धर्मेण कृतवान्दैवं पित्र्यं च भारत ॥ १३
फेनपा ऋषयश्चैव तं धर्मं प्रतिपेदिरे ।
वैखानसाः फेनपेभ्यो धर्ममेतं प्रपेदिरे ।
वैखानसेभ्यः सोमस्तु ततः सोऽन्तर्दधे पुनः ॥१४
यदासीच्चाक्षुषं जन्म द्वितीयं ब्रह्मणो नृप ।
तदा पितामहात्सोमादेतं धर्ममजानत ।
नारायणात्मकं राजन्रुद्राय प्रददौ च सः ॥ १५
ततो योगस्थितो रुद्रः पुरा कृतयुगे नृप ।
वालखिल्यानृषीन्सर्वान्धर्ममेतमपाठयत् ।
अन्तर्दधे ततो भूयस्तस्य देवस्य मायया ॥ १६
तृतीयं ब्रह्मणो जन्म यदासीद्वाचिकं महत् ।
तत्रैष धर्मः संभूतः स्वयं नारायणान्नृप ॥ १७
सुपर्णो नाम तमृषिः प्राप्तवान्पुरुषोत्तमात् ।
तपसा वै सुतप्तेन दमेन नियमेन च ॥ १८
त्रिः परिक्रान्तवानेतत्सुपर्णो धर्ममुत्तमम् ।
यस्मात्तस्माद्व्रतं ह्येतत्त्रिसौपर्णमिहोच्यते ॥ १९
ऋग्वेदपाठपठितं व्रतमेतद्धि दुश्चरम् ।
सुपर्णाच्चाप्यधिगतो धर्म एष सनातनः ॥ २०
वायुना द्विपदां श्रेष्ठ प्रथितो जगदायुषा ।
वायोः सकाशात्प्राप्तश्च ऋषिभिर्विघसाशिभिः ॥
तेभ्यो महोदधिश्चैनं प्राप्तवान्धर्ममुत्तमम् ।
ततः सोऽन्तर्दधे भूयो नारायणसमाहितः ॥ २२
यदा भूयः श्रवणजा सृष्टिरासीन्महात्मनः ।
ब्रह्मणः पुरुषव्याघ्र तत्र कीर्तयतः शृणु ॥ २३
जगत्स्रष्टुमना देवो हरिर्नारायणः स्वयम् ।
चिन्तयामास पुरुषं जगत्सर्गकरं प्रभुः ॥ २४
अथ चिन्तयतस्तस्य कर्णाभ्यां पुरुषः सृतः ।
प्रजासर्गकरो ब्रह्मा तमुवाच जगत्पतिः ॥ २५
सृज प्रजाः पुत्र सर्वा मुखतः पादतस्तथा ।
श्रेयस्तव विधास्यामि बलं तेजश्च सुव्रत ॥ २६
धर्मं च मत्तो गृह्णीष्व सात्वतं नाम नामतः ।
तेन सर्वं कृतयुगं स्थापयस्व यथाविधि ॥ २७
ततो ब्रह्मा नमश्चक्रे देवाय हरिमेधसे ।
धर्मं चाग्र्यं स जग्राह सरहस्यं ससंग्रहम् ।
आरण्यकेन सहितं नारायणमुखोद्गतम् ॥ २८
उपदिश्य ततो धर्मं ब्रह्मणेऽमिततेजसे ।
तं कार्तयुगधर्माणं निराशीःकर्मसंज्ञितम् ।
जगाम तमसः पारं यत्राव्यक्तं व्यवस्थितम् ॥ २९
ततोऽथ वरदो देवो ब्रह्मलोकपितामहः ।
असृजत्स तदा लोकान्कृत्स्नान्स्थावरजङ्गमान् ॥३०
ततः प्रावर्तत तदा आदौ कृतयुगं शुभम् ।
ततो हि सात्वतो धर्मो व्याप्य लोकानवस्थितः ॥
तेनैवाद्येन धर्मेण ब्रह्मा लोकविसर्गकृत् ।
पूजयामास देवेशं हरिं नारायणं प्रभुम् ॥ ३२
धर्मप्रतिष्ठाहेतोश्च मनुं स्वारोचिषं ततः ।
अध्यापयामास तदा लोकानां हितकाम्यया ॥ ३३
ततः स्वारोचिषः पुत्रं स्वयं शङ्खपदं नृप ।
अध्यापयत्पुराव्यग्रः सर्वलोकपतिर्विभुः ॥ ३४
ततः शङ्खपदश्चापि पुत्रमात्मजमौरसम् ।
दिशापालं सुधर्माणमध्यापयत भारत ।
ततः सोऽन्तर्दधे भूयः प्राप्ते त्रेतायुगे पुनः ॥ ३५
नासिक्यजन्मनि पुरा ब्रह्मणः पार्थिवोत्तम ।
धर्ममेतं स्वयं देवो हरिर्नारायणः प्रभुः ।
उज्जगारारविन्दाक्षो ब्रह्मणः पश्यतस्तदा ॥ ३६

सनत्कुमारो भगवांस्ततः प्राधीतवान्नृप ।
सनत्कुमारादपि च वीरणो वै प्रजापतिः ।
कृतादौ कुरुशार्दूल धर्ममेतमधीतवान् ॥ ३७
वीरणश्चाप्यधीत्यैनं रौच्याय मनवे ददौ ।
रौच्यः पुत्राय शुद्धाय सुव्रताय सुमेधसे ॥ ३८
कुक्षिनाम्नेऽथ प्रददौ दिशां पालाय धर्मिणे ।
ततः सोऽन्तर्दधे भूयो नारायणमुखोद्गतः ॥ ३९
अण्डजे जन्मनि पुनर्ब्रह्मणे हरियोनये ।
एष धर्मः समुद्भूतो नारायणमुखात्पुनः ॥ ४०
गृहीतो ब्रह्मणा राजन्प्रयुक्तश्च यथाविधि ।
अध्यापिताश्च मुनयो नाम्ना बर्हिषदो नृप ॥ ४१
बर्हिषद्भ्यश्च संक्रान्तः सामवेदान्तगं द्विजम् ।
ज्येष्ठं नाम्नाभिविख्यातं ज्येष्ठसामव्रतो हरिः ॥ ४२
ज्येष्ठाच्चाप्यनुसंक्रान्तो राजानमविकम्पनम् ।
अन्तर्दधे ततो राजन्नेष धर्मः प्रभोर्हरेः ॥ ४३
यदिदं सप्तमं जन्म पद्मजं ब्रह्मणो नृप ।
तत्रैष धर्मः कथितः स्वयं नारायणेन हि ॥ ४४
पितामहाय शुद्धाय युगादौ लोकधारिणे ।
पितामहश्च दक्षाय धर्ममेतं पुरा ददौ ॥ ४५
ततो ज्येष्ठे तु दौहित्रे प्रादाद्दक्षो नृपोत्तम ।
आदित्ये सवितुर्ज्येष्ठे विवस्वाञ्जगृहे ततः ॥ ४६
त्रेतायुगादौ च पुनर्विवस्वान्मनवे ददौ ।
मनुश्च लोकभूत्यर्थं सुतायेक्ष्वाकवे ददौ ॥ ४७
इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थितः ।
गमिष्यति क्षयान्ते च पुनर्नारायणं नृप ॥ ४८
व्रतिनां चापि यो धर्मः स ते पूर्वं नृपोत्तम ।
कथितो हरिगीतासु समासविधिकल्पितः ॥ ४९
नारदेन तु संप्राप्तः सरहस्यः ससंग्रहः ।
एष धर्मो जगन्नाथात्साक्षान्नारायणान्नृप ॥ ५०
एवमेष महान्धर्म आद्यो राजन्सनातनः ।
दुर्विज्ञेयो दुष्करश्च सात्वतैर्धार्यते सदा ॥ ५१
धर्मज्ञानेन चैतेन सुप्रयुक्तेन कर्मणा ।
अहिंसाधर्मयुक्तेन प्रीयते हरिरीश्वरः ॥ ५२
एकव्यूहविभागो वा क्वचिद्द्विव्यूहसंज्ञितः ।
त्रिव्यूहश्चापि संख्यातश्चतुर्व्यूहश्च दृश्यते ॥ ५३
हरिरेव हि क्षेत्रज्ञो निर्ममो निष्कलस्तथा ।
जीवश्च सर्वभूतेषु पञ्चभूतगुणातिगः ॥ ५४
मनश्च प्रथितं राजन्पञ्चेन्द्रियसमीरणम् ।
एष लोकनिधिर्धीमानेष लोकविसर्गकृत् ॥ ५५
अकर्ता चैव कर्ता च कार्यं कारणमेव च ।
यथेच्छति तथा राजन्क्रीडते पुरुषोऽव्ययः ॥ ५६
एष एकान्तिधर्मस्ते कीर्तितो नृपसत्तम ।
मया गुरुप्रसादेन दुर्विज्ञेयोऽकृतात्मभिः ।
एकान्तिनो हि पुरुषा दुर्लभा बहवो नृप ॥ ५७
यद्येकान्तिभिराकीर्णं जगत्स्यात्कुरुनन्दन ।
अहिंसकैरात्मविद्भिः सर्वभूतहिते रतैः ।
भवेत्कृतयुगप्राप्तिराशीःकर्मविवर्जितैः ॥ ५८
एवं स भगवान्व्यासो गुरुर्मम विशां पते ।
कथयामास धर्मज्ञो धर्मराज्ञे द्विजोत्तमः ॥ ५९
ऋषीणां संनिधौ राजञ्शृण्वतोः कृष्णभीष्मयोः ।
तस्याप्यकथयत्पूर्वं नारदः सुमहातपाः ॥ ६०
देवं परमकं ब्रह्म श्वेतं चन्द्राभमच्युतम् ।
यत्र चैकान्तिनो यान्ति नारायणपरायणाः ॥ ६१

जनमेजय उवाच ।

एवं बहुविधं धर्मं प्रतिबुद्धैर्निषेवितम् ।
न कुर्वन्ति कथं विप्रा अन्ये नानाव्रते स्थिताः ॥ ६२

वैशंपायन उवाच ।

तिस्रः प्रकृतयो राजन्देहबन्धेषु निर्मिताः ।
सात्त्विकी राजसी चैव तामसी चेति भारत ॥ ६३
देहबन्धेषु पुरुषः श्रेष्ठः कुरुकुलोद्वह ।

सात्त्विकः पुरुषव्याघ्र भवेन्मोक्षार्थनिश्चितः ॥६४
अत्रापि स विजानाति पुरुषं ब्रह्मवर्तिनम् ।
नारायणपरो मोक्षस्ततो वै सात्त्विकः स्मृतः ॥६५
मनीषितं च प्राप्नोति चिन्तयन्पुरुषोत्तमम् ।
एकान्तभक्तिः सततं नारायणपरायणः ॥ ६६
मनीषिणो हि ये केचिद्यतयो मोक्षकाङ्क्षिणः ।
तेषां वै छिन्नतृष्णानां योगक्षेमवहो हरिः ॥ ६७
जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकस्तु स विज्ञेयो भवेन्मोक्षे च निश्चितः ॥
सांख्ययोगेन तुल्यो हि धर्म एकान्तसेवितः ।
नारायणात्मके मोक्षे ततो यान्ति परां गतिम् ॥६९
नारायणेन दृष्टश्च प्रतिबुद्धो भवेत्पुमान् ।
एवमात्मेच्छया राजन्प्रतिबुद्धो न जायते ॥ ७०
राजसी तामसी चैव व्यामिश्रे प्रकृती स्मृते ।
तदात्मकं हि पुरुषं जायमानं विशां पते ।
प्रवृत्तिलक्षणैर्युक्तं नावेक्षति हरिः स्वयम् ॥ ७१
पश्यत्येनं जायमानं ब्रह्मा लोकपितामहः ।
रजसा तमसा चैव मानुषं समभिप्लुतम् ॥ ७२
कामं देवाश्च ऋषयः सत्त्वस्था नृपसत्तम ।
हीनाः सत्त्वेन सूक्ष्मेण ततो वैकारिकाः स्मृताः ॥

जनमेजय उवाच ।

कथं वैकारिको गच्छेत्पुरुषः पुरुषोत्तमम् ॥ ७४

वैशंपायन उवाच ।

सुसूक्ष्मसत्त्वसंयुक्तं संयुक्तं त्रिभिरक्षरैः ।
पुरुषः पुरुषं गच्छेन्निष्क्रियः पञ्चविंशकम् ॥ ७५
एवमेकं सांख्ययोगं वेदारण्यकमेव च ।
परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते ।
एष एकान्तिनां धर्मो नारायणपरात्मकः ॥ ७६
यथा समुद्रात्प्रसृता जलौघा-
स्तमेव राजन्पुनराविशन्ति ।
इमे तथा ज्ञानमहाजलौघा
नारायणं वै पुनराविशन्ति ॥ ७७
एष ते कथितो धर्मः सात्वतो यदुबान्धव ।
कुरुष्वैनं यथान्यायं यदि शक्नोषि भारत ॥ ७८
एवं हि सुमहाभागो नारदो गुरवे मम ।
श्वेतानां यतिनामाह एकान्तगतिमव्ययाम् ॥ ७९
व्यासश्चाकथयत्प्रीत्या धर्मपुत्राय धीमते ।
स एवायं मया तुभ्यमाख्यातः प्रसृतो गुरोः ॥ ८०
इत्थं हि दुश्चरो धर्म एष पार्थिवसत्तम ।
यथैव त्वं तथैवान्ये न भजन्ति विमोहिताः ॥८१
कृष्ण एव हि लोकानां भावनो मोहनस्तथा ।
संहारकारकश्चैव कारणं च विशां पते ॥ ८२

इति श्रीमहाभारते शान्तिपर्वणि
षट्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३६ ॥

३३७

जनमेजय उवाच ।

सांख्यं योगं पञ्चरात्रं वेदारण्यकमेव च ।
ज्ञानान्येतानि ब्रह्मर्षे लोकेषु प्रचरन्ति ह ॥ १
किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने ।
प्रब्रूहि वै मया पृष्टः प्रवृत्तिं च यथाक्रमम् ॥ २

वैशंपायन उवाच ।

जज्ञे बहुज्ञं परमत्युदारं
यं द्वीपमध्ये सुतमात्मवन्तम् ।
पराशराद्गन्धवती महर्षिं
तस्मै नमोऽज्ञानतमोनुदाय ॥ ३
पितामहाद्यं प्रवदन्ति षष्ठं
महर्षिमार्षेयविभूतियुक्तम् ।
नारायणस्यांशजमेकपुत्रं
द्वैपायनं वेदमहानिधानम् ॥ ४
तमादिकालेषु महाविभूति-

नारायणो ब्रह्ममहानिधानम् ।
ससर्ज पुत्रार्थमुदारतेजा
व्यासं महात्मानमजः पुराणः ॥ ५

जनमेजय उवाच ।

त्वयैव कथितः पूर्वं संभवो द्विजसत्तम ।
वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशरः ॥ ६
पराशरस्य दायादः कृष्णद्वैपायनो मुनिः ।
भूयो नारायणसुतं त्वमेवैनं प्रभाषसे ॥ ७
किमतः पूर्वजं जन्म व्यासस्यामिततेजसः ।
कथयस्वोत्तममते जन्म नारायणोद्भवम् ॥ ८

वैशंपायन उवाच ।

वेदार्थान्वेत्तुकामस्य धर्मिष्ठस्य तपोनिधेः ।
गुरोर्मे ज्ञाननिष्ठस्य हिमवत्पाद आसतः ॥ ९
कृत्वा भारतमाख्यानं तपःश्रान्तस्य धीमतः ।
शुश्रूषां तत्परा राजन्कृतवन्तो वयं तदा ॥ १०
सुमन्तुर्जैमिनिश्चैव पैलश्च सुदृढव्रतः ।
अहं चतुर्थः शिष्यो वै शुको व्यासात्मजस्तथा ॥
एभिः परिवृतो व्यासः शिष्यैः पञ्चभिरुत्तमैः ।
शुशुभे हिमवत्पादे भूतैर्भूतपतिर्यथा ॥ १२
वेदानावर्तयन्साङ्गान्भारतार्थांश्च सर्वशः ।
तमेकमनसं दान्तं युक्ता वयमुपास्महे ॥ १३
कथान्तरेऽथ कस्मिंश्चित्पृष्टोऽस्माभिर्द्विजोत्तमः ।
वेदार्थान्भारतार्थांश्च जन्म नारायणात्तथा ॥ १४
स पूर्वमुक्त्वा वेदार्थान्भारतार्थांश्च तत्त्ववित् ।
नारायणादिदं जन्म व्याहर्तुमुपचक्रमे ॥ १५
शृणुध्वमाख्यानवरमेतदार्षेयमुत्तमम् ।
आदिकालोद्भवं विप्रास्तपसाधिगतं मया ॥ १६
प्राप्ते प्रजाविसर्गे वै सप्तमे पद्मसंभवे ।
नारायणो महायोगी शुभाशुभविवर्जितः ॥ १७
ससृजे नाभितः पुत्रं ब्रह्माणममितप्रभम् ।
ततः स प्रादुरभवदथैनं वाक्यमब्रवीत् ॥ १८
मम त्वं नाभितो जातः प्रजासर्गकरः प्रभुः ।
सृज प्रजास्त्वं विविधा ब्रह्मन्सजडपण्डिताः ॥ १९
स एवमुक्तो विमुखश्चिन्ताव्याकुलमानसः ।
प्रणम्य वरदं देवमुवाच हरिमीश्वरम् ॥ २०
का शक्तिर्मम देवेश प्रजाः स्रष्टुं नमोऽस्तु ते ।
अप्रज्ञावानहं देव विधत्स्व यदनन्तरम् ॥ २१
स एवमुक्तो भगवान्भूत्वाथान्तर्हितस्ततः ।
चिन्तयामास देवेशो बुद्धिं बुद्धिमतां वरः ॥ २२
स्वरूपिणी ततो बुद्धिरुपतस्थे हरिं प्रभुम् ।
योगेन चैनां निर्योगः स्वयं नियुयुजे तदा ॥ २३
स तामैश्वर्ययोगस्थां बुद्धिं शक्तिमतीं सतीम् ।
उवाच वचनं देवो बुद्धिं वै प्रभुरव्ययः ॥ २४
ब्रह्माणं प्रविशस्वेति लोकसृष्ट्यर्थसिद्धये ।
ततस्तमीश्वरादिष्टा बुद्धिः क्षिप्रं विवेश सा ॥ २५
अथैनं बुद्धिसंयुक्तं पुनः स ददृशे हरिः ।
भूयश्चैनं वचः प्राह सृजेमा विविधाः प्रजाः ॥२६
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ।
प्राप चैव मुहूर्तेन स्वस्थानं देवसंज्ञितम् ॥ २७
तां चैव प्रकृतिं प्राप्य एकीभावगतोऽभवत् ।
अथास्य बुद्धिरभवत्पुनरन्या तदा किल ॥ २८
सृष्टा इमाः प्रजाः सर्वा ब्रह्मणा परमेष्ठिना ।
दैत्यदानवगन्धर्वरक्षोगणसमाकुलाः ।
जाता हीयं वसुमती भाराक्रान्ता तपस्विनी ॥ २९
बहवो बलिनः पृथ्व्यां दैत्यदानवराक्षसाः ।
भविष्यन्ति तपोयुक्ता वरान्प्राप्स्यन्ति चोत्तमान् ॥
अवश्यमेव तैः सर्वैर्वरदानेन दर्पितैः ।
बाधितव्याः सुरगणा ऋषयश्च तपोधनाः ।
तत्र न्याय्यमिदं कर्तुं भारावतरणं मया ॥ ३१
अथ नानासमुद्भूतैर्वसुधायां यथाक्रमम् ।

निग्रहेण च पापानां साधूनां प्रग्रहेण च ॥ ३२
इमां तपस्विनीं सत्यां धारयिष्यामि मेदिनीम् ।
मया ह्येषा हि ध्रियते पातालस्थेन भोगिना ॥३३
मया धृता धारयति जगद्धि सचराचरम् ।
तस्मात्पृथ्व्याः परित्राणं करिष्ये संभवं गतः ॥३४
एवं स चिन्तयित्वा तु भगवान्मधुसूदनः ।
रूपाण्यनेकान्यसृजत्प्रादुर्भावभवाय सः ॥ ३५
वाराहं नारसिंहं च वामनं मानुषं तथा ।
एभिर्मया निहन्तव्या दुर्विनीताः सुरारयः ॥ ३६
अथ भूयो जगत्स्रष्टा भोःशब्देनानुनादयन् ।
सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत् ॥ ३७
अपान्तरतमा नाम सुतो वाक्संभवो विभोः ।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः ॥ ३८
तमुवाच नतं मूर्ध्ना देवानामादिरव्ययः ।
वेदाख्याने श्रुतिः कार्या त्वया मतिमतां वर ।
तस्मात्कुरु यथाज्ञप्तं मयैतद्वचनं मुने ॥ ३९
तेन भिन्नास्तदा वेदा मनोः स्वायंभुवेऽन्तरे ।
ततस्तुतोष भगवान्हरिस्तेनास्य कर्मणा ।
तपसा च सुतप्तेन यमेन नियमेन च ॥ ४०

श्रीभगवानुवाच ।

मन्वन्तरेषु पुत्र त्वमेवं लोकप्रवर्तकः ।
भविष्यस्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः ॥ ४१
पुनस्तिष्ये च संप्राप्ते कुरवो नाम भारताः ।
भविष्यन्ति महात्मानो राजानः प्रथिता भुवि ॥
तेषां त्वत्तः प्रसूतानां कुलभेदो भविष्यति ।
परस्परविनाशार्थं त्वामृते द्विजसत्तम ॥ ४३
तत्राप्यनेकधा वेदान्भेत्स्यसे तपसान्वितः ।
कृष्णे युगे च संप्राप्ते कृष्णवर्णो भविष्यसि ॥ ४४
धर्माणां विविधानां च कर्ता ज्ञानकरस्तथा ।
भविष्यसि तपोयुक्तो न च रागाद्विमोक्ष्यसे ॥४५
वीतरागश्च पुत्रस्ते परमात्मा भविष्यति ।
महेश्वरप्रसादेन नैतद्वचनमन्यथा ॥ ४६
यं मानसं वै प्रवदन्ति पुत्रं
पितामहस्योत्तमबुद्धियुक्तम् ।
वसिष्ठमग्र्यं तपसो निधानं
यश्चापि सूर्यं व्यतिरिच्य भाति ॥ ४७
तस्यान्वये चापि ततो महर्षिः
पराशरो नाम महाप्रभावः ।
पिता स ते वेदनिधिर्वरिष्ठो
महातपा वै तपसो निवासः ।
कानीनगर्भः पितृकन्यकायां
तस्मादृषेस्त्वं भविता च पुत्रः ॥ ४८
भूतभव्यभविष्याणां छिन्नसर्वार्थसंशयः ।
ते ह्यतिक्रान्तकाः पूर्वं सहस्रयुगपर्ययाः ॥ ४९
तांश्च सर्वान्मयोद्दिष्टान्द्रक्ष्यसे तपसान्वितः ।
पुनर्द्रक्ष्यसि चानेकसहस्रयुगपर्ययान् ॥ ५०
अनादिनिधनं लोके चक्रहस्तं च मां मुने ।
अनुध्यानान्मम मुने नैतद्वचनमन्यथा ॥ ५१
शनैश्चरः सूर्यपुत्रो भविष्यति मनुर्महान् ।
तस्मिन्मन्वन्तरे चैव सप्तर्षिगणपूर्वकः ।
त्वमेव भविता वत्स मत्प्रसादान्न संशयः ॥ ५२

व्यास उवाच ।

एवं सारस्वतमृषिमपान्तरतमं तदा ।
उक्त्वा वचनमीशानः साधयस्वेत्यथाब्रवीत् ॥ ५३
सोऽहं तस्य प्रसादेन देवस्य हरिमेधसः ।
अपान्तरतमा नाम ततो जातोऽऽज्ञया हरेः ।
पुनश्च जातो विख्यातो वसिष्ठकुलनन्दनः ॥ ५४
तदेतत्कथितं जन्म मया पूर्वकमात्मनः ।
नारायणप्रसादेन तथा नारायणांशजम् ॥ ५५
मया हि सुमहत्तप्तं तपः परमदारुणम् ।

पुरा मतिमतां श्रेष्ठाः परमेण समाधिना ॥ ५६
एतद्वः कथितं सर्वं यन्मां पृच्छथ पुत्रकाः ।
पूर्वजन्म भविष्यं च भक्तानां स्नेहतो मया ॥ ५७

वैशंपायन उवाच ।

एष ते कथितः पूर्वं संभवोऽस्मद्गुरोर्नृप ।
व्यासस्याक्लिष्टमनसो यथा पृष्टः पुनः शृणु ॥ ५८
सांख्यं योगं पञ्चरात्रं वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ॥ ५९
सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते ।
हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः ॥ ६०
अपान्तरतमाश्चैव वेदाचार्यः स उच्यते ।
प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन ॥ ६१
उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः ।
उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः ॥ ६२
पञ्चरात्रस्य कृत्स्नस्य वेत्ता तु भगवान्स्वयम् ।
सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ॥ ६३
यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः ।
न चैनमेवं जानन्ति तमोभूता विशां पते ॥ ६४
तमेव शास्त्रकर्तारं प्रवदन्ति मनीषिणः ।
निष्ठां नारायणमृषिं नान्योऽस्तीति च वादिनः ॥
निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः ।
ससंशयान्हेतुबलान्नाध्यावसति माधवः ॥ ६६
पञ्चरात्रविदो ये तु यथाक्रमपरा नृप ।
एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै ॥ ६७
सांख्यं च योगं च सनातने द्वे
वेदाश्च सर्वे निखिलेन राजन् ।
सर्वैः समस्तैरृषिभिर्निरुक्तो
नारायणो विश्वमिदं पुराणम् ॥ ६८
शुभाशुभं कर्म समीरितं य-
त्प्रवर्तते सर्वलोकेषु किंचित् ।
तस्मादृषेस्तद्भवतीति विद्या-
द्दिव्यन्तरिक्षे भुवि चाप्सु चापि ॥ ६९

इति श्रीमहाभारते शान्तिपर्वणि
सप्तत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३७ ॥

३३८

जनमेजय उवाच ।

बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ।
को ह्यत्र पुरुषः श्रेष्ठः को वा योनिरिहोच्यते ॥ १

वैशंपायन उवाच ।

बहवः पुरुषा लोके सांख्ययोगविचारिणाम् ।
नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ॥ २
बहूनां पुरुषाणां च यथैका योनिरुच्यते ।
तथा तं पुरुषं विश्वं व्याख्यास्यामि गुणाधिकम् ॥
नमस्कृत्वा तु गुरवे व्यासायामिततेजसे ।
तपोयुक्ताय दान्ताय वन्द्याय परमर्षये ॥ ४
इदं पुरुषसूक्तं हि सर्ववेदेषु पार्थिव ।
ऋतं सत्यं च विख्यातमृषिसिंहेन चिन्तितम् ॥ ५
उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः ।
अध्यात्मचिन्तामाश्रित्य शास्त्राण्युक्तानि भारत ॥६
समासतस्तु यद्व्यासः पुरुषैकत्वमुक्तवान् ।
तत्तेऽहं संप्रवक्ष्यामि प्रसादादमितौजसः ॥ ७
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ब्रह्मणा सह संवादं त्र्यम्बकस्य विशां पते ॥ ८
क्षीरोदस्य समुद्रस्य मध्ये हाटकसप्रभः ।
वैजयन्त इति ख्यातः पर्वतप्रवरो नृप ॥ ९
तत्राध्यात्मगतिं देव एकाकी प्रविचिन्तयन् ।
वैराजसदने नित्यं वैजयन्तं निषेवते ॥ १०
अथ तत्रासतस्तस्य चतुर्वक्त्रस्य धीमतः ।
ललाटप्रभवः पुत्रः शिव आगाद्यदृच्छया ।
आकाशेनैव योगीशः पुरा त्रिनयनः प्रभुः ॥ ११

ततः खान्निपपाताशु धरणीधरमूर्धनि ।
अग्रतश्चाभवत्प्रीतो ववन्दे चापि पादयोः ॥ १२
तं पादयोर्निपतितं दृष्ट्वा सव्येन पाणिना ।
उत्थापयामास तदा प्रभुरेकः प्रजापतिः ॥ १३
उवाच चैनं भगवांश्चिरस्यागतमात्मजम् ।
स्वागतं ते महाबाहो दिष्ट्या प्राप्तोऽसि मेऽन्तिकम् ॥
कच्चित्ते कुशलं पुत्र स्वाध्यायतपसोः सदा ।
नित्यमुग्रतपास्त्वं हि ततः पृच्छामि ते पुनः ॥१५

रुद्र उवाच ।

त्वत्प्रसादेन भगवन्स्वाध्यायतपसोर्मम ।
कुशलं चाव्ययं चैव सर्वस्य जगतस्तथा ॥ १६
चिरदृष्टो हि भगवान्वैराजसदने मया ।
ततोऽहं पर्वतं प्राप्तस्त्विमं त्वत्पादसेवितम् ॥ १७
कौतूहलं चापि हि मे एकान्तगमनेन ते ।
नैतत्कारणमल्पं हि भविष्यति पितामह ॥ १८
किं नु तत्सदनं श्रेष्ठं क्षुत्पिपासाविवर्जितम् ।
सुरासुरैरध्युषितमृषिभिश्चामितप्रभैः ॥ १९
गन्धर्वैरप्सरोभिश्च सततं संनिषेवितम् ।
उत्सृज्येमं गिरिवरमेकाकी प्राप्तवानसि ॥ २०

ब्रह्मोवाच ।

वैजयन्तो गिरिवरः सततं सेव्यते मया ।
अत्रैकाग्रेण मनसा पुरुषश्चिन्त्यते विराट् ॥ २१

रुद्र उवाच ।

बहवः पुरुषा ब्रह्मंस्त्वया सृष्टाः स्वयंभुवा ।
सृज्यन्ते चापरे ब्रह्मन्स चैकः पुरुषो विराट् ॥२२
को ह्यसौ चिन्त्यते ब्रह्मंस्त्वया वै पुरुषोत्तमः ।
एतन्मे संशयं ब्रूहि महत्कौतूहलं हि मे ॥ २३

ब्रह्मोवाच ।

बहवः पुरुषाः पुत्र ये त्वया समुदाहृताः ।
एवमेतदतिक्रान्तं द्रष्टव्यं नैवमित्यपि ।
आधारं तु प्रवक्ष्यामि एकस्य पुरुषस्य ते ॥ २४
बहूनां पुरुषाणां स यथैका योनिरुच्यते ।
तथा तं पुरुषं विश्वं परमं सुमहत्तमम् ।
निर्गुणं निर्गुणा भूत्वा प्रविशन्ति सनातनम् ॥२५

इति श्रीमहाभारते शान्तिपर्वणि
अष्टात्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३८ ॥

३३९

ब्रह्मोवाच ।

शृणु पुत्र यथा ह्येष पुरुषः शाश्वतोऽव्ययः ।
अक्षयश्चाप्रमेयश्च सर्वगश्च निरुच्यते ॥ १
न स शक्यस्त्वया द्रष्टुं मयान्यैर्वापि सत्तम ।
सगुणो निर्गुणो विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः ॥
अशरीरः शरीरेषु सर्वेषु निवसत्यसौ ।
वसन्नपि शरीरेषु न स लिप्यति कर्मभिः ॥ ३
ममान्तरात्मा तव च ये चान्ये देहसंज्ञिताः ।
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्क्वचित् ॥
विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः ।
एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखम् ॥ ५
क्षेत्राणि हि शरीराणि बीजानि च शुभाशुभे ।
तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते ॥ ६
नागतिर्न गतिस्तस्य ज्ञेया भूतेन केनचित् ।
सांख्येन विधिना चैव योगेन च यथाक्रमम् ॥ ७
चिन्तयामि गतिं चास्य न गतिं वेद्मि चोत्तमाम् ।
यथाज्ञानं तु वक्ष्यामि पुरुषं तं सनातनम् ॥ ८
तस्यैकत्वं महत्त्वं हि स चैकः पुरुषः स्मृतः ।
महापुरुषशब्दं स बिभर्त्येकः सनातनः ॥ ९
एको हुताशो बहुधा समिध्यते
एकः सूर्यस्तपसां योनिरेका ।

एको वायुर्बहुधा वाति लोके
महोदधिश्चाम्भसां योनिरेकः ।
पुरुषश्चैको निर्गुणो विश्वरूप-
स्तं निर्गुणं पुरुषं चाविशन्ति ॥ १०
हित्वा गुणमयं सर्वं कर्म हित्वा शुभाशुभम् ।
उभे सत्यानृते त्यक्त्वा एवं भवति निर्गुणः ॥ ११
अचिन्त्यं चापि तं ज्ञात्वा भावसूक्ष्मं चतुष्टयम् ।
विचरेद्यो यतिर्यत्तः स गच्छेत्पुरुषं प्रभुम् ॥ १२
एवं हि परमात्मानं केचिदिच्छन्ति पण्डिताः ।
एकात्मानं तथात्मानमपरेऽध्यात्मचिन्तकाः ॥ १३
तत्र यः परमात्मा हि स नित्यं निर्गुणः स्मृतः ।
स हि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः ।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ॥ १४
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते ।
ससप्तदशकेनापि राशिना युज्यते हि सः ।
एवं बहुविधः प्रोक्तः पुरुषस्ते यथाक्रमम् ॥ १५
यत्तत्कृत्स्नं लोकतन्त्रस्य धाम
वेद्यं परं बोधनीयं सबोद्धृ
मन्ता मन्तव्यं प्राशिता प्राशितव्यं
घ्राता घ्रेयं स्पर्शिता स्पर्शनीयम् ॥ १६
द्रष्टा द्रष्टव्यं श्राविता श्रावणीयं
ज्ञाता ज्ञेयं सगुणं निर्गुणं च ।
यद्वै प्रोक्तं गुणसाम्यं प्रधानं
नित्यं चैतच्छाश्वतं चाव्ययं च ॥ १७
यद्वै सूते धातुराद्यं निधानं
तद्वै विप्राः प्रवदन्तेऽनिरुद्धम् ।
यद्वै लोके वैदिकं कर्म साधु
आशीर्युक्तं तद्धि तस्योपभोज्यम् ॥ १८
देवाः सर्वे मुनयः साधु दान्ता-
स्तं प्राग्यज्ञैर्यज्ञभागं यजन्ते ।
अहं ब्रह्मा आद्य ईशः प्रजानां
तस्माज्जातस्त्वं च मत्तः प्रसूतः ।
मत्तो जगज्जङ्गमं स्थावरं च
सर्वे वेदाः सरहस्या हि पुत्र ॥ १९
चतुर्विभक्तः पुरुषः स क्रीडति यथेच्छति ।
एवं स एव भगवाञ्ज्ञानेन प्रतिबोधितः ॥ २०
एतत्ते कथितं पुत्र यथावदनुपृच्छतः ।
सांख्यज्ञाने तथा योगे यथावदनुवर्णितम् ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि
एकोनचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३३९ ॥

३४०

युधिष्ठिर उवाच ।

धर्माः पितामहेनोक्ता मोक्षधर्माश्रिताः शुभाः ।
धर्ममाश्रमिणां श्रेष्ठं वक्तुमर्हसि मे भवान् ॥ १

भीष्म उवाच ।

सर्वत्र विहितो धर्मः स्वर्ग्यः सत्यफलोदयः ।
बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया ॥ २
यस्मिन्यस्मिंस्तु विषये यो यो याति विनिश्चयम् ।
स तमेवाभिजानाति नान्यं भरतसत्तम ॥ ३
अपि च त्वं नरव्याघ्र श्रोतुमर्हसि मे कथाम् ।
पुरा शक्रस्य कथितां नारदेन सुरर्षिणा ॥ ४
सुरर्षिर्नारदो राजन्सिद्धस्त्रैलोक्यसंमतः ।
पर्येति क्रमशो लोकान्वायुरव्याहतो यथा ॥ ५
स कदाचिन्महेष्वास देवराजालयं गतः ।
सत्कृतश्च महेन्द्रेण प्रत्यासन्नगतोऽभवत् ॥ ६
तं कृतक्षणमासीनं पर्यपृच्छच्छचीपतिः ।
ब्रह्मर्षे किंचिदाश्चर्यमस्ति दृष्टं त्वयानघ ॥ ७
यथा त्वमपि विप्रर्षे त्रैलोक्यं सचराचरम् ।
जातकौतूहलो नित्यं सिद्धश्चरसि साक्षिवत् ॥ ८

न ह्यस्त्यविदितं लोके देवर्षे तव किंचन ।
श्रुतं वाप्यनुभूतं वा दृष्टं वा कथयस्व मे ॥ ९
तस्मै राजन्सुरेन्द्राय नारदो वदतां वरः ।
आसीनायोपपन्नाय प्रोक्तवान्विपुलां कथाम् ॥ १०
यथा येन च कल्पेन स तस्मै द्विजसत्तमः ।
कथां कथितवान्पृष्टस्तथा त्वमपि मे शृणु ॥ ११

इति श्रीमहाभारते शान्तिपर्वणि
चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४० ॥

३४१

भीष्म उवाच ।

आसीत्किल कुरुश्रेष्ठ महापद्मे पुरोत्तमे ।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः ॥ १
सौम्यः सोमान्वये वेदे गताध्वा छिन्नसंशयः ।
धर्मनित्यो जितक्रोधो नित्यतृप्तो जितेन्द्रियः ॥ २
अहिंसानिरतो नित्यं सत्यः सज्जनसंमतः ।
न्यायप्राप्तेन वित्तेन स्वेन शीलेन चान्वितः ॥ ३
ज्ञातिसंबन्धिविपुले मित्रापाश्रयसंमते ।
कुले महति विख्याते विशिष्टां वृत्तिमास्थितः ॥ ४
स पुत्रान्बहुलान्दृष्ट्वा विपुले कर्मणि स्थितः ।
कुलधर्माश्रितो राजन्धर्मचर्यापरोऽभवत् ॥ ५
ततः स धर्मं वेदोक्तं यथाशास्त्रोक्तमेव च ।
शिष्टाचीर्णं च धर्मं च त्रिविधं चिन्त्य चेतसा ॥ ६
किं नु मे स्याच्छुभं कृत्वा किं क्षमं किं परायणम् ।
इत्येवं खिद्यते नित्यं न च याति विनिश्चयम् ॥ ७
तस्यैवं खिद्यमानस्य धर्मं परममास्थितः ।
कदाचिदतिथिः प्राप्तो ब्राह्मणः सुसमाहितः ॥ ८
स तस्मै सत्क्रियां चक्रे क्रियायुक्तेन हेतुना ।
विश्रान्तं चैनमासीनमिदं वचनमब्रवीत् ॥ ९

इति श्रीमहाभारते शान्तिपर्वणि
एकचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४१ ॥

३४२

ब्राह्मण उवाच ।

समुत्पन्नाभिधानोऽस्मि वाङ्माधुर्येण तेऽनघ ।
मित्रतामभिपन्नस्त्वां किंचिद्वक्ष्यामि तच्छृणु ॥ १
गृहस्थधर्मं विप्रेन्द्र कृत्वा पुत्रगतं त्वहम् ।
धर्मं परमकं कुर्यां को हि मार्गो भवेद्द्विज ॥ २
अहमात्मानमात्मस्थमेक एवात्मनि स्थितः ।
कर्तुं काङ्क्षामि नेच्छामि बद्धः साधारणैर्गुणैः ॥ ३
यावदेवानतीतं मे वयः पुत्रफलाश्रितम् ।
तावदिच्छामि पाथेयमादातुं पारलौकिकम् ॥ ४
अस्मिन्हि लोकसंताने परं पारमभीप्सतः ।
उत्पन्ना मे मतिरियं कुतो धर्ममयः प्लवः ॥ ५
समुह्यमानानि निशम्य लोके
निर्यात्यमानानि च सात्त्विकानि ।
दृष्ट्वा च धर्मध्वजकेतुमालां
प्रकीर्यमाणामुपरि प्रजानाम् ॥ ६
न मे मनो रज्यति भोगकाले
दृष्ट्वा यतीन्प्रार्थयतः परत्र ।
तेनातिथे बुद्धिबलाश्रयेण
धर्मार्थतत्त्वे विनियुङ्क्ष्व मां त्वम् ॥ ७

भीष्म उवाच ।

सोऽतिथिर्वचनं तस्य श्रुत्वा धर्माभिलाषिणः ।
प्रोवाच वचनं श्लक्ष्णं प्राज्ञो मधुरया गिरा ॥ ८
अहमप्यत्र मुह्यामि ममाप्येष मनोरथः ।
न च संनिश्चयं यामि बहुद्वारे त्रिविष्टपे ॥ ९
केचिन्मोक्षं प्रशंसन्ति केचिद्यज्ञफलं द्विजाः ।
वानप्रस्थाश्रमं केचिद्गार्हस्थ्यं केचिदाश्रिताः ॥ १०
राजधर्माश्रयं केचित्केचिदात्मफलाश्रयम् ।
गुरुचर्याश्रयं केचित्केचिद्वाक्यं यमाश्रयम् ॥ ११

मातरं पितरं केचिच्छुश्रूषन्तो दिवं गताः ।
अहिंसया परे स्वर्गं सत्येन च तथा परे ॥ १२
आहवेऽभिमुखा केचिन्निहताः स्त्रिदिवं गताः ।
केचिदुञ्छव्रतैः सिद्धाः स्वर्गमार्गसमाश्रिताः ॥१३
केचिदध्ययने युक्ता वेदव्रतपराः शुभाः ।
बुद्धिमन्तो गताः स्वर्गं तुष्टात्मानो जितेन्द्रियाः ॥१४
आर्जवेनापरे युक्ता निहतानार्जवैर्जनैः ।
ऋजवो नाकपृष्ठे वै शुद्धात्मानः प्रतिष्ठिताः ॥ १५
एवं बहुविधैर्लोके धर्मद्वारैरनावृतैः ।
ममापि मतिराविग्ना मेघलेखेव वायुना ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
द्विचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४२ ॥

३४३

अतिथिरुवाच ।

उपदेशं तु ते विप्र करिष्येऽहं यथागमम् ।
गुरुणा मे यथाख्यातमर्थतस्तच्च मे शृणु ॥ १
यत्र पूर्वाभिसर्गेण धर्मचक्रं प्रवर्तितम् ।
नैमिषे गोमतीतीरे तत्र नागाह्वयं पुरम् ॥ २
समग्रैस्त्रिदशैस्तत्र इष्टमासीद्द्विजर्षभ ।
यत्रेन्द्रातिक्रमं चक्रे मान्धाता राजसत्तमः ॥ ३
कृताधिवासो धर्मात्मा तत्र चक्षुःश्रवा महान् ।
पद्मनाभो महाभागः पद्म इत्येव विश्रुतः ॥ ४
स वाचा कर्मणा चैव मनसा च द्विजर्षभ ।
प्रसादयति भूतानि त्रिविधे वर्त्मनि स्थितः ॥ ५
साम्ना दानेन भेदेन दण्डेनेति चतुर्विधम् ।
विषमस्थं जनं स्वं च चक्षुर्ध्यानेन रक्षति ॥ ६
तमभिक्रम्य विधिना प्रष्टुमर्हसि काङ्क्षितम् ।
स ते परमकं धर्मं नमिथ्या दर्शयिष्यति ॥ ७
स हि सर्वातिथिर्नागो बुद्धिशास्त्रविशारदः ।
गुणैरनवमैर्युक्तः समस्तैराभिकामिकैः ॥ ८
प्रकृत्या नित्यसलिलो नित्यमध्ययने रतः ।
तपोदमाभ्यां संयुक्तो वृत्तेनानवरेण च ॥ ९
यज्वा दानरुचिः क्षान्तो वृत्ते च परमे स्थितः ।
सत्यवागनसूयुश्च शीलवानभिसंश्रितः ॥ १०
शेषान्नभोक्ता वचनानुकूलो
हितार्जवोत्कृष्टकृताकृतज्ञः ।
अवैरकृद्भूतहिते नियुक्तो
गङ्गाह्रदाम्भोऽभिजनोपपन्नः ॥ ११

इति श्रीमहाभारते शान्तिपर्वणि
त्रिचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४३ ॥

३४४

ब्राह्मण उवाच ।

अतिभारोद्यतस्यैव भारापनयनं महत् ।
पराश्वासकरं वाक्यमिदं मे भवतः श्रुतम् ॥ १
अध्वक्लान्तस्य शयनं स्थानक्लान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधार्तस्य च भोजनम् ॥ २
ईप्सितस्येव संप्राप्तिरन्नस्य समयेऽतिथेः ।
एषितस्यात्मनः काले वृद्धस्येव सुतो यथा ॥ ३
मनसा चिन्तितस्येव प्रीतिस्निग्धस्य दर्शनम् ।
प्रह्लादयति मां वाक्यं भवता यदुदीरितम् ॥ ४
दत्तचक्षुरिवाकाशे पश्यामि विमृशामि च ।
प्रज्ञानवचनाद्योऽयमुपदेशो हि मे कृतः ।
बाढमेवं करिष्यामि यथा मां भाषते भवान् ॥ ५
इहेमां रजनीं साधो निवसस्व मया सह ।
प्रभाते यास्यति भवान्पर्याश्वस्तः सुखोषितः ।
असौ हि भगवान्सूर्यो मन्दरश्मिरवाङ्मुखः ॥ ६

भीष्म उवाच ।

ततस्तेन कृतातिथ्यः सोऽतिथिः शत्रुसूदन ।

उवास किल तां रात्रिं सह तेन द्विजेन वै ॥ ७
तत्तच्च धर्मसंयुक्तं तयोः कथयतोस्तदा ।
व्यतीता सा निशा कृत्स्ना सुखेन दिवसोपमा ॥८
ततः प्रभातसमये सोऽतिथिस्तेन पूजितः ।
ब्राह्मणेन यथाशक्त्या स्वकार्यमभिकाङ्क्षता ॥ ९
ततः स विप्रः कृतधर्मनिश्चयः
कृताभ्यनुज्ञः स्वजनेन धर्मवित् ।
यथोपदिष्टं भुजगेन्द्रसंश्रयं
जगाम काले सुकृतैकनिश्चयः ॥ १०

इति श्रीमहाभारते शान्तिपर्वणि
चतुश्चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४४ ॥

३४५

भीष्म उवाच ।

स वनानि विचित्राणि तीर्थानि च सरांसि च ।
अभिगच्छन्क्रमेण स्म कंचिन्मुनिमुपस्थितः ॥ १
तं स तेन यथोद्दिष्टं नागं विप्रेण ब्राह्मणः ।
पर्यपृच्छद्यथान्यायं श्रुत्वैव च जगाम सः ॥ २
सोऽभिगम्य यथाख्यातं नागायतनमर्थवित् ।
प्रोक्तवानहमस्मीति भोःशब्दालंकृतं वचः ॥ ३
ततस्तस्य वचः श्रुत्वा रूपिणी धर्मवत्सला ।
दर्शयामास तं विप्रं नागपत्नी पतिव्रता ॥ ४
सा तस्मै विधिवत्पूजां चक्रे धर्मपरायणा ।
स्वागतेनागतं कृत्वा किं करोमीति चाब्रवीत् ॥ ५

ब्राह्मण उवाच ।

विश्रान्तोऽभ्यर्चितश्चास्मि भवत्या श्लक्ष्णया गिरा ।
द्रष्टुमिच्छामि भवति तं देवं नागमुत्तमम् ॥ ६
एतद्धि परमं कार्यमेतन्मे फलमीप्सितम् ।
अनेनार्थेन चास्म्यद्य संप्राप्तः पन्नगालयम् ॥ ७

नागभार्योवाच ।

आर्य सूर्यरथं वोढुं गतोऽसौ मासचारिकः ।
सप्ताष्टभिर्दिनैर्विप्र दर्शयिष्यत्यसंशयम् ॥ ८
एतद्विदितमार्यस्य विवासकरणं मम ।
भर्तुर्भवतु किं चान्यत्क्रियतां तद्वदस्व मे ॥ ९

ब्राह्मण उवाच ।

अनेन निश्चयेनाहं साध्वि संप्राप्तवानिह ।
प्रतीक्षन्नागमं देवि वत्स्याम्यस्मिन्महावने ॥ १०
संप्राप्तस्यैव चाव्यग्रमावेद्योऽहमिहागतः ।
ममाभिगमनं प्राप्तो वाच्यश्च वचनं त्वया ॥ ११
अहमप्यत्र वत्स्यामि गोमत्याः पुलिने शुभे ।
कालं परिमिताहारो यथोक्तं परिपालयन् ॥ १२

भीष्म उवाच ।

ततः स विप्रस्तां नागीं समाधाय पुनः पुनः ।
तदेव पुलिनं नद्याः प्रययौ ब्राह्मणर्षभः ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४५ ॥

३४६

भीष्म उवाच ।

अथ तेन नरश्रेष्ठ ब्राह्मणेन तपस्विना ।
निराहारेण वसता दुःखितास्ते भुजंगमाः ॥ १
सर्वे संभूय सहितास्तस्य नागस्य बान्धवाः ।
भ्रातरस्तनया भार्या ययुस्तं ब्राह्मणं प्रति ॥ २
तेऽपश्यन्पुलिने तं वै विविक्ते नियतव्रतम् ।
समासीनं निराहारं द्विजं जप्यपरायणम् ॥ ३
ते सर्वे समभिक्रम्य विप्रमभ्यर्च्य चासकृत् ।
ऊचुर्वाक्यमसंदिग्धमातिथेयस्य बान्धवाः ॥ ४
षष्ठो हि दिवसस्तेऽद्य प्राप्तस्येह तपोधन ।
न चाभिलषसे किंचिदाहारं धर्मवत्सल ॥ ५

अस्मानभिगतश्चासि वयं च त्वामुपस्थिताः ।
कार्यं चातिथ्यमस्माभिर्वयं सर्वे कुटुम्बिनः ॥ ६
मूलं फलं वा पर्णं वा पयो वा द्विजसत्तम ।
आहारहेतोरन्नं वा भोक्तुमर्हसि ब्राह्मण ॥ ७
त्यक्ताहारेण भवता वने निवसता सता ।
बालवृद्धमिदं सर्वं पीड्यते धर्मसंकटात् ॥ ८
न हि नो भ्रूणहा कश्चिद्राजापथ्योऽनृतोऽपि वा ।
पूर्वाशी वा कुले ह्यस्मिन्देवतातिथिबन्धुषु ॥ ९

ब्राह्मण उवाच ।

उपदेशेन युष्माकमाहारोऽयं मया वृतः ।
द्विरूनं दशरात्रं वै नागस्यागमनं प्रति ॥ १०
यद्यष्टरात्रे निर्याते नागमिष्यति पन्नगः ।
तदाहारं करिष्यामि तन्निमित्तमिदं व्रतम् ॥ ११
कर्तव्यो न च संतापो गम्यतां च यथागतम् ।
तन्निमित्तं व्रतं मह्यं नैतद्भेत्तुमिहार्हथ ॥ १२

भीष्म उवाच ।

तेन ते समनुज्ञाता ब्राह्मणेन भुजंगमाः ।
स्वमेव भवनं जग्मुरकृतार्था नरर्षभ ॥ १३

इति श्रीमहाभारते शान्तिपर्वणि
षट्चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४६ ॥

३४७

भीष्म उवाच ।

अथ काले बहुतिथे पूर्णे प्राप्तो भुजंगमः ।
दत्ताभ्यनुज्ञः स्वं वेश्म कृतकर्मा विवस्वतः ॥ १
तं भार्या समभिक्रामत्पादशौचादिभिर्गुणैः ।
उपपन्नां च तां साध्वीं पन्नगः पर्यपृच्छत ॥ २
अपि त्वमसि कल्याणि देवतातिथिपूजने ।
पूर्वमुक्तेन विधिना युक्ता युक्तेन मत्समम् ॥ ३
न खल्वस्यकृतार्थेन स्त्रीबुद्ध्या मार्दवीकृता ।
मद्वियोगेन सुश्रोणि वियुक्ता धर्मसेतुना ॥ ४

नागभार्योवाच ।

शिष्याणां गुरुशुश्रूषा विप्राणां वेदपारणम् ।
भृत्यानां स्वामिवचनं राज्ञां लोकानुपालनम् ॥ ५
सर्वभूतपरित्राणं क्षत्रधर्म इहोच्यते ।
वैश्यानां यज्ञसंवृत्तिरातिथेयसमन्विता ॥ ६
विप्रक्षत्रियवैश्यानां शुश्रूषा शूद्रकर्म तत् ।
गृहस्थधर्मो नागेन्द्र सर्वभूतहितैषिता ॥ ७
नियताहारता नित्यं व्रतचर्या यथाक्रमम् ।
धर्मो हि धर्मसंबन्धादिन्द्रियाणां विशेषणम् ॥ ८
अहं कस्य कुतो वाहं कः को मे इह भवेदिति ।
प्रयोजनमतिर्नित्यमेवं मोक्षाश्रमी भवेत् ॥ ९
पतिव्रतात्वं भार्यायाः परमो धर्म उच्यते ।
तवोपदेशान्नागेन्द्र तच्च तत्त्वेन वेद्मि वै ॥ १०
साहं धर्मं विजानन्ती धर्मनित्ये त्वयि स्थिते ।
सत्पथं कथमुत्सृज्य यास्यामि विषमे पथि ॥ ११
देवतानां महाभाग धर्मचर्या न हीयते ।
अतिथीनां च सत्कारे नित्ययुक्तास्म्यतन्द्रिता ॥ १२
सप्ताष्टदिवसास्त्वद्य विप्रस्येहागतस्य वै ।
स च कार्यं न मे ख्याति दर्शनं तव काङ्क्षति ॥ १३
गोमत्यास्त्वेष पुलिने त्वद्दर्शनसमुत्सुकः ।
आसीनोऽऽवर्तयन्ब्रह्म ब्राह्मणः संशितव्रतः ॥ १४
अहं त्वनेन नागेन्द्र सामपूर्वं समाहिता ।
प्रस्थाप्यो मत्सकाशं स संप्राप्तो भुजगोत्तमः ॥ १५
एतच्छ्रुत्वा महाप्राज्ञ तत्र गन्तुं त्वमर्हसि ।
दातुमर्हसि वा तस्य दर्शनं दर्शनश्रवः ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
सप्तचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४७ ॥

३४८

नाग उवाच ।

अथ ब्राह्मणरूपेण कं तं समनुपश्यसि ।
मानुषं केवलं विप्रं देवं वाथ शुचिस्मिते ॥ १
को हि मां मानुषः शक्तो द्रष्टुकामो यशस्विनि ।
संदर्शनरुचिर्वाक्यमाज्ञापूर्वं वदिष्यति ॥ २
सुरासुरगणानां च देवर्षीणां च भामिनि ।
ननु नागा महावीर्याः सौरसेयास्तरस्विनः ॥ ३
वन्दनीयाश्च वरदा वयमप्यनुयायिनः ।
मनुष्याणां विशेषेण धनाध्यक्षा इति श्रुतिः ॥ ४

नागभार्योवाच ।

आर्जवेनाभिजानामि नासौ देवोऽनिलाशन ।
एकं त्वस्य विजानामि भक्तिमानतिरोषणः ॥ ५
स हि कार्यान्तराकाङ्क्षी जलेप्सुः स्तोकको यथा ।
वर्षं वर्षप्रियः पक्षी दर्शनं तव काङ्क्षति ॥ ६
न हि त्वा दैवतं किंचिद्विविघ्नं प्रतिपालयेत् ।
तुल्ये ह्यभिजने जातो न कश्चित्पर्युपासते ॥ ७
तद्रोषं सहजं त्यक्त्वा त्वमेनं द्रष्टुमर्हसि ।
आशाछेदेन तस्याद्य नात्मानं दग्धुमर्हसि ॥ ८
आशया त्वभिपन्नानामकृत्वाश्रुप्रमार्जनम् ।
राजा वा राजपुत्रो वा भ्रूणहत्यैव युज्यते ॥ ९
मौनाज्ज्ञानफलावाप्तिर्दानेन च यशो महत् ।
वाग्मित्वं सत्यवाक्येन परत्र च महीयते ॥ १०
भूमिप्रदानेन गतिं लभत्याश्रमसंमिताम् ।
नष्टस्यार्थस्य संप्राप्तिं कृत्वा फलमुपाश्नुते ॥ ११
अभिप्रेतामसंक्लिष्टां कृत्वाकामवतीं क्रियाम् ।
न याति निरयं कश्चिदिति धर्मविदो विदुः ॥१२

नाग उवाच ।

अभिमानेन मानो मे जातिदोषेण वै महान् ।
रोषः संकल्पजः साध्वि दग्धो वाचाग्निना त्वया ॥
न च रोषादहं साध्वि पश्येयमधिकं तमः ।
यस्य वक्तव्यतां यान्ति विशेषेण भुजंगमाः ॥ १४
दोषस्य हि वशं गत्वा दशग्रीवः प्रतापवान् ।
तथा शक्रप्रतिस्पर्धी हतो रामेण संयुगे ॥ १५
अन्तःपुरगतं वत्सं श्रुत्वा रामेण निर्हृतम् ।
धर्षणाद्रोषसंविग्नाः कार्तवीर्यसुता हताः ॥ १६
जामदग्न्येन रामेण सहस्रनयनोपमः ।
संयुगे निहतो रोषात्कार्तवीर्यो महाबलः ॥ १७
तदेष तपसां शत्रुः श्रेयसश्च निपातनः ।
निगृहीतो मया रोषः श्रुत्वैव वचनं तव ॥ १८
आत्मानं च विशेषेण प्रशंसाम्यनपायिनि ।
यस्य मे त्वं विशालाक्षि भार्या सर्वगुणान्विता ॥
एष तत्रैव गच्छामि यत्र तिष्ठत्यसौ द्विजः ।
सर्वथा चोक्तवान्वाक्यं नाकृतार्थः प्रयास्यति ॥२०

इति श्रीमहाभारते शान्तिपर्वणि
अष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४८ ॥

३४९

भीष्म उवाच ।

स पन्नगपतिस्तत्र प्रययौ ब्राह्मणं प्रति ।
तमेव मनसा ध्यायन्कार्यवत्तां विचारयन् ॥ १
तमभिक्रम्य नागेन्द्रो मतिमान्स नरेश्वर ।
प्रोवाच मधुरं वाक्यं प्रकृत्या धर्मवत्सलः ॥ २
भो भो क्षाम्याभिभाषे त्वां न रोषं कर्तुमर्हसि ।
इह त्वमभिसंप्राप्तः कस्यार्थे किं प्रयोजनम् ॥ ३
आभिमुख्यादभिक्रम्य स्नेहात्पृच्छामि ते द्विज ।
विविक्ते गोमतीतीरे किं वा त्वं पर्युपाससे ॥ ४

ब्राह्मण उवाच ।

धर्मारण्यं हि मां विद्धि नागं द्रष्टुमिहागतम् ।

पद्मनाभं द्विजश्रेष्ठ तत्र मे कार्यमाहितम् ॥ ५
तस्य चाहमसांनिध्यं श्रुतवानस्मि तं गतम् ।
स्वजनं तं प्रतीक्षामि पर्जन्यमिव कर्षकः ॥ ६
तस्य चाक्लेशकरणं स्वस्तिकारसमाहितम् ।
वर्तयाम्ययुतं ब्रह्म योगयुक्तो निरामयः ॥ ७

नाग उवाच ।

अहो कल्याणवृत्तस्त्वं साधु सज्जनवत्सलः ।
अवाच्यस्त्वं महाभाग परं स्नेहेन पश्यसि ॥ ८
अहं स नागो विप्रर्षे यथा मां विन्दते भवान् ।
आज्ञापय यथा स्वैरं किं करोमि प्रियं तव ॥ ९
भवन्तं स्वजनादस्मि संप्राप्तं श्रुतवानिह ।
अतस्त्वां स्वयमेवाहं द्रष्टुमभ्यागतो द्विज ॥ १०
संप्राप्तश्च भवानद्य कृतार्थः प्रतियास्यति ।
विस्रब्धो मां द्विजश्रेष्ठ विषये योक्तुमर्हसि ॥ ११
वयं हि भवता सर्वे गुणक्रीता विशेषतः ।
यस्त्वमात्महितं त्यक्त्वा मामेवेहानुरुध्यसे ॥ १२

ब्राह्मण उवाच ।

आगतोऽहं महाभाग तव दर्शनलालसः ।
कंचिदर्थमनर्थज्ञः प्रष्टुकामो भुजंगम ॥ १३
अहमात्मानमात्मस्थो मार्गमाणोऽऽत्मनो हितम् ।
वासार्थिनं महाप्राज्ञ बलवन्तमुपास्मि ह ॥ १४
प्रकाशितस्त्वं स्वगुणैर्यशोगर्भगभस्तिभिः ।
शशाङ्ककरसंस्पर्शैर्हृद्यैरात्मप्रकाशितैः ॥ १५
तस्य मे प्रश्नमुत्पन्नं छिन्धि त्वमनिलाशन ।
पश्चात्कार्यं वदिष्यामि श्रोतुमर्हति मे भवान् ॥ १६

इति श्रीमहाभारते शान्तिपर्वणि
एकोनपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३४९ ॥

३५०

ब्राह्मण उवाच ।

विवस्वतो गच्छति पर्ययेण
वोढुं भवांस्तं रथमेकचक्रम् ।
आश्चर्यभूतं यदि तत्र किंचि-
द्दृष्टं त्वया शंसितुमर्हसि त्वम् ॥ १

नाग उवाच ।

यस्य रश्मिसहस्रेषु शाखास्विव विहंगमाः ।
वसन्त्याश्रित्य मुनयः संसिद्धा दैवतैः सह ॥ २
यतो वायुर्विनिःसृत्य सूर्यरश्म्याश्रितो महान् ।
विजृम्भत्यम्बरे विप्र किमाश्चर्यतरं ततः ॥ ३
शुक्रो नामासितः पादो यस्य वारिधरोऽम्बरे ।
तोयं सृजति वर्षासु किमाश्चर्यमतः परम् ॥ ४
योऽष्टमासांस्तु शुचिना किरणेनोज्झितं पयः ।
पर्यादत्ते पुनः काले किमाश्चर्यमतः परम् ॥ ५
यस्य तेजोविशेषेषु नित्यमात्मा प्रतिष्ठितः ।
यतो बीजं मही चेयं धार्यते सचराचरम् ॥ ६
यत्र देवो महाबाहुः शाश्वतः परमोऽक्षरः ।
अनादिनिधनो विप्र किमाश्चर्यमतः परम् ॥ ७
आश्चर्याणामिवाश्चर्यमिदमेकं तु मे शृणु ।
विमले यन्मया दृष्टमम्बरे सूर्यसंश्रयात् ॥ ८
पुरा मध्याह्नसमये लोकांस्तपति भास्करे ।
प्रत्यादित्यप्रतीकाशः सर्वतः प्रत्यदृश्यत ॥ ९
स लोकांस्तेजसा सर्वान्स्वभासा निर्विभासयन् ।
आदित्याभिमुखोऽभ्येति गगनं पाटयन्निव ॥ १०
हुताहुतिरिव ज्योतिर्व्याप्य तेजोमरीचिभिः ।
अनिर्देश्येन रूपेण द्वितीय इव भास्करः ॥ ११
तस्याभिगमनप्राप्तौ हस्तो दत्तो विवस्वता ।
तेनापि दक्षिणो हस्तो दत्तः प्रत्यर्चनार्थिना ॥ १२

ततो भित्त्वैव गगनं प्रविष्टो रविमण्डलम् ।
एकीभूतं च तत्तेजः क्षणेनादित्यतां गतम् ॥ १३
तत्र नः संशयो जातस्तयोस्तेजःसमागमे ।
अनयोः को भवेत्सूर्यो रथस्थो योऽयमागतः ॥ १४
ते वयं जातसंदेहाः पर्यपृच्छामहे रविम् ।
क एष दिवमाक्रम्य गतः सूर्य इवापरः ॥ १५

इति श्रीमहाभारते शान्तिपर्वणि
पञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५० ॥

३५१

सूर्य उवाच ।

नैष देवोऽनिलसखो नासुरो न च पन्नगः ।
उञ्छवृत्तिव्रते सिद्धो मुनिरेष दिवं गतः ॥ १
एष मूलफलाहारः शीर्णपर्णाशनस्तथा ।
अब्भक्षो वायुभक्षश्च आसीद्विप्रः समाहितः ॥ २
ऋचश्चानेन विप्रेण संहितान्तरभिष्टुताः ।
स्वर्गद्वारकृतोद्योगो येनासौ त्रिदिवं गतः ॥ ३
असन्नधीरनाकाङ्क्षी नित्यमुञ्छशिलाशनः ।
सर्वभूतहिते युक्त एष विप्रो भुजंगम ॥ ४
न हि देवा न गन्धर्वा नासुरा न च पन्नगाः ।
प्रभवन्तीह भूतानां प्राप्तानां परमां गतिम् ॥ ५

नाग उवाच ।

एतदेवंविधं दृष्टमाश्चर्यं तत्र मे द्विज ।
संसिद्धो मानुषः कायो योऽसौ सिद्धगतिं गतः ।
सूर्येण सहितो ब्रह्मन्पृथिवीं परिवर्तते ॥ ६

इति श्रीमहाभारते शान्तिपर्वणि
एकपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५१ ॥

३५२

ब्राह्मण उवाच ।

आश्चर्यं नात्र संदेहः सुप्रीतोऽस्मि भुजंगम ।
अन्वर्थोपगतैर्वाक्यैः पन्थानं चास्मि दर्शितः ॥ १
स्वस्ति तेऽस्तु गमिष्यामि साधो भुजगसत्तम ।
स्मरणीयोऽस्मि भवता संप्रेषणनियोजनैः ॥ २

नाग उवाच ।

अनुक्त्वा मद्गतं कार्यं क्वेदानीं प्रस्थितो भवान् ।
उच्यतां द्विज यत्कार्यं यदर्थं त्वमिहागतः ॥ ३
उक्तानुक्ते कृते कार्ये मामामन्त्र्य द्विजर्षभ ।
मया प्रत्यभ्यनुज्ञातस्ततो यास्यसि ब्राह्मण ॥ ४
न हि मां केवलं दृष्ट्वा त्यक्त्वा प्रणयवानिह ।
गन्तुमर्हसि विप्रर्षे वृक्षमूलगतो यथा ॥ ५
त्वयि चाहं द्विजश्रेष्ठ भवान्मयि न संशयः ।
लोकोऽयं भवतः सर्वः का चिन्ता मयि तेऽनघ ॥

ब्राह्मण उवाच ।

एवमेतन्महाप्राज्ञ विज्ञातार्थ भुजंगम ।
नातिरिक्तास्त्वया देवाः सर्वथैव यथातथम् ॥ ७
य एवाहं स एव त्वमेवमेतद्भुजंगम ।
अहं भवांश्च भूतानि सर्वे सर्वत्रगाः सदा ॥ ८
आसीत्तु मे भोगपते संशयः पुण्यसंचये ।
सोऽहमुञ्छव्रतं साधो चरिष्याम्यर्थदर्शनम् ॥ ९
एष मे निश्चयः साधो कृतः कारणवत्तरः ।
आमन्त्रयामि भद्रं ते कृतार्थोऽस्मि भुजंगम ॥ १०

इति श्रीमहाभारते शान्तिपर्वणि
द्विपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५२ ॥

३५३

भीष्म उवाच ।

स चामन्त्र्योरगश्रेष्ठं ब्राह्मणः कृतनिश्चयः ।
दीक्षाकाङ्क्षी तदा राजंश्च्यवनं भार्गवं श्रितः ॥ १
स तेन कृतसंस्कारो धर्ममेवोपतस्थिवान् ।
तथैव च कथामेतां राजन्कथितवांस्तदा ॥ २
भार्गवेणापि राजेन्द्र जनकस्य निवेशने ।

कथैषा कथिता पुण्या नारदाय महात्मने ॥ ३
नारदेनापि राजेन्द्र देवेन्द्रस्य निवेशने ।
कथिता भरतश्रेष्ठ पृष्टेनाक्लिष्टकर्मणा ॥ ४
देवराजेन च पुरा कथैषा कथिता शुभा ।
समस्तेभ्यः प्रशस्तेभ्यो वसुभ्यो वसुधाधिप ॥ ५
यदा च मम रामेण युद्धमासीत्सुदारुणम् ।
वसुभिश्च तदा राजन्कथेयं कथिता मम ॥ ६
पृच्छमानाय तत्त्वेन मया तुभ्यं विशां पते ।
कथेयं कथिता पुण्या धर्म्या धर्मभृतां वर ॥ ७
तदेष परमो धर्मो यन्मां पृच्छसि भारत ।
असन्नधीरनाकाङ्क्षी धर्मार्थकरणे नृप ॥ ८
स च किल कृतनिश्चयो द्विजाग्र्यो
भुजगपतिप्रतिदेशितार्थकृत्यः ।
यमनियमसमाहितो वनान्तं
परिगणितोञ्छशिलाशनः प्रविष्टः ॥ ९

इति श्रीमहाभारते शान्तिपर्वणि
त्रिपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५३ ॥
॥ समाप्तं मोक्षधर्मपर्व ॥

॥ समाप्तं शान्तिपर्व ॥